Almira 2
Shelf 3
32

४०५८

मनोरमा २।०५२८७

श्री ५ को सरकार
संस्कृत पुस्तकालय

मनोरमा

स॰ श॰ १

श्रीगणेशायनमः॥श्रीमद्दाशरथिंप्रणौमि॥शेषविभूषणमीडे शेषाशेषार्थलाभाय।दातुंसकलमभीष्टंफलमीष्टेयत्कृपादृष्टिः॥१॥ध्यायमिति।ध्यात्वाध्यात्वेत्यर्थः।णमुलन्तमेतत्।परं सर्वजगदुपादानम्।कार्यब्रह्महिरण्यगर्भव्यावृत्तयइदम्।ध्यानंचिन्तापरपर्यायंस्मृत्यनुकूलव्यापाररूपं।स्मरणंतुतज्जन्यमितिविशेषः।गुरोरित्येकवचनेनसर्वविद्यालाभएकस्मादेवगुरोरितिसूचितम्।प्रौढानांमनोरमयतीत्यर्थिकांमनोरमांप्रौढत्वंचसकलदर्शनार्थज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वम्।इण्ग्रहणेष्विति।नन्विदंन्यूनमम् ग्रहणेपिग्रहणात्।फलंतुबढ्प्रम्।क्हित्वाहेत्यादौप्रसःस्वप्यमितिरुत्वम्।गवित्यस्यमाहेत्यादिवद्पदान्तत्वात्ककारादेर्नेङ्भमिति

श्रीः॥ध्यायंध्यायंपरंब्रह्मस्मारंस्मारंगुरोर्गिरः।सिद्धान्तकौमुदीव्याख्यांकुर्मःप्रौढमनोरमाम्॥१॥हयवरट्।हकारोपदेशःअट्अश्हश्इण्ग्रहणेषुहकारग्रहणार्थः।अर्हेण।अड्व्यवायेपि।इति णत्वम्।देवाहसन्ति।भोभगोइतिरोर्यत्वम्।देवोहसति।हशिचेत्युत्वम्।लिलिहिढ्वे।लिलिहिध्वे।विभाषेटइतिवाढः।हल्।इदंसूत्रंवल्रल्झल्शल्षुहकारग्रहणार्थम्।रुदिहिस्वपिहि।रुदादिभ्यःसार्वधातुकइतिवलादिलक्षणइट्।स्निहित्वा।रलोव्युपधादितिवाकित्वम्।अदाग्धाम्।झलोझलीतिसकारलोपः।अलिक्षत्।शलइगुपधादितिक्सः॥ स्नेहित्वा

चेन्न।सुट्तिथोरित्यादाविकाराद्युच्चारणेनशास्त्राबोधिताजव्यवहितहल्समुदायस्यासाधुत्वबोधनात्।अतएवोच्चैरुदात्तइतिसूत्रेभाष्यम्।नपुनरन्तरेणाचंव्यञ्जनस्योच्चारणमपिभवतीति।स्कोरित्यादिस्तुसौत्रःप्रयोगः।अतएवाटिहकारप्रयोजनकथनावसरेभाष्येशश्छोटीत्युपन्यस्यतदुदाहरणंनोपन्यस्तम्।हकारपरशकारासम्भवेनशश्छोटीतिप्रसङ्गोच्चारितमितिचकैयटेनव्याख्यातम्।अमिहकारप्रयोजनमितिचभाष्येनोक्तमितिदिक्।इदंसूत्रमिति।वलादिप्रत्याहाराश्चरेफेणैवसन्तु।हरन्त्यमित्यत्रान्योन्याश्रयपरिहारस्तुरन्त्यंहरितिन्यासेनावृत्त्याहर्प्रत्याहारबोधकसूत्रसमुदायान्त्यमित्यर्थेनवासुकरइतिभावः।ग्रहणार्थमिति।शषसहरित्येवतुनोक्तम्।खरिहकारग्रहणापत्तेः।हरिर्हरतीत्यादौविसर्गापत्तेः॥

रा॰म॰ १

सप्तमीति।आधिकरणकारकस्यकर्त्राद्यन्वयद्वाराक्रियान्वयादस्तिसामर्थ्यमितिभावः।अस्ययोगविभागस्यभाष्येऽदर्शनादाह।सुप्सुपेतीति।अनेनापिसाधनस्यागतिकत्वादाह।यद्वेति।हलोहलितिसूत्रस्यान्त्यमितिविग्रहइतिभावः।षष्ठीस्थानइत्यस्यचोदुपधायागोहइत्यादाविवगुणानांचपरार्थत्वादितिन्यायेनवाप्रवृत्तिरितिबोध्यम्।तन्त्रावृत्त्येकशेषान्यतममस्त्विति।यद्यपीदृशेविषयेउच्चारयितुस्तन्त्रैकशेषान्यतरेणोच्चारणंबोद्धुस्त्वावृत्त्याबोधइत्येवानुभवसिद्धंतथापिव्यवस्थितैवान्यतमसत्तानेनबोध्यतइतिनदोषः।एकशेषस्यप्रत्याख्यातोऽसहविवक्षायामपिशास्त्रमात्रप्रक्रियोपयोगीत्याशयेनपृथगुक्तः।सामीप्यंषष्ठ्यर्थइति।षष्ठीस्थानइत्यस्यगुणानाञ्चपरार्थत्वादितिन्यायेनाप्रवृत्तिः।नन्वेकोगुणवृद्धीइतिसूत्रेतच्छेषशब्देनपरिभाषयोरपिगुणगुणिभावउक्तइतिवाच्यम्।सार्वधातुकार्धधातुकयो

हलन्त्यम्।सूत्रेन्त्यमिति।हलिअन्त्यमितिविग्रहेसप्तमीतियोगविभागात्सुप्सुपेतिवासमासइतिभावः।यद्वा।षष्ठीतत्पुरुषोऽयम्।स्यादेतत्।हलीत्येकदेशस्यैवतन्त्रावृत्त्येकशेषान्यतममस्तु । हस्यलइतिचव्याख्यास्यते।सामीप्यंषष्ठ्यर्थः।यद्वामास्तुतन्त्रादि।अस्तुसमाहारद्वन्द्वोहल्चल्चेति।लकारस्यसंयोगान्तलोपइतिचेन्नैवम्।आद्येसमासस्यक्लिष्टत्वात्।नहिब्राह्मणस्यकम्बलइत्यादौब्राह्मणसमीपवर्त्तीअन्यदीयःकम्बलःप्रतीयते॥

रलोन्त्यस्यकोगुणवृद्धीतिसूत्रत्रयस्यलक्ष्यसंस्कारकमहावाक्येविशेष्यविशेषणभावमादायैवतच्छेषव्यवहारोनतुगुणगुणिभावेनपरस्परापेक्षत्वेनवेतिकेचिन्नस्पष्टमुक्तेरेतन्मूलकतयैवतत्सत्त्वासंभवस्यतेनोक्तेश्चेतिभावः।क्लिष्टत्वादिति।ब्राह्मणस्यकम्बलइत्यादावसत्यपिप्रकरणादौस्वस्वामिभावादिप्रतीतिवदनन्तरसमीपादिशब्दप्रयोगमन्तरेणसामीप्याद्यप्रतीतेः तस्यषष्ठ्यर्थत्वाभावात्तत्प्रयोगेत्वसामर्थ्यात्षष्ठीसमासाप्राप्तिरिति।मध्यमपदलोपिसमासेसौत्रेवातत्रसमासस्यक्लिष्टत्वमितिभाव स्देतदाह।नहीत्यादिनातन्त्रानिष्टइत्यन्तेन ॥

चित्रगवीणामिति। कुमतिचेतिणत्वमादन्त्यपाठस्तुलेखकप्रमादात्। एवंस्त्रीगवीणामित्येकशेषप्रकरणान्तस्थकैयटप्रयोगोऽपिबोध्यम्। अस्तेरनन्तरेसमीपेवेत्यादि
भाष्येत्वनन्तरादिपदाध्याहारेणतन्निरूपितसंबन्धार्थिकास्थानपदाध्याहारेणतन्निरूपितसंबन्धार्थिकावाषष्ठीत्यभिप्रायकम्। अतएवसमतुसूत्रेकैयटेनगावोऽस्य
सन्त्यनन्तराइत्यर्थेनतुपूर्वाङ्गापरभाष्यव्याख्यावसरेआनन्तर्यमस्त्यर्थवत्स्वकृत्यर्थोपाधिरित्युक्तम्। नतुतस्यषष्ठ्यर्थत्वेनप्रत्ययार्थत्वमुक्तम्। भाष्यकृताचासामर्थ्यान्न
नवृत्त्यभावउक्तः। षष्ठ्यर्थत्वेतुप्रत्ययार्थत्वात्कासामर्थ्यम्। तस्माद्यत्रषष्ठ्यन्तमात्रप्रयोगेआनन्तर्यादिप्रतीतिस्तत्रानन्तरादिपदाध्याहारएवबोध्यः। तत्रास्तिग्रहणाभावेन
सान्यफलकत्वेवासूत्रानुपात्तास्त्यर्थान्तर्भावेणमत्वर्थीयवद्बहुव्रीहिवच्चतथाभूतानन्तर्याद्यर्थान्तर्भावेणचित्रागावोऽस्यसत्यनन्तराइत्याद्यर्थेबहुव्रीहिमत्वर्थीयौनभ
नवाचित्रगुशब्दाच्चित्रगवीणांसमीपवर्तीरक्षादिःप्रतीयते। अतएवानन्तरादिषुनसमासोऽनभिधानादितिस्पष्टमा
करे। किंबहुनाब्राह्मणस्यकम्बलश्चित्रागावोऽस्येतिव्यस्तप्रयोगोऽपितत्रानिष्टः। द्वितीयेऽपिसंयोगान्तलोपोदुर्लभो यणःप्रतिषेधा
रम्भात्। तत्प्रत्याख्यानपक्षेऽपिझलोझलीत्यतोझल्ग्रहणमपकृष्यसंयोगान्तस्यझलोलोपविधानाच्च ॥
वतोऽनभिधानादितिमतुसूत्रेभाष्येस्पष्टम्। अनन्तरादेरिदमर्थत्वेतस्येदमितिशैषिकोऽप्यनभिधानान्नेतितस्येदमित्यत्रभाष्ये। तदुक्तमनन्तरादिषुनसमासोऽनभिधा
नादितिस्पष्टमाकरइति। तत्रसमासग्रहणंतद्धितवृत्तेरप्युपलक्षणम्। अनन्तरादिशब्दैःषष्ठीतत्पुरुषादिस्तुभवत्येव। ग्रामकूपोगङ्गातीरमित्यादौसमीपएवाव
रोपेणसमासः। स्पष्टाचेयंरीतिर्मपर्यन्तस्येतिसूत्रेकैयटे। किंचहस्यलित्यर्थेहल्विलेखनइतिधातोर्लस्येत्वापत्तिः। नचफलाभावोदेवदत्तहलिसादौडित्व
भस्यापिटेर्लोपवल्लित्वसामर्थ्यात्तस्ययासूर्वत्वाभावेऽपिलित्स्वरस्यैवफलत्वंवक्तुंशक्यमित्यपिबोध्यम्। यद्यपिहलसीरादितिनिर्देशेनतस्यनेत्वमितिक
थापिज्ञापकस्वीकारापेक्षयासूत्राकृतिरेवलघीयसीतिदिक्। झलोलोपेति। सौत्रलोपाश्रयणेतुमूलोक्तमेवलघु ॥

असंभवादिति। नचाद्यन्तौटकितावित्यादौयथासंख्यमन्वयेऽपिप्रथमतः साहित्यावच्छिन्नेसाहित्यावच्छिन्नान्वयमात्रेणसहविवक्षामाश्रित्ययथाद्वन्द्वसाधुत्वंतथेहापि प्रथमतोलकारोहल्पदवाच्यश्चेदितिसामान्यतोबोधंकल्पितमादायद्वन्द्वसाधुत्वं,ततोविशेषजिज्ञासायामादिरन्त्येनेत्येकवाक्यतयाविशेषतोवाक्यार्थोलक्ष्यसंस्कारकः। किंचसहविवक्षासहैववक्तुंवक्तुरिच्छा,साचसूत्रप्रणयनानुपपत्त्यापाणिनेस्ततःपूर्वमपिहल्पदार्थज्ञानादक्षतैव,बोध्यबोधस्तुक्रमेणैवेतिवाच्यम्। आद्यन्तावित्यादौयथासंख्यसूत्रारम्भसामर्थ्येनतत्साधुत्वाङ्गीकारेप्यन्यप्रकारेणतस्यधुंसोत्वकल्पनेमानाभावात्। किंचश्रोतॄणांसहबोधोभवत्वितीच्छयासहैववक्तुमिच्छायाएवसहविवक्षात्वेनश्रोतॄणामपिसहबोधएवोचितः। तादृशेच्छयातेषांतादृशबोधाजनकशब्दप्रयोगेतुपाणिनेर्भ्रान्तत्वापत्तिः। सुखंनयनंपश्येत्यादौतुनदोषः। उभयज्ञत्वेनज्ञातंप्रत्येवतादृशशब्दप्रयोगात् तेनरूपेणज्ञानंभ्रमःप्रमावेत्यन्यदेतत्। किंचपाणिनेःपूर्वंहल्पदार्थज्ञानेपितदभिप्रायेणनप्रयोगः। अन्यथाव्याख्यातृपरम्परावगतवक्तृतात्पर्यानुपपत्त्यालट्स्मेइतिसूत्रस्थकैयटोक्तरी किंचपदार्थबोधंविनावाक्यार्थबोधासंभवेनहल्प्रत्याहारसिद्धेःप्रागेतत्सूत्रार्थाबोधेप्रसक्तेतदुद्धारार्थोऽयंयत्नः। अस्यांचावस्थायांहल्शब्दार्थाप्रसिद्धौद्वन्द्वएवदुर्लभः। सहविवक्षायाअसंभवात्। तस्माद्यथोक्तमेवन्याय्यम्।। स्याल्लक्षणयातन्त्रान्तरीयप्रथमादिव्यवहारेणप्रथमादिपदानामिवशक्त्यनुमानाद्वाततःश्रोतॄणांबोधसंभवेनेतरेतराश्रयस्येवाभावेतदाशङ्कालेश्चेतिवक्तव्यमित्यादिसमाधानपरभाष्यासङ्गत्यापत्तेः। नचैवमजादिव्यवहारस्यापिलक्षणादिनैवोपपत्तावादिरन्त्येनेतिसूत्रंवैयर्थ्यम्। क्वचिल्लक्षणादिनाबोधइतिसर्वत्रलक्षणाद्याश्रयणमेवेतिनियमाभावात्। नासूयाकर्तव्यायत्रानुगमःक्रियतइतिपङ्क्तिविंशतीतिसूत्रेभाष्योक्तेः। तस्मात्करिष्यमाणशक्तिग्रहोपायकपदस्यतदभिप्रायेणाचार्यस्यपूर्वमप्रयोगइत्येवकल्पनांज्यायसी। ध्वनितश्चायमर्थोनाज्झलावितिसूत्रेशादशानांग्रहणाभावायवर्णानामुपदेशस्तावत् उपदेशोत्तरकालेत्संज्ञाइत्संज्ञोत्तरकालःप्रत्याहारःप्रत्याहारोत्तरकालासवर्णसंज्ञातदुत्तरकालमणुदिदितिसवर्णग्राहकमित्येतेनसमुदितेनान्यत्रसवर्णानांग्रहणंभवतिनत्वस्मिन्नपिस्वाङ्गेइत्येवंवाक्यापरिसमाप्तिप्रतिपादकभाष्येणापि। अन्यथातत्तच्छास्त्रप्रणयनानुपपत्त्यापाणिनेस्तथात्वानस्यपूर्वमपिसत्त्वेनाचार्येणतथाप्रयोगेबोद्धॄणामपिक्रमेणतथाबोधेउपपन्नेकिंतेनकृतंस्यात्कथंवानाज्झलावित्यत्राष्टादशादीनांग्रहणवारणंभाष्योक्तंसङ्गतंस्यादितिविभाव्यनान्तदाह। तस्मा

१६

म॰ प्र॰
३

आद्यन्ताभ्यामिति।अवयवत्वेनबोधकाद्यन्तशब्दाभ्यामित्यर्थः।तस्य।समुदायस्य।तयोःपारार्थ्येति।सञ्ज्ञास्वरूपबोधकतयाशक्तिग्रहकालएवतयोःपारार्थ्यनिर्णयादित्यर्थः।परामर्शित्वादिति।वस्तुतोज्ञापकादिनाऽस्यापिनसञ्ज्ञाकार्यमाद्यन्तशब्दाभ्यामाद्यन्तघटितसमुदायस्याक्षेपेणान्येषामिवतयोःप्राप्तायाःसञ्ज्ञायाःप्रकारान्तरेणाशक्यवारणत्वात्।स्वशब्दानुवृत्तेश्चनफलम्।भाष्येपिएतत्फलितार्थकथनमेव।स्वस्यचरूपस्येति।सञ्ज्ञास्वरूपत्वंविशिष्टस्यास्तुप्रत्येकंस्वबोद्ध्यत्वंचास्तुकोविरोधः।यथाच्चघेरित्यादौगुणदर्शनेनघिप्रशब्दस्यापिघिसञ्ज्ञाबोद्ध्यत्वंतद्वदेवमजादिसञ्ज्ञास्वसञ्ज्ञिघटकेकारादिघिवाकारचकारयोरपिप्राप्नोत्येव।किंचस्वशब्देनकेवलान्त्यपरामर्शासंभवेपिविशिष्टपरामर्शेनबाधकंतत्रसमुदायेफलाभावाद[illegible]प्रान्तिप्राप्स्यति।तस्मात्ज्ञापकादिनैवान्त्यस्यतत्कार्यवारणीयमित्यलम्।भाष्येति।तत्रहिउपदेशइतिकिमभ्रआँअपःमध्यगानामिति।आद्यन्ताभ्यामवयवाभ्यामवयवीसमुदायआक्षिप्यते।तस्यचयुगपल्लक्ष्येप्रयोगाभावात्तदवयवेअवतरन्तीसञ्ज्ञामध्यमेषुविश्राम्यति।नत्वाद्यन्तयोः।संज्ञास्वरूपान्तर्भावेणतयोःपरार्थ्यनिर्णयादितिभावः।स्वस्यचेति।स्वरूपमित्यनुवृत्तेः।स्वरूपंचादेरेवगृह्यतेनान्त्यस्य।अन्त्येनेत्यप्रधानतृतीयानिर्देशात्।सर्वनाम्नामुत्सर्गतःप्रधानपरामर्शित्वात्।आद्योच्चारणमिति।यद्यप्युपदिश्यतेऽनेनेतिकरणव्युत्पत्त्याशास्त्रमुपदेशइतिभाष्यवृत्त्यादिषुव्याख्यातंतथापितत्प्रौढिवादमात्रम्।करणेघञोदुर्लभत्वात्।ल्युटाबाधात्॥ ७ प्रत्यक्षमाख्यानमुपदेशोगुणैःप्रापणमुद्देशइतिनासावुपदेशइत्युक्तोपदेशोद्देशयोर्लोकव्यवहारेणसंकीर्णत्वमाशङ्क्योपदेशेऽजनुनासिकइतिवार्त्तिककृद्दर्शितन्यासस्यखण्डनायोपदेशइतिकरणेघञुपदिश्यतेनेनेत्युक्तंतच्चशास्त्रशासनकरणप्रत्यासत्त्यैतच्छास्त्रीयधात्वागमप्रातिपदिकप्रत्याहारसूत्रप्रत्ययादेशरूपम्।प्रौढिवादमात्रमिति।वार्त्तिककृदुक्तन्यासीयार्थस्यकथंचित्सूत्रतोपिलाभसंभवात्न्यासान्तरप्रवृत्तिस्तेवृथैवेतिप्रौढ्याबोधयितुमेवंवादइतिभावः।घञइति।अकर्त्तरिचेत्यत्रसञ्ज्ञायामित्यस्यप्रायिकत्वात्तत्प्राप्तिरितिभावः।बाधादिति।वासरूपविधिस्तुक्तल्युट्तुमुन्खलर्थेषुप्रतिषिद्धः।नचतत्रसाहचर्येणभावल्युटएवग्रहणमितिवाच्यम्।ईषत्पानःसोमोभवतेत्यत्रकर्मणिखल्नेतिभाष्यादिप्रामाण्येनात्रसाहचर्यानाश्रयणादितिभावः ॥

रामः
३

क्लिष्टत्वादिति।गुणप्रधानसन्निधौप्रधानस्यविशेषणेसाकाङ्क्षत्वेइतरान्वयस्तस्यायुक्तइतिक्लेशइतिभावस्तदाह।नहीत्यादिना।भाष्यकृतेति।अस्यार्थस्येतिशेषः।एवंचोभयप्राप्तौकर्मणीतिनियमान्नकर्त्तरिषष्ठीतिबोध्यम्।अवहेलनाच्चेति।चोहेतौ।यतोवहेलनमतःक्लिष्टत्वमित्यर्थः।घापवादइति।ल्युडपवादश्चेत्यपिबोध्यम्।तत्रापिसञ्ज्ञायामित्यनुवृत्तेरितिभावः।अगतिकगतिरिति॥नचखनोघचेतिघविधानमन्यतोपीत्यर्थमित्याकरेस्पष्टंतेनात्रघेसिद्धतीतिवाच्यम्।तस्यापिअगतिकगतित्वात्।भगःपदमित्यादौयत्रघित्वफलंतत्रैवतत्प्रवृत्तेश्च॥पदस्यघञर्थेकेनसिद्धेर्नैतदुदाहरणंकिंतुकाचित्कंवाक्यंतत्।किंचोच्चार्यवर्णानाहोपदिशइमेवर्णाइत्यादिभाष्यादुपदेशशब्दस्योच्चारणार्थत्वस्यनिर्णयेनसंकीर्णलोकव्यवहारस्यलक्षणयाप्युपपत्त्याभावघञिबाधकाभावः।किंचोपदेशशब्दस्यप्रत्ययादिपरत्वेतस्यैवहलन्त्यमित्यत्रान्वयेनयत्किंचित्समुदा

नचघः।असञ्ज्ञात्वात्।प्रायेणसञ्ज्ञायामितिव्याख्यानस्यक्लिष्टत्वात्।नह्युपाधेरुपाधिर्भवतीत्यादिनाभाष्यकृतावहेलनाच्च।अतएवघापवादोहलश्चेतिघञपीहन।बाहुलकंत्वगतिकगतिः।अतएवप्रक्रियन्तेशब्दायाभिरितिकरणव्युत्पत्तिरपिपरास्ता।तथाचवार्त्तिकम्।अजब्भ्यांस्त्रीखलनाः।स्त्रियाःखलनौविप्रतिषेधेनेति।अतोभावेएवप्रत्ययोन्याय्यइतिभाव[illegible]न्तुधातुसूत्रेत्यादिपठन्ति।यच्चव्याचक्षते।करणव्युत्पत्त्यापूर्वार्धोपात्तानामुपदेशत्वम्।कर्मव्युत्पत्त्यात्वागमादीनाम्।उणादिलिङ्गानुशासनयोरपिसूत्रत्वात्[illegible]पृथगुपादानंगोबलीबर्दन्यायेन।एवंगणत्वादेवसिद्धेधातोरपीत्यादि।अत्रेदंवक्तव्यम्।किमेषामुपदेशसञ्ज्ञाउतयोगमात्रम्।

यान्त्यस्यवारणंसंभवेतदर्थमन्त्यग्रहणसामर्थ्यादिवर्णनक्लेशोभाष्यकृतोप्यर्थःस्यादितिबोध्यम्।उद्देशश्चप्रातिपदिकानांनोपदेशइत्यादेश्चउपदेशेइतिसूत्रेचभाष्येभावघञन्तस्यैवतस्याङ्गीकाराच्चेतिदिक्। धातुसूत्रेत्यादीति। धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।आगमप्रत्ययादेशाउपदेशाःप्रकीर्तिताइतीत्यर्थः॥उपदेशत्वमिति।उपदेशशब्दव्यवहारइत्यर्थः।धातोरपीति।प्रत्ययेभ्यउणादेरपीत्यपिशब्दार्थः।वाक्यशब्देनवार्तिकंशीङ्लण्चोरट्उणआचारेऽवगल्भपुट्अणअनङिस्युदाहरणानि।उपदेशसञ्ज्ञेति।उपदेशपदंयोगरूढमेवेतिभावः

स॰ प्र॰ ५

ननुसञ्ज्ञाशब्देनव्यवहारएवाभिमतोऽतआह।आमइत्यादि॥नचाकारोच्चारणंव्यर्थम्।तेनास्मत्पक्षज्ञापनस्यैवौचित्यादितिभावः।आदिनाय[illegible]कारादीचुञ्चुप्चणपावि
त्यादिसंग्रहः॥उपदेशाभावादिति॥आदेशस्योपदेशाभावादित्यर्थः॥ततोधातुसञ्ज्ञेति॥लूशब्दएवधातुसञ्ज्ञः केवलमसौञित्कार्यंलभतइतिभावः॥नन्वत्रसूत्रसाहचर्या
द्धात्वागमप्रत्ययादिशब्देनतद्बोधकपाणिन्यादिपठितानुपूर्वीकाणांग्रहणम्॥तेषांधात्वादिव्यवहारस्तुभाविसञ्ज्ञाविषयघटितत्वेनधातुपाठइत्यादिव्यवहारवदि
तिचेन्न।आद्योच्चारणविषयाणामित्येवसिद्धे[illegible]तस्यानुपयोगात्॥अतएवचारुचेराह॥अपिचेति॥अलोन्त्यात्सूत्रेति।उपधासञ्ज्ञासूत्रेत्यर्थः।विरुद्धेतेति॥तत्रहिलोप

नाद्यः।संज्ञायाः शास्त्रकारैरनुक्तेः।असञ्ज्ञात्वात्घप्रत्ययोनेतिभाष्योक्तेश्च।अस्मदादिकृतसञ्ज्ञायाः शास्त्रव्यवस्थापकत्वेऽतिप्रसङ्गाच्च।आमोमित्वमदन्तत्वा
दितिस्वपरग्रन्थविरोधाच्च।नह्युत्सृष्टानुबन्धस्यामोनप्रत्ययत्वंयेनमित्त्वंनभवेत्। किंचैवंप्रत्ययविधौपञ्चम्याःप्रकल्पक[illegible]सनःसनेवआदेशोऽस्त्वित्याशङ्क्योपपत्ती
देशाभावादित्सञ्ज्ञानस्यादितिभाष्यकैयटोक्तंव्याकुप्येत।किंचनधातुलोपइतिसूत्रेधातुग्रहणंकिंलूञ्लवितापूञ्पवितेतिभाष्यमुपदेशएवानुबन्ध
लोपेकृतेततोधातुसञ्ज्ञेत्येवंपरःकैयटग्रन्थश्चविरुध्येत।अपिचघ्वसोरेद्धावितिसूत्रेलोपश्चेतिद्विशकारकोनिर्देशः।द्वितीयःशकारो[illegible]दितिअलोन्त्यसूत्रस्य
भाष्यकैयटादिकमपिविरुध्येत।नद्वितीयः।यो[illegible]यपुरस्कारेपरिगणनस्यव्यर्थत्वात्।धात्वादिषुकरणव्युत्पत्तिरागमादिषुनेतिवैषम्यस्यदुरुपपादत्वाच्च ॥

शीतिभिन्नंपदंशितिच।पूर्वस्यमुख्यत्वेनशः।असंदेहाय[illegible]झल्परसंयोगादित्वेपिस्कोरित्यस्यनप्रवृत्तिः।झलांजशित्यादौजश्त्वस्येव॥शकारस्यधात्वाद्यन्तत्वाभावःस्पष्टएवेतिभा
वः।किंचनमोवरिवश्चित्रङः[illegible]संग्रहोऽत्र[illegible]इत्यपिबोध्यम्।एवंचतस्ययोगरूढिरित्युक्तेःपरिगणनतायाएवलाभात्॥योगस्यैवेति।ननुरूढेरित्यर्थः।परिगणनस्यै
ति।धात्वादिगणनस्येत्यर्थः।वैषम्येति।भाष्यरीत्याकरणव्युत्पत्त्यैवसर्वसंग्रहादितिभावः ॥

रामः ४

उपदेशताप्रयोजकेति।योगमात्रस्वीकारेउपदेशताउपदेशकरणतानहितत्प्रयोजकंधातुत्वादिभवतीतितद्विरोधः।सञ्ज्ञात्वेतुउपदेशताउपदेशशब्दत्वम्।उपदेशशब्दस्यशब्दपरत्वा
तातदवच्छिन्नस्यप्रयोजकंतुरूढ्यर्थतावच्छेदकतयाधातुत्वादिवक्तुंशक्यमितिभावः।।शकारस्येति।।नह्यनेनकिंचिदुपदिश्यतइतिभावः।।ननूपदिश्यतेज्ञाप्यतेऽनेनेतितदर्थः।धात्वा
दिभिर्हिप्रयोगोज्ञाप्यतेतद्वदनेनापिशकारेणसर्वादेशत्वंज्ञाप्यतइत्यरुचेराह।।आदेचइति।।सर्वेति।भाष्यकारादीत्यर्थः।।यत्रतुकरणल्युटस्तस्यैवार्थसंगतिस्तत्रागत्यास्तुकृत्यल्युटइति
बाहुलकात्ल्युडभावः।यथायन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावित्यादावितिदिक्।।नासिकामनुगतइति।नासिकामभिहत्यवायुनाऽभिव्यञ्जितइत्यर्थः।।प्रातिशाख्यशिक्षादौलोके
चतद्व्यवहारस्यतथैवोपपादनमावश्यकमितितात्पर्यम्।अतएवमुखग्रहणप्रत्याख्यानभाष्यध्वनितोयमानुस्वारयोरनुनासिकव्यवहारःसूत्रमतेसंगच्छते।।[illegible]नुनासिकइत्यादौस्वरूप
उपदेशताप्रयोजकधातुत्वादिरूपोपाध्यवच्छिन्नसमुदायान्त्यहलिदित्यर्थइतिस्वग्रन्थविरोधाच्च।पक्षद्वयेपिलिङ्गानुशासनस्यप्रकृतानुप[illegible]गात्।लोपश्चेतिश
कारस्यासंग्रहाच्च।आदेचउपदेशेउपदेशेत्वत्तइत्यादावाद्योच्चारणस्यैवउपदेशपदार्थतायाःसर्वसंमतत्वाच्चेतिदिक्।उपदेशेजनुनासिकइत्।।यद्यप्यत्रोपजीव्यत्वा
दनुनासिकसञ्ज्ञाप्रथमंवक्तुमुचितातथापिनासिकामनुगतइतियोगाश्रयणेनैवगतार्थत्वादनुनासिकसञ्ज्ञासूत्रंमन्दप्रयोजनमितिध्वनयितुंनेहोपन्यस्तम्।
उपदेशेकिम्।अभ्रआँअपः।यद्यपीहउञऊँइत्यत्रवाविधानसामर्थ्यान्नेत्त्वमितिसुवचम्।तथाप्युत्तरार्थमवश्यंकर्त्तव्यमुपदेशग्रहणंस्पष्टप्रतिपत्तयेइहैवकृतम्।अच्
किम्।मनिनोमकारस्यमाभूत्॥ ~ ग्रहणाभावस्तुपशुरपस्यमित्यादिवदितिध्येयम्।मन्दप्रयोजनमिति।।मन्देषुप्रयोजनमस्येतिबहुव्रीहिः।एवंविधयोगलोकप्रातिशाख्याद्यनभि
ज्ञंप्रतिसप्रयोजनमित्यर्थः।।अभ्रआँअपइति।अत्रेत्सञ्ज्ञायांलोपःस्यादितिभावः।विधानेति।।इदितिवक्तव्येअनुनासिकविधानसामर्थ्यादित्यर्थः।नेत्वमिति।।तत्फललोपस्यसामर्थ्यादभावे
इत्त्वमपिफलाभावान्नेत्यर्थः।।नन्वभ्रआँअदितइत्यत्रानेकान्ताअनुबन्धाइतिपक्षेआदितश्चेतीट्प्रतिषेधःफलम्।नचलोपाभावेइदितिमहासञ्ज्ञाकरणात्त[illegible]पिनेतिवाच्यम्।महास
ञ्ज्ञयैवलोपसिद्ध्यातस्यलोपइत्यस्यवैयर्थ्यापत्तेः।इककइत्यादौककारादिश्रवणानापत्तेश्चेतिचेन्न।अनुबन्धानामेकान्तत्वमेवेतिमुख्यपक्षेदोषाभावइत्याशयात्।तट[illegible]मुखे[illegible]विन्यन्यपदार्थे

बहुव्रीहिः।नावाच्यमाकारोऽख्यातोरवरूपवइत्स्यखाप्त।

म॰श॰ प्रतिज्ञेति।प्रतिज्ञानविषयइत्यर्थः।प्रातिज्ञशब्दस्येति॥भावाङन्तस्येत्यर्थः॥क्लिष्टेति॥शक्तिग्राहकव्याकरणसत्त्वाच्छक्त्यैवतदर्थबोधसंभवेलक्षणाश्रयण[illegible]वः॥लक्षणांवि
५ विनैवेति॥अत्रलक्षणयाव्याख्यानंकुर्वतापितत्रलक्षणांविनामदुक्तरीत्यैवव्याख्यातमेवंचपूर्वापरविरोधस्तस्येतिभावः।नचोभयोर्विधानेपिलाघवाद्वेशक्तिः[illegible]र्मणिलक्षणाअनुशास
नमपिलाक्षणिकार्थानुशासनमेवेतिवाच्यम्।लःकर्मणीत्यादौनामपितथात्वापत्तौतिङांकर्त्रादौशक्तिरितिसिद्धान्तासङ्गत्यापत्तेः।व्याकरणस्याभियुक्तोक्तशक्तिग्राहकत्वस्यभङ्गापत्तेश्च॥
प्रतिज्ञायतइतिप्रतिज्ञा।आतश्चोपसर्गइतिकर्मण्यङ्।प्रतिज्ञाआनुनासिक्यंयेषामितिविग्रहः।एवचप्रतिज्ञासमधिगम्येप्रतिज्ञाशब्दस्यलक्षणेतिक्लिष्टंव्याख्या
नंनाश्रयणीयम्।पाणिन्युपज्ञंव्याकरणमित्यादिष्विवलक्षणांविनैवनिर्वाहात्।यद्यपिसूत्रकारकृतोनुनासिकपाठइदानींपरिभ्रष्टस्तथापिवृत्तिकारादिव्यवहा
रबलेनयथाकार्यंप्राक्स्थितइत्यनुमीयतइतिभावः।ननुरलयोरितिन्यूनम्।टकारस्यापिमध्यगत्वादित्यतआह।प्रत्याहारेष्विति।व्यवह्रीयन्तइति।प्रत्याह्रीयन्तेसं
क्षिप्यतेवर्णायत्रेतिबाहुलकादधिकरणेघञ्।यद्यपियोगमात्रमकारादिसञ्ज्ञास्वतिप्रसक्तंतथापियोगरूढिरितिभावः।प्रत्याहाराश्चैकचत्वारिंशदितिप्राञ्चः।च
तुर्दशसूत्रीस्थैर्हल्भिरिद्भिःकृताअष्टाध्याय्यांव्यवहृताएकचत्वारिंशदितितस्यार्थः।तेनसुप्तिङादीनांरप्रत्याहारस्यचयोद्वितीया[illegible]र्तिकस्य[illegible]चयप्रत्याहारस्य
चाधिक्येप्यदोषः।यत्तुयमन्ताड्डइतियमिर्यमन्तेषुनिडेकइष्यतइतिचयम् वार्तिककृताव्यवहृतइत्याहुः; तद्भ्रमसाभिधानम्।आघस्योणादिसूत्रे[illegible]त् द्वितीयस्यव्याघ्र
भूतिकारिकास्थत्वादित्यास्तांतावत्।एषचसंख्यानियमोनातीवोपयुज्यतइत्युपेक्षितः।ऊकालोच्॥ह्रस्वदीर्घप्लुतइतिसमाहारद्वन्द्वः।सौत्रंपुंस्त्वम् ॥
टकारस्यापीति।अत्रयद्वक्तव्यंतदन्यत्रोक्तम्।बाहुलकादिति॥भावघञन्तादर्शआद्यजित्यपिबाहुलकाद्विशिष्टमितिभावः।एकचत्वारिंशदिति॥एकस्मान्ङञणवटाद्वाभ्यांष
ड्भ्यएवकणमाःस्युः॥ज्ञेयौचयौचतुर्भ्योरःपञ्चभ्यःशलौषड्भ्यइतितदुक्तेरितिभावः॥सौत्रंपुंस्त्वमिति।यद्यपिइतरेतरयोगेपिसौत्रमेकवचनंवक्तुंशक्यंतथापिलिङ्गमशिष्यं राम:
लोकाश्रयत्वाल्लिङ्गस्येतितत्रतत्रवार्त्तिकोक्तेर्लिङ्गस्यलौकिकत्वात्तद्व्यत्ययकल्पनमेवोचितंनतुशास्त्रीयवचनव्यत्ययकल्पनमितिभावः ॥ ५

फलितार्थेति।ऊपदेनस्वोच्चारणकालसदृशलक्षणयाकालशब्देनसमानाधिकरणबहुव्रीहौतत्फलतीतिभावः॥वांकालइतितुनविग्रहोव्यधिकरणत्वात्तदाह।विग्रहस्त्विति।कालइतिजात्याख्यायामेकवचनम्।स्वोच्चारणकालइति॥स्वोच्चारणकालसदृशइत्यर्थः।सादृश्यमूलकेकालयोरभेदाध्यवसायेतुयथाश्रुतमेवसाधु॥फिट्स्वरेणेति॥अन्तोदात्तइत्यर्थः।जसःसुप्त्वादनुदात्तत्वम्।एकादेशउदात्तेनेत्येकारउदात्तइतिभावः॥अनुदात्तइति।फिट्स्वरेणान्तस्योदात्तत्वेशेषनिघातेनेतिभावः।अभिमुखवाच्यव्युत्पन्नंप्रातिपदिकमर्वाङिति अविवक्षितमित्यर्थइति॥इदंचवक्ष्यमाणंप्रातिशाख्यंयच्छाखायांतच्छाखास्थवैपाक्षिकोदाहरणविषयम्।तनूनपाच्छचीपतिशब्दयोरिति।अस्ययद्यपीत्यादिः।शेषनिघातइति।

वांकालइवेति।फलितार्थकथनमिदम्।विग्रहस्तुवःकालोयस्येतिबोध्यः।ऊशब्देनस्वोच्चारणकालोलक्ष्यते।आयइति।निपाताआद्युदात्ताइति आकारउदात्तः।यच्छब्दस्तु फिट्सूत्रेणअर्वाङ्।अकारोनुदात्तः॥तस्यादितः।अतन्त्रमिति।उपेयिवानित्यत्रउपसर्गइवाविवक्षितमित्यर्थः।ननुतत्रईयिवांसमतिस्त्रिधइत्यादौप्रयोगदर्शनादविवक्षास्तु इहत्वविवक्षायांप्रमाणंकिमितिचेल्लक्ष्यदर्शनंप्रातिशाख्यादिकंचेतिगृहाण।तथाहि।येराइत्यत्रएकारः।तनूनपाच्छचीपतिमित्यत्रप[illegible]पाठेऊदीतौचा[illegible]दात्तौइतिसकलबहृचप्रसिद्धम्।तनूनपाच्छचीपतिशब्दयोरुभेवनस्पत्यादिषुयुगपदितिपूर्वोत्तरपदयोराद्युदात्तत्वेकृतेअनुदात्तंपदमेकवर्जमितिशेषनिघातः।पूर्वपदभूतयोस्तनूशचीएतयोरन्त्यस्यपाक्षिकंस्वरितत्वंप्रातिशाख्येउक्तम्।जात्यवद्वातथावान्तौतनूशचीतिपूर्वयोरिति।तथास्वरितार्द्धस्योदात्तत्वेप्रातिशाख्यमपि।एकाक्षरसमावेशेपूर्वयोःस्वरितःस्वरः।तस्योदात्ततरोदात्तादर्धमात्रार्द्धमेववा १ अनुदात्तःपरःशेषःसउदात्तश्रुतिर्नचेत्।उदात्तंवोच्यतेकिंचित्स्वरितंवाक्षरंपरमिति ॥ ७अस्यतथापीतिशेषः।तेनोदीतौअनुदात्तौप्राप्नुतइतिभावः॥जात्यवद्वेति॥पूर्वपदभूतयोस्तनूशचीशब्दयोरन्तौजात्यवदिति।अतोऽन्यत्स्वरितंस्वारंजात्यमाचक्षतेपदेइतिलक्षितोजात्यः॥उदात्तस्वरितपूर्वंस्वरितादन्यदेकपदेस्थितःस्वरितोजात्यइतितदर्थः।तेनतुल्यंतद्वत्अस्यान्तउदात्तश्रुतिकइत्यर्थः॥तथावाअसंहितवद्वावासंहितवद्वेत्यर्थः।पद्यादींस्तुअनुदात्तानामसंहितवदुत्तरोनित्युत्तरमस्यपाठात्असंहितवदित्यनेनकेवलमनुदात्तत्वम्।संहितवदित्यनेनार्धानुदात्तस्वरितत्वमितितद्भाष्येस्पष्टम्।तथेति।लक्ष्यदर्शनवत्प्रातिशाख्यमपिप्रमाणमस्तीत्य

म॰श॰
६

स्वतन्त्रोदात्तापेक्षयेति।श्लोकेउदात्तादितिस्वतन्त्रोदात्तादित्यर्थकमितिभावः।एवकारइति॥तच्छाखायांदीर्घादिष्वपिसमांशोदात्तकस्वरितस्यैक्यादितिभावः।एतेनैतौ
पक्षौवैकल्पिकावित्यपास्तं।वाशब्दस्तुपादपूरणायेतिबोध्यम्।अप्राकृतइति।स्वरितविशेषइत्यर्थः।स्वारइति॥स्वरएवस्वारःस्वार्थेण्।स्वरितोदात्ताभ्यांपूर्ववर्णगइत्यर्थः।
लक्ष्यतेइति॥तदुक्तंभाष्ये।अर्द्धह्रस्वशब्दोऽर्द्धमात्रायांरूढइति।हरिरप्याह।प्रमाणमेवह्रस्वादावनुपात्तंप्रतीयतइति।अनुपात्तमपिअर्द्धमात्रारूपंप्रमाणमेवोपलक्ष्यतइ

अस्यार्थः।पूर्वयोरुदात्तानुदात्तत्वयोरेकत्रसमावेशेसतिस्वरितोबोध्यः।तस्यस्वरितस्यस्वतन्त्रोदात्तापेक्षयोदात्ततराऽर्द्धमात्राबोध्येति।क्वचोऽस्मादित्यादिह्र
स्वाभिप्रायम्।अर्द्धवेतिदीर्घाभिप्रायम्।अनेनैवह्रस्वस्यापिसंग्रहाज्ज्ञापकत्वादिदमेवादर्तव्यमितिसूचयितुमेवकारः।अनुदात्तइत्यादिपरिशेषसिद्धार्थ
कथनं।सःशेषउदात्तश्रुतिःस्यात्।किमविशेषेणेत्याह।नचेत्यादि।उदात्तस्वरितपरंविहायेत्यर्थः।शाकल्योऽप्याह।अप्राकृतस्तुयःस्वारःस्वरितोदात्तपूर्व
गः।उदादायार्द्धमस्याथशिष्टंनिघ्नन्तिकम्पितमिति।उदादायउदात्तंकृत्वा।अर्द्धह्रस्वशब्देनअर्द्धमात्रालक्ष्यतइतिहरदत्तादिग्रन्थास्तुमतान्तरपरतयाकथं
चिन्नेयाः।क्तेति।किमोत्।तित्स्वरितम्।वइति।अनुदात्तंसर्वमपादादावित्यधिकारादनुदात्तम्।अम्बाइति।अशेःक्वनिनिनित्स्वरेणाद्युदात्तं।संहितायांत्वे
कादेशउदात्तेनोदात्तइत्योकारउदात्तः।येअराइति।द्वयमपिफिट्सूत्रेणान्तोदात्तम्।एकादेशस्तुपक्षेस्वरितः।स्वरितोवानुदात्तेपदादावित्युक्तेः।मुखंचना
सिकाचेतिविग्रहेप्राण्यङ्गत्वादेकवद्भावेमुखनासिकमितिस्यादतआह।मुखसहितेति॥तुल्यास्य॥आस्येभवमास्यं।शरीरावयवाद्यतइत्यभिप्रेत्याह।ताल्वादीति ॥

त्यर्थंतस्यहेलाराजआह।एवंचलोकेन्यशाखासुचदीर्घादिष्वप्यर्धमात्रैवोदात्तेतिभावः।मतान्तरेति।प्रातिशाख्योक्तमतापेक्षयेतरवेदलोकसाधारणमतान्तरेत्यर्थः।कथंचि
दिति।लक्ष्यतेइत्यंशपरमिदंभाष्यतोरूढिशक्तेरेवप्रतीतेरितिभावः।इत्युक्तेरिति।नोदात्तस्वरितोदयमितिनिषेधस्तुउदात्तादनुदात्तस्येत्यस्यैवानन्तरस्येतिन्यायादितिभावः॥आस्यश

ब्देनकथंतदवयवत्वात्ताल्वादिग्रहणमतआह।आ
स्येभवमिति ॥

राम:
६

प्रशब्दबलादिति॥ प्रकृष्टोयत्नःप्रयत्नःप्रकर्षश्चवर्णोत्पत्त्यव्यवहितप्राक्कालिकत्वरूप इतिभावः॥ चकारेणेति॥ अत्रयथानासिकायाःस्थानत्वंतथान्यत्रनिरूपितम्। नतुतत्कालेति॥ एषांशिक्षाद्युक्तार्थानुवादत्वेनात्रशास्त्रप्रवृत्त्यभावादितिभावः॥ नासिद्धंस्यादिति॥ ततश्चगोधुङ्मानित्यादौघत्वजश्त्वानुनासिकेषुभष्भावोनस्यात्। नचातिदेशान्तरवदस्यापित्रिपाद्यांप्रवृत्तौनदोषः। सपादसप्ताध्याय्यामपिपूर्वंप्रतिपरासिद्धत्वापत्तेः॥ मध्येपाठस्यविप्रतिषेधसूत्रस्यचसामर्थ्याश्रयणेतुविनिगमनाविरहात्रिपाद्यामपिअप्रवृत्त्यापत्तिरितिभावः॥ रोरीत्यस्यप्रसङ्गादिति॥ सिद्धेः सिद्धत्वारोपात्सूत्रोदाहरणसंपत्त्यैपरत्वाल्लब्धेकार्येप्रवृत्तेरावश्यकतयापरत्वात्त्रैपादिकेकार्यजातेतत्राभावप्रतियोगित्वारोपेपिदेवदत्तहन्तृहतन्यायेनस्थानिभूतरोरभावाद्धशिचेत्यस्याप्राप्तिरितिभावः॥ स्पष्टंचेदंप्रकृतसूत्रेअचः परस्मिन्नित्यत्रषत्वतुकोरित्यत्रचभाष्ये ॥

आभ्यन्तरेति। एतच्चप्रशब्दबलाल्लभ्यते। तुल्यास्यंकिम्। तर्प्ता। अत्रपकारस्यतकारेपरेझरोझरीतिलोपोमाभूत्। प्रयत्नग्रहणंकिम्। वाक्श्चोतति। शस्यलोपोन। ञमङणनानामिति। नासिकाचेतिचकारेणस्वस्ववर्गानुकूलताल्वादिसमुच्चीयते। अनुस्वारोत्तमाअनुनासिकाइतितैत्तिरीयाणांप्रातिशाख्यम्। यमानुस्वारनासिक्यानांनासिका, अनुनासिकाश्चोत्तमाइतिकात्यायनप्रातिशाख्यम्। वर्गोत्तमास्तामङणनाअनुनासिकाभवन्ति। चशब्दात्तत्स्थानाद्यपरित्यागेननासिकास्थानंद्वितीयमेषामित्यर्थइतितद्भाष्यंच। एदैतोरित्यादौतपरत्वमसंदेहार्थंनतुतत्कालग्रहणार्थम्। तेनप्लुतस्यापिसंग्रहः॥ पूर्वत्रासिद्धम्। यद्ययंस्वतन्त्रोविधिःस्यात्तर्हित्रिपादीपूर्वंप्रत्यसिद्धाइत्येवलभ्येतत्रैपादिकंतुपूर्वंप्रतिपरंनासिद्धंस्यादतआह। अधिकारोयमिति। यद्यत्रकार्यासिद्धत्वमिष्येततर्हिपूर्वत्रासिद्धमितिमनोरथइत्यादौउत्वंनस्यात्। परत्वाद्रोरीत्यस्यप्रसङ्गात् ॥

तथाचेति॥शास्त्रस्यतद्बोध्यकार्यस्यचशास्त्रजज्ञानवेलायामसिद्धत्वाभावेरोरीत्यादेःप्रसङ्गेचेत्यर्थः॥व्याकुप्येतेति।त्वयाविप्रतिषेधशास्त्रप्रवृत्तौनिमित्तस्यत्रैपादिकस्यशास्त्रजबोधविषयकार्य
स्यशास्त्रस्यवाऽसिद्धतावक्तुमशक्या किन्तुलक्ष्येजातस्यवस्तुप्रवर्तमानस्यपादसप्ताध्यायीस्थकार्यदृष्ट्याऽसिद्धत्वंवाच्यम्।एवंचविप्रतिषेधाभावोपपादकहेतोरसिद्धिरितिभावः।नचममापिपूर्वप
रयद्योःपूर्वपरशास्त्रजन्यबोधविषयकार्यलक्षणयाशास्त्रस्वकार्यासिद्धत्वमितिवाच्यम्।लक्षणायांमानाभावात्फलाभावाद्गौरवाच्च।ननुमनोरथेदर्शनाभावरूपेलोपेऽभावारोपस्यदर्शनारोपरू
पत्वेननदोषोऽभावाभावस्यप्रतियोगिरूपत्वादित्यतआह॥अमूइत्यादि।अदअओअदअजसइत्यवस्थायांजातस्योत्वस्यसपादसप्ताध्यायीस्थकार्यदृष्ट्याऽसिद्धत्वेपिपूर्वरीत्याऽकाराभावेनपररूपाद्य
नापत्तिः।मुत्वस्यासिद्धत्वनिषेधसामर्थ्यादेतद्विषयेउक्तन्यायाप्रवृत्तिरितिचेत्,तेनशास्त्रासिद्धत्वमेवज्ञापयितुंयुक्तम्।एवंशीभावात्पूर्वमदसोसेरितिमुत्वेदात्वरैकाराभावेनैतईदितिसूत्रमपिव्यर्थंसद्
त्रैवज्ञापकमस्तुनिचतौसदित्यादिनिर्देशैर्देवदत्तहन्तृहतन्यायोऽनित्यइतिवाच्यम्।हतेदेवदत्तेतद्धन्तरिहतेपिनोन्मज्जनंहतत्वारोपेतुसुतराम्।हन्तुमुपतस्यहननेतूज्जीवनमस्त्येवेतिन्यायशरीरम्।

तथाचपूर्वत्रासिद्धेनास्तिविप्रतिषेधोऽभावादुत्तरस्येतिसिद्धान्तोव्याकुप्येत।अमूअमीइत्यादिचनसिद्ध्येदतआह।त्रिपादीति।परंशास्त्रमितिच।एतेनत्रिपाद्यांविहितंकार्यमसिद्धमित्या
दिप्राचांग्रन्थःपरास्तः।विवृण्वतेकण्ठमिति।विवारएषांप्रयत्नइतिभावः।वर्गयमगाइति।वर्गगायमगाश्चेत्यर्थः।कादयइति।लोकप्रसिद्धपाठापेक्षमिदम्।चतुर्दशसूत्र्यांमावसानत्वा
योगात्।अर्द्धविसर्गेति।सादृश्यमुच्चारणेलेखनेचबोध्यम्।ऋलृवर्णयोरिति।आच्आच्रलौतौचलौवर्णौचेतिविग्रहः।उ॰ऋउलृचरलौ॥ ७ नाविसादैरद्धिहन्तुःपूर्वसवर्णदीर्घस्यहननेोद्यमसजाती
यंप्रसङ्गमात्रंनतुहननस्थानीयालक्ष्येप्रवृत्तिरितिनतत्रास्यन्यायस्यविषयइतितेनास्यानित्यत्वबोधनासंभवात्।स्पष्टंचेदंत्वादिषुसर्वेष्वितिसूत्रेकैयटे॥प्रकृतेतुनिरधिष्ठानारोपासंभवेनहननसजातीयंप्र
योगेकार्यप्रवर्तनमावश्यकमेवेत्यन्यत्रविस्तरः।परास्तइति।विहितंकार्यमित्यध्याहारेगौरवाच्च।किंचत्रिपादीशास्त्रंतद्विधानेकरणंनत्वधिकरणम्।त्रिपाद्यांविधानेनशास्त्रेणविहितंकार्यमितिव्या
ख्यानेत्वत्यन्तक्लिष्टतेत्यपिबोध्यम्।लोकप्रसिद्धेति।त्रिभिश्चमध्यमैर्वर्गैरितिभाष्यपर्यालोचनयाकखगघङेत्यादीनामप्यनादित्वमितिभावः।उच्चारणेति॥पादमात्रिकाविमावितिभावः।लेखनेचेति॥अर्द्धवृत्त
हूयात्मकलिपित्वादितिभावः।रलाविति।ऋलृओइतिस्थितेऋत्यकइतिप्रकृतिभावेनदीर्घाभावेगुणेयणिचरलावित्यस्यसिद्धिः।उ॰ऋउलृचऋलोरितिपाठ।रलोरितिपाठेआगन्तुनाऽकारेणनिर्देशइति

तयोर्वर्णयोरिति।पूरणगुणेतिनिषेधस्तुषष्ठीसमासस्यनतुकर्मधारयस्यबहुलग्रहणेनतदभावोभाष्योदाहृतविषयएवनान्यत्रेतिभावः।प्रथमान्तेनेति।प्रथमोपस्थितत्वादितिभावः।अयंपक्षोनेक
मन्यपदार्थेतिसूत्रेभाष्ये।परिनिष्ठितेति।अत्रचैकविभक्तिचापूर्वनिपातइतिज्ञापकम्।अन्यथामालामतिक्रान्तइतिविग्रहेऽतिपदस्यापिनियतविभक्त्यन्तत्वेनैकविभक्तौस्वस्यव्यावर्त्यालाभः।एक
स्यानियतविभक्तित्वेहितद्वारणायैकविभक्तौतिसार्थकं परिनिष्ठितविभक्त्यासमासेत्वतिक्रान्तमनिक्रान्तेनेत्यादिक्रमेणातस्यानियतविभक्तिकत्वस्पष्टमेव।अतएवतत्पुरुषेतुल्यार्थेतिसूत्रेभाष्ये
परमेकारकेपरमेणकारकेणेत्यादावतिप्रसङ्गमाशङ्क्यप्रतिपदोक्तपरिभाषयासमाहितमितिभावः॥अत्रचेति।सूत्रेइत्यर्थः।प्रश्लेषे।आकारप्रश्लेषेनिर्देशाः लिङ्गमित्यन्वयः।निर्देशेनाकार
हकारयोःसावर्ण्याभावबोधकानुमानिकवचनकल्पनापेक्षयाप्रश्लेषएवतात्पर्यकल्पनंलघीयइतिभावः॥व्याख्यानादिति॥एवंव्याख्यानेमानंतुप्रयत्नभेदेननाज्झलावित्येतत्स्यव्याख्यानपरंभा
ष्यंतत्ध्वनयन्वस्यतिसूत्रंमास्त्वितिभाष्येस्थितमिति॥शीतलशब्देइति।शस्यईकारेपरेदीर्घीतीकारस्यशकारेपरेत्वेत्यर्थः।नचशीङःशाकारोच्चारणेनतच्छकारस्येकारेनदीर्घइतिवाच्यम्।शीतलश
तयोर्वर्णयोरितिवा।प्रथमान्तेनपरिनिष्ठितविभक्त्यावाविग्रहइतिसिद्धान्तात्।ऋत्यकइतिप्रकृतिभावः।नाज्झलौ।आकारसहितइति।अत्रचकालसमयवेलासित्वादिनिर्देशः प्रश्लेषेलिङ्
मानंचैवमपिपियासोइत्यादौगुरोरनृतइतिप्लुतांदाकारात्परस्यसनःसस्यषत्वंस्यादेवेतिवाच्यम्।आश्वआश्चेतिद्वन्द्वेसवर्णदीर्घेणदीर्घात्परत्रप्लुतोपिप्रश्लिष्यतइतिव्याख्यानात्।यणादि
कमिति।शीतलशब्देसवर्णदीर्घआदिशब्दार्थः।अत्रेति।अत्रैवेत्यर्थः॥ ७ ङेशीङोभावात्।किंतुश्यैधातोःक्तेद्रवमूर्तिस्पर्शयोःश्यइत्यनेनसंप्रसारणेश्योऽस्पर्शइतिसुक्तेर्नत्वाभावेचनिष्पन्नाच्छीतश्
ब्दात्सिध्मादित्वाल्लचिशीतलशब्दइत्यदोषात्।शीतशब्दोहिसिध्मादिषुगणरत्नेचनोचपठ्यते।किंचतेनापूर्ववचनकल्पनापेक्षयासूत्रोदाहरणत्वमेवतस्ययुक्तमितिभावः।अत्रैवेति।ग्राहकसूत्रएवेत्यर्थः।
अत्रचउर्ऋदितिसूत्रेतपरत्वंमानम्।तद्धिचुरादिण्यन्तात्कृतधातोर्लुङ्यचीकृतदित्यत्रदीर्घऋकारस्यस्थानेह्रस्वएवयथास्यादित्येवमर्थम्।पूर्वेणात्राणग्रहणेनह्रस्वेनविधेयेनचऋकारेणानण्त्वाद्भिन्न
कालाग्रहणेननतेस्यस्थानित्वंनवाआदेशत्वंप्रसक्तमितितदर्थंनतत्स्यात्।नचतपरसूत्रेणलकारग्रहणार्थंतत्।स्थानेन्तरतमपरिभाषयाऋकारस्थानेतस्यवारणेनतद्ग्रहणेफलाभावात्।नचैवञ्ज्ञापिते
पिभाव्यमानत्वात्सवर्णग्रहणाप्रसक्तेस्तद्वैयर्थ्यम्।तपरत्वाभावेआदेशान्तरनिवृत्त्यर्थत्वेनस्वरूपाभ्यनुज्ञानार्थतयाऽपूर्वबोधत्वाभावेनाविधेयत्वात्।कृतेतुतपरत्वेभाव्यमानतापीत्यन्यदेतत् ॥

अनिष्पन्नेरिति॥वर्णानामुपदेशस्तावत्तदुतरकालमित्सञ्ज्ञा तदुतरमादिरन्त्येनेतिप्रत्याहारस्तदुतरकालासवर्णसञ्ज्ञा तदुत्तरकालमणुदिदिति एतेनसमुदितेनान्यत्रसवर्णानांग्रहणमिति[illegible]रिसमाप्तिन्यायादित्यर्थः।अयंभावः॥आदिरन्त्येनेतिप्रत्याहारसिद्धौनाज्झलावित्येतद्वाक्यार्थबोधेसतिनिर्णीतेतद्विषयपरिहारेणसवर्णपदबोध्यत्वनिश्चयेऽणुदिदित्यनेन[illegible]वतांग्रहणबोधनीयमन्यथाबाधकसंभावनयातुल्यास्यसूत्रजशक्तिग्रहेप्रामाण्यसन्देहेनतच्छास्त्रजबोधानापत्तिः।नचैतद्वाक्यार्थबोधतः प्राक्तन्निश्चयइति।यत्तुनिषेधवाक्यार्थबोधात्पूर्वंविधेर्वाक्यार्थबोधएवनेतितन्न।पदार्थोपस्थितौवाक्यार्थबोधेबाधकाभावात् निषेधस्यप्रतियोगिज्ञानोपपादकतयाविध्यपेक्षत्वेपिविधेस्तदपेक्षत्वेमानाभावाद्वारमास्त्वित्यत्रषत्वमिति।सर्वस्याप्येकयायुक्त्यावारणेनापाद्यमानेधैर्य्याख्यानादरादेवमुक्तम्।भाष्येस्थितमिति।अनेनाकारप्रश्लेषमानंदर्शितम्।सादृश्यंचेति।वाधातौवासादृश्यंचप्रयो यद्यपीति।ग्रहणकशास्त्रस्याद्याप्यनिष्पन्नेरितिभावः।होढइत्युपलक्षणंरमास्त्वित्यत्रषत्वंवागार्शीरित्यत्रझयोहइत्याकारस्यघकारः दासीष्टेत्यादौदादेरितिघत्वंचनेतिबोध्यम्।यदितुविवृतमूष्मणामित्यत्रइषदित्यनुवर्त्यस्वराणांचेत्यत्रनिवर्त्यप्रयत्नभेदोव्याख्यायतेतदानाज्झलावितिसूत्रमास्त्वितिभाष्येस्थितम्।वृद्धिरादैच्।ऐजिहद्विमात्रएव।तात्परत्वात्तेनकृसैकत्वमित्यत्रत्रिमात्रोन।एवमुत्तरसूत्रेपि।तेनगङ्गोदकमित्यादौत्रिमात्रोन॥भूवादयोधातवः॥भूश्चवाश्चेतिद्वन्द्वः।आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः।भूवौआदीयेषामितिबहुव्रीहिः।भूप्रभृतयोवासदृशाः।सादृश्यंचक्रियावाचकत्वेनेत्यभिप्रेत्याह।क्रियावाचिनइति।क्रियावाचिनःकिं।याःपश्यसीत्यादौधातुत्वंमाभूत्।सतिहितस्मिन्आतोधातोरितिस्यात्॥ ७ गभेदेनबोध्यम्।आतोधातोरिति।नचास्यार्थनिमित्तकतयाबहिरङ्गासिद्धत्वम्।नाजानन्तर्यइतिनिषेधात्।ततोपिबहिर्भूतसंख्यानिमित्तकविभक्तिनिमित्तकभसञ्ज्ञानिमित्तकत्वेनलोपस्यबहिरङ्गत्वाच्च,अर्थनिमित्तकबहिरङ्गत्वस्याभावाच्च।नाप्ययंलाक्षणिकः।नकारजावनुस्वारपञ्चमौझलिधातुषु।सकारजःशकारश्चेषाट्टवर्गीस्तवर्गजइत्यभियुक्तोक्तेर्भ्वादिषुलाक्षणिकानामपिदर्शनेनतद्विषयेतत्परिभाषायाअप्रवृत्तेः।आतोधातोरित्यत्रप्रतिपदोक्तआकारोगृह्यतइतितुवक्तुमप्यशक्यम्।पशुषाइत्यसिद्ध्यापत्तेः।पशुंसनोतीतिविट्,विड्वनोरित्यात्वम्।आतोनापइतिवार्तिकमतेतुविकल्पार्थकनिपातवाशब्दस्यधातुत्वेप्रातिपदिकत्वाभावात्सुब्भावेपदत्वानापत्तिर्दोषः।क्रियात्वंसाध्यत्वेनप्रतीयमानत्वम्।साध्यत्वंचोत्पाद्यमानत्वमेवे

हिरुगित्यादि। एषांक्रियासमानाधिकरणत्वाल्लिङ्गाद्यनन्वयित्वाच्चतदर्थस्यक्रियात्वमित्यभिमानः। एषामव्ययेषुपाठस्तुअप्रातिपदिकत्वेप्यकजर्थःस्यात्। एतेननतेषुपाठसामर्थ्याद्वातुत्वाभावइत्यपास्तम्। नन्वेषांक्रियाकाङ्क्षादर्शनेननक्रियावाचकत्वमतआह॥ शिष्येइति॥ कालोपिधात्वर्थएवेतिनक्रियावाचकत्वहानिस्तस्यचधातुत्वेआदेचउपदेशेइत्यात्वंस्यात्तद्धि अनैमित्तिकंधातुत्वनिमित्तकंचेतिस्पष्टमेव। अत्रप्रत्ययस्यैवधातुत्वापत्तिर्बोध्या। तिङन्तस्यतूपदेशाभावान्नात्वप्रसक्तिरित्याहुः॥ ननुषष्ठप्रकृतसूत्रेधातुग्रहणासंबन्धउक्तोभाष्येइतिनतद्धातुत्वनिमित्तकम्। किंचाशितीतिप्रसज्यप्रतिषेधोपिशित्परत्वयोग्यस्यैवात्वविधानान्नात्रात्वप्रसक्तिरपिचवासादृश्यमन्यानभिहितक्रियावाचकत्वेनेतिनदोषेतआह। चेति॥ सूत्रशेषभाष्योक्तेश्चाणवयतिवट्टयतीत्यादिषुचधातुत्वेशास्त्रविषयतयासाधुत्वापत्तिरितितद्व्यावृत्तयेतदितिभावः॥ उदित्करणेनेति॥ इदमुपलक्षणम्।

स्वादयःकिम्। हिरुक्पृथगित्याद्यव्ययानांशिष्येइतिभावार्थतिङन्तस्यचमाभूत्। स्तम्भ्वादीनामुदित्करणेनसौत्राणांधातुत्वंज्ञाप्यते। चुलुम्पादीनांतुबहुलमेतन्निदर्शनमितिगणसूत्रेणसंग्रहः। स्वादयः। अद्रव्यार्थाःकिम्। पशुः। लिङ्गसंख्यान्वितंद्रव्यम्। इहतुस्यादेव। लोधंनयन्तिपशुमन्यमानाः। पशुइतिसम्यगर्थे॥ उपसर्गाः॥ निस्दुसइतिसान्तौ। निसस्तपताविति निर्देशात्। अयोगवाहानामविशेषेणेतिप्रकरणेनिष्कृतंदुष्कृतमित्युदाहृत्यइदुदुपधस्यसकारस्ययोविसर्जनीयइतिभाष्यकारोक्तेश्च। उपसर्गस्यायतावितिसूत्रेवामनोप्येवम्। निरःकुषःसुदुरोरधिकरणेइतिनिर्देशाद्रेफान्तावपीतितत्रैवसूत्रेहरदत्तः॥ इतिसंज्ञाप्रकरणम् ॥ *

तत्प्रकृतिकेघूल्यनुवादेनाङ्विधानेनसार्वधातुकेपरेविकरणविधानेनचधातुत्वम्। जुचंक्रम्येत्यत्रपठितजोः जपजभेत्यत्रपठितपसः ऋतिप्रभृतीनांचकेषांचिद्धात्वधिकारविहितकार्यादृश्यत्वाद्बोध्यम्। एतेष्वस्थितस्यतेषांपाठस्यभ्रंशोनुमीयतेइतिभावः। मैत्रेयाद्यन्यसंमतंसमाधिमाह॥ बहुलमिति। सम्यगर्थेइति॥ नचलुब्धमृगिंनयन्तिपशुमन्यमानाइतिनिरुक्तेपशुमितिसानुस्वारपाठात्तत्रपश्वितिलुप्तविभक्तिकंसत्ववाचीतिवाच्यम्। लोधमित्यनवगतमितितद्भाष्योक्त्यातन्मात्रनिर्णायकेनिरुक्तेपशुशब्दांशेन्यथापाठेमानाभावात्। स्पष्टंचेदंप्रकृतसूत्रेहरदत्तग्रन्थेदशपादीमाधवग्रन्थेचेतिदिक्। वामनोप्येवमिति। तत्रहिदुःसान्तइतितेनोक्तम्॥ इतिसंज्ञाप्रकरणम् ॥

योजनयेति॥यद्यपि तदनुवृत्त्यैव सिद्धेः सामर्थ्याच्छब्दव्यापाराश्रयणेन लभ्यते मूलोक्तार्थस्तथापि मन्दबुद्धिसाधारण्येन स्फुटत्वायैवमेवोक्तम्।सदिति॥अत्रनैव स्यादिति भावः॥इ
ममिति॥अ[illegible]स्यैव स्यान्नत्वन्त्यस्येति भावः।सोर्लुगिति॥अत एव दीर्घो नेति भावः॥तच्चेति॥इक इति पदं चेत्यर्थः॥अनेनात्र सूत्रे पदोपस्थितिपक्ष इति सूचयति॥अचोञ्णितिओ
गुण इत्यादौ [illegible]लिङ्गस्य श्रुत्यपेक्षया दुर्बलत्वेन प्रथमतः श्रोतात्पदार्थादिघटितवाक्यार्थबोधे वृत्ते निर्दिष्टस्थानिकत्वेनोपस्थितस्यापि इक्पदस्य वाक्यार्थेऽनन्वयः।सार्व
धातुकेत्यादौ तु तदुपस्थितिं विना स्थान्याकाङ्क्षाया अभावेन बोध एव नेति विशेषः।एवं च पदश्रुतिनिमित्तैषा पदैकवाक्यतयान्वयवत्यन्तरङ्गा॥स्थानषष्ठीत्वनिर्णये उपस्थिता
लोन्त्यपरिभाषया अनन्त्यस्य गुणाद्यावृत्तये वाक्यैकवाक्यतयान्वय इति बहिरङ्गसा तदाह॥इगन्ताङ्गस्येत्यादि॥मृज्योरवयवस्येति॥एवं च स्थानषष्ठीत्वाभावनिर्णयेना

इको गुणवृद्धी॥गुणवृद्धिशब्दाभ्यामिति।एतच्च पूर्वसूत्राभ्यां गुणवृद्धिपदे अनुवर्त्य गुणो वृद्धिरिति ये गुणवृद्धी इति योजनया लभ्यते।तेनेह न।दिव
औत्।द्यौः।त्यदादीनामः।सइमम्।षष्ठ्यन्तप्रति।सूत्रे षष्ठ्यन्तस्यानुकरणाच्छब्दस्वरूपपरतया नपुंसकात्सोर्लुगिति भावः।पदमिति।तच्च संभवति सामाना
धिकरण्ये इगन्तस्याङ्गस्येत्यादिक्रमेण संबध्यते।मिदेर्गुणः।मृजेर्वृद्धिरित्यादौ तु सामानाधिकरण्यासंभवान्मृदिमृज्योरवयवस्येक इति संबध्यते।यत्तु इक एवस्था
नेस्त इति प्राचा व्याख्यातं, यच्च तट्टीकाकृतोक्तमनियमप्रसङ्गे नियमार्थमिदमित्यादि।तत्सर्वं भाष्यविरोधादुपेक्ष्यम्।तच्छेषपक्षं दूषयित्वा पदोपस्थितिपक्षस्यैव भाष्ये स
मर्थितत्वादित्याहुः॥ ७ लोन्त्यस्येत्यस्य प्रवृत्तिरेव नेति भावः॥नियमार्थमिदमिति॥तत्र द्विधायकैर्विहितयोर्गुणवृद्ध्योरलोन्त्यस्येति विदितमपि स्यान्नियमार्थमिति तदाशयः॥ त
त्सर्वं भाष्येति॥द्वयोर्नियमयोः सार्वधातुकेत्यादावविरोधेन गुरूपस्यान्त्यस्येत्यर्थो वाच्यः॥अन्त्यस्येक इति वा।उभयथापि द्वयोर्विशेषणविशेष्यभावसत्त्वात्तच्छेषपक्षे पर्यव
सानम्।सः अलोन्त्यस्येति नियमः शेषो विशेषणमस्येति तदर्थः।तस्यालोन्त्यस्येत्यस्य विशेषणमिति वा।एवं च मिदेर्गुण इत्यादौ परस्परविरोधादनयोस्त्यागे सर्वादेशगु
णापत्त्या तद्विरोध इति भावस्तदाह॥तच्छेषपक्षमिति ॥

दूषणोद्धारस्त्विति॥मिदेरित्यत्रमिदइर्मिदिस्तस्येतिव्याख्यानान्नदोषः॥पुगन्तेत्यत्रपुक्यन्तोलघ्वीउपधेतिव्याख्येयमित्यादिभाष्योक्तदूषणोद्धारस्त्वित्यर्थः।नचयापयतिस्थापयतीत्यादौदोषः॥गुणेकृतेरद्धारूपसिद्धेः।अतएवसमयाच्चयापनायामितिनिर्देशः संगच्छतेनदाह॥कौस्तुभेस्पष्टीकृतमिति॥नन्वेवंतर्हिकिमर्थंप्राचांपक्षउपेक्षितइतिचेच्छृणु।लघूपधांशेइक्परिभाषानुपस्थितावनिग्लक्षणत्वाद्भिन्नमित्यादौगुणनिषेधानापत्तिभियासउपेक्षितइति।क्नोः किलस्यानिग्लक्षणत्वेपिगुणनिषेधप्रवृत्तिज्ञापकत्वाश्रयणेतुतस्यपदोपस्थितिपक्षज्ञापकत्वमेवोचितमितिदिक्॥इस्थादाविति॥आदिनाझलन्तलक्षणोनुमइदितोनुमित्यादिच॥अचोऽसंभवादिति॥नुमोमित्वंतुज्ञानानीत्यादौचरितार्थमितिमुचादावन्त्यस्यैवस्यादितिभावः॥दीर्घःसिद्धइति॥तच्छब्देनयस्यविहितस्तसमुदायःपरामृश्यतेइतिभावः।यद्यपितस्यान्त्याचइतिव्याख्यानेपिभवितेत्या

तच्छषपक्षेपिदूषणोद्धारस्तुशब्दकौस्तुभेस्पष्टीकृतोस्माभिः।अचांमध्यइति।यत्तुप्राचोक्तमन्त्यादचःपरइति।तन्न।शेमुचादीनामित्यादावन्त्यस्याचोसंभवात्।तस्यैवान्तावयवइति।तेनत्रपुणीत्यादौअङ्गस्यनान्तत्वेनदीर्घःसिद्धः।परादित्वेसनसिद्ध्येत्।अभक्तत्वेतुवहंलिहइत्यत्रवहाभ्रेलिहइतिखशिअरुर्द्विषदितिमुमिमोनुस्वारोनस्यात्।अपदान्तत्वात्।यत्त्वभक्तत्वेत्रपुणीतिदीर्घोनस्यादितितन्नदादिग्रहणंस्यादिनुमर्थमित्यङ्गसञ्ज्ञासूत्रस्थवार्तिकेनैवदूषितप्रायम्।स्थानेयोगेति।स्थानेनयोगोस्यादितिविग्रहः।निपातनादेत्वम्।अनेकविधमिति ॥

दौतासवचनेदोलघूपधाङ्गावयवत्वेनप्राप्तस्यगुणस्यदीधीवेवीटामितिनिषेधारम्भेपालोकव्यवहारेणचावयवावस्यसमुदायावयवत्वाङ्गीकारादत्रनदोषः।तथापितथानव्याख्या[illegible]रतीनीत्यादौपदस्यविभज्यान्वाख्यानेउत्तरपदस्यापिनान्तत्वापत्ताविगन्तेतिस्वरानापत्तेरितिस्पष्टंभाष्यादौ॥त्रपूणीत्युपलक्षणंतातापिण्डानामितिनलोपसिद्धेः।तानितानीर्थेशःछन्दसीतिशेर्लोपेतदुदाहरणम्॥स्थानेनेति।स्थानशब्दार्थेनेत्यर्थः।तन्निरूपितसंबन्धः षष्ठ्यर्थोनतुतद्रूपः सबन्धस्तदर्थइतिअनेनध्वनयति॥एत्वमिति॥व्यधिकरणबहुव्रीहिरप्यतएवेतिबोध्यम् ॥

वय

गुणप्रमाणेति॥प्रमाणस्यह्रस्वत्वादेर्गुणत्वेपिब्राह्मणवसिष्ठन्यायेनपृथगुक्तिः।गुणशब्देनोक्तत्रितयातिरिक्तधर्ममात्रंतेनानान्तर्यमेवैतयोरान्तर्यमित्यादिस्थानेन्तरतमसूत्रस्थभाष्येणनस्थितेः।अन्तरतमाभावएवगुणविधौऋकाराकारयोःसादृश्यमितितदर्थः॥बाह्यानांविवारादीनांसाक्षाद्वर्णावृत्तित्वेप्यौपचारिकंगुणत्वंबोद्ध्यम्।अनुकरणमिति॥अचीत्यादिसप्तम्यन्तार्थकस्यस्वतन्त्रतच्छब्दस्यनिर्देशेनस्वरूपपरंव्याख्यानाद्बहुलक्ष्यसंस्कारानुरोधाच्च।सप्तमीतुसप्तम्यन्तानामेवतच्छब्दार्थत्वमितिबोधनाय।तद्बोद्ध्यार्थस्यनिर्दिष्टइत्यनेनसामानाधिकरण्यायचेतिभावः।शब्दार्थकत्वेनत्वनुकरणत्वव्यवहारइतिबोद्ध्यम्।दिशिरुच्चारणेति॥अतएवजनपदेलुबित्यादौनदोषः।नह्यर्थउच्चारितोनापिशब्दस्यनिरन्तरइतिभावः॥अवियणिस्युक्तेइति॥अचिउपश्लिष्टस्ययणिस्युक्तेइत्यर्थः।इदंचसंहितायामितिसूत्रेभाष्येस्पष्टम्।फलितेति॥सप्तम्यन्तार्थेऽव्यवहितेषष्ठ्यन्तार्थोप्यव्यवहितएवेतिभावः।नसूत्रितमिति॥स्वरूपमित्यतःप्रागितिस्थानार्थगुणप्रमाणकृतमित्यर्थः।बलीयइतितेनचेतास्तोतेत्यत्रप्रमाणतआन्तर्यवानकारोनेतिभावः।तस्मिन्निति।सप्तम्यन्तानामनुकरणम्।निःशब्दोनैरन्तर्यपरः।द्विरुच्चारणक्रियः।अचियणिस्युक्तेव्यवहितेऽव्यवहितेचसतिप्राप्तमव्यवहितेएवेति,पूर्वस्यपरस्यचप्राप्तंपूर्वस्यैवेतिचनियम्यते।अव्यवहितस्येतितुफलितार्थकथनम्।परस्ययदिति।तस्मादित्युत्तरस्यादेरितितुनसूत्रितम्।आदेरित्यंशस्यसर्वादेशबाधकत्वापत्तेः।सिद्धान्तेतुपरत्वात्सर्वादेशत्वंबाधकमित्यनुपदमेववक्ष्यति।अनेकाल्शित उदाहरणमिदमइश्इदतः।यत्तुवृत्तिकृताजश्शसोःशिरित्युदाहृतंतन्न।सर्वादेशतायाःप्राक्शित्वस्यैवाभावात्।तत्रहिडाणलोरित्यानुपूर्व्यादनेकाल्त्वेनैवसर्वादेशत्वमितिसिद्धान्तः॥७)शेषः।तत्रादेरितिपृथग्वाक्यंनत्रोत्तरस्येत्यनुवर्ततेस्थानषष्ठीचेयंपञ्चमीनिर्देशेनयत्कार्यंतदुत्तरसंबन्धिउत्तरस्यस्थानेविधीयमानंचादेर्बोद्ध्यमितिवाक्यार्थद्वयंवाक्यभेदसामर्थ्याच्चादेरित्यंशंविनापिक्वचिदंशान्तरप्रवृत्तिः।आदेरित्यंशस्त्वनुवृत्तोत्तरस्येत्यस्यावृत्त्यापरत्वबोधकशब्देनयत्रविधानंतत्रैवेतिनित्यंङितइत्यादौनप्रवर्ततइतिभावः॥वक्ष्यतीति॥नचानेकालित्यतःपूर्वमेवतस्मिन्नितिनिर्दिष्टेपूर्वस्यतस्मादित्युत्तरस्यादेरितिसूत्रेकुतोनपठितेइतिवाच्यम्।आदेरित्यंशेषष्ठीस्थानेइत्यस्यासंबन्धेआज्जसेरसुगित्यादावपितस्यप्रवृत्त्यापत्तेःसंबन्धेमध्येतस्मिन्नितितस्मादित्यनयोरपितत्संबन्धेतयोरप्यागमविषयेऽप्रवृत्त्यापत्तेरितिदिक्।डाणलोरिवेति॥आदेशानांप्रत्ययाधिकारेपाठेपिवाक्यार्थबोधोत्तरमेवप्रत्ययत्वज्ञानेनोपदेशेणकारेइत्वाप्रवृत्तेस्तदुत्तरंलक्ष्येप्रवृत्तिकालेइत्वेप्यनेकाल्त्वात्क्षतेरितिभावः ॥

प्रवर्ततएवेति॥उपपादितमेतत्॥शब्दान्तरप्राप्त्येति॥यद्व्यक्ति संबन्धितयापूर्वंप्रवृत्तिस्तद्व्यक्तिसंबन्धितयैवपुनःप्रवृत्तौकृताकृतप्रसङ्गित्वंप्रसिद्धमितिभावः॥कृताकृतेति।व्यक्तिविशेषानाश्रयणेनेत्यर्थः॥वृद्धौत्वतृज्वद्भावेत्यस्यत्वत्रनप्राप्तिः।साहचर्येणविभक्तिनिमित्तानामेववृद्ध्यादीनामत्रग्रहणात्।नित्यत्वेनैवसिद्धेवाचनिकपूर्वविप्रतिषेधाश्रयणेफलाभावाच्चेतिदिक्॥अन्तरङ्गत्वादिति॥भाष्येत्वयप्रत्ययान्तरंनतुतयवादेशः।उभयीत्यत्रङीप्तुमात्रजितिप्रत्याहाराश्रयणेनसाधितः।एवंचोभयशब्देविकल्पस्यप्राप्तिरेवनेतिउक्तम्।अन्तरङ्गस्यबलवत्त्वेज्ञाइत्यादाविति।आदिशब्देनातोभिसऐस्इतिगृह्यते।परत्वादिति।अतएवादेःपरस्येतिपृथक्क्रियतेइत्युक्तम्।उत्तरस्येत्यंशस्तुऔशीसोरपिप्रवर्ततएव।यत्तुप्राचाआदेरितिसूत्रंविवृण्वतापञ्चमीनिर्देशेनेत्याद्युक्तंतदसंबद्धमितिस्पष्टमेव।परनित्येति।परान्नित्यंयथा।तुदति।रुणद्धि।परमपिलघूपधगुणंबाधित्वाशश्नमौ।तथारधेर्णिच्।रन्धयति।परामप्युपधावृद्धिंबाधित्वारधिजभोरितिनुम्।नचसोपिशब्दान्तरप्राप्त्यानित्यइतिवाच्यम्।कृताकृतप्रसङ्गमात्रेणापिक्वचिन्नित्यताभ्युपगमात्।अन्तरङ्गंयथा।उभयेदेवमनुष्याः।इहप्रथमचरमेतिपरमपिविकल्पंबाधित्वासर्वादीनीतिसर्वनामसञ्ज्ञाविभक्तिरनपेक्षत्वेनान्तरङ्गत्वात्।अपवादोपियद्यन्यत्रचरितार्थस्तर्ह्यन्तरङ्गेणगुणेनबाध्यतएव।तद्यथा।अयजेइन्द्रंग्रामेइहसर्वेइत्यत्रान्तरङ्गेणगुणेनसवर्णदीर्घोबाध्यते।सचयद्यपियणगुणयोरपवादस्तथापिसमानाश्रयेचरितार्थः।तथाचवार्त्तिकम्।इण्ङिशीनामागुणः सवर्णदीर्घत्वादिति।असिद्धमिति।तेनपचावेदमित्यादावेतऐत्वंन।अकृतव्यूहाइति।यद्यपिकृतमपिवानिवर्त्तयन्तीतिपरिभाषान्तरंपठ्यतेफलंच तुल्यम्।तथापिअकृतेत्येवलघु।प्रसालनाद्धिपङ्कस्यदूरादस्पर्शनं वरमितिन्यायादितिभावः।नकुर्वन्तीति।यथानिषेदुषीमित्यादौवसोरिटमन्तरङ्गत्वात्प्राप्तमपिभाविनासंप्रसारणेनवलादित्वंनङ्क्ष्यतीत्यालोच्यनकुर्वन्तीत्यर्थः।इतिपरिभाषाप्रकरणोपक्रमन्यत्रप्रपञ्चितम्।बाध्यतएवेति॥निरवकाशत्वरूपस्यबलवत्त्वबीजस्याभावात्॥तेनेति॥पूर्वात्तुअन्तरङ्गबहिरङ्गयोर्युगपत्प्राप्तावेवेतिभावः॥नकुर्वन्तीत्यर्थइति॥यदितुसेदुषइत्यादौपदाधिकेन्वाख्यानेसेदुस्असितिस्थितेइट्संप्रसारणयोः प्राप्तौप्रतिपदविधित्वेनशीघ्रोपस्थितिकत्वात्पूर्वंसंप्रसारणेवलादित्वाभावादिटः प्राप्तिरेवनतस्यानुरोधात्त्रपदावधिकमेवान्वाख्यानमितितत्सिद्धिरित्युच्यतेतदेषापरिभाषानिष्फलेतिबोध्यम्।अतएवभाष्येनक्वापिव्यवहृतेत्यन्यत्रविस्तरेणनिरूपितम्॥इतिपरिभाषाप्रकरणम् ॥

ननुव्यक्तिपक्षेइक्पदेनस्थान्योकारादिभिर्दीर्घादिग्रहणंनस्यात्।उच्चरितएवशब्दःप्रत्यायकोनानुच्चारितइत्यणुदित्सूत्रेभाष्योक्तेः।नचोच्चारितस्यैवप्रत्यायकत्वेरहसिपुस्तकमीक्षमाणस्यबोधा
नापत्तिरितिवाच्यम्।तत्रापिपुस्तकद्रष्टुःस्वीयसूक्ष्मोच्चारणसत्त्वादित्यतआह॥प्रत्याहारग्रहणेष्विति॥एतेनदीर्घकारादेर्ग्राहकशास्त्रबलेनइकारादिभिर्बोधेपितेषामिक्पदत्वस्यानुपस्थितत्वेनत
दुत्तरप्रत्ययार्थेऽन्वयापत्तिरित्यपास्तम्।वृत्तिप्रयोज्योपस्थितिसत्त्वेनादोषाच्च।नन्वणुदित्सूत्रंव्यर्थम्।नचप्रत्याहाराणामाद्यवर्णेषुचरितार्थम्।अन्त्यवर्णानामिवतत्सवर्णानामपिलक्षणयैवग्रह
णसिद्धेः।नचास्यच्वावित्यादौचारितार्थ्यम्।व्यक्तिपक्षेसप्रत्याहारसूत्रस्थतोभेदेनाणत्वाभावादितिस्पष्टमणुदित्सूत्रेभाष्येइतिचेन्नालक्ष्यतावच्छेदकज्ञानार्थमेवतच्चारितार्थ्यात्।प्रत्याहारेषूपलक्ष
णतद्वाच्यवाच्येतिच।अस्यच्वावित्यादावपिस्वसदृशवाच्येषुलक्षणावश्यकत्वात्।अणुदित्सूत्रगृहीतलक्ष्यतावच्छेदकिकालक्षणाविधीयमानातिरिक्तविषयएवाप्रत्ययइत्युक्तेः।अतएवसदादौ
नास्मदित्यादौभस्वसदृशवाच्येषुलक्षणा॥नाज्झलौअणुदिदित्यत्रतुनलक्षणातद्बोधकालेलक्ष्यतावच्छेदकाग्रहादितिभावः॥तत्रप्रमाणमाह।दीर्घादिति॥अक्पदीयाकारेणस्वसवर्णग्र

इकोयणचि।प्रत्याहारग्रहणेषुतद्वाच्यवाच्येनिरूढालक्षणा।दीर्घाज्जसिचेतिज्ञापकात् त्वादिभ्यइतिनिर्देशाच्च।तेनेक्शब्देनषट्षष्टिर्गृह्यन्ते।यण्शब्देनसप्त।
भाव्यमानत्वेनसवर्णाग्राहकत्वेपिगुणानामभेदकत्वेनानुनासिकानामपियवलानांग्रहणात्।अतोनास्तियथासंख्यम्।नचलक्ष्यार्थबोधात्पूर्वभाविनंशक्यार्थबोध
मादाययथासंख्यमस्त्वितिवाच्यम् ॥ ७

हणेपितत्रनादिचीत्येवसिद्धमितिभावः।तेन,लक्षणाङ्गीकारेण।भाव्यमानत्वेनेति॥विधीयमानविषयेलक्षणाभावस्यानुपदमुक्त
त्वादितिभावः॥अभेदकत्वेनेति॥शास्त्रेउच्चारितगुणानांभेदकत्वाभावेपिस्वरूपकृतभेदमादायसप्तत्वसंख्यानविरुध्यते।यदितुअणुदित्सूत्रेणग्रहणाद्यण्विषयेगुणानां
भेदकतैवोचितेतिविभाव्यते।तदापिचत्वारोयणइतियथासंख्यमसंगतमेव।तद्ध्वनयन्नाह॥अतोनास्तीति॥तत्खण्डनेएवाग्रहोनतुसप्तत्वसंख्यायामितिभावः॥शक्या
र्थबोधमादायेति॥त्वादिभ्यइत्यादिनिर्देशोहिततात्पर्यानुपपत्तिग्रहस्यतत्सत्त्वएवसंभवेनसबोधआवश्यकस्तत्रचयथासंख्यसहायेनवाक्यार्थेनिष्पन्नेत्वादिभ्यइत्यादि
निर्देशाल्लक्षणयाजायमानेपुनर्वाक्यार्थबोधेलक्षितदीर्घादीनांस्ववाचकान्वयिन्येवान्वयइतिभावः ॥

स्थानेन्तरतमसूत्रेणैवेति॥व्यक्तिपक्षेव्यक्तीनामानन्त्येनसंख्याज्ञानाभावाद्यथासंख्यासंभवाल्लस्यासिद्धेश्चेतिभावः।परेतुव्यक्तिपक्षेझलादिप्रत्याहारसूत्रेषुसर्वझकारादीनांग्र
हणंदुरुपपादम्।नहितत्रलक्षणावक्तुंशक्यालक्ष्यतावच्छेदकाग्रहात्॥एवंचतत्रप्रत्याहारसूत्रेषुजातिनिर्देशेनैवनिर्वाहोनान्यथा।एवंचाइउणित्यादावपिजातिनिर्देशएवोचितः।
अर्द्धजरतीयस्यानौचित्यात्।अतएवाणुदित्सूत्रेभाष्येप्रत्याहारेष्वस्यचावित्यादौचउक्तामनुपपत्तिमाशङ्क्यजात्याश्रयणमेवकृतम्।यथासंख्यसूत्रेचव्यक्तिसाम्यइवधर्मसाम्येपि
प्रवर्ततेस्यतासीलृलुटोरित्यादौयथा।नाप्यत्रपक्षेऋकारादौलकाराद्यापत्तिः।लृत्वादिजातेर्ऋकारादावभावात्।नचजातिपक्षेऽणुदित्सूत्रेऽण्ग्रहणप्रत्याख्यानेउपसर्गादृतीत्यादौ
ऋकारेणलकारग्रहणायसावर्ण्यवचनस्थानेलृवर्णस्यऋवदतिदेशाल्लृकारेरेफापत्तिरितिवाच्यम्।क्लृ३प्तशिखार्थंतस्यातिदेशस्यानित्यत्वावश्यकत्वात्।तत्पक्षेऽण्ग्रहणप्रत्या
एवमपितृतीयचतुर्थाभ्यामृकारलृकाराभ्यांप्रत्येकंत्रिंशदुपस्थितौलृवर्णानांरेफादेशस्यऋवर्णानांलादेशस्यचप्रसङ्गात्।तस्मादिहस्थानेन्तरतमसूत्रेणैवेष्टसि
द्धिरित्यभिप्रेत्याह।स्थानतआन्तर्यादिति।अनचिच।द्वेवेति।यरोनुनासिकइतिसूत्राद्वाग्रहणमनुवर्ततइतिनाज्झलावितिसूत्रेकैयटः।एवंचसर्वत्रशाकल्यस्येतिसू
त्रंतत्प्रपञ्चभूतंपूर्वोत्तरसूत्रद्वयंचनारम्भणीयमितिभावः ॥ ७) स्थानेप्यप्रत्ययइत्यंशोवाक्यभेदेनविधीयमानेजातिग्रहणप्राप्तसवर्णग्रहणनिषेधकस्तपरस्तत्
यदितित्यदादीनामइत्यादौनदोषः।एवंचात्रयण्पदेनजात्याश्रयणेनापिनसवर्णबोधनमितिस्वौजसित्यादौअनुनासिकस्थानेपिनिरनुनासिकएव।अतएवस्थानेन्तरतमसूत्रे
भाष्येऽस्यतदुदाहरणत्वमाशङ्क्ययथासंख्यमित्यनेनापिसिद्धमित्युक्तंतेनात्रतयोःफलाविशेषउक्तः।उञइतिसूत्रेनव्यानांप्रमादएव।नचझलादिषुझकारादिभीरूपसादृश्येन
सर्वझकारादिप्रतीतिरितिवाच्यम्॥अगादिष्वपिकिंचित्सादृश्यमाश्रित्यदीर्घादीनामपिग्रहणोपपत्तेः।त्वादिभ्यइतिनिर्देशानामीणत्सादृश्येनापिग्रहणमित्यर्थज्ञापकतायायुक्त
त्वात्।तदप्युक्तमइउण्सूत्रेभाष्येरूपसामान्याद्वासिद्धमिति।अणुदित्सूत्रेऽण्ग्रहणंतुप्रत्याहाराद्यवर्णेषुणकारादिभिश्चिह्नैःप्रत्याहारसूत्रस्यायमितिप्रत्यभिज्ञासत्त्वादुपाया
न्तरपरमाचार्याःकृतान्निवर्तन्तइतिन्यायादिदमेवाभिप्रेत्यतत्रत्यमण्ग्रहणंप्रत्याख्यातंभाष्येइत्याहुरितिदिक् ॥

क्लिश्यन्तइति॥अनचीत्यनुवर्त्यपर्युदासपरतयाहलिपरएवनित्यनिषेधइतिव्याख्यानेनेतिभावः॥विकल्पउक्तइति॥एवंचसर्वत्रशाकल्यस्येतिवदिदमपिप्रपञ्चार्थमितिभावः॥असतीति॥यत्तुनादि[illegible]त्यादौत्तावनचीतिप्राप्तिमुद्भाव्यत्रिप्रभृतिषुसर्वत्रेत्यनयोःप्राप्तिमनुद्भाव्यपुनर्दीर्घादित्यत्रानचीतिप्राप्तिरुद्भाविताहरदत्तेन।तस्यायमाशयः।निषेधविकल्पेप्राप्त्युद्भावनंनावश्यकंतद्विकल्पेविधिविकल्पस्यफलितत्वेनविधेरेवअप्राप्तविषयविकल्पसंभवाद्नित्यनिषेधेतुतदुद्भावनमावश्यकमितितत्त्वं।विकल्पेपिनिषेधप्रकरणान्नञुल्लेखस्यावश्यकत्वेनप्राप्त्युद्भावनस्यावश्यकत्वात्।मध्येनञोःसंबन्धोमण्डूकानुवृत्तिरग्रेइत्यत्रमानाभावाच्च।सर्वत्रेतिसूत्रेऽस्यद्वित्वमात्रनिषेधकर्तेतिबोधयितुंतदनुल्लेखाच्च।त्रिप्रभृतिष्वित्येतद्विषयेनकारषकारयोर्द्विर्वचनाभावइतिमिश्रग्रन्थेनप्राप्त्युल्लेखस्यकृतप्रायत्वाच्च।वृत्तिहरदत्तयोर्नादिन्याक्रोशेचेत्यनयोरपिप्राप्त्युल्लेखस्यबहुषुपुस्तकेष्वनुपलम्भाच्चेतिदिक्॥

यत्तुदीर्घादाचार्याणामितिसूत्रेआचार्यग्रहणंपूजार्थमित्यभिप्रेत्यवाक्वाक्क्इतिभाष्योदाहृतेविकल्पेउपपत्तिचिन्तार्थंक्लिश्यन्तेतन्मुधैव।पूजार्थतायाःप्रामाणिकैरनुक्तेः।त्रिप्रभृतिष्वितिसूत्रेशाकटायनग्रहणस्यापितथात्वापत्तेः।नचेष्टापत्तिः।सस्कर्तेतित्रिसकारत्वपरकैयटहरदत्तादिग्रन्थविरोधात्।स्वग्रन्थविरोधाच्च।अतएवप्रातिशाख्यभाष्येपिआत्वारथमितिमन्त्रेतकारस्यद्वित्वविकल्पउदाहृतः।माधवेनचास्तेइत्यत्रसकारस्यद्वित्वविकल्पउक्तः।एवंचपात्रंशदइत्यत्रतकारस्यद्वित्वमसदित्युक्तिरेवासतीतिदिक्।स्थानिवदादेशः।धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाइतिप्राचोक्तम्।तत्परिगणनमुदाहरणमात्रंवा।नाद्यः।सिच्क्सचङ्ङादीनांश्नादेशस्यशानचश्चासंग्रहापत्तेः॥

चङ्ङादीनामिति।आदिनाचिण्।नकेवलंश्नादेशानामेवासंग्रहइत्याह॥श्नादेशस्येति॥तदभावेह्यत्रादिषातामित्यत्रेड्नस्यात्।क्सादेःकादीनामित्वंनस्यात्॥शानचःशस्यचतन्नस्यान्माहिदर्शदित्यादौअङिगुणोनस्यादितिभावः।ननुसिजादीनांप्रत्ययाधिकारेपाठात्श्नमत्प्रत्ययत्वमस्तीतिनस्यानिवत्त्वोपयोगः।नचतेषांप्रत्ययत्वेच्लिविधानंव्यर्थम्।मन्त्रेघसेतिसूत्रेचङ्ङ्सिचामितित्रयाणांग्रहणेगौरवापत्तेः।सिचोलुकितद्विषयेआदिःसिचइतिस्वरापत्तिश्चेतिभाष्यकैयटयोस्पष्टमित्यरुचेराह।चेति।तेनाग्रहीदित्यादाविडादेशस्यईटोसङ्ग्रहइत्यर्थइदमुपलक्षणमव्ययस्यपदादेशग्रहणवैयर्थ्यमपिदोषइतिबोध्यम्॥

अव्ययस्येति।अत्रत्वस्यैवदोषत्वमितिभावः।नन्वव्ययस्याङ्गत्वेफलाभावेनप्रत्ययस्यलुकालुप्तत्वेनचतद्प्राप्ताकथंतेनाव्ययसंग्रहोतआह। पदेति। तत्वंचततः परस्यनिघाता
र्थमावश्यकंप्रत्ययलक्षणेनसुबन्तत्वाच्चतत्त्वमितिभावः॥सिद्धत्वाच्चेति।अतएवात्रतुक्।नचसर्वेसर्वपदादेशादितिन्यायेनप्रस्तुत्वाद्लस्यस्थानेप्रस्तुत्यइत्यादेशेतस्याव्यय
त्वसिद्धिरितित्याशयइतिवाच्यम्।अर्थवत्वेवस्थानिवत्त्वमिति तात्पर्येणत्वकोप्यर्थवत्त्वेनतादृशस्यान्यादेशभावकल्पनेमानाभावादितिदिक्।अनल्विधावितिकिमिति॥
ल्विधिग्रहणविशिष्टंकिमर्थमितिप्रश्नः॥णत्वंप्राप्तमिति॥नचसकारेस्वतोऽड्भिन्नत्वसत्त्वात्अड्भिन्नव्यवायेनेतिनिषेधात्कथंणत्वप्राप्तिरितिवाच्यम्।अतिदिश्यमानधर्मविरुद्ध
स्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात्।इदंचासिद्धवत्सूत्रेकैयटेस्पष्टम्॥द्युकामइति॥यद्यपिवत्वंहल्त्वाद्यपेक्षयाविशेषधर्मस्तथाप्येतद्वाक्योपप्लुतेवकारव
नान्यः।अव्ययस्याङ्गपदाभ्यांपृथग्ग्रहणाद्वैयर्थ्यात्।प्रस्तुत्येतिवृत्तिकारोक्तंतदुदाहरणमपिमन्दम्।त्वामात्रस्थानव्ययत्वात्।कृत्वेनसिद्धत्वाच्चेत्याशयेनाह।आदेशइति।
अत्राल्विधावितिकिम्।तेनतस्मात्तस्यतस्मिंश्चविधौमाभूत्।तत्रअलाविधौयथा।व्यूढोरस्केन।अत्रसकारस्यस्थानिवत्त्वेनविसर्गवद्‌द्रूमाश्रित्याड्व्यवायइतिणत्वंप्राप्त
म्।अलःपरस्य।द्यौः।पन्थाः।हल्ङ्यादिलोपोन।अलोविधौ।द्युकामः।व्वलिलोपोन।अलिविधौ।यजेःक्तः।कद्दष्टः।हशिचेत्युत्वंन।अल्त्वेहस्थान्यवयवएवगृह्यते।तेनसामा
येत्यादौसुपिचेतिदीर्घःसिद्धः।नहियोहियजादित्वमाश्रितंयञ्चादेशावयवोनतुस्थान्यवयवइतितदेतत्सकलमभिप्रेत्याह।नतुस्थान्यलाश्रयइति।आश्रयणंचेहयथाकथंचिन्नतु
प्राधान्येनैवेत्याग्रहः।तेनप्रपच्येत्यत्रवलादिलक्षणइण्न। ७७ दुकारइतिवाक्येउपात्तधर्मापेक्षयानतस्यतत्त्वम्।सूत्रक्लृप्तस्थान्यादेशभावमादायैवेतत्कृतवाक्योपप्लवादितिभावः॥क
दृदृइति॥यद्यपीदंरूपंपरत्वेगुणेऽवादेशेपाक्षिकलोपेनसिद्ध्यतितथापिपक्षेकयिष्टइतिस्यात्।कयिष्टइतिचेष्यतेइतिभावः॥स्थान्यवयवएवेति॥उपलक्षणमेतत्स्थानिरूपोपीतिबोध्यम्।
अतएवादेशिन्यल्याश्रीयमाणेप्रतिषेधइतिभाष्येउक्तम्।नतुस्थान्यवयवइति॥अतःप्रत्ययत्वंस्थानिवत्त्वेनभवत्येवेतिभावः।अग्रहीदित्यादौग्रहोलिटीत्यनेनेटएवदीर्घविधा
[illegible]त्वेनतस्यस्थानि[illegible]तइतीट्त्वाश्रयस्यसिचे[illegible]लोपस्यसिद्धिरितिबोध्यम्।यथाकथंचिदिति॥व्याख्यानादितिभावः ॥

दूषयित्वेति॥अङ्गस्येतिसूत्रेनास्येतिशेषः।एतदसिद्धवद्दूषयित्वेत्यर्थः।विस्तरस्त्वन्यत्रद्रष्टव्यः॥अनेनतुवार्यतइति॥स्थानिनिमित्तेयद्भवतितद्वादेशेपिभवतितत्रसतियन्नभवतितदादेशेपि
नभवतीत्यर्थात्।अजादेशोऽज्कार्यंलभतेनलभतेचेतिवाच्योर्थः।तत्रोपपत्तिमाह।शब्देति॥पूर्वसूत्रेस्थानिवत्सदस्यतद्वत्कार्यंलभतइत्येतन्मात्रार्थकस्येहोभयार्थकत्वात्तदाश्रयणमितिभावः
।यलोपदीर्घादीति॥यलोपदीर्घावादीयेषामित्यर्थः।यलोपादयोदीर्घादयश्चेतियावत्॥तेनस्वरादीनामपिसंग्रहः॥यलोपादीत्येवसिद्धेएवमुक्तिर्वैचित्र्याय।नहियलोपादिविषयेऽभावातिदेशप्र
त्तनिषेधादिति।स्थानिवत्त्वनिषेधादित्यर्थः॥अचः॥अल्विध्यर्थमिति।तेनवव्रश्चेत्यत्रवस्यसंप्रसारणंन।उरदत्वस्यस्थानिवत्त्वेनसंप्रसारणतयानसंप्रसारणइतिनिषेधात्।नचोरदत्वं
परनिमित्तंनेतिवाच्यम्।अङ्गाक्षिप्तेप्रत्ययेपरेतद्विधानात्।प्रागभ्यासविकारेभ्योऽङ्गाधिकारइतिपक्षंदूषयित्वाआसप्तमसमाप्तेरितिपक्षस्यैवआकरेसिद्धान्तितत्वात्।किं
चपूर्वसूत्रेणस्थानिप्रयुक्तमतिदिश्यतेनत्वादेशप्रयुक्तंवार्यतेनायकःपावकइत्यादौएचोयवायावइत्यादीनामप्रवृत्तिप्रसङ्गात्।अनेनतुवार्यते।शब्दाधिकारमा
श्रित्यभावाभावयोरप्यतिदेशोयमितिस्वीकारात्।नपदान्तेतिसूत्रेयलोपदीर्घादिग्रहणंचेहलिङ्गम्।अतएवगणयतीत्यादौनवृद्धिः।स्थानिनिमित्तस्याभवन्त्यास्तस्याआ
देशेप्यभावातिदेशात्।उक्तंच।काममतिदिश्यतांवासत्त्वासत्त्वापिनेहभारोस्तीति।स्यादेतत्।पूर्वत्वस्यसावधित्वेनसन्निहितस्यैवअवधित्वमुचितम्।सन्निहितंचेहत्रयंस्था
नीआदेशोनिमित्तंच।तत्रनतावत् स्थानीअवधिस्तस्यादेशेनापहारात्।नाप्यादेशनिमित्ते,वैयाकरणइत्यत्रऐकारस्य यादेशापत्तेरित्याशङ्क्याह।अचःपूर्वत्वेनदृष्टस्ये
ति।पूर्वत्वमुपलक्षणंनतुविशेषणमितिभावः।एतेनअचःपूर्वत्वविज्ञानाद्वैचोः सिद्धमितिवार्तिकंव्याख्यातम् ॥
सक्तिरितिभावः॥नवृद्धिरिति॥अतउपधाया इतिवृद्धिर्नेत्यर्थः।क्विलुगुपधात्वेतिनिषेधस्तूपधात्वनिमित्तकप्रत्ययविधावेवनान्यत्रेतिभाष्येस्पष्टम्॥आयादेशापत्ते
रिति॥यणःस्थानिवत्त्वेनाच्त्वादितिभावः।पूर्वत्वंचात्रव्यवहिताव्यवहितसाधारणंस्वरेनिषेधात्।अतोयणनिमित्ताकारापेक्षयाप्यैकारस्यपूर्वत्वमस्तीतितत्पक्षेप्य
दोषइतिभावः।आदेशेनापहारात्कथंस्थानिनोवधित्वमित्यतआह॥उपलक्षणमिति ॥

अन्तशब्दस्यचरमावयववाचित्वंविधिशब्दोभावसाधनःकर्मषष्ठ्यासमासेनपदचरमावयवेकर्त्तव्येइत्येवंव्याख्यानेफलमाह।वृक्षमिति।विजिति।क्विपितूठ्स्यादिति भावः॥स्थानिवत्वादिति।णिलोपस्यटिलोपस्यवास्थानिवत्त्वादित्यर्थः।नन्वस्यपदत्वाभावात्कुतोऽसिद्धिरतआह।सुबन्तादिति।अन्तर्वर्तिसुब्निमित्तकपदत्वस्यैकदेशविकृतन्यायेनवान्तेपिसत्त्वमितिभावः।प्रत्ययलक्षणमिति।स्थानिवत्त्वेनप्रत्ययनिमित्तंकार्यमित्यर्थः।वर्णाश्रयत्वादिति॥ णाविष्ठवदित्यनेनयचिभमितिशास्त्रस्यैवातिदेशस्तच्चवर्णाश्रयमेवंचस्थानिवत्त्वस्याप्रसक्तिः॥कार्यातिदेशेपियन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिमित्तकत्वमतिदेशस्यापीत्यङ्गीकाराद्वर्णाश्रयत्वाक्षतिः॥प्रत्ययलक्षणसूत्रेतुभाष्यकृताप्रत्ययस्ययत्रासाधारणंरूपमाश्रीयतेतत्रैवप्रत्ययलक्षणमितिनियमार्थत्वेनस्थापितंनत्वप्राधान्येनालाश्रयणेविद्ध्यर्थमितिभावः।नचाचःपरस्मिन्नितिणिलोपस्यस्थानिव

नपदान्त ।।पदस्यचरमावयवइति।वृक्षंवेतीतिवृक्षवौः।वातीतिवृक्षवाः।तमाचष्टेवृक्षव्।विच्।इहलोपोव्योरितिवलोपोन।स्थानिवत्त्वात्।नचनपदान्तेतिनिषेधः।इहविधेयस्यलोपस्यपदानवयवत्वात्।पदान्तस्यस्थानेविधौनेतिव्याख्यानेतुनेदंसिद्ध्येत्।सुबन्ताण्णिजितिहरदत्तादिमतेऽन्तर्वर्तिसुपापदत्वात्।नचेष्ठवदित्यतिदिष्टेनणिचिभत्वेनपदत्वबाधोणेर्लुप्तत्वात्।नचप्रत्ययलक्षणम्।वर्णाश्रयत्वादितिभावः।द्विर्वचनादौचेति।यलोपादयआदिशब्दग्राह्याः।वरेइतितुवरेयोऽजादेशःसनस्थानिवदितिव्याख्येयम्।सहविवक्षाभावेपिनिपातनाद्द्वन्द्वःसप्तम्यालुक्च।अथोदाहरणानि।पदान्ते।कानिसन्ति।कौस्तः।द्विर्वचने।सुद्ध्युपास्यः॥ त्वेनभत्वंसुलभमितिवाच्यम्॥ णिलोपस्येवटिलोपस्यापिस्थानिवत्त्वापत्तौवान्तेभत्वस्यदुर्लभत्वेनतत्रपदत्वानिवृत्तेः॥प्रकल्प्यचापवादविषयमितिन्यायेननिषेधविषयेतत्प्रतिबन्धात्स्थानिवत्त्वाप्रवृत्तेश्च।हरदत्तादिमतेइत्यनेनारुचिर्बोधिता।तद्बीजंत्वयंपक्षोनसूत्रवार्तिकभाष्यसंमतइतिप्रातिपदिकात्तदुत्पत्तौपदत्वाभावइति।चरमावयवेकार्यइतिव्याख्यानेफलंतुएणोयन्हसतीत्यादौयणःस्थानिवत्त्वादेतत्तदोरितिसुलोपाभावः।इदृपःशतारियन्नितिरूपम्।उत्वेचनस्थानिवदनेननिषेधादितितत्त्वम्॥कानिसन्तीति।वाक्यसंस्कारपक्षएतत्।तत्रपक्षेपूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वमादायान्तरङ्गाणांपूर्वप्रवृत्तेरिकारादेःस्थानिभूतादचःपूर्वत्वंद्रष्टव्यम्।एतन्मूलकमेववाक्यसंस्कारपक्षेश्रुतवर्णक्रमेणैवलक्ष्यसंस्कारइतिवदन्ति ॥

नस्थानिवदिति॥तेनातोलोपोनेतिभावः।नचपूर्वमल्लोपस्ततोवलिलोपइतिक्रमसत्त्वादकारेणार्द्धधातुकत्वाद्यलाभात्कथमतिदेशेनतल्लाभः।सम्भावनामात्रेणापितल्लाभस्यवरेग्रहणेनज्ञा
पनात्।अस्तिचात्रापियदिपूर्वंयलोपःस्यात्तदाकारेणप्रत्ययत्वंलब्धंस्यादितिसंभावना।फलंतुयातिरित्यादिसिद्धिरितिदिक्॥क्तिजिति॥क्तिच्क्तौचसञ्ज्ञायामित्यनेन।क्तिन्तु।अप्रत्यया
दित्यनेनबाधात्।नस्थानिवदिति॥स्थानिवत्त्वेहिस्वराप्रवृत्तिरेवस्यात्।अकारस्यतुनत्वविधौस्थानिवत्त्वनिषेधात्॥लित्वंतुकारकइत्यादौसावकाशमितिभावः॥शिण्ढीति॥नन्वत्रानुस्वारस्या
देशादचःपूर्वत्वेनस्थानिवत्त्वाप्रवृत्तिः।नचास्मादेवज्ञापकात्तस्याशास्त्रीयत्वेपिस्थानिवत्त्वेनतत्त्वम्।फलाभावात्।तद्धुटितसन्निवेशापेक्षस्यततःपूर्वत्वस्यातिदेशसहस्रेणाप्यतिदेष्टुमशक्यत्वा
द्भोभगोइतिसूत्रस्थभाष्यरीत्यातस्यस्थानिभूतात्वृत्तिधर्मत्वेनानल्विधावितिनिषेधाच्चविशेषणतयाल्लाश्रयणाच्च।भाष्येपूर्वत्रासिद्धेइत्यवष्टम्भेनवरेयलोपस्वरभिन्नानांद्विर्वचनादीनां
ग्रहणस्यात्रप्रत्याख्यानेनतस्यचणत्वेप्रतिप्रसवेनात्रस्थानिवत्त्वेनपरसवर्णाभावस्यैवलाभादिदमुदाहरणंचिन्त्यम्।णत्वग्रहणेचप्रतिप्रसववार्तिकेलक्षणप्रतिपदोक्तपरिभाषानेत्युपपा
वरे।यापावरः।यश्चयङइतिवरच्।अतोलोपः।सचआतोलोपइटिचेत्यालोपेकर्तव्येनस्थानिवत्।यलोपे।यातिः।यातेर्यङन्तात्क्विच् ।अतोलोपः।यलोपः।अल्लोपस्यस्था
निवत्त्वादातोलोपः।यलोपः।नचपुनरालोपःशङ्क्यः।चिणोलुङ्न्यायेनातोलोपस्यासिद्धत्वात्स्थानिवद्भावाच्च।स्वरे।चिकीर्षकः।सनोतोलोपः।लितीतिककारेकारस्यउदात्तत्वेक
र्तव्येनस्थानिवत्।सवर्णानुस्वारयोः।शिण्ढि।दीर्घा।प्रतिदीव्ना॥७ इष्यते।किंचदीर्घादाचर्याणामित्युत्तरमनुस्वारस्ययथि।वायदान्तस्य।तोर्लि।उदःस्था।झयोहो।शश्छोटीतिषट्सू
त्रीपाठोत्तरंझलांजश्झशि॥अभ्यासेचर्च।खरिच।वावसाने।अणोप्रगृह्यस्येतिपञ्चसूत्र्याःपाठइतिभाष्यसंमताष्टाध्यायीपाठपक्षेपरसवर्णइत्यस्याझलांजशझशीत्यस्यझरोझरीत्यस्य
चासिद्धत्वेनययुपरत्वाभावात्तदप्राप्तेरितिचेत्सत्यम्।पादयतेःक्विपिपाद्भसतीत्यादौझयोहइतिपूर्वसवर्णपञ्चमीसमासेनप्राप्तस्थानिवद्भाववारणार्थत्वात्।हरितशब्दादाचक्षाणण्यन्तात्
क्विपिहरिद्भसतीत्यादौउक्तरीत्याप्राप्तस्यतस्यवारणार्थत्वाच्च।अत्राल्लोपस्यापितत्राप्याक्षौलुप्तमित्यस्यविषयएवन।हरिन्मतीत्यादौअनुनासिकेतद्व्यावृत्त्यर्थत्वाच्च।हयवरट्सू
त्रभाष्यरीत्यातत्रसवर्णग्रहणापकर्षेणतस्यापिसवर्णविधित्वादित्यन्यत्रविस्तरः ॥

सूत्रेणसइति॥सग्धिः स्त्रीसहभोजनमित्यमरात्सहस्यसादेशइतिप्रतीयते।झलोझलीति। सिचएवलोपइतिपक्षेछान्दसोवर्णलोपोबोद्ध्यः।स्पष्टंचेदंधिचेतिसूत्रेभाष्ये।लोकेतुसग्धिरित्यसाध्वेवेतिबोद्ध्यम्॥विशेषणेन।पदस्येत्यधिकारप्राप्तविशेषणेनसंयोगस्येत्यनेन।एकत्वसंख्येति।अभेदैकत्वसंख्येतितदर्थः।संख्यासामान्याभावइतियावत्।विग्रहेएकवचनंतुऔत्सर्गिकम्।सुबन्तत्वसंपत्तिमात्रफलकमितिसमर्थसूत्रेभाष्येस्पष्टम्। भाष्येस्थितमिति। संयोगसञ्ज्ञासूत्रस्थेइत्यर्थः।एवंचप्रत्येकंसंयोगसञ्ज्ञापक्षस्यानन्तराइतिसूत्राक्षरस्वारस्यविरोधेनफलाभावेनचासंगतत्वमितितत्रैवभाष्येध्वनितंतयात्रत्यमन्तग्रहणंव्यर्थमेवनतुफलान्तरेऽभिनिवेशःकार्यइतिभावः।यत्तुसंयोगेतिलुप्तषष्ठीकंतच्चपदस्येति

जशि।सग्धिश्चमे।अदनंग्धिः।अदेः क्तिनिबहुलंछन्दसीतिघस्लआदेशः।घसिभसोर्हलीसुपधालोपः।झलोझलीतिसलोपः।धत्वम्।घस्यजश्त्वम्।सहस्यसइतिसूत्रात्सइत्यनुवर्तमाने समानस्यछन्दस्यमूर्द्धप्रभृत्युदर्केष्वितिसूत्रेणसः।चरि।जक्षतुः।संयोगान्तस्य।तदन्तस्येति।अलोन्त्यपरिभाषयेतिभावः।यद्यपिविशेषणेनतदन्तविधिलाभात्संयोगस्येत्येवसूत्रयितुमुचितंतथापिप्रत्येकंसंयोगसञ्ज्ञेतिपक्षेदृषत्करोतीत्यादौलोपंवारयितुंसंयोगावन्तौयस्येतिद्विवचनान्तेनसमास लाभार्थमन्तग्रहणम्।वृत्तौहिउपसर्जनानामेकत्वसंख्यौत्सर्गिकीद्वित्वादिकंतुप्रयत्नलभ्यमितिभाष्येस्थितम्।यणइतिवाचनिकम्।यद्वावाच्योव्याख्येयः।व्याख्याचद्वेधा।झलोझलीत्यतोझल्ग्रहणमपकृष्यझलएवलोपोविधीयतइत्यन्तरङ्गेलोपेकर्तव्येबहिरङ्गस्ययणोसिद्धत्वमितिवा।नचषाष्ठीअसिद्धपरिभाषात्रिपादीस्थत्वेनासिद्धमन्तरङ्गंलोपंनपश्यतीतिवाच्यम्।कार्यकालपक्षाभ्युपगमात् ॥ ७ चान्तविशेषणंसंयोगान्तस्यसतःपदान्तस्येत्यर्थमन्तग्रहणमिति।तन्न।तादृशलस्याभावात्।अतएवघसोरितिसूत्रेद्विशकारकोनिर्देशइतिभाष्येउक्तम्।त्वद्रीत्यासंयोगान्तलोपस्यदुर्वारत्वेनशकारद्वयाभावात्तदसंगतिःस्पष्टैव।अपकृष्येति।तच्चषष्ठ्याविपरिणम्यवाक्यभेदेनसंबध्यते।तेनपूर्ववाक्यस्यक्वचिदझल्यपिप्रवृत्तिः।उत्तरवाक्येनचतस्यक्वाचित्कत्वंज्ञाप्यते।तेनचनातिप्रसङ्गः।ध्वनितंचेदमसोमशित्यत्रभाष्ये।तत्रहिमद्वयात्मकमादेशंविधायशित्वंप्रत्याख्यातम्।एकस्यमस्यसंयोगान्तलोपइतिचकैयटेनव्याख्यातम् ॥

अनित्यत्वादिति।तत्रचज्ञापकंकेणइतिनिर्देशः।कइअणइतिस्थितेलक्ष्यगतपरत्वमाश्रित्यप्राप्तइकारस्ययण्असिद्धपरिभाषयातन्न्यावर्त्यते।अन्तरङ्गंबलीयइतिपरिभा
षान्तरंनास्त्येवेतिभावः।वस्तुतओमाङोश्चेत्याङ्ग्रहणादनित्यमिदम्।तद्धिशिवआइहीतिस्थितेपरमपिसवर्णदीर्घंबाधित्वाधातूपसर्गकार्यत्वेनान्तरङ्गत्वादाद्गुणेवृद्धिबाधनार्थं
म्।अस्याउदाहरणंतुअक्षद्यूरिति।अन्यथान्तरङ्गेयणयूठसिद्धःस्यात्।मतभेदइति॥नवेतिवाशब्दस्वारस्येनवचनारम्भवादिनएवप्रत्याख्यानप्रकारोभाष्यकृत्तुतत्तर्हिवक्तव्यंनव

नचनाज्ञानन्तर्येबहिष्ट्वप्रक्लृप्तिरितिनिषेधः।तस्यानित्यत्वात्।उत्तरकालप्रवृत्तेलोपेजानन्तर्याभावाच्च।तथाचवार्तिकम्।संयोगान्तस्यलोपेयणःप्रतिषेधः।नवाझलोलो
पोद्बहिरङ्गलक्षणत्वादिति।इहयथोद्देशपक्षेआद्यंवार्तिकद्वयंतृतीयंतुकार्यकालपक्षइतिविवेकः।यत्त्वाहुः।वार्तिककृतोवचनंप्रत्याख्यानप्रकारद्वयंतुभाष्यकृतइ
ति।तन्निर्मूलम्।मतभेदेप्रमाणाभावात्।यदप्याहुः।काव्यंकलत्रंशाल्वंवाचक्षाणःकाव्कलत्शाल्अदभ्यतेरथब्इति।तदपिन।पक्षत्रयेपिसंयोगान्तलोपस्यदुर्ल
भत्वात्।आद्यपक्षद्वयेकरूप्यार्थंपूर्वंपूर्वमन्तरङ्गंपरंपरंबहिरङ्गमित्यल्लोपणिलोपयोरसिद्धत्वस्यसुवचत्वात्।अतएवकातन्त्रपरिशिष्टेश्रुक्रुयतेःक्विपिश्रुक्रुइत्यु
दाहृतम्।वान्तयोःक्विपिऊठोदुर्वारत्वात्।नचस्थानिवत्त्वम्।क्वौविधिंप्रतितन्निषेधात्।विचिलोपेव्योरितिलोपस्यप्रसङ्गाच्च।गिरिवेश्मयतेस्तुक्विपियणःप्रतिषेधार्थंवच
नारम्भपक्षेगिरिवेडिसुचितम् ॥

ॐ काव्यमित्यादिशब्दैरेवप्रत्याचष्टइतिसर्वंवार्तिककृतएवेतिभावः।कावित्यादि।संयोगान्तलोपादितिभावः।ननुपूर्वपूर्व
स्थानिकमन्तरङ्गमित्यर्थोनभाष्यसम्मतः॥किंतुपूर्वंपूर्वनिमित्तकमित्येव।किंचप्रातिपदिकाद्णिजुत्पत्तेरेवभाष्यसंमततयाबहिर्भूतसुब्निमित्तकसंयोगान्तलोपोपिबहिरङ्ग
इत्यरुचेराह।वान्तयोरिति।काव्येयलोपेस्थानिवत्त्वनिषेधाल्लोपोव्योरितिकृतेवान्तत्वमितिऊठ्दुर्वारोन्त्येचस्वतएवेतितत्रवलोपंबाधित्वोठ्दुर्वारइत्यर्थः।विचीति॥का
व्यशब्देइतिशेषः।यलोपेस्थानिवत्त्वनिषेधादेवंचप्राचीनोक्तंसंयोगान्तलोपोदाहरणत्वमयुक्तमितिभावः।शाल्वेतुअल्लोपादेःस्थानिवत्त्वान्नतत्प्रसक्तिरितिबोध्यम् ॥

मान्तमेवेति॥अस्यप्राप्नोतीतिशेषः।तस्मात्तत्पक्षेपिवाक्यभेदेनव्याख्यायगिरचेडित्येव।अन्यथारम्भप्रत्याख्यानयोः फलभेदःस्यादितिभावः।दिगिति।दिगर्थस्तुसंयोगान्तलोपसं
योगादिलोपविषयकतयारब्धस्ययणःप्रतिषेधइतिवचनस्यसंयोगान्तलोपविषयकस्यझलोलोपादितिप्रत्याख्यानम्।अतएवतत्रसंयोगान्तलोपोझलोलोपइतिभाष्येव्या
ख्याकृता।बहिरङ्गलक्षणत्वादित्यस्यतुबहिरङ्गोयणादेशोऽन्तरङ्गोलोपइतिव्याख्यानेनवार्त्तिकस्वारस्येनचेदृशानांलक्ष्याणामनभिधानमेव।वस्तुतस्तृतीयंवार्तिकंविसर्जनीय
सूत्रभाष्येकार्यकालपक्षमुपक्रम्यायुक्तोयंपरिहारोबहिरङ्गलक्षणत्वादित्यनेनदूषितमित्यलम्।उभयद्वित्वेति॥द्विधंद्वियमेकम्।१।पुनर्द्वित्वेत्रिधंत्रियम्।२।अन्यतरेति।एक
धंद्वियंत्रियंच।४।एकयंद्विधंत्रिधंच।६।द्वयोरपिद्वित्वेअन्यतरस्यपुनर्द्वित्वेद्विधंत्रियं।७।त्रिधंद्वियंच।८।अनुभयद्वित्वेएकधमेकयम्।९।लोपविकल्पान्यतरद्वित्वयोःसमफलतासंभ
प्रत्याख्यानपक्षेतुमान्तमेवेतिदिक्।इतिपक्षइति।पक्षद्वयस्यापिभाष्येस्थितत्वादितिभावः।चत्वारिरूपाणीति।यत्तुवदन्तिधकारयकारोभयद्वित्वेउभयोःपुनर्द्वित्वे
लोपविकल्पेन्यतरद्वित्वेनुभयद्वित्वेचनवरूपाणि।तथाहि।एकधंत्रिधा।एकयंद्वियंत्रियंच,एवंद्विधंत्रिधंचत्रिधेति।नचान्तरङ्गेद्वित्वेबहिरङ्गस्ययणोसिद्धत्वं,त्रैपादि
केऽन्तरङ्गेबहिरङ्गपरिभाषानप्रवर्त्ततइतिविसर्जनीयसूत्रेभाष्यकैयटयोर्व्यवस्थापितत्वादिति।अत्रेदंवक्तव्यम्।पुनर्द्वित्वमशुद्धम्।एकस्यांव्यक्तौएकंलक्षणंसकृदेवप्रव
र्त्ततइतिएकःपूर्वपरयोरितिसूत्रेभाष्येसिद्धान्तितत्वात् ॥ एवमात्रेणतुतदुक्तिः।एकःपूर्वपरयोरिति।तत्रहियथानयोःपूलयोःकटंकुर्वित्यादौएकवाक्यतयैवबोधाद्एकत्व
विवक्षणेनोभयसंबन्ध्येकैकैरणप्रतीतिस्तथाआदचिपूर्वपरयोर्गुणइत्यादावपिद्वन्द्वनिर्देशाद्विधेयगतसंख्याविवक्षणाच्चोभयोःस्थानेएकएवादेशोभविष्यतीत्येकग्रहणंप्रत्याख्या
यशङ्कितं,शास्त्राधिकारिणःपुरुषान्प्रतिप्रवृत्तंसंस्कारकंतत्तच्छास्त्रंप्रतिपुरुषमेकवाक्यतयासकृदेवार्थबोधकं,यथाधानेनाग्नीन्संस्कुर्यादित्यर्थकवसन्तेब्राह्मणोऽग्नीनादधीतेति
वाक्यंप्रतिब्राह्मणंसकृदेवार्थबोधकंसकृदेवस्वविषयेप्रवर्तकंच।अतएवपुनःपुनर्नाधानादिसंस्कारस्तथाव्याकरणशास्त्रस्यावर्णादचिपूर्वपरयोर्गुणोभवतिगुणवान्शब्दश्चसाधु
र्भवतिसचप्रयोक्तव्यइत्येतावत्पर्यन्तंव्यापारात्तत्रकृतस्यैकस्यखट्वेन्द्रस्यप्रयोगेणशास्त्रार्थस्यकरणान्मालेन्द्रादिप्रयोगोनस्यात् ॥

अतस्तत्तल्लक्ष्यविषयवाक्योपप्लवेनवाक्यभेदोवश्यंवाच्यः।तत्पूर्वपरविषयेपिस्यादितितत्रैकग्रहणमावश्यकमिति।तत्रगुणोभवतीत्यादौशीलस्यसंस्कारफलकएवयथाधानमग्निसंस्कारकंशास्त्रतात्पर्यविषयप्रयोगविधिश्चपुरुषसंस्कारकएवेतितदाशयः।ततःसिद्धान्तितम्।यथानित्यनैमित्तिककाम्यविधीनांतदकरणजन्यप्रत्यवायपरिहारायफलायचवाक्यभेदेनतत्तद्विषयकशास्त्रोपप्लवात्पुनःपुनःप्रवर्तकत्वम्।तथामभाष्यसाधुप्रयोगेप्रत्यवायश्रवणान्नित्यसमत्वंप्रयोगविधेरेकःशब्दःसम्यग्ज्ञातःशास्त्रान्वितःसुष्ठुप्रयुक्तःस्वर्गेलोकेकामधुग्भवतीत्यनेनकाम्यत्वंचेतितत्तद्विषयानन्तवाक्योपप्लवेनभवत्येवमालेन्द्रादिप्रयोगइति।एवंप्रयोगविध्यंशस्यनित्यकाम्यत्वव्यवस्थापनेनगुणविध्यंशस्यशुद्धसंस्कारार्थत्वमेवोक्तम्।एवंचतस्याधानादिवदेवाग्निस्थानीयत्वस्येषुसर्वेषुप्रकृतावपिएकाग्न्याविवेकत्वस्येनावृत्तिरितिपूर्वपरयोर्नादेशद्वयप्रसक्तिरितितत्तात्पर्यम्।एवंचस्पष्टमेवपूर्वपक्षसिद्धान्तयोरयंन्यायःसंस्कारकविधिविषयेसिद्धान्तितइतिभावः।संप्रसारणाच्चेतिसूत्रेभाष्येपिस्फुटोयम्।वैकल्पिकत्वादिति।एवंचपक्षेद्वित्वानामानन्त्यापत्त्यापरिनिष्ठितत्वाभावापत्तिः।नचत्वदुक्तरीत्याऽनन्त्यापत्तिप्रयुक्त

अन्यथाद्वित्वानामानन्त्यापत्तेः।नचझरोझरीतिहलोयमामितिचलोपेननिर्वाहः।लोपस्यवैकल्पिकत्वात्।कथमन्यथात्रिधंत्रियंचेतिभवदुक्तिःसंगच्छेत॥ ७ परिनिष्ठितत्वमसकृत्प्रवृत्तौबाधकमितिलभ्यते।तच्चनात्रद्वित्वस्यवैकल्पिकत्वेनयावच्छक्तिद्वित्वसहितप्रयोगस्यपरिनिष्ठितत्वसंभवात्।अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वंहिपरिनिष्ठितत्वमितिवाच्यम्।आनन्त्यापत्तेरित्यस्यचतुष्पञ्चादिधकारयकाराणामापत्त्यात्रिधमित्यादित्वदुक्तमर्यादाभङ्गापत्तेरितित्यर्थात्।तद्ध्वनयन्वक्ष्यति।नवत्वोक्तिरसंगतैवेति।आनन्त्यापत्तिरेवतन्न्यायबीजमितितुनयुक्तम्।उद्वोढामित्यादौउद्वहस्तामित्यवस्थायांसिज्लोपादेरसिद्धत्वात्सिचिवृद्धावोकारेलक्ष्येलक्षणस्येतिन्यायेनपुनर्वृद्धिर्नेतिसिचिवृद्धिरितिसूत्रस्थभाष्यविरोधात्।आनन्त्यापत्तेस्तत्राभावात्।एतद्भाष्यप्रामाण्येनविकारकृतभेदेननलक्ष्यभेदाश्रयणम्।स्तमःसुटीतिसूत्रेचास्यांमानम्।अन्यथासमोवालोपमित्यनेनान्त्यलोपेपुनर्द्वित्वेनत्रिसकारस्यापिसिद्धौतद्वैयर्थ्यंस्पष्टमेव।इरयोरेइतिसूत्रेइरयोरितिद्विवचनंतुस्वविधेयस्यस्वस्मिन्नुद्देश्यत्वाप्राप्त्यातत्प्राप्तयेइतिनतदस्यांमानम्।नचतत्रसहिवहोरोदितिनपरत्वसामर्थ्यान्नवृद्धिरितिवाच्यम्।अशाब्दत्वादन्तकालव्यावृत्तेरेवतेनशब्दमर्यादयालाभात्।एतेनसुद्ध्युपास्येपूर्वधस्यद्वित्वेजश्त्वेलक्ष्यभेदात्पुनर्द्वित्वमित्यपास्तम्।पूर्वमकारस्येदानीमोकारस्येतिलक्ष्यभेदस्योद्वोढामित्यादावपिसत्त्वेनोक्तभाष्यविरोधात्।विकारान्यानुपूर्व्यैक्येनलक्ष्यैक्यंतुसमाप्यस्त्येवेतिदिक्॥

इतिद्वित्वमपीति॥एतेनाष्टमिकवर्णद्वित्वंस्थानेद्वित्वमितिलक्ष्यभेदोस्तीतिपरास्तम्।पद्द्वित्वस्याप्यावृत्त्यापत्तेः।वस्तुतस्तस्याष्टद्वित्ववत्स्थानेद्विर्वचनमित्यन्यत्रनिरूपितम्॥प्रत्याख्यातमिति॥अनभ्यासप्रतिषेधोनर्थकश्छन्दसिवावचनान्नानूयतेनौनावेत्यादौनदोषइतिभाष्यम्।एकस्यैकाचोद्वित्वेकृतेएकाज्व्यपदेशोहेतोरचोद्विरुक्तत्वात्।अनेनन्यायेनाचःपुनःपुनर्द्वित्वाप्राप्तौअवयवान्तरस्यैकाज्वाभावेनतदप्रवृत्तौतद्ध्यर्थमितिचतदाशयःकैयटेनोक्तः॥कैयटादिभिरिति॥अत्रारुचिवीजंतुभाष्यप्रामाण्येनतेषामननिधानं,वीप्सेति

किंचैवंसतिसर्वस्यद्वेइतिद्वित्वमपिपुनःपुनःप्रवर्तेत।अतएवलिटिधातोरितिसूत्रेऽनभ्यासग्रहणंभाष्येप्रत्याख्यातम्।सन्नन्ताद्यङन्ताद्वाणिचिचङि·द्वित्वाभावार्थंतदितितुकैयटादिभिरुक्तम्।तस्मादिहत्यजवापञ्चमादीनिरूपाणिस्वीकुर्वतारूपानन्त्यमितिनवत्वोक्तिरसंगतैव।सकारद्वित्वेनाष्टैविसर्गद्वित्वेनषोडशेतित्वन्यदेतत्। यदप्युक्तंत्रैपादिकेन्तरङ्गेइत्यादि।तदपिन।नार्कुटोनार्पत्यइत्यत्रविसर्गनिवारणायवृद्धेरसिद्धत्वस्यतत्रैवभाष्येस्पष्टत्वात्।संयोगान्तलोपेयणःप्रतिषेधइत्यस्यबहिरङ्गत्वेनप्रत्याख्यातत्वात्।स्वयमपितथैवानूदितत्वाच्च।तस्मादिहयथोद्देशपक्षोग्राह्योबहिरङ्गपरिभाषायाअप्रवृत्तये।तथाचभाष्येमयःपुरस्ययणोद्वित्वेदध्यत्रेत्युदाहृतम्।नचैवमपिइकोसवर्णइतिशाकलेनरूपान्तरमस्त्वितिवाच्यम्।समासेतन्निषेधात्।नचनित्यसमासएवतन्निषेधइतिवाच्यम्।भाष्येनित्यग्रहणस्यप्रत्याख्यातत्वात्।यथोत्तरंमुनीनांप्रामाण्यात्।नन्विहयणेवदुर्लभः।सुधीशब्दस्यध्यायतेःसंप्रसारणेननिष्पन्नत्वेनसंप्रसारणेचेतिपूर्वरूपापत्तेरितिचेन्न ॥ ७५ ण्योरितिसूत्रस्थःसोऽसुप्यतेःसन्सोऽसुपिषतइतिभाष्यप्रयोगोपिच्छान्दसइत्याहुः॥रूपाणामानन्त्यमिति।रूपाधिक्यमित्यर्थः।तदाह॥

नवत्वोक्तिरसंगतैवेति॥सकारद्वित्वइति॥अच्चरयत्वावच्छिन्नंद्वयस्यलक्ष्यन्तत्रैकस्मिन्धकारेप्रवृत्तावपितादृशेसकारेलक्ष्यभेदात्पुनःप्रवृत्तिर्भवत्येवेतिभावः।एवंसंप्रसारणादिविधेयणत्वावच्छिन्नमुद्देश्यमितिलक्ष्यभेदाद्यावदुद्देश्यंपुनःप्रवृत्तिर्भवत्येवेतिननसंप्रसारणेइत्यादेर्वैयर्थ्यमितिबोध्यम्॥तदपिनेति।यथोद्देशपक्षेइत्यनुक्त्वासामान्येनयदुक्तंतदपिनेत्यर्थः॥तस्मादिहेति॥यणोमयइत्यत्रेत्यर्थः।विसर्जनीयसूत्रभाष्यात्तुकार्यकालपक्षेपित्रिपाद्यान्तदप्रवृत्तिरितिलभ्यतेमूलेतुकैयटानुसारेणेतिपरे ॥

संप्रसारणस्थानिकस्येति॥स्थानेजातस्येतिशेषः।साक्षात्संप्रसारणस्थानिकपूर्वरूपादेर्हलइत्यारम्भसामर्थ्यादल्विधौस्थानिवत्त्वाङ्गीकारेपिपूर्वरूपोत्तरंप्रवृत्तस्यहलइतिदीर्घ
स्यस्थानिवद्भावेनसंप्रसारणत्वेमानाभावइतिभावः॥द्वित्वंनेति॥यणोमयइतिप्राप्तंनेत्यर्थः॥द्वित्वप्रकरणेइति॥तथाचभाष्यंरेफस्यानुनासिकपरसवर्णाद्विर्वचनप्रतिषेधोवक्त
व्यः।स्वर्नयतिकुण्डरथेनभद्रह्रदः।नवक्तव्यः।रेफोष्मणांसवर्णानसन्तिनेमौरहौकार्यिणौकिंतर्हिनिमित्तंद्विर्वचनस्येति।अन्यथावचनारम्भेद्विर्वचनमात्रस्यनिषेधेनफलभेदेप्रत्या
ख्यानानापत्तेः।साक्षाच्छ्रुतेन।विशेषशब्दबोधितेनयत्रयत्रद्वित्वनिमित्तत्वंतत्रसर्वत्रवाक्यान्तरेणानचीत्यनेनकार्यित्वप्रसक्तेरनवकाशेनतेनभाष्यप्रामाण्यात्सामान्यतएवद्वित्वकार्यि
त्वंबाध्यतेइतिभावः॥नबाध्यतइति॥इदंचव्यक्तिपक्षेप्यावश्यकम्।अन्यथाकःसवर्णेइत्येतत्पर्यालोचनयाश्रीशइत्यादिविषयकयण्शास्त्राभावकस्यनवत्संग्राहकवाक्येइकःस्थानित्व
संप्रसारणपूर्वत्वेसमानाङ्गग्रहणमितिवार्तिकोक्तेः।संप्रसारणस्थानिकस्यातथात्वाच्च।नचैवमपिनभूसुधियोरितियण्निषेधःशङ्क्यः।आङ्गत्वेनप्रत्ययेपरतएवतस्यप्रवृत्तेः।अ
नन्तरस्येतिन्यायेनएरनेकाचइतिओस्सुपीतिचसूत्रद्वयेनप्राप्तस्यैवनिषेधाच्च।धात्वंशइति।अत्ररेफस्यद्वित्वंनद्वित्वप्रकरणेरहाभ्यामितिसाक्षाच्छ्रुतेननिमित्तभावेनरेफस्य
कार्यित्वबाधात्सुद्ध्युपास्यइत्यादौतुस्थानित्वेननिमित्तत्वमिकस्तस्मादित्युत्तरस्येत्यादिनिर्देशाज्ज्ञापकान्नबाध्यतइतिकैयटः।नकारस्यतुभवत्येवेत्युक्तम्।तच्चवेत्य
तोत्ररूपद्वयम्।आकृतिरितित्वेकमेव ॥ ꣼ श्रवणात्तद्विषयकलक्षणाभावस्यैवकल्पनंस्यादितिस्पष्टमिकोयणचीत्यत्रकैयटे॥कैयटइति॥अत्रारुचिबीजंतुअत्रस्थानित्वस्य
नानवकाशत्वंमध्वत्रेत्यत्रनिमित्तत्वाप्राप्त्यातत्रस्थानित्वस्यचारितार्थ्यात्।तक्रकौण्डिन्यन्यायोप्यनवकाशविषयएवइतिस्पष्टंतद्धितेष्वचामितिसूत्रेभाष्ये।तदप्राप्तियोग्यविषयाभाव
रूपंत्वानवकाशत्वमेतद्विषये।नचतक्रकौण्डिन्यन्यायोविधेयविषयएवविशेषविहितेनसामान्यविहितंबाध्यतइतिअभियुक्तव्यवहारादितिवाच्यम्।अपूर्वबोध्यत्वेननिमित्तत्वादेरपि
विधेयत्वात्।नहिनिमित्तवत्तत्त्वमपिमानान्तरसिद्धमितिदिक्॥एकमेवेति॥यण्तत्प्राग्वर्तियरोद्वित्वप्रयुक्तरूपभेदाभावादितिभावः।वकारस्तुनात्र,न्यूनानतिरिक्तस्थानकादेशलाभेना
धिकस्थानकस्याऽप्रवृत्तेः।लण्सूत्रस्थभाष्यविरोधेनेदृशानामनभिधानमितितत्त्वम् ॥

आर्त्नीं इति॥आङ्पूर्वाद्र्त्तेर्बाहुलकान्निप्रत्ययः धनुषः कोटी उच्यते॥आर्तिः पीडाधनुःकोट्योरित्यमरेनकाररहितः पाठो दृश्यते॥अर्तिरिति पाठान्तरम्।वार्तिकेत्वनेनत स्ववाचनिकत्वंसूचितम्॥पूर्वसूत्रेइति।वान्तज्ञानायतत्पर्यालोचनस्यावश्यकत्वादितिभावः॥ऋधेर्धस्येति॥नचद्वित्वभिन्नेपूर्वत्रकर्तव्येपरमसिद्धमित्यर्थकेनपूर्वत्रासिद्धमद्वित्वेइत्यनेनधातुधकारस्यजश्त्वेदस्येतिवक्तुमुचितमितिवाच्यम्॥फलेविशेषाभावेनतदनादरणात्।नह्यत्रजश्त्वात्पूर्वमनन्तरंवाद्वित्वेरूपेविशेषोस्ति।तदनन्तरंजश्त्व हलोयमाम्।लोपः स्याद्वेति।झयोहइत्यतोन्यतरस्यामित्यनुवृत्तेः।एतच्चल ण्सूत्रेभाष्येस्पष्टम्।माहात्म्यमिति।अत्रमलोपोनेत्यर्थः।हलोयमांयमिसवर्णेलोपइतितु नसूत्रितम्।आर्द्रीत्सूर्द्रः शार्ङ्ग आर्त्नीइत्यादौरेफात्परस्यलोपापत्तेः।वान्तोयि।यकारादाविति।विशेषणमात्मान्तस्यसञ्ज्ञास्यादित्येतदर्थकस्ययेनविधिरितिसूत्रस्यापवादभूतेनयस्मिन्विधिस्तदादावल्ग्रहणेइतिवार्तिकेनायमर्थोलभ्यते।ओदौतोरितिपूर्वसूत्रेतयोरेववान्तोप्रतिस्थानित्वेननिर्णीतत्वादित्यर्थः ननुगव्यूतिरित्यत्रहलिसर्वेषामितिलोपः शाकल्यस्येतिवालोपःस्यादित्याशङ्क्याह।वान्तइति।लव्यमिति।लुनातेरचोयत्।सार्वधातुकार्धधातुकयोरितिगुणः।अवश्यलाव्यमिति।ओरावश्यकइतिण्यत्।क्षय्यमिति।शकिलिङ्चेतिचात्कृत्याः।क्षेयमिति।अर्हेकृत्यतृचश्चेतियत्।हरस्हीति।इहओमाङोश्चेतिपररूपंप्राप्तम्।उरण्रपरः।आन्तरतम्यादिति। रेफशिरस्कस्यारइत्यस्यरेफद्वाराऋकारेणस्थानसाम्यादित्यर्थः।पक्षेद्वित्वमिति।ऋधेर्धस्येतिभावः।लोपोवेति।झयोहोऽन्यतरस्यामितिसूत्राद्विकल्पानुवृत्तेः।एतच्चनाज्झलावितिसूत्रेभाष्यकैयटयोःस्पष्टम्।प्राचस्तुविकल्पानुवृत्तेरनुक्तेर्न्यूनता।यदपिव्याख्यातृभिःशरोचीतिज्ञापकमुपन्यस्यतत्संवादार्थभाष्यमुपन्यस्तम्।अनुवर्ततेविभाषाशरोचि यद्वारयस्ययंद्वित्वमिति।तन्न।तदुत्तरभाष्येएवउक्तज्ञापकस्यदूषितत्वात्।लोपस्यहिनित्यत्वेअचोरहाभ्यामितिद्वित्वंलोपापवादःस्यात्॥ ञ प्रवृत्तेःसत्त्वात्।यत्रपूर्वत्रासिद्धप्रसक्तौ तन्निषेधेवाफलेविशेषस्तत्रैवास्याःपरिभाषात्वेनप्रवृत्तेरित्यन्यत्रविस्तरः।यद्वाधस्यधस्थानिकस्येत्यर्थइतिदिक्। नाज्झलावितिसूत्रेइति॥हयवरट्सूत्रशेषेचेत्यपिबोद्ध्यम्॥अनुक्तेरिति।हलोयमामित्यत्रझरोझरीत्यत्रचेतिभावः॥ज्ञापकमिति।उभयत्रापिविकल्पानुवृत्ताविति भावः॥लोपस्यहीति।लोपमात्रस्येत्यर्थः॥ लोपापवादइति॥आरम्भसामर्थ्या

म॰ श॰ ज्ञापकान्तरमिति॥अणुदित्सूत्रस्थमणग्रहणंहलः परस्ययरोलोपोवैकल्पिक इतिसामान्यापेक्षमाश्रयणीयमितिभावः॥तस्यहलोयमामितिविशेषापेक्षत्वेआह॥व्याख्यानमेववे
१८ ति॥यदितुहलोयमामित्यत्रविकल्पंसिद्धंकृत्वाद्वित्वस्यतद्विषयेचारितार्थ्येनझरोझरीत्यत्रतदनुवृत्तौशरोचीतिज्ञापकमुपन्यस्यतेतदासम्यगेवपरंतुप्राचांभाष्यसंमतिलेखः प्रा
मादिकस्तद्भाष्यस्योभयविषयतयाप्रवृत्तेः।असंभवादिति॥नचआअवतीतिऔर्जनस्यऔर्जनोरित्यादाववेःक्वावूठ्याद्गुणेपरादिवत्त्वेनोठ्त्वात्संभवोस्ति।नचवृद्धिरेचीतिवृद्धिरोमा
ङो॥श्चेत्यनेनबाधादनेनतुसामर्थ्यात्तद्बाध्यत इतिवाच्यम्।तस्यानभिधानादित्याशयात्।किंचओमाङोरित्येतद्बाधकल्पनापेक्षयासामर्थ्येनलस्यानुरोधेनचैचीत्यस्यासंबध[illegible]पनेयो
तथाचशरोचीत्यस्यसार्थक्यंस्पष्टमेव।तस्माद्विकल्पानुवृत्तौज्ञापकान्तरमनुसर्तव्यम्।भाष्यकारादिव्याख्यानमेववाशरणम्।द्वित्वलोपयोरिति।यत्तुद्वित्वविधानसाम
र्थ्याद्भावेवशिष्येतेइतितन्न।लोपस्यवैकल्पिकत्वेनद्वित्वस्यपक्षेचरितार्थत्वात्।त्रिधमिति।यणोमयइतिलक्षणान्तरेणपुनर्द्वित्वेतुचतुर्थमपिबोध्यम्।एत्येधत्यूठ्सु।अत्र
एचीत्यनुवर्त्ततेतच्चएतेरेवविशेषणंनत्वेधतेः।अव्यभिचारात्।नाप्यूठः।असंभवादितिप्राञ्चः॥अत्रकैयटः।एधतेरपिविशेषणम्।माभवान्प्रेदिधदित्यत्रव्यभिचारात्।यद्य
पीदंकैयटपुस्तकेषुप्रायेणनदृश्यतेतथापिक्वचिद्दृश्यतएव।नचणौचङीतिह्रस्वेकृतेनायमेधतिरितिवाच्यम्।एकदेशविकृतस्यानन्यत्वात्।नचैवमप्यजादेर्द्वितीयस्येतिधिश
ब्दस्यानेधिधिशब्दादेशेसतिवचिसोरिवप्रकृतिप्रत्ययविभागसंमोह इतिवाच्यम्।द्विः प्रयोगोद्विर्वचनंषाष्ठमितिषाष्ठभाष्येसिद्धान्तितत्वात्।अन्यथेहैवणिलोपोनस्यात् ॥
चिता॥ह्रस्वेकृतेइति॥वृद्धेः पूर्वमित्यादिः।वार्णपरिभाषयेतिभावः॥अनन्यत्वादिति॥नचाचः परस्मिन्नितिस्थानिवत्त्वेनैजादित्वंसुलभं, पूर्वपरविधित्वात्।पूर्वस्यैवविधौहिसः।मध्येपवादन्यायेना
द्गुणंबाधित्वाद्वृद्धिरेवस्यात्।उपैधतइत्यादौतुपरत्वात्पररूपमेवस्यादितिभावः॥संमोह इति॥एधतेरादेशाभावेनेनस्थानिवत्त्वेनतत्वम्॥नस्यादिति॥नचणेरनिटीत्यस्यण्यन्तस्याङ्गस्यलोपइत्यर्थः स
चालोन्त्यपरिभाषयान्त्यस्य।एवंचप्रकृतेनदोषः।सर्वेसर्वपदादेशाइतिन्यायेनधीत्यस्यधिधिइत्यादेशसत्त्वेनस्थानिनोण्यन्ततयाआदेशेपिस्थानिवद्भावेनण्यन्तत्वस्यसुलभत्वादितिवाच्यम्। रामः
अलोन्त्यपरिभाषयानिर्दिश्यमानपरिभाषयाचणेरनिटीत्यस्यण्यन्तस्याङ्गस्यान्त्योनिर्दिश्यमानोणिस्तस्यलोपइत्यर्थेनदोषात्।अन्तेणेरसत्त्वात्।सूत्रंतुआद्यादित्यादौचरितार्थमितिभावः॥ १८

कुत्वंनस्यादिति॥हन्त्यवयवहकाराभावात्।सन्संबन्धिसकारवैशिष्ट्याभावेतुस्थानिवत्त्वेनकुत्वंस्यादपीतिभावः अन्तरङ्गत्वादिति॥चङ्परणिनिमित्तह्रस्वापेक्षयाचङ्मात्रनिमित्तत्वेनाल्पपदार्थापेक्षत्वादित्यर्थः।भाष्येतुनित्यत्वमात्रमेवद्वित्वस्योक्तम्॥ज्ञापितत्वादिति॥इदंचणौचङीतिसूत्रेभाष्येस्पष्टम्॥असंगतंस्यादिति॥सुनोतिग्रहणेनसावयतेरपिग्रहणेनशङ्काजिघांसतीत्यादौसनःसकारेणविशिष्टस्यद्वित्वेकृतेकुत्वंचनस्यात्।नचान्तरङ्गत्वात्प्रथमंचङीतिद्वित्वेकृतेह्रस्वोनभवत्येवेतिवाच्यम्।ओणेर्ऋदित्करणेनबहिरङ्गस्यापिणौचङीतिह्रस्वस्यप्रथमंप्रवृत्तिरितिज्ञापितत्वात्।अत्रमाधवः।माभवान्प्रेदिधदित्यत्रनातिप्रसङ्गः।ण्यन्तस्यशब्दान्तरत्वादेधतिग्रहणेनाग्रहणात्।अतएवहिनभाभूपूकमिगमीत्यत्रण्यन्तानांचभादीनामुपसंख्यानमित्युक्तम्।तत्रैवशब्दान्तरत्वादप्राप्तानुपसंख्यानमितिकैयटन्यासकारहरदत्तादिभिःसर्वैरेवोक्तम्।किंच ण्यधिकस्यापिग्रहणेउपसर्गात्सुनोत्यत्राभिषावयतीत्युदाहृत्यण्यन्तेनाभेर्योगात्सुनोतिंप्रत्यनुपसर्गत्वात्कथंषत्वमित्याशङ्क्याभेःप्रकृत्यर्थविशेषकत्वेनसमाधानंभाष्यकाराद्युक्तमसंगतंस्यात्।नचहेरचङीतिलिङ्गात्प्रकृतिग्रहणेण्यधिकस्यापिग्रहणमितिभ्रमितव्यम्।ज्ञापकस्यकुत्वमात्रविषयकत्वात्।तथाचवार्तिकम्।हेश्चङिप्रतिषेधानर्थक्यमङ्गान्य[illegible]त्।ज्ञापकंतुचङोन्यत्रण्यन्तेपिकुत्वभावस्येति।तस्माद्युक्तिविरोधाद्भाष्यवार्तिकवृत्तिन्यासादिग्रन्थैःपूर्वापरस्वग्रन्थेनचविरोधादुपेक्ष्योयंकैयटइति।अत्रेदंवक्तव्यम्।अस्तुविशिष्टस्यशब्दान्तरत्वंतावतापिप्रकृतिभागस्यैधूपत्वंकेनापगतमित्यवधार्यताम्।नह्युपेधतइत्यादौतिङन्तस्यैधूपतानास्तीतिप्रकृत्यंशेसाहीयते।तथाचोपसर्गात्सुनोतीतिसूत्रेवार्तिकंसिद्धंत्ववयवानन्यत्वादिति।यत्त्वभिषावयतीत्यत्रत्वंभाष्यविरोधोद्भावनंतद्विपरीतम्।यतःप्रकृतेःसुनोतिरूपानपायात्।कैयटमतेसिद्धायथोक्ताव्यवस्था।त्वन्मतेतुरूपान्तरत्वेनण्यधिकस्याग्रहणादसंगतैवप्रागुक्तव्यवस्थास्यात्।कोह्येधयतिसावयत्योर्विशेषः॥ ७७ याएवाभावादितिभावः॥अवयवानन्यत्वादिति॥ये[illegible]त्वावयवस्यसुनोतेःसुनोतिभिन्नत्वाभावादितितदर्थः॥सुनोतिरूपानपायादिति॥सुनोतित्वानपायादित्यर्थः॥असंगतैवेति॥ण्यन्तेनाभेर्योगादितिशङ्काप्रकृत्यर्थविशेषकत्वेनसमाधानरूपाचव्यवस्थासंगतैवस्यात्॥त्वदुक्तिरीत्याण्यधिकेषत्वाप्राप्तेरित्यर्थः।तदेवाह॥कोहीति॥

ग्रहइति।समस्यमानपदस्वरूपबोधकमित्यर्थः।ततइनाविति।।अतइनिठनाविति विहितेइत्यर्थः।अन्तरङ्गेणेति।।प्रथमप्रवृत्तिकेनेत्यर्थः।समर्थग्रहणेनकृतसन्धिकार्यादेवत
द्धितोऽस्यातद्विषयेऽकृतव्यूहपरिभाषायाअप्रवृत्तेस्तस्याअसत्त्वाच्चेतिभावः।।चरितार्थत्वादिति।।तद्धुटकोहिनीशब्दस्यकल्पितार्थेनाप्यर्थवत्त्वाभावेनतत्रैतत्सूत्राप्रवृत्तेश्चेत्यपि
यदेधतेर्ण्यधिकस्याग्रहणंसुनोतेस्तुग्रहणमिति।यदपिण्यन्तभादीनामुपसंख्यानमुपन्यस्तंतदपिनास्माकंप्रतिकूलम्।विशिष्टस्यशब्दान्तरत्वेनप्रकृत्यंशस्य[illegible]
चाव्यवधानेनोपसंख्यानस्यआवश्यकत्वात्।अतएवनतत्रत्यन्यासादिभिः स्वोक्त्यावाविरोधः।प्रत्युततत्रैवविरोधः।षाष्ठेभाष्यवार्तिकयोरेत्येधत्योरितियोगवि
भज्यैवेतिविशेषितत्वात्।तस्मादिहवृत्तिग्रन्थोमाधवग्रन्थश्चासङ्गतएवेत्यभिप्रेत्यव्याचष्टे।एजाद्योरिति।अक्षौहिणीति।ऊहोऽस्त्यस्याऊहिनीअक्षाणामूहिनीतिविग्र-
हः।परिमाणविशेषविशिष्टासेनाअक्षौहिणी।पूर्वपदात्संज्ञायामितिणत्वम्।यत्तुप्राचाविगृहीतमक्षाणामूहः समूहः सोऽस्त्यस्याइति।तदपिऊहिनीशब्देनषष्ठीतत्पु
रुषइत्येवंपरतयैवकथंचिन्नेयम्।ऊहशब्देनसमासेततइनौतुवृद्धिर्नस्यात्।अन्तरङ्गेणगुणेनबाधात्।अपवादभूतायाअपिवृद्धेरूहिनीशब्देनविग्रहेचरितार्थत्वा
त्।तथाचोक्तंप्राक्।इण्ङिशीनामाद्गुणःसवर्णदीर्घत्वादिति।स्वादीरेरिणोः।इरेरिण्योरितिक्वाचित्कोपपाठः।स्वैरीतिणिन्यन्तस्य स्त्रियांवृद्ध्यभावप्रसङ्गात्।स्वैरिणीत्य
त्रतुङीपःप्रागभ्यागमादायवृद्धिर्बोध्या।यत्तुव्याचख्युः।लिङ्गविशिष्टपरिभाषयेतितन्निष्फलम्।प्रादूहोढोढ्येषैष्येषु।अत्रोहशब्दःकैश्चित्प्रक्षिप्तोभाष्यादौतुन
दृश्यतइतिप्राञ्चः।इदानींतनपुस्तकेषुतुभाष्यवार्तिकयोरूहशब्दोदृश्यतएव।नानर्थकस्येति।उपस्थितस्यार्थस्यशब्दंप्रतिविशेषणत्वसंभवेत्यागायो
गादितिभावः।सीरदेवस्त्वाह।वृश्चेतिसूत्रेराजेःपृथग्भ्राजिग्रहणमिहज्ञापकमिति।नन्वेतदयुक्तंफणादिनाराजिनासाहचर्यात्तथाभूतस्यैवएत्वार्थ
तयाभ्राजिग्रहणोपक्षीणत्वादितिचेत् ।।
बोध्यम्।।ज्ञापकमितीति।।भ्राजौराजेरपिसत्त्वेनराजिग्रहणेनैवसिद्धेस्तद्व्यर्थंसत्ज्ञापकमितिभावः।तथाभूतस्यैवेति।फणादेरेवेत्यर्थः ।।

राजइतिपठित्वेति॥नचैवमनुबन्धनिर्देशाद्राराष्ट्रीत्यादौयङ्लुकिषत्वंनस्यादितिवाच्यम्।यङ्लुकश्छान्दसत्वात्श्तिपाशपेत्यस्यानित्यत्वाच्चभाष्येतस्यानुक्तत्वाच्च।एतेनफणादित्वेनग्रहणेगणेनग्रहणाद्यङ्लुकिनस्यादित्यपास्तम्।गणेननिर्देशाभावाच्च।राट्विभ्राट्इत्यादौराज्त्वंतुभूतपूर्वगत्याराशब्दपूर्वकेज्धातोःक्विपिनिष्पन्नराज्शब्देनपुंसकेनषत्वंसूत्रेराजइत्यनुनासिकस्यपाठात्॥सीरदेवोक्तमिति॥अत्रारुचिबीजंतुव्रश्चादिसाहचर्येणधातुसञ्ज्ञकराजेर्ग्रहणंस्यादितिभ्राजिग्रहणस्यावश्यकत्वम्।किंचभ्राजन्तर्गतराजेर्नेऋकारानुबन्धत्वंतस्यसमुदायानुबन्धत्वादिति॥भाष्यादिविरुद्धमिति।तदनुक्तत्वादितिभावः॥गतार्थमिदमिति।पूर्वपरयोरितिद्विवचननिर्देशेनोभयोरपिप्रत्येकंस्थानिवत्त्वादितिभा
विभ्राट्विभ्रागितिरूपद्वयंहिसाध्यंतच्चव्रश्चादिसूत्रेराजइतिपठित्वापिसुसाधम्।एकस्यभ्राजतेर्ऋकारस्यप्रागपिदातुंशक्यत्वात्।ऋभ्राजइति।भ्राजभासेतिविकल्पस्य
वाचनिकतयाऋकारस्यआत्मनेपदमात्रफलकतयावक्ष्यमाणत्वेनतत्स्थानेऽकारस्यसुपठत्वाच्च।तस्मात्सीरदेवोक्तंज्ञापकमपिसम्यगेव।प्रैष्यइति।एषसाहचर्यादेष्योपि
अनव्ययंगृह्यते।तेनण्यन्तादिषेःक्तोल्यपिपररूपमेवनतुवृद्धिः।प्रेष्यगतः।प्रवत्सतरेति।अत्रकालापानुसारिणोवत्सरशब्दमपिपठित्वावत्सरेदेयमृणंवत्सरार्णमित्युदाहरन्ति।
[illegible]रेतुवत्सशब्दमपिपठन्तितत्सर्वंभाष्यादिविरुद्धम्।अन्तादिवच्च।इहैकःपूर्वपरयोरित्यनुवर्ततेयथासंख्यंचेत्यभिप्रेत्याह।पूर्वस्यान्तवदिति।स्थानिवत्सूत्रेणैवगतार्थमिदंसूत्रं
म्।नवाल्विध्यर्थमिदमितिभणितव्यम्।अस्याप्यल्विधावनिष्टत्वात्।अन्यथाअयजेइन्द्रमित्यत्रसवर्णदीर्घापत्तेः।तथाचवार्तिकम्।नवाअताद्रूप्यातिदेशाद्इति।नविसर्गइति।एतच्च
सुखार्तइत्यादावपितुल्यम्॥६ वः॥एवंचप्रार्छतीत्यादौविसर्गवारणायज्ञापकाश्रयणमपिनकार्यंयतस्तत्रस्थानिवत्त्वेनरेफान्तपदत्वंदुर्लभंतस्यतत्स्थानिधर्मत्वाभावात्।आनुमा[illegible]
कल्पनयाप्र[illegible]त्वस्यप्राक्यादेशेतुसमुदायेप्रशब्दधर्माणांस्थानिवत्त्वेनलाभेपिप्रारित्यत्रतदलाभेनरेफेपदान्तत्वस्यदुर्लभत्वादितिबोध्यम्॥नवेति।वर्णाश्रयेविधावन्तादिवद्भावप्राप्तेषे
धोवाच्यइत्यस्यप्रत्याख्यानमेतत्।नवावक्तव्यंताद्रूप्यस्यवर्णमात्रवृत्तिधर्मस्यानेनातिदेशाभावादितिनदर्थः।पूर्वस्यचसमुदायस्यान्तादिभ्यांवर्णाभ्यांपृथगवस्थिताभ्यांयेव्यवहाराःप्रातिपदिक
त्वसुबन्तत्वप्रत्ययत्वादयस्तेकृतैकादेशस्यापिभवन्तीत्यर्थात्।अतएवतुक्यसिद्धवचनंचरितार्थम्।अन्यथाधीत्येत्यादौह्रस्वप्रयुक्ततुक्सिद्धेरसिद्धवचनवैयर्थ्यंस्पष्टमेव।अतएवखट्वाभिरित्य

म·श· अत्रचेति॥सुखार्त्तइत्यत्रप्रार्च्छतीत्यत्रचेत्यर्थः।आद्ये विशिष्यऋतशब्दतृतीयासमाससापेक्षत्वेनान्त्ये उपसर्गत्वधातुत्वादिसापेक्षत्वेनवृद्धेर्बहिरङ्गत्वादितिभावः।अचोरानन्तर्यमिति
२० ।अचोजानन्तर्यनिमित्तमित्यर्थः। पश्चात्प्रवर्तमानेइति। अन्तरङ्गेइत्यर्थः। अत्रचषत्वतुकोरितिसूत्रस्थतुग्ग्रहणंज्ञापकम्। अन्यथाधीत्येत्यादौल्यप्प्रवृत्तयेपूर्वंसमासेजातेतत्रसं
हितायानित्यत्वाल्ल्यबुत्पत्तिपर्यन्तमप्यसंहितयावस्थानासंभवेनएकादेशेल्यपितुगपेक्षयापदद्वयसंबन्धिवर्णद्वयापेक्षैकादेशस्यबहिरङ्गतयासिद्धत्वेनतद्वैयर्थ्यंस्पष्टमेव।तत्रपश्चा
त्प्रवर्तमानेतुकचोऽन्यानन्तर्यनिमित्तककार्यत्वान्नदोषः।अजानन्तर्यमिति॥अचोन्यानन्तर्यमित्यर्थः।यत्क्रियेति॥यदर्थक्रियायुक्ताइत्यर्थः॥इत्युक्तत्वादिति।भाष्यकारादिभिरितिशेषः।[illegible]रा
अत्रचकार्यकालपक्षेबहिरङ्गत्वादसिद्धत्वमपिबोध्यम्।नचनाजानन्तर्यइतिनिषेधः।यत्रान्तरङ्गेबहिरङ्गेवाअचोरानन्तर्यंतत्रेतिहरदत्तपक्षेतत्प्राप्तावपियत्रपश्चात्प्रवर्त
मानेऽचआनन्तर्यमितिकैयटमतेनिषेधाप्राप्तेः।बहूपेक्षत्वेनबहिरङ्गायांवृद्धावजानन्तर्यसत्त्वेपिपश्चात्प्रवर्तमानेतदभावात्।उपसर्गेणेति।यत्क्रियायुक्ताःप्रादयस्तंप्रत्येव
गत्युपसर्गसंज्ञाइत्युक्तत्वादितिभावः।प्रार्षभीयतीति।शरोचीतिद्वित्वनिषेधः।प्रेजतइति।एजृदीप्तौ।कंपनार्थस्तुपरस्मैपदी।एजतेकंपतइतितुप्राचांव्याख्यानंप्रामादिक
मेव।एङ्येङित्येवसिद्धेपरग्रहणमतोगुणइत्युत्तरार्थंरूपग्रहणंतुचिन्त्यप्रयोजनम्।एङिपरइत्येवसिद्धेः।यथाअभिपूर्वइति।नियोगोवधारणमिति।यदाहुः ॥
र्थमिति।तेनाद्यश्र्यात्मिन्द्युःपचन्तीत्यादिसिद्धिः॥अतोगुणइत्युत्तरार्थमितिक्वाचित्कोऽपपाठः॥चिन्त्यप्रयोजनमिति॥नचशिवायेत्यत्राणोप्रगृह्यस्येत्यनुनासिकत्वेतदनुकरणेततःप
त्मोमित्यस्यौमाङोश्चेतिपररूपेऽनुनासिकाभावार्थंपरस्ययादृशंरूपंतादृशंयथास्यादितिरूपग्रहणंस्पष्टंचेदमैओजित्यत्रभाष्येकैयटेचेतिवाच्यम्॥तृज्वत्क्रोष्टुरितिसूत्रभाष्योक्त
रीत्यागुणस्यशब्दत्वादिवद्रूपत्वाभावेनरूपग्रहणेनाव्यावृत्तेः रूपशब्देनचश्रवणज्ञानविषयोवयवसंस्थानवान्अतएवतृज्वत्सूत्रेनहिस्वरोरूपवानित्युक्तम्।वर्णरूपावयवसंस्थानमेव
शब्दस्यरूपंतद्वत्तयैवशब्दस्यरूपमितिव्यवहारःस्वरस्तुनतद्वानितिशब्दत्वादिवन्नसशब्दस्यरूपमितितदर्थः॥तत्रसूत्रेरूपातिदेशेस्वरातिदेशोनस्यादित्युपक्रम्येदमुक्तम्॥परःकिं रामः
गुणकोभवतीत्याकाङ्क्षायांस्थानिगुणकइतिलभ्यते।तत्रोभयगुणकस्यासंभवादेकस्यान्यन्तरतमत्वात्तद्गुणकस्यैवोपस्थित्याचतस्यैवसिद्धेश्च॥परशब्देनप्रयोगस्यस्योपस्थितस्यग्रह २०

णं प्रयोगे च गुणो भेदकस्त्व। शास्त्रे परमुच्चारितो गुणोऽभेदकोऽन तु प्रयोगे इति परशब्देनोपस्थितानानुनासिकस्यैवैकस्यान्यन्तरतमत्वाद्विधिः। यत्र तु स्थानिद्वयगुणकसंभवस्तत्र स एवात एव स्वरितान्त सुब्रह्मण्याशब्दस्य निपातत्वादुदात्तेन ओंशब्देनोमाङोरित्येकादेशः सुब्रह्मण्योमिति स्वरित इति तस्यादित इति सूत्रे भाष्यकैयटयोः स्पष्टम्। ऐओजिति सूत्रे एकादेशे आद्गुणइत्यादेः दीर्घग्रहणं कर्तव्यं त्रिमात्रचतुर्मात्राणां त्रिमात्रचतुर्मात्रा आदेशा माभूवन्निति वार्त्तिककृतोक्तेः कः सवर्णे इत्यत्र योगविभागेनेकः पूर्वपरयोरिति योनिर्दिष्टः स दीर्घ इति व्याख्यानेप चन्नीत्यत्र दोषमाशङ्क्यैकदेशिनोक्तं रूपग्रहणात् परस्य यादृशं रूपं नित्यादिभाष्ये। ननु ह्रस्वस्य स्वरूपताभिमानेन। सिद्धान्ते तु स्पष्टार्थमेव रूपग्रहणमिति तत्रैव भाष्ये सूचितम्। इ

अनवक्लृप्तौ यद्यदृष्टः पररूपस्य गोचरः। एवं वस्तु विपर्यासे दुर्निर्णेयं यदा भवेदिति। एतेन नियोजनं नियोगो व्यापार इति व्याख्यानं परास्तम्। यद्वैव पूर्वं ज्वलने शरीरं। ममैव जन्मान्तरपातकानामित्यादिप्रयोगविरोधात्। उदाहृतधृतिस्य श्लोकविरोधात्। लङः शाकटायनस्यैवातपस्त्वपुः कर्मकस्यैवेत्यादि सौत्रप्रयोगविरोधाच्च। यत्तु श्लोकवार्त्तिकमिदमित्याहुस्तद्भ्रमसात्। शकन्ध्वादिष्विति। शकन्ध्वादिविषये तत्सिद्धानगुणं पररूपं वाच्यमित्यर्थः। अत एवाह। तच्चटेरिति। यदित्वादित्यधिकारादकारस्यैवेष्येन तर्हि मनीषापतञ्जलिरिति न सिद्ध्येत्। केचित्तु मनः पतञ्जल्योः पृषोदरादित्वादन्त्यलोपेऽकारस्यैव पररूपमाहुः। शकानां देशविशेषाणामन्धुः कूपः शकन्धुः। कर्कोणां राज्ञामन्धुः। बदरीवाचीतु कर्कन्धूशब्दो दीर्घान्तः। अन्दूदृम्भूइत्यादिना उणादिषु व्युत्पत्तेः। अटतीत्यटा। पचाद्यच्। कुलस्य अटा कुलटा ॥ ६७ कोगुणेति सूत्रस्य कैयटस्तु विस्पष्ट एव। तत्र हि इक्परिभाषाभावेऽजनेर्गुणोऽनुनासिकः स्यादिति शङ्किते पररूपेण शुद्धो भविष्यतीति भाष्ये उक्तं तस्य मदुक्तरीत्या उपपत्तेः। ऐऔजिति सूत्रस्य कैयटस्तु पूर्वपक्षोपपादकत्वान्न स्वार्थसाधक इति

टीका॥ नावक्लृप्तौ यदेति पाठे न च्छन्दोभङ्गः। तद्भ्रमसादिति॥ उन्नौ भवमिति व्याख्याने वार्त्तिकशब्दस्य पूर्वनिपातापत्तिरित्याहुः। विषये इति॥ शकन्ध्वादिष्विति विषयसप्तमीति भावः॥ अत आहेति। ईदृशव्याख्यानतो लब्धमाहेत्यर्थः। आहुरिति॥ अत्रारुचिबीजं तु वचनद्वयव्यापारो व्यर्थः पृषोदरादित्वाद्विलोपेनैव सिद्धिरिति॥ देशविशेषाणामिति॥ देशविशेषशब्दस्य योगिरूढेन जातिवाचकत्वाभावाद्विशेषणानां चाजातेरिति न निषेध इति बोध्यम्। कुलस्याटेति। कर्मणः शेषत्वविवक्षायां षष्ठी। अन्यथा कर्मण्यणि कुलाटीति स्यादिति भावः ॥

म·श· किंचित्साम्येनेति॥तदभावेहिभयदन्ताद्युच्चारिताव्यक्तशब्देष्वस्मादव्यक्तत्वस्यार्थबोधाजनकत्वेनापिवक्तुंशक्यमित्याहुः।निरालम्बनत्वादिति॥अद्ग्रहणंतद्भिन्नव्यावृत्त्यर्थमित्य
२१ र्थस्यबालैरपिसुज्ञेयत्वेनातः किमितिप्रश्नस्यदान्तेमाभूत्वटकृमरुदित्यत्रचमाभूदितिउत्तरस्यचनिरालम्बनत्वमित्यर्थः।शब्दाधिकारेति॥तदाश्रयणाच्चात् शब्दस्येत्यर्थोऽभविष्य
ईषउञ्छेईषगत्यादिषु।आभ्यांगुरोश्चहलइत्यप्रत्ययईषा।मनसईषामनीषा।हलस्यईषाहलीषा।लाङ्गलदण्डः।मूर्द्धन्योपधः।यस्तुप्रभुशङ्करयोरीशः स्त्रियां
लाङ्गलदण्डकेइतिरभसकोशात्तालव्योपधस्तस्मिन्परेआद्गुणइत्येवभवति।हलेशा।पतन्नञ्जलिर्यस्मिन्नमस्कार्यत्वादितिपतञ्जलिः।मार्तण्डइति।के
चिदत्रसवर्णदीर्घमाहुः।परामार्तण्डमास्यत।पुनर्मार्तण्डमाभरत्।विश्वोमार्तण्डोव्रजमित्यादिवैदिकप्रयोगास्तेषामनुकूलाः।ओत्वोष्ठयोरिति।अकारस्यओ
त्वोष्ठयोश्चैकत्रसमासेस्थितौसत्यामिदंप्रवर्तते।तेनेहन।वृषलसुतौष्ठव्रणस्तेइति।अव्यक्तशब्दंव्याचष्टे।ध्वनेरिति।अनुकरणस्येति।परिस्फुटाकारादिवर्णस्ये
तिभावः।तस्यचानुकरणत्वंकिंचित्साम्येनबोध्यम्।यत्तुप्राचोक्तम्।अतःकिम्।दकारान्तेमाभूत्इति।यच्चव्याख्यातंदकारान्तइतिरूपान्तरोपलक्षणंवटकृमरुतद्
स्यादेरपीति।तन्निःसारम्।प्रश्नस्यदान्तइत्युत्तरस्यचनिरालम्बनत्वात्।यत्तुव्याचख्युः।अतोगुणइत्यतोऽतइत्यनुवर्त्यशब्दाधिकाराश्रयणात्सिद्धमितिप्रश्नः।यदाज
श्त्ववशाद्दान्तत्वंतदापिस्यात्पुनर्द्रुहपोतुनान्तत्वस्याविवक्षणान्नेत्युत्तरमिति।तच्चिन्त्यम्।जश्त्वशास्त्रस्यासिद्धत्वेनपररूपस्यैवप्रवृत्तेः।नाम्रेडितस्येतिनिषेधेप
टत्पटदितीत्युदाहरणस्यासंबद्धत्वापत्तेश्च।तत्रहिभवदुक्तरीत्याप्राप्तिरेवनास्ति।दान्तत्वात्।एतेनानुकार्यानुकरणयोरभेदविवक्षया।विभक्त्यभावेनगवित्ययमा
हेतिवद्पदत्वात्पटत्इतीत्यत्रजश्त्वंनेतिग्रन्थोपिप्रयुक्तः ॥ ७ तीतिभावः।तदापिस्यादिति॥एकदेशविकृतन्यायेनाव्यक्तत्वादितिभावः॥जश्त्वशास्त्रस्येति॥
अनुकार्यानुकरणयोर्भेदेपि दान्ततयाजश्त्वेपीत्यादिः तदसिद्धत्वेनातएवसत्त्वादितिभावः।ननुपुनरत्ग्रहणाज्जश्त्वासिद्धत्वमपिबोध्यतामतआह॥नाम्रेडितेति॥उदाह राम·
रणस्य।इत्यादिस्यस्य।अनुकार्यानुकरणयोरिति।सर्वत्रजश्त्वप्राप्तौदाहरणासम्भवाशङ्कायांह्येतदुक्तंतैरितिबोध्यम् ॥ २१

उत्तरग्रन्थेति॥नाम्रेडितस्येत्यस्यपटत्पटदितीत्युदाहरणपरग्रन्थेत्यर्थः।ननुसग्रन्थोजश्त्वासिद्धत्वेनयोज्यइतिचेत्तत्राह॥जश्त्वेति।तस्यासिद्धतयापररूपेणैवभवितव्यमितिजश्त्वस्याप्रवृत्तिलक्षणोबाधः।एवंचयदाजश्त्वंबाधाक्रान्तत्वमितिग्रन्थासंगतिरितिसेयमुभयतस्पाशारज्जुरितिभावः॥दिगिति॥दिगर्थस्तुअपदान्तादित्यनुक्त्यैवजश्त्वविषयेव्यावृत्तिसिद्धेःपुनरद्ग्रहणंव्यर्थमेव।एतेनपुनरद्ग्रहणंश्रोततान्तत्वविवक्षाद्वाराजश्त्वविषयेऽभेदविवक्षायामेवयथास्यान्नतुभेदविवक्षायांजश्त्वविषयइत्यर्थकमित्यपास्तम्।समाङ्ग्रहणंतुशब्दाधिकारान्नित्यत्वज्ञापनार्थमितिदिक्॥सुवचमिति॥जातिपक्षाश्रयणेयथासंख्येनेष्टसिद्धेरितिभावः।एवंरीत्यायथासंख्यमिकोयणचीत्यत्रापिबोध्यमितिसूचितम्।उत्तरग्रन्थविरोधात्।जश्त्वस्यासिद्धतयापररूपेणैवबाधाच्च।ननुतदपिनित्यंतथाचकथंपररूपविरहेणप्रयोगइतिचेन्न।अलौकिकंप्रक्रियावाक्यमिदमितिस्वयमेवव्याख्यातत्वात्।संहितायाअविवक्षायांतत्संभवाच्चेतिदिक्।अकःसवर्णे।अचिपरइति।यदातूष्मणामीषद्विवृतत्वमाश्रित्यनाज्झलावितिसूत्रंप्रत्याख्यायतेतदाइहाचीतिनानुवर्तनीयम्।अकोऽकिदीर्घइतिसुवचम्।वर्णद्वयंद्विमात्रमिति।यत्तुप्राचाव्याख्यातंदीर्घप्राप्तेह्रस्वऋकारोऌकारश्चविधीयतइतितद्भाष्यकैयटादिविरोधादुपेक्ष्यम्।एङःपदान्तात्॥ङसिङसोश्चेत्यस्यारम्भादस्यपदान्तविषयत्वेलब्धेउत्तरार्थंपदान्तादितिस्पष्टार्थमिहैवकृतम्।सर्वत्रविभाषागोः।यद्यपिच्छन्दसीतिनप्रकृतंतथापियजुष्युरइत्यादिप्रक्रमाच्छन्दस्येवेदमितिसंभाव्येत।अतःसर्वत्रेत्युक्तम्।तद्व्याचष्टेलोकेवेदेचेति।इहएङइत्यनुवर्त्यैङन्तस्यगोरितिव्याख्येयम्।तेनेहन।चित्रग्वग्रमिति।प्रतिपदोक्तस्यएङोग्रहणान्नेह।हेचित्रगोऽग्रम्।प्रकृतिभावइति।प्रकृत्यान्तःपादमितिसूत्रात्प्रकृत्येत्यनुवृत्तेः॥ ७१ तद्भाष्येति॥तुल्यास्यसूत्रस्यभाष्येइत्यर्थः।तत्रहिअकःसवर्णइतिसूत्रेणैतद्वार्तिकान्यथासिद्धिरुद्भाविता॥आरम्भादिति॥अपदान्ताच्चेन्ङसिङसोरेवेतिनियमादितिभावः॥उत्तरार्थमिति॥इकोसवर्णइत्याद्यर्थमित्यर्थः॥स्पष्टार्थमिति।विभक्तौचेन्ङसिङसोरेवेतिनियमशङ्कावारणार्थमितिभावः॥इत्यनुवर्त्येति॥षष्ठ्याविपरिणमय्येत्यपिबोध्यम्॥प्रतिपदोक्तस्येति॥एङ्ग्रहणादस्येतिभावः॥प्रतिपदोक्तपरिभाषयावावर्णग्रहणेतदप्रवृत्तिज्ञापकस्यतदनित्यतामात्रज्ञापकत्वम्।ध्वनितंचेदमोत्सूत्रेभाष्ये।एङःपदान्तादित्यत्रतुहलोनन्तराइत्यादिनिर्देशान्नप्रतिपदोक्तग्रहणम्।अत्रचस्थानिवत्सूत्रस्थंभाष्यंमानमि

पूर्वरूपमेनेति॥ पूर्वरूपमपीत्यर्थः। गोशब्दस्य यद्यस्माप्लुतन्नेतिव्याख्यानेन नान्तः पादमित्यनेनेव पूर्वत्वादिकं विकल्पेन निषिद्धा तद्व्यर्थं। तेनावादेशोपि न। एङन्तस्य गोरिति। प्रतिप्रदोक्तस्ये
ङ इत्यपि बोध्यम्। ननु गोरग्रवचनं स्वरसिद्ध्यर्थमन्यथावङ् कदाचित्स्तोदात्तोपिस्यादित्येतत्सूत्रस्य भाष्यप्रामाण्याच्चित्रग्वग्रमित्यत्रानङभावोस्तु तत्रागवङोरूपे विशेषस्यस्पष्टत्वात् चित्रगोग्र
मित्यत्रावङभावकल्पने किंमानमिति चेन्न। उपदेशे आद्युदात्तत्वनिपातनेनावङ्न्यासस्थापनपरभाष्यस्यमानत्वात्। चित्रगोशब्द आमन्त्रिताद्युदात्तत्वेनान्तानुदात्तस्तत्राकितस्यागमस्यानुदात्तत्वे उभयोरुदा
त्तयोरेव श्रवणं स्यात्। आद्युदात्तनिपातनेन तु गकाराकारस्योदात्तस्येति विशेषः स्पष्टः। न च गवाक्ष इत्यादाववङ आद्युदात्तस्य श्रवणं माभूदिति तस्योपदेशिवद्भावो वाच्य इति समासान्तोदात्तादित्वमामन्त्रिताद्युदा
त्तत्वादपि प्रागवङ्स्वरप्रवृत्तौ पश्चादामन्त्रितस्वरे स्वरभेदाभावदिति वाच्यम्। गवाक्ष इत्यादौ समानकालप्रवृत्तिकस्य परत्वेन प्रथमं प्राप्तस्य समासस्वरस्य प्रागप्रवृत्तौ उपदेशिवद्भाववचनचारितार्थ्येना
यद्यपि भाष्ये इकोगुणवृद्धीतिसूत्रे नान्तः पादमिति पाठः स्थितः। प्राचुभाष्येप्येवम्। तथापि शाकलसूत्रे ह्रस्वश्चेति चकारेण प्रकृत्येत्यनुकृष्यते इति भाष्यदर्शनात्। प्रकृत्यान्तः पादमिति
पाठोपि साधुरेव। नेति पाठे तु सर्वत्रेति सूत्रेण पूर्वरूपमेव विकल्प्यत इत्यवधेयम्। अवङ् स्फोटायनस्य। अत्राप्येङन्तस्य गोरिति व्याख्येयम्। अगिति सूत्रयितुमुचितम्। विभाषानु
वृत्तेः स्फोटायनग्रहणं पूजार्थम्। गवीति। यत्तु प्राचा गवेन्द्र इति प्रत्युदाहृतम्। तन्न। सत्यप्यवङि अतो गुण इति पररूपेण रूपसिद्धेः। न च सत्यवङि ङेर्यादेशः स्यात् स्त्रियां तु टाप्स्यादि
ति वाच्यम्। सन्निपातपरिभाषया यादेशप्राप्तेः सुसमाधानत्वात्। न च सा नित्येति वाच्यम्। तावताप्यौत्सर्गिकतत्प्रवृत्तेः सिद्धेः ॥ ९७ इसञ्ज्ञासापेक्षबहिरङ्गगुणापेक्षयान्तरङ्ग
त्वात्पूर्वमेवामन्त्रितस्वरप्राप्त्या तद्प्रवृत्तिसंपादने स्वसामर्थ्याभावात्। तद्ध्वनयन्नाह॥ अगितीत्यादि॥ यथान्यासेत्वाद्युदात्तनिपातनोपदेशिवद्भावयोः करणे गोरवादस्यौचित्यमिति
अवङ्स्थानिवत्सूत्रे भाष्येप्युक्तं गोः पूर्वत्वे स्थानिवत्त्वप्रतिषेधो वक्तव्यः। चित्राङ्गवग्रं सर्वत्र विभाषा गोरिति पूर्वत्वं प्राप्नोतीति नैष दोषः एङ इति वर्तते। तत्राचल्विधाविति प्रतिषेधो भविष्यति। एवं तर्हि
चित्रगोग्रमित्यत्र प्राप्नोतीति। अत्र पूर्वत्वपदेन तद्पवादप्रकृतिभावावङो विवक्षितमनाविरहात्। सर्वत्रेत्यवङि स्यस्याप्युपलक्षणम्। अतएव प्रकृतिभावे इति त्यक्त्वा पूर्वत्वे इत्युक्तं वार्ति
के भाष्ये च। चित्रगोशब्दस्य लाक्षणिकत्वेपि स्थानिवत्ता प्राप्नोतीति प्रतिषेधः कृतः। एङः प्रतिपदोक्तत्वाश्रयणे तु तत्त्वकार्यमिति लाघवमिति दिक्॥ इत्यादिति। ङीप उपलक्षणमिदम्॥

इष्टसिद्धेरिति॥गवीत्यस्यस्थानेगवेइतिस्यात् इतितद्ग्रन्थव्याख्यानमपिनासमञ्जससम्। भाष्यासंमतत्वादिति॥इन्द्रेइतिसामर्थ्यान्नित्यमितितदुक्तेरितिभावः।प्लुतइति।प्रकृतिभाववचनसा
मर्थ्यादेवप्लुतस्यतत्रनासिद्धत्वमितिभावः।उपलक्षणमिति।एवंचासत्यप्याह्वानेभवतीतिभावः।एहीत्यादिरिति॥वाक्यस्यटेरित्युक्तेरितिभावः॥हरदत्तइति॥कैयटोप्येवम्।अत्रापक्षे
विभाषापृष्टेत्यत्रविभाषाग्रहणमवयुत्यानुवादः॥अविद्वांसःप्रत्यभिवादेइत्यादिपस्पशास्थंभाष्यमपिवैकल्पिकेषुभावानुष्ठानौचित्येनशास्त्राज्ञाननिन्दापरंबोध्यम्॥आख्यातप्रागिति।प्र
गवाक्षइति।गवामक्षीवेतिविग्रहः।अक्ष्णोदर्शनादित्यच्समासान्तः।वातायनेरूढोयम्।पुंस्त्वंलोकात्।इन्द्रेच।आरम्भसामर्थ्यान्नित्यमिदम्।इन्द्रेचनित्यमितिपाठस्तुभाष्यासं
मतत्वादुपेक्षितः।एहिकृष्णेति।दूराद्धूतेचेतिप्लुतः।यत्तुकृष्णाएहीतिप्राचोक्तंतन्न।दूराद्धूतेचेत्यादौवाक्यस्यटेरित्यधिकारात्।चक्र्यत्रेति।इहस्कोरितिकलोपेन।यणःकार्यका
लपक्षेबहिरङ्गपरिभाषयासिद्धत्वात्।स्थानिवद्भावाच्च।पूर्वत्रासिद्धीयेनेतितुनास्ति।तस्यदोषःसंयोगादिलोपेत्याद्युक्तेः।दूराद्धूतेच।हूतमाह्वानंतच्चसंबोधनमात्रोपलक्षणमि
त्यभिप्रेत्याह।दूरात्संबोधनइति।उपलक्षणतयाव्याख्यानस्यफलमुदाहरति।सक्तून्पिबेत्यादि।गुरोरनृतः।अपिशब्दोगुरोरगुरोश्चटेःप्लुतार्थः।देवदत्तेति।अस्मैहीत्यादिः।एवम
ग्रेपि।सर्वःप्लुतइति।तथाअग्नीत्प्रेषणेपरस्यचेतिसूत्रेभाष्यम्।सर्वःप्लुतःसाहसमनिच्छतापिविभाषाकर्तव्यइति।साहसंशास्त्रत्यागःतदनिच्छतापिशास्त्रमनुरु
न्धानेनापीत्यर्थ इतिहरदत्तः।वैकल्पिकेष्वनुष्ठानक्लेशंधर्माधिक्यफलकमप्यशक्तत्वादनिच्छतेत्यर्थ इत्यन्ये।एतेनद्वैपायनोविरहकातरआजुहावपुत्रेतिभागवतंव्या॰
ख्यातम्।प्लुतस्यवैकल्पिकत्वात्।किंचेहपुत्रशब्दस्यवाक्यान्तत्वंनास्तीत्यपिसुवचम्।आख्यातप्राग्वर्तिनोप्यनुकरणसंभवात्।अपिच अस्तुप्लुतःप्रकृतिभावस्तुवैकल्पि
कत्वान्मास्तु।तथाचईचाक्रवर्मणस्येतिसूत्रेभाष्यम्।ईग्रहणेननार्थः।वशाइवंवशेयमितिप्लुतप्रकृतिभावःसर्वोपिचाक्रवर्मणमतेनास्तीतिभावः॥७) त्रएहीतिवाक्यस्यसे
त्यर्थः।अनुकरणेदूरसंबोधकत्वाभावाच्चेत्यपिबोध्यम्॥वैकल्पिकत्वादिति।अस्यअप्लुतवद्भावस्यवैकल्पिकत्वेनतत्त्वमित्यर्थः।प्लुतप्रकृतिभावइति।तस्यमतेअप्लुतवद्भावोक्तेरि
तिभावः।एतेनचाक्रवर्मणस्याचार्यस्याप्लुतवदित्येवभाष्योक्तेरिदंसर्वंचिन्त्यमित्यपास्तम्।प्रकारान्तरेणाप्यप्लुतवद्भावोत्रेत्याह।अपिचेति ॥

अवैदिकइति।अस्यपुराणस्थत्वेनावैदिकत्वंस्पष्टमेव॥कुमार्योरिति।अत्रहिप्रत्ययलक्षणेनद्विवचनान्तत्वंश्रुतत्वाच्चेदंतत्वमस्तीतिभावः॥इदंचद्विवचनान्तमीदन्तमित्यर्थे।ई
दन्तयद्द्विवचनंतदन्तमित्यर्थेतदन्तविध्यसंभवएवदोषोबोध्यः।इत्युक्तमिति।मूलेइतिशेषः।शान्त्रवंवेति।शान्त्रवंयथाइदेत्यर्थः।लवेत्यादिकोशप्रदर्शनेनवशब्दइवपर्यायः

अपिचइहप्रकृतिभावोपिदुर्लभएव।अप्लुतवदुपस्थितइतिसूत्रात्उपस्थितंनामावैदिकइतिशब्दस्तस्मिन्परेप्लुतोऽप्लुतवत्स्यादितिहितस्यार्थः।एवंचचतुर्थ्यापिनिर्वाहेस्पष्टेआर्षःप्रयोगइतिश्रीधरोक्तिर्नादर्तव्या।द्विवचनमिति।सुप्तिङन्तमित्यन्तग्रहणेनसञ्ज्ञाविधौप्रत्ययग्रहणेतदन्तग्रहणंनास्तीतिज्ञापितत्वादितिभावः।तेनेहन।कुमार्योर्वध्वोश्चागारंकुमार्यगारंवध्वगारमिति।स्पष्टंचेदंभाष्यादौ।द्विवचनान्तंप्रगृह्यंस्यादितितुप्राचःप्रमादएव।हरीएताविति।इहशाकलंन।प्लुतप्रगृह्याइत्यत्रनित्यग्रहणादित्युक्तम्।अत्रवृत्तिकारः।मणीवादीनांप्रतिषेधोवक्तव्यइतिपठित्वामणीवरोदसीवदंपतीवजंपतीवेत्युदाजहार।तच्चमुनित्रयानुक्तत्वादप्रमाणमितिकैयटहरदत्तादयः।एवंस्थितेमणीवोष्ट्रस्यलंबेतेप्रियौवत्सतरौममेतिभारतप्रयोगंसमर्थयते।इवार्थइति।वशब्दइति।वंप्रचेतसिजानीयादिवार्थेचतदव्ययमितिमेदिनी।ववायथातथैवैवंसाम्येइत्यमरग्रन्थव्याख्यावसरेशान्त्रवंवपपुर्यशइतिकालिदासप्रयोगस्याभियुक्तैरुदाहृतत्वात्।कादम्बखण्डितदलानिवपङ्कजानीत्यादिदर्शनाच्चेतिभावः।यत्तुपाठान्तरंवह्वायथातथेत्यादितदयुक्तम्।नामलिङ्गानुशासनप्रक्रमेणतद्धितवृत्तेरननुगुणत्वात्।अपत्यसमूहादिपर्यायभञ्जोऽण्फिञादीनामनुक्तेश्च।अदसोमात्।इहएकारोनानुवर्ततेअसंभवात्इत्यभिप्रेत्याह।ईदूताविति।ननुउकारानुवृत्तिर्व्यर्था।स्त्रियौफलेवाअमूआसातेइत्यत्रपूर्वेणैवसिद्धेः।मुत्वस्यासिद्धत्वेप्येकारान्तत्वादतआह।रामकृष्णाविति।पुंसिपूर्वेणनसिद्ध्यति।ओकारान्तत्वादितिभावः ॥

स्वतन्त्रएवनतुसत्याभामादिवत्एकदेशइतिसूचयति।विनापिप्रत्ययंपूर्वोत्तरपदयोर्लोपोवाच्यइतिवचनेनतादृशस्थलेतथाकल्पनेप्यखण्डेपदेतथात्वेमानाभावात् ॥

आरम्भसामर्थ्यादिति। ननुकार्यकालपक्षेऽनुनासिकप्रतिषेधेनचारितार्थ्यंतत्पक्षेहिसञ्ज्ञाशास्त्रस्यनपृथग्बोधकत्वं,पूर्वत्रासिद्धमितिचातिदेशःकार्यार्थः।कार्यज्ञानंवाकार्यबोधोत्तरमितियद्देशोवाकार्यबोधस्तद्देशस्थत्वमेवतस्य।किंचअधिकारःसः।एवंचमुत्वदृष्ट्यानुनासिकविधेरसिद्धत्वेनतदेकवाक्यतापन्नसञ्ज्ञायाअपिसिद्धदृष्ट्यासिद्धतयामुत्वशास्त्रेऽनुवृत्तपूर्वत्रासिद्धमित्यत्रत्यपूर्वशब्देनतदेकवाक्यतापन्नस्यादसोमादित्यस्यग्रहीतुमशक्यत्वम्।एतेनकार्यकालपक्षेऽपिपाठक्रमपूर्वत्वस्या

अदसोमादितिसूत्रंप्रतितुमूत्वमीत्वेनासिद्धेआरम्भसामर्थ्यात्।एकारोपीति।तथाचएकारानुवृत्तितात्पर्यग्रहणफलकंमाद्ग्रहणमितिभावः।अत्रेदंचिन्त्यम्।ईदूत्सप्तम्यर्थेप्रगृह्यम्।अदसःएच्चद्विवचनमित्येवकुतोनसूत्रितम्।एवंहिपूर्वसूत्रस्थमीद्ग्रहणंप्रकृतसूत्रेमाद्ग्रहणंचमास्तु।एकदेशानुवृत्तिक्लेशोपिनेति।शे।छान्दसमपीदंसंदर्भशुद्ध्यर्थमुक्तम्।वस्तुतस्त्वनुकरणार्थतयालोकार्थमपिसंभवत्येव।त्वेरायोमेरायइत्यादौत्वेइतिमेइतिअनुकरणेप्रयोजनलाभात्।अस्मेइत्यस्मभ्यमित्यर्थः।भ्यसःसुपांसुलुगितिशेआदेशः।शेषेलोपः।निपात।अनाङितिपर्युदासादेवाङ्रूपनिपातेलब्धेनिपातग्रहणमुत्तरार्थस्यशेषार्थसिद्ध्यैकृतम्।आएवमिति।पूर्वप्रक्रान्तस्यवाक्यार्थस्यान्यथात्वख्यापकोयमाकारः।पूर्वमित्थंनामंस्यादिदानींत्वेवंमन्यसेइत्यर्थः ॥

नपगमेनसञ्ज्ञाप्रत्यसिद्धत्वंदुर्वारमित्यपास्तमितिचेन्न।अप्रगृह्यादसइतिन्यासेनैवसिद्धेःसामान्यसञ्ज्ञासूत्रकरणसामर्थ्येनप्लुतप्रगृह्याइत्यत्राप्युपस्थित्यातत्सामर्थ्येनासिद्धत्वबाधात्।हेसुकासुकइत्यादौव्यवस्थितविभाषाश्रयणात्तयोरनभिधानाद्वा.सूत्रमतेपिनानुनासिकइत्याशयात्।स्पष्टंचेदंभाष्ये।छान्दसमिति।शेआदेशस्यछान्दसत्वादितिभावः।मेइतीत्यनुकरणइति।प्रकृतिवदनुकरणमित्यतिदेशेनपदत्वात्पदान्तत्वप्रयुक्तःप्रकृतिभावस्तत्रतेनातिदेशेनप्रगृह्यत्वंतुन।लोपइत्यादावनुकार्येफलाभावेनप्रगृह्यत्वाप्रवृत्त्यातदनुकरणेऽतिदेशेनासिद्धोपदेशप्रवृत्तिरेववाच्येतिभावः।अन्यथात्वेनि॥अनभिमतत्वेत्यर्थः।तदाह।नामंस्यादिति ॥

स्मरणेइति।विस्मृतस्यस्मरणविषयताद्योतकइत्यर्थः।मर्यादाभिविधावित्यत्रमद्यपदलोपीसमासः।तत्सहितेभिविधावित्यर्थः।सप्तम्यर्थेति।तद्धितत्वंचतस्यनिरुक्तेस्पष्टम्।अ
व्ययीभावाभावश्चप्लुतौछान्दसत्वाद्बोध्यः।अत्रपरत्वादिति॥नचैतदभावेनित्यविधिर्दुर्वारः।इतिशब्दातिरिक्तेओदित्यस्यनिपातातिरिक्तेसंबुद्धावित्यस्यचारितार्थ्येनसामर्थ्या
भावादेवंचफलेऽविशेषइतिवाच्यम्।परत्वेनविकल्पप्रवृत्तावभावपर्यन्तमप्यस्यव्यापारेणसकृद्गतिन्यायेननित्यस्यतदभावेऽप्रवृत्तेः।अतएवनयदिविभाषासाकाङ्क्षइतिसू
त्रेनिषेधीयोभयत्रविभाषेतिसंगच्छते।अन्यथापरत्वादेतत्प्रवृत्तावप्यनेननिषेधाभावेपूर्वसूत्रस्यदुर्वारत्वेनसादुर्लभास्यात्।नचाकडारसूत्रेणान्यत्रसञ्ज्ञानांबाध्यबाधक

आएवंकिलेतिस्मरणद्योतकोयमाकारः॥वाक्येत्यादि॥तस्याचभाष्यमीषदर्थेक्रियायोगेमर्यादाभिविधौचयः।एतमातंङितंविद्याद्वाक्यस्मरणयोरङित्॥१॥इति।
अत्रअङिल्लक्षणएवतात्पर्यंलाघवात्।अन्यस्यङित्त्वंत्वर्थसिद्धम्।ईषदर्थेत्यादिस्तुअवयुत्यानुवदः।एवंचअअआँअपइत्यत्रसप्तम्यर्थवृत्तेरप्याकारस्यङित्त्वा
दाङोनुनासिकश्छन्दसीतिप्रवर्ततइतिभावः।ओत्।निपातः।किम्।देवोसि।वायवायाहि।संबुद्धौ।ऋषिर्वेदस्तदुक्तमृषिणेत्यादौतथादर्शनादित्यभिप्रेत्याह।अ
वैदिकइति।संबुद्धौकिम्।अहोइति।अत्रपरत्वाद्विकल्पोमाभूत्।यत्त्वोदित्यत्रनिपातानुवृत्ते त्वचसंबुद्धिग्रहणस्यप्रत्युदाहरणंवृत्यादावुक्तं।ग विस्मयमाहेति।त
न्नातत्रप्रगृह्यसञ्ज्ञात्वेपिप्रकृतिभावाप्रसक्तेः।इकोसवर्णइत्यत्रहिपदान्तग्रहणमनुवर्ततइत्याकरेस्पष्टम्।एवंचप्लुतःप्रगृह्याइतिसूत्रेतत्संबन्धआवश्यकः॥
भावाभावस्यज्ञापितत्वात्परत्वाद्विकल्पइत्यसंगतमितिवाच्यम्।सञ्ज्ञायाएकत्वात्ज्ञापकस्यचविशेषापेक्षत्वेनसञ्ज्ञाभेदविषयत्वादितिभावइतिकेचित्।परेतुओदित्यस्येति
शब्दनिरपेक्षत्वेनान्तरङ्गत्वमितिपरत्वंनयुक्तंसंबुद्धावितितुनिपातपदाननुवृत्तये।अन्यथोक्तनिपातस्यैवैतौविकल्पापत्तिः।नित्यविकल्पविध्योर्युगपत्प्रसक्तावपिविधेया
भावेनपरत्वादित्यस्यासंगतेः।एवंचपरत्वादित्यस्योत्कृष्टत्वादपवादत्वादित्यर्थः।ओद्ग्रहणानुवृत्त्यैवसिद्धेपुनरोद्ग्रहणेनापितन्निवृत्तिसिद्धौवैचित्र्यार्थमेवसंबुद्धिग्रहणमित्याहुः
॥आवश्यकइति॥अन्यथाइकोसवर्णइत्यत्रमण्डूकानुवृत्त्यापत्तिः।साचसंबन्धतदभावोभयकल्पनापत्त्याऽन्याय्येतिभावः॥

अनुस्वाराद्दिति॥ अत एव तस्याः श्रवणं न। अभेदविवक्षा पदार्थस्यार्थवत्सूत्रे निरूपयिष्यते। न च लिङ्ग-सर्वनामनपुंसकताभ्युपगमे नोत्पन्नाया विभक्तेर्लुक्प्रसक्त्यापत्तेः। न च सुप्सुपेति समासेन निर्वाहः। इति शब्दस्य शब्दस्वरूपपरतातात्पर्यग्राहकत्वेन तेनैकार्थीभावरूपसामर्थ्यस्य दुरुपपादत्वात्। न च गोभ्यां गोक्षीरमित्याद्येकदेशगोशब्दानुकरणे ऋलृक्सूत्रभाष्योक्तेन प्रकृतिवदनुकरणमित्यतिदेशेन पदत्वं सुलभमिति वाच्यम्। क्षियो दीर्घादिति सूत्रभाष्योक्तेन तदतिदेशानित्यत्वेन तदप्रवृत्तिमाश्रित्यापि सुसाधत्वेनासाधारणप्रयोजनत्वाभावादिति भावः। एतदर्थमेवेति। एतदर्थमपीत्यर्थः। अग्नितेः क्विपि संबुद्धावान्चिनो पीत्यत्र नश्क्वीति रुत्वे अत्रानुनासिक इति पूर्वस्यानुनासिके यदेतन्नाग्निनोपि कमलँ आँग्निनो पीत्यत्रापि फलसत्त्वा गावितिच न पदम्। अनुकार्यानुकरणयोरभेदविवक्षया अर्थवत्त्वाभावेन विभक्तेरनुत्पादात्। उञः। निपात एकाजिति प्राप्ते विभाषेयम्। ऊँ। अनुनासिक इति। तेनास्मिन्परे यणोऽनुनासिक इति विकल्पः। यदेतँ उँ इति पठसि यदेतदूँ इति जातदीर्घमित्यादि। एतदर्थमेव तत्रानुनासिकग्रहणम्। अन्यथा यरोऽञमिञ्स्वेत्येवावक्ष्यत्। मय उञो वो वा। मयः परस्येति। परादिति तु प्राचः प्रमादः। षष्ठीनिर्दिष्टस्य हि आदेशा उच्यन्ते इति भाष्यात्। आदेशविधौ स्थानिनः षष्ठ्या एव न्याय्यत्वाच्च। असिद्धत्वादिति। अत एवेदं षत्वं त्रिपाद्यां विधीयते। प्रकृतिभावमात्रबाधनार्थत्वे हि इको यणित्यनन्तरं मय उञो वेत्येवावक्ष्यत्। यणं चानुवर्तयिष्यत्। इह मय उञ इतौ परे अष्टाविंशतिरूपाणि। तथा हि। उञ इति प्रगृह्यत्वे किमु इति। वत्वपक्षे किम्विति। ऊँ आदेशे किमूँ इति। आदेशस्य स्थानिवत्त्वेन मय उञ इति प्रकृतिभावापवादभूते आन्तरतम्यादनुनासिके वकारे किम्विँति ॥ ७७ तु। अवक्ष्यदिति। न चैवं न्यासे यथासंख्यापत्तिः। तस्याः सार्वत्रिकत्वात्। आन्महत इत्यादिनिर्देशाच्चेति भावः। पूर्वोक्ते कमलाँ अग्निनो पीत्यत्र लस्य नकारापत्तिवारणाय विधेयकोटावनुनासिक इति॥ विधेयकोटौ यकारमारभ्य प्रत्याहारे तु विधेयविषये सवर्णग्रहणाभावेन पूर्वोक्ते निरनुनासिकलस्यैवापत्तिरिति यथान्यासमेव साधु॥ इत्येवावक्ष्यदिति। न चात्रापि न्यासे सन्निपातपरिभाषयानुस्वारप्राप्तिरिति वाच्यम्॥ त्रिपाद्यां तथापाठे मसन्निपातपरिभाषाऽनित्यत्वस्यापि ज्ञापकमिति भावः॥ अनुनासिके वकारे इति॥ इदं कैयटानुरोधेन। मय उञ इत्यत्र विधीयमानस्य सवर्णाग्राहकत्वेनानेन सानुनासिकविधानाभावेन कथमत्र सः। अन्यथेदमो मस्याऽनुनासिकोऽकारः स्यात्। अत एवेदृशे विषये गुणानामभेदकत्वपक्षानाश्रयणमिति चिन्त्यम् ॥*॥ इति स्वरसन्धिः॥*

विनापितद्योगमिति॥साहित्यंचयोगक्रियायाम्।एतदिति।संयोगइतितदर्थः।सत्साभामेतिवन्निर्देशः।संयोगश्चाव्यवहितयोरेवेतिचितंकटुतैलमित्यादौनदोषः।यथासंख्यमिति॥तथ्यद्भ
नेत्यादेरप्यनादितयातमादायपरस्मैपदानांणलित्यादौसूत्रान्तरस्थक्रमेणेवयथासंख्यमितिभावः।च्वादिशब्देश्चानादिसिद्धलोकप्रसिद्धक्रमेणैवोपस्थितिरितितात्पर्यम्।ननुतज्ज्ञानमित्या
अनुनासिकाननुनासिकयोर्वकारयोर्मयोयणइतिद्वित्वस्यमकारस्यानचिचेतिद्वित्वस्यचविकल्पेनवत्वपक्षेरूपाष्टकम्।तदभावेद्वयमितिदशकम्।प्रगृह्यसञ्ज्ञाविरहप
क्षेमयउञइतिवत्वस्यासिद्धत्वादिकोयणचीतियणेवा।तस्यसिद्धत्वान्मोनुस्वारेवापदान्तस्येतिपरसवर्णपक्षेअनुनासिकाननुनासिकवकारद्वयोपेतमेकादशंरूप
म्॥अनुनासिकस्यद्वित्वेहलोयमामितिलोपस्यवैकल्पिकत्वादकरणेत्रिवकारंद्वादशंरूपम्।परसवर्णाभावपक्षेअनुस्वारस्ययर्त्वात्पाक्षिकेद्वित्वेद्वेसंकलनयाचतुर्द
शाइतिशब्देकारस्यअणोप्रगृह्यस्येत्यनुनासिकविकल्पादष्टाविंशतिरिति॥इत्यच्सन्धिः॥स्तोश्चुना।स्तोरितिसमाहारद्वन्द्वः॥सौत्रंपुंस्त्वम्।श्चुनेति॥सहयुक्तेतिसू
त्रेविनापितद्योगंतृतीयेतिवक्ष्यते।योगंइत्येतदध्याहारलभ्यम्।अत्रस्थान्यादेशयोर्यथासंख्यंनिमित्तकार्यिणोस्तुन॥शादितिज्ञापकात्।अल्पाच्तरमित्यादौतु
सौत्रत्वात्श्चुत्वंन।तज्ज्ञानमित्यादौतुभवत्येव।स्तोश्चौश्चुरितिसुवचम्।नचतस्मिन्नितिनिर्दिष्टइतिपरिभाषोपस्थानेनयज्ञःयाञ्चाइत्यादिनसिद्ध्येत्।शादितिलिङ्गे
नतस्याइहानुपस्थानाभ्युपगमात्।ष्टुना।इहापिकार्यिनिमित्तयोर्यथासंख्यंन।तोष्विइतिज्ञापकात्।ष्टौष्टुरितिसुवचम्।ईट्टेईष्टेइत्यादौनपदान्तादितिज्ञापकान्नदो
षः।सर्पिष्टममिति॥ह्रस्वातादावितिषत्वम्।प्रत्ययेभाषायामिति।यत्तुप्राचामयदिनित्यमितिपठितम्।यच्चहलन्तप्रकरणेषसांषड्णामित्युदाहृतम्।य
च्चयरोनुनासिकइतिवानुनासिकइतितत्रव्याख्यातंतत्सर्वंभाष्यविरोधादुपेक्ष्यम् ॥ ७ दोश्चुयोगाभावात्तस्यादतआह॥तज्ज्ञानमिति॥जञयोगेतयोश्चा
रणमात्रंनत्विदंवर्णान्तरमितिभावः॥अनुपस्थानेति॥पूर्वत्वाच्छानुपस्थानेत्यर्थः।तेनचितमित्यादौनदोषः॥षत्वमिति॥नचषस्यपदान्तेजश्त्वंभविष्यतीतितद्व्यर्थमि
तिवाच्यम्।षत्वस्यासिद्धत्वेनास्यजश्त्वाभावात्॥भाष्येति॥प्रत्ययेइत्येवतत्रपाठादितिभावः ॥

दकारमिति॥चर्त्वेनेतिभावः।मृच्छब्दस्ययवादिगणेपाठेनमानमितितत्रभ्रूयइतिवत्त्वेमृद्वानिस्येवेतितात्पर्यम् इतिकेचित्तन्न मृन्मानितितुकाशिकोऽसांप्रदायिकःपाठः।ननुसव
र्णपदमधिकंपरसवर्णेस्त्वत्रैकार्थीभावापन्नस्यान्यत्रसंबन्धोवक्तुमशक्यः।नचपूर्वस्येत्यस्यसंबन्ध्याकाङ्क्षायांयत्किंचित्संबन्धिकल्पनापेक्षयापूर्वत्रोपस्थितार्थवाचकपदाध्याहारोचि
त्यात्तल्लाभः । चुटूइत्यादावादेरप्येवमेवसंबन्धोपपत्तौतत्रतत्रस्वरितत्वप्रतिज्ञायावैयर्थ्यापत्तेः।नचस्वरितत्वप्रतिज्ञासामर्थ्यादेकदेशानुवृत्तिः।तोर्लीत्यत्रसमुदायानुवृत्त्यातस्या
श्चारितार्थ्यादित्यतआह।अनुस्वारस्येत्यादि।एकदेशेइतिच।पकारमात्रेस्वरितत्वप्रतिज्ञयैवतोर्लीत्यादावनुवृत्तिसिद्धौपुनःसकारांशेतत्प्रतिज्ञयातावतोप्यंशस्यउत्तरत्रानुवृत्तिरितिभावः॥
नदतिरभसादिति॥चयोःभावात्।दीर्घादाचार्याणामित्युत्तरमनुस्वारस्ययपि।वापदान्तस्य।तोर्लि।उदस्था।झयोहो।शश्छोटीतिषट्सूत्रीपाठोत्तरंझलांजशझशि।अभ्यासेचर्च।खरिच।वावसाने।अणो
यवादिगणइति।यचिभंतसौमत्वर्थइतिसंहितयापाठेतसावितितात्पूर्वंदकारंप्रश्लिष्यभत्वेनाप्येतत्समाधातुंशक्यम्।उदस्था॥अनुस्वारस्ययथीत्यत्रसमस्तमपिसवर्णग्रहणमिह
निष्कृष्यसंबध्यते॥एकदेशेस्वरितत्वप्रतिज्ञानादित्याशयेनाह॥पूर्वसवर्णःस्यादिति॥अघोषस्येत्यादि॥एतेनसस्यतकारइतिप्राचांग्रन्थाःप्रत्युक्ताः॥यदपीहचयोर्द्वितीयाःशरी
त्यस्योपन्यसनंतंदतिरभसात्।तच्छिवइति।यत्तुप्राचातत्शिवइत्यत्रजश्त्वेकृतेखरिचेत्युक्तम्।तन्न।तदोदान्तत्वेनजश्त्वोपन्यासवैयर्थ्यात्।यत्तुतत्पौत्रेणोक्तंतदोवाव
सानइतिचर्त्वेकृतेपश्चाच्छिवइत्यनेनसंबन्धेझलांजशोन्तइतिजश्त्वेखरिचेतिचर्त्वमितितदतिस्थवीयः।जश्त्वंप्रतिअवसानेचर्त्वस्यअपवादत्वात्॥ प्रगृह्यस्येतिपञ्चसूत्र्याः
पाठेभाष्यसंमतेथस्यचर्त्वेपितस्यासिद्धत्वाच्छशर्परत्वाभावाच्चेतिभावः॥चर्त्वमिति॥ततश्छत्वेशश्छोटीतिप्रक्रियेतिभावः॥चर्त्वापवादत्वादिति॥एवंचतत्रकृतेजश्त्वाप्रवृत्तिरितिभावः।नच
जश्त्वेकृतेचर्त्वस्यचारितार्थ्येनतस्यासिद्धत्वादपवादत्वेनमानमितिवाच्यम्॥तत्कालेऽवश्यंप्राप्तत्वेनयेननाप्राप्तिन्यायेनापवादत्वस्यसुलभतयोक्तरीतेरसंभवात्।एतदेवाभिप्रेत्यमिदचोन्त्या
त्सूत्रेभाष्येउक्तम्॥सत्यपिसंभवेबाधनंभवतीति।अन्यथाकौण्डिन्यायतक्रमित्यनेनब्राह्मणेभ्योदधीतिप्राप्तदधिदानस्यापिबाधोनस्यात्।तद्दानोत्तरंतत्पूर्वंवातद्दानस्यचारितार्थ्यात्।अतएव
वाजादेर्द्वितीयस्येतिसूत्रेप्रथमद्विर्वचनोत्तरमस्यचारितार्थ्येनप्रथमद्विर्वचनस्थानेनबाधोनस्यादित्याशङ्क्यसत्यपिसंभवेइतिन्यायेनबाधकत्वमुक्तंभाष्ये।एवंचदयतेर्दिगीतिसूत्रस्यकैयटादिग्रन्थाअ

संभवेएवबाधकत्वेतिवार्त्तिकानुसारेणप्रवृत्ताअप्युक्ताएवे
तिबोध्यमितिभावः॥

केनवार्यतामिति॥एवंचेदृशविषयेवाक्यसंस्कारपक्षेणैवसाधुत्वाद्व्याख्यानमितिस्वीकृत्याकृतव्यूहपरिभाषालाज्येतिचेदिष्टापत्तिरितिबोध्यम्।अन्येतुपदसंस्कारेहरिःअस्तीतिसविसर्गम
वस्तुतस्तुव्युत्पत्तिपक्षेपिबहुपटवइत्याद्यर्थंसूत्रम्।नचैवंबहुच्पूर्वइत्येवसूत्र्यतामितिवाच्यम्।मूलकेनोपदंशंइत्यादौकृदन्तत्वेनातिप्रसङ्गात्।नचसमासग्रहणंनियमार्थमितिनिस्तारः।अर्थवत्सूत्रारम्भंविनासमासग्रहणस्यनियमार्थत्वायोगादितिदिक्।कृत्तद्धितसमासाश्च।अर्थवदित्यनुवर्तते।तत्सामर्थ्याचदन्तविधिः।नहिजहत्स्वार्थायांवृत्तौकृतान्ततद्धितानांचअर्थोस्ति।भूतपूर्वगतिलभ्यस्तुनप्रशस्तः।अजहत्स्वार्थायामपिनप्रत्ययमात्रेणार्थपर्यवसानमित्यभिप्रेत्याह।कृत्तद्धितान्तावितिलिट् धुक्इत्यादौअधातुरितिकर्तेत्यादौअप्रत्ययान्तमितिपर्युदासेप्राप्तेकृदन्तेविधिरयम्।नियमार्थमिति।नचप्रत्ययान्तत्वेनपर्युदासेप्राप्तेविध्यर्थमस्त्वितिशङ्क्यम्।वाक्यस्याप्रत्ययान्तत्वात्।प्रत्ययग्रहणेयस्मात्सविहितस्तदादेरेवग्रहणात्।ननुस्त्रीप्रत्ययेतदादिनियमोनिषिद्धः एवंचराजकुमारीत्यादौविध्यर्थमस्त्वितिचेन्नैवम् ॥

वः।अधातुरितीति।कर्तृरूपार्थस्याधिकस्यभानेपिक्रियावाचकत्वात्तस्याधातुत्वासक्तेरितिभावः।स्त्रीप्रत्ययेइति।अनुपसर्जनस्त्रीप्रत्ययेइत्यर्थः।तस्ययेनकेनापिरूपेणग्रहणेत्तन्निषेधइत्यभिमानः शङ्कितुः।राजकुमारीति।नन्वत्रप्रातिपदिकत्वस्यनफलंलिङ्गविशिष्टपरिभाषयैवतत्कार्यसिद्धेरितिचेन्न।प्रातिपदिकत्वतद्व्याप्यधर्माणांलिङ्गप्रत्ययरहितेदृष्टानान्तद्विशिष्टेनयातिदेशेनतस्याअत्राप्रवृत्तेः नहिङीब्रहितेराजकुमारीत्यादौतदस्ति,ङ्याब्ग्रहणंत्वन्यार्थमितिवक्ष्यते।शङ्कित्रभिमानानुसारेणैवोत्तरयति।

अन्तरङ्गस्यापीति।सुलभत्वादिति।यथोद्देशेइदं। यदित्वस्यनिषेधस्यप्रत्ययग्रहणपरिभाषाशेषत्वमेवंचयथासाप्रत्ययग्रहणेएवनतुप्रत्ययाप्रत्ययग्रहण
इतिउगितश्चेतिसूत्रेभाष्येस्पष्टं तथायंनिषेधोपिस्त्रीप्रत्ययमात्रग्रहणेनतुस्त्रीप्रत्ययास्त्रीप्रत्ययग्रहणेइत्युच्यते।तदानदोषः।समुदायस्यप्रत्ययान्तत्वाभावा
दितिदिक्।असमर्थसमासेइति।असूर्यपश्यादित्यादावित्यर्थः।धर्मिग्राहकेति।प्रातिपदिकसंज्ञाधर्मस्तद्धर्मीअसमर्थसमासः ग्राहकंमानंखश्विधायकम्।अ
न्यथापरस्परमसंबन्धेनैकार्थीभावाभावात्समासोदुर्लभःस्यात्।असूर्यशब्दइति॥तत्प्रकृतिकेसुबन्तइत्यर्थः।सुपीत्यधिकारात्।उपपदमितिमहासंज्ञाकरणा

अन्तरङ्गस्यापिहल्ङ्यादिलोपस्यलुग्विषयेऽप्रवृत्त्याश्रूयमाणएवसुपिसमासप्रवृत्तेः।तत्रचाप्रत्ययान्तत्वेनप्रवृत्तायाः संज्ञाया एकदेशविकृतन्या
येनविभक्तिलुक्यपिसुलभत्वात्।अतएवगोमत्प्रियइत्यादौनुमादयोन।लुकः प्रागन्तरङ्गप्रवृत्तौतुस्युरेव।नन्वेवमपिअसमर्थसमासेदश्रदाडि
मादिवदनर्थकेविध्यर्थमस्त्वितिचेन्न।अर्थवदित्यस्यानुवृत्तेरुक्तत्वात्।कथंतर्हिअसमर्थसमासेसंज्ञेतिचेद्धर्मिग्राहकमानादेवेतिगृहाण।असू
र्यललाटयोरितिहिअसूर्यशब्देउपपदेखश्विधीयते।उपोच्चारितंपदंचोपपदम्।पदंचसुप्तिङन्तमिति।नियमशरीरमाह।यत्रसंघातेइत्यादि।पू
र्वभागइत्युपलक्षणम्।उत्तरस्तुप्रत्ययोनेत्यपिबोध्यम्।अन्यथाजन्मवानित्यादौसंज्ञानस्यात्तद्धितग्रहणस्यऔपगवादौकृतार्थत्वात् ॥

तदेतदाह।पदंचेत्यादि॥शशशृङ्गादिपदानांचबोद्धेतस्मिन्नर्थाकिरितिनतदर्थमपिसमासग्रहणमितिबोध्यम्।यत्रसंघातेइतीति।अर्थवतीतिशेषः।सजातीयापे
क्षनियमस्यौचित्यादितिबोध्यम्।प्रत्ययोनेत्यस्यपूर्वभागप्रकृतिकःप्रत्ययोनेत्यर्थः।तेनराजन्वानित्यादौनदोषः।जन्मवानित्यादाविति।तत्रपूर्वभागस्यपदत्वादितिभा
वः।ननुतडितग्रहणसामर्थ्यंतत्राह।तद्धितेति।तत्रपूर्वभागस्यतत्त्वात्पूर्वभागःपदमित्यत्रचपदशब्देनपदसंज्ञकग्रहणमितिभावः ॥

म·श·
४९

नन्वत्रपक्षेगवित्ययमाहेत्यादौदोषः।गोइत्यादीनांसुबन्तत्वाभावेनपदत्वाभावात्।एवमेवसुरित्यादिसमासेपूर्वभागस्यभत्वेनतत्साजात्येनपूर्वो
भागःपदमित्यर्थलाभासंभवश्चेत्यतआह।यद्वेति।प्रकृतसूत्रेभाष्येतुअर्थवत्समुदायानांसमासग्रहणंनियमार्थमित्युक्तम्।अत्रतन्त्रेणषष्ठीतत्पुरु
षःकर्मधारयश्च,तत्रषष्ठीसमासेअर्थवदित्यस्यस्वातन्त्र्येणापिप्रयोगार्हार्थवदित्यर्थः।गवित्ययमित्यादावनुकरणस्यानितिपरस्यापिप्रयोगसत्त्वेन
तत्त्वमस्त्येव।प्रकृतिप्रत्ययसमुदायस्यतुनव्यावृतिःप्रत्ययस्यस्वातन्त्र्येणप्रयोगार्हार्थवत्त्वाभावात्।सरूपसूत्रेभाष्येसुबन्तानामित्यनेनेदमेवोपलक्ष्यते

> पूर्वोभागःपदमितिकिम्।बहुज्विशिष्टस्यप्रातिपदिकसंज्ञायथास्यात्।तेनबहुपटवइत्यत्रप्रथमजसोलुकिबहु
> पटुशब्दस्यचित्स्वरेपुनर्जसिउपोत्तमोदात्तत्वंसिद्ध्यति।यद्वा।प्रकृतिप्रत्ययभावानापन्नसंघातविषयकोनियमोऽस्तु।न
> चाद्यपक्षेराजपुरुषावित्यादौपुरुषावित्यादेःसंज्ञास्यादितिवाच्यम्।अर्थवत्त्वेनैववारणात्।प्रत्ययार्थोहिविशिष्टएवान्वेति
> नतूत्तरपदार्थमात्रे।येनपुरुषावित्यस्यार्थवत्त्वंस्यात्।नियमफलमाह।तेनेत्यादि।नन्वेवमपिमूलकेनोपदंशमित्यादौवा
> क्यस्यसंज्ञादुर्वारा।कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणात्इतिचेन्मैवम् ॥

इतिस्पष्टमेवकैयटेनोक्तमितिबोध्यम्।पुरुषावित्यादेरितितत्पूर्वभागस्योत्तरपदत्वेचेतिनिषेधेनापदत्वात्।परस्यतत्प्रकृतिकप्रत्ययत्वाभावादितिभा
वः।अर्थवत्त्वेनैवेति।उत्तरपदस्यकार्यित्वाभावेनतन्निषेधाप्रवृत्तेश्चेत्यपिबोध्यं।वाक्यस्येति।कृदन्तत्वादितिभावस्तदाह।कृदिति।नचास्यभुजौकरणत्वेनोप
दंशंप्रतिनकारकत्वं।मूलकस्योपदंशेकर्मत्वेनान्वयोविभक्तिस्तुप्रधानानुरोधिकरणत्वकृतातृतीयैवेतितंप्रत्यपिकारकत्वमित्याशयात् ॥

रामः
४९

परत्वाद्बाधादिति।नियमस्यार्थतोनिषेधेपितात्पर्येणार्थवत्सूत्रापवादस्यास्यपरत्वेनकृदंतत्वप्रयुक्तस्यापिनिषेधेतात्पर्यादितिभावः।निषेधानांबलवत्त्वाच्चेत्यपिबोध्यम्।निष्फलत्वादिति।स्पष्टंचेदंप्रयोगादितिसूत्रेभाष्यकैयटयोः।नचसमासेइति।नापिवाक्येइतिबोध्यम्।एकार्थीभावेति।एकोपस्थितिनियामिकासमुदायशक्तिरेवैकार्थीभावइतिभावः।एवंसमासेवृत्तिःसिद्धा।वाक्येपिशक्तिरस्तिविशेषणविशेष्यभावांशेतच्छक्तेरर्थवत्सूत्रभाष्यादावुक्तत्वात्।लक्षणे

समासग्रहणकृतनियमेनपरत्वाद्बाधात्।एवंचकृत्तद्धितेतिसूत्रेकृद्ग्रहणपरिभाषानोपतिष्ठतएवनिष्फलत्वादितितत्त्वम्।यत्तुवदन्ति।समासग्रहणंननियमार्थंकिंतुविध्यर्थमेव।अर्थवत्त्वंहिवृत्तिमत्त्वम्।वृत्तिश्चद्विधा।शक्तिर्लक्षणाच।नचसासमासेऽस्तीति।अत्रेदंवक्तव्यम्।सिद्धान्तेतावदेकार्थभावाभ्युपगमाद्वृत्तिर्नास्तीतिबाधितमेव।मीमांसकमतेपिलक्षणास्त्येव।यदाहुः।सर्वत्रैवहिवाक्यार्थोलक्ष्यएवेतिचस्थितमिति।अथनैय्यायिकरीत्योच्येत।तदपिन।बहुपटवदित्याद्यसिद्धेः।तद्धितग्रहणंतद्विशिष्टपरमितिचेन्न।पचतकीत्यादावतिव्याप्तेः।किंचैवंकृद्ग्रहणपरिभाषयामूलकेनोपदंशमित्यादावतिव्याप्तिर्दुर्वारैवेत्यास्तांतावत्।चकारोऽनुक्तसमुच्चयार्थः।तेननिपातस्यानर्थकस्यप्रातिपदिकसंज्ञावक्तव्येतिगतार्थम्।येषांद्योत्योप्यर्थोनास्तितदर्थमिदम्॥

ति॥वृत्तौवाक्येचेतिभावः।असिद्धेरिति।समासइवतद्धितेपिशक्तिलक्षणयोरभावादितिभावः।पचतकीत्यादाविति।नचपूर्ववर्तित्वोत्तरवर्तित्वाभ्यामेववैशिष्ट्यंनिवेशनीयम्।विनिगमनाविरहेणमध्यवर्तित्वस्यापिग्रहणापत्तेरित्याशयात्।किंचबहुपटवस्तिष्ठन्तीतिवाक्यस्यापिसंज्ञापत्तिः।एवम्।समासग्रहणस्यनियमार्थत्वाभावे।नचात्रार्थवत्त्वाभावाद्वारणं,न्यायनयेउत्तरसूत्रेतदसंबन्धात्।तृतीयाप्रभृतीनीतितुस्वरेविशेषार्थम्॥

अभेदविवक्षायामिति।सादृश्यमूलाभेदविवक्षायामित्यर्थः।अनुकरणंचस्वसादृश्येनानुकार्यमुपस्थापयतितथोपस्थितस्यशाब्देन्वयप्रतियोगित्वंव्युत्पत्तिवैचित्र्यात्।एवंचदृस्यार्थबोधकत्वरूपार्थवत्त्वाभावइतिभावः।अतएवभूसत्तायामित्यादिनिर्देशाःसङ्गच्छन्तेतदाह।भूइति।अपदंनप्रयुञ्जीतेत्यस्यापरिनिष्ठितमित्यर्थः।अस्यचास्मादेवलिङ्गात्परिनिष्ठितत्वम्।भेदविवक्षायामिति।।अर्थवच्छब्दोपिवृत्तिविषयएवैतत्पक्षेइतिभावः।अयंपक्षोमतोक्तःसूक्तेतिसूत्रेभाष्ये।अनयोश्चलक्ष्यानुरोधाद्व्यवस्थेतिदिक्।विशिष्टस्यापीत्यर्थइति।प्रातिपदिकत्वतद्व्याप्यधर्माणांलिङ्गप्रत्ययविशिष्टेऽतिदेशादितिभावः।स्पष्टंचेदंबहुव्रीहेरूधसइत्यत्रभाष्ये।इयंचप्रातिपदिकसामान्यग्रहणेतद्विशेषग्रहणेचतत्स्वनयन्नाह।अयस्कुम्भीति।किंचेत्यादिचा।उत्तरपदेष्विति।अत्रचङ्यन्तमुत्तरपदमितिभाव।टिलोपइति।इदमुपलक्षणंपुंवत्त्वस्यणिचश्च।सामान्यग्रहणेपिप्रवृत्तेरेवानयापरिभाषयाङ्याब्ग्रहणवैयर्थ्यंभाष्येशङ्कितम्।नचदृष्टामालादृष्टागौरीतिसमुदायस्यानुपसर्जनस्त्रीप्रत्ययेतदादिनियमाभावात्ङ्याबन्तत्वेनततःसुबुत्पत्त्यर्थंतदस्तु।लिङ्गविशिष्टपरिभाषयातुनात्रसिद्धिःङ्याब्रहितस्यदृष्टामालाइत्यादेःसमुदायस्यप्रातिपदिकत्वाभावेनतदतिदेशाप्रवृत्ते रेवंचाम्दृष्टमालादेवदत्तेत्यादावेकपदान्तरितत्वेनैकान्तरतापत्तिरितिवाच्यम्।एतद्भाष्यप्रामाण्येनप्रातिपदिकसाहचर्येणचपृथगर्थोपस्थापकविभक्त्यन्तानवयवकङ्याबन्तस्यैवग्रहणेनादोषात्।प्रत्येकमपिपदत्वसत्त्वेनैकान्तरत्वाभावाच्च।उत्तरसंज्ञायाःपूर्वसंज्ञाबाध

अवद्यति।अनुकरणेषुतुअनुकार्येणसहाभेदविवक्षायामर्थवत्त्वाभावादेवनप्रातिपदिकत्वम्।भूसत्तायामितियथा।भेदविवक्षायांतुसंज्ञास्यादेव।भुवोवुगितियथा।लिङ्गविशिष्टस्येति।लिङ्गबोधकप्रत्ययविशिष्टस्यापीत्यर्थः।परिभाषायाःप्रयोजनन्तु।अयस्कुम्भी।अतःकृकमीतिसत्वम्।तद्धिकंसादिषूत्तरपदेषुविधीयते।किंचकुमारीमाचष्टेकुमारयति।णाविष्टवदितिटिलोपः।एवंयामिनयंत्यहानिइत्यत्रआचारेक्विबपिफलम् ॥

कत्वात्।नियमार्थंतुना।स्तूङन्तेदोषापत्तेः।

कुत्साद्यर्थकस्वार्थिकानांकुत्सितइतिसूत्रस्थभाष्योक्तरीत्याङ्याबन्तादुत्पत्तेः सिद्धत्वादत्यन्तस्वार्थिकेफलमाह।तथाहीत्यादिना।स्वार्थिकत्वेन।अत्यन्तस्वार्थिकत्वेन।परश्चेत्यभ्युच्चयः।एवंचलोहिताल्लिङ्गबाधनंवेतिनवक्तव्यमितिभावः।विकल्पः सिद्ध्यतीति।अन्यथाऽऽर्यशब्दात्कनिसमुदायोत्तरटापैवलिङ्गसंबन्धबोधनसम्भवादेकाज्द्विर्वचनन्यायेनसमुदायादेवटापिकनः पूर्वंटाबभावेआतःस्थानिकत्वाभावाद्विकल्पासिद्धिरितिभावः।ङीप्प्रसङ्गादिति।अन्यपदार्थस्यस्त्रीत्वादितिभावः।अकृतएवेति।इद्गोण्योरितिसूत्रेभाष्येस्पष्टम्।समासान्ताइत्यत्रतादर्थ्यात्ताच्छब्द्यमितिहितत्रभाष्यम्।अलौकिकेप्रक्रियावाक्यएवेत्यस्यप्रवर्त्ततइत्यनेना

ङ्याब्भ्यां प्रागिति।तेनलोहिनिकाऽऽर्यिकाचसिद्ध्यति।तथाहि।स्वार्थिकत्वेनान्तरङ्गः परश्चलोहितान्मणावितिकन्ङीपंबाधेत।ततः लोहितिकेत्येवस्यादिष्यतेतूभयम्।ङीब्ग्रहणसामर्थ्यात्तुङ्यन्तात्कनिरूपद्वयंसिद्धम्।वर्णादनुदात्तादित्यस्यवैकल्पिकत्वात्।आर्यशब्दात्तुनसामिवचनइत्यत्रज्ञापयिष्यमाणोऽत्यन्तस्वार्थिकोपिकन्आब्ग्रहणसामर्थ्यात्पूर्वंनप्रवर्त्तते।तेनउदीचामातःस्थानेयकपूर्वायाइतिइत्वविकल्पः सिद्ध्यति।स्यादेतत्।एवंसतिबहुगोमत्केतिनसिद्ध्येत्।बहुगोमच्छब्दात्कपः प्रागुगिल्लक्षणङीप्प्रसङ्गादितिचेन्नैवम्।अकृतएवसमासेऽलौकिकप्रक्रियावाक्यएवउत्तरपदस्यावयवीभूयसमासान्तः प्रवर्ततेइति वक्ष्यमाणत्वात्।सचविभक्तेःपुरस्तादित्येके ॥

न्वयः।क्वप्रवर्त्ततेतत्राह।उत्तरपदस्येति।अनन्तरमितिशेषः।अवयवीभूयेत्यस्यप्रक्रियावाक्यस्येत्यादिः।एतत्स्वरूपकथनम्।अवयवत्वेप्रमाणमाह।समासान्तइति।तच्छब्दवाच्यत्वादितिभावः।समासस्यैवायमन्तावयवइत्यन्तइतिसूत्रेभाष्येस्पष्टम्।इत्येकेइति।अत्रारुचिबीजन्तुसमासार्थवाक्यस्यान्तइतिगोस्त्रियोरितिसूत्रस्थभाष्यस्यवाच्यार्थविरोधः।नहिसुब्रहितंसमासार्थंकिंतुतद्विशिष्टमेव।किंचततःपूर्वंकपिततःसमाससंज्ञायांसुब्लुकिटापिबहुचर्मिकेत्यादावापःसुपःपरत्वादित्वानापत्तिः।तत्रविभक्त्यन्तेन्यपदार्थबोधकत्वारोपेणस्त्रीत्वबोधकत्वस्यतदन्तेसत्त्वात्सुब्लुकः पूर्वंकबन्तात्टाबितिवक्तुमशक्यमिति ॥

परस्तादितिपक्षेत्विति।नचविशिष्टस्यसुबन्तत्वाभावेनसुबन्तात्तद्धितइतिसिद्धान्तविरोधः।तेषामतिरिक्तार्थीभावेनपरिपूर्णम्पदमितिन्यायाविषयतयातस्य
सिद्धान्तस्यसमासान्तविषयेऽभावात्।एवंचसमासान्तेषुङ्याप्प्रातिपदिकादित्यस्यासंबन्धएव।तस्यामवस्थायांवाक्यस्यप्रातिपदिकत्वाभावादितिभावः।तद्धि
तान्तत्वादिति।प्रातिपदिकत्वेनेतिशेषः।पुनःसुपिचाकृते इति।प्रत्ययलक्षणेनसुबन्तत्वात्समाससंज्ञा॥कपस्तद्वाक्यावयवत्वेनतद्ग्रहणेनतद
न्तस्यग्रहणम्।सुपिचकृत्ते इतिक्वाचित्कःपाठःप्रामादिकः + यद्यपितत्रपाठेऽलौकिकविग्रहवाक्येपिअन्यपदार्थान्तर्भावेणएकार्थीभावारोपात्।
स्त्रीत्वसत्वेनपूर्वंटापिततःसुपिआपःसुपःपरत्वाभावाद्धकुचर्मिकेत्यत्रेत्वसिद्धिरस्तितथापितदुत्पत्तिपर्यन्तंसमाससंज्ञायाअप्रवृत्तौमानाभावात्।न

परस्तादितिपक्षेतुतद्धितान्तत्वात्सुब्लुकिपुनःसुपिचाकृतेसमासइतिसिद्धान्तः।तस्मादन्तरङ्गादपितद्धिता
त्प्राङ्ङ्याप्पोःप्रवृत्त्यर्थंङ्याब्ग्रहणमितिस्थितम्।यस्काद्धः।आब्ग्रहणंस्पष्टार्थमिति।तदनेनप्रत्युक्तम्।व
स्तुतस्तुङ्याप्पोर्ग्रहणंमास्तुसुबन्तात्तद्धितोत्पत्तिरितिनिष्कर्षःसुपःप्रागेवचङ्याप्पोःप्रवर्त्तेते ॥

चसुबन्तत्वाभावः।अनेनसुपासमुदायस्यसुबन्तत्वेपिउत्तरपदमात्रस्यतत्वाभावात्।पूर्वपदस्यसुबन्तताया:प्रत्ययलक्षणेनैवोपपाद्यत्वात्।एवंचपूर्वं
तत्करणेफलाभावः।बहिर्भूतसङ्ख्याकारकसापेक्षसुपस्तस्यामवस्थायां तदन भिव्यक्त्याऽप्रवृत्तेश्च।वस्तुतस्तुतद्धितान्तत्वनिमित्तप्रातिपदिकसं
ज्ञासमकालमेवविरोधाभावेनतत्पूर्वभागस्यसमाससंज्ञेतिबोध्यम्।यौगपद्यासंभवएवशास्त्राणांक्रमप्रवृत्त्यङ्गीकारादितिदिक्।यस्काद्धरिति।ङीग्र
हणन्तुलोहिनिकेत्यर्थमितितद्भावः।अनेनेति।आर्यकेत्यस्यासाधनेनेत्यर्थः ॥

सुबन्तात्तद्धितोत्पत्तौ प्रागेव ङ्याप्योः प्रवृत्तौ च बीजमाह। स्वार्थादीति। स्वार्थद्रव्यलिङ्गसङ्ख्याकारकेत्यर्थः। स्वार्थः प्रवृत्तिनिमित्तं। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्पूर्वं जात्यादिज्ञानं। ततो धर्मित्वेन प्रधानत्वाल्लिङ्गादिभिरप्याकाङ्क्षितत्वात्तदाश्रयज्ञानं। ततः स्वमात्रापेक्षत्वाल्लिङ्गस्य ज्ञानं। ततो विजातीयक्रियाकारकापेक्षया सजातीयपदार्थापेक्षसङ्ख्यायाः प्रथममुपस्थित्या तज्ज्ञानं। ततः कारकरूपविभक्त्यर्थाकाङ्क्षा। तन्निवृत्तौ हि बहिर्भूतकुत्स्यादियोग इति कुत्सित इति सूत्रे भाष्ये स्पष्टम्। एवं च ज्ञानक्रमानुरोधेनैव तत्तत्प्रयुक्तकार्यप्रवृत्तेरौचित्येन क्रमिकत्वं स्पष्टमेव। यद्यपि लोकानां बोधो न क्रमेण तथापि शास्त्रप्रक्रियायां शा

स्वार्थादिप्रयुक्तकार्याणां क्रमिकत्वस्वीकारादित्यवधेयम्। सुङस्योरिति। सोरुकारोऽवर्णस्य सावित्यत्र विशेषणार्थः। असावित्युक्ते हलसकारादावित्यर्थः स्यात्। तथा च वाजमर्वत्सु पयउस्रिया सु इति न सिद्ध्येत्। ङसेरिकारो युष्मदस्मद्भ्यां ङसोऽश् इत्यत्र अस्य ग्रहणं मा भूदिति। यदि तु एकवचनस्य चेत्यत्र पञ्चम्या इत्यनुवृत्तेः परिशेषादन्यस्य ङसोऽत्र ग्रहणं भविष्यतीत्युच्यते तर्हि टाङसिङसामित्येतदर्थः। जश्शसोर्जकारशकारौ जसः शी नस्माच्छसो न इत्यनयोर्विषयविभागार्थौ। अन्यतरस्य निरनुबन्धकत्वमेवास्तु इति चेन्न। जसो जकाराभावे औ इत्यस्यावृस्यात्। ततश्च प्रत्ययस्य वकारान्ततापि सम्भाव्येत।

सूत्रकृत्कल्पितोऽयं क्रमः। अर्थवदुद्देशेन प्रातिपदिकत्वविधानात् प्रातिपदिकोद्देशेन लिङ्गनदीङीबादिविधानादिति बोध्यम्। अत एव घकालतनेष्विति चरितार्थम्। स्पष्टं चेदम् अचः परस्मिन्नित्यत्र भाष्यकैयटयोः। एवं चैतन्न्यायसिद्धार्थानुवाद एव ङ्याब्ग्रहणम्। अत्यन्तस्वार्थिकानारभ्य तस्य निवृत्तेरुक्तन्यायविषयाभावाच्च समासान्तेषु न दोषः। अत्यन्तस्वार्थिके कन्यार्थिकेत्येव यद्यभिधानमस्ति। लोहिनिकेत्येतत्सिद्ध्यर्थं च लोहिताल्लिङ्गबाधनं वेति कार्यमेवेति भावः। स्पष्टं चेदं सूत्रशेषे भाष्ये इत्यन्यत्र विस्तरः। पञ्चम्या इत्यनुवृत्तेरिति। तृतीयाव्यावृत्तये इति भावः। टाङसीति। तत्रेकारानुच्चारणे इष्टस्य यथासङ्ख्यस्यानापत्तिरिति भावः ॥

ङित्वमिति।ततश्चटिलोपःस्यादितिभावः।विशेषणार्थइति।तत्फलन्तुसुपांसुलुगितिसूत्रेणाकारादेशेइनादेशाभावः।घेर्ङितीति।नचघेःसुपिगुणइत्येवास्तु

एवंशसःशकाराभावेऔटोङित्वंसम्भाव्येत।अतोअसन्देहार्थंतत्करणौचित्यात्।औटष्टकारःसुडितिप्रत्याहारार्थः।टाटकारस्तुटाङसीतिविशेषणार्थः।ङेप्रभृतीनांङकारोघेर्ङितीतिविशेषणार्थः।पकारस्तुप्रत्याहारार्थः।एवंचसर्वेषांफलत्वेपिसंज्ञार्थाइतिप्राचोग्रन्थोऽसङ्गतएव।सम्यग्ज्ञानंसंज्ञातदर्थाःविशेषणार्थाइतियावत्।इतिभङ्ग्याव्याख्यानेपिक्लिष्टत्वमेवेत्युपेक्षितम्।सुपः॥तिङस्त्रीणित्रीणिइतिसूत्रात्त्रीणित्रीणिइतिपदंतान्येकवचनेत्यादिसूत्रंचसंपूर्णमनुवर्ततइतिव्याचष्टे।सुपस्त्रीणित्रीणीत्यादिना।एकशइति।एकैकमित्यर्थः।सङ्ख्यैकवचनाच्चेतिवीप्सायांप्रथमान्तात्शस्।यत्तुप्राचाएकैकशइत्युक्तंतदयुक्तम्।शसैववीप्सायाउक्तत्वेनद्विर्वचनायोगात्।येननाप्राप्तिन्यायेनद्विर्वचनापवादःशस्इतिसिद्धान्तात्।यत्त्वाहुः।सर्वस्यद्वेइत्यत्रएकैकशोददातीतिभाष्यप्रयोगात्तान्येकेतिसूत्रेएकशइतिसूत्रकारनिर्देशाच्चोभयंसाध्विति।तन्न।उदाहृतभाष्यस्यान्यविषयत्वात्।यत्रतद्धितेनानुक्तावीप्साभवतितत्रद्विर्वचनंइत्युपक्रम्यहि।तद्यथा।एकैकशोददातीतिभाष्येउदाहृतम् ॥

जसिचेतिनियमात्तुनाङितिप्रवृत्तिरितिवाच्यम्।एतयदित्यर्थंजसिचेत्यस्यावश्यकत्वात्।तान्येकेति।तत्रानुवृत्तानीत्यस्यलब्धव्याकरणान्तरोक्तप्रथमादिसंज्ञानीत्यर्थः ॥

वीप्सायांद्विर्वचनेइति।शसःकारकाद्विधानेनमङ्गलामङ्गलारूपार्थापेक्षणेनचबहिरङ्गतयाद्विर्वचनेकृतेशसितिभावः।यद्यपिक्वचिदुक्तार्थानामपिप्रयोगोभवतितथापियत्रतद्धितेनानुक्तावीप्साभवतितत्रद्विर्वचनम्।यथैकैकशोददातीत्यादिभाष्योक्त्याल्पार्थकैकशब्दाद्वीप्सायांद्विर्वचनेबह्वल्पार्थादितिशसितिकैयटोक्त्याचप्रकृतेतद्वक्तुमशक्यम्।नचैवमृषिसहस्रमेकांकपिलामेकैकशःसहस्रकृत्वोदत्त्वातयातेसर्वेसहस्रदक्षिणाःसंपन्नाइत्यइउणसूत्रस्थभाष्येएकेकशइतिप्रयोगासङ्गतिरितिवाच्यम्।एकेतिप्रधानार्थकसंबोधनसत्वेनैकशइत्यस्यप्रत्येकमित्यर्थकत्वेनादोषात्।एतद्भाष्यप्रामाण्येनस्वार्थिकद्विर्वचनकल्पनापेक्षयामदुक्तस्यैवन्याय्यत्वात्।किंचनायंभाष्यप्रयोगःकिंतुगोण्यप्युत्तरासंख्यापूर्वांसंख्यांबोधतेइत्यत्रश्रौतोवास्मार्त्तोवायंव्यवहारोदृष्टान्तत्वेनोक्तोभगवतेतितत्रछान्दसत्वान्नदोषएकैकशःपितृसंयुक्तानित्यादिवदितिदिक्।रमन्तेऽस्मिन्निति।योगिनइतिशेषः।इतिभावइति।एतावतैवद्वन्द्वापवादएकशेषइतिव्यवहारइतिभावः।एतेनैकशेषारम्भफलमपिनिरूपितंद्वन्द्वनिवृत्तिरूपम् ॥

> व्याख्यातंचकैय्यटेनअल्पार्थोप्येकशब्दोऽस्ति तस्यवीप्सायान्द्विर्वचनेबह्वल्पार्थादितिशस्प्रत्ययइति।नचैषोर्थःप्रकृतेसंभवतीत्यास्तान्तावत्।रामइति।सञ्ज्ञाशब्दोयमव्युत्पन्नइतिपक्षेऽर्थवत्सूत्रेणप्रातिपदिकसञ्ज्ञा।करणाधिकरयोश्चेत्यधिकारेघापवादेनहलश्चेतिघञारमन्तेस्मिन्नितिव्युत्पादनेतुकृत्तद्धितेतिसूत्रेणेतिविवेकः।सरूपाणामेकशेषएकविभक्तौ।एकविभक्तौयानीति।विभक्तिःसारूप्येउपलक्षणंनत्वेकशेषेनिमित्तम्।सर्वत्रानैमित्तिकत्वेनान्तरङ्गोयमेकशेषःसुबुत्पत्तेःप्रागेवप्रवर्त्तते।यद्येतन्नारभ्येततर्हिप्रत्येकंविभक्तिःस्यात्द्वन्द्वश्चप्रवर्तेत।आरब्धेत्वेकशेषेऽनेकसुबन्तविरहाद्द्वन्द्वस्याप्राप्तिरेवफलिताभवतीतिभावः ॥

उत्तरसूत्रस्थस्येति।वृद्धोयूनेतीत्यर्थः।अनुकर्षणादिति।अनुपश्चात्कर्षणाद्आकर्षणादित्यर्थः।क्वचिदपकर्षणादित्येपिपाठः।नैकशेषइति।भ्यामादावपीत्यर्थः।भ्यामिस्त्रीपुंसयोस्ताभ्यामित्यनुप्रयोगस्यसमत्वात्।एतेनानुप्रयोगविरोधादत्रनैकशेषइत्यपास्तम्।पुमान्स्त्रियेत्येकशेषोपिन।तत्राप्येकविभक्तौसरूपाण्येवेत्यनुवृत्तेः।अतएवप्रातिपदिकैकशेषेमातृमात्रोःप्रतिषेधोवक्तव्यइतिवार्तिककृतोक्तम्।ननुवार्तिकेप्रातिपदिकैकशेषइत्ययुक्तम्।विभक्त्यन्तानामेकशेषेपिजननीमातृधान्यमात्रर्थकेमातृभ्यांदेहिमातृभ्यांचेत्यत्रप्रतिषेधआवश्यकः।नचतत्पक्षेइष्टापत्तिः।किमुच्यतेप्रातिपदिकानामेकशेषइतिनपुनर्यस्यापिविभक्त्यन्तानामेकशेषस्तेनापिप्रतिषेधोवक्तव्यस्तस्यापिह्येतानिकचिद्विभक्त्यन्तानिसरूपाणिमातृभ्यांचेति।अथमतमेतद्विभक्त्यन्तानांसारूप्येभवितव्यमेकशेषेणेतिभाष्योक्तेरितिवाच्यम्।

सरूपाण्येवेति।एतच्चोत्तरसूत्रस्थस्यैवकारस्येहानुकर्षाल्लभ्यते।तेनमातृशब्दयोर्जननीवाचिपरिच्छेतृवाचिनोर्नैकशेषः।मातृभ्यामित्यादौसारूप्येपिओजसादिषुवैरूप्यात् ॥

७ सूत्रव्याख्यानपक्षभेदेनैकलक्ष्यस्यसाधुत्वासाधुत्वयोरनौचित्यात्।अतएवाथमतमेतदितिप्रतीकमुपादायाभ्युपगमवादेनत्वेतदुच्यतइतिकैयटादिभिर्व्याख्यातमितिचेन्न।ईदृशविरुद्धमभ्युपेत्यैववार्त्तिकेतदुक्तेः।अतएवतदुत्तरमेवंचकृत्वाचोद्यतेइत्युक्तंभाष्ये।अस्यप्रातिपदिकानामेकशेषइत्यादीतिशेषः।अनेनचास्यपूर्वपक्षवार्त्तिकत्वंस्फुटमेवोक्तम्।तत्रमातृग्रहणंविभक्तौविरूपाणामुपलक्षणम्।अयंचपूर्वपक्षःप्रातिपदिकैकशेषस्यैकविभक्तावितिपदाभावेएवोपपत्तिमत्वाकृतः।तदभावेहियानिसरूपाणितेषामेकशेषश्चेत्यर्थएवप्राप्नोतिप्रयोगमात्रावच्छेदेनसारूप्यस्यहरिणहरितप्रकृतिकहरिणीशब्दादौतद्धितेवैरूप्येणासंभवात्प्रयोगसामानाधिकरण्येनैवसारूप्यस्यग्राह्यतयातस्यात्रापिसत्वात्प्राप्तस्यसनिषेधः।अतएवाग्रेविभक्तेःसारूप्येउलक्षणत्वमाश्रित्यतत्पक्षस्यापनेनतत्खण्डनंकृतमित्यैवकारापकर्षोभाष्येध्वनितः ॥

तंविनातावन्मात्रेणतत्खण्डनायोगात्।एतेनैकविभक्तावित्यावश्यैकविभक्तौसरूपाणामेकविभक्तौविवक्षितायामेकशेषइत्यर्थेयस्यांविभक्तावेकशेषस्तस्यांविभक्तौसरूपाणामित्यर्थस्यप्रत्यासत्त्यालाभेनभ्यामादावेकशेषोनौजसादावितिवार्तिकंव्यर्थमितितदाशयइत्यपास्तम्।वार्तिकमतेभ्यामादावपितदभावस्यप्राप्तत्वाच्चेतिदिक्।एतच्चेति।एकशेषविधायकंचेत्यर्थः।ध्वनितंचेदंपृथक्त्वेषांविभक्तिपराणामेकशेषइतिपक्षेविभक्त्यन्तानामेकशेषइतिपक्षेचद्वन्द्वप्रतिषेधोवक्तव्यइत्यस्यानवकाशएकशेषोद्वन्द्वंबाधिष्यतइतिग्रन्थेनभाष्ये।इतरेतरेति।एकवच्चास्यान्यतरस्यामित्यनेनैकशेषविषयपदानांसमाहारेऽवृत्तिबोधनादितिभावः।इत

एकएवेति।एतच्चसहविवक्षायामेवप्रवर्तते।इतरेतरयोगद्वन्द्वस्यविषयेइतियावत्।यत्रह्यनेकस्यार्थस्यमिलितस्येतरान्वयःसतथाभूतोऽस्यविषयः।इदंचइदितोनुम्धातोरितिलिङ्गाल्लभ्यतेन्यायाच्च।तथाहि।यःशिष्यतेसलुप्यमानार्थाभिधायीतिस्थितेश्रूयमाणैकशब्दोपस्थितंसर्वमविशेषादेकरूप्येणैवान्वेतुमर्हति।यद्वापूर्वसूत्राद्द्वन्द्वइत्यनुवर्त्यद्वन्द्वेप्रसक्तेसतीतिव्याख्येयम्।स्यादेतत्।द्वन्द्वेकृतेसतीत्यर्थोऽस्तु।मैवम्।पन्थानौ।पन्थानइत्यादौसमासान्तापत्तेः।करौकराइत्यादावेकवद्भावापत्तेः।सर्वे।सर्वेषामित्यादौद्वन्द्वेचविभाषाजसीत्यनयोरापत्तेश्चेतिदिक्॥यत्तुप्राचारामरामऔइतिस्थितेइत्युक्तंएकएवशिष्यतेएकविभक्तौपरत्वइतिच।तत्रेत्यमुक्तिसंभवः।रामरामइत्यत्रअवयवयोरिवसमुदायस्यापिप्रातिपदिकसंज्ञास्तिमिलितेनार्थवत्त्वात्॥

रान्वयइति।एकरूप्येणैकरूपावच्छिन्नेइतरत्रान्वयइत्यर्थः।इदितइति।अत्रह्यनेदेनपरस्परान्वयाद्विदघटितसाहित्यनिमित्तैकशेषाप्रवृत्तिरितिभावः।एकरूप्येणैवेति।पुष्यवन्तपदइवेतिभावः।द्वन्द्वेप्रसक्तेइति।विभक्त्युत्पत्तेःसत्यान्तप्रसक्तिर्बोध्या।एकवद्भावापत्तेरिति।एवंचेतरेतरयोगविषयाभावेनैकशेषानापत्तिरितिभावः।इत्यनयोरिति।जसःशीत्यत्रचेतिवक्तव्येविभाषाजसीतितूद्भूतावयवभेदविवक्षयाबहुवचनेएकशेषद्वन्द्वयोरभावात्तत्रविकल्पवारणायो

तथैवेतिभावः।

सजातीयेति।स्वातन्त्र्येणप्रयोगार्हत्वेनसाजात्येपिनदोषः।एतत्पूर्वभागस्यविभक्त्युत्पत्तिमनपेक्ष्यस्वातन्त्र्येणप्रयोगानर्हत्वात्।अनुग्रहसंभवादिति।अतएवनप्रत्येकंतदु
त्पत्तिः।बाधादिति।अन्यथाद्वन्द्वोच्छेदोनलोपाद्यसिद्धिश्चेतिभावः।यानिसरूपाण्येवेति।तेषामेकविभक्तौपरतएकशेषइतिशेषः।मानाभावादिति।भाष्येऽनुक्तत्वादितिभावः।
किंचावृत्तौप्रत्यासत्तिन्यायेनयस्यांविभक्तावेकशेषस्तस्यांविभक्तौयानिसरूपाण्येवतेषामित्यर्थापत्त्याभ्यामादावेकशेषापत्तिः।प्रातिपदिकैकशेषेमातृमात्रोःप्रतिषे

नचार्थवत्त्वेपिसमासग्रहणस्यनियमार्थत्वान्नैवमितिवाच्यम्।यत्रसमुदायेपूर्वोभागःपदन्तद्विषयकोनियमइत्युक्तत्वात्।बहुपटवइत्याद्यनुरो
धेननियमस्यसजातीयविषयताया औचित्याच्च।तथाचैकाज्द्विर्वचनन्यायेनसमुदायप्रातिपदिकादेवद्विवचनाद्युत्पत्तिः तावताप्यवयवा
र्थानांसंख्यान्वयेनानुग्रहसंभवात्।नन्वेवंरामकृष्णावित्यादिष्वपिद्वन्द्वंविनैवसमुदायाद्विभक्तिःस्यादितिचेन्नैवम्।द्वन्द्वविधावनेकंसुबन्तमित्यस्या
नुवृत्त्याएकाज्द्विर्वचनन्यायस्यबाधादितिदिक्।इत्थमुक्तिसंभवेसत्यपिसमुदायादेकविभक्तौपरतइतिपक्षःकिमर्थमुपेक्षितइतिचेत्।शृणु।
अस्मिन्पक्षेमातृमातारौइत्यादावप्येकशेषःस्यात्।नन्वेकविभक्तावित्यावर्त्यएवकारंचानुकृष्यएकविभक्तौयानिसरूपाण्येवेतिव्याख्येयमिति
चेन्न।आवृत्तौमानाभावात्।विभक्तेरेकशेषस्यविशेषणत्वेफलाभावाच्च।नचपयःपयोजरयतीत्यादिष्वावृत्तिःफलं,सहविवक्षायामित्यस्या
वश्यकत्वात्।अन्यथापयःपयोनयतीत्यत्रगौणमुख्यकर्मणोरेकशेषापत्तेः ॥ धोवक्तव्यइतिवार्त्तिकेनभ्यामादावपितदभावस्यैवेष्टत्वानु
मानात्।फलमिति।समुदायादेकविभक्तेरभावाद्विभक्तेर्लुकालुप्तत्वाच्चेतिभावः।सहविवक्षायामिति।साचसमुदायस्यैकार्थनिरूपितैककारकावेशएवभवती
तिभावः।गौणमुख्यकर्मणोरिति।उभयोरपिकर्मत्वेनतत्रसमुदायादेकविभक्तेःकर्त्तुंशक्यत्वेनविभक्तिपदेनव्यावर्त्यासंभवेनसहविवक्षायामित्यावश्यकमितिभावः ॥

नन्वत्रापिलुकिविभक्तिपरत्वाभावइत्यरुचेराह। देवदेवइति। असहविवक्षायामप्येकशेषेतत्पुरुषादिविषयेपितदापत्तिरितिभावः। तत्रापिसमुदायादेकविभक्तेः सत्वात्। नन्वनेकबोधकैकभिक्षाशब्दादणिभैक्षसिद्धिरस्तीत्यतआह। तथाहीत्यादि। एकशेषारम्भेएकशेषंविनातादृशस्यज्ञानासंभवइतिभावः+ विभक्तिपरत्वाभावादिति। परत्वान्नित्य त्वाच्चादिवृद्धौसारूप्याभावाच्चेत्यपिबोध्यम्। अविरविकन्यायेनसमाधानंतुलक्षणैकचक्षुष्कैर्दुर्ज्ञेयमत्रनचसमर्थग्रहणेनपरिनिष्ठितप्रातिपदिकात्तद्धितोत्पत्तेः पूर्वमेकशेषेपश्चात्तद्धितइतिवाच्यम्। प्रातिपदिकाधिकारात्किंतत्समर्थकृतवर्णानुपूर्वीकमितिभाष्यात्प्रातिपदिकसंबन्धिवर्णमात्राश्रयतत्संबन्धिवर्णनिमित्तकार्येणपरिनिष्ठितत्वस्यैवाश्रयणात्। अतएवाश्विमानणितिसङ्गच्छते। अन्यथाप्रकृत्यंशेदीर्घश्रवणंस्यात्। उभयतइति। विभक्तौपरतो

देवदेवइत्यादावतिप्रसङ्गाच्च। प्रस्तुतआस्त्याउभयविशेषणत्वेभिक्षाणांसमूहोभैक्षमितिनसिद्ध्येत्। तथाहि। भिक्षा३आम्अइतिस्थितेन्तरङ्गानुविधीन्बहिरङ्गोपीतिलुकिकृतेविभक्तिपरत्वाभावादेकशेषोनस्यात्। लुकालुप्तेप्रत्ययलक्षणाभावात्। किंच। रामावित्यादौपरत्वान्नित्यत्वाच्चवृद्धिरेचीत्येकादेशेकृतेविभक्तिपरत्वाभावादेकशेषोनस्यात्। उभयतआश्रयणेऽन्तादिवद्भावाभावादितिदिक्॥ ७ यतःप्रत्ययविधिस्तस्यैकशेषइत्यर्थात्तदाश्रयणमितिभावः। अचःपरस्मिन्नितिस्थानिवत्त्वंतुन। लोकसिद्धतन्त्रानुवादकत्वादस्यशास्त्रस्यानुवादसामर्थ्यादेवद्वन्द्वनिवर्तकस्यशास्त्रीयविधित्वाभावात्। अनयापिरीत्यान्तवत्त्वाप्रवृत्तिरित्यन्यत्। यद्वेकदेशविकृतन्यायेनप्राग्दीव्यतोणितिसूत्रस्थभाष्यप्रामाण्यात्स्थानषष्ठ्यबोधितविकारस्यापिग्रहणमशास्त्रीयस्यचतेनातिदेशस्तदाभान्तस्यतेनन्यायेनतत्प्रकृतितयाऔङ्स्यस्यचप्रत्ययत्वेनादोषः। अतएवतस्यपदत्वसिद्धिः। अतएवआयसावित्यत्रैकादेशेकृतेनसमाधाङ्क्या चःपरस्मिन्नितिस्थानिवत्त्वेनपरिहृतंभाष्येइत्युच्यतेतर्हिवैरूप्यादेकःशेषोनस्याद्विरूपाणामित्यनेनतत्साधनेतुनदो[illegible]त्यलम्॥

युगपदधिकरणेति।युगपदधिकरणानान्द्रव्याणांवचनंयैःपदैस्तद्भावस्तदर्थस्तदाह।एकैकमित्यादि।अलौकिकेइति।तत्रैवद्वन्द्वादिवृत्तिसत्वात्।तत्रापितत्कल्पनादितिभावः।रामकृष्णावित्यादौविरूपाणामपीत्येकशेषस्तुन।द्वन्द्वविधानसामर्थ्येनतत्प्राक्कालिकस्यैवसमानार्थत्वस्यतत्रनिमित्तत्वात्।एवंचैकस्यविभक्त्यन्तस्यनिवृत्तावपरस्यतद्विशिष्टस्यश्रवणमितिभावः।पक्षान्तरेपीति।अयंभावः।अलौकिकेतत्कल्पनेपिप्रत्येकंसुबुत्पत्त्यनन्तरमेवतत्कल्पनात्तदनन्तरमे

यत्तुप्राचाव्याख्यात्रापक्षान्तरमुपन्यस्तंसविभक्तिकानामेकशेषइति।तन्न।निवर्तमानानांविभक्त्यासहैवनिवृत्तावपि
शिष्यमाणेएकवचनश्रवणप्रसङ्गात्।अथोच्येतयुगपदधिकरणवचनतायांद्विवचनबहुवचनान्तानामेकशेषःद्वन्द्वोप्येवमुत
थाहि।अजहत्स्वार्थायांवृत्तौएकैकमनेकार्थाभिधायिपरस्परसमभिव्याहारात्।तथाचअलौकिकेद्वन्द्वैकशेषयोःप्रक्रियावा
क्येद्विवचनबहुवचनयोरेवप्रवेशाद्विभक्त्यन्तानामेकशेषइतिपक्षोनिर्बाधएवेति।तदपिन।जहत्स्वार्थायांवृत्तौत
दयोगात्।पक्षान्तरेपिप्रथमप्रवृत्तस्यैकवचनस्यत्यागायोगात्।अन्यथाषष्ठीतत्पुरुषाद्युच्छेदापत्तेः।तत्रापिपूर्वपद
स्यउत्तरपदार्थेउपसंक्रमेणषष्ठ्याद्ययोगात् ॥

वतत्कल्पकद्वन्द्वैकशेषयोःप्रवृत्तेः।एवंचान्तरङ्गत्वादुत्पन्नैकवचनत्यागेनद्विवचनाद्युत्पत्तौमानाभावइति॥उत्तरपदार्थेउपसंक्रमेणेति।उपसंक्रमश्चतदालिङ्गितस्यैवस्वार्थस्योपस्थितिःसाचविभक्त्यर्थसंबन्धाद्यन्तर्भावेणैवेतितस्योक्ततयातदनापत्तौतदुच्छेदइतिभावः।दुःखाचेति।वृद्धव्यवहारस्यशब्दार्थनिश्चयहेतुत्वंनचप्लक्षशब्दस्यन्यग्रोधाभिधायित्वंवृद्धव्यवहारेदृश्यते।न्यग्रोधशब्देनतल्लाभाच्चनलक्षणापि।प्लक्षन्यग्रोधावित्यादौबोधात्स्यननुभवाच्च ॥

दुरुपपादाचेति।नचद्विवचनाद्यनुपपत्तिस्तदुपपादिका।समासस्योद्भूतावयवभेदसमुदायाभिधानशक्तिमत्त्वाद्द्विवचनादिसिद्ध्यातदनुपपत्तेस्तदुपपादकत्वाभावात्।समुच्चयान्वाचययोःसमासस्यासामर्थ्येनैववारयिष्यमाणतयानतदापत्तिरेतदुपपादिका।नचान्यत्रोपपादयितुमशक्यत्वेपिएकशेषेकस्यशेषइत्यत्रविनिगमकाभावात्सर्वेषांसर्वार्थत्वमावश्यकम्।तथासत्येकशेषस्यैववैयर्थ्यापत्तेः।तस्मादेकशेषज्ञानोत्तरंशास्त्रवासनावतान्तच्छक्तिज्ञानंनतुततःप्रागपीतिनदोषः।आकृत्यविनाभूतेति॥नियमेनाकृतिसंबद्धेत्यर्थः।ब्राह्मणशब्देनैवेतिभावः।नहितत्रैकशेषः॥तावद्ब्राह्मणंशब्दज्ञानासंभवात्तस्मात्तत्रजातिपक्षेणतन्त्रेणैवायथानिर्वाहस्तथा

तथाचभाष्यम्।सेयंयुगपदधिकरणवचनतादुःखाचदुरुपपादाचेति।यदपिव्याचख्युः।व्यक्तिपक्षेयावद्व्यक्तितत्तच्छब्दप्रयोगेप्राप्तेएकस्यैवप्रयोगोयथास्यादितिसूत्रम्।आकृतिपक्षेतुएकेनैवाकृत्यविनाभूतानेकव्यक्तिलाभादनर्थकमिति।तन्न।व्यक्तिपक्षेपिनब्राह्मणंहन्यादित्यत्रब्राह्मणशब्देनैकेनापिअनेकस्यतन्त्रेणसुवचत्वात्।अन्यथाजातिपक्षेपि वासेनसम्यक्क्षमयोश्चतस्मिन्नित्यादिनानार्थानुरोधेनसूत्रंविनाऽनिर्वाहात्।तस्माज्जातिव्यक्तिपक्षयोरुभयोरपितन्त्रेणप्रयोगनिर्वाहेपिसर्वत्रतन्त्रेणैवबोधनीयमितिनियामकाभावात्पाक्षिकोद्वन्द्वःसूत्रंविनादुर्वारः ॥

न्यत्रापीतिभावः।नब्राह्मणमित्येकवचनंत्वार्षम्।तन्त्रेणसुवचत्वादिति॥अयंभावः।भाष्येऽर्थावर्थौप्रतिपदर्थानर्थान्प्रतिचयत्तदपिप्रत्यर्थमेवेत्युक्तम्।एवंचैकेनानेकार्थबोधनमपिप्रत्यर्थमेवेतिएकेनैवब्राह्मणपदेनानेकार्थबोधनंतत्र।अन्यथाऽविद्यमानायाःशक्तेरेकशेषशास्त्रसहस्रेणापिउपपादयितुमशक्यतयाबोधानुपपत्तिरेवस्यात्।तन्त्रंचात्रार्थतन्त्रम्।एकत्रैवशब्देऽनेकार्थानांसत्त्वात्।शब्दस्यपर्यायपरिवृत्तिसहतयार्थतन्त्रमेवे[illegible]त्।अस्मादित्यादौतुतदसहतयाशब्दतन्त्रमेव।अन्यथा।तन्त्रानङ्गीकारे।क्षमाशब्दःक्षान्तिभूम्योर्वाचकः।नानार्थानुरोधेनेति।सूत्रमावश्यकंतत्रेतिशेषः ॥

न्यायप्राप्तत्वादिति।अनभिधानमाश्रित्यतुभाष्येपक्षद्वयेपिसूत्रंप्रत्याख्यातमित्यन्यत्।अनेकघटादिपदानांचार्थेवृत्तिरेवनानभिधानादितिद्वन्द्वाप्राप्तिरेवेति
तदाशयः।आवश्यकमिति।अनभिधानाज्ञानेइतिशेषः।नानेनैकशेषोविधीयतेइति।किंतुन्यायसिद्धएवानूद्यतेइति।तच्छेषस्तद्वन्द्वे।प्रयुक्तानामिति।अयंभावः।
वृद्ध्यादिप्रवृत्तावेकशेषशास्त्राप्रवृत्त्यानित्यविद्युद्देश्यतावच्छेदकानाक्रान्तत्वेनतावदेवपरिनिष्ठितस्यात्तच्चनलोकेप्रयुज्यतेप्रयुक्तानांचेदमन्वाख्यानमितिनतत्प्र

घटोयंघटोयमितिनानाशब्दप्रयोगदर्शनात्तद्वद्घटघटावितिद्वन्द्वस्यन्यायप्राप्तत्वात्।नचैवमपिघटकलशावितिद्वन्द्वापत्तिः।विरूपाणामपिस
मानार्थानामितिवार्तिकात्।रूप्यतेबोध्यतइतिव्युत्पत्त्यारूपशब्दस्यअर्थपरत्वमाश्रित्यवार्तिकार्थस्यापिसूत्रेणैवक्रोडीकाराच्च।तस्माद्घटघटौघ
टकलशावित्यादिप्रसक्तानिष्टवारणायपक्षद्वयेपिसूत्रमावश्यकमित्यवधेयम्।एवंस्थितेसूत्रवैयर्थ्यमेवहृदिनिधाययदिहव्याचख्युः।नानेनैक
शेषोविधीयतेइत्यादिग्रन्थसमुदायादेकस्यांविभक्तावितिपक्षंप्रत्याख्यायपुनराहुः।रामरामऔइतिस्थितेइति।अलौकिकमेतत्प्रक्रियावाक्यमूह्य
तेनतुलौकिकम्।अलौकिकेचविभक्त्येकादेशादिकार्यंनप्रवर्तते।प्रयुक्तानामेवान्वाख्यानादित्यादि।तत्सर्वंसन्दर्भविरुद्धंन्यायविरुद्धंच।प्रयुक्तानेवह्यन्वा
ख्यातुमलौकिकंत्विष्यते।शास्त्रीयकार्यंचसर्वमलौकिकेष्वेवप्रवर्ततेनतुपरिनिष्ठिते।प्रथमयोःपूर्वसवर्णइत्यादीनांप्रवृत्तिंविनापरिनिष्ठितरूपालाभात्।परि
निष्ठितेतत्प्रवृत्तेर्दुरुपपादत्वाच्चेत्यास्तांतावत्।

क्रियावाक्येवृद्ध्यादिप्राप्तिरिति।संदर्भविरुद्धमिति।एकस्यैवप्रयोगेयथास्यादितिसूत्रमितिसमुदायादेकविभक्ता
वितिपक्षःप्रत्याख्यातइतिचसन्दर्भइत्यर्थः।न्यायविरोधमाह।प्रयुक्तानेवेति।नचयद्यादृशशास्त्रीयकार्यप्रवृत्त्यापरिनिष्ठितंसल्लोकेप्रयोगार्हंकल्पितेतदीयालौकिकेतच्छा
स्त्रप्रवृत्तावपिअत्रवृद्ध्यादिप्रवृत्तिर्नोचितावैषम्यादितिवाच्यम्।कृतद्वन्द्वानामेकशेषइतिपक्षेनावावनड्वाहावित्यादौपरत्वादिनाआवादौकृतेएकशेषानापत्तेरितिदूषणदा
नपरभाष्यवार्तिकासङ्गत्यापत्तेरित्यलम्॥

अमियोजिति।अवयविनआधारत्वविवक्षायांवृक्षेशाखेतिवत्सप्तमीतदाह।अमोऽवयवेचीति।पूर्वपरयोरित्यधिकृतपरशब्देनविशेष्यत्वादजेवगृह्यतइतिबोध्यम्।नि
र्विवादत्वादिति।उत्तरत्रानुवृत्तेःसत्वादितिभावः।लिङ्गमिति।अनुवृत्तावनुवृत्तस्यविशेष्यत्वेचेत्यर्थः।स्पष्टंचेदमौतोम् शसोरित्युपक्रम्यप्रत्ययलक्षणसूत्रेभाष्ये।अवयवष
ष्ठीति।अवयवावयविभावसंबन्धबोधिकाषष्ठीत्यर्थः।निर्देशाच्चेति।नुम्ग्रहणाच्चेत्यपिबोध्यम्।नियमार्थइति।सचसाजात्यादक्षरसमाम्नायिकविषयकोऽतोनृणामित्या

अमिपूर्वः।अम्यचीति।अमियोच्तस्मिन्।अमोऽवयवेचीतियावत्।तेनमकारसहितस्यपूर्वरूपंन।एवंअस्मादूहिन्यामित्यादावपिऊहिन्यांयोच्तस्मिन्नित्यादिबो
ध्यम्।इकोयणचीत्यजग्रहणस्यानुवृत्तेर्निर्विवादत्वात्।पदास्वैरिबाह्येत्यादिनिर्देशाच्चेहलिङ्गं।तस्माच्छसः।तत्शब्देनसन्निहितःपूर्वसवर्णदीर्घःपरामृश्यते।
शसइत्यवयवषष्ठी।सचावयवःपरत्वेनविशेष्यते।पूर्वसवर्णदीर्घात्परस्यशसोअवयवस्येति।तदेतदाह।परोयःशसःसकारइति।परोयःशस्इतितुनोक्तम्।अ
संभवात्।नहिकृतेपूर्वसवर्णदीर्घेततःपरःशस्संभवति।अट्कुप्वाङ्।रषाभ्यामितिपञ्चमीनिर्देशाद्व्यवहितस्याप्राप्तौवचनमिदम्।तत्रसर्वैर्व्यवायोऽसंभ
वी।एकैकमात्रव्यवायइत्यपिनार्थः।क्षुभ्नादिषुक्षुभ्नशब्दपाठसामर्थ्यात्तद्रूपाणामित्यादिनिर्देशाच्चेत्यभिप्रेत्याह।व्यस्तैर्यथासंभवंमिलितैश्चेति।नन्वेवंआदर्शेने
त्यादौअतिप्रसङ्गः।नचअडादिभिरेवव्यवधानेइतिनियमः।अप्राप्तेविधिरयमित्युक्तत्वात्।सत्यम्।योगविभागोऽत्रबोध्यः।व्यवायेपीत्येकोयोगोविध्यर्थः।अट्कुप्वा
ङ्नुम्इत्यन्योनियमार्थः।छान्दसोभिसोलुक्।निषेधंबाधितुमिंति।तेनपर्याणद्धमित्यत्रउपसर्गादसमासेपीतिणत्वंसिद्ध्यतीतिभावः॥

दावुतरस्यभागेनअवधानेपिणत्वसिद्ध्याक्षरवर्णान्नस्येतिवचनेनकार्यमितिभावः।इदंप्रत्याहाराह्निकेप्रकृतसूत्रेचभाष्येस्पष्टम्।यद्यपिरषाभ्यामि[illegible]स्योपस्थितनिर्दि
ष्टपदस्यव्यवायेइत्यनेनाविरोधायाडाद्यतिरिक्ताव्यवहितपरतयाऽदर्शनालीस्यादोणत्वंसुशकवारणम्।ध्वनितंचेदंप्रकृतसूत्रेवार्त्तिककृतातथापि[illegible]नृणामि
त्यर्थवचनारम्भेगौरवमितीदमेवादृतंमूलकृता॥

स्वाभाविकस्येति।तद्भिन्नस्थानिकस्यपाणिन्युच्चारितस्येत्यर्थः।तृंहूइत्यादेरपिनकारजावनुस्वारेतिवृद्धोक्तेर्नस्थानिकत्वादतएवतृंहूइत्यसनलोपेतृढइत्यस्यासिद्धिः।इविप्रीणनेइति।हिविदिवीतिदण्डकपठितस्येदंनिष्कृष्यग्रहणम्।प्रेन्वनमित्यादौनुमोनस्यक्षुभ्नादित्वाण्णत्वाभावः।इतिदिगिति।तद्वदत्रनुनवकुंशकुंतृंहूइ

नुम्ग्रहणमिति।तत्स्थानिकस्यस्वाभाविकस्यचानुस्वारमात्रस्योपलक्षणमित्यर्थः।तेनचवृहिरिद्धौद्दित्वान्नुम्।तस्यानुस्वारः।तृंहूहिंसायाम्।स्वाभाविकोत्रानुस्वारः।बृंहणम्।तृंहणम्।उभयत्रापिणत्वंसिद्धम्।इविप्रीणने।प्रेन्वनम्।इहकृत्स्यचइजादेःसनुमइतिणत्वंन।यथानक्षत्रंदृष्ट्वावाचंविसृजेदितिविधौनक्षत्रदर्शनस्यकालविशेषोपलक्षणत्वात्सत्यपिदिवानक्षत्रदर्शनेवाङ्नविसृज्यतेउपलक्षितस्यकालविशेषस्याभावात्।रात्रौअसत्यपिनक्षत्रदर्शनेविसृज्यते।तस्यसत्त्वात्।तथेहापिबोध्यम्।नन्वेवंनुम्ग्रहणंव्यर्थंअनुस्वारस्याद्त्वेनैवसंग्रहात्।उरःकेणेत्यादौविसर्ग— जिह्वामूलीयादिव्यवधानेह्येषैवगतिः इतिचेत्सत्यमित्याह।नश्चेति।स्यादेतत्।उक्तरीत्यानुम् विसर्जनीयेतिसूत्रेपिनुम्ग्रहणंत्याज्यंस्यात्।तत्राप्यनुस्वारस्यलक्षणीयत्वात्।अन्यथाऽसंभवात्।नहिषत्वप्रवृत्तिवेलायांसर्पींषीत्यादौनुमलभ्यते।षत्वस्यासिद्धत्वेनततःप्रागेवानुस्वारप्रवृत्तेः।यद्यपिसुहिन्सुइत्यत्रसंभवत्येवतथापितत्रैवातिव्याप्तिंवारयितुंलक्ष्यानुरोधान्नुम्स्थानिकेऽनुस्वारेलक्षणाश्रयणीयैवव्याख्यानात्।तस्यचशर्त्वेनतद्व्यवायेषत्वस्यसिद्धत्वादितिचेत्।मैवम्।उक्तरीत्यातत्रत्यविसर्गग्रहणस्यप्रत्याख्यानसम्भवेपिनियमार्थंनुम् ग्रहणम्।तथाहि।अनुस्वारेणव्यवधानेचेत्षत्वंतर्हिनुम्स्थानिकेनैवेतिनियम्यते।तेनपुंस्वित्यादौषत्वंनेतिदिक्।यस्मात्प्रत्ययविधिः।अत्रप्राचोक्तम्।यस्माद्धातोःप्रातिपदिकाद्वेति।तन्न।तिङन्तादीनामपितरबादिकंप्रत्यंगत्वात्।सङ्कोचस्यनिर्मूलत्वात्।आमुष्यायणइत्यादौवृद्ध्यभावापत्तेश्च ॥

स्यस्यतृंहणमित्यसिद्धेः।स्पष्टंचेदंभाष्ये।अङ्गत्वादिति।तदनङ्गीकारेह्यपाचितरामित्यादौचिणोलुगापादनादिपरभाष्यविरोधः।चिणःपरस्याङ्गसंज्ञानिमित्तस्यप्रत्ययस्यलुगित्यर्थात्॥

दिगिति। दिगर्थस्तु यथाकथाचमित्यादौ याथाकथाचहस्ताभ्यांणयतावित्यनेन वचनसामर्थ्येन निपातसमुदायात्प्रत्ययेङ्गत्वानापत्तौ वृद्ध्यनापत्तेरित्यलम्। ऐस्कृतइति। नद्यैरित्यादिसिद्धये उत्तरार्थं तदित्यन्ये स्पष्टमिति सुपिचेत्यपेक्षयानामीति तत्रनिस्समिस्सपिध्वनितं। विषयभेदादिति। तन्त्रेणषष्ठीद्वयोच्चारणात् आदेशरूपसस्यस्थानेप्र

नहिप्रातिपदिकादयंतद्धितः किंतुसुबन्तादितिदिक्। अतोभिसऐस्। नन्वैसइत्येवास्तु। नचअतोगुणेइतिपररूपापत्तिः। एकारोच्चारणवैयर्थ्यापत्तेः। अन्यथाइसमेवविदध्यात्। इतिचेत्सत्यम्। एदैतोर्द्विमात्रत्वाविशेषेणगौरवाभावात् ऐस्कृतः। एवंचपररूपशङ्कैवनास्तीतिमहल्लाघवम्। यत्त्वाहुः। ऐस्करणंनिर्जरसैरित्यैकारश्रवणार्थमितितद्भाष्यविरुद्धम्। सन्निपातपरिभाषयाजरसादेशाप्रवृत्तेर्निर्जरैरित्येवभाष्येसिद्धान्तितत्वात्। नामि। परिभाषाविरोधादिति। एतच्चरुधादिभ्यःश्नमितिसूत्रेश्नान्नलोपइतिसूत्रेचभाष्यकैय्यटयोःस्पष्टम्। आरम्भसामर्थ्यादिति। सुपिचेत्यस्यतुनसामर्थ्यम्। रामाभ्यामित्यादौसावकाशत्वादितिभावः। एवंचरामशब्देनामीत्यस्योपन्यासोलेखकप्रमादादितियदूचुः तच्चिन्त्यम्। आदेशप्रत्यययोः एकापिषष्ठीविषयभेदाद्भिद्यतेइत्याशयेनव्याचष्टे। आदेशः प्रत्ययावयवश्चेति। यदितुआदेशावयवोगृह्येतेतर्हितिसृणामित्यादौदोषः। यदिचप्रत्ययोयः सकारइतितर्हिरामेष्वित्यादौनस्यात्। यद्यप्येवंवैरूप्येणव्याख्यानेसहविवक्षाविरहात् द्वन्द्वोनयुज्यतेतथापिसौत्रत्वाद्बोध्यः। विवृताघोषस्येति। यत्तुवदन्तिसकारस्यसोष्मणोऽघोषस्यान्तरतमः षएवमूर्धन्यः इतितन्न्यूनम् ॥

त्ययावयवसस्यस्थानेचषोभवतीत्येवंरूपः षष्ठीभेदइत्यर्थः। ओस्त्वंबभ्रइत्यार्थैकइत्यभिमानः। तिसृणामिति। तिस्रादेशेसकारोच्चारणंतुतिस्रइत्यत्रनरपरेतिषत्वनिषेधेचरितार्थमितिभावः ॥

ठकारेतिप्रसङ्गादिति। सोष्मणः सोष्माण इति द्वितीयाद् इति स्थानेंऽतरतमसूत्रस्थभाष्येण तस्यापि सोष्मत्वबोधनात्। सोष्मण इत्यस्य सोष्मत्वसहितस्येत्यर्थः। अस्यार्थेऽन्य

न्तरसंवादश्चाप्यास्तु तथा चेति। प्राक्सुबुत्पत्तेरिति। सोपपदात्क्विचेर्विचिति भावः। केवलात्क्विचेर्विचिदध्नः सेचाविति समासे तूत्तरपदत्वे चेत्यस्यापदादिविधत्वविति निषे
धेन प्रत्ययलक्षणेन पदत्वसत्त्वात्सदस्यादिरिति पक्षेपि सिद्धिरिति भावः। यद्यपि कैयटेन सोपपदात्क्विचेर्विजेव नानभिधानादित्युक्तं तथापि यच्चिभमित्यत्र सुप्तिङन्त
मित्यतः सुबित्यनुवर्त्य यजादावसर्वनामस्थाने तत्प्रकृतिर्भसंज्ञा भवति यजाद्यसर्वनामस्थानपरं सुबन्तं यद्यस्ति तदपि भसंज्ञं तेन सुवाचेत्यादौ न कुत्वम्। अत्र तत्प्रकृतेः
सञ्ज्ञाप्रधानशिष्टा अवयवसुबन्तस्य त्वन्वाचयशिष्टा। एवं स्वादिष्विति योगं विभज्य स्वादिषु पूर्वस्य पदत्वं विधायासर्वनामस्थाने इत्यत्र सुबन्तमित्यनुवर्त्य यचीत्यपकृष्य प्रसज्यप्र

ठकारेतिप्रसङ्गात्। तथा च प्रातिशाख्यम्। वर्गे च प्रथमावघोषौ युग्मौ सोष्माणावनुनासिकोन्त्य इति। न च दधि सेचौ दधि सेच इत्यादौ प्राक् सु
बुत्पत्तेः समासे षत्वं वारयितुं पदादादिः पदादिरिति पञ्चमीसमासो भाष्ये उक्तः। ततश्चेहापि सात्पदाद्योरिति निषेधः स्यादिति चेत् ॥

तिषेधमाश्रित्य यजादौ सर्वनामस्थाने परतः पूर्वपदं न तत्परं यदि सुबन्तमस्ति तदपि पदं नेत्यर्थः। सुबन्तं च यजादिप्रत्ययाव्यवहितमेवातो राजपुरुषादौ पूर्वप
देन लोपादिसिद्धिः। तत्र समुदायस्य स्वादिष्विति प्राप्ताऽवयवस्य सुबन्तमिति प्राप्ता श्रूयमाणे सौ पूर्वपदस्य संज्ञेष्टैव। तेन सुवाचावित्यादिसिद्धिरित्येवमुत्तरपदत्वे
चेत्यस्य प्रत्याख्याने दध्नः सेचाविति षष्ठीतत्पुरुषेपि षत्वनिषेधाय पञ्चमीसमास आवश्यक इत्यनभिधानेन मानमिति तात्पर्यम्। प्रत्याख्याने पञ्चमीस
मासे वहुसेचावित्याद्यर्थं बह्वच्पूर्वस्य षत्वं नेति वचनं कार्यं वार्त्तिकारम्भे तत्रैव कुत्ववारणाय बह्वच्पूर्वस्य चापदादिविधौ नेतिवदिदमपि योगविभागस्येष्टसि
द्ध्यर्थतया यत्रोत्तरपदस्य कार्यित्वं तद्विषय एव पदान्तत्वप्रयुक्तकार्यस्य च बोध्यमित्यन्यत्र विस्तरः ॥

यापदसंज्ञेति।नच राजपुरुषेष्वित्यत्रदोषः।अंतर्वर्तिविभक्त्यासुबन्तमितिपदत्वमाश्रित्यनिषेधापत्तेरितिवाच्यम्।सातिग्रहणेनस्वादिष्वितियस्यपदसंज्ञातद्वृत्तरस्यषत्वनिषेधोनेतिज्ञाप्यतइतितात्पर्यात्।प्रत्याख्यानरीत्यातस्यापिस्वादिष्वितिपदत्वाच्च।सर्वंचेदंनलुमतेतिसूत्रेभाष्येस्पष्टम्।व्यतिसेइति।यद्यपिव्यतिहारस्यानेककर्तृकक्रियाविषयत्वादेकवचनस्यतत्रासम्भवस्तथापिविश्वामित्राश्रमेमारीचंप्रतिकिमर्थंब्रह्मवधंकरोषीतिपृष्टेममायंधर्मइतितेनोत्तरितेधर्मोस्तिसत्यंतवराक्षसायमन्योव्यतिस्तेतुममापिधर्मः।ब्रह्मद्विषस्तेप्रणिहन्मियेनेति।भट्टिकाव्यस्यरामवाक्येतवधर्मेणममान्योधर्मस्तपोरूपोव्यत्यासेनभवतियनधर्मेणत्वत्संबं

मेवम्।स्वादिष्वितियापदसंज्ञातामाश्रित्योक्तनिषेधोनप्रवर्ततइतिसातिग्रहणेनज्ञापितत्वात्।यत्त्वाहुः प्रत्ययविषयेनायंनिषेधइतिज्ञाप्यतइतितन्न।व्यतिसेइत्यादौषत्वापत्तेः।ननुपदस्यादिरितिपक्षेव्यतिसइत्यत्रषत्वंदुर्वारम्।नचव्यपदेशिवद्भावेनसेइत्यस्यापितिङन्तत्वात्पदत्वंशंक्यम्प्रत्ययग्रहणेयस्मात्सविहितस्तदादेरेवग्रहणात्।अन्यथारामेष्वित्यादावपिषत्वनिषेधापत्तेरितिचेत्सत्यम्।नवयंप्रत्ययमात्रस्यतदन्ततांब्रूमःकिंतुप्रकृतिप्रत्ययसमुदायेप्रवृत्तांपदसंज्ञामेकदेशविकृतन्यायेनलुप्तप्रकृतिकेप्रत्ययेप्यानयामः ॥

न्धिनोनिहन्मीत्यर्थकेएकवचनदर्शनान्नदोषः।अद्यारभ्यत्वद्धर्मःक्रौर्यंमयिभवतिमद्धर्मोक्रौर्यंचत्वयि।वर्त्तमानसामीप्येलट्।रामबाणपातेनसमुद्रसमीपेपतितोमारीचस्तपश्चचारेतिरामायणेप्रसिद्धम्।अन्यसंबन्धिक्रियामितरःकरोतिइतरसंबन्धीनीमन्यइतिकर्मव्यतिहारसंभवादितिजयमङ्गला।व्यतिसेइत्यस्यहेचैत्रमैत्रेणसहव्यत्यस्तोभवसीत्यर्थःयद्देशेमैत्रसत्तातद्देशेचैत्रस्यसायद्देशेचैत्रस्यसत्तातद्देशेमैत्रस्यसेतिफलति।यद्यपिव्यपदेशिवद्भावेनैकाच्त्वादेरिवास्याप्यशास्त्रीयस्यातिदेशोवक्तुंशक्यःरामेष्वित्यादौलसहायत्वाभावान्नतत्प्रवृत्तिस्तथापिपूर्वपक्ष्युक्तमभ्युपेत्यापिसमाधातुमुपक्रमतेनवयमित्यादिना ॥

सिद्धान्तादिति।सुप्तिङन्तमित्यत्रयस्मात्प्रत्ययविधिरित्यनुवृत्तेरितिभावः।अत्रकृतेप्येकादेशेएकदेशविकृतन्यायेनोक्तरीत्यामान्तस्यप्रकृतित्वादौइत्यस्यपरादिवद्भावेनसुप्त्वात्तदंतत्वेनपदत्वसिद्धिरितिसिद्धान्तांतरमपिसूचितम्।इदंचान्तादिवत्सूत्रेभाष्येस्पष्टम्।तत्रवृक्षेइत्यादौपरादिवत्त्वेनैकारस्यसुप्त्वमाश्रित्यपदादित्वंसाधितम्।अनुपयोगाच्चेति।चेनससहायेव्यपदेशिवद्भावाप्रवृत्त्यात्तत्संनिधानेतेषांपदत्वंनास्तीतिसूचितम्।आद्यंतवत्सूत्रस्थभाष्योक्तैकपुत्रादिदृष्टान्तबले

रामौरामादित्यादावपिहिएकदेशविकृतन्यायेनैवपदत्वम्।एकादेशात्प्रागेवपदसंज्ञाप्रवृत्तेः।नत्वेकादेशेकृतेसुप्तिङन्तमित्यस्यप्राप्तिरस्ति।उभयतआश्रयणेनान्तादिवदितिसिद्धान्तात्।यत्तुवदन्ति।प्रकृतिसन्निधानेप्रत्ययस्यपदत्वंनास्ति।मन्त्रेषुसर्वेषामित्यादिनिर्देशादिति।तन्मन्दम्।उक्तरीत्यापदत्वाभावेन्यायसिद्धेज्ञापनस्यासंभवादनुपयोगाच्च॥सर्वादीनिसर्वनामानि॥सर्वादीनीतितद्गुणसंविज्ञानोबहुव्रीहिः।हलिसर्वेषामितिनिर्देशात्।द्वन्द्वेचेतीति।सहिसमुदायस्यनिषेधोनत्ववयवानामितिवक्ष्यते।नचतदन्तविधिंविनासमुदायेसंज्ञाप्रसक्तिरस्तिइतिभावः।ननुतदन्तसंज्ञायाःकिंफलम्।नचपरमसर्वस्मादित्यादौस्मायादयःफलम्।अङ्गाधिकारेतदन्तविधिनैवसिद्धेः।इत्यतआह।तेनेति।नचेहापिप्रातिपदिकादित्यनुवृत्तेः।सर्वनाम्नांतद्विशेषणेतदन्तविधिर्भवतीतिवाच्यम्।समासप्रत्ययविधौप्रतिषेधइत्युक्तेरितिभावः। नतथैवलाभादितिदिक्।तद्गुणसंविज्ञानइति।तस्यान्यपदार्थस्यगुणाविशेषणानिसंविज्ञायन्तेकार्यित्वादिनायत्रेत्यर्थः।प्रायःसंयोगसमवायान्यतरसंबन्धेनसंबन्धीयत्रान्यपदार्थस्तत्रतद्गुणत्वम्।तदतिरिक्तस्यस्वस्वामिभावादिसंबन्धेनसंबन्धिनस्त्वेऽतद्गुणत्वंनागयज्ञोपवीतीभोज्यतामित्यादौयज्ञोपवीतस्यकार्यित्वाभावेप्येतत्संनिहितत्वमस्त्येवेतितद्गुणत्वमेवेतिहरिग्रन्थेस्पष्टम्।तत्सिद्धेरिति।नचसर्वनाम्नोविहितत्वाभावः।तदन्तसंज्ञाभावेद्वन्द्वेचेत्यादीनामवयवसंज्ञानिषेधकत्वेनविहितविशेषणेफलाभावादितिभावः।

तसिलिति। अवयवसर्वनामत्वे न तु न निर्वाहः सर्वनामप्रकृतिकसप्तम्याद्यन्तत्वाभावादितिभावः। —— भाष्यप्रयोगइति। दिङ्नामान्यन्तराले दक्षिणोत्तराभ्यामिति सूत्रस्थइतिशेषः। एवम्। नित्यद्विवचनान्तत्वे। स्वाङ्गशिटामित्याद्युदात्तत्वन्तु न फलं उभेभद्रेद्र्यादावन्तोदात्तपाठे गणेऽन्तोदात्तनिपातनात्। [illegible]णादित्वेन तत्सिद्धेश्चेति भा अकच्चेति। चकारात्परमसर्वतइत्यत्र तसिल्॥ जसः शी॥ अनेकाल्त्वादिति। नतु शित्त्वादितिभावः। अवर्णान्ता इति। अवर्णान्तादङ्गात्परस्येत्य[illegible]तोयेषांके षान्तेषामित्यादौ नाव्याप्तिः। सर्वनाम्नो विहितस्यामइति। सर्वनाम्नः परस्येति तु नोक्तम्। दक्षिणोत्तरपूर्वाणामित्यत्र सुट्प्रसङ्गात्। द्वन्द्वे चेति निषेधो हि समुदायस्य न त्ववयवस्य न च तस्मादयमाम् विहितः किन्तु समुदायादेवेति न सुट्। विहितविशेषणत्वस्याश्रयणे प्रमाणन्तु दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोग एव। पञ्चत्रिंशादिति। पञ्च च त्रिंशच्चेति द्वन्द्वः। पञ्चाधिका त्रिंशदिति तत्पुरुषो वा। यत्तु प्रत्याहारा एकचत्वारिंशदिति प्राचो ग्रन्थ व्याचक्षाणैरुक्तम्। नायं मध्यमपदलोपी तत्पुरुषः। तथा सति राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु संख्येति विधीयमानः पूर्वपदप्रकृतिस्वरो न स्यात्। तस्मात्समाहारद्वन्द्व एवायम्। एकविंशतिरित्यादौ नपुंसकत्वन्तु न भवति। लोकाश्रयत्वाल्लिङ्गस्येति। तच्चिन्त्यम्। समासभेदे न स्वरभेदे इष्टापत्तेः। तथा च बहुव्रीहौ संख्येये इति सूत्रे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थमन्यत्राधिकलोपादिति वार्तिकं व्याचक्षाणो भाष्यकार आह। एकाधिका विंशतिरेकविंशतिः द्वाविंशतिरिति। अत एवेति। इयोर्द्विवचनस्यैवाम्नायत्वादितिभावः। नन्वेवं सर्वादिषु पाठो व्यर्थः। सर्वनामकार्याणां स्मायादीनां द्विवचनेऽभावात्। न च उभाभ्यां हेतुभ्यामुभयोर्हेत्वोरित्यत्र सर्वनाम्नस्तृतीया चेति पाक्षिकतृतीयातः फलमिति युक्तम्। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्तिकेन गतार्थत्वात्। न च वृत्तिकृता सर्वनाम्नस्तृतीया चेति सूत्रे पठितत्वादिदं वार्तिकं सर्वनामसंज्ञासापेक्षमिति वाच्यम्। भाष्ये हेताविति सूत्रे तस्य पठितत्वात्। अत एवान्नेन कारणेन वसति अन्नस्य कारणस्येत्युदाहृतं हरदत्तेनेत्याशङ्क्याह। तस्येह पाठस्त्विति॥ वः। प्रायदर्शनमिति। प्रायग्रहणादुभातिरिक्तासर्वनाम्नः प्रथमाद्वितीये न स्त इत्यर्थकल्पनसंभवान्नासर्वनामत्वे सदोषः ॥

अयच्स्यादिति।अत्रापिस्थानिवत्सूत्रस्थभाष्यरीत्याप्रत्ययान्तरत्वमितिभावः।निर्देशेनचेति।वृत्तिविषयेइत्यनुक्त्वाइदमेववक्तव्यमितिभावः।अन्याभावइति।अन्येषांसर्वनामकार्याणामभावइत्यर्थः।पूर्वपक्षिणान्तवद्भावविरहादितिवदेकदेशविकृतन्यायोऽशास्त्रीयविकारविषयोपीतिनाभ्युपेतमितितदनुसारेणैवसमाधिंवक्तुमुपक्रमते।तथापीत्यादि।उभशब्दादिति।अत्यन्तस्वार्थिकानांसुबुत्पत्तेःपूर्वमेवान्तरङ्गत्वादुत्पत्तेरुभघटिताच्छब्दादुभयशब्दादित्यर्थः।यत्रलुकापहृतंतत्रायजितितुनोक्तंप्रातिपदिक अयच्प्रसङ्गादिति।अयंभावः।उभादुदात्तोनित्यमित्यत्रोभादुदात्तइतियोगोविभज्यते।अवयववृत्तेःसंख्यावाचिनउभशब्दादवयविन्यर्थेऽयच्स्यात्।उभयोमणिः।ततोनित्यम्।उभशब्दाद्वृत्तिविषयेनित्यमयच्स्यात्स्वार्थे।तेनोभयपक्षविनीतनिद्रइत्यादावयच्।यथानित्यएवंकप्रत्ययेपिस्यादिति।नन्वेवंअॅविकृतेपिअयजुवीरइतिचेन्नैवम्।योगविभागस्येष्टसिद्ध्यर्थतयाउभौसाभ्यासस्येतिनिर्देशेनयत्रचद्विवचनंनश्रूयतेतत्रैवायमितिव्याख्यानात्।तथाचवार्तिकम्।अन्याभावोद्विवचनटाब्विषयत्वादिति।अकचिहिसतितन्मध्यपतितस्तद्ग्रहणेनगृह्यतेइतिन्यायेनोभशब्दस्यद्विवचनविषयत्वंनविहन्यतेकप्रत्ययेतुविहन्यतैव।तदुक्तमिति।वार्तिककृतेतिशेषः।यद्यपिपूर्ववार्तिकेटाबप्युक्तस्तथापिनासौविवक्षितः।टाब्विषयत्वमपिद्विवचनपरत्वएवबोद्धव्यमितिकैयटादिभिर्व्याख्यातत्वादित्याशयेनव्याचष्टे।द्विवचनपरत्वाभावइति।टाबेकादेशस्यापिपूर्वान्तत्वेनग्रहणाद्द्विवचनपरत्वमस्तीतिभावः।यद्यप्युभावित्यादौद्विवचनपरत्वंदुरुपपादमुभयत आश्रयणेनान्तादिवद्भावविरहात्तथाउभशब्दादुत्पन्नंद्विवचनंलुकानापहृतंयत्रततोन्यत्रायच्इतीहविवक्षितोर्थः ॥ ७७ प्रकृतिकाचारक्विबन्तेयद्यायजिष्यत्तेतदातस्यानापत्तेः।तत्रोत्पत्तेरभावेनविशिष्टत्वाक्लृप्तेः।लुकानापहृतमिति।लुक्कृतापहारसंभावनाभाववदित्यर्थः।एतेनोभशब्दस्यपाठाभावेऽसर्वनामत्वेनततसिलादिविवक्षायाःकर्तुमशक्यत्वेनद्विवचनस्यलुकानपहारस्यैवसत्त्वेनततोऽजनापत्तावुभयत्रेत्यासिद्धिरित्यपास्तम्।यद्ययच्स्यात्तदात्रलादिस्यात्तस्मिंश्चलुगपिस्यादितिलुकापहारसंभावनासत्त्वेनलुक्कृतापहारसंभावनाभाववतोऽन्यत्वात्।

यद्यपिभाष्येइति।स्वार्थिकत्वेनोभशब्दात्परस्यकप्रत्ययस्यापिद्विवचनत्वमस्तीत्यन्वयः।अधिकेति।संख्यापेक्षयाधिकलिङ्गकारकेत्यर्थः।दिगिति।दिगर्थस्तुभाष्यस्थप्रौढिवादत्वमपिसमर्थयितुंशक्यंइति।तथाहि।कप्रत्ययस्यस्वार्थिकत्वेनद्व्यर्थाभिधानसमर्थत्वेनवार्तिकेद्विवचनशब्देनतस्यापिग्रहणंद्विवचनत्वंद्वित्वसंख्याप्रकारकसङ्ख्येयविशेष्यकबोधविषयार्थानुवादकत्वम्।त्रतसिलौतुविभक्त्यन्तस्यस्वार्थेविहितौइतितत्कारकशक्तिप्रधानावेवातोनतयोरुक्तंद्विवचनत्व

यद्यपिभाष्येकप्रत्ययस्यापिस्वार्थिकत्वेनोभशब्दात्परस्यद्विवचनत्वमस्तीत्याशयेनोभशब्दपाठःप्रत्याख्यातः।तथापिप्रौढिवादमात्रंतत्।कृत्रिमस्यैवद्विवचनस्येहग्रहीतुमुचितत्वात्।अन्यथात्रतसिलादावतिप्रसक्तत्वात्।ननुकारकविभक्त्यन्ताद्विहितौत्रतसिलौस्वार्थिकत्वेपिद्वित्वमात्रंनाभिधत्तइतिचेत्।न।कप्रत्ययस्याप्यज्ञाताद्यर्थबोधकत्वात्।पञ्चकपक्षेऽधिकबोधकत्वध्रौव्याच्चेतिदिक्।नास्तीति।अनभिधानादितिभावः।तथाचोभयशब्दस्यद्विवचनानुत्पादादसर्वविभक्तिकत्वेनाव्ययत्वेप्राप्तेतद्धितश्चासर्वविभक्तिरितिसूत्रेकृत्तद्धितानांग्रहणंचपाठेइतिभाष्यंकैयटेनावतारितम्।अस्तीति।पचतिकल्पंपचतिरूपमित्यादिवारणेनपाठस्योपक्षीणत्वादनभिधानेप्रमाणंनास्तीतिभावः।तयप्प्रत्ययान्तत्वेति।उभयशब्दस्येतिभावः ॥

म्।कस्यंतुअज्ञाताद्यर्थविशिष्टोभार्थेविधानेनतत्वंप्रेक्षतमेवेतिभाष्याशयः।कल्पाद्यन्तेऽयजैवभवति।तत्रोभयोमणिरित्यादौअवृत्तयेअंस्यलिङ्गाभ्यासस्योभयेषामितिनिर्देशोनानित्यत्वावश्यकत्वात्।कल्पबादेस्तस्मादनभिधानमेवेत्यतस्कैयटेनावतारितमिति।उभयोन्यत्रेतिवार्तिकेउभयोमणिरुभयेदेवमनुष्याइतिभाष्यकृतोदाहरणात्स्वार्थिकोपक्रमेणतत्प्रवृत्तेश्चोभयोरपिग्रहणमितितस्यद्विवचनाभावोऽनभिधानादावश्यकइतितद्भावः।इतिभावइति।इत्यभिमानइत्यर्थः।तद्बीजंतूक्तम् ॥

अनन्वयापत्तेरिति। तेनहिवाक्यशेषेणकृत्स्नस्यसंबोध्यत्वावगत्यासंबोध्यस्यचयुष्मदर्थत्वेनानन्वयःपिबन्तंभवन्तमितिचानन्वितमितिबोध्यम्। अत्रपक्षेत्व इत्येकश्रुत्योदात्तानुदात्तयोर्निर्देशइतिबोध्यम्। प्राप्त्यभावादिति। पूःशब्देनस्त्रीत्वविशिष्टस्यैवबोधनेनतादृशार्थस्यविशेष्यत्वेएवतत्प्रवृत्तेः। अतएवभाष्येन्तरा नित्येवेति। परेःवरउभयाअमित्राइतितुछान्दसत्वाद्बोध्यम्। अव्युत्पन्नाविति। एतच्चप्रसशायांकैयटेस्पष्टम्। एके। काशिकाकाराः। एतन्त्वमन्येइत्युदात्तस्य। उतत्व ":पश्यन्। इत्यनुदात्तस्यचदर्शनादितिभावः। एकः। प्रथमः। संहितयापाठेतांतत्वस्यास्फुटत्वेपितांतच्छेत्स्योऽन्यथाएकश्रुत्यासकृदेवपठेत्। नचतान्तेविप्रतिपत्तव्यम्। त्वत्त्वसमसिमेत्यनुच्चानीतिफिट्सूत्रात्। तथाचऋक्। ऋ:स्तरीस्त्वद्भवतिसूतउत्वादिति। वेदभाष्यकाराश्चेत्थंव्याचख्युः। त्वदितिसर्वनामसुपठितोऽनुदात्तोयमन्यपर्यायइति। जयदेवोपिप्रायुंक्त। त्वदधरमधुरमधूनिपिबन्तमिति। त्वतोऽन्यस्याःअधरइतिविग्रहः। नतुतवाधरइति। पश्यतिदिशिदिशिरहसिभवन्तमितिपूर्ववाक्येनसहानन्वयापत्तेः। नेमइति। श्रूयतेच। प्रनेमस्मिन्ददृशेसोमइति। समइति। तथाचश्रूयते। नभन्तामन्यकेसमे। मानोवृकायवृक्येसमस्मै। उरुष्याणोअघायतःसमस्मात्। उतोसमस्मिन्नाइत्यादि। सिमःकृत्स्नेचशक्तेचस्यान्मर्यादावबद्धयोः। श्रूयते। आरात्रीवासस्तनुतेसिमस्मै। उकुक्रमत्कमजतेसिमस्मात्। उभयत्रापिसिमशब्दःसर्वपर्यायइतिवेदभाष्यम्। गणसूत्रइति। यद्यपिभाष्येअष्टाध्यायीस्थसूत्रेऽपुरीतिवक्तव्यमितिवार्तिकंपठितंतथापितद्गणसूत्रस्यशेषः। नतुजसिविभाषाविधायकस्य। अतइत्यधिकृत्यजसःशीविधानात्टाबन्तात्प्राप्त्यभावात्। अन्तरायामिति। प्राकाराद्बाह्यायामन्तदन्तर्वर्तिन्यांवेत्यर्थः। लिङ्गविशिष्टपरिभाषयाएकादेशस्यपूर्वान्तत्वेनग्रहणाद्वाप्राप्तिर्बोध्या। त्यदूतइएतौउक्तपरामर्शकौ। तत्राद्यश्छान्दसइतिगणरत्नकारः। तन्न। स्यश्छन्दसिबहुलमितिसूत्रेछन्दोग्रहणवैयर्थ्यापत्तेः। एकोन्यार्थेप्रधानेचप्रथमेकेवलेतथा। साधारणेसमानेऽल्पेसंख्यायांचप्रयुज्यते ॥

यामितिस्त्रियांसप्तम्यामेवोदाहृतमितिभावः। केवलइति। असहायइत्यर्थः। स्वाभिधेयापेक्षावधीतिसमस्तपाठंव्याचष्टेस्वस्येत्यादि। अपेक्षेतिकर्मणिघञ् ॥

व्यवस्थास्त्येवेति। पूर्वादिशब्दैरेकस्याएवदिशउपाधिकृतभेदस्यप्रतिपादनम्। उपाधिश्चपृथ्वीमध्यंतत्सागन्तवर्त्तिनश्चत्वारः पर्वताश्चरामायणेकिष्किन्धायांसुग्रीवेणमध्यदेशावधिकस्यैवदिग्विभागस्योक्तेः। पृथ्वीमध्यंचमध्याह्नसूर्यसंयोगिदेशः एवंचतन्मध्यभागावधिकोदयाचलादिपर्यन्तदेशरूपोपाधिविशिष्टदिशिपूर्वादिशब्दानान्तत्तच्छब्दप्रवृत्तिनिमित्तीकृत्यप्रवृत्तिरित्युपाध्यन्तर्गततयाव्यवस्थास्त्येव। उदयाचलपर्यन्तरूपोपाधेस्तदभिधेयस्यनदाकाङ्क्षत्वंचास्त्येव। मध्याह्नसूर्यसंयोगिदेशात्तत्संमुखदेशउदक्तत्पृष्ठस्यदेशश्चदक्षिणा। मध्याह्नेसूर्यस्योदङ्मुखत्वात्। स्पष्टंचेदंहेलाराजीये। व्यवस्थायामितिचविषयसप्तमीतिभावस्तदाहप्रसिस्वाभिधेयेति।

स्वस्यपूर्वादिशब्दस्याभिधेयेनापेक्ष्यमाणस्यावधेर्नियमइत्यर्थः। दिशःसपत्नीभवदक्षिणस्यादित्यादावपिव्यवस्थाऽस्त्येव। प्रसिद्धत्वात्तुनावधिवाचीशब्दःप्रयुज्यते। नचसंज्ञात्वान्निषेधः। आधुनिकसङ्केतोहिसंज्ञा। नचदिक्षुसास्तीति अस्तातिप्रकरणेकैयटहरदत्तादयः। अत्रदिक्षुचिरंतनःकुरुषुतुआधुनिकःसङ्केतइत्यत्रव्याख्यातृवचनमेवप्रमाणम्। एतेनविश्वेषांदेवानामितिव्याख्यातम्। वेदप्रसिद्धत्वात्। देवगणविशेषेविश्वशब्दस्यआधुनिकसङ्केताभावात्। दक्षिणागाथकाइति। इहामुकस्मात्कुशलाइतिअवध्यन्वयसंभवेपितन्नियमोनास्तीतिभावः। अधरेताम्बूलरागःउत्तरेप्रत्युत्तरेचशक्तइत्यपिप्रत्युदाहर्तव्यम्। कथंतर्हि। तथापरेषांयुधिचेतिकालिदासः। अपरेप्रत्यवतिष्ठन्तेइत्यादिच। अत्राहुः। देशवाचितयाव्यवस्थाविषययोरेवपरापरशब्दयोरुपचाराच्छत्रौप्रतिवादिनिचप्रयोगः ॥

द्धत्वादिति। देशवृत्तीनान्ततदवधिकोदयाचलसंनिहितत्वादिप्रवृत्तिनिमित्तमित्यादिबोध्यम्। आधुनिकसङ्केतोहीति। असंज्ञापदसामर्थ्यादन्यथासर्वादीनांकेवलरूढत्वेनेन्द्रादिपदानामिवरूढत्वरूपसंज्ञात्वस्यसर्वत्रसत्त्वात्तदसङ्गतिःस्पष्टैवेतिभावः। व्याख्यात्रिति। कैयटादीत्यर्थः। आधुनिकसङ्केताभावादिति। किंत्वैश्वरएवेतिभावः। यदितत्रोत्कर्षस्यावधिसापेक्षत्वाद्व्यवस्थास्तीत्याग्रहस्तदाप्रत्युदाहरणान्तरमाह। अधरेइत्यादि। अत्रापिसंज्ञात्वंमत्वाह। उत्तरेइत्यादि। उपचारादिति। तत्त्वारोपादितिभावः ॥

अर्थान्तरसंक्रमइति।स्वार्थविशिष्टार्थान्तरबोधकत्वमित्यर्थः।इदंचञितश्चतत्प्रत्ययादितिसूत्रेभाष्येध्वनितम्।नेवार्थइति।दैशवदयमपितच्छक्यइत्यर्थः।तुल्यन्यायादेतच्छ
ब्दस्यापिकैयटोक्तार्थःशक्यइतिध्वनितम्।सुमेरुमिति।हिमवानवधिरितितुयेकेचनपरेणहिमवन्तं जनपदाउत्तरकुरवःउत्तरमद्राइतिऐतरेयब्राह्मणेश्रूयतेउत्तराइत्यस्य
तन्नामानइत्यर्थस्तदाहआधुनिकेति।उत्तराःकुरवोदक्षिणान्कुरूनपेक्ष्योत्तरउच्यन्तेइतितुकपिंजलाधिकरणेशाबरभाष्येउक्तम्।हेमचन्द्रइति।कोशयोरविरोधेसंभवतिवि
नचैवमुपसर्जनता।नहिलाक्षणिकत्वमुपसर्जनत्वम्।किंतुस्वार्थविशिष्टार्थान्तरसंक्रमः।सचसमासादिवृत्तावेव।अतएवभूवादिसूत्रेएतान्यपीति।एतत्प्रति
पाद्यानिवस्तूनीत्यर्थइतिकैयटोक्तिःसङ्गच्छते।वस्तुतस्तु परापरशब्दयोःदेशान्तरनिष्ठत्वादिकमेवार्थः।शत्रुत्वादिकंतुआर्थिकोर्थः।असंज्ञायांकिम्।उत्तराःकुरवः
सुमेरुमवधिमपेक्ष्यकुरुषूत्तरशब्दोवर्तते।इत्यस्तीहव्यवस्था।किंतुआधुनिकसङ्केतोयमित्याहुः।स्वमज्ञातिधनाख्यायाम्।आत्मात्मीयज्ञातिधनवाचीस्वशब्द
स्तत्रज्ञातिधनयोःपर्युदासात्।आत्मात्मीयोपरिशिष्टावित्याशयेनव्याचष्टे।आत्मीयाइत्यर्थःआत्मानइतिवेति।यत्वाहुः।आत्मनिस्वशब्दोनपुंसकःतेनस्वेस्वाइत्यु
दाहरणंतत्रनसंभवति।तच्चिन्त्यम्।आत्मन्यपिस्वशब्दस्यपुंस्त्वात्।विभाषाजसीतिप्रकरणेस्वमात्मीयेइत्येववक्तव्येगुरुनिर्देशंकुर्वतःसूत्रकारस्यैवात्रप्रमा
णत्वात्।यदपि स्वोक्तेर्थेउपष्टंभार्थम्।स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोस्त्रियांधने।इतिअमरसिंहोक्तिमाहुः।तदपिचिन्त्यम्।कोशेहिआत्मनीतिपूर्वान्वयि।
स्वमितितुउत्तरान्वयि।तथाचहेमचन्द्रः।द्यौःस्वर्गनभसोःस्वोज्ञात्यात्मनोःस्वंनिजेधनेइति।मेदिनीकारोपि।स्वःस्यात्पुंस्यात्मनिज्ञातौत्रिष्वात्मीयेस्त्रियांध
नेइति।तस्मात्स्वेस्वाइत्यस्यात्मानइतिविवरणंसम्यगेवेतिस्थितम् ॥ रोधोनन्याय्यइतिभावः।यदितुएवमन्वयेस्वोज्ञातावात्मनिधनेस्त्रीआत्मी
यकेत्रिष्वितिपाठेनैवसिद्धेत्रिःस्वग्रहणवैयर्थ्यापत्तेः।बन्धूकबन्धूभवदेतदस्यामुखेन्दुनानेनसहोज्जिहाना।रागश्रियाशैशवयौवनीयांस्वमाहसन्ध्यामधरोष्ठलेखेति
श्रीहर्षश्लोकेआत्मानमित्यर्थकस्वमित्यस्यबन्धूकबन्धूभवदितिविशेषणेनचनपुंसकत्वमस्तीत्युच्यतेतर्ह्यस्तुमेदिन्यादिप्रामाण्यात्पुल्लिङ्गोप्यस्त्येवेतिस्वेस्वाइत्युदाहर

णंनसंभवतीतिप्राचीनोक्तिरसङ्गतैवेतिध्व
नयन्नाहविवरणंसम्यगेवेति।

एतदर्थमेवेति। एतदर्थमपीत्यर्थः। धनत्वेनात्मीयस्य बोधे माभूदित्यर्थं चेत्यपि बोध्यम्। आत्मायाख्यायामिति तु नोक्तं लाघवाभावात्। बाह्यं चेति। उक्तबहिर्देशस्यमित्यर्थः। उपसंव्यानशब्दोपीति। एवञ्च तद्ग्रहणं बहिर्योगस्य गृहेष्वेव प्रसिद्धिमाश्रित्य सूत्रे कृतमिति भावः। महाल्लाघवमिति। त्रिसूत्र्या जसाधारे शीभावे एव विकल्पविधानात्। व्यवस्थायामित्यादिगणे एव पाठविशेषणमिति भावः। वक्ष्यमाणत्वादिति। एकद्वादिति बहुव्रीहेरभिधानेपि तत्रैकद्व्यन्यतरादित्यर्थादुपसर्जनत्वमेव। समासा

ज्ञातिधनवाचिनस्त्विति। ताच्छील्ये णिनिना ज्ञातिधनयोरपि आत्मीयत्वं पुरस्कृत्य प्रवृत्तौ सर्वनामतास्त्येवेति ध्वनयति। एतदर्थमेव हि सूत्रे आख्याग्रहणं कृतम्। अन्तरं बहिर्योगोपसंव्यानयोः। बहिरित्यनावृतो देशो बाह्यं चोच्यते। तत्राद्यमर्थं गृहीत्वाह। बाह्या इत्यर्थ इति। द्वितीये तु आभ्यन्तरा इत्यर्थो बोध्यः। बाह्येन हि आभ्यन्तरस्य योगोस्ति। अर्थद्वयमप्याकरे स्थितम्। उपसंव्यानशब्दोपि करणव्युत्पत्त्योत्तरीयपरः। कर्मव्युत्पत्त्या तु अन्तरीयपरः। पूर्वादिभ्यो नवभ्यो वा। अत्रेदमवधेयम्। एतत्सूत्रं जसः शी इत्यत्रानुवर्त्य वाक्यभेदेन व्याख्येयम्। वा छन्दसीत्येतदपि पूर्व इत्यत्र यथा। एवं चाष्टाध्याय्यां पूर्वपरेत्यादित्रिसूत्री गतार्थेति महल्लाघवम्। एकशब्दस्याष्टावर्था उक्तास्तत्र विशेषमाह। संख्यायामिति। अन्येष्वसप्रसुत्ववचनान्तरमपि स्यादेव। एके एकेषां इति यथेति भावः। नबहुव्रीहौ। कृते बहुव्रीहौ निषेधोत्यर्थः। उपसर्जनीभूतानसर्वादय इति वक्ष्यमाणत्वादत आह। चिकीर्षित इति। समासात्प्रागेवेति च प्रक्रियेति। अलौकिके विग्रहवाक्ये इत्यर्थः। नन्वस्तु तत्राकज् अत आह। स चेति। न च निमित्तस्यानुपसर्जनत्वस्य विनाशोन्मुखत्वात्प्रागेव संज्ञा न भविष्यतीति वाच्यम्। न्ते कृतेपि शिष्टस्य सर्वाद्यन्तत्वाभावाच्च। समासान्तानामुत्तरपदावयवत्वं तु नेत्युक्तम्। चिकीर्षित इतीति। अध्याहारलभ्यमेतत्। एतदर्थमेव न बहुव्रीहिरिति वक्तव्ये बहुव्रीहाविति गुरुनिर्देश इति भावः। विनाशोन्मुखत्वादिति। यद्यप्यलौकिके एवैकार्थीभावस्यारोपोस्ति तथापि तत्र स्वार्थविशिष्टार्थान्तरबोधकत्वरूपोपसर्जनत्वाभावादेवमुक्तम् ॥

अनित्यत्वादिति।अतएवातिभवकानित्यादिसिद्धिः।वस्तुतःसाभाष्यानुक्तत्वान्नास्त्येवेतिबोध्यम्।सतुक्कग्रहणमिति।च्छ्वोःशूडितिसूत्रेप्रष्टेत्यादावन्तरङ्ग·त्वाज्जातस्य तुकोनिवृत्तयेतन्क्रियते।सतुक्कनिर्देशसामर्थ्याच्चनान्त्यस्यषः।वान्तादिप्रकृतिकक्विबन्तादेस्तुअप्रयुक्तत्वेनलक्षणविषयतैवनेत्यादिभाष्येस्पष्टम्।तत्परिभाषासत्वेहि शादेशेनिमित्तविनाशेनपूर्वंतदप्रवृत्तिरेवेतिसत्यर्थएवस्यादितिभावः।प्रकृतिप्रत्यापत्तीति।कंसङ्घ्नयतीत्यादौठलुकितन्निमित्तकादेशनिवृत्तयेक्रियमाणमाख्यानात्कृतस्तदाचष्टेकृल्लुक्प्रकृतिप्रत्यापत्तिश्चेतिवचनमित्यर्थः।अत्रेदंचिन्त्यम्।लुक्यपिप्रत्ययलक्षणसत्वाद्राजाऐनेयइत्यादाविवाकृतपरिभाषायाअत्राप्राप्तिः नलुमतेतिनिषेधस्तुप्रत्ययेपरतोजायमानपूर्वकार्यएवेतिस्पष्टमेव।तस्मात्पुष्ययोगंजानातिपुष्येणयोजयतीत्येतत्साधकेपुष्ययोगज्ञ इतिवचनेभाष्यकृत्कृतप्रत्यापत्त्यनुवृत्तिर्ज्ञापिका।

अकृतव्यूहपरिभाषायाअनित्यत्वात्।तत्रचैतत्सूत्रस्यैवज्ञापकत्वात्।अतिभवकानिति।एतदेवज्ञापकंफलमितिभावः।इष्टापत्तिंकृत्वेति। छ्वोःशूडि तिसतुक्कग्रहणंप्रकृतिप्रत्ययापत्तिवचनंवाअनित्यत्वेज्ञापकम्।लक्ष्यानुरोधाद्व्यवस्थेतिभावः।यथोत्तरमि।तथाचाद्यत्वेभाष्यकारोक्त्यैवव्यवस्थेति भावः ॥

ॐ तत्रहिचजोरितिघितिपरतःकुत्वमिति।भाष्यकारोक्त्येति।अकत्त्वरौतुकर्त्तव्यौप्रत्यङ्ग·मुक्तसंशयावितिचतदुक्तिः एतदेवाभिप्रेत्यापिन्विकृण्व्योरचेतिसूत्रेकिमर्थमत्वंविधीयतेवलोपएवास्त्वित्याशङ्क्यात्वेऽल्लोपेतस्यस्थानिवत्त्वेनगुणाभावायतत्।नचवलोपेपिनधात्वितिगुणनिषेधःसिद्धइतिवाच्यम्।तत्प्रत्याख्यानपक्षेगुणप्राप्तेरित्युक्तम्।अनेनसूत्रमतात्प्रत्याख्यानवादिमतंप्रबलमितिप्रत्याख्यानवादिसंमतलक्ष्यमेवकथंचित्सूत्रमतेपिसाध्यंनतुविपरीतंसंभवेअन्यथासूत्रमप्रमाणमेवेतिचप्रत्याख्यानंसूत्रसंमतमितिचध्वनितम्।सूत्रकृत्खण्डितप्राचीनऋषिवाक्यानामप्रामाण्यवत्सूत्रकारवचःखण्डनप्रवृत्तभाष्यवार्त्तिकवचनैस्तद्देशेसूत्रकारवचसोऽप्यप्रामाण्यकल्पनैवोचितेतिदिक् ॥

किमिति।बहुव्रीहौनेत्यस्यद्वेधाव्याख्यानसंभवादितिभावः।उत्तरग्रन्थेति।न्यासकारस्यापिसूत्रलभ्यार्थप्रतिपादनएवतात्पर्यादितिभावः।प्राप्तेरिति।प्राप्तेरभावेनिषेधो व्यर्थएवेतिभावः।अतएवेति।अवयवानामुपसर्जनत्वेनसर्वादिबहिर्भावादेवेत्यर्थः।अन्वर्थेति।सर्वेषांनामेत्येवंरूपेत्यर्थः।तस्यार्थइति।सोऽनुस्थितोन्वर्थसंज्ञयागौणमात्रे यत्तुप्राचोक्तम्।बहुव्रीहौसर्वादेःसर्वनामतानस्यात्।प्रियसर्वाय।सूत्रकारमतेबहुव्रीहौनसर्वनामता।भाष्यकारमतेगौणत्वमात्रे।त्वत्कपितृकोमत्कपितृ कइत्यत्रसमासावयवयोर्युष्मदस्मदोःसर्वनामत्वादनंगकार्यत्वेनाकच्स्यात्समाभूत्।कप्रत्ययएवस्यादित्येतदर्थमिदंसूत्रमितिन्यासकृन्मतमिति।अत्रेदं वक्तव्यम्।किंबहुव्रीहौसंज्ञानेतिविवक्षितम्।उततदवयवानांसर्वादीनामिति।नाद्यः।समासावयवयोर्युष्मदस्मदोरित्युत्तरग्रन्थविरोधात्।समुदायेप्राप्तिविरहा च्चानचतदन्तविधिनाप्राप्तिः।बहुव्रीह्यवयवानांउपसर्जनतयासर्वादिबहिर्भावेनतदन्तेप्राप्तेर्दूरापास्तत्वात्।अतएवनद्वितीयोपि।नचोपसर्जनानांपाठात्पर्युदासो वार्तिककृतोक्तोनतुसूत्रारूढइतिवाच्यम्।अन्वर्थसंज्ञाबलेनसूत्राक्षरैरेवतल्लाभात्।एतेनसूत्रकारमतेबहुव्रीहौनसर्वनामतेत्यपिपरास्तम्।बहुव्रीहाववे तितस्यार्थः।भाष्यकारमतेइत्याद्यपिन।विशेषोपादानेनहिसूत्रकारवार्तिककारयोर्मतमन्यादृशमितिप्रतीयते।देवदत्तोवामेनाक्ष्णापश्यतीत्युक्तेदक्षिणे ननपश्यतीतिवत्।तच्चन।सूत्रवार्तिकमतेपिगौणपर्युदासस्येष्टत्वात्।यत्तुत्वत्कपितृकइत्यादितदित्थंप्राचाव्याख्यातम्।त्वंपितायस्यअहंपितायस्येतिविग्र ह्यबहुव्रीहिःसमासेकृतेसमासावयवयोःसमासान्तःपातिनोर्युष्मदस्मदोःसर्वार्थवाचकत्वेनसर्वनामसंज्ञकत्वादज्ञाताद्यर्थविवक्षायांअव्ययसर्वनाम्नामि त्यकच्प्रसज्येत।तस्यस्मैप्रभृतीनांइवाङ्गाधिकारविहितत्वाभावेनाङ्गसंज्ञानपेक्षत्वात्।ततश्चत्वत्कपितृकइत्याद्यनिष्टंप्रसज्येतेति।न्यासकृतापिअन्वर्थसं ज्ञाबलादेवसंज्ञानिरासेकृतेऽकज्नभविष्यतीत्याशंक्यसमुदायोहिविशेषेवर्ततेपूर्वपदन्तुसर्वार्थतयाअनपेतमेवेत्युक्तम्।तदेतत्सर्वंप्रामादिकमेव।तथाहि।अज हत्स्वार्थायांवृत्तौसमासावयवयोरर्थएवनास्ति।अजहत्स्वार्थायामपिस्वार्थविशिष्टान्यपदार्थवृत्तित्वेनोपसर्जनत्वंस्पष्टमेव। ॰ तदप्रवृत्तेस्तत्संमतत्वादितिशेषः।सूत्रे

त्यादि।तन्मतेन्वर्थत्वेनवार्त्तिकमतेतुवचनेनेत्यर्थः।स्वोक्तार्थेन्यासकृद्ग्रन्थसंवादमाह।न्यासकृतापीति।अनपेतमेवेति।समुदायेएकार्थीभावाङ्गीकारेणसमुदायस्यान्यपदार्थोपसर्जनत्वेप्यवयवस्यतत्त्वेमानाभावइत्यभिमानः।व्याहतइति।अजत्स्वार्थायामपिअनयवार्थस्यान्यपदार्थविशेषणतयैवोपस्थित्योपसर्जनत्वाक्षतेरितरार्थविशेषणत्वेनोपस्थितिविषयत्वस्यैवोपसर्जनत्वपदार्थत्वादितिभावः।सर्वशब्दस्येति।उत्तरपदभूतस्यापीत्यर्थः।युक्तिमदिति।नचोत्तरपदेलक्षणापूर्वाः।एवंचसमासांतःपातिनोर्युष्मदस्मदोःसर्वार्थवाचकत्वेनेत्यादिग्रन्थःसमुदायोहीत्यादिन्यासग्रन्थश्चपक्षद्वयेपिव्याहतः।किंचैवंअतिसर्वायेत्यत्रस्मायादेशोदुर्वारः।अङ्गाधिकारेतदन्तग्रहणात्त्वदुक्तरीत्यासर्वशब्दस्यसर्वार्थतानपायात्।नहिपूर्वपदेसर्वार्थताउत्तरपदेतुनेतियुक्तिमत्।अपिचैवंगौणत्वेसर्वादीनांसर्वार्थवाचकत्वंनास्तीतिस्वोक्त्यासहविरोधःस्यादिति।यत्किंचिदेतत्।यदपिव्याचख्युः।त्वंपितायस्येत्यादौविग्रहवाक्येप्राप्तासंज्ञानिषिध्यतेइति।तदपिन।विग्रहवाक्यंहिलौकिकमलौकिकंवाविवक्षितम्।नाद्यः।प्रक्रियावाक्येयंनिषेधःनतुलौकिकइतिकैय्यटग्रन्थविरोधात्।प्रकृतसंदर्भगतपूर्वापरस्वग्रन्थविरोधाच्च।नद्वितीयः।तस्ययुष्मद्सुपितृसुइत्याकारकत्वेनत्वंपितेत्याकारकत्वायोगात्।यदपिव्याचख्युः।नन्वतिसर्वादौसंज्ञानप्रवर्ततेत्वत्कपितृकादौतुप्रवर्ततइत्यत्रकिंविनिगमकन्तत्राह।अनङ्गकार्यत्वेनेति।अङ्गशब्दःसमुदायपरः।तेनातिसर्वइत्यत्राङ्गस्यसंज्ञापेक्षितासर्वनाम्नोंगात्स्मायादिविधानादवयवमात्रस्यसत्यपिसर्वनामत्वेदोषाभावात्।समुदायेचसमुदायार्थंप्रतिसर्वादेरुपसर्जनत्वात्।तदंतस्यसंज्ञानभवतीतियुक्तम्।इहतुअवयवमात्रस्यसाचिकीर्षितानसमुदायस्यावयवश्चस्वार्थमात्रप्रधानइतिस्मात्।प्रसङ्गइतिवैषम्यमस्तीत्याशयइति।तदपिन।अङ्गाधिकारेतदन्तविधेःसर्वसंमतत्वेनावयवमात्रेसत्यपिसर्वनामत्वेदोषोनास्तीतिस्वोक्तेर्व्याहतत्वात्।अङ्गाधिकारपरिभाषयास्मैस्याद्दुइतिस्वग्रन्थविरोधाच्च ॥ ७ वपदन्तात्पर्यग्राहकमितिमतेतद्युक्तिमदितिवाच्यम्।तत्रमतेहिपूर्वपदंनिरर्थकंस्वार्थप्रतिपादकंवा।नाद्यः।नैरर्थक्येनसर्वार्थकत्वाभावादेवाप्राप्तेः।नान्त्यः।पूर्वपदार्थविशेषणान्वयापत्तेः।विनिगमनाविरहेणपदद्वयेपिलक्षणौचित्याच्चएकार्थीभाववादिभिस्तथावक्तुमशक्यत्वाच्च।एवंचतद्घटकावयवानांस

र्वनामत्वाभावएवोचितइतिदिक्।स्वोक्त्येति।एतत्प्रकरणस्थयेत्यर्थः।स्वग्रन्थेतितैरप्यलौकिकएवनिषेधस्योक्तेरितिभावः। अर्थान्तरोपसंक्रमेसतिगतेति।तेनातिसर्वोमेत्या
दौनदोषः।पुनःसंज्ञातुदुर्लभा।संज्ञोपसर्जनानांनिषेधात्।पाक्षिकपर्युदासेनतदन्तग्रहणेनापिनसंज्ञा।अर्थान्तरसंक्रमात्पूर्वन्तुस्मैभावस्यनप्रवृत्तिः।अकच्प्रवृत्तिस्तुततः प्रागस्त्येवेति
तन्निवृत्तयेइदंसूत्रमित्यभिमानः।गच्छत्विति।निमित्तापायपरिभाषयेतिभावः। दुर्लभेति।उपसर्जननिषेधादितिभावः।इत्यर्थइति।अनङ्गकार्यत्वेनेत्यस्यार्थइतिभावः।क्लिष्ट
भयायमाशयः।प्राक्प्रवृत्तापिसंज्ञाअर्थान्तरोपसंक्रमेसतिगतेति।तर्हिअकजपिगच्छतु।ननुकार्यकालपक्षेस्मायाद्यर्थंपुनःसंज्ञापेक्षितासाचदुर्लभेत्याशयइतिचेत्।
अस्त्वेवम्।नत्वसौप्रकृतग्रन्थार्थः।न्यासग्रन्थविसंवादेनइतिन्यासकृन्मतमितिवाक्यशेषविरोधात्।न्यासग्रन्थस्त्वनुपदमेवोदाहरिष्यते।यदपिव्याचख्युः।अङ्ग
मप्रधानंवाध्यंतद्धिरूढमनङ्गबाधकमित्यर्थः।तथाचकप्रत्ययापवादत्वादकच्स्यादित्यर्थइति।तदपिक्लिष्टम्।व्यर्थंच।न्यासग्रन्थासंमतंच।तथाहि।त्वत्कपितृकोम
त्कपितृकइतिवृत्तिग्रन्थंव्याख्यायन्यासकारउज्जग्राह।ननुचअन्वर्थसंज्ञांकरणादेवात्रसंज्ञानिरासेकृतेऽकज्नभविष्यति।नह्यत्रसर्वार्थतासंभवति।विशेषविषय
त्वात्।नैतदस्ति।समुदायोहिविशेषेवर्ततेपूर्वपदंतुसर्वार्थतायाअनपेतमेव।भवतुतर्हिअनयोरनन्तरयोरेतत्सूत्रविषयता।प्रियविश्वायेत्यादेस्तुनोपपद्यते।नहिप्रिय
विश्वादयः शब्दाः सर्वेषांनामानि।नापितदवयवभूतानांविश्वादिशब्दानांकिंचित्सर्वनामकार्यमुपपद्यते।स्मैप्रभृतीनामङ्गकार्यत्वात्।विश्वादिशब्दानामनङ्गत्वात्।एवं
मन्यते।त्वत्कपितृकोमत्कपितृकइत्यत्राकज्माभूदित्येतदर्थंतावदेतदारब्धव्यम्।प्रियविश्वायेत्यादावपिविस्पष्टार्थंभविष्यतीति।अनेनहिन्यासग्रन्थेनाङ्गसंज्ञान
पेक्षत्वमेवार्थोलभ्यते।सचस्वोत्प्रेक्षितव्याख्यायांदूरोत्सारितएव ॥ ऽ मिति।तत्त्वंतुस्पष्टमेव।न्यासग्रन्थासंमतिमुपपादयन्ननङ्गकार्यत्वेनेत्यस्यैवार्थमुपपादयति
तथाहीति।विशेषविषयत्वादिति।अन्यपदार्थविशेषणत्वादित्यर्थः।समुदायोहीति।तस्यैवतद्विशेषणत्वमित्यभिमानः।अनन्तरयोरिति।त्वत्कपितृकमत्कपितृक
योरित्यर्थः।अङ्गसंज्ञानपेक्षत्वमेवार्थइति।एवंचानुपदोक्तेयदस्मीतिपक्षेकप्रत्ययापवादत्वस्याकचिप्रसिद्धत्वादेवंवक्रीत्यातदुक्तिर्व्यर्थेतिबोध्यम् ॥

इत्यादिवदतेति। वृत्तिग्रन्थव्याख्यावसरे इति शेषः। प्रतिपदोक्तत्वादिति। यदन्तत्वमादाय सर्वनामत्वप्राप्तिस्तस्य चार्थे विहितत्वाद्वाक्यमपि तत्संबन्ध्येव प्रत्यासत्तेरिति भावः। तेन करोति द्वारा सामर्थ्यमासेन कृताय पूर्वस्मै मासपूर्वस्मै इति समासे तत्संबन्धिनि वाक्ये च नातत्र वाक्यस्य प्रतिपदोक्तसमाससंबन्धिन एव ग्रहणे

यदपि व्याचख्युः। यद्यपि सूत्रवार्तिककृतोरप्येतन्मतं तथापि न्यासकृता विवृतत्वाद्न्यासकृन्मतमित्युक्तमिति। तदपि स्थवीयः। वार्तिककृता स्वार्थस्यास्पष्टत्वात्। न्यासकृता समासे कृते सतीत्यादिवदता त्वदुक्तार्थस्य दूरे त्यक्तत्वेन तद्विवृतत्वाभावाच्च। यदप्याहुः। न्यासकृच्छब्देन सूत्रकार एव विवक्षित इत्यादि। तदपि न। सूत्रकारमते बहुव्रीहावित्यादिपूर्वग्रन्थेन सह विरोधात्। भाष्यकारमते त्विति ग्रन्थेन तस्य विच्छिन्नत्वाच्च। तस्मादिह प्राचः प्रक्रियाग्रन्थः तद्व्याख्यातृग्रन्थाश्चापातरमणीया एवेत्यास्तां तावत्। यदि तु प्रक्रियाग्रन्थोपि कथंचिद्भाष्याविरोधेन व्याख्येय इत्याग्रहस्तर्हीत्थं व्याख्यायताम्। ननु प्रियविश्वायेति गौणतया गतार्थम्। अतो निष्कर्षमाह। सूत्रकारमत इति। बहुव्रीहाविति। चिकीर्षिते सतीति शेषः। गौणत्वमात्र इति। मात्रशब्दोवधारणे गौणत्व एव न तु ततः प्राक्। तथा च सूत्रं प्रत्याख्यानमिति भावः। न्यासकृन्मतस्य तु अतिफल्गुत्वात् स्वरूपव्याक्रियैव पराक्रियेत्याशयेनाह। त्वत्कपितृक इत्यादि। एतच्च प्राचीनतत्तद्ग्रन्थपरिशीलनशालिभिर्विभावनीयम्। प्रकृतमनुसरामः। संज्ञाकार्यमिति। सर्वनामसंज्ञाप्रयुक्तं स्मायादिकमित्यर्थः। अन्तर्गणकार्यमिति। अड्डतरादिभ्यः। त्यदादीनामः। तदोः सः सावित्यादिकमित्यर्थः। तृतीयासमासार्थेति। इह पूर्वसदृशेति विहितः समासो गृह्यते प्रतिपदोक्तत्वात्। न तु कर्तृकरणे कृतेति। तेन त्वयकाकृतमित्यत्र निषेधो नासमुदायस्येति। तत्रैव द्वन्द्वशब्दस्य मुख्यत्वान्न तु द्वन्द्वे यानि सर्वादीनीति संबन्धः। कारकाणां क्रियायैवान्वयात्। न च द्वन्द्वे विद्यमानानि यानीति संबन्धः। विद्यतिक्रियाध्याहारे गौरवात् ॥

फलान्तरमप्याह। त्वयकेति। तृतीयासमासमात्रस्य ग्रहणे हि तदर्थे वाक्ये यत्र क्वापि स्थितस्य सर्वादेः संज्ञानेत्यर्थे त्रापि स्यादिति भावः ॥

न्याय्यत्वाच्चेति। किंचावयवमात्रनिषेधेप्रयोजनंसर्वनामाव्ययसंज्ञायामितियेनविधिरितिसूत्रस्थभाष्यप्रामाण्येनतदन्तस्यसंज्ञायांवर्णाश्रमेतराणामितिभाष्यप्रयोगानुपपत्तिः। नह्यत्रसर्वार्थवाचकत्वंनास्तीतिवक्तुंशक्यंमानाभावात्। लोकव्युत्पत्तिसिद्धस्यतस्यानेननिषेद्धुमशक्यत्वात्। नापितस्यसर्वादिनामपाठेनिषिद्धत्वंइतियुक्तम्। तस्याःप्रक्रान्तत्वात्। अविधेयत्वाच्च। नचनिषेधवैयर्थ्यम्। अवयवकुत्साबोधकाकज्व्यावृत्त्याचारितार्थ्यात्। तदेवध्वनयन्नाहफलबलाच्चेति। फलंसुवचमिति। तथादक्षिणोत्तरपूर्वकाणामित्यादावयवनिषेधेनकप्रत्ययेसमुदायसंज्ञाभावेपिफलम्। द्वन्द्वावयवमात्रेसुन्दरादिविशेषणान्वयाभाववत्कुत्सादिविवक्षायाअभावः समुदायेतद्विवक्षायान्तुसमुदायोत्तरप्रत्ययेनतदुक्तेर्नावयवात्तदुत्पत्तिरितिचिन्त्यमेतत्। समुदायनिषेधेतुद्वन्द्वस्यसंज्ञिनोधिकरणत्वविवक्षयासप्तमीबोध्या। यनिषेद्ध्यायाःभवतिक्रियायाएवप्राधान्येनतदन्वयस्यैवन्याय्यत्वाच्च। किंच। त्यदादीनांद्वन्द्वोनास्तिएकशेषेणबाधितत्वात्। ततःप्राचीनास्त्वदन्ताःतत्रकाकचोर्नविशेषः। नचदक्षिणोत्तरपूर्वाणामित्यत्रेष्टमपिपुंवद्भावंनिषेद्धुमिदंकिंनस्यादितिवाच्यम्। सर्वनाम्नोवृत्तिमात्रइतिमात्रग्रहणंहिक्वचित्सर्वनामत्वेनदृष्टानांसंप्रतिसंज्ञाभावेपिपुंवद्भावार्थम्। अतएवदक्षिणपूर्वायेइत्यत्रसंज्ञाभावेपिपुंवद्भावः। तस्मान्न्यायबलात्फलबलाच्चसमुदायग्रहणमेवोचितम्। यद्यपित्वच्छब्दस्तान्तइतिपक्षेऽवयवनिषेधेपिफलंसुवचम् ॥ ७५ द्वाद्यंसप्तमीप्रथमार्थे। अकच्स्वरौतुकर्त्तव्यौप्रसङ्ग-मुक्तसंशयावितिभाष्योक्तेतत्प्रकरणविषयस्मृत्यन्तरेणतद्विषयेनबहुव्रीहावित्येतत्साहचर्येण वा एतत्प्रकरणस्यसप्तमीनिर्देशानान्तद्दर्शकत्वौचित्यात्। किंचविभाषाजसीत्यनेनफलाभावादवयवनिषेधाभावेतत्साहचर्येणार्थाधिकारानुरोधेनचद्वन्द्वेचेत्यस्याप्यवयवनिषेधकत्वाभावः। एतेनसप्तमीनिर्देशसामर्थ्याद्बहुलस्यसंस्कारानुरोधाच्चविद्यमानानीत्यध्याहारेणसमुदायस्यावयवानांवायंनिषेधः तत्रसमुदायस्यव्यपदेशिवद्भावेननिषेधः। आधाराधेयभावेपिव्यपदेशिवद्भावस्यानद्यतनेलङ्-तुल्यास्यप्रत्ययस्यादित्यादिसूत्रस्थभाष्यादौस्पष्टत्वात्। तत्फलंचवर्णाश्रमेतराणामित्यादाववयवसर्वनामत्वप्रयुक्तोपिनाकजित्यपास्तम्। इतरकशब्देनसमासेऽतिभवकानित्यादाविवतच्छ्रवणस्यदुर्वारत्वेनतन्निषेधेफलाभावाच्चेतिदिक् ॥

व्याप्तस्येति। स समुदायात्प्राप्तस्येति शेषः। यद्यपीति। जसीत्याधारसप्तमीति भावः। जस इरिति। इकारेण ईकारग्रहणं बोध्यम्। प्रसंख्यायेति। प्रसंख्यानेन वेदं ध्वन्यते। वक्ष्यमाण
क्लेशपरिहारार्थ एवैकारो न तु फलान्तरे ऽभिनिवेष्टव्यमिति। आदादेशे त्वदितिच्छेद एव सूत्रतात्पर्यमिति। ते चेति। येनिमित्ततयोपात्तास्ते शस्प्रभृतय इत्यर्थः। अनुरू
तथापि शास्त्रस्याल्पविषयता स्यात्। न्यायश्चाविरुध्येतेति भावः। सुट्प्रसङ्ग इति। वर्णाश्रमेतराणामित्यादाविति भावः। न च निषेधसामर्थ्यम्। अनाङ्‌स्यत्र तसिलादेर्व्या
ख्याचरितार्थत्वात्। जसाधारमिति। यद्यपि शीभावेन जस् अपह्रियते तथापि औपचारिकमाधारत्वं बोध्यम्। यद्वा। जसः इः जसिः तस्मिन् सौत्रः सप्तम्या लुक्। इत्यर्थे तो
व्याचष्टे। जसाधारमिति। जराया जरसन्यतरस्याम्। विभक्ताविति। एतच्च अष्टन आ विभक्तावित्यतो ऽनुवर्तते। तेन जरया इदं जारमित्यादौ नातिव्याप्तिरिति भावः। पदे
ति। पदमङ्गं च विशेष्यम्। विशेषणेन च तदन्तविधिरिति भावः। तदनुसारिभिरिति। इनातोः पूर्वविप्रतिषेधे एकसूत्रोपात्तत्वात् स्यादेशो ऽपि ग्रहीतुमुचित इति तेषामाश
यः। अत एव वीतजन्मजरसः परं शुचिर्ब्रह्मणः पदमुपैतुमिच्छतामिति भारविप्रयोगमसमञ्जसमिति मत्वा वीतजन्मजरस इति पठनीयमिति तैरुक्तम्। एतच्चेति। भा
ष्यकृता हि टाङसि इति सूत्रे इनातौ प्रत्याख्याय नादेशमदादेशं च विधाय नादेशे परे एत्वं योगविभागेन साधितम्। बहुवचने झल्येत्। ओसि च। ततः आङि च परे ऽत एत्वं
स्यात्। रामेण। ततः आपः संबुद्धौ च। आप एकारः स्यात्संबुद्धौ आङि ओसि च। न चैवमनेनेत्यत्र हलि लोपः स्यादिति वाच्यम्। अनादेशस्य नकारे परे विशिष्य विधानात्। तथा हि
अनापि नकारे आपि च परे ऽन् स्यादित्यर्थः। सूत्रे अ इति नान्तस्य नपुंसकनिर्देशः। न च ङसेरदादेशे कृते पररूपं स्यादिति वाच्यम्। अकारोच्चारणसामर्थ्याद्दीर्घसंभवादिति।
तथा। जराया जरसन्यतरस्यामिति सूत्रे उक्तम्। गौनर्दीय आह। अतिजरैरिति भवितव्यं सन्निपातपरिभाषयेति। एवं च पूर्वविप्रतिषेधेनेत्यादि सर्वं भाष्यविरुद्धमित्यर्थः।
पद्दन्नो। अत्र शस्प्रभृतयो निमित्ततयोपात्ताः। ते च पदाद्यादेशानुरूपान् प्रकृतिविशेषानाक्षिपन्तीत्याह। पाद दन्तेति ॥
पानिति। स्वार्थबोधनसमर्थान्स्वसदृशान्वर्णवतश्चेत्यर्थः। वस्तुतो वा शोकष्यञिति व इत्यस्यार्थमेव बोध्यम्। अनुवर्तते इति। अस्येति ग्राह्य इति शेषः ॥

ज्ञापकादिति। तन्निवृत्तेरितिभावः। अतएवभाष्येतदनुवृत्तिर्नोक्ता। तथासतीति। प्राचीनसंमतव्याख्यादरे इत्यर्थः। भस्येत्यनेनेति। अङ्गस्येत्येतत्सहितेनेत्यर्थः। एतेनऽभत्वस्य वृषणोः प्रत्ययवत्स्वप्शब्दयोरपिविधानात्तेननप्रत्ययाक्षेपइत्यपास्तम्। अङ्गं चेति। अधिकारलब्धमितिभावः। ननुभत्वस्यतत्सूत्रे यस्मात्प्रत्ययविधिरित्यनुवृत्त्याङ्गनिष्ठत्वेनते नाङ्गनिष्ठयजादिपरत्वाक्षेपेणतदवयवस्यतत्वालाभः। किंचानोविशेषणेपिविधेयोपरिभाषोपतिष्ठतेनानुवादेइतिनिर्दिष्टपरिभाषानुपस्थितेरनल्लस्नोत्यादौदोषोदुर्वारइतिचेत्तन्न। हाएतच्चेति। तथाचभाष्यम्। एवंतर्हिकार्यकालंसंज्ञापरिभाषंयत्रकार्यंतत्रोपस्थितमिदंद्रष्टव्यंभस्येत्युपस्थितमिदंभवतियचिभमितितत्रयजादिपरतयाऽन्काऽरंविशेषयिष्यामः यद्यपिशीर्षंन्छन्दसीत्यतोऽत्रछन्दसीत्यनुवर्ततेतथापिभाषायामपिक्वचिद्भवतिमासश्छन्दसीतिवार्तिकेछन्दोग्रहणाद्ज्ञापकादित्युक्तिवक्ष्यते। प्रामादिकमिति। नथाहि। अल्लोवृकस्यवर्तिकासमीकेइतिमन्त्रेमुखादित्यर्थः। औचित्यात्। वृकस्यचिद्वर्तिकामन्तरास्यात्। इतिमन्त्रान्तरसंवादाच्च। एवंहव्योजुह्वानआसनि। आसन्यंप्राणमूचुरित्यादावपि। व्याख्यातंच तथैववेदभाष्येषु। अतएवहरदत्तेनापिकाशिकायाःप्रामादिकत्वमाविष्कृतमितिध्येयम्। अल्लोपोनः। अत्रप्राञ्चः। अन्नन्तस्यभस्याङ्गस्याकारस्यलोपःस्यादिति। तथासतितक्ष्णाइत्यादौतकाराकारस्यापिलोपःस्यात्। भस्याङ्गस्यानोकारस्येतिव्याख्यानेतुअनसामनसाइत्यादौस्यात्। तन्नास्त्यादिनान्नन्तस्यभस्यानोकारस्येतिव्याख्यानेपि। अनस्तस्णोत्यादौअतिव्याप्तिरेव। अतोव्याचष्टेऽङ्गावयवइत्यादि। भस्येत्यनेनाक्षिप्तःप्रत्ययविशेषोऽङ्गं चेतिद्वयमनोविशेषणम्। अनतुअकारस्यअतोनोक्तदोषइतिभावः। एतच्चष्यङःसंप्रसारणंइतिसूत्रेभाष्येस्पष्टम् ॥ ७५ अनाअकारम्। यजादिस्वादिपरस्यानोऽकारस्येति। तस्यायंभावः। कार्यकालपक्षेभस्येतिश्रुतेभपदार्थजिज्ञासायांयचिभमित्युपस्थितेनशक्तिग्रहेवृत्तेएतद्वाक्यार्थबोधकालेलस्यानुरोधेनतक्रादिन्यायाश्रयणाद्यचीत्यस्यानुविशेषणत्वापिविधेयपरिभाषेतिन्यायस्तुइक्कोगुणवृद्धीअवश्चेतिव्यतिरिक्तेनास्त्येव। उदात्तस्वरितयोर्यणइत्यादा। उदात्तस्वरितस्थानिकयणइत्यर्थस्येष्टत्वादिति। एतच्चस्वौप्रत्ययेइत्यप्रकरणेनिरूपयिष्यामः। यदितुअदमुयङि-त्यर्थमनन्त्यविकारेइतिपरिभाषावश्यकीतयैवानस्तक्ष्णोत्यादौव्यावृत्तिः। अत्रसान्तमहतइत्यादौचानेकक्लिष्टकल्पनापेक्षयापरिभाषास्वीकारएवोचितः। भाष्य

तिकोक्तफलानांअन्यथासिद्धिप्रदर्शनमात्रपरम्।

श०प्र
६७

अतएवा प्यान्येतस्याः परिभाषायाः प्रयोजनानितदर्थमेषापरिभाषाकर्त्तव्येतिभाष्येउपसंहृतम्। यत्तुनसंप्रसारणइतिसूत्रेनैतस्याः परिभाषायाःसन्तिप्रयोज
नानीतिभाष्यंतत्तुनसंप्रसारणइत्यादेरेवज्ञापकात्प्रयोजनाल्पत्वसूचकमित्युच्यते। तदास्तुअङ्गविशेषणमेवतदित्याहुः। सामर्थ्यादिति। निमित्तनिमित्तिनो
रपदस्थयोरसंभवादितिभावः। अखण्डमिति। तत्त्वंचनिमित्तानधिकरणनिमित्तिमत्पदाघटितत्वम्। तेनमातृभोगीणइत्यत्रणत्वसिद्धिः। केवलभोगीनेत्यस्य
प्रत्ययमात्रस्यवातत्त्वाभावात्। अतएवात्मन्विश्वजनेतिसूत्रस्थमाचार्यादणत्वंचेतिचरितार्थम्। सुपर्वणेत्यादिसिद्धयेनिमित्तानधिकरणेति । पदंच।
त्रलोकेविभक्तीतरानपेक्षतयार्थबोधकत्वेनदृष्टम्। तेनगन्धर्वगानमित्यादौसुबुत्पत्तेः प्राक्समासेपिणत्वंन। सुम्नादिषुनृनमनशब्दस्तुसंज्ञाभूतोऽखण्डइतितस्यऋव
रषाभ्याम्। पदइतीयतैवसामर्थ्यादेकपदत्वेलब्धेपिसमानग्रहणंपदत्समानमेवअखण्डमितियावत्। तत्रयथास्यात्तेनसमासेनभवति। रामनाम। यूषइति। यूषोम
ण्डः। मुद्गामलकयूषस्तुभेदीदीपनपाचनः इतिदर्शनात्। इतिप्रसक्तेत्विति। एतेनपञ्चमीसमासस्यपाक्षिकतांध्वनयति। तथाहि। भाष्ये। वेभिदिता। माथितिकः।
अपीपचन्नितिप्रयोजनत्रयमुक्तम्। तच्चान्यथासिद्धम्। एकाचउपदेशेत्यत्रविहितविशेषणादेववेभिदितेत्यत्रइण्निषेधेन। माथितेपथ्यमस्येतिविग्रहेठकि
ठस्यैकादेशेयस्येतिचेत्यल्लोपेइसुसुक्तान्तात्कइतिकादेशस्तुनभविष्यति। ठस्याभावात्। ७ णीसरस्यणत्वेज्ञापकताभाष्योक्तानासङ्गतेत्याहुः। मण्डइति। तद्विशे
षइत्यर्थः। वेभिदितेति। वेभिद्यतेर्यङन्तात्तृचिअल्लोपयलोपयोः एकाचउपदेशइतिनिषेधादिण्नस्यात्। पञ्चमीसमासेत्वल्लोपस्यस्थानिवत्त्वान्निषेधाप्रवृत्तिरितिभावः। ए
वंचितरयोः कादेशजुसोरभावोबोध्यः। विहितविशेषणेति। एवंचस्थानिवत्त्वंविनापितदप्रवृत्तिःसिद्धेतिभावः। विहितविशेषणत्वंचास्यैकाचोद्वेइत्यत्रभाष्येध्वनितम्। तत्र
हियङ्लोपेवेभिदितेत्यत्रयङन्तात्तृचिइट्प्रतिषेधमाशङ्क्यैकाजोङ्गादितिव्याख्यानेनपरिहृतम्। तद्भाष्यस्ययथाश्रुतत्वेबिभित्सतीत्यादौदोषवारणायोपदेशग्रहणस्यैकाजंशे
पिसंबन्धेवेभिदितेत्यादावपिपरिहारासंभवेनतस्यविहितविशेषणत्वेतात्पर्यमावश्यकम्। प्रत्ययविधानावधेरेवप्रायेणाङ्गत्वादङ्गादित्यनेनेदंसूचितम्। विहितविशेषणेचेवि

श०प्र
६७

भित्सतीत्यादावदोषेणैकाजंशे उपदेशग्रहणासंबन्ध इति तदाशयः। न भविष्यतीति। स्थानिवत्वं विनापीति शेषः। ओ अल्विधित्वादिति। ठस्येक इत्यत्र स्थानिनि प्रत्यये वुच
सर्वत्राकारो न विवक्षितः आदेश एव तु विवक्षितः। अन्यथा निषादकर्षूशब्दादेर्देश इति ठञि व्यञ्जनमात्रस्य व्यञ्जनरूपकादेशे कशब्दस्य लाक्षणिकत्वात्केण इतिह स्वाना
पत्तिरिति भावः। स्थान्यादेशयोरिति। इकादेशस्थानिभूतप्रत्यये आदेशविधायके सूत्रे ठस्येक इत्यत्र चेत्यर्थः। स्पष्टं चेदं ठस्येक इत्यत्र भाष्यकैयटयोः। इदमुपलक्षणमूह
न्निपातपरिभाषयापि कादेशवारणं बोध्यम्। स्पष्टं चेदं ठक्कसोश्चेति वार्तिकभाष्ये। बलीयस्त्वादिति। एतच्च यस्य विभाषा। वित्तो भोग इति सूत्रस्थकैयटे स्पष्टम्। एतत्सर्वं
मपरविधाविति तु वक्तव्यमिति वार्तिकस्य कैयटानुरोधेन। दिगिति। दिगर्थस्तु स्तनदर्थपञ्चमीसमासस्यावश्यकत्वम्। तथा हि। परसाहचर्यस्य बलवत्त्वे मानाभा

न च स्थानिवद्भावेन ठत्वम् अल्विधित्वात्। ठस्येक इत्यत्र हि स्थान्यादेशयोः अकार उच्चारणार्थः। अपीपचन्नित्य पिणिलोपस्य चङन्त्यकारयोरेकादेशस्य च
स्थानिवद्भावं विनापि सिद्धम्। विदिसाहचर्याद्भ्यस्तादपि लङ एव झेर्जुस् विधानात्। न च सिचा साहचर्याद्लुङ एव किं न स्यादिति वाच्यम्। पूर्वसाह
चर्यात्परसाहचर्यस्य बलीयस्त्वादिति दिक् ॥ ॐ वः। विप्रतिषेधसूत्रे कार्यशब्देन शास्त्रीयस्यैव ग्रहीतुमौचित्येनात्र तदप्राप्तेः। नित्यः परयणादेशः पश्चासौ
व्यवस्थया। युगपत्संभवो नास्ति बहिरङ्गेण सिद्ध्यतीत्यर्थः। परस्मिन्निति सूत्रस्थभाष्योक्तरीत्या पूर्वसाहचर्यस्यान्तरङ्गत्वेन तस्यैव ग्रहीतुमौचित्याच्च विभाषा गमहन
विदविशामित्यत्र लुग्विकरणपरिभाषानुग्रहाय परसाहचर्याश्रयणेनुदविदोन्द्रेत्यत्राप्यन्तरङ्गपरिभाषानित्यत्वाद्व्याख्यानेन परसाहचर्याश्रयणमिति बोध्यम्। प्र
स्यैषिवन्नित्यादौ लङि उभेऽभ्यस्तमिति सूत्रस्थभाष्यसंमते एवमपि दोषाच्च पूर्वोत्तरसाहचर्येण भावरूपादेशानपहृतविकरणकाभ्यस्तस्यैव ग्रहणमित्यप्यतिक्लिष्टं
ततो वरं पञ्चमीसमास एव। अपरविधाविति तु वक्तव्यमिति न्यासान्तरेपि पञ्चमीस सासो वक्तुं शक्यः न्यासान्तरन्तु स्वविधेरपि संग्रहायेति स्पष्टमेव। अतिप्रसङ्ग
स्त्वनित्यत्वेन परिहरणीय इति ॥

म.प्र. ६८

चक्र्यत्रेति। तसिरसिभ्यां णयन्ताभ्यां क्विपि लोपाभावोपि फलम्। निगाल्यते इति। न चात्र णिलोपात्पूर्वं लत्वम्। सपादसप्ताध्यायीस्थकार्यस्य प्रवृत्तियोग्यतया तद्प्रवृत्तेः। न च स्थानिवत्त्वमल्विधित्वात्। प्रत्ययलक्षणन्तु नियमार्थमिति भावः। अत्र बहिरङ्गासिद्धत्वेन। नाजानन्तर्य इति तन्निषेधात्। त्रिपाद्यान्तदप्रवृत्तेरेव विसर्जनीयसूत्रस्याप्यसंभवत्वाच्चेत्यन्यत्र प्रपञ्चितम्। एवंस्नायतद्स्यप्ययता विस्यस्योपसर्गविशेषणत्वे फलम्। माषवपनीति। इह ङीनुत्पत्तेः प्राक् समासे ङीपि अल्लोपे समासस्य प्रातिपदि

पूर्वत्रासिद्धेनेति। एतच्च न्यायसिद्धमित्यवोचाम। त्रिपाद्या असिद्धत्वेन न तत्रस्थे कर्तव्ये अचः परस्मिन्नित्यतिदेशस्याप्रवृत्तेः। तस्येति। तस्य पूर्वत्रासिद्धे इत्यस्य। तथा च स्थलत्रये स्थानिवद्भावो न कर्तव्य इत्यर्थः। संयोगादिलोपे चक्र्य च। लत्वे निगाल्यते। णत्वे माषवपनी। इह यस्येति चेति अल्लोपस्य स्थानिवत्त्वेन नकारस्य प्रातिपदिकान्तत्वाभावाण्णत्वं न। यत्त्वाहुः। कथंचित्स्थानिवत्त्वाभावेपि सूष्णा इत्यादौ रषाभ्यामित्यस्यानुपयोगः। ष्टुत्वेन सिद्धेः। तथा च षग्रहणमुत्तरार्थमिति आकरे स्थितम्। ततश्चारभसवादेनैतदुपन्यस्तमिति स एवायं रभसवादः। तथाहि उत्तरार्थतयापीह षग्रहणं स्थितम्। ततश्च पूष्णः। पूष्णीत्यादौ रषाभ्यामिति णत्वस्य प्रवृत्तिः केन वार्यताम्। ष्टुत्वेनेति चेन्न। तस्यासिद्धत्वात्। न च वचनप्रामाण्यात् सिद्धत्वम्। पुष्टः पुष्टिरित्यादौ चरितार्थत्वात्। नस्य षयोगेण इत्यंशो चरितार्थ इति चेन्न। तस्य पृथगनुक्तेः। इह षात्परस्येत्युक्तिरचरितार्थत्वस्यापि तुल्यत्वात् च। आकरे हि इह षग्रहणं विना त्वस्यासिद्धिर्नास्ति इत्येवाभिप्रेतं न पुष्णातीत्यादौ रषाभ्यामित्यस्याप्रवृत्तिरिति दिक्। नलोपः प्रातिपदिकान्तस्य। लुप्तषष्ठीके इति। सौत्रत्वान्नतु षष्ठीतत्पुरुषयोः पूर्वपदे सापेक्षत्वेन समासासंभवात्। प्रातिपदिकस्य पदविशेषणत्वाच्चेति भावः ॥

कान्तस्याण्णत्वं प्राप्तम्। पूर्वपदाक्षिप्तसमासरूपप्रातिपदिकान्तस्य तेन णत्वविधानात्तस्यापि पूर्वपरोभयसापेक्षत्वेन समासत्वज्ञानसापेक्षत्वेन च समत्वात्त्रिपादीस्थत्वेन बहिरङ्गासिद्धत्वाशङ्का नेति बोध्यम्। अप्रवृत्तिरिति। अभिप्रेतेति शेषः। सापेक्षत्वेनेति। नलोप इत्येतद्विषयमिदम्। अन्ये आहुः। पदविशेषणत्वाच्चेति ॥

रा.न. ६८

व्यधिकरणषष्ठीति। प्रातिपदिकस्य पदस्येत्यनयोः परस्परानन्वितयोरन्तेनान्वयादिति भावः। अभेदेनैवेति। संबन्धान्तरासत्त्वेपि विशेष्यविशेषणभावसंबन्धेनेत्यर्थः। शक्यमकर्तुमिति। पदस्येत्यस्य क्वचिद्वैयधिकरण्येनान्वयेऽस्य तात्पर्यग्राहकत्वं भाष्ये उक्तं तत्तु लक्ष्यानुसारिव्याख्यानादेव ज्ञापकं विनापि सिद्धमित्यभिमानः। भत्वासंभवादिति सर्वनामस्थानत्वेनेति भावः। समाहारद्वन्द्वस्येति। प्राण्यङ्गत्वात्कृतसमाहारद्वन्द्वस्य ककुद्दोःशब्दस्येत्यर्थः। सुयोजम्। दोःशब्दस्य पुंस्त्वेपि सुनिर्वाहम्। न्याय्यम्। अल्पाच्त्वेन दोःशब्दस्य द्वन्द्वे पूर्वनिपातापत्तेः। किं च तदन्ते आदेशो दुर्लभः। विशेष्यसन्निधानादिति भावः। ककुद एकत्वमिति। प्रकरणाच्छ्रुतौ तथार्थकमेवेदमिति भावः। दक्षिणं तमुद्यम्य दोर्नामा निशाचर इत्यन्वयभ्रमवारणायाह। तत्रेति। एकदेशिसमास इति। तत्रत्यव्याख्याने तु कर्मधारय इति बोध्यम् ॥

तदन्तस्येति। षष्ठीतत्पुरुषः। तस्यान्तो यो नकारस्तस्येति अर्थः। उक्तं च हरदत्तेन। विशेष्यमन्तस्येत्यस्य नेत्येतदविभक्तिकम्। तथैव प्रातिपदिकेत्येतत्पदविशेषणमिति। यत्तु प्राचोक्तम्। प्रातिपदिकान्तस्य पदान्तस्य नस्येति। यच्च व्याख्यातम्। अन्तस्येत्युभाभ्यां संबध्यते इति। तद्गौरवग्रस्तम्। अन्तस्येत्यस्या वृत्तिप्रसङ्गात्। व्यधिकरणषष्ठीद्वयापत्तेश्च। यदि तु अभेदेनैव संबन्धेन प्रातिपदिकेनेव नेत्यनेनापि पदं विशेष्यते। तदा विशेषणेन तदन्तविधौ सौत्रमन्तग्रहणं शक्यमकर्तुम्। विभाषाङिश्योः। शीति नपुंसकाच्चेति विहितो न तु जश्शसोः शिः। तस्मिन् भत्वासंभवात्। भस्येत्यनेनासर्वनामस्थानस्यैव यजादेराक्षेपात्तदेतदाह। असर्वनामस्थानेति। अत एवेति। दोषणीति प्रयोगात्। यद्यपि समाहारद्वन्द्वस्य एकशेषे कृतेपि भाष्यं सुयोजं तथापि ककुदित्यस्य पृथक्पदत्वं न्याय्यम्। अन्यथा ककुद एकत्वं बाह्वोर्द्वित्वं च न लभ्येत इति भावः। तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचर इति रघुः। तत्र दक्षिणं दोरिति उद्यम्येत्यनेन कर्मतया संबध्यते। दोषं तस्येति। दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन् गुणमिति श्रीहर्षप्रयोगः। तत्र दोषं हस्तं दूषणं च भजतश्चापस्य गुणं मौर्वीमतिशयं च गृह्णन्निति संबन्धः ॥

न॰ श॰ ९९

जहातीति। हाहइति शोकव्यञ्जकशब्दमित्यादिः। नुम्यच्यस्त्विति। अयंभावः। तन्त्रेणनाभावेनकारेचकार्येतंप्रतिअन्यंप्रतिचकृते च कार्यान्तरं प्रतिसुभावोसिद्धइ
तितदर्थः। एतेनसुत्वस्यासिद्धत्वेनेनादेशोगुणेनुमादेरप्राप्तिरितिपरास्तम्। नुम्येवास्त्वितिपाठेएवकारोप्यर्थः। उच्चारणार्थत्वादिति। तन्त्रेणोच्चरितेद्वितीयेनेशब्देद

अमरव्याख्यातारस्तु। दोषशब्दस्त्रियामपिस्वीकृत्यभागुरिमतेनटापिदोषेत्युक्ता। दोर्दोषाचभुजोबाहुःपाणिर्हस्तःकरस्तथेतिधनंजयनिघण्टुमुदाजहुः।
द्वयोरह्नोर्भवइति। तद्धितार्थेतिसमासः। कालाट्ठञ्। द्विगोर्लुगनपत्यइतिलुक्। राजाहःसखिभ्यइतिटच्। अह्नोह्नएतेभ्यइत्यह्नादेशः। अह्नःसायइति। स्यतेर्घ
ञिअवसानवचनःसायशब्दः। संख्याविसायेतिज्ञापकादेकदेशिसमासः।। इत्यदन्ताः।। हाहानिति। गन्धर्वविशेषवाचकमव्युत्पन्नंप्रातिपदिकमिदम्। कौमारा
स्तुजहातीतिहाहाइतिक्रियाशब्दंचवदन्तोविश्वपावद्रूपमाहुः। तन्मतेप्रत्युदाहरणंतुअकारोवासुदेवःस्यात्तेनसहवर्तन्तइतिसाःतान्सानितिबोध्यम्। इ
त्यादन्ताः। आङोनास्त्रियाम्। पुंसीतितुनोक्तम्। अमुनाकुलेनेत्यत्रयथास्यात्। नचनुमारूपसिद्धिः। सुत्वस्यासिद्धत्वादिकोचीतिनुमोप्राप्तेः। नादेशेतुनासिद्धत्वंनमुनेइ
तिनिषेधात्। नचनमुनेइतिनिषेधोनुम्येवअस्तुनेइत्यकारस्योच्चारणार्थत्वादितिवाच्यम्। अमुष्मैकुलायेत्यादावसिद्धापत्तेः। अच्चघेः। इदुद्भ्यामितिङेरितिऔदिति
चपदत्रयमनुवर्ततइत्याशयेनव्याचष्टे। इदुद्भ्यामुत्तरस्येत्यादिना। घेरुत्तरस्येतितुनोक्तम्। सूत्रेघेरित्यस्यषष्ठ्यन्तत्वात्। तन्त्रावृत्त्यादौचप्रमाणाभावात्। औदितिपूर्वसू
त्रेइदुद्भ्यामुत्तरस्यङेरितिकृतसंबन्धस्यत्यागायोगाच्च। औत्त्वादिति ॥ स्यै त्यर्थः। अमुष्मैइति। नमुनइतिसूत्रविषयेपूर्वविभक्तिनिमित्तकार्यप्रवृत्तौसु
त्वेतस्यनकारविषयेकमपिप्रत्यसिद्धत्वाभावेनविभक्त्यादेशंप्रत्यसिद्धत्वेपिवास्मैभावात्परत्वेननुमापत्तेः। आदिनाअमूकुलेअमुयोरितितयोरेत्वस्याप्रवृत्तौमुत्वे
नुमिचानिष्टंस्पष्टमेव। नमुटादेशइतिवार्तिकस्वारस्येननादेशइत्येवतदर्थउचितइत्यपिबोध्यम् ॥

राम: ९९

नेत्संज्ञइति। इयमपितदुक्तिश्चिन्त्यातस्यलोपइतिसूत्रभाष्येउच्चारणार्थानामपीत्संज्ञकत्वस्यस्पष्टमुक्तत्वात्स्वरितत्वादर्शनादिति।नन्वौतःस्वरितत्वेपिनाग्नावित्यत्रस्वरितश्रवणमग्निशब्दस्यान्तोदात्तत्वेनैकादेशउदात्तेनेत्यनेनोदात्तत्वादितिचेन्न।वृत्तावनुदात्तस्येत्यस्यतत्रानुवर्त्तितत्वात्।शेषनिघातेनौकारस्वरितत्वमादायाग्निशब्दस्यसर्वानुदात्तत्वाच्च।स्वरितस्यतुनोदात्तपदेनग्रहणमुदात्तस्वरितयोरित्यादौस्वरितग्रहणात्।उच्चारणार्थानामित्संज्ञकत्वेपि प्रत्ययाप्रत्यययोरित्येवसिद्धेपुनस्तितिप्रत्ययग्रहणंकर्तव्यमितिवार्तिकेनोपदेशिकप्रत्ययत्वस्यैवतत्प्रवृत्त्यानात्रस्वरितत्वप्रवृत्तिरितितत्त्वम्। आदेशेषुदकारस्थानिकचर्त्वेनिष्पन्नतकारस्यसत्त्वेनदित्त्वात्तदप्राप्तेः।उच्चारणार्थइत्य

अत्रव्याचख्युः।औतस्तित्वंस्वरितार्थम्।नविभक्तावितीत्वनिषेधस्तुनभवति।अनित्यत्वात्।अनित्यत्वंचइदमस्थमुरितिथमोमकारस्येत्संज्ञापरित्राणार्थादुदित्करणाल्लभ्यतइतितत्रैवोक्तमिति।तच्चिन्त्यम्।नविभक्ताविति सूत्रेङेःऔतस्तु″कारउच्चारणार्थः नेत्संज्ञइतिस्वयमेवोक्तत्वेनपूर्वापरविरोधात्।युक्तंचोच्चारणार्थत्वनतुस्वरितार्थत्वम्।स्तीर्णेबर्हिषिसमिधानेअग्नावित्यादौस्वरितत्वादर्शनात्।अदितितपरत्वंतुबुद्धावित्यादावत्वेकृतेस्त्रियांटाप्माभूदित्येतदर्थमित्याहुः।तदपिचिन्त्यम्।तपरग्रहणाद्धिटापासहदीर्घोमाभूत्टाप्तुस्यादेव।लक्षणद्वयबाधेमानाभावात् ॥

स्यचवर्णान्तरोच्चारणेमुखस्यक्लेशधारणार्थोनत्वन्यफलार्थइत्यर्थः।अतएवभाष्येऔकारंङितमाश्रित्यादितिप्रत्याख्यातम्।नहितदातित्वमस्ति।नचङित्वेविंशतौतिलोपापत्तिः।भाष्यप्रामाण्येनतस्यसप्तम्यामनभिधानादितिदिक्।अदिति।अस्ययदपीत्यादिः।दीर्घोमाभूदिति।भिन्नकालत्वात्तदर्थत्वात्तपरत्वस्येतिभावः।नचज्ञोविदर्थस्येतिप्रकरणेनसमासबाधइवानेनटापोपिबाधइतिवाच्यम्।प्रतिपदविधानाषष्ठीनसमस्यतइतिवार्त्तिकानुरोधेनतत्रतथाकल्पनेपीहतथाकल्पनेमानाभावात् ॥

अनङ् सिद्ध्यतीति। वैकल्पिकत्वमात्रं तु वाचनिकमिति तद्भावः। संज्ञापूर्वक इत्यस्य भाष्यास्पष्टत्वादाह। अङ्गवृत्तेति। इयमगतिकगतिः। सोर्डेति न्यासे लाघवाभाव श्चडित्वसामर्थ्याट्टिलोपकल्पने गौरवं च तस्मादुशनसोऽनङ् तद्वैकल्पिकत्वं च चिन्त्यमेव भाष्यानुक्तत्वादिति प्रामाणिकाः। चेतीति। तस्मादित्युत्तरस्येति जाग्रति विहितवि

अत एव क्रुन्मेजन्त इति सूत्रे भाष्यवार्त्तिकयोर्विवरणे च सन्निपातपरिभाषया टाबन्तेत्युक्तम्। टापा व्यवधाने हि आनन्तर्यविघातः स्यादिति। तस्मादौत इव अतोपि तपरकरणमुच्चारणार्थमेवेत्यवधेयम्। अनङ् सौ। सोर्डेत्येव सिद्धे अनङ्विधानमन्यतोपि स्यादिति ज्ञापनार्थम्। तेनोशनसः संबुद्धौ अनङ् सिद्ध्यतीति प्राञ्चः। तच्चिन्त्यम्। सोर्डेत्युक्ते हि ऋदुशनेत्युत्तरसूत्रेणापि डा स्यात्। ततश्च उशनेत्यत्र सर्वनामस्थाने चासंबुद्धाविति दीर्घः स्यात्। पुरुदंसेत्यत्र सान्तमहत इति दीर्घः स्यात्। यद्वा। संज्ञापूर्वको विधिरनित्य इति वा अङ्गवृत्तपरिभाषया वा समाधानं बोध्यम्। हल्ङ्याब्भ्यो। दीर्घादित्येतन्ङ्यापोरेव विशेषणं न तु हलोऽसंभवादित्याह। दीर्घाविति। परमिति। नत्विदं विहितविशेषणं यासाकादित्यादावव्याप्तेः। न च तत्र हलन्ताद्विहितत्वेन निर्वाहः। यः स इत्यादावतिव्याप्तेः। कर्त्तेत्यादावव्याप्तेश्चेति भावः। हलिति। तस्य च सुतिसीत्येवंरूपत्वेमेकदेशविकृतन्यायेन बोध्यम्। लुप्यत इति। यद्यपीह लोपो व्योरित्यतो लोप इत्यनुवर्तते। तच्च तत्र भावसाधनं तथापीह कर्मसाधनं हलिति प्रथमान्तेन सामानाधिकरण्यादिति भावः। दीर्घग्रहणं किम्। अतिखट्वः। निष्कौशाम्बिः ॥

शेषणासंभवश्च शब्दार्थः। एकदेशविकृतन्यायेनेति। स्थानिवत्त्वस्योपलक्षणमिदम्। अर्द्धाधिकविकारेण प्रत्यभिज्ञाभावाच्छिन्नपुच्छश्वदृष्टान्तमूलकन्यायस्यात्राप्राप्तेरिति बोध्यम्। प्रथमान्तेनेति। यद्यपि तस्मादित्युत्तरस्येत्युक्तेः षष्ठ्यन्ततापि संभवति तथापि बहुषु पदेषु विभक्तिविपरिणामकल्पनापेक्षया आगन्तुकलोपशब्द एवार्थान्तरकल्पनमुचितमिति भावः ॥

ननुसुतिसीतिप्रत्ययैर्यस्मात्तद्विहितस्तदादेरित्युपस्थित्यातस्यहल्ङ्याब्भ्यइतिविशेषणमितिहल्ङ्याबन्तात्तदादेःपरस्येत्यर्थेनप्रकृत्याक्षेपादुपसर्जनस्त्रीप्रत्ययेतदादिनियमसत्वात्चप्रकृतेर्ङ्याबन्तत्वाभावेननात्रदोषइत्यतआह॥अतएवेति।एतत्सिद्ध्यर्थंयेनविधिरितिपरिभाषयाशब्दरूपंविशेष्यमादायतदन्तविधौततःप्रत्ययग्रहणपरिभाषयोक्तंविशेष्यमादायपुनस्तदन्तविधौटिड्ढाणञितिसूत्रेऽणन्तान्तादितिवद्ङ्याबन्तान्तादित्यर्थस्यावश्यकत्वेनात्रदोषः।मालेत्यादौतुव्यपदेशिवद्भावेनसिद्धिरितिभावः।श्रविष्टासुजातःश्रविष्ठइत्यादौतद्धितलुकिस्त्रीप्रत्ययलुकिचप्रत्ययलक्षणेनटाबन्तत्वादतिव्याप्तिवारणार्थंदीर्घग्रहणमित्यपिबोध्यम्।

ननुइहसमस्तस्यङ्याबन्तत्वंनास्ति।नचस्त्रीप्रत्ययेतदादिनियमोनास्तीतिवाच्यम्।अनुपसर्जनेहितथाइहतूपसर्जनत्वात्तदादिनियमोस्त्येव।सत्यम्।तथापिउत्तरपदस्यङ्याबन्तत्वेनसोस्ततःपरत्वानपायात्।नहीदंविहितविशेषणमित्यवोचाम।अतएवबहुश्रेयसीत्यत्रसुलोपः।स्यादेतत्।गङ्गीयतेःक्विप्।गङ्गीः।इहेकारस्यस्थानिवद्भावेनापृक्तत्वाद्दीर्घत्वाच्चातिव्याप्तिरितिचेत्।सत्यम्।ङीईआआप्इतिप्रश्लिष्यदीर्घग्रहणस्यप्रत्याख्यानान्नकश्चिद्दोषः।सुतिसीतिकिम्।भेत्ता।तासेस्तकारस्यलोपोमाभूत्।नचैवमपिअभैत्सीदित्यादौसिचोलोपापत्तिः।सुतिभ्यांसाहचर्येणविभक्तेरेवग्रहणात्।अपृक्तंकिम्।भिनत्तिदिनत्तीतिप्रत्युदाहरन्ति।तच्चिन्त्यम्।विशिष्टस्याहल्त्वात्।सुतिसीनांहलितिक्लिष्टंव्याख्यायातिप्रसङ्गापादनस्यानुचितत्वात्।यदप्याहुः।सुरांसुनोतीतिसुरसुत्।तमाचष्टेसुरासयति।ततःक्विप्।सुराः।सुरासौ।सुरासः॥

अतिव्याप्तिरिति।अस्यस्त्रीईदेवदत्तस्यईदेवदत्तेरित्यादावपिसेतिबोध्यम्।प्रत्याख्यानादिति।दीर्घग्रहणेनोपस्थितत्वादीकाराकाररूपस्यैवदीर्घस्यग्रहणाच्चेत्यपिबोध्यम्।सुरास्यतीति।नचणौचङीतिसूत्रस्यभाष्यप्रामाण्येनइदुदुपधेभ्योणिज्नास्तीतिसिद्धान्तात्कथमत्रणिजितिवाच्यम्।तद्भाष्यस्यतेषांलुङिप्रयोगाभावकल्पनेनोपपत्तेः।सर्वथातदभावकल्पनमप्रामाणिकमित्यभिमानात्॥

ग्रहणाच्चेति।सावनुनासिकोकारपाठाच्चेत्यपिबोध्यम्।एवंचापृक्तग्रहणंचिन्त्यप्रयोजनम्।वस्तुतोगङ्गीःसुराढ्यादेरभिधानेदृढंमानंचिन्त्यम्।विभक्त्योरा
नन्तर्यमिति।एवंचविभक्तिसंयोगान्तलोपस्यासिद्धत्वंज्ञाप्यतइतितात्पर्यम्।गोमानित्यादौलस्यभेदाद्वारंवारंसंयोगान्तलोपः।नपुंसकार्थत्वादिति । सम्बोधि
तिहितत्रलुगितितत्रनलोपनिषेधायावश्यकत्वादितिभावः।लुकालुप्तेइति।ङिसंबुद्ध्योरितिसप्तमीतिभावः।आवश्यकतयाचेति।ङिसंबुद्ध्योरित्यस्यसप्तम्यन्तत्व

इहसुनोनैरवयवस्यसस्यलोपंव्यावर्तयितुंअपृक्तग्रहणमिति।तदपिन।परस्परसाहचर्येणसुतिसीनांविभक्तीनामेवग्रहणात्।अन्यथासिचोलोपा
पत्तेरुक्तत्वात्।प्रत्ययाप्रत्यययोःप्रत्ययस्यैवग्रहणाच्च।हलकिम्।बिभेद।ननुप्रथमंहल्ग्रहणंव्यर्थम्।हलन्तात्परेषांसंयोगान्तलोपसंभवात्।अत्राहुः।
संयोगान्तस्यलोपेहिनलोपादिर्नसिद्ध्यति।यत्तुतेनैवलोपःस्यात्हलस्तस्माद्विधीयते।तथाहि।सखेत्यत्रनलोपोनस्यात्संयोगान्तलोपस्यासिद्ध
त्वात्।स्यादेतत्।संयोगान्तलोपोनासिद्धः।नङिसंबुद्ध्योरितिसूत्रेसंबुद्धिग्रहणाज्ज्ञापकात्।नचैवंगोमानित्यादावपिनलोपापत्तिःज्ञापकस्यविशे
षविषयत्वात्।यत्रहिनकारविभक्त्योरानन्तर्यन्तत्रैवसिद्धत्वंव्याख्यानात्।यत्त्वाहुः।हेब्रह्मन्नितिनपुंसकार्थत्वान्नैतज्ज्ञापकमिति।तन्न।लुकालुप्तेप्र
त्ययलक्षणाभावेनसंबुद्धौवानपुंसकानामित्यस्यावश्यकतयाचसंबुद्धिग्रहणस्यनपुंसकविषयत्वासंभवेनोक्तज्ञापकस्यसुस्थत्वात्।तस्मान्नलो
पोनप्रयोजनमितिचेत्।इहतर्हिअभिनोत्रेत्यत्ररोरुत्वंनस्यात्।तदिदमुक्तंनलोपादिरिति।तथाअबिभर्भवान्।अजागर्भवानित्यत्रतिलोपोनस्यात्।
रात्सस्येतिनियमात्।अत्रेदमवधेयम्।ङ्याब्ग्रहणंसोरेवविशेषणंनतुतिस्योः।व्याख्यानात् ॥

पक्षेपि[illegible]स्यार्थमावश्यकतयाचेत्यर्थः।यद्य
पिवानपुंसकानामित्येवभाष्येपठितंसंबुद्धिग्रहणंचसूत्रादेवसंबध्यतइतितदर्थंनचरितार्थंतथाप्यत्रपाठेनोक्तार्थज्ञापकतापि।संबुद्धिग्रहणंभाष्येप्रत्याख्यातमितितु
नभ्रमितव्यम्।सूत्रस्थङिग्रहणस्यङिसंबुद्ध्योरनुत्तरेतिवार्त्तिकस्थसंबुद्धिग्रहणस्यचप्रत्याख्यानेपिसूत्रस्थस्याप्रत्याख्यानादितिभावः ॥

भाष्यमिति।यदिपुनरयमपृक्तलोपःसंयोगान्तलोपोविज्ञायेतेत्युपक्रम्यतद्भाष्यंप्रवृत्तम्।पूर्वान्तत्वेनेति।नचैवंसंबुद्धावित्यादौसंनिपातपरिभाषयाटाम्नेतिभाष्यविरोधइतिवाच्यम्।दीर्घप्रवृत्त्युत्तरमन्तादिवद्भावप्रवृत्तावपिटाबुत्पत्तिकालिकानन्तर्यविघातस्यतेनवारयितुमशक्यत्वात्।अशास्त्रीयत्वात्संनिपातस्यान्तवद्भावेनातिदेष्टुमशक्यत्वाच्च।अत्राबन्तात्त्वितितुनाऽत्रविर्बोधिता।पञ्चमीसमासाश्रयणेस्थानिवद्भावोस्ति।अस्याभिधानेचनदृढमानम्।आबन्तेभ्यआचारक्विबेवनास्ति।आतोधातोरितिसूत्रस्यभाष्यप्रामाण्यात्।तत्रवार्त्तिककृताआतोनापइत्युक्तमितितद्बीजम्।आचारक्विबन्ताद्यङ्लुक्तुनास्त्येव।तेनकस्यस्त्रीकी।कीशब्दादिभ्यआचारक्विबन्तेभ्योऽपि
अस्मिन्नेवसूत्रेहिहलपृक्तग्रहणन्तिस्योश्चग्रहणंनकर्त्तव्यंभवतीतिभाष्यंचेहप्रमाणम्।यदिहिङ्याब्ग्रहणंतिस्योरपिविशेषणंस्यात्।तर्हिकथंतिस्योर्ग्रहणस्याकर्तव्यतांब्रूयात्।यत्तुङ्याब्भ्यांतिस्योरसंभवएवेति।तत्रङ्यन्तादसंभवइतिसत्यम्।आबन्तात्तुआचारक्विबन्ताल्लङःतिप्सिपोस्तएव।अगङ्गात्।अगङ्गाः।इतियथा।नचशपाव्यवधानम्।एकादेशस्यपूर्वान्तत्वेनग्रहणात्।नचस्थानिवद्भावः।अपूर्वविधित्वात्।अत्रायंनिष्कर्षः।ङ्यापःसोरित्येवसूत्रमुचितम्।नचसुराःसुरासेइत्यादौधातोःसकारेऽतिप्रसङ्गः।ङ्याब्भ्यांसाहचर्यात्।प्रत्ययाप्रत्यययोरितिपरिभाषयाचप्रत्ययस्यैवसोर्ग्रहणात्।राजेत्यादौनलोपस्तुनङिसंबुद्ध्योरितिज्ञापकेनसाधितएव।किंचाभिनोत्रेतिउत्वमपिसूपपादम्।संयोगान्तलोपोरोरुत्वेइतिसिद्धकाण्डेपाठात्।हरिवोमेदिनंवेतियथा।अबिभर्भवान्इत्यत्रापिनदोषः।एत्तस्येतिअत्रतकारस्यापिप्रश्लेषेणत्तस्येतिच्छेदात्॥

यङ्लुकिलङिअचेकेदित्यादौङ्यन्तादपिसंभवइत्यपास्तम्।ईकाररूपत्वाभावाच्च।उत्वमपीति।अपिनापूर्वरूपम्।रोरुत्वेइति।कर्त्तव्येकृतेचेतिशेषः।नमुनेइतिवत्।हरिवइति।हरिशब्दान्मतुपिछन्दसीरइतिवत्वेरुमिसंयोगान्तलोपेमतुवसोरितिरुत्वेउत्वेगुणः।ढ्रेदादिति।कीर्त्तयतेःक्विब्विचावेवनस्तोवृत्तेर्यङ्लुकिलङिईड्भावेतिप्सिपोःप्रयोगएवनास्ति।यथालक्षणमप्रयुक्तेइत्यत्रैवभाष्योक्तेः।अप्रयुक्तेलक्षणप्रवृत्त्यभावस्यैवयोग्यतेत्यर्थः।प्रयुक्तानामिदमन्वाख्यानमितिसिद्धान्तात्॥

नेतिव्याख्यानमिति।उपपादितंचेदंरामशब्दान्ते।नलोपेकृतेइति।संयोगान्तलोपस्यासिद्धत्वादितिभावः।नलोपात्प्रागिति।विभक्तिसंयोगान्तलोपस्यनलोपविषयेऽसिद्धत्वाभावज्ञापनद्वारेतिशेषः।एतेनराजेधतेचक्र्यत्रराजाच्छत्रमित्यादौवृद्धियण्तुगादिकंनस्यात्संयोगान्तलोपस्यासिद्धत्वात्।किंचकर्त्र्यैत्यादावेकमेवयण्शास्त्रंपूर्वापरविषयभेदाद्भिन्नमितिशब्दपरविप्रतिषेधात्परस्ययणादेशइत्यचःपरस्मिन्नित्यत्रभाष्यकैयटयोःस्पष्टम्।विषयगतपौर्वापर्यस्यलक्षणेआरोपइतितदाशयस्तेनधीमा

ननुउखास्रदित्यादौसंयोगादिलोपःस्यादितिचेत्न।दत्वेकृतेतदप्राप्तेः।असिद्धंदत्वमितिचेन्न।सिद्धकाण्डेवस्वादिषुदत्वमितिपाठात्।नन्वपदान्तत्वाद्दत्वंनस्यादितिचेन्न।सावपिपदंभवतीतिपक्षाश्रयणात्।तद्बीजन्तुअसर्वनामस्थानेयचीतिच्छित्वायजादौसर्वनामस्थानेपदंनेतिव्याख्यातम्।नचैवंराजेत्यादौनलोपेकृतेसौरुत्वविसर्गौस्यातामितिवाच्यम्।इतोदितिसिद्धेपथिमथीत्याकारविधानेनप्रथमंसुलोपस्यज्ञापनाच्च।ननुनैतज्ज्ञापकंसंबुद्धौचरितार्थत्वात्।हेपन्थाः।मन्थाः ऋभुक्षाः।तत्रहिदीर्घोसंबुद्धावितिपर्युदस्तः।नलोपश्चनिषिद्धइतिचेत्।एवंतर्हिनलोपात्प्राक्संयोगान्तलोपइत्यर्थेनङि·संबुद्ध्योरितिसूत्रमेवज्ञापकमस्तु।तथाहि।ङि·संबुद्ध्योरितिषष्ठीनतुसप्तमीङे·र्लुकालुप्ततयाप्रत्ययलक्षणाभावात्ङ्यन्तस्यसंबुद्ध्यन्तस्यचप्रातिपदिकस्येतिसामानाधिकरण्येनान्वयः।नचप्रथमंसंयोगान्तलोपंविनासंबुद्ध्यन्तंप्रातिपदिकंलभ्यते।तस्मान्ङ्यापःसौरितिन्यासेनकिंचिद्बाधकम् ।

नित्यादौसुविषयसंयोगान्तलोपशास्त्रस्यनलोपविषयेतत्रपूर्वस्मिन्नसिद्धत्वेननलोपोनस्यादित्यपास्तम्।सावपिपदमितिपक्षेतुअदोषाच्च।आरोपेमानाभावाच्च।षष्ठीति।अतएवङौनलोपनिषेधःसार्थकस्तदाहङे·रिति।नचनलुमतेतिनिषेधानित्यत्वान्नदोषः।तदपेक्षयाषष्ठ्यन्ततयाव्याख्यानस्यैवलघुत्वात्।संबुद्ध्यन्तेति।संबुद्ध्यन्तप्रातिपदिकान्तनस्यलोपोनेत्यर्थः ॥

इतिसूत्रमस्त्विति।अतएवसुपीरित्यादिसिद्धिः।अन्यथापदान्तेसंयोगादिलोपस्यसंयोगान्तलोपापवादत्वात्तस्यवृत्तौवोरितिदीर्घोनस्यात्।तिप्यनस्तेःसिपिधातोरिति सूत्राभ्यांधातुसंबन्धिपदान्तसस्यदंलरुत्वविधायकाभ्यांकसाहचर्येणचप्रकृतिप्रत्ययसंबन्धिवर्णसंयोगमाश्रित्यसस्यपदान्तेसंयोगादिलोपाप्रवृत्तिकल्पनेतुनकिंचिल्लाघवम्।किंचनङि·संबुद्ध्योरितिसप्तम्येवयुक्ताङि·ग्रहणाच्च।नलुमतेत्यस्येतद्विषयेऽनित्यत्वमूलकमेववानपुंसकानामितिवार्त्तिकम्।एवंचब्रह्मन्नाद्यर्थंसंबुद्धिग्रहणस्यावश्यकत्वेनज्ञापकासंभवः।अपूर्ववचनकरणेनसिद्धप्रत्याख्यानन्तुनयुक्तम्।इदमेवाभिप्रेत्यसूत्रशेषेभाष्येतस्मादशक्योहलष्टक्तलोपःसंयोगान्तलो

यदितुवस्वादिषुदलमितिवार्तिकंप्रत्याख्यायते।अधातुग्रहणेनैवोखास्रदित्यादौदीर्घाभावःसिद्धः।तर्हिहल्ङ्यापःसोरितिसूत्रमस्तु।यत्तुयथाश्रुतंसूत्रंप्राचाव्याख्यातम्।ङ्यन्तादाबन्ताद्दीर्घाच्चेति।तन्न।ङ्यापोर्हिदीर्घौ नतुतदन्तमपि।नचदीर्घाद्ङ्यन्तादित्यादेर्दीर्घायोङीतदन्तादित्यादेरर्थोलभ्यते। दीर्घादितिपञ्चम्या अनन्वयात्।समासेउपसर्जनयोर्ङ्यापोर्विशेषणायोगात्।उक्तंहिभाष्ये।सविशेषणानांवृत्तिर्नवृत्तस्यवाविशेषणयोगोनेति।एतेनअनदीसंज्ञंह्रस्वंइउवर्णान्तमित्यपिप्राचोवृत्तिःप्रत्युक्ता।सख्युरसंबुद्धौ।इहेतोत्सर्वनामस्थानेइत्यतःसर्वनामस्थानेइत्यनुवर्तते।तदसंबुद्धावित्यनेनविशेष्यते।गोतोणिदितिसूत्रात्सिदित्यनुवृत्तंतत्सामानाधिकरण्येनसप्तम्याःप्रथमाकल्प्यतइत्याह। संबुद्धिवर्जंसर्वनामस्थानमिति ॥

꣼ पोविज्ञातुम्। नचैद्विज्ञायतेद्विहलष्टक्तग्रहणंतिस्योश्चग्रहणंकर्त्तव्यमित्युक्तम्।इतिसूत्रमित्युपलक्षणम्।हल्ङ्यापःसुतिसिहलितिसूत्रमस्त्वित्याशयात्।अतएवाबिभाराज्यमित्यादौद्वलोपइतिदीर्घसिद्धिरितिदिक्।दीर्घाच्चेति।हलन्तादित्यपेक्षश्चकारइतितद्व्याख्यातारः।नतुतदन्तमपीति। तस्याज्झत्वसमुदायरूपत्वादितिभावः।प्रत्युक्तेति।इउवर्णान्तस्यह्रस्वत्वासंभवादिउवर्णयोरेकादेशत्वेनतद्विशेषणासंभवाच्चेतिभावः ॥

युक्तमिति।अनङ् सावित्यत्रविभक्तिविपरिणामःकार्यःसर्वनामस्थानेइत्यस्यगोतोणिदित्यत्रप्रथमान्ततायाःक्लृप्तत्वान्नतन्निवृत्तिरित्यभिमानः।विशेष्यासन्निधानादि
ति।शब्दस्वरूपंविशिष्यत्वव्यावर्तकम्।किंचसत्यपिविशेष्येसखिशब्दभिन्नान्तस्येत्येवस्यान्नतुसख्यन्तभिन्नस्येति।नञैकार्थीभावापन्नस्यान्यत्रान्वयायोगादितिभावः।

सख्युरसंबुद्धिः इत्येवतुसूत्रंयुक्तम्। ख्यत्यात्परस्य।कृतयणादेशयोः खिखीशब्दयोः अनुकरणं ख्येति।एवंतितीशब्दयोस्त्येति।उभयत्राप्यकार
उच्चारणार्थः।ननुसख्यापत्यादिशब्दैकदेशानुकरणमिदम्।सख्युर्यः।पत्युर्नः।संख्यायाःसंवत्सरसंख्यस्यच।आपत्यस्यचतद्धितेइत्यादिनिर्देशात्।
इत्यभिप्रेत्याह।खितिशब्दाभ्यामित्यादि।परस्येतिग्रहणंएकः पूर्वपरयोरित्यधिकारनिवृत्त्यर्थम्।औत्।एतच्चनदीसंज्ञकेषुइदुद्भ्यामितिपूर्वसूत्रे
णबाध्यते।घिसंज्ञकेषुअच्चघेरित्युत्तरसूत्रेण।तस्मात्संज्ञाद्वयशून्योस्यविषयः।नचतादृशउकारोस्ति।अतआह।उकारेति।यत्तुप्राचाघिनदीसंज्ञा
वर्जिताभ्यामिदुद्भ्यांपरस्येत्युक्तम्।तन्न।तादृशउकारस्याप्रसिद्धेः।समुदायस्येति।नचपर्युदासेपिपर्युदस्यमानसमर्पकेसखिशब्देतदन्तग्राहकत्वं
शंक्यम्।विशेष्यासन्निधानात्।यत्विहग्रहणवतेत्याद्युपन्यस्तंहरदत्तेन।यच्चख्यत्यात्सूत्रेकय्यटेन।तन्न।तस्यप्रत्ययविधिविषयत्वात्।गौणत्वेपीति।
अस्थ्याद्यनङ्दितिभावः।तथाचयेनविधिरितिसूत्रेपरमसखायावितिबहुव्रीहिः।तत्पुरुषेहिटचाभाव्यमितिकैयटः।तथाद्वितीयाश्रितेतिसूत्रेसो
मसखेतिप्रतीकमुपादायबहुव्रीहित्वान्नसमासान्तइतिकैयटः।मिदचोन्त्यादितिसूत्रेतृज्वत्क्रोष्टुः स्त्रियांचेतिसूत्रेचभाष्यकैयटयोःख्याधातौमाधव
ग्रन्थेचस्फुटमेतत्।अनुद्युक्षोवरुणइन्द्रसखा।आग्नेयाहिमरुत्सखा।तीव्रंसोमंपिबतिगोसखायंइत्यादिप्रयोगाश्चैवमेवसङ्गच्छन्ते।तत्रबहुव्रीहिप्रयुक्त
स्यपूर्वपदप्रकृतिस्वरस्यदर्शनेनगौणत्वात्।एतेनघिसंज्ञासूत्रेशोभनःसखायस्यससुसखिरित्युदाहरन्तौहरदत्तन्यासकारौतदनुगामिनश्चान्येउपेक्ष्याः ॥

तस्यप्रत्ययविधीति।एवंचहरदत्तानुरोधेनेदंसर्वमितिभावः।तथाद्वितीयेति।तत्पुरुषविषयेबहुव्रीहिर्नेतिउपक्रम्योभयंखल्वपीष्यतेसोमसखागवांसखइतिभाष्यम्।अन्येष

ष्ठ्याआक्रोशइत्यलुक्।

संख्यावाचकेइति।आदिसंख्याव्यापकधर्मविशेषवाचकेइत्यर्थः।ननुबहुत्वंसंख्यानियतंविषयपरिच्छेदहेतुत्वरूपसंख्यात्वस्यतत्राभावात्।अतएव भाष्येयद्यस संख्या संख्येत्याहेत्युक्तम्।संख्यायतेऽनयेति।साक्षाद्व्याप्य संख्याद्वारावेत्यर्थः।अतएव बहुगणसाहचर्येणसंख्यासंबन्ध्यर्थप्रतिपादकस्यग्रहणादेवबहुवचनेति।अन्यथाषट्त्वेचवदेत्।अर्थप्राधान्येति।षट्शब्देनषट्संज्ञकःशब्दस्तदर्थसंख्याश्रयश्चेत्युभयमपिविवक्षितम्।तेषांबहुत्वादिदंबहुवचनम्।तत्रार्थात्परत्वंस्वगतसंख्यानुवादकरूपंगौणंतदाह।षडर्थेति।तेनगौणेन।इदंप्राचामनुरोधेन।षड्भ्यइतिबहुवचनंतिसृभ्यइतिवत्।षट्संज्ञकानांबहुत्वाच्च।नहिसर्वत्रजातिनिर्देशएवोचितः।आचार्यैशे

पतिःसमासएव।एवकारइष्टतोवधारणार्थः।अन्यथाहिसमासेपतिरेवेतिसंभाव्येत।धात्वादेरित्यादिज्ञापकानुसरणेचप्रतिपत्तिगौरवंस्यात्।अथकथसीतायाःपतयेनमः।पराशरस्य।नष्टेमृतेप्रव्रजितेक्लीबेचपतितेपताविति।उच्यते।पतिरित्याख्यातःपतिःणौटिलोपे अचइरित्यौणादिकइः।अयंपतिशब्दःपतिःसमासएवेत्यत्रनगृह्यतेलाक्षणिकत्वात्।एतेनकृष्णस्यसखिरर्जुनइतिभारतम्।सखिनावानरेन्द्रेणेतिरामायणंचव्याख्यातम्।बहुगण।बहुगणौप्रातिपदिकेसंख्यावाचकेगृह्येते।नतुसंघवैपुल्यकेअपि।संख्यायतेअनयेतिअन्वर्थसंज्ञाविधानात्।अतएवडतिरपितद्धितएवगृह्यते।वतुनासाहचर्याच्च।नतुपातेर्डतिः।षड्भ्योलुक्।षड्भ्यःपरयोरिति।बहुवचननिर्देशोअर्थप्राधान्यसूचनार्थः।षडर्थगतसंख्याभिधायिनोरितिफलितोर्थः।प्रत्ययलोपे।स्थानिवत्त्वेनसिद्धेनियमार्थमिदम् ॥ ७५ लीवा।षट्शब्दस्यबहुवचनान्तस्यैवसंज्ञात्वाच्च।तस्मादिदंविहितविशेषणम्।परमपञ्चादीनामपिसंख्याप्रकारकसंख्येयविशेष्यकबोधजनकत्वेनसंख्यावाचितयाषट्त्वमस्त्येव।लोकेगणनायांप्रसिद्धानामेवग्रहणमित्यत्रनमानम्।उपसर्जनेतुअतिक्रान्ताद्यर्थप्राधान्यंनतुसंख्याइतिनदोषः।स्पष्टंचेदंसर्वादीनीतिसूत्रेभाष्येइतितत्त्वम्।सिद्धेइति।तृणहइतिसूत्रेःश्विनेत्यनुवृत्त्यातृणह्मानीत्यादिव्यावृत्तौहलीत्यननुवृत्त्याअतृणेडित्यस्यसिद्धिः।शासइतः।अङि।अजादौङितिचेदङ्येवेतिनियमेनाजादिव्यावृत्तौतत्रहल्ग्रहणाकरणेनमित्रशीरित्यस्यसिद्धिरेवमन्यत्रापीतिभावः ॥

स·प्रा· ७४

प्रत्ययस्यासाधारणमिति। इदं द्वितीयप्रत्ययग्रहणेन लभ्यते। यत्र प्रत्ययस्य विशेष्यत्वं तत्रैवेति नियमस्तु न। राजेत्यादौ पदत्वानापत्तेः। दीर्घो नेति। असोलुकः स्थानिवत्त्वेनासन्तत्वेपीति शेषः। नन्वातुसाहचर्याच्छ्रूयमाणासन्त एव दीर्घ इति वाच्यम्। तदनित्यत्वस्यापनेन ज्ञापनात्। प्राधान्येनेति। तत्त्वं च वर्णाविशेषणत्वरूपम्। एतच्च स्थानिवदित्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षणमित्येतत्सामर्थ्याल्लब्धम्। इमिति। मित्रशीरित्यादौ हलादौ क्ङिति विधीयमानमित्त्वं च सिद्ध्यतीत्यपि बोध्यम्। वर्णप्राधान्येति। वर्णस्य तत्त्वं च प्रत्ययनिरूपितविशेष्यत्वमितराविशेषणत्वं च। अणयोऽकार इत्याद्यर्थके टिड्ढाणञित्यादौ इकोयणचीत्यादौ च। तत्रान्त्यमुदाहरति। तेनेति। आद्योदाहरणं तु चि

प्रत्ययस्यासाधारणं यत्र रूपं प्रयोजकं तदेव कार्यं प्रत्ययलोपे सति भवति। न तु प्रत्ययाप्रत्ययसाधारणमिति। तेन शोभनादृषदोस्य सुदृषत् प्रासाद इत्यत्रात्वसन्तस्येति दीर्घो न। यद्वा। यत्र प्रत्ययः प्राधान्येनाश्रीयते तत्रात्विधित्वेपि विध्यर्थमिदम्। तेन अतृणेडित्यत्र हलादौ पिति सार्वधातुके विहित इम् लुप्तेपि तस्मिन्न भवति। वर्णाश्रयेनास्ति प्रत्ययलक्षणं इति तु वर्णप्राधान्यविषयकम्। तेन गवे हितं गोहितमित्यत्र अवङ् न। अस्मादिति। अत्र प्राचा अव्ययेत्यपि पठितं तत्तु अव्ययानां प्रायेण निर्लिङ्गत्वात् अव्ययीभावस्य क्लीबत्वेपि लिङ्गान्तराभावाच्चोपेक्षितम्॥

त्रायां जाता चित्रेत्यादावण्योकारस्तदन्तादिति विहितो ङीब्नेति बोध्यम्। न च गोहितमित्यत्र न लुमतेति निषेधः लुप्तप्रत्ययनिमित्ताङ्गोद्देश्यककार्य एव तेन निषेधात्। अत एवोक्रामेत्यादौ क्रमः परस्मैपदेष्विति दीर्घः सिद्धः। परस्मैपदपरशिन्निरूपिताङ्गस्य तेन दीर्घविधानात्। तस्मिन्निति न्यासेपि लुक्स्थानिभूतप्रत्ययाव्यवहितप्रकृत्युद्देश्यककार्य एव प्रवर्तत इति बोध्यम्। अय इत्यादिनोक्तो वार्तिककृत्संमतः पक्षस्तत्फलानामन्यथासिद्ध्या भाष्यकृता दूषयित्वा नियमार्थत्वपक्ष उक्त इति दिक्। प्रायेणेति। विभक्तिप्रतिरूपकाणां लिङ्गयोगेपि त्रिषु सारूप्याभाव इत्याशयः॥

रामः ७४

अर्थप्राधान्यबोधकस्येति।अर्थप्राधान्यएवप्रवृत्तिबोधकस्येत्यर्थः।बहुवचनस्येत्युपलक्षणम्।तद्बोधकाभावादित्यत्रतात्पर्यम्।गौणमुख्यन्यायस्तुपदकार्यएवन प्रातिपदिककार्ये।किंचाप्रसिद्धत्वरूपस्यगौणलाक्षणिकत्वरूपस्यवागौणत्वस्यतत्रग्रहणम्।नचायंतथा।इतरविशेषणत्वेनउपसर्जनत्वंनतुगौणत्वम्।अतएवप्रियति वस्तुतस्त्विति।।अर्थप्राधान्यबोधकस्यबहुवचनस्याभावात्।गौणत्वेपित्रयादेशोन्याय्यः।अस्थ्यादयनङ्‌दितिभावः।अकारेवक्तव्यइति।तथाचबहुत्वाभावेऔडुलोमिशब्दइकारान्तः।बहुत्वेतुअकारान्तउडुलोमशब्दोअन्यएव।तस्यचइकारान्तेष्वव्युत्पादनंप्रासङ्गिकमितिभावः।तथाचौडुलोमिशब्दस्यइदन्तस्यबहुत्वेअदन्तत्वमितिनभ्रमितव्यम्।।इतिइदन्ताः।।किदिति।तेनआतोलोपइटिचेत्यालोपइतिभावः।ययीपप्यादयइति।यत्तुप्राचोक्तम्।एवंदेवयज्यतिलक्ष्म्यादयइति।तन्न।देवान्यजतइतिविग्रहेइन्नित्यौणादिकसूत्रेणह्रस्वान्तस्यैवदेवयजिशब्दस्योज्ज्वलदत्तादिभिःसाधितत्वात्।अप्रोद्विजान्देवयजीन्निहम्मिइतिभट्टिप्रयोगस्यह्रस्वविषयकतयैवव्याख्यातत्वात्।नचयजेर्दीर्घईप्रत्ययःप्रतिपदोक्तोस्ति।बहुलग्रहणात्कल्प्यतइतिचेद् भवेदेवंयद्यनन्यथासिद्धंकल्पकमुपलभ्येत।वेदेपिह्रस्वएवप्रयुज्यते।आयजिंत्वामनवेजातवेदसंइति।अतिलक्ष्मीशब्दस्यतुनदीत्वाद्ध्रस्वेआडागमेनुटिआमिचकृतेमहदेववैलक्षण्यमितिनवातत्रमीसास्यम्।एतच्चमूलेएवस्पष्टीभविष्यति।क्विबन्तेति।एतच्चमाङ्‌मानेशब्देचेतिधातौमाधवग्रन्थेस्पष्टम्।।७ सेत्यादौतित्वादयोभाष्यकृतोदाहृताः।गौणत्वेपीति।उपसर्जनत्वेपीत्यर्थः।नद्रूसितव्यमिति।एतद्भ्रमनिवृत्त्यर्थमेवात्रास्यव्युत्पादनमितिभावः॥इतीदन्ताः।ह्रस्वविषयकतयैवेति।जयमङ्गलायामितिशेषः।माङ्‌मानेइति।घुमास्थेतीत्वविधायकसूत्रस्थमवकारादावितिवार्तिकंभाष्येप्रत्याख्यातमितिईत्वंसुलभम्।शंस्याशब्देतुभाष्यप्रयोगादेवेत्वाभावः।ततोविजेवेंत्सन्ये।नचतेनेत्वेपितस्यासिद्धत्वात्कथंयणितिवाच्यम्।क्वावीत्वंविभक्तौयणादेशइतिव्याश्रयत्वादितिबोध्यम्॥

नकबिति।समासान्तविधौलिङ्गविशिष्टपरिभाषाभावस्यङ्याप्प्रातिपदिकादितिसूत्रेभाष्येउक्तावप्यस्यतन्निषेधकत्वेनात्रप्रवृत्तिरस्त्येव।गोस्त्रियोरितिसूत्रेब
हुश्रेयसीतिभाष्यीयग्रहणादनन्तरस्येतिन्यायंबाधित्वानघृतश्चेत्यस्याप्ययंनिषेधइतिभावः।ङ्यादिष्विति।बहुवचनंप्रयोगभेदाभिप्रायेण।शक्तीति।स्त्रीत्वनिरूपि
तशक्तीत्यर्थः।तेनलक्ष्म्यादिशब्दसंग्रहः।तदन्तसंज्ञापक्षेतुश्रीनद्योरित्यादौनदीशब्दस्यतदवयवेलक्षणा।नद्यन्तादित्वाद्यप्यतिलक्ष्म्याद्यर्थमावश्यकंलक्ष्मीशब्देव्य
पदेशिवद्भावेनतत्त्वंबोध्यम्।इउवर्णाविति।अतएवघ्यन्ताद जाद्यन्तंविप्रतिषेधेनेतिसङ्गच्छते।नतिस्त्यसादाविदंहरदत्तानुरोधेन।न्यायसिद्धमिति।अन्तरङ्गत्वात्पूर्वप्रव

बहुश्रेयसीति।ईयसश्चेतिनकप्।नाप्युपसर्जनह्रस्वः।ईयसोबहुव्रीहेर्नेतिनिषेधात्।यूस्त्र्याख्यौ।ईदूदन्ताविति।इहवर्णयोरेवसंज्ञेत्यपिपक्षोस्ति।
आच्छीनद्योरितिसूत्रस्वरसात्।तयोस्त्र्याख्यत्वंतुङ्यादिषुस्वतःक्वचित्तुस्त्रीवाचकवर्णसमुदायेघटकत्वेनप्रवेशात्।शक्तिपर्याप्त्यधिकरणत्वस्यावि
वक्षितत्वात्।तेननद्यन्तादिव्यवहारोनविरुध्यते।एवंघिसंज्ञायामपि।इउवर्णौतदन्तंवाघिसंज्ञमितिपक्षद्वयंबोध्यम्।वर्णसंज्ञापक्षेअसखीत्यस्यसखिभि
न्नस्यावयवइत्यर्थः।नतुसखिशब्दावयवंवर्जयित्वेति।तेनातिसखिनेत्यादिनिर्बाधमित्यवधेयम्।पूर्वमिति।वृत्तेःप्रागित्यर्थः।वक्तव्यमिति।संज्ञायांयथोद्देश
प्रवृत्तौन्यायसिद्धमिदंकार्यकालत्वेतुवाचनिकम्।अचिश्नु।इहय्वोरितिधातोरेवविशेषणंनतुश्नुभ्रुवोर्व्यभिचारात्।इत्याह।इवर्णोवर्णान्तधातोरिति।
त्तनदीघ्यन्तयैवसमुदायेनसंज्ञत्वात्कार्यसिद्धिरितिभावः।वाचनिकमिति।स्त्रीत्वविशिष्टार्थमात्रबोधकस्यैवसंज्ञेत्यभिमानेनेदम्।जहत्स्वार्थावृत्तित्वाभिमानेनवा।भा
ष्यकृतांत्वजहत्स्वार्थायामवयवस्यनित्यस्त्रीत्वविशिष्टार्थबोधजनकत्वेनतस्यसंज्ञायांकुमार्यैब्राह्मणायखरकुट्यैब्राह्मणायेत्यादौक्विलुब्विषयेआनुपूर्व्यैक्येनभेदा
ग्रहात्समासेनघ्यन्तत्वात्कार्यसिद्धिमाश्रित्यप्रत्याख्यातमिदम्।अवयवस्त्रीविषयत्वात्सिद्धमिति।तन्मात्रबोधकत्वनिवेशेनमानम्।यौगिकेषूत्तरपदेजहत्स्वार्थत्वाभावश्चेति
तदाशयः।अवयवशब्देनात्रवृत्तिप्रकृतिभूतशब्दग्रहणम्।अतएवक्यजाद्यन्तेनदोषः।तत्रापीच्छाविशेषणतयाकुमारीशब्दादेर्नित्यस्त्रीलिङ्गार्थबोधकत्वात्।स्रुप्रभृतीनामिति।

दोषइति।सामानाधिकरण्येविशेषणविशेष्यभावमात्रम्।वैयधिकरण्येतुभेदसंबन्धस्यचेतिगौरवंदोषइत्यर्थः।दिदिवतुरिति।अत्रयणापत्तिस्तत्रापितद्रीत्यावैयधि
करण्यात्।यदियण्विधौसामानाधिकरण्यमेवतदेयङ्एवापत्तिः।नचैषुलोपेननिर्वाहःप्रत्ययनिमित्तेयङादेरसिद्धत्वात्।अनित्यत्वात्तदभावेप्याहऊयतुरिति।क्लिष्टते
ति।अज्ञादिप्रत्ययस्याङ्गांशेउत्थिताकाङ्क्षत्वादितिभावः।उभयोर्विशेषणमिति।व्याख्यानाल्लक्ष्यानुरोधाच्चैकदेशान्वयेपिसौत्रत्वाद्वृत्तिरितिभावः।उन्याविति।अतएवस्वर
पूर्वीपदपूर्वांचोपधायस्येवर्णस्यतस्ययेणिस्वर्थकंस्वरपदंपूर्वोपधस्येतिवार्त्तिकंसङ्गच्छतेउक्तोपायेनप्रत्याख्यातमित्यन्यत्।तदन्तत्वादिति।नचधात्ववयवसंयोगपूर्व
श्नुप्रभृतीनामिवर्णावर्णयोरितिव्याख्यानेतुइयङुवङोर्ङित्वंव्यर्थंवैयधिकरण्यंचदोषः।क्षिपति।अद्युतत्।दिदिवतुः।ऊयतुः।इत्यादौचातिव्याप्तिः।त
द्वारणायइवर्णोवर्णयोरच्परत्वेनविशेषणेतुक्लिष्टतेतिभावः।आन्तरतम्यादिति।स्थानतइतिभावः।एरनेकाचः।अचिश्नुधात्वितिसूत्रेद्वन्द्वानदे
शेपिधातुरेवेहसंबध्यते।नतुश्नुभ्रुवोः।तयोरिवर्णासंभवात्।धातुग्रहणंचावृत्त्याउभयोर्विशेषणम्।संयोगस्यचाङ्गस्यचेतिव्याचष्टे।धात्ववयवसंयोगेत्यादित
त्रधातुनांसंयोगस्यविशेषणादिहयण्।उन्न्यौ।उन्न्यः।अङ्गविशेषणन्तु।हरिम्।हरी।हरीन्इत्यादिसिद्धये।यदिहिधातुनाङ्गंनविशेष्येततर्हिइहापिप्रध्यंप्रध्याइ
र्ण त्यादाविवपूर्वरूपंपूर्वसवर्णदीर्घंचबाधित्वायण्स्यात्।धात्ववयवसंयोगपूर्वकोनभवतियद्वर्णःतदन्तत्वादङ्गस्य। त्वस्यधात्ववयैवेकारएवसंभवेनसंयोगव
द्विप्रयोगस्यापिविशेषावगतिहेतुत्वेनतद्भिन्नस्यापिधात्ववयवस्यैवग्रहणान्नदोषइतिवाच्यम्।तन्न्योरित्यादौधात्ववयवसंयोगपूर्वस्याधात्ववयवस्यापिसंभवात्।परिमाणा
ख्यायामितिसूत्रेभाष्येअजपावपिसंज्ञायामेवयथाजातीयकउत्सर्गस्तज्जातीयकेनापवादेनापिभवितव्यमित्युक्तंतन्मूलकेनउत्सर्गसमानदेशाअपवादाइतिन्यायेनतु
ननिर्वाहः।अङ्गांशेतदसंबन्धेहरिमित्यादावपितत्प्राप्त्यातेनयेननाप्राप्त्यभावेनतदपवादत्वस्यैवाभावात्।यद्यपिप्रत्यासत्त्याइकोगुणवृद्धीइतिनिर्देशोपष्टम्भयाधात्ववय
वसंयोगपूर्वभिन्नस्यधात्ववयवस्यैवग्रहणमितिहरिमित्यादौनदोषस्तथापिस्पष्टप्रतिपत्तयेआवृत्तिरेवाश्रितेतिदिक् ॥

सूत्रमतेपीति। भीत्रेतिसूत्रंषष्ठीबाधनार्थमितिवैतण्डिकतयावदन्तितत्सिद्धसूत्रमतेपीत्यर्थः।वस्तुतोभयहेतुरित्युक्त्यास्यतृतीयाबाधकत्वंबोध्यम्।[illegible]ादिति।एवंचयलोपोदुर्लभइतिभावः।वार्त्तिककारोक्तेरिति।लोपोव्योरितिसूत्रेक्वावुपसंख्यानमितिवार्त्तिकम्।तस्यापूर्वत्वापेक्षयाक्वौयथालोपेदुर्लभइष्टसिद्धिर्भवतितथावक्तव्यमित्यर्थः।साचपूर्वविप्रतिषेधेनेत्याशयेनैवमुक्तमित्तिबोध्यम्।गौणत्वेपीति।इच्छाकर्तृरूपार्थप्रत्युपसर्जनत्वेपीत्यर्थः।कृतयणेति।अन्यथाखितेःपरस्येत्वेववदेदि

वृश्चिकशब्दस्येति।भाष्यकृताहिबुद्धिपरिकल्पितमपायमाश्रित्यभीत्रार्थानामितिसूत्रंप्रत्याख्यातंततश्चसंबन्धमात्रविवक्षायांषष्ठ्येवेतिभावः।सूत्रमतेप्याह।वृश्चिकसंबन्धिनीति।अल्लोपयलोपाविति।नचपरत्वादेरपृक्तस्येतिस्यादितिवाच्यम्।वेरपृक्तलोपाद्वलिलोपःपूर्वविप्रतिषेधेनेतिवार्तिककारोक्तेः।क्वौलुप्तमिति।नपुंसकेभावेक्तः।क्वौलोपइत्यर्थः।इदंसर्वंकुमारीमिच्छन्कुमारीत्यत्रापिबोध्यम्।अनन्यतयेति।गौणत्वेपिअनङ्णित्वयोःप्रवृत्तेरुक्तत्वाच्चेतिबोध्यम्।दीर्घस्यापीति।एतदर्थंकृतयणादेशनिर्देशइतिभावः।नन्वतिसखेःभूपतेःइतिगुणविषयेव्यावर्तयितुंयणानिर्देशइतिचेत्।अस्त्वेवम्।तथापिदीर्घप्रवृत्तेर्दुर्वारत्वात्।नहिह्रस्वेष्वेभाव्यंनदीर्घेष्वित्यत्रप्रमाणमस्ति।सौत्रस्यविकृतनिर्देशस्याव्याप्त्यतिव्याप्त्युभयवारकत्वेननतत्सा[illegible]र्वत्वलाभेन[illegible]स्यात्।भाष्यारूढत्वाच्च।यत्तुप्राचावेतिकेचित्।इत्युक्त्वा।सख्यः।सख्युः।इत्याद्युक्तम्।यच्चतद्व्याख्यातृभिरुभयमप्येतद्भाष्येस्थितमित्युक्तम्।यच्चात्रोपष्टंभार्थंप्रसादकृता।सख्युपत्युःप्रसिद्धौयतख्यत्यादित्याहपाणिनिः ॥

तिभावः।गुणविषयेइति।प्रकृतिप्रत्ययापेक्षगुणापेक्षयातदवयवमात्रापेक्षस्यान्तरङ्गत्वेनततःपूर्वंप्रवृत्तिःस्यादितिभावः।दुर्वारत्वादिति।तदर्थंकृतस्यान्यसंग्राहकत्वेपिबाधकाभावादितिभावः।विकृतनिर्देशस्येति।यकारान्तानुकरणनिर्देशस्येत्यर्थः।अकारस्तूच्चारणार्थइतिभावः ॥

उपधाया इति। उपधादीर्घस्यैवायंनियमः। तेनवृत्रहायन्तइत्यत्रअकृत्सार्वधातुकयोरितिदीर्घोभवत्येव। तथावृत्रहणीदित्यत्रानुनासिकस्यक्विझलोरितियोदीर्घः सोपिनियमेनव्यावर्त्यतेउपधादीर्घमात्रापेक्षयानियमविज्ञाना–दितिभावः। हन्तेरत्पूर्वस्येतिसूत्रंयोगविभागेनव्याचष्टे हन्तेः। प्रसङ्गादस्योदाहरणमाह। प्रहण्यादिति। प्रकृतोपयुक्तमंशमाह। अत्पूर्वस्य। एकाजुत्तरेति। नचाल्लोपेकृते एकाच्त्वंनास्तीतिवाच्यम्। पूर्वस्मादपिविधौस्थानिवत्त्वात्। नचपूर्वत्रासिद्धेनस्थानिवदितिवाच्यम्। तस्यदोषः संयोगादिलोपलत्वणत्वेष्वित्युक्तेः। यत्तुअट्कुप्वाङितिसूत्रेवृत्रघ्नः सुघ्नइतिभाष्यमुपादायकैयटेनव्याख्यातंप्रातिपदिकान्तेतिणत्वप्रसङ्गइतितत्पञ्चमीसमासोमास्त्वित्याशयेन। तस्यदोषइत्यत्रणत्वग्रहणंमास्त्वित्याशयेनवाबोध्यम्। णत्वग्रहणप्रत्याख्यानंतुभाष्येध्वनितंकौस्तुभेप्रपञ्चितम्। वस्तुतस्तुकुमतिचेतिनित्यंणत्वमिहन्याय्यम्। सर्वथापिवैकल्पिकंनित्यंवाप्राप्तंणत्वंनियमेननिवर्त्यतइतिसिद्धम् ॥

भाष्येध्वनितमिति। अन्यथासिद्धमाषपवनीत्येतस्यतदुदाहरणत्वोक्त्येत्यभिमानः। न्याय्यमिति। तस्यप्रातिपदिकान्तेत्यपवादत्वादितिभावः। नचसन्निपातपरिभाषयातदप्राप्तिः। सर्वणत्वेषुकवर्गव्यवायाश्रयणेनतद्विषयेतस्याअनित्यत्वावश्यकत्वात् ॥

राम:
८१

हादेशे षिति। हादेश कवर्गव्यवाये इत्यर्थः। आर्षत्वाद्वार्तिके समासः। वार्तिके हादेशेत्युक्ते दुघण इत्यादौ पूर्वपदादिति णत्वं सिद्ध्यति। तत्र हि हन्तेरपूर्वस्य घो घनादे
शश्च। अत एवागारैकदेश इति सूत्रे प्रघण प्रघाणयोः कृतणत्वयोरुच्चारणम्। तत्रापि हन्तेर्घनघनादेशविधानात्। न्याय्यत्वादिति। न च वार्तिकरीत्या बहुवृत्रहाणीति
णत्वमायाति। सूत्रारम्भे तु नेति वार्तिकारम्भस्यैवज्यायस्त्वात्कथं न्याय्यत्वं बहिरङ्गत्वेन दीर्घस्यासिद्धत्वे तु प्राघानीत्यत्र दोषः। तथा सूत्रारम्भे प्रघना घन इत्यत्र णत्वं प्रा
भाष्ये तु कुव्यवाये हादेशेषु प्रतिषेधो वक्तव्यः। किं प्रयोजनम्। वृत्रघ्नः। स्रुघ्नः। प्राघानि। हन्तेरत्पूर्वस्येति अत्पूर्वग्रहणं न कर्तव्यं भवतीत्युक्तम्।
एतच्च वार्तिकाशयवर्णनमात्रं न तु वस्तुस्थितिः। वार्तिकेन सूत्रावयवप्रत्याख्यानापेक्षया योगविभागमाश्रित्य वार्तिकार्थोपसंग्रहस्यैव न्याय्यत्वा
दिति दिक्। माधवेनोक्तमिति। इत्थं हि तदीयो ग्रन्थः। भसंज्ञायाम ल्लोपे उत्तरपदमनचूकं स्यात्। स्थानिवद्भावश्चाल्विधित्वान्नेति एकाजुत्तरपदत्वाभा
वात् प्रातिपदिकान्तनुम्विभक्तिषु चेति विकल्पो भवति। वृत्रघ्नो वृत्रघ्ना इति। तद्भाष्येति। किं चाल्विधित्वान्नेत्यसंगतम्। अल्विध्यर्थमेव अचः परस्मि
न्नित्यस्यारम्भात्। तस्याप्रवृत्तौ युक्त्यन्तरस्यैव वाच्यत्वात्। विकल्प इत्यप्यसंगतम्। कुमति चेति सूत्रस्य दुर्वारत्वाद् इत्यवधेयम्। मघवा बहु
लम्। अर्वणस्त्रसावनञ इति सूत्रात् त इत्यनुवर्तते। तदपेक्षया च मघवेति षष्ठ्यर्थे प्रथमा तदाह। मघवन्शब्दस्येति। अधातोरिति। अधा
तुभूतपूर्वस्यापीत्यर्थः। अञ्चतिग्रहणं हि नियमार्थम्। धातोश्चेद्भवति अञ्चतेरेवेति ॥ ७७ घ्नेति वार्त्तिकरीत्या तु नेति वाच्यम्। अत्पूर्वस्येत्यनेन हस्या
निककवर्गाभाववद् हन्तेरेवोपलक्षणेनादोषात्। प्रघणप्रघाणयोः कृतणत्वयोरगारैकदेश इति सूत्रे उच्चारणमत्रत्यात्पूर्वग्रहणस्योक्तार्थोपलक्षणत्वे मानम्। णत्वनि
पातनकल्पनापेक्षयोक्तार्थतात्पर्यग्राहकत्वौचित्यादिति भावः। तदेतद्ध्वनयतोक्तम्। वार्तिकार्थोपसंग्रहस्येति। भूतपूर्वपर्यन्तमधातुपदस्य लक्षणायां बीजमाह। अञ्चतिग्र
हणं हीति। अञ्चतेरिति। नलोपिनोऽञ्चतेरित्यर्थः। नलोपेन निर्देशात्। सामान्यापेक्षश्च नियमस्तेन पर्णध्वद् गोमत्यतेः क्विपि गोमानित्यादावुगितश्चेति ङीबपिनेति दिक्। स्पष्टं चेद

मत्र भाष्ये उगितश्चेति सूत्रे च।

कैयटेनेति। अयं च कैयटः केशाद्व इति सूत्रस्थः। अर्वणस्तृ इत्यादि। अर्वणो मघोनश्च न शिष्यं यतस्तच्छान्दसं सामान्यतो बोधितानामपि केषांचिद्दृ घधात्वादिवन्नियतविषयत्वादित्यर्थः। एवं च छन्दसि दृष्टानुविधिरिति न तदर्थः शास्त्रारम्भ इति तात्पर्यम्। एवं हि छान्दसलक्ष्यसाधकसर्वसूत्रप्रत्याख्यानं स्यादतः प्रकारान्तरेणापि सिद्धिमाह। मतुब्वन्योरिति। ऋ धातोर्विजन्तान्मघशब्दाच्च मतुब्वनिभ्यां रूपद्वयसिद्धिरिति भावः। ननु सूत्रारम्भे नित्यस्तृ आदेशोऽर्वणः प्रत्याख्याने तु पक्षे तदभावोपीत्यत आह। छन्दस्युभयेति। त्रादेशतदभावेत्यर्थः। तदुदाहरणमिमान्यर्वणः पदानीति। एतत्प्रत्याख्याने दीर्घो घकारोदात्तत्वं च लभ्यते। एतेनास्य छान्दसत्वाच्छन्दसित्रा

एवं च गोमानिवाचरति गोमानित्यादौ संप्रतिधातुत्वेपि विद्ध्यर्थमधातुग्रहणम्। एतच्च मूल एव स्फुटीभविष्यति। ननु कुर्वन्नित्यादाविव संयोगान्तलोपस्यासिद्धत्वेन नान्तत्वाभावाद्दीर्घत्वं न स्यादित्याशङ्क्याह। इहेति। बहुलग्रहणादिति। क्वचिदन्यदेवेत्यर्थकादित्यर्थः। निपातनादिति। महेर्हकारस्य घकारः अवुगागमः कनिप्रत्ययश्चेत्यस्य त्रितयस्य निपातनादित्यर्थः। प्रत्याख्यातमिति। तथा च छन्दसीवनिपावित्यत्र कैयटेनोक्तम्। मघवा बहुलमित्येतन्न कर्तव्यं श्वन्नुक्षन्निति निपातनान्मघशब्दान्मतुपा च भाषायामपि शब्दद्वयस्य सिद्धत्वादिति। यत्तत्र वार्तिककृतोक्तम्। अर्वणस्तृमघोनश्च न शिष्यं छान्दसं हि तत्। मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनादिति ॥ ७ देशपक्षे मघवन्नित्येव रूपं तच्च मत्वन्तस्य छान्दसत्वाद्दीर्घाभावेन साध्यमिति प्रत्याख्यानाशयः। लोके तु मत्वन्ते दीर्घो भवत्येवेति परास्तम्। वार्तिकास्वरस्वारस्येन तथाप्रतीतेर्मघवानृजीषीत्यादौ वेदेपि दीर्घस्य पठ्यमानत्वाच्चातदेतत्कैयटेनोक्तं भाषायामसाधुतेति। केशाद्व इति सूत्रस्थ उक्तकैयटस्तु एतत्सूत्रस्य वार्तिकविरोधात्स्वग्रन्थविरोधाच्च हेय एवेति ध्येयम्। यत्तु छान्दसा अपि क्वचिद्भाषायामित्याश्रित्य भाषायां प्रयोग इति। तन्न। तज्ज्ञापकस्य वयस्यासु मूर्ध्नो मतुबिति सूत्रप्रयोगस्य छन्दोवत्सूत्राणि भवन्तीति भाष्यकारेष्ट्यान्यथासिद्धत्वादिति तदाशयः ॥

तद्वनिबन्तेति। इदंचिन्त्यं,नशिष्यंछान्दसंहितदितिसामान्यप्रवृत्तवार्तिकस्यसङ्कोचेमानाभावात्। कविप्रयोगाणांबहुशः प्रामादिकानांदर्शनेनतेषामार्षवचनसंकोचेयत्त्वतद्व्याख्यावसरेकैयटेनभाषायामसाधुतेत्युक्तंतद्वनिबन्तमद्योदात्तमघवन्शब्दविषयकम्। छन्दस्येववनिब्विधानात्। अतोनकैयटस्यपूर्वापरविरोधइतिध्वनयन्नाह। छन्दसीत्यादि। अन्तोदात्तंत्विति। यद्यपिश्वन्नुक्षन्नित्यत्रकनिनन्ताएतेइत्युज्ज्वलदत्तादिग्रन्थमहिम्नाआद्युदात्तंलभ्यतेतथापि उक्षासमुद्रोअरुणःसुपर्णः पूषात्वेतोनयतुअग्निर्मूर्धानिर्मज्जानंनपर्वणोजभार त्वमर्यमाभवसियत् इत्यादौतत्सूत्रोपात्तानामुक्षन्नादीनामन्तोदात्तत्वस्यनिर्विवादतयाकनिप्रत्ययएवोचितइतिभावः। मघवाबहुलमितिसूत्रेमघोनइतिप्रतीकमुपादायमघशब्दस्याकारस्ययस्येतिलोपमाशङ्क्यनैतदस्ति। अन्यदेवह्येतदव्युत्पन्नंप्रातिपदिकंतथाहिभाषायामप्यस्यप्रयोगोदृश्यतेइतिवदन्न्यासकारोपिमघवन्शब्दस्यान्तोदात्तत्वेभाषायामपिसाधुत्वेचानुकूलः। एवंस्थितेमतुपमाश्रित्यत्रादेशंप्रत्याचक्षाणौभाष्यवार्तिककृतौमघवानित्यत्रत्रादेशपक्षेपिदीर्घंस्वीकुरुत एव। फलभेदेप्रत्याख्यानासम्भवात्। अतोबहुलग्रहणान्नासिद्धत्वमितियदुक्तंतद्भाष्यादिसंमतमेव। यत्त्वाहुः। मतुप्पक्षेपिछान्दसत्वान्नदीर्घइत्येवंभाष्यस्याशयइति। तन्न। मतुबन्तस्यछान्दसत्वेमानाभावात्। उदाहृतभट्टिकैयटविरोधाच्चेतिदिक्। एतेनश्वन्नुक्षन्नित्यत्रनिपातितस्यमघवन्नित्यस्यत्रादेशेदीर्घाभावान्नमघवन्नितिक्षीरस्वामिग्रन्थः प्रत्युक्तः। तथाचकातन्त्रसूत्रंसौमघवान्मघवाचेति। विचारचिन्तामणावपिमघवानेवमघवेत्युक्तम्। काशिकायामपिदीर्घएवदृश्यतइत्यलंबहुना। अर्वणस्तृ। ऋधातोर्विचिगुणेचअरितिरूपंतस्मान्मतुपिअर्वन्तावित्यादिसेत्स्यति। छन्दसीवनिपावितिवनिपिक्लेदेअर्वेति। लोकेतुऋधातोरेववनिपिसेत्स्यति। रूढिशब्दश्चायम् ।

नमानत्वमितिदिक्। उचितइतिभावइति। तथाचवनोरचेतिसूत्रेभाष्येमघोनीत्यत्रप्राप्नोतिमघवन्शब्दोव्युत्पन्नंप्रातिपदिकमिति ॥

Sampurnanand Sanskrit University, Balmeeki Campus, Kathmandu

प्रायुङ्क्तेति।अत्रयद्वक्तव्यन्तदुक्तम्।इतिपक्षेइति।अस्थिदधीत्यत्रोदात्तपाठेनसिद्धेउदात्तग्रहणेनशास्त्रेविनायत्नंस्वरूपेणोच्चारितगुणस्याविवक्षयाऽभेदक
त्वज्ञापनादितिभावः।उञ ऊँ इत्यत्रनासिकाव्यापारेणक्लेशाधिक्येनोच्चारणादानुनासिक्यंविवक्षितमितिसर्वेषांसमानम्।भेदकत्वेपितपरसूत्रस्यानणिविध्यर्थ

वाजिवाहार्वगन्धर्वहयसैन्धवसप्तय इत्यमरकोशात्।अतोर्थोपिनभिद्यते।तथापिनान्ततान्तयोःसर्वत्रप्रयोगेप्राप्तेव्यवस्थार्थमिदंसूत्रंतृज्वत्क्रोष्टुरिति
त्रिसूत्रीवत्।यत्तुहरदत्तेनोक्तम्।अर्वन्मघवन्शब्दयोर्भाषायांस्तृ मधुत्वमेव । अर्वणश्च मघोनश्चेत्यादिभाष्यादिति।तदापाततः
भाष्यस्यविशेषविषयतायाःप्रागेवोक्तत्वात्।तथाचश्रीहर्षः।वाहैरलुप्यतसहस्रदृगर्वगर्वइतिप्रायुङ्क्त।ननुगुणाअभेदकाइतिपक्षेसूत्रे
ऽननुनासिकोच्चारणेपिआन्तरतम्यादनुनासिकःस्यादित्याशङ्क्याह।आआदिति।यत्त्वाहुः।इहानुनासिकोन।अनण्त्वेनसवर्णग्रहणाभा
वात्।नचतपरस्तत्कालस्येतिअनणिविध्यर्थमितिवाच्यम्।भाव्यमानःसवर्णान्नगृह्णातीतिनिषेधात्।गुणानामभेदकत्वेपिशुद्धैकव्यक्तेः
सूत्रेनिर्देशान्नातिप्रसङ्गइति।अत्रेदंवक्तव्यम्।अनणिविध्यर्थमितिशङ्कायांभाव्यमानइत्याद्युत्तरमसङ्गतम्।तस्याण्विषयत्वात्।यदाहुः।
भाव्यमानोणित्यादि।अन्यथाचोक्करित्यादावपिनिषेधापत्तेः।तत्रोदित्करणसामर्थ्यान्ननिषेधइतिचेत्। किमनेनवक्रबन्धनप्रयासेन।तपर
स्तत्कालस्येतिसूत्रेऽप्रत्ययग्रहणस्यभाष्यकृताऽननुवर्तितत्वाच्च।किंचशुद्धैकव्यक्तेरित्यसंगतम्।अभेदकत्वेदोषस्यदुरुद्धरत्वात्।
एकाव्यक्तिर्गृह्यतइत्युक्त्याहिव्यक्त्यन्तरंननिर्दिष्टमित्यर्थःफलितः;सचगुणानांभेदकत्वेसत्येवसंगच्छतेनान्यथेत्यास्तांतावत्।

त्वाद्दोषः;तत्राप्रत्ययग्रहणानुवृत्तौमानाभावादित्यपिबोध्यम्।अननुवर्तितत्वाच्चेति।एवंचतत्रसूत्रेतत्संबन्धेमानाभावः।एवंचभेदकत्वेपितपरसूत्र
स्यानणिविध्यर्थत्वाद्दोषइतिभावः।नान्यथेति।एवंचगुणानामभेदकत्वेपीत्युपक्रम्यतादृश्युक्तिरसङ्गतेतिभावः ॥

मूलशैथिल्यादिति।सवर्णग्रहणाप्राप्तेरितिभावः।तद्विशिष्टस्येति।थइतिस्थानिश्रवणात्तदन्तविध्यभावाच्चेतिभावः।अयम्।इनस्त्रियामित्येषः।एवंचऋक्पूरित्येषतेननिषेधेनापिवारयितुंशक्यइतिभावः।थोन्थश्चेति।थोन्थइतिसूत्रमित्यर्थः।चादिलोपः।प्राप्तमिति।तदन्तग्रहणादितिभावः।नभवतीति।नचटिलोपोनविभक्तिनिमित्तकोऽन्यत्रापितत्प्रवृत्तेरितिवाच्यम्।प्रकृतोदाहरणेविभक्तिनिमित्तत्वमात्रेणतत्प्रवृत्तेः।अतएवयुवोरनाकावितिसूत्रभाष्येश्वयुवेत्यादेःपरिभाषाफलत्वेनोपन्यासः

एतेनभाव्यमानोऽण्सवर्णान्नगृह्णातीतिनिषेधादाकारोनानुनासिकइतिप्रसादग्रन्थोपिप्रत्युक्तः।दीर्घस्यानण्त्वेनमूलशैथिल्यात्।थोन्थः।स्थान्यादेशौद्वावप्यनचकौ।थेन्थइत्येवसिद्धेइतोद्वचनम्।ऋभुक्षिन्नर्थम्।न्थादेशइति।केचित्तुअन्थादेशमाहुः।तत्राकारप्रश्लेषोव्यर्थः।यत्तुन्यासकृताप्राचाचोक्तमनेकाल्त्वेपिथकारमात्रस्यायमादेशोनिर्दिश्यमानस्यादेशाभवन्तीतिन्यायादिति।तन्न।तद्विशिष्टस्याप्रसङ्गेनोक्तपरिभाषायाइहविषयाभावात्।प्रसङ्गादाह।स्त्रियामिति।सुपथीति।इनस्त्रियामितितुकब्नकृतः।समासान्तविधेरनित्यत्वात्।युवोरनाकावितिसूत्रेसुपथीतिभाष्याच्च।नपूजनादितिनिषेधस्यतुनायंविषयः।षचःप्राचीनेष्वेवसइतिवक्ष्यमाणत्वात्।पथिमथीत्यात्वंथोन्थश्चलिङ्गविशिष्टपरिभाषयाप्राप्तंविभक्तौलिङ्गविशिष्टाग्रहणान्नभवति।शाविति।यत्तुप्राचाइतोत्सर्वनामस्थानेथोन्थइतिसूत्रद्वयेसुटीतिव्याख्यानम् ॥

संगच्छते।परत्वादित्यभ्युच्चयः।नचाभिव्यक्तपदार्थाइतिन्यायेनकथमत्रात्वादीनांप्रवृत्तिः।तस्यन्यायस्यपदकार्यविषयत्वेननतपरकरणादनित्यत्वेनचेहाप्रवृत्तेः।नचनकेवलःपथिशब्दःस्त्रियामस्तीतियुवोरनाकावितिसूत्रस्यभाष्यप्रामाण्यादेभ्यःक्यजन्तेभ्यःक्विपोनभिधानमितिवाच्यम्।स्त्रीप्रत्ययाप्रवृत्त्यातदङ्गीकारेप्यक्षतेः विभक्तौलिङ्गविशिष्टाग्रहणमित्येतत्प्रयोजनकथनावसरेहिभाष्येतदुक्तम् ॥

नयणिति।ननुतद्भावेपीयङ् दुर्लभः।सुब्विधावन्तर्वर्तिविभक्त्याश्रयनलोपस्यासिद्धत्वेनावर्णान्ताङ्गाभावादितिवाच्यम्।सुप्त्वतद्व्याप्यधर्मनिमित्तकसुब्विधेरेवग्रहणात्।अतएवदण्डिषित्यादौषत्वेनलोपस्यासिद्धत्वंन।नचन्यादेशेऽङ्गवृत्तपरिभाषयानेयङ्।तस्याअनित्यत्वात्।नचेयङिकृतेत्वंदुर्वारम्।सन्निपातपरिभाषयास्वातिरिक्ततद्विघातकस्यबाधेनादोषादितिभावः।नचप्रकृतिप्रत्ययविशेषापेक्षन्यापेक्षयान्तरङ्गत्वाद्यणेवस्यादितिवाच्यम्।प्रातिपदिकस्याप्यत्रप्रकृति

तदसत्।निर्बीजलक्षणापत्तेः।क्लीबेऔङःश्यांसुपथीत्यत्रातिव्याप्तेः।सुपन्थानिपश्येतिशसिरूपस्यासिद्धिप्रसङ्गाच्चेतिभावः।अत्रेदमवधेयम्।पन्थानमात्मनइच्छतिपथीयति।ततःक्विप्।अल्लोपः।यलोपः।एकदेशविकृतस्यानन्यत्वात्पथिमथीत्यात्वम्।थोन्थः।पन्थाः।इतोत्सर्वनामस्थानइत्यत्वन्नभवति।इतंइतितपरकरणात्।एरनेकाचइतियणंबाधित्वापरत्वादनित्यत्वाच्चथोन्थः।संयोगपूर्वकत्वान्नयण्।पन्थियौ।पन्थियः।पन्थियम्।पन्थियौ।भस्यटेर्लोपः।पथः।पथा।पथीभ्याम्।पथीभिः।इत्यादिंएतेनइतोत्सर्वनामस्थानेइत्यत्रस्थानिन्यादेशेचतपरकरणंमुखसुखार्थमितिहरदत्तग्रन्थःप्रत्युक्तः।यत्तुन्यासकारस्तदनुसारिणोन्येचसुखीःसुतीरितिवत्पथीःपथ्यौपथ्यइत्याद्युदाजह्रु,स्तच्चिन्त्यम्।सावात्वस्यदुर्वारत्वात्।यत्तुपथिमथ्यृभुक्षामितिनान्तप्रकृत्यनुकरणमेतदिति।तदप्यनर्थकम्।एकदेशविकृतन्यायस्यदुर्वारत्वात्।पन्थाइत्यत्रापिनित्यत्वात्विशेषविहितत्वाच्चपूर्वमात्वेकृते नान्तत्वेनन्यादेशाप्रसङ्गाच्च ॥

७ त्वेनहलादेरपितन्निमित्तत्वेनयण्प्रकृतितन्निमित्तव्याप्यत्वाभावात्।तदोःसःसावितिसूत्रेनन्त्ययोरित्युक्त्यातत्सूत्रव्याख्यानायभाष्यकृतादसइतियोगविभागकरणेनचतादृशान्तरङ्गत्वस्यसर्वत्रानाश्रयणाच्चेतिबोधनात्।सावात्वस्येति।न्यादेशस्याप्युपलक्षणम्।यदिवैयात्यान्नात्रातिदेशइतिवदेत्तत्राप्याह।पन्थाइति।न्यादेशेति।अत्वस्याप्युपलक्षणम् ॥

नात्वादीति।नचनपदान्तेतिनिषेधः।अनान्तत्वयानःक्येइतिनियमेनसञ्ज्ञाविधौनलोपासिद्धत्वेनचेकारान्तेपदत्वाभावादेतेनपदान्तत्वादिकोसवर्णइतिह्रस्वत्वंदुर्वारमित्यपास्तमितिभावः।आश्रितत्वादिति।तत्प्रकृतिकसख्युरितिरूपेङसिनिमित्तोयण्क्यजकारनिमित्तकत्वेहिक्विनिमित्तकलोपापत्तिः।ङसिनिमित्तकस्यतुबहिरङ्गत्वेनासिद्धत्वान्नलोपःस्थानिवत्त्वेहिव्यवधानात्तन्निमित्तकोपिनस्यात्।अनुकूलत्वाच्चेति।आत्वादिप्रवृत्तिप्रतिबन्धकन्यायानामनित्यत्वेनैतद्वि

यदप्याहुः।अल्लोपस्यस्थानिवत्त्वान्नात्वादि क्वौलुप्तंनस्थानिवदितिनेहाश्रीयतेइति।तदपिचिन्त्यम्।तथासतियण्प्रसङ्गात्।ख्यत्यादितिसूत्रेसुखीःसुखीरित्यादिनिर्वाहायक्वौलुप्तंनस्थानिवदित्यस्यकैयटादिभिराश्रितत्वात्।इतोदित्यत्रतपरकरणंकुर्वतःसूत्रकृतोपिइहानुकूलत्वाच्च।तस्मादात्वंन्यादेशश्चन्याय्यएवेतिस्थितम्।एतेनमथीः।मथ्यौ।मथ्यः इत्याद्यपिप्रत्युक्तम्।मन्थाः।मन्थियौः।मन्थियःइत्यादेरेवन्याय्यत्वात्।यदपिऋभुक्षीः।ऋभुक्ष्यौ।ऋभुक्ष्यइत्यादि।तत्रसावात्वंदुर्वारमित्युक्तमेव।औङादिषुयण्तुदुर्लभःसंयोगपूर्वकत्वात्।तस्मात्ऋभुक्षाः।ऋभुक्षियौइत्यादिबोध्यम्।ष्णान्तापट्।स्त्रीलिङ्गनिर्देशःसंख्यांविशेषयितुम्।तत्सामर्थ्याच्चपूर्वत्रसंज्ञापरमपिसंख्याग्रहणमिहसंज्ञिपरंसंपद्यतइत्याशयेनाह।संख्येति।यत्तुप्राचाउपदेशकालेष्णान्तानान्ताचेत्युक्तम्।तस्यश्चेत्यत्रनलोपेकृतेपीत्यादिस्वग्रन्थविरुद्धम्।संप्रत्यनान्तत्वेपिउपदेशेनान्तत्वमासीदितिकिमसिद्धत्वेन।नन्वयंपूर्वापरविरोधःकाशिकायामपितुल्यइतिचेत्किंततः।

षयेऽप्रवृत्तिबोधकतयेतिभावः।विशेषयितुमिति।विशेष्यसाकाङ्क्षत्वात्तस्येतिभावः।तत्सामर्थ्याच्चेति।ष्णान्तेतिअनेनविशेषणसामर्थ्यादित्यर्थः॥संख्याशब्देतत्वासंभवादितिभावः।इहेति।अनुवृत्तमितिशेषः।सञ्ज्ञिपरमिति।यद्यपिसंज्ञिषुबहुगणवतुडतिषपितदसंभवस्तथापिलोकेसंख्याप्रकारकबोधजनकाःपञ्चादयइहतत्वेनविवक्षिताइतिबोध्यम्।किमसिद्धत्वेनेति।नलोपेकृतेपीत्यादिग्रन्थप्रतिपादितेनेतिभावः ॥

बाधे,दूषणे।अवयवेनेति।ष्णान्तपदावयवेनषकारनकारेणेत्यर्थः।समुदायेन।ष्णान्तपदेन।ससंबन्धिकः;नित्यसंबन्ध्यन्तरसापेक्षोयथागुर्वादिः।सापेक्षोपीति।सा
पेक्षस्यासमासेहिततोबोधाभावोबीजंनचनित्यसमासपक्षेतद्बीजमस्तीतिभावः।तदेवाह।वाक्यवदिति।व्यपेक्षा।अकाङ्क्षा।अवयवान्।गुर्वादीन्।संसृष्टस्ययुज्यन्ते

बाधेदृढेऽन्यसाम्यात्किंदृढेन्यदपिबाध्यतामितिन्यायात्।यत्तुव्याचख्युः।उपदेशकालेयौषकारनकारौतदन्तेत्यर्थः। देवदत्तस्यगुरुकुलमि
तिवत्समुदायेनसंबन्धान्नासमर्थसमासइति।तदापाततः।अवयवेनसंबन्धंव्याख्यायसमुदायेनसंबन्धादित्युक्तेःपरस्परव्याघातात्।किं
चयत्रोपसर्जनपदार्थःससंबन्धिकस्तत्रद्वयीविधा।सापेक्षोपिसमस्यतइत्येका।प्रधानपदार्थस्यैवकुलादेर्गुर्वादिनेवदेवदत्तादिनापिसंबन्धःस
चगुरुणासहउत्पत्तिगर्भःदेवदत्तेनसहतुतदीयगुरुत्वाद्यत्वरूपोगुरुघटितइतिद्वितीयाविधा।उक्तंचहरिणा।संबन्धिशब्दःसापेक्षोनित्यं
सर्वःसमस्यते।वाक्यवत्साव्यपेक्षाहिवृत्तावपिनहीयतेइति।समुदायेनसंबन्धोयेषांगुरुकुलादिना।संस्पृश्यावयवांस्तेतुयुज्यन्तेतद्वता
सहेतिच।अत्रउपसर्जनंनससंबन्धिकम्।येनद्वयीविधावकाशमासादयेत्।नन्विहष्णन्तशब्दःससंबन्धिकार्थोस्तीतिचेत्।उपदेशकाले
यौषकारनकारावितिवदद्भिस्तदन्तस्यत्यक्तत्वात्।अन्यथाहिउपदेशकालेऽन्तोयस्येतिवक्तव्यंस्यात्।वस्तुतस्तुतदपिन ॥

इत्यस्यतद्द्वारकसंबन्धेनयुज्यन्तइत्यर्थः।उपसर्जनम्।ष्णपदम्।नससंबन्धिकंनसंबन्ध्यंशेनित्यसाकाङ्क्षम्। साकाङ्क्षोनित्यसाकाङ्क्षः ॥

ईशितव्यम्।प्रजाभूस्यादि।समंप्रकृतेपीति।अन्तःशब्दस्यउपदेशकालंप्रतिननित्यसाकाङ्क्षतेतिभावः।सञ्ज्ञिपरत्वेत्यादि।संख्यापदस्येत्यादिः।अन्तग्रहणंसमास संपादनद्वाराऽन्यपदार्थबोधकत्वेनतत्संपादकमितिभावः।किंचान्तग्रहणस्यतदर्थत्वेतस्यविशेषणत्वात्सप्तम्यन्तत्वेनचपूर्वनिपातापत्तिः।उणादीनामव्युत्पत्तिपक्षेप्रत्ययानांसमुदायानांवोपदेशाभावेनत्वदुक्तार्थासंगतिश्चेत्यपिबोध्यम्।उपदेशग्रहणंकर्त्तव्यमिति।वार्त्तिकस्यतुस्वप्रकृतिप्रत्ययोपदेशकालेसान्तेत्यर्थस्त्व

अन्तःशब्दोहिअवयविनिसाकाङ्क्षोनतुयत्रकुत्रचित्।अन्यथाऋद्धस्यराजपुरुषइतिस्यात्।राज्ञोपिईशितुरीशितव्यंप्रतिसाकाङ्क्षत्वात्।राजाप्रभौनृपेचन्द्रेयक्षेक्षत्रियशक्रयोरितिकोशात्।यदितुऋद्धंप्रत्यनाकाङ्क्षेतिब्रूषेतर्हिसमंप्रकृतेपि।सन्निपातेति।तथाचोपदेशकालइतिव्याख्यानंनिष्फलमपीतिभावः।यत्त्वाहुः।परिभाषायाअनित्यत्वात्लुक्स्यादिति।तत्साहसमात्रम्।दृष्टस्थलेप्यप्रवृत्तौपरिभाषायानिष्फलत्वापत्तेः।किंचोपदेशइतिनिर्मूलमपि।यत्तुवदन्ति।अन्तग्रहणसामर्थ्यादौपदेशिकत्वंलभ्यतेइति।तदपिन।संख्येत्यस्याकर्षणेनसञ्ज्ञिपरत्वसंपादनेनचसामर्थ्योपक्षयात्।नोपधायाः।नेतिलुप्तषष्ठीकमङ्गस्यविशेषणम्।गौणत्वेत्विति।बहुवचननिर्देशस्यार्थप्राधान्यार्थत्वादितिभावः।प्रियपञ्च्नामिति।ञकारद्वयमध्येचकारः।अष्टनआहलादाविति।रायोहलीत्युत्तरसूत्राद्धलीत्यपकृष्यते।तच्चविभक्तेर्विशेषणमितिभावः ॥

यातुसमस्तान्तपदार्थभूतस्यउपदेशकालस्यतथान्वयोवक्तुमशक्यइतिस्पष्टमेवेतिदिक्।हलीत्यपकृष्यतइति।हलीत्युभयोःशेषइतिभाष्योक्तेरितिभावः।सन्निपातेति।नान्तत्वप्रयुक्तषट्सञ्ज्ञकसन्निपातेनजातस्यनुटस्तद्विघातकत्वमितिनस्याःप्राप्तिः ॥

अनित्यत्वादिति।नचनुटिनोपधायाइतिदीर्घेनलोपेनाष्टानामित्यस्यसिद्धेःकिमनित्यत्वेन।नचनलोपस्यापिसन्निपातपरिभाषयाऽप्राप्तिः।नलोपस्यासिद्धत्वेनतद्विषयेतदप्राप्तेरितिवाच्यम्।कृत्वोजन्तसूत्रभाष्येसन्निपातपरिभाषादोषनिरूपणावसरेहेगौरीत्यादौसंबुद्धिलोपेपितस्यस्थानिवत्त्वेनह्रस्वनिमित्तसन्निपातविघाताभावात्तत्रानित्याप्तिपरभाष्यासङ्गतेः।सन्निपातस्याशास्त्रीयत्वात्तस्यानिवत्त्वमितिचेत्तत्रासिद्धत्वमपिकथमितिविभावय।किंचपूर्वत्रकर्त्तव्येनदसिद्धत्वेपितत्रकृतेतस्यासिद्धत्वेमानाभा

तेनाष्टानामित्यत्रनुटःपश्चादेवसन्निपातपरिभाषायाअनित्यत्वादात्वंनतुप्राक्।अन्यथाअष्टन्आमितिस्थितेपरत्वान्नित्यत्वाच्चआत्वेकृतेऽनान्तत्वेषट्सञ्ज्ञाभावान्नुट्नस्यात्।नचयथोद्देशपक्षेन्तरङ्गत्वात्प्रागेवकृताषट्सञ्ज्ञाएकदेशविकृतन्यायेनकृतात्वेपिसुलभेतिवाच्यम्।अल्विधौउक्तन्यायायोगादितिभावः।अष्टाभ्यऔश्।कृताकारादिति।ननुहलीत्यपकृष्यतइत्युक्तम्।तत्कथंकृताकारताइत्यतआह।आष्टभ्यइति।कृतात्वस्येदमनुकरणंनतुलक्षणवशसंपन्नमात्वम्।तथाहिसतिवक्ष्यमाणज्ञापकेनतस्यवैकल्पिकतयालाघवार्थमष्टभ्यइत्येवब्रूयादितिभावः।इदमिति।श्रुतमनुमितंचेत्यर्थः।अष्टनोदीर्घादिति।दीर्घान्तादष्टनःपराअसर्वनामस्थानविभक्तिरुदात्तास्यात्।अष्टाभिः।दीर्घात्किम्।अष्टभिः।मध्योदात्तमिदम्।षट्त्रिचतुर्भ्योहलादिरितिबाधित्वाझल्युपोत्तममित्यस्यप्रवृत्तेः ॥

वः।अन्यथा।हलीत्यस्यात्रासंबन्धे।परत्वादित्यभ्युच्चयः।नित्यत्वाच्चेति।कार्यकालपक्षेसञ्ज्ञायास्तत्तद्विध्येकवाक्यतयाषट्त्वात्वयोर्बहिरङ्गत्वंसमानमितिभावः।अल्विधित्वादिति।षट्सञ्ज्ञायाअल्विधित्वेनतन्मूलककार्याणामप्यल्विधित्वमित्यभिमानः।यदितुनान्तसंख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्यषट्त्वस्यस्थान्यल्धर्मत्वाभावेनतत्प्रयुक्तकार्यस्यनुडादेरपिनाल्विधित्वमितिस्थानिवत्त्वेनैकदेशविकृतन्यायेनचनुट्सुलभस्तर्हिमुख्येकार्यकालपक्षेनत्सिद्धिर्हलीत्यनुवृत्तेःफलमितिबोध्यम्।श्रुतम्।हलादौ।अनुमितम्।जश्शसोः ॥

ह्रस्वव्यावृत्त्यर्थमिति।ह्रस्वेन्तोदात्तव्यावृत्त्यर्थमित्यर्थः।व्यर्थंस्यादिति।ननुज्ञापितेपिव्यर्थमेवतत्।अष्टाभिरित्यत्रसावकाशस्याष्टनइतिसूत्रस्याष्टभिरित्यत्रपरत्वात्झल्युपोत्तममित्यनेनबाधेसकृद्गतिन्यायेनपुनरप्रवृत्तेरितिचेन्न।दीर्घग्रहणेनैवसकृद्गतिन्यायानित्यत्वस्यापिज्ञापनात्।यद्वात्रयथोद्देशपक्षएवज्ञाप्यतेतत्रात्वस्यबहिरङ्गतयाप्राक्षट्त्वेजातेनान्तसंख्यावाचकत्वसमानाधिकरणधर्मरूपस्यषट्त्वस्याल्धर्मत्वाभावेनस्वरादेरल्विधित्वाभावात्स्थानिवद्भावेनैकदेशविकृतन्यायेनवाऽकारान्तस्यापिषट्त्वेनतत्रापिझल्युपोत्तममित्यस्यप्राप्त्याष्टन्स्वरस्यतदपवादत्वात्।तन्त्रपक्षेभविष्यतिकिंचिदनेनप्रयोजनमित्यभिसन्धिमात्रेणैवसञ्ज्ञाप्रवृत्तेःप्रगृह्यसंज्ञाप्रकरणेकैयटेनोक्तत्वात्।स्पष्टंचेदंषट्सञ्ज्ञासूत्रेऽष्टनोदीर्घादितिसूत्रेचभाष्यकैयटयोः॥आकारान्तस्यषट्त्वेप्यौश्विधिसामर्थ्यादष्टावित्यत्रलुग्न।नन्वेवमष्टावित्यत्राष्टन्स्वरस्यचारितार्थ्यम्।हलादित्वाभावेनषट्स्वरस्यतत्राप्राप्तेः।नचैकादेशेव्यपवर्गाभावः।स्वरात्पूर्वंसंधिकार्याप्रवृत्तेरैौत्स्यत्राङ्निमित्तनि

षट्त्रिचतुर्भ्योयाहलादिर्विभक्तिस्तदन्तेपदेउपोत्तममुदात्तंस्यादितितस्यार्थः।एवंस्थितेह्रस्वव्यावृत्त्यर्थंक्रियमाणंदीर्घग्रहणमात्वस्यनित्यत्वेव्यर्थंस्यादित्यर्थः॥

७) घातसिद्धयेयद्धितुपरमितिसूत्रेभाष्येध्वनितत्वादितिचेन्न।एतद्भाष्यप्रामाण्यादेवाष्टन्शब्दस्यघृतादिपाठादन्तोदात्तत्वेनैकादेशउदात्तेनोदात्तइत्येवतत्रान्तोदात्तसिद्धेः।ननुप्रियाष्टाभ्यामित्यादावष्टन्स्वरःसावकाशः,षट्स्वरविधायकेविहितविशेषणाश्रयणेनसमासेगौणेतदप्राप्तेः।अतएवचतुरःशसीतिसूत्रेप्रियांप्रतिषेधोवाच्यः।चतस्रःपश्य,चतसर्याद्युदात्तनिपातनात्तत्सिद्धम्।तन्निपातनेपिचतसृणामितिविभक्तिस्वरःसिद्धः।षट्त्रीतिसूत्रेहलादिग्रहणेननिपातनस्वरस्यविभक्तिस्वराबाधकत्वज्ञापनात्।आद्युदात्तनिपातनेहिहलादिग्रहणानर्थक्यं।नह्यन्यद्धलादिग्रहणंप्रयोजयतिअन्यदतश्चतसृशब्दादितिभाष्योक्तंसङ्गच्छते।अन्यथाप्रियाष्टानंइत्यादेःसंभवेनतदसङ्गतिः।अष्टौपरमाष्टावित्यादेरेकादेशस्वरेणसिद्धेः।नचकृदष्टावित्यादिव्यावर्त्यसंख्याप्रकारकसंख्येयविशेष्यकबोधजनकत्वयो

तरपदार्थप्रधानसमासेसमुदायस्यापिषट्त्वात्।स्पष्टंचेदंसर्वादीनीत्यत्रभाष्ये।ततोविहितत्वाच्चेतिवाच्यम्।एतद्भाष्यप्रामाण्येनतदनभिधानादितिचेन्न।एतज्ज्ञापकपरभाष्यप्रामाण्याद्ष्टनद्त्वस्यापिविहितविशेषणाश्रयणेनसमासेऽप्रवृत्तेः।प्रियाष्टादीनामनभिधानस्यषट्संज्ञासूत्रेभाष्येस्पष्टत्वाच्च।तिसृभ्योजसइतिसूत्रस्थेनोपसमस्तार्थमेकइतिभाष्येणतुल्यन्यायात्षट्त्वस्यापितदन्तेप्रवृत्तेरुक्तत्वाच्च।चतुरःशसीतिसूत्रस्थन्तुवार्तिकंजस्ग्रहणानर्थक्यमन्यत्राभावादितितिसृभ्यइतिसू

पूर्वस्मादपीति।एवंचप्रियाष्ट्नाइतिहरदत्तोदाहृतंष्टुत्वंनसंभवतीतिभावः।नचपूर्वत्रासिद्धीयेनस्थानिवदितिनिषेधः।तस्यदोषइतिसापवादत्वात्।ननुरषाभ्यामितिप्रतिपदोक्तणत्वंतत्रग्रहीष्यामः।ननुष्टुत्वविधिलभ्यमितिचेत्।मैवम्।भाष्यमतेतदयोगात्।तथाहि।रषाभ्यामितिसूत्रेऽपदान्तस्यमूर्द्धन्यइतिसूत्रमनुवर्त्यणग्रहणंपदान्तस्येतिनिषेधसूत्रंचभाष्येप्रत्याख्यातम्।नचमूर्द्धन्यशब्देनष्टुशब्देनवानिर्वर्त्यमानेणकारेवैषम्यंसुवचम्।यथोत्तरंमुनीनांप्रामाण्यमितिस्थानिवद्भावएवोचितः।शब्दकौस्तुभेतस्यदोषइत्यत्रणत्वग्रहणंमास्त्वितिनिष्कर्षः कृतस्तद्रीत्याप्याह।कार्यकालपक्षइति।नचयथोद्देशमाश्रित्यष्टुत्वमस्त्वितिवाच्यम् ॥

त्रस्थवार्तिकवदेवदूष्य,मेकेइतिचमुख्यार्थकमितिदिक्।प्रतिपदोक्तमिति।संयोगादिलोपसाहचर्याल्लत्वस्यैवेतिभावः।प्रत्याख्यातमिति।तदेकवाक्यतयात्रनित्यत्वेनणत्वांशेप्रतिपदोक्तपरिभाषासाहचर्यपरिभाषयोरप्रवृत्तिरितिभावः।प्रत्याख्यानेनचस्पष्टार्थमेवतयोरुपादानंनतुफलान्तराभिनिवेशः कार्यइतिसूच्यते ॥

प्रत्याख्यानासंभवेनेति। उक्तरीत्या भाष्यध्वनितणलग्रहणेत्यादिः णग्रहणेतिवा। पञ्चमीसमासेति। अपरविधाविति वक्तव्यमित्यचः परस्मिन्निति सूत्रस्य वार्तिकव्याख्यानावसरे कैयटध्वनितेत्यर्थः। वस्तुतस्तदयुक्तमिति प्राङ्निरूपितम्। तत्प्रत्याख्यानमभ्युपेत्यापि समाधत्ते। फलैक्यायेति। प्रत्याख्यानस्यायुक्तत्वं ध्वनयन् पञ्चमीसमासपक्षे लस्य सिद्धिं शङ्कते। निष्ठायामिति। सेड्ग्रहणादिति। तत्र हि सेड्ग्रहणं नानिड्व्यावृत्त्यर्थं णिजन्तात्तदसंभवात्। नच ज्ञपेः सनीवन्तेतीड्विकल्पात्तं ज्ञपित इत्यादौ यस्य विभाषेतीण्निषेधेन तत्संभवतीति वाच्यम्। यस्य विभाषेत्यत्रैकाच इत्यनुवृत्तेः। अन्यथा दरिद्रातेरपि सनि विकल्पितेट्त्वेन दरिद्रित इतीण्न स्यात्। वादान्तेति सूत्रे ज्ञप्ता इति निपातनेनेड्भावस्येव णिलोपस्यापि निपातनाच्च। तस्मात्तद्योगविभागेन कालावधारणार्थमिटि कृते एव णिलोपो न तु न

फलभेदे प्रत्याख्यानासंभवे न कार्यकालपक्षस्यैवेह न्याय्यत्वादिति भावः। अत एव पञ्चमीसमासस्य प्रत्याख्यानोपष्टम्भेनापि ष्टुत्वं प्रत्याख्यानं कार्यं फलैक्याय कार्यकालपक्षस्यैव न्याय्यत्वेनासिद्धत्वस्य दुर्वारत्वात्। निष्ठायां सेटीति सेड्ग्रहणाज्ज्ञापकात् पूर्वस्माद्विधौ स्थानिवद्भावस्यानित्यतयानेह प्रवृत्तिरिति तु संभवेदुत्प्रेक्षा यदि लस्येष्टत्वं प्रमितं स्यात् ॥

तः प्रागिति। अन्यथा कारितमित्यादौ परमपीटं बाधित्वा नित्यत्वाण्णिलोपे एकाच इतीण्निषेधः स्यात् पूर्वस्माद्विधौ स्थानिवत्त्वे त्वप्राप्त एव निषेधो णिचा व्यवधानादिति भावः। यदि तु एकाच उपदेश इत्यत्र विहितविशेषणपक्षे सेटीति चिन्त्यप्रयोजनमित्युच्यते तदा प्रविगणय्येति भाष्योदाहरणादेव तदनित्यत्वम्। अन्यथाल्लोपस्य स्थानिवत्त्वाल्ल्यपि लघुपूर्वादिति णेरयादेशो न स्यात्। ल्यपीति सूत्रं प्रशमय्येत्यादौ चरितार्थमिति दिक् ।

म·प्र·
९८

स्पष्टमिति।वस्तुनस्तुषड्भ्योलुगित्येतत्साहचर्यादस्यगौंणेनप्रवृत्तिः।तस्यचविहितविशेषणाद्गौणेप्रवृत्तिरितिसर्वादिसूत्रेभाष्येस्पष्टम्।गौणेऔंशोप्रवृत्तौतज्ज्ञाप्यात्वमपिनेतिबोध्यम्।इत्येवस्यादिति।यद्यपिहलीत्यपकर्षपक्षेप्रियाष्टावितिनसिद्ध्यति।प्रियाष्टानइतिप्राप्नोतीतिभाष्येउक्तम्।तथापिअपकर्षाभावेप्यात्वस्यवैकल्पिकतयाप्रियाष्टानइत्यस्यदुर्वारत्वेनयथाश्रुतभाष्यासङ्गतेरेवगर्भतयातद्व्याख्यानम्।प्रियाष्टाइतीति।आवादेशेवकारस्यलोपः शाकल्यस्येतिलोपोत्र।गौणत्वेप्यौश्त्वप्रवृत्तौहिभाष्यमसंगतमेवेतिभावः।कैयटइति।अत्रारुचिबीजंतुयथालक्षणमित्यस्यतत्कृतानैववालक्षणमप्रयुक्तेप्रवर्त्ततेप्रयुक्तानामेवल

लक्षणैकचक्षुष्कतायांतुअनित्यत्वपुरस्कारोनुचितएवेत्यास्तांतावत्।जः शसोरिति।औश्त्वंहिलुग्नुटाविवगौणत्वेनभवति।अष्टाभ्यइतिबहुवचननिर्देशात्।अन्यथाहिकृतात्वानुकरणेपिएकवचनेनैवनिर्दिशेत्. अष्टाऔशिति।अष्टइतिवा।एतच्चष्णान्तेतिसूत्रेभाष्यकैयटयोः स्पष्टम्।तयाचऔश्त्वविधौकृतात्वनिर्देशबलेनानुमीयमानमात्वमपिप्राधान्येएवोचितम्।तथाच जसिप्रियाष्टानइत्येवस्यान्नतुप्रियाष्टाइत्याशङ्क्योक्तंभाष्येयथालक्षणमप्रयुक्तेइति।नभवत्येवात्रात्वमित्यर्थइतिकैयटः ॥

७ क्षणेनान्वाख्यानादितिद्वितीयव्याख्यैवयुक्ता।आद्यव्याख्यायामप्रयुक्तेइतिवाक्यशेषासङ्गतिः।प्रयुक्तेपिलक्षणानतिक्रमसत्त्वात्।प्रयुक्तानामिदमन्वाख्यानमित्यभियुक्तोक्तिविरोधाच्च।यथालक्षणमित्यस्याप्रयुक्तेलक्षणाभावस्यैवयोग्यतानतुलक्षणप्रवृत्तेरित्यक्षरार्थः।किंचभाष्यकारस्यलक्ष्यैकचक्षुष्कतयैषैवव्याख्योचिता,एकस्यैवप्रयोगस्यभाष्यफक्किकाव्याख्यानभेदेनसाधुत्वासाधुत्वयोरनौचित्याच्च।तस्मादत्रत्यंमूलंटीकाचैवंव्याख्यातं,कैयटाद्यनुरोधेन।वस्तुतःप्रियाष्टादीनामनभिधानमेवेतिदिक् ॥

रामः
९८

आत्वस्याभावादौश्त्वंनेति।अत्रवृत्तिकृताऔशोभावादात्वंनेतिवक्तुंयुक्तम्।प्रथमैकवचनमिति।हल्ङ्यादिलोपात्परत्वादात्वेसोर्लोपाप्राप्त्यारुत्वविसर्गौ।नचलोपो
न्तरङ्गः।प्रकृतिप्रत्ययोभयसापेक्षत्वेनसमत्वादित्यभिमानः।नलोपाभावस्त्विति।कुञ्चधातुर्नोपधइतिसंमताकारीयधातुवृत्त्यनुसारेणेदम्।परेश्चेतिसूत्रभाष्या

वासनोपि।अष्टाभ्यऔशितिसूत्रेतदन्तग्रहणात्परमाष्टावित्युक्त्वाप्रियाष्टानइत्यत्रात्वस्याभावादौश्नभवतीत्याह।हरदत्तस्तुतत्रैवप्रियाष्टानइत्य
त्रेतिवृत्तिग्रन्थमुपादाययथापुनर्गौणतायामात्वंनभवतितथातद्विधावेववक्ष्यतइतिप्रतिज्ञायअष्टनआविभक्ताविति सूत्रेएकवचननिर्देशादुपसर्ज
नेप्यात्वम्।भविषयेआतोलोपः।प्रियाष्टःपश्येत्यादिवदन्पूर्वप्रतिज्ञातार्थविपरीतंभाष्यवृत्त्यादिविरुद्धंकथमभिहितवानितिसएवप्रष्टव्यः।हलादावे
वेति यद्यपिहलीत्यस्यापकर्षमकृत्वापिव्याख्यानंभाष्येप्रतीयते।तथापितस्यापरितोषग्रस्तत्वंप्रपञ्चितमन्यत्रेतिभावः।प्रियाष्टादितिप्रथमैक
वचनम्।उक्तंसंगृह्णाति।प्रियाष्टइति॥ नान्ताः॥ भुदिति।बुध्यतेः क्विप्॥ धान्ताः॥ ऋत्विग्दधृक्।किंचिदिति।ऋतावुपपदेयजेःक्विन्।ध
ष्णोतेर्द्विर्वचनमन्तोदात्तत्वंच।सृजेःकर्मणिक्विन्अमागमश्च।दिशेःकर्मणि।उत्पूर्वात्स्निहेःक्विन्उपसर्गान्तलोपःषत्वम्।अञ्चेःसुप्युपपदेक्विन्चेत्य
र्थः।युजेरिति।कुञ्चेरप्येवम्।नलोपाभावस्त्वधिकः।कनाविति ॥

तुअयंञोपधइतिलभ्यते।तत्रहिकुञ्चेत्यत्रकुत्वमाशङ्क्यकुञ्चामितिऋत्विगादिसूत्रस्थनिपातनात्सिद्धमित्युक्तम्।तस्यनकारजत्वेतुपरसवर्णासिद्धत्वात्कुत्वा
प्राप्तौभाष्यमसङ्गतिः।निर्देशेनचचयोगेकुत्वाभावोनिपात्यतेइतिकुङित्यादौकुत्वंभवत्येवतदानलोपस्यप्राप्तिरेवनेतितत्त्वम् ॥

उच्चारणार्थइति।मनुतदित्संज्ञाप्रयुक्तकार्यभागयमतोविशिष्यन्तस्यनोक्तासाउच्चारणेसहायसंस्पादनेनवर्णोच्चारणस्यचारितार्थ्येविधेयेतदपगममात्रफलिकानुसाऽस्येवेतिनतस्यलोपइतिसूत्रस्यभाष्यविरोधइतिबोध्यम्।कुत्वस्यासिद्धत्वादिति।चोःकुरितिकुत्वस्येत्यर्थः।इदंसर्वंन्यायसिद्धार्थकथनमात्रम्।परत्वादिति।हलङ्यादिलोपादित्यादिः।असंनिहितत्वादिति।स्कोर्ग्रहणसामर्थ्येनैकाचोबशइत्यतस्तदनुवृत्तेर्निष्ठादेशप्रकरणेनविच्छेदाच्च।एतेनात्रैवचोरितिवक्तव्यंतन्त्रे

इकारस्तूच्चारणार्थइतिभावः।सन्निहितेइति।यत्तुप्राञ्चस्तुतीयेधात्वधिकारेइति।तन्न।सन्निधौधातुग्रहणस्यउत्तरत्रानुवृत्तेरभावेनाधिकारत्वयाभावात्।युजेरसमासे।सर्वेति।यत्तुप्राचोक्तंसुटीति।तन्न।सर्वनामस्थानेइत्यस्यैवप्रकृतत्वात्।लक्षणायांबीजाभावात्।क्लीबेयुजीइतिद्विवचनेऽतिव्याप्तेश्च।यत्तुवदन्तिनपुंसकेशसियुञ्जी त्यत्रनुम्नस्यादिति।तन्न।नपुंसकस्यझलचइतिनुमःसम्भवात्।सुलोपइति।कुत्वस्यासिद्धत्वात्।परत्वादादौनुम्।ततोहलङ्यादिलोपइतिभावः।क्विन्प्रत्ययस्यकुः।पदान्तेइति।यत्तुप्राचोक्तंझलीति।तन्न।झलीत्यस्यासन्निहितत्वात्।निष्फलत्वाच्च।यत्तुतन्त्रेणव्याख्यातम्।झलोझलीत्यतोमण्डूकप्लुत्याझलीत्यस्मिन्ननुवर्तमानेपिनकश्चिद्दोषइति।तन्न।स्पष्टइत्यादावतिव्याप्तेः।खन्इति।खञ्जतीतिखन्।खञ्जिगतिवैकल्ये।परौव्रजेःदीर्घश्चेति।यत्तुप्राचाव्याख्यातंविण्।णित्वादुपधावृद्धिरिति।तन्न।पञ्चपाद्यांदशपाद्यांचानेनक्विप्दीर्घयोरेवविधानात्।स्कोः।संयोगेतिलुप्तषष्ठीकम्।झलन्ताभ्यांविशेष्यतेइतिव्याचष्टे।पदान्तइत्यादिना ॥ ७ ववाक्विन्प्रत्ययस्येतिवक्तव्यम्।एवंचकुग्रहणंव्यर्थमित्यपास्तम्।

चोरित्यत्रतत्संबन्धादत्रतदसंबन्धाच्च।निष्फलत्वाच्चेति।सिद्धान्तिसमतफलाभावादित्यर्थस्तध्वनयन्नाह।अतिव्याप्तेरिति।लुप्तषष्ठीकमिति।एतेनोपसर्जनस्यस्तविशेषणत्वात्समासानुपपत्तिरित्यपास्तम्।पदान्तेझलिचयोःस्कोःसंयोगादीतयोर्लोपइतिनसूत्रार्थः।संयोगादित्वस्यपदान्तत्वस्यचैकस्मिन्नसंभवात् ॥

तदपवादस्येति। सूत्रद्वयविहितण्विनपवादस्येत्यर्थः। तत्रमन्त्रेइतिसूत्रेउपपदानांधातूनांचपृथक्पाठेकर्तव्येसमुदायोच्चारणमलाक्षणिकानांनिपातनार्थंनत्रश्वेतशब्देकर्तृवाचिन्युपपदेवहेः कर्मणिप्रत्ययः। उक्थेकर्मणिकरणेवोपपदेशंसेः प्रत्ययोनलोपश्च। अस्यनलोपेपिनवृद्धिः। उक्थशास्शब्दस्यसामान्येनरुः सिद्धो नतस्यनिपातनंक्रियतेइतिभाष्येणतत्रतदभावस्यापिनिपातनात्। दाशृदानेइत्यस्मात्पुरः पूर्वकात्प्रत्ययः कर्मणिदाशृआदेर्डत्वंचेति। वहियज्योरिति।

भृज्जतीतिभृट्। क्विप्। सस्येति। जश्त्वस्यासिद्धत्वात्पूर्वंष्टुत्वमित्यर्थः। एतेनप्राचोपिविपरीतोक्तिः प्रत्युक्ता। ऊर्गिति। ऊर्जबलप्राणनयोः। अस्माच्चुरादिण्यन्तात् भ्राजभासेत्यादिनाक्विप्। णिलोपः। सचचोः कुत्वेनस्थानिवत्। पदान्तविधित्वात्। पूर्वत्रासिद्धत्वाच्च। इहजान्तेष्ववयाइतिनोदाहृतम्। मन्त्रेश्वेतवहोक्थेतिप्रकृत्यअवेयजइतिविहितस्यण्विनस्तदपवादस्यच नेह सम्प्रछान्दसत्वात्। यत्तुश्वेतवाडुक्थशास्पुरोडाशवयजांडक्षितिप्राचोक्तम्। तन्न। डसः प्रकृतभूतयोर्वहियज्योर्दीर्घाभावात्। यदपिअवयाइतिप्रतीकमुपादायण्विनितिप्राचाव्याख्यातम्। तन्न ॥

शंसेरप्युपलक्षणमिदम्। किंचोक्तभाष्यादुक्थशासित्युच्चारणमपिप्राचामसंगतम्। नचडत्वविधेयः अवयाः श्वेतवाः पुरोडाश्चेतिपदान्तविषयेरुत्वेरूपसिद्धेरितिवाच्यम्। वृद्धौअतः परत्वाभावेनोत्वानापत्तौश्वेतवोभ्यामित्याद्यसिद्ध्यापत्तेः ॥

अप्रवृत्तिरिति। ननुपदान्तविषयेवासरूपन्यायेनण्विनप्यस्तुनिपातनंचेदुभयोरतएवरु प्र करणेअवयाइतिसूत्रपाठः। अन्यथाडसन्तेससजुषोरु रितिरुत्वेसिद्धेदीर्घमात्रस्यनिपातनात्तत्प्रकरणेएवकृतंस्यादितिचेन्न। डसत्ववक्तव्यः किंप्रयोजनंर्वर्थम्। क्रियतेर्वर्थंनिपातनम्। अवयाः श्वेतवाइति। तन्नवक्तव्यम्। अवश्यंतदुक्तव्यंडसारंभेपिसंबुद्धौदीर्घार्थंतर्हिडसन्नवक्तव्यः। डसपिनवक्तव्यः श्वेतवोभ्यामित्यर्थमितिभाष्यविरोधात्। अन्यथाण्विन्पक्षेरुत्वार्थमपितस्यावश्यकत्वेनसंबुद्धौदीर्घार्थमितिभाष्यस्यनिर्दलतापत्तिः। तस्मादत्रवार्तिकनयेवासरूपाप्रवृत्तिः क्तादिष्विवव्यवस्थितविभाषयाङ्गीकार्या। रुप्रकरणेसूत्रंतुसूत्रकृताडसोऽकरणात्कृतंणिनन्तेरुत्वमात्रस्यैवतदिष्टत्वात्। श्वेतवोभ्यामितिप्रयोगंतुसूत्रकृन्नजानात्येवेतिस्पष्टंभाष्यविदाम्। केचित्तुण्विनआदे

अपवादस्यडसोविषयेउत्सर्गस्यण्विनोऽप्रवृत्तेः। तदोः सः सावनन्त्ययोः। अनन्त्ययोः किम्। हेस परत्वात्सदाद्यत्वं बाधित्वासत्वंस्यात्। ततोहल्ङ्यादिलोपेरुत्वविसर्गौस्याताम्। किंच त्रियांसेतिनस्यात्। वस्तुतस्तुअनन्त्यग्रहणंशक्यमकर्तुम्। नचोक्तदोषः ॥

णोडस्। श्वेतवहादीनांडस्पदस्येतिवार्तिकात्। एतत्संबन्धिनोण्विनः प्रत्ययस्यडस्तदन्तेपदत्वस्यभावित्वेइतितदर्थः। अतएववृत्तिकृताण्विनंप्रक्रम्यश्वेतवादयुदाहृतमेवंचवासरूपस्यात्रविषयएवनेत्याहुः। परत्वादिति। नित्यत्वंतुनात्वस्यशब्दान्तरस्यप्राप्तेः। सत्वंस्यादितिः उभयोरपीतिभावः। असोलोपणिकत्वेनालसन्तस्येत्यस्यनप्रवृत्तिः। नचप्रत्यय विशेषापेक्षसत्वापेक्षयान्तरङ्गत्वादत्वेरूपसिद्धेर्दव्यर्थेनादृशान्तरङ्गत्वस्यशास्त्रेनाश्रयणज्ञापनार्थत्वादतएवभाष्येईदृशमन्तरङ्गत्वंनक्वाप्याश्रितम् ॥

पुनः प्रसङ्गेति। कृताकृतप्रसङ्गित्वमात्रेण नित्यतायां सापि सुवचा। शब्दान्तरप्राप्त्या नित्यत्वमभ्युपेत्य प्रवृत्तं भाष्योक्तं समाधिमाह। सकृदिति। अनन्त्ययोरित्येतदेव सकृद्गतिन्यायज्ञापकमिति त्वदाशयः। न्याय्यत्वादिति। वस्तुत एषामनभिधानमेव। एतदाशङ्क्य यथालक्षणमप्रयुक्त इति भाष्योक्तेः। अस्यार्थश्चाष्टन्शब्दे उक्तः। द्विवचननोपपत्तये आह। पृथक्पदमिति। अत्र गौरवं मत्वा प्रकारान्तरमाह। प्रथमाशब्द इति। एवं च तस्यैकत्वान्ङे शब्देन समासे द्विवचनमिति भावः। तस्या

पुनः प्रसङ्गविज्ञानेत्यदाद्यत्वसम्भवात्। सकृद्गताविति पक्षेपि तदोः सः सावित्यस्यानन्तरमदस इति योगं विभज्यादस एव दस्य सत्वं नान्यस्य दस्येति व्याख्यातुं शक्यत्वात्। ननु यथान्यासे द्वीयतेः क्विपि स्व इति प्राप्नोति नियमे तु द्व इति स्यादिति चेन्नैवम्। गौणे अत्वसत्वयोरसम्भवेन द्वौरित्यस्यैव न्याय्यत्वात्। ङे प्रथमयोरम्। ङि इति पृथक्पदं लुप्तषष्ठीकम्। प्रथमाशब्दः प्रथमाद्वितीययोः समुदाये गौण इति व्याचष्टे ङि इत्यस्येत्यादिना। ङे सुटोरम् इति सुवचम्। अधिकरणत्वविवक्षयेति। यदि तु शेषे इति विभक्तिविशेषणं स्यात्तर्हि व्यर्थमेव तत्। आत्वयत्वाभ्यां विशेषविहिताभ्यां स्वविषये लोपस्य बाधसंभवात्। न चैवमन्त्यलोप इति पक्षस्य निरालम्बनत्वापत्तिः। साम आकमिति ससुट्कनिर्देशेन तस्यापि ज्ञापितत्वादिति भावः। युवं वस्त्राणीति। शेषे लोपः। यत्तु काशिकायामुक्तं पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि। यान्यद्विवचनान्यत्र शेषे लोपो विधीयत इति। तद्भाषापेक्षया। छन्दसि तु प्रथमाद्विवचनमपि शेषे लोपस्य विषय एवेति बोद्ध्यम् ॥

७ पीति। तस्यैवेत्यर्थः। अन्त्यलोपस्यैवेत्यर्थः। अनेनायमेव पक्षः सूत्रसंमत इति सूचितम्। किं च शेषस्य लोप इत्यर्थे फलाभावः। अन्त्यलोपे प्यस्य विभक्तिसन्निपातनिमित्तकत्वात्सन्निपातपरिभाषया बुद्धावित्यत्रेव टापो निवृत्तेः। शेषग्रहणं तु भाष्ये प्रत्याख्यातमेव। ससुट्कनिर्देशप्रत्याख्यानापेक्षया स्य प्रत्याख्यानमेव ज्यायः। त्यदादीनामः इति सूत्रभाष्योक्तोऽप्ययं पक्षस्तत्रैवाकरिरित्युक्त्या बोधिताः केचिद् इत्यन्यत्र निरूपितम् ॥

अन्यस्य । अङ्गवृत्तशास्त्रस्य। दीर्घोभविष्यतीति । जीनातीत्यादौमूलोक्तस्यदीर्घनिर्देशसामर्थ्यान्नह्रस्वइत्यस्याङ्गवृत्तपरिभाषाज्ञापनद्वारानह्रस्व
इत्यर्थइतिनतद्विरोधः । नन्वनेनदीर्घेपचामिभोइतिवद्जानाम्भोइत्यादावनन्त्यस्यापीतिप्लुतोनस्यात् । अतआदित्येवसिद्धेतत्रत्यदीर्घग्रहण
स्यप्लुतनिवर्तकत्वात्।।नचानन्त्यस्यपदस्यचटेरितितदर्थात्कथंपचामीत्यादौतस्याप्तिरितिवाच्यम्। दीर्घग्रहणसामर्थ्येनान्त्यविषयएवतत्संबन्धात् वाक्यस्टेःप्लुत
संबन्धत्यागेमानाभावात्।तेनवाक्यस्यानन्त्यस्यपदस्यप्लुतःस्यादन्त्यस्यपदस्यचटेरित्यर्थः तपरकरणेनतुनप्लुतस्यावृत्तिः। प्लुतस्यासिद्धत्वात्।अतएवगीःपूरित्यादौ
मपर्यन्तस्यकिमिति।अधिकारसूत्रंकिमर्थमितिप्रश्नः।अङ्गकार्येइति।एतेनाङ्गवृत्तेपुनर्वृत्तावविधिरितिपरिभाषाअर्थतउपनिबद्धा। अङ्गे अङ्गाधि
कारेवृत्तंवर्तनंयस्यतदङ्गवृत्तंशास्त्रम्।तस्मिन्कृतेसतिप्रवृत्ते सतिपुनरन्यस्यप्रवृत्तौप्राप्तायाम विधिरितिहितस्याअर्थः।एषाचपरिभाषाज्यादादीयसः
ज्ञाजनोर्जेतिसूत्रद्वयेपिज्ञापितेतिभाष्येस्थितम्।अन्यथाहिज्यादादितिआकारंनब्रूयात्।बहोर्लोपइत्यतोलोपमेवानुवर्तयेत्।अकृत्सार्वेतिदीर्घेसिद्धं
न्यायानिति।ज्ञाजनोर्ज्जंविदद्धात्।अतोदीर्घोयञीतिदीर्घोभविष्यतीति।नचैवंद्वाभ्यामित्यत्रत्यदाद्यत्वेकृतेसुपिचेतिदीर्घोनस्यादितिवाच्यम्।द्वयोरेक
नि स्येत्यादिनिर्देशेनउक्तपरिभाषायाअनित्यत्वज्ञापनात्।यत्तुकेचित्परिनिष्ठितस्येतिपठन्ति।द्वाभ्यामितितुदीर्घंविनानपरिनिष्ठितमितिचवदन्ति।तद्भाष्यविरुद्ध
म्।ज्यायान्।जानाति।जायतइत्येतेषामपिदीर्घंविनाऽपरिनिष्ठितत्वेनभाष्योक्तज्ञापनस्यापिशिथिलमूलत्वापत्तेः।यदितुभ्यसोऽभ्यमितिसूत्रेभाष्येपिप
रिनिष्ठितस्येत्येवपाठस्तर्हिवाचनिकतामेवाश्रित्यपक्षान्तरपरतयायोज्यः ॥

दीर्घः।अन्यथातस्यापीदुदितिनपरत्वसामर्थ्यादप्रवृत्त्यापत्तिः दीर्घग्रहणेतुतत्सामर्थ्यादसिद्धत्वस्यापिबाधः।आकारान्तरप्रश्लेषेणवारणंतुक्लिष्टमस्तुवातदुपाया
न्तरमितिचेन्न।उक्तज्ञापकपरभाष्यप्रामाण्यात्प्लुतस्यतत्रानिष्टत्वेवैकल्पिकत्वेनेदृशेविषयेप्लुताप्रवृत्तेः।अतोदीर्घइत्यत्रदीर्घग्रहणंहलिलोपइतिसूत्रेहल्यशिति
वक्तव्येलोपग्रहणवत्तस्येननार्थसाधकमितिदिक्। निर्देशेनेति।अन्यथात्यदाद्यत्वेएत्वंनस्यादितिभावः ॥

वाचनिकत्वेगौरवंज्ञापकद्वयशैथिल्यंचापरिहृतमित्यतआह।अनित्यत्वबलेति।अनुवृत्त्यर्थमिति।स्पष्टमेतद्भाष्येनैव।अभ्यमितिच्छेदस्यैवमुख्यत्वंध्वनयन्नाशङ्कते।नचेति।अतएवयुष्मदस्मदोरितिसूत्रेनचादेशोहलादिरस्तीतिभाष्यंसंगच्छते।एत्वनिरस्येति।अङ्गवृत्तपरिभाषायाअनित्यत्वबोधनद्वारेतिभावः।एवंच

अनित्यत्वबलफलितार्थकथनंतत्तुज्ञाप्यांशप्रविष्टमितिवास्तु।एवंतुकाशिकादिग्रन्थोपिकथंचिन्नेतुंशक्यइतिदिक्।मकारान्तरमित्युपलक्षणम्।जसःशीत्यत्रजसःसइतिसकारंप्रश्लिष्यसान्तस्यजसइतिव्याख्यानादतोमितिसूत्रादम् ग्रहणमनुवर्त्यअम्अमेवेतिव्याख्यानादितिबोध्यम्।अविभक्तिकमिति।तथाचङेप्रथमयोरितिपूर्वसूत्रेणप्राप्तस्यामःप्रतिषेधोयमितिभाष्येशङ्कितम्।नचतथैवकिंनस्यादितिवाच्यम्।स्त्रीनपुंसकयोर्नत्वाप्राप्तेर्युष्मान्ब्राह्मणीःकुलानिवा।अलिङ्गत्वेयुष्मान्ब्राह्मणानित्यादेरसिद्धत्वप्रसङ्गाच्च।योचि।अचिकिम्।युवाभ्याम्।यदितुयुष्मदस्मदोरनादेशइत्यत्रायेहलीत्यतोहलीत्यनुवर्ततेतदाद्वाचीतिमास्तुपरिशेषादेवसिद्धेः।युष्मदस्मदोः।हलादाविति।योचीत्यज्ग्रहणात्परिशेषात्सिद्धमिदम्।रायोहलीत्यतोनुवृत्यालब्धंया।नन्वेवंकिमनादेशग्रहणेननत्वादेशोहलादिरस्ति।मैवम्।भ्यमःसत्त्वात्।अभ्यम्पक्षेतुयोचीत्यत्रानुवृत्त्यर्थमनादेशग्रहणंबोध्यम्।पक्षद्वयेपीति।नचान्तलोपपक्षेपररूपंबाधित्वासवर्णदीर्घःस्यादकारोच्चारणसामर्थ्यादितिवाच्यम्।एत्वनिवृत्त्याकारोच्चारणस्यचरितार्थत्वात्।युष्मदस्मद्भ्यांङसोश्।शित्त्वंसर्वादेशार्थम्।अन्यथाह्यादेःपरस्येतिस्यात्।नचवैयर्थ्यम् ॥

पररूपेणबाधान्नसवर्णदीर्घइतितात्पर्यम्।वैयर्थ्यमिति।अकारस्याकारविधिवैयर्थ्येनान्त्यस्यैवाकारेऽतोगुणेचसिद्धंतवेत्यादीतिव्यर्थमेवशित्त्वमित्यर्थः।नचपररूपबाधनार्थमेवादेरत्वविधानंस्यादितिवाच्यम्।विधिबाधापेक्षयादेःपरस्येतिपरिभाषाबाधस्यन्याय्यत्वात् ॥

आदेशेनि।आदेर्विधानेप्यादेशत्वसंपादनेनयत्वनिरासाशेषेलोपार्थंचाकारविधानंचरितार्थमित्यादेःपरस्येयस्यबाधेमानाभावेनसर्वादेशार्थंशित्त्वमितिभावः।नचयोच्यङ·सीत्युक्त्यैवयत्वनिरासशेषलोपौसिद्धावितिवाच्यम्।पर्युदासेएकवचनत्वादिनासादृश्यग्रहणापत्तेःयुष्मदस्मदोरित्यात्वस्यप्राप्तेश्च।हलादाविर्तेहिपरिशेषसिद्धोऽर्थस्तत्रेतिभावः।अनादेशतास्त्येवेति।अनादेशादितिहितत्पुरुषेलाघवात्।एवंचत्वमहसित्यादौसंपूर्णविभक्त्यादेशेयत्वाभावसंपादकमनादेशादितिप्रकृतेयत्वंस्यादेव।नन्वेवमादेरकारस्यविधानंव्यर्थमितिसामर्थ्यादन्यस्यस्यात्तन्नचातोगुणइतिपररूपेआदेशरूपविभक्तित्वमितियत्वाप्राप्तिः।नचवार्णादाङ्गःमितिपरिभाषया।पररूपात्पूर्वंयत्वप्राप्तिरितिवाच्यम्।वार्णाङ्ग·योरेकस्थानिकत्वेएवधर्मिग्राहकमानेनतत्प्राप्तेरितिचेन्न।युष्मद

आदेशव्यपदेशेनयत्वनिवृत्त्यर्थत्वात्।नचावयवस्यादेशेसत्यपिविभक्तेरनादेशतास्त्येवेतिवाच्यम्।सर्वेसर्वपदादेशादितिसिद्धान्तात्।इदमेवशिलिंज्ञापयतिसर्वेसर्वपदादेशादिति।अर्थवत्येवस्थान्यादेशभावविश्रान्तिरित्यर्थः।सिच्चङादयस्तुवचनसामर्थ्यादनर्थकस्यापिबोध्याः।इदंत्ववधेयम्।अन्त्यलोपपक्षेअशःस्यादेशःप्राप्तः।अङ्ग·वृत्तपरिभाषयावारणीयः ॥

स्मदोरनादेशइत्यत्रप्रत्यासत्त्यायुष्मदादिग्रहणेनविहितादेशरूपविभक्तेरेवग्रहणेनान्यादेशेपररूपेपितादृशविभक्तेरभावेनयत्वापत्तेर्दुर्वारत्वात्पररूपादेशस्तुनतथेतिभावः।सर्वेसर्वेति।स्पष्टंचेदंभाष्ये।एवंचाकारविधानेपियत्वव्यावृत्त्यातस्यचारितार्थ्येनादेःपरस्येत्येतद्बाधेमानाभावेनसर्वादेशार्थंशित्त्वंसार्थकमितिभावः।अत्रपदशब्देनार्थवद्गृह्यतइत्याह।अर्थवत्येवेति।अर्थवत्त्वंचकल्पितमेवगृह्यते।एतेनकृत्वादित्यस्यकृयइत्यादेशेप्रकृतिप्रत्ययसंमोहेह्रस्वस्येतितुगस्यादित्यपास्तम्।सिजादीनांकल्पितोप्यर्थोनास्तीत्यतआह।सिच्चङादयइति।पोत्यार्थेनसोप्यर्थवानित्यन्ये ॥

दुराग्रह इति। ज्यादादीयस इत्यस्य ज्ञापकत्वपरभाष्यविरोधादस्य दुराग्रहत्वम्। अकारान्तत्वात्प्राप्त इति। ससुड्निर्देशाभाव इति शेषः। निर्देशसामर्थ्यादिति। अयंभावः सामः प्रसङ्गे आकमिति सूत्रार्थस्तेन आम्सकारयोरत्र विषये ऽत्यन्तमप्रयोगो बोध्यते स्थान्यादेशभावविषये सर्वत्रैवमेव। यथार्धधातुकविषये स्तेरप्रयोगो भुवः प्रयोगश्चा ऽस्तेरित्यनेन प्रतिपाद्यते न तु सतो निवृत्तिः। शब्दानित्यत्वप्रसङ्गात्। किंतु प्रसक्तबुद्धेरेव निवृत्तिः। तत्र सकारबुद्धेः प्रकृते सांप्रतिक्या असंभ

यदित्वङ्गस्य यत्कार्यं तद्विषयिण्येव सा परिभाषा न त्वङ्गाधिकारमात्रपरेति दुराग्रह, स्तर्हि अश्विस्यत्रातो गुण इति पररूपेणाकारान्तं प्रश्लिष्याकाररूप एव अश् भवति न विधीयते इति व्याख्येयम्। यत्तु स्यादेशस्यापवादो ऽशिति तत्र अशादेशप्रवृत्तिकाले शेषे लोपाभावेन स्यादेशस्याप्रसक्तेः। भाविनइति। कृते हि शेषे लोपे ऽकारान्तत्वात्प्राप्तः सुट् ससुड् स्यस्य स्थानित्वेन निर्देशसामर्थ्यान्निवर्तत इति भावः। शेषे लोपष्टिलोप इति पक्षे तु सुड्ग्रहणं व्यर्थमेव। आकमिदीर्घोच्चारणं सवर्णदीर्घार्थम्। अन्यथा पररूपं स्यात्। न चाकारोच्चारणसामर्थ्यम्। एत्वनिवृत्त्या ऽभ्यम इव चरितार्थत्वात्। इह युवावौ द्विवचने त्वमावेकवचन इति सूत्रद्वये द्विवचनैकवचनशब्दौ न प्रत्ययपरौ किं त्वर्थपराविति व्याख्यातम् ॥

७ वा द्वाविन्याग्रहणं सकारोच्चारणसामर्थ्यादिति भाष्ये स्पष्टम्। तन्निवृत्तिश्चामो ऽभावात्। अत्र सामः स्थानित्वोक्त्या ऽऽकमि स्थानिवत्त्वेन साम्त्वमेव न त्वाम्त्वम् अत एवातित्वाकमित्यादौ प्रत्ययोत्तरपदयोरिति सूत्रभाष्योदाहृते आकम्नुडभावौ सिद्धौ। आम्येव साम्त्वस्याहार्यारोपेणादेशः। आदेशस्याम्त्वाभावाच्चात्र न नुट्। न च यत्र भावी सुट् तत्रैवायम्। सामो भावित्वस्य सर्वथा दुरुपपादत्वादिति भाष्यविरुद्धकल्पना व्यर्थेति दिक्। किं त्वर्थपराविति। व्याख्यानमत्र शरणं द्वयोरेकस्य वचने बोधने समर्थयोर्युष्मदस्मदोरिति वाच्योर्थः ॥

भूतपूर्वेति। जहत्स्वार्थावृत्तिरित्यभिमानेनेदम्। सामर्थ्यादेवतद्बाधादिति। उभयगतिरिहशास्त्रेभवतीतिसंख्यासञ्ज्ञासूत्रस्यभाष्योक्तेश्चेतितत्त्वम्। अन्यथाद्वयो
रेकस्मिन्नित्युक्त्यैवयुष्मदादिविशेषणतयासिद्धेवचनग्रहणसार्थक्यंदुरुपपादमितिबोध्यम्। बाधादिति। आकमुत्पत्तिकालेन्त्यलोपाभावेनसुटः सत्त्वादिति

तत्फलंदर्शयति। समस्यमानेइत्यादिना। द्व्येकत्वेति। पञ्चकंप्रातिपदिकार्थइतिपक्षेसंख्याया अपिप्रातिपदिकार्थत्वादितिभावः। त्रिकपक्षेतुद्व्येका
र्थवाचिनीइतिपाठ्यम्। संख्यायाविभक्त्यर्थत्वेपिसंख्येयस्यप्राप्तिपदिकार्थत्वादितिभावः। समासार्थोमुख्यविशेष्यम्। अन्यसंख्यश्चेत्। युष्मदस्म
दर्थगतसंख्येतरसंख्यश्चेदित्यर्थः। स्त्वइति। अर्थपरत्वाश्रयणसामर्थ्यादेवभूतपूर्वगतेरपिस्वीकारात्। प्रत्ययपरत्वेतुनस्यातामि—त्यव्याप्तिः स्यादि
त्यर्थः। एवंचतुर्थश्लोकेपि युवावौत्वमौनचेत्युक्त्याप्रत्ययपरत्वेऽतिव्याप्तिर्ध्वनिता। एवञ्चाव्याप्त्यतिव्याप्तिपरिहारायार्थपरत्वमाश्रितमितिफलितम्। न
चकृत्रिमाकृत्रिमन्यायविरोधः। वचनग्रहणसामर्थ्यादेवतद्बाधात्। अन्यथाहिद्वित्वेएकत्वेइत्येवब्रूयात्। द्वित्वेएकत्वेचयाविभक्तिस्तस्यामितिव्याख्या
नसंभवादितिभावः। अतित्वाकमतिमाकमिति। यत्तुवदन्तिसामआकमित्यत्रयद्यपिसुट्ग्रहणंनस्थानिविशेषणंबाधात्। तथापिउपलक्षणंभव
ति। तेनयस्यामः सुडग्रेभावीतस्यैवआमआकमाभवितव्यम्। नचैतत्गौणेसंभवतीत्याकम् नप्रवर्त्तते। नचसमुदायनिर्देशेविशेषणत्वमुपलक्षण
त्वंवाविहायतृतीयः प्रकारोस्ति। नचसुडामोः पृथक्स्थानित्वमिहनिर्दिश्यते। चशब्दस्यद्विवचनस्यचअभावात्। यदितुसुट्चआम्चेतिसमाहार
द्वन्द्वोव्याख्यायेत.

भावः। नचैतद्गौणत्वेइति। सर्वनामत्वाभावादितिभावः ॥

योग्यताबलाच्चेति।आम्समभिव्याहारेयुष्मदस्मद्ध्यान्तस्यैवसंभवादितिभावः।साहित्याभ्युपगमादिति।समूहाभ्युपगमादित्यर्थः।कृत्विति।तेभ्योलिटइण्निषेधादितिभावः।उभयत्रतुल्येति।एवंचपूर्वमामआकमिततःसुटितद्विशिष्टस्यपुनराकम्मुख्येगौणत्वेत्वामएव।सूत्रेसकारग्रहणंतुसुड्विशिष्टपरमि

योग्यताबलाच्चसशब्देनसुडेवगृह्येत।तथापियदिसुट्ग्रहणमन्वाचयशिष्टंसतःसमासोनस्यात्।अन्यत्रतुसाहित्यविवक्षयाकेवलस्यामोऽप्रसक्तेरिति॥अत्रेदंवक्तव्यम्॥यस्यामःसुडग्रेभावीसादितावद्बाधितम्।आकमोऽपहृतस्यसुडन्वयाभावात्।आकमःसुड्भावीतिचेत्तर्हितमेवोपलक्षयेत्।आदेशद्वारकेणपरम्परासंबन्धेनस्थानिनमुपलक्षयतीतिचेत्।हन्तैवंयुष्माकमित्यादौसुट्श्रूयेत।सामइतिनिर्देशसामर्थ्यान्नश्रूयतइतिचेन्न।निर्देशस्यगौणव्याख्याचरितार्थत्वेनसामर्थ्याभावात्।यदपिसमाहारद्वन्द्वप्रक्रम्यान्वाचयशिष्टत्वेदूषणाभिधानम्।तदप्यसम्भवदुक्तिकम्।साहित्यविवक्षयाकेवलस्याप्रसक्तिरितिपरमवशिष्यते।तदपिन।प्रक्रियादशायांस्थितस्यामउत्तरकालभाविनोत्प्रेक्षितस्यसुटश्चैकबुद्ध्यारोहेणैवसाहित्याभ्युपगमात्।अतीतानागतयोरयंद्रष्टेतिवत्।तत्रोभयोरेकस्मिन्दर्शनेसंबन्धइतिचेदिहाप्येकस्मिन्नादेशइतितुल्यम्।तथाचइरयोरितिसूत्रेदध्रेइत्यादौधाञोझस्यइरेचिआतोलोपेरेभावेतस्यकृसृभृप्रभृतिषुचरितार्थतयाइटिकृतेइरयोरितिद्विवचननिर्देशाल्लाक्षणिकस्यापिरेभावःपुनःक्रियतइतिस्थितमाकरे।इरयोरित्येकशेषःसामइतितुद्वन्द्वः।सहविवक्षातूभयत्रतुल्यैव ॥

तिभावः।एवंपरोक्तसमाहारद्वन्द्वेऽपिगौणेआकममुपपाद्यसत्पदस्यसुड्विशिष्टलक्षणामसहमानैस्तदीयैरन्यैरुक्तंप्रकारान्तरमपिस्वरूपव्याक्रियैवपराक्रियेतेतिन्यायेनदुष्टमितिबोधयन्ननुवदति।वस्तुतइत्यादिना ॥

य

फलैक्यमिति।तत्पक्षेपिप्रथमप्रवृत्तस्यैवपर्यवसानादितिभावः।सिद्धान्तीयस्यैवंत्वदीयैरुक्तमितिशेषः।एतेनसाम्मदस्यास्पदेननतन्त्रमसारूप्यात्सारूप्यस्यैव
तद्बीजतयाहर्यादिभिरुक्तेः।पूर्वंतन्त्रंकत्वाततःसुपदेनसमासेउभयोरपितत्संबन्धबोधापत्तिः।किंचैवमपिगौणेनुड्वारयितुमशक्यः।नचामासहितस्यामश्चा
कमित्यर्थः।गौणेनुटितत्सहितस्याप्याकमितिवाच्यम्।प्रथमप्रवृत्तस्यैवेत्यादेरसंङ्गत्यापत्तेस्तत्रएवमर्थस्यनिरूपयितुमशक्यत्वाच्चेतिवस्तुतस्त्वित्याद्युक्तिरसङ्ग
तेत्यपास्तम्।अस्यापिग्रन्थस्यपरमतानुवादत्वेनदुष्टत्वेप्यदोषात्।तदनुवदत्फलंचतेषांपरस्परविरोधप्रदर्शनंतदेतत्सकलंध्वनयन्परमतदूषणमुपसंहर
ति।सर्वथेति।अत्रनुटोनिवृत्तिस्तुपूर्वमुपपादितेतिदिक्।ननुपदस्येत्यधिकारेपियुष्मदादिरूपपदस्यविभक्त्याविशिष्टस्यापिभ्यामादौसंभवाद्विशिष्टयोरित्य

वस्तुतस्तु।सामआकमितिसूत्रेकेवलोप्याम्तन्त्रेणनिर्दिष्टः।तस्याकमितिस्थानिवद्भावेनाम्त्वात्ससुट्कत्वाच्चसामइतिप्रवर्तते।गौणत्वेतुप्रथ
मप्रवृत्तस्यैवपर्यवसानम्।अतएवशेषेलोपष्टिलोपइतिपक्षेणसहफलैक्यमपिसिद्ध्यति।सर्वथापिअतित्वयामतिमयामितिकैश्चिदुत्प्रेक्षितंसमर्थ
यितुंनाभिनिवेष्टव्यम्।अतित्वाकमतिमाकमित्यादेर्भाष्यकृतैवोदाहृतत्वादितिदिक्।षष्ठ्यादिविशिष्टयोरिति।एतच्चसर्वस्यपदस्येत्यधिकाराल्लभ्यते।

र्थालाभः।षष्ठीद्वितीययोरसंभवेनपदावयवयोरित्यर्थलाभेपित्वदुक्तार्थेनमानम्।नचपदावयवत्वस्याव्यभिचारित्वेनतदनुवृत्तिसामर्थ्यात्तदर्थलाभः।तदनु
वृत्तेस्तत्रानावश्यकत्वेनसामर्थ्यायोगादतआह।सर्वस्येति।तत्सामर्थ्याद्युष्मदाद्यवयवकस्यसर्वस्यपदस्येत्यर्थइतिभावः।अतएवयुवाभ्यामित्यादौप्रकृतिभाग
स्यन।असहायेएवव्यपदेशिवद्भावप्रवृत्त्यायुष्मदाद्यवयवकत्वाभावाच्च।एकाज्द्विर्वचनन्यायेनसमुदायेएवतत्प्रवृत्तेश्च।अतित्वेत्यादीनांतुनतेद्वत्याद्यादेशाः
षष्ठ्यादेःप्रकृत्याकाङ्क्षायांप्रत्यासत्त्याश्रूयमाणयुष्मदादिप्रकृतिकस्यैवग्रहणेनादोषात् ॥

तेनैवकारणेनेति।श्लोकस्थंतेनेतिभक्तत्वेहेतुकथनमितितद्भावः।विधिरिति।सचाज्ञातज्ञापनरूपोत्रनतुप्रवर्तनारूपः।दिगिति।तदर्थस्तुभक्तत्वेहेत्वाकाङ्क्षायाअभा
स्यग्रहणेतुविभक्तौश्रूयमाणायामेवयथास्यान्नतुलुप्तायामित्येतदर्थमितिवक्ष्यति।वेदैरघोषैरिति।युष्मान्रक्षतुगोविन्दोस्मान्कृष्णःसर्वदावतुइतितुप्रा
चःपूर्वस्यक्तोःस्मान्नित्यस्यसमानवाक्यस्थत्वाभावादेवाप्राप्तेः।स्थग्रहणादिति।तिष्ठतिरहानौवर्तते।यथासमयेतिष्ठसुग्रीवेतिसमयमाजहासी
तिगम्यते।तेनषष्ठ्यादीनजहतोरेवादेशाइत्यर्थः।युष्मत्पुत्रइति।युवयोर्युष्माकंवापुत्रइतिविग्रहः।पदात्परत्वंसंपादयितुमितिशब्दः।प्राचातुनासौ
प्रयुक्तःस्तत्रपदात्परत्वाभावादेवादेशोनभविष्यतीतिकिंस्थग्रहणेन।नन्ववाचादिति।पञ्चकेति।पञ्चानांमध्येऽन्यतमेनयोगइत्यर्थः।युक्तइति।नपुंसकेभावे
क्तः।पश्यार्थैः।अतएवनिपातनाद्भावेशः।दर्शनंपश्यः।तच्चेहज्ञानमात्रम्।अदर्शनंलोपइत्यत्रयथा।नतुचाक्षुषज्ञानमेव।अनालोचनइतिनिषेधात्।तदेतदाह।
अचाक्षुषज्ञानार्थैरिति।भक्तइत्यादि।अत्रव्याचख्युः।येनहरेस्त्वंभक्तस्तेनैवकारणेनाहमपिभक्तइतियोज्यम्।यदितुतेनेत्यनेनभक्तत्वंत्राणेहेतुर्निदिश्यते।
ततःसापेक्षविधानेऽलमेवतदिममितिवदन्वादेशोनस्यादिति।अत्रेदंवक्तव्यम्।सापेक्षत्वविधानेऽन्वादेशत्वंनास्तीतितावदसंगतम्।आदेशोहिविधिःकिंचि
द्विधायपश्चादितरविधिस्त्वन्वादेशोनतुनिरपेक्षत्वगर्भोऽशब्दार्थत्वात्।शास्त्रेतथाऽपरिभाषितत्वाच्च।नचप्रयोगदर्शनादेवतथाकल्प्यतइतिवाच्यम्।वन्य
द्विपेनोन्मथितातगस्य।अथैनमद्रेस्तनयाशुशोचेत्यादौसापेक्षत्वेपिएनादेशदर्शनात्।तत्रहेतुत्वंनशब्देनोपात्तमितिचेन्न।तदेनमुल्लङ्घितशासनंविधेर्विधे
द्विक्रीनाशनिकेतनातिथिमित्यादिमाघप्रयोगविरोधात्।नक्तंभीरुरयमितितुनायंविधिःकिंत्वनुवादः।अतस्तदिममितिनविरुध्यते।एवंस्थितेऽप्येनत्वंभक्त
ः इतियत्शब्दाध्याहारक्लेशोव्यर्थःकिंतुतेनत्रायतइत्येवसंबन्धः।प्रक्रान्तार्थत्वाच्चनयच्छब्दापेक्षेतिदिक् ॥
वः।त्राणेआकाङ्क्षितहेत्वर्थकस्याध्याहारेसापेक्षत्वंतवापिदुर्निवारंचशब्दमर्यादयातेनेत्यस्यत्राणेएवान्वयप्रतीतेःशाब्दमर्यादात्यागश्चेति ॥

म·श· नचेति।अयमतइत्यनेनहरिस्त्वामित्यनेनशब्दोन्वयः समामित्यत्राध्याहारः।वैपरीत्यंतुनाध्याहारस्यानुपपत्तिमूलकत्वेनोत्तरत्रैवयुक्तत्वात्।किंचाध्याहृतस्यागन्तूनामन्तेनि
१०५ वेशइतिन्यायेनान्तएवनिवेशेनसमामित्यस्यतदर्थकत्वमित्यस्यैवाध्याहारपदार्थत्वेनचसइत्यस्यविद्यमानपूर्वकत्वाभावः।श्रूयमाणंतुनसमानवाक्यस्थमितिभावः।अनुष

अत्रतेनेतिपूर्वंविद्यमानंत्वंतोहरिरितिप्रथमान्तंततःपरस्यादेशः।तथात्रापितइत्यस्मात्परंसइतिप्रथमान्तम्।नचअयमतइतिभिन्नवाक्यस्थमितिभ्रमितव्यम्।सह
रिस्त्वांसांत्रायतइतितन्त्रेणानेककारकसंबन्धात्।अनुषङ्गाभ्युपगमेप्येकतिङ्वाक्यमितिपरिभाषितैकवाक्यत्वानपायाच्च।सामन्त्रितम्
सञ्ज्ञाविधावपिमहासञ्ज्ञाकरणसामर्थ्यात्तदन्तग्रहणम्।आमन्त्रणमामन्त्रितमुपचारात्तत्साधनेवृत्तिः।विभक्त्यन्तेनचामन्त्र्यतेनेनतुकेवलयाविभक्त्येत्याश
येनाह।तदन्तमिति।आमन्त्रितंपूर्वमविद्यमानवत्।यत्तुप्राचोक्तंविशेष्यपूर्वसंबोधनेतरपूर्वंचसंबोधनंहित्वान्यस्मात्संबोधनात्परयोर्नैतेआदेशाइतिकेचिदिति।
तत्रकेचिदित्यनुचितम्।उक्तार्थस्यप्रकृतद्विसूत्रीसिद्धत्वात्।यच्चव्याचख्युः।त्रिसूत्र्यामयमर्थइतितन्न।तृतीयसूत्रार्थस्यतेनासंस्पर्शात्।पादःपत्।तदवयवस्येति।
निर्दिश्यमानस्यादेशाइतिपरिभाषयेदंलभ्यते॥दान्ताः॥अग्निमन्थतीति।मथ्नातेर्मन्यतेश्चक्विप्येतदेवरूपम्।इदितस्तुनलोपाभावात्।अग्निमन्।अग्निमन्थौ।अग्नि
मन्थः॥थान्ताः॥ङकारइति।आन्तरतम्यादितिभावः।ह्रस्वव्यञ्जनयोरिति।व्यञ्जनस्यहिह्रस्वईषत्सदृशोदीर्घस्तुविसदृशइतिभावः।उक्तंचेति।वार्तिककृतेतिशेषः।केचि
त्तुपूर्वस्यैवमुत्वादमुद्र्यङित्युदाहरन्ति।तद्भाष्यादौनोक्तमित्युपेक्षितम्।उदईत्।अचइत्यस्यापवादः।चान्ताः ॥ ७ ङ्केति।अनुषङ्गोहितत्सजातीयशब्दान्तरकल्प
नाउपात्तस्यैवतदर्थकत्वंवा।तत्रोपात्तस्यान्वयाभावेनसमानवाक्यत्वंदुरुपपादमितिभावः।एकतिङिति।एकशब्दोहितत्रसमानवाचीतिभावः।केचित्तुपूर्वस्यैवेति।अदसो राम:
द्रेःपृथङ्मुत्वमितिपृथग्वाक्यम्।तेनकदाचित्पूर्वस्येतितदाशयः।उपेक्षितमिति।केचिदन्त्यसदेशस्येत्यस्यवैयर्थ्यापत्तेश्चेत्यपिबोध्यम् ॥ १०५

विभज्यते इति।तत्रचासन्तस्येत्येकदेशेस्वरितत्वप्रतिज्ञानात्तावतएवतत्रसंबन्धइतिभावः।अतइतिवालुप्तषष्ठीकंपृथक्पदम्।कैयटेति।उगिदचामितिसूत्रेहितेनेदमुक्तम्।इत्यनुवृत्त्यैवेति।अनुवृत्तंचपूर्वोभ्यासइत्यादाविवात्रवाच्यमितिभावः।समुदायेति।गर्गाःशतंदण्ड्यन्तामित्यत्रेवेतिभावः।अन्यथाब्राह्मणभोजनन्यायेनप्रत्येकंसञ्ज्ञास्यादितिभावः।अन्यथा।प्रत्येकंसञ्ज्ञायाम्।अभ्यस्तानामिति।अनिटिअजादौलसार्वधातुकेभ्यस्तानामादिरुदात्तइतितदर्थः।इतिआदिरिति।आदिशब्दःपूर्ववर्तिवाची।भाष्ये

भत्वसन्तस्यचाधातोः।इहाधातोरितियोगोविभज्यतेतत्सामर्थ्यादनन्तरस्यासन्तस्यैवप्रतिषेधः।नात्वन्तस्येतिकैयटहरदत्तादयः।तदेतद्दर्शयति।धातुभिन्नासन्तस्येति।उभेअभ्यस्तम्।द्वेइत्यनुवृत्त्यैवसिद्धेउभेग्रहणंसमुदायप्रतिपत्त्यर्थमितिव्याचष्टे।उभेसमुदितेइति।अन्यथाहिनेनिजतीत्यत्राभ्यस्तानामादिरित्याद्युदात्तत्वंप्रत्येकंपर्यायेणस्यात्।जक्षित्यादयःषट्।जक्षइतिपृथक्पदम्।इतिशब्देनजक्षितिरेवपरामृश्यतेइतिआदिर्येषामित्यसद्गुणसंविज्ञानोबहुव्रीहिस्तदेतदाह।षट्धातवोन्येइति।तान्ताः॥ गोपायतीतिगुपूकिपिविवक्षितेआयादयआर्द्धधातुकेवेत्यायाभावः॥पान्ताः॥त्यदादिषु।अनालोचनेकिम्।तंपश्यन्तीतितदर्थः।कर्मण्यण्।तादृशादयस्तुरूढिशब्दत्वादसत्तापिअवयवार्थेनव्युत्पाद्यन्ते।अतएवअज्ञानार्थाद्दृशेरितिसंगच्छते।भाष्येतुकर्मकर्त्तरिव्युत्पत्तिर्दर्शिता।तमिवेमंपश्यन्तिजनाःसइवायंपश्यतिज्ञानविषयोभवतीत्यर्थात्तत्रविषयत्वापत्तिमात्रवृत्तित्वेपिविषयीकरणावृत्तित्वादज्ञानार्थादितिसंगच्छते।नशेर्वा।अत्रझल्यपीत्यपाणिनीयम्।नष्टमित्यादावतिप्रसक्तंच।नगिति।षडुगकाः प्राग्वत्।शान्ताः ॥

२ तुकर्मकर्तरिव्युत्पत्तिर्दर्शितेतितमिवेमंपश्यन्तिजनाःसोयंसइवदृश्यमानस्तमिवात्मानंपश्यतीतिभाष्येउक्तंतत्राद्यारोपितप्रेषणपक्षेकर्मकर्तृत्वम्।पश्यतीत्यस्यचदर्शयतीत्यर्थइतिस्पष्टमेवतत्राधिकार्थत्वादज्ञातार्थत्वबोध्यम्।निवृत्तप्रेषणकर्मकर्त्तर्यपिसौकर्यायव्युत्पत्तिंदर्शयति।तमिवेममित्यादि।अत्रपक्षेकर्मणीत्यधिकारबाधःसामर्थ्यादितिबोध्यम्।

पूर्वस्य। विसर्गस्थानिकसस्य। अस्मिन्। संयोगान्तलोपे। पूर्वंपूर्वमन्तरङ्गमित्याश्रित्येति भावः। पदसंज्ञासापेक्षत्वेनेति। बहिर्भूतसुब्निमित्तकेत्यादिः तदपेक्षया बहूपेक्षत्वरूपंबहिरङ्गत्वंप्रबलमितिभावः। प्रागुक्तमिति। पूर्वंपूर्वमन्तरङ्गमित्याश्रित्याल्लोपासिद्धत्वेनेत्यादिः। अतिदेशेनेति। विभक्त्याश्रयस्यैकदेशविकृतन्यायेन लभ्यस्येत्यर्थः।

नुम्विसर्जनीयशर्व्यवायेपि। इत्वेनेति। सनः सस्य रुत्वविसर्गयोः कृतयोर्वा शरीति विकल्पात्पक्षे सकारः । तेन शराव्यवाये सुपः सस्य षत्वं पूर्वस्य इत्वं न त्वादेशप्रत्यययोरिति षः। अपादान्तस्येति निषेधादिति भावः। एवं स्थिते सकारग्रहणेन सिद्धे शर्ग्रहणस्य प्रयोजनं चिन्त्यम्। व्याख्यानादिति। असम्भवादिति हरदत्तोक्तिर्नादर्त्तव्या। सुहिन्सु इत्यत्र सम्भवादिति भावः। संयोगान्तेति। न चास्मिन्कर्त्तव्ये बहिरङ्गत्वेनातो लोपस्यासिद्धत्वं शङ्क्यम्। पदसञ्ज्ञासापेक्षत्वेन संयोगान्तलोपस्यैव बहिरङ्गत्वात्। कथं तर्हि काव्यकलत्रंश्याल्वं वा वक्ष्यमाणे संयोगान्तलोपो नेति प्रागुक्तमिति चेन्न। तत्र यणः प्रतिषेधो न वा झलो लोपादिति पक्षद्वयेपि लोपाभावेनिर्णीते तदैकरूप्याय पूर्वंपूर्वमन्तरङ्गमिति ग्रहीतुं युक्तम्। अतिदेशेन लभ्यस्य पदत्वस्य तत्प्रयुक्तलोपस्य च लक्ष्यपूर्वभागे विश्रान्तेः स्पष्टत्वात्। इह तु आद्यपक्षद्वये संयोगान्तलोपस्य स्पष्टतया तदैकरूप्याय बहिर्भूतनिमित्तापेक्षं बहिरङ्गमित्यस्यैव न्याय्यत्वादिति दिक्। तक्षिरक्षिभ्यामित्यादि। यत्तु वदन्ति। भुङ्क्तं चक्रं भुङ्क्तं वा वक्ष्यमाणे भुकलोपः। भुल्। भुङ्क्तौ। भुल्भ्याम्। चः। चक्रौ। चर्भ्याम्। भूः। भुक्रौ। भूर्भ्यामित्यादि तत्सर्वमनेन प्रत्युक्तम्। अयं तु विशेषः। तत्रागित्यत्र संयोगान्तलोपो निर्विवादः। तत्र तु सोपि दुर्लभ इति। दिधगिति। यत्तु दहेर्हो ढः षढोरिति कत्वासिद्धत्वात्। संयोगान्तलोपे ठस्य जश्त्वे दिधडिति नैमिषीयेणोक्तम्, तत्प्रामादिकम्। दादेर्घ इति घत्वस्य ढत्वापवादस्य जागरूकत्वात्। षान्ताः ॥

लक्ष्यपूर्वभागे इति। काव्यादिशब्दरूपलक्ष्यस्य पूर्वभागे याधन्ते इत्यर्थः। बहिर्भूतेति। बहिर्भूतनिमित्तापेक्षत्वरूपबहिरङ्गत्वस्येत्यर्थः। वस्तुतस्तेषामनभिधानमेव पूर्वंपूर्वमित्यस्यैव पूर्वंपूर्वनिमित्तकमित्येवार्थ इत्यन्यत्र प्रपञ्चितम्। दुर्लभ इति। यर्त्वादझल्त्वाच्चेति भावः ॥

स्थानिवद्भावेनापिसिद्धेरिति।ङित्त्ववदितिभावः।नचतदनुबन्धपरिभाषाप्रवृत्त्यर्थमेवतत्।निरनुबन्धकत्वेनापितत्सिद्धेः।कथंचिदिति।तेनपद्दन्नदितिसूत्रेछन्दसीतिनिरुक्तेः कल्पनयातस्यचारितार्थ्येनैतदर्थज्ञापकत्वासंभवइतिसूचितम्।प्रागेवेति।अन्तरङ्गत्वादितिभावः।निवर्तयिष्यतेइति।अकृतव्यूहपरिभाषयापूर्वमेवनप्रवर्तयिष्यतइतिभावः।अन्तरङ्गेइ विद्वन्निति।विदेःशतुर्वसुः।अदादित्वाच्छपोलुक्।सेदिवानिति।भाषायांसदवसश्रुवइतिक्वसुः।सेदुषइति।ननुतदनुबन्धकग्रहणेनातदनुबन्धकस्येतिपरिभाषयाविदेःशतुर्वसुरित्यस्यैववसोःसंप्रसारणंयुक्तंनतुक्वसोः।सत्यम्।वसोरुकारानुबन्धग्रहणंक्वसोःसामान्यग्रहणार्थम्।उगित्त्वस्यस्थानिवद्भावेनापिसिद्धेः।इहगमिप्रभृतिभ्यःक्वसुर्नोदाहृतश्छान्दसत्वात्।कवयस्तुप्रयुञ्जते।श्रेयांसिसर्वाण्यधिजग्मुषस्तेतंतस्थिवांसंनगरोपकण्ठेइत्यादि।छान्दसाअपिक्वचिद्भाषायांभवन्तीतिसास्यछन्दसीतिसामान्यापेक्षज्ञापकमाश्रित्यकथंचित्समाधेयम्।पुंसोसुङ्।विवक्षितइति।तेनपरमपुमानित्यत्रपरत्वादसुङिकृतेसमासान्तोदात्तत्वंभवदसुङएवाकारस्यभवति।परसप्तम्यांतुनैतत्सिद्ध्येत्।सर्वनामस्थानोत्पत्तेःप्रागेवपुंशब्दोकारस्योदात्तत्वेकृतेसंसनधर्मिणोहलःस्थानेतद्धर्मिणोऽनुदात्तस्यैवादेशस्यप्रसङ्गात्।नचोकारस्यकृतोपिस्वरोनन्त्यत्वान्निवर्त्तयिष्यते।असुङश्चान्त्यत्वात्करिष्यतइतिवाच्यम्।अन्तरङ्गेस्वरेकर्त्तव्येबहिरङ्गस्यासुङोऽसिद्धत्वादितिभावः।एतच्चकैयटहरदत्तानामनुरोधेनोक्तम्।वस्तुतस्तुपरसप्तमीपक्षोपिसूपपादः।अकृतव्यूहपरिभाषयाअन्तरङ्गपरिभाषापवादत्वादित्यवधेयम्।नन्वेवमसमासेप्यसुङिकृतेप्रातिपदिकस्वरेणसतिशिष्टेनप्रत्ययस्वरस्यबाधादसुङउदात्तत्वंस्यात्दृष्यतेतूकारस्य । पुमान्संपरिपालित्यादौतथैवपाठादितिचेत्सत्यम्।डुम्सुनोनित्करणसामर्थ्यात्प्रातिपदिकस्वरोनभवतीतिहरदत्तः ॥

ति।अकृतव्यूहपरिभाषातुनास्त्येवेतिभावः।तदेवाह।कैयटेत्यादि।भाष्येप्युपदेशिवद्भाववचनंकर्त्तव्यमित्युक्तम्।अकृतव्यूहपरिभाषायाइति।सत्त्वेइतिशेषः ।

नन्वेतदिति। अन्तोदात्तत्ववारणायनित्करणसामर्थ्याश्रयणमित्यर्थः। फिट्स्वरस्यैवात्राप्राप्तेरितिभावः। इदम्। इम्सुनोनित्वम्। यद्यप्यसिद्धमिति। नित्वाभावेपिफिषोन्तइ
तिकर्तव्ये असुङोबहिरङ्गस्यासिद्धत्वात्प्रत्ययस्वरे णोकारस्योदात्तत्वेएवंस्थितेततोसुङनुदात्तएवेतिभावः। नित्करणमिति। व्युत्पत्तिपक्षे इत्यादि। उङाविताविति। लो
पेनरेत्तंस्त्राप्रयुक्तकार्यार्थमितिभावः। न इध्वनयन्तव्याख्याताह। उगित्कार्यार्थमिति। इत्वप्रसङ्गादिति। नचेत्वविधायके आआपीतिप्रश्लिष्टनिर्देशान्नेत्वम्। कारिकेत्या

नन्वेतदयुक्तम्। प्रकृतिप्रत्ययविभागशून्येष्वेवफिष इत्यस्यप्रवृत्तिरितिचेत्सत्यम्। क्वचित्स्वखण्डेष्वपिप्रवृत्ताविदंलिङ्गम्। यद्यपिअसिद्धंबहिरङ्गमित्येवेदं
सिद्धं तथापिबहिरङ्गपरिभाषायाअनित्यत्वमपिज्ञापयितुंनित्करणमितिनिष्कर्षः। उच्चारणार्थ इति। यत्तुप्राचोक्तमुङाविनाविति। यच्चतत्सौत्रेणव्याख्यातमु
कारउगित्कार्यार्थइतितदसंगतमितिभावः। हेपुमन्निति। असंबुद्धाविन्युक्तेर्नदीर्घः। पुंस्विति। संयोगान्तलोपेमोनुस्वारः। नुम्स्थानिकस्यैवानुस्वारस्योपलक्ष
णानुम्विसर्जनीयेतिनषत्वम्। अस्यसंबुद्धाविति। एतच्चवाचनिकम्। यत्तुहरदत्तादयआहुः। सोर्डेतिवाच्येअनङ् साविति वचनेनक्वचिदनङ् एवश्रवण
स्यज्ञापितत्वादेतत्सिद्धमिति। तत्तुप्रागेवदूषितम्। अङ्गवृत्तपरिभाषयावासमाधेयम्। अदसऔसुलोपश्च। ननुसोरेवौकारोविधीयतांत्यदाद्यत्वेनासाविति
सिद्धे किंसुलोपविधानेन। मैवम्। अस्तकौस्त्रीत्वत्रटापिप्रत्ययस्थादितीत्वप्रसङ्गात्। असुकइति। औत्वाभावेत्यदाद्यत्वंसादुत्वम्। असुकइतित्वसाधुः। सत्वेनमु
त्वस्यबाधात्। एवममुकौअमुकशर्माइत्यादयोप्यसाधवएव। असुकाअदकःशर्मेत्यादेरेवन्याय्यत्वात् ॥ ७ दावपिइत्वानापत्तेः। तस्मात्प्रश्लिष्टनिर्देशोनात्रेत्यत्रैवभा

ष्येस्पष्टम्। एतेनविभक्ताविति स्यत्यदादीनामइत्यत्रविषयसप्तमीत्वमपास्तम्। एवंहिविभक्त्युत्पत्तेःपूर्वंत्यदाद्यत्वेटापिसावदसइत्यन्त्यस्यौत्वेपिस्थानिवत्त्वेनादित्वापत्तेः। नि
र्दिष्टपरिभाषायांसत्यांविषयसप्तम्यावक्तुमशक्यत्वाच्चेतिदिक्। न्याय्यत्वादिति। क्वचित्सान्तत्वेनमुत्वाप्राप्तेः। क्वचित्सत्वेनबाधादितिभावः ॥

नस्य[illegible]ता इनादेशगुणौ चस्यातामित्यपि बोध्यम्। हशि चेत्यस्येति। नर्वर्थमित्यादावतोरोरित्यस्य व्यावृत्त्यर्थमित्यपि बोध्यम्। तत्रैव चरितार्थत्वादिति। सामर्थ्याद्योतं सर्वादेशः।
एवंच[illegible]योगविभागेनासिद्धत्वाभावे च। अश्ग्रहणं चेति। अत्र यद्वक्तव्यं तदुक्तं प्राक्। इति हलन्ताः पुल्लिङ्गाः। ननु सन्निपातपरिभाषया नत्वं न स्यादत आह। झष इति। धत्वे कृते
ए[illegible]ईद्बहुवचने। पारिभाषिकस्य ग्रहणे अमीभिरित्यादिसिद्धावपि जसि अमी इति न सिद्ध्येत्। नह्यत्रैकारस्य बहुवचनपरतास्त्यतो व्याचष्टे। बह्वर्थोक्ताविति। ननु
नो ने इति विषयसप्तमीत्याह। नाभावे कर्त्तव्ये इति। अन्यथा घेः परत्वाभावान्नाभावो न स्यादिति भावः। नन्वेवमपि कृते नाभावे सुपि चेति दीर्घः स्यात्। दीर्घप्रतिमु
त्वस्यासिद्धत्वादत आह। कृते चेति। सन्निपातपरिभाषया वा समाधेयम्। अत्रेदमवधेयम्। अमुनेतिवदमुने इति वक्तव्ये न मुन इत्युक्तिर्नेति योगविभागार्था। तेन रामः
रामेभ्य इत्यादि सिद्ध्यति। अन्यथा रोरसिद्धतयोकारस्येत्संज्ञालोपौ कथं स्याताम्। न चानुनासिकनिर्देशसामर्थ्यादित्संज्ञालोपौ प्रत्यसिद्धत्वं नेति वाच्यम्। तरुमूलमित्या
दौ हशि चेत्यस्य व्यावृत्तये ऽतोरोरित्यत्रानुनासिकस्यैव निर्देशेन तत्रैव चरितार्थत्वात्। न चाऽतोरोरित्यत्र मास्त्वनुनासिकः प्रतिपदोक्तग्रहणेनैव निर्वाहादिति वाच्यम्।
एवमपि देवरुहीत्यत्र रुधातोर्दुर्वारत्वात्। रामइत्यादावप्यनुनासिकस्य रोः श्रवणस्यापाद्यमानतया चरितार्थस्य सुवचत्वाच्च। एवं च स्थानिवत्सूत्रस्यापि प्रवृत्तौ पदत्वा
द्विसर्गोऽपि लभ्यते। प्रत्ययः परश्चेत्यादिनिर्देशाय त्वविधावश्ग्रहणं चेह लिङ्गमिति दिक्॥ इति हलन्ताः पुल्लिङ्गाः॥ नहो धः। द इत्येव नोक्तम्। तथाहि सति नद्धमित्यत्र रदाभ्या
मिति नत्वं स्यात्। झषस्तथोरिति च न स्यात्। अत्रेदमवधेयम्। सुष्ठु अनड्वाहो यस्यामिति बहुव्रीहौ स्वनड्वानित्यादि पुंवदेव रूपम्। यत्तु गौरादिङीषं कृत्वा स्वनड्वाहीत्युदाज
हुः तच्चिन्त्यम्। अनुपसर्जनादित्यधिकारविरोधात्। गीरिति। गृ निगरणे शब्दे च। क्विप्। ॠत इदितीत्वम्। र्वोरुपधाया दीर्घः। पूरिति। पॄ पालनपूरणयोः। उदोष्ठ्यपूर्वस्येत्युत्व
म्। आशिषाविति। आशासः क्वावुपसंख्यानमित्युपधाया इत्वम्। शासिवसीति षत्वम्॥ * इति हलन्ताः स्त्रीलिङ्गाः * ॥ श्रीसंकष्टनाशिन्यै नमः ॥
सन्निपातपरिभाषाया अनित्यत्वान्नद्धमित्यादौ जश्त्वं बोध्यम्। इति हलन्ताः स्त्रीलिङ्गाः * ॥ श्रीकरवीरपुरवासिन्यै नमः ॥

अन्येवेति। औशसादिष्वनेनैवसिद्धिरितिभावः। त्यदाद्यत्वेनेति। नचयेननाप्राप्तिन्यायेनैतदस्त्यदाद्यत्वापवादत्वेनतत्रकृतेकथंत्यदाद्यत्वम्। नचोपसर्जनएतच्चरितार्थम्। त्यदाद्यत्वेनैवसिद्धमितिभाष्यासङ्गत्यापत्तेः। एनदोऽप्युपसर्जनेएतदस्त्रतसोरितिसाहचर्येणाप्रवृत्तेः स्वीकारात्। नचनपुंसकेऽपितच्चारितार्थ्यंद्वितीयादिग्रहणस्यैवमप्यचारितार्थ्यादितिवाच्यम्। आर्धधातुकेइत्येतत्साहचर्येणास्यापिद्वितीयादिविषयेपूर्वमेवप्रवृत्तेरित्याशयात्। एतत्सर्वंभाष्येयद्येनन्क्रियतइत्याद्येकदेश्युक्त्या ध्वनितम्। स्वमोर्लुकेति। तद्विषयेनलुमतेतिनिषेधबाधेनचारितार्थ्येनबहिरङ्गलुग्विषयेतद्बाधेनमानमितिभावः। वस्तुतएतत्सर्वमत्रत्यकैयटानुरोधेन; तका

अन्वादेशइति। अयंचान्येवेतिव्याख्यातारः। तस्यलुकालुप्तत्वेऽपिवचनसामर्थ्यात्प्रत्ययलक्षणमित्याहुः। वस्तुतस्तुसूत्रेएवैनद्वक्तव्यः। एनम्। एनौ इत्यादितुत्यदाद्युत्वेनसिद्धम्। क्लीबेऽमिलुकालुप्तेऽपितकारोच्चारणसामर्थ्यादेनदादेशः। नचैवमेतत्कुलइत्यत्रापितदापत्तिः। एकपदाश्रयत्वेनान्तरङ्गेस्वमोर्लुकिचरितार्थत्वेनबहिरङ्गेसामासिकेलुकितदप्रवृत्तेः। रोऽसुपि। अहर्भातीति। प्राच्यास्तुअहन्नितिसुपन्यस्तंतदिहानुचितम्। अहोभ्यामित्याद्यर्थंतथाकथंचिद्योज्यम्। असकृच्छब्दस्त्विति। एतच्चक्षीरस्वामिग्रन्थेस्पष्टम्। बहूर्ज्जीति। अन्त्यादितिचवाचनिकम्। तथाचवार्तिकम्। बहूर्जिप्रतिषेधः। अन्त्यात्पूर्वोनुममित्येकेइति ॥

रोच्चारणसामर्थ्येननपुंसकलुकीवात्रापिसामर्थ्यादेवैनेत्प्रवृत्तेः। नचबहिरङ्गत्वम्। लुग्विषयेबहिरङ्गपरिभाषाप्रवृत्तेः। अतएवैनदादेशेएतत्कुलकइतिनसिध्यति। एनत्कुलकइतिप्राप्नोतीतिभाष्यंसंगच्छते। एतद्विधानेनएतत्सूत्रविषयेनलुमतेत्यस्याप्रवृत्तिरितितदाशयः। वस्तुतएषामनभिधानमेव। अस्यांशङ्कायांयथालक्षणमप्रयुक्ते इतिभाष्योक्तेः। विषयसप्तम्यांमानाभावेत्वेनेनतौपृथग्वक्तव्यौइत्याहुः ॥

अचः पर इति। नपुंसकस्येति सूत्रेऽज्ग्रहणसामर्थ्येनावृत्त्याऽच इत्यस्य झल्विशेषणत्वमन्यथेगन्तानामिकोचीत्येव सिद्धा एजन्तेषु नपुंसकह्रस्वत्वेन चाकारग्रहणमेव कुर्यात्। आत्नौसामानं च दाण्डिनायनेति सूत्रे हिरण्मयानीति निर्देश एव। काष्ठतक्षीत्यादौ झल्त्वजातेरचः परत्वाद्भवत्येव नुम्। ऊर्क्शब्दादौ तु नेति भावस्तदाह। एवमिति एतेन न[illegible]शब्दान्नपुंसके शौ नपुंसकस्येति युजेरिति च नुम्द्वयमित्यपास्तम्। युजेरित्यस्य नित्यत्वात् पूर्वप्रवृत्तौ अचः परझलोऽभावेन नपुंसकस्येत्यस्याप्राप्तेः। वस्तुत ऊर्दादेः

भाष्ये तु अचः परो यो झल् तदन्तस्य नुमित्यर्थमाश्रित्य प्रथमं वार्तिकं प्रत्याख्यातम्। एवं तु उर्द्माने गर्ह्गर्हायामित्यादीनामपि क्विबन्तानां नुमा न भाव्यमेव। यथोत्तरं मुनीनां प्रामाण्यादिति दिक्। अल्लोपस्येति। क्वौ लुप्तं न स्थानिवदिति तु नेहाश्रीयते। तस्य क्वाचित्कत्वात्। क्वौ विधिं प्रति न स्थानिवदित्यस्यैव सार्वत्रिकत्वादिति स्पष्टमाकरे। अम्बाक्षिभूतानीति। सप्तविंशत्यधिकापञ्चशतीत्यर्थः। तथाहि। सौ नवानामन्त्यस्य द्वित्वे ष्टादश। औङि चतुर्णां मध्ये पूजार्थानां त्रयाणां जद्वित्वे सप्त। अनुनासिकस्तु नास्ति प्रगृह्यत्वात्। जसि जद्वित्वस्यानुनासिकस्य च विकल्पात् द्वादश। संकलनया सप्तत्रिंशत्। एवं द्वितीयायामपि। टायां चतुर्दश। भ्यामि अष्टचत्वारिंशत्। भप्राग्वर्गीयमानां द्वित्वात्। भिसि चतुर्विंशतिः। ङयि सप्त। अनुनासिकस्तु नास्ति। एकारस्यानप्लुत्वात्। भ्यसि भ्यांवत्। ङसौ ङसादिपञ्चके च प्रत्येकं चतुर्दश। सुपि गत्यर्थे त्रयाणां ककारषकारयोर्द्वित्वेन उकारस्यानुनासिकेन च चतुर्विंशतिः ॥

क्विपि नपुंसके नुम्विषयेऽनभिधानमेव वार्तिकानुरोधात्। अन्यथा भाष्यवार्तिकयोः फलभेदापत्तेरित्याहुः। आकरे इति। दीधीवेवीटामिति सूत्रेण पदान्तसूत्रे च भाष्यकैयटयोरित्यर्थः। संकलनयेति। तत्कृत्यं मन्दबोधनम्। चतुर्दशेति। पूजार्थानां त्रयाणां भद्वित्वात्तेषामनुनासिकविकल्पाच्च। चतुर्विंशतिरिति। भप्राग्वर्तिवर्णविसर्गद्वित्वात्। विसर्गे तु नानुनासिकः। अप्रगृह्यस्येति पर्युदासेनाक्षरसमाम्नायिकेष्वेव तत्प्रवृत्तेः ॥

स॰प्र॰
१०५

ङणयोरिति।षकारद्वित्वेशरःखयइत्यनेनभाष्यअतिरिक्तमतइति।भाष्यमतेचःयरोयोऽत्तलित्यर्थेनात्रकृतेचःपरझल्जांतेरभावान्नुमोप्राप्तेरेवंचनेतास्यसाधून्यवेतिभावः।उ
एवंकुक्पक्षेषण्णाङ्ङयोर्द्वित्वेअनुनासिकेचअष्टचत्वारिंशत्।कुगभावेत्रयाणांङकारद्वित्वअनुनासिकेचद्वादश।सु१८औ७जसि१२अम्१८औ७शस्५२टा१४
भ्यां४८भिस्२४ङे७भ्यां४८भ्यस्४८ङसि१४भ्यां४८भ्यस्४८ङस्ओस्आम्ङिओस्प्रत्येकम्१४सुप्४८अत्रेदमवधेयम्।पूजायांजसिनुमागमेकृतेनस्य
पाक्षिकेद्वित्वेञकारत्रयसहितंरूपषट्कम्।एवंशस्यपीतिसंकलनयाद्वा।द्विशतंतथाहृपंग्रहः।दिपूर्९भूतास्यमितिभाष्यअतिरिक्तमतेइतिदिक्।सत्तुवदन्ति।
ऊह्यमेवंद्वित्वपुनर्द्वित्वलोपविकल्पनैः।अष्टपञ्चाशतोत्तरद्वात्रिंशच्छतत्याधिकंशतमिति।तच्चिन्त्यम्।पुनर्द्वित्वस्याप्रामाणिकत्वात्रूपाणामनन्त्यप्रसङ्गाच्च।अष्टपञ्चाश
तोत्तरद्वात्रिंशपस्याभावाच्चेतिदिक्।निरश्वीइति।झलादचइत्यस्यलोपः।अलोपइतिवचनान्निर्यादेशाभावः।स्वब्धिति।शोभनाआपोऽस्मिन्सरसीतिबहुव्रीहिः।ऋक्पूरि
तिसमासान्तेप्राप्तेनपूजनादितिनिषेधः।यत्त्वनित्यत्वादितिप्राचोक्तंतस्यासादिकमात्यन्तरूपसर्गेभ्यइतित्वनभवति।तत्रापइतिकृतसमासान्तस्यानुकरणमितिव
क्ष्यमाणत्वात्।सुपुंसीति।पुंसोसुङितिसूत्रेसुटीतिव्याचक्षाणस्यप्राचोमतेशसिनैतत्सिद्ध्येत्।औङिचातिव्याप्तिः।अस्माकंतुसर्वनामस्थानइतियथासूत्रंब्रुवतांस
र्वेष्टसिद्धिरितिभावः॥इतिहलन्तानपुंसकलिङ्गाः॥स्वरादिनिपातमव्ययम्।स्वरादयोनिपाताश्चेतिसमाहारद्वन्द्वः।स्वरितिस्वर्गेपरलोकेच।अन्तरितिमध्ये।प्रातरि
तिप्रत्यूषे।पुनरितिअप्रथमेविशेषेच।सनुतर्अन्तर्धाने।स्वराद्याःपञ्चरेफान्ताः।उच्चैस्महति।नीचैस्अल्पे।शनैस्क्रियामान्द्ये।ऋधक्सत्ये।वियोगशीघ्रसामी
प्यलापनेषित्यन्ये।ऋतेवर्जने।युगपदित्येककाले।आराद्दूरसमीपयोः।पृथक्भिन्ने।ह्यस्अतीतेऽह्नि।श्वस्अनागतेऽह्नि।दिवादिवसे।रात्राविति।निशि।सायमिति
निशामुखे।चिरमितिबहुकाले।मनाक्ईषदिमावल्पे।जोषंसुखेमौनेच।तूष्णीमितिमौने ॥
प[illegible]स्याभावादिति।नियमेमानाभावादितिभावः।प्रामादिकमिति।शास्त्रेणैवसिद्धेरितिभावः॥इतिहलन्तानपुंसकलिङ्गाः ॥

एमः
१०६

इत्यादिभिरिति।आदिनातत्रतस्येवतदर्हम्।इत्येकइति।अत्राह चिबीजंकिमेत्तिङइति विहितस्यतद्धितश्चेत्यनेनासिद्धिःकास्प्रत्ययादिति।विहितात्परस्याम इत्यनेनलुक्
हिस्‌अबसद्गैमौबाह्ये।समयेतिसमीपेमध्येच।निकषेत्यन्तिके।स्वयमित्यात्मनेस्वर्थे।वृथेतिव्यर्थे।नक्तमितिरात्रौ।नञ्निषेधे।हेताविनिनिमित्ते।इद्धेतिप्राका
श्ये।अद्धाइतिस्फुटावधारणयोः।तत्त्वातिशययोरित्येके।सामीत्यर्द्धजुगुप्सनयोः।वत्।तेनतुल्यमित्यादिभिर्विहितोवतिप्रत्ययः।सस्तुउपसर्गाद्धात्वर्थइतिविहितःसने
हगेहाते।यदुतोनिवतोयासि।सनासनत्सनात्इत्येतेनित्ये।उपधेतिभेदे।तिरस्‌अन्तर्द्धौतिर्यगर्थेपरिभवेच।अन्तरेतिमध्येविनार्थेच।अन्तरेणेतिवर्जने।ज्योगिति
कालभूयस्त्वेप्रश्नेशीघ्रार्थेसंप्रत्यर्थेच।कमितिवारिमूर्द्धनिन्दासुखेषु।शंसुखे।सहसेत्याकस्मिकाविमर्शयोः।विनेतिवर्जने।नानेत्यनेकविनार्थयोः।स्वस्तीतिमङ्गले।
स्वधा पितृदाने।अलंभूषणपर्याप्तिशक्तिवारणनिषेधेषु।वषट्वौषट्श्रौषट्एतेहविर्दाने।अन्यदित्यन्यार्थे।अस्तीतिसत्तायाम्।उपांश्वित्यप्रकाशोच्चारणरहस्ययोः।
क्षमेतिक्षान्तौ।विहायसेतिवियदर्थे।दोषेतिरात्रौ।मृषामिथ्येत्येतौवितथे।मुधेतिव्यर्थे।पुरेतिविरतेचिरातीतेभविष्यदासन्नेच।मिथोमिथस्एतौरहस्सहार्थयोः।प्रायस्इति
बाहुल्ये।मुहुस्पुनरर्थे।प्रबाहुकंसमकालेसिद्धार्थे च।प्रवाहिकेतिपाठान्तरम्।आर्यहलमितिबलात्कारे।शाकटायनस्तुआर्येतिप्रतिबन्धे।हलमितिप्रतिषेधविवादयोरि
त्याह।आभीक्ष्ण्यमितिपौनःपुन्ये।साकंसार्द्धमेतौसहार्थौ।नमस्नतौ।हिरुक्वर्जने।धिक्निन्दाभर्त्सनयोः।अम्शैघ्र्येऽल्पेच।आम्अङ्गीकारे।किमेत्तिङव्ययेतिकास्प्रत्य
यादित्यादिभिश्चविहितःप्रत्ययोपीहगृह्यतेइत्येके।पपाचतराम्।कारयामास।प्रतान्ग्लानौ।प्रशान्समानार्थे।प्रतान्विस्तारे।मामाङ्एतौशङ्कानिषेधयोः।आकृतिगणइति।
तेनान्येपिज्ञेयाः।तथाहि।कामंस्वाच्छन्द्ये।प्रकाममित्यतिशये।भूयइतिपुनरर्थे।सांप्रतमितिन्याय्ये।परमितिकिंत्वर्थे।साक्षात्प्रत्यक्षे।साचितिर्यगर्थे।सत्यमित्यर्द्धाङ्गीकारे।मङ्क्षुआशु
एतौशीघ्रे।संवत्वर्षे।अवश्यंनिश्चये।सपदिशैघ्र्ये।बलवदित्यतिशये।प्रादुस्आविस्इतिप्रकाशे।अनिशंनित्यंनित्यदासदाअजस्रंसंततमेतेसातत्ये।उषेतिरात्रौ।रोदसीद्यावापृथिव्यर्थे।ओं
मित्यङ्गीकारेब्रह्मणिच।भूरितिपृथिव्याम्।भुवइत्यन्तरिक्षे।झटितिझगितितरसाइतिशैघ्र्ये।सुष्ठुप्रशंसायाम्।दुष्ठुअतिकष्टे। ७) सिद्धान्तस्यतत्त्वेफलाभावइति ॥ ॥

अनुपसर्गत्वादिति।अवदत्तंचेत्यादिभाष्येतकाराकरणेनगुणभूतोपसर्गत्वबाधोवोद्यतइतिभावः।यदपीति।स्वरादीनुपक्रम्यान्तोदात्ताः पठ्यन्तइतिकाशिकायाम्।प्रामादिकमिति।
सुपूजायाम्।अहह आश्चर्ये।कुइतिकुत्सितेषदर्थयोः।अञ्जसातत्त्वशीघ्रार्थयोः।मिथुइतिद्वावित्यर्थे।भाजक्इतिशैघ्र्ये।चिरायचिररात्रायचिरस्यचिरञ्चिरेणचिरादित्येतेचि
रार्थकाः।अस्तमितिविनाशे।आनुषक्आनुपूर्व्ये।अनुषक्अनुमाने।अम्र सूशीघ्रसांप्रतिकयोः।स्थानेइतियुक्ते।वरमितीषदुत्कर्षे।सुदिशुक्लपक्षे।वदिकृष्णपक्षे।इत्यादि।
चेतिसमुच्चयादिषु।वास्याद्विकल्पोपमयोरेवार्थेपिसमुच्चये।हेतिप्रसिद्धौ।अहेतिपूजायाम्।एवेत्यवधारणेऽनवक्लृप्तौच।एवमितिउक्तपरामर्शे।नूनमितिनिश्चयेतर्केच।श
श्वदितिपौनःपुन्येनित्येसहार्थेच।युगपदितिऐककाल्ये।भूयस्पुनरर्थेआधिक्येच।कूपदितिप्रश्नेप्रशंसायांच।कुविदितिभूर्यर्थेप्रशंसायांच।नेदितिशङ्कायांप्रतिषेधविचारसमु
च्चयेषु।चेदितियद्यर्थे।चण्अयंचेदर्थे।णित्।समुच्चयादौत्वननुबन्धः।कच्चिदितिदृष्टप्रश्ने।यत्रेत्यनव क्लृप्त्यमर्षगर्हाश्चर्येषु।नावकल्पयामिनमर्षयेगर्हेआश्चर्यंवा यत्रभवानर
षलंयाजयेत्।नहेतिप्रत्यारम्भे।हन्तेतिहर्षविषादेअनुकम्पायांवाक्यारम्भेच।माकिः।माकिंनकिरितित्रयोपिवर्जने।माङ्नञौस्वरादिषुउक्तौ।इहपाठस्तुनिपातत्वार्थः।तेनआद्यु
दात्तत्वंसिद्ध्यतीतिप्राञ्चः।तच्चिन्त्यम्।फिट्स्वरेणापीष्टसिद्धेः।यदप्याहुः।सत्त्ववचनानामपिअव्ययसञ्ज्ञार्थं स्वरादिपाठइतितदपिचिन्त्यम्।लक्ष्मीवाचकस्यापिमाशब्दस्याव्य
यत्वापत्तेः।तस्मादुभयत्रपाठेफलंचिन्त्यम्।यावत्तावत्एतौसाकल्येवधिमानावधारणेषु।साकल्ये।यावत्कार्यंतावत्कृतम्।अवधौ।यावद्गन्तव्यंतावत्तिष्ठ।माने।यावद्दत्तंतावद्भुक्त
म्।अवधारणे।यावदमत्रंब्राह्मणानामन्त्रयस्व।त्वैविशेषवितर्कयोः।न्वैवितर्के।न्वेइतिपाठान्तरम्।रैदानेअनादरेच।रैकरोतिददातीत्यर्थः।त्वंरैकिंकरिष्यसि।श्रौषट्वौषट्एतौहविर्दाने।
स्वाहादेवताभ्योदाने।स्वधेतिपितृभ्यः।श्रौषडानामादीनामनेकाचामुभयत्रपाठःस्वरभेदार्थः।तुमितितुङ्कारे।गुरुंतुङ्कृत्यहुङ्कृत्य।तथाहिनिदर्शने।खलुनिषेधवाक्यालङ्कारनिश्चये
च।किलेतिवार्तायामलीकेच।अथेतिमङ्गलानन्तरारम्भप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु।अयंस्वरादिरपितेनमङ्गलवाचकस्यसत्त्वार्थत्वेप्यव्ययत्वंसिद्ध्यति ॥
नाइः स्वरौस्वरितावितिफिट्सूत्रेणस्वरितत्वात्सनाच्चहोतानव्यः तिरः पुरूचिदश्विन्येत्यादौसनात्तिरसोरन्तोदात्तपाठाच्च ॥

निर्मूलत्वाच्चेति। आद्युदात्तप्रापकशास्त्राभावादिति भावः ।

तथा च श्रीहर्षः। उदस्य कुम्भीरथ शातकुम्भजाश्चतुष्कचारुत्विषि वेदिकोदरे। यथाकुलाचारमथावनीन्द्रजापुरन्ध्रिवर्गः स्नपयांबभूवताम्। अत्र हि अथ स्नपयांबभूवेत्यस्य मङ्गलस्नपनं चकारेत्यर्थः। निपातस्तु स्वरूपेणैव मङ्गलम्, दङ्ध्वनिवत्। सुष्ठु स्वरभेदार्थः पाठः। स्मेत्यतीते पादपूरणे च। आदहेत्युपक्रमहिंसाकुत्सनेषु। अवदत्तमिति। इहानुपसर्गत्वादच उपसर्गात्त इति न भवति। अहमिति सुबन्तप्रतिरूपकम्। एतेन गेये केन विनीतौ वामिति व्याख्यातम्। युवामर्थे हि वामित्यव्ययम्। अस्तीति तिङन्तप्रतिरूपकम्। एवमस्मीत्यहमर्थे। त्वामस्मि वच्मि। आहेत्युवाचेत्यर्थे। आसेति बभूवेत्यर्थे इत्यादि। अ इति संबोधनेऽधिक्षेपे निषेधे च। आ इति वाक्यस्मरणयोः। इ इति संबोधनजुगुप्साविस्मयेषु। ई उ ऊ ए ऐ ओ औ संबोधने। पशु सम्यगर्थे। पशु मन्यमानाः। शुकं शैघ्र्ये। यथाकथाचेत्यनादरे। पाट् प्याट् अङ्ग हे है भोः ये एते संबोधने। घेति हिंसाप्रातिलोम्यपादपूरणेषु। विषुना नार्थे। एकपदे इत्यकस्मादित्यर्थे। युत् कुत्सायां। हेतौ आत इतोपीत्यर्थे। आकृतिगण इति। तद्यथा। यत् तत् इति हेतौ। आहोस्वित् विकल्पे। सिम सर्वतोभावे। कं पादपूरणे। सुकमतिशये। अनुकं वितर्के। शंबट् अन्तःकरणे आभिमुख्ये च। व पादपूरणे इवार्थे च। दिष्ट्येत्यानन्दे। चटु चाटु प्रियवाक्ये। हुमिति भर्त्सने। इवेति सादृश्ये। अद्यत्वे इदानीमित्यर्थे इत्यादि। अत्रेदमवधेयम्। स्वरादिचाद्योराकृतिगणत्वाविशेषेपि येषां निपातस्वरो दृष्टस्ते चादिषु अन्ये स्वरादिषु स्वरद्वयभाजस्तूभयत्र बोध्याः। यथा उतशब्दः स्वरादिषु। ईड्यो नूतनैरुतेत्यन्तोदात्तप्रयोगात्। यत्तु उतशब्दस्य स्वरादितामुक्त्वा निपातस्वरमाशङ्क्यान्तोदात्तनिपातनमाश्रित्य समादधुस्तद्भ्रमात्। स्वरादेरनिपातात्। अन्तोदात्तत्वनिपातनवैयर्थ्याच्च। यदपि काशिकायामुक्तम्। स्वर शनैस् ऋधक् दिवा रथा नक्तमित्यादयोन्तोदात्ता इति। पश्च सनुत् सनात् एवमादय आद्युदात्ता इति तत्सर्वं प्रामादिकम्। लक्ष्यविसंवादान्निर्मूलत्वाच्चेति शब्दकौस्तुभे प्रपञ्चितम्। तद्धितश्चासर्वविभक्तिः। सर्वेति। वचनत्रयात्मिकेत्यर्थः। नेति। किंतु एकवचनमेवोत्पद्यत इति भावः। तद्धितः किम्। एकः द्वौ त्रयः। असर्वेत्यादि किम्। औपगवः ॥

सिद्धेस्त्वादिति।व्यत्ययेनयगभावइतिभावः।अन्तग्रहणमिति।मेजन्त्याकृतोविशेषणात्तदन्तलाभेसिद्धेइत्यादिः।लक्षणेति।क्वचिद्वर्णग्रहणेपितत्परिभाषाप्रवृत्तिज्ञापकत्वेतदनित्यत्वमात्रज्ञापकमितिभावः।भूतमिति।भूतशब्दःपौतन्यवृत्तिर्नित्यनपुंसकस्तत्रपर्जन्यवल्लक्षणप्रवृत्त्यान्तरङ्गत्वात् ह्रस्वेशब्दान्तरसन्निधानोत्तरंटापिल

कृन्मेजन्तः।जीवसेइति।तुमर्थेसेसेनितिअसेप्रत्ययः।पिबध्यैइति।तेनैवशध्यैप्रत्ययः।पाघ्रेतिपिबादेशः।यस्त्वाहुः।कर्त्तरिशबिति।तद्भ्रमात्।अव्ययकृतोभावेइतिसिद्धान्तात्।अन्तग्रहणमौपदेशिकत्वप्रतिपत्त्यर्थम्।तेनेहन।आधये।चीकीर्षवे।लक्षणप्रतिपदोक्तसन्निपातपरिपरिभाषाभ्यांसिद्धेतयोरनित्यत्वज्ञापनायेदम्।क्त्वातोसुन्कसुनः।उदेतोरिति।उत्पूर्वादिणोभावलक्षणेस्थेणकृञ्वदिचरिहुतमिजनिभ्यःस्तोसुन्।विसृपइति।सृपितृदोःकसुन्।आब्ग्रहणमिति।तथाचवार्त्तिकम्।अव्ययादापोलुग्वचनानर्थक्यंलिङ्गाभावादिति।सूत्रस्योक्तिसंभवस्तुस्त्रियामितिसूत्रेस्त्रीसमानाधिकरणादितिपक्षंगृहीत्वाबोध्यः।सचनस्थितः।भूतमियंब्राह्मणीत्यादावतिव्याप्तेः।अलिङ्गत्वेआथर्वणविद्यागतश्रुतिविरोधमाशङ्क्याह।सदृशमिति।लिङ्गकारकेतिविभक्तिवचनशब्दौकारकसंख्यापराविति भावः।यथावाचेति।परिगणनमिदमित्येके।अन्येतूदाहरणमात्रमित्याहुः।वगाहइति।आदिरेवाकारोलुप्यतेनान्त्यः।अपिनासाहचर्यात्॥इत्यव्ययानि॥ खट्वेति।अशूप्रुषिलटिखटिकणिविशिभ्यःक्वन्।पञ्चाजीति।नचतदन्तविधिविरहादेवदाक्षीतिवाच्यम्।असमहत्पूर्वग्रहणेनानुपसर्जनाधिकारेणचस्त्रीप्रत्ययेषुतदन्तविधिज्ञापनात्।मूषिकेति।वृश्चिकृषोःकिकनित्यधिकारेमुषेदीर्घश्चेतिकिकनिइकारमध्योमूषिकशब्दः।यस्तुमुषस्तेयेइतिदीर्घोपधात्सञ्ज्ञायांक्वुनिमूषकशब्दोमाधवेनोक्तस्ततोप्ययंटाप्।प्रत्ययस्थादितीत्वमितितुविशेषः।यत्तुक्वुन्नन्तोसौअजादिगणेपाठंनप्रयुङ्क्ते।तस्यजातिलक्षणङीष्बाधनार्थत्वात्।सञ्ज्ञायाश्चाजातित्वादित्याहुः॥

स्येलक्ष्म्यास्यितिन्यायेननपुंह्रस्वइतिभावः॥इत्यव्ययानि॥अनुपसर्जनाधिकारेणचेति।तस्यहिबहुकुरुचराव्यावर्त्याएवंचवनोरचेत्यत्रेवात्रापितदन्तविधिरितिभावः॥

जातित्वानपायादिति।कुनादिविधौसञ्ज्ञापदेनरूढिरेवगृह्यतेनतुशब्दप्रवृत्तिनिमित्तकत्वरूपंसञ्ज्ञात्वंगृह्यते।अतएवघ्रःसञ्ज्ञायामित्यादिनाव्याघ्रादिसिद्धिरितिदिक्।गौणीवृत्तिरिति।लाक्षणिकत्वापरपर्यायंगौणत्वमित्यभिमानेनेदम्।सदृशलाक्षणिकत्वमप्रसिद्धत्वमेववागौणत्वम्।गौणमुख्यन्यायश्चपदकार्यविषयोऽतएवाजस्यस्त्रीअजेत्यर्थेऽजेत्येवेति सिद्धान्तेतुजातिरित्यावश्यकमितिबोध्यम्।जात्यन्तरेइति।ब्राह्मणादुग्रजातिकान्यायामुत्पन्नेआभीरजातावित्यर्थः।नृपात्शूद्रायामुत्पन्नोग्रजातिकन्या।नतुशूद्रत्वंतत्रास्ति।अतएवशूद्रसधर्माणस्तेइत्येवस्मृतिषूक्तंनतुशूद्राइति।
तच्चिन्त्यम्।व्याघ्रीत्यादिवत्सञ्ज्ञात्वेपिजातित्वानपायात्।भस्त्रफलेति।भस्त्रेवफलानियस्याइतिविग्रहः।ङ्यापोरिति।एतच्चफलनिष्पत्तावितिधातौमाधवग्रन्थेस्थितम्।भाष्येतुप्रायेणदीर्घएवपठ्यते।प्रत्यक्पुष्पेति।पाककर्णेत्यादिसूत्रस्थभाष्यवार्तिकपर्यालोचनयेदमुक्तम्।तेनसत्प्राक्काण्डेतिपाठोनादर्तव्यः।शूद्राचेति।शूद्रशब्दष्टापमुत्पादयतिजातिश्चेत्।महत्पूर्वस्तुन।जातिश्चेदितीहापिसंबध्यते।पुंयोगेत्विति।पुंयोगोदाम्पत्यरूपएवेतिननियमः;किंतुजन्यजनकभावोपि।तेनवैश्याशूद्रोस्तुराजन्यान्माहिष्योग्रौसुतौस्मृताविति सिद्धम्।महाशूद्रीति।आभीरीतुमहाशूद्रीजातिपुंयोगयोःसमेत्यमरः।अत्रेदमवधेयम्।अजादिगणेशूद्रेत्येवपाठ्यम्।जातिरितिव्यर्थम्।मुख्येकार्यसंप्रत्ययाज्जातिलक्षणोङीषेवबाधिष्यते।पुंयोगेहिगौणीवृत्तिः।अमहदित्याद्यपिव्यर्थम्।महाशूद्रशब्दोहिविशिष्टएवजात्यन्तरेवर्तते।तत्रावयवस्यानर्थकतयाशूद्रशब्दार्थसमवेतस्त्रीत्वाभावात्टापःप्रसङ्गएवनास्ति।यातुमहतीशूद्रातत्रमहाशूद्रेतीष्यतएव।कुञ्चेत्यादित्रयोमीहलन्ताइत्येके।क्रुञ्चानालभेतउष्णिहककुभौइत्यादिप्रयोगमुदाहृत्यादन्ताअपिभाष्येस्वीकृताः।इष्यतएवेति।अतस्तद्व्यावृत्त्यर्थंनैतदितिभावः।भाष्यवार्तिककारौतुशूद्रजातिवृत्तिमत्त्वेनतांजातिंतत्रारोप्यशूद्रशब्दप्रयोगइति शूद्रशब्दार्थसमवेतस्त्रीत्वस्यसत्वादस्त्येवटापःप्राप्तिरित्यमहत्पूर्वेति।शूद्रशब्दार्थसमवेतस्त्रीत्वेपिशूद्रशब्दादेवटाप्स्यान्नतुतदन्तादितितदन्तविधिज्ञापकतापिभाष्योक्तानासंगता।अतएवशङ्खेनमातृजात्यारोपेणैवब्राह्मणक्षत्रियैर्वैश्यैःक्षत्रियावैश्याशूद्रासूत्पन्नाःक्षत्रियवैश्यशूद्राएवेत्युक्तम्।तत्रजातिरित्यस्याभावेपूर्वजातिमात्रविवक्षयाकुक्कुटाण्डवत्शूद्रशब्देनसमासेततःस्त्रीत्वविवक्षायाममहत्पूर्वेति

निषेधेनतापुनस्स्यादितिमन्यन्तेइत्यलंविस्तरः।

युत्यादितश्चेति।न्यासकृतेतिशेषः।इदंव्युत्पादनमप्रामाणिकम्।अत्रत्यभाष्यासंमतेः॥दधातेः क्वनिबिति॥घुमास्थेतीत्वम्॥पावान इत्यस्यक्वनिपासिद्धिमाश्रित्येदंत्वमत्र
ारादावित्यस्यतत्रैवभाष्येप्रत्याख्यानात्।स्थः कचेतिसूत्रभाष्यस्थेशंस्यादित्यनाम्बाबेतिसूत्रभाष्यस्थेसत्येष्ठादित्यत्रचस्यसिजित्यतोवाग्रहणमण्डूकप्लुत्यानुवर्त्यत्वस्थि
तविभाषाश्रयणात्तद्भावः।तत्रविजेवेत्यन्ये॥अतएवधीङ्ध्यायतेर्दधातेर्वेतिध्यायतेः संप्रसारणमितिवार्तिकस्थंभाष्यंसंगच्छते॥घुमास्थेत्यत्रहलीत्यस्यानजादावित्यर्थोत्र

पुंयोगेपीति।यदाज्येष्ठादयः प्रथमजातादौवर्तन्तेतदाअदन्तत्वादेवटापसिद्धः।यदातुज्येष्ठस्यस्त्रीत्यादिविवक्षातदापुंयोगलक्षणोङीष्प्राप्तः सोऽनेनबाध्यत इति
सूचयितुमपिशब्दः।मूलान्नञः।नञः किम्।ज्ञातमूली।अमूलेति।ओषधिजातिरियम्।उगितश्चाभवतीति।सर्वादिषुभवतुइत्युदित्पठितः भातेर्डवतुरितिव्युत्पादित
श्च।शन्नन्तात्तुङी।पिशपृथ्यनोरितिनित्योनुम्।वनोरच।सुत्वानमिति।सुयजोर्ङ्वनिप्।अतिधीवरीति।दधातेः क्वनिप्।शर्वरीति।शृधातोर्वनिप्।गुणेकृतेहशान्तात्परत्वेपि
हशन्ताद्विहितत्वाभावाद्ङीब्रयोर्निषेधोन।अवावेति।न्यासकारस्तुप्रायिकोयंनिषेधः।तेनअवावरीत्याह।नत्वेतद्भाष्यादौदृष्टम्।पक्षेडाबिति।तथाचद्विवचने।बहुधीव
र्यौ।बहुधीवानौ।बहुधीवेइतिरूपत्रयंभवतीतिभावः।टाबृचि।पूर्वेणप्राप्तस्यङीपोपवादः।असिद्धत्वादिति।कार्यकालपक्षेणेदम्।यदितुयथोद्देशंषट्संज्ञायदिवाउप
देशकालेष्णान्तेतिव्याख्यानंतदाअसिद्धत्वोपवर्णनंनोपयुज्यतइत्याहुः।वस्तुतस्तुयथोद्देशपक्षेपिअसिद्धत्वमुपयुक्तमेव।एकदेशविकृतस्योपसंख्यानंहिस्थानिव
त्सूत्रेपठ्यते।आदेशग्रहणसामर्थ्यात्सर्वेसर्वपदादेशा इत्याश्रित्यआनुमानिकोप्यादेशः स्थानिवदितिवाव्याख्यायते।उभयथापिअल्विधौनतत्प्रवृत्तिः ॥

त्ययलक्षणसूत्रस्यनियमार्थत्वेपिप्रत्ययलक्षणकार्यंसुलभमितिदिक्।निषेधोनेति।वनोनहशइतिवार्तिकेविहितविशेषणस्येदमेवफलमितिभावः।नत्वेतदिति।अतोऽप्रमाण
त्वादितिभावः।व्याख्यानमिति॥उपदेशइतिवक्तव्यमितिवदतोवार्तिककारस्येतिभावः॥आनुमानिकोपीति।एरुरित्यनेनतेस्तोरनुमानादितिभावः ॥

एतच्चाकरेइति॥अत्राहुचिवीजंतुषट्त्वंनास्त्यर्थइतितदाश्रयविधीनांनात्रविधित्वमिति॥सिद्धेइति॥एवंचान्यतरस्यांग्रहणंकिमर्थमितिभावः॥ङीपेति।ऋन्नेभ्यइतिविहितेनानोयोसौविकल्पइति।अन्यतरस्यामितिविभक्तसूत्रेणप्राप्तइत्यर्थः॥अनइतिसूत्रेप्यन्यतरस्यामित्यस्यसत्त्वाद्विकल्पनियमलाभोऽन्यथासनित्यार्थोविधिरेवस्यादितिभावः॥सउपधेति।सउपधालोपिनोनुपसर्जनस्यबहुव्रीहेरेवेत्यर्थः।निषेधार्थमिति।योगविभागेनपक्षप्राप्तस्यऋन्नेभ्यइतिङीपइत्यर्थः॥इत्येवङीबिति।नियमशास्त्राणांनिषेधमुखेनप्रवृत्तिरित्यभिमानेनेदम्।तेनेति।अनउपधेत्यस्यनियमत्वेनेत्यर्थः।ऋन्नेभ्यइति।अस्यान्यथेत्यादिः।अनउपधेत्यस्यविधायकत्वेइतितदर्थः।प्रकरणान्तरस्थे

एतच्चआकरेस्पष्टम्।बहुयज्वानाविति।नसंयोगादितिनिषेधान्नायमुपधालोपीतेनअनउपधालोपिनइतिनप्रवर्तते।डाबुभाभ्याम्।ननुनिषेधडापोर्वचनसामर्थ्यात्पर्यायःसिद्धः।सत्यम्।अन्यतरस्यामितियोगोविभज्यते।तत्रमनइतिनिवृत्तम्।अनोबहुव्रीहेर्ङीब्वास्यात्।ङीपासहविकल्पलाभार्थमिदम्।अनउपधालोपिनइतिसूत्रंतुनियमार्थम्।अनोयोसौविकल्पःसउपधालोपिनएवेति।तथाचसुपर्वेत्यादौअनुपधालोपिनिनिषेधार्थमिदम्।बहुराज्ञीत्यादौतुऋन्नेभ्यइत्येवङीप्।तेनबहुधीवरीसिद्ध्यति।ऋन्नेभ्यइतिहिङीपमनूद्यतत्सन्नियोगेनविधीयमानोरेफःप्रकरणान्तरस्थेनङीपिकृतेनसिद्ध्येत्।ननुवनोरचेतिसूत्रमेवङीब्रौविधत्तामितिचेन्न।उभयविधौगौरवात्।किंचैवमपिङीपिनिषिद्धेरोपिदुर्लभः॥

नेति।तेनानन्तरत्वंबोधितम्।गौरवादिति।ममतुऋन्नेभ्यइतिप्राप्तङीपमनूद्यतत्सन्नियोगेनरभावमात्रविधायकंतदितिभावः।ननुवनोरचेत्यस्योभयविधायकत्वेऽनोबहुव्रीहेरित्यनन्तरत्वादस्यनिषेधकमुतयेनेतिन्यायेनऋन्नेभ्यइत्यस्य,नाद्यइत्याह।किंचेति।अनउपधेत्यनेनङीप्यपिरोदुर्लभएवेतिभावः।किंचैवंबहुश्वेत्यत्रऋन्नेभ्यइतिङीबापत्तिः।किंचबहुव्रीहौवेतिवार्तिकस्याप्यपूर्वविधायकतापत्त्यासुपर्वन्शब्देङीब्रयोरापत्तिः।सिद्धान्तेत्वनउपधेत्येतत्प्रापितङीबनुवादेनरभावस्यतेनविधानान्नदोषः॥एतेनान्यपक्षोबाध्यसामान्यचिन्तयोभयबाधकमितिपक्षश्चपरास्तः॥बहुव्रीहौवेत्यनेनसुपर्वन्शब्देङीब्रयोरापत्तेरितिदिक्॥

इत्यस्यानन्तरमिति।अनोबहुव्रीहेर्डाबुभाभ्याम्।अनुपसर्जनात् उपधालोपिनोवेति पाठ्यमितिभावः।यथाश्रुतेऽनुपसर्जनादित्यस्यसंबंधोदुर्घटः।अतएवबहुदा
मानिपुराण्यतिक्रान्तानगरीत्यत्रङीन्न॥ग्रहणंचेति।चेनबहुव्रीहौवेत्यस्यापिसंग्रहः॥पूर्वोक्तयोगविभाग अकारस्तुगुरुभूत इतिभाष्याशयः॥इत्युक्तमिति।डाप्सू
त्रेऽन्यतरस्यामितियोगविभागकरणपक्षेइदमुक्तमित्यर्थः॥पूर्वेणेति।उक्तयोगविभागेनेत्यर्थः।अकचिनस्यादिति।तदकारोहिपचतकीत्यादिसिद्धयेनप्रयोगसमवायीति
भावः।यत्नसाध्यइति।एतत्प्रयोगरूपज्ञापकसाध्यइत्यर्थः।एतच्चाकारस्येति।संनिहितत्वात्साक्षादुद्देश्यत्वेनप्राधान्याच्चेतिभावः॥तत्रसामर्थ्यादिति।कात्पूर्वस्येति
सन्नियोगशिष्टत्वात्।भाष्येतुसूत्रभङ्गेनसमाहितम्।तद्यथा।अनोबहुव्रीहेरित्यस्यानन्तरमुपधालोपिनोवेतिसूत्रमस्तु।अनउपधेत्यादिप्रदेशान्तरस्थंसूत्रं
डाप्सूत्रेऽन्यतरस्यांग्रहणंचमास्त्विति।अनउपधा।बहुव्रीहेरूधसोङीष्।इत्यतोबहुव्रीहिग्रहणंसंख्याव्ययादेर्ङीप्चानुवर्ततेइत्याशयेनाह।अन्नन्तादित्या
दि।नियमार्थमिदमित्युक्तम्।नचैवंपूर्वेणविकल्पसिद्धौइहान्यतरस्यांग्रहणंव्यर्थमितिवाच्यम्।असतिहितस्मिन्नित्यार्थोविधिरेवायंस्यान्नतुनियमः।प्रत्य
यस्यात्कात्पूर्वस्य।कादित्यकारउच्चारणार्थः।व्यञ्जनमात्रंविवक्षितम्।विशिष्टविवक्षायांतुएतिकाश्चरन्तीत्यादौअकचिनस्यादित्याशयेनाह।ककारादिति।वर्ण
निर्देशेहिकारप्रत्ययोविहितः।क्वचित्समुदायात्प्रयोगस्तुउच्चैस्तरांवावषट्कारइतिनिर्देशरूपयत्नसाध्यइतिभावः।आपिपरइति।एतच्चअकारस्यविशेष
णम्।तत्रसामर्थ्यात्ककाराकाराभ्यांव्यवायेपिभवति।नतुरथकट्येत्यादौत्रिचतुरादिव्यवाये।अतएवसर्विकादौआद्याकारस्यनभवति ॥
शास्त्रसामर्थ्यात्ककारेणव्यवधानंसह्यते।आबकारयोस्त्वेकादेशेकृतेचः परस्मिन्नितिस्थानिवत्त्वेनाकारव्यवधानेपिश्रौतमव्यवधानंगृहीत्वाप्रवृत्तिः।अकारशब्देना
द्विजातिग्रहणम्।तेनैतिकेत्यादावकारद्वयसत्त्वेपिनक्षतिरितिभावः।अतएवनयासयोरितिचरितार्थम्।त्रिचतुरादीति।श्रौतत्रिचतुरादीत्यर्थः।आद्याकारस्येति।इ
दंचकात्पूर्वस्येत्यंशोप्यनूद्यमानविशेषणत्वान्नाव्यवधानांशप्रवृत्तिरितिवादिमांमतेबोद्धम् ॥

वचनेसामर्थ्यादिति। श्रोतान्यवधानमाश्रित्येत्यर्थः। अनूद्यमानस्येति। साक्षादनूद्यमानविशेषणतयावानूद्यमानस्येत्यर्थः। विशेषणेषु, आपीत्यादिषु॥ सिद्धिरिति॥ अ
स्यतेरुक्तमिति शेषः। अनेनतत्रसूत्रे एतस्यैवज्ञापकत्वंवर्णयतोऽत्रचैवंवदतस्तवपूर्वापरविरोध इति भावः॥ यदिलन्तरङ्गत्वेनस्थानसंबन्धलाभ इत्यर्थः षष्ठीस्था
नेइत्यत्रभाष्येस्पष्ट इति स्थानेग्रहणंव्यर्थमेव तस्य परिभाषालभ्यत्वाभावे नज्ञापकासंभवात्। वृद्धसञ्ज्ञायामिक्परिभाषानुपस्थितिस्तु मालादीनांचेति ज्ञापकात्, तद्वि
प्रस्थेः वृद्धमिति पर्युदासे प्राप्ते आरभ्यते अनुवादे इति च निर्मूलम्। यद्वा इक्परिभाषा च परिभाषयोर्विधीयते इत्यद्याहारात्तत्र तस्या अप्रवृत्तिरनुवादे इति च तद्विषयमे
तदेतदुक्तम्। अकारस्येकारस्यादापि पर इति। ककारविशेषणत्वे तु विवक्षिते आप् परात्ककारात् पूर्वस्यात इत्यवक्ष्यत्। यत्तु प्राञ्चः। आपीति ककारविशेषणं
सर्विकेत्यादौ तु एकादेशस्य स्थानिवद्भावादकारेण व्यवधानेऽपि वचनसामर्थ्याद्भविष्यतीति। तन्न। रथकट्यादावतिप्रसङ्गात् व्यवहितस्यापि परत्वानपायात्। न
च निर्दिष्टपरिभाषया निस्तारः। अनुवादे परिभाषाणामनुपस्थितेः। अनूद्यमानविशेषणेष्विति हितदर्थः। अत्र च उदीचामात इति सूत्रे स्थानेग्रहणं लिङ्गम्। फलन्तु
वृद्धसञ्ज्ञायामिक्परिभाषानुपस्थानात् शालीयादिसिद्धिः। यदप्याहुः। आपीति विधीयमानस्येतो विशेषणमिति। तत्स्वकीयः। आपीत्यस्याङ्गविशेषणत्वं त्वना
शङ्क्यमेव। रथकट्यापुत्रकाम्येत्यत्रातिप्रसङ्गात्। शकेति। पचाद्यच्। स्यग्रहणं विस्पष्टार्थम्। ककारमात्रस्य प्रत्ययस्याभावादेव तात्स्थ्यलाभात्। पूर्वस्य किम्। सर्विके
त्यादौ टाबेकादेशं बाधित्वा कात्परस्य माभूत्। तस्मादित्युत्तरस्येति परिभाषणात्॥

यात्, एवाल्लोपो न इत्यत्र यजादिस्वादिपर इत्यस्यान् विशेषणत्वेऽपि अव्यवधानलाभ इति ष्यङ इति सूत्रे भाष्ये ध्वनितं संगच्छते इति विभाव्यते तदा संनिहितत्वादिनैवा
पीत्यस्याकारविशेषणतेति बोध्यम्। तत्स्वीय इति। विधेयस्यासिद्धत्वेन तद्विशेषणासंभवादिति भावः। अनाशङ्क्यमेवेति। श्रुतेनान्वयसंभवेऽश्रुतेनान्वयायोगादिति भा
जः लक्ष्यविसंवादमप्याहारयेत्यादि। तात्स्थ्यलाभादिति। कान्तात्प्रत्ययादिति तु नार्थः क्षिपकादीनां निषेधस्य व्यर्थत्वापत्तेः॥

ऽअपवादेइति॥येननाप्राप्तिन्यायेनबाधकविषयेतेनैवन्यायेनबाधसिद्धेरितिभावः।प्रत्ययस्थेकीति।प्रत्ययेकीत्येवमुक्तंनयासयोरितिज्ञापकात्कादौप्रत्ययइतिनार्थइतिबोध्यम्
एवंचाप्परस्यप्रत्ययस्थककारपरस्यचातइदित्यर्थः।तत्रसामर्थ्यादाप्परत्वांशेककारव्यवधानंसोढव्यमेवेतिभावः॥विग्रहइति।दक्षिणापश्चादितित्यक्।अन्यथा।दिग्वाच
यत्तुवार्णादाङ्गमितिपरिभाषयाएकादेशोबाध्येतेत्याहुः।तन्न।अपवादेपरत्वस्येवउक्तपरिभाषायाअपिनिष्फलत्वात्।वस्तुतस्तुप्रत्ययस्थेकिइतिसप्तमीनि
र्देशएवोचितः।पूर्वग्रहणंचसुत्यजम्।अतइतितपरः किम्।कृदाधारार्चिकलिभ्यःकः।धाका।राका।मामिकेति।केवलमामकेत्यादिनासंज्ञाछन्दसोरेवेतिनियमा
न्नङीप्।त्यक्त्यपोरिति।उदीचामातस्थानइतिविकल्पस्यापवादः।दाक्षिणात्यिकेति।दक्षिणस्यामदूरेदक्षिणा।आजन्तः।दक्षिणाभवेतिविग्रहः।यत्तुदक्षिणस्यांदि
शिभवेतिप्राचाविगृहीतम्।तन्न।त्यग्विधोवव्ययसाहचर्यादाजन्तस्यैवदक्षिणाशब्दस्यग्रहणात्।अन्यथासर्वनाम्नोवृत्तिमात्रेइतिपुंवद्भावापत्तेश्च।यत्तुसमा
सेएवपुंवदितितन्नेतिवक्ष्यते।त्यकिकिनिचेत्यादिइद्वोटाप्।ततोऽज्ञाताद्यर्थेकः।केणइतिह्रस्वः।टाप्।इहत्यिकेति।अव्ययात्त्यप्।नयासयोः।अत्रन्यासकारः।याइ
त्येतस्योदीचामातस्थानइतिविकल्पेप्राप्तेनिषेधोयमिति।तन्न।आत्स्थानेइत्यंशस्येहाभावात्।यासेतियत्तदोरुपलक्षणमित्याशयेनाह।यत्तदोरितिस्वरूप
स्याविवक्षायांफलमुदाहरति।यकांतकामिति।यासयोरित्यपहाययत्तदोरित्येववक्तुमुचितम्।उपत्यकेति।उपाधिभ्यांत्यकन्नासन्नारूढयोः।क्षिपकादीनां
च।नेत्यनुषज्यते।क्षिपकेति।क्षिपेरिगुपधलक्षणःकः।ततोऽज्ञातादौकः।चटभेदने।पचाद्यच्।ततःकः।तारकेति।तरतेर्ण्वुल्।ज्योतिर्नक्षत्रंनेत्रकनीनि
काच।वर्णकाप्रावारविशेषः।तन्तूनांविकारस्तान्तवम्।ओरञ्।अन्यत्रवर्णिकेति।ग्रन्थविशेषस्यव्याख्या।स्तोत्रकर्त्रीच।वर्तयतीतिवर्तका।शकुनौइत्वं
वा।अन्यत्रनित्यमेव।पितरश्चताःदेवताश्चपितृदेवताःतदर्थंकर्मपितृदेवत्यम्।देवतान्तात्तादर्थ्येयदितियत् ॥
कस्पर्तविग्रहणे।चेनसाहचर्यत्यागेमानाभावः संगृहीतः॥इहाभावादिति।अकचःसत्त्वादितिभावः।प्रावारविशेषइति।वर्णयत्याच्छादयतीतिव्युत्पत्तेः ॥

जागरूकेइति। स्थानेपदाभावेप्यन्तरङ्गत्वात्स्थानसंबन्धस्यैवलाभइत्यपिबोध्यम्॥ प्रतिपदोक्तस्येति। स्त्रियामित्यधिकृत्यविहितस्येत्यर्थः। विशिष्यतदनुपादानात् कथं तल्लाभइतिचिन्त्यम्॥ इच्छन्तीति। तद्भाष्यादावदर्शनादयुक्तम्। शुभंयाः विच्ततः कइति। नदीसञ्ज्ञासूत्रस्थभाष्यप्रामाण्यादादन्तेभ्यः क्विपोनभिधानाद्विज्युक्तः। तत्रहि अश्नन्तिब्राह्मणाः यस्यांसाअष्टका। इष्यशिभ्यान्तकन्। अष्टिकान्येति। अष्टौपरिमाणमस्याः। संख्यायाअतिशदन्तायाः कन्। अर्थगतंस्त्रीत्वमाकारेऽध्यारोप्ययकपूर्वायाइतिस्त्रीलिङ्गनिर्देशः। तेनस्त्रीप्रत्ययोलभ्यतइत्याशयेनाह। स्त्रीप्रत्ययाकारस्येति। साङ्काश्यिकेति। सङ्काशेननिर्वृत्तंसांकाश्यम्। वुञ्छणादिसूत्रेणसंकाशादिभ्योण्यः। ततोभवार्थेधन्वयोपधाद्वुञ्। अकादेशः। सचसांकाश्यभवांस्त्रियमाहेतितदकारस्यापित्वंविकल्प्येत, तस्मादातइत्युक्तम्। ननुयथायमकारोनाकारस्थानिकएवंस्त्रीप्रत्ययस्थानिकोनेतिह्यङ्गविकलमेतत्। अत्राहुः। सतिह्यातइत्येतस्मिन्स्त्रीलिङ्गनिर्देशबलात्स्त्रीवाचकआकारः स्त्रीप्रत्ययएवेतिलभ्यते। असतितुतस्मिन्स्त्रीवाचकस्ययोऽकारइत्येतावल्लभ्येत, ततः सांकाश्यिकेत्यत्रापिप्रसज्येतेति। अत्रेदंवक्तव्यम्। यकपूर्वायाःस्थानेइतिस्थानेशब्देजागरूकेकथमवयवषष्ठीत्वंगम्यताम्। नचवुञःस्थानेऽयमितिवाच्यम्। अकोनिसमुदायस्यतथात्वेपिअकाररूपावयवस्यातथात्वात्। वुञोयकपूर्वत्वाभावाच्च। नहितस्यामवस्थायांयस्येतिलोपोलभ्यते। किंच प्रतिपदोक्तस्यस्त्रीप्रत्ययस्यलाभेभवार्थविहितस्यवुञादेःप्रसङ्गएवनास्ति। तस्मादातइतिस[illegible]। अश्विकेति। कौमारास्तुभस्त्रादिवाक्येस्वशब्दमपिपठन्तोस्यापिविकल्पमिच्छन्ति। शुभंयातीतिशुभंयाः विच्। ततः कः। केऽणः। शुभमितिमान्तोनिपातः। सुष्ठुनयोयस्याः सुनया। ततः कः। भस्त्रैषा। तदन्तेति। आङ्गत्वादितिभावः। एवंचेति। उक्तंचहरदत्तेन। अत्रातस्थानइत्येतत्स्वशब्दस्यविशेषणम्। संभवव्यभिचारौहितत्रस्तः काकचोःसतोः। द्वैषयोःसंभवोनास्तिनान्यत्रव्यभिचारिता। सर्वनाम्नःस्वशब्दस्यतेननायंविधिर्भवेत्इति। इहस्वशब्दस्येत्यस्यानन्तरमतइतिशेषोबोध्यः। एतच्चइहमूलेध्वनितम्॥ ७ ल्यारव्याविति पदेआदन्तलक्षणोविज्युक्तोननुक्विप्इत्याहुः। कैयटस्तुशुभंयातिक्विप्। शुभमितिनिपातो[illegible]दोवा। केणइतिह्रस्वइत्याह। मूलेपिध्वनितमिति। स्वशब्दस्यातोविशेषणमित्यादिनाभवत्युदाहरणमित्यन्तेनग्रन्थेनेतिभावः ॥

स्विकाचामित्नीति। स्त्राशब्दादत्यन्तस्वार्थिकेके इत्वेसाधुः। नह्यकच्अत्यन्तस्वार्थिकस्याप्यपवादः॥ व्याचक्षाणा इति। अकचमुक्त्वावैकल्पिकमित्वंव्याचक्षाण इत्यर्थः। स्त्रीत्वमेवनास्तीति
स्वोज्ञातावात्मनिस्वन्त्रिष्वात्मीयेस्वोस्त्रियांधने इतिकोशादितिभावः। सञ्ज्ञाविषयकमिति। सञ्ज्ञायाअपिसञ्ज्ञापूरण्योश्चेतिपुंवत्वनिषेधेनभाषितपुंस्कत्वबोधनादभाषितपुंस्का
श्चेत्यनेननसिद्धिरितिभावः। अत्यन्तस्वार्थिककान्तविषयंचेदस्यपिबोध्यम्॥ उपलक्षणमिति। भस्त्राशब्दसाहचर्येणव्याख्यानेनचश्रुतानुपूर्वीकस्यैवैषाशब्दस्यग्रहणमतएवैषाद्वे
एवंचहंसतनौसन्निहितंचरन्तंमुनेर्मनोवृत्तिरिवस्विकायामितिश्रीहर्षश्लोकेभस्त्रैषेतिवैकल्पिकमित्वमितिव्याचक्षाणाउपेक्ष्या इतिभावः। आत्मीयायामिति। आत्मज्ञातिध
नेषुतुस्त्रीत्वमेवनास्तीतिभावः। यत्तुज्ञातिधनयोः स्वकास्विकेतिरूपद्वयमाकरेस्थितमित्याहुः। तच्चिन्त्यम्। तादृशस्याकरस्याप्रसिद्धेः। लिङ्गानुशासनविरोधा
च्च। यत्तुस्वकास्विकेतिकाशिकायामुदाहृतंतत्सञ्ज्ञाविषयकंनतुज्ञातिधनविषयकम्। यदपिस्वार्थिकाः क्वचित्प्रकृतितोलिङ्गवचनान्यतिवर्तन्ते इतिपरिज
हुः। तदपिचिन्त्यम्। उक्तरीत्याकप्रत्ययान्तात्टापसम्भवेप्रकृतेरस्त्रीलिङ्गतयाआतस्थानेइत्वंशास्यदुरुपपादत्वात्। प्रत्युदाहरणान्युक्त्वाउदाहरणान्याह। निर्भ
स्त्रिकेत्यादि। निष्क्रान्ताभस्त्रायाः निर्भस्त्रा। उपसर्जनह्रस्वः। टाप्। ततोऽज्ञातेकः। कृतषत्वेति। सूत्रेविकृतनिर्देशोविवक्षितविषयोनतुन्यासस्योरितिवदुपलक्षण
मितिभावः। स्त्रीलिङ्गनिर्देशादजादयः स्त्रीलिङ्गाएवगृह्यन्ते। तेनेहन। शुभ्रोजोस्याः शुभ्राजिका। जानातीतिज्ञः। प्रियोज्ञोऽस्याः प्रियज्ञिकेति। अभाषित ——— वि
हितविशेषणतयाव्याख्यायाः फलमाह। बहुव्रीहेरिति। नित्यमिति। अस्यविकल्पस्याप्रवृत्तेः प्रत्ययस्थादित्युत्सर्गएवप्रवर्ततइत्यर्थः। परविशेषणत्वेत्वयंविक
ल्पः स्यादितिभावः। बहुव्रीहेरित्युपसर्जनोपलक्षणंतेनातिखट्विका। निःखट्विकेत्यादावपिनित्यमेव ॥ ७५ नञ्पूर्वेउदाहरणमितिभाष्येप्येषत्वेवोक्तम्। अन्य
थाएतद्वीत्येववदेदितिभावः। शुभ्राजिकेति। बहुव्रीहेष्टापिततः स्वार्थिकः कइतिभावः। एतेनातः स्थानिकत्वाभावादप्राप्तिरित्यपास्तम्॥ परविशेषणेत्वेत्विति। समुदायस्य
षितपुंस्कत्वेपितदवयवस्यखट्वशब्दस्यतथात्वेनततः परत्वात्परविशेषणेदोषः स्यादेवेतिभावः ॥

ह्रस्वप्रसे इति॥बहुजसखट्वाजसित्यवस्थायांकपिसुब्लुकि प्रत्ययलक्षणेनभागद्वयस्यसुबन्तत्वात्समाससञ्ज्ञायांसमासान्ताइति शास्त्रबलात्कबन्तस्यैवसमासत्वेनोपसर्जनस्त्रीप्रत्यया न्तान्तसमासरूपप्रातिपदिकाभावा द्गोस्त्रियोरितिह्रस्वत्वाभावेकेणइतिह्रस्वत्वेचनकपीतिनिषिद्धेआपोन्यतरस्यामितिह्रस्वेकपःप्रागवर्तिनःखट्वशब्दात्परस्यापोऽभाषितपुंस्कादिहि तत्वेनतत्स्थानिकाकारस्यायंविकल्पः ह्रस्वाभावेतुबहुखट्वाकेतीतिभावः।प्राञ्च आहुरिति।नचस्त्रियामित्यस्यगृह्यमाणविशेषणत्वान्नात्रदोषः।अनुपसर्जनाधिकारेणतदन्तविधौस्त्रिया मित्यस्यस्त्रीप्रत्ययप्रकृतिविशेषणतायाश्चज्ञापनेनादोषात्।अतएवधीवानमतिक्रान्ताअतिधीवरीसिद्धाति।प्राधान्येनतद्विशेषणतायान्याय्यत्वाच्च।अनुपसर्जनादितितुगृह्यमाणस्यैव

पैषिकेकपीति।आपोन्यतरस्यामितिह्रस्वपक्षेइतिभावः।अभिव्याप्येति।अतएवबहुयुवाशालेत्यत्रयूनस्तिरुपसर्जनत्वान्नेतिप्राञ्च आहुः।टिड्ढा।इहवृत्तिकृतासूत्रेख्युनपक्षिप्तः। औत्सीति।उत्सेभवा।उत्सादिभ्योञ्।नचशार्ङ्गरवाद्यञइतिङीनासिद्धमिदमितिवाच्यम्।तत्रजातेरित्यनुवृत्तेः।अन्यथापुंयोगेपिस्यात्।एतेनइहअञ्ग्रहणंस्पष्टार्थमितिप्राचोग्र न्थःप्रत्युक्तः।इहानेकंवाक्यंतत्रअनुपसर्जनमण्योकारस्तदन्तादितिव्याख्यानान्नेह।आपिशलमधीतेआपिशलाब्राह्मणीति।अत्रहिप्रोक्तार्थेऽण्उपसर्जनम्।अद्धेत्रण्तुलुप्तः। वर्णप्राधान्यान्नप्रत्ययलक्षणम्।अतष्टाबेवभवति।ताच्छीलिकेति।अयंभावः।शीलंछत्रादिभ्योणइतियोणस्तस्मिन्अण्कार्यंभवति।कार्मस्ताच्छील्येइतिज्ञापकात्।अनेनहिअन्नि तिअणिविहितंप्रकृतिभावंबाधितुंटिलोपोनिपात्यते।चौरीति।चुराशीलमस्याः।हलस्तद्धितस्य।उपधाभूतस्येति।ननुयस्येतिचेतियञोकारलोपेकृतेयकारस्यईकारपरत्वमस्त्येव।

किमुपधाग्रहणानुवृत्त्या।नचाल्लोपस्यस्थानिवद्भावः।यलोपेतन्निषेधात्।मैवम्।यलोपेकार्येऽल्लोपस्याभीयत्वेनासिद्धत्वात्॥ ७ विशेषणम्।अतएवकौम्भकारेयसिद्धिः।अन्यथाकुम्भका रेयोप्यापद्येतकुम्भेनसमासेपिकेवलस्यकारस्यप्रातिपदिकत्वेनतदर्थस्यापिस्त्रीत्वेनयोगात्ततोङीपिकुम्भेनैकार्थीभूतस्यापिविशिष्टस्यापत्येनयोगेतस्यायोगस्यवक्तुमशक्यत्वात्तेनापियोगेकदाचि त्ततोढकिविशिष्टस्यतन्निरूपिताङ्गत्वाभावेनकुम्भशब्दोकारेरुद्धानापत्तेः॥निष्कर्षेकार्थीभावस्यैवप्रत्ययोत्पत्तिनिमित्तत्वेमानम्।समुदायेनैकार्थीभावेऽवयवेनापितस्यैवसत्त्वात्।नचसमुदायान्ङी प्यपिअनुपसर्जनस्त्रीप्रत्ययेनटादिनियमाभावेनकदाचित्कारीशब्दादापत्तिस्तथापीतिवाच्यम्।एतदधिकारसामर्थ्यादेवतदादिनियमाभावेनाधिकस्यैवकार्यबोधात्ते ननुन्यूनस्येत्यदोषादिति

तदाशयोविंस्तरस्त्वन्यत्रबोध्यः।पुंयोगोपिस्यादिति।इष्यतेतुङीषित्यर्थः॥प्रत्युक्तइति।अनेनैवसिद्धेतत्रानुग्रहणंतूत्तरस[illegible]पत्नंस्त्रीत्यत्रजातिलक्षणङीष्बाधनार्थमितिबोध्यम्।अत्रहीति।नचै
वमनुपसर्जनाधिकारस्यचारित[illegible]णोक्ततदन्तविधिज्ञापकतानुपपत्तिरितिवाच्यम्।लक्ष्यानुसारिव्याख्यानेनस्त्रियामित्यस्यगृह्यमाणविशेषणतयापितद्वारणसम्भवात्।तस्माद्दृद्रुकुरुच
रित्येवतद्व्यावर्त्यसिद्धौतद्बलात्तदादिविधिंविनानोपपद्यतइतितज्ज्ञापकत्वंस्त्रियामित्यस्यप्रकृतिविशेषणत्वज्ञापकत्वंचेतिबोध्यम्।तत्करणेएतद्व्यावृत्तिरपिअनेनैवउपसर्जनपदेनोभयोरपिग्रह
अनपत्येतियञ्यपत्यग्रहणंकर्तव्यमितिवार्त्तिकंतथापिअपत्याधिकारविहितपरंतत्तादृशश्चगर्गादियञेवनतुदेवायञ्।तस्यापत्याधिकारात्प्रागेवपाठात्।अतएवभाष्यकृ
ता[illegible]यञश्चेतिगर्गादिभ्यः अयञितिचअकारःप्रश्लिष्टः।यस्कादिभ्योगोत्रे।यञञोश्चेतिसूत्रेप्येवम्।प्राचांष्फतद्धितः।तद्धितग्रहणंप्रातिपदिकसञ्ज्ञार्थम्।ननुतांविनापिषि
त्करणसामर्थ्यादेवङीप्भविष्यति।एवंतर्हितद्धितग्रहणमिञन्तादपिक्वचित्ष्फइतिज्ञापयति।यञन्तेसवर्णदीर्घेणापिरूपसिद्धौयस्येतिलोपस्यानावश्यकत्वात्।तेनआसुरेरु
पसंख्यानमितिवक्ष्यमाणंसिद्ध्यति।आयनेति।फकारादिषकारउच्चारणार्थः।आयनीनोर्नकारस्यनेत्वम्।फिनोनित्करणसामर्थ्यात्।कौरव्या।कथंतर्हिपद्यसौकूपमाण्डूकितवे
तावनिकःस्मयइतिभट्टिः।अत्राहुः।कौरव्यसाहचर्यादपत्यप्रत्ययान्तस्यैवमाण्डूकस्येहग्रहणम्।इहतुमण्डूकस्येयंभार्येतितस्येदमित्यण्।कुमारीति।प्रथमवयोवाचीए
षशब्दः।नत्वनूढत्वप्रयुक्तः।वृद्धकुमारीतितुगौणःप्रयोगः।त्र्यनीकेति।त्रयाणामनीकानांसमाहारः।अत्राजादेराकृतिगणत्वात्टाबितित्र्यनीकाधिकरणेमीमांसकाः।पञ्चा
श्वेति।नन्वत्रद्विगोरितिङीप्माभूत्ठगन्तत्वात्तुस्यादेवेतिचेत्।न।ठकोयोऽकारःइतिव्याख्यानात्।द्विबिस्तेति।सुवर्णबिस्तौहेम्नोक्षेइत्यमरः।आचितोदशभारास्युः॥
णमित्याशयात्।अण्कार्यमिति।ङीबित्यर्थः।ताच्छीलिकेइत्युक्तेस्तदस्यांग्रहणमितिणेदाण्डेत्येव।अकारःप्रश्लिष्टइति।तद्वार्त्तिकप्रत्याख्यानायेतिशेषः॥अभिजिद्विदभृदित्यादिसू
त्रे।स्त्रियामित्यनु[illegible]गोत्रार्थकत्वेपिनतत्रङीप्परिहारनेष्टः।संघाङ्केतिसूत्रेएतद्भाष्यप्रामाण्यादेकानुबन्धकपरिभाषायाअप्रवृत्त्यागर्गादियञएवग्रहणमितिभावः॥एवमिति॥
अकारःप्रश्लिष्टइत्यर्थः।प्रातिपदिकसञ्ज्ञार्थमिति।तत्फलंचङीषितिभावः।नचलिङ्गविशिष्टपरिभाषयातत्सिद्धिः॥एतत्सूत्रस्यैतत्समानार्थभाष्यप्रामाण्येनास्याःस्त्रीप्रत्ययप्रकरणेनु

पस्मि[illegible]ते।।सामर्थ्यादेवेति।।अप्रातिपदिकत्वेपीतिभावः।।उच्चारणार्थइति।तेनद्वकआदेशासिद्धिः।।निष्करणेति।।असञ्जातविरोधन्यायसहकृतेत्यर्थः।।नन्विति।अल्पवयस्यूढा
यामपिप्रयोगादितिभावः।।गौणइति।।पुंसाऽसंप्रयोगरूपसादृश्यादितिभावः।।ठगन्तत्वादिति।द्वाभ्यांशताभ्यांक्रीताद्विशतेत्यादौनिषेधश्चरितार्थोऽत्रहिकनोलुक्।कम्बल्यमिति।अप
रिमाणत्वेप्येतयोर्ग्रहणंनियमार्थमुन्मानस्यचेद्विस्तकम्बल्ययोरेवेति।तेनान्यत्रोन्मानेद्विपलीद्विनिष्कीत्यादिसिद्धिः।श्रुतत्वादिति।अवान्तरवाक्यार्थबोधोत्तरंयेनविधिरित्यस्यप्रवृत्तेस्त
द्विकम्बल्येति।द्वाभ्यांकम्बल्याभ्यांक्रीता।कम्बल्यमूर्णापलशतम्।कम्बलाच्चसञ्ज्ञायामितियत्।क्रीतार्थस्यठञोलुक्।द्व्याढकीति।द्वावाढकौपचतीति।आढकाचितपात्रात्खोन्य
तरस्याम्।द्विगोष्ठंश्चेतिखठञ्भ्यांमुक्तेप्राग्वतीयष्ठञ्तस्यलुक्।एतेनद्व्याचिताव्याख्याता।काण्डान्तात्।षोडशहस्तप्रमाणोदण्डःकाण्डम्।यद्यपिविशेषणेनतदन्तविधिःसिद्ध
स्तथापिअन्तग्रहणेअसतिक्षेत्रइत्येतत्श्रुतत्वात्काण्डस्यैवविशेषणंस्यान्नतदन्तस्य।ततश्चेहापिस्यात्।द्वाभ्यांकाण्डाभ्यांकाण्डप्रमिताभ्यांक्षेत्राभ्यांक्रीताद्विकाण्डीवडवेति।इ
हतुनस्यात्।द्विकाण्डाक्षेत्रभक्तिरिति।अतोन्तग्रहणम्।मात्रचइति।यत्तुप्राचोक्तंद्वयसच्चोलुगिति।तन्न।प्रथमश्चद्वितीयश्चऊर्ध्वमानेमतौममेतिसिद्धान्तात्।द्विकाण्डीरज्जुरिति।नन्वि
हापरिमाणान्तादितिपूर्वेणनिषेधःस्यात्।काण्डशब्दस्यायामपरतयाऽपरिमाणार्थत्वात्।परितःसर्वतःआरोहतःपरिणाहतश्चयेनमीयतेतद्धिपरिमाणम्।आढककुडवादि।न
तुयथाकथंचित्परिच्छेदकमात्रम्।यदाहुः।ऊर्ध्वमानंकिलोन्मानंपरिमाणंतुसर्वतः।आयामस्तुप्रमाणंस्यात्संख्याबाह्यातुसर्वत इति।अतएवद्विहस्ताभित्तिरित्यत्रङीब्न।अत्रा
हुः।नियमार्थमिदम्।क्षेत्रएवनिषेधोयथास्यादिति।अतोद्विकाण्डीरज्जुरित्यत्रङीबेवसूत्रस्यफलमिति।पुरुषात्प्रमाणे।यद्यपिपुरुषशब्दोजातिवचनस्तथापिद्वौपुरुषौप्रमाणमस्या
इतिमकोप्रमाणेवर्ततएवाप्रमाणशब्दसामानाधिकरण्यात्।वृत्तौतुनतुस्वभावादेव।तथाचशूल्बसूत्रम्।पञ्चारत्निःपुरुषइति।द्विपुरुषीति।अत्रन्यासकारः।प्रमाणेलोद्विगोर्नित्य
मितिद्वयसचोलुगित्याह।।७लालेश्रुतत्वात्तेनैवसंबधेजातेपश्चात्तदन्तविधावपिपुनर्व्यापारेमानाभावइतिभावः।।इहापीति।इहैवेत्यर्थः।।सिद्धान्तादिति।षोडशहस्तप्रमाणदण्डार्थका
[illegible]डशब्दस्तुतिर्यङ्मानमितिनतस्योर्ध्वमानत्वमितिभावः।।प्रमाणेवर्ततएवेति।।परिच्छेदकेवर्तत इत्यर्थः।।तत्स्वभावादिति।।वृत्तिस्वभावादित्यर्थः।।द्वयसचोलुगिति।।तस्यायंभावः।आयामोदैर्घ्यं

तच्चद्विविधम्।तिर्यगूर्ध्वंच।उन्मानंचतुलादावारोपयेनमीयते
तदिदंचविनियमव्याविरहादिति॥

प्रमाणवाचित्वाभावेनेति।तिर्यङ्मानस्यैवप्रमाणत्वात्।तिर्यङ्मानस्यैवायामपदेन प्रमाणलक्षणेग्रहणंनतूर्ध्वमानस्य।ऊर्ध्वंकिलोन्मानमित्युक्तेरितिभावः॥द्विगोर्लुगित्यं
शेपिप्रमाणेइत्यनुवर्त्तत एवेतितात्पर्यम्।प्रमाणत्वेनप्रसिद्धा इति।तिर्यङ्मानत्वेनप्रसिद्धा इत्यर्थः॥शमादीनामूर्ध्वाधरदिगवस्थितवस्तुपरिच्छेदकत्वेपितिर्यगवस्थितव
स्तुनोपिपरिच्छेदकत्वात्तत्त्वेनप्रसिद्धिरक्षता।अन्यथेति।नचप्रमाणेलइत्यत्रसमर्थानांप्रथमाद्वेत्यतोवेत्यनुवृत्तेरुक्तप्रयोगसिद्धिः॥आद्यपदयोरननुवर्तनेनवेत्यस्याप्य

तन्न।पुरुषशब्दस्यप्रमाणवाचित्वाभावेनप्रमाणेलइतिश्लोकवार्तिकस्यतत्राप्रवृत्तेः।येहिशमादिवत्प्रमाणत्वेनप्रसिद्धास्तत्रैतत्प्रवर्ततेनतुपुरुषशब्देपि।अ
न्यथापुरुषद्वयसमित्यत्रापिलुक्स्यात्।स्पष्टंचेदंपुरुषहस्तिभ्यामण्चेतिसूत्रेपदमञ्जर्याम्।नचैवंद्वयसज्दघ्नचावपिनास्मात्स्यातामितिवाच्यम्।उर्ध्वमानेम
तौममेतिवचनात्।एवंपुरुषात्प्रमाणेइत्यस्यापिसामर्थ्यादेवप्रवृत्तिः।यत्तुतत्रैवसूत्रेद्विगोर्नित्यंलुगितिवृत्तिग्रन्थमुपादायहरदत्तेनोक्तम्।तत्पादप्राप्तस्यैवात्रलुग्वि
धीयतइति।तदपिचिन्त्यम्।मुनित्रयानुक्तस्यविधानोक्तेर्व्याहतत्वात्।यदपिप्राचीनप्रक्रियांव्याचक्षाणैरुक्तंपुरुषहस्तिभ्यामित्यत्रपठ्यमानेनवार्तिकान्तरेणलुगि
ति।तदपिरभसोक्तिमात्रम्।उदाहृतसूत्रस्यभाष्यवार्तिककाराभ्यामस्पृष्टत्वादित्यास्तांतावत्।वस्तुतस्तु।पुरुषात्प्रमाणइतिसूत्रेद्विगोस्तद्धितलुकिइत्यनुवर्त्तते।
तत्सामर्थ्याल्लुगप्याक्षिप्यते।हरदत्तोक्तिरपिकथंचिदेवंपरतयैवनेयेतिसहृदयैराकलनीयम्।प्रमाणेकिम्।द्वाभ्यांपुरुषाभ्यांक्रीताद्विपुरुषागौः।तद्धितलुकी
त्येव।समाहारेपञ्चपुरुषी।ऊधसोनङ्॥

७ संबन्धात्॥लुक्स्यादिति॥शमइत्यादाविवेतिभावः॥सामर्थ्यादिति॥तिर्यगवस्थितवस्त्वपरिच्छेदकत्वेपिसामर्थ्यात्प्रमा
णपदस्यपरिच्छेदकमात्रपरत्वमितिभावः॥लुगप्याक्षिप्यतइति॥इदमपिवृत्त्याशयवर्णनमात्रम्।वस्तुतस्तुद्वौपुरुषौप्रमाणमस्येत्यर्थेतदस्यपरिमाणमितिठक्ष्ठञोर्वाद्धर्ये ति
लुकि[illegible]त्वस्यचारितार्थ्यात्तदाक्षेपेनमानम्॥तत्रहिपरिमाणशब्देनोत्तरसूत्रानुरोधेनपरिच्छेदकमात्रग्रहणमितितत्त्वम्॥

नादे[illegible]नेति।अतएवऊधसोनकारोलिङ्गाधिकारेइतिवार्तिककृतोक्तम्।एतेनलाक्षणिकत्वादस्यानोऽल्लोपोनइतिनस्यात्।कुण्डोध्न्यादिभ्यआचारक्विप्यात्मनेपदार्थंचङ्का
रइत्यपास्तम्।अन्त्यवार्तिकभाष्यप्रामाण्येनानुग्रहणेप्रतिपदोक्तपरिभाषयाआचारक्विबभावस्यचतदन्तेआत्मनेपदाभावस्यवाकल्पनात्।तदयुक्तमिति।अन्तर्वतीत्यत्रमतुपोऽप्र
प्रिरितिभावः॥तमुधेति।विभाषासपूर्वस्येत्यत्रयज्ञसंयोगइत्यस्यासंबन्धात्।अतएवाशायाःपतिराशापलीतितत्रोदाहृतंभाष्ये।आशापूरकत्वेनकस्याश्चित्तत्पतित्वमितिभावः॥इत्यु
नादेशेनैवसिद्धेऽनङ्करणंधनुषश्चेत्येतदर्थम्।दाम।बहुव्रीहिविशेषणत्वादेवसिद्धेअन्तग्रहणंस्पष्टार्थम्।संख्यादेरिति।स्वरितत्वबलादेकदेशएवानुवर्ततइतिभावः।
केवलमामक।इत्यादीति।अद्धास्यांमामकीतनू।मित्रावरुणयोर्भागधेयी।अनिषव्यास्तन्वःसन्तुपापीः।उतापरीभ्योमघवाविजिग्ये।समानीवआकूतिः।आर्यकृती।सु
मङ्गली।शिवारुद्रस्यभेषजी।प्रत्युदाहरणंत्विति।यत्तुप्राचाअन्तर्वतीपतिवतीतिप्रत्युदाहृतम्।तदयुक्तमितिभावः।व्यस्तेकथमिति।यत्तुप्राचा समस्तेप्युपचारइ
तिवर्णितन्तन्मुधेतिभावः।पूतक्रतोरैच।ऐकारआदेशः।नतुप्रत्ययः।उत्तरसूत्रेउदात्तइत्युक्तेः।नत्विति।अन्यथावृषाकपिशब्दोलघावन्तेद्वयोश्चबह्वषोगुरुरिति
मध्योदात्तउदात्तत्वंप्रयोजयति।अग्न्यादिषुत्रिषुस्थानेन्तरतमइत्येवसिद्धमितिप्राचांग्रन्थाविरुद्धोरन्नितिभावः।उदात्तेकारइति।मनुशब्दोह्याद्युदात्तः।भृमृशिहीत्या
दौमनेरुप्रत्ययविधायकेसूत्रेधान्येनिदित्यधिकारात्।समासनिर्देशेनैतद्दर्शयति।उदात्तइत्यनुवर्त्तमानंसंबन्धानुवृत्तेरैकारेणैवसंबध्यतेनत्वौकारेणापीति।ततश्चयदु
क्तंप्राचाऐकारौकारउदात्तौस्तइतितदुपेक्ष्यम्।वृत्तिपदमञ्जर्यादिविरोधादितिभावः।मनायीति।मध्योदात्तम्।इतरद्वयमाद्युदात्तम्।एता।कर्बुरा।वर्णानामिति।एतः।शोणः।
शितिः।पृश्निः।पृषत्।इत्युदाहरणानि।त्रेण्येति।अत्रउत्तरपदस्योपसर्जनत्वेपिसमस्तस्यअनुपसर्जनत्वमितिभावः।सञ्ज्ञात्वासत्वंछान्दसत्वाद्वा॥ ७ क्तेरिति।प्रत्ययत्वेहिआ
द्युदात्तश्चेत्येवसिद्धेतद्वैयर्थ्यंस्पष्टमेवेतिभावः॥नत्वौकारेणेति।ततश्चसआन्तरतम्यादनुदात्तएवेतिभावः।इतर द्वय[illegible]मनावामनुरित्येतत्॥समस्तस्येति।एतच्चग्रन्थस्वारस्यानुसारेणो
क्तम्।टिड्ढाणञित्यादाविवात्रापिगृह्यमाणविशेषणत्वमेवेत्युपमानानीनिसूत्रभाष्यसंमतेपक्षेत्रिषुस्थानेषुएनीत्र्येणीतिबोद्ध्यम्।छान्दसत्वाद्वाङीप्।तस्यणत्वंसञ्ज्ञात्वानङ्गीकारेआह॥छान्द

सत्वाद्धेति॥ङीपणत्वंवेतिशेषः॥

प्राञ्चइति॥कैशरादयइत्यर्थः।छान्दसेषुसूत्रेषुवाग्रहणवदिदमेकइत्यपीतितेषांभावः॥नप्रत्ययेइति।दृशापाद्यनुसारेणेदम्।तत्रहिनप्रत्ययप्रकरणेतुषिशुजिरसिकृषेश्चकि
दितिइलचंप्रकरणेकमेश्चेतिपठितम्।कपिःसौत्रइतिचोक्तम्।पञ्चपाद्यांतुकृषेर्वर्णइतिनक्प्रत्ययः।कमेःपञ्चेतिइलजित्युक्तम्।पठ्यतइति।इदंचासिद्धवत्सूत्रेभाष्येस्य
श्यम्।उक्तंरूपमिति।नान्तंरूपमित्यर्थः।णिचिनस्तद्धितइतिटिलोपेतदभावःस्पष्टएव॥नचनस्तद्धितइतिटिलोपोनेष्ठवद्भावेनटेरितितुप्रकृत्यैकाजितिनिषिद्धमितिवाच्यम्।अस्य
मतस्यनामधातौदूषयिष्यमाणत्वात्।तस्थ्वनयतोक्तम्।मुख्यमतेइति॥नस्तद्धितइत्यस्यापिप्रकृतिभावइतिषपूर्वेतिप्रकृत्यैकाजितिसूत्रभाष्येध्वनितत्वेनपूर्वंटिलोपाभावेपि
क्रमेकेइति।अत्रछन्दसीतिभाष्योक्तेःलोकेगतोगणस्तूर्णमासिक्निकानामित्यादिप्रयोगाःप्रामादिकाइतिप्राञ्चः।वस्तुतस्तुछन्दस्येकेइत्यन्वयात्भाषायामपिइति
भाष्याभिप्रेतम्।अन्यथाएकग्रहणंनकुर्यात्।नहिछन्दसिपलिक्नीरिद्युवतयइत्यादिप्रयोगेषुकश्चिद्विप्रतिपद्यते।विशुद्धवाचीति।देपृशोधनेइतिस्मरणात्।अवदा
तःसितोगौरइतिकोशेतुविशुद्धत्वसाधर्म्यात्प्रयोगउपनिबद्धइतिभावः।लघाविति।अन्तेएकस्मिन्लघौद्वयोश्चलघ्वोःपरतोबह्वचोबह्वच्कस्यगुरुरुदात्तःस्या
त्।असितिअचःप्राचांसञ्ज्ञा।कृष्णेति।कृषेश्चेतिनक्प्रत्ययेकपेश्चेतिसौत्राद्धातोरौणादिकेइलचिचकृसकपिलावन्तोदात्तौ।षिद्गौरादिभ्यश्चाश्वन्शब्दोत्रपठ्यते।
तेनकृत्नेभ्योङीप्इत्यत्रयत्राचाशुनीत्युदाहृतंतत्प्रामादिकम्।यत्तुव्याचक्षते।श्वानमाचष्टेश्वेवाचरतीतिवार्थेणिचःक्विपोवाक्वौउपसर्जनत्वात्ङीषभावेनिः
शुनीत्यादिवत्ङीबिति।तन्न।णिचिसंप्रसारणटिलोपयोःकृतेरूपंमुख्यमतेदुर्लभम्।अन्यत्रतुआस्तांकथंचित् ॥
संप्रसारणेवार्णादाङ्गमितिपररूपात्पूर्वंटिलोपइतितस्यदौर्लभ्यम्।तदुक्तंसंप्रसारणटिलोपयोरिति।अन्यत्रक्विबन्तात्क्वौअनुनासिकस्येतिदीर्घेपिएकदेशविकृतन्या
येनानत्वमितिसंप्रसारणंभवतीतिभावः॥कथंचिदिति॥अनेनारुचिःसूचिता।तद्बीजमेषामनभिधानम्।अन्यथाऽनुपसर्जनादितिसूत्रस्यतदन्तविधिज्ञापकताभाष्योक्ता
भज्येत।किंचाचक्षाणकर्त्रादिरूपार्थस्यापिश्वशब्दार्थत्वेनतस्यानुपसर्जनत्वादस्त्येवङीषःप्राप्तिरभिव्यक्तेतिन्यायस्तुपदकार्यविषयएवेति ॥

इत्याहुरिति । ।अत्रारुचिबीजंत्वाकडारसूत्रस्थभाष्यविरोधस्तत्रहिसमस्तकृदन्ततद्धितसर्वनामजातिसंख्यासञ्ज्ञाशब्दातिरिक्तप्रातिपदिकमात्रस्यगुणवचनसञ्ज्ञाकृताबहुशब्दस्यसंख्या।अत्रार्थेबहुग्रहणमपिमानम्।सत्त्वेनिविशतइत्यादिगुणलक्षणमपितदेकवाक्यतापन्नमित्यन्यत्रप्रपञ्चितम्।व्यर्थमेवेति।उत्तरार्थमितिवदतांमतेइतिशेषः॥गौणीवृत्तिरिति।लक्षणेत्यर्थः।नत्वेषागौणीसादृश्यसंबन्धमूलकलक्षणायाएवगौणीत्वात्।इङश्चेतिसूत्रेइति॥अपादानेस्त्रियांघञउपसंख्यानन्तदन्ताआवपनंचेदिति।ओप्यतेनिक्षिप्यतेधान्यंयस्मिन्।गोणान्येति।यस्यायादृच्छिकंनाम।अकृत्रिमेति।यथासैषास्थलीयत्रविचिन्वतात्वामिति।स्थलान्येति।कृत्रिमापुरुषेणसंस्कृता।यथास्थलयोदकंपरिगृह्णन्ति।श्राणा।पक्वा।अयोविकारइति।फालइतिप्रसिद्धः।कुशान्येति।छन्दोगाःस्तोत्रीयागणनार्थान्औदुम्बरान्शङ्कून्कुशाइतिव्यवहरन्ति।अतःकृकमीतिसूत्रेहानौतूपायनेतिव्याससूत्रेकुशावानस्पत्याःस्थतामायानेतिश्रुतौचप्रसिद्धएवायम्।पतिंवरेति।तथाच।पाणिग्रहणोत्कण्ठाभिधायित्वाद्गुणवचनोयमितिभावः।बह्वादिभ्यश्च।बहुशब्दस्यगुणवाचित्वात्पूर्वेणसिद्धेउत्तरार्थंग्रहणमित्याहुः।वस्तुतस्तुबहुशब्दोनित्यंछन्दसीत्युत्तरसूत्रंचेतिद्वयमपिव्यर्थमेव।सर्वविकल्पानांछन्दसिव्यवस्थितत्वात्।पुंयोगादिति।तथाचगौणीवृत्तिरितिभावः।यदातुमुख्यार्थान्तस्येदमित्यण्तदागौपीत्येवभवति।योगश्चेहदम्पतिभावएवेत्येके।वस्तुतस्तु।संकोचेमानाभावाज्जन्यजनकभावोपिगृह्यते।तथाचभट्टिः।कौशल्ययासाविसुखेनरामःप्राक्केकयीतोभरतस्ततोभूदिति।केकयस्यदुहिता।केकयी।जनपदशब्दादित्यपत्यप्रत्ययेतुकैकेयीतिस्यात्।नचतस्यअतश्चेतिलुक्।नप्राच्यभर्गादीतिनिषेधात्।तथाचकालिदासः।कैकेयिकायाःफलितास्तवेति।एतेनदेवकीव्याख्याता।दुष्टोयवोयवानीति।जात्यन्तरमेवानेनाभिधीयते।अयमेववातस्यदोषः।यदुक्तयवत्वजातेरभावेपितदाकारानुकृतिःङीष्वाच्यइति।इदञ्चतृतीयेभाष्येइङश्चेतिसूत्रेस्थितम्।कथमिति।यत्तुवदन्ति।दीर्घोच्चारणसामर्थ्याद्आअनुक्इतिपदंविभज्यते॥ ५१ इवाङीषितितत्रोक्तम्।उपेत्याधीयतेयस्मादितिविग्रहः।दीर्घोच्चारणे[illegible]निचेन्द्रादिशब्देभ्यआचक्षाणणिचिटिलोपेइन्द्राणीतिसिद्ध्यर्थंतत्।अदन्त्वाभावेनतत्राप्राप्तेः।पदंविभज्यतेइति।तत्रनकारोच्चारणसामर्थ्यात्श्रुतक्रमानुरोधेनचपूर्वमाकारस्ततोतअनुगितिबोध्यम्।स्पष्टार्थंदीर्घाकारआदेशउक्तः॥

प्रसङ्गादिति। इन्द्रादिशब्दे इतिभावः। अकारोच्चारणेति। अनुकीर्तिशेषः। अल्लोपो नइत्यस्य बाधेनेति अल्लोपो नइत्यस्य लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तेर्बहुव्रीहेरूधस इतिसू
त्रभाष्यसंमतत्वात्। ककाराभावे वस्यप्राप्तस्य अल्लोपो नइत्यस्य बाधेनाकारोच्चारणस्य चारितार्थ्यादित्यर्थः। नभविष्यतीति। एवं च न तद्बाधार्थमाकारोच्चारणमिति पररूपस्य तेन बा
धादिति भावः। पररूपबाधनार्थमिति। अल्लोपबाधेन चरितार्थस्य पररूपबाधकत्वे मानाभावेनेन्द्रशब्दे पररूपबाधायाकारोच्चारणस्यावश्यकत्वेन त्वदुक्तकल्पनानवकाश इति भा
तत्रेन्द्राद्रीनासिनुकैव सिद्धे आकारादेशविधानसामर्थ्यात् क्वचिदन्यतोऽपि विधानमनुमीयते [illegible] अनुकि कृते नो गुण इति
पररूपप्रसङ्गात्। नन्वकारोच्चारणसामर्थ्याद्दीर्घो भविष्यति अन्यथा हि नुकमेव कुर्यात् [illegible] नइत्यस्य बाधने चरितार्थ [illegible] र्न इति वदादेशे क
र्तव्ये आगमलिङ्गककारोच्चारणसामर्थ्याद्वाल्लोपो न भविष्यतीति चेन्न। सर्व [illegible] चारितार्थ्यात्। न हि तत्राल्लोपोऽस्ति। न संयोगादि [illegible] त्। तस्मात् क
काराकारयोः सामर्थ्यविरहे पररूपबाधनार्थं दीर्घोच्चारणमावश्यकमिति। एतेनानुक् ह्रस्वादिरेव लाघवाद् कर्तव्य इति हरदत्तोक्तिरपि प्रत्युक्ता। कर्मे [illegible] तदन्तान्
ङीप्। पूर्वपदात्संज्ञायामिति णत्वम्। दन्तक्रीतेति। वस्त्रभिस्क्रीत इत्यस्यामवस्थायां प्राक्सुबुत्पत्तेः समासे दन्तत्वान्ङीष्। क्वचिन्नेति। कर्तृकरणे [illegible] बहुल
ग्रहणात् क्वचित्सुबन्तेन समासः। तत्र च सुपः प्रागेवान्तरङ्गत्वात् टाप्। ततो दन्तत्वाभावान्न ङीष् इति भावः। तेन बह्विति। अयं भावः। बहोर्नञ्वदुत्तरप [illegible] त्र
सुभ्याम्। जातिकालसुखादिभ्यो ना [illegible] क्तोऽकृतमितप्रतिपन्नाः इति ह्यन्तोदात्तताविधायकानि। तत्र जातिपूर्वादित्युक्ते बह्वादिपूर्वकस्यार्थाद्युदास इ
ङ्गपूर्वपदाद्विकल्पस्य वक्ष्यमाणत्वा [illegible] ङ्गपूर्वपद एवोदाहरणमित्याह। ऊरुभिन्नीति ॥ ७५ वः। ङीबिति। इन्द्रवरुणेति सूत्रं त्विन्द्रीत्यादिव्यावृत्त्यर्थमु
वृत्तिस्वरेण च स्वरे न विशेष इति भावः। सुबुत्पत्तेरिति। टाबुत्पत्तेश्चेत्यपि बोध्यम्। बहुलग्रहणादिति। अत एव गतिकारकेत्यादेरनित्यत्वेनाप्रवृत्तिरिति भावः। सुखादिभ्य इ
सुखादयश्च सुखादिभ्यः कर्तृवेदनायामित्यत्र पठिताः सुखदुःखकृच्छ्रादयः। सकृदाख्यातनिर्ग्राह्येत्यत्र द्वितीयं लक्षणम् ॥

तन्नोख्यातमुपदेशादित्याशयेनाह॥ एकस्यामित्यादि॥ ब्राह्मणत्वमप्येवंतत्पितृपितामहादौ सुग्रहमिति बोध्यम्। इयंचनाकृतिग्रहणा ब्राह्मणक्षत्रियाद्याकारस्य समत्वादिति बोध्यम्॥ बा
धतेइति। गोत्राणीति शेषः। प्रतीकमादायेति। औपगवीत्यस्य गोत्रानन्तरापत्यसाधारणत्वेन विशिष्य इति तदुक्तिरुपेक्षेत्यर्थः॥ एतेन जातिलक्षणे एको गोत्र इति सूत्रस्य भाष्यप्रामाण्येन पा
जातान्तादिति। वर्णादनुदात्तादिति बहुव्रीहेरुदात्तादित्येव सिद्धेऽन्तग्रहणं नित्यत्वप्रतिपत्त्यर्थम्। षाजात इति तु वैकल्पिक उदात्तो न तु नित्य इति भावः। सुमुखा शालेति। एवं च फ
प्रयोजकसंनिधानेपिप्रयोज्यस्यास्त्येव।नचोपलक्षणत्वेप्रमाणाभावः।प्रधानकर्मण्याख्येयेलादीनाहुर्द्विकर्मणाम्॥अप्रधानेदुहादीनांमित्युक्ता ण्यन्ते
कर्तुश्चकर्मणइतिवदतोभाष्यकृतएवतत्रप्रमाणत्वात्।नहिलक्षणांविनाणिजन्तानांद्विकर्मकतालभ्यते येनण्यन्तेकर्तुरितिवचनंसावकाशंस्यात्।ननु
स्वतन्त्रेसंकेतितस्यतत्रैवलक्षणाकथमितिचेत्संज्ञान्तरानुपहितेसंकेतितस्यसदुपहितसाधारणेस्वतन्त्रमात्रेसेत्यवधेहि।नीवह्योरिति।यद्यप्यनयोःप्राप
णमर्थोनगतिस्तथापिगतिरपिविशेषणीभूयप्रापणमङ्गप्रविष्टेत्येतावन्मात्रेणप्राप्तिमत्त्वाप्रतिषेधउक्तः ॥ अभ्यवहरतिमुदाहृत्याप्राप्तेहरतिभारंदेवदत्तोहार
यतिभारमित्युदाहरणम्।विपूर्वोहरतिर्गत्यर्थोभ्यवपूर्वःप्रत्यवसानार्थइतितत्रत्यकैयटाच्चनगतीतिसूत्रेभाष्येहृवह्योरप्रतिषेधःसंप्रहरन्तेराजानइतिहिंसार्थेरावभाष्येउदाहरणाच्चात
त्रैववहिर्नगत्यर्थः।देशान्तरप्रापणंहिवहेरर्थइतिभाष्येणप्रापणस्यगतित्वाभावबोधनाच्चनगत्यर्थत्वेनतेषांग्रहणम्।प्राप्तिश्चसंबन्धमात्रंनसंयोगएव।सुखंप्राप्तोधनंप्राप्तोभूःप्राप्तेत्यादिव्यवहा
रात्।आदिकर्मणिचकर्तरिक्तःदेशान्तरप्राप्तेःपरंगतिंविनानुपपत्त्याक्षविनान्तरीयकतयागतिप्रतीतिरस्त्येवतादृशमपिगत्यर्थकत्वमभिमत्यवार्त्तिकारम्भः।वस्तुतोप्राप्तिरेवेतिअनेनसूचितम्।
न

हिंसेति। हिंसाङ्गे भक्षणे च भक्षयतेर्वृत्तिर्बोध्या। भाष्यप्रयोगादेवेति। आद्यानार्थकघटादिभिन्नस्मरतेरेव योगे तद्भाष्यप्रामाण्यात्कर्मत्वाभावो घटादेस्तु भवत्येव कर्मत्वमिति भावः।
परास्ता इति। इदं च कैयटानुरोधेनोक्तम्। वस्तुतः शब्दक्रियाणामिति पक्षे आध्येह्वाययति शब्दाययति क्रन्दयतीत्यत्र निषेध उक्तो न तु शब्दकर्मकाणामिति पक्षे एवं च तत्र पक्षे शब्दायतेप्र
नियन्त्रिति। नियन्ता पशुप्रेरको न तु सारथिरेव तेन वाहयति बलीवर्दान् सवान् इति सिद्ध्यति। अनिषेध इति। प्रयोज्यः कर्मेति वक्तव्यमिति फलितोऽर्थः। सूत इति। नियन्ता प्राजिता यन्ता
सूतः क्षत्ता च सारथिः। आदयतीति। अकर्त्रभिप्राये फले शेषात्कर्तरीति परस्मैपदं कर्त्रभिप्राये तु णिचश्चेत्यात्मनेपदमेव। तदपवादस्तु निगरणचलनार्थेभ्यश्चेत्यस्य अदेः प्रति
षेध इति निषिद्धत्वात्। सस्यमिति। क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिंसादृष्ट्या तस्यामवस्थायां तेषां चेतनत्वात्। स्मारयतीति। यत्तु णेरणाविति सूत्रे स्मरयत्येनं वनगुल्म
स्वयमेवेत्युदाह्रियते तत्र भाष्यप्रयोगादेव कर्मत्वं बोध्यम्। शब्दायते इति। शब्दं करोतीत्यर्थे शब्दवैरेत्यादिना क्यङ्। ततो हेतुमण्णिच्। धात्वर्थेति। एतेन शब्दाययति सैनिके
रिपूनिति कर्म प्रयुञ्जानाः परास्ताः। यत्तु प्राचा अयं क्रन्दशब्दायह्वेञां नेत्युक्तं तत्रायतेरुक्तिस्तावन्निर्मूलैव। क्रन्दह्वेञोस्तु शब्दक्रियत्वमात्रेण प्राप्तिसंभावना। वस्तुत
स्तु नाशेः सूत्रार्थ इत्युक्तम्। यदपि भ्रुग्रहदृशामिति कर्मत्वमुक्तम्। तत्र दृशिग्रहणं प्रामाणिकमेव। घ्राणोतेस्तु शब्दकर्मकत्वात्सिद्धम्। ग्रहेस्तु द्विकर्मकत्वं यद्यपि सुधाकरादीनां संमतं तथा
पि बहूनामसंमतम्। अत एव अजिग्रहत्तं जनको धनुस्तदिति भट्टिप्रयोगमजिग्रहत् बोधितवानिति व्याचख्युः। तथा अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं श
शाकेत्यत्र ग्राहयितुमुद्वाह्यत्वेन बोधयितुमिति। युक्तं चैतत्। ग्राहेर्द्विकर्मकत्वे हि जायाप्रतिग्राहितगन्धमाल्यामित्यत्र क्तेन प्रयोज्याया धेनोरभिधानं स्यात्। ण्यन्ते कर्तु
श्च कर्मणा इत्युक्तेः ॥ तिषेधानुक्त्याऽकर्मकशब्दाययतिसत्त्वे न मानम्। शब्दस्य धात्वर्थेन संगृहीतत्वेऽपि बहिर्भूतप्रश्नादिकर्माभावेन मानमिति बोध्यम्। आचख्युरिति।
तेन बोधनातिरिक्तार्थस्य न द्विकर्मकत्वम्। अन्यथाऽप्रसिद्धार्थपरिग्रहो व्यर्थ एव स्यादिति भावः। ग्राहेः। बोधनातिरिक्तार्थग्राहेः ॥

ततश्चेति।एवंचव्यधिकरणत्वादन्यपदार्थाभावाच्चबहुव्रीहिर्नस्यादितिभावः।प्रतिग्राहितेइति।अस्यजाययेत्यादिः।तत्रजायाप्रतिग्राहितशब्दयोस्तृतीयातत्पुरुषंकृत्वाबहुव्री
हिःकार्यइतिभावः।बहुव्रीहिणातृतीयातत्पुरुषस्तुदुर्लभोविधायकाभावात्।अवयवेनसामर्थ्येपिसमुदायेनतृतीयान्तस्यासामर्थ्याच्चतदाह।जायानिष्ठेति।ननुद्विकर्म
कत्वेपिधेनुरूपप्रयोज्यकर्मणःकर्मत्वाविवक्षायांगन्धमाल्यरूपकर्मण्येवक्तेइष्टसिद्धिरितिचेन्न।णिजुत्पत्त्यर्थप्रयोजकजायायाहेतुत्वावश्यकत्वेनहेतोश्चकर्तृप्र
योजकत्वरूपत्वेनप्रयोज्यायाधेनोःकर्तृत्वार्थंजायानिष्ठप्रेरणविषयीभूतव्यापाराश्रयत्वविवक्षायाआवश्यकत्वेनेदृशार्थस्यैवैतत्कर्तृसञ्ज्ञानिमित्तकोटौप्रवेशे
नेदृशविषयेकर्मत्वाविवक्षायाउपपादयितुमशक्यत्वात्।कर्मत्वशक्तेरपितत्त्वमनियतत्वेनाविवक्षायाअसंभवइत्यभिमानात्।नचनिवृत्तप्रेषणप्रतिग्रहधातोर्णिचि
ततश्चजाययागन्धमाल्येप्रतिग्राहितामितिस्यात्।सिद्धान्तेतुप्रतिग्राहितेगन्धमाल्येययेतिविग्रहः।जायानिष्ठप्रेरणविषयीभूतंगन्धमाल्यकर्मकंयस्प्रतिग्रहणंत
त्कर्त्रीमित्यर्थः।अन्यपदार्थान्तर्भावेणवविशेषणविशेष्यभाववैपरीत्येनैवैकार्थीभावकल्पनात्।अभिवादिदृशोरिति।अभिवादयतेरप्राप्ते दृशेस्तुप्राप्तेविभाषेयम्।अभि
नि। नेत्याद्यतरत्वेनपूर्वनिपातेकर्तव्येविपरीतोच्चारणमाहशसमुदायविवक्षार्थमित्याह।संघातपूर्वकस्येति।तेनेहन।निविशतेयदिशूकशिखापदेइति।क्वचिन्नेति।
एषयेसमभिनिविष्टानामितिभाष्यप्रयोगश्चेहमानम्।उपपदविभक्तिमाह।उभसर्वतसोरित्यादिना ॥ ७६ गन्धमाल्यकर्मण्येवक्तेइष्टसिद्धिर्नायापदेनषष्ठीसमासइ
तिवाच्यम्।प्रकृत्येवतदर्थलाभेणिजुपादानस्यापुष्टतापत्तेः।ननुगवादिपदानांविग्रहेस्वार्थमात्रपराणांसमासेन्यपदार्थपरत्वमिवप्रतिग्राहितशब्दस्यधेनुपरत्वेपिवृत्तौगन्ध
माल्यपरत्वंभविष्यतीत्यतआह।अन्यपदार्थेति।तदन्तर्भावेणैकार्थीभावस्यसूत्रव्युत्पत्त्यादिबलेनाङ्गीकारेप्यन्यान्तर्भावेणतत्स्वीकारेमानाभावइतिभावः।अभिवादयतेरिति।वदि
अभिवादनइतिण्यन्तस्येत्यर्थः।व्याख्यानात्सङ्ग्रहणेस्थितेव्याख्यानेबीजाभासंदर्शयति।पूर्वनिपातेति।निविशतेइति।अतएवसत्वेनिविशतेइतिभाष्यप्रयोगःसंगच्छते।भा
ष्यप्रयोगइति।समर्थसूत्रस्थइतिशेषः ॥

उभसर्वयोस्तसाविति।उभांशेउभशब्दघटितसमुदायोद्देश्यकत्वमित्यर्थइतिबोध्यम्।उभशब्दस्यशब्दपरत्वाद्वृत्तिविषयेविनायच्वार्त्तिके।उदाहरणेतुअन्तरङ्गत्वात्सूर्वमेवायचि
ततउभयशब्दान्तस्यापितद्घटितसमुदायोद्देश्यकत्वमस्त्येवेतिनदोषः।वृत्तिविषयेइति।वृत्तौकृतायामित्यर्थः।प्राचीनैर्हिउभौसाभ्यासस्येतिनिर्देशेनवृत्तिघटकेपरतएवा
यजितिव्याख्यातंतदाह।उभशब्दादित्यादि।एवंचतेषांलक्षणाश्रयणंव्यर्थमितिभावः।अविभक्तिकइति।अनुत्पन्नविभक्तिकइतितदर्थइतिव्याख्यातारः दृष्टान्तबलेनतथैव
उभसर्वयोस्तसौउभसर्वतसौतदन्तयोर्योगेद्वितीयाकार्येत्यर्थः।अत्रप्राञ्चः।उभशब्देनोभयशब्दोलक्ष्यते।अन्यथातसोसंभवादित्याहुः।वस्तुतस्तु।वृत्तिविषये
अयच्प्रवृत्तावपिउभशब्दाद्विहितोयस्तस्तदन्तमस्त्येवेतियथाश्रुतंसाधु।।धिगित्यविभक्तिकोनिर्देशः।गवित्ययमाहेतिवदितिप्राञ्चः।तन्न।तथासतिअपदा
न्ततयादृशान्तेलोपःशाकल्यस्येत्यस्येवद्गार्ग्यान्तिकेजश्त्वस्यापिअप्रवृत्तिप्रसङ्गात्।नचायंगकारान्तएवेतिभ्रमितव्यम्।कस्यचदइतिसूत्रेधकिदित्युदाहरणस्या
संगतिप्रसङ्गात्।तस्मात्धिगितिविभक्त्यन्तमेव।प्रकृतिवदनुकरणमित्यतिदेशात्तुपोलुक्।उभयतःकृष्णमिति।कृष्णस्यपार्श्वद्वयेइत्यर्थः।आद्यादित्वात्तसिः।ष
ष्ठ्यर्थेद्वितीया।एवमुपपदविभक्तौसर्वत्रबोध्यम्।नाम्नोद्विधैवसंबन्धःसर्ववाक्येषुव्यवस्थितः।सामानाधिकरण्येनषष्ठ्यावापिक्वचिद्भवेत्इतिवृद्धोक्तौषष्ठीग्रहणंत
दपवादविभक्तेरप्युपलक्षणम्।द्विधेत्युक्तिःसामानाधिकरण्यवैयधिकरण्याभ्यांनिर्वाह्या।षष्ठीतदपवादयोरेककोटित्वाद्यावा।धिक्कृष्णाभक्तमिति।तस्यनिन्द्यतेइत्यर्थः।कथं
धिङ्मूर्खेति।संबोधनपदस्यक्रियान्वयइतिप्रागेवोक्ततयाधिक्शब्दयोगाभावात्।क्रियापदंचक्वचिच्छ्रुतंक्वचिदाक्षिप्तमित्यन्यदेतत्॥लाभात्तदभिप्रेत्याह।जश्त्वस्येति।अतिदे
शादिति।अतिदेशेनाव्ययत्वादित्यर्थः।आद्यादित्वादिति।कृष्णसंबन्धिपार्श्वद्वयाभ्यामागतादित्यर्थेपञ्चम्यास्तसिरित्यन्ये।सामानाधिकरण्येन विनापिसंबन्धंविशेष्यविशेषणभा
वेन।षष्ठ्येति।भेदसंबन्धपूर्वकविशेष्यविशेषणभावेनेत्यर्थः।नाम्नोरित्यनेनक्रियाकारकयोःक्रियाकारकभावरूपकारकविभक्त्यर्थसंबन्धेनान्वयइतिसूचितम्।वैयधिकरण्येति।षष्ठ्यावेत्य
तद्वैयधिकरण्योपलक्षणमितिभावः।क्रियान्वयइति।बोधनीयक्रियान्वयइत्यर्थः।धिक्शब्दयोगाभावादिति।संबोधनस्यक्रियान्वयात्क्रिययैवधिकोयोगोनतेनापीतिभावः ॥

व्याख्यातमिति।तात्रेत्यादेर्हाशब्देनयोगइतिभावः।हापरस्यचाआहूत त्वामित्यनेन मामित्यनेनवाऽन्वयइतितात्पर्यम्।कारकविभक्तित्वमिति।कर्तृकारकविभक्तित्वमित्यर्थः।संबोधन
पदार्थस्यदेवस्यत्वमित्यनेनसहाभेदेपिशब्दतः क्रियाश्रयत्वादिप्रतीतेरुपपादनस्याशक्यतयाकर्तृत्वंदुर्लभम्।वास्तवक्रियाश्रयत्वमादायकर्तृत्वेतुबहूपप्लवइतिभावः।नास्यप्रवृत्तिरि
ति।अतएवसर्वप्रासपमन्तानामुपर्युपरिवर्ततेइत्यादौनद्वितीया।अत्रह्युपर्युपरीत्यस्यातिशयोर्थोनसामीप्यम्।वीप्साद्विर्वचनंचात्रेतिबोध्यम्।उपसर्गइति।बुभुक्षितान्वितप्रत्यर्थसंबन्धस्य
तथाचमूर्खसंबोध्यकंनिषिद्धाचरणादिनिन्द्यतीति वाक्यार्थः।एतेनहातातहादेविधीराभवेत्यादिव्याख्यातम्।यत्तु।उपपदविभक्तेःकारकविभक्तिर्बलीयसीतिसंबोध
नेप्रथमैवभवति।संबोधनपदस्यकर्तृकारकवाचित्वादिति।तन्मन्दम्।संबोधनपदस्यकर्तृकारकत्वेउक्तिसंभवाभावात्।देवप्रसीदेत्यादौवस्तुगत्यादेवएवकर्तेतिचेत्तर्हि
तावताकारकविभक्तित्वंलभ्यते।किंचदेवत्वांभजेत्वांभजन्तीत्यादौसंबोध्यस्यवास्तवमपिनकर्तृत्वमित्यास्तांतावत्।उपर्युपरीति।कथंतर्हिउपर्युपरिबुद्धीनांचरन्तीश्वर
बुद्धयः।उच्यते।उपरिबुद्धीनामुत्तानबुद्धीनामुपरिचरन्तीत्यर्थः।एवंचआम्रेडितत्वाभावान्नद्वितीया।षष्ठी।प्रतिपदोक्तस्योपर्यध्यधसःसामीप्यइतिकृतद्वित्वस्यात्रग्रह
णम्।तेनवीप्सायांद्विर्वचनेसतिनास्यप्रवृत्तिः।अन्यत्रापिदृश्यतइत्युक्तंतद्दर्शयति।अभितःपरितइति।प्रतिभातीति।एषप्रतिशब्दःक्रियाविशेषकत्वादुपसर्गः।नतुकर्मप्रव
चनीयः।अन्तरात्वांमामिति।तवममचमध्येइत्यर्थः।सामर्थ्यादिति।अतएवहेतुत्वपर्यन्तमपिशाब्दबोधेविषयइतिस्वीक्रियतइतिभावः।नदीमन्ववि।द्वितीयायाःसंबन्धो
र्थः।सचेहसाहित्यरूपइतिअनुनाद्योत्यते।लक्षणेत्यम्।वृक्षंप्रतीति।वृक्षसंबन्धिद्योतनमर्थः।संबन्धश्चलक्ष्यलक्षणभावइतिप्रत्यादयोद्योतयन्ति।भक्तोविष्णुंप्रतीति।विष्णो
र्भक्तेश्चविषयविषयिभावः।प्रत्यादिद्योत्यः।लक्ष्मीरिति।लक्ष्मीरूपस्यभागस्यहरिणासहस्वस्वामिभावः।वृक्षंवृक्षमिति।इहवीप्साद्विर्वचनेनैवद्योत्यते।परिशब्दस्तुक्रियायासंबध्यते।क
र्मणिद्वितीया।कर्मप्रवचनीयसञ्ज्ञयाउपसर्गसञ्ज्ञायाबाधात्षत्वंन ॥ ७ क्रियागतत्वात्बुभुक्षितस्यनभातीत्यन्वयइतिभावः।मध्येइति।अन्तरा इति हि मध्ये इत्यर्थकम्।लक्ष्यलक्षणे।ने।
वृक्षप्रकाशेनविद्युद्विद्योतज्ञानात्वृक्षोलक्षणंविद्युद्विद्योतनंलक्ष्यम्।कर्मणीति।वृक्षपदार्थस्यसेचनंप्रतिकर्मत्वात्।अतएववृक्षस्यप्रतिसेवनमित्यादौषष्ठीतिभावः ॥

विषयेतु पेति। अन्ययोस्त्वायाआपिवीप्सायाः सञ्ज्ञाप्रतिभिन्नत्वादितिभावः। इतरे लक्षणादयस्तु द्योत्या एवेति बोध्यम्। इतितु नभवतीति। विशिष्टक्रियासंबन्धे विशेषणेनापि संबन्धाव्याप्तिरितिभावः। एतत्सर्वं हरदत्तानुरोधेन। कर्मत्वाविवक्षायामपि द्वितीयार्थसञ्ज्ञाया आवश्यकत्वात्। किंचपरैः क्रियाविशेषकत्वेनान्वर्थत्वेन कर्मप्रवचनीयत्वस्यैवानापत्तिरित्यन्यत्र विस्तरः। नन्वन्वर्थभागाप्रतीत्या कथं निषेधोऽत आह। अन्वर्थेति। अर्थतो भागे पर्यवसानमादाय निषेधप्रवृत्तिरितिभावः। कालाध्वेति। येनकालेनाध्वना वात्यन्तसंयोगस्तद्वृत्तिभ्यामित्यर्थः। एतदर्थमेव लक्षणादयो विषयतयोपात्ता इति व्याख्यातमाकरे। पञ्चम्यपाङ्परिभिरितितु नभवति। वर्जनार्थेनापेत्यनेन साहचर्यात्। मसाभिष्यादिति। ममभागः स्यादित्यर्थः। मामभिष्यादित्यपि प्राञ्चः प्रत्युदाहरन्ति। तन्न मां प्राप्नुयादित्यर्थः। उपसर्गवशेन अस्तेः सकर्मकत्वान्मामिति द्वितीया। अत्र ममभाग इत्यर्थतः पर्यवसानात्। अभागे इति कर्मप्रवचनीयत्वे निषिद्धे उपसर्गप्रादुर्भ्यामिति षत्वम्। पूजायां चेति। सुः पूजायामिति पूर्वसूत्रात् पूजाग्रहणमनुकृष्यते। कालाध्वनोः। अन्तं विराममतिक्रान्तोऽत्यन्तः स चासौ संयोगो निरन्तरसंनिकर्ष इत्यर्थः। द्वितीया स्यादिति। श्रुतत्वात्कालाध्ववृत्तिभ्यामेव। मासस्येति। क्त्वोऽर्थप्रयोगे कालेऽधिकरण इति षष्ठी स्यादुः। तन्न। तत्र शेषग्रहणानुवृत्त्या द्विरह्नो भोजनमिति कृदन्तेन सह समासवृत्तेरेव फलत्वात्। तस्मादिह षष्ठी शेष इति सूत्रेणैव षष्ठीति तत्त्वम्॥ इति द्वितीया॥ स्वतन्त्रः कर्ता। प्रधानीभूतधात्वर्थप्रति आश्रयत्वं स्वातन्त्र्यम्। आह च। धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यत इति। साधकतमं करणम्। प्रकृष्टेति। यद्व्यापारादनन्तरं क्रियानिष्पत्तिस्तत्प्रकृष्टम्। उक्तं च। क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतमिति। विवक्ष्यत इत्यनेन स्थाल्यादीनामपि वैवक्षिककरणत्वमस्तीति ध्वनयति ॥ तस्मादिति। अन्तरङ्गत्वाच्चेत्यपि बोध्यम्। एतेन शेषग्रहणाननुवृत्तौ तेनैवेति परास्तम्॥ इति द्वितीया॥ प्रधानीभूतेति। प्राधान्यं च कर्तृत्वप्रत्ययसमभिव्याहारे धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयधात्वर्थत्वम्। धातुनोक्तक्रिये कारके नित्यं कर्तृतेष्यते इत्यन्वयः। यद्व्यापारादिति। अनन्तरशब्दयोर्दूरान्तिकार्थैरिति सूत्रेण पञ्चमी। यन्नमेषां कारकाणां मध्ये इत्यर्थः ॥

वस्तुनइति।वस्तुनीत्यर्थः।सार्वविभक्तिकस्तसिः।तत्कर्तृत्वादिकमनिर्देश्यम्।इदंवस्तुकर्त्रैवेत्यादिक्रमेणननिर्देश्यमित्यर्थः।हियतोवस्तुनतत्तद्रूपेणव्यवस्थितम्।तामेवाव्यवस्थान्दर्शयति।स्थाल्येत्यादि।कारकत्वमिति।विशेषणत्वादियथाखञ्जकुब्जादावव्यवस्थितम्।एवंकारकत्वंतद्व्याप्यमधिकरणत्वादिकंचेत्यर्थः।तण्डुलानोदनंपचतीत्यत्रकारकस्यापितन्दुलस्यतण्डुलानामोदनंपचतीत्यादावोदनपदार्थान्वयेनषष्ठ्यन्ततादर्शनात्कारकत्वस्यव्यभिचारोद्रष्टव्यः।प्रकृतव्यक्त्युपात्तेति।प्रकृतधातुव्यक्तीत्यर्थः॥अनेकधात्वमेवदर्शयति।एवंचपचेरिति।तण्डुलधारणादिपरत्वेइति।आदिनाआपाकसमाप्तिधारणम्।अवयवविभागादीति।आदिनारोटिकादाववयवमेलनम्।तआहच।वस्तुतस्तदनिर्देश्यंनहिवस्तुव्यवस्थितम्।स्थाल्यापच्यतइत्येषाविवक्षादृश्यतेयतइति।अयंभावः।कारकत्वंतद्व्याप्यकर्तृत्वादिषट्कंचवस्तुविशेषेविशेषणविशेष्यभावव्यवतिष्ठते।नहिगोंस्सर्वंप्रतिगोरेवनतुकंचित्प्रत्यगोरितिवत्विशेषणंविशेष्यमेवेतिसुवचम्।तथाचकयाचित्धातुव्यक्त्याउपस्थापितेऽर्थेकिंकर्त्रादिकमितिप्रश्नेप्रकृतव्यक्त्युपात्तव्यापाराश्रयतयाविवक्षितःकर्ता।व्यापारव्यधिकरणफलाश्रयःकर्म।कर्तृकर्मद्वारकसंबन्धेनाश्रयोधिकरणम्।पच्यर्थोव्यापारश्चानेकधा।एवंचपचेरधिश्रयणतण्डुलावपनैधोपकर्षणादितात्पर्यकत्वेतदाश्रयोदेवदत्तःकर्ता।ज्वलनतात्पर्यकत्वेएधाःकर्त्तारः।तण्डुलधारणादिपरत्वेस्थालीकर्त्री।अवयवविभागादिपरत्वेतण्डुलाःकर्तारः।स्थाल्यापचतीत्यत्रततोयोपात्तव्यापाराश्रयोपिस्थालीकरणमेवनतुकर्त्री।देवदत्ताद्व्यापारस्यैवतद्धातूपात्तत्वात्।तथा।आदिखादिभ्यामुपात्तेऽर्थेप्रयोज्यःकर्ता।तस्मिन्नेवार्थेभक्षयतिनोपात्तेकर्म।अधिपूर्वैःशीङादिभिरुपात्तेऽर्थेआधारःकर्मकेवलैरुपात्तेअधिकरणमित्यादि ॥ तण्डुलाःकर्तारइति।कर्मकर्त्तरीत्यर्थः।संप्रदानापादानयोस्तुनकर्त्तृत्वविवक्षाशब्दशक्तिस्वाभाव्यात्तद्व्यापारेधातोरवृत्तेरितिबोद्ध्यम्।उपात्ते।उक्तेइत्यर्थः।स्वप्रकाशत्वे।ज्ञानविषयत्वे।कर्तृकर्मविरोधइति।अभेदेआधाराधेयभावस्यविषयविषयिभावस्यचाभावादितिभावः।शब्दविशेषोपाधिकस्य।शब्दविशेषनिमित्तकस्य।कर्तृकर्मशब्दयोराश्रयविषयोपलक्षकत्वे स्वप्रकाशत्वेइत्यस्यस्वप्रकाशपदव्यवहार्यत्वेइत्यर्थेवालक्षणेवदोषइतिबोद्ध्यम् ॥

परेति।कर्मत्वाभिमतापेक्षयापरेत्यर्थः।गम्यादिकर्त्तर्यतिव्याप्तिवारणायेदम्।अपादानेइति।प्रयागात्काशींगच्छतीत्यादौतस्यापिक्रियाजन्यविभागाश्रयत्वादितिभावः।धात्वर्थतावच्छेदकेति।संयोगस्यैवतथात्वंनतुविभागस्येतिभावः।तत्त्वेनेति।ण्यन्तधात्वर्थतावच्छेदकत्वेनेत्यर्थः।वचनबलात्।गत्यादिनियमबलात्।ननुविभागस्यतत्त्वेनकर्त्तुरितितथायुक्तमितिचप्राप्तेतिअपादानप्रकरणेवक्ष्यन्वयिनोविभागस्यधात्वर्थतायावक्ष्यमाणत्वादित्यतआह।एकसञ्ज्ञेति।सावकाशत्वादिति। विषंभुङ्क्ष्व इत्यादौसावकाशायाइत्यर्थः।कर्त्तुरिति।कर्मसञ्ज्ञात्वपा

एतेनज्ञानस्यस्वप्रकाशकत्वेकर्तृकर्मविरोधइत्यादिपरास्तम्।शब्दविशेषोपाधिकस्यकर्तृत्वादेःप्रत्यक्षादौउक्तिसंभवाभावात्।एतेनपरसमवेतक्रियाजन्यफलशालित्वंकर्मत्वंचेत्।अपादानेऽतिव्याप्तिमाशङ्क्यधात्वर्थतावच्छेदकफलशालिकर्मेतिपरिष्कुर्वन्तोऽपिप्रयुक्ताः।ग्रामंगमयतिदेवदत्तमित्यादौगन्तर्यव्याप्तेः।तन्मतेगमनस्यप्रकृत्यर्थत्वेपितथात्वानवच्छेदकत्वात्।तत्रणिचोव्यापारार्थकत्वेनप्रकृतेःतत्त्वेवापाचयत्यादिप्रयोज्यकर्तर्यतिव्याप्तेः।तत्रपारिभाषिकमनुशासनोपयोगिकर्मत्वंवचनबलाद्व्यवस्थितमितिचेत्।अपादानेपितर्हितत्त्वास्तीत्यवधेहि।एकसञ्ज्ञाधिकारेऽनवकाशयासावकाशायाबाधात्।अतएवात्मानमात्माहन्तीत्यादौपरयाकर्तृसञ्ज्ञयाकर्मसञ्ज्ञाबाधमाशङ्क्य—हंकारादिविशिष्टात्मभेदमाश्रित्यसमाहितंभाष्ये।रामेणेति।इहयद्यपिविभक्त्युपस्थितानांकारकाणांक्रियांप्रतिविशेषणतैवतथापिकृदुपस्थितानांविशेष्यतैव।सत्त्वप्रधानानिनामानीत्युक्तेः।धातूपस्थाप्ययोःफलव्यापारयोरपिकर्मकृत्समभिव्याहारेविशेषणविशेष्यभावव्यत्यासः।तथाचरामनिष्ठोयोव्यापारस्तद्विषयीभूतब्राह्मणव्यापारसाध्यप्राणवियोगाश्रयोवालीतिवाक्यार्थः ॥ दानसञ्ज्ञायाःपरत्वाद्बाधिका।अतएवग्रामंत्यजतीत्यादौद्वितीयासिद्धिरितितात्पर्यम्।अ

पादाननिष्ठविभागीयसंबन्धस्यफलतानवच्छेदकत्वान्नदोषइत्यपिबोध्यम्।अतएवएकसञ्ज्ञाधिकारेसञ्ज्ञयोर्बाध्यबाधकभावादेव।अहंकारादीनि।आदिनाशरीरम्।विभक्त्युपस्थितानामिति।विभक्त्यर्थस्यसंसर्गत्वमनेनतदन्तोपस्थितानामित्यर्थः।व्यत्यासइति।तद्व्यत्यासेनैवधातुतस्तदुपस्थितिरित्यर्थः।तत्रव्यापारजन्यफलमेवधात्वर्थइतिभावः ॥

तदिष्टापत्तीति। तस्वकृत्यर्थक्रियायामपि कारकाणामन्वयादिति भावः। तन्नैवसानमाह। कर्मित्यादि। यत्तु भवतिक्रियायां प्राथमिकान्वयेन तत्तद्विभक्तौ कृदन्तेन पार्ष्णिकान्वयात्तेषांचा
रितार्थमिति। ननु भवतिक्रियायां कर्तृत्वेनान्वये कर्तुरुक्तत्वात्तृतीयानापत्त्या हरिणात्रातइत्यसिद्ध्यापत्तेः। करणत्वेनान्वये पार्ष्णिकस्यापि हरिकर्तृकत्राणकर्मणो बाधानापत्तेः। क
र्तृतीयान्ते न समासविधायकासंगतेश्च। यत्कर्तृककृतिकर्म विश्वमिति विग्रहवाक्यजबोधाद्भिन्नबोधस्वीकारेण मानमत आह। अषष्ठ्यर्थेति। आकृतीति। इदं च यथायथं सर्व
विभक्त्यपवादः। नाम्नेति। नामसंबन्धितीक्ष्णत्ववानित्यर्थः॥ करणशब्दानुवृत्त्येति। एकसञ्ज्ञाधिकारेण चेति बोध्यम्। ननु मनसा देवदत्त इत्यसंङ्गतं कृद्योगलक्षणषष्ठीप्राप्तेः। न च कर्तृ
यनुयाजपेयाधिकरणे मीमांसकैरुक्तं काष्ठैः पाचक इत्यपि स्यादिति तदिष्टापत्तिग्रस्तम्। कर्तृकरणे कृता बहुलं कर्तृकर्मणोः कृतीत्यादिसूत्राणां कृत्स्वकृत्यर्थेन कारकान्व
यविनोक्तिसंभवेस्येदाभावादिति सुधीभिराकलनीयम्। अनभिहिते किम्। हरिः करोति। जीवन्त्यनेन जीवनः। शाब्दिकः। शब्ददर्दुरं करोतीति ठक्। कृतं विश्वं येन कृत
विश्वः। विश्वकर्मककृत्याश्रय इत्यर्थः। अषष्ठ्यर्थबहुव्रीहौ मुसत्यन्तरस्वीकारात्। यथा चैतत्तथा वक्ष्यते। प्रकृत्यादिभ्य इति। आकृतिगणोयम्। तेन नाम्ना सुतीक्ष्णश्चरिते
नदाम्त इत्यादि बोध्यम्। द्वयोर्द्रोणयोः समाहारः द्विद्रोणम्। पात्रादित्वात्स्त्रीत्वाभावः। द्रोणद्वयसंबन्धिधान्यमित्यर्थः। चादिति। करणशब्दानुवृत्त्या परिक्रयणे संप्रदानमित्यु
क्तसूत्रस्यान्यतरस्यांग्रहणापकर्षणेन वा सञ्ज्ञयोः पर्यायेण लब्धे समावेशार्थश्चकारः। तेन मनसा दीव्यतीति मनसा देव इत्यत्र कर्मण्यण् करणे तृतीया चेत्युभयं सिद्ध्यति। मन
सः सञ्ज्ञायामित्यलुक्। किं चाक्षैर्देवयते यज्ञदत्तेनेत्यत्र सकर्मकत्वादणिकर्तुर्णौ कर्मत्वं न। अणावकर्मकादिति परस्मैपदं च नेति सिद्धान्तः॥ ७५ साहचर्यात्तत्र मुख्यव्यवहारेण
धात्वर्थाश्रयस्यैव कर्मणो ग्रहणम्। अतस्तोकं पाक इत्यादौ षष्ठी नेति वाच्यम्। धात्वर्थभेदेनान्वयिकर्मग्रहणेनैव तदुपपत्तावत्राप्रवृत्तौ मानाभावात्। ध्वनितं चेदमाकडारसूत्रे कैयटे। ता
दृशसञ्ज्ञात्वे दृढतरमानाभावश्चेत्यरुचेराह। किंचेति। कर्मत्वेनेति। न च वैकल्पिकत्वेप्यत्यन्ताविद्यमानकत्वाभावात्कर्मत्वाभावः सिद्ध इति वाच्यम्। तत्रात्यन्ताविद्यमानकर्म
काणामेव ग्रहणे मानाभावस्यान्यत्र निरूपितत्वादिति भावः ॥

फलान्तस्याह। णाविति। दीव्यतेऽक्षैर्देवदत्तेनेति भावे लकारः। भावः फलमित्यपि बोध्यम्। करणत्वाच्च तृतीयेति समावेशाफलम्। द्वितीयेति। अक्षान् दीव्यतीत्यत्राक्षपदस्याक्षजेयधने लक्षणा न च तदाकरणत्वमक्षैरित्यर्थेक्षानिति न भवतीत्यन्ये। एकैव त्वत्र शक्तिरिति। द्विधात्वर्थनिरूपितसाधकतमत्वशक्तिरित्यर्थः। सहयुक्ते। अत्राप्राधान्यं नाम शाब्दगुणाद्यन्वयित्वाभाव इत्याह। पितुरन्वेति। आर्थ इति। पुत्रसाहित्यवान्पिता आगत इति बोधे साहित्यस्य पुत्रेण गमनसंबन्ध एव संभव इति पश्चात्तस्यापि मानससत्संबन्धबोध इति भावः। शाब्दत्वं च विवक्षानिबन्धनमेवं चैव शाब्दत्वरूपविशेषणाभावकृतो विशिष्टाभावः। सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यादौ विद्यमानतावाचिसहशब्दयोगे क्रियाद्यन्वयित्वरूपविशेष्याभावकृतो विशिष्टाभावो दशानां पुत्राणां विद्यमानत्वेपीत्यर्थ इत्यन्यत्र विस्तरः। अन्तरङ्गत्वादिति। प्राचीनैरन्तरङ्गत्वमूलकतयोक्तादुपपदविभक्तेरिति न्यायादित्यर्थः॥ वस्तुतस्तु तद्वाचनिकत्वेनैवेत्यन्तरङ्गत्वं तन्न्यायोपलक्षणं बोध्यम्। प्रथमा यत्तु प्राचा कर्मसंज्ञां बाध्यादिति व्याख्यातम्। तदाकरविरोधादुपेक्ष्यम्। स्यादेतत्। करणसंज्ञाया अवकाशः देवना अक्षाः करणे ल्युट्। कर्मसंज्ञायास्तु दीव्यन्ते अक्षाः कर्मणि लट्। अक्षैर्दीव्यतीत्यत्र तु संज्ञाद्वयप्रयुक्तकार्यद्वयप्रसङ्गे परत्वात्तृतीयैव स्यान्न तु द्वितीयेति चेन्न। अत्राहुः। कार्यकालपक्षे कर्मणि द्वितीयेत्यत्र पदस्योपस्थापनं तस्यानवकाशत्वाद्द्वितीयेति। ननु दीव्यन्ते अक्षा इत्यत्र कर्मण्यभिहितेपि करणत्वस्यानभिधानात् तृतीया स्यात्। तथा देवना अक्षा इत्यत्र ल्युटा करणस्याभिधानेपि कर्मणोनभिधानात् द्वितीया स्यात्। मैवम्। एकैव ह्यत्र शक्तिः संज्ञाद्वययोरिनीतया च उभयत्राप्यभिधानमेव न त्वनभिहितत्वम्। सहयुक्ते। पुत्रेणेति। पितुरत्र क्रियासंबन्धः शाब्दः। पुत्रस्य तु आर्थ इति तस्य प्राधान्यम्। अप्रधानग्रहणं शक्यमकर्तुम्। न चैवं पितुरपि तृतीयापत्तिः। तत्र प्रातिपदिकार्थमात्रे अन्तरङ्गत्वात्प्रथमोत्पत्तेः॥ ७ याश्चकारकेति विभक्तित्वमनभिहितपादे भाष्ये बहुशः स्पष्टम्। प्रपञ्चितं च। अन्तरङ्गत्वं तु न युक्तम्। षष्ठ्यपवादत्वमिव प्रथमापवादत्वस्याप्युपपदविभक्तीनामापत्तेः। अनन्तरस्येति न्यायेन च प्रथमापवादत्वस्यैवापत्तेः। उपपदविभक्तेरिति न्यायेन च वाचनिके सर्वतोबलवत्त्वे कारकविभक्तेर्बाधितेः [illegible] ष षष्ठ्यपवादत्वमुपपदविभक्तीनामवतिष्ठते। किं च उपपदविभक्तेः पदान्तरनिमित्तकत्ववत्कारकविभक्तेः क्रियानिमित्तकत्वात्तत्त्वं दुरुपपादम्। न च संबन्धस्य क्रियाकारकभावमूलकत्वेन तत्प्रयुक्तं कार्यं बहिरङ्गं पुत्रेपि तृतीयानापत्तेरेकक्रियाकर्तृत्वमूलकत्वात्साहित्यस्य क्रियायाः प्राधान्यात्तन्निमित्तिका विभक्तिः प्रबलेत्यपि न युक्तम्। अप्रधानक्रियायामपि कारकान्वयदर्शनात् ॥

तद्देव्यधनपत्राहा।इत्यादौकारकविभक्तेरिति।अत्रादिनापुत्रेणसहागतःपितेत्यस्यसंग्रहइत्यलम्।अर्शआद्यजन्तइति।व्याख्यानादितिभावः।अन्यथायेनगुणेनकारणत्वादिनावयवस्याविकारोलक्ष्यतद्वत्यर्था।अस्याऽक्षिकाणमस्येत्यादौप्रथमांबाधित्वागुणवचनात्काणशब्दादेरेवस्यात्अक्ष्णाकाणइत्यादौतुषष्ठ्येवस्यादितिबोध्यम्।प्रकृत्यर्थेति।अर्शआद्यच्प्रकृतेरित्यर्थः।शरीरस्येत्यवयवन्नुपलक्षणम्।संभवतीति। लक्ष्यःसंभवतीत्यर्थः।द्रव्यादीति।आदिनागुणक्रिये।एवंचत्रितयसाधारणंहेतुत्वं।नियतक्रियमिति।क्रिययानियतमित्यर्थः।क्रियामात्रविषयमिति यावत्।हेतुकरणयोर्वैषम्यान्तरमप्याह।नाश्रितेत्विति।एवंचकरणत्वहेतुत्वविषयकशाब्दबोधायसूत्रद्वयमित्यर्थः।विकल्प्यतइति।तदर्थत्वेनविवक्षायांचतुर्थ्याहेतुत्वेनविवक्षायांतृतीयायाश्चप्राप्तेः पितुरागमनमित्यादौकारकविभक्तेःप्राबल्याच्च।येनाङ्गविकारः।अङ्गशब्दोऽर्शआद्यजन्तस्तदाह।अङ्गिनइति।येनेतिसर्वनाम्नःप्रकृत्यर्थभूतोऽवयवएवगृह्यते।संनिधानात्।सचार्थाद्विकृतएव।नह्यक्ष्णाविकृतेनावयवेनशरीरस्याविकारःसंभवति।तदेतदाह।येनाङ्गेनविकृतेनेति।संजानीतइति।संप्रतिभ्यामनाध्यानेइतितङ्।कृद्योगेपरत्वात्षष्ठीपितुःसञ्ज्ञाता।यत्तुहरदत्तेनोक्तम्।आध्यानेपरत्वादधीगर्थेतिषष्ठीमातुःसंजानातीति।तन्न।तत्रशेषाधिकारात्।द्रव्यादीति।उक्तंच।द्रव्यादिविषयोहेतुःकारकंनियतक्रियमिति।अनाश्रितेतुव्यापारेनिमित्तंहेतुरिष्यतइति च।फलमपीति।एतच्चप्रत्ययइतिसूत्रेकैयटेस्पष्टम्।एवंचतादर्थ्यचतुर्थ्याःसहेयंतृतीयाविकल्प्यते।अध्ययनायवसति।अयंतुविशेषः।अध्ययनस्यफलेनसहाभेदसंसर्गः।उपकारकत्वेनसहेतुनिरूपकत्वेति।गम्यमानेति।नतुश्रूयमाणेवेत्याग्रहइतिभावः।साधनेति।साध्यमित्यत्रप्रकृतिभागस्यार्थप्रतीतिभावः।माचापलायेतिगणान्व्यनैषीदित्यत्रतुयतध्वमितिशेषः।अशिष्टेति।एतच्चदाणश्चसाचेच्चतुर्थ्यर्थेइत्यनेनज्ञाप्यते॥इतितृतीया॥ ७ विवक्षाभेदेनविभक्तिद्वयमित्येतावतातयोर्विकल्पव्यवहारइतिबोध्यम्।फलेनसहेति।तच्चफलंफलत्वेनतृतीयार्थइत्येके।हेतुत्वेनैवेत्यन्ये॥अध्ययनहेतुकोवासइतिबोधस्तृतीयायाम्।चतुर्थ्यामध्ययनोपकारकोवासइतिबोधइतिमतेदूषणम्।अध्ययनोपकार्यकोवासइतिबोधश्चतुर्थ्यामितिमतेतत्राप्यभेदभानमेवेतिबोध्यम्।गम्यमानेति।श्रमेणेत्यादिपदजबोधविषयेत्यर्थः।स्पष्टंचेदंसहयुक्तइत्यत्रभाष्येतदाह।नतुश्रूयमाणेति।श्रूयमाणत्वमात्रवाचकपदजन्यबोधविषयेत्यर्थः।ज्ञाप्यतेरिति।चतुर्थ्यर्थविहिततृतीयायुक्ताद्दृणआत्मनेपदमितितदर्थः।साचेदित्यनेनतस्याःकाचित्कत्वंज्ञाप्यते।तेनाशिष्टव्यवहारेइत्यंशोऽपिसिद्धइतिभावः। इतितृतीया ॥

अपुनर्ग्रहणायेति।इदंचस्वस्वत्वनिवृत्तेर्बोध्यतास्वीकारफलप्रदर्शनंनतुधात्वर्थेनिविष्टमितिबोध्यम्।भक्तइति।अधीनीकरणरूपेऽर्थे इत्यर्थः।नशूद्रायमतिंदद्यादित्यत्रमतिंतज्जनकंशास्त्रंनोपदिशेदित्यर्थः।आग्रहइति।अतएवक्रियाग्रहणंकर्तव्यमितिवार्तिकंभाष्ये प्रत्याख्यातम्।भाष्यान्तरमप्याह।खण्डिकेत्यादि।चपेटान्ददातीत्यत्रसंयोगोऽर्थः।शेषित्वमुद्देश्यत्वम्।शेषत्वमप्रधानत्वरूपम्।शेषित्वंनास्तीति।यद्यपिग्रामसंस्कारार्थमजानयनेतदपिग्रामस्यास्तितथाप्यजायाइवपरत्वात्कर्तुरितिकर्मसंज्ञयाबाधान्नदोषइतितत्त्वम्।अस्मात्कर्मणीति।क्र्यादेश्चुरादेर्वेत्यर्थः।प्रीङ्प्रीतावितिदैवादिकादित्यपिकश्चित्।हरिंप्रीणयतीति।प्रीयमाणइतिनिर्देशेनप्रीधात्वर्थकर्मणःसंप्रदानत्वाभावज्ञापनादत्रअन्वर्थसंज्ञाबलेनाह।दानस्येति।तेनअजांनयतिग्रामंहस्तंनिदधातिवृक्षइत्यादौनातिप्रसङ्ग इतिभावः।दानंचापुनर्ग्रहणायस्वस्वत्वनिवृत्तिपूर्वकंपरस्वत्वापादनम्।अतएवरजकस्यवस्त्रंददातीत्यादौनभवति।तत्रहिददातिर्भाक्तः।एतच्चवृत्तिमतम्।भाष्यमतेतुनान्वर्थतायामाग्रहः।खण्डिकोपाध्यायस्तस्मैचपेटांददातीतिप्रयोगात्।रजकस्यददातीतितुशेषत्वविवक्षायांबोध्यम्।नचैवमजांनयतिग्राममित्यत्रापिप्रसङ्गः।यमभिप्रैतीत्युक्त्याहियमितिनिर्दिष्टस्यशेषित्वंकर्मणश्चशेषत्वंलभ्यते।ग्रामस्यअजांप्रतिशेषित्वंनास्ति।दानीयइति।बाहुलकात्संप्रदानेअनीयर्।रुच्यर्थानांप्रीयमाणः।प्रीञ्तर्पणे।अस्मात्कर्मणिलट्।हरयेरोचतेइति।हरिंप्रीणयतीत्यर्थः।कर्मसंज्ञायांप्राप्तायांवचनम्।प्रीयमाणःकिम्।देवदत्तायरोचतेमोदकःपथि।अत्रपथोमाभूत्।श्लाघह्नुङ्।श्लाघास्तुतिः।कृष्णायश्लाघतेकृष्णंस्तौतीत्यर्थः।अन्येत्वाहुः।कृष्णायात्मानंपरंवाश्लाघ्यंकथयतीत्यर्थइति ॥ नसंप्रदानत्वमितिभावः।अत्रपथइति।नचतदभावेसत्त्रस्यशेषत्वविवक्षायांचारितार्थ्येनपरत्वात्तयाबाधसिद्धिरितिवाच्यम्।देवदत्तंरोचतइत्यस्याप्यापत्तेः।कृष्णंस्तौतीति।स्तुत्यापरस्मैकृष्णंकथयतीत्यर्थः।ज्ञीप्स्यमानपदेनप्रथमोपस्थितत्वाण्णिच्प्रकृत्यर्थकर्मैवग्राह्यम्।तस्यापिज्ञापनविषयेच्छाविषयत्वाच्छानजुपपत्तिरितिभावः।ह्नुङादेरपिह्नुत्यादिनाबोधनमर्थइतिबोध्यम्।अन्येत्विति।प्राधान्यात्ज्ञीप्स्यमानपदेनण्यर्थकर्मणएवग्रहणमितितदाशयः।तदेवाह।कृष्णायेति ॥

कारकशेषत्वादिति। कर्मणायमभिप्रैतीति संप्रदानत्वाविवक्षायां शेषत्वादित्यर्थः। सपत्नीभ्य इति। तत्र ह्नुवानेत्यन्तमार्थिकार्थकथनम्। स्वाभिप्रायं कस्मै बोधयतीत्यर्थः। एवं शपते
वृत्यपि व्याख्येयम्। [illegible] मि। स्पृहणीये कर्मण्यनीयर् इति भावः। यद्वा त्विति। कर्मणः शेषत्वे विवक्षेत्यर्थः। इति स्थितमिति। शेषत्वविवक्षायां चारितार्थ्येन कर्मसञ्ज्ञाबाधकत्वायो
गोत्रारुचिः। संप्रदस्न्ने इति। बाहुलकादिति भावः। व्याख्येयमिति। षष्ठ्यपवादत्वाच्छेषत्वविवक्षा कर्तुमशक्येत्यभिमानः। अमर्ष इति। वाक्चक्षुरादिविकारानुमेयः प्ररूढकोप
तत्राद्ये पक्षे कर्मत्वे प्राप्ते द्वितीये तु कारकशेषत्वात् षष्ठ्यां प्राप्तायां वचनम्। ह्नुत इति। सपत्नीभ्यः कस्मै ह्नुवानातमेवार्थं कस्मै संबोधयतीत्यर्थः। यस्य कस्यचित् कु
तदिति वा। तिष्ठत इति। स्थित्या स्वाभिप्रायं बोधयतीत्यर्थः। प्रकाशनस्थेयाख्ययोरिति तङ्। धारेरुत्तमर्णः। षष्ठ्यां प्राप्तायां वचनम्। स्पृहेरीप्सितः। परत्वादिति। ते
नपरस्परेण स्पृहणीयं यशो भं स्पृहणीयगुणैर्महात्मभिरित्यादि सिद्धम्। यदा तु शेषत्वविवक्षा तदा षष्ठी। तेन कुमार्या इव कान्तस्य त्रस्यन्ति स्पृहयन्ति चेति सिद्धम्।
एतच्च सर्वं हरदत्तादिरीत्योक्तम्। वाक्यपदीयहेलाराजग्रन्थयोस्तु स्पृहयतियोगे कर्मसञ्ज्ञायाः शेषषष्ठ्याश्च बाधिकेयं संप्रदानसञ्ज्ञेति स्थितम्। तन्मते स्पृहणी
यमित्यत्र दानीय इतिवत् संप्रदाने कृत्यः। कुमार्या इवेत्यत्र तु विभक्तिविपरिणामेन कान्ताय स्पृहयन्तीति व्याख्येयम्। क्रुधद्रुह। क्रुध कोपे द्रुह द्रोहे। ईर्ष्य ईर्ष्यायाम्। असू
येति कंड्वादियगन्तः। एषामर्थ इवार्थो येषां धातूनामित्यर्थः। तत्र क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या असहनम्। असूया तु गुणेषु दोषारोपः। क्रुधद्रुहोरकर्मकत्वात्तद्योगे षष्ठी
प्राप्ता अन्ययोः सकर्मकत्वाद्वितीया प्राप्ता। राधीक्ष्योः। कारकमिति। कर्मकारकमिति तु प्राचः प्रमादः। एकसञ्ज्ञाधिकारात्। न च प्राथमिकप्राप्तिमात्राभिप्रायेण कर्मत्व
व्यपदेशः ॥ इत्यर्थः। अपकार इति। अपकारविषये चेत्यर्थः। असहनम्। उत्कर्षविरोधिधर्मारोपानुकूलो व्यापारः। गुणेषु। गुणविषये। दोषारोपः। दोषत्वारो
पानुकूलो व्यापारः। अकर्मकत्वादिति। क्रोधजन्यस्य फलस्य देवदत्तादौ सत्त्वेऽपि तस्य धात्ववाच्यत्वादिति भावः। द्वितीयेति। तत्प्रयोजिका कर्मसञ्ज्ञेत्यर्थः। प्राथमिकेति। राधी
क्ष्योः प्रश्नविषयपर्यालोचनमर्थस्तत्र प्रश्नविषयरूपफलाश्रयत्वात्कर्मत्वप्राप्तिरिति भावः ॥

इत्यर्थाभ्युपगमेनेति।तस्यप्रधानीभूतधात्वर्थाप्रयोज्यत्वेनतदप्राप्तिरितिभावः।कर्मत्वेनप्राप्तेइति।शंसितुःशंसनविषयहर्षानुकूलव्यापारलक्षणंप्रोत्साहनंतयोरर्थः।शंसितुःप्रोत्साहनेकर्मतयान्वयः होतुश्चशंसितर्यभेदान्वयः।एवंचकर्मसामानाधिकरण्यात्कर्मत्वप्राप्तिरितिभावः।धनादीति।आदिनादुर्भिक्षेऽन्नम्।अनेकधेति।साक्षात्परम्परयाचेत्यर्थः।ब्राह्मणायदधीत्यादौतद्भोजनोपकारकत्वेनतदुपकारकत्वंबोध्यम्।ज्ञानात्मनेति।आत्मशब्दस्तद्वृत्तिधर्मपरोज्ञानत्वेनपरिणमतइत्यर्थः।एवंचतस्यविकृतिवाचकत्वाभावान्नच

कृत्स्नसंबन्धिशुभाशुभंपर्यालोचनयेतीत्यर्थाभ्युपगमेनषष्ठ्याएवप्राप्तेः।अनुप्रतीति।गृणइतिश्नान्तस्यानुकरणात्षष्ठी।होत्रेइति।कर्मत्वेप्राप्ते।परिक्रयणे।क्रयोधनाद्यर्पणेनात्यान्तिकस्वीकरणम्।तस्यसमीपंपरिशब्दआचष्टेतच्चनियतकालम्।ततोन्यूनत्वादितिव्याचष्टे।नियतेति।भृत्या वेतनादिना।तादर्थ्यइति।तस्मैकार्यायेदन्तदर्थंकारणम्।तस्यभावस्तादर्थ्यम्।ष्यञाउपकारकत्वरूपःसंबन्धोऽभिधीयते।कृत्तद्धितसमासेभ्यःसंबन्धाभिधानंभावप्रत्ययेनेतिसिद्धान्तात्।उपकारकत्वंचानेकधा।तेनब्राह्मणायदधीत्यादावपिभवतिभक्तिर्ज्ञानायेति।ज्ञानात्मनापरिणमतइत्यर्थः।प्रकृतिविकृत्योर्भेदविवक्षायांविकृतिवाचकाच्चतुर्थी।अभेदविवक्षायांतुपरत्वात्प्रथमैव।भक्तिर्ज्ञानंकल्प्यतइति।यदातुजनिकर्तुरितिभक्तेरपादानत्वंविवक्ष्यतेतदाज्ञानस्याभिहितकर्तृत्वात्प्रथमैवभक्तेर्ज्ञानंकल्पते।क्लृपीत्यर्थग्रहणमित्याशयेनाह।संपद्यतइत्यादि।उत्पातेनेति।प्राणिनांशुभाशुभसूचकोभूतविकारउत्पातः।तेनज्ञापितेर्थेवर्तमानाचतुर्थीत्यर्थः।वातायेति।वातस्यज्ञापिकेत्यर्थः।हितेति।समासविधानाज्ज्ञापकादितिभावः।एवंसुखयोगेपिबोध्यम् ॥ चतुर्थीकिंतुप्रकृत्यादित्वात्तृतीया।ज्ञानत्वविशिष्टरूपान्तरप्राप्तिर्भक्तिकर्तृकेतियावत्।रूपान्तरप्राप्तिर्हिपरिणामइतिभावः।प्रथमैवेति।भक्त्युपादानकोज्ञानरूपःपरिणामइतितदाबोधः।समासविधानादिति।चतुर्थीतदर्थेतिहितसुखयोगेसमासविधानाज्ज्ञापकादित्यर्थः।तदाह। एवमिति।वृत्तावाशीरर्थाप्रतीतेर्नचतुर्थीचाशिषीतिचतुर्थ्याहितयोगेनिर्वाहः।आशीरर्थयोगेआशीर्विषयस्यविधेयत्वंतदाश्रयस्योद्देश्यत्वंचप्रतीयते।नचवृत्तौतथान्वयोव्युत्पन्नइतिहरदत्तइतिदिक् ॥

म·श·
१३९

नहिफलार्थेति।यद्यपिब्राह्मणायदधीत्यादौब्राह्मणीयभोजनोपकारकमपिदधितद्द्वाराब्राह्मणोपकारकंतथापिफलेनाहरणद्वारानकोपियानक्रियोपकारइत्याशयः।तु
मुनेवेति।भाववच[illegible]ादीनांतुमुनपवादतयानत्समानार्थत्वात्।एवंचप्रथमापवादोयमितिभावः।द्विषांविघातायविधातुमिच्छतइत्यत्रविघातायेतितादर्थ्येचतुर्थीविघा

तुमुन्ण्वुलौक्रियायामितिसूत्रमहिम्नाक्रियार्थकमुपपदंक्रियावाच्येवफलतीत्याशयेनाह।क्रियेति।क्रियाफलकम्।क्रियावाचकप्रकृतिकमित्यर्थः।
तुमुनिति।ण्वुलोप्युपलक्षणम्।फलेभ्योयातीत्यस्यफलान्याहारकइत्यपिविवरणेबाधकाभावात्।कर्मणीति।तथाचद्वितीयापवादोयमितिभावः।यत्तुप्राचा
व्याख्यातमप्रयुज्यमानस्येदकर्मणियथास्यात्प्रयुज्यमानस्यमाभूदितिनियमार्थंसूत्रमिति।तन्न।अप्राप्तस्यनियमायोगात्।नचतादर्थ्यइतिप्राप्तिः।नहि
फलार्थायानक्रियाकिंत्वाहरणार्था।आहरणंतुफलकर्मकमित्यन्यदेतत्।तुमुनोभावएवविधानात्तदर्थस्यभाववचनत्वेसिद्धेपुनर्भाववचनग्रहणंसूत्रवि
शेषपरिग्रहार्थमित्याह।इतिसूत्रेणेति।नचतादर्थ्यइत्येवगतार्थताशङ्क्या।भाववचनेनैवतुमुनेवतादर्थ्यस्यद्योतितयाप्रातिपदिकार्थमात्रेप्रथमाप्रसङ्गात्।
यत्तुप्राचोक्तम्।भाववचनादेवयथास्यात्पाचकोव्रजतीतिण्वुलन्तान्माभूदितिनियमार्थमिदंसूत्रमिति।तन्न।ण्वुलन्तेकर्तुःप्राधान्यात्कर्तारंप्रतिच
तादर्थ्याभावात्।गुणीभूतपाकस्यचविभक्त्यर्थानन्वयात्।ननुषष्ठ्यपीतिकुतः।षष्ठ्येवास्तु।अलंशब्दस्तुपर्याप्तीतरार्थकएवगृह्यतामित्याशङ्क्याह।त
स्मैप्रभवतीति।नत्वांतृणमित्यादि।ननुतृणादिवत्युष्मत्शब्दादपिपक्षेचतुर्थीभाव्यम्।मैवम्।अनादरइतिहिकर्मणोविशेषणम्।अनादरद्योत
कंयत्कर्मेति।तादृशंतृणमेवनतुयुष्मदर्थः॥ ॥इतिचतुर्थी ॥

तार्थेयद्विधानन्तदर्थेक्त्वावतइत्यर्थः।एतेनात्रतुमुनातादर्थ्यस्योक्तत्वात्कथंचतुर्थीत्यपास्तम्।उत्तरक्रिययोस्तद्द्योतनेपिपूर्वक्रिययोस्तद्द्योतनात्।कर्त्तुःप्राधान्यादिति।ए
वंचतादर्थ्यचतुर्थ्यास्तत्राप्राप्तेर्नियमासंभवइतिभावः।विभक्त्यर्थेति। तदर्थ्यचतुर्थ्यर्थेइत्यर्थः॥ इतिचतुर्थी ॥

राम:
१३९

प्रकृतेति। कर्त्तर्येति व्याप्तिवारणाय सत्यन्तम्। अन्यथा कर्त्तृसञ्ज्ञायाद्यमपवादः स्यात्। कर्त्तृसञ्ज्ञा तु पचत्यादियोगे चरितार्था। कर्मणि ग्रामेति व्याप्तिवारणाय विशेष्यम्। अवधित्वं न विरुद्ध्यत इति। तदुपात्तक्रियानाश्रयत्वादिति भावः। न विरुद्ध्यते। तदनाश्रयत्वादिति भावः। अतदावेशादिति। तद्धातूपात्तगमनावेशादित्यर्थः। तदावेशादिति ध्रुवमिति। ध्रु गतिस्थैर्ययोः। अस्मात्कुटादेः पचाद्यच्। ध्रुव स्थैर्ये इति पाठे तु इगुपधलक्षणः कः। ध्रुवं स्थिरम्। प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तज्जन्यविभागाश्रयः। तच्चार्थादवधेरेवेत्याह। अवधिभूतमिति। धावत इति। इह क्रियाविशिष्टस्याप्यश्वस्य प्रकृतधातूपात्तक्रियांप्रत्यवधित्वं न विरुद्ध्यते। परस्परस्मान्मेषावपसरत इत्यत्र तु स धातुना गतिद्वयस्याप्युपादानात्। एकनिष्ठां गतिं प्रतीतरस्यापादानत्वं न विरुद्ध्यते। उक्तं च। अपाये यदुदासीनं चलं वा यदि वाचलम्। ध्रुवमेवातदावेशात्तदपादानमुच्यते। पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ। तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते। मेषान्तरक्रियापेक्षमवधित्वं पृथक्पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथगिति। पर्वतात्पततोऽश्वात्पततीत्यत्र तु पर्वतावधिकपतनाश्रयोऽश्वस्तदवधिकं देवदत्तादिनिष्ठपतनमर्थः। पञ्चम्यर्थोऽवधौ अभेदेन संसर्गेण प्रकृत्यर्थो विशेषणम्। प्रत्ययार्थस्तु क्रियायां स च धर्मी न तु धर्ममात्रम्। विभक्त्यर्थे विहितस्य बहुव्रीहेर्धर्मिपरताया निर्विवादत्वात्। उद्धृतौदना स्थालीत्यत्र हि ओदनकर्मकोद्धरणावधिभूतेत्यर्थः। जुगुप्सेति। भाष्यकारास्तु जुगुप्सादीनां तत्पूर्वकनिवृत्तिलक्षणतामाश्रित्य सूत्रेण तत्सिद्धिमाहुः। एवमुत्तरसूत्रेष्वपि। भीत्रा। कथं तर्हि कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे इति रामायणम्। अत्राहुः। कस्य संयुगे इति। न चैवं संयुगस्यैवापादानसञ्ज्ञापत्तिः। परत्वादधिकरणसञ्ज्ञया बाधात् ॥ पाठे तन्मात्रावेशात्। विभागमात्रावेशादित्यर्थः। विशेषणमिति। वस्तुतोऽवध्यवधिमद्भावरूपविभक्त्यर्थसंबन्धेनावधिक्रिययोरन्वय इत्यन्यत्र निरूपितम्। सा च क्रिया विभागरूपा। कालिकसंबन्धेन फलाश्रयेति प्रसङ्गवारणाय फलतावच्छेदकसंबन्धस्य कर्मलक्षणे निवेशान्न तदाश्रयस्य कर्मत्वं विभागजन्यसंयोगस्य धात्वर्थत्वादित्यन्यत्र विस्तरः। निवृत्तीति। विश्लेषेत्यर्थः ॥

इष्टापत्तिरिति।शेषत्वविवक्षयाकस्येतिषष्ठीत्यन्ये।संबन्धिनीति।तज्जन्येत्यर्थः।अर्थासंगतिमिति।नहिधातुंप्रतिकर्त्तृत्वंकिंतुतद्वाच्यक्रियांप्रत्येवेत्यर्थः।समासानुपपत्तिस्तुजका
भ्यामितिनिषेधात्।उपधालोपप्रसङ्ग·लुगमेरिडित्यादाविवजनिघसिभ्यामित्यादाविवचानुकार्यस्वरूपभङ्गभियानकृतइत्यन्ये।सौत्रत्वादितिपरे।भाष्यकैयटेति।इ
दमेवयुक्तम्।प्रकृतिशब्दस्यतत्रैवप्रसिद्धेः।प्रत्याख्यानपरभाष्यसंमतत्वाच्च।किंचवृत्तिमतेकारकइत्यधिकृतस्यकारणसामान्यवाचिनोनिर्धारणसप्तम्यन्तस्यान्वयोऽसंभवी।

अधिकरणत्वाविवक्षायांत्विष्टापत्तिः।अध्ययनादिति।अध्ययनसंबन्धिनीग्लानिरित्यर्थः।जनिकर्तुः।जननंजनिःउत्पत्तिः।इञजादिभ्यइतिजनेर्भावेइञ्।जनिघसि
भ्यामिण्इत्युणादिसूत्रेणइण्वा।जनिवध्योश्चेतिवृद्धिप्रतिषेधः।तस्याःकर्तेतिशेषषष्ठ्यासमासः।तथाचधात्वन्तरयोगेपिभवति।अङ्गादङ्गात्संभवतीतियथा।तदे
तदाह।जायमानस्येति।एतेनइक्श्तिपौधातुनिर्देशइतिइकानिर्देशोयमित्याक्षिप्यगमहनेत्युपधालोपप्रसङ्ग·मर्थासंगतिंसमासानुपपत्तिंचोद्भावयन्तोमीमांसावा
र्त्तिककाराःसमाहिताइतिभावः।इहसूत्रेप्रकृतिग्रहणंहेतुमात्रपरमितिवृत्तिकृन्मतम्।पुत्रात्प्रमोदोजायतइत्युदाहरणात्।उपादानमात्रपरमितितुभाष्यकैयटम
तम्।तदुभयसाधारणमुदाहरणमाह।ब्रह्मणइति।ब्रह्माहिरण्यगर्भः।सचहेतुरेवनतूपादानम्।किंचब्रह्ममायाशबलम्।तद्धिसर्वकार्योपादानमितिवेदान्त
सिद्धान्तः।भुवः।भवनंभूरितिसंपदादित्वाद्भावेक्विप्।पूर्वसूत्रेसमासनिर्दिष्टमपिकर्तृग्रहणमनुवर्ततेस्वरितत्वादित्याह।भूकर्तुरिति।प्रभवत्यस्मादितिप्रभवः।
ल्यब्लोपइति।ल्यबन्तस्यगम्यमानार्थकत्वादप्रयोगइत्यर्थः॥ ७ नहिकारणानांमध्येउपादानकारणमितिवत्कारणानांमध्येकारणमितिसंभवति।भावेक्विबिति

व्याख्यानम्।अत्रनिसाहचर्याच्चेतिभावः।प्रभवतीति।प्रभवनमत्रप्रथमप्रकाशः।सूत्रेभवनमप्येतदेव।अप्रयोगइति।तदन्तशब्दाज्ञानेपितदर्थज्ञानेइत्यर्थः।यथाप्रविशपिण्डीमि
त्यादाविग्यणइतिसूत्रभाष्योक्तरीत्यावाक्यैकदेशप्रयोगस्तस्यैवचपदस्यवृत्त्यासंपूर्णवाक्यार्थबोधकत्वात्तथाप्रकृतेपीतिबोध्यम्।एवंफलेभ्योयातीत्यादावपि॥

अर्थद्वारा प्रयुक्तादिति । तदर्थपरिच्छेद्यादित्यर्थः । सिद्धत्वादिति । अन्यार्थयोगे तु न तेन सिद्धिः । निर्धारणप्रयोजकीभूतधर्मानभिधानात् । परस्परप्रतियोगिकभेदस्य परस्परवृत्तित्वेन । निर्धारकत्वात् । तुल्यत्वादिति । तद्दन्यः कातर इत्यस्यापि वक्तुं शक्यत्वादिति भावः । कैयट इति । मेरुपृष्ठादारभ्येति पातञ्जलभाष्यप्रयोगोपि बोध्यः । आरभ्येति । अवधिमादायेत्यर्थकं तत् । आयतमेति । यदवधित्वेनाश्रित्याध्वनः कालस्य वा निर्माणं परिच्छेदः प्रतिपाद्यते तस्मादित्यर्थः । तेन पञ्चम्यन्तार्थेनार्थद्वारा प्रयुक्तान्निर्मीयमाणाध्ववाचिनः प्रथमासप्तम्यौ स्तः । कालादिति । तद्युक्तादित्यपेक्ष्यते । प्रपञ्चार्थमिति । नेच इतरस्त्वन्यनीचयोरित्यमरोक्तेर्नीचार्थकस्येदं ग्रहणमिति वाच्यम् । अस्मात्तरो मन्दो वेत्यादाविव पञ्चमी विभक्ते इत्यनेनैव सिद्धत्वात् । यत्तु इतर इति निर्दिश्यमानप्रतियोगिक एव प्रयुज्यते । तद्यथा चैत्रः शूर इतरः कातर इति । अतो नायमन्यार्थ इति । तन्मन्दम् । प्रतियोग्याकाङ्क्षाया उभयत्र तुल्यत्वात् उदाहृतकोशविरोधाच्च । ऋते कृष्णादिति । कथन्तर्हि पुरुषाराधनमृते इति । प्रमादोयमित्येके । अन्ये तु उभसर्वतसोरित्यत्र दृशिग्रहणात् ये त्रं यावच्छ्रीतमित्यादिवत् ऋते योगे द्वितीयापि साधुरित्याहुः । युक्तं चैतत् । ऋते द्वितीया चेति चान्द्रसूत्रात् । प्रभृतियोग इति । प्रभृत्यर्थैर्योग इत्यर्थः । तथा च कार्तिक्याः प्रभृतीति भाष्यं विवृण्वन् कैयटः प्रयुङ्क्ते तत आरभ्येत्यर्थ इति । वचनग्रहणादिति । वचनग्रहणसामर्थ्यादवधिमात्रं विवक्ष्यते तेन विनेति विशेषणांशस्तु नेति भावः । यद्वा मर्यादेति शब्द उच्यते । यस्मिंस्तु मर्यादावचनम् । आङ् मर्यादाभिविध्योरिति सूत्रं तत्र य आङ् दृष्टः स उक्तस्तस्य इत्यर्थः । परिहरेतीति । परेर्वर्जने वा वचनमिति वार्तिकात्पक्षे द्विर्वचनाभावः । परि[illegible]नाना मन्पञ्चमी विधेः वर्जनार्थेनापेन साहचर्यादिति भावः । प्रतिनिधिप्रतिदाने च । अस्मादेव निर्देशाद्द्याभ्यां योगे पञ्चमीत्याहुः । मुख्यस्याभावे तत्सदृश उपादीयते स प्रतिनिधिः दत्तस्य प्रतिनिर्यातनं प्रतिदानम् । अकर्तरि । पञ्चमी स्यादिति । तृतीयापवादोयम् । शतेनेति । शतमिह उत्तमर्णाय धार्यमाणत्वादृणम् ॥ ७७ द्विप्रकारार्थप्रभृतिशब्दयोगे तु न पञ्चमी मानाभावादि अन्यत्र विस्तरः । विशेषणांशस्तु नेति । तेन विनेति मर्यादा तेन सहेत्यभिविधिरिति वृद्धोक्ताविति भावः । अस्मादेव निर्देशादिति । यत्त्वनेन सूत्रेणैवेति । तन्न । एतद्घटकीभूतप्रश्नः प्रतिनिध्याद्य कत्वाभावेन कर्मप्रवचनीयत्वाभावात् । उपादीयते इत्यस्य यदित्यादिः । दत्तस्य तत्तुल्यमूल्यादेः प्रतिनिर्यातनं [illegible]स्य दानम् । तृतीयेति । हेतुतृतीयेत्यर्थः ॥

म·श्र·
१४१

हरदत्तग्रन्थेति। भाष्ये तु न्यस्यते इह। अगुणो स्त्रियां चेत्यत्रासंनिहिते वेति। उभयोः समुच्चयस्तु व्याख्यानादिति बोध्यम्। सप्तम्यपीति। प्रातिपदिकार्थमात्रे इति शेषः। तद्विशेषकत्वमिति। सत्त्ववचनप्रातिपदिकार्थविशेषणत्वमित्यर्थः। दूरान्तिकार्थेभ्य इत्यस्योदाहरणे क्रियाविशेषणत्वेनासत्त्ववाचिता बोध्या। सप्तम्यधिकरणे चेत्यत्र तु नास्य संबन्धो व्याख्यानादिति बोध्यम्। क्रियानद्रव्यमिति। एवं च तत्समानाधिकरणविशेषणत्वादत्र स्तोकशब्दस्याद्रव्यवाचित्वमिति भावः। तमनूद्येति। प्राचां ग्रन्थमनूद्येत्यर्थः। तदनुपपत्तिः। असत्त्वानुपपत्तिः। कृदभिहितत्प्रयोजको हेतुश्चेति चकारेणोक्तकर्तृसंज्ञा च। योगविभागादिति। एतच्च हेतुमनुष्येभ्य इति सूत्रे हरदत्तग्रन्थे स्पष्टम्। स्त्रियां चेति। बाहुलकं प्रकृतेस्तनुदृष्टेरिति वार्तिकनिर्देशोपीह ज्ञापकः। पृथग्विना। समुच्चयार्थमिति। निपातानामनेकार्थत्वादिति भावः। पञ्चमीति। तत्र मण्डूकप्लुत्या पञ्चमी। द्वितीया तु संनिहितैव। दूरं दूरेण चेति। इह सप्तम्यपि वक्ष्यते। किं च दूरान्तिकार्थेभ्य इति सूत्रस्योत्तरत्राप्यनुवर्तनादधिकरणे एभ्यो विभक्तिचतुष्टयं बोध्यम्। तथा च प्रयुज्यते। दूरादावसथान्मूत्रमिति। आवसथस्य दूरे इत्यर्थः। असत्त्वेति। सत्त्ववचनत्वं च तद्विशेषकत्वम्। एवं च सामानाधिकरण्येन प्रातिपदिकार्थविशेषकं व्युदस्यते॥ तदाह। दूरः पन्था इति। एतेन करणे च स्तोके इति सूत्रेण करणे किं क्रियाविशेषणे कर्मणि मा भूत्। स्तोकं पचतीति। क्रियान द्रव्यमिति प्राचां ग्रन्थोपि व्याख्यातः। यत्तु तमनूद्य क्रियाया विशेष्यत्वेन द्रव्यत्वावश्यंभावाच्चिन्त्यमित्यूचुस्तदेव चिन्त्यम्। धातुवाच्यायाः क्रियायाः असत्त्वरूपस्याकरे प्रसिद्धत्वात्। न च विशेष्यत्वे तदनुपपत्तिः। कृदभिहितभाववल्लिङ्गसंख्याद्ययोगित्वमात्रेण तदुपपत्तेः। यद्यपि हतशायिकाः शय्यन्त इत्यादौ भाष्ये संख्यान्वयः स्वीकृतः। पचति भवतीत्यादौ कर्तृकर्मत्वान्वयश्च तथापि लिङ्गस्य कारकान्तरस्य चाभावो निर्बाध एव। उक्तञ्च। क्रियान युज्यते लिङ्गक्रियानाधारकारकैः। असत्त्वरूपता तस्या अयमेवानपायिता॥ इति पञ्चमी ॥ ५) तभाववदिति। वैधर्म्ये दृष्टान्तः। यथा पक्त्वा पक्तुमित्यादि कृदभिहितभावेत्यर्थः। इत्यादाविति। इदमुपलक्षणं पचतीत्यादावपि कारकगतसंख्यां क्रियायामारोप्यते नैव तद्द्वयस्य स्तुत्या प्रसूत्रे भाष्ये उक्तत्वात्। भवतीत्यादाविति। परस्य मृगो भवतीत्यादिशब्दार्थः। लिङ्गस्येति। तन्निरूपितविशेष्यतायामेव द्रव्यत्वमिति भावः। क्रियानाधारेति। धात्वर्थानाधारेत्यर्थः। करणत्वादिभिरिति यावत्। स्वातिरिक्तपदान्तरवाच्यक्रियानिरूपितकरणत्वादिभिर्न युज्यते इत्यर्थः। इयमेव लिङ्गकरणत्वादिभिरसंबन्धरूपेण। असत्त्वरूपत्वेप्येतदंशस्य स्त्रीलिङ्गनिर्देशः। इति पञ्चमी ॥

रा म:
१४१

प्रत्ययार्थस्य।संबन्धस्य।प्रकृत्यर्थं।राजार्थम्।प्राधान्यादिति।संसर्गविशेषोभयनिरूपितत्वस्यप्रकारतायांस्वीकारादितिभावः।तदर्थश्च।प्रकृत्यर्थश्च।विशेषणम्।षष्ठ्यर्थसंबन्धेनेतिभावः।यत्तुदर्थशब्देनप्रत्ययार्थःसंबन्धइति।तन्नातस्यसंसर्गविधयैवभानस्यभाष्यादिसंमतत्वात्।उक्तन्यायेति।प्रकृत्यर्थस्यैवप्रत्ययार्थंप्रतिप्राधान्यापत्तेरित्यर्थः।राजसंबन्धीपुरुषइत्येवबोधादितिभावः।शेषत्वाभावमुपपादयति।पुरुषशब्दइति।इदमपि।कर्मादीनांसंबन्धसामान्येनान्वयविवक्षणमपि।नापूर्वमिति।षष्ठीशेषेइतिसूत्रेणसिद्धत्वादितिभावः।अष्टसूत्री

राज्ञःपुरुषइति।प्रत्ययार्थस्यप्रकृत्यर्थंप्रतिप्राधान्यादप्रधानादेवषष्ठीतदर्थश्चपुरुषेविशेषणम्।प्रधानात्तुनषष्ठी।उक्तन्यायविरोधात्।शेषत्वाभावाच्च।पुरुषशब्दोहियथायथंप्रातिपदिकार्थमात्रवृत्तिःकारकार्थकोवा।यदातुनेवन्तदापुरुषशब्दादपिषष्ठीभवत्येव।यत्त्वप्रधानेशेषइतितन्न।प्रातिपदिकार्थमात्रेप्रयुक्तोघटइत्यादौविशेषणेषष्ठीप्रसङ्गात्।नचप्रथमयाबाधः।तस्याःप्राधान्येचरितार्थत्वात्।कर्मादीनामपीति।यथाविशेषाविवक्षायांरूपज्ञानमितितद्विवक्षायांतुनीलःपीतइत्यादिप्रयुज्यतेतथेदमपिन्यायसिद्धमितिभावः।सतामिति।एवंचनपुंसकेभावेक्तस्ययोगेशेषत्वविवक्षायांचेतितृप्त्यर्थानांकरणेषष्ठीवेतिचप्राचांग्रन्थेपठ्यमानंनापूर्ववचनमितिभावः।सर्पिषइति।ज्ञोविदर्थस्यकरणे।अधीगर्थदयेशांकर्मणि।कृञःप्रतियत्ने।रुजार्थानांभाववचनानामज्वरेः।आशिषिनाथः।जासिनिप्रहणनाटक्राथपिषांहिंसायाम्।व्यवहृपणोःसमर्थयोः।कृत्वोर्थप्रयोगेकालेधिकरणे।इत्यष्टसूत्रीतुनेहव्याख्याता।तस्याःसमासनिवृत्तिफलकत्वात्।तथाहि।तत्रशेषइत्यनुवर्तते।शेषत्वेनविवक्षितेचकारणादौषष्ठीसिद्धैव।तदयमर्थः।इहषष्ठ्येवनतुतल्लुक्।तथाचलुकःप्रयोजकीभूतःसमासएवनेति।तथाचवार्त्तिकम्।प्रतिपदविधानाचेत्यादि ॥ ५७ ति।कृत्वोर्थेतिसूत्रंवृत्तिरीत्याव्याख्यातम्।वस्तुतस्तत्रशेषग्रहणंनानुवर्ततेमध्येविच्छेदादित्यन्ये।तेषांसप्तसूत्रीतिबोध्यम्।अनुवर्त्ततइति।अतएवाधीगर्थेतिसूत्रेशेषइतिवर्ततइतिभाष्यउक्तम्।ननुतद्बलाल्लुगभावोस्तुसमासाभावःकुतइत्यतआह।तथाचेति।प्रतिपदविधानाषष्ठीनसमस्यतइतिवार्त्तिकबलात्तत्प्राक्कल्पनमितिभावः।वस्तुतोनिषेधवार्त्तिकेऽनुवादाद्येमानिसूत्राणीतिबोध्यम् ॥

स्मरणमिति। करणे ल्युट्। कृद्योगषष्ठ्येति। अतएवसमासनिषेधप्रकरणेएतानिनोक्तानि तथासतिकर्माद्यर्थकषष्ठ्यामपिसमासनिषेधापत्तेः। द्विवस्तदर्थस्येत्यत्रकर्मणीत्यस्यकर्तृत्वमितापत्तेश्च। ननुशेषत्वाविवक्षायांकृद्योगषष्ठ्यावैकल्पिकसमासाङ्गीकारेऽधीगर्थत्वादीनांवैयर्थ्यमेवेत्यतआह। तत्रचेति। करणल्युडन्तस्मरणादिशब्दैः कृद्योगषष्ठ्याःसमासेऽनोभावकर्मवचनइत्यस्याप्राप्तिरितिभावः। मातुःस्मृतमिति। आदिकर्मणिकर्तर्यत्रक्तः। प्रशब्दंविनापिअनुदात्तोआदिकर्मबोधवदत्रापिप्र हरिश्माह। कारकैर्यपदिष्टेषुश्रूयमाणक्रियेषुनः। प्रोक्ताप्रतिपदंषष्ठीसमासस्यनिवृत्तयेइति। तेनशेषत्वविवक्षायांसर्पिषोज्ञातंमातुःस्मरणमित्यादीन्यसमस्तान्येवसाधूनि। हरिस्मरणमित्यादीनितुशेषत्वाविवक्षायांकृद्योगषष्ठ्यासमासेबोध्यानि। तत्रचकारकपूर्वकत्वात्कृदुत्तरपदप्रकृतिस्वरः। शेषषष्ठ्यासमासेत्वन्तोदात्तत्वंस्यात्तच्चानिष्टम्। तथाचस्वरार्थेयमष्टसूत्रीतिपरमनिष्कर्षः। किंचमातुःस्मृतमित्यादौसमासेवोपिफलम्॥ नहिकारकषष्ठीलभ्यते। नलोकेतिनिषेधात्। आहच। निष्ठायांकर्मविषयाषष्ठीचप्रतिषिध्यते। शेषलक्षणयाषष्ठ्यासमासस्तत्रनेष्यतइति। सर्वंस्थितेइत्यादिबहुग्रन्थेषुइहप्रकरणेउदाहरणंप्रत्युदाहरणंचयद्यतिङ् इष्यतेतत्सर्वमुपलक्षणतयाऽनेयमितिहरदत्तादयः। सर्वनाम्नस्तृतीयाच॥ इहसर्वनाम्नइतिषष्ठीमुदाह। सर्वनाम्नःप्रयोगेइति। पञ्चम्यांतुहेतुशब्दात्षष्ठीतृतीयेनस्यातामितिभावः। निमित्तपर्यायेति। पर्यायग्रहणस्यफलमुदाहरति। एवमित्यादिना। प्राचातुकिमर्थमित्युदाहृतंतत्रकिमःक्लीबत्वंदुर्लभम् करणाभिप्रायेणतद्दूषणासम्भवः। एतेनात्रकर्मणिक्तेकर्मणउक्तत्वादधीगर्थत्वस्यविषयएवन। भावेतुक्तोदुर्लभःसकर्मकत्वात्। गत्याद्यर्थकत्वाभावाच्चकर्तरिसदुर्लभइत्यपास्तम्। कर्मणःशेषत्वेनाविवक्षायामविवक्षितकर्मत्वेनाकर्मकतयाभावेक्तस्यसुलभत्वाच्च षष्ठीचेति। चस्त्वर्थः। एवंचतत्रसमासाभावोपिफलमितिभावः। दुर्लभमिति। अर्थशब्दस्यद्वितीयान्तत्वेतुकमर्थमित्युचितम्। प्रथमान्तत्वेऽर्थशब्दस्यपुंस्त्वान्नपुंसकत्वंदुर्लभमितिभावः।

कथंचिदिति। आद्ये क्लिष्टमन्त्ये लक्षणाभावोर्थासङ्गतिश्च। कोर्थः किमर्थमिति समासे सामान्ये नपुंसकत्वाश्रयणं चेति भावः। तेनेति। यत्तु सर्वनामसूत्रशेषे भाष्ये भवतः सर्वनामत्वे तृतीयाप्रयोजनं सर्वनाम्नस्तृतीया चेति। तत्तु यथाश्रुतसूत्रमते। अत एव सूत्रोपन्यासः नतु तद्बलादिदं सर्वनामविषयम्। कैयटादिविरोधात् हेतावित्यत्रोपन्यासस्य निर्बीजत्वापत्तेश्चेति बोध्यम्। पञ्चम्यपीति। अत्र सार्वविभक्तिकः षष्ठ्यन्तात्तसिरित्यन्ये। चिन्त्यप्रयोजनमिति। इदमत्रैव सूत्रे भाष्ये स्पष्टम्। समानाधिक

सामान्येन नपुंसकतां समासं चाश्रित्य कथंचिदानेयम्। असर्वनाम्न इति। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्तिकं हि वृत्तिकारेण यद्यपीहोक्तं तथापि भाष्यकृता हेतावित्यत्र पठितं तेन सर्वनामाप्रयोगेपि प्रवर्तते किंतु प्रायग्रहणात्तत्र तृतीयाद्वयमेवेत्यर्थः। वर्द्धमानस्तु प्रथमामपीच्छति। षष्ठ्यतसर्थप्रत्ययेन। पञ्चम्यादिति। कथं तर्हि ततः पश्चादिति। ततः पश्चात्स्रंस्यते ध्वंस्यते चेति भाष्यप्रयोगात्पश्चाद्योगे पञ्चम्यपि। प्रत्ययग्रहणं चिन्त्यप्रयोजनम्। एनपा। कथं तर्हि तत्रागारं धनपतिगृहादुत्तरेणास्मदीयमिति। उत्तरेणेति तृतीयान्ततोरणेनेत्यनेन समानाधिकरणं बोध्यम्। दूरान्तिकार्थैः। अन्यतरस्यां ग्रहणं समुच्चयार्थम्। तेन ष्ठि प्रकृतेपि पञ्चमी समुच्चीयते व्याख्यानात्। नतु षष्ठीद्वितीयातृतीयाः। तदेतदाह। पञ्चमी चेति। दिवस्तदर्थस्य। तच्छब्देन व्यवहृपणौ परामृश्येते तौ च द्यूते क्रयविक्रयव्यवहारे च तुल्यार्थौ पूर्वसूत्रे गृहीतौ इत्याशयेनाह। द्यूतेति। कर्मणीति ॥

रणं बोध्यमिति। स्त्र्यधिकारात्परेण वा सरूपविधिर्नेत्यत्र परेणेति तृतीया। ततः परेण शास्त्रेण वा सरूपसंबन्धो नेत्यर्थः। ततः परेणानायमनुवर्तते इत्यत्र सार्वविभक्तिकः षष्ठ्यन्तात्तसिरिति बोध्यम्। समुच्चीयत इति। अतः षष्ठीपञ्चम्योरेवात्र विधानमित्यर्थः। नतु षष्ठीति। विधीयन्त इति शेषः। षष्ठी द्वितीया तृतीया अत्र न विधीयन्त इत्यर्थः। तत्राद्योपात्ता। अन्ये समुच्चेया इति बोध्यम्। समुदायविधानाभावे तात्पर्यम् ॥

उत्तरसूत्रद्वयेति। अयंभावः। अत्रशेषइत्यस्यसंबन्धेविभाषोपसर्गेइत्यत्रशेषइतिसंबध्यतेउतन। नाद्यः। द्विनस्तदर्थस्येत्यनेनैवसमासाभावस्यसिद्धत्वेनसूत्रवैयर्थ्यापत्तेः। नचपक्षेषष्ठीशेषइत्यस्याप्रवृत्त्यापक्षेसमासप्रवृत्तिःफलम्। नोपसर्गइतिन्यासेनदिवइत्यस्यनिषेधेशेषषष्ठ्यांसमासविकल्पेनरूपद्वयस्यसिद्धतयाविभाषाग्रहणस्यतथापि वैयर्थ्यात्। नान्त्यः। वेदेपिविभाषोपसर्गइतिसूत्रेणकर्मणिद्वितीयायाःसिद्धत्वादापाद्यरूपस्यतत्राभावाच्चद्वितीयाब्राह्मणइत्यस्यवैयर्थ्यापत्तेः। नचतन्निरुपसर्गेद्वितीयार्थमिति वाच्यम्। कर्मत्वविवक्षायांदिवइत्यस्याप्रवृत्त्याकर्मणिद्वितीयेत्येवसिद्धत्वेनवैयर्थ्यस्यतदवस्थत्वात्। नचद्वितीयाब्राह्मणइतिसूत्रेशेषइत्यनुवर्त्ततेतेनकर्मत्वाविवक्षायांद्वितीयार्थमितिवाच्यम्। विच्छिन्नत्वेनानुवृत्तेरयुक्तत्वात्। वक्ष्यमाणोदाहरणेकर्मत्वस्यैवप्रतीतेश्च। कृतिलिदंनप्रवर्त्ततेइतिपुनर्विधानंसमासाभावायेत्यपिनवाच्यम्। अतए इहशेषइतिनसंबध्यतेउत्तरसूत्रद्वयारम्भादितिभावः। अतएवेहत्रिसूत्र्यांतिङन्तमुदाहरति। शतस्यदीव्यतीति। प्रेष्यब्रुवोः। इष्यतेहैवादिकस्यगत्यर्थः लोण्मध्यमपुरुषैकवचनंप्रेष्येति। तत्साहचर्यात् ब्रुविरपितथाभूतएवगृह्यते। अतएवेहशेषग्रहणंनसंबध्यतेतिङन्तेनसहसमासस्याप्रसक्तत्वात्। कर्तृकर्मणोःकृति। गुणेति। तदुक्तम्। प्रधानेनियताषष्ठीगुणेतूभयथाभवेदिति। कृतपूर्वीति। कृतंपूर्वमनेनेतिविग्रहः। पूर्वंकृतवानित्यर्थः। अविवक्षितकर्मकतयाभावेक्तः ॥ ७ वद्वितीयाब्राह्मणइतिसूत्रेभाष्यम्। किमुदाहरणम्। गांप्रतिदीव्यन्ति। पूर्वेणाप्येतत्सिद्धम्। इदन्तर्हिगामस्यतदहःसभायांदीव्येयुरितिदिवस्तदर्थस्येतिनित्यंषष्ठीप्राप्नोतीतिकैयटश्चेति। त्रिसूत्र्यामिति। तृतीयस्यवैदिक्यामुपन्यासोद्रष्टव्यः। अप्रसक्तत्वादिति। कल्पाद्यन्तस्यतुनप्रैषेप्रयोगइतिभावः। उभयथा। षष्ठीतदभावे। इदंचाकथितसूत्रभाष्येस्पष्टम्। अविवक्षितेति। तद्धितवृत्तेःपूर्वमविवक्षितेत्यर्थः। पश्चात्तुकर्मयोगोभवत्येवेतिबोध्यम्। अयंचप्रकारस्तद्धितविषयएव। तेनघटंक्रियतेइत्यादिन। नपुंसकेभावेक्तोप्यकर्मकेभ्यएव। आन्तंदेशमित्यादितुगत्यर्थाकर्मकेतिक्तेननिर्बाधम्। तत्सूत्रोपात्तधातुभ्यश्चनते। तस्यभावेविधानादित्यन्यत्रविस्तरः ॥

धायैरामोदमुत्तममिति। दधातेर्ददातिदधात्योर्विभाषेति णः। आतोयुगिति जयमङ्गला। धयैरिति ह्रस्वपाठो लेखकप्रमादात्। उत्तमपुष्पादिसंबन्ध्यामोदं धारयद्भिरित्यर्थाभिमानेन प्रश्नः। यदित्वामोदं गृहीत्वा मादृशां दुःखस्य पोषकैरित्यर्थो जयमङ्गलाव्याख्यातरीत्या स्वीक्रियते तदानकाप्यनुपपत्तिः। निर्देशादिति। अयं भावः। तत्रैव। तस्य। अर्हमिति सूत्रत्रयं कार्यम्। अर्हमित्यत्र योग्यताबलात्कर्मणि षष्ठीति तस्यभावइत्यत्र च तस्येति न वाच्यम्। एवं सिद्धे तदिति निर्देशोऽसमस्तद्वितीयान्तत्वबोधनार्थः। एतेन सूत्रे कर्मोपपदादण्प्रत्यये उ

सुप्सुपेति समासः। पूर्वादिनिः सपूर्वाच्चेति कर्त्तरि इनिः। तद्धितो श्राद्धमनेनेति सूत्रादनेनेत्यनुवृत्तेः। अथ कथं धायैरामोदमुत्तममिति भट्टिः। अत्राहुः। अनित्यमिदम्। तदर्हमिति निर्देशात्। स्त्रीप्रत्यययोरिति। कथं तर्हि सुट्तिथोरिति सूत्रे सुटासीयुटो बाधोनेति वृत्तिः। करणत्वविवक्षायां तृतीयेति गृहाण। न लोकाव्ययनिष्ठा। उश्च उकश्च ऊकौ लश्च उकौ चेति विग्रहः। उकारेण कृतो विशेषणात्तदन्तविधिस्तदाह। हरिं दिदृक्षुरलंकरिष्णुर्वेति। शेषे षष्ठीत्विति। एतेनेक्ष्वाकूणां दुरापेर्थे त्वदधीना हि सिद्धयः। अपिवागधिपस्यदुर्वचंवचनंतद्विदधीत विस्मयमित्यादिव्याख्यातम्। यद्वा। इक्ष्वाकूणां सिद्धय इत्यन्वयः। न तु इक्ष्वाकूणां दुराप इति। तथा वागाधिपस्य विस्मयमित्यन्वयः। न तु वागाधिपस्य दुर्वचमिति। तुल्यार्थैः। कथं तर्हि तुलां यदारोहयति दन्तवाससा इति कालिदासः। स्फुटोपमं भूतिसितेन शंभुनेति माघश्च। उच्यते ॥

उपपदसमासोऽजन्तस्य कर्मषष्ठ्या वा समास इति निरस्तम्। अत एव द्वितीयासमर्थादिति व्याख्यायते। राजानमर्हतीति च विगृह्यते। तत्फलं त्वनित्यत्वबोधनमेवेति। भाष्ये तु नैतद्दृश्यत इति बोध्यम्। ऊकौ चेति। अव्ययं चेत्यादेरुपलक्षणमिदम्। तदन्तविधिरिति। व्यपदेशिवद्भावेन तस्यापीति बोध्यम्। ननु नपुंसके भावे क्तस्येति भाष्यवार्तिकात्कारकषष्ठीनिषेधविषये शेषत्वविवक्षा न। तत्प्रत्याख्यानेन त्वनभिधानात् क्तातिरिक्तविषये सा न। अत एव पूरणगुणेति सूत्रे सद्ग्रहणं भाष्ये प्रत्याख्यातमित्यरुचेराह। यद्वेति ॥

सहयुक्तेइति।स्फुटोपममित्यत्रोपमाशब्दोऽत्रसाधनः॥ इतिषष्ठी॥ प्रातिपदिकार्थमात्रेइति।सप्तम्यधिकरणेचेतिसूत्रेणाधिकरणेसप्तम्याः सिद्धत्वाच्चकारेणान्तरङ्ग प्रा
तिपदिकार्थमात्रेसप्तमीविधीयतेप्रागुक्ताश्वतिलः।इयंचसप्तमीनिरवकाशत्वात्परायाअपिप्रथमायाबाधिकेतिभावः।वृत्तिर्भूमिर्यस्येतियत् क्तान्तनिरूपितपरा
र्थाभिधायकत्वाश्रयइत्यन्तः शब्दइत्यर्थः।अत्रेनोविषयस्येनःप्रकृतेः क्तान्तस्येतिषष्ठीतत्पुरुषोपिवक्तुंशक्यः।तादर्थ्येइति।फलस्यहेतुत्वेनविवक्षणात्फलार्थत्वा

सहयुक्तेप्रधानेइतितृतीया।स्वबालभारस्यतदुत्तमाङ्गजैः समंचमर्यैवतुलाभिलाषिणइ‾त्यत्रयथा।उक्तंहि।विनापितद्योगंतृतीयेति।व्याख्यानादिति।सूत्रे
र्थशब्दोपिपृथङ्ङिमित्तम्।तथाचद्वन्द्वएव।ननुअर्थशब्देनबहुव्रीहिरितिभावः।इतिषष्ठी॥आधारस्त्रिधेति।एतच्चसंहितायामितिसूत्रेभाष्येस्पष्टम्।च
तत्वइति।प्रातिपदिकार्थमात्रेइतिभावः।किंचदूरान्तिकेतिसूत्रस्यइहाप्यनुवर्त्तनादधिकरणेप्येताबोध्याः।क्तस्येति।इन् इन्नन्तः शब्दोविषयः वृत्तिः भू
मिर्यस्यक्तस्येत्यर्थः।हेतुतृतीयेति।तादर्थ्येचतुर्थ्यपिबोध्यम्।सीमेत्यादि।एतच्चदुर्गवाक्यप्रबोधेकुलचन्द्रेणोक्तम्।मेदिनीकारोप्याह।सीमाघाटस्थितिक्षे
त्रेष्वण्डकोशेषुचस्त्रियामिति।अथपुष्कलकोगन्धमृगेक्षपणकीलयोरितिच।हद्दत्तादयस्तुपुष्कलकः शङ्कुः सीम्निसीमज्ञानार्थंहतोनिहतः निखात
इत्याहुः।यस्यच।निर्ज्ञातकालाक्रियाअनिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदकत्वाल्लक्षणम्।तदाश्रययोः कर्तृकर्मणोर्बोधकादियंसप्तमी।त
त्रब्राह्मणेष्वधीयमानेषुगतइतिकर्तर्युदाहरणम्।कर्मण्याह।गोष्विति ॥

चकारणस्येतिभावः।ननुज्ञाप्यज्ञापकभावरूपलक्ष्यलक्षणभावोभूयोदर्शनाश्रयोदृष्टस्तच्चोदितेआदित्येतमोनष्टमित्यादावेवस्यान्नतुप्रकृतेकदाचिद्धिगोषुदुह्यमाना
स्वसौगतइत्यतआह।निर्ज्ञातकालेति।कालोद्देशस्याप्युपलक्षणंतदुदाहरणंसतिगुणेद्रव्यत्वमस्तीति।तदाश्रययोरिति।क्रियाश्रययोरित्यर्थः ॥

विशेषणीभूतयोरिति। शिखीध्वस्त इत्यादौ शिखायां ध्वंसप्रतियोगित्वविश्रान्तिर्नहि विशिष्टवेषेणैतस्य लक्षकत्वात्। नत्विति। गवांकृष्णेत्यादौ गोत्वाद्याक्रान्ततायामिति भावः। तदाह। नह्यत्रेति। वार्त्तिकादिति। साधुभृत्यो राज्ञ इति तु राज्ञो भृत्येनान्वये साधुःप्रत्यासत्त्या च राजविषयमेव साधुत्वं गम्यते न तु शब्देन तल्लक्ष्यते। अर्चायां प्रतियोगिनिषेधार्थत्वात्र साधुग्रहणमिति तत्त्वम्। तत्परे इति। रूढत्वादेतदर्थस्यैव ग्रहणम्। तेन प्रकर्षेणासितदित्यर्थेन॥ इति सप्तमी॥ इति श्रीमद्दीक्षितभट्टोजिदीक्षितपौत्रहरिविरचिते

इह अधीयमानानां ब्राह्मणानां दुह्यमानानां गवां च प्रतीयमानलक्षकत्वं विशेषणीभूतयोरध्ययनदोहनक्रिययोर्विश्राम्यति। भेद एवेति। न तु शब्दान्तरोपात्तसामान्यरूपाक्रान्ततेति भावः। आयुरा इति। नह्यत्र गवां कृष्णेत्यादाविव सामान्यविशेषभावः किंतु शब्दोपात्तयोर्धर्मयोर्विरोध एव। निपुणो राज्ञ इति। साधुशब्दप्रयोगे त्वर्चां विनापि सप्तमी भवत्येव। साध्वसाधुप्रयोगे चेति वार्तिकात्। प्रसित इति। तत्परे प्रसितासक्ताविष्टमरः। मूले नेति। न [illegible] [illegible]लुभो[illegible]शिष इति लुप्। पर्यायेणेति। ईश्वरशब्दो भावसाधनः। यस्य स्वामिन ईश्वरत्वमुच्यते इत्येकं व्याख्यानम्। यस्येति स्वं निर्दिश्यते यस्य स्वस्य ईश्वरं उच्यते इत्यपरम्। एवं च व्याख्याभेदात्पर्यायेण विभक्तिः सा च विशेषणात्षष्ठीवदिति भावः॥ इति सप्तमी॥ सामर्थ्याश्रित इति। स[illegible]मर्थशब्दो लाक्षणिक इति भावः। कतिपयेति। यद्यपि उदात्तवता गतिमता च तिङा गतेः समासो नित्याधिकारे वार्तिककृतोक्तः। तथापि नासौ नियतः। यज्ञानयत्। अभिप्रभरधृषतेत्यादौ समासादर्शनात्। अत एव भाष्यकृता सहेति योगविभागेनायं साधितः। यथोत्तरं मुनीनां प्रामाण्यमिति भावः। सचेति। एतदपि योगविभागस्येष्टसिद्ध्यर्थत्वादेव लभ्यते ॥

प्रौढमनोरमाव्याख्याने लघुशब्दरत्ने कारकं समाप्तम्॥ नित्याधिकारे इति। उपपदमतिङिति सूत्रे इत्यर्थः। नियत इति। अप्रतिबद्धप्रसरो नित्य इत्यर्थः । एवं चाधिकारप्राप्तमपि नित्यपदं तदंशेन संबध्यत इति भावः। योगविभागेनेति। तस्य चैकल्पिकत्वं वक्ष्यति। एतदपीति। छन्दस्येव नेत्यादिरित्यर्थः। एतदुत्तरं छन्दस्येवेति प्रतीकपाठो लेखकप्रमादात् ॥

म·प्र·
१४५

एतेचेति। उक्तंछान्दसत्वमित्यर्थः।निर्वाहइति। शायितव्यमित्यादेःक्रियावाचकस्यापिनपुंसकत्ववदस्यापिप्रातिपदिकत्वेवत्त्वेनलुकातदश्रवणादित्यर्थः।अन्यथेति।सुबन्त
मित्यनेनान्यतरस्यैवग्रहणेविनिगमकाभावादितिभावः।पूर्वशब्दस्यैवेति।तस्यकालवाचकत्वेनक्रियायांविशेषणत्वादितिभावः।काचित्कइति।कादाचित्कइत्यपिबोध्य
म्।योगविभागसिद्धत्वात्तदनुवादेनविभक्त्यलोपस्यैवानेनविधानमितिभावः।व्यस्तप्रयोगइति।समासेह्यीवस्यपरनिपातःस्यादितिभावः।अलोपश्चप्रत्यासत्त्यासमासा
एतच्चसंप्रदानसञ्ज्ञासूत्रेपदमञ्जर्यांस्पष्टम्।यदिहिलोकेपिस्यात्तर्हिअभिप्रेतिइत्यादौसमासात्वाद्यः स्युः।पचतिकल्पमित्यादौतद्धिता। न्ताद्यथा।नचलि
ङ्गः सर्वनामनपुंसकताभ्युपगमेननिर्वाहः।प्रकुरुतेइत्यादौह्रस्वापत्तेः।प्रकुर्वीरन्नित्यत्रनलोपापत्तेश्च।निर्देशादिति।अन्यथाहिप्रथमानिर्दिष्टत्वाविशेषेपि
रुपसर्जनसञ्ज्ञायाअन्वर्थत्वेनपूर्वशब्दस्यैवपूर्वनिपातःस्यादितिभावः।द्वेनेति।अयमपिसमासःपूर्ववत्काचित्कएव।तेनजीमूतस्येवेत्यादौनेतितिरी[illegible]
थकृपदत्वेन[illegible]इवामनइत्यादौव्यस्तप्रयोगोपिसङ्गच्छते।गोस्त्रियोः।उपसर्जनंयइति।यत्तुप्राचागोन्तस्त्रीप्रत्ययान्तयोरुपसर्जनयोरित्युक्तम्।तन्न।
चित्रगुरित्यादौगोशब्दस्योपसर्जनत्वेपितदन्तत्वाभावात्गौरीपतिरित्यादौअतिप्रसङ्गाच्च।कथंतुगोकुलंराजकुमारीपुत्रइतिचेत्शृणु।उपसर्जनस्ययत्संबन्धि
कतयायस्यप्रातिपदिकस्यह्रस्वोविधीयतेतदर्थंप्रतिउत्तरपदभूतयोर्गोस्त्रियोर्गुणीभावस्तदैवह्रस्वत्वम्।दिशयोरिति॥दिशोरितिहलन्तेनविग्रहेप्येतदेवरूपंदि
श्शब्दस्यशरदादित्वाट्टच्।वचनसामर्थ्यादिति।विभक्तीत्यनेनहियेनसुबन्तेनसहसमासस्तद्घटकीभूतैवविभक्तिर्गृह्यतेसंनिधानात्।तदर्थद्योतकस्याधिरि
तिभावः ॥७ वयविभक्तेरेवतेनसमासादुत्पन्नस्याव्ययादितिलुग्भवत्येव।ननुगोपदार्थस्यैवचित्रगोइतिसमुदायार्थस्यचित्राभिन्नगोरूपस्यान्यपदार्थोपसर्जनत्व
मेवेत्यरुचेराह।गौरीपतिरिति।राजकुमारीपुत्रेस्त्रीप्रत्ययान्तस्यप्रातिपदिकत्वलाभायसमस्तस्यपूर्वपदत्वकरणम्।उत्तरपदभूतयोरितिस्वरूपकथनम्।उत्तरप
दस्यैवतथात्वसंभवात्।टजिति।यतष्टच्अतएवदेवरूपमित्यन्वयः।संनिधानादितिउपस्थितत्वादित्यर्थः ॥

रा·स·
१५४

परिशिष्टेत्विति। अत्रारुचिः स्पष्टैव। द्योतकसमभिव्याहारे षष्ठ्या अप्राप्ते ऽवाचकत्वेपि संनिधानस्यागे न मानमिति। विग्रहायोगादिति। एवंच विग्रहे इति तदुक्तिरसंगतेतिभावः। प्रवेशस्यैवेति। एवंच तादृशविग्रहस्वरूपकथनमसंगतमिति भावः। असंस्पर्शादिति। एवंच तत्रार्थकथनत्वस्यैवाभावेन तन्मात्रत्वोक्तिरसंगतेति भावः। दुर्लभत्वाप

परिशिष्टे तु प्रथमान्तेनायं समासः षष्ठ्यन्तेन वेत्यपि पक्षद्वयं स्थितम्। यत्तु प्राचोक्तं हरौ अधिकृत्येति विग्रहे हरावधीति स्थिते इति। तन्न। नित्यसमासत्वेन विग्रहायोगात्। यदाहुः। अविग्रहो नित्यसमास इति। नन्वस्वपदविग्रहोपि स्वीक्रियते कुम्भं करोतीति यथा। अयमपि तथास्तु अधिकृत्येति ल्यबन्तस्य समासाप्रविष्टस्य सत्त्वादिति चेत्। न। समासार्थलेशमपि अबोधयतस्तस्य विग्रहे प्रवेशस्यैवासंभवात्। यत्तु आचख्युः। विग्रह इव विग्रहः। अर्थकथनमात्रम्। तेनाविग्रहत्वान्नित्यसमासत्वमविरुद्धम्। अत एव समासप्रकृतिभूतमलौकिकं वाक्यान्तरं दर्शयति। हरौ अधीति स्थित इतीति। अत्रेदं वक्तव्यम्। विग्रह इवेत्यसंगतम्। अर्थकथनवाक्यस्यैव विग्रहत्वेन ननोभेत्स्यापत्तेः अर्थकथनमात्रमित्यपि न। ल्यबन्तेन समासार्थासंस्पर्शात्। हरौ अधीति अलौकिकमित्युक्तम्। तदपि न। तत्र हरि ङि इत्यस्यैव प्रवेशात्। अन्तरङ्गानपीति न्यायात्। अन्यथा समासे हरिशब्देकारस्य दुर्लभत्वापत्तेश्च। यदपि व्याचख्युः। अलौकिकत्वादेवाधिशब्देनाभिहितेपि सप्तमी अन्यथा सा न स्यात् अनभिहिताधिकारादिति। तदप्यापाततः। अलौकिकत्वं हि नित्यविध्यन्तरप्राप्तिविषयत्वेनापरिनिष्ठितत्वं न त्वेतावन्मात्रेणाननुशिष्टायाः सप्तम्यास्तत्र प्रवेशः सूपपादः। अतिप्रसङ्गात्। यत्तु तत्वोत्रेण व्याख्यातम्। तिङ्कृत्तद्धितसमासैरिति परिगणनादधिनाभिहितेपि सप्तमीति। तन्न। परिगणनस्याकरे प्रत्याख्यातत्वात्। कर्मणि द्वितीयेति सूत्रे स्वयमपि तथैवोक्तत्वात् क्रमादमुं नारद इत्यबोधि स इत्यादिप्रयोगविरोधाच्च। द्वितीयापञ्चम्योरिति ॥

ऋतेरिति। कृतत्वेन कृते कादेशौकारस्यैव लुकापहारेणेति भावः। वैकल्पिके ङ्यादिविषये सेद्ध्यादावलौकिकत्ववारणाय नित्येति। आकरे। अनभिहितसूत्रे भाष्ये। परिगणनफलस्य भीष्मकटासित्यस्यान्यथासिद्धिस्तत्रोक्ता ॥

म.श.
१४६

रक्षितग्रन्थे इति।अत्रारुचिबीजं तु मद्यार्थकसम्प्राप्तेर्योगे द्वितीयाविधानस्य दूरार्थकाराच्छब्दयोगे पञ्चमीविधानस्य चारितार्थ्यमिति।प्रागुक्तरीत्या।अधिहरीत्यत्रोक्तया।अधिकरणश
क्तीति।कालवाचकत्वादितपि बोध्यम्।क्रियापदेनैवेति।कर्तृकर्मद्वारेतिभावः।निषेधोपीति।अत्यन्ताभावार्थकनञ्क्रियान्वयित्वव्युत्पत्तेरितिभावः।नवायुक्तीति।उक्तयुक्त्येति वि
एतच्च रक्षितग्रन्थे स्पष्टम्।यत्तु वदन्ति चैत्रस्य वनादागादित्यादौ सापेक्षत्वादसमासे चरितार्थत्वाद्विधानसामर्थ्यं नास्तीति।तच्चिन्त्यम्।नित्यसमासस्यान्याय्यत्वे सति चै
त्रस्येत्यादिविशेषणप्रयोगस्यैवासंभवात्।उक्तं हि भाष्ये।वृत्तस्य विशेषणयोगो नेति।ननु सविशेषणानां वृत्तिर्नेत्यपि भाष्ये उक्तमिति चेत्सत्यम्।अनित्यसमासविषयं
तत्।नित्यसमासस्यापि सविशेषणेष्वप्रवृत्तौ महतः कुम्भस्योप इत्याद्यापद्येत।यत्तु प्राचा कस्य समीप इत्युक्तम्।यच्च व्याचख्युरीदृशे प्रक्रियावाक्ये स्थिते इति तदुभय
मपि न्यायुक्ते [illegible]मेवासंप्रतिनेति।संप्रतीत्यव्ययमिदानीमित्यर्थे।एतर्हि संप्रतीदानीमधुना साम्प्रतं तथेत्यमरः।तच्चाधिकरणशक्तिप्रधानत्वात्क्रियापदेनैवा
न्वयार्हम्।निषेधोपि क्रियाया एव।तदेतदाह।युज्यत इति।असंप्रतीति समाहारो ह्युजिक्रियान्तर्भवति इ ओदनं इत्यत्र . सेकक्रिया यथा।यत्तु प्राचोक्तम्।असंप्रतीति संप्र
त्यभाव इत्यर्थः।अनेनोपभोग्यवस्तुनो यो वर्तमानः कालः तस्यैव निषेधः क्रियत इति।नन्न।अधिकरणस्य निषेधं प्रति प्रतियोगित्वेनान्वयस्य सर्वतन्त्रविरुद्धत्वात्।नहि भूतले घ
टो नास्तीत्यनेन भूतलं निषिध्यत इति कश्चिदभ्युपैति न वा युक्तिसहमित्यास्तां तावत्।इति हरीति।स्वरूपपरेण पञ्चम्यन्तेन हरिशब्देन सह प्रकाशार्थस्येति शब्दस्य समासः।प्रतिशब्दस्येति
यत्त्वाहुः।ग्रामस्य वृक्षं वृक्षं प्रतीत्यत्र सापेक्षत्वेन समासाभावे द्वितीयाविधानं सावकाशमिति तत्प्रागेव दूषितम्।हरदत्तस्त्वाह।अर्थमर्थं प्रतीति भाष्यकारप्रयोगात् वाक्यमविसाधु।यद्वा
नात्राव्ययं वीप्सावृत्ति किं तर्हि कर्मप्रवचनीयत्वात्संबन्धमवच्छिनत्ति वीप्सा तु द्विर्वचनद्योत्येति।सहपूर्वाह्णमिति।साकल्येऽव्ययीभावः गुणभूतेपीति।यदि सादृश्य इति नोच्येत
ततो यत्र सादृश्यं प्रधानं तत्रैव स्यात् ॥ ७५ शेषादितिभावः।ततो भूतलाधारकघटाभावप्रतीतिस्त्वार्थीति बोध्यम्।भाष्यकारेति।सञ्ज्ञा तु प्रतिस्थानमित्यादौ यत्त्यागाभावा
र्थेति सदाशयः।अत्र।अर्थमर्थं प्रतीति वाक्ये।प्रतिशब्दस्येत्यादिमूलं तु रक्षितानुसारीति बोध्यम्।साकल्य इति।पूर्वाह्णमपरित्यज्येत्यर्थ इति भावः ॥

रामः
१४६

औत्सर्गिकत्वादिति।उन्मत्तगङ्गमित्यादौव्यभिचारादितिभावः।नन्वग्निग्रन्थादग्रेप्यध्ययनमस्तीत्यतआह।इदानीमिति।तदर्थे।तत्प्रतिपादके।अन्तत्वविवक्षायाम्।तस्यापिविवक्षायामित्यर्थः।ग्रन्थपर्यन्तमिति।तदन्तमित्यर्थः।अन्तत्वस्यसुतरामिति।प्राधान्येनेत्यर्थः।तस्येति।अन्तत्वस्येत्यर्थः।ननुसहशब्दस्यान्तवाचकत्वाभावेतेनसमासोनस्यात्।अग्निग्रन्थपर्यन्तमिमितिविग्रहप्रदर्शनेनभवतापितस्यस्वीकारात्।अग्निरन्तोयस्येत्यस्यत्वदुक्तविग्रहसमानार्थत्वादतआह।सहयुक्तेइति।एवंचप्रथमान्तेनसमासइत्यसंगतम्।साहित्यंचसहशब्दार्थः।तत्राव्ययार्थप्राधान्यस्याव्ययीभावेऔत्सर्गिकत्वादितिभावः।अन्तइति।इदानीमेतावान्प्रदेशोऽध्येतव्यइतियावतःप्रदेशस्यपरिग्रहःकृतस्तदपेक्षयासमाप्तिरिहान्तोविवक्षितः।सचासकलेप्यध्ययनेभवतीतिसाकल्यात्पृथगुच्यते।साग्नीति।अग्निशब्दस्तदर्थग्रन्थेवर्ततेसतृतीयान्तःसमस्यते।यद्यप्यग्निनासहेतिप्रयोगार्हमेवतथापिसाहित्यमात्रेतथा।अन्तत्वविवक्षायांतुसमासोनित्यः।अतएवाग्निग्रन्थपर्यन्तमित्यस्वपदविग्रहोदर्शितः।यत्तुअग्निरन्तोऽस्येतिप्रथमान्तेनाग्नेरन्तत्वमितिषष्ठ्यन्तेनवाविग्रहइतिप्रथमान्तेनषष्ठ्यन्तेनवासमासइति।तन्न।सहशब्दस्यान्तवाचकत्वाभावात्अन्तत्वस्यतुसुतरामलाभात्।तस्याध्ययनेऽनन्वयाच्च।सहयुक्तेतृतीयायान्याय्यत्वाच्च।सतृणमत्तीत्यत्रसाकल्यस्यैवसाग्नीत्यत्रान्तत्वस्यापिसाहित्यद्योत्यतयातत्रतृतीयान्तेनसमासंस्वीकृत्येहतत्परित्यागस्यनिर्मूलत्वाच्च।यावच्छ्लोकमिति।यावदित्यव्ययंसमस्यते।विग्रहस्तुतद्धितेनेत्यस्वपदत्वंबोध्यम्।विभाषा।एतदिति।न्यायसिद्धेऽर्थेलिङ्गदर्शनमिदम्।टिघुभादिसञ्ज्ञानामिवसमाससञ्ज्ञायाअपिनित्यप्राप्तत्वाद्वचनंविनाविध्यन्तराणामिवसञ्ज्ञानामपिविकल्पालाभात्।स्यादेतत्।सुप्सुपेत्यपितर्हिनित्यंस्यात्।नचेष्टापत्तिःअपसिद्धान्तात्।७चसूत्रेविनिगमनाविरहादधिकार्यकसहशब्दस्यग्रहणमितिभावः।साकल्यस्यैवेति।यस्तृणानिभक्षयेत्सकथमन्नंपरित्यजेदितिप्रतीतेरितिभावः।एवंचयत्रनत्वत्रतृणभक्षणेतात्पर्यमितिग्रन्थसूचितसाहित्यप्रतीतौनतात्पर्यंतत्रापिचेत्तृतीयातर्हियत्रतदपिभासतेतत्रकथंनतृतीयेतितात्पर्ये।साहित्यद्योत्यतयेति।साहित्यवत्द्योत्यतयाबोध्यतयेत्यर्थः।मयूरव्यंसकादित्वात्सुप्सुपेतिवासमासः।यथाश्रुतेतुग्रन्थइत्यस्यसहाध्ययनेपिसाहित्यप्रतीतिर्जायतेनत्वन्तत्वप्रतीतिरितितस्यतद्द्योत्यतोक्तिरसंगतैवस्यादितिदिक्।न्यायसिद्धत्वमेवाह।वचनंविनेति।विकल्पबोधकशब्दंविनेत्यर्थः ॥

नित्यत्वादिति।वाक्येनसञ्ज्ञानवगमान्नित्यसमासैकदेशत्वेननित्यत्वादित्यर्थः।पुनर्विधानमिति।समाससञ्ज्ञाया इतिभावः।अन्यथातद्विहितसमाससञ्ज्ञानुवादेनान्यथा भावादिसञ्ज्ञामेवविदध्यात्।अत्रचव्याख्यानमेवशरणंवृद्धानाम्।नचतत्सञ्ज्ञाविधानमव्ययादीनांसमासशास्त्रप्रथमानिर्दिष्टत्वसंपादनेनोपसर्जनसञ्ज्ञार्थंचरितार्थमितिकथंज्ञापकमितिवाच्यम्।तत्रसूत्रेसमासेइत्यस्यसमाससञ्ज्ञाव्याप्यसञ्ज्ञाविधौप्रथमानिर्दिष्टमित्यर्थेबाधकाभावादितिदिक्।इवेनसमासस्यवैकल्पिकत्वेहेतुमाह।

तथाहि।चरट्सूत्रेवृत्तिकृतोक्तं पूर्वंभूतोभूतपूर्वः।सुप्सुपेतिसमासइति।तथाशाकलसूत्रेसिन्नित्यसमासयोःशाकलप्रतिषेधइत्यत्रनित्यग्रहणेननार्थइत्समपिसिद्धंभवति।वाप्यामश्वोवाप्यश्वइतिभाष्यंकैयटोव्याख्यत्।वाप्यश्वइतिसुप्सुपेतिसमासः।सञ्ज्ञायामितिसमासस्यनित्यत्वात्सिद्धः प्रतिषेधइति।तथाऽनुदात्तंपदमेकवर्जमसिद्धवदत्रेत्यादिसूत्रेष्वपिकैयटेस्पष्टम्।अतआह।सुप्सुपेतीति।समासेति।योगविभागेनैवसिद्धेसमासेउत्तरसूत्रैःपुनर्विधानंप्राचीनसूत्रावैकल्पिकताज्ञापयतीति।[illegible]वेनसमासस्यापिवैकल्पिकत्वादुद्बाहुरिववामनइत्यादिसिद्धम्।इवेनेतिवार्तिकंतुयद्यपिकुगतीत्यत्रपठ्यतेतथापिसुप्सुपेत्यत्रैवभेनित्याधिकारेस्मारितमितिकैयटः।एवंस्थितेइवेनसमासस्यछान्दसत्वंकल्पयन्तःप्रत्युक्ताः।जीमूतस्येवेत्यत्रबहुव्रीहिः समासाभ्युपगमेपितैत्तिरीयैर्लस्वरस्यैवपाठादितिदिक्।अपपरिबहिः।अतएवज्ञापकाद्बहिर्योगेपञ्चमी।ज्ञापकसिद्धंनसर्वत्र।तेनकरस्यकरभोबहिरितिसिद्धम्।आबालमिति।यत्तुआपरमाणोराचभूगोलकमितिकिरणावल्यांप्रयुक्तंतत्प्रामादिकम्।समासमध्येचकारप्रयोगासंभवात्।आभूगोलकादितितुपाठ्यम्।यंपदार्थमिति।सूत्रेयदितिसामान्येनपुंसकम्।अव्ययंविभक्तीत्यनेनसिद्धेविभाषार्थंसूत्रम्।तेनपक्षेवनस्यानुइत्युदाहार्यम् ॥

जीमूतस्येवेति।अतएवज्ञापकादिति।बहिर्योगेपञ्चम्याःसमासविधानात्ज्ञापकादित्यर्थः।लक्षणत्वंवस्तुसन्निमित्तंनतुतेनसंबन्धेनान्वयस्तदाह।अव्ययमिति।अनोःसमीपार्थत्वादितिभावः।वनस्यान्विति।कर्मप्रवचनीयसञ्ज्ञातुनात्रतद्योत्येनलक्ष्यलक्षणभावेनेतरत्रान्वयाभावात्।वनसमीपमित्येवबोधादितिभावः।तेनसंबन्धेनान्वयेतुवनमन्वित्येवबोध्यम्।अ

अ॰नाद्योत्यतइति।दीर्घगङ्गासंदृशीतिवाक्योर्थः।गङ्गादैर्घ्यंस्यादिःफलितोर्थः।द्योत्यार्थस्यविशेषणतायाएवसर्वसंमतत्वात्।यद्वाद्योत्यतेइत्यस्यबोध्यतेइत्यर्थः।सचशक्त्यैवेतिबोध्यम्।लक्षणत्वंचवस्तुसदेवनिमित्तम्।एवंचात्रापितेनसंबन्धेनान्यत्रान्वयाभावान्नकर्मप्रवचनीयत्वप्रयुक्ताद्वितीया।सादृश्याद्यन्तर्भावश्चैकार्थीभावबलात्।उपलक्षितेत्यस्यविशिष्टेत्यर्थः।गङ्गादैर्घ्यसदृशेत्यादिबोधोत्तरंनियमेनमनसातद्गतज्ञापकत्वबोधात्तस्यासुद्योत्यतोक्ता।यथाप्रारभ्यतइतिक्रियाध्याहारकतयाऽथशब्दस्यप्रारम्भद्योतकतातद्वदितिबोध्यम्।सामान्यशब्दोपीति।तेनपञ्चनदंसप्तगङ्गमित्यादिसिद्धिः।पदान्तरसमभिव्याहारेणेति।तद्घटितमेवतत्रवाक्यंनकेवलद[illegible]पदार्थघटितमिति।वरंचतदनश्चवरानः।श्रेष्ठोदकं।तस्यादूरभवा।अदूरभवश्चेत्यण्।आदिवृद्धिः।पूर्वपदात्संज्ञायामितिणत्वम्।अण्णन्तत्वान्ङीप्।नदीभिश्चेति।स्वरूपस्यसंज्ञा।नद्याश्चेनेहग्रहणंबहुवचननिर्देशात्किंत्वर्थस्य।नचतस्यसमासः संज्ञाभवति।अतस्तद्वाचिनामयंसमासः।तेनचनकेवलंविशेषशब्दाएव किंतुसामान्यशब्दोपि।नित्यसमास इति।एतच्चवृत्तौस्पष्टम्।शाकलसूत्रेकैयटस्वरसोप्येवम्।नन्वेवंन्यायसाम्याद्बहुव्रीहेरपिनित्यसमासत्वंस्यादितिचेन्नैवम्।यस्येत्यादिपदान्तरसमभिव्याहारेणान्यपदार्थप्रतीतेः।अतएवसंज्ञानवगमात् इत्युक्तंनत्वन्यपदार्थाऽनवगमादिति।संज्ञायांकिम्।शीघ्रगङ्गोदेशः।अथाव्ययीभावेऽसाधारणान्तसमासान्तानाह।अव्ययी।सामासान्त इति।समासस्यसमासार्थोत्तरपदस्यवाचरमावयवइत्यर्थः ॥

…

अनुगङ्गमिति।इहायामोलक्षणत्वंचानुनाद्योत्यते।लक्ष्यंतुसमासार्थः।अतएववाराणस्याःसामानाधिकरण्यम्।एवंस्थितेफलितमाह।गङ्गादैर्घ्येति।वाराणसी

तमितिभावः।समासस्येति।इदंचसमासान्ताः।अन्तइत्यादिसूत्रेषुभाष्येस्पष्टम्।समासार्थोत्तरपदस्यवेति।अयंपक्षःसरूपसूत्रेकैयटेस्पष्टः।परंतुचिन्त्यः।समासपदस्यतदर्थोत्तरपदलक्षणायांमानाभावात्तदर्थवाक्यस्योपचारेणसमासपदेनग्रहणमित्यर्थस्यैवगोस्त्रियोरितिभाष्येउक्तत्वाच्च।अन्तइतिसूत्रस्यभाष्येणोत्तरपदावयवत्वपक्षस्यविरोधाच्च।सरूपसूत्रस्यभाष्येतुसमासावयवत्वपक्षेपिसुयोजंसुधियाम् ॥

तद्ध्वनयन्नाद्यपक्षेएवपरिहारमाह।तेनेति।अदन्ताव्ययीभावत्वप्रयुक्तम्।अदन्तद्विगुत्वप्रयुक्तोङीप्चेत्यर्थः।नचद्विधुरीत्यादावकारान्तोत्तरपदत्वाभावात्स्त्रीत्वंकथंस्यादितिवाच्यम्।लिङ्गानुशासनसूत्राणांलोकसिद्धलिङ्गानुवादकत्वेनाविधायकत्वेनचात्रद्विगोस्त्रीत्वाभावनियामकत्वाभावात्।तदुक्तंलिङ्गमशिष्यंलोकाश्रयत्वाल्लिङ्गस्येतिसमासान्ताइत्यादिसूत्रेषुभाष्ये।नचोत्तरपदावयवत्वेपिअवयवावयवस्यसमुदायावयवत्वेनोक्तप्रयोगयोःसिद्धिरितिवाच्यम्।अन्तइतिसूत्रेसमासस्यान्तोदात्तत्वमुत्तरपदस्यचेतिविकल्पेआद्येइदंप्रथमकाइत्यादौकपोन्तोदात्तत्वापत्तिमुक्त्वाअस्तुतर्ह्युत्तरपदस्येत्युक्तेतत्पक्षेनृचइत्यत्रान्तोदात्तत्वासिद्धिरित्यर्थपरभाष्येविरोधेनतत्पक्षस्याङ्गीकर्तुमशक्यत्वादित्यलम्।इन्द्रियमात्रपरइति।बाह्येन्द्रियेत्यर्थः।सर्वबाह्येन्द्रियाविषयएवपरोक्षत्वव्यवहारादितिभावः।नसञ्ज्ञायाइति। सञ्ज्ञकस्येत्यर्थः।नपुंसकह्रस्वइति।उपलक्षणमेतत्।उपसर्जनह्रस्वस्यापि।तदुक्तमिति।माधवादिभिरितिभावः।नदीभिश्चेत्यत्रकैयटोप्येवम्।परन्तुयोगविभागसिद्धस्यसामान्यत्वेनविशेषेणनदीपौर्णमासीत्यनेनबाधः कथंनेत्यत्रदृढंमानंफलंचचिन्त्यन्तदेतत्तदुक्तमित्यनेनध्वनितम् ॥*॥

तेनोपशरदमित्यत्रनाव्ययीभावादित्वम्।द्विपुरीत्यादौद्विगोरितिङीप्सिद्ध्यति।जरायाइति।गणसूत्रम्।प्रतिपरेति।अक्ष्णःपरमिति।अविषयइत्यर्थः।वृत्तिर्विषयेऽक्षिशब्दः इन्द्रियमात्रपरः।समक्षमिति।अक्ष्णोयोग्यम्।नदी।इहस्वरूपस्यैवग्रहणंनसञ्ज्ञायाः।पौर्णमास्याग्रहायण्योःपृथग्ग्रहणात्।उपनदीति।टजभावेनपुंसकह्रस्वः।इदंत्ववधेयम्।नदीभिश्चेतिसूत्रेविशेषणानामिवस्वरूपस्यग्रहणंविशेषाणामेवेत्यत्रमानाभावादित्युक्तम्।तेनपञ्चनदमितिसिद्ध्यति।अत्रचनित्योऽच्।तदुक्तम्।गोदावर्याश्चनद्याश्चसंख्यायाउत्तरेयदीति।एतच्चअच्प्रत्यन्ववेत्यत्राजितियोगविभागात्सिद्धम्।पूजार्थमिति।अन्यतरस्यांग्रहणस्यप्रकृतत्वादितिभावः।इत्यव्ययीभावः ॥

इत्यव्ययीभावः * ॥ ॥श्रीसंकटाभैरवाभ्यांनमः ॥श्रीविश्वेश्वरायनमः॥ रामकृष्णाभ्यांनमः ॥ श्रीगुरुचरणाभ्यांनमः ॥

इ।ःपक्षेत्विति॥अत्रतुनासूचितमरुचिबीजमुक्तम्।यद्यपिसंबोधनेइति।एवंचतत्रे वा नेनसमासःस्यादितिशङ्का।तद्घटितेति।ततप्रकृतिकसुबन्तेत्यर्थः।गर्गादिभ्यइति।तद्धितविधौसुपइतिनाधिकारः तत्संबन्ध्यपत्यमित्यर्थे गर्गादिभ्यः प्रत्ययइत्यर्थे तदर्थबोधस्यसुबुत्पत्तिंविनासंभवात् परिपूर्णपदं पदार्थान्तरेणान्वेतीतिकुत्सितइतिसूत्रोक्तभाष्याच्चसुबुत्पत्त्यनन्तरंसामर्थ्यात्सुबव्यवहिताप्रत्ययोत्पत्तिरितिकिमर्थंतत्रलक्षणाकथंवातस्यज्ञापकत्वमितिचिन्त्यम्।तत्रैकैपदेति।समासप्रत्ययवि

द्विगोस्तत्पुरुषत्वेफलमाह॥समासान्तइति।पञ्चराजमिति।राजाहःसखिभ्यष्टच्।उत्तरपदस्यानकारान्तत्वात्स्त्रीत्वाभावः।समासार्थोत्तरपदान्ताःसमासान्ताइतिपक्षेतुपात्रादित्वंबोध्यम्।काशिकायांतुपञ्चराजीतिक्वाचित्कःपाठः।अपपाठःसइतिहरदत्तः।श्रितादीति।श्रितादीनांयद्यपिसंबोधनेसुबन्तत्वंसंभवतितथापिअन्यथापिसमासस्येष्टत्वात्श्रितादयस्तद्घटितसमुदायेलाक्षणिकाः।प्रायेणसमासतद्धितप्रकरणेएवमेव।स्वग्रासेपे।गर्गादिभ्योयञ्इत्यादिसामान्यापेक्षज्ञापकात्नहिखट्वेत्यस्यद्वितीयान्तत्वंगर्गादीनांषष्ठ्यन्तत्वंवासंभवति।येनविधिरितिसूत्रस्थभाष्येवृत्तिग्रन्थोपीहमानम्।तत्रकैयटहरदत्तादीनांतुमहान्प्रमादइतिशब्दकौस्तुभेप्रपञ्चितमितिभावः।केचित्तुनदन्ति।श्रितादीनांकृदन्तत्वेनगतिकारकोपपदानामितिसुबुत्पत्तेःप्रागेवसमासइष्टः।अन्यथाकाष्टश्रितेपोनसिद्ध्येदतएवकिलप्राचाश्रितादिभिरित्येवव्याख्यातंनसुबन्तेरिति।तन्न।प्रधानस्त्रीप्रत्ययेतदादिनियमाभावेनकाष्टश्रितेयस्यनिर्बाधत्वात्।यदपिश्रितादिशब्दादपिकदाचित्स्यादिति।तदपिन॥

योप्रतिषेधइतिवार्तिकव्याख्यावसरेश्रितस्यश्रितान्तस्यचसुबन्तत्वाभावमाशङ्क्यसंबुद्धौसंभवइत्युक्तम्।प्रमादइति।कष्टंश्रितःकष्टश्रितइत्यत्रयथास्यात्कष्टंपरमश्रितइत्यत्रमाभूदितिभाष्यविरोधादितिभावः।समर्थेनेत्यस्यविशेष्यत्वमादायप्राप्तस्यतदन्तविधेःसमासप्रत्ययेतिनिषेधइतितात्पर्यम्।सुबुत्पत्तेरिति।स्त्रीप्रत्ययोत्पत्तेरित्यपिबोध्यम्।नसिद्ध्येदिति।श्रितशब्देनसमासेतत्रापिसमुदायस्यस्त्रीप्रत्ययान्तत्वा[illegible]सिद्धिःश्रिताशब्देनसमासेतुसमुदायस्यटाबन्तत्वाभावइतितद्भावः॥

सापेक्षत्वेनेति। ननुकारकांशेक्रियायानित्यसापेक्षत्वेनकोदोषः। नचसापेक्षत्वेनकृष्टशब्देनैकार्थीभावापन्नत्वेनठगर्थापत्येननिष्कृष्यतस्यकेवलस्यैकार्थीभावोदुरुपपादइतिअसामार्थ्यमितितदर्थइतिवाच्यम्। परमगार्ग्यस्यापत्यमित्यर्थेपरमगार्ग्यायणइतिप्रयोगस्ययेनविधिरितिसूत्रभाष्यसंमतत्वेनतदनुपपत्त्यानिष्कृष्यैकार्थीभावाभावेपियथाकथंचिदेकार्थीभावमादायप्रवृत्तेर्भाष्यसंमतत्वादितिचेन्न। समुदायाद्वापितदादिनियमाभावेनकेवलादापत्तेर्दुर्वारत्वमितिदोषस्यानेनोपलक्षणात्। दिगिति। दिगर्थस्तुउपपदमतिङितिसूत्रस्थेनषष्ठीसमासादुपपदसमासोविप्रतिषेधेननवाषष्ठीसमासाभावादुपपदसमासइत्यन्तरङ्गत्वाभिप्रायमुक्त्वातदुभयप्रत्याख्यानपरेणतदुत्तरेणापवाविभाषाषष्ठीसमासोयदानतदोपपदसमासोभविष्यतीतिभाष्येणयथाकथंचित्कारकोपादानेपितत्परिभाषाप्रवृत्तेःषष्ठीसमासोपिसुबुत्पत्तेःपूर्वमेवगतिकारकेतिस्वसापेक्षत्वेनासामर्थ्यात्। गतिकारकेत्यादेस्तुनायंविषयः। कर्तृकरणेकृता — साधनंकृतेतिवत्द्वितीयाश्रितेतिसूत्रेकारकतद्विशेषयोरनुपादानादितिदिक्। कृत्स्नमिति। इहश्रितादिषुगत्यर्थत्वात्कर्तरिक्तः। श्रयणंप्राप्तिरापत्तिश्चेहगतिरेवनतुफलम्। अत्यासत्तिस्तुव्यतिक्रमः। सोपिगतिविशेषणमेवेतिप्राञ्चः। यद्वाश्रितइत्यादावादिकर्मणिक्तः। ग्रामंगमीति। गमेरित्यौणादिकइनिः। सचभविष्यत्काले। भविष्यतिगम्यादयइत्युक्तेः॥ ७६ रश्चषष्ठीसमासेपीत्युभयोःसमत्वेनान्तरङ्गत्वाभावेपिनक्षतिः। एकसंज्ञयोरेवोभाभ्यामपिप्रवृत्त्याविरोधाभावेनयुगपदेवोभाभ्यांसंज्ञाद्वयेजातेयदानषष्ठीसमासोनतत्कृतैकार्थीभावस्तदोपपदसमासस्तत्कृतैकार्थीभावोभविष्यतिस्यास्यतीत्यर्थकेनयद्यपियथाकथंचित्कारकोपादानेपितत्प्रवृत्तिरितिलभ्यतेपरिभाषायांसामान्यतःकारकपदोपादानेनतस्याःकारकमात्रविषयत्वौचित्यात्। अन्यथाकर्तृकरणोपपदानामित्येववदेत्। तथापितदुक्तप्रयोजनासिद्धिरेवात्रदूषणमिति। एवंचेदृशेषुसुपेत्यस्यसंबन्धेपिनक्षतिरितिबोध्यम्। नफलमिति। तेनमुख्यगत्यर्थत्वाभावात्कथंकर्तरिक्तःकथंवाकर्मणिद्वितीयेत्यपास्तम्। यद्वेति। अत्रापिपक्षेफलानुकूलव्यापारोधात्वर्थइत्यावश्यकमेव। प्रत्यासत्तेरगतित्ववादिनांमतेतदर्थमावश्यकमिदम् ॥

द्वितीयाग्रहणस्येति। चतुर्थीत्वेप्येव सिद्धे तत्सामर्थ्यात् षष्ठीबाधकत्वमित्याशयः। प्रत्याख्यायेति। संदर्शनादिपरत्वे धात्वर्थस्य कर्मतया कर्मणा यमभिप्रैतीति संप्रदानत्वे चतुर्थ्या स्तत्परत्वे कर्मणि द्वितीयायाश्च सिद्धिमाश्रित्य तत्प्रत्याख्यातमाकरे। नित्येतीति। समाससमानार्थकवाक्याभावेन तत्त्वाभिमानः। अर्थद्वारकमिति। गुणवचनस्य शब्दत्वादिति भावः। नन्वेवं कर्तृकरणे इत्येव सिद्धमत आह॥ रूढत्वे त्विति। धनरूढत्वे त्वित्यर्थः। अर्थैर्विभवा अपीत्यमरादिति भावः। एतदभिप्रायेणैवार्थग्रहणमिति तात्पर्यम्। श्लक्ष्णनि

अकेनोरिति कृद्योगलक्षणषष्ठीनिषेधात्कर्मणि द्वितीया। यत्तु गत्यर्थकर्मणीति सूत्रे द्वितीयाग्रहणस्य कृद्योगलक्षणषष्ठीबाधनार्थतामाहुः। तद्भाष्यविरुद्धम्। भाष्ये तत्सूत्रं प्रत्याख्याय कृद्योगे षष्ठ्या एव स्वीकारादित्यन्यत्र विस्तरः। खट्वारूढ इति। जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः। वेदं व्रतानि च समाप्य समावत्तेन हि खट्वारोढव्या। ब्रह्मचर्य एव भूमिशयनार्होपि यः खट्वामारोहति स जाल्मः। रुढश्चायम्। तेन खट्वामारोहतु मा वा निषिद्धानुष्ठानपरः सर्वोपि खट्वारूढ इत्युच्यते। अत एवाह। नित्येति। प्रस्थप्रमित इति। माङ् माने। आदिकर्मणि कर्तरि क्तः। इह प्रतिपच्चन्द्रेण नास्त्यत्यन्तसंयोगः। मुहूर्तक्षिति। मुहूर्तव्यापीत्यर्थः। कालाध्वनोरत्यन्तसंयोग इति द्वितीया। तृतीयातत्कृतार्थेन गुणवचनेन। तच्छब्देन तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते। तदर्थकृतत्वं गुणवचनस्यार्थद्वारकं विशेषणम्। एवं स्थिते फलितमर्थमाह। तृतीयान्तार्थेत्यादि। कृतो यो गुणस्तद्वचनेनेत्यर्थः। धान्येनेति करणे तृतीया। अर्थ्यत इत्यर्थः। प्रयोजनम्। अर्थनमर्थः अभिलाषो वा। अर्थशब्दस्य रूढत्वे तु धान्येनेति हेतौ तृतीया। पूर्वसदृश। इह समसदृशाभ्यां योगे तुल्यार्थैरिति तृतीया। अन्ये योगे हेताविति। अत एव वचनाद्वा। इह सदृशग्रहणं व्यर्थं षष्ठीसमासेन गतार्थत्वात्। न च तत्पुरुषे तुल्यार्थतृतीयेति पूर्वपदप्रकृतिस्वरार्थमिदमिति वाच्यम्। सदृशप्रतिरूपयोः सादृश्य इति सूत्रेण तत्सिद्धेः ॥

गुणयोगे हेतुत्वसंभवेपि सर्वत्र हेतुत्वोपपादनासंभवरूपारुचेराह। वचनाद्वेति। व्यर्थमिति। सदृशशब्दयोगे प्रतिपदोक्ततया तुल्यार्थैरिति तृतीयान्तेनैव समासो न तु भोजने न हेतुना सदृश इत्यादौ। एतेन तत्र षष्ठीसमासेनासिद्धिः हेतोः षष्ठ्यर्थत्वाभावादिति परास्तम् ॥

म·श·
१५०

अभिधेयपरमिति। ऊनार्थकलहं तृतीयाया इति सूत्रे व्याख्यातादूनार्थग्रहणं वृत्तिकृतोक्तम्। ऊनार्थान्युत्तरपदान्यर्थकलहशब्दे तृतीयान्तात्पराण्यन्तोदात्तानीति तदर्थः। तत्र हि प्रतिपदोक्तत्वादस्यैव ग्रहणमतोऽत्राप्यर्थशब्दोऽभिधेयपर इति भावः। तृतीयेति सूत्रभाष्येत्रत्यमर्थग्रहणं प्रत्याख्यातम्। अतएव समर्थसूत्रभाष्ये तृतीया तत्कृते सुपन्यस्योपादानविकल इत्युदाहृतमुपादानेन कृतो विकल इत्यर्थः। स्वरविधायके व्याख्यानादर्थग्रहणे तु न भाष्यानुग्रहः। किंच तृतीयाया इत्युक्त्या प्रतिपदोक्तपरिभाषाया अप्रवृत्तिरेव वाचा कृत इत्याद्यर्थकवाकलहादाविष्टमेवेति तदाप्राप्यः प्रतीयते कैयटस्य तु तत्र प्रमाद एवेत्यन्यत्र प्रपञ्चितम्। एरजन्तस्येति। उभयथापि सूत्रपाठदर्शनादिति भावः। अस्य वार्तिकस्य समासप्रकरणे दर्शनादाह। एतच्चे

ऊनार्थेति। पूर्वसूत्रेऽर्थशब्देन समासस्य साधितत्वादिहार्थग्रहणमभिधेयपरं तच्च ऊनशब्देनैव संबध्यते न तु पूर्वादिभिः; समसदृशयोः पृथगुपादानादिति भावः। भक्ष्येण मिश्रीकरणम्। खरं विशदमभ्यवहार्यं भक्ष्यम्। खरं कठिनम्। विशदं विविक्तावयवम्। यत्त्वत्रत्यपान्तस्यैरजन्तस्य च भक्ष्यतेस्तत्रैव प्रयोगात्। गुणान्तरेण। एतच्च वार्तिकं सर्वगुणकार्त्स्न्ये इति सूत्रे पठितम्। नृणामिति। अत्र द्विजशब्देन समासप्रसङ्गः। तदपेक्षया हि षष्ठी। श्रेष्ठत्वं च द्विजेतरमनुष्येभ्यः। तेषां सामान्यशब्देनोपस्थिततया तान्विहायोपस्थितकल्पनाया अन्याय्यत्वात्। अथ कथं पुरुषोत्तम इति। यस्मान्निर्धार्यते यश्चैकदेशो निर्धार्यते यश्च निर्धारणे हेतुस्तत्त्रितयसंनिधौ सत्येवायं निषेध इति द्विवचनविभज्येति सूत्रे कैयटः॥ ति। अत्र द्विजशब्देनेति। नरसंबन्धी द्विजस्तदितरमनुष्येभ्यः श्रेष्ठ इति बोधः। द्विजनरसमुदाययोरवयवावयविभावः संबन्धो द्विजेतरमनुष्येभ्य इत्यध्याहारः। यतः समुदायादेकदेशस्य पृथक्करणं गुणादिभिरिति निवृत्त्या तथैव लाभात् तत्र पृथक्करणं स्वघटितसमुदायघटकस्वेतरेभ्य इति मते इदम्। ये तु व्यावृत्तत्वाख्यः संबन्धो निर्धारणविभक्तेरर्थः। नृणामित्यस्य च द्विजेतरमनुष्यपरता। तद्व्यावृत्तश्रेष्ठत्ववान् द्विज इति बोध इति वदन्ति तन्मते श्रेष्ठशब्देन समासप्राप्तिर्बोध्या। तद्ध्वनयन्नाह। कथं पुरुषोत्तम इति॥ पूर्वमते तु पुरुषस्योत्तमेन सामर्थ्यं दुरुपपादम्। उत्तमत्वस्य निर्धारणागुणत्वात्। निषेध इति। इदमुपलक्षणं तत्रैव निर्धारणषष्ठीत्यपि बोध्यम्। एवं च संबन्धसामान्यषष्ठ्याऽत्र समास इति भावः ॥

श·म·
१५०

सामान्यतएवषष्ठीसमासनिषेधयोः प्रवृत्तिरितिवैतण्डिकमतमभ्युपेत्याह । यद्वेति।सञ्ज्ञायामितिसमासइति।हलदन्तादित्यलुक्तुनालुकिसञ्ज्ञात्वभङ्गापत्तेः।कृतालुकः सञ्ज्ञात्वेहितेनतस्यसाधुत्वान्वाख्यानम्।अतएवरघुनाथादौणत्वंन।सर्वनामानीत्यत्रनिपातनाण्णत्वाभावइत्यस्यत्वयमाशयः।स्वायत्तसञ्ज्ञाकरणेशास्त्रानुगतायाएवकर्तुमौचित्येना कृतणत्वस्यैवसञ्ज्ञात्वेनोच्चारणंतादृशस्यैवसाधुत्वार्थम्।तदुक्तम्।बाधकान्येवनिपातनानीतिसञ्ज्ञायांन।द्विजइत्यादितुनेष्यतएवअभिधानलक्षणाःकृत्तद्धितसमासाइत्यक इतिद्विवचनविभज्येतिसूत्रेकैयटः।यद्वापुरुषेषूत्तमइतिनिर्द्धारणसप्तम्याःसञ्ज्ञायामितिसमासः।नचैवंननिर्द्धारणइतिव्यर्थम्।स्वरेभेदात्।सप्तमीसमासेहिपूर्वपदप्रकृतिस्वरः।षष्ठीसमासेतुअन्तोदात्तत्वंस्यात्।पूरणगुण।अत्रप्राचोक्तम्।तदर्थैःषष्ठीनसमस्यतइति।तन्न्यूनम्।एवंहिसुहितार्थानामेवग्रहणंस्यात्।तावतामेनार्थशब्दे नसमस्तत्वादितिध्वनयन्नाह।सदादिभिश्चेति।अत्रव्याचख्युः।पूरणार्थशब्दःप्रत्ययएवगृह्यते।कृत्रिमेकार्यसंप्रत्ययादिति।तन्मन्दम्।नहिप्रत्ययविशेषाणांपूरणार्थत्वं टिघुभादिवत्सञ्ज्ञासूत्रैर्लब्धमस्तियेनोक्तपरिभाषावकाशमासादयेत्।कुतस्तर्हिपूरणप्रत्ययान्ताःषष्ठादयएवेहगृह्यन्ते।नतुपूरणोम्मनादिशब्दादितिचेल्लोपेचेत्यादपूरणमितिनिर्देशादित्यवधेहि।तेनकुम्भपूरणभवःपटुरुच्चैरित्यादिसिद्धम्।कथंतर्हितान्युञ्छषष्ठाङ्कितसैकतानीति।प्रमादएवायमित्येके।वस्तुतस्तुउञ्छेषुषष्ठःउञ्छात्मकःषष्ठइतिवाआख्येयम्।यत्तुपूरणेतिस्वर्यनेतेनाधिकारावगतिः।अयंतुभागार्थकात्प्रत्ययान्तइति।तन्न।अनुप्रत्ययान्तेनापिनिषेधस्यद्वितीयतृतीयेतिसूत्रेभाष्यएवस्पष्टत्वात्।अतएवभिक्षाद्वितीयमित्यादावन्यतरस्यांग्रहणसामर्थ्यात्समासइतितत्रोक्तम्।ननुब्राह्मणस्यशुक्लाइत्यत्रसमासप्रसङ्गएवनास्ति।ब्राह्मणशब्दस्यदन्तैरेवान्वयात्।ब्राह्मणस्ययेदन्तास्तेशुक्लाइत्यर्थादतआह।यद्वेति।शुक्लशब्दएवेहविशेष्यसमर्पकइतिभावः ॥

र्त्तरिचकारकेइत्यत्रभाष्योक्तेरितिदिक्।पूरणार्थत्वम्। तत्सञ्ज्ञकत्वम् । कृत्रिमाकृत्रिमन्यायस्यसञ्ज्ञाविषयत्वादितिभावः । —— उञ्छेष्विति।अधिकरणेसप्तमी।पादपूरणमितिनिर्देशेनपूरणेननिषेधस्यानित्यत्वंज्ञाप्यते।तेनकुम्भपूरणइत्यादिउञ्छषष्ठेत्यादिचसिद्धमित्यन्ये।भाष्येएवेति।एवञ्चस्वरितत्वकल्पनंभाष्यविरुद्धमितिभावः ॥

उक्तोदाहरणस्येति।ब्राह्मणस्यशुक्लादित्यस्येत्यर्थः।गुणवाचितयेति।सदागुणवाचितयेत्यर्थः।पूर्वग्रन्थेति।पूर्वस्तेनसमासप्रतिषेधस्योक्तत्वेनपुंनस्तेनतत्स्वीकारोविरुद्धइतिभावः ।——
अ॰श॰ ——भावप्रत्ययान्तएवेति।भावप्रत्ययान्तःसन्योगुणमेवाहेत्यन्वयः।तदाह।तदभावेगुणंगुणिनंचेति।घटस्यशुक्लोघटःशुक्लइत्युभयविधप्रयोगदर्शनादितिभावः।गुणमेवेति।नगुणिनमित्यर्थः
१५१ ।क्लिष्टमिति।भावप्रत्ययान्तोगुणवाचीतिशब्देनाक्षरमर्यादयातदर्थालाभात्क्लेशः।पुनरुक्तीति।शुक्लादिरेवेत्यनेनैवगन्धादिभिर्ननिषेधःइत्यर्थालाभेनसदेत्यादिपुनरुक्तिग्रस्तमित्यर्थः।निष्कृष्टं
यत्तुभावप्रत्ययान्तोगुणवाच्यत्रनिषिध्यतेइतिप्राचोक्तम्।तन्न।उक्तोदाहरणस्यभाष्यरूढस्यासंगतिप्रसङ्गात्।यदपिसदागुणवाचिनोननिषेधइति।तदपिन।भावप्रत्ययान्त
स्यगुणवाचितयापूर्वग्रन्थविरोधात्।यत्तुव्याचख्यते।भावेत्यादेर्भावप्रत्ययान्तएवनिषिध्यतइतिनार्थःकिंतुभावप्रत्ययान्तएवसन्योगुणमाह।तदभावेतुगुणंगुणिनंचसशु
क्लादिरेवनिषिध्यतेसदेति।अन्तरेणापिभावप्रत्ययंयोगुणमेवव्यक्तिगन्धादिशब्दस्तस्यननिषेधइति।तदपिक्लिष्टंपुनरुक्तिग्रस्तंच।काकस्यकार्ष्ण्यमित्यादावव्याप्तंच।उक्तव्या
ख्यायांहिशुक्लादीनामेवनिषेधोलभ्यतेनतुशौक्ल्यादीनाम्।नहिशौक्ल्यादिशब्दाःभावप्रत्ययंलब्ध्वानिष्कृष्टंगुणमाहुः।नवातदभावेगुणंगुणिनंचकिंतुअन्तरेणापिभाव
प्रत्ययंगुणमात्रपरत्वाद्रूपरसगन्धादिशब्दतुल्याएव।नचशौक्ल्यमितिकार्ष्ण्यमितिभावप्रत्ययोस्त्वेवेतिवाच्यम्।तस्यशुक्लरूपादिशब्दैर्लब्धत्वेपिशौक्ल्यादिश
ब्दैरलब्धत्वादन्यथातदभावेत्वित्यादिस्वग्रन्थेनैवसहविरोधापत्तेरितिअवहितैराकलनीयम्।यदितुप्राचोग्रन्थोपियोज्यइत्याग्रहस्तर्हीत्थंयोज्यताम्।सदेत्या
दितावद्यथाश्रुतम्।चन्दनगन्धइत्युदाहरणंच।अस्यापवादंप्रथममाह।भावेति।ननुअस्तुनामेयंयोजनाआकरग्रन्थात्तुकथमेतावान्सिद्धान्तोलब्धइतिचेत्।शृणु।सू
त्रेगुणार्थइत्यनेनकेवलगुणस्यगुणोपसर्जनद्रव्यस्यचप्रतिपादकोगृह्यते।व्याप्तिन्यायात्काकस्यकार्ष्ण्यंब्राह्मणस्यशुक्लाइतिद्वेधाभाष्येउदाहरणाच्च॥ ५७ गुणमिति।गुणमेवनाहुः किं
तुगुणगताञ्जातिमाहुरित्यर्थः।तुल्याएवेति।तेनतत्रनिषेधाप्राप्तिः इष्यतेचतत्रसभाष्यादिसम्मतत्वादितिभावः।स्वग्रन्थेनैवेति।तत्रहिसशुक्लादिरेवेत्युक्तम्।अस्यापवादमिति। राम:
भावप्रत्ययान्तःसदागुणवाच्यप्यत्रनिषिध्यतइतितदर्थइतिभावः।केवलस्यगुणस्येति।भावप्रत्ययान्तोन्यश्चगृह्यतेइतिभावः।तेनब्राह्मणस्यशुक्लोरूपमित्यत्रापिनिषेधइतिबोध्यम्। १५१

तत्स्थैश्चगुणैरिति।इदंषष्ठीतिसूत्रेभाष्ये।तत्रगुणमात्रेतिष्ठन्तिवाचकतयानगुणिनितेतत्स्थास्तैर्गुणैः गुणबोधकैः शब्दैरित्यर्थः।गन्धत्वेनेति।गन्धशब्देनेत्यादिः।गन्धशब्दात्तेनरूपेणप्रतीयमानोगन्धः शुक्लादिशब्दाच्छुक्लगुणइवनगुणिसामानाधिकरण्येनतद्विशेषणतयाप्रतीयते किंतुस्वप्रधानः स्वनिष्ठविशेष्यतावानेवप्रतीयतइत्यर्थः।तात्स्थ्यमिति।गुणसामानाधिकरण्येनैवगुणवाचकत्वमित्यर्थः।अदर्शनादिति।गन्धंमालतीकुसुममित्यप्रयोगादित्यर्थः।नतत्स्थेति।घटः शुक्लइत्यादौगुणिसमानाधिकरणगुणस्यापि चन्दनगन्धइत्यादौतुनिषेधेप्राप्तेतत्स्थैश्चगुणैरितिवचनेनसमासः प्रतिप्रसूयते।गन्धत्वेनहिप्रतीयमानोगन्धोनकदापिगुणिसमानाधिकरणः।किंतुस्वप्रधानएवेदमेवतात्स्थ्यम्।ननुवहतिजलमियंपिनष्टिगन्धानितिप्रयोगादर्शनादयुक्तमिदमितिचेन्न।तत्रहिगन्धानितिनगुणशब्दः मालतीकुसुमादिष्वदर्शनात्।किंतुचन्दनत्वादिजातिनिमित्तकोन्यएवसः।तस्माच्चन्दनगन्धइत्यत्रतत्स्थत्वंसुस्थमेव।एवंघटरूपमित्यादावपि।सुरभिशुक्लादयः शब्दास्तुनतत्स्थगुणप्रतिपादकाः।एवमपिशौक्ल्यसौरभादिभिः शब्दैः सहसमासोदुर्वारइतिचेन्नैवम्।तैर्हिशुक्लत्वादिप्रकारकएवगुणबोधः।तद्रूपापन्नानांतुद्रव्यसामानाधिकरण्यमस्त्येव।शुक्लः सुरभिरित्यादाविति दिक्।फलानामिति।करणस्यशेषत्वविवक्षायांषष्ठी।ब्राह्मणस्यकृत्वेति।तादर्थ्यरूपसंबन्धस्यसामान्यरूपेणविवक्षायांषष्ठी।ब्राह्मणसंबन्धिनीयाक्रियातदनन्तरमित्यर्थः।इत्यादीति।तथाचभट्टिः।यत्कृतेरीन्निगृह्णीमः।आदेयाःकिंकृतेभोगाः कुम्भकर्णत्वयाविनेत्यादि।अनेकमन्यपदार्थइतिसूत्रेसर्वपश्चादितिभाष्यप्रयोगोपिइहानुकूलः ॥ ५६ तैःप्रतिपादनादित्यर्थः।शौक्ल्येति।तैः सर्वदागुण समानाधिकरणस्यैवगुणस्यप्रतिपादनादितिभावः।सामानाधिकरण्यमस्त्येवेति।गुणिसामानाधिकरण्येनप्रतिपादकशब्दावाच्यगुणवाचकत्वंतत्स्थत्वंनैवंशौक्ल्यादिशब्दानांगुणिसामानाधिकरण्येनप्रतिपादकशुक्लादिशब्दावाच्यगुणवाचकत्वादितिदिक्।तादर्थ्यरूपसंबन्धस्येति।अतएवगुर्वर्थशब्दस्यगुरोरिदमितिविग्रहप्रदर्शनंभाष्ये।सर्वपश्चादिति।ततःपश्चादितिभाष्यप्रयोगोआद्यादित्वात्पञ्चम्यन्तात्तसोपपत्तौतद्योगेपञ्चमीकल्पनेमानाभावइतिभावः।भाष्यप्रयोगोपीति।प्रकृतसूत्रस्यभाष्यस्वरसोपीत्यस्याप्युपलक्षणमिदम् ॥

म. श. कैयटेति। उक्तमन्त्रारुन्धिबीजम्। तन्मतेनत्विति। यद्यपि विशेषणस्य ज्ञानस्वरभेदस्तथापि कारकषष्ठ्याः समासस्यैव समासनिषेधस्याविशेषादुभयोरपीति भावः। सतिसमासे इति। षष्ठीसमासे
१५२ इत्यर्थः। षष्ठ्यन्तत्वेनोभयोरपि प्रथमानिर्दिष्टत्वेनोपसर्जनत्वादिति भावः। पाठक्रमादर्थक्रमो बलीयानिति अप्रधानमुपसर्जनमित्यन्वर्थतामाश्रित्यैवेतत्। तत्र षष्ठीसमासेपि सुवच
मित्यत्र बोध्यम्। व्यवस्थेष्यत इति। पूर्वनिपातव्यवस्थेष्यत इत्यर्थः। तत्रेति॥ तद्व्यवस्थारूपं बलिस्यर्थः। अप्रधानमुपसर्जनमित्यन्वर्थतामाश्रित्य षष्ठीसमासेपि सुवचमिति शेषः। ना
एवंचास्याप्यभावेनाकुलत्वात्स्वीकार्य इति भावः। तक्रकौण्डिन्येति। आसीदित्यध्याहारेण धातुसंबन्ध इति भूते क्त इति वाच्यम्। सुरासुरैः पूजितोऽस्तीत्यादौ दोषात्। तेनेनीति। अन्यथा वर्त्तमाने क्तप्रत्य
यः स्यादिति। कैयटहरदत्तौ तु अव्ययप्रतिषेधे वृक्षस्योपरीत्युदाहरतः। अत एव द्व्ययेनापि निषेधं मन्येते। स्वरे भेद इति। कृदुत्तरपदप्रकृतिस्वरेण तित्स्वरस्यैवावस्थानात्। अन्त
स्वरितइष्टः। तन्मतेनतु मध्योदात्तत्वं स्यादिति भावः। तस्य कस्येत्यादि। यत्तु प्राचा कृदाहरणम्। राज्ञोनलस्येत्यादि यत्र समर्थनं सति समासे पूर्वनिपातानियमः स्याद्विशेषणसमास
स्तु स्यादेवेति। अत्रेदं वक्तव्यम्। विशेषणविशेष्यभावे कामचाराद्व्यवस्थायां प्राप्तायाम् अप्रधानमुपसर्जनमित्यन्वर्थतामाश्रित्य द्रव्याश्रितत्वेन गुणादीनामप्राधान्यात् द्रव्यापेक्ष
या गुणादीनां विशेषणतेति व्यवस्थेष्यते तत्र षष्ठीसमासेपि सुवचमिति किं तन्निषेधेनात आह नच पूजायाम्॥ पूजाग्रहणमुपलक्षणमिति व्याचष्टे मतिबुद्धीति। भूत इति। नच तक्र
कौण्डिन्यन्यायेन मत्यादिभ्यः क्तस्य वर्तमानकालता भूतकालतां बाधत इति वाच्यम्। तेनेत्यधिकारे उपज्ञात इति निर्देशेनाबाधज्ञापनात्॥ ७ क्तस्यच वर्त्तमान इति कर्त्तरि षष्ठ्या दुर्वारत्वेनो
पज्ञातशब्दयोगे तृतीयान्तत्वासंभवः। नचेयमर्थान्तरे तृतीया पूर्वोत्तरत्र कर्तृतृतीयाया एव निर्णयात्। सामान्यविषयकत्वस्यैवेति। विधेयविषय एव सन्यायो नानुवाद्यविषय इति सामान्यतो ज्ञा
प्यत इत्यर्थः। परे त्वाहुः। तक्रकौण्डिन्यन्यायेन वर्त्तमाने क्तेन भूते क्तो बाध्यत इति वक्तुमयुक्तं यतस्तक्रकौण्डिन्यन्यायो येन नाप्राप्ते इत्यनेन समानविषयः नाप्राप्ते दधिदाने तक्रदानमारभ्यते इ
ति तेन युक्तो दधिबाधः। प्रकृते तु नसः अप्राप्तायामेवान्त्योपधावृद्धौ अचामादिवृद्धिरारभ्यते सौश्रुत इत्यादावतो न तक्रकौण्डिन्यन्यायेन तया तयोर्बाध इति तद्धितेष्वचामिति सूत्रभाष्योक्तेः। अतो वर्त्तमा श.म.
नक्तस्य भूतक्तेनाप्राप्ते नारम्भात् वर्त्तमानत्वभूतत्वयोर्युगपद्विवक्षाया असंभवात्। यदीदं न स्यात् वर्त्तमाने लट् स्यादिति तस्यैवायमपवादो न्याय्यो न तु भूते क्तस्येति दिक् ॥ १५२

सन्निपातपरिभाषयेति।ढ।दिधकारस्योच्चारणार्थत्वेनअल्विधितयास्थानिवत्वायोगाच्चेत्यपिबोध्यम्।निष्कर्षेत्विति।वार्त्तिकभाष्योक्तस्यापिसूत्रसंमतत्वमेवेति निष्कर्षेत्वित्यर्थः।अतएव।सूत्रेणासिद्धत्वादेव।प्रकरणोक्तस्यैवेति।अनन्तरस्येतिन्यायादितिभावः।असमाविष्टत्वादिति।दक्षिणोत्तराभ्यामतसुच्।दिङ्नामानीत्यनुयोः सूत्र अन्यथाहिकृतेढकादेशेभत्वात्पुंवद्भावेसंनिपातपरिभाषयाकादेशोनस्यान्माथितिकवत्।भाष्यकारेक्ष्येति।अनेनसूत्रवार्तिकयोरुक्तिसंभवोपिध्वनितः।उत्तरंदृष्ट्वापूर्वस्याप्रवृत्तत्वात्।निष्कर्षेतुवैयर्थ्यस्पष्टमेवेतिभावः।दृष्टेरुदाहरणान्याह।सर्वमयइत्यादिना।मयडादीनांपरिगणिततसिलादिबहिर्भावात्नसूत्रेणगतार्थता।अतएवसर्वतःसर्वत्रेत्यादिनोदाहृतम्।सर्वकभार्यइति।नचस्त्रियाःपुंवदितिसूत्रेणगतार्थता।नकोपधायाइतिनिषेधात्।नचास्यापि तेननिषेधःशङ्क्यः।स्त्रियाःपुंवदित्यादिप्रकरणोक्तस्यैवतेननिषेधात्।अस्यादृष्टेस्तुतस्मिन्प्रकरणेऽसमाविष्टत्वात्सर्वप्रियइति।अपूरणीप्रियादिष्वितिपर्युदासादप्राप्तेपूर्वस्यैवेति।वृत्तिघटकानेकभागमध्येकिंचिदपेक्षयापूर्वस्येत्यर्थः।अतएवतदितरेत्यादौपरस्यनपुंवद्भावः।लिङ्गादिति।अन्यथाहिएषाद्वाएतयोः कात्पूर्वस्यापिविधीयमानमित्वंनिर्विषयंस्यादितिभावः।यत्तुप्राचोक्तंसर्वनाम्नःसमासेपूर्वपुंवदिति।यच्चव्याचख्युः।वार्तिकार्थमनुवदतिसर्वनाम्नइत्यादिना सर्वनामशब्देनसञ्ज्ञोपसर्जनभिन्नाःसर्वगणपठिताउपलक्ष्यन्ते।तेनसर्वानामकाचित्तस्याःपुत्रःसर्वापुत्रः।अतिसर्वापुत्रइत्यत्रनातिप्रसङ्गइति।तदेतत्त्वेआपातरमणीयम्।तथाहि।समासेइत्यनाकरम्।वृत्तिमात्रेइतिभाष्यात्।मयडाद्यन्तेऽव्याप्तेश्च।तथाचश्रीहर्षःप्रायुङ्क्त।निजामयोऽद्याममपिपावनीमयंभवन्मयोद्यापदतिनायनीप्रस्वेरिति ॥ ७७ योर्भाष्येपाठादितिभावः।तदितरेत्यत्रसुप्सुपेतिसमासः।निर्विषयंस्यादिति।पुंवत्त्वेनायोनिवृत्तेरितिभावः।अव्याप्तेश्चेति।यत्तुठक्छसोरितिनियमार्थंतद्धितेचेत्सर्वनाम्नःपुंवत्त्वंतर्हिठक्छसोरेवेतिअतोमयडाद्यन्तेऽनिष्टमेवपुंवत्त्वमिति।तन्न।दक्षिणोत्तराभ्यामतसुजिति सूत्रस्थभाष्यविरोधात्।भवनायइति।तत्प्रकृतवचनेइतिमयट् ॥

ब्राह्मणीपूर्व इति। सर्वनाम्नासमासत्वेन पूर्वस्यब्राह्मणीस्यादेः पुंवत्त्वापत्तिरिति भावः। उक्तोदाहरणयोरिति। सञ्ज्ञोपसर्जनघटितोदाहरणयोरित्यर्थः। तत्रसर्वनामसञ्ज्ञकत्वस्यैवाभावेनलक्षणाव्यर्थ्येतिभावः। अतिसर्वाशब्दस्येति। उपलक्षणमिदंसञ्ज्ञाया अपि। कदापीति। वृत्तौ वृत्तेः प्रागित्यर्थः। वैयाकरणभार्य इति। नख्याभ्यामितिसूत्रस्थकैयटहकिंचब्राह्मणीपूर्वइत्यादावतिव्याप्तिः। नचजातेश्चेतिनिषेधः। सौत्रप्राप्तिमात्रविषयकः इतिसिद्धान्तात्। रूपवतीपूर्वइत्यादौजातिवाचकत्वाभावेनातिव्याप्तिदार्ढ्याच्च। वार्तिकार्थमित्यपिस्वकीयः। वार्तिकग्रन्थेएतदभावात्। नचात्रविवदितव्यम्। ठक्छसोश्चेत्यस्यनिरालम्बनतापत्तेः। सर्वनामशब्देनेत्याद्यपिनसाधु। उक्तोदाहरणयोर्लक्षणंविनापिसुस्थत्वात्। दक्षिणपूर्वायेत्यादावुपसर्जनतयाऽव्याप्त्यापत्तेश्च। ननुमात्रग्रहणसामर्थ्यात्सर्वनामताउपलक्षणंनतुविशेषणम्। तेनवृत्तेः प्राक्सर्वनाम्नः संप्रत्यसर्वनामत्वेपिपुंवद्भावोलभ्यतइत्याकरेस्थितम्। मयापिस्वग्रन्थेउक्तमितिचेत्। तर्हिउपसर्जनभिन्नालक्ष्यन्तेइतिलघून्यस्त्वदुक्त्यैवपराहतइत्यवधार्यताम्। नचैवमतिसर्वापुत्रेअतिव्याप्तिः। अतिशर्वाशब्दस्यकदाप्यसर्वनामत्वेनतत्रातिव्याप्तेरुक्तिसंभवाभावादित्यास्तांतावत्। स्वभिन्नामिति। यात्वात्मानमेवदर्शनीयांमन्यतेतत्रस्त्रियाः पुंवदित्येवसिद्धम्। एकस्याएवरूपभेदेनकर्मत्वकर्तृत्वयोःसत्वेपिवास्तवाभेदेनसामानाधिकरण्याविधानादितिभावः। मद्रिकायतइति। मद्रेषुभवामद्रिकामद्रवृज्योः कन्। पाकाभार्येति। अर्भकपृथुकपाकावयसीतिकपूर्वस्ययास्तोयमुणादिषुनिपातितः। नत्विहतद्धितः नापिवुः। वयसिप्रथमइतिङीपंबाधित्वाऽजादित्वाट्टाप्। वृद्धिनिमित्तस्य। वृद्धिशब्देनकिम्। तावतीभार्यायस्यतावद्भार्यः। आसर्वनाम्नइत्याकारविधौवृद्धिशब्दोनास्ति। फलोपधानेति। निमित्तशब्दः फलोपहितपरः स्वरूपयोग्यपरत्वेतुवैयाकरणभार्योनसिद्ध्येदितिभावः। अकेशेति। सहनञ्विद्यमानपूर्वाच्चेतिङीषभावः। जातेश्च। जातेः परइति। जातिवाचकात्परत्वमात्रमिहविवक्षितंनतुजातेरित्येवंविधानपर्यन्तमाग्रहः। भाष्येह्यस्तिकमित्युदाहरणेऔपसंख्यानिकस्यनायंनिषेधइत्युक्तेः। रदत्तानुरोधेनेदम्। भाष्येइति। नकोपधायाइतिसूत्रस्येत्यर्थः। इत्युक्तेरिति। हस्तिन्शब्दस्यादन्तत्वाभावेनततोजा

[illegible]तिभावः॥

दाबादिरिति। दृढविडोऽपत्यं स्त्री दृढबिड़ सा भार्या यस्येत्यर्थे समासे एतन्निषेधाभावेन पुंवत्त्वं भवत्येवेति भावः। अनूङ इत्यस्य पर्युदासत्वे ऐडविडवृन्दारिकेति निषेधविषयोत्तरसूत्रविषयकर्मधारयउदाहरणात् बहुव्रीहावीदृशे पुंवत्त्वनिषेध इष्ट एवेति तु न वाच्यम्। उत्तरत्राप्येतदनुवृत्तिं तत्रापीदृशार्थकत्वमिति ध्वनयितुं तथोक्तेः। दृढविडादेस्तेन हस्तिनीभार्य इत्यादौ नान्तलक्षणस्यापि निषेधः सिद्ध्यतीति भावः। यः प्रत्यय इति। टाबादिः। प्राचा तु विशिष्य ङीषेवोपात्तः। तन्निर्मूलं भूद्राभार्या इत्यादाववव्याप्तं चेति भावः। ब्राह्मणीति। शार्ङ्गरवादित्वान्ङीप्। यत्तु प्राचा ङीष् न पुंवदिति व्याख्याय ब्राह्मणीभार्य इत्युदाहृतम्। तत्परस्परविरोधादुपेक्ष्यम्। सौत्रस्येति। व्याख्यानमेवात्र शरणम्। संख्यया। सामानाधिकरण्यस्यान्यपदार्थे वृत्तेश्च विरहात् पूर्वेणाप्राप्तौ वचनम्। उपदशा इति। उपशब्दः समीपे समीपिनि वर्तते आद्योऽव्ययीभावः। द्वितीये तु बहुव्रीहिरिति विवेकः। सूत्रेतीति। लुप्तषष्ठीकमित्याह। तिशब्दस्येति। अन्येषामपि दृश्यते। अत्र प्राचोक्तम्। दृशिग्रहणात्कर्मव्यतिहारबहुव्रीहौ पूर्वपदान्तस्य दीर्घत्वमात्वं वा नचेति। तत्रात्वं वेत्यपाणिनीयम्। अतएव मुष्टामुष्टि बाहाबाहवीति उदाहरणमप्यप्रमाणिकमेव। भाष्यादिविसंवादात्। अत एव दृशिग्रहणस्येदृशेऽर्थे तात्पर्यं न कल्प्यमिति प्रामाणिकः पन्थाः। अर्वाचीनास्तु आत्वमाहुः। तथा च पञ्जिकायां त्रिलोचनदासेनोक्तं नाम्यन्तपूर्वपदस्यात्वं दृश्यत इति। एवं च प्राचा केचिदिति वक्तुमुचितं पाणिनीयसूत्राशयमज्ञो निक्षेपस्त्वनुचित एवेति दिक्। ओर्गुणः। तद्धिते किम्। पट्वी। गुणोक्तेरिति। यद्यपि ओरोदिति सूत्रितेऽपि भस्य तद्धित इति सञ्ज्ञाद्वयपूर्वकत्वमस्त्येव तथापि विधेयसमर्पकं पदं यत्र सञ्ज्ञारूपं स एव सञ्ज्ञापूर्वको विधिरिति भावः। यद्यपि ओदिति तपरस्तत्कालस्य सञ्ज्ञैव। तथापीह तकार उच्चारणार्थः। ओरोदित्येव वास्तु ॥

रनन्तरापत्ये जातित्वाभावाच्च। परस्परेति। ब्राह्मणीत्यत्र हितेनापि ङीनेवोक्त इति भावः। यदि तु तत्र ङीषिति पाठस्तदाकरविरोधो बोध्यः। सामानाधिकरण्यस्येति। दृशानां समीपिन इत्यर्थात्। तदाह। उपशब्द इति। उच्चारणार्थ इति। तन्मात्रार्थ इत्यर्थः। फलाभावेन तपरसूत्राप्रवृत्तेरिति भावः ॥

प्रत्याख्यातमिति।अव्यावर्तकत्वात्तस्याऽग्रहणम्।तस्याः विशिष्टरूपोपादानविषयत्वाच्चेत्यपि बोध्यम्।विद्यमानतावाचीति।दशानां पुत्राणां विद्यमानत्वेद् त्यर्थस्तत्[illegible]तिमाह।दशांस्विति।अव्यभिचारादिति।पूर्वाह्णस्य साहपूर्व्यं सह पूर्वाह्णमित्यादावपि अव्ययस्य प्रथमानिर्दिष्टत्वेनोपसर्जनत्वमस्त्येवेति भावः।अवयवद्वारकमिति।समासस्योपसर्जनत्वासंभवादिति भावः।यद्यपि सहकृत्वप्रियइत्यादौ समासस्योपसर्जनत्वसंभवस्तथापि लक्ष्यानुसारादेवं व्याख्यानं बोध्यम्।उ स्वरूपं शब्दस्येति तु प्रत्याख्यातमिति भावः।तेन सहेति तुल्ययोगे।तुल्ययोगे किम्।सहैव दशभिः पुत्रैर्भारं वहति गर्दभी।विद्यमानतावाची सहशब्दः।दशपुत्रेषु विद्यमानेष्वित्यर्थः।वोपसर्जनस्य।उपसर्जनस्येति न सहस्य विशेषणम्।अव्यभिचारात्।किं तूत्तरपदेन सन्निधापितस्य समासस्य।तच्चावयवद्वारकम्।उपसर्जनसर्वावयवकस्य समासस्य बहुव्रीहेरिति यावत्।व्यधिकरणे च षष्ठ्यौ तदेतदाह।बहुव्रीहेरवयवस्येति।तेन ह न।सहकला।सहयुध्वा।प्रायिकमिति।सपूर्वाया उदक्षरः सकर्मकादित्यादिनिर्देशादिति भावः।स्वरे विशेष इति।उचिसति चित इत्यन्तोदात्तत्वं स्यात् असति तु पूर्वपदप्रकृतिस्वर इत्यर्थः।संख्याया इति।संख्यान्तस्य तत्पुरुषस्य अन्तावयवोऽड्ज्वाच्य इत्यर्थः।एकविंशतिरित्यादौ तु न।अन्यत्राधिकलोपात् इति वार्तिककारोक्तेः।स्थूलाक्षेति।यत्तु प्राचा प्रत्युदाहृतम्।स्थूलाक्षिरिति।तन्न।अक्ष्णोऽदर्शनादित्यच्प्रसङ्गात्।यत्तु व्याचख्युः।समासान्तविधेरनित्यत्वात्सनकृत इति।तदापाततः।एवं हि षजपितथैव न भविष्यतीति प्रत्युदाहरणस्यासङ्गतिप्रसङ्गात्।नेतुर्नक्षत्र इति।नक्षत्रे यो नेतृशब्दस्तदन्ताद्बहुव्रीहेरित्यर्थः।नेता नायकः ॥७ पसर्जनसर्वावयवकस्येति।कश्चिदवयवः सर्वत्रोपसर्जनमेवेति विशेषणसामर्थ्यादेतल्लाभ इति भावः।तादृशश्च बहुव्रीहिरेवेत्याह।बहुव्रीहेरिति।व्याख्यानाच्चात्रोपसर्जनपदेन लौकिकं शास्त्रीयं च तद्गृह्यते।तेन सपुत्र इत्यादावपि उपसर्जनसर्वावयवकत्वं नेदम्।सपूर्वाया इति।एतच्च वृत्त्यनुरोधेन।अत्र सह विद्यमानः पूर्वो यस्याः इति अनेकमन्यपदार्थे इति बहुव्रीहिरित्यन्ये।अन्यत्राधिकेति।अव्ययादेरित्युक्तत्वादित्यपि बोध्यम्।अत एव गोविंशतिरित्यादौ न।मक्षत्रेय इति।तद्वृत्तित्वं च नेतृशब्दस्य तत्सामानाधिकरण्यात्।तेन चन्द्रो नेता यस्य स चन्द्रनेता मृग इति सिद्धं समासविशेषणे तु बहुव्रीहेर्नक्षत्रवृत्तित्वाद्दोषः स्या

उपलक्षणमिति। स्पष्टं चेदं गतिश्चेति सूत्रे भाष्ये। अव्याप्तीत्यादि। प्रयोगेन येत्यत्राव्याप्तिः प्रनःपूर्षेत्यत्रातिव्याप्तिरिति भावः। सामानाधिकरण्यासंभवादिति। यद्यपि प्रातःकल्पविस्था
द्राविव चैतौ शक्तिमत्प्रधानत्वं संभवति। तथापि प्रातःकाले स्वरूपतः शोभनत्वस्य निरूपयितुमशक्यत्वात्तत्रैव प्रयोगाच्च कर्मपर्यन्तं लक्षणेति बोध्यम्। व्यावृत्तिरिति। मद्यामस्य
नासु स्थूलपूर्वादिति। स्थूलपूर्वाद् बहुव्रीहेरच् नेत्यर्थः। खुरखराभ्यामिति। नासिकाया इत्यपेक्ष्यते। केवलादेप्रावचनं प्रत्ययनिवृत्त्यर्थम्। उपसर्गाच्च। उप
सर्गग्रहणं प्रादीनामुपलक्षणम्। नासिकाशब्दस्याक्रियार्थत्वेन तं प्रत्युपसर्गत्वायोगात्। तदाह। प्रादेरिति। तद्द्रेति। प्रयोगेनयप्रतनं वस्त्रोअच्छ प्रनःपूषाद्
त्यादौ अव्याप्त्यतिव्याप्तिप्रसङ्गादिति भावः। शोभनं प्रातरस्येति। प्रातःशब्देन प्रातस्तनं कर्म लक्ष्यते। अन्यथा प्रातःशब्दस्याधिकरणप्रधानतया सामानाधिकरण्य
स्यासंभवादित्याहुः। एणीपदादिषु त्रिषु निपातनात्पद्भावः। धर्मादनिच् केवलात्। इह बहुव्रीहिणा पूर्वपदं आक्षिप्यते इत्युपदसेयवक्ष्यति तच्च केवलादित्यनेन वि
शेष्यत इत्याह। केवलादिति। यत्तु प्राचा केवलादित्युभयविशेषणतया व्याख्यातम्। तत्सौत्रेण च केवलादिति धर्मशब्दस्य पूर्वपदस्य च विशेषणमित्युक्तम्। पाणिनी
यमतदर्पणे च केवलादिति कैवल्यं धर्मप्राक्पदयोर्मतमित्युक्तं तत्सर्वमापाततः। धर्मपदविशेषणे प्रयोजनाभावात्। धर्मशब्दान्तं यत्रोत्तरपदं तद्द्वारा वृत्तिः फल
मितिचेन्न। तत्र धर्मशब्दस्य बहुव्रीह्यवयवीभूतपूर्वपदात् परत्वस्याभावात्। त्रिपदे बहुव्रीहाविति। इह सर्वनामसंख्ययोरुपसंख्यानमिति स्वशब्दस्य पूर्वनिपातो न भव
ति। आहिताग्न्यादेराकृतिगणत्वादिति हरदत्तमाधवौ। आपेक्षिकमिति। नन्वत एव केवलग्रहणं व्यर्थम्। पूर्वपदशब्दस्य समासप्रथमावयवे रूढत्वेनैव मध्यमपद
व्यावृत्तिसंभवात् इति चेन्नैवम्। पूर्वपदाक्षेपेतास्यर्थग्राहकत्वेनैव केवलपदस्य सार्थकत्वात्। कर्मधारयेति। यत्त्वाहुः। साध्यो धर्मोऽस्येति साध्यधर्मा संदिग्धश्चासौ सचेति विग्र
हः। सन्दिग्धः साध्यधर्मो द्वारकएव पर्यवस्यतीति। सोऽयं रथ्याक्लेशः। उक्तरीत्यैव साध्यस्य साक्षात्संदिग्धत्वलाभात्। ननु कर्मधारयपूर्वपदत्वेऽनिच् दुर्लभः। केवलादित्यस्य समासा
नात्म[illegible]सुग[illegible]थ्यादिति चेन्नैवम्॥ नपूर्वपदत्वम्। यत्पूर्वपदं ततः परत्वं च न धर्मशब्दस्येति भावः। पूर्वपदाक्षेप इति। यौगिकपूर्वपदाक्षेप इत्यर्थः। वस्तुतस्तु तत्फलं चिन्त्यम्।

म·श· आकरग्र[illegible]मिति।केवलपदस्यलोकेनसुदुर्भ्यांकेवलाभ्यामित्यादौचसजातीयान्याभावेएवप्रयोगेणत्वदुक्तार्थेमानाभावादितिभावः।एतच्चेजादेरितिसूत्रेभाष्येस्पष्टम्।नि
१७५ वृत्तिधर्मेति[illegible]तिधर्मस्योपलक्षणम्।इममिति।जम्भैः दन्तैः सुतमभिषुतंसोमंपिबतेतितदर्थः।प्रयुञ्जतइति।एकरूपेणेतिशेषः।इतिशब्दादिति।लौकिकविव
क्षानुसारकत्वात्तस्येतिभावः।कर्मव्यतिहारः परस्परग्रहणादिः।अव्ययीभावत्वमिति।तेनतस्याव्ययत्वंबोध्यम्।एतच्चवृत्त्यादिप्रामाण्यादास्थितम्।एवंचस्वरार्थमपीति।

त्वदुक्तेक्षितार्थस्याकरग्रन्थानारूढत्वात्।अस्मदुक्तार्थस्तुभ्वादिगणेधृञ्धारणेइतिधातौमाधवग्रन्थेस्पष्टः।निवृत्तिधर्माहिस्यानोभवतीतिप्राचांप्रयोगोपिअस्माकमेवानुकूलइतिदिक्।दन्तेचेति।तथाचदृश्यते।इमंजम्भसुतंपिबेति।दक्षिणेर्मा।लुब्धोव्याधः।अतएवाह।व्याधेनेति।कवयस्तुहिंसामात्रेप्रयुञ्जते।बालीहेमाब्जमालीगुणनिधिरिपुणानिर्मितोदक्षिणेर्मेतियथाकेशाकेशीति।तत्रतेनेतिबहुव्रीहिः।तत्रहिग्रहणप्रहरणयुद्धानीवकर्मव्यतिहारोपिइतिशब्दाल्लभ्यते।इच्प्रत्ययस्यतिष्ठद्गुप्रभृतिषुपाठात्तदन्तस्याव्ययीभावत्वम्।नन्वेवमव्ययीभावसञ्ज्ञयाबहुव्रीहिसञ्ज्ञायाः बाधात्समासस्वरेणैवान्तोदात्तत्वंसिद्धंतत्किमिच्श्चित्त्वेन।अत्राहुः।विशेषणार्थंतत्।तिष्ठद्गुप्रभृतिष्विकारमात्रपाठेहिसुगन्धिरित्यादावतिव्याप्तिःस्यात्।यद्वादण्डादण्डीत्यादौसञ्ज्ञयोः समावेशएवउपजीव्यविरोधस्यान्याय्यत्वात्।एवंचस्वरार्थमपिचित्त्वम्।द्विदण्डीति।द्विदण्डाघातेस्मिंस्तुइच्न ॥

इदंसति शिष्टस्वरबलीयस्त्वानाश्रयणेन।यदितुउपजीव्यत्वेनबहुव्रीहिसञ्ज्ञयासमावेशेपिसतिशिष्टस्वरबलीयस्त्वेनाव्ययीभावत्वप्रयुक्तसमासान्तोदात्तत्वेन
सिद्धिरित्युच्यतेतदाद्यमेवप्रयोजनमितिबोध्यम्।समावेशफलंत्विच्प्रत्ययाव्ययत्वयोः सिद्धिः।तत्रतेनेदमित्यव्ययीभावप्रकरणेइजपितत्समासान्तप्रकरणे राम:
एवतुनकृतः द्विदण्ड्यादिभ्यश्चेत्यत्रेच्पदस्यकर्तव्यतापत्तेः सिद्धान्तेतुपरत्वादेषनङ्·एवेष्यते ॥ १७५

विषयविशेषेति। मुद्रादिरूपान्यपदार्थरूपेत्यर्थः। उभयाहस्त्याभरेति। इदं वेदभाष्ये यद्यपि उभाभ्यां हस्ताभ्यामाभरेति व्याख्यातम्। तथापि संमुदायनिपातनादेव बहुव्रीह्यधिकारेपि तत्पुरुषादयमव्ययत्वाद्व्यामोलुक्। इदमप्यव्ययत्वफलं बोध्यम्। आश्रित्येति। आरोप्येत्यर्थः। स्वतन्त्रोपीति। जानुवाचीत्यर्थः। उपज्ञुरिति। जानुसमीपमित्यर्थः। एकदेशद्वेत्यस्य विवरणमविभागेनेति। अवयवावयविनोर्हि अविभागलक्षणसमवायः। एवं प्रकृतेपीति। इवेत्युक्तं तद्ध्वनयन्नाह। एवं

समुदायनिपातनस्य विषयविशेषपरिग्रहार्थत्वात्। उभाहस्तीति। निपातनादेवायचं विना प्रयोगः। उभयाहस्तीति। पक्षे यच्। उभयाहस्त्याभरः। प्रसंभ्याम्। जानुशब्दस्यैकत्वेऽपि अर्थगतमुपपदनिबन्धनं वा द्वित्वमाश्रित्य जानुनोरिति द्विवचननिर्देशः। तत्फलं तु स्थानषष्ठीत्वस्फुटीकरणं जानुन इत्युक्ते किं पञ्चमीयं प्रत्ययाधिकाराज्ज्ञुरपि प्रत्यय इति सम्भाव्येत। तदेतद्ध्वनयन्नाह। ज्ञुरादेश इति। छन्दसि तु स्वतन्त्रोपि दृश्यते। उपज्ञु बाधो नमसा सदेम। धनुषश्च। धनुरन्तस्येति। धनुरन्तादिति तु प्राचः प्रामादिक एव। अथ कथं स्वलावण्याशंसाधृतधनुषमह्नाय तृणवदिति पुष्पदन्तः। समासान्तविधेरनित्यत्वात्। अनित्यत्वे प्रमाणन्तु श्वादिगणे राजन्शब्दस्य पाठः। स हि प्रतेरंश्वादयस्तत्पुरुषे इत्यन्तोदात्तार्थः। राजाहःसखीति टचो नित्यत्वे तु किं तेनेति दिक्। अविभागेनेति। एवं च गुणवाचिन एवेह ग्रहणं न तु द्रव्यवाचिन इति फलितोर्थः। द्रव्याणीति। अस्ति च गन्धशब्दो द्रव्यवचनः। वहति जलमियं पिनष्टि गन्धानियमियमुद्ग्रथते स्रजो विचित्राः इति दर्शनात् ॥

७ चगुणेति। गुणोपसर्जनद्रव्यवाचिन इत्यर्थः। एतद्वृत्तिविषयमेव गन्धस्य तादृशत्वमिति न पूरणगुणेति सूत्रस्थग्रन्थविरोधः। एतदेवाभिप्रेत्य भाष्यकैयटयोरुक्तं कुङ्कुमाद्यनुलेपनमपि देवदत्तादेरविभागापन्नं निलीनं यदि विवक्षितं तदा सुगन्धिर्देवदत्त इति। विभागेनावस्थाने तु सुगन्ध इतीति। न तु द्रव्येति। चन्दनत्वजातिविशिष्टद्रव्येत्यर्थः। सुगन्धिर्वायुरित्यत्रापि गन्धाश्रयाणां तत्संसृष्टानां वाय्वविभागापन्नानामेव ग्रहणमिति न दोषः। एवं सुगन्धि पुष्पं सलिलं चेत्यत्रापि द्रष्टव्यम्। कोशेपि द्रव्यवचन इत्यस्यो

आघ्रायोते।वहे।वहन्वायुराघ्रातइत्यर्थः।दुर्घटेति।अत्रकेचित्खिल्वत्रचारुचिबीजंतुतादृशार्थत्वेउक्तभाष्यविरोधइतिदिक्।यद्वेत्यादिनोक्तंचिन्त्यम्।परनिपातावज्ञाप
काश्रयणस्यावश्यकत्वान्ङीकथंतर्हीति।सञ्ज्ञात्वाभावेनस्त्रियांसञ्ज्ञायामित्यस्याप्यप्राप्तेरितिभावः।नद्यृतश्चेतिसिद्धेइति।इदंलक्ष्मीशब्दमात्रविषयंप्रकारान्तरम्।अन्येषु
गन्धस्तुसौरभेनृत्येगन्धिकेगर्वलेशयोः।सएवद्रव्यवचनोबहुत्वेपुंसिचस्मृतइतिकोशात्।एतेनमहीभृतःपुष्पसुगन्धिरादे।भग्नबालसहकारसुगन्धौइत्यादि
व्याख्यातम्।एतच्चसर्वंहरदत्तग्रन्थेस्पष्टम्।केचित्तुतदेकान्तशब्देनस्वाभाविकत्वंविवक्षित्वाआगन्तुकस्यनेत्याहुः।तथाचभट्टिः।आघ्रायिवान्गन्धवहःसुगन्धइ
ति।व्याख्यातंचजयमङ्गलायाम्।गन्धस्येदुत्पूतिसुसुरभिभ्यइतीकारःसमासान्तोन।गन्धस्यैत्वेतदेकान्तग्रहणमितिवचनात्।सुगन्धआपणिकइतियथेति।अतए
वभग्नबालसहकारसुगन्धावित्यादीनांप्रामादिकत्वंदुर्घटवृत्तिकृतोक्तम्।अल्पाख्यायाम्।सूपस्यगन्धोलेशोयस्मिन्निति।व्यधिकरणपदोबहुव्रीहिः।अतएवज्ञाप
कात्।यद्वा।सूपोगन्धोस्मिन्नित्येवविग्रहः।गन्धस्यविशेषणत्वेपिअस्मादेवज्ञापकात्परनिपातः।इतिविश्वइति।एतेनाल्पपर्यायोयंगन्धशब्दइतिप्राचो
ग्रन्थोव्याख्यातः।अल्पाख्यायामितिसूत्रस्यापिस्वरसः।यत्तुवदन्ति।गन्धशब्दोत्रलक्षणयाऽल्पत्वंगमयतीति।तच्चिन्त्यम्।शक्तिग्राहकस्योक्तत्वात्।पादस्य।
यद्यपिलोपःसमासान्तोनस्यात्आदेःपरस्येत्यादेःस्यात्शैषिकःकप्प्रसज्येत।समासान्तापेक्षस्यशेषस्याश्रयणत्वात्अतआह।अयंसमासान्तइति।क
थंपुनरभावोभावस्यावयवःस्यात्तत्राह।स्थानिद्वारेणेति।औपचारिकमवयवत्वंवचनबलादितिभावः।वयसि।सादक्षरोणात्सुदतीससर्जेति।नह्यत्रवयोगम्य
ते।ननु।सुदन्तीतिभाष्यम्।अत्राहुः।शोभनादन्ताअस्याःसमस्ताजातानतन्नूनाइतिकथंचिदिहापिवयोगम्यतएवेति।उरःप्रभृतिभ्यःकप्।लक्ष्मीरिति।नद्यृतश्चेतिसि
द्धेनियमार्थमिहपाठः।एकवचनान्तस्यैवेति।अत्रैवनित्योयथास्यात्।अन्यत्रशेषादितिविकल्पएव।तेनअकृशामकृशलक्ष्मीश्चेतसांशंसितंसइतिसिद्धम्।
तुअविभक्तिकपाठात्तद्विवक्षेतिबोध्यम्।एकवचनान्तस्यैवेति।तदवयवकस्यैवेत्यर्थः।सिद्धमिति।बहुवचनान्तेनविग्रहात् ॥

तदाह। अकृशादिति। बहुलक्ष्मीक इति। बह्वी लक्ष्मीर्यस्येति विग्रहः। तत्त्रामादिकमिति। विशेषविहितत्वेनास्यैवोचितत्वमिति भावः। निषेधमुखेनेति तत्पक्षे हीतरनिवृत्तावेवास्य तात्पर्यमिति भावः। पक्षमाश्रित्यवेत्यनेन सपक्षो भाष्यासंमत इति सूचितम्। वृत्त्यादिग्रन्थानामिति। आदिना भाष्यम्। अस्य पर्यालोचनयेत्यनेनान्वयः। तत्र प्रकृतसूत्रस्थेनानुक्तसमासान्ते इत्यर्थलाभो बहुव्रीहिप्रकरण— स्थेन संख्ययाव्ययेत्यादिसूत्रस्थेन शेषाधिकारस्यादित्यस्य लाभ इति बोध्यम्। बाधाप

अकृशालक्ष्म्यो यस्येति विग्रहः। यत्तु प्राचोक्तम्। नद्युतश्चेति कप्। बहुलक्ष्मीक इति। तत्त्रामादिकमिति व्याख्यातारः। नियमशास्त्रस्य निषेधमुखेन प्रवृत्तिरिति पक्षमाश्रित्य वा योज्यम्। अनर्थकेनापीति। कथं तर्हि सुपथी नगरीति प्राचामुदाहरणं स्वयमप्यनुसृतं कपो दुर्वारत्वात्। न च नपूजनादिति निषेधः। पवः प्राचीनानामेव स इति वक्ष्यमाणत्वात्। सत्यम्। समासान्तविधेरनित्य इति कथंचित्समाधेयम्। सुपथीति। शुवोरनाक इति सूत्रीयभाष्याच्चेत्युक्तम्। तत्त्वादिनेति। एतच्च प्रकृतसूत्रस्थवृत्त्यादिग्रन्थानां बहुव्रीहिप्रकरणे कब्भावार्थं चेति पुनःपुन भाष्यकारोक्तेश्च पर्यालोचनया लभ्यते। यत्तु वदन्ति। प्रतिपदोक्ताः समासान्ताः स्वविषये बाधका भवन्ति। तत्किमनुक्तसमासान्तपरेण शेषग्रहणेनेति। तन्न। ऋक्पूरित्यादीनां समासान्तरे चरितार्थतया परेण कपा बाधापत्तेः। बहुनाडिरिति। उपसर्जनह्रस्वः। सप्तमी विशेषणे। कण्ठेकाल इति। यदा कण्ठे किंचिदस्तीति निर्ज्ञाते काल इति विशेषणं तदेदं बोध्यम्। अन्यदा तु सप्तमीग्रहणं विनाऽपि विशेषणत्वादेव सिद्धम्। चित्रगुरिति। यद्यपीह उपसर्जनं पूर्वमिति सिद्धम् ॥ ७ नेरिति। इदं च समासान्तमात्रापेक्षं शेषत्वमिति वदतः कैयटानुरोधेन। अनन्तरबहुव्रीह्यधिकारापेक्षं शेषत्वं न कबपेक्षं नापि समासान्तापेक्षमिति वदतो भाष्यकारस्य मते नेदं दूषणं किंतु प्रतिपदोक्तत्वमात्रेण बाधकत्वं किंत्वनवकाशत्वेन। न त्वत्र तदस्ति कब्भावे सावकाशत्वादिति भाष्योक्तं दूषणं बोध्यम्। तदेदमिति। विशेषणशब्देन परिच्छेदकं गृह्यत इत्यभिमानः। एवं हि यदाऽस्य चित्राः सन्तीति निर्ज्ञातं तत्परिच्छेदाय च गाव इति प्रयुक्तं तदा गोचित्र इत्यस्यापत्तिः। तस्माद्विशेषणत्वेन सिद्धावपि सप्तमीग्रहणं व्यधिकरणसमासज्ञापनार्थमित्येव तत्त्वम्॥

म.शे. तककौण्डिन्यन्यायेनेति[illegible]दंचिन्त्यम्। अनुवाद्यत्वात्। तस्मादन्यपदार्थापेक्षयोभयोरप्यप्रधानत्वेनप्रथमानिर्दिष्टत्वेनचानियमेप्राप्तेउत्तरपदार्थविशेषणस्यैवपूर्वनिपातो
१७७ र्थमिदं[illegible]बोध्यम्। जह[illegible]पदंयमिति। यत्पदेनयस्यपदंस्वसमर्थस्यसंगृह्यते। चार्विति। चारुस्मितंयस्येतिबहुव्रीहिः॥ इतिबहुव्रीहिः॥ कर्मादीति। अन्यपदार्थेत्यर्थः। स
मप्रधान[illegible]नामिति। समप्राधान्ये परस्परविशेषणत्वम्। सम्भवतीति। पुष्पवन्तादिवदितिभावः। समुच्चयान्वाचयौस्यातामिति। एकार्थीभावविषयाविति शेषः। तत्रैकस्येत
[illegible]थापिबहुव्रीहौस[illegible]भीत्युक्ते तक्रकौण्डिन्यन्यायेनउपसर्जनपूर्वत्वंबाध्येतअतोविशेषणग्रहणम्। सर्वनामेति। कथंतर्हितःपरोयस्मात्सतप
र इति। कथंचजहत्स्वार्थावृत्तिरिति। इहहिजहत्स्वंपदंयंजहत्स्वःसोऽर्थोयत्रेतिबहुव्रीहिगर्भोबहुव्रीहिः। तथाचस्वरशब्दयोःसर्वनामत्वात्पूर्वनि
पातेनभाव्यम्। सत्यम्। सूत्रभाष्यादिप्रयोगाद्राजदन्तादित्वाद्वासिद्धम्। सारङ्गजग्धीति। अस्वाङ्गपूर्वपदाद्वेतिङीप्। कथंचारुःस्मितमिति। नपुंसके
भावेक्तइत्यस्यनपूर्वनिपातः। निष्ठाशब्देनविहितस्यैवेहग्रहणमित्याहुः॥ इतिबहुव्रीहिः॥ चार्थेद्वन्द्वः। चार्थादिति। चशब्दद्योत्यादित्यर्थः। असाम
र्थ्यादिति। एकार्थीभावाभावादित्यर्थः। तथाहि। बहुव्रीहिघटकपदानांकर्माद्यन्तर्भावेणेवद्वन्द्वघटकपदानांचार्थान्तर्भावेणएकार्थीभावआवश्य
कः समर्थःपदविधिरितिपरिभाषितत्वात्। चार्थेद्वन्द्वइत्युक्तेष्वा। नचैकशक्तिविषयाणांसमप्रधानानांपरस्परंविहायइतरान्वयस्सम्भवति। येन
समुच्चयान्वाचयौस्याताम्। किंतुमिलितानामेवान्वयोवाच्यः मेलनंचसमुदायःसचवर्तिपदार्थप्रतिविशेषणंविशेष्यंचेतिद्वैधम् ॥
[illegible]लितस्यैवान्वयादितिभावः। द्वैधमिति। यथातुचार्थइतिसूत्रेभाष्यंतथोभयत्रापिसमुदायस्यविशेष्यत्वम्। आद्येउद्भूतावयवभेदोऽन्त्येतिरोहितावयवभेदइतिअन्य
पदार्थप्राधान्येबहुव्रीहेरिवचार्थप्राधान्येद्वन्द्वस्योचितत्वाच्च । उद्भूतावयवभेदत्वमारोपितावयवगतसंख्यावत्त्वम्। एतदनारोपेतिरोहितावयवभेदत्वम्। अन्यथास्वपदैस्ते श.मः
षामुभयत्रापितत्तद्रूपेणबोधात्तस्यदुरुपपादम्। आरोपानारोपयोश्चशब्दस्वभावएवबीजम्। अतएवाद्येघटश्चपटश्चेत्येवविग्रहोऽन्त्येतयोःसमाहारइतितत्त्वम् ॥ १७७

त शब्दान्तर्भावेणेति। प्रवृत्तिनिमित्तयोः सामानाधिकरण्यं तत्र चार्थः। नीलत्वसमानाधिकरणोत्पलत्ववदुत्पलं नीलमिति बोधात्। अत एव तदन्तर्भावेण वृत्तिरपीति भावः। द्वन्द्वे इष्टापत्तिरिति। ननु गुणादेर्द्रव्याश्रितत्वेन तदपेक्षत्वात्तयोः सहविवक्षासंभवेन कथं तत्रेष्टापत्तिः। स्पष्टं चेदं विशेषणं विशेष्येणेत्यत्र भाष्यकैयटयोरिति चेन्न। गुणयोः क्रिययोश्च तत्संभवात्। आशंसासंभावनयोरविशेष इत्यादिभाष्यप्रयोगाच्च। विशेषणमिति सूत्रे तिलकृष्णा इति न द्वन्द्व इति भाष्योक्तिस्तु तिलकृष्णा आनेया

तत्राद्य इतरेतरयोगद्वन्द्वः। द्वितीये समाहारद्वन्द्वः। उभयत्रापि समुदायस्य द्वन्द्वेनोक्तत्वाच्चशब्दाप्रयोगः। नन्वेवं नीलोत्पलमित्यादावपि चशब्दान्तर्भावेण विग्रहदर्शनादेकार्थीभावसत्त्वाच्च द्वन्द्वो दुर्वार इति वाच्यम्। सामानाधिकरण्ये विशेषविहिततया विशेषणं विशेष्येणेति तत्पुरुषसञ्ज्ञया द्वन्द्वसञ्ज्ञाया बाधात्। यत्तु केचित्कर्मधारयसञ्ज्ञया बाध इत्याहुस्तत्तुच्छम्। तस्या एकसञ्ज्ञाधिकारबहिर्भूतत्वात्सञ्ज्ञानां च कृत्कृत्यप्रत्ययादिषु समावेशस्य सुप्रसिद्धत्वान्न्याय्यत्वाच्च। सामानाधिकर ण्याविवक्षायां तु द्वन्द्वे इष्टापत्तिरेवेति दिक्। होतापोत्रिति। अनयोरुत्तरपदपरत्वाभावादानङ्। अजाद्यदन्तम्। कथं तर्हि स सौष्ठवौदार्यविशेषशालिनीम्। लोचनाधरकृताहृतरागेति भारविः। अत्राहुः। अनित्यमिदं प्रकरणम्। समुद्राभ्राद्घ इत्यादिनिर्देशात्। द्वन्द्वश्च प्राणितूर्य ॥

इत्यादिप्रयोगपरा। कृष्णानामाश्रयाकाङ्क्षायामुपस्थिततिलैरेव तदाकाङ्क्षाशान्तिरिति न तत्र सहविवक्षाभाव इति तात्पर्यात्। तिलकृष्णयोर[illegible] इत्यादि भवत्येव। एवं नीलोत्पलयोरभेद इत्यपि भवति अभेदान्वये तयोः सामानाधिकरण्यस्य पश्चान्मानसप्रतीतावपि द्वन्द्वरूपपदसंस्कारवेलायां तदविवक्षणात्। यद्वा शब्दस्वरूपपरावेतौ। एवं च भिन्नार्थत्वान्नैकशेषः। नापि सामानाधिकरण्यप्रयुक्तः कर्मधारयः तयोः शब्दयोरर्थभेदाभावादविशेषो भेदो [illegible]र्थ इत्याशंसायां भूतवच्चेत्यत्र सूत्रे कैयटे स्पष्टमिति दिक्। स सौष्ठवेति। सौष्ठवौदार्ययोर्ये विशेषास्तच्छालिनीमित्यर्थः ॥

म·प्र· समाहारेद्वि[illegible]समाहारद्वन्द्वः प्राण्यङ्गादीनामेवेत्यर्थः। अध्वर्युशब्द इति। अध्वर्युणा क्रतोः संबन्धाव्यभिचारादिति भावः। कथं तर्हीति। व्यक्तिप्राधान्यविवक्षया न निर्वाहः। सकलतरुशैल
१७८ ग्रहणस्या[illegible]क्षितत्वा[illegible]तिभावः। चत्वार इति। नदीदेश इति भिन्ने पदे। द्वन्द्वे द्विवचननपुंसकत्वान्यतरापत्तेरिति भावः। जनपदो हीति। जनानां पदं स्थानं यत्रेति व्युत्पत्त्या

समाहार एवेति। विपरीते तु नियमो न भवति समाहारे प्राण्यङ्गादीनामेवेति। तिष्यपुनर्वस्वोरिति सूत्रे बहुवचनग्रहणात्। तद्धि समाहारे कवचनस्य माभूदि-
[illegible]कृतं तिष्यपुनर्वस्वि[illegible]या। उदगादिति। इह यदा कठेषु कलापेषु उदितेषु प्रतिष्ठितेषु वा आवाभ्यां तत्र गन्तव्यमिति संवादे कृते तं च विस्मृत्य कश्चिदास्ते तं प्र-
तीदमुच्यते। कठेन प्रोक्तमधीयते कठाः। वैशंपायनान्तेवासित्वाण्णिनिः। कठचरकाल्लुक्। अह्नोत्र णस्तु प्रोक्ताल्लुक्। कलापिनोऽण्। सब्रह्मचारीत्याद्युपसंख्यानाट्टिलोपः।
अध्वर्युशब्दो यजुर्वेदं लक्षयति तदाह। युजुरिति। पदान्यधीते पदकः। क्रमादिभ्यो वुन्। एवं क्रमकः। पदान्यधीत्य क्रमोऽध्येतव्य इति स्पष्टा प्रत्यासत्तिः। अध्ययनतः किम्। विशि-
पितापुत्रौ। अविप्रकृष्टेति किम्। याज्ञिकवैयाकरणौ। जातिरप्राणिनाम्। कथं तर्हि रञ्जितानुविविधास्तरुशैला इति भारविः। तरुसहिताः शैला इति व्याख्येयम्। विशि-
ष्टलिङ्गो नदी। सूत्रे चत्वारोऽपि शब्दा अवयवधर्मेणावयविनि द्वन्द्वे बोध्याः। नदीग्रहणमदेशत्वात्। जनपदो हि देशः। अत एव पर्वतानां न। कैलासश्च गन्धमादनश्च कैला-
सगन्धमादने। चकारेण बाध्यत इति। चकारः पुनर्विधानार्थ इति भावः। पात्रादिति। यैर्भुक्ते भस्मना शुद्ध्यते कांस्यमित्यादिस्मृत्युक्तसंस्कारेणापि पात्रं न शुद्ध्यति तेषामित्य-
र्थः। अनिरवसितानामिति निषेधबलादेव शूद्रशब्दोऽत्र त्रैवर्णिकेतरपरः। न तु शूद्रत्वजातिपरः। गवाश्वमिति। इह पशुद्वन्द्वे विभाषा प्राप्ता। दासीदासमिति। अत्र पुमान् स्त्रिये-
त्येकशेषो बाध्यते। अत्र वार्तिकम्। गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तमिति गणपाठे रूपमेषां विवक्षितं न तु पूर्वोत्तरपदनिर्देशमात्रे तात्पर्यमित्यर्थस्तेनावङादेशाभाव- रामः
पक्षे न भवति॥ मनुष्यवासयोग्य इत्यर्थः। तादृशं च ग्रामनगराद्यपि। जनपद इत्यस्य विशेषण इत्यर्थस्तदाह। अतएवेति। अत्र भाष्यमुदासीनम्। एकशेषो बाध्यत इति। निपातनेनेति शे- १७८

गोअश्वेभ्यइति।एवंपररूपपक्षेपिनेतिबोध्यम्।प्रतिपदविधानार्थमिति।सनपुंसकमित्यस्यप्रतिपदविधानत्वार्थमित्यर्थः।तदेवोपपादयति।तच्छब्देनहीति।एकवद्भावभाजइति।विनिगमनाविरहात्यावदेकवद्भावभाजइत्यर्थः।प्रतिपदविहितमिति।अनवकाशंचेत्यपिबोध्यम्।विधेर्ज्यायस्त्वेननमृगशकुनिग्रहणवदस्यनियमार्थत्वम्।प्रत्युदाहृतमिति।विप्रतिषिद्धमित्यर्थः।तदभावेह्यद्रव्यवाचिनांसमाहारद्वन्द्वएवेत्यर्थेप्रकृतेइतरेतरद्वन्द्वानापत्तिरितितदाशयः।इत्यादाविवेति।कामक्रोधयोर्विरोधाभावेपिसुखदुःखादेरिवद्रव्यवाचित्वाभावेननियमव्यावर्त्यकोटावप्रवेशात्।चेन्नविभाषा[illegible]णानियमएवोचितः।तदभावेह्येवंनियमः।वैकल्पिकोयः समाहारेद्वन्द्वः सोद्रव्यवाचिनामेवेतिभावः।तदाशयइति।एवंचविप्रतिषिद्धपदाभावेऽद्रव्यवाचिनामेवेति[illegible]मःस्यात्।एवंचात्राप्युभयंस्यात्सत्त्वेतुविप्रतिषिद्धानामेवेतिनियमादत्रेतरेतरयोगएवेतितदाशयः।विरोधापत्तेरिति।विपरीतनियमेत्रपाक्षिकैकवद्भावस्येष्ट

अपशवोवाअन्येगोअश्वेभ्यः पशवोगोअश्वाः।पशुग्रहणमिति।विकल्पार्थमित्यनुषज्यते।नपुंसकत्वार्थमिति।अयंभावः।पशुद्वन्द्वइत्येवसिद्धेअश्ववडवग्रहणंप्रतिपदविधानार्थम्।तेनाश्ववडवमित्येकवद्भावपक्षेपूर्ववदश्ववडवावित्येतद्बाधित्वासनपुंसकमित्येतदेवभवति।तच्छब्देनहिएकवद्भावभाजं परामृश्यविधीयमानंनपुंसकत्वमेकवद्भाववदेवप्रतिपदविहितंभवतीति।अन्यथेति।नचपूर्ववदश्ववडवावित्यस्यनिरवकाशत्वंशक्यम्।एकवद्भावविरहपक्षेसावकाशत्वात्।विप्रतिषिद्धंच।भवत्येवेति।विप्रतिषिद्धग्रहणाभावेतुसनस्यात्।अद्रव्यवाचिनामेवेतिनियमादितिभावः।यत्तुवृत्तिकृताकामक्रोधावितिप्रत्युदाहृतम्।तन्न।तत्रापिशीतोष्णंसुखदुःखमित्यादाविवपाक्षिकस्यैकवद्भावस्यैवदुर्वारत्वात्।नियमार्थंहिइदंसूत्रमितिस्थितम्।नएवद्रव्यवाचिनांचेद्भवतितर्हिविप्रतिषिद्धानामेवेतितदाशयःकल्प्यः।शीतोष्णेउदकेइत्यत्रपाक्षिकैकवद्भावापत्तेः।नचेष्टापत्तिः।अनधिकरणवाचीतिकिम्।शीतोष्णउदकेइतिस्वोक्त्यासहविरोधापत्तेरितिदिक् ॥

विकल्पः [illegible] प्रवृत्ति। जाति[illegible] प्राणिनामित्यपि न चार्थे द्वन्द्व इत्येतद्विहितसमाहारद्वन्द्वस्य नियममात्रस्य च बाध्यसामान्यचिन्तयाऽनेन निषेधात्। अत एव ब्रह्मप्रजापत्या
दि पाठश्च[illegible] परिमाण[illegible]नियम इति। स च संख्याकृत एव व्याख्यानादिति भावः। नियमस्येति। नियमस्यैवेत्यर्थः। तदुदाहृतमिति। प्राचीनोदाहृतमित्यर्थः। निषिद्धश्च
द्विति। तथा [illegible]समाहारद्वन्द्व[illegible]दिति भावस्तत्र शङ्कते नन्विति। वाक्यमेव स्यादिति। एतावदेव प्राचां पक्षे दूषणं सारम्। अभ्युच्चयमाह। किं चेत्यादि। कथं तर्हीति। अवयवेषु

द[illegible]पयसी इति। व्य[illegible]त्वाद्विकल्पः प्राप्तः। अधिकरणैतावत्त्वे च। समासार्थस्याधिकरणमाश्रयो वर्तिपदार्थः। तस्य एतावत्त्वं परिमाणनियमस्तस्मि
न्नागम्यमाने इति[illegible]ष्टः। द्रव्यसंख्येति। अन्ये त्वाचख्युः। समाहारद्वन्द्वस्यैवायं निषेधो न तु नियमस्य। तथा हि सति नियमे प्रतिषिद्धेऽपि चार्थे द्वन्द्व इति स
माहारे द्वन्द्वः स्यादिति तन्नेति ध्वनयन् व्याचष्टे। नियमो न स्यादिति। अयं भावः। प्राचां पक्षे दशदन्तोष्ठा इति त्वदुदाहृतमेव न सिद्ध्येत्। प्राण्यङ्गानां समाहार ए
वेत्यनेन इतरेतरयोगद्वन्द्वस्य निषिद्धत्वात्। ननु समाहारद्वन्द्व एव प्रकृतसूत्रेण निषिद्ध इति चेत्तर्हि वाक्यमेव स्यात्। द्वन्द्वद्वयस्यापि निषेधात्। एवं च पञ्च
खिद्वास्त्राह्निकरेषु भिरव्याभिसाधुनामाधुकरीसदक्षेत्यादीनामसाधुत्वं स्यात्। किं च समाहारद्वन्द्वनिषेधो व्यर्थः न्यायबलेनैव तद्वारणात्। तथा हि। वर्तिपदा
र्थस्य संख्याविशेषबोधनीये समाहारद्वन्द्वस्य प्राप्तिरेव नास्ति सविशेषणानां वृत्तिर्नेति वचनात् सापेक्षत्वेनासामर्थ्यात्। कथं तर्हि दशपञ्चपूल्य इति समाहारे द्वि
गुरिति चेत् प्रधानभूते समाहारे दशत्वसंख्यान्वयादिति गृहाण। न चोक्तन्यायेनेतरेतरयोगद्वन्द्वोऽपि न स्यादिति वाच्यम्। तत्र प्रधानस्य सापेक्षत्वात्। उक्तं हि भाष्ये। भवति वै प्र
धानस्य सापेक्षस्य वृत्तिरिति। न्याय्यं चैतत्। प्रधानस्यैकदेशत्वाभावात् ॥ ७ दशत्वसंख्यान्वयद्वन्द्वाभिमानः। गृहाणेति। न चैवं समाहारे दशत्वान्वयविवक्षायां प्राप्तसमाहारद्वन्द्व
निषेधोऽस्त्विति वाच्यम्। द्रव्यसंख्यानवगमे नैतत्सूत्राप्रवृत्तेः। प्रधानस्येति। मम तु प्राण्यङ्गादिषु द्वन्द्वश्चेति नियमादितरेतरयोगाप्राप्तौ तद्विधानेनास्य चारितार्थ्यम्। न च नियमनिषेधे उभयोर्

पत्तिः। असामर्थ्येन समाहारे तदप्राप्तेरिति भावः॥

दिगिति। दिगर्थस्तु यत्तदन्तोष्ठद्वारकसंबन्धेन समाहारे एवदशत्वान्वयविवक्षा तदास्त्वेव समाहारे द्वन्द्वप्राप्तिः। प्रत्यास्यैव सापेक्षत्वाद्द्वन्द्वसंख्यावगमाच्च। किंच अत्र रूमाला राप्राप्तावपि नियमाभावेन नियमाप्राप्त्याकस्थानेन निषेधः स्यात्। तस्मात्पूर्वसूत्रवदयमप्युभयोर्निषेधः। अतएवोत्तरसूत्रविषये समाहारद्वन्द्वसिद्धिः। सामर्थ्येनासामर्थ्ये समासकल्पनापेक्षयैवमन्वयकल्पनस्यैवौचित्यादिति। अव्ययीभावस्येवेति। समानलिङ्गवचनत्वादिति भावः। यदि त्विति। एकवद्भावपक्षे इति शेषः। न च बहुव्रीह्यनुप्रयोगे उपदशसामान्याप्रयोगे इति लिङ्गादिति दिक्। विभाषा समीपे। यद्यपीह समाहारद्वन्द्वो वेति व्याख्यानेऽपि न क्षतिस्तथापि प्रक्रममनुरुध्याह। नियमो वा स्यादिति। उपदशमिति। एकवद्भावपक्षेऽव्ययीभावस्येवानुप्रयोगः। यदि तु बहुव्रीहिस्तदा उपदशस्य पाणिपादस्येति षष्ठी स्यात्। उपदशं पाणिपादस्येत्येव चेष्यते इत्याकरः। आनङृतो द्वन्द्वे। इहोत्तरपदेन पूर्वपदं नाक्षिप्यते तेन मध्यस्याप्यानङ्। तदाह। होतृपोतृनेष्टोद्गातार इति। एतच्च समर्थसूत्रे भाष्यकैयटयोः स्पष्टम्। ओजः सहोम्भस्तमसस्तृतीयाया इति सूत्रे पदमञ्जर्यां तु स्पष्टतरम्। यत्तु प्राचोक्तम्। पूर्वपदस्यानङ् स्यादिति। यच्च व्याख्यातृभिर्द्वन्द्वे पूर्वपदकार्यविशेषमाहेत्यवतारितम्। यच्चाधिकृते नोत्तरपदेन पूर्वपदमाक्षिप्यते इत्युक्तम्। तत्सर्वमाकरविरोधादुपेक्ष्यम्। प्रसिद्धसाहचर्यस्येति ॥

मित्यस्यासिद्धिः। उपदशादित्यस्यैवौचित्यादिति वाच्यम्। दिगर्थोक्तरीत्याऽवयवद्वारकसंबधेन समुदायार्थेऽन्वयेन द्वन्द्वार्थे अभेदेनान्वयाद्द्वन्द्वार्थस्यैकवद्भावेन तास्सिद्धेरात्। उपदश[illegible]ति। अव्ययीभावानुप्रयोगे तु नाव्ययीभावादित्यादिना न दोष इति भावः। अव्ययीभावानुप्रयोगे सामानाधिकरण्यं तु समीपसमीपिनोरभेदविवक्षया बोध्यम्। इतरेतरयोगे तु बहुव्रीहेरेवानुप्रयोगस्तस्य समीपिप्रधानत्वात्समानलिङ्गवचनत्वाच्च। अतएव तत्र नाव्ययीभावानुप्रयोगः ॥

अत्यन्तसहचरितेति। तद्धि चैकहविर्भागित्वेन। वेदसूत्रप्रसिद्धतया लोके प्रसिद्धसाहचर्यतया वेत्यन्यत्। प्रायुङ्क्तेति। तदार्थमित्यन्ये। अकारे सतीति। सचेत्सञ्ज्ञक इति बोध्यम्। निपात्यत इति। उत्तरखण्डे तु ऋतोऽङीत्येव सिद्धम्। पितरामातरा च च्छन्दसि मातरपितरावितिसूत्रद्वयविषयपूर्वोत्तरपदयोरराविति भाष्यं तु पूर्वोत्तरपदयोः

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिष्विति सूत्रेऽभिव्यक्तिग्रहणेनात्यन्तसहचरितयुगले द्वन्द्वमिति निपातनादिति भावः। ईदग्नेः। देवताद्वन्द्व इति काशिकानुरोधेनानुवर्तितम्। आश्वलायनस्तु ज्योतिर्लतयोरदेवताद्वन्द्वेऽपि प्रायुङ्क्त अग्नीषोमौ प्रणेष्यामीति। अग्निष्टुदिति। अग्निस्तूयतेस्मिन्क्रतुविशेषः। संपदादित्वादधिकरणे क्विप्। रुत्वं माभूदिति। अकारे सति सकारस्य श्रवणं भवति तेन प्रयोगे विकाराभावोऽनुमीयत इति भावः। विसर्गमिति। तथा च क्वचिद्विकारो नेत्येवमनुमेयं लक्ष्यानुरोधादिति भावः। मातरपितरौ। मातृशब्दस्यारङादेशो निपात्यते। वाक्त्वचमिति। बहूनां द्वन्द्वे तु वाक्त्वक्त्वचम्। द्वन्द्वगर्भे द्वन्द्वे तु वाक्स्रजत्वचम्॥ ॥इति द्वन्द्वः॥ ॥विरूपाणामिति। एतच्च सूत्राक्षरैरेव सुलभम्। रूप्यते इति व्युत्पत्त्या सौत्रस्य रूपशब्दस्यार्थपरतयापि व्याख्यानात्। वृद्धो यूना। अपत्यमन्तर्हितं वृद्धमिति पूर्वाचार्यैः परिभाषितस्येह ग्रहणं यूनाकृत्रिमेण साहचर्यात्तदाह। गोत्रं शिष्यत इति। भागवित्तिशब्दात् गोत्रार्थकादिञन्ताद्यूनि वृद्धाट्ठक्सौवीरेषु बहुलमिति कुत्सायां ठक्। इह कुत्सा सौवीरत्वं चाधिकमपेक्षते न तु युवत्वमात्रकृतं वैरूप्यम्। गार्ग्यदात्स्यायनाति। इह प्रकृतांशे वैरूप्यं न गोत्रादिकृतम्। पुंवद्भावप्रयुक्तं वैलक्षण्यं स्फुटीकर्तुं द्विवचनान्तेन विग्रहमाह। गार्ग्यायणाविति। पुमान् स्त्रिया। ननु हंसश्च वरटा चेत्यत्र प्रसङ्गः॥

७) तोः पूर्वपदस्येत्यर्थपरतया कैयटेन व्याख्यातमिति न तद्विरोधः। अत एवोत्तरपदे इत्यधिकृतस्य न बाध इति दिक्। वाक्स्रजत्वचमिति। समर्थसूत्रभाष्यप्रयोगा। देवगुर्वक्षरत्वेपि वाक्शब्दस्य पूर्वनिपातस्तत्प्रकरणानित्यत्वात्॥ इति द्वन्द्वः॥ अपत्यमन्तर्हितमिति। पौत्रप्रभृत्यपत्यमित्यर्थः। यूनेति। अपत्यविशेषवाचकेन युवशब्देनेत्यर्थः। तत्साहचर्येण

पत्यविशेषवाचकस्यैव वृद्धशब्दस्य ग्रहणं न तु वृद्धिर्यस्येत्यादिनासङ्केतितस्येति भावः।

अनुन्यासकारइति।मत्यादिसूत्रेकैयटोप्येवम्।कारकषष्ठ्याएवेति।क्तादियोगेतस्याः प्रतिपदविहितत्वादितिभावः।एतेनेति।उक्तप्रकारद्वयेनेत्यर्थः।कथंतर्हीति।किमोरस्यधिकर
णमित्यर्थाभिप्रायेणप्रश्नः।व्यर्थः स्यादिति।कर्त्रर्थेतृजकाभ्यांकर्मषष्ठ्यैवसमासप्रतिषेधस्तेनेतिभावः।परिशेषितेनेति।कर्मातिरिक्तेनिषेधेनकर्मणिपरिशेषितेत्यर्थः।विधिरूपे
णेति।अयमेवपक्षोयुक्तइत्यन्यत्रप्रपञ्चितम्।उपरञ्जकत्वमात्रम्।बाधाभावेनसंभवमात्रम्।जयादित्यइति।अनेनारुचिः सूचिता।तद्बीजंकर्मणिचेतिसूत्रस्थभाष्यविरो
नचज्ञानार्थएवज्ञापकम्।पूजितोयः सुरासुरैरित्यादिप्रयोगानुरोधेनसामान्यविषयकत्वस्यैवन्याय्यत्वादित्यनुन्यासकारः।अन्येतुकारकषष्ठ्याएवसमास
निषेधोयम्।शेषषष्ठ्यातुसमासइत्याहुः।एतेनकलहंसराममहितःकृतवानितिभट्टिप्रयोगोव्याख्यातः।इदमेषामिति।क्तोधिकरणेचेतिक्तः।अधिकरणवाचिन
श्चेतिकर्त्तरिषष्ठी।अधिकरणेचेत्येवसिद्धेसूत्रद्वयेपिवाविग्रहणंस्पष्टार्थम्।कथंतर्हिकिंरत्नंयद्धृतमिति। नायमधिकरणेक्तः किंतुकर्त्तरि। किमा
वृत्तंनिष्पन्नमित्यर्थः। कर्मणिच। यद्यत्रयाकाचनकर्मणिषष्ठीगृह्येततर्हितृजकाभ्यांनिषेधोव्यर्थःस्यात्।तस्मादव्ययानामनेकार्थत्वादितीत्यर्थेचशब्दोयम्।
तदाह।कर्मणीतिधाषष्ठीति।सप्तम्येकवचनान्तपदमुच्चार्ययाषष्ठीविहितापरिशेषितावेत्यर्थः।नियमसूत्राणांविधिरूपेणनिषेधरूपेणवेतिद्विधाप्रवृत्तेः स्वीकृत
त्वात्।तृजकाभ्याम्।इहकर्तरीत्यकस्यैवविशेषणम्।नतुतृचः।अव्यभिचारात्।तथापिउपरञ्जकत्वमात्रमभिप्रेत्याह।कर्त्रर्थेति।जयादित्यस्तुकर्तृषष्ठ्याइतिव्याच
ष्टे।तन्मतेतृजुत्तरार्थेइतिकृत्यंस्यात्।किंचकर्तृग्रहणंतृजकयोरेवविशेषणमितियुक्तंतयोः श्रुतत्वात्।नतुषष्ठ्याइतिभावः।शेषषष्ठ्येति।केचित्तुजनिकर्तुः प्र
कृतिस्तत्प्रयोजकोहेतुश्चेतिनिर्देशादनित्योयंनिषेधइत्याहुः।न्यासकारस्त्वाह।तृन्नन्तमेतत् ॥
धः।तत्रहिकर्मषष्ठीमात्रेतन्निषेधेऽस्यवैयर्थ्यमापादितम्।आहुरिति।अत्रारुचिबीजंताभ्यांकारकषष्ठ्यैवनिषेधइतिप्रत्यासत्तिलभ्यार्थस्यैवज्ञापनमुचितम्।एतत्।
त्रिभुवनविधातुरित्येतत्।सानुबन्धकस्येति।तस्यहितृन्नेवव्यावर्त्यइतिभावः।मतान्तरेसानुबन्धनिर्देशः कर्त्तरीतिवत्स्पष्टार्थः।अन्यथातुसाहचर्यात्कर्त्रर्थकस्यैवग्रहणेसिद्धेकर्त्तरीतिव्यर्थमेव ॥

अतएवेति। अन्यथा नकर्मधारयान्मत्वर्थीय इत्यनेन तन्निह्रासाकल्पनलाघवमूलकेनपसनस्यादिति भावः। अत एव। षष्ठशब्दान्मत्वर्थीयानेतिरस्कृत इति सूत्रभाष्ये उक्तं रूढ
ले तु न दोषः। कर्मधारयान्मत्वर्थीये कृते योऽर्थः प्रतीयते तस्मिन्बहुव्रीहिणा लब्धे हि लाघवचिन्ता नान्यथेति तात्पर्यम्। कुष्ठसर्पवानिति। अत्र हि जातिविशेषवान्प्रतीयते न
तथा प्रतीतिर्बहुव्रीहौ। सर्वधनीत्यादि तु व्रीह्यादिपाठात्सिद्धम्। अदण्डी अवामीत्यादौ मत्वर्थीयान्तेन नञ्समासः बहुव्रीहिणा दण्डसंयोगनिषेधस्य सम्यग्बहुभावित

नलोकेति षष्ठीनिषेधस्त्वनित्यः। त्रकाभ्यामिति वक्तव्ये तृचः सानुबन्धकस्य ग्रहणाज्ज्ञापकादिति। पूर्वापरा। एकदेशशब्दोऽवयवे रूढः। अत एव तस्य क
र्मधारयत्वेऽपि ततो मत्वर्थीयः कुष्ठसर्पवान्वल्मीक इतिवत्। यद्यप्यहरेकगोपूर्वादिति ठञ् प्राप्तस्तथापि अत एव निर्देशादिनिस्तदेतदाह। अवयविनेति। ननु
किमनेन सूत्रेण कर्मधारयेणैव पूर्वकाय इति सेत्स्यति। उर्द्धकायवत्। समुदाये वृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते इति न्यायादत आह। षष्ठीत्यादि। तथा च कायपू
र्वद्द इत्यादिप्रयोगव्यावृत्तये सूत्रमिति भावः। नन्विह षष्ठी तु दुर्लभा। अन्यारादिति पञ्चमीप्रसङ्गात्। तत्र हि दिशि दृष्टः शब्दो दिक्शब्द इति व्याख्यानेन संप्रत्यदि
ग्वृत्तिं विनापि योगे पञ्चमी स्वीकृतेति चेत्सत्यम्। अवयववृत्तिभिर्योगे षष्ठ्येवेष्यते तस्य परमाम्रेडितमिति लिङ्गात्। पूर्वं नाभेरिति। नाभेर्यः पूर्वो भागः स कायस्यावयव इत्यर्थः। ना
भेरिति दिग्योगलक्षणा पञ्चमी। अत्र पूर्वस्य भागस्य नाभिरवधिः न त्वेकदेशिनी। अतो नाभ्या सह समासो नेत्यर्थः। कायेन तु स्यादेव पूर्वकायो नाभेरिति। पूर्वशब्दस्य नित्यसापे
क्षत्वात्प्राधान्याच्च ॥

७ त्वनिषेधस्य चानवगमात्। असुब्वतोऽङ्स्येति प्रत्ययस्यात्र त्रस्य भाष्यप्रयोगेण क्वचिल्लाघवानादरोऽपीत्यन्यत्। ऊर्ध्वाद्यवयवे कायशब्दप्रवृत्तौ बीजमाह। समुदाय
इति। तथा चेति। द्वंद्वत्वाद्यनुसारेण सूत्राशयवर्णनमात्रम्। परवल्लिङ्गमिति सूत्रस्य भाष्यानुसत्यभिधाने षष्ठीसमासः इष्यत एवेति लभ्यते तच्चोपरिष्टात्स्फुटीभविष्यति। नाभेर्य इति। नास्य व
धिक इत्यर्थस्तदाह। दिग्योगलक्षणेति। ननु पूर्वशब्दस्य नाभिसापेक्षत्वात्कथं समासोऽत आह। पूर्वशब्दस्येति। प्राधान्याच्चेति। प्रधानस्य सापेक्षस्यापि वृत्तिरिति भावः ॥

समुदायेति। छात्रसमुदायावयवः पूर्व इति बोधः। एकदेशिसमासं विनेति। लक्षणप्रतिपदोक्तपरिभाषयैकदेशपूर्वकस्यास्यैव तत्र ग्रहणमिति भावः। इति भाव इति। इत्यभिमान इत्यर्थः। यथाश्रुतसूत्राशयवर्णनाभियुक्तानां ज्ञापकवादिनामिति भावः। एतत्सूत्रप्रत्याख्यातृभाष्यरीत्या तु तत्र लक्षणप्रतिपदोक्तपरिभाषाया न प्रवृत्तिः। कर्मधारयेणैव सर्वप्रयोगसिद्धेः। तत्रैवार्थे च साधुत्वं यथोत्तरं मुनीनां प्रामाण्यात्। षष्ठीसमासस्तु तद्विषयेऽनभिधानाद्वारणीयः। अदृष्ट एव सः ज्ञापकस्य च नोपयोगः। तद्ध्वनयन्व्यस्यति पूर्वं छात्राणामिति। समुदायसमुदायिसंबन्धे षष्ठी। बहुवचनं तु उद्भूतावयवभेदसमुदायविवक्षया। यथा छात्राणां पञ्चम इति। ततश्छात्राणामेकदेशित्वे सत्यपि एकत्वसंख्याविशिष्टाभावान्न समासः। सर्वोपीति। पूर्वादिभिन्नोपीत्यर्थः। ज्ञापकादिति। न ह्यन्यथा सायपूर्वत्वमह्नस्योपपद्यते न चोर्द्धकायवत् सामानाधिकरण्येन निर्वाहः शङ्क्यः। अह्नः सर्वैकदेशेत्यादिना विहितस्य समासान्तस्य च अह्नोऽह्न एतेभ्य इत्यह्नादेशस्य चैकदेशिसमासं विनानुपपत्तेरिति भावः। इत्याहुरिति। न चैवं दिनमध्यो रात्रिमध्य इत्यादि न सिध्येदिति वाच्यम्। ज्ञापकसिद्धस्यासार्वत्रिकत्वात्। यत्तु प्राचोक्तम्। सर्वेणैकदेशेनाह्नः समास इति। तन्न। एकदेशस्य तृतीयानिर्दिष्टस्य परनिपातापत्तेः धर्मिग्राहकमानविरोधात्। यदपि पाठान्तरम्। सर्वेण एकदेशिनाह्न इति। तदपि नाऽह्नरेव ह्येकदेशि। न च तेनैव तस्य समास इति संभवति। अर्धं नपुंसकम्। नित्यं क्लीब इति। अर्धमिति निर्देशादेव क्लीबत्वे लब्धे नपुंसकग्रहणं नित्यनपुंसकत्वार्थमित्यर्थः। खण्डमात्रवाची तु त्रिलिङ्गः। भिन्ने शकलखण्डे वा पुंस्यर्धोऽर्धं समेंऽशके इत्यमरः। अत्र वा पुंसीति पूर्वोत्तराभ्यां संबध्यते। तत्र शकलखण्डे इति रूपभेदात् क्लीबत्वे निर्णीते वावचनाच्च पुंस्त्वविकल्पः स्त्रियामिति फलितम्। न च खण्ड इति स्त्रीलिङ्गमेव किं न स्यादिति वाच्यम्। भिन्नलिङ्गानां न द्वन्द्व इति तेन परिभाषितत्वात्। शकलश्चार्धोऽतिनिर्देशेनैव निर्णयात् ॥ ६७ एषां प्रत्यारम्भणमिति दिक्। निर्देशादेवेति। न च शब्दपरत्वेऽपि तुर्यार्धादिवन्नपुंसकोच्चारणसत्त्वेन तेन क्लीबग्रहणासिद्धिरिति वाच्यम्। योगविभागपूर्वकमर्धमिति निर्देशेन तत्राभ इत्याशयात्। भिन्नलिङ्गत्वमुपपादयति। शकलश्चेति। निर्देशेनेति। शकलखण्डे इति निर्देशेनेत्यर्थः ॥

स॰श॰ लभ्येतेइति।तेनखण्डमात्रवाचिनक्लिलिङ्गत्वंसिद्धम्।अतएवदन्तार्धमास्यात्यतितमित्यादयःप्रयोगा।उपपद्यन्ते।अवयववाचीपुल्लिङ्गइतिभाष्यंतदुपलक्षणमितिभा
१५४ वः।अन्येतुभाष्यानुरोधेनकोशेवापुंसीतिपूर्वान्वय्येवदन्तार्धमित्यादौसमांशत्वारोपाभिप्रायंनपुंसकत्वम्।शरीरार्धहरामितिवत्षष्ठीसमासः।स्त्रियांप्रयोगादर्शनाभावत्वेत्या
हुः।प्राप्तमिति।तृचोरुविग्रहेनिषिद्धमितिभावः।ननुपिप्पलीनांबहुत्वाद्बहुवचनंकुतोनेत्यतआह।परवदिति।विशेष्यैक्यादिति।अर्द्धस्यविशेष्यस्यैकत्वादित्यर्थः।मा

अर्द्धइतिरूपभेदात्पुंस्त्वावगतौसत्यामपिवापुंसीतिविकल्पेनाविशेषात्स्त्रीनपुंसकेलभ्येते।प्राग्वदिति।अवयविनासमस्यतेइत्यादौत्यर्थः।अर्द्धंपिप्पलीनामिति।
इहार्द्धपिप्पलीतिप्राप्तंपरवल्लिङ्गातिदेशेपिवचनातिदेशाभावात्।विशेष्यैक्याच्चेतिभावः।कथंतर्ह्यर्द्धपिप्पल्यइति।अर्द्धानिपिप्पलीनामितिविग्रहेमाभूत्।ख
ण्डसमुच्चयेतुभविष्यति।अर्द्धपिप्पलीचार्द्धपिप्पलीचेत्यादिविग्रहात्।एकदेशिनेतिकिम्।अर्द्धंपशोर्देवदत्तस्य।अत्रदेवदत्तःस्वामीनत्ववयवीतिनतेनसमासः।ए
तत्सूत्रंपरवल्लिङ्गमित्यत्रभाष्येप्रत्याख्यातम्।तथाहि।अर्द्धपिप्पलीतिकर्मधारयेणसिद्धम्।समुदायेदृष्टाःशब्दाअवयवेपिवर्तन्तेइतिन्यायात्।समप्रविभागादन्यत्रहित
नाप्येषैवगतिः।अर्द्धहारः।अर्द्धंनरतीयम्।अर्द्धवैशसम्।अर्द्धोक्तमर्द्धविलोकितमित्यादिदर्शनात्।नचसमप्रविभागेषष्ठीसमासंबाधितुमिदंसूत्रमितिवाच्यम्।षष्ठी
समासस्यापीष्टत्वादिति।तथाचकालिदासःप्रायुङ्क्त।प्रेमणाशरीरार्द्धहरांहरस्येति।द्वितीयतृतीयेतिनिषेधंबाधित्वेति ॥

भूदिति।अवयविंन एकत्वाभावादितिभावः।खण्डसमुच्चयेत्विति।एकशेषेणेतिभावः।एतत्सूत्रमिति।एतस्यैकदेशिसमासस्यविधायकंसूत्रमित्यर्थः।जातावेकवचनान्तेनसूत्रत्रय
मित्यर्थः।अर्द्धपिप्पलीत्युपलक्षणंसूत्रत्रयोदाहरणस्यएकदेशिसमासोनारप्यलेइतितत्रभाष्येउपक्रमात्।इष्टत्वादिति।तथाचतत्रैवभाष्यम्।इष्यतएवपिप्पल्यर्द्धमितीति।प्रयो रामः
गस्यैतद्भाष्यविरोधादर्धपिप्पल्यित्यत्रैकदेशिसमासेप्रसक्तेषष्ठीसमासोनभवतीतिद्वितीयेतिसूत्रस्थंभाष्यमेकदेशयुक्तिरितिआहुः ॥ १५५

द्विगुप्राप्तेति। तद्धि एषु तत्पुरुषेषु परवल्लिङ्गतानिषेधकम्। तत्पुरुषग्रहणप्रत्याख्यानेऽर्धादेरप्रत्याख्यानं तस्येति भावः। त्रिसूत्रीमिति। उक्तरीत्या कर्मधारयेपि सिद्धिमाश्रित्येत्यर्थः। एवं हि तत्र भाष्ये तत्पुरुषग्रहणं न करिष्यते एकदेशिग्रहणात्सिद्धम्। द्वन्द्वैकदेशिनोरिति वक्ष्यामि। तदेकदेशिग्रहणं कर्तव्यं न कर्तव्यम्। एकदेशिसमासो नारभ्यते। कथमर्द्धपिप्पलीति समानाधिकरणे भविष्यति। अर्द्धं चासौ पिप्पली चेति। षष्ठीसमासोपि प्राप्नोति। इष्यत एव षष्ठीसमासः। अपूपार्द्धं पिप्पल्यर्द्धमिति इति। भक्त्यादिपरे स्त्रीलिङ्गे

भाष्यकारास्तु परवल्लिङ्गमिति सूत्रे तत्पुरुषग्रहणं द्विगुप्राप्तेत्यादि वार्त्तिकं पूर्वापरेत्यादि त्रिसूत्रीं च प्रत्याचख्युः। तन्मते भिक्षाद्वितीयादिसिद्धये पूरणेत्यादिनिषेधस्यानित्यत्वमाश्रयणीयम्। संज्ञाप्रमाणत्वादित्यादिनिर्देशानां सामान्यापेक्षज्ञापकात्। एवं सति तान्युत्कृषष्ठेत्यपि सिद्धम्। प्राप्तापन्ने। अत्र चकारेणविधेयसमुच्चयार्थे नाकारप्रश्लेषानुमानात्। प्राप्तापन्ने समस्येते। अ च। अत्वं च तयोः स्यादिति भाष्ये स्थितम्। अत्र चकारात्पूर्वमेवाकारं श्लिष्ट्वा सौत्रत्वात्प्रकृतिभावो नेति प्राञ्चः। इमं क्लेशं परिहरन्नाह। द्वितीयया अ इति। प्राप्तास्त्रीति। एकादेशस्य पूर्वान्तत्वेन ग्रहणाल्लिङ्गविशिष्टपरिभाषया वा प्राप्तापन्नयोष्टाबन्तयोरपि समासः। कालाः परिमाणिना। परिमीयते परिच्छिद्यते येन तत्परिमाणं परिच्छेदकं तद्वान्परिमाणी तदाह। परिच्छेद्यवाचिनेति। काला इति। कालविशेषवाचकादित्यर्थः। कालसामान्यस्यापि परिच्छेदकत्वात्। मासो जातस्येति। षष्ठीसमासे प्राप्ते वचनम्। ननु जातः पुरुषस्तस्य चक्षुस्तवित्तरत्वादिकं परिच्छेदकं न कालस्तस्य क्रियामात्रपरिच्छेदकत्वादिति चेत्सत्यम्। साक्षात्क्रियां परिच्छिन्दन्नपि कालस्तद्द्वारा देवदत्तं परिच्छिनत्ति। यस्य हि जननादूर्ध्वं मासो गतः स मासजात इति व्यवह्रियते ॥

श्चतुर्थ्यादिशब्दैरनभिधानात्समास एव नेति तत्रैकदेशिसमासे चतुर्थीभिक्षेति कर्मधारये तु पुंवत्त्वे चतुर्थभिक्षेति भेद इति न शङ्क्यम्। इत्यादीति। आदिना लोपे चेत्यारपूरणमित्यादेः संग्रहः। इमं क्लेशमिति। न चात्र पक्षे तस्याव्यवहितप्राप्तापन्नाभ्यामन्वयक्लेशः। सौत्रत्वकल्पनस्येतोधिकक्लेशत्वमित्यभिमानात्। तद्वानिति। परिच्छेद्य इत्यर्थः। तद्द्वारेति। तत्परिच्छिन्नक्रियया हि पुरुषस्य परिच्छेद इत्यर्थः। तदाह। यस्य हीति ॥

म·षा· परिच्छिन्नस्यैवेति। तावत्कालातीतजननाश्रयत्वेनेति भावः। द्योतयितुं यस्य स इति। गुणीभूतमपि यच्छब्दार्थं तच्छब्देन परामृश्यत स्वसमासजातपदप्रतिपाद्यताप्रदर्शनेन
१५५ द्योतनमिति भावः। यस्य स मासजातपदार्थ इति हि विग्रहवाक्यात् बोधः। मासजातो दृश्यतामित्यादौ जातस्यैव दर्शनकर्मत्वादिप्रतीतेः। न त्वेतावताऽन्यपदार्थप्रधानोऽयमि-
तिभ्रमः कार्य इति बोध्यम्। नास्य प्रवेश इति। तत्र विशेष्यविशेषणभाववैपरीत्येनैकार्थीभावारोपादिति भावः। व्यासेनेति। जातपरिच्छेदको मास इति वाक्यार्थो मासपरि

मासजातस

तन्नव्यवहारकालजननलक्षणयोरन्तरालभावी मासो जननद्वारा जातमपि परिच्छिनत्त्येव। इह विग्रहे षष्ठीनिर्दिष्टस्यापि वृत्तौ प्राधान्यं द्योतयितुं यस्य स इत्युक्तम्। अलौकिके तु प्रक्रियावाक्ये नास्य प्रवेशः। एवं च बहुव्रीहावपि। एतावानन्तरो विशेषः। इह जातशब्दात् षष्ठी चित्रगुरित्यादौ तु द्वाभ्यामपि शब्दाभ्यां प्रथमैव। समानाधिकरणानां बहुव्रीहिरिति वक्ष्यमाणत्वात्। विशेषणविशेष्यभावव्यत्यासेनैकार्थीभाव इति तुल्यम्। यत्तु मीमांसकाश्चित्राणां गवामयमिति विगृह्णन्ति। तत्रेदं वक्तव्यम्। उक्तरीत्या वृत्तिवाक्ययोः क्वचित्प्रधानार्थसाम्यलाभेपि अषष्ठ्यर्थबहुव्रीहौ पञ्चविधेपि कर्मकरणादिप्राधान्यस्याभिमतस्योक्तविग्रहादलाभाद्वृत्तिवाक्ययोर्महान्विप्रकर्षः स्यात्। कृतविश्वः प्राप्तोदको ग्राम इत्यादौ कर्तृकर्मणोः समासेनाभिहितत्वान्नकारकविभक्तिरित्यादिसिद्धान्तस्य निर्विवादत्वात्। किं चालौकिके प्रविष्टानामेव पक्षान्तरे परिनिष्ठितानां लौकिकेपि प्रवेशसंभवे उपस्थितपरित्यागेनानुपस्थितकल्पनमन्याय्यमसांप्रदायिकं च ॥

च्छेदो जात इति वृत्त्यर्थ इति भावः। विगृह्णन्तीति। वृत्तिविग्रहयोः प्रधानार्थसाम्यायेति भावः। अषष्ठ्यर्थबहुव्रीहावित्यस्य विप्रकर्षः स्यादित्यनेनाप्यन्वयः। पञ्चविधेति। कर्मकरणसंप्र
दानापादानाधिकरणरूपे। तत्र प्राप्तस्योदकस्यायमिति विग्रहेपि ततः कर्मत्वादिनाऽबोधात्। निर्विवादत्वादिति। त्वदीयानां मासजातादीनां चेति शेषः। किं चेति। षष्ठ्यन्तानां तु ना रा·भ:
लौकिके प्रवेशः शेषवदुक्तेरिति वक्ष्यते। अनुपस्थितकल्पनम्। षष्ठ्यन्तकल्पनम्। असांप्रदायिकं चेति। सर्वादीनीति सूत्रे सर्व आदिर्येषान्तानीति भाष्ये विग्रहप्रदर्शनादिति भावः ॥ १५५

परान्तरेति। सद्भूत्येतादित्यर्थः। अत एवैतस्य वृद्धसम्मत इत्यनेनान्वयः। प्राच्येन। सद्भूत्यतः पूर्वेण चित्रा गावो यस्येत्यादिना। अर्पिते। बोधिते। निषये। वाक्यार्थे। तत्पदकेपच्छ त्यर्थे। तत्स्वं दातुम्। तत्स्वदेनतं परामष्टुं वाक्यभेदेनेति। यस्य चित्रा गावः सन्ति स चित्रगुपदवाच्यो भवतीत्येवं वाक्यभेदेनेत्यर्थः। इयं कारिका ग्रन्थकर्तुरेवास्यज्यतानिति। वाक्ये गवामेव प्राधान्यं वृत्तौ तु सम्बन्धिन इति नास्त्येव वाक्येन प्रधानार्थसाम्यमित्यर्थः। क्वचित् गुणेति। अर्थानां वृत्तिविग्रहयोर्गुणप्रधानत्वं समानमिति यत्तदविवक्षितमिति तदर्थः। यतस्तद्धितार्थोपदर्शके आख्याते वृत्त्यपेक्षया गुणप्रधानभावस्य विपर्ययो वैपरीत्यं क्रियाप्रधानत्वादिरूपं दृष्टमित्यर्थः। तदाह। विग्रहवाक्यानीहेति। परे तु यादृशो गुणप्रधानभावोऽर्थानां लोके दृष्टः स क्वचिदविवक्षितस्तद्धितार्थविग्रहवाक्ये तिङन्ते लोकदृष्टस्य क्रियाप्रधानत्वस्य वैपरीत्यं कर्तृप्रधानत्वं दृश्यत इति हरिश्लोकार्थः।

तदनुगुणतयैव पदान्तरप्रक्षेपगौरवं तु फलमुखत्वान्न दोषावहम्। अत एव वाक्यार्थं तत्स्वं दातुं प्राच्येन विषयेऽर्पिते। लौकिको वाक्यभेदेन विग्रहो वृद्धसंमतः। अथवा मास्तु तच्छब्दः प्रधानार्थसाम्यमपि औत्सर्गिकमिह त्यज्यताम्। तथा च हरिणा। क्वचिद्गुणप्रधानत्वमर्थानामविवक्षितमित्युपक्रम्य। आख्यातं तद्धितार्थस्य यत्किंचिदुपदर्शकम्। गुणप्रधानभावस्य तत्र दृष्टो विपर्यय इत्युक्तम्॥ तद्धितग्रहणं कृतामप्युपलक्षणम्। तेन आक्षिकः वैयाकरणः पाचकः इध्मप्रव्रश्चनः इत्यादीनां विग्रहवाक्यानीहोदाहरणम्। स्यादेतत्॥ ७। तद्धितेत्युपलक्षणं वृत्तिमात्रस्य। एवं च वृत्तिसमानार्थकमेव तदर्थबोधकत्वेन दृश्यमानं वाक्यमिति भावः। तदेव प्राधान्यं तच्छब्देन दर्श्यते तच्च सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शकत्वात्तच्छब्देन दर्शितं भवति। चित्रगोसम्बन्धीयः स चित्रगुपदवाच्य इत्यर्थात् तत एव तद्वहतीति सूत्रे भाष्ये तस्येदमित्येव सिद्धे इदं व्यर्थमित्याशङ्क्य वहति वोढेति शब्दस्य भेदान्न तेन विधिरित्युक्ते शब्दभेदेऽप्यर्थसामान्यात् सिद्धम्। य एवार्थो रथं वहतीति स एव रथस्य वोढेतीत्युक्तम्। तत्र शब्दभेदादित्यस्य वहतीति क्रियाप्रधानं वोढेति कर्तृप्रधानमित्यर्थः। अर्थसामान्यादित्यस्य तस्यार्थोपदर्शके वहतीत्यत्रापि विशेषणविशेष्यभावव्यत्यासाद्वहनकर्तृत्वेवार्थ इत्यर्थः। वर्तमानकालश्चाविवक्षितः। एवमन्यत्राप्यूह्यम्। कालाः परिमाणिनेति सूत्रे भाष्येऽपि स्फुटमिदं सूक्ष्मदृशामित्याहुः ॥

म·श·
१५६

हेतुकद्विगुरिति। तद्धितार्थोत्तरपदेति विहितेत्यर्थः। वार्त्तिके उत्तरपदेनेति हेतौ तृतीयेति भावः। नियमभङ्गो नेति। इदञ्च कैयटानुरोधेन। यद्वा सतस्साधारत्वं तदन्वय
द्वारैव तस्य क्रियान्वय इति शौण्डादेरस्ति क्रियान्वयेन तद्द्वारा तदन्विताक्षस्यापि तदन्वय इति प्रकारान्तरेणापि तदभङ्ग· सम्भवात्तदन्तर्भावेन मानम्। अक्षकुशल इ
त्यादौ तदासक्तत्वाद्यप्रतीतेश्चेत्यन्ये। आधेयप्रधान इति। अधिशब्दस्याधिकरणवृत्तिरित्यर्थः। ईश्वराधीन इत्यस्येश्वररूपाधिकरणवृत्तिरित्यर्थः। स्वत्वं चेदं स्वविधाय

चित्रगुर्दण्डीति समासतद्धितवृत्त्योरलौकिके प्रक्रियावाक्येपि च चित्रा गोदण्डः एते शब्दाः षष्ठ्यन्ता एवेति मीमांसकाशय इति चेन्नैवम्। शेषो बहुव्रीहिः त्रिकतः
शेषः। अस्तिसामानाधिकरण्ये मतुप्। समर्थानां प्रथमाद्वेत्यादिसूत्रभाष्यविरोधेन वृत्तेरेवतत्र दुर्लभत्वादिति दिक्। प्रकृतमनुसरामः। उत्तरपदेनेति। परिमाणमु
त्तरपदं हेतुकद्विगुसिद्धये बहूनां तत्पुरुषो वक्तव्य इत्यर्थः। सुप्सुपेत्येकत्वस्य विवक्षितत्वादप्राप्ते वचनम्। अह्नादेश इति। त्रिपदतत्पुरुषानन्तरमुत्तरपदेप
रतोऽवान्तरद्विगोस्तनीति भावः। सप्तमी शौण्डैः। बहुवचननिर्देशाद्गणपाठसामर्थ्याच्चाद्यर्थावगतिरित्यभिप्रेत्याह। शौण्डादिभिरिति। शौण्डः प्रवीणः। इ
ह आसक्तिरूपा क्रियावृत्तावन्तर्भवति तद्द्वारकं च सामर्थ्यम्। यथा दध्योदनगुडधानादौ। तेन कारकाणां क्रिययैव संबन्ध इति नियमस्य भङ्गो नेति बोध्यम्। अधिशब्द
इति। आधेयप्रधान इति शेषः। अधिकरणप्रधानस्य तु अव्ययीभावस्य अधिहरीति यथा। अन्तःशब्दोऽप्यत्र पठ्यते स चाधिकरणप्रधानः मध्य इत्यर्थस्तद्योगेऽवयविन
आधारत्वविवक्षायां सप्तमी यथा वृक्षे शाखेति। वनेऽन्तः वनान्तर्वसति। यस्तु अधिकरणत्वमात्रवृत्तिरन्तःशब्दस्तस्य विभक्त्यर्थ इत्यव्ययीभावो नित्यसमासः। प्रनिरन्तरिति
णत्वमतर्वणम्॥ ७ केभाष्ये। अधिकरणप्रधानस्येति। अधिकरणशक्तिमात्रबोधकस्येत्यर्थः। अधिकरणप्रधान इति। मध्यगताधिकरणत्वशक्तिप्रधान इत्यर्थः। तदाह।
मध्ये इत्यर्थादिति। वनेऽन्तरिति। वनवृत्तिमध्यभागे इति बोधः। अधिकरणत्वमात्रेति। ननु मध्यालिङ्गि तत्रवृत्तिरित्यर्थः ॥

श·म·
१५६

असङ्गतेरिति। अव्ययीभावनित्यत्वेन अपेक्षायास्तत्रासम्भवादिति भावः। अन्यथा। अतोधिकार्थततितापव्ययीभावस्वीकारे। अतिप्रसङ्गाच्चेति। चो हेतौ। अन्यथाऽन्यथेत्ति पदोपात्तसाध्ये हेत्वन्तराकथनेन तदसङ्गतिः स्पष्टैव। अवयविन इति। त्वद्रीत्या मध्यगताधारत्ववचनत्वेपि वनगताधारत्ववाचकत्वं न तस्येति भावः। अधिकरणप्रधान इति। शक्तिमत्प्रधान इत्य यत्तु हरदत्तेनोक्तम्। तत्पुरुषस्यवैकल्पिकत्वात्पक्षेऽव्ययीभाव इति। तच्चिन्त्यम्। तत्पुरुषस्यवैकल्पिकत्वेपि अव्ययीभावस्य नित्यत्वाद्वने अन्तरिति त्वदुक्तविग्रहस्यैवासंगतेः। किंच विभक्त्यर्थमात्रवृत्तेरव्ययीभावो वचनग्रहणसामर्थ्यात्। अन्यथा वृक्षस्योपरीत्यादावतिप्रसङ्गाच्च। तत्कथं मध्यवाचिनः प्रसङ्गः। किंच क्रियावाक्यान्तर्गतविभक्त्यर्थवृत्तेरेवाव्ययस्य समासः सन्निधानात्। तत्सामर्थ्यादेव निपातेनाभिहितेपि सप्तमीति स्थितम्। न चैतदिहास्ति। अवयविन आधारत्वविवक्षायां सप्तमीति त्वयैवोक्तत्वादिति दिक्। यदप्याहुः। अन्तःशब्दोधिकरणप्रधानः तत्सामानाधिकरण्याद्वनात्सप्तमी वनरूपे मध्ये इत्यर्थात्। वनेऽन्तर्वनान्तर्वसति। पूर्वपदार्थप्राधान्ये तु अव्ययीभावः वनस्यान्तरन्तर्वणमिति। अत्रेदं वक्तव्यम्। सामानाधिकरण्ये सप्तमीत्यसंगतं व्यधिकरणसमासप्रकरणात् विशेषणं विशेष्येणेत्यनेनैव गतार्थत्वात्। किंच मध्यवाचिनाव्ययीभावो दुर्लभः। लक्षणाभावात्। अथाव्ययमिति योगविभागेन कथंचित् उपपत्तिं ब्रूषे अपदिशामि ति यथा। तर्हि तथैवेहापि नित्यसमासत्वाद्विग्रहत्वं स्यात्। तथा च वनस्यान्तरिति त्वदुक्तिर्विरुद्ध्येत। दिक्संख्ये संज्ञायाम्। नियमार्थमिति। कथं तर्हि त्रिलोकनाथेन सतां मखविद्विष इति कालिदासः। त्रिलोकशब्दस्यासंज्ञात्वान्न च समाहारे द्विगुः। द्विगोरिति ङीप्प्रसङ्गात्। न च पात्रादित्वं कल्प्यम्। यदि त्रिलोकी गणनापरा स्यादिति प्रयोगविरोधात्। न चोत्तरपद इति समासः। त्रिपदतत्पुरुषस्येह दुर्लभत्वात्। अत्रोच्यते। लोकशब्दोत्र लोकसमुदायपरः। अवयवो लोकस्त्रिलोकः ॥ ७ ॥

र्थः। असङ्गतमिति। विशेषणसमासेनैव गतार्थत्वात्तदाह। अधिकरणेति। एवं चैतत्प्रकरणे तदर्थकथनमनुचितमिति भावः। इह। शास्त्रे। दुर्लभत्वादिति। सुप्सुपेत्युक्तेरिति भावः ॥

शाकपार्थिवादिरिति। नचकैयटोक्ततत्प्रत्याख्यानेदोषः। शाकप्रियपार्थिवइत्यादिवारणायतद्वचनस्यावश्यकत्वेनकैयटोक्ततत्प्रत्याख्यानस्यासङ्गतत्वादितिभावः। तद्ध्वनयन्नाह। एतच्चे
ति। भाष्यएवेति। तत्रहित्रैविद्यइत्यत्रत्र्यवयवांविद्यामधीतेइतिविग्रहइत्युक्तम्। एतेनेति। नववरसरुचिरामित्यस्यनवावयवकरससमूहेनरुचिरामित्यर्थइतिभावः। एकापिसप्तमीति। एको
च्चारणविषयापिसप्तमीतन्त्रेणोच्चारणाद्द्विद्यतइत्यर्थः। द्वन्द्वसाधुत्वंतुसौत्रत्वात्। स्पष्टंचेदमादेशप्रत्यययोरितिसूत्रेमूले। विषयेइति। अतएवपौर्वशालइत्यादौतद्धितोत्पत्तिः।
अन्यथाउक्तार्थानामप्रयोगइतिनस्यादितिभावः। प्रतिपदोक्तत्वादिति। निरवकाशत्वाभावेपिप्रतिपदोक्तत्वेनशीघ्रोपस्थितिकत्वान्न्याय्यमितिभावः। प्राचाग्रन्थमिति। भाष्यग्रन्थ

शाकपार्थिवादिः। एतच्चद्विगोर्लुगनपत्यइतिसूत्रेभाष्यएवस्पष्टम्। एतेननववरसरुचिरामित्यादिव्याख्यातम्। तद्धितार्थे। एकासप्तमीविषयभेदाद्द्विद्यतेइत्याश
येनाह। तद्धितार्थविषयेइत्यादि। सर्वनाम्नइति। एतच्चपूर्वापरोदाहरणान्वपि। यद्यपिस्त्रियाःपुंवदित्यनेनापिप्रकृतेनिर्वाहःसिद्धस्तथापिदक्षिणपूर्वेत्यादिसि
ध्यर्थंसर्वनाम्नइत्यावश्यकंप्रतिपदोक्तत्वादिहापिन्याय्यमितिभावः। षाण्मातुरइति। मातुरुत्संख्येत्युत्। अनपत्यइत्युक्तेर्द्विगोर्लुगितिलुग्न। विकल्पेप्राप्तइति
प्राचाग्रन्थमनुसृत्योक्तम्। वस्तुतस्तुत्रयाणांसमासेकृतेऽन्यपदार्थोपसंक्रमेणपरस्परसंबन्धाभावाद्द्वन्द्वतत्पुरुषयोरप्राप्तौसत्यांवचनमितिज्ञेयम्। तत्रतद्धि
तार्थेतिसूत्रेणोत्तरपदेपरेतत्पुरुषोवचनसामर्थ्यात्सिद्धः। एकार्थीभावसत्त्वादेवनित्यतापिसिद्धा। नहिमहाविभाषापिसत्येकार्थीभावेसञ्ज्ञायाविकल्पिका। नच
सञ्ज्ञायाभावाभावाविध्येतेइतिभाष्यविरोधात्। किंतुवैकल्पिकैकार्थीभावविषयेनित्येयंतत्सञ्ज्ञा। इहतुवैकल्पिकत्वांशोबाधितः ॥ ७ मित्यर्थः। परस्परसंबन्धा
भावादिति। निष्कृष्यपञ्चगोपदमात्रयोः परस्परंसामानाधिकरण्याभावाच्छत्रोपानहस्यचार्थमात्रेवृत्त्यसम्भवादित्यर्थः। अन्यथापञ्चगोधनपदानांपरस्परंविशेष्यविशेषणभावपूर्व
कमेवान्यपदार्थोपसंक्रमाच्छत्रोपानहप्रियइत्यत्रसमूहबोधपूर्वकमेवतदपसंक्रमात्तदसङ्गतिःस्पष्टैव। वचनसामर्थ्यादिति। ॰।त्सामर्थ्याद्भूतपूर्वसामानाधिकरण्यमाश्रित्ये
त्यर्थः। बाधितइति। त्रयाणामेकार्थीभावेद्वयोर्व्यपेक्षायादुर्लभत्वात्। महाविभाष ह्यपेक्षायाएवपक्षेबोधिकेनिभावः ॥

ज्ञापकसिद्धेति।वचनसामर्थ्यसिद्धतत्पुरुषस्यन्यायसिद्धनित्यत्वरूपार्थस्यचानुवादमात्रमितिभावः।ज्ञापकशब्दोबोधकपरः।अतएवेति।वार्त्तिकस्यतत्पुरुषपदस्यसूत्रसिद्धार्थानुवादकत्वादेवेत्यर्थः।त्रिपदेहिबहुव्रीहौखादिरीपदस्योत्तरपदत्वाभावात्पुंवत्त्वंनस्यात्।वार्त्तिकस्यापूर्वत्वेहिशम्यारूपेउत्तरपरेपूर्वयोस्तत्पुरुषेपुंवत्कर्मधारयेत्यनेनपुंवत्त्वंसिद्धमेवेतितदाश्रयणंव्यर्थंस्यादितिभावः।पूर्वनिपातेति।त्रिपदेबहुव्रीहावितरशब्दस्यसर्वनामत्वात्पूर्वनिपातःस्यादितिभावः।नन्वेवंपूर्वनिपातव्यावृत्तयेतदाश्रयणस्यावश्यकत्वेकथंपूर्वकृतार्थसाधकत्वेनास्यकैयटस्योपन्यासइतिवाच्यम्।तपरइत्यादिनिर्देशैस्तत्पूर्वनिपातस्यानित्यत्वेनापितत्सिद्धिरितिपुंवत्त्वमेवमुख्यंफलमित्याशयात्।कर्मधारयपूर्वपदकबहुव्रीहौतुतस्यविशेषणत्वेनपूर्वनिपातापत्तेःसनकृतः।सूत्रार्थानुवादकत्वेतुनात्रतत्प्राप्तिः।दिक्संख्ययोरभावात्।अतएवेति।ज्ञापकसिद्धार्थानुवादत्वादेवेत्यर्थः।

एवंचवार्तिकेतत्पुरुषइत्यंशोज्ञापकसिद्धार्थानुवादमात्रम्।अतएवखादिरेतरशम्यमितिकर्मधारयोत्तरपदोबहुव्रीहिर्नतुत्रिपदइतिसमर्थसूत्रेकैयटोक्तंसङ्गच्छते पुंवद्भावपूर्वनिपातयोःसिद्धयेहितथोक्तम्।अतएवचित्रांजरद्गुरितिसङ्गच्छते।पूर्वकालैकेत्यादेर्जरद्गवादौकृतार्थतयाभूतपूर्वगत्याप्रवृत्तेरयोगादितिदिक् ॥

❦ अन्यथाचित्राशब्देपुंवत्त्वापत्तिरितिभावः।ननुभौतपूर्विकंसामानाधिकरण्ययामादायद्विगुवत् पूर्वकालैकेत्यपिदुर्वारमितिटच्दुर्वारोऽतआह।पूर्वाकालैकेति।तस्यसामर्थ्यात् प्रवृत्तावप्यस्यप्रवृत्तौमानाभावः इतिभावः।दिगर्थस्तुयदिसामानाधिकरण्यमात्रंनियामकंनतुनिष्कृष्यतयोरेवेत्याग्रह एवमेकार्थीभावमात्रमपेक्षितंनतुनिष्कृष्येत्याग्रहः।अतएवयेनविधिरितिसूत्रेभाष्येप्रत्ययग्रहणेयस्मात्सविहितइत्यस्यपरमगार्ग्यायणसिद्धिः प्रयोजनमुक्तम्।किंचैवंप्राचीशालाप्रियायस्यप्राक्शालाप्रियइत्यादौसामानाधिकरण्यनिबन्धनपुंवत्त्वासिद्धिः।पुंवत्त्वेयथाकथंचित्सामानाधिकरण्यंनिमित्तम्।कर्मधारयेतुनिष्कृष्येत्यत्रम[illegible]ाभावात्।तथाचार्थवृत्तितादृन्द्वेनियामिकानतुतन्मात्रवृत्तिता।अतिप्रसङ्गस्त्वनभिधानाद्वारणीयः।अतएवभाष्येसंपूर्णवचनमेवप्रत्याख्यातमित्युच्यतेतदामूलंसम्यगेवेति ॥

वाग्दृषद्प्रियइति। अत्र वाग्दृषदोः सामानाधिकरण्याभावेपि प्रियशब्देन तयोः सामानाधिकरण्यात् बहुव्रीहिर्निर्बाधः। पूर्वतन्त्रे जैमिनीये बाधलक्षणे दशमाध्याये। पृष्ठ्यः षडहो द्वादशाहे उत्पन्नास्तत्राहः क्रमेण रथन्तरबृहद्वैरूपवैराजशाक्वररैवतानि सामानि गवामयने पृष्ठ्यः षडह इत्यादिवाक्यम्। द्वन्द्वं कृत्वेति। बृहद्रथन्तरे सामनी यस्येत्यर्थः। नेह द्वन्द्व इति। किंतु त्रिपदबहुव्रीहिरेवेत्यर्थः। स्वरे विशेषस्येति। त्रिपदबहुव्रीहौ पूर्वपदप्रकृतिस्वरेण बृहच्छब्दस्वरः। उत्तरपदे परतो द्वन्द्वे तु सतिशिष्टद्वन्द्वस्वरेण बृहद्रथन्तरे त्वन्तोदात्तमिति स्वरे विशेषः। स्वरविशेषेप्यस्य प्रवृत्तिरिति समर्थसूत्रशेषे भाष्ये स्पष्टम्। तत्रैव हेतुमाह। नित्येति। चो हेतौ। संकोचे। समासान्तमात्रकृतविशेषविषयत्वे। न चात्र द्वन्द्वे पूर्वपक्षवत् षडहस्य त्र्यहःसु उ

द्वन्द्वस्योदाहरणं तु वाक् च दृषच्च प्रिये अस्य वाग्दृषद्प्रियः। छत्रोपानहप्रियः। इह त्रिपदे बहुव्रीहौ कृते पूर्वयोर्नित्यं द्वन्द्वः। तेन समासान्तष्टजपि नित्य एव। यत्तु पूर्वतन्त्रे बाधलक्षणे पृष्ठ्यस्य युगपद्विधेरेकाहवद्द्विसामत्वमित्यधिकरणे पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्य इत्युदाहृत्य द्वन्द्वं कृत्वा बहुव्रीहिरिति पूर्वपक्षं रचयित्वा तत्रोपष्टम्भकतया कात्यायनवचनमिदमुपन्यस्तम्। यच्च नेह द्वन्द्व इति सिद्धान्तयित्वा कात्यायनवचनं तु समासान्तकृतविशेषमात्रविषयमित्युक्तम्। तदुभयमपि चिन्त्यम्। उत्तरपदे इत्युक्ते द्वन्द्वं कृत्वेत्यस्यासङ्गतेः। स्वरे विशेषस्य स्पष्टतया समासान्तपर्यन्तमाग्रहे बीजाभावाच्च। नित्यसमासवचनमिति वार्तिकस्य संकोचे प्रमाणाभावाच्च। संख्यापूर्वो द्विगुः। अत्रोक्त इति। अयं भावः। पूर्वसूत्रविषय एवेयं संज्ञानन्तरस्येति न्यायात् ॥

भयोरनुष्ठानापत्तिः। एकस्मिन्नेकमितरस्मिन्नितरदिति ह्यनुष्ठानं सिद्धान्ते इष्यते इति वाच्यम्। षडहापेक्ष इतरेतरयोगो न तदवयवापेक्ष इत्यदोषात्। केषुचिदहःसु घृतेन केषुचित्तैलेन भोजनेपि मासं घृततैलाभ्यां भोजयितव्यमितिवत्। यदि तु श्रुतौ बृहच्छब्दस्वर एव बृहद्रथन्तरसामेत्यत्र श्रूयते। तदा छान्दसत्वात् त्रिपदे बहुव्रीहौ द्वन्द्वो नेति कल्प्यम्। यदा चार्थान्तर्भावेणैकार्थीभावस्तदा हि द्वन्द्वस्य नित्यता वार्तिकसंमता। यदा तु तदनन्तर्भावेणैकार्थीभावस्तदा द्वन्द्वाप्राप्त्या त्रिपदो निर्बाध एवेत्यन्ये ॥

स्वरेणनसंभवतीति।तत्रदिक्संख्येसञ्ज्ञायामितिसमासेनद्विगुत्वाभावादितिभावः।एवमेवेति।पूर्वनिपातार्थत्वमेवेत्यर्थः। शब्दप्रवृत्तिनिमित्तेति।वैयाकरणखादीत्यर्थः।पापाणकेति।अत्रापिसूत्रेकुत्सितशब्दःकुत्स्यमानपरः।अतएव।पूर्वपदस्यसदृशलाक्षणिकत्वादेव।नचदर्शनीयायामातादर्शनीयामातेत्यत्रापिद्वयोरेकविशेष्यकप्रतीतिजनकएतदर्थमेवहितत्रयोगविभागःकृतः।अन्यथादिक्संख्येसञ्ज्ञातद्धितार्थोत्तरपदसमाहारइत्येवब्रूयात्।तेनसप्तर्षयइत्यत्रइगन्तकालेतिपूर्वपदप्रकृतिस्वरोनभवतिकिंतुसमासान्तोदात्तएव।तथाचलक्ष्यंसप्तर्षयस्तपसेयेनिषेदुःसप्तर्षीणांसुकृतांयत्रलोकइत्यादि।सनपुंसकमिति।एतच्चमूलेएवव्याख्यास्यते।कुत्सितानिकुत्सनैः।कुत्सअवक्षेपणे।मत्यादिसूत्रेचकारस्यानुक्तसमुच्चयार्थत्वात्वर्तमानेक्तइत्याशयेनाह।कुत्स्यमानानीति।तदर्थकानीत्यर्थः।वैयाकरणखसूचिरिति।सूचयतेरचइः।यःपृष्टःसन्प्रश्नंविस्मारयितुंखंसूचयति।अहोनिर्मलंगगनमितिसएवमुच्यते।दुर्दुरूढइति।डुलउत्क्षेपे।दुःपूर्वः।औणादिकःकूटप्रत्ययः।बहुलमन्यत्रापीतिणिलुक्।रलयोरेकविषयत्वस्मरणादूः।विशेष्यस्यपूर्वनिपातार्थंसूत्रम्।प्रायेणाग्रेप्येवमेव।शब्दप्रवृत्तिनिमित्तकुत्सायामेवायम्।संनिधानात्।तेनेहन।मीमांसकोदरिद्रः।पूर्वसूत्रेति।पापणकशब्दौकुत्सनाभिधायिनौतयोःपूर्वसूत्रेणसमासेसतिपरनिपातःस्यात्।तस्मात्पूर्वनिपातार्थमिदंसूत्रमितिभावः।लाक्षणिकमिति।अतएवसामानाधिकरण्यात्मृगीवचपलामृगचपलेत्यादौपुंवद्भावः।उत्तरपदोपस्थितश्यामत्वचापलादिद्वारकमेवेहसादृश्यंगृह्यतेसंनिधानात्।वागर्थाविवेत्यादावपिहिसंनिहितसंपर्कादिद्वारकमेवसादृश्यंप्रतीयते।कथंतर्हिउपमानपरतेतिचेत्।भूतपूर्वगत्याप्राक्यार्थमादायेत्यवेहि।सामान्यवचनत्वंचोपमानोपमेयसाधारणधर्मविशिष्टोपमेयपरत्वंबोध्यम् ॥ ८५. त्वेनसामामाधिकरण्यात्पुंवत्त्वापत्तिः।वृत्तौवृत्तेःप्राक्चसामानाधिकरण्यस्यतत्त्ववृत्तेः।इवशब्दस्यद्योतकत्वाच्चवृत्तेःप्रागपिसामानाधिकरण्यमत्रेतिबोध्यम्।भूतपूर्वगत्येति।घनेनतुल्यःश्यामइतिवाक्येतच्छक्यार्थस्यसादृश्येप्रतियोगित्वेनान्वयादुपमानत्वमस्तीतिभावः।उपमेयपरत्वमिति।नचश्यामादिशब्दानांस्पष्टमेव ॥

खञ्जपाचक इति। खञ्जत्वं गुणद्रव्यभिमानेनेदम्। नन्वप्रधानमुपसर्जनमिति महासञ्ज्ञयानेकस्य प्रथमानिर्दिष्टत्वे अप्रधानस्यैव सञ्ज्ञा न प्रधानस्येति बोधयितुं शक्यम्। ननु अप्राधान्यं कस्य स्वत्वस्य नियामकतेत्यरुचेराह। यद्वेति। निरूढविशेषणेति। विषयताविशेषप्रकारतावदित्यर्थः। तदेव हि लोकस्य विशेषणत्वेन प्रसिद्धम्। ननु द्रव्यगुणसमभिव्या उपमितसमासक[illegible]व्याब्धिः क्वातिगम्भीर इति कैयटः। सामान्यप्रयोगसत्त्वेनास्याप्रवृत्तेः। उच्यते। इह गाम्भीर्येण सादृश्यं न विवक्षितं किन्तु विततदुरवगाहत्वादिना तस्य चाप्रयोगात्[illegible]ति निर्बाधः समासः। विशेषणम्। ननु विशेषणविशेष्यभावे कामचारात्पाचकपाठकादाविव नीलोत्पलादावपि अव्यवस्थितः पूर्वनिपातः स्यादिति चेत्। अत्राहुः। जातिशब्दस्य गुणक्रियाशब्दयोः समभिव्याहारे विशेष्यसमर्पकत्वेन। तेन नीलोत्पलं पाचकब्राह्मण इति व्यवस्थित एव प्रयोगः। गुणशब्दयोः क्रियाशब्दयोर्गुणक्रियाशब्दयोश्चानियम एव। खञ्जकुब्जः कुब्जखञ्जः। पाचकपाठकः। पाठकपाचकः। खञ्जपाचकः। पाचकखञ्ज इति। अत्र च मूलमुपसर्जनमिति महासञ्ज्ञा। अप्रधानं ह्युपसर्जनम्। गुणक्रिययोश्च द्रव्यं प्रत्यप्राधान्यं स्पष्टमेवेति। यद्वा विशेषणविशेष्ययोश्च संबन्धिकतया अन्यतरोपादानमात्रेणेतरस्य संभवे उभयोपादानं निरूढविशेषणविशेषपरिग्रहार्थम्। निरूढिश्च प्राग्युक्ताभाष्यकारादिव्यवहारादवसीयते। पूर्वापर। अपरस्येति। एतच्च पश्चादिति सूत्रे भाष्ये स्थितम्। बाहुलकादिति। एके मुख्येषु वीरयते पराक्रमते इति वा बोध्यम्। श्रेणिकृता इति। एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूहः श्रेणिः। कृताकृतमिति। एकदेशकरणात्कृतम्। एकदेशान्तरस्याकरणात्तदेवाकृतम्। सन्महत्। गुणक्रियाशब्दैः सह समासे सदादीनां पूर्वनिपातनियमार्थं सूत्रम्। तत्पुरुषः। समानाधिकरण इत्यर्थ आद्यजन्तम्। औपचारिकं वा। समानाधिकरणपद इत्यर्थः। भाषितपुंस्कादित्यादि। एतच्च स्त्रियाः पुंवदिति सूत्रे स्फुटीकरिष्यते ॥ हारेकस्य तादृशविषयतात्त्वमत आह। रूढिश्चेति। रूढिविषयतादृशविषयतावत्त्वमित्यर्थः। अवसीयत इति। गुणादेरेतादृशविषयतावत्त्वं निश्चीयत इत्यर्थः। एकेनेति। अनेकशिल्पादिजीविन एकशिल्पादिजीविन ——— कृता इत्युदाहरणार्थः। असमूहरूपाः समूहरूपाः कृता इति वा। गुणक्रियेति। सत्पाठकः सच्छुक्ल इत्यादौ ॥

रूढिशब्देति। ते च मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनीति कोशप्रसिद्धा मतल्लिकादयः। न्याय्यमिति। न च युवत्वारोपवत् पुंस्त्वस्याप्यारोपेण सामा-
नाधिकरण्यमुभयारोपापेक्षयाल्पस्यानुसारेण परिभाषाज्ञापनस्यैवौचित्यात्। पूर्वान्तग्रहणेति। पूर्वान्ततया ग्रहणे इत्यर्थः। क्वचित्तथैव पाठः। पूर्वनिपाते विशेष इति। गुणवचनत्वात् ग
ननु तेनैव कर्मधारये सिद्धम्। जातीयदेशीययोश्च तसिलादिष्विति सिद्धम्। तत्किमनेन सूत्रेणेत्यत आह। पूरणीत्यादि। तथेत्यादि च स्त्रीपुंसलक्षणेति। स्तनश्मश्र्वादियुक्ता
स्त्री पोटेत्यमरव्याख्यातारः। हरदत्तस्तु नपुंसकं पोटेत्याह। तन्मूलं मृग्यम्। अमरेण नपुंसकपर्यायेभ्यः पृथगेवास्य पाठात्। कठधूर्त इति। नात्र कठत्वं कुत्स्यतेऽतः कुत्सितानि कु-
त्सनैरिति गतार्थता न शङ्क्या। प्रवृत्तिनिमित्तकुत्सायामेव तस्य प्रवृत्तेः। कथं तर्हि जनयति कुमुद्भ्रान्तिं धूर्तबको बालमत्स्यानामिति बकधूर्त इति युक्तम्। सत्यम्। प्रमाद एवाय-
मिति प्रामाणिकाः। प्रशंसावचनैश्च। वचनग्रहणं रूढिशब्दपरिग्रहार्थम्। ये तु यौगिकाः प्रशस्तशोभनरमणीयादयः ये च विशेषवचनाः शुचिमृद्वादयः ये च गौण्या वृत्त्या प्रशं-
सां गमयन्ति सिंहो माणवक इत्यादयस्ते सर्वे व्युदस्यन्ते। कुमारः। एतदेवेति। एवकारः स्फुटसिद्धत्वद्योतनार्थः। ज्ञापकान्तरस्यापि संभवात्। तथाहि। युवा खलतीति सूत्रे जर-
तीग्रहणं लिङ्गम्। नहि युवन्शब्दस्य पुंस्त्वे जरतीसामानाधिकरण्यं न्याय्यम्। यत्तु अश्वादिभ्यः फञ्विधौ पुंसि जात इति गणसूत्रे पुंसीत्युक्तिरपीह ज्ञापिकेति। तन्न। एकादे-
शस्य पूर्वान्त ग्रहणे ज्ञापकस्य मूलशैथिल्यात्। चतुष्पादो गर्भिण्या। मण्डूकप्लुत्या जातिरित्यनुवर्तते। तेनेह न। कालाक्षी गर्भिणी। चतुष्पात् किम्। ब्राह्मणी गर्भिणी। प्रत्युदा-
रणे तु विशेषणमिति समासः स्यादेव। पूर्वनिपाते विशेषः। मयूरव्यंसकादयश्च। चकारोऽवधारणार्थः समासान्तरं व्यावर्तयति। धूर्त इति। तथा च गुणवचनत्वात् पूर्वनि-
पाते प्राप्ते इदं वचनमिति भावः। अन्ये त्वाहुः। मयूर इव व्यंसको मयूरव्यंसकः। उपमानानि सामान्यवचनैरिति सिद्धे पुनर्विधानं तत्पुरुषे तुल्यार्थेति स्वरो मा भूदिति। स ह्यु-
पमानशब्देन विहिते समासे प्रवर्तते। अश्नीतपिबतेति। इह क्रियारूपस्यान्यपदार्थस्य प्राधान्यात्क्लीबत्वान्न टाप् ॥
णीशब्दस्य पूर्वनिपात इति भावः। उपमानशब्देनेति। लक्षणप्रतिपदोक्तपरिभाषयेति भावः। इदं च मतं कैयटे स्पष्टम्। क्रियारूपस्येति। क्रियापदवाच्यरूपस्येत्यर्थः ॥

भिन्नवाचीति। पूर्वपदार्थप्रधानश्चायम्। नित्येति। तेन ताभ्यां विग्रहो न। उत्तरपदार्थेति। स्पष्टं चेदं भाष्ये। आरोपितत्वं नञा द्योत्यते इति —————— आरोपितब्राह्मणत्वं ब्रा
ह्मणपदप्रवृत्तिनिमित्तमित्यब्राह्मण इत्यत्र नञा द्योत्यत इत्यर्थः। एवमन्यत्रापि बोध्यम्। एतदेव भाष्यसंमतम्। नञो वाचकत्वे आह। आरोपमात्रं वेति। इदं नञ्वाच्यमेवोत्तरपदार्थे विशेषणं
तदाह। विषयत्वं तु संसर्ग इति। तादात्म्यारोपश्चात्र। नामार्थयोर्भेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषयेति भावः। यत्तु अत्रापि पक्षे द्योतकत्वेव नञ इति। तन्न। समभिव्याहृतपदशक्त्याह्युद्बो
धकत्वस्य द्योतकत्वे विशिष्टस्यैव तच्छक्तिविषयतया पृथगुपस्थित्यभावे न विषयत्वं तु संसर्ग इत्यस्यासंगतेः। पृथगुपस्थितयोर्हि संसर्गो भवतीत्याहुः। आरोपितो ब्राह्मण इति। अयमन्त्ये बोधाकारः
आद्ये तु आरोपितब्राह्मणत्ववानिति प्रदर्शनीयम्। आद्यमेव युक्तं न त्वन्त्यम्। तस्य नञर्थत्वेपि ब्राह्मणादिपदानां मुख्यसंबन्धेन ब्राह्मणत्वादिमति शक्तिग्रहात्तत्रारोपितत्वान्वयस्य दुर्घटत्वात्। न
एवमग्रेपि। राजान्तरमिति। अन्तरशब्दो भिन्नवाची। मात्रं कार्त्स्न्येवधारणे। अन्तरमात्रशब्दाभ्यां सह नित्यसमासः। नञ्। उत्तरपदार्थप्रधानोयं समासः। तथाहि। आरोपितत्वं न
ञा द्योत्यते। आरोपमात्रं वा। विषयत्वं तु संसर्गः। तथा च अब्राह्मणशब्दादारोपितो ब्राह्मण इति बोधे अर्थाद्ब्राह्मणभिन्न इति पर्यवस्यति। अत एवानुपसर्जनत्वादतस्मिन्
स्यादौ सर्वनामकार्यं सिद्ध्यति ॥ ७६ च नञ्समभिव्याहारात्तदर्थत्यागः। शब्दार्थसंबन्धस्यानित्यत्वापत्तेः। मम तु न दोषः मुख्यसंबन्धेन ब्राह्मणत्ववत इवारोपितसंबन्धेन ब्रा
ह्मणत्ववतोपि तदर्थत्वात्। नञ् तु स्वविशिष्टस्य तदर्थकत्वतात्पर्यनिर्णायकः। इदमेव नञो द्योतकत्वं नाम। एतावतैवात्रैकार्थीभावव्यवहारोपि विशिष्टानुपूर्व्या द्योत्यार्थान्तर्भावेण
शक्त्यानवच्छेदकत्वाद्विशिष्टस्यार्थवत्त्वम्। समासविधायकशास्त्रबलादत्रैव मेलकत्वस्यौचिता। प्रजयतीत्यादौ तु नैवम्। अडादिव्यजस्यार्थमन्यथा तत्र कल्पनात्। लोकस्य तु तत्रा
पि विशिष्टशक्त्यैव बोधः। अवयवशक्तिबोधनद्वारा विशिष्टस्य विशिष्टशक्तिबोधकमेव च व्याकरणमिति दिक्। पर्यवस्यतीति। भेद एवारोपस्य संभवादिति भावः। अत एव। उ
त्तरपदार्थप्रधानत्वादेव ॥

इह लिङ्गमिति। अन्यथोपसर्जनत्वाद्ध्रस्वापत्तौ हल्ङ्यादिलोपस्य दुर्वारत्वेन तद्वैयर्थ्यं स्पष्टमेव। नच वचनसामर्थ्यादुपसर्जनत्वेप्यस्त्वमिति वाच्यम्। लाघवेनोत्तरपदार्थप्राधान्यस्यैव ज्ञापयितुं युक्तत्वात्। अब्राह्मणानश्वयोर्विशेषश्चिन्त्यः। आर्थिकार्थमिति। आरोपितत्वबोधोत्तरं प्रकरणादितात्पर्यग्राहकवशान्मानसस्तदर्थबोध इति भावः। उत्तरपदप्राधान्यम्। तदर्थप्राधान्यम्। भाष्योक्तमित्यनेन कैयटाद्युपपादितपूर्वपदार्थप्राधान्यपक्षस्य तदसंमतत्वात्तुच्छत्वं बोधितम्। तच्चान्यत्र प्रपञ्चितम्। वास्तवबहुत्वेति। नन्वेकत्वादेरिह शे

तत्पुरुषस्यौत्सर्गिकमुत्तरपदार्थप्राधान्यमप्येवं सति निर्बाधम्। एतत्तदोरिति सूत्रे नञ्समासग्रहणं चेह लिङ्गम्। मीमांसकादयस्तु ब्राह्मणभिन्न इत्यादि शाब्दबोध एवेत्याहुः। तन्मतेऽसदित्यादेः अतिसर्व इत्यादिसमकक्ष्यत्वात्सर्वनामसंज्ञाकार्यं गणकार्यं च न स्यात्। यत्तु तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिता इति पठित्वा अब्राह्मणः। अपापम्। अनश्वः। अनुदरा कन्या। अपशवो वा अन्ये गोअश्वेभ्यः। अधर्मः। इत्युदाहरन्ति। तत्तु यथायथमार्थिकार्थमभिप्रेत्य [illegible] न्नेयम्। सर्वथापि नञ्समासस्योत्तरपदप्राधान्यं भाष्योक्तं नान्यथयितव्यम्। अतएवानेकमन्यपदार्थ इत्यत्रानेकशब्दादेकवचनं प्रयुक्तम्। माघेऽपि। सेव्यतेऽनेकया सन्नतायाङ्ग्येति। कथं तर्हि पतन्त्यनेके जलधेरिवोर्मय इति। उच्यते। अध्यारोपितैकत्वानां प्रकृत्यर्थतया तत्र यास्तवबहुत्वाभिप्रायं बहुवचनम्। यद्वा समुदायबहुत्वे बहुवचनम्। रथोऽश्वो राजश्च प्रत्येकमनेकस्ततः। अनेकश्चानेकश्चेत्येकशेषात्। यत्तु प्राचीनप्रक्रियायां व्याचक्षाणा आहुः। नञ्विशिष्टेनोत्तरपदेन सह स्वादयो लक्ष्यन्तद्वदादि।

विषये आरोपितस्योत्तरत्वेनोत्तरसंख्यायाश्च पूर्वसंख्याव्यवहारप्रतिबन्धकत्वान्न तत्र बहुत्वभानम्। शब्देनैकत्वस्यैवोपस्थितेश्च। अन्यथाऽनेकमन्यपदार्थ इत्यत्रापि वास्तवबहुत्वसत्त्वाद्बहुवचनापत्तिरित्यरुचेराह। यद्वेति। रथो गज इत्युपलक्षणं सापकसमूहस्यापि। अनेके इत्यस्य पद्यभेदेनोभयविशेषणत्वात्। [illegible]स्वाद्यद् इति। सदृक्तदित्यर्थः। कारिकायां सदृशादीनामिति पाठदर्शनात् ॥

तत्पुरुषीयेति। तद्वन्येपिपूर्वन्तेषामार्थिकार्थत्वकथनात्। आकरविरुद्धंचेति। विशिष्टेनलक्षितस्यप्राधान्येपिआकरोक्तोत्तरपदार्थप्राधान्यहानेरितिभावः। मासजातवदिति। तत्रप्रधाजातस्यप्राधान्यंतथाप्रकृतेब्राह्मणादेरारोपितोब्राह्मणइतिबोधात्। नञर्थमिलितम्। नञर्थप्रकारेणजनितबोधम्। तत्समस्तंपदम्। आरब्धासदृशादिजनकमित्यर्थइतिसह्याख्यातारः। भाष्यंविरुद्धमिति। तथाप्रकारस्यभाष्येऽनुक्तेः। अर्थतएवतद्बोधसंभवेनलक्षणायाःव्यर्थत्वाच्च। समर्थयितुमिति। मीमांसकाद्युक्तपूर्वपदार्थप्राधान्यमितिशेषः। लक्षणैवेति। नञोभेदवत्त्यर्थइत्यर्थः। इदमुपलक्षणम्। निपातानामनेकार्थत्वादित्यस्यापि। ज्ञापकादिति। नञ्समासेउत्तरपदार्थप्राधान्येसतियद्यद्भवतितत्पूर्वपदार्थप्राधान्येपीतिसा

तत्त्वकीयग्रन्थसंदर्भविरुद्धमाकरविरुद्धंच। यद्यपिविचारचिन्तामणावुक्तम्। समासेतूत्तरपदप्राधान्यंमासजातवत्। नञर्थमिलितंतत्तसदृशादीनिलक्षये दिति। तदप्युक्तरीत्याभाष्यविरुद्धमितिस्पष्टमेव। यदितुस्वातन्त्र्यमेवावलम्ब्यतेतर्हिकथंचित्समर्थयितुंशक्यम्। तथाहि। अस्तुलक्षणैव। तथापिनञ्समासेउत्तरपदप्राधान्यप्रयुक्तकार्याणिलप्स्यन्ते। अनञ्समासइतिज्ञापकात्। उपेयप्रतिपत्त्यर्थाउपायाअव्यवस्थिताइतिन्यायात्। समासेत्वितिवदन्वाक्येनञोऽसमस्तत्वात्किमर्थैवान्वयइतिध्वनयति ॥

७ सान्यापेक्षज्ञापकादनेकमित्याद्येकवचनस्यापिसिद्धिः। एवमाश्रयणेतिगौरवेलाघवादुत्तरपदार्थप्राधान्यंज्ञापककत्वमेवोचितम्। एतदेवध्वनयतोक्तम्। कथंचिदिति। यत्त्विदंसमर्थनंविचारचिन्तामणिश्लोकोत्तरार्द्धीयस्येति। तन्न। तत्रोत्तरपदस्यतदर्थेलाक्षणिकत्वेतद्विशेष्यकबोधेचोपसर्जनत्वासंभवेनात्वादिसिद्धयेज्ञापकोपन्यासवैयर्थ्यापत्तेः। लाक्षणिकतामात्रेणोपसर्जनत्वाभावाद्विशिष्टस्यलाक्षणिकत्वेतूत्तरपदप्राधान्यमितितदुक्तिविरोधादित्यूह्यम्। नन्विदंभाष्येनोक्तमतआह। उपेयेति। लक्ष्येत्यर्थः। एवंसमर्थनेप्यत्रासाधुत्वमेवमुनित्रयसंमतेर्थेएवशब्दानांसाधुत्वस्यसर्वसंमतत्वादितिबोध्यम्। वदन्तीति। विचारचिन्तामणिकृदितिभावः ॥

यतइति। यतोवधारितंततोध्वनयतीत्यन्वयः।संबोधनान्तम्। अत्रसंबोधनपदंयत्तत्क्रियायाविशेषणमितिहर्युक्तिः प्रमाणम्।कृत्वोर्थी क्रियाजन्मगणनेतद्विधानात्।कारकम्।कर्त्रादिषट्कम्।क्रियाजनकस्यैवकारकाधिकारेणकर्त्रादिसञ्ज्ञाविधानात्।प्रथमोवतिः।तेनतुल्यंक्रियाचेदितिविहितः।असमस्तनञ्।प्रसज्यप्रतिषेधार्थकइतिशेषः।अतएवप्रसज्यप्रतिषेधेऽसमर्थसमासइतितत्रतत्रभाष्यकृत्।एतत्।असमस्तनञः क्रियान्वयित्वम्।वचनपुरुषव्यवस्थेति।घटाभावोमद्भावइत्यर्थैकवचनप्रथमपुरु

यतः।संबोधनान्तंकृत्वोर्थाः कारकंप्रथमोवतिः।धातुसंबन्धाधिकारनिष्पन्नमसमस्तनञ्।१।तपायस्यवभावेनषष्ठीचेत्युदितंद्वयम्।साधुत्वमप्येकस्यास्यक्रियये वान्वयार्थताम्।२।युक्तंचैतत्।त्वंपचसि।युवांपचथ। इत्यादौनञ्समभिव्याहारेक्रियायाएवनिषेधप्रतीतेरनुभवसिद्धत्वात्।भवतिप्रयोगेऽपितथैवन्याय्यत्वात्।घटोनास्ति।पटौनस्तः।अहंतत्रनास्मीत्यादौवचनपुरुषव्यवस्थादर्शनाच्च।अन्यथार्थाभावेऽव्ययीभावस्यदुर्वारत्वाच्च।यत्तुभूतलाधेयत्वाभाववान्घटइत्यर्थवर्णनं।तन्न।क्रियानन्वयेकारकविभक्तेर्दुर्लभत्वात्।तस्मात्कारकविशिष्टक्रियायांनञर्थेऽन्वयःशाब्दइत्येवतत्त्वम्।भाष्यवार्तिकेत्युपलक्षणम्।सांप्रदायिकरीत्यापूर्वपदार्थप्राधान्येऽव्ययीभावः।उत्तरपदार्थप्राधान्येतत्पुरुषइतिविषयविवेकस्यसुलभत्वात्।यत्तुवदन्ति।यदाऽभावसामान्येनञ्वर्ततेतदाऽव्ययीभावः।अभावविशेषविवक्षायांतत्पुरुषएव।तत्रापिनञर्थत्वाभावेनपूर्वपदार्थप्राधान्यासंभवादिति।तन्न।पापाभावोऽपापमितित्वोक्ततत्पुरुषोदाहरणेऽपिअभावत्वेनैवाभावभानेनाव्ययीभावस्यदुर्वारत्वात्।यदपिविशेषस्यनञर्थत्वंनास्तीति।तदपिन।निर्विशेषस्यसामान्यस्याभावात्।विशेषणरूपेणवाच्यत्वंनास्तीतिचेत् ॥

षयोरेवापत्तिरितिभावः।अन्यथा।घटाभावबोधे।वचनपुरुषव्यवस्थावदिदमपिदूषणमित्यर्थः।कारकविशिष्टक्रियायामिति।भूतलेघटोनास्तीत्यादौभूतलाधिकरणकघटकर्तृकसत्ताभावइतिबोधइतिभावः।पूर्वपदार्थप्राधान्यइति।असंहितमित्यस्यसंहिताभावइत्यर्थात्।असंदेहाइत्यत्रारोपितसंदेहोनिश्चयइत्यर्थः।इतिबोधेतदभावप्रतीतिरार्थभेदेनधर्मिणआरोपात्।एवमनुपलब्धिपदेपिबोध्यम्।न्यायसिद्धेएवंचलिङ्गदर्शनंमूलोक्तमितितत्त्वम्।अभावसामान्यइति।अत्यन्ताभावत्वादिनाबोधाविषयोभावत्वे नै[illegible]विषयस्यसामान्यमित्यभिमानस्तेषाम्।अव्ययीभावइति।तत्रात्यन्ताभावत्वेनैवबोधादितिभावः।नशब्देनेतीति।निषेधार्थनाशब्देनेत्यपिबोध्यम् ॥

इत्येवेति। अत्र नञा नशब्देन चैकशब्दस्य समासस्ततो धा। प्रकारेनेकसंख्यात्वप्रतीतेः। एकप्रकारेणानञर्थान्वयाननुभवाच्च। एवमेव नैकरूपो बृहद्भानुरिति विष्णुसहस्रनामप
द्येऽनेकरूप इत्यर्थे नैकशब्देन रूपशब्दस्य बहुव्रीहिर्बोध्यः। गतिसंज्ञाविकल्प इति। तत्फलं समासविकल्पः। कथमिति। गतित्वे ते प्राग्धातोरिति धातोः प्रागेव प्रयोगः स्यादिति
तर्हि अविघ्नमित्यादिरव्ययीभावो दत्तजलाञ्जलिरेव स्यादिति न किंचिदेतत्। नञो नलोप इति। तिङन्तेन समासाभावादप्राप्तेर्वचनम्। अपचसीति। कुत्सितं पचसीत्यर्थः।
नशब्देनेति। नञा समासे त्वनेकधेत्येव भवतीति भावः। ऊर्यादिच्विडाचश्च। च्विडाचौ कृभ्वस्तियोगे विहितौ ऊर्यादयोऽपि स्वभावात् तत्रैव प्रयुज्यन्ते। तत्रापि आविः प्रादुःश
ब्दौ मुक्त्वाऽन्येषां कृञेति नैव योग इति माधवादिग्रन्थे स्थितम्। तथैवोदाहरति। ऊरीकृत्येति। आविः शब्दस्य तु साक्षात्प्रभृतिषु पाठात् कृञो योगे गतिसंज्ञाविकल्पः। भ्व
स्तियोगे तु अनेन नित्यमिति विशेषः। कथं तर्हि वारुणीमदविशङ्कमथा विश्वसुषोऽभवदसाविवराग इति माघः। अभवद्युगपद्विलोलजिह्वायुगलीढोभयसृक्कभा
वमाविरिति च। निरङ्कुशाः कवय इति हरदत्तः। वस्तुतस्तु ते प्राग्धातोरिति सूत्रस्य प्रयोगनियमार्थत्वे प्रकृतेऽनुपपत्तावपि संज्ञानियमार्थत्वपक्षे दोषलेशोऽपि ना
स्तीति प्रपञ्चितं शब्दकौस्तुभे। एतेन पुरो रामस्य जुहवांचकार ज्वलने वपुरिति भट्टिर्व्याख्यातः। हतं परिगृह्येति। हत्वागमनं हि प्राह तं त्यक्त्वा परिरं त्यजेति। आ
द्यमुदाहरणं द्वितीयं प्रत्युदाहरणम्। अपरिग्रहे इति च प्रयोगोपाधिर्न तु वाच्यकोटिनिविष्टमिति भावः। कणेहत्येति। अतिशयेनाभिलष्य तन्निवृत्तिपर्यन्तं पि
बतीत्यर्थः। ततश्च श्रद्धाया अवागमात् तत्प्रतिघातो गम्यते। प्रत्युदाहरणं तु कणे हत्वा गतः। सूक्ष्मस्तण्डुलावयवः कणस्तस्मिन् हत्वेत्यर्थः। पुरस्कृत्येति। नमस्पु
रसोरिति सत्वम्। कथं तर्हि अमुं पुरः पश्यसि देवदारुमिति। स्थितमित्यध्याहारेण दृशिं प्रत्यगतित्वात् ॥
भावः। प्रयोगनियमेति। गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्या इति तस्यार्थः। संज्ञानियमेति। धातोः प्राक्प्रयुक्तानामेव गत्यादिसंज्ञा नान्येषामिति तदर्थः। अयमेव पक्षो युक्त
लाघवादिति भाष्ये स्पष्टम्। प्रयोगोपाधिरिति। ल्यबन्तप्रयोगयोग्यत्वं पश्चान्मानसबोधविषयमित्यर्थः। श्रद्धा। अभिलाषातिशयः ॥

एतेनेति। पुर इति कौतुके इत्यनेनान्वेति। तस्य च न क्रियावाचकत्वम्। तस्येत्यस्य सप्तमी पद् इति शेष इति भावः। सञ्ज्ञानियमपक्षे तु षाङ्के वनेति भावः। माधव इति। विभाषेति सूत्रे ऽन्तर्धाविस्यस्य निवृत्त्यापि तत्सिद्धिरित्यन्वय इहेति। तेन निवचने कृत्वेति सिद्धम्। गतार्थे वृत्तिमिति। प्रशब्दादेरिति भावः। नित्यसमासत्वादिति। तेनान्तोदात्तादुत्तरपदादनित्य

एतेन तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोरिति व्याख्यातम्। अस्तं च। अव्ययमिति किम्। अस्तं काण्डं प्रक्षिप्तमित्यर्थः। अदः कृत्येति। यदा स्वयमेव पर्यालोचयति तदेदमुदाहरणम्। तिरोन्तर्द्धौ। अन्तर्द्धौ किम्। तिरो भूत्वा स्थितः। पार्श्वतो भूत्वेत्यर्थः। विभाषा कृञि। तिरः कृत्वेति। गतित्वाभावपक्षे सत्वमपि न। तिरसोऽन्यतरस्यामिति सत्वविधौ गतिग्रहणानुवृत्तेः। केचित्तु पराभवे तिरस्कारशब्दप्रयोगमनुरुन्धानाः सत्वविधौ गतिग्रहणं निवर्तयन्तीति माधवः। वाचंनियम्येति। निवचने हि वचनाभावः। अर्थाभावेऽव्ययीभावः। इहाविशेषेण एदन्तता निपात्यते न तु सञ्ज्ञासंनियोगेन। प्रगत आचार्य इति। अनेन गतार्थे वृत्तिमस्वपदविग्रहे पानित्यसमासतां च दर्शयति। अतिमाल इति। एवमभिगतो मुखमभिमुखः। उद्गतो वेलामुद्वेलः। प्रतिगतोऽक्षं प्रत्यक्षः। उपपदमतिङ्। अतिङिति नोपपदस्य विशेषणं किंतु समासस्य। एतच्च अनवक्लृप्त्यमर्षयोरिति सूत्रे भाष्ये एव स्पष्टम्। तत्र हि किंवृत्तस्यानधिकारादकिंवृत्तग्रहणानर्थक्यमित्युक्त्वा उपपदसञ्ज्ञार्थं तर्हीत्याशङ्क्यातिङिति समासप्रतिषेधात्सञ्ज्ञानर्थक्यमिति सिद्धान्तितम्। तदेतदभिप्रेत्याह। अतिङन्तश्चेति। ननु सुपेत्यधिकारात्तिङन्तेन न भविष्यति तत्राह। अतिङ्ग्रहणमिति। पूर्वसूत्र इति। कुप्रादयः। सुबन्ताः सुबन्तेन समस्यन्ते। ततः गतिः। गतिः सुबन्तोऽतिङन्तेन समस्यत इति व्याख्येयमित्यर्थः। तथा चेति। यद्यप्युक्तरीत्या गत्युपपदयोरेव लाभस्तथापि नित्यविषयिणी प्राचां परिभाषा एकदेशानुमतिद्वारा इहापि ज्ञाप्यत इति भावः ॥

(६) समासे इत्यनेनानित्यसमासे यदुत्तरपदं सावेकाजन्तोदात्तं ततः परा तृतीयादिर्विभक्तिरुदात्ते र्थकेन न विभक्त्युदात्तत्वम्। एतेन शाकपार्थिवादित्वादिदं सिद्धमित्यपास्तमिति भावः। ज्ञाप्यत इति। अतिङ्ग्रहणकरणेन तदर्थस्य स्वेष्टत्वं बोध्यत इत्यर्थः ॥

उ[illegible]यसाधकमिति। सुबुत्पत्तेः पूर्वंसमासोबहुलग्रहणादितिभावः।सुबुत्पत्तेरित्युपलक्षणम्।स्त्रीप्रत्ययोत्पत्तेः प्रागित्यपिबोध्यम्।अनुवर्त्ततइति।उपरञ्जकतयाचपसंभवा
द्विरोधाभावाच्चेतिभावः।उपपदमितिमहासञ्ज्ञयासुबन्तस्यैवोपपदत्वात्।अतएवेति।सुबुत्पत्त्यनन्तरमेवतेनसमासादेवेत्यर्थः।व्याङोरिति।व्याङोर्मध्ये विशब्दस्यघ्रशब्देनतद्
न्तेनघ्रशब्देनगतिसमासइत्यर्थः।आङातूपपदसमासएव।आतश्चोपसर्गइतिसप्तमीनिर्देशात्।उपसर्गत्वपर्याप्त्यधिकरणस्यैकस्यैवोपपदत्वादितिकश्चित्।तन्न।गतिसमासेनसि

यद्वाकारकांशेकर्तृकरणेकृतेतिसूत्रस्थंबहुलग्रहणमुक्तार्थेसाधकंबोध्यम्। प्रागिति।कृदन्तादुत्तरपदात्सुबुत्पत्तेः प्रागित्यर्थः।प्रथमान्तंसुब्ग्रहणमिहानु
वर्त्ततएव।अतएवराजदर्शीत्यादौपूर्वपदेनलोपादिपदकार्यंसिद्ध्यति। परिभाषायाः फलंदर्शयन्गतिमुदाहरति।व्याघ्रीति।व्याजिघ्रतीतिव्याघ्री।आतश्चोप
सर्गइतिकः।पाघ्राध्मेतिशप्रत्ययस्तुसञ्ज्ञायांनेतिवक्ष्यते।व्याङोर्घ्रशब्देनगतिसमासः सयदिघ्रशब्दस्यसुबन्ततामपेक्षेततर्हिसुबुत्पत्तयेसंख्याद्यपेक्षणात
तः प्रागेवलिङ्गयोगः लिङ्गनिमित्तश्चप्रत्ययष्टाबेवस्यान्नतुङीष्।घ्रशब्दमात्रस्यजातिवाचित्वाभावात्।ततोघ्राशब्देनसमासेसतिअदन्तत्वाभावाज्जातिलक्ष
णोङीष्नस्यादितिभावः।उपपदमुदाहरति।कच्छपीति।कच्छेनपिबतीतिकच्छपी।व्याघ्रीवत्सुपीतियोगविभागात्कः।यत्तुप्राचाउपपदमतिङन्तमि
तिव्याख्यातंतन्न।तथासतिप्रथमान्तसुब्ग्रहणनिवृत्त्याबहुविप्लवापत्तेः।तथाहि।निर्गतइत्यत्रनिसोरुत्वंसंयतेत्यत्रमोनुस्वारः राजदर्शीत्यादौनलोपश्च
नस्यात् ॥

৺ ङ्त्वात्तत्रोपपदसञ्ज्ञाया एवफलाभावेनाभावात्।अतएवकर्मण्यणितिसूत्रेनुपपदत्वेनायंव्यवहृतोभाष्ये।व्याङोश्चक्रमेणघ्रशब्देनतदन्तेनचगतिस
मासद्वयस्येत्यर्थः।कच्छेनेति।अधिकरणस्यकरणत्वविवक्षयातृतीया।नचकारकत्वात्सिद्धम्।कारकत्वेप्युपपदत्वाहान्यापरत्वादुपपदसमासस्यैवप्रवृत्तेः।उपपदमितिमहास
ञ्ज्ञामाश्रित्यप्रथमान्तस्यनिवृत्तिरुच्यते उततदनाश्रित्य।नाद्यः।तदाश्रयणेऽत्रतन्निवृत्त्याग्रेमण्डूकानुवृत्त्याश्रयणेगौरवात्।नान्त्यइत्याह।तथासतीत्यादि ॥

प्राटितेति। गतिरिति सूत्रेपि तदसंबन्धेऽयं दोषः। एवं निर्गतः संपन्नेरिति च। प्रत्युक्तमिति। सुबित्येतत्संबन्धेनैव तद्व्यावृत्तावतिङ्पदस्य वैयर्थ्यापत्तेरित्यभिमानः। शेषीकृतेनेति। भाष्यकृतेति शेषः। कथमिति। संहितायानित्यत्वादिति भावः। दिगिति। दिगर्थस्तु यदि सुबित्यनुवृत्त्यैव एधानाहरको व्रजतीत्यस्य व्यावृत्तिः सिद्धा वतिङ्ग्रहणमेवोभयोर्निवृत्तौ ज्ञापकम्। महासंज्ञाकरणाच्च राजदर्शीत्यादौ न दोषः। सुप्यजातावितिणिनेः सुबुत्पत्तिं विनाऽसंभवेन तं विनोपपदत्वाभावेन दोषाच्च। निर्गतदृत्यादौ शब्दान्तरसंबन्धात् पूर्वं सुबुत्पत्तौ लुकि च पदत्वोत्तरं पदान्तरसंबन्धेन समासे न क्षतिः। माङि लुङि त्यादौ सतिसप्तमीति नोपपदत्वम्। फलाभावाच्च। प्रथमार्थे सौत्री

प्राटिते त्यादौ अतो गुण इति पररूपं च स्यात्। एतेनातिङिम्। एधानाहरको व्रजतीति प्रत्युदाहरणमपि प्रत्युक्तम्। यदपि कुगतीति सूत्रे उक्तम्। अत्र सुप्सुपेत्यननुवृत्तेस्तिङापि समासः दुरीकरोतीत्यादि। तदप्यसत्। तत्र शेषीकृतेनातिङ्ग्रहणेनैव विरोधात्। तिङ्समासस्तु सहेति योगविभागबललभ्यश्छान्दसश्चेति प्रागेवोक्तम्। लोके तु प्रभवतीत्यादौ उपसर्गः पृथक् पदमेव। काव्यादिपाठिनामेकपद्यभ्रमे तु धातूपसर्गयोः संहितायानित्यत्वं मूलम्। कथं तर्हि अग्न आ याहीत्यादौ पदपाठे उपसर्गेऽवसानमिति चेत्। पदपाठस्यापि व्याख्याविशेषतया तत्रानुकरणशब्दत्वेनोपसर्गत्वाभावात्। प्रकृतिवदनुकरणमित्यतिदेशस्य वैकल्पिकत्वाद्यन्तदेतेभ्य इति सूत्रे स्वदाद्यत्वं कुर्वता एकशेषं चाकुर्वता सूत्रकृतैव तथाज्ञापितत्वादिति दिक्। अमैवाव्ययेना। तुल्यविधानमिति। एतच्चाद्याहारेण लभ्यम्। तदेवेति ॥

ॐ सप्तम्येव हि तन्निमित्तम्। अत एव पशावित्यादीनां नोपपदत्वम्। एधानाहरक इत्यादौ तु क्रियार्थोपपदस्येति कार्यार्थमुपपदसंज्ञावश्यकत्वेन तत्रास्य प्रवृत्तिव्यावृत्त्यर्थं तच्चरितार्थं ध्वनितं चेदं भाष्ये इत्युच्यते। तदा तु उभयोर्निवृत्तिः। अतिङन्तश्चेत्यस्य तिङन्तापटित इत्यर्थः। एवं चोपपदमतिङन्तमिति व्याचक्षाणस्यानवक्लृप्त्यमर्षयोरिति सूत्रस्य भाष्यविरोधो दूषणमिति ॥

नियमस्वभावेति।अमैवेतिनियमस्वभावलब्धेरर्थः।अमैवतुल्यविधानंयदुपपदंतदव्ययेनसमस्यते।अन्येनतुल्यविधानंनेतिवचनव्यक्तेरितिभावः।ननुसूत्रस्थ
इति।ननुसूत्रस्थएवावृत्त्याद्वेधायोज्यतइतिअमितव्यमितिभावः।तदेवेति।उपपदमित्यर्थः।अग्रेभोजमिति।विभाषाग्रेप्रथमेतिसूत्रेणक्त्वोपिविधानान्नास्यामैवतु
त्वविधानता।अग्रेभुक्त्वेत्यादावमन्तेनसमासाभावान्नतस्यनियमविषयतेतिभावः।उत्तरपदप्रकृतिस्वरइति।उत्तरपदाद्युदात्तत्वमित्यर्थस्तदाह।आदिर्णमुलीति।

नियमस्वभावलब्ध्यर्थकथनपरोयमेवकारोनतुसूत्रस्थः।अव्ययेनेतिकिम्।कुम्भकारः।असतिह्यव्ययग्रहणेऽमैवयत्तुल्यविधानंतदेवसमस्येत।पूर्वसू
त्रारभ्यसामर्थ्यादम्यविषयकएवनियमंइतिचेत्।तर्हिअमन्तविषयकएवकिंनस्यात्।अमन्तेनयः समासः सोऽमैवतुल्यविधानस्येति।तथाचअग्रेभोज
मित्यत्रमाभूत्।अग्रेभुक्त्वाकालोभोक्तुमित्यत्रतुस्यादेवेतिभावः।तृतीयाप्रभृतीन्यन्यतरस्याम्।उभयत्रविभाषेयम्।अमैवतुल्यविधानस्यप्राप्तेयथाउपदं
शस्तृतीयायामिति।यत्तुअमाचान्येनतुल्यविधानंतस्याप्राप्तेयथाअव्ययेयथाभिप्रेताख्यानइति।उच्चैःकारमाचष्टे।इहसमासपक्षेकृदुत्तरपदप्रकृतिस्वरआदि
र्णमुल्यन्यतरस्यामित्याद्युदात्तत्वम्।असमासेतुउच्चैरित्यन्तोदात्तत्वम्।स्वरादिषुतथापाठात्।अमेत्यनुवृत्तिमभिप्रेत्याह।अमन्तेनेति।तेनेहन।पर्याप्तोभो
कुम्।तत्पुरुषस्याङ्गुलेः।समासान्तापेक्षयाऽवयवषष्ठी।द्व्यङ्गुलमिति।द्विगोर्नित्यमितिद्वयसचोलुक्।द्वन्द्वार्थमिति।तत्पुरुषस्यासंभवादितिभावः ॥

अत्राभ्यस्तानामितिनानुवर्ततइतिमतइदम्।यद्यपिलित्स्वरणमुल्स्वरयोरत्राविशेषः।आदिर्णमुलीतित्वनेकाजर्थंतथापिअभ्यस्तानामित्यनुवृत्त्यभावपक्षेपरत्वादिदंन्याय्यमित्य
भिमानः।लितीत्यनेनापीदंसुसाधम्।अन्तोदात्तमिति।फिट्स्वरेणेतिभावस्तदाह।स्वरादिष्विति।त्रैस्वर्येणपाठपक्षेइतिभावः।समासान्तापेक्षयेति।तत्पुरुषस्यसमासस्यान्तावयवइ
त्यर्थः।समासान्ताइतिसूत्रेसमासेतिलुप्तषष्ठीकंबोध्यम्।द्वयसचइतिऊर्ध्वमानत्वेइदम्।प्रमाणत्वेतुमात्रचोलुगितिबोध्यम् ॥

नन्वेवं प्रकरणविरोधोऽत आह। हेमन्तेति। चो हेतौ। यतो द्वन्द्वे दर्शनमतो गौणग्रहणायोग इत्यर्थः। स्पष्टं च द्वन्द्वार्थत्वं भाष्यकृतोक्तम्। एकवद्भावादिति। समाहारद्वन्द्वत्वादित्यर्थः। आकरेति। पुल्लिङ्गस्यैवात्रोदाहरणादित्यर्थः। रात्राह्नाहा इति पुंस्त्वे प्राप्ते आह। संख्यापूर्वमिति। स्पष्टार्थ इति। विपरीतनियमस्य स्पष्टं वारणमपि तु द्वन्द्वेन यत्नक्लेशेन तद्वारणमाह। अह्न एवेति विलिङ्गादिति। अह्न एवेति नियमे तद्वैयर्थ्यं स्पष्टमेव। नियमफलत्वाद्धिकमिति। अह्ना निर्वृत्तमित्यर्थे कालादित्यनुवृत्तौ तेन निर्वृत्तमिति ठञ्। असंभवादिति। यद्य

न त्वहश्चासौ रात्रिश्चेति कर्मधारयोऽस्तु। पूर्वोत्तरपदयोरन्यतरस्य गौणत्वसंभवादिति चेत्। न। मुख्यसंभवे गौणग्रहणायोगात्। हेमन्तशिशिरावहोरात्रे च च्छन्दसीति सूत्रे द्वन्द्वे समासान्तदर्शनाच्च। अहोरात्र इति। जातिरप्राणिनामिति समाहारद्वन्द्वः। रात्राह्नाहा इति पुंस्त्वम्। यत्तु प्राचोक्तमेकवद्भावात्क्लीबतेति। तन्न। स नपुंसकमित्यस्य रात्राह्नाहा इति पुंस्त्वेन परत्वात् बाध इति वक्ष्यमाणत्वात्। आकरविरोधाच्च। द्विरात्रमिति। संख्यापूर्वं रात्रं क्लीबमिति वक्ष्यते। अह्नष्टखोरेव। न तु तद्धित इत्येतस्मिन्निति नियमार्थमिदम्। एवकारः स्पष्टार्थः। अह्न एव टखयोरिति विपरीतनियमस्तु न भविष्यति। आत्माध्वानौ ख इति प्रकृतिभावविधानाल्लिङ्गात्। अनित्यत्वादिति। अत्र चलिङ्गम्। शक्तिलाङ्गलाङ्कुशेत्यत्र घटीग्रहणम्। अह्नोऽह्न एतेभ्यः। अहः सर्वेति सूत्रे अहरादयो निर्दिष्टाः। चकारेण संख्याव्ययेऽनुकृते। तत्र सर्वेषां बुद्धिस्थत्वाद्विशेषैः पि अहःशब्दग्रहणं गृह्यते संभवादित्याशयेनाह। सर्वादिभ्य इति। समासान्ते पर इति। प्रकरणबललभ्यमेतत्। प्राचा तु टचि परत इति व्याख्यातं तत्तु तात्पर्यलभ्यमिति कथंचिन्नेयम्॥

अपि ब्रह्मणोऽह्न इदमवयवीभूतमहरित्यर्थे षष्ठीसमासः संभवति तथाप्यत्र सूत्रेऽह्नः सर्वैकदेशसंख्यातपुण्याच्च रात्रेरित्यस्मादनुवृत्त्येनासिद्धे एतेभ्य इत्यनुवृत्त्या अस्यावहितानामहःशब्दभिन्नानामेव ग्रहणं स्यादिति प्रामाण्यादिति नोद्यम्। तस्यानभिधानाच्च। प्रकरणेति। तल्लभ्यस्य सप्तम्या विपरिणाम इति भावः। सामर्थ्येति। अहन्नताद्वान्तस्य रूपाट्टच एव विधानादिति भावः। कथंचिदिति। शब्दतोऽनुपस्थित्या वाक्यार्थान्वयित्वासंभव इति भावः॥

म॰श॰
१९५

यत्र्पह्नादेशऽप्यसौनङ्‌नत्समासान्तएव।एवंचविभक्तिविपरिणामेनकार्यइति।तन्न।टजपवादस्यापत्तावस्यदुद्दस्यादाद्वन्तोदात्तत्वानापत्तेः।टचितुतत्सामर्थ्याद्न्तोदात्त
त्वंतच्चेष्टमितिध्वनयन्नाह।भाष्येत्विति।अत्रप्राञ्चइति।अदन्तस्येतिवक्तव्यमित्यस्यप्रकृतसूत्रस्थवार्त्तिकस्यप्रत्याख्यानायभाष्यकृतइत्यर्थः।दीर्घाह्नीति।बह्वादिषुअ

भाष्येतुअन्हादेशःप्रत्याख्यातः।अह्नएतेभ्योच् स्यात्टचोपवादः।अह्नष्टखोरेवेतिनियमाद्टिलोपोन।अह्नोपोऽनइतित्वस्यादनात्।अह्नोऽदन्तात्रेफादि
ति।यदिलक्षाह्नइत्यपिप्रयोगोऽस्तितर्हिणादित्यपिबोध्यम्।रषाभ्यामित्यधिकारात्।अत्रप्राञ्चः।अह्नइतिषष्ठ्याःस्थानेव्यत्ययेनप्रथमा।अदन्तनिर्देशान्नेह।
दीर्घाह्नीप्रावृडितिवदन्ति।तत्रव्यत्ययादिकल्पनक्लेशोव्यर्थः।दीर्घाह्नीत्यत्रप्रातिपदिकान्तेतिणत्वंव्यावर्त्तयितुंसुभ्वादित्वस्यैववक्तव्यत्वादाकरएवतथोक्तत्वाच्चे
त्याशयेनाह । अह्नोनस्येति।प्राचस्तुअह्नोनस्येत्युक्त्वाअदन्तनिर्देशादितिवदतोव्याघातःस्पष्टएव।कालाट्ठञिति।एतच्चसंख्याविसायेतिसूत्रेन्यासपदमञ्जर्योः
ओहाङ्‌धातौमाधवग्रन्थेचस्पष्टम्।यत्तुनसंख्यादेःसमाहारइतिसूत्रेद्व्यन्हेइत्यत्राणोलुगितिवृत्तिकारादिभिरुक्तंतदप्ययुक्तमितिभावः।प्रसङ्गादाह।स्त्रिया
मिति।दाविति।यत्तुप्राचाकालनिर्णयदीपिकायांपूर्वास्यान्नवमीयुग्माथदशमीकालासङ्गाद्याथसाल्पह्नीकालयुगादिमेत्तरयुताचाथोत्तरैकादशीतिश्लोकेद्व्य
ह्नीतिप्रयुक्तम्।सादशमीद्वयोरह्नोर्भवाद्व्यह्नीत्यादिचतद्विवरणेव्याख्यातम्।तत्सर्वंप्रामादिकमितिभावः।तथाहि।इहटिड्ढेतिङीप्द्विगोरितिवा।आद्योऽपि
अणन्तत्वादञन्तत्वाट्ठञन्तत्वाद्वा।नाद्यः।वृत्तिकाराद्युक्तत्वस्याऽणइहप्रामादिकत्वाल्लुकालुप्तत्वाच्च।नचप्रत्ययलक्षणम्।अणोयोऽकारइतिव्याख्यानात्।नापिद्वितीयः।ठ
ञोयोऽकारस्तदन्तादितिव्याख्यानात् ॥ ऊँ ह्नम्इतिपाठादुपसर्जनत्वेपिङीप्।अयुक्तमिति।कालाट्ठञस्तदपवादत्वादितिभावः।प्रामादिकत्वादिति।तदपवादस्यठञःप्रा
प्तेरितिभावः।लुकेति।स्वरूपकथनमेतत्।अणयोऽकारइति।एवंचवर्णप्राधान्यान्नप्रत्ययलक्षणमितिभावः ॥

रा॰म॰
१९५

ठञोलुकीति। निष्कादिभ्यः समासे ठकोऽप्राप्तेरिति भावः। निष्कस्य परिमाणत्वे इदम्। उरोभूषणादिवाचित्वे ऽसमासे इति सूत्रे परिमाणवाचिनिष्कादीनामेव ग्रहणे तु ठको लुकीति बोध्यम्। न च द्विनिष्केत्यत्र निष्कस्य परिमाणत्वेऽपि द्विनिष्कीति ङीपैव भवितव्यम्। उन्मानत्वेऽपि उन्मानस्य चेद्बिस्तकम्बल्ययोरेव निषेध इति नियमेन ङीबेव प्राप्तेरिति। एवं च द्विबिस्तेत्यत्र बिस्तादिप्रतिषेधेन ङीबभावो न तु ठञो कारणाभावादिति वाच्यम्। निष्कशब्द उन्मानवाची विस्तादयः परिमाणविशेषा एवेति मतमनुसृत्य हरदत्तादिभिराकरे तथोक्तेरित्याशयात्। तदाह अपरिमाणान्तत्वाद्द्विगोरिति ङीपि निषिद्धेपि ठञन्तत्वात्स्यादुक्तरीत्यैव वारणात्। एतेन द्विबिस्तेत्यपि व्याख्यातम्। न चैवमपरिमाणेति निषेधो व्यर्थः स्या-

अत एव हि द्विनिष्केत्यत्र क्रीतार्थे प्राग्वतीयस्य ठञो लुकि टाबेवाकरे उदाहृतः। द्विबिस्तेत्यादावप्येवम्। नापि तृतीयः। टचः समासान्तत्वात् तदन्तस्य तद्धितार्थत्वं वस्तुपसर्जनत्वात् तत एव हि आपिशलिना प्रोक्तमधीयाना ब्राह्मणी आपिशलेत्युदाहृतम्। भाष्यमते अचा टचो बाधनाच्च। नापि चतुर्थः। अपरिमाणेत्यादिना ङीपो निषेधात्। तस्माट्टाबेव युक्तः। स्यादेतत्। टाबयुक्तः स्त्रीत्वस्यैव दुर्लभत्वात्। तथा चाह्नोऽह्न एतेभ्य इति सूत्रे कैयटहरदत्तावाहतुः रात्राह्नाहाः पुंसीति वचनात् स्त्रियां वृत्त्यभावात् ठजचोर्नास्तीह विशेष इति। मैवम्। भावानवबोधात्। इत्थं हि कैयटाद्याशयः सर्वादिपदपूर्वादह्नएजपवादो ज्विहितः ॥ न तत्सामर्थ्येन तदभावकल्पनापेक्षया न्यायसिद्धोक्तरीत्यैव तद्वारणस्योचितत्वात्। तेनापि तदर्थबोधस्यैवौचित्यात्॥ तदन्तस्येति। तदन्तार्थस्येत्यर्थः। उदाहृतमिति। अनुपसर्जनादिति सूत्रे वार्तिककारैरिति शेषः। चतुर्थः। द्विगोरिति ङीबिस्त्येवंरूपः। ननु बह्वादिगणेऽहन्शब्दपाठाद्दीर्घाह्नीत्यादावुपसर्जने ङीप् विवात्रापि स्यादिति चेन्न। समासान्ते कृतेऽहन्शब्दत्वाभावात्। तस्माट्टाबेवेति। अस्य स्त्रीत्वमङ्गीकुर्वतां मते इति शेषः। अतस्तन्मतमाशङ्कापूर्वकमुपपादयति। स्यादेतदित्यादिना ॥

म॰ भ॰
१६६

स्त्रीत्वसंभवेपीति। रात्राह्नाहा इत्यस्य रात्रान्हशब्दघटितसमाससमानार्थनिमित्तलिङ्गस्यान्तरङ्गस्य सार्वत्रिकस्य च बाधेनोपपत्तौ बहिर्भूततद्धितार्थनिमित्तलिङ्गबाधकत्वे माना
भाव इति भावः। पुण्याहमित्यत्र उत्तमैकाभ्यां चेत्यन्हादेशनिषेधात् पुण्यसुदिनाभ्यामह्नः क्लीबत्वस्य सत्त्वाच्चेत्याशयेनाह। चतुर्णामिति। परत्वादिति। अन्हाहान्ता इत्यपेक्ष
तत्र संख्यापूर्वस्य तद्धितार्थद्विगोर्विशेष्यनिघ्नत्वेन स्त्रीत्वसंभवेपि टजन्तस्य तद्धितं प्रत्युपसर्जनत्वात्। अनुपसर्जनाधिकारोक्तस्य टिड्ढेति ङीपः प्राप्तिरेव नास्तीति
तत्र टजचोर विशेषः स्पष्ट एव। पुण्याहमित्यत्र तु उत्तमैकाभ्यां चेत्यचो निषेधः। अह्नादेशस्य वेति मतभेदेन व्यवस्थितम्। इतरेषां चतुर्णां रात्राह्नाहा इति वचनात् स्त्रियां वृ
त्तिर्नास्तीति। स्यादेतत्। भवेदेष वृद्धानामाशयः। यद्युक्तं द्विगोर्विशेष्यनिघ्नत्वे प्रमाणं स्यात्। तदेव किमिति चेत् ।। उच्यते। अमरसिंहेन पुंस्त्वे सभेदानुचराः सपर्यायाः
सुरासुरा इति पुंस्त्वाधिकारे। अह्नाहान्ताः स्वेडुभेदा रात्रान्ताः प्राक्संख्यकाद् इत्युक्तम्। अर्धान्ताः प्राद्यलंप्राप्ताः पन्नपूर्वाः परोपगाः। तद्धितार्थे द्विगुः संख्याः सर्वनामतदन्त
का इति च, ततः परमुक्तम्। एवं चेह अह्नाहान्ता इत्यनेन पुंस्त्वं प्राप्तं तद्धितार्थे द्विगुरिति परोपगत्वेन परत्वादेव बाध्यते। तथा च तेनैव परिभाषितम्। परं विरोधे शेषं तु
ज्ञेयं शिष्टप्रयोगत इति। तस्मादमरग्रन्थः उक्तार्थे प्रमाणम्। किंच परवल्लिङ्गमित्यस्य रात्राह्नाहा इत्यपवादः। यत्र तु द्विगुप्राप्तेत्यादिनोत्तरगामि विधिः। तत्र तदपवाद
स्याप्रवृत्तिः स्पष्टैव। एतच्च माधवेनापि ध्वनितमित्यनुपदमेव वक्ष्यामः। किंच भवाद्यर्थतद्धितान्तं परोपगमिति निर्विवादम्। तद्धितलोपे तु यः शिष्यते स लुप्यमानार्थो
भिधायीति न्यायेन भवाद्यर्थवत् स्त्रीत्वादेरप्यभिधानं न्याय्यमेव। प्रकृतेर्लिङ्गानुशासनस्य केवलायां प्रकृतावुपक्षीणस्य लुप्ततद्धितायामप्रवृत्तेः। लुपि युक्तवदिति लि
ङ्गातिदेशोप्यत्र प्रमाणम्। प्रकृतलिङ्गानुशासनानां लुप्तप्रत्ययेष्वप्रवृत्तौ तदैव्यर्थापत्तेः। अत एव लवणः सूपः लवणा यवागूः इत्यादौ न क्लीबत्वम्। अत एव च कुमारी ब्रा
ह्मण इत्यादिषु आचारक्विबन्तप्रकृतिककर्तृक्विबन्तेष्वपि विशेष्यनिघ्नतैवाकरे स्पष्टा ॥
यात तद्धितार्थे द्विगुरित्यस्य परत्वादिति भावस्तदाह। तथा चेति। केवलायां प्रकृतौ। सर्वाह्ण इत्यादौ ॥

रा॰ म॰
१६६

अलं बहुनेति। एतेन स्त्रीत्वमेव नास्तीति सूचितम्। तथा हि। रात्रान्हाहा इत्यनेन बहिर्भूततद्धितार्थनिमित्तलिङ्गबाधकल्पने उपस्थितरात्रान्हाहशब्दार्थविशेष्यत्वप्रयुक्तप्राप्तिकलिङ्गस्यैव बाधः स्यान्न तु बहिर्भूतसमाहारविशेषणत्वप्रयुक्तप्राप्तिकस्यापि अतो ऽन्तरङ्गन्यायाप्राप्तिः। किं च प्राद्यत्वमित्यादिवाक्यस्यापि कोशे परत्वात्तेनाप्यन्हादिविषये पुंस्त्वबाधापत्तौ परवल्लिङ्गमिति सूत्रे एकदेशिग्रहणं कृत्वा भाष्यकृता कृतस्य द्विगुप्राप्तेति वार्त्तिकप्रत्याख्यानस्यासंगत्यापत्तिः। न च रात्रान्हेत्यादिबाधार्थं तस्यावश्यकत्वात्। न चेदमप्येकदेशिसमासविषयकमेव। अत्रत्याहर्ग्रहणस्य पुण्यसुदिनाभ्यामित्यादेश्च वैयर्थ्यापत्तेः। अतिरात्रः सर्वाह्न इत्याद्यसिद्ध्यापत्तेश्च

द्व्यह्नीति ङीपं च दत्ता प्राचा ऽपि स्त्रीत्वं स्वीकृतमेवेत्यलं बहुना। यदि समर्थनीयमेवेत्याग्रहस्तर्हि आधाराधेयभावव्यत्यासेन समर्थ्यताम्। द्वे अहनी यस्यामिति दिनद्वयाधारभूते इत्यर्थलाभात्। उपान्त्यस्यापीति। यथा प्रथमयोरिति प्रथमाद्वितीययोर्ग्रहणं द्विवचननिर्देशात्। तथेहापि उत्तमग्रहणसामर्थ्याद् अन्त्ययोर्ग्रहणम्। उत्तमो ऽन्त्य एकश्चेति विग्रहे सौत्रं द्विवचनमिति तेषामाशयः। खार्याः प्राचाम्। द्विगोरिति। खारीशब्दान्तात् द्विगोरित्यर्थः। द्व्यञ्जलमिति समाहारे द्विगुः। आन्महतः। पदाधिकारे तदन्तस्यापि ग्रहणान्महच्छब्दान्तस्यापि ॥

। एवं चोत्सर्गस्य परवल्लिङ्गस्य द्विगुरित्यादिनिषेधे तद्विषये तदपवादस्याप्यप्रवृत्तिरिति निरस्तम्। अहरतिक्रान्ता रात्रिरित्यर्थे समासस्य स्त्रीलिङ्गत्वात्तत्र टजचोर्ङीप्टाब्भ्यां विशेषसत्त्वेन नास्ति टजचोर्विशेष इति कैयटासंगतिश्च। तस्मात्प्राद्यत्वं प्राप्तेत्यादिस्तद्धितार्थे द्विगुरिति कोशश्चान्हाहान्ताद्यतिरिक्तविषय एव न्याय्य इति दिक्। द्वे अहनी यस्यामिति। बहुव्रीहौ रात्रान्हाहा इत्यस्याप्राप्तेरिति भावः। बह्वादिष्वहः शब्दपाठादुपसर्जनत्वेपि ङीष्। तदन्तस्यापीति। तेन परममहाबाहुः सिद्धः। अपाणिनीयत्वादिति। घासादिषु महत आत्वपुंवत्त्वयोर्वार्त्तिककृतोक्तेरिति भावः। आन्महत इत्यत्र लिङ्गविशिष्टपरिभाषाबलाद्याप्प्रातिपदिकादिति सूत्रे भाष्ये उक्तत्वेन पुंवद्भावात्परत्वादात्वमिति

अतिरभसादिति। आर्द्रप्रैषस्यैव तेन लुको विधानादिति भावः। द्वन्द्वेनेति। राजन्यबहुवचनद्वन्द्वे इत्यनुवर्तमाने संख्येत्यनेन पूर्वपदप्रकृतिस्वरस्य तत्राप्राप्तेरित्यर्थः। प्रक्रम
कथं तर्हि परममहत्परिमाणमिति। परममहतो द्रव्यस्य परिमाणमिति षष्ठीतत्पुरुष इति वृद्धाः। यत्तु वर्द्धमाने नोक्तम्। इष्टकेषीकामालानामित्यत्र तदन्तविध्युपसंख्यानसामर्थ्यादुत्तरपदाधिकारे तदन्तविधिर्नास्तीति। तद्भाष्यकैयटविरुद्धम्। तथाहि। पदाधिकारे प्रयोजनम्। इष्टकचितं पक्वेष्टकचितमित्यादि भाष्ये उदाहृतम्। कैयटेन च पदशब्देनोत्तरपदं गृह्यत इति व्याख्यातम्। एतदेवार्थतः काशिकायामुपनिबद्धम्। न तु इष्टकेषीकेत्यत्र स्वतन्त्रमुपसंख्यानमस्ति। महतीशब्दस्येति। यत्तु प्राचीनैः कंजातीयघासादौ ती शब्दस्यापि आत्वं वक्तव्यमिति। तत्र जातीये तावद्व्यर्थम्। पुंवत्कर्मधारयेति आन्महत इति च सूत्राभ्यामेव रूपसिद्धेः। ती शब्दस्यापि अपाणिनीयत्वादुपेक्ष्यम्। अष्टन इति। कपाले उत्तरपदे हविषि वाच्ये अष्टन आत्वं वक्तव्यमित्यर्थः। अष्टाकपाल इति। संस्कृतं भक्षा इत्यणोऽध्यर्द्धपूर्वेति लुगिति व्याचख्युः। तदतिरभसात्। द्विगोर्लुगनपत्य इति तु बोध्यम्। द्व्यधिकादिति। एतच्च भाष्यवार्तिकारूढमित्युक्तम्। यत्त्विह पूर्वपदप्रकृतिस्वरसिद्धये विस्पष्टादेराकृतिगणत्वं शरणीचक्रुस्तच्चिन्त्यम्। उपलभ्यमानस्य तादृशस्वरस्य द्वन्द्वेन निर्वाहात्। स्वरान्तरेऽपीष्टापत्तौ बाधकाभावादिति दिक्। एकादिः। अदुकि अकारोच्चारणसामर्थ्यात्पररूपं न। केचित्तु स्पष्टार्थमादुकं दीर्घादिमाहुः। रात्राह्नाहाः पुंसि। परत्वादिति। यत्तु प्राचा एकवद्भावात् क्लीबतेत्युक्त्वा अहोरात्रमित्युदाहृतं तन्नेत्यवोचाम। यत्तु वदन्ति। रात्रादीनामेवानेन पुंस्त्वं विधीयते तदन्तस्य तु परवल्लिङ्गमित्येव सिद्ध्यति। अत एव भिन्नविषयत्वान्न विप्रतिषेधशङ्का। एवं च समाहारे सनपुंसकमित्येव भवति परवल्लिङ्गापवादत्वादिति। तन्न। उक्तरीत्या द्व्यहत्र्यहादावपि क्लीबत्वं स्यात्। न चेष्टापत्तिः। प्राचा अपि द्व्यहस्त्र्यह इत्युदाहृतत्वादाकरविरोधाच्च। अमरोऽप्याह। ते तु त्रिंशदहोरात्र इति। मासेन स्यादहोरात्र इति च। तस्मात्तदन्तस्यैवायं पुंस्त्वविधिः। द्वन्द्वतत्पुरुषयोरिति प्रक्रमणादिति स्थितम्

णादिति। प्रक्रमादित्यर्थः। प्रकरणादिति यावत् ॥

प्रामादिकमेवेति। समाहारद्विगावित्यर्थः। संख्यापूर्वं रात्रमित्यस्य प्रतिप्रसवविधित्वलाघवानुरोधेन समाहारद्विगावेव प्रवृत्तेः। भविष्यति मर्यादेति सूत्रस्थे त्रिंशद्रात्रः पञ्चदशरात्र इति भाष्यप्रयोगे तु त्रिंशत् पञ्चदश वा रात्रयो यस्मिन्निति बहुव्रीहिरच् प्रत्यन्ववेति योगविभागात्समासान्तो बोध्यः। पृषोदरादित्वादकार इति कश्चि

संख्यापूर्वमिति। तथा च लिङ्गानुशासनसूत्रम्। अपथपुण्याहौ नपुंसकौ संख्यापूर्वा रात्रिरिति। अमरोऽप्याह। रात्रं प्राक् संख्ययाऽन्वितमिति। गणरात्रं निशाबह्व्य इति च। पुंस्त्वाधिकारे स एवाह। रात्रान्ताः प्रागसंख्यकादिति। एवं स्थिते द्विरात्रस्त्रिरात्र इति वृत्तिकारहरदत्तादिभिरुक्तं पुंस्त्वं प्रामादिकमेवेत्यवधेयम्। अर्द्धर्चाः पुंसि च। इह केषांचिदर्थभेदेन व्यवस्था। तथा च शाश्वतः। मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः। अर्द्धर्चादिगणे पाठात्तु नपुंसकयोर्मधुरिति। अमरस्तु माध्वीकं मधुनद्योरित्याह। पात्राद्यन्तस्य नेति। स्त्रीत्वमिति शेषः। सुदिनाहमिति। सुदिनशब्दः प्रशस्तपर्यायः। तथा च प्रयोगः। सुदिनासु सभासु कार्यमेतत्प्रविचिन्वीत विशेषतस्त्वयं वेति। पथः। कथं तर्हि व्यध्वो दुरध्वो विपथः कदध्वा कापथः समा इत्यमरः। व्यध्वो विपथकापथाविति रभसकोशश्च। अत्राहुः। प्रमाद एवायमिति। वस्तुतस्तु पथे गतावित्यस्मात्पचाद्यचि पथते व्याप्नोतीति पथः। आकारान्तोऽयम्। तथा च त्रिकाण्डशेषः। वाटः पथश्च मार्गस्यादिति तेन समासे पुंस्त्वम्। न चैवं विपथस्सिद्धावपि कापथो न स्यात् कादेशस्य दुर्लभत्वादिति वाच्यम्। ईषदर्थे चेति तत्सम्भवात् कुत्सायामर्थतः पर्यवसानात्। इदं त्ववधेयम्। परवल्लिङ्गतापवादरूपत्वात्तत्पुरुष एवेदं प्रवर्तते नान्यत्र। विपथा नगरी। बहुव्रीहिरयम्। पन्थानमतिक्रान्ता अतिपथा इहापि न। द्विगुप्राप्तेत्यादिना परवल्लिङ्गतायाः प्रतिषेधादिति भावः ॥

ता। पौनरुक्त्यपरिहारायाह। सुदिनशब्द इति। सुदिनास्विति। प्रशस्तास्वित्यर्थः। पथेते इति। एतदात्मनेपदित्वमपि पठ्यत इति मतेनेदम् ॥

म॰श॰ १६८

माधवेनोक्तं प्रायमिति। अत्रारुचिबीजं तूक्तम्। किं च पथइत्यस्य परवल्लिङ्गतापवादत्वात् तत्पुरुषे प्रवृत्तिस्तत्रैव प्रवृत्तौ त्वापवादत्वमित्यन्योन्याश्रयोऽप्यत्र बोध्यः। तस्माद्द्विपथाः इति पथे स्यादावर्द्धनावमितिवल्लोकाश्रयत्वाल्लिङ्गस्य लिङ्गमशिष्यमिति न्यायेन सिद्धमिति बोध्यम्। एवं च व्यध्वौ विपथकापथावित्यपि समञ्जसम्। द्वितीये

एवं च न्यायसाम्येन व्यन्हेत्यत्रापि राजान्हाहादित्यस्य प्रवृत्तिर्नेति माधवेनोक्तं प्रायम्। मृदु पचतीति। क्रियाविशेषणत्वाद्द्वितीयान्तम्। धातूपात्तभावनां प्रति हि फलांशः कर्मीभूतः। तथा च फलसामानाधिकरण्ये द्वितीया। अत एव सकृल्ल्वावित्यादौ कारकपूर्वकत्वाद्यण्। यत्तु भावनां प्रति करणतया धात्वर्थविशेषोऽन्वेति तत्र तद्विशेषणानां तृतीयान्ततैव। ज्योतिष्टोमेन स्वर्गकामो यजेतेति यथा। एतच्च करणे यजः इति सूत्रे वृत्तिपदमञ्जर्योः स्पष्टम्। न चैवं ज्योतिष्टोमेन भक्तिपूर्वं यजेतेति न सिद्ध्येदिति वाच्यम्। भावनाविशेषणत्वेन तदुपपत्तेः। तत्रापि संदर्शनप्रार्थनादिभिर्व्याप्यमानत्वात्। क्रियायाः कृत्रिमकर्मत्वविवक्षायां तद्विशेषणत्वाद्द्वितीया। अन्यथा तु प्रथमैवेति विवेकः। सामान्येन नपुंसकमिति च अनियतलिङ्गविषयकम्। तेन आदिः पचति प्रातरादिरिति पुंस्त्वमेव। विस्तरस्तु शब्दकौस्तुभे बोध्यः। पर्यायस्यैवेति। कथं तर्हि नृपतिसभामगमन्नवेपमाना इति कीचकवधे। गजपतिवत् राजविशेषणत्वादिति रक्षितः। विभाषा सेना। श्वनिशमिति। कृष्णचतुर्द्दशीत्याहुः। तस्यां किल केचिच्छ्वान उपवसन्ति। तथा च तिर्यगधिकरणे शाबरभाष्यम्। शुनश्च चतुर्दश्यामुपवसतः पश्याम इति। इति तत्पुरुषः ॥

ति। क्रियाविशेषणादिति भावः। ज्योतिष्टोमेनेति। तदभिन्नेन यागेनेष्टं भावयेदिति तत्र बोधात्। न सिद्ध्येदिति। कर्मभूतफलांशाभावेन द्वितीयानापत्तेस्तृतीयापत्तेश्चेत्यर्थः। कथं तदुपपत्तिस्तत्राह। तत्रापीति। व्याप्यमानत्वादिति। तेषां धात्वर्थविवक्षयेत्यर्थः। ज्योतिष्टोमाभिन्नयागकरणिकामिष्टविषयां भावनां पश्येदिति बोध इत्यभिमानः। तथा बोधाननुभवेनाह। अन्यथेति। पुंस्त्वमेवेति। आदिशब्दस्य नित्यपुंस्त्वात्। अत एव प्रातरादिरित्यत्र प्रातरित्यस्य क्लीबत्वेऽलिङ्गत्वे पि वा आदिरित्यस्य पुंस्त्वमेव॥ इति तत्पुरुषः ॥

रामः १६८

नन्वप्रथमाविभक्त्यर्थ इत्यनुचितम्। अन्यपदार्थे इति सूत्रात्। पदं च सुबन्तमित्यत आह। पदेनहीति। तत्र विभक्त्यर्थास्पिप्रसंबन्ध्यन्तर्भावेणाप्येकार्थीभावाङ्गीकाराच्च चित्रगुर्देवदत्त इत्यादौ सामानाधिकरण्यानुपपत्तिरित्यन्यत्र विस्तरः। तस्यापि। सशब्दस्यापि। अयमेवेति। कर्मग्राम एवेत्यर्थः। भिन्नेनैवेति। प्रत्ययार्थस्य प्रकृत्यर्थं प्रति विशेषणतादिविषयेत्यर्थः। नहीति। तस्माद्विशेषणीभूते कर्तरि तस्याभेदान्वय इति व्युत्पत्त्यन्तरमङ्गीकार्यम्। बहूनामिति। सामान्येनोक्तमर्थं विशेषतो विवृणोति। चकारादीति। आदिना

यस्य त्रिकस्येति। यद्यपि प्रादयो गताद्यर्थे प्रथमयेत्युक्तम्। तथाऽपि द्वितीयाश्रितादिभिरितितत्प्रथमाकेनचित्सह समस्यत इति नोक्तमित्यर्थः। वार्तिककृता प्रथमयेत्युक्तावपि सूत्रकृता नोक्तमिति वा। अन्यस्य पदस्येति। पदेन हि प्रकृत्यर्थोपसर्जनः प्रत्ययार्थोऽभिधीयते। तथा च द्वितीयाद्यर्थे इति फलितं तदाह। अप्रथमेति। समानेति। एतच्च शेषपदाल्लब्धम्। प्राप्तमित्यादि। ग्रामकर्मकप्राप्तिकर्तृ उदकं विग्रहार्थः। उदककर्तृकप्राप्तिकर्मेति समासार्थः। विग्रहे सदिति प्रयोगे तु तस्याप्ययमेवार्थः। यद्यपि क्तप्रत्ययार्थस्य कर्तुर्धात्वर्थं प्रति विशेष्यतोचिता तथाऽपि व्यपेक्षावादिभिरगत्या समासे भिन्नैव व्युत्पत्तिः स्वीकार्या। किंच कर्तृविशिष्टप्राप्तेः पदार्थत्वे तस्यैव नामार्थे तयोदकस्य तदभेदो वाच्यः स च बाधितः नहि कर्तृविशिष्टा प्राप्तिरुदकमिति संभवति। अपि च व्यस्ते समीचीनमुदकमितिवत्समस्तेऽपि उदकविशेषणप्रयोगः प्राप्तः। स च वृत्तस्य विशेषणयोगो नेति वचनेनैव वारणीयः। सिद्धान्ते तु बहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महद्गौरवं तस्मादेकार्थीभाव आस्थितः। इकारादनिषेधोऽप्यबहुव्युत्पत्तिभञ्जनाय कर्तव्यं तेन्यायसिद्धं त्वस्माकं तदिति स्थितम्। ऊढेत्यादि। अनडुत्कर्तृकोद्वहनकर्मीभूतो रथः। रथकर्मकोद्वहनकर्ता तु समासार्थः॥

क्तान्तार्थसंग्रहः। तेषां निषेधोऽभावस्याद्दोषकं लोपवचनं कार्यमित्यर्थः। बहुव्युत्पत्तीति। प्रत्ययार्थप्राधान्यादिव्युत्पत्तीत्यर्थः। कर्तव्यमिति। इदमुपलक्षणं विभाषाधिकारादीनामपि। न्यायसिद्धमिति। तादृशतादृशार्थान्तर्भावेणैकार्थीभावाङ्गीकारादित्यर्थः। विशेषणत्वेनैवोपस्थितेर्विशेषणाद्यन्वयोऽपि नेत्यन्यत्र विस्तरः ॥

समासेनाभिहितत्वादिति। एवं च तेषां कर्मत्वादिरूपतैव नास्ति विभक्तिवाच्यतावच्छेदकरूपेण कर्मादीनां कर्मादिशब्दैरिवैतेरप्यनभिधानादिति भावः। तत्सिद्धेरिति। अनवकाशत्वेनाव्ययीभावादिसंज्ञाया अस्याबाधादिति भावः। उत्तरपदलोपइत्यस्य शेषं प्रदर्शयति। वाच्य इति। सुत्यजमिति। मुख्यार्थे तु न समासोनभिधानादिति भावः। न च

रुद्रसंप्रदानकोपहरणकर्म पशुः। पशुकर्मकोपहरणसंप्रदानं रुद्रः। स्थाल्यधिकोद्धरणकर्म ओदनः। ओदनकर्मकोद्धरणावधिः स्थालीत्यादिरर्थः। इह कर्मादीनां समासेनाभिहितत्वात्प्रथमा। प्रथमार्थे त्विति। दृष्टे देवे अनयोर्न समासोऽशेषत्वादित्यत्र तात्पर्यम्। व्यधिकरणानामिति। अत्राप्युक्त एव हेतुः। इत्यंशे नग्रहणमुपनिबद्धम्। न चोन्मत्तगङ्गमित्यादिव्यावृत्तिरेव तत्फलम्। एकसंज्ञाधिकारेणैव तस्मिंस्तत्सिद्धेरिति भावः। अनेकं किम्। बहूनामपि यथा स्यात्। तदुदाहरणं तु मूल एव स्फुटीभविष्यति। एवं चात्र सुपीत्येवानुवर्तते। न तु सुपेति। यत्तु सुप्सुपेत्यनुवर्त्यानेकं सुबन्तं सुपा सहेति व्याख्यातम्। तन्न। द्विपदबहुव्रीह्यसिद्धिप्रसङ्गात्। प्रादिभ्य इति। प्रादिभ्यः परं यद्धातुजं तदन्तस्य पदान्तरेण सह समासो व्याख्येयः। सूत्रसिद्धार्थानुवादोऽयम्। वाचेति। इदं तु वाचनिकम्। पूर्वपदान्तर्गतस्योत्तरपदस्य धातुजस्येति रलोपो वाच्यः। एतच्च प्रादीनामेव वृत्तौ विशिष्टार्थवृत्तितामाश्रित्य सुत्यजम्। स्त्रियाः पुंवत्। ऊङोऽभाव इति। यदि तु ऊङोऽन्योऽनूङिति पर्युदासः स्यात्तर्हि टाबाद्यन्तमेव गृह्येत ततः किमिति चेत्। इडविडोऽपत्यं जनपदशब्दात्क्षत्रियादञ्। ऐडविडः। दरदोपत्यं स्त्र्यतश्चेति लुक्। इडविड् दरत्। सा चासौ वृन्दारिका च ऐडविडवृन्दारिका। दारदवृन्दारिकेति न सिद्ध्येत्। न ह्यत्र स्त्रीप्रत्ययः कश्चिदस्तीति भावः। निपातनादिति। एतच्च पूर्वत्रापि योज्यं वैयधिकरण्येन स्वरसतो बहुव्रीहेर्दुर्लभत्वात् ॥

इडमलपेक्ष्य दारदः। तयोः स्त्रिया

७ नारम्भ एव तु ज्यायान्। न सिध्येदिति। जातेश्चेति निषेधस्तु नात्र निषेधविषये एव पुंवत्कर्मधारयेत्यस्य प्रवृत्तेः। किं च तत्र जातेरिति पञ्चमीनिर्देशात्ततः परो यः प्रत्ययस्तदन्ते स निषेधो नायं तथा। एवं च सत्यभिधाने बहुव्रीहावपि ऐडविडभार्य इत्येव। भाष्ये उत्तरसूत्रोदाहरणं तु तत्राप्ययमेवार्थ इति सूचयितुमैडविडस्यानन्तरापत्यत्वे भाष्यमते

जातित्वाभावाच्च ॥

प्राचामनुरोधेनेति।तदनुरोधेबीजंतुप्रागुक्तार्थकभाषितपुंस्कादित्यस्याप्रसिद्धत्वम्।षष्ठ्यन्तपाठइति।अनूङःसमानाधिकरणेइत्येवंरूपः।पुमान्यस्मिन्निति।प्रवृत्तिनिमि
त्तस्याधारत्वविवक्षयासप्तमी।सत्सप्तमीवायस्मिन्अर्थेसतिपुमान्भाषितोभवतीत्यर्थः।स्त्रीप्रत्ययेति।स्वरितत्वप्रतिज्ञयाप्राप्तामित्यर्थः।अचःपरस्मिन्नितीति।उत्तरपदपरत्व

अर्धुगिति।इहभाषितपुंस्कमस्तीतिभाषितपुंस्कात्।अततेः क्विप्।एवंचसमानाधिकरणएवबहुब्रीहिः।अलुगर्थंचयत्नोमास्त्वितियद्यपिसुवचंतथापिप्राचाम
नुरोधेनक्लिष्टव्याख्यानमितिव्यवधेयम्।षष्ठ्याश्चेति।एवंचसूत्रेकेषांचित्षष्ठ्यन्तपाठोऽनाकरःहरदत्तादिग्रन्थविरोधादितिभावः।तुल्येइत्यादि।अयंभावः।भा
षितः पुमान्यस्मिन्नर्थेतद्भाषितपुंस्कंप्रवृत्तिनिमित्तम्।तदस्यास्तीतिअर्शआद्यच्।तेनतुल्येप्रवृत्तिनिमित्तेउक्तपुंस्कंशब्दरूपंलभ्यतइति।स्त्रीवाचकेति।एते
नस्त्रियांइत्यस्यस्त्रीप्रत्ययपरतांवारयति।तथाहिसतिइत्थंसूत्रार्थःस्यात्।अनूङःस्त्रीप्रत्ययस्यपुंसीवनिवृत्तिरित्यर्थः।यथामरुवदस्मिन्ग्रामेजलमित्युक्तेअ
भावएवातिदिश्यतेतद्वत्।नन्वयमेववावाक्यार्थोऽस्तु।यथोक्तंप्राचाउक्तपुंस्कात्परस्यानूङःस्त्रीप्रत्ययस्यपुंसीवपुंवत्स्यात्।पुंवद्भावात्स्त्रीप्रत्ययलोपइतिचेन्नै
वम्।अस्यार्थस्याकरेएवअनेकधादूषितत्वात्।तथाहि।अस्मिन्पक्षेपटुभार्यइत्यत्रोत्तरपदनिमित्तायाङीषोनिवृत्तेः।अचःपरस्मिन्नितिस्यानिवत्त्वेसतियण्स्यात्।
किंचवतण्डस्यापत्यंस्त्रीवतण्डी।वतण्डाच्चेतियञ्।तस्यलुक्स्त्रियामितिस्त्र्यपत्येलुक्।शार्ङ्गरवादित्वान्ङीन्।वतण्डीचासौवृन्दारिकाचवातण्ड्यवृन्दारिकेति
इष्यते।अत्रङीनोनिवृत्तावपिअर्थगतस्यस्त्रीत्वस्यानिवृत्तत्वाल्लुक्स्त्रियामितिप्रवर्तेत।अपिचैवमेडविडवृन्दारिकेत्यादिप्रागुक्तंनसिद्ध्येत्।किंचगार्ग्यश्चतावृन्दा
रिकाश्चगर्गवृन्दारिकाः।ङीपिनिवृत्तेऽपियञञोरितिलुङ्नस्यात्।अस्त्रियामितिनिषेधात्।तस्माद्यथाकरमेवाग्राह्यम्।लौकिकेति।यत्तुचित्राणांगवामयमिति
मीमांसकैर्विगृहीतंतल्लौकिकाल्लौकिकबहिर्भूतत्वादुपेक्ष्यमितिभावः।एतच्चमासजातइत्यत्रप्रपञ्चितम् ॥

निमित्तत्वादस्यानिवृत्तेरितिभावः।प्रवर्त्तेतेति।ननिवर्त्तेतेत्यर्थः।अस्त्रियामितीति।तद्राजस्यबहुष्वितिसूत्रात्तत्रनदनुवृत्तेरितिभावः ॥

पूर्वसवर्णदीर्घो नेति। पूर्वशब्दे सानुस्वारः पाठः समासात्पूर्वं नसवर्णदीर्घ इत्यर्थः। पूर्वसवर्णेत्यपपाठो दीर्घाज्जसीति निषेधात्। इत्थमेवेति। पूर्वपदं नाक्षिप्यत इत्येवमेवेत्यर्थः। चतुर्णां द्वन्द्वे इति। उपक्रमभाष्यतस्तथैवलाभादिति भावः। एतेननेष्टृन्तद्वन्द्वंकृत्वोद्गातृशब्देनद्वन्द्वेनदोषइत्यपास्तम्। पूर्वपदमिति। येनानङ्स्यादितिशेषः।

चित्राअंसइति। अन्तरङ्गानपीतिन्यायादिहपूर्वसवर्णदीर्घोनप्रवर्ततेअन्यथाएकादेशस्यप‾रादित्वेनसुपोलुकिचित्रगुरित्यत्रअकारोनलभ्येतेतिभावः। नेहेति। इष्टसिद्ध्यनुरोधेनपूर्वपदंक्वचिदाक्षिप्यतेनतुसर्वत्र। तथाचौजःसहोम्भसइतिसूत्रेहरदत्तेनेत्थमेवोक्तमितिभावः। आनङिति। तथाचसमर्थसूत्रेभाष्येहोतृपोतृनेष्टोद्गातारइत्यत्रचतुर्णांद्वन्द्वेतृतीयस्यआनङुदाहृतः। पूर्वपदाक्षेपेतुसनसिद्ध्येत्। नह्यत्रनेष्टापूर्वपदंनापितदन्तंहोतुरेवपूर्वपदत्वादितिभावः। अतएवेति। पूर्वपदाक्षेपादेवे‾त्यर्थः। चित्राजरदिति। नंचेहद्वन्द्वात्मकस्यपूर्वपदस्यपुंवद्भावोस्तुतथाचटाबपिनिवर्तेतेतिवाच्यम्। द्वन्द्वान्तर्गतयोःस्त्रीप्रत्ययप्रकृत्योःप्रत्येकंभाषितपुंस्कत्वेपिउदाहृतद्वन्द्वस्यातथात्वात्। तथाचपट्वीमृद्वीभार्येयस्येतिविगृह्यपट्वीमृदुभार्यइत्युदाहरताभाष्यकारेणसर्वमिदंध्वनितमितिभावः। द्वयोरपीति। पूर्वपदान्तर्गतमुत्तरपदमाश्रित्यप्रथमस्यापिपुंवद्भावइतिभावः। जरच्चित्रेति। पूर्वकालैकेतिसूत्रेजरच्छब्दस्यप्रथमानिर्दिष्टत्वादुपसर्जनत्वेसतिलिङ्गविशिष्टपरिभाषयाजरत्याःपूर्वनिपातः। कर्मधारयोत्तरेति। एतेनादृष्टसदृशप्रजमितिप्रयोगोव्याख्यातः। इहप्रघट्टकेबहूनांबहुव्रीहौपूर्वपदंनपुंवदित्युक्तरूपेविशेषउक्तः। अनिज्विधावपिविशेषान्तरंवक्ष्यति। यत्तुप्राचानीलोज्ज्वलवपुरित्युदाहृतंतत्रस्वरेविशेषोबोध्यः। तथाहि ॥·

लिङ्गविशिष्टपरिभाषयेति। जरच्छब्दस्यप्रथमानिर्दिष्टत्वात्तेनलिङ्गविशिष्टपरिभाषयाजरतीशब्दस्यापिग्रहणेनोपसर्जनत्वेसतिजरत्याःपूर्वनिपातइतिशेषपूरणेनान्वयः। विशेषान्तरमिति। परमःस्वोधर्मोयस्येतित्रिपदबहुव्रीहावपितिजभावरूपमित्यर्थः ॥

महान्भेद इति। यदि तु कर्मधारयोत्तरपदे बहुव्रीहौ नीलपदस्वरः सिध्यति इत्युच्यते तदा चिन्त्यमेव प्राचीनोदाहृतमिति भावः। तत्करोतीति। प्रमाणं प्रमां करोति जनयतीत्यर्थः। क्विबन्तस्येदमिति। सवर्णदीर्घे यजादेराकृतिगणत्वाद्वा प्रबोध्यः। अगतिकगतिरिति। भाष्यानुक्तत्वादिति भावः। प्रत्ययाश्रय इति। तेन लोपस्य बहिरङ्गत्वेना-(बहुव्रीहिपूर्वपदे नीलशब्दस्य प्रकृतिस्वरः कर्मधारयपूर्वपदे तु कर्मधारयस्यान्तोदात्त इति महान्भेदः। स्त्री प्रमाणीयस्येति करणार्थल्युडन्तत्वात्प्रमाणशब्दो विशेष्यलिङ्गः। टित्वान्ङीप्। कथं तर्हि प्रमाणानां स्मृताविति शाबरभाष्यम्। भावे ल्युडन्तात्तत्करोतीति णिचि पचाद्यचि टाप्। यद्वा प्रमाणमिवाचरतीत्याचारक्विबन्तात्पचाद्यच्। नव्यास्तु। प्रमाणमयते याति मूलभूतां श्रुतिं यतः। क्विबन्तादयतेस्तस्मात्प्रमाणा स्मृतिरुच्यते॥ १॥ इत्यादिग्रन्थेन अयतेः क्विबन्तस्येदं रूपमित्याहुः। तत्र ह्रस्वस्य पिति कृति तुक् दुर्वारः। आगमशास्त्रमनित्यमिति तु अगतिकगतिः। इह तु गत्यन्तरमुक्तमेव। यदप्याहुः। लोपो व्योर्वलीति लोपोऽपीह वलादिप्रत्ययाश्रय इति। तदप्यापाततः। तत्र प्रत्ययग्रहणस्याप्रकृतत्वात्। गोधेरः पचेते इत्याद्युदाहरणविरोधाच्चेत्यास्तां तावत्। परिगणितानां त्रलतसिलादीन्त्रयोदश क्रमेणोदाहरति। बह्वीष्विति। यद्यपि बह्वादिभ्यो ङीषो वैकल्पिकत्वात्तदभावे बहुत्रेत्यादि सिध्यति तथापि पाक्षिकानिष्टवारणायेदम्। यत्तु प्राचा ततस्त्रेत्युदाहृतं तत्सर्वनाम्नो वृत्तिमात्रे इत्यनेन गतार्थत्वादुपेक्ष्यम्। दर्शनीयतरेति। यत्तु प्राचा पटुतमेत्युदाहृतं तत्त्वमादिकमिति ध्वनयन्नाह। पटुरूपेति। बहुथेति। प्रकारवचने थाल्। तत्र हि किंसर्वनामबहुभ्य इत्यधिकृतम्। इकतिरिति च। वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसीति तिल्। अजथ्येति। अजाविभ्यां थ्यन्छन्दसीति। बह्वल्पार्थादित्ययमपि शस् तसिलादिषु द्रष्टव्य इत्यर्थः। त्वतलोरिति। अत्र वदन्ति। जातिसंज्ञाव्यतिरिक्तधर्ममात्रं गुण इति। एवं च क्रियाशब्दानामप्यनेन न पुंवद्भाव इति भावः॥ सिद्धत्वान्न तुक्प्राप्तिरिति भावः। गोधेर इत्यादि। र शब्दे ते शब्दयोः प्रत्ययावयवत्वेपि प्रत्ययत्वाभावादिति भावः। विरोधाच्चेति। तेन तु कोपि प्रत्ययाद्ये सत्त्वेन समत्वमित्यस्य संग्रहः। ततस्त्रेति। तस्यास्तस्यामित्यर्थे इदम्। तिलिति। लिङ्गविशिष्टपरिभाषयेति भावः। परिगणनसामर्थ्यादेव जातेश्चेति निषेधाप्रवृत्तिरिति बो-

कैयटइति।अनेनहिकैयटेनभेदकधर्ममात्रंगुणइत्यस्यनिरासेनशुक्लादिगुणग्रहणंसूचितम्।अत्रारुचिबीजंतुसंज्ञाजातिकृदन्ततद्धितान्तसमस्तसर्वनामसंख्याश
ब्दातिरिक्तःशब्दोगुणवचनःशब्दइत्याकडारसूत्रस्थभाष्यविरोधः।अयंचसंख्यासर्वनामेतिचस्पष्टमेव।प्रगृह्यसंज्ञेति।इग्यणइतिसूत्रेउभयसंज्ञात्वस्येतिभाष्यप्र

अतएवप्राचानकोपधायाइतिसूत्रेपाचिकातापाचिकात्वमित्युदाहृतम्।तत्सौत्रेणचत्वतलोरितिप्राप्तिरितिव्याख्यातम्।तदेतत्सर्वंभाष्यादिविरोधादुपे
क्ष्यम्।तथाहि।एकतद्धितेचेतिसूत्रेएकताएकत्वमित्युदाहृत्यपुंवद्भावेनसिद्धमित्याशङ्क्यभगवानाहउक्तमेवतत्त्वतलोर्गुणवचनस्येति।अत्रकैयटः।एक
शब्दस्यसंख्यावाचित्वाद्योगुणवचनत्वेपिअसहायवाचिनोऽतथात्वादितिभावइति।एवंहिवदताशुक्लादयएवेहगुणाइतिध्वनितम्।अतस्तथैवोदाहरति।
शुक्लत्वंशुक्लतेति।अतएवप्रत्युदाहरति।कर्त्र्याइति।कर्त्रीत्वमिति।तथाचस्त्रियामितिसूत्रेव्यापिनीत्वात्स्वरवृत्तेरितिकैयटेनप्रयुक्तम्।तथाचपुंयोगादितिसू
त्रेस्त्रियाःसंविधात्रीत्वादितितेनैवप्रयुक्तम्।प्रगृह्यसञ्ज्ञाप्रकरणेपिविभक्तेरेवसञ्ज्ञिनीत्वादित्युक्तम्।स्यादेतत्।निरीक्ष्यमेनेशरदःकृतार्थता।सेवतामुप
गतास्त्वनुवेलंघृष्टतारहसिभर्तृसुताभिः।सामुमोचरतिदुःखशीलतामित्यादिप्रयोगाणांकागतिरित्यतआह।शरदइति।सामान्यइति।तथाचपत्युर्नो
यज्ञसंयोगेइतिसूत्रेपत्न्याःफलप्रतिगृहीतृत्वादितिवृत्तिग्रन्थमुपादायकर्तृत्वमात्रंविवक्षितंनतुस्त्रीत्वमितिङीप्नकतइतिहरदत्तोव्याख्यत्।परः
संनिकर्षइतिसूत्रेएकैकवर्णवृत्तित्वात्वाचइतिभाष्येकैयटोप्येवमेवाह।एतेननेष्टंपुरोद्वारवतीत्वमासीत्इतिमाघोव्याख्यातः ॥

योगोपिमानम्।तस्यसमस्तत्वेनाप्यगुणवचनत्वंबोध्यम्।कृतार्थतेति।कृतार्थदुःखशीलशब्दौक्रियाशब्दावितिभावः।समस्तौचेत्यपिबोध्यम्।व्याख्यातमिति।द्वारवती
तिसञ्ज्ञापिनेष्टाकिमुतदीर्घोर्थइतिव्याख्यातृभिर्व्याख्यातत्वेनसञ्ज्ञाशब्दत्वात्।भाष्यरीत्यातद्धितान्तत्वेनगुणवचनत्वाच्च।त्वेचेतिह्रस्वस्तुछन्दस्येवेतिबोध्यम् ॥

रौहितेयइति।पुंवद्भावेसिद्धश्चप्रत्ययविधावित्यनाश्रित्येदम्।तदाश्रयेतुरौहितिरित्यापत्तिर्बोध्या।संस्कारविशेषेइति।तद्वतीत्यर्थः।पत्यन्तेति।लिङ्गविशिष्टपरिभाषयेत्यर्थः।इत्यविरोधइति।एवंचमाधवानुसारेणायंलिखितइतिसूचितम्।रूढ्यर्थंचेति।तत्रतदर्थमिदंनिपातनंनविवाहनिबन्धनपति——घटितस्यतस्यविवाहितपुरुषविवाहितस्त्रीमात्रबोधकत्वेनान्याबोधकत्वेनचातिप्रसङ्गाभावेनरूढिकल्पनेफलाभावाच्च।तस्याःभाषितपुंस्कत्वेनपुंवत्त्वप्राप्त्यापुंवत्त्वबाधनार्थमितिन्यासग्रन्थासंगतेश्च।किंतुतृतीयस्य।सहियोगार्थप्रवृत्तिनिमित्तकएवडुच्यन्तोलोकव्यवहारेणसमुदायोच्चारणेनचस्त्रीविशेषमद्धमसपत्नीशब्दबोध्येरूरौहिणेयइति।रोहितशब्दाद्वर्णादनुदात्तादितिङीनकारेपुंवद्भावेतुसतितयोर्निवृत्तौरौहितेयइतिस्यादितिभावः।गृह्यतइति।व्याख्यानमेवात्रशरणम्।शत्रुपर्यायादिति।अत्रचव्यन्सपत्नेइतिनिर्देशोलिङ्गम्।रिपौवैरिसपत्नारिद्विषद्द्वेषणदुर्हृदइत्यमरः।विवाहनिबन्धनमिति।तज्जन्यसंस्कारविशेषरूढमित्यर्थः।सापत्न्यइति।भाषितपुंस्कत्वात्पुंवद्भावेकृतेयस्येतिलोपः।एतच्चसुब्धातौवृत्तौस्पष्टम्।यत्तुपारक्षणइतिधातौमाधवेनोक्तम्।भावकर्मणोःपत्यन्तलक्षणेयक्।सापत्न्यम्।अभाषितपुंस्कत्वात्पुंवद्भावोनेति।तत्तुद्वितीयंसपत्नीशब्दमाश्रित्येत्यविरोधः।यत्तुनित्यंसपत्न्यादिष्वितिसूत्रेन्यासकृतोक्तम्।समुदायोच्चारणंपुंवद्भावबाधनार्थमिति।तन्न।समानस्यसभावार्थंरूढ्यर्थंचनिपातनाश्रयणेनसमुदायोच्चारणस्यतावतैवोपक्षयात्।अन्यथासंबुद्धिह्रस्वादीनामपिबाधापत्तेः।किंचतसिलादिष्वितिसूत्रेभाष्यकारेणसपत्नीशब्दाच्छिवाद्यणिभस्याढेइतिपुंवद्भावेनसापत्नइतिप्रापय्यशिवादिषु ॥ ७ ढइतिभावः।अतएवसमानस्वामिकदासेनैतयोर्व्यवहारःक्वचित्तथाव्यवहारस्तुगौणः।किंचविवाहनिबन्धनःपतिशब्दोनास्त्येव।स्वामित्वेनैवहिसबोधकः।स्वामित्वंचप्रकरणादिनायज्ञफलनिरूपितंकदाचित्बुध्यते।ततश्चनयन्पुंवद्भावबाधकत्वेदूषणान्तरमाह।किंचेति।सापत्नइति।प्रापय्येति।अढेइत्युच्यतेतत्रसापत्नेपुंवत्त्वंप्राप्नोति।एवंचसापत्नइतिप्राप्नोतीतिभाष्यकैयटयोरुक्तम्।तृतीयस्यहिभाषितपुंस्कत्वेनपुंवत्त्वापत्तिः।सहिसमानस्वामिकत्वेनपुंसासमभ्याह।पुंवत्त्वबाधेहितदसंगतिःस्पष्टैव।किंचविवाहनिबन्धनसत्त्वेतस्याः

म·श·
१७२

भाषितपुंस्कत्वेनतमादायसापत्नसिद्धेस्तद्संगतिः।नचसापत्नएवनसिद्ध्यतिसापतोपिप्राप्नोतीतिभाष्यार्थइतिवाच्यम्।द्वितीयसत्वेरूढत्वेनतस्यैवशिवादौग्रहणे
तृतीयादणोऽभावेनसाधवरीत्यासापत्नप्राप्तेरितिदिक्।केवलयौगिकस्यग्रहणंनेति।केवलयोगमात्रलभ्यसमानपतिकत्वरूपप्रवृत्तिनिमित्तकत्वेनेत्यर्थः।तेनैकस्त्रवि
वाहितपतिविवाहितांस्त्रियमाहनवृतत्वेन।व्यक्तिविशेषस्यबोधनाद्रूढ्यर्थंनिपातनमुक्तम्।अतएवास्यभाषितपुंस्कत्वमितिभावः।यद्वा।केवलयौगिकपतिशब्द
घटितस्येत्यर्थः।एवंहितत्रसिद्धान्तभाष्यम्।सापत्नः प्रकृत्यन्तरत्वात्।सपत्नशब्दः प्रकृत्यन्तरमस्तीति।अस्यार्थः।अन्याप्रकृतिर्यस्यसप्रकृत्यन्तरस्तत्वादित्यर्थः।प्रकृत्यन्त
रमाह।सपत्नशब्दइति।अत्राण्निरूपितप्रकृत्यन्तरत्वंसपत्नश
ब्दस्यशब्दमर्यादयालभ्यते।नतुङीन्निरूपितम्।लक्षणयातथाव्याख्यानेचनमानम्।एवंचसपत्नीतिगणपाठमाश्रित्यसपत्नप्रकृतिकसपत्नीशब्देनसापत्नसिद्धावपिसा
केवलयौगिकस्यग्रहणंनेत्याशयेनसापतइतिप्रयोगोवारितः।निपातनस्यंपुंवद्भावनिवृत्त्यर्थत्वेतुसर्वंविरुद्ध्यतेतिदिक्।भावकादिति।ठक्स्यायामेवाभत्वेपिपुंवद्भा
वोविधीयते॥ पतोपिप्राप्नोतीतिभाष्येपूर्वपक्षः त्वतंसमताप्रकृतिर्गणेनपठ्यतेकिंतुभिन्नःसपत्नशब्दःतदाचि लिङ्गविशिष्टपरिभाषयाङीनन्तादण्सिद्ध्यति।त्वाद्वास
मान्यचिन्तयाशिवादिपाठोदृष्टकोपिबाधकइत्युत्तराशयः।एवंचकेवलयौगिकपतिशब्दघटितस्यग्रहणंनेतिस्पष्टमेव।एवंचमूलेद्वितीयसपत्नीशब्दमुपादानंमाधवा
नुरोधेन।तदेतद्ध्वनयतायत्तुपारक्षणइत्यादिनामाधवग्रन्थमुपन्यस्यतत्रद्वितीयसपत्नीशब्दमाश्रित्यस्युक्त्यादायविरोधाभावउपपादितः।सापत्न्यमितिप्रयोगस्तुसपत्न
प्रकृतिकादेवब्राह्मणादित्वात्ष्यञिबोध्यः।सपत्नप्रकृतिकोपितृतीयसपत्नीशब्दार्थएवतत्रैवलोकेतस्यप्रयोगात्।रूढयोरेवग्रहणादित्यस्यसपत्नशब्दस्यलिङ्गविशिष्टपरि
भाषयातत्प्रकृतिकङीनन्तस्यचेत्यर्थः।तयोःशुद्धरूढत्वात्।तृतीयस्तुयोगरूढः।अन्यथाऽस्यापिस्वयंरूढत्वुक्तेस्तदग्रहणेबीजाभावः।मध्यमाद्ययोरितिव्याख्यातृ
णांमध्यमस्यैवतस्यरूढिघटितस्यशुद्धयौगिकस्यग्रहणेऽस्यरूढस्यकथंत्यागःस्यात्इतिसुहृदोविभावयन्तु ॥

रा·म·
१७२

अनुवृत्तेरिति। सारूप्ये सति तल्लक्षणविशेष एवैतत्प्रवृत्तिरिति भावः। नियमतो न स्यादिति। सरूपाणामित्येकशेषे तु स्त्रीत्वकृतस्यापि शेषापत्तिः। न चेष्टापत्तिः। कौयटादिविरोधात्। नहि पुमान्स्त्रियेत्येकशेषोऽत्रोक्तः। न च त्यदादितः शेषे पुंनपुंसकत इत्युक्तेरेतावित्यस्य नियमेन सिद्धिः। गावावित्यत्र तु रूपेण विशेष इति वाच्यम्। अद्वन्द्वतत्पुरुषविशेषणानामित्यत्र द्वन्द्वपदेन तदपवादैकशेषस्याप्युपलक्षणेन तदप्राप्तेरिति भावः। तदितरेति। ताभ्यां स्त्रीत्वपुंस्त्वाभ्यामितरः पुंयोगादिकृतङीषादि

हंसत्वजातिसाम्येऽपि शब्दवैलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वादिति चेन्मैवम्। सरूपग्रहणानुवृत्तेः। अनुवृत्तौ ज्ञापकं तु भ्रातृपुत्रादिति सूत्रम्। नन्वेवमपि गौरियं गौश्चायं तयोः सहोक्तौ एतौ गावाविति नियमतो न स्यात्तल्लक्षणविशेषाभावादिति चेन्मैवम्। तदितरकृतविशेषविरहरूपे विशिष्टाभावे तात्पर्यात्स चेह विशेष्याभावादस्त्येव। इन्द्रेन्द्राण्यावित्यादौ तु नैकशेषः। पुंयोगकृतविशेषात्। पिता मात्रा। श्वशुरः श्वश्र्वा। नन्वेतत्सूत्रं व्यर्थम्। तथाहि। यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेनास्मिन्विषये पितृशब्द एव मातरमपि वक्ति श्वशुरशब्दश्च श्वश्रूम्। तत्र शक्तिरेव निरूढलक्षणा वेत्यन्यदेतत्। एतच्च सूत्रं विनापि सुलभम्। न च पूर्वसूत्रसमूहवदिदमपि सूत्रद्वयं द्वन्द्वनिवृत्त्यर्थमिति वाच्यम्। इह द्वन्द्वस्यापि पक्षे इष्टत्वादिति चेत्। मैवम्। पितृश्वश्रूशब्दयोरिव मातृश्वश्रूशब्दयोः उभयोर्विषये केवलयोः प्रयोगं वारयितुं सूत्रारम्भात्। अनभिधानमाश्रित्य प्रत्याख्यानं दुर्बलमिति दिक्। त्यदादीनि सर्वैर्नित्यम्। सर्वैः किम्। [illegible] त्यदादिभिरेव सहोक्तावित्यर्थो मा भूत्। परमिति। शब्दपरविप्रतिषेधादिति भावः। त्यदादितः इति। आद्यादित्वात्तसिः ॥

विरह इत्यर्थः। तात्पर्यादिति। चेदेव शब्दोपादानसामर्थ्येन विशेषे [illegible] तल्लक्षण एवेत्यन्वयेनेति भावः। तल्लक्षण एवेत्यस्य व्यावर्त्यमाह। इन्द्रेन्द्राण्याविति। मातरमपीति। पितृत्वारोपेणेत्यर्थः। त्यदादिभिरेवेति। सर्वं पदं सावधारणमित्यर्थलभ्य[illegible]मेवकारः। इत्येवार्थो मा भूदिति नान्वयः। सर्वैरित्यस्य त्यदादिभिरन्यैश्चेत्यर्थः। शब्दपरेति। गणपाठीयेत्यादिः। आद्यादित्वादिति। पुंनपुंसकत इत्यत्रापीदमेव ॥

किंतु विशेष्येति। अनेनान्तरङ्गस्वार्थलिङ्गबाधनेन चरितार्थस्य बहिरङ्गविशेष्यसंबन्धप्राप्तलिङ्गबाधकत्वे मानाभाव इति व्यापसिद्धत्वमस्य सूचितम्। अतएवैकशेष्यविशेषणे गौरित्यादाविति इत्यस्याप्रवृत्तिः। अतएव पुंस्त्रीसंघे स्त्रीशेषे गाव इमाश्चरन्तीति भाष्यप्रयोगः सङ्गच्छते। इमा इत्यत्र ह्यनेनैवैकशेषः। अन्तरङ्गत्वादिति। विभक्त्यनपेक्षत्वेन तदुक्तेः पूर्वमेव सद् इत्यर्थः। बाधकमात्रपरतयेति। बाधकमात्रत्वं च पूर्वं स्वस्य प्रवृत्त्या तस्य वृत्तिप्रतिबन्धकत्वम्। इत्यत्र यथेति। मिदेरित्यादौ इक इत्स

त्यदादीनां शेषे सह विवक्षिते पुंसः पुमान् यश्च नपुंसकेन इशेन लिङ्गप्रतिपादकानि भवन्ति। अर्थात्त्यदादीन्येव। अद्वन्द्वेति। द्वन्द्वादिविशेषणानां प्रागुक्तेन। किंतु विशेष्यनिघ्नत्वेनेति भावः। तच्चेति। पिप्पल्या अर्द्धमित्यर्थः। साचेति। अर्द्धपिप्पलीत्यर्थः। इह सर्वत्रेति। एतेन कृतद्वन्द्वानामेकशेष इति भ्रमं व्यावर्तयति। ननु तथैव किं न स्यादिति चेत्। न। एकशेषस्यान्तरङ्गत्वात्। न चेदं दुराग्रहमात्रं किंतु फले विशेषोऽस्तीत्याह। तेनेति। यस्तु द्वन्द्वापवाद एकशेष इति केषांचिदुद्घोषस्तत्रापवादशब्दो बाधकमात्रपरतया नेयः। इकोगुणवृद्धी इति सूत्रे तच्छेषस्तदपवादो वेत्यत्र यथा॥ इत्येकशेषः॥ प्रसङ्गादाह। परार्थेति। अभिधानमिति करणे ल्युट्। अनेनैतद्दर्शयति। न केवलया क्लृप्तयाप्यवयवशक्त्या सर्वत्र निर्वाहः। किंतु विशिष्टार्थविषयकं शक्त्यन्तरमेव स्वीकर्तव्यम्। अतएव वृत्तौ विशेषणस्य पदार्थैकदेशत्वान्न विशेषणसंबन्धः। द्वन्द्वे च शब्दस्याप्रयोगः॥

स्योपस्थितावयवषष्ठीत्वेनालोन्त्यस्येत्यस्य प्रवृत्तिप्रतिबन्धकत्वमात्रेणेक इत्यस्यालोन्त्यापवादत्वव्यवहार इति भावः॥ इत्येकशेषः॥ करणे ल्युडिति। यद्घटकैः पदैः परार्थान्वितस्वार्थस्यैव तत्तत्पदाभिधा समुदायाभिधा भिरूपस्यार्नसा वृत्तिः। विशिष्टार्थविषयकमिति। राजपुरुषपदं राजसंबन्धवति पुरुषे शक्तमित्येव शक्तिग्रहाकारेण तच्छक्तेस्तद्विषयकत्वमिति भावः। पर्यवसानगत्या तु तस्या अवयवशक्तलभ्ये पर्यवसानमित्यन्यदेतत्। शक्त्यन्तरमेवेति। तत्स्वीकर्तव्यमेवेत्यन्वयः। तत्फलं विशिष्टैकोपस्थितिस्तत्फलमाह। अतएवेति ॥

मीमांसकानामिति। अरुणाधिकरणवार्त्तिके स्पष्टमेतत्। विस्तरस्त्वन्यत्र द्रष्टव्यः। योगरूढिश्चेति। पङ्कजादिपद इति शेषः। क्लृप्तशक्त्यनुसारिण्येति। क्लृप्तशक्तिकावयवपदघटितसंबन्धरूपयेत्यर्थः। निरूढेति। प्रयोजनाभावादिति भावः। एवं च बहुव्रीहौ चरमपदस्यैव तत्रापि ङ्प्रत्ययादेर्लक्षणयैवोपपत्तौ समुदायशक्त्युच्छेद इति तात्पर्यं

बहुव्रीहौ तु यच्छब्दादेः। वाक्ये तु सर्वमिदं भवत्येवेति वैलक्षण्यम्। किं चावयवशक्त्यैव निर्वाह इत्याग्रहे मीमांसकानां बहुव्रीहेरन्यपदार्थे शक्तिर्न सिद्ध्येत्। योगरूढिश्च तत्तद्धादीनां दुर्लभा स्यात्। क्लृप्तशक्त्यनुसारिण्या निरूढलक्षणयैव निर्वाहात्। न चेष्टापत्तिः। अपसिद्धान्तादिति भावः। अविग्रह इति। लौकिकविग्रहरहित इत्यर्थः। अस्वपदेति। समस्यमानयावत्पदाघटितविग्रह इत्यर्थः। कटप्रूः। अजस्रमिति। इह हि क्रुत्प्रत्ययविधौ कटप्रू अजस्र इति समस्तानुवादसामर्थ्यात्। धातुना समास आक्षिप्यते तत्रैव वा निपात्यते इति हरदत्तादिग्रन्थे स्पष्टम्। तिङन्तार्थैकृतेन सहेति वियोगविभागेनाप्येतत्सुसाधम्॥ इति सर्वसमासशेषः॥ ऋक्पूर्॥ न दन्तस्येति। तद्वाचकधूःशब्दान्तस्येत्यर्थः। यदि तु अक्षे समासार्थे सतीति नेति व्याख्यायेत तर्हि दृढधूरक्ष इत्यत्रैव स्यात्। नाक्षधूरित्यत्र। यदि त्वक्षे पूर्वपदे नेति व्याख्यायेत ततोऽक्षधूरित्यत्रैव स्यात्। न तु दृढधूरक्ष इत्यत्र। तस्माद्व्याख्याद्वयोक्तमेव ज्यायः। कृतसमासान्तस्येति। येन विधिस्तदन्तस्येति सूत्रे प्रयोजनं महद्भूयस्त्वनह्नोदीर्घविधाविति वार्त्तिके आपस्तिष्ठन्ति स्वाप इति भाष्यं चात्र प्रमाणमित्यवधेयम्। प्रतीपं समीपमिति। प्रतिकूलास्सङ्गताश्च आपो यस्मिन्निति निविग्रहे। समीपो देवयजनमिति। देवा इज्यन्ते स्मिन्निति व्युत्पत्त्या यज्ञभूमिः। समापशब्दस्य पुंस्त्वं लोकादित्याहुः॥ म्। अपसिद्धान्तादिति। अनुपपत्तिप्रतिसन्धानं विनापि बोधाच्चेत्यपि बोद्धुमभावस्येति। तेन बहुव्रीहेर्नैदृशनियमः। कृत्प्रत्ययविधौ। क्विब्वचीति वार्त्तिकेन मिकम्पीति सूत्रे च। सुसाधमिति। अनेन प्रकारेणाप्यत्र समासः प्रत्ययसन्नियोगेनैव योगविभागस्येष्टसिद्ध्यर्थत्वादिति बोध्यम्। यद्यपि स च छन्दस्येवेति पूर्वमुक्तं तथापि लक्ष्यानुसारात्क्वचिदन्यत्रापि प्रवृत्तौ न बाधकमिति तात्पर्यम्॥ इति सर्वसमासशेषः॥ तद्वाचकेति। अक्षसंबन्धिधूर्वाचकेत्यर्थः॥

भाष्येलिखिति। अनेन विशेष्यस्यान्यलिङ्गत्वेऽस्य पुंस्त्वमसाध्विति समापे देवयजनमिति प्रयोगो संगत इति सूचितम्। गतिश्चेति सूत्रे इति। उपसर्गादृतीति सूत्रेऽपि एतौ
प्रयोगौ। वद्धिधीति। क्रियायोगे उपसर्गत्वे उपसर्गाश्छन्दसि धात्वर्थे इत्युक्तः प्रणसंमुखं प्रपमित्यादौ। क्रियायोगाभावादुपसर्गत्वाभावेन दोष इत्याशङ्क्योपस
र्गग्रहणस्योपलक्षणत्वेन संग्राहितं तत्र भाष्ये इति बोध्यम्। प्रतिसाममितीति। इत्यादिष्वित्यर्थः। पद्माकारेति। तस्वेव पद्माश्रयत्वेन यथाकथंचिद्बोध्यम्। अह्वेति। पद्मना
भाष्ये तु क्लीबमुदाह्रियते अवर्णान्ता इति। ह्यन्तरिति सूत्रेऽपर आह। ईत्वमनवर्णादितिवक्तव्यम्। इह माभूत्। प्रापं परापमिति भाष्योक्तेः। गतिश्चेति सूत्रेऽपि हि धिन
स्मा वा वीत्वस्वाङ्गादिस्वरणत्वेषु दोष इत्युपक्रम्य। अवीत्वं प्रेपं परेपमिति भाष्योक्तेश्चेति भावः। उदनोर्देशे। दीर्घोच्चारणमवग्रहार्थमित्याकरः। बह्वृचास्तु अनूपे गोमा
न्गोमिरित्यादौ अनूपशब्देनावगृह्णन्ति। अनुगता आपोऽस्मिन्नित्यनूपो देशः। जलप्रायमनूपं स्यादित्यमरः। प्रतिसाममिति। अव्ययीभावः। प्रादिसमासः। बहुव्रीहिर्वा। कृ
ष्णभूम इत्यादयो बहुव्रीहयः। पद्मनाभ इति। पद्माकारा नाभिर्यस्येति गौणेन पद्मशब्देन सामानाधिकरण्याद्बहुव्रीहिः। यद्वा। गड्वादित्वात्सप्तम्याः परनिपातः। एतेनोर्ण
नाभो व्याख्यातः। तत्र ङ्यापोः संज्ञाछन्दसोर्बहुलमिति ह्रस्वो विशेषः। गवाक्ष इति। गावः किरणाः। अचतुरा निपात्यन्त इति। निपातनफलं तु समासविशेषनियमः। दि
लोपादिकं च तदाह। आद्यादिति। बहुव्रीहय इति। बहुव्रीहय एवेत्यर्थः। तेन नञ्तत्पुरुषे अचत्वार इत्येवेति भावः। त्रिचतुरा इति। त्रयश्चत्वारो वेति विग्रहः। संख्य
याव्ययेति बहुव्रीहिः। बहुव्रीहौ संख्येये डजिति डचोऽपवादोऽच्। अक्षिभ्रुवमिति। प्राण्यङ्गत्वादेकवत्। ऊर्वष्ठीवमिति। सक्थि क्लीबे पुमानूरुरित्यमरः। नामरूप
वीष्ठीवदन्त्रियामिति च। सरजः पङ्कजमिति। कथं तर्हि सरजसमपहाय केतकीनां प्रसवमित्यादि। सरजसमकरन्दनिर्भरासु प्रसवविभूतिषु वीरुधां विरक्त
इति प्रमाद एवायमित्याहुः। गोष्ठश्वेति। एतेन सप्तमीत त्सु रुष एवेति नियमं दर्शयति। षष्ठीतत्पुरुषेति गोष्ठश्वेत्येव ॥ श्वःश्रेयस्येति विग्रह इति भावः। प्रमाद एवेति। प्रसव
शब्दस्य नपुंसकत्वमेवेति मतेनेदम्। पुल्लिङ्गत्वे तु पुष्पवाचिप्रसवविशेषणत्वेन द्वितीयान्तमाद्यश्लोके चं विनापि साध्वेव ॥

न्तत्म्। सर्वतोव्याप्तम्। वसुमान् यत्त इति। एवंच वसुमच्छब्दादीयसुनि वसीय इतीति श्रुत्या लभ्यते। स्पष्टं चेदं तैत्तिरीयोपनिषदः शाङ्करभाष्ये तद्वार्तिके च।
वसुमन्शब्दादीयसुनि अस्मादेव निपातनात् साध्विति पक्षान्तरमपि तत्र। विषयमिति। विषयभूतमित्यर्थः। आशीर्विषयताया इति। तेनाशीर्लिङन्तसमभिव्याहा

ब्रह्मवर्चसमित्यादी षष्ठीतत्पुरुषौ। वर्चो दीप्तिः। पलं मांसमर्हतीति पल्यः। मांसभोजी तदीयं वर्च्चः। पल्यवर्चसम्। अवतमसमित्यादि। अवहीनं संततं च तम इति विग्रहः। अन्धमिति। गाढमिति फलितोर्थः। अत एव ध्वान्ते गाढेन्धतमसं क्षीणोऽवतमसन्तमः। विष्वक् संतमसमित्यमरः। श्वसो॥ वसुशब्द इति। एतेन अवसशब्दादीयसुनि अवसीय इति व्याचक्षाणा आकरविरोधादुपेक्ष्या इति ध्वनयति। वसीय इति। तथा च श्रूयते। यः कामयेत वसीयान्स्यामिति वसुमान्यज्ञो वसीयान् भूयासमिति च। श्वस्शब्द इति। यद्यप्ययमन्यत्र कालविशेषे वर्तते। तथापीह समासे उत्तरपदार्थभूतां प्रशंसामाशिषो विषयमाह। आशीर्विषयताया द्योतकोयमिति यावत्। एतच्च रक्षितरीत्योक्तम्। श्वस्शब्दस्येहार्थ एव नास्तीत्यपि सुवचम्। उत्तरपदार्थमात्रवृत्तित्वं वास्तु। उक्तं च पाणिनीयमतदर्पणे। अर्थपरपदस्येह श्वः शब्दः कालवाच्यपि। अभिधत्ते स्वभावेन तेनेमौ मङ्गलार्थकाविति।१। अन्ववारह इत्यप्रकाशमुच्यते। अनुगतमवहीनं च रह इति प्रादिसमासः। अनुगतं रहोऽस्मिन्नित्यादि बहुव्रीहिर्वा। तप्तमिव तप्तं परेणानधिगम्यं हि यद्रहो वह्निनाप्तवत्। तप्तं च तद्रहश्चेति नतप्तरहसं विदुः। नपूजनात्। इह ततः प्रागिति। प्राक् बहुव्रीहिग्रहणं कर्तव्यमिति वार्तिकोक्तेरिति भावः। प्राचा तु बहुव्रीहौ सक्थ्यक्ष्णोरनिषेध इत्युक्तम्। तन्न्यूनम्। इत्यादावित्यध्याहारेण वा योज्यम्। तेन सुप्रा अत्यूध्नी इत्यादि सिद्धम्। नञस्तत्पुरुषात्। नञ इति षष्ठी। इति सकलसमाससाधारणाः समासान्ताः॥

रे एवास्य साधुत्वमिति भावः।

प्राग्बहुव्रीहेरिति। बहुव्रीहौ संख्येये इत्यतः प्राक् समासान्तविधेरभावाद्बहुव्रीहौ सक्थ्यक्ष्णोरित्यपि वतन्त्रग्रहणमिति भावः॥ इति साधारणसमासान्ताः॥

म॰श॰ स्तौकान्मुक्तिरिति। स्तोकशब्दादेर्वृद्धिः प्रयोजनं निषेधाश्च बलीयांस इति न्यायेन तद्धितनिमित्तलुकोपि निवृत्तिरिति बोध्यम्। ऐकस्वर्यमपि समासफलं बोध्यम्। समास
१८२ श्चास्त्रे पठिता एवेति। उत्तरपदाक्षिप्तसमासस्य प्रतिपदोक्तत्वात्स्तोकान्तिकेति विहितस्यैव ग्रहणेनोपस्थितत्वात्तत्रत्यानामेव ग्रहणं न तु करणे च स्तोकेति सूत्रे प
स्तोकान्मुक्त इति। समासप्रयोजनं तु स्तोकान्मुक्तस्यापत्यं स्तौकान्मुक्तिः। स्तोकान्मुक्तायाः स्तौकान्मुक्तेयः। इह स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेनेति समा
सश्चास्त्रे पठिता एव स्तोकादयो गृह्यन्त इत्याशयेनाह। एवमिति। ओजः सह। कथं तर्हि सततनैशतमोवृतमन्यत इति भारविः। अत्र दुर्घटवृत्तिकृत्। उत्त
रपदाधिकारे सदन्तग्रहणं नास्ति किंतु केवलपदाधिकार एवेति। तन्न। भाष्ये पदाङ्गाधिकार इत्यत्र इष्टकेषीकेत्यादेः प्रयोजनत्वेनोदाहरणात्। यदपिह
रदत्तादय आहुः। उत्तरपदाक्षिप्तेन पूर्वपदेनेह ओजःप्रभृतयो विशेष्यन्ते पूर्वपदभूतेभ्य ओजःप्रभृतिभ्य इति। न चात्र तमःशब्दः पूर्वपदं किंतर्हि सततनै
शतमःशब्दः। यत्र तु तदन्तविधिरिष्यते तत्रोपात्तेनाक्षिप्तं विशेष्यते। यथा इष्टकेषीकेत्यादाविति। तदपि चिन्त्यम्। भाष्यवार्तिकविरोधात्। विशेष्यविशेष
णभावव्यवस्थार्थमेव पदाङ्गाधिकार इत्यादीनां प्रवृत्तिरिति कैयटवदेव स्वयमपि व्याख्यातत्वात्। भारविप्रयोगस्त्वित्थं समाधेयः। वृत्तं वृत्तिः। नैशतमसो
वृत्तीति षष्ठीतत्पुरुषः। नपुंसके भावे क्तस्य योगे शेषविवक्षायां षष्ठी। ततः सततं नैशतमोवृत्तं यस्मिन्निति बहुव्रीहिः। यद्वा वृत्तु वर्तते घञर्थे कविधानमि
ति भावे कः। शेषं प्राग्वत्। पूरण इति वक्तव्यमिति। इह आत्मनश्चेत्यंशोपि वार्तिकान्तर्गतः न तु सूत्रमिति केचिद्भ्रमन्ति तन्नादर्तव्यमिति भावः। तथाहि
सति उत्तरसूत्रे आत्मान इति न लभ्येत ॥ ७५ ठिनानामिति भावः। भाष्यवार्तिकविरोध इत्यस्य तद्व्याख्यानग्रन्थविरोध इत्यर्थः। तमुपपादयति। विशेषणे
त्यादि[illegible]रितु तदारम्भोपि पादस्य पदेति सूत्रेण दिग्धपादोपहतमित्यादेश्चवारणाय विशेष्यविशेषणभाववैपरीत्यस्य तत्र सूत्रे भाष्य एवाश्रयणेनात्रापि तथाश्रयणे राम:
बाधकाभाव इत्याहुः। आम्नन्तीति। आत्तामिनिचा आत्मनश्च पूरणे। आत्मनश्च पूरणे उपसंख्यानं कर्तव्यमिति भाष्यं भ्रमे मूलम् ॥ १८३

विशे किनामिति।आत्मनश्चेतिसूत्रेआज्ञायिनि चेत्यनुवृत्तिप्रदर्शनार्थंभाष्येसूत्रद्वयग्रहणम्।अतएवात्मनश्चेतिसूत्रेचः सार्थकः।व्याख्यानभाष्येआत्मनश्चेत्युक्ते खलु वार्तिकस्याज्ञायिनिचेत्येतत्साधारणत्वभ्रमव्यावृत्तये इतितेषांभावः।भेदंपरिकल्प्येति।आत्मत्वेनवर्त्तिपदार्थता।जनार्दनत्वेनान्यपदार्थतेतिभावः।अधिक

परस्यचेतितदुत्तरसूत्रंचव्यर्थमेवस्यादितिस्पष्टमेव।विशे किनाम्।बहुव्रीहिर्बोध्य इति।एकस्यापिवस्तुनोभेदंपरिकल्प्यवर्त्तिपदार्थत्वमन्यपदार्थत्वंचविवक्षणीयमितिभावः।वैयाकरणाख्यायाम्।व्याकरणेभवावैयाकरणी।अणृगयनादिभ्य इत्यण्।साचासावाख्याचेतिकर्मधारयः।आत्मनेभाषाइति।यद्यपीयमाख्याशाब्द्याख्यां न दृष्टा तथापिवैयाकरणीभवत्येव।धातुसूत्रगणोणादिवाक्यात्मकं पञ्चप्रस्थानंव्याकरणमितिस्वीकारात्।अस्याश्चधातुपाठेदृष्टत्वात्।ननुविकृतिप्रकृतिभावविरहात् रन्धनायस्थालीतिवत् समासोनस्यादतआह।योगविभागादिति।एतच्चवृत्तिन्यासावनुसृत्योक्तम्।अलुग्विधिसामर्थ्यादित्यपीहसुवचम्।हृदिस्पृगिति।हृदयंदिवंचस्पृशतीतिविग्रहः।कर्मणोऽधिकरणविवक्षायासप्तमी।भाष्येतुकर्मण्येवसप्तमीत्युक्तम्।अलुग्विधिरेवज्ञापक इतितदाशयः।अपृक्तस्य इति।दिगादित्वाद्यत्।ओर्गुणः।वान्तो यि।प्राचा तु यत्स्थानेजशब्दंपठित्वाऽप्सुज इत्युदाहृतम्।तदाकरविरोधादुपेक्ष्यम्।अप्सुज इतितुहलदन्तादित्येवसिद्धम्।अप्सुमन्तावितिकारीर्य्यामाज्यभागौ ॥

रणत्वविवक्षयेति।ग्रामंगच्छतीत्यादाविवफलसमानाधिकरणंव्यापारस्यधात्वर्थत्वविवक्षयातस्यतत्त्वविवक्षेतिबोध्यम्।अन्यथापरत्वात्कर्मसञ्ज्ञयातस्याबाधः स्यात्।अधिकरणसञ्ज्ञांकर्मसञ्ज्ञाबाधते।गेहंप्रविशतीतियथेत्याकडारसूत्रेभाष्यात्।वस्तुतः फलस्यहृदयनिष्ठतयाप्रतीतावेवास्यप्रयोगस्यसाधुत्वमित्याह।भाष्येत्विति।हलदन्तादित्येवेति।इत्यपीत्यर्थः।तत्पुरुषेकृतीत्यस्यापिनासङ्ग्रहः ॥

नोक्तदोषेति। अनित्यत्वान्मतुपः सिद्धिस्तदाश्रयणाच्चलुकः प्राप्तिरितिभावः। ताद्रूप्या[illegible]विति। दृश्यमानोपि भाष्ये तथा पाठोऽसांप्रदायिकोहरदत्तविरोधादितिभा
वः। उक्तत्वाच्चेति। एतत्सर्वं हरदत्तानुरोधेनोक्तमित्यन्यत्र विस्तरः। मूर्खादीति। ब्रह्मज्ञानरहितादित्यर्थः। तेहि पशुवद्देवनियम्यास्तदाह। देवपशुत्वादिति। पाक्षिक

अप्स्वग्ने संधिष्टव अप्सुमे सोमो अब्रवीत्। इत्यनुवाक्ये। तत्रं चाप्सुशब्दोस्ति। नन्वेवं प्रकृतिवदनुकरणमित्यतिदेशेन अप्सु इति सोः प्रत्ययात्तदन्तात् प्रथमाया अभावे मतुबेव दुर्लभः। अतिदेशप्रवृत्तौ तु सोर्लुकः प्राप्तिरेव नास्तीति चेत्। सत्यम्। अतिदेशस्य वैकल्पिकत्वान्नोक्तदोषद्वयमपि। वैकल्पिकत्वे प्रमाणं तु यत्तदेतेभ्य इति सौत्रनिर्देश उक्तः। प्रकृतवार्तिकमपि तथेति ज्ञेयम्। यत्तु प्राचामतिषिति पठित्वा अप्सुमतिरित्युदाहृतम्। तद्भाष्यादौ न दृष्टम्। यत्तु वदन्ति। मतुषिति पाठे सप्तम्यन्तान्मतुपः कथं संभव इति चिन्त्यमिति। तदेव चिन्त्यम्। पाठान्तरस्यानाकरत्वात्। मतुपः संभवस्योक्तत्वाच्च। पश्यतोहर इति। षष्ठी चानादर इति षष्ठी। पश्यन्तमनादृत्य हरतीत्यर्थात्। देवानामिति। मूर्खा हि देवानां प्रीतिं जनयन्ति। देवपशुत्वात्। शुन इव शेपमस्य शुनःशेपः। शेपशब्दो हि अकारान्तोप्यस्ति। शीङो नीपादित्यादौणादिकः प्रत्ययः। तथा च मन्त्रः। यस्यामुशन्तः प्रहरेम शेपमिति। एवं पुच्छलाङ्गूलाभ्यामपि बहुव्रीहिः। ऋषिविशेषाणामेताः सञ्ज्ञाः। बह्वृचब्राह्मणादौ प्रसिद्धाः। मातुः पितुर्भ्यामिति सूत्रे समास इत्यनुवर्तितम्। तस्य फलमाह। असमासे त्विति। इह पाक्षिकमपि षत्वं नेत्यर्थः॥ इत्यलुक्समासः॥ घरूप। चेलडिति पचादौ टित्त्वं क्रियते ङीबर्थम्। ब्राह्मणितरेति। तसिलादिष्विति पुंव[illegible]वस्तु न। जातेश्चेति निषेधात्। एतेन पुंवद्भावं बाधित्वा परत्वाद्ध्रस्व इति व्याचक्षाणाः परास्ताः आमलकीतरेति॥

मपीति। नित्यस्य प्राप्तिरेव न। व्यवधानात्॥ इत्यलुक्समासः॥ परास्तादिति। निषेधसत्त्वेन पुंवत्त्वप्राप्तेरेवाभावादितिभावः। यद्वितरेत्यादौ तु परत्वादिति वक्तुमुचितम्॥

नित्यस्त्रीलिङ्ग इति। वृक्षजातिः स्त्रियामिति लिङ्गानुशासनसूत्रादिति भावः। आम्र इत्यादिदर्शनात्तत्क्वाचित्कमित्यन्यत्। शौनकस्त्वारलस्तिष्यफला त्वामलकी त्रिषित्यमरात् तिष्यफलाख्यामलकाविशेष्यस्य त्रिलिङ्गत्वमपि। तस्मादेव तु शब्दादन्या नित्यस्त्रीलिङ्गेति लभ्यते। नायन्तु शब्दस्यारलपर्यायत्वं तिष्यफलायामावर्तयि आमलकीशब्दो वृक्षे नित्यस्त्रीलिङ्गः। एवं कुवलीशब्दः। नद्याः पूर्वसूत्रेऽश्रुतादन्यः शेषः स च द्विधेत्याह। अङ्कोल्लेति। निर्मूलमिति। यत्तु वृत्तिकृतोक्तं पुंवद्भावोऽत्र पक्षे वक्तव्यः। श्रेयस्तरा। विदुष्तरा। प्रकर्षयोगात् प्राक्स्त्रीत्वस्याविवक्षितत्वात् सिद्धमिति। अत्रेदं वक्तव्यम्। इह पुंवद्भाव इत्यादि मुनित्रयानुक्तत्वादप्रामाणिकम्। सूत्रकृता हि तसिलादिष्विति नित्य एव पुंवद्भाव उक्तः। न तु पाक्षिकः। भाष्यवार्तिकयोरपि नाधिकमुक्तम्। प्रमाणतामभ्युपेत्यापि ब्रूमः। कथमिह वचनं व्यज्यते पुंवद्भावो यः प्राप्तः सोऽत्र पक्षे वक्तव्य इति उत पुंवद्भाव एव वक्तव्य इति। आद्ये पुंवद्भावनिषेधार्थमिदं वचनं स्यात्। तथा च द्वितः प्रागेव त्वदुदाहृतानि श्रेयसीतमा विदुषीतमा विदुषीतरेति दीर्घङीविशिष्टानि रूपाणि सिध्यन्तु नाम। प्रकर्षयोगादित्यादि त्वदीयग्रन्थस्त्वसङ्गत एव स्यात्। स हि उपसंख्यानं प्रत्याचष्टे इति न्यासकृतावतारितः। प्रत्याख्यानं च तस्य पुंवद्भावफलकत्वे सत्येव स्यात्। न तु तन्निवृत्तिफलकत्वे। वस्तुतस्तदपि न। ङ्याब्ग्रहणं तद्धितविधानार्थमित्युक्तत्वात्। स्वार्थद्रव्यलिङ्गाद्यनुत्तरमेव प्रियकुत्सनप्रकर्षादिविवक्षेति भाष्ये निर्णीतत्वाच्च। द्वितीयस्तु सम्भवेद्यदि तसिलादिमध्ये तरप्तमपौ न परिगणयेयाताम्। तौ तु सर्वैरेव परिगणितौ। दर्शनीयतरा दर्शनीयतमेति चोदाहृतम्। न च वृत्तिग्रन्थे विदुषीतमेत्यादिदीर्घोपन्यासः स्थितिप्रदर्शनपरो न तु त्रैरूप्यपर इति वाच्यम्। प्रकर्षयोगादिग्रन्थशेषविरोधात्। तस्मादसङ्गत एवायं वृत्तिग्रन्थ इति। एतच्च सर्वमिति मन्यत इति वदता हरदत्तेन ध्वनितम्। न्यासकारस्य तु इदमुपसंख्यानमिति भ्रमः तत्प्रत्याख्यानं युक्तमिति भ्रमः स्वास्त्येवेति तद्ग्रन्थदर्शिनां स्पष्टमेव ॥ ७ तुंस्त्रीलिङ्गनिर्देशेनैव तद्व्यावृत्तेरित्याहुः। तदपि नेति। प्रकर्षयोगात् प्रागित्यस्योक्तिसम्भवो नेत्यर्थः। इनिदिगिति। दिगर्थस्तु यद्यपि विदुषीतरेति रूपासङ्गतिं शङ्कते। पुंवद्भावोऽत्रेति ॥

पक्षे। ह्रस्वाभावपक्षे इत्यर्थः। तत्पक्षे पुंवद्भाव एवोदाहर्तुमुचितो न तु दीर्घ इति भावः। समाधत्ते। प्रकर्षयोगादिति। एवं तथा पूर्वकर्मा विवक्षयैव विद्वत्तरेत्यादेः स्त्रि द्वौ। ह्रस्वविकल्पविधानसामर्थ्यात्पक्षे दीर्घग्रहणम्। कृतपूर्वीकटमित्यादौ यथा पूर्वं कर्मा विवक्षा पश्चात्तत्संबन्धे एवं प्रकृतेपि पूर्वं सामान्येन पुंस्त्वविवक्षां कृत्वा तत एव तरपि पश्चात्तदर्थविशिष्टे स्त्रीत्वविवक्षा स्वार्थे स्यादेरपि यल्लिङ्गं पूर्वं विवक्षितं तत्त्वात्कार्यमन्तरङ्गमित्येष एवार्थ इति वृत्तिग्रन्थे योजना कर्तुं शक्या। तथापि प्र

एवं स्थिते पक्षे पुंवद्भावो वक्तव्य इति प्रक्रियाग्रन्थः न्यायसिद्धमिदमित्यादि तद्व्याख्यातृग्रन्थश्च वृत्तिन्यासोक्तार्थानुवादी मूलशैथिल्यादनादर्तव्य इति दिक्। पादस्य पदा। पदेति सौत्रो विभक्तिलुक्। ऋचः शे। शा इति शस्प्रत्ययस्येदमेकदेशानुकरणम्। उदमेघ इति। साहचर्यात्पुरुषस्येयं सञ्ज्ञा। उदपेषमिति। स्नेहने पिष इति णमुल्। उदधिर्घट इति। उदकं धीयते स्मिन्निति विग्रहः। कर्मण्यधिकरणे चेति किप्रत्ययः। उदमन्थ इति। द्रव द्रव्यसंस्कृताः सक्तवो मन्थाः। तृतीयेति योगविभागात्समासः। ष्यङः संप्रसारणम्। इह तत्पुरुष इत्यनेन पूर्वपदमुत्तरपदं च आक्षिप्यते इत्याशयेनाह। पूर्वपदस्येति। उत्तरपदयोरिति च। इहोत्तरपदेन पुत्रवतीति विशेष्यते न तु विपरीतं तेन कारीषगन्ध्यापरमपुत्र इत्यत्र नातिप्रसङ्गः। मालभारीति। मालां बिभर्तीति ताच्छील्ये णिनिः। केचित्तु हारिषिति पठन्ति। कारे सत्यागदस्य। सत्यङ्कारः ———— समयकरणम्। अशपथेपि परत्वाद्गुणं बाधित्वा मुम्। अगदङ्कारो वैद्यः ॥

कृतविषये स्वार्थस्य भाष्यानुक्तत्वादीदृशोर्थः प्रकृतेन साधुत्वनियामक इति। शस्प्रत्ययस्येति। लोमादिषु पादशब्दपाठाभावादिति भावः। संख्यैकवचनादिति शस्। योगादिति। सुसुपेत्युचितम्। आक्षिप्यते इति। तत्र पूर्वपदं ष्यङो विशेष्यं तेन ष्यङन्तग्रहणम्। ष्यङ्मात्रस्य पूर्वपदत्वाभावादिति बोध्यम्। समयकरणम्। शापथकरणम्। सत्यंकारः। शपथकर्त्ता च। वैद्य इति। विषप्रतिपक्षद्रव्यकरणं चेत्यपि बोध्यम् ॥

अभ्युपगमइति। तत्कर्त्री चेत्यपि बोद्ध्यम्। अव्ययमिति। तिङन्तानुकरणमित्यन्ये। हरदत्त इति। कैयटश्चा[illegible]ऊचत एवेति। तेन तदर्थोऽपीति भावः। कइति। अचि विभाषेति लत्वम्। इ
अस्तु[illegible]ऽभ्युपगमः। अस्त्विति तिङन्तप्रतिरूपकमव्ययम्। धेनुंभव्येति। भव्यगेयेति कर्तरि कृत्यः। धेनुश्चासौ भव्या चेति विग्रहः। भविष्यन्ती धेनुरित्यर्थः। गौतमस्मृतौ
तु स्नातकधर्मेषु अधेनुं धेनुभव्येति ब्रूयादिति प्रयुक्तं तत्रार्षत्वान्मुमागमो नेति। तद्व्याख्यायां मिताक्षरायां हरदत्तः। लोके पृण इति। पृणतिः पूरणकर्मेति हरदत्तः। प्रीणन इ
ति तु पठ्यते एतत्। अनभ्याशमित्य इति। अभ्याशं समीपं तद्भिन्नमनभ्याशं दूरम्। एतिस्तुशास्वृदृजुषः क्यप्। भ्राष्ट्रमिन्ध इति। कर्मण्यण्। घञन्तेन वा षष्ठीसमासः।
तिमिङ्गिल इति मत्स्यविशेषः गिरतेर्मूलविभुजादित्वात्कः। गिल गिले चेति। गिलङ्गिलतीति गिलगिलः तिमीनां गिलगिल इति विग्रहे इदमारब्धम्। नित्यमेवेति। पूर्ववि
प्रतिषेधेनेति भावः। सज्योतिरिति। समानं ज्योतिरस्येति बहुव्रीहिः। यस्मिन्ज्योतिष्यादित्येन क्षेत्रे वा उपनिपतितं तदस्तमयपर्यन्तमनुवर्तमानमाशौचं सज्योतिरित्यु
च्यते। पृषोदरादीनि यथोपदिष्टम्। निरुक्तादिशास्त्रसिद्धानामसमासपदानामुणादयो बहुलमिति सिद्धिः। अनेन तु समासपदानामिति विवेक इति हरदत्तः। वस्तुतस्तु
समासविषयकमेवेदमिति न नियमः। हंससिंहशब्दयोरपि प्राचा कारिकायामुदाहृतत्वात्। हन्तेः पचाद्यचि समागमः। हिंसेः पचाद्यचि हकारसकारयोः स्थानव्यत्ययः। यदि तु
भवेद्वित्यादिश्लोकस्यापि प्रकृतसूत्रोदाहरणतायां नाग्रहः किंतु नैरुक्तव्युत्पत्तिरनेकधेत्येतावन्मात्रं तदा हरदत्तोक्तविवेकोऽपि निर्बाध एवेति दिक्। आकृतिगणोऽयमि
ति। तेनान्यदपि सिद्ध्यति। यथा लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि। समो वा हिततयोर्मांसस्य पचि युड्घञोः। अन्तमिति शेषः। कृत्यप्रत्ययान्ते उत्तरपदे ऽव
श्यंशब्दस्यान्त्यमकारं प्रमाल्लुम्पेत्। तथा कामशब्दे मनस्शब्दे च परे तुम्शब्दस्यान्त्यम्। तुमिति षष्ठ्यर्थे प्रथमा। युट्घञ्प्रत्ययपरो यः पचधातुः तस्मिन्परे मांसस्यान्त्यम
कारं लुम्पेदित्यर्थः। अवश्यसेव्यः। गन्तुकामः। गन्तुमनाः। सहितं। संहितः ॥ [illegible]त्यादिश्लोकस्यापीति। भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययादित्यादिश्लोकस्येत्यर्थः। अनेकधेति। उ
णादावेव प्रत्ययोऽन्यश्चेत्येको परेत्रोक्तस्तदा प्रत्ययातिरिक्तकार्यमेवोणादित्वादित्येवमित्यर्थः। तुं काममित्यत्र तुमिति समोऽप्युपलक्षणम्। तेन सकामः समनाः इति सिद्धम् ॥

निपातनादिति। पृषोदरादिषु विशिष्टपाठादित्यर्थः। समास एवेदम्। तेनावश्यं कर्तव्यमित्यादि सिद्धिः। मांसस्येत्याद्यंशः पद्न्निति सूत्रस्थेन मांसपृतनेत्यादिवार्तिकेनापि सूपपादेः नभिधानात्स्तान्तत्वमित्यसाधु। निर्वाह इति। तेन कार्यविशेषे भत्वन्तद्विशेषे पदत्वं चेति भावः। व्याख्यायामिति। तन्मन्त्रपटके कृतावधावितिपदे उक्तमित्यर्थः। तन्नेतीति। असततः। सन्ततः। मांस्यचनम्। मांस्पाकः। इह संयोगान्तलोपाभावोऽपि निपातनाद्बोध्यः। छन्दसि तु [illegible]स्यपादित्वेनापि निर्वाह उक्तः। अपरस्पराः क्रियासातत्य इति सूत्रे सातत्यनिर्देशेनैवैकदेशानुमतिद्वारा पूर्वाचार्यपठितोऽयं श्लोको ज्ञापित इत्याहुः। नहिवृतीति। एषु परेष्विति। उत्तरपदेष्विति बोध्यम्। उपनह्यत इत्युपानत्। संपदादित्वात्कर्मणि क्विप्। निवर्तते इति नीवृत्। प्रवर्षतीति प्रावृट्। मर्माणि विध्यतीति मर्मवित्। रुच दीप्तौ। निरोचते इति नीरुक्। ऋतिं सहते ऋतीषट्। सहेः पृतनर्ताभ्यां चेत्यत्र सहेरिति योगविभागादनुक्तसमुच्चयाद्वाऽस्य षत्वमिति न्यासकारः। पूर्वपदादिति षत्वमिति हरदत्तः। परितनोतीति परीतत्। गमः क्वावित्यत्र गमादीनामिष्यत इतिवचनात्तनोतेर्नलोपः। यत्तु वेदभाष्ये ऋतेन मित्रावरुणावृतावृधाविति मन्त्रस्य व्याख्यायामुक्तं ऋतस्य वर्द्धयितारावित्यर्थेऽन्तर्भावितण्यर्थात् वृधेः क्विप्। नहिवृतीत्यादिना पूर्वपदस्य दीर्घ इति तच्चिन्त्यम्। प्रकृतसूत्रे वृधेरनुपात्तत्वात्। तस्मादन्येषामपीति दीर्घस्तत्र बोध्यः। वनं पुरगा। व्यत्ययेन षष्ठ्याः स्थाने प्रथमेत्याह। वनशब्दस्येति। विद्ध्यर्थ इति। असञ्ज्ञात्वेन पूर्वपदात्सञ्ज्ञायामित्यस्याप्राप्तेरिति भावः। अत एवाह। निपातनादिति। यत्तु व्याचक्षते हलन्तादिति सप्तम्या अलुगिति तन्नेति भावः। प्रथमेति सप्तम्यर्थस्य प्रातिपदिकार्थेऽन्तर्भावादिति भावः। निषाद इति। निषीदत्यस्मिन् पापमिति निषादः। पुलिन्दो मनुष्यजातिः। हलश्चेत्यधिकरणे घञ्। कथं तर्हि प्रतीहारो दौवारिकः। अत्राहुः। प्रतीहारो द्वारम्। तत्स्थ्यात्ताच्छब्द्यमिति। एकचितीक इति। शैषिकः कप्। शुनो दन्तेत्यादि। अत्र केचिद् दंष्ट्रेति ह्रस्वान्तं पठित्वा श्वादंष्ट्र इति बहुव्रीहावेवायं दीर्घ इत्याहुः। अन्ये तु दीर्घान्तमेव पठन्तस्तत्पुरुषस्याप्युदाहरणतामाहुः। इह षादिति ॥ ७ सञ्ज्ञात्वाद्धलदन्तादित्यस्याप्राप्तेरित्यर्थः। सप्तम्यर्थस्येति। अग्रे शब्दार्थस्य प्राधान्येऽपीति भावः।

कथमिति। दौवारिके प्रतीहारपदप्रयोगः कथं साधुरित्यर्थः। तत्पुरुषस्यापीति। एकदेशविकृतन्यायेन बहुव्रीहेरपीत्यर्थः। शौवादंष्ट्रो मणिरिति ष्यादेरिञीति सूत्रे भाष्यप्रयोगादिति बोध्यम् ॥

वक्तव्यमिति। तत्सद्घटितं वार्त्तिकमित्यर्थः। चत्वार्यङ्गान्यस्य ति। न चोत्तरपदत्वे चेति निषेधात् कथमङ्गशब्दस्य पदत्वम्। प्रत्यासत्त्योत्तरपदस्य कार्यित्व एव तन्निवृत्तेरित्यन्यत्र वि
केचित्तु क्रोश्येति तालव्यमध्यं पठन्ति तत्राप्यमादिकमिति भावः। शिरीषवणमिति। ननु यस्य फलमेव न पुष्पं स वनस्पतिः। वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिरित्य
मरकोशात्। स च उदुम्बरादिः। शिरीषस्तु न तथा तस्य पुष्पफलोभयसत्त्वात्तत्कथमिह णत्वमिति चेत्। सत्यम्। इह वनस्पतिशब्देन वृक्षमात्रमुपलक्ष्यते। अत्र च लिङ्गं लुपियु
क्तवदिति सूत्रे व्यक्तिवचने इति किं शिरीषाणामदूरभवो ग्रामः शिरीषास्तस्य वनं शिरीषवनम्। वनस्पतित्वमतिदिश्येत ततश्च णत्वं स्यादिति भाष्यकारोक्तिः। इरिकादिभ्य इति।
ओषधित्वात्प्राप्तिः। क्षीरपाणा उशीनरा इति। उशीनरशब्दो देशवाची। तद्वासिष्वौपचारिकः। गिरिनद्यादीनामिति। वक्तव्यमेतत्। सञ्ज्ञायां प्राप्ते असञ्ज्ञायामप्राप्ते उभयत्र विभाषे
यम्। माषवापिणाविति। बहुलमाभीक्ष्ण्ये इति णिनिः। व्रीहिवापाणीति। कर्मण्यण्। उत्तरपदं यदिति। अत्र च व्याख्यानमेव शरणम्। प्राञ्चस्तु नुमग्रहणमिह ज्ञापकमित्याहुस्तद्दूषय
ति। अत एवेति। ज्ञापकं शिथिलमिति ध्वनयति। किं चेति। परिपक्वानीति। अत्र कुमति चेति नित्यं णत्वं प्राप्तम्। हरिमाणीति। मनेर्ण्यन्तात् क्विप्। प्राक् सुबुत्पत्तेः। समासात् नकारा
न्तमुत्तरपदम्। नान्तत्वान्ङीब् त्वम्। चतुरङ्गयोगेनेति। चत्वार्यङ्गान्यस्य तेन योग इति विग्रहः। अतद्धित इति। व्यवधायकस्य पदस्य तद्धितश्चेत्यरो न भवति तदा निषेध इत्यर्थः।
आर्द्रगोमयेणेति। अत्र गोशब्दः पदम्। पारस्कर इति। पारङ्करोतीति विग्रहे कृञो हेतुताच्छील्येति टः। किष्किन्धेति। किङ्किं दधातीति विग्रहे आतोऽनुपसर्गे कः। पूर्वस्य किमो नलोपः सु
ड्षत्वञ्च निपात्यते। रूढिशब्दाश्चैते कथंचित् व्युत्पाद्याः। तद्बृहतोरिति गणसूत्रम्। तादिति। तलोपश्चेत्यत्र चेति भावः। चत्वेन सुपलक्षणम्। झरो झरीति लोपस्यापि सुवचत्वात्। दकारत
कारौ विनि। नद्दहंभ्यां यथासंख्यं बो ध्वम्। प्रायस्येति। प्रायः पापं विनिर्दिष्टं चितं तस्य विशोधनमिति स्मरणात्। आकृतिगणोऽयमिति। तेन परः शता इत्यादि सिद्धम्। अधिश्रयन्तीर्जन
ताः परः शताः इति माघः। शतात्परा इति विग्रहे पञ्चमीति योगविभागात्समासः। राजदन्तादित्वात् परनिपातः। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। लोकाश्रयत्वाल्लिङ्गस्य विशेष्यनिघ्न
ता। पारस्करादित्वात् सुडिति दिक्॥ ॥ इति समासाश्रयविधयः ॥ ७ स्तरः। पञ्चमीति योगविभागादिति। सुप्सुपेतीत्यन्ये॥ ॥ इति समासाश्रयविधयः ॥ ॥

समर्थानाम्।अलुग्विधानाच्चेति।तेनहिस्वार्थेपरिपूर्णस्यैवपदान्तरसंबन्धइतिबोद्ध्यतइतिसुबन्तात्तल्लब्धिः।कुत्सितइतिसूत्रभाष्योक्तरीत्यातत्सिद्धेरितिभावः।किंचतत्संबन्ध्यपत्यमित्य
र्थप्रत्ययइत्यादिरीत्यातस्यापत्यमित्यादेर्वाक्यार्थइतिसंबन्धादिबोधनार्थंविभक्त्युत्पत्तिरावश्यकीतिदिक्।[illegible]उचितमिति।ञयइत्यस्यवैकल्पिकत्वेपिभावानुष्ठानेधर्माधिक्यादुचितमित्यर्थः
समर्थानाम्।ननुप्रकृतसूत्रेएकार्थीभावरूपंसामर्थ्यंग्रहीतुंनोचितम्।समर्थःपदविधिरितिपरिभाषयागतार्थत्वात् घकालतनेष्विति अलुग्विधानाद्धिसुबन्तात्तद्धितोत्प
त्तिः तथाचपदविधित्वंस्पष्टमेवअतआह।सामर्थ्यमिति।कृतेत्यादि।अस्यफलंतुतस्यापत्यमितिसूत्रेमूलएवस्फुटीभविष्यति।इहसमर्थात्प्रथमादितियुक्तंवक्तुम्।महोत्सर्गं
नाह।प्राग्दीव्यतोण्।अश्वपत्यादिभ्यश्च।प्राग्दीव्यतीयेष्विति।दीव्यतःप्राक्प्राग्दीव्यत्।अपपरिबहिरञ्चवः पञ्चम्येत्यव्ययीभावइत्याहुः।प्राग्दीव्यतमितितुउचितम्।ञयइतिट
त्प्रवृत्तेः।ततोभवार्थेवृद्धाच्छः।स्यात्पुन।अमेहेत्यादिपरिगणनात्।अव्ययीभावस्याव्ययत्वेप्रयोजनंलुङ्मुखस्वरोपचाराइतिपरिगणनाच्च।अचामादेरिति।निर्धारणेषष्ठी।ते
नार्थसिद्धमाह।अचइति।अचोञ्णितीतिसूत्रादचइत्यस्यानुवृत्तिरपीहसुवचा।प्रामादिकमेवेति।यद्यपिचातुर्वर्ण्यादेराकृतिगणत्वात्ष्यञा एतत्सूपपादंत
थापिहरदत्तग्रन्थानुरोधादेवमुक्तम्।दित्येदित्यापूर्वपतिशब्दस्योत्तरपदशब्देनबहुव्रीहिंकृत्वादित्यादिभिर्द्वन्द्वः कार्य्यइतिव्याचष्टे।दित्यादिभ्यः पत्युत्त
रपदाच्चेतिपत्यन्तादितितुनोक्तम्।बहुच्पूर्वादपिप्रसङ्गात्।दैत्यइति।ननुदितेर्ण्यप्रत्ययोदेवताद्यर्थेसावकाशः।अपत्येतुपरत्वादितश्चानिञइतिढक्स्यात्।
सत्यम्।पठ्यतेतत्रपूर्वविप्रतिषेधः ण्यादयोर्थविशेषलक्षणादणपवादात्पूर्वविप्रतिषिद्धमिति।अर्थविशेषेकिम्।औष्ट्रपतम्।उष्ट्रपतिर्नामपत्तनम् ॥
।अतएवदैत्यदित्ययुक्तमितिनोक्तम्।तान्ताच्छेअव्ययानाम्भमात्रेइतिटिलोपवारणार्थन्तस्यानित्यत्वाश्रयणेक्लेशः स्यादित्यभ्यस्योचितत्वंबोद्ध्यम्।परिगणनाच्चेति।इयंसमु
च्चययुक्तिः।भाष्येतत्प्रत्याख्यानात्।एवमुक्तमिति।स्त्रीनपुंसकत्वापत्तिः।स्वरेभेदश्चेति।हरदत्ताशयइतितदनुरोधइतिभावः ॥

ॐ

५

परिषदश्चेत्यञिति। नच पत्रात् वाह्ये इत्युक्तेरयमप्यर्थो विशेषलक्षणइति वाच्यम्। इदमिति सामान्यशब्देन तद्विशेषसङ्ग्रहात्। विशेषलक्षणप्रत्ययत्वे विशेषशब्दोपादानेन बोधितार्थकप्रत्ययत्वमिति भावः। दितिशब्दादिति। क्विजन्तादिति शेषः। एवमदितेरपि। ङीपि कृते इति। क्विजन्ताभ्यामिति शेषः। नपदान्तेति। पूर्वत्रासिद्धे नेति निषेधोप्यत्र बोध्यः। निर्वातस्येदम्। पत्राध्वर्युपरिषदश्चेत्यञ्। अथ कथं दैतेय इति। अत्राहुः। दितिशब्दात् कृदिकारादक्तिनइति ङीषि कृते स्त्रीभ्यो ढक्। एतत्तु नालिङ्गविशिष्टपरिभाषाया अनित्यत्वादिति। आदित्यइति। आदित्यशब्दात् ण्यप्रत्यये यस्येति लोपे हलो यमां यमि लोप इति यलोपः। नचाल्लोपस्य स्थानिवद्भावः। नपदान्तेति यलोपे तन्निषेधात्। काशिकायामिति। हरदत्तमाधवादिग्रन्थेष्वेवम्। तथा च प्रयोगः। नाप्नुयामशतशोप्यादित्यः पुनर्यातनाइति। भाष्ये तु नैतद्दृष्टम्। तत्र ष्यञ्प्रयोगो निर्वाह्यः। बहिषइति। टिलो॰ यञ्वचनमव्ययानांभमात्रइत्यस्यानित्यत्वज्ञापनार्थम्। तेनारातीयइत्यादि सिद्धम्। एवंप्रकृते यञ्वचनमाद्युदात्तार्थम्। प्राचां ग्रन्थे तु यण्चेति पठ्यते तदनाकरम्। अश्वत्थामइति। भाष्योदाहरणादेवेह तदन्तविधिः। अन्यथा बलवाचिनः स्थामन्शब्दस्य केवलस्यापत्येन योगाभावेपि जातादिष्वेव विधिः स्यात्। अश्वस्येव स्थामयस्येति बहुव्रीहौ पृषोदरादित्वात्सस्य तः। गोरिति। नकेवलमपत्यएव किंतु सर्वेषु प्राग्दीव्यतीयेषु। गव्यमिति। गवि भवं गोरिदं गौर्देवतास्येत्यादिरर्थः। अनेन हि गव्यमिति जैमिनीयसूत्रे विद्यमानं दूषयन्तो वार्त्तिककाराः समाहिताः। केचित्तु प्राग्दीव्यतीयेभ्योऽन्यत्राप्यर्थे अयं यदिति व्याचक्षाणाः गवा चरति गव्य इत्याद्यप्याहुः। गोरूप्यमित्यादि। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः मयट् चेति रूप्यमयटौ। उत्सादिभ्योऽञ्। अपवादस्तदपवादानामिञादीनाञ्चापवादोऽयम्। इह पठ्यते। वष्कयासे। असे असमासे। पूर्वाचार्यसञ्ज्ञेयम्। वष्कयस्यापत्यं वाष्कयः। असे किम्। गोवष्कयिः। असइत्येतदेवेह तदन्तविधिं ज्ञापयति। तेन अधेनूनां समूहः आधेनवइति सिद्ध्यति। धेनुशब्दस्येह पाठात्॥

त्यइति। ष्यञः षित्त्वं ष्यञादिपाठादिति भावः। स्त्रीत्वं तु लिङ्गमशिष्यं लोकाश्रयत्वादिति न्यायेन बोध्यम्। वस्तुतस्तु एषोपि प्रागुपपादितहरदत्तादिरीत्या प्रमाद एवेति तत्त्वम्। याम्याः शंसन्तीति वैदिकप्रयोगनिर्वाहस्तु छान्दसत्वादित्यन्ये। आहुरिति। युक्तं चैतत्। भाष्ये सर्वत्र गोरजादिप्रसङ्गे यदित्युक्तेः। अपवादइति। बाधक इत्यर्थः। तदपवादेञादीनां ण्यादयोऽर्थविशेषलक्षणादिति पूर्वविप्रतिषेधेन बाधक इति भावः। धेनुरनञिति। अत्र चानञ इत्युक्तेर्नञ्पूर्वेन ढगिति बोध्यम्॥

धेनोः कादेशसत्त्वेनेकन्नित्यनुचितमत आह। ठकमित्यर्थ इति। कैयट इति। तदधीन इति प्रकरण इति शेषः। सूत्रद्वयमिति। अविद्यालसगस्त्र आन्नादिति वार्त्तिके वार्त्तिकसूत्रिक
इति भाष्योदाहरणात्। सूत्रांचकोपधादिति। सूत्रे संख्याप्रकृतेः सूत्रवाचकादिति वाच्यम्। यथाष्ट [illegible] इति नेह माहावार्त्तिक इति भाष्याच्चत्वतल्प्रकरणस्थभाष्यप्रामाण्याच्चस्वरि

नचैवं धेनुकं गोधेनुकं चन सिद्ध्येदिति वाच्यम्। धेनुरनञ्‌इकमुत्पादयतीति विशेषवचनस्य भाष्ये आपिशलिमतत्वेनोदाहृतत्वात्। इकमिति। ठकमित्यर्थ इति कैयटः। अग्निकलिभ्यामिति। अयमर्थः। सूत्रकृता सास्य देवतेत्यधिकारे अग्नेर्ढगिति सूत्रितं दृष्टं सामेत्यधिकारे कलेर्ढगिति वार्त्तिककृता पूरितम्। तदिदम् सूत्रद्वयमपनीय प्राग्दीव्यत इति प्रकरणेऽग्निकलिभ्यां ढगिति पाठ्यम्। तेन अग्नेरपत्यम् अग्निना दृष्टं साम अग्नौ भवम् अग्नेरागतम् अग्नेः स्वं वा आग्नेयं कालेयमिति सिद्धम्। एतेन मीमांसकैर्यदुक्तं कलेर्ढगिति पाणिनीयसूत्रस्य पार्थक्यमित्यादि तत्सर्वमवैयाकरणमीमांसकसन्तोषार्थमिति प्रपञ्चितं शब्दकौस्तुभे॥ इत्यपत्यादिविकारान्तार्थसाधारणाः प्रत्ययाः। स्त्रीपुंसाभ्याम्। प्रागित्यनुवर्त्तते स्त्रैण इति। स्त्रीषु भवः स्त्रीभिश्चरति स्त्रीभ्यो हित इत्यादि। वत्यर्थेति। सामान्यापेक्षं ज्ञापकमिति भावः। अत एवोदाहरति स्त्रीवदिति। कथं तर्हि त्वतलौ। स्त्रीत्वं स्त्रीता। पुंस्त्वं पुंस्तेति। आ च त्वादिति चकारादिति वक्ष्यते। द्विगोर्लुगनपत्ये॥ द्विगोरिति षष्ठी। तदर्थश्च हेतुत्वम्। तच्च रथन्तरसामत्वादेरिव भाविनोऽपि बुद्ध्याध्यवसायात्। तदेतदाह। द्विगोर्निमित्तमिति। अजादिरिति। एतच्चोत्तरसूत्रादचीत्यस्यापकर्षाल्लभ्यते ॥

तो वानुदात्त इति सूत्रभाष्याच्च वार्त्तिकेऽपि सूत्रत्वाङ्गीकारादिति भावः ॥ इत्यपत्यादिविकारान्तार्थसाधारणाः प्रत्ययाः ॥ सामान्यापेक्षमिति। स्त्रीपुंसाभ्यामिति योगापेक्षमित्यर्थः। हेतुत्वमिति। न तु स्थानसंबन्धः। प्रत्ययादर्शनस्यैव लुक्त्वात्। नाप्यानन्तर्यसंबन्धः। पञ्चकपालस्य पुरोडाशस्येदं पाञ्चकपालमित्यादावतिप्रसङ्गादिति भावः। रथन्तरसामत्वादेरिति। यदि रथन्तरसामा सोमः स्यात् ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयादिति श्रुताविति भावः ॥

नन्वचीत्यपकर्षेद्विरथइत्यत्रनस्येदमित्यधिकारविहितयतोलुक्नस्यात्। नचेष्टापत्तिः। येनविधिस्तदन्तस्येतिसूत्रस्थभाष्यविरोधादतआह। वाग्रहणमिति। समर्थानामितिसूत्रस्थमित्यर्थः। तेनकस्यचिदनजादेरपिलुक्सिद्धिरितिभावः। अग्रेतुनसंबन्धः। फक्फिञोरितिसूत्रेऽन्यतरस्यांग्रहणात्। वस्तुतोचीतिनापकृष्यते। अनभिधानान्नातिप्रसङ्ग इतितत्त्वम्। तस्यैवेति। अत्रगोत्रप्रत्ययस्यान्यलुकोः संभवोबीजम्। सचोपपादयिष्यते। गोत्रइत्यस्यफलमाह। कुवलस्येति। अत्रफलेलुक्सचनगोत्रप्रत्ययइतिस्पष्टम्। तस्यैवालुग्यथास्यादिति। गोत्रेइतीत्युक्तिस्तत्त्वेएतदर्थलाभइतिएतन्मात्रेणैवेतिबोध्यम्। तद्राजस्येत्यस्यतोत्रबहुष्वित्यनुवृत्तेस्तदप्येतत् प्रकरणस्थमितिबोध्यम्। अतएवजनपदशब्दात्क्षत्रियादञितिसूत्रेतद्राजलुकोप्ययमलुगुक्तः। यत्तुगोत्रस्त्रियाइतिसूत्रेणस्यणित्वंकिमर्थम्। वतण्डस्यगोत्रापत्यंस्त्रीवतण्डीवतण्डाच्चेतिविहितयञोलुक्स्त्रियामितिलुकिशार्ङ्गरवादित्वात्ङीन्। तस्याअपत्यंवातण्डोजाल्मइत्यादौवृद्ध्यर्थम्। नचगोत्रेलुगचीतिलुक्प्रतिषेधः ईकारेणव्यवधानादित्युक्तातत्रकिङ्कार

वाग्रहणमनुवर्त्यव्यवस्थितविभाषाश्रयणेनवा॥ गोत्रेलुगचि॥ गोत्रेकिम्। यस्कादिभ्योगोत्रेइति प्रकरणेनयस्यप्राप्तंतस्यैवलुग्यथास्यात्। नेह। कुवलस्येदंकौवलम्। बादरम्। यूनिलुक् ॥

णम्स्यादइतिपुंवद्भावइत्युक्तम्। नत्वेकदेशस्युक्तिः। पुंवत्त्वेनङीनइवलुकोपिनिवृत्तेरितितन्मात्रबाधकम्। यद्वा। तत्रैतस्यतत्प्रयोजनंनपुंवद्भावेनङीन्लुकोर्निवृत्तिसिद्धेरित्यर्थइतिनतद्विरोधः। यदपिवान्यस्मिन्नितिसूत्रेणगोत्रयुवसञ्ज्ञयोः समावेशेपीलायाअपत्यंपैलः पीलायावेत्यण्तस्यापत्यंयुवाणोद्व्यचइतिफिञः पैलादिभ्यश्चेतिलुक्पैलस्यच्छात्राः पैलायाः। अत्रापिगोत्रेलुगितिफिञोऽलुक्प्रसङ्गः। असमावेशेत्वस्याप्राप्तौअन्तरङ्गत्वात्पैलादिलुगितिउक्तम्। तस्यायंभावः। समावेशेद्वितीयाद्यापत्यस्यलुङ्[illegible]स्यमध्येपवादन्यायेनायमलुक्स्यात्। असमावेशेतुयुवप्रत्ययविषयेऽस्याप्रवृत्तेस्तेनन्यायेनभूम्निप्राप्तस्येत्यर्थलाभइतिनतद्विरोधोलेशतोप्यस्माकमितिदिक् ॥

इद्धेति। द्विगोर्लुगनपत्य इत्युत्तरम्। अचि। यूनि फक्फिञोरन्यतरस्यां गोत्रे नेति कार्यमित्यर्थः। एतेनैवं न्यासे द्विरथ इत्यसिद्धिरित्यपास्तम्। ननु द्वयोः सावकाशयोरेकत्र इत्से भ्य इत्यत्र दीर्घत्वयोरिवैकस्य द्विकार्ययोगमूलकेनासंभवेन केवलेनासम्भवेन वा चिविप्रति[illegible]ध इतीको गुणवृद्धी इत्यादिषु भाष्ये स्पष्टम्। एवं च प्रकृते न तस्य विषयोऽत आह। अत्र च ज्ञापकमिति। एवं च ज्ञापकादेव बाध्यबाधकभाव इति भावः। आदिवृद्धिप्राप्तिविषये तद्बाधो ज्ञाप्यते। अतएव व्यापद्भिभवं वैयापदमित्यादावपि नोपधावृद्धिः। तत्राह।

इह द्विगोर्लुगनपत्येऽचि। यूनि गोत्रे नेत्येव सूच्यताम्। तथा च लुगलुग्ग्रहणं शक्यमकर्तुम्। अजादाविति किम्। ग्लौचुकायनरूप्यम्। प्राग्दीव्यतीये किम्। तस्मै हितं ग्लौचुकायनीयम्। ननु उपगु अ इति स्थिते ओर्गुणं बाधित्वा परत्वादचोञ्णितीति वृद्ध्या भाव्यम्। गुणस्य तु पिचव्य इत्यादिरवकाशः किं च कृते गुणे आदेशे च अत उपधाया इति वृद्ध्या भाव्यं तत्राह। आदिवृद्धिरिति। परत्वादिति भावः। अन्त्योपधावृद्ध्योरवकाशः। गौः। पाचकः। आदिवृद्धेरवकाशः। शुश्रुत। सौश्रुतः। औपगवः। त्वाष्टः जागत इत्यादौ उभयप्रसङ्गे परत्वादादिवृद्धिरेव भवति। न च पुनः प्रसङ्गविज्ञानं सकृदिति न्यायाश्रयणात्। अत्र च ज्ञापकम्। अनुशतिकादिषु पुष्करसच्छब्दस्य पाठः। अन्यथा उपधावृद्ध्या पौष्करसादेः सिद्धत्वादुत्तरपदवृद्ध्यर्थस्तत्र पाठोऽनर्थकः स्यात्। अकृतेति परिभाषायाश्च समर्थग्रहणमेव ज्ञापकम्। तद्धि परिनिष्ठितपरमित्युक्तम्। परिनिष्ठितत्वं च ङ्याप्प्रातिपदिकांश एव न तु सुब्विशिष्ट इत्यवधेयं तेन औपगवः दण्डिमानित्यादि सिद्धम्। अग्निमानणिति सौत्रप्रयोगश्चेह लिङ्गम्॥ ७ पिद्वृद्धिप्राप्त्या तद्विषयस्त्व

त्। एञ्विधायकेन निषेध इत्यन्यदिति दिक्। ज्ञापकमिति। एतच्च कैयटे नैव स्पष्टम्। ङ्याबिति। तदंशे परिनिष्ठितत्वफलं तु शालीयसिद्धिः। अन्यथैकादेशात् प्राग्यस्येति लोपे शा[illegible]शब्दाकारश्रवणापत्तिः। श्रविष्ठासु जातः श्रविष्ठ इत्यादौ अन्तरङ्गानपीति न्यायादेकादेशो न। अत एवाकारश्रवणम्। तद्विषयतद्धितोत्पत्तेः प्रागेव। एतद्बलादेव तद्विषये समर्थादित्यस्यानुपस्थितिः। उपगोरित्यत्र तु गुणोत्तरं लोपे ओसित्यस्य निवृत्तौ औपगवासिद्धिः। दण्डीमानित्यापत्तिश्चेति भावः॥

नङ् इति। तद्ङित्वं हि विश्न इत्यत्र गुणनिषेधार्थम्। ह्रस्वविनाशोन्मुखत्वेन तुगभावे हि गुणप्राप्तिरिति तस्य तज्ज्ञापकता बोध्या। शक्यमकर्त्तुमिति। यदि तथा ज्ञापकं तदाऽकर्तुमशक्यमित्यर्थः। यदि तु तत्राकृतसन्धेरित्युच्यते तत्राकृतसन्धेरेव। अन्यत्र तु अनियम इत्यर्थस्तदा परिनिष्ठितादेवेत्यर्थमावश्यकं तदिति बोध्यम्। अकृतव्यूहपरिभाषायास्तु न फलम्। सेदुष इत्यादौ पदावधिके व्याख्याने सेद्वस् असिति स्थिते इड्संप्रसारणयोः प्राप्तौ प्रतिपदविधित्वेन शीघ्रोपस्थितिकत्वात्पूर्वं संप्रसारणे। वलादित्वाभावादिटः

यदि तु नङो ङित्करणेनाकृतव्यूहपरिभाषा ज्ञाप्यते। पामादिगणे विष्वगित्युत्तरपदलोपश्चाकृतसन्धेरित्यत्राकृतसन्धिग्रहणेन परिनिष्ठितात्तद्धितोत्पत्तिस्तर्हि समर्थग्रहणं शक्यमकर्तुम्। ननु समासस्तद्धितेन नित्यं वाध्येत। न च तद्धितस्य वैकल्पिकत्वात्पक्षे सोपीति वाच्यम्। यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते उत्सर्गो न प्रवर्त्तत इति पारेमध्ये षष्ठ्या वेति वाग्रहणेन ज्ञापितत्वादित्याशङ्क्याह। दैवयज्ञीत्यादि। जातित्वादिति। यत्तु प्राचोक्तम्। अणन्तत्वान्ङीबिति। यच्च व्याचख्युष्टिड्ढाणञित्यनेनेति तदुभयं प्रामादिकमिति भावः। औत्स इति। उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झर इत्यमरः। तस्यापत्ययोरास्तु गाङ्गेयो भीष्म इतिवत्। जीवति तु वंश्ये युवा। पितृपितामहादिरुत्पादकप्रबन्धो वंशः। तत्र भवो वंश्यः। दिगादित्वाद्यत्। पौत्रप्रभृतीत्यनुवृत्तं षष्ठ्या विपरिणम्यते व्याख्यानादित्याह। पौत्रादेरिति। तुशब्दो भिन्नक्रमः युवेत्यस्मात्परो बोध्यः। स च एवकारार्थ इति व्याचष्टे। युवसञ्ज्ञमेवेति ॥

प्राप्तिरेव नेति तत्सिद्धेः स्पष्टं चेदमप्यत्रैव कैयटे। तत्सर्वं यदि तु ज्ञाप्यत इत्यनेन सूचितम्। ज्ञापितत्वादिति। न च षष्ठीसमासविधानं व्यर्थम्। अन्यतस्तद्विषये तस्येदमित्यस्य प्राप्तेरिति वाच्यम्। अनन्तरादिपदेस्तस्य चारितार्थ्यात्। अनभिधानेन हि तत्र तद्धिताभावस्य भाष्ये स्पष्टमुक्तत्वादिति भावः। प्रामादिकमिति। उपगोः प्रवराध्याय प्रसिद्धत्वात् उपगोर्गोत्रापत्यमिति तद्व्याख्यातृभिर्विग्रहप्रदर्शनाच्चेति भावः। पितृपितामहादीति। अतएव पितृव्यमातुलादीनां न वंश्यत्वम् ॥

तृतीये द्वयोरिति। उपगोस्तृतीयेनाद्येऽणि योरित्यर्थः। त्रयाणामणिञ्फकाम्। नन्वत्र पक्षे औपगवादिञ् प्रत्ययद्वयमनिष्टं प्राप्नोति। औपगव इतीष्टं च तृतीयेन सिद्ध्यति। गर्गादिभ्यो यञि स्यादेश्चानर्थक्यं प्राप्नोति। गोत्रेपत्ये इत्यस्य विरोधाद्गर्गादिञि ततः प्रत्ययान्तरे निष्टं च प्राप्नोति। यदि त्वस्यात्र पक्षे विद्ध्यर्थत्वं तदा न नियमत्त्वमिति प्रत्ययान्तात् प्रत्ययनिषेधस्यावश्यवक्तव्यत्वम्। न च गोत्रपदेन गोत्रागोत्रसमुदाय उच्यते तत्र यूनो न ग्रहणं गोत्रग्रहणात्। एकपदं च सामर्थ्यात् सावधारणम्। पुत्रे एकः पौत्रेऽपरस्तदपत्ये चापर इति गोत्रसमुदाये बहूनां प्राप्तौ एक एवापत्यप्रत्यय इति नियमेनैकाभ्यनुज्ञाद्वारा परमप्रकृतेर्विधिरपि परंपरापत्यापत्यवत्संबन्धे प्रवर्त्तत इत्यनुमीयत इति न दोष इति वाच्य

एको गोत्रे। अपत्यप्रत्यय इति। एतच्चाधिकारबलाल्लभ्यते। औपगव इत्यादि। उपगोरण्। गर्गादिभ्यो यञ्। नडादिभ्यः फक्। सूत्रारम्भफलं मतभेदेन व्यवस्थापयति। गोत्र इति। स्वङ्गोत्रन्तदपेक्षया एकोनसंख्यानां तृतीये द्वयोः चतुर्थे त्रयाणामित्यादावित्यर्थः। यद्वेति। तृतीये एकस्मादनिष्टोत्पत्तिः। चतुर्थे द्वाभ्यामित्यादावित्यर्थः। पितुरेवेति। तथा चामरः। आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वेपत्यन्तोकन्तयोः समे इति ॥

म्। तथाविधेरनुमाने गौरवात्। एतदेवाभिप्रेत्यैवं नियमोपपादनोत्तरं भाष्ये उक्तम्। इहोत्स्यादयितर्यपत्ययुक्ते प्रत्ययान्तात्प्रतिषेधो वक्तव्यः। परमप्रकृतेश्चोत्पत्तिर्वक्तव्येति विधित्वे प्रतिषेधो वक्तव्यः। गोत्रपदलक्षणया नियमत्वे उत्पत्तिर्वक्तव्या। एकेन वाक्येनोभयं त्वलभ्यम्। एको पत्यप्रत्ययो भवति न तु तद्विषये गोत्रे प्रत्यय इत्येवार्थः स्यादित्येकाभ्यनुज्ञैव दुर्लभेति तद्भाव इत्यरुचेराह। यद्वेतीति। अत्र पक्षे इष्टसंसिद्ध्या सर्वेष्वपत्ययुक्ते पु प्रत्ययान्तात्प्रतिषेधो वक्तव्य इति भाष्योक्तानिष्टवारणायानियमार्थमिदम्। गोत्रशब्दस्य गोत्रजातिपरत्वेति नियमोपपत्तिः ॥

अत्र पक्षे युक्त्यन्तराण्याह। न पतन्तीत्यादि। अपत्यं तोकं तयोः समे इत्यमरस्य त्वयमर्थः। तद्घटितसन्तानपरंपरयोरिति। किं चैकाभ्यनुज्ञाद्वारा परंपरापत्यापत्यवत्त्वं बन्ध्ये प्रकृत्यनुमानापेक्षया पितामहादीनामपत्यमित्यनुमानस्यैव युक्तत्वम्। तदेतत्सर्वं पितामहादीनामपीति मुख्यपक्षे त्विति वदता मूले ध्वनितम्। ननु मुख्यपक्षे स्वनियमस्तेष्वप्यनन्तरापत्यप्रत्ययान्ताद्गोत्रे प्रत्ययो दुर्वारस्तावतापि गोत्रे एकस्यैव कृतत्वेन नियमाबाधात्। एतदभिप्रायेणैव सर्वेष्वपत्ययुक्तेष्विति पक्षे नियमार्थत्वमुपपाद्य पुनरुक्तं भाष्ये सर्वेष्वपत्ययुक्तेषु प्रत्ययान्तात्प्रतिषेधो वक्तव्य इति। न च गोत्रपदेनापत्यसमुदायो लक्ष्यते। तेन परमप्रकृतेरेव भविष्यतीति वाच्यम्। अपत्यमित्यनुवृत्त्यैव सिद्धे गोत्रग्रहणवैयर्थ्यापत्तेः। गोत्राद्यूनीत्यस्य सत्त्वेन यूनो ग्रहणेप्यदोषादिति चेन्न। भाष्ये प्रत्याख्यातत्वेनेष्टापत्तेः। स्पष्टं चेदं सर्वं सूत्रशेषे भाष्ये इति दिक्। ननु युवेति। अपत्यं पितुरेवेति पक्षे पञ्चमे यूनि विवक्षिते चतुर्थात्प्रत्ययान्तादेव प्रत्यय इत्यनिष्टं प्राप्नोति तृतीयादिभ्योत्पत्तिर्न सिद्ध्यति अत एको गोत्रे इति साहचर्यादस्य नियमत्वं युवपदं च तद्घटितापत्यसमुदायपरं विद्याभ्यनुज्ञानं च प्राग्वदिति भावः ॥

ततः प्राचामिति। तथा हि न पतन्त्यनेनेत्यपत्यमिति व्युत्पत्तिः पङ्क्तिविंशतीति सूत्रे भाष्यकृता दर्शिता। व्यवहितोपि पितामहादीनां मुहूर्तेति प्रसिद्धं जरत्कार्वाद्युपाख्यानेषु। सूत्रकारोप्याह। अपत्यं पौत्रप्रभृतीति। आद्यपक्षे अपत्यमिवापत्यमिति गौणी वृत्तिराश्रयणीया स्यात्। औपगवादिरिति। यस्यापत्यन्तद्वाचकादेव प्रत्यय इति भावः। एवं सत्यनुपदं वक्ष्यमाणस्य पितामहादीनामिति मुख्यपक्षस्य विवरणे उपगोरण इष्टसिद्धिरित्याद्युक्तिः संगच्छते। मूलादिति पञ्चमी तु अवधित्वमर्पणमात्रार्था न तूपगुरूपमूलस्य संख्यान्तःपातित्वार्था। अत एव द्वितीयपक्षे मूलपदमनुपादाय शततम इत्येवोक्तत्वान्मूलस्य संख्यान्तःपातित्वं ज्ञेयम्। इञपीत्यपि भिन्नक्रमः। णन्तादित्यस्य शेषो बोध्यः। गोत्राद्यूनि। गोत्रप्रत्ययान्तादेवेति। न तु युवप्रत्ययान्तादिति प्रथमपक्षेर्थः ॥

म॰ प्र॰ १९१

अग्रपक्षेः स्वविधित्वमेवस्यान्नतुनियमत्वमित्याशङ्क्याह। द्वितीयपक्षेत्विति। पितामहादीनामपीतिमुख्यपक्षेत्वित्यर्थः। अत्रेष्टसिद्धिरस्त्येव किंत्वनिष्टमपि प्राप्नोतीति तन्निवृत्तये नियमार्थत्वमेवेत्यर्थः नन्वस्त्रियामित्यस्य स्त्रीभिन्ने यूनीतिनार्थः। स्त्रीविषये यूनि प्रत्ययेषमालाप्रसङ्गाद्। एको गोत्रे इत्यस्य तु न प्रवृत्तिः युवसंज्ञया गोत्रसंज्ञाया बाधात्। न च स्त्रियां यूनि न प्रत्यय इति वाक्यभेदेन संबन्धः। गोत्रप्रत्ययेन स्त्रिया अभिधानानापत्तेः किंतु वाक्यमेव स्यादत आह। अयंभाव इति। विशेषस्याविवक्षायामिति।

द्वितीयपक्षेतुमूलप्रकृत्यनन्तरयुवभ्यो नेत्यर्थः। स्त्रियांत्विति। अयंभावः। अस्त्रियामिति योगो विभज्यते। यूनि शब्दस्वरूपपरम्। परिभाषा चेयं यत्र युवसंज्ञा विधीयते तत्रास्त्रियामित्युपतिष्ठत इत्यर्थः। सिद्धस्य गतिरियम्। जीवति तु वंश्ये युवा। अस्त्रियामिति तु सूत्रयितुमुचितम्। अतइञ्। तपरः किम्। शुभंयः अपत्यं शौभंयः। कथं तर्हि प्रदीयतां दाशरथाय मैथिलीति। अपत्यरूपविशेषस्याविवक्षायां शैषिकोऽण्। बाहविरिति। यत्तु बाधृ लोडने इति धातोर्माधवेनोक्तम्। केवलस्य बाहोरपत्येनायोगात् सामर्थ्यात्तदन्तविधिः सैबाहविरिति। तच्चिन्त्यम्। जानन्ति बाहवीत्याश्वलायनसूत्राद्बाह्वादिभ्यश्चेति सूत्रे बाहविरिति भाष्यवृत्त्याद्युदाहरणाच्च बाहोः संज्ञाशब्दत्वात्। औडुलोमिरिति। यद्यपि लोमन्शब्दो गणे पठ्यते तथापि सामर्थ्यात्तदन्तग्रहणम्। उडुमीव शरा इव लोमानि यस्य तस्यापत्यमौडुलोमिः। शारलोमिः। बहुत्वे तु इञपवादोऽकारः प्रागेवोक्तः। उडुलोमाः। शरलोमाः। इह याः पुराणादिप्रसिद्धाः संज्ञास्ताभ्य एव प्रत्ययो बोध्यः। निरूढत्वेन प्रथमोपस्थिताभिरेव विधेर्निराकाङ्क्षत्वात्। यस्तु इदानींतनो बाहुस्तस्यापत्ये बाहव इत्येव। उक्तं च हरिणा ॥

सर्वनाम्ना सामान्यरूपेण विशेषरूपेण च सर्वार्थबोधकत्वमिति तस्यापत्यमिति सूत्रे भाष्यकैयटयोः स्पष्टमिति भावः। अत एवापत्यं गोत्रमिति वार्तिकप्रयोगः संगच्छते। अपत्यस्येदमापत्यं पौत्रप्रभृतीति तदर्थः। इह। प्रतिपदविधानविषये। निरूढत्वेन। प्रसिद्धतरत्वेन ॥

राम: १९१

अभिव्यक्तेति।आद्यपादस्यानर्थकंव्यावर्त्यमेतच्चद्विविधंसर्वथार्थरहितमप्रसिद्धार्थकंच।गौणंतत्रलक्षणायामनियमात्तत्संदिग्धार्थकंतस्यस्वतन्त्राद्दृस्मनेनगुणयोगादिक्रमनपेक्ष्यंप्रवर्त्तमानाद्इत्यर्थकेनव्यावृत्तिः।अप्रयुक्तंप्रसिद्धार्थकमपियल्लोकेनप्रयुक्तंतदुक्तिधित्स्यस्यनत्तद्दृशेष्वित्यर्थः।इदंचविशिष्टरूपोपादानेपदकार्यएवातएवसञ्ज्ञाप्रतिषेधोवार्त्तिककृतासर्वादिसूत्रेउक्तः।अतएवमहदूतेत्यत्रपुंवत्त्वंविशिष्टरूपोपादानाभावात्।अमहान्महानित्यादौदीर्घादिचसिद्ध्यति।पदकार्यस्याभावादिति

अभिव्यक्तपदार्थायेस्वतन्त्रालोकविश्रुताः।शास्त्रार्थस्तेषुकर्तव्यःशब्देषुनतदुक्तिषिति।अनर्थकंसंदिग्धार्थकमप्रयुक्तंचक्रमेणविशेषणव्यावर्त्यम्।तदुक्तिषुतत्तद्देशेष्वित्यर्थः।अतएवसञ्ज्ञाश्वशुरस्यापत्यंश्वाशुरिरित्यत्रराजश्वशुरादितियन्न।मिमीतेमातातस्यस्वसामातृस्वसा।मातृपितृभ्यांस्वसेतिषत्वंन।वारूडकिरिति।वरूडादयोजातिविशेषाः।इत्यादीति।आदिशब्दान्नैषादकिः।चाण्डालकिः।वैम्बकिः।वस्यतद्इति।व्रातच्फञोरितिविहितस्यञ्यप्रत्ययस्येतिशेषः।यञिञोश्चगोत्रेयावितिगोत्रेकिम्।द्वीपादनुसमुद्रंयञ्।द्वैप्यः।सुतंगमादिभ्यइञ्।सौतङ्गमिः।तदपत्येमाभूत्।अनृष्यानन्तर्ये।अनृषीतिपञ्चम्याः सौत्रोलुक्।सूत्रइति।आनन्तर्येइत्यत्रेत्यर्थः।वैदिरित्यत्रऋष्यणमाशङ्क्याह बाह्वादेरिति।प्रवराध्यायेति।एतच्चस्त्रीपुंसाभ्यांनञ्स्नञावितिसूत्रेकैयटग्रन्थेस्पष्टम्।कापेयइति।इतश्चानिञइतिढक्।कपेर्गर्गादित्वाद्यञ्।आङ्गिरसएवेतिनियमार्थंसूत्रम्।गणेपाठस्तुलोहितादिकार्यार्थः।काप्यायनीबोधिरिति।अनृषित्वादिञ् ॥

दिक्।तुल्यन्यायान्नामधातुप्रकृतिकप्रातिपदिकानामप्यप्रसिद्धार्थकत्वंशास्त्रबोधितत्वेपिलोकेप्रकरणादिनिरपेक्षतयाप्रतीत्यजनकत्वात्।प्रवराध्यायेत्यादेस्तादृशमपत्यप्रत्ययान्तमित्यर्थः।कैयटेइति।तत्सूत्रेभाष्येचध्वनितम्।यूनिलुक्सूत्रेभाष्येऽपत्याधिकारादन्यत्रलौकिकंगोत्रमित्युक्तम्।प्रवराध्यायप्रसिद्धत्वमेवलौकिकत्वमिति।गोत्रावयवादितिसूत्रेभाष्येअगस्त्याष्टमर्षीणामपत्यंयातानिगोत्राणिइतितत्रोक्तंतानिलोकेगोत्रत्वेनप्रसिद्धानीतितदर्थः ॥

म॰ श॰ १८२

ऋषित्वे प्याह। बाह्वादित्वादिति। यञणोरिति। गर्गादौ शिवादौ च पाठादिति भावः शिवादिपाठे मानं तु च तण्डाच्चेति योगविभाग एवाऽन्यथा लुक् स्त्रियामित्यनेन संयुञ्जैव पठेत्। परिशेषितस्यैवेति। आङ्गिरसे परिशेषप्राप्तस्येत्यर्थः। निषेधमुखेन नियमानां प्रवृत्तिरिति प्रौढिवादपक्षाश्रयेणेदं लभ्यते इति विधिमुखेन प्रवृत्तावनन्तरस्येति न्यायेनाप्येतल्लभ्यते इति बोध्यम्। तस्मादिति। जात इति पञ्चम्यर्थे सप्तमी इति भावः। कैयटेति। इदं च प्रकृतसूत्रे भाष्येऽध्वनितम्। तथाहि। अत्राण्ग्रहणं व्यर्थं शिवादिभ्यो यथा विहितमित्येव।

बाह्वादित्वाद्वा च तण्डाश्च यञणोः प्राप्तयोः आङ्गिरसे यञेवेति नियमार्थं सूत्रम्। लुक् स्त्रियां विहितस्येति। परिशेषितस्यैवेति बोध्यम्। एतच्च आङ्गिरस इत्यनुवृत्त्या लभ्यते। अत एवाह। अनाङ्गिरसे त्विति। वक्ष्यमाण इति। अणिञोरनार्षयोरिति सूत्रेणेति भावः। अश्वादिभ्यः फञ्। गोत्रे इति। क्वचिद्यून्यपि तथाहि। अश्वादिगणे गोत्रप्रत्ययान्तास्त्रयः पठ्यन्ते वैल्यः आनडुह्यः आत्रेय इति। विलिर्नाम राजर्षिः। तस्य वृद्धे कोसलेति ञ्यङ्। आनडुह्यशब्दो गर्गादियञन्तः। आत्रेयशब्दो ढगन्तः। ततः सामर्थ्यात् युनि फञ्। न हि युवानं विना अपत्यप्रत्ययद्वयं लब्धुं शक्यते। पुंसि जात इति। गणसूत्रम्। पुंसि विद्यमानो यो जातशब्दस्तस्मात्फञित्यर्थः। जातायाः इति। लिङ्गविशिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा प्राप्तः फञ्। शिवादिभ्योऽण्। गोत्र इति निवृत्तमिति। इतः प्रभृति अपत्यसामान्ये प्रत्यया इति भावः। एतच्च वसौ कैयटादिग्रन्थे च स्पष्टम्। यत्तु यूनि लुक्सूत्रे भाष्यकैयटपर्यालोचनया गोत्रसञ्ज्ञासूत्रपर्यन्तं गोत्राधिकार इति लभ्यते ॥

ण्त्विदेः। नचैवमिञ्स्यात्। पुनर्वचनवैयर्थ्यापत्तेः। न च बाधकबाधनार्थं तत्। तस्यैवाभावादिति तत्रोक्तम्। गोत्र इत्यनुवृत्तौ तु शिवादिभ्यो गोत्र एवेञ् नान्यत्रेति नियमेन चरितार्थ्यात्। अण्ग्रहणं विनाऽणोऽसिद्धेस्तस्य सार्थक्ये तदसंगतिः स्यादतस्तन्निवृत्तिरत्रेति तद्भावः। भाष्यकैयटेति। तत्र हि सर्वत्र शास्त्रीयगोत्रग्रहणे गार्ग्यायणादिभ्यो युवप्रत्ययान्तेभ्यः समूहादौ गोत्रत्वप्रयुक्तो वुञ् नस्यादित्याशङ्क्यापत्याधिकारादन्यत्र लौकिकं गोत्रम् अत्र च गोत्रोक्षेति सूत्रस्य राजन्यग्रहणं ज्ञापकमुक्तं भाष्ये। गोत्रसञ्ज्ञासूत्रपर्यन्तं गोत्राधिकार इति च कैयटेन व्याख्यातम् ॥

राम॰ १८२

मतान्तरमिति। विशिष्टंमतमित्यर्थः। अनयोरेतदन्तरमित्यादौ विशेषवाचिनोऽप्यन्तरशब्दस्यसत्वात्। नियमविधिसम्भवे विधेरेवन्याय्यत्वेनतदनुरोधेनाणएवविधानमितिप्रकृतसूत्रस्थोक्तभाष्याशयस्त्वेनेदंभाष्यंनतन्निवृत्तौमानम्। गाङ्गेयादावनन्तरापत्ये प्रत्ययस्तुद्रौणायनिवदुपचारेणसाधुः। किंचात्रैवतन्निवृत्तौमनुषीशब्दात्कु

तन्मतान्तरमितिभावः। विपाशशब्दोऽत्र पठ्यन्ते। तस्यकुञ्जादिष्वपि पाठात्स्त्रीत्वेच्छञा वैपाशः। वैपाशायनः। जरत्कारुशब्दः पठ्यतेऽतः शुभ्रादित्वाड्ढगपि। ढेलोपोकद्र्वाः इत्युलोपः। जारत्कारवः। जारत्कारेयः। विश्रवणरवणशब्दौ पठ्यते। तौ विश्रवः शब्दस्यादेशौ प्रकृत्यन्तरे एव वा वृत्तिविषये तत्समानार्थौ वैश्रवणः। रावणः। इतश्चानिञः द्व्यचः किम्। उदधेरपत्यमौदधः। यत्तु काशिकायांमरीचेर्मारीच इति प्रत्युदाहृतम्। तच्चिन्त्यम्। बाह्वादित्वेनेञ्प्रसङ्गात्। तथा च मिदचोऽन्त्यात्परः इति सूत्रे भाष्यम्। मरीचिशब्दो बाह्वादिषु पठ्यत इति। शुभ्रादिभ्यश्च। मृकण्डशब्दोऽत्र पठ्यते। स च अदन्तः। एतच्च मृगय्वादयश्चेति सूत्रे उज्ज्वलदत्तग्रन्थे स्पष्टम्। मृकण्डस्य मुनेस्तीर्थन्तद्याम्यामतिनिर्मलमिति स्कान्दे मार्कण्डेयः। उकारान्तपाठे तु ढेर्लोपो बोध्यः। कल्याण्यादीनामिनङ्। इति सूत्रे उज्ज्वलदत्तग्रन्थे स्पष्टम्। परस्त्रीशब्दोऽत्र पठ्यते। पारस्त्रैणेयः। अनुशतिकादित्वादुभयपदवृद्धिः। परभार्यायामुत्पन्न इत्यर्थः। विदादिगणे तु परस्त्री परशुश्चेति पठ्यते। आपद्यत इति शेषः। परस्त्रिया अपत्यं पारशवः। ब्राह्मणाच्छूद्रायान्तेनैवोढायामुत्पन्नः। सा च जात्यन्तरयोगात्परस्त्री। तदिह परस्त्रीति कल्याण्यादिषु षष्ठीतत्पुरुषः। विदादौ तु कर्मधारय इति विवेकः। तथा च याज्ञवल्क्यः। विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम् ॥

त्सितमपत्यमित्यर्थविवक्षायां मानुषो जात्म इति ण प्रत्ययस्य भाष्यकृतदृष्टत्वात्सिद्धिरितीदमेवयुक्तंमतम्। शास्त्रीयंगोत्रंचयुवत्वानाक्रान्तपौत्रप्रभृत्यपत्यरूपम्। तदर्थकत्वंचवास्तवं शास्त्रप्रक्रियानिर्वाहायकल्पितंचेतिभावः ॥

अंबष्ठः शूद्र्यामिति। शूद्रकन्यायामित्यर्थः। जातौ ङीष्प्रयोग आर्षः। अत्रानुलोमप्रस्तावात्तद्विवाहितेत्याहुः। तृतीयं रूपमिति। उभयोरप्यत्र कुलटाशब्देन ग्रहणमि

अम्बष्ठः शूद्र्यां निषादो जातः पारशवोपि चेति। न चैवं पारशवेपि स्थानिवद्भावात् अनुशतिकादिकार्यं स्यादिति वाच्यम्। पूर्वोत्तरपदसंप्रमोहात्। नहीह एतावान्पूर्वपदस्यादेश इति विषयविभागो गम्यते। सतीभिक्षुक्यत्रेति। अत्र इनङ्विधौ। उक्तं चामरसिंहेन अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः। कौलटेरः कौलटेयो भिक्षुकी तु सती यदि। तदा कौलटिनेयोस्याः कौलटेयोपि चात्मज इति। केचित्तु क्षुद्राया अपि इनङं तृतीयं रूपमाहुः। वृत्तौ तु क्षुद्राभ्यः परत्वाड्ढगित्युक्तं, सच्चिन्त्यम्। तस्य वैकल्पिकतया स्वयमपि पक्षे ढकः स्वीकाराच्च। इनङः प्राप्तेर्दुर्वारत्वात्। तयोरेवेति। तत्र टाबन्तात्तद्धिते लुप्ते लुक्तद्धितलुकीति टापो लुकि पुनरजादिलक्षणष्टाप्, जातिलक्षणस्य ङीषो बाधक इति भावः। यत्त्विह न्यासकृतोक्तम्। चटकादेरणित्येव सांप्रदायिकः सूत्रपाठ इति। तद्भाष्यवार्त्तिकविरोधादुपेक्ष्यम्। आरगुदीचाम्। उदीचां ग्रहणं पूजार्थम्। वचनादेव ढक्ढगारकोः पर्यायसिद्धेः। अन्यत इति। अनकारान्तात्कुतश्चिदित्यर्थः। जडस्येति। जल घातने। डलयोरभेदाज्जडः। पडि गतौ। पण्डः। एतच्च उक्तधात्वोर्माधवीयवृत्तौ स्पष्टम्। तत्र पण्डस्यापत्यन्त्रिमादि बोध्यम्। गार्ष्टेय इति। ननु गृष्टिः सकृत्प्रसूता गौरिति कोशाच्चतुष्पाद्भ्यो ढञित्येव सिद्धम्। अत्राहुः। कोशे गौरिति प्रायोवादः। सकृत्प्रसूता सर्वापि गृष्टिः। अतोयमारम्भ इति। वस्तुतस्तु गृष्टिशब्दः शुभ्रादिः। तथा चान्योदात्तं ढगन्तं प्रयुज्यते। स द्भार्ष्टेयो वृषभो गोभिरानडिति ॥

तिभावः। पूजार्थमिति। इदं च गोधाशब्दमात्रविषयं सूत्रमिति मते। जडादिभ्यो विधानार्थत्वे तु तत्र विकल्पार्थमावश्यकमेतदिति बोध्यम्। अरक् न कृतः। गोधार इत्यसिद्ध्यापत्तेः। कोशस्य यथाश्रुतत्वमभ्युपेत्याप्याह। वस्तुतस्त्विति ॥

पाक्षिकेति। अन्यथा शुभ्रादिढकाचतुष्यादञो बाध एव स्यादिति भावः। ऋषिशब्द इति। प्रवराध्यायप्रसिद्ध इति शेषः। तदा बोध्यमिति। तदापि ञुअर्थमावश्यकमिदमिति
भावः। पारिभाषिकेपि गोत्रे न क्षतिरिति। अत्र प्रयोगे क्षत्यभावमात्रमनेन प्रतिपाद्यते न त्वेतावता तत्र पारिभाषिकग्रहणमिति भ्रमितव्यम्। अपत्याधिकारादन्यत्वेन लौ

अतः पाक्षिकाद्युदाहृतार्थमिह सूत्रे गृष्टिशब्दग्रहणम्। ढञिति। गृष्ट्यादित्वादिति भावः। केकयमित्रयु। केकयस्यापत्यं स्त्री कैकेयी जनपदशब्दात्क्षत्रियादञ्। मैत्रेयिक
या श्लाघते मित्रयूनां भावेनेत्यर्थः। गोत्रचरणाच्छ्लाघात्याकारेति वुञ्। तत्र हि लौकिकं गोत्रं गृह्यते। लोके च ऋषिशब्दो गोत्रमिति प्रसिद्ध इति काशिका। एतच्च यदा मित्रयश
ब्दोऽभेदोपचारात् तदपत्ये सन्ताने वर्त्तते तदा बोध्यम्। यदा तु गृष्ट्यादित्वाड्ढञो यस्कादित्वाद्बहुषु लुक् तदा पारिभाषिकेपि गोत्रे न क्षतिः। प्रलयादागतं प्रालेयम्। इया दे
शेन वृद्धिर्न बाध्यते। विषयभेदात्। अचामादेर्वृद्धिर्यादेरियादेशः। अङ्गं तु उभयोर्विशेषणं ।नकार्यमिति हरदत्तः। दाण्डिनायना। एतानीति। दण्डिन् हस्तिन् आभ्यां नडा
दित्वात्फक्। येत्तु नडादिषु तेन पठ्यन्ते तेषामत एव निपातनाल्लुक्। टिलोपाभावस्तु निपातनादेव। अथर्वन्निति वसन्तादिषु पठ्यते। अथर्वणा प्रोक्तो ग्रन्थः अथर्वा। उ
पचारात् तमधीते आथर्वणिकः। जिह्माशिन्निति शुभ्रादिः। जिह्माशिनोऽपत्यं जैह्माशिनेयः। वाशिनोऽपत्यं वाशिनायनिः। उदीचां वृद्धादिति फिञ्। भ्रूणहन् धीवन्
एतयोः ष्यञि तकारादेशो निपात्यते। भ्रूणघ्नो भावो भ्रौणहत्यम्। धैवत्यम्। इह हन्तेस्तत्वे हनस्तोऽचिण्णलोरित्येव सिद्धे निपातनं ज्ञापयति ॥

किकग्रहणेस्यैव न्याय्यत्वादिति बोध्यम्। एतत्सर्वमपिना सूचितम्। निपातनमिति। न च कुत्वाभावार्थं निपातनम्। तदर्थत्वेपि धैवत्यसाहचर्येणास्यां परिभाषायामस्य ज्ञाप
कत्वपरस्य मृजेर्वृद्धिरिति सूत्रस्य भाष्यस्य प्रामाण्येन च तत्त्व निपातनस्यापि सूत्रकृत्तात्पर्यविषयत्वेन ज्ञापकत्वाक्षतेः ॥

स्वरूपग्रहणे इति। इदं प्रायिकम्। धातोः कार्यमुच्यमानमित्येव सारम्। एतच्च मृजेर्वृद्धिरित्यत्र भाष्ये स्पष्टम्। ज्ञापितेऽपि तत एव ओणहस्वे कुत्वं नायादेरिति। सुहृत्स्येत्यर्थः। निपातनबलादेवालोन्त्यस्येत्यस्याप्रवृत्तिः। एकस्यश्रुत्येति। एतेन सूत्रे द्वन्द्वनिर्देशस्तत्र तद्लौकिकविग्रहे विरुद्धस्वरकयोर्द्वयोः प्रवेशासंभवेन कथं द्वयोर्ग्रहणमित्यपास्त

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति। तेन वार्त्रघ्नमित्यत्र तत्वं न। सरयुद्वस्याणि परे यादेर्वो निपात्यते। सरय्वां भवं सारवमुदकम्। देविकायां सरय्वांच भवे दाविकसारवाविसमरः। तत्र देविकाशिंशपादित्यवाट्दीर्घसत्रश्रेयसामात् इति सूत्रेण देविकाशब्दस्याचामादेराकारादेशो वोद्धः। ऐक्ष्वाकइति। अणन्तमञन्तञ्च। एकश्रुत्या पाठात्। उभयत्राप्युकारलोपः। इक्ष्वाकोरपत्यम्। जनपदशब्दात् क्षत्रियादञ्। ऐक्ष्वाको राजा। बहुत्वे लुक्। इक्ष्वाकूणान्दुरापेर्थे इक्ष्वाकुषु जनपदेषु भवः। कोपधादण्। अस्य बहुत्वेपि न लुक्। ऐक्ष्वाकेषु च मैथिलेषु च फलं त्वस्माकमद्याशिषइति मुरारिः। हिरण्यशब्दस्य मयटि यादिलोपो निपात्यते। हिरण्यस्य विकारो हिरण्मयः। यस्कादिभ्यो गोत्रे। अपत्याधिकारादन्यत्र लौकिकं गोत्रमित्यभिप्रेत्याह। अपत्यप्रत्ययस्येति। राजश्वशुराद्यत्। यथाक्रममणिञोरपवादः। जातावेवेति। प्रकृतिप्रत्ययसमुदायेन जातिश्चेद्द्योत्येत्यर्थः। प्रत्ययस्तु अपत्य एव। व्यन्सपत्ने। सपत्नशब्दः शत्रुपर्यायः अव्युत्पन्नं प्रातिपदिकम्। वस्तुतस्तु सपत्नीशब्दादिवार्थे अल्प्रत्ययो निपात्यते ॥

म्। तत्रैकश्रुतियुक्तस्यैव प्रवेशात्। लौकिकमिति। तच्च प्रवराध्यायप्रसिद्धमस्य प्रत्ययान्तम्। अपत्य एवेति। गोत्र एवेत्यर्थः। तदधिकारे पाठेन आरोपितेन तेन साधुत्वान्वाख्यानात् तत्वात्ते राज्ञोऽपत्यं गोत्रमिति विग्रहो दर्शनीय इति भावः। लोके तु न तथा बोधः। एतत्सर्वं वार्तिके एवकारं पठता सूचितम्। अव्युत्पन्नमिति। सबलघावन्ते इति मध्योदातः ॥

अवग्रह इति। सशब्द इति शेषः। मध्योदात्त इति। सपत्नशब्द इति शेषः। परे त्विदं चिन्त्यम्। लघावन्त इत्येव सिद्धे लित्त्वस्य फलाभावात्। भस्याढे इत्यत्र सपत्नप्रकृतिकतायाः सपत्नीशब्दे भाष्यकृताङ्गीकाराच्च। तेन रूपेण ततो बोधाभावाच्च। अवग्रहे तु संप्रदाय एव शरणमित्याहुः। इत्याहेति। तन्मतेपि पाप्मनि चेतनधर्मशत्रुत्वासं

सपत्नीव सपत्नः। अत एव ये नः सपत्ना अप ते भवन्त्वित्यत्र सपत्नाः इत्यविग्रहः पठ्यते। लित्स्वरेण मध्योदात्तः पाप्मनेति। न ह्यत्र भातृपुत्रत्वरूपो वयवार्थोस्तीति भावः। वृत्तिकारस्तु इहापत्यग्रहणं न संबध्यते। अनर्थकावेव प्रकृतिप्रत्ययौ समुदायार्थः परं सपत्न इत्याह। गार्ग्योऽपत्यमिति। पितुरसंविज्ञाने मात्रा व्यपदेशात् कुत्सा। पुंवद्भावादिति। भस्याढे इत्यनेन। गार्ग्यशब्दादिति। यद्यपीह प्रकृतेर्वृद्धत्वात्तस्य णित्वं नोपयुज्यते तथापि ग्लुचुकायन्याः अपत्यं ग्लौचुकायन इत्यत्र वृद्ध्यर्थं तद्बोध्यम्। गोत्रेति किम्। कारिकेयः। स्त्रियाः किम्। औपगवस्यापत्यं युवा औपगविः। कुत्सने किम्। गार्गेयः। कौरव्या ब्राह्मणा इति। यत्तु कुरुनादिभ्यो ण्य इति वक्ष्यते तत्र क्षत्रियादित्यधिकृतम्। तद्राजत्वाल्लुक्। कुरवः क्षत्रिया इति विशेषः। वावदूक्य इति। वदेर्यङन्तादूकप्रत्ययः स च कुर्वादिगणे वावदूकेति पाठसामर्थ्यादेवेति माधवः। उलूकादयश्च तूणादिसूत्रेणेत्यन्ये। सम्राज इति गणसूत्रम्। हारिषेण्य इति। एति संज्ञायामगादिति षत्वस्यासिद्धत्वात् सेनान्तोयम्। नापित्य इति। प्राचां मतेनेदम् ॥

भवादुपचार आवश्यक इति बोध्यम्। पितुरसंविज्ञाने इति। उभयोः संविज्ञाने तु न सा। देवकीतनयं वन्दे इति यथा। ग्लौचुकायन इति। न चात्र केष्ठे चेति शङ्क्यम्। इञादित्यनुवृत्त्या तत्र फिञ एव ग्रहणात् असौवीरत्वाच्च। तथा च शेष इति सूत्रे भाष्ये उक्तं न च फिञन्तं सौवीरगोत्रमस्तीति। षत्वस्येति। तदसिद्धत्वेन णत्वाभावो प्येतद् दृश्येति भावः ॥

फिञिति। वृद्धेभ्य इति शेषः। अवृद्धेभ्यस्त्विञिति बोध्यम्। वृत्तिकार इति। अत्रारुचिबीजं तु बोध्यं सामान्यचिन्तायां सर्वबाधापत्तिः विशेषचिन्तायां तु पुरस्तादिति न्यायेन ण्यस्यै वबाधापत्तिः इष्टिस्तु भाष्येनास्ति उपसंख्यानपाठेन शिवादिपाठस्य निर्मूलत्वं चाण्येन बाधितत्वादिति। तस्यापत्यमित्यौत्सर्गिकस्य तेन बाध इति भावः। भाष्येति। भाष्यकृतो पसंख्यानपाठात् वृत्तिकृता शिवादौ पाठादिति भावः। पुंवद्भावप्रतिषेधार्थ इति। पाण्ड्यादपि तद्वत्सादौ अनन्तरापत्ये जातित्वाभावाज्जातेश्चेत्यनेन न सिद्धिः ॥ तदधिपतिवा

उदीचान्तु परत्वात्फिञिति वक्ष्यते। तस्ण इति उदीचामित्येव। इञोपवादः। वृत्तिकारस्तु तक्षन्शब्दं शिवादिषु पठित्वा कारिलक्षणमुदीचामिञ्मयमण् बाधते ण्यस्य तु बाधो नेष्यते इत्याह सर्वथाऽण्ण्याभ्यां रूपद्वयं निर्विवादम्। यत्तु षपूर्वहन्धृतराज्ञामणीति सूत्रे हरदत्तेनोक्तम्। ताक्ष्णः तस्येदमित्यण् नत्वपत्ये कारिलक्षणेन ण्येन बाधितत्वादिति तदिहत्यभाष्यवृत्तिस्वग्रन्थविस्मरणमूलकम्। तैकायनिरिति। तिक आस्कन्दने तिक्नोतीति तिकः इगुपधत्वात्कः। वृद्धात्किम्। दाक्षिरिति। दक्षशब्दोऽत्र प्रौढपरः। नामधेयत्वे तु वा नामधेयस्येति वृद्धत्वात्तस्से फिञ्भवत्येव दाक्षायण्योऽश्विनीत्यादितारा इत्यमरः। पञ्चालानां राजेति। इह अवृद्धादपि बहुवचनविषयादिति प्राप्तो वुञ्बाध्यते। पूरोरिति। पूरुशब्दस्य जनपदवाचित्वाभावात्प्राग्दीव्यतीयेऽणि सिद्धे तद्राजसंज्ञार्थं वचनम्। जनपदवाचित्वे तु द्व्यञ्मगधेत्येव सिद्धम्। पाण्डोर्ड्यण्। णकारो वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधार्थः। युधिष्ठिरपितृवाचिनो गुणवाचिनश्च पाण्डोर्नेह ग्रहणम्। जनपदशब्दादित्युक्ते हि तदधिपतिवाच्येवोपतिष्ठते। कुरुनादिभ्यो ण्यः। कुरोर्द्व्यज्लक्षणेऽणि प्राप्ते नकारादिभ्यस्तु अञि प्राप्ते वचनम्। ते तद्राजाः। अञ दय इति ततः प्राचीनास्तु तच्छब्देन न परामृश्यन्ते गोत्रयुवसंज्ञाकाण्डेन विच्छेदादिति भावः। तद्राजस्य बहुषु तदर्थेति। तद्राजस्यार्थेन कृत इत्यर्थः ॥

च्येवेति। प्रत्यासत्त्या तज्जनपदस्वामित्वेन यो यक्षत्रियवाची स एवोपतिष्ठते इत्यर्थः। तद्राजस्यार्थेनेति। तद्राजान्तस्यार्थेनैव कृत इत्यर्थः। तावन्मात्रान्वयीति यावत्। अत [illegible] देवदत्तयज्ञदत्ता इत्यादौ लुग्व्यावृत्तिस्तत्र बहुत्वस्य देवदत्तादावप्यन्वयेन तदर्थमात्रान्वयित्वाभावादित्यन्यत्र विस्तरः ॥

कौशल्येतीति। आम्बष्ठ्येतीत्यपि बोध्यम्। अप्रत्युदेति। न चौदमेध्याया अपत्यमित्यर्थे ठक्यल्लोपे यस्याना पत्यत्वाल्लोपो न स्यात्। भस्याढे इति पुंवत्त्वं तद्धे इति निषिद्धमादेशत्वे त्वापत्यत्वं सुलभम् अपत्यस्यायमित्यर्थात्। प्रत्ययत्वे तु स्त्रीप्रत्ययानां स्वार्थिकत्वेपि स्त्रीत्वद्योतकत्वेन न तत्त्वं वक्तुमशक्यं यौधेयीत्यादावञोप्यन्तस्वार्थिकत्वात् गोत्रत्वमस्त्येवेति शार्ङ्गरवाद्यञ इति ङीन् सिद्धिः। अत एवापत्याणन्ताभिजितशब्दादभिजिद्विदभृदिति सूत्रेणात्यन्तस्वार्थिके यञि गोत्रचरणादिति वुञि आपत्यस्येति यलोपे आभिजितकसिद्धिः

——— रघुयदुशब्दयोरिति। एतच्च बह्वच इञ इति सूत्रे पदमञ्जर्यां स्थितम्। सिन्धुतक्षेति। कम्बोजशब्दस्य सिध्मादिषु पठ्यमानत्वादितिभावः। अवन्तीकुन्तीति। ञ्यङो लुक्। इतो मनुष्यजातेरिति ङीष्। कुरूरिति। ण्यस्य लुक् ऊङुत इत्यूङ्। अतश्चेतीह तद्राजेन अकारो विशेष्यते न तु विपरीतम्। विशेषणेन तदन्तविधौ ञ्यङ्ण्यादीनामपि अनेनैव लुक्सिद्धौ अवन्तिकुन्तिकुरुभ्यो लुग्वचनवैयर्थ्यापत्तेः तेन कौशल्येति सिद्धम्। तदेतदाह। तद्राजस्याकारस्येति। कारूशीति। कृञ उः करुः तं वष्टि मूलविभुजादित्वात्कः करूशः। एतेन करूषेति मूर्द्धन्यपाठः प्रत्युक्तः। अणिञोः। यद्यपि स्त्रीप्रत्ययाः प्रकृताः ष्यङः प्रत्ययत्वे लक्ष्यसिद्धिरप्यप्रत्यूहा तथाप्यादेशत्वमेवोचितम्। पत्युर्नो यज्ञसंयोगे इति नकारस्य यथा ॥

औदमेध्यानां सङ्घ औदमेधइत्यत्राण्तु भस्याढे इति प्रागेव पुंवत्त्वे इञन्तत्वादेव सिद्धो यकारनिवृत्तिश्च पुंवत्त्वादेवेति वाच्यम्। आदेशत्वेपि स्त्रीत्वस्याधिकस्याद्योत्यताया दुर्वारत्वेन तत्रापि लोपस्य दुर्लभत्वात्। स्थानिवत्त्वेनापत्यत्वं तु न सुलभम् अशास्त्रीयत्वात्। यदि तु आपत्यस्य चेति सूत्रे आपत्यत्वमपत्यार्थकत्वमात्रं न त्ववधारणगर्भमित्युच्यते तदा समाप्यदोष इत्याशयात्। एतच्च कैयटे स्पष्टम्। प्रत्ययत्वपक्षश्च ये च तद्धिते इति सूत्रे भाष्ये दृश्यते आदेशत्वपक्षश्च प्रकृतसूत्रे भाष्ये। षाष्ठभाष्यं तु एकदेश्युक्तिरिति तत्त्वम् ॥

षष्ठीस्वरसादिति। नच व्रीहिशाल्योरितिवदानन्तर्ये षष्ठी तत्र स्यात्तदर्थं कित्करणात् षष्ठीस्थाने इत्यस्य बाधेऽप्यत्र तद्बाधे मानाभावादिति भावः। नन्वत्रपक्षे हस्तिशिरसोऽपत्यं हास्तिशीर्षिर्बाह्वादित्वादिञ् अचीशीर्ष इति शीर्षादेशस्तत इञः ष्यङ्‌ हास्तिशीर्ष्या अत्र स्थानिवत्त्वेन शीर्षशब्दस्य शिरसशब्दत्वाद्ये च तद्धिते इति शीर्षन्नादेशः प्राप्नोति। टिलोपस्तु नस्ये चाभावकर्मणोरिति प्रकृतिभावात्। स्पष्टं चेदं ये च तद्धित इत्यत्र भाष्य इति चेन्न। अन् आत्माध्वानौ विति साहचर्यात् अन्नन्तादिहितयादावेव

अणिञोरिति षष्ठीस्वरसात्। इत्यभिप्रेत्याह। ष्यङादेशः स्यादिति। नन्वयं तातङ्न्यायेन सर्वादेशः स्यात् ङिच्चेत्यस्यानन्यार्थङित्त्वे एव नङ्गादिष्वचरितार्थत्वात् ष्यङो ङित्त्वस्य यङश्चेति विशेषणार्थत्वादित्यत आह। निर्दिश्यमानस्येति। कौमुदगन्ध्येति। अणः ष्यङ्। वाराह्येति। इञः ष्यङ्। अणिञोः किम्। आर्तभागी। ऋतभागस्य बिदादित्वादञ्। इत्यपत्याधिकारः। रज्यतेऽनेनेति। शुक्लस्य वर्णान्तरोपादानमिह रञ्जेरर्थः। कथं हरिद्रौ कुक्कुटस्य पादाविति। उपमानाद्भविष्यति। लाक्षा रोचनात्। वृत्तिकृत्तु वार्तिकस्थौ शकलकर्दमावपि सूत्रे प्रचिक्षेप। आभ्यामिति। भाष्यादौ तु नैतदस्ति। नील्येति। नीली ओषधिविशेषः। नक्षत्रेण। नक्षत्रवाचकाः शब्दाः वृत्तिविषये तद्युक्तं चन्द्रमसमभिदधानाः प्रत्ययं लभन्ते। पुष्येणेति। पुष्यसमीपस्थेन चन्द्रमसेत्यर्थः ॥

प्रकृतिभावस्वीकारेणादोषात्। नस्तद्धित इत्यत्र तु न तथार्थो व्याख्यानात्। हास्तिशीर्ष्येत्यस्य भगवतोच्चारणात्। ध्वनितं चेदं प्रकृतसूत्रे आदेशत्वं स्थापयता भगवता॥ इत्यपत्याधिकारः। शुक्लस्येति। उपलक्षणमेतत्। भाष्यादाविति। आदिना वार्तिकम्। चन्द्रमसमभिदधानादिति। तादृशाश्च संकल्पवाक्ये प्रसिद्धाः। अश्विन्यादेः केवलनक्षत्रवाचकस्य तु न ग्रहणं तेन कालयोगस्याव्यभिचारात्। अप्राप्तिपूर्वकप्राप्तिरूपयोगस्यासंभवाच्च ॥

पूर्वसूत्रात्।तेनप्रत्यासत्त्यानक्षत्रस्ययावन्तंकालंचन्द्रमसासंबन्धऔत्सर्गिकस्तत्कालसंबन्धविशेषोगृह्यतेसचषष्टिदण्डात्मकइतिभावः।द्विरण्ड्त्वस्यप्रतिप्रसूतोणित्स्यर्थस्तदाह।इहही
षष्टिदण्डेति।अयञ्चविशेषः।पूर्वसूत्रानुवृत्तिबलाल्लभ्यते।नाद्येत्युक्त्यानह्योनम्भइति।विशेषेगम्यमानेपिलुब्लवस्यैवेतिभावः।द्वन्द्वाच्छः।विशेषेउदाहरणमाह।तिष्यपुनर्वसवीय
महरिति।अविशेषेतुअद्यराधानुराधीयम्।नचलुबविशेषइति अणइवच्छस्यापिलुप्स्यादितिवाच्यम्।पूर्वोपस्थितेनअणैवतस्यनिराकाङ्क्षत्वात्।एतदेवहिमध्येपवादन्यायेपितत्व
स्य।अस्मिन्नर्थेइति।तथाचश्लोकवार्त्तिकम्।दृष्टंसामनिजाते चाप्यणिड्द्विर्वाविधीयतेइति।जातेर्थेयोद्विरण्सचवाडिदित्यन्वयः।शतभिषजिजातः।शातभिषः।शातभिषजः।इह
द्विःप्राग्दीव्यतइतिप्राप्तेणकालाट्ठञाबाधितः।सन्धिवेलादिसूत्रेणप्रतिप्रसूतः।इत्यणंद्विरुक्तेण अतोवाडित्वम्।एतच्चमूलेस्वस्थानेवक्ष्यते।वामदेवात्।यस्येतिलोपेनसिद्धेड्यड्ड्य
योर्डित्करणंस्वरार्थम्।ययतोश्चेतिसूत्रेणविधीयमानेनञउत्तरस्ययदान्तस्यअन्तोदात्तत्वम्।अवामदेव्यशब्देमाभूत्।किन्तुअव्ययपूर्वपदस्वरएवयथास्यात्। ननुकृतेपिडित्वेयय
तोरित्यस्यप्रवृत्तिः कुतोनेतिचेत्।परिभाषाबलादित्यवेहि।तथाहिनिरनुबन्धकग्रहणेनसानुबन्धकस्येतियग्रहणेड्यग्रहणंनभवति।तदनुबन्धकग्रहणेनातदनुबन्धकस्येतियद्ग्रहणेड्यद्ग्रहणं
नभवति।इमेचपरिभाषेइहैवडित्त्वेनज्ञाप्येते।तत्राद्यायाः प्रयोजनंपूरणगुणेतिसूत्रेतव्यग्रहणेतव्यद्ग्रहणंमाभूत्।दिवऔदित्यत्रदीव्यतेर्माभूत्।द्वितीयस्यास्तुअङ्ग्रहणेचङ्ग्रहणंमाभू
त्।त्रयंनेरः।अभ्वत्।नेहअशिश्वियत्।परिवृतोरथः।तदेकान्तग्रहणंकर्तव्यम्।नेहपुत्रैः पौत्रैः परिवृतः।तत्रोढतम्।शरावइति।अनुक्तोच्छिष्टइत्यर्थइतिवृत्तिकाराः।अवशिष्टइतितदर्थः।त
थाचकल्पसूत्रेषुव्यवहारः।उच्छिनष्टिनःसर्वंजुहोतीति।सास्मिन्पौर्णमासीतिसूत्रात्प्राकृतञ्नेत्यनुवर्त्तते।तेनसप्तम्यन्तादेवप्रत्ययाः।स्थण्डिलात्।व्रतंशास्त्रेणविहितोनियमः।तस्मिन्नासु
दायेनगम्ये।उरस्यमिति।कथन्तर्हिउरस्योऽग्निः।नह्यसौभवइतिचेत्सत्यम्।भवार्थेदिगादित्वाद्यदित्याहुः।दध्नष्ठक्।दध्नोति।संस्कारश्चेहलवणादिना।यस्तुसंस्कृतार्थेप्राग्वहतेरितिठग्वक्ष्यते
सतृतीयान्तात्।ततश्चदध्नासंस्कृतोपिदाधिकएव।उदकेनम्थयतीति।क्विप्तुक्इहैवसूत्रेनिपातनात्संप्रसारणाभावः।इतिशब्दादिति।सहितोलौकिकीं विवक्षामनुसारयति।सूत्रेसञ्ज्ञा
यामितिवृत्तिकताप्रक्षिप्तम् ॥ ७ति।तदनुबन्धकेति।सउपात्तएवानुबन्धोयस्यसतदनुबन्धकः सचान्यश्चानुबन्धोयस्यसोऽतदनुबन्धकइतिबोध्यम्।लौकिकींविवक्षामिति।तेनसाधनातिरिक्त

मासाईमादयोरेवानेनप्रत्ययइतिभाष्येस्पष्टम्॥

अनन्तवचनइति।प्रकृतइतिशेषः।विशेषणसमासः।शतस्वसंख्यावाचिशतशब्देनतुतद्धितार्थेतिसमासेशतश्लोकीत्यादिसिद्धिः।अयंतुनसंख्यावाचीतिभावः।ओर्गुणइति।परत्वादकृत्सार्वेतिदी
र्घेङ्कृतपरिभाषयाअनित्यत्वेनपुनः प्रसङ्गविज्ञानादोर्गुणइत्यर्थः।मरुत्वतीयमिति।मरुत्वानिद्रः।अग्नीषोमीयमिति।ईद्ग्नेरितीत्वम्।निपातनादिति।तत्पुरुषेकृतीतिबहुलग्रहणादलुक्
पौर्णमासीति।महाराजप्रोष्ठपदाट्ठञित्यत्रतदस्मिन्वर्त्ततइत्यर्थेपूर्णमासादण् उपसंख्यानादण्।शतंरुद्रादिति।शतशब्दोनन्तवचनः।सोमीति।हलस्तद्धितस्येतियलोपः।
वायव्यमिति।ओर्गुणः।वान्तोयीत्यवादेशः।उषस्यमिति।उषस्शब्दः स्त्रीलिङ्गोदिवोदुहितरंदेवतांवक्ति।एतच्चसुपेशसंसुखंरथमित्यादिमन्त्रेषुप्रसिद्धम्।शुना
सीरीयमिति।शुनश्चसीरश्चेतिद्वन्द्वः।शुनोवायुः सीरआदित्यइतिवृत्तिकारः।अन्येत्वेकमेवशुनासीरमिन्द्रस्यगुणमाहुः।तथाचाश्वलायनः। इन्द्रोवाशुनासीरइति।
मन्त्रवर्णश्चइन्द्रंशुनासीरमस्मिन्यज्ञेहवामहइति।मरुत्वतीयम्।मरुत्वत्यम्।अग्नीषोमीयम्।अग्नीषोम्यम्।वास्तोष्पत्यम्।वास्तोष्पतीयम्।वेश्मभूर्वास्तुरस्त्रि
याम्।वास्तोःपतिर्वास्तोष्पतिः।इहैवसूत्रेनिपातनात्साधुः।गृहमेधीयम्।गृहमेध्यम्।गृहमेधशब्दोऽकारान्तः।मरुद्भ्योगृहमेधेभ्यइत्याश्वलायनः।गृहमेधासआगतेति
मन्त्रलिङ्गञ्च।कालेभ्योभववत्।कालेभ्योयेभवेप्रत्ययावक्ष्यन्तेतेसास्यदेवतेत्यस्मिन्विषयेऽनेनसूत्रेणातिदिश्यन्ते।वत्करणंसर्वसादृश्यार्थन्तेनयस्माद्योविहितः ततः
सएवभवति।तथैवोदाहरति।मासिकंप्रावृषेण्यमिति।षकारेति।अन्यथाप्रक्रियालाघवायषकारमेवपठेदितिभावः।तस्यसमूहः।चित्तवदाद्युदात्तमगोत्रान्त
प्रतिपदमनुक्तप्रत्ययमिहोदाहरणम्।तथाहिअचित्ताट्ठग्वक्ष्यते।अनुदात्तादेरञ्।गोत्रान्ताद्वुञ्केदारादिभ्यःप्रतिपदंयञादयः इत्याशयेनोदाहरति।काकम्बाकमिति।एवं
वार्कम्।काकबकवृकशब्दाआद्युदात्ताः ॥

कस्कादित्वात्सत्वम्।वाचस्पतिर्दिवस्पतिवदित्यन्ये।मासिकमित्यादि।कालाट्ठञ्।प्रावृषएण्यः।षकारमेवेति।तत्रषकारोच्चारणेपिषस्यनेत्वंफलाभावात्।सोढाद्यन्तस्यक्लीवत्वात्।अविदूसादि
[illegible]त्यारक्विबन्तेभ्यः कर्त्तरिक्विप्प्रमास्त्येव भाष्येउदाहरणेषुदन्त्यपाठात् नषइतिबोध्यम् ॥

आदिभूतादिति। अचइत्यर्थः। कवर्गात्पूर्वेति। इदं फलितार्थकथनम्। पूर्वशब्दो भावप्रधानः। कोः पूर्वत्वमेषामिति बहुव्रीहिरतः सूत्रे न सर्वनामकार्यं सुडिति बोध्यम्। कवर्गावधिकपूर्वत्ववतामिति वाच्योर्थः। अनुदात्तादेरिति। गर्भिन्शब्दस्यान्तोदात्तत्वादिति भावः॥ प्रत्याख्यानादिति। उक्तरीत्यानुदात्तादित्वाभावादञोप्राप्तावौत्सर्गिकाणा सिद्धिमाश्रित्येत्यर्थ

प्राणिनां कुपूर्वाणामिति फिट्सूत्रात्। प्राणिविशेषवाचिनां शब्दानां ये आदिभूताः कवर्गात्पूर्वे तेषामुदात्तः स्यादिति सूत्रार्थः। अथादिः प्राक्शकटेरिति ह्यधिकृतम्। यत्तु वृत्तौ न्यासे च शौक्रमित्युदाहृतं तत्स्वामादिकं खण्डिकादिषु शुकशब्दस्य भाष्ये वृत्तौ च पठितत्वेनाग्रन्तत्वादित्यवधेयम्। भिक्षादिभ्योण्। भैक्षमिति। अचित्तत्वाट्ठक्प्राप्तः। गार्भिणमिति। अनुदात्तादेरञ्प्राप्तः। सति तस्मिन् आद्युदात्तत्वं टिलोपश्च स्यात्। युवतीनामिति। वृत्तिकारास्तु भिक्षादिगणे युवतिशब्दं पठित्वा तत्सामर्थ्यात्पुंवदित्याहुः। न चानुदात्तादेरञं बाधितुं पाठः भस्याढे तद्धिते इति पुंवद्भावः सिद्धश्च प्रत्ययविधाविति प्रागेव प्रत्ययनिवृत्तौ सत्याङ्निवृत्तीति कनिनन्ततया आद्युदात्तत्वात्तथा च स्त्रीसंघे यौवतमिति रूपं तन्मते स्थितम्। किन्तु नैतद्युक्तं भाष्यवार्त्तिकयोरिह युवतिशब्दपाठस्य प्रत्याख्यानात्। तथा चेह औत्सर्गिकोऽण् न तु भिक्षादित्वप्रयुक्त इत्यवधेयम्। शत्रन्तादिति। एवं च गार्भिणं यौवतङ्गण इत्यमरोक्तिः। अदः समित्तं मुखवीरयौवतन्तुदङ्गजाकम्बुमृणालहारिणी इति श्रीहर्षोक्तिश्च भाष्यमतेपि नासङ्गतेति भावः। ब्राह्मणमाणव। ननु त्रयोप्यमी वृद्धास्तेभ्यः प्रकृतो यञेवास्तु। नहि वृद्धात् यञि यनि वा रूपे विशेषोस्ति। न वा स्वरे उभयथाप्याद्युदात्तत्वाट्ठञ् तु नानुवर्त्तिष्यते स्वरितत्वात्सत्यम् ॥

स्तद्राह। तथा चेहेति। अस्वरितत्वादिति। योगविभागसामर्थ्यादित्यपि बोध्यम्। वुञस्तु न संबन्धो व्याख्यानात्। समूहप्रत्ययान्तानां नपुंसकत्वाद्यञश्चेत्यत्रापत्यग्रहणाच्च न स्त्रियां विशेष इति बोध्यम् ॥

मत्वर्थलक्षणयेति। छान्दसस्येति शेषः। छान्दसस्तत्रमतोर्लुगित्यन्ये। फिट्सूत्रादिति। शकुनीनाञ्चलघुपूर्वमित्याद्युदात्तत्वन्तु नान्त्यात्पूर्वं लघूदात्तमिति तदर्थादिति भावः। मधू

अन्यतो विधानार्थं यन्वचनं तत्सिद्धार्थकथनपरं वार्तिकमाह। पृष्ठादिति। पृष्ठशब्दः स्तोत्रविशेषस्य सञ्ज्ञा। पृष्ठ्य इति। पृष्ठानां समूहः। कथन्तर्हि पृष्ठ्यः षडह इति। मत्वर्थलक्षणयेत्यवेहि। ग्रामजनबन्धुभ्यः। वृत्तिकृता तु वार्तिकान्तर्गतः सहायशब्दोऽपि सूत्रे प्रक्षिप्तः। अनुदात्तादेरञ्। इह सूत्रे चित्तवन्त उदाहरणम्। अचित्तात्तु आपूपिकं शाष्कुलिकमित्यादौ परत्वाट्ठगेवेत्याशयेनाह। कापोतमिति। कापोतमयूरशब्दौ मध्योदात्तौ लघावन्ते इति फिट्सूत्रात्। खण्डिकादिभ्यश्च। आद्युदात्तार्थं वचनम्। अचित्ताट्ठकोबाधनार्थञ्च। चरणेभ्यो धर्मवत्। यस्याः प्रकृतेर्यः प्रत्ययो धर्मे वक्ष्यते स ततः समूहेऽपि स्यादित्यर्थः। वुञादयो हि चरणेभ्यो वक्ष्यन्ते चरणाद्धर्माम्नाययोरिति तु तत्र वार्त्तिकन्तदप्यनेनातिदेशसूत्रेण ज्ञापितमिति बोध्यम्। काठकमिति। गोत्रचरणाद्वुञ्। छान्दोग्यमिति। छन्दोगौक्थिकेति ञ्यः। विषयो देशे। तस्येत्यनुवर्त्तत इत्याह। षष्ठ्यन्तादिति। भौरिकिविधमिति। क्लीबत्वं लोकात्। सोस्यादिरिति। अक्षरेयत्तानिबन्धनं पङ्क्त्यादिच्छन्दः तद्वाचकात्प्रथमान्तात् अस्येत्यादिमति प्रत्ययः स्यात्। यआदिमांन्सप्रगाथश्चेत्। प्रग्रथ्यत इति प्रगाथः। अकर्त्तरि च कारक इति कर्मणि घञ्। पृषोदरादित्वाद्रेफनकारयोर्लोपः। रूढश्चायम्। चतुर्थषष्ठौ पादौ बार्हते प्रगाथे पुनरभ्यसित्वोत्तरयोरवस्येत् इत्येवमादिवचनाद्यत्र द्वयोर्ऋचोस्तिस्रः क्रियन्ते स प्रगाथः। त्रैष्टुभमिति। कुटीकुटीर इत्यादिवत् स्वार्थिके कृते लिङ्गान्यत्वम्। सङ्ग्रामे। प्रयोजनवाचिभ्यो योद्धृवाचिभ्यश्च प्रथमान्तेभ्योऽस्येति षष्ठ्यन्तार्थे सङ्ग्रामेऽभिधेये णः स्यात्। तदस्याम्। प्रहरणकिम्। मालाभूषणमस्याम्। क्रीडायाङ्किम्। खड्गः प्रहरणमस्यां सेनायाम्। घञः सास्याम्। घञः किम्। श्येनपतनमस्यां वर्त्तते। क्रियाकिम्। प्राकारोऽस्यां वर्तते। तदस्यामिति प्रकृते पुनः सास्यामित्युक्तिः क्रीडायामित्यस्यानुवृत्तिर्माभूदिति। अतएवाह। दण्डपातोस्यान्तिथाविति॥

रोमादेर्नाकृत्यनेनापि मध्योदात्तः। स तत इति। चरणवाचकादिति शेषः। स प्रगाथ इति। सूत्रे इतिशब्दः प्रकारे तेनादिसदृशान्तपरिग्रहस्तेन पङ्क्त्युतः पाङ्क्तः काकुभ इत्यादिप्रातिशाख्यव्याख्यातमिति केचित्॥

प्रत्ययंलभन्तइति।अध्ययनवेदनयोः सहाधिकारादुत्तरप्रत्ययानांनियमेनव्यर्थकत्वमितितदर्थसिद्धिरित्युच्यतेतदास्पष्टार्थमेव।अतएवतदस्मिन्नस्तीतिदेशइतिसूत्रेप्रमादकृत

तदधीतेतद्वेद।द्वितीयान्तादध्येतरिवेदितरिचप्रत्ययस्स्यात्। द्विस्तद्ग्रहणमधीयानेविदुषिचपृथग्विधानार्थमन्यथाउत्तरत्रक्रतुवसन्तादीनामशब्दात्मक तयाअध्ययनासंभवेनवेदितर्येवप्रत्ययः स्यात्।सिद्धान्तेतुद्विस्तद्ग्रहणसामर्थ्यात्क्रतुवसन्तादयः शब्दास्तत्प्रतिपादकग्रन्थेगौणाअपिप्रत्ययंलभन्ते।क्रतूक्थादि।क्रतुविशेषेति।क्रतुशब्दस्तुनगृह्यतेतथाहिसतिउक्थादिष्वेवपठ्येत।नापिक्रतुपर्यायाः।उक्थादिषुयज्ञशब्दस्यपाठादितिभावः।आग्निष्टोमिकइति।संस्थाविशेषवचनस्यापिअग्निष्टोमशब्दस्यतत्संस्थाकेक्रतौनिरूढः प्रयोगः।वासवदत्तामिति।गद्यरूपोग्रन्थविशेषः।आख्यायिकेति।अधिकृत्यकृतेग्रन्थइतिसूत्रेहरदत्तः।सर्वादेरिति।सादेरित्यत्रअर्थवतस्स शब्दस्यग्रहणात्सर्वादेः पृथगुपादानम्।एतदपिअर्थवत्परिभाषायांज्ञापकम्।सवार्त्तिकइति।वार्त्तिकान्तमधीतइत्यर्थः।अन्तवचनेअव्ययीभावेऽव्ययीभावेचाकालइतिसहस्यसः।ततोणोलुक्।इकन्निति।पदशब्दउत्तरपदंयस्यतस्मादिकन्स्यात्।शतशब्दात्षष्टिशब्दाच्चपरोयः पथिन्शब्दः तदन्तात्ष्ठिकन्स्यात्।षोडित्यर्थः।शतपथिकइति।अत्रवृत्तिकारोबहुलग्रहणंकृत्वाशातपथइतिअणमप्युदाजहार॥इकन्बहुलंयथोत्तरपदादिसूक्थाद्यन्तर्गणसूत्रमितिन्यासकारः।वसन्तादिभ्यष्ठक्।उक्थादिषुवसन्तादयः पाठ्यास्तेवावसन्तादिषु।तथातुनकृतमित्यन।अथर्वाणमिति।अथर्वणाप्रोक्तोऽथर्वा।उपचारात्।यद्वा।तेनप्रोक्तमितिप्रकृत्यऋषिभ्योलुग्वक्तव्यः। वसिष्ठः विश्वामित्रोऽनुवाकः इत्युदाहृत्यअथर्वणोवा।अथर्वा॥

मांचार्यस्यतदधीतेइतिसूत्रेद्विस्तद्ग्रहणंशक्यमकर्तुमित्युक्तंभाष्ये।उक्थादिष्वेवेति। प्रथमोपस्थितत्वादितिभावः।अणोलुगिति।अस्यान्ययीभावत्वेप्यद्धोत्तणिउपसर्जनत्वान्नाव्ययत्वम्॥

भाष्योक्तेरिति॥ रेवतिकादिभ्यश्छन्दसीतिसूत्रे इति शेषः। अस्मादेव भाष्यप्रयोगात् द्विषतावैकल्पिकीत्याहुः। अत्र पक्षे प्रोक्ताल्लुकृ तु न विधानसामर्थ्यादर्थप्रतीतेरणाप्युपपत्तेः आर्षप्रत्ययान्तादिति। ऋषिपदघटितसूत्रविहितप्रत्ययान्तादित्यर्थः। एतच्च मूलानुसारेण। औत्सर्गिकएवेति। यत्र ह्यौत्सर्गिकस्येञा बाधः प्राप्तस्तत्रैव तद्बाधाय ऋष्यणः प्राप्तेरिति भावः।

अथर्वण इति। शैषिकप्रकरणान्ते भाष्योक्तेः साधुः। ण्यक्षत्रियार्ष। ण्यप्रत्ययान्तात् क्षत्रियगोत्रप्रत्ययान्तादार्षप्रत्ययान्तात् ञितश्च परयोर्युवाभिधायिनोरणिञोर्लुक् स्यात्। कुर्वादिभ्यो ण्यः। कौरव्यः पिता। कौरव्यः पुत्रः। ऋष्यन्धकेत्यण्। श्वाफल्कः पिता। तत इञ्। लुक्। श्वाफल्कः पुत्रः। वसिष्ठादृष्यण्। वासिष्ठः पिता पुत्रश्च। तिकादिभ्यः फिञ्। तैकायनिः। ततोऽण्। लुक्। तैकायनिः पुत्रः। ऋष्यण एवेति। पाणिनशब्दे तु औत्सर्गिक एवाण् इति भावः। यद्वा। पाणिनशब्दो यौगिको न तु ऋषौ रूढः। लुग्विधौ तु रूढस्यैव ग्रहणम्। एतच्च शास्त्रान्ते भगवतः पाणिनेः सिद्धमिति वार्त्तिकनिर्देशाद्दाक्षीपुत्रस्य पाणिनेरिति भाष्याच्च निर्णीतमित्यवधेयम्। अष्टकमिति। संख्यायाः सञ्ज्ञासङ्घसूत्राध्ययनेष्विति संख्याया अतिशदन्तायाः कन्। छन्दो ब्राह्मणानि। छन्दोग्रहणादेव सिद्धे ब्राह्मणग्रहणं तद्विशेषप्रतिपत्त्यर्थं तेन पुराणप्रोक्तानामेव तद्विषयता। नेह। याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्कानि। कण्वादिभ्यो गोत्र इत्यण्। आपत्यस्य चेति यलोपः। याज्ञवल्क्यादयो नूतना इति सूत्रकारदृष्ट्या इति कृतोऽयं व्यवहारः। छन्दोब्राह्मणानीति किम्। पाणिनीयं व्याकरणम् ॥

यद्वेति। पणिनशब्द इति पाठः। एवं चार्षत्वमत्र प्रतिपदोक्तपरिभाषाऽप्रवृत्तावपि न क्षतिः। अत एव चान्यस्मिन्निति सूत्रे अत्रिशब्दादितश्चानिञ इति ढकि तत इञ् ण्यक्षत्रियेति लुक् भाष्योक्तः संगच्छत इति भावः। मूलन्तु प्राचामनुसारेणेति बोध्यम्। अत्र पक्षे आर्षत्वार्थेऽण् ऋषिवाचिनो गोत्रप्रत्ययान्तादित्यर्थ इति बोध्यम्। इति कृतामिति। याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वादिति वार्त्तिकविरोधोऽत्रारुचिः छन्दस्त्वं मन्त्रे एवेति च ॥

[illegible]इति। तदर्थेष्वित्यर्थः। लोकनिरूढ इति। सकललोकप्रसिद्धे देशनाम्नीत्यर्थः। अन्तर्भावितेति। निर्वर्तितेत्यर्थः। लुक् स्यादिति। एतद्धरदत्तानुसारेण। अर्थविशेषासम्प्रत्यये तन्निमित्तादपि पञ्चकपाल्यां संस्कृत इत्यविगृह्य पञ्चकपाल इत्येव यथा स्यादिति भाष्यवार्तिकाभ्यामव्यविकन्यायेन पञ्चकपाल्यां संस्कृत इति वाक्यमेवेति तत्रत्यव्याख्यानभाष्येण च विरुद्धमेतत्। चेतुरवयवार्थश्चतुर्थः। तत्रभव इति तु न्याय्यम्। पुनर्द्वन्द्व इति। एतदपि हरदत्तानुसारेण। द्वन्द्वद्वयेनैव निर्वाहात्। नद्यन्तेति लुबन्तं चेद्देशनाम तदा लुबिति सूत्रार्थ इति भा

अथ चातुरर्थिकाः। तदस्मिन्। मतुपोऽयमपवादः। सकललोकनिरूढे यथा स्यात्। नत्वाधुनिकसङ्केतितेऽपीत्येतदर्थ इति शब्दः। देशे तन्नाम्नीति उत्तरसूत्रत्रयेऽप्यन्वेति। तेन निर्वृत्तम्। अन्तर्भावितण्यर्थाद्वृतेः कर्मणि क्तः। चातुरर्थिकत्वमिति। चतुर्णामर्थानां समाहारश्चतुरर्थी। तत्रभवाश्चातुरर्थिकाः। अध्यात्मादित्वाट्ठञ्। तद्धितार्थे द्विगौ तु ठञो लुक् स्यात्। वुञ्छण्क। सूत्रे कुमुदशब्दस्य द्विः पाठेऽपि एकशेषो न भवति। प्रथमतः कुमुदान्तानां चतुर्णां द्वन्द्वं विधाय द्वितीये न काशादिकुमुदान्तद्वन्द्वेन सह पुनर्द्वन्द्वविधानात्। आदिशब्दः प्रत्येकमभिसंबध्यते। तदाह। अरीहणादिभ्य इति। जनपदे लुप्। तन्नाम्नीत्येव। नेह। उदुम्बराः सन्त्यस्मिन्नौदुम्बरो जनपदः। नद्यन्तलुबन्तं नामधेयम्। वक्ष्यमाणेनेति। अवर्णोपधात्परत्वादिति भावः। न च टिलोपस्य स्थानिवत्त्वम्। पूर्वत्रासिद्धे तन्निषेधात्। नन्वेकदेशविकृतन्यायेन पदत्वाद्रुत्वं स्यादिति चेन्न। बहिरङ्गत्वेन टिलोपस्यासिद्धत्वात्। न च षाष्ठी बहिरङ्गपरिभाषा रुत्वं न पश्येदिति वाच्यम्। कार्यकालपक्षाश्रयणात्। नन्वेवमौत्क्लीत्यादौ रुत्वं घटौआमलकीत्यादौ जश्त्वं च स्यात्। यस्येति लोपे कृते वशिष्टस्य स्वादिष्विति पदत्वात्। न च भत्वं यस्येति लोपस्य स्थानिवद्भावात्॥ वः।

बहिरङ्गत्वेनेति। बहिर्भूतप्रत्ययनिमित्तत्वादिति भावः। जश्त्वं चेति। चेन वेतस्वानित्यत्र रुत्वम्। यस्येति लोप इति। वेतस्वानित्यत्र टिलोपे अन्तरङ्गे सुप्तिङन्तमिति पदत्वे कृते अस्यापि प्राप्तिरित्यपि बोध्यम्। नहि स्वादिष्विति पदत्वं तेभ्योऽन्तरङ्गं येनोक्तन्यायेन समाधिः स्यादिति भावः। यस्येतीति। टिलोपस्याप्युपलक्षणम्॥ रुत्वं स्यादिति। वेतस्वानित्यत्रेति शेषः।

कार्यकालतयेति। कार्यकालपक्षे एकवाक्यतयेत्यर्थः। निषेधादिति॥ साक्षात्परम्परया वा पूर्वत्रासिद्धीयप्रापकप्रतिबन्धकस्यानिवत्त्वस्य तेन निषेधादित्यर्थः। दिगिति। दिगर्थस्तु त्यध्यायेन भत्वे च पित न्निषेधः। एवं चौत्तीत्यादावपि न दोषः। एवं चैकदेशविकृतन्यायेन सुबन्तत्वनिमित्तक पदत्वमपि वेलस्वानित्यत्र न परत्वेन तस्यापि भत्वेन बाधादिति। एतेनयष्ये देशाश्रयणेपि सा साक्षात्परंपरयेत्याद्युक्तरीत्या पदत्वं स्थानिवत्त्वनिषेधः स्यादेवेत्यपास्तम्। वस्तुतइदं सर्ववार्त्तिकानुरोधेन, कार्यकालपक्षेपि त्रिपाद्यां भाष्यमते बहिरङ्ग परिभाषाया अप्रवृत्तेः। परपदस्याजादेशस्यैव स्थानिवत्त्वे निषेधाच्च। पूर्वत्रासिद्धीयेति निषेधोप्यत्र नेति नपदान्तसूत्रे उपपादितम्। मतुप एवेति। न च ह्रस्वनुड्भ्यां मतुबित्यत्रैतद्ग्रहणार्थक्य

नच पदत्वेप्येवं तस्य रुविधानासह कार्यकालं तया पूर्वत्रासिद्धे चेति निषेधादिति चेन्न। पदसञ्ज्ञायां यथोद्देशाश्रयणात्। अत एव रामऔ इत्यवस्थायां पदत्वे वस्त्रादेरिव स्थानिवद्भावेन रामौ इत्यादेः पदत्वम्। अन्यथा उभयत आश्रयेऽन्तवद्भावप्रतिषेधात् पदत्वं दुर्लभं स्यादिति दिक्। महिषाच्चेति। एतच्च सूत्रेणैव सूचितम्। तथाहि। प्रकृतस्य मतुप एव हि डित्वमतिदिश्यताम्। प्रक्रियालाघवाय ड्वतुबेव वा क्रियताम्। एवं च ड्मतुब्वचनमन्यतो विधानार्थम्। शिखायावलच्। दन्तशिखात्संज्ञायामिति पञ्चमे वक्ष्यते। तदेशोपि शिखावल इति रूपस्य सिद्धये। इदं तु निर्वृत्ताद्यर्थम्। देशे तन्नाम्यणो बाधनार्थं च। कुञ्जेत्यादि। नडादन्तर्गणसूत्ररूपम्। सौत्रः षष्ठ्या लुक्। एवं तक्षशिलेत्यत्रापि। इति चातुरर्थिकाः॥ ङ्नुबन्धकोच्चारणम्। परत्वाट्टिलोपे ह्रस्वात्परत्वाभावात्। न गोश्वन्निति निषेधेन फलाभावाच्च। सावर्णान्तत्वात्। न च वेत्रस्वानित्यादावुदात्तनिवृत्तिस्वरस्य न गोश्वन्निति निषेधाभावाद्यतत्। तत्र हि मतुब्ग्रहणमनुवर्त्तत इति चाविति सूत्रे भाष्ये स्पष्टमिति वाच्यम्॥ कुमारीत्यादावन्तोदात्तत्वानापत्त्या तेनोदात्तनिवृत्तिस्वरस्य न निषेध इत्यर्थस्य तत्सूत्रे भाष्य एव स्पष्टत्वादिति भावः। ननु रकाजाडार इत्यस्य साधयितुमशक्यत्वेन तेनान्यतो विधानस्य ज्ञापयितुं शक्यत्वेऽपि प्रकृते तदशक्यम्। मतु[illegible]हि स्वानित्यस्य साधयितुं शक्यत्वादित्यरुचेराह। प्रक्रियेति। अन्यत इति। एवं रीत्या एतज्ज्ञापकसिद्ध्यर्थमेव प्रकृतस्य मतुपो डित्वं न कृतमिति तत्त्वम्॥ इति चातुरर्थिकाः॥

अत्र प्रवृत्तेरिति। तेषामपीदमर्थत्वात्प्राप्तिः। नेतः प्रागिति। नेतः प्रागर्थेष्वित्यर्थः। तेषामर्थानामिदंशब्देनाग्रहणं ज्ञाप्यते इति तत्त्वम्। नन्वार्याद्र्द्रकादिभ्यश्चतुरर्थ्यामेवेति नियमार्थन्त

शेषे। लक्षणं चेति। स्यादेतत्। लक्षणन्त्वाद्यर्थम्। चाक्षुषादीनां तस्येदमिति सूत्रेण दार्षदादीनां तु संस्कृतं भक्षा इत्यनेन सिद्धत्वात्। तथा अधिकारोऽपि व्यर्थः। तं विनापि घादीनां घुद्युलन्तानामपत्यादिचतुरर्थीपर्यन्तेष्वर्थेष्वप्रवृत्तेः शेषपक्षबलेनैव सुसाधत्वात्। तथा हि। आर्द्रकाच्छालेत्याद्यो वृद्धाः तेषां वृद्धाच्छ इत्येव सिद्धे उत्करादिषु पाठो ज्ञापयति नेतः प्राक् घादयः स्युरिति। गोत्रोक्षेति वुञ्विधिरपीह लिङ्गम्॥ अन्यथा समूहस्यापि इदमर्थान्तर्भूततया गोत्रचरणाद्वुञित्येव सिद्धे किं तेन। किं च। अपत्याद्यर्थानामनुवृत्त्या तस्येदं विशेषणतया वा यदि सूत्र घादय इष्येरन् तर्हि प्राग्दीव्यतोऽणित्यत्रैव ण्यादिभिः सह पठ्येरन्। अथोच्येत नापत्यादिव्यावृत्त्यर्थे शेषाधिकारः किंतु अर्थसाकल्यार्थः। अन्यथा सन्निहिते जातार्थ एव घादयः स्युः। भवादौ तु प्राग्दीव्यत इति विशिष्टावधिपरिच्छिन्नेष्वर्थेषु विधीयमाना अणादय एव स्युर्न तु घादयः। शेषशब्दात्तु सर्वेषु घादयः सिध्यन्तीति। मैवम्। जाताधिकारानन्तरं प्रावृषष्ठबित्यादिभिः सह घादिषूक्तेष्वेषु ततः प्राक् पाठसामर्थ्यादेवार्थसाकल्यलाभात्तस्माद्व्यर्थमिदं सूत्रमिति चेत्। अत्रोच्यते। अधिकारस्तावदावश्यकः। शैषिकात्सरूपः शैषिको नेति वक्ष्यमाणस्यार्थस्य विषयलाभो यथा स्यात्। शैषिकत्वप्रयुक्तं कार्यविशेषं ध्वनयितुं क्रियमाणः शेषाधिकार एव ज्ञापयति। शैषिकान्मतुबर्थीयादित्यादि। एष च श्लोकः सन्निधौ मतुब्विधौ च भाष्ये पठितः। इह तु सन्नन्ते उपन्यस्त इति तत्रैव व्याख्यास्यते। एवं स्थिते विधायकत्वमपि तस्य सुवचमिति नातीव तत्र निर्भरः कार्यः। विगृहीतादपीत्यादि। वाचनिकमेवेदम्। सूत्रे संघातस्यैव ग्रहणम्। अन्यथा वैषम्यात्संख्यातानुदेशो न स्यात् ॥

त्यादिष्वरुचेराह। गोत्रोक्षेतीति। लिङ्गं तु लोकादेव नपुंसकत्वं बोध्यम्। पठ्येरन्निति। संभावनायां लिङ्। तेनेदं सूचितं विकारे घादिनिवृत्त्यर्थं तथा पाठः। अन्यथा ण्यादीनामपि निवृत्त्यापत्तिरिति। जाताधिकारानन्तरमिति। प्रावृष एण्यठपाविति सूत्रकरणलाघवानुरोधेनेत्यर्थः ॥

बहुव्रीहिरपीति। सूत्रेनक्रमेणोभयोर्निर्देशः। स्त्रियांटाप्चेति। चेनदूरे   औत्तरंइतिप्रयोगनिवृत्तिश्चास्यफलमितिसंगृहीतम्। तद्धितार्थेतिसमासइति। मद्रस्यपूर्वंइत्येकदेशिस

कुत्सितास्त्रयइति। इहबहुव्रीहिरपिसुवचः। अतएवनिपातनात्कोःकद्भावः। तेनकद्भावेत्रावुपसंख्यानमितिनकर्त्तव्यम्। दक्षिणापश्चात्। पाश्चात्यइति। कथंतर्हि
पश्चात्तनैःकश्चननुद्यमानइतिश्रीहर्षः। नचदिग्देशवाचिनिपश्चाच्छब्देसावकाशंत्यकंकालवाचकात्ट्युट्युलौबाधंतेपरत्वादितिवाच्यम्। अग्रादिपश्चाड्डिमजितिडि
मवाट्युट्युलोर्बाधस्यदुर्वारत्वात्(सत्यम्। पश्चात्तन्वन्तिइतिपश्चात्तनाःइतिकथंचिद्योज्यम्। कापिश्याष्फक्। कापिशीशब्दात्ष्फक्स्यात्। षोङीषर्थः। तदाह। कापिशायि
नीद्राक्षेति। द्युप्रागपाक्॥ अपाचीदक्षिणादिक्। द्वितीयोवर्णःपकारोनतुदन्त्योष्ठ्यः। यदिन्द्रप्रागपागुदक्इत्यादौतथादर्शनात्। प्रागादयोद्विविधाः अव्ययाअनव्यया
श्च। अस्तात्यन्ताअव्ययाः अन्येतुन। उभयेपीहगृह्यन्तेऽविशेषात्। अथकथंसंस्काराःप्राक्तनाइवेति। कालवाचिनोव्ययात्परत्वात्ट्युट्युलावितिबोध्यम्। औत्तराहइति।
यदातुउत्तरादाहिप्रत्ययेततोऽण्क्रियतेतदाऔत्तराहशब्दोऽन्तोदात्तःस्त्रियांङीप्चबोध्यः। आहजन्तस्तुआद्युदात्तः। स्त्रियांटाप्चेतिविशेषः। वक्ष्यतइति। ष्यसस्तुट्चे
त्यत्र। मद्रेभ्योञ्। बहुवचननिर्देशाज्जनपदवाचीगृह्यते। नतुभद्रपर्यायः। दिशोमद्राणामिति। दिग्वाचकादुत्तरपदस्यजनपदवाचिनःमद्रभिन्न स्याचामादेर्वृद्धिः
स्यात्ञितिणितिकितिचतद्धितेइत्यर्थः। पौर्वमद्रइति। मद्रैकदेशेमद्रशब्दस्यवृत्तौदिक्शब्देनसामानाधिकरण्यात्तद्धितार्थेतिसमासः। उदीच्यग्रामात्। दिग्ग्र
हणंनिवृत्तम्। शैवपुरमिति। प्रस्थपुरवहान्ताच्चेतिवुञ्नभवति। वृद्धादितिहितत्रानुवर्त्तते। भवतष्ठक्छसौ। जश्त्वमिति। सितिचेतिपदत्वादितिभावः। एतद
र्थमेवहिछसःसकारः। अतएवनायंशकारादिः ॥

मासइत्यन्ये ॥ ॥ ॥ ॥ ॥ ६ ॥ ६ ॥ ।

सित्वमिति। अवर्णार्थं तु न सकारो व्याख्यानात्। एभ्यो देशेति। सति संभव इति शेषस्तेनापठितेभ्योप्यदेशवाचिभ्यः सिद्ध्यति। गहादिराकृतिगणः। ज्ञापयितुमिति। तेनारातीयसि
तथाहि सति सित्वं व्यर्थं स्यात्। काश्यादिभ्यष्ठञ्ञिठौ। इकार उच्चारणार्थ इति। अकार एवोभयत्राप्यनुबन्धः तस्य विपर्यासस्तु स्त्रीप्रत्ययविशेषार्थ इति भावः। आप
दादीति। अन्तर्गणसूत्रमिदम्। धन्वयोपधाद्वुञ्। धन्वेति न स्वरूपग्रहणं वृद्धत्वासंभवात् इत्याशयेनाह। धन्वविशेषेति। ऐरावतं धन्वेति। यद्यपि समानौ मरु
धन्वानावित्यमरेण पुंस्त्वमुक्तं तथापि नपुंसकोपि धन्वशब्दोस्ति आष्टकं नाम धन्वेति भाष्ये ह्रस्वपाठात्। गहादिभ्यश्च। एभ्यो देशवाचिभ्यश्छः स्यात्। पूर्वपक्षादि
शब्देभ्यस्तु देशवाचित्वाभावेपि पाठसामर्थ्याच्छः। मुखपार्श्वेति। अलोन्त्यस्येति सकारस्य लोपः। यस्येति चेत्यकारस्य। अन्यथा नांभमात्रे टिलोपस्यानित्यतां ज्ञाप
यितुं लोपवचनम्। मुखतीय इति। मुखते जातादिः। आद्यादित्वात्तसिस्ततश्छः। स्वकीयमिति। गहादेराकृतिगणत्वाच्छः। अदेशवाचित्वेपि पूर्वपक्षादिवत्। तथा
चतुर्योगाप्रख्यानादित्यत्र न हि स्वकीयस्यैव प्रत्याख्यानमिति न्यासः। केवलात् स्वशब्दात्तु अण्। सौवम्। एतच्च द्वारादीनां चेति सूत्रे आकारे उदाहृतम्। स्वीयमिति
तु प्राक्क्रीताच्छः। चान्द्रास्तु स्वपरजनदेवराज्ञां कुक्चेति सूत्रयन्ति। तत्र राज्ञो नलोपे यत्नः कर्त्तव्यः। पर्वताच्च। कथं तर्हि तत्र घोरं रघोर्जन्यं पार्वतीयैर्गणैरभूदि
ति। उच्यते। पार्वतीयस्य राज्ञ इमे इत्यर्थे छान्तादण्। शैषिकाच्छैषिको नेति निषेधस्तु नास्ति॥ असरूपत्वात्। युष्मदस्मदोः। इह योगो विभज्यते। तेन यथासंख्यं
न। तथाहि। युष्मदस्मदोरन्यतरस्याम्। आभ्यां छो वा स्यात् त्यदादीनि चेति वृद्धत्वान्नित्यं प्राप्ते विकल्पोयम्। ततः खञ्च। एवमुत्तरसूत्रेपि योगविभागो बोध्यः। तेना
नयोः खञणभ्यां यथासंख्यं न। तस्मिन्युष्मकास्माकौ। तस्मिन् खञीत्यर्थः। ततः अणि च। अत एव खञणोरिति नोक्तम् ॥

ढिः। इह योगो विभज्यत इति। स्पष्टं चेदमत्रैव भाष्ये ॥

यथासंख्येनेति। नचैक एव स्थाने न विधीयते येन तस्य ससहायता द्योत्यते सा च प्रकरणाच्छेनेति यथासंख्याप्राप्तिरेवेति वाच्यम्। ससहायताद्योतनेपि तस्याः संबन्ध्यन्तरसाकाङ्क्ष-
तया, द्वयोरुपस्थित्या तत्प्राप्तेः द्वितीयोपस्थितिं विनाऽर्थापर्यवसानात्। नच प्रत्ययत्रयविधानान्न यथासंख्यं विकल्पार्थकानां पक्षेऽभावमात्रार्थत्वेपि अन्यभावार्थत्वाभावात्। प्रकृ
ते च महाविभाषया वाक्यस्य सिद्धत्वादन्यतरस्यांग्रहणबोधिततदभावेऽणो वेत्यस्य लक्ष्यसंस्कारवेलायां निर्णयोपि विद्धार्थप्रमितिकाले त्रयाणामनुपस्थित्या तदप्रवृत्तेः। यथा

तवकममकावेकवचने। अत्रापि खञि अणि चेति वाक्यभेदेन संबद्ध्यते अतो यथासंख्यं नेति दिक्। असाम्प्रतिके। संप्रतीत्यस्य यं प्रज्ञादौ पठ्यते। तच्च न्याय्ये वर्त्त
ते। तथा च प्रयुज्यते। अनाम्नश्च तूरात्रो अतिरिक्तः षड्रात्रः सदा एष संप्रति यज्ञोपपन्न रात्र इति। न्यूनो नातिरिक्तः सम इत्यर्थः। इदानीमित्यर्थेपि। एतर्हि सं
प्रतीदानीमित्यमरात्। ततोण्। सांप्रतम्। ततो विनयादेराकृतिगणत्वात्स्वार्थे ठगिति न्यासकारः। द्वीपादनुसमुद्रं यञ्। समुद्रं समया अनुसमुद्रम्। अनुर्यत्समयेत्य
व्ययीभावः। सप्तम्यन्तं चेदम्। विद्यमानक्रियाद्वारकं द्वीपविशेषणमित्याह। समुद्रसमीपे यो द्वीप इति। कच्छाद्यणो मनुष्यवुञश्चापवादोयम्। अनुसमुद्रं किम्।
द्वैपमन्यत्। द्वैपको मनुष्यः। कच्छादिभ्यश्च। मनुष्यतत्स्थयोर्वुञ् इति सूत्राभ्यां यथायथमणवुञौ। कालाट्ठञ्॥ इह कालविशेषवाचिनामेव ग्रहणं न तु स्वरूप
स्य पर्यायाणां चेति वृत्तिन्यासपदमञ्जर्यादिषु स्थितम्। तन्मते कालिकी व्याप्तिः कालिकः संबन्धः इत्यादिप्रयोगाः विरुद्ध्यन्ति। किं च विशेषा एव गृह्यन्त इति
निर्मूलम्। मुनित्रयानुक्तत्वात्। यत्तु वदन्ति स्वरूपं पर्यायश्च नेह गृह्यते। ज्ञापकात्। तथा हि ॥

संख्यसूत्रे च विद्धार्थप्रमितिवेलायां निर्दिश्यमानगतसंख्यासाम्यं गृह्यत इति स्पष्टं ञमङणनमित्यादौ भाष्ये तएव सिद्धप्रकराभ्यां कन् अञ् वेति नासूत्रीति भावः। समुद्रं समये
ति। अनोस्तु द्यर्थकत्वदर्शनाय समयेत्युक्तम्। अनुनैव विग्रहः। सप्तम्यन्तमिति। समयेत्यस्याधिकरणशक्तिप्रधानत्वादिति भावः ॥

इतिभाष्यमिति। अत्रभाष्येसायंप्रातिकस्योदाहरणम्। कालसमुदायस्याकालत्वेपियथाकथंचित्कालवाचकत्वेनठञ्। ट्युट्युल्सूत्रेचिरमित्यस्यग्रहणेनाव्ययत्वप्रयुक्तट्युट्युलोरनित्यत्वाज्ज्ञाप्यंप्रयोगादेवज्ञातठञ्प्रवृत्तिः। कुकविकृतिरिति। कुत्सितस्यकवेः कृतिरित्यर्थः। इहगौणेति। गौणशब्देनात्रलाक्षणिकमात्रमित्यभिमानः। वस्तुतस्तद्प्राप्तिरेवेति तत्त्व

सन्धिवेलादिसूत्रेणसन्धिवेलात्रयोदशीप्रभृतिभ्यो ऽऋतुभ्योऽप्यण्विधीयते। तच्चठञोबाधनार्थं तदेवोक्तार्थेज्ञापकमितितच्चिन्त्यम्। इदंहिविशेषग्रहणेज्ञापकं नतुतन्मात्रग्रहणे। तथाचनस्तद्धितइतिसूत्रेसायंप्रातिकः पौनःपुनिकइतिभाष्यंव्याचक्षाणः कैयटआह। यथाकथंचित्कालशब्दाट्ठञिति। तथाचनदीभिश्चेतिसूत्रेनदीवाचकत्वाविशेषात्स्वरूपस्यापिग्रहणमुक्तम्। तथेहाप्युचितम्। तदेतदाह। कालवाचिभ्यइति। एतेनाकालिकेप्सेतिजैमिनिसूत्रेऽकालिकेतिह्रस्वपाठपक्षेकालाट्ठञितिकालिकमितिभट्टवार्तिकमपिव्याख्यातम्। इत्यादिमतेतुकालात्कालशब्दाट्ठञितिकालाद्यत्प्रकृष्टेठञितिपाञ्चमिकसूत्रेणैवंपरतयाकुकविकृतिरिवभट्टव्याख्येयंस्यात्। इहगौणमुख्यन्यायोनाश्रीयते तेनकदम्बपुष्पसाहचर्यात्कदम्बपुष्पः कालः व्रीहिपलालसाहचर्याद्व्रीहिपलालः तत्रभवंकादम्बपुष्पिकंव्रैहिपलालिकमित्याकरः। अत्रप्रमाणंतुसन्धिवेलादिसूत्रेअनेनकालग्रहणेननक्षत्राणांविशेषणमित्याहुः। ननुपुष्यादिशब्दानांकालोमुख्योऽर्थः। लुबविशेषइतिसूत्रादनादितिचेत्। मैवम्॥ पुष्यादिसमीपस्थेनचन्द्रमसायोगाल्लक्षितलक्षणयाहिकालेवृत्तिः। सैवलुब्द्वाराभिव्याख्यायतेपौषादिनिवृत्त्यर्थंनत्वेतावताकालोमुख्योऽर्थः। अनन्यलभ्यस्यैवशब्दार्थत्वादितिदिक् ॥

लक्षितलक्षणयेति। पुष्यसमीपस्थलक्षितचन्द्रमसाकालोलक्षितइत्यर्थः। परम्परासंबन्धेनपुष्यपदस्यकालेलक्षणेत्यर्थोवा। मुख्योऽर्थइति। शक्योऽर्थः ॥

ठस्यादित्वाभावादि [illegible] सन्नियोगशिष्टतयाऽन्तरङ्गत्वात्तुदि अङ्गात्परस्येत्यर्थे ततष्ठस्य परत्वाभावात् कर्मठ इत्यादौ अठच ष्ठस्यैवेकादेशो दुर्लभः। यदागमा इति न्यायेन विशिष्टस्यग्रहणेपि निर्दिश्यमानपरिभाषया समुदायस्य न स्यात्। निर्दिश्यमानस्तु न्यक्तहित इति भावः। प्रत्ययाद्युदात्तत्वे कृते इति। सन्नियोगशिष्टतयेति भावः। अत्र ठचश्चित्वेनैस्सुपलक्षणं ठश्चित्वंसामान्यापेक्षं ज्ञापकम्। प्रत्ययसंबन्ध्यादेशा अन्तरङ्गेभ्यो बलवन्त इतीति बोध्यम्। ठचश्चित्वं तु न ज्ञापकं ठस्येक इत्यत्र सङ्घातग्रहणपक्षे न्तोदात्तस्य ठस्यान्तरतम्याद

एवंस्थिते कालवाचिभ्य इति मूलस्य कालप्रतिपादकेभ्यः इत्यर्थो बोध्यः। श्राद्धे शरदः। श्राद्धमिति कर्मनामधेयम्। श्रद्धावान्पुरुषस्तु नेह गृह्यते। व्याख्यानात्। रूढिर्योगमपहरतीति न्यायाच्च। श्वसस्तुट्च। ठञ्चास्यादिति ऐषमोह्य इत्यादिनास्यबपि विकल्पितः पक्षेट्युट्युलौ बोध्यौ। शौवस्तिकमिति। नन्विह इकादेशो दुर्लभः। तुटः प्रत्ययभक्ततया ठस्यादित्वाभावात्कर्मठ इत्यठचो यथा। न च परत्वादिकः आङ्गतया तस्य बहिरङ्गत्वात्तस्य सन्नियोगशिष्टतया तु टोऽन्तरङ्गत्वात्। न च सूत्रभङ्गे न तु क्सुकरः। इसुसुक्तान्तादिति कादेशप्रसङ्गात्। मैवम्। वुञ्छणादिसूत्रे बहुचो मनुष्यनाम्नष्ठज्वेति सूत्रे चठचश्चित्वेनेकादेशोऽन्तरङ्गेभ्यो बलवानिति ज्ञापितत्वात्। अन्यथा प्रत्ययाद्युदात्तत्वे कृते इकादेशः स्यादिति किं ठचश्चित्वेन। कृते त्विकादेशे प्रत्ययस्वरं बाधितुं चित्त्वं युज्यते। सन्धिवेला। तैषमिति। तिष्यात् भवादौ प्रत्ययः जातार्थे तु श्रविष्ठाफल्गुनीति लुक्स्यात्। सूर्यतिष्येत्यत्र तिष्यपुष्ययोर्नक्षत्राणीत्युक्तेर्यलोपः। प्रावृषएण्यः। ऋत्वणोपवादः ॥

न्तोदात्तादेशसंपादनेन चित्त्वसार्थक्यात् वर्णग्रहणपक्षे ठकारादिष्वकार उच्चारणार्थोऽनक्का एव प्रत्ययाद्रूत्यर्थस्याकरसंमतत्वेन प्रत्यये व्यर्थस्य चित्त्वस्यादेशेन्तोदात्तसंपादनेन चित्त्वसार्थक्यात् ॥ ——— भाष्ये तु श्वसस्तुट्चेति चेनादेशसंनियोगः कर्तव्य इत्युक्तम्। यदि तु अङ्गत्वनिमित्तस्येति व्याख्यायते। यदागमा इति परिभाषया विशिष्टस्यग्रहणेपि निर्दिश्यमानपरिभाषया ठस्यैवादेश इत्युच्यते तदा त्विति दिक् ॥

अनुकृष्यत इति। सर्वत्रग्रहणसामर्थ्यात्। अन्यथा छन्दसीत्यस्य निवृत्त्यैव तत्फले सिद्धे तद्वैयर्थ्यं स्पष्टमेवेति भावः। तत्र हैमनो लोके वृत्तिविषये एव ऋत्वणा चित्वमिति हैमन्तशब्दे नैव विग्रह इति बोध्यम्। वैकल्पिकत्वादिति। एवं च रूपत्रयसिद्धौ विदं न कार्यमिति भाष्ये उक्तम्। तद्रीत्या हैमन्तशब्दे ऋत्वणो हैमन्ताच्चेति ठञा बाधापत्तौ हैमन्तमित्यसिद्ध्या फलभेदे

प्रावृषेण्य इति। प्रावृषि भवः। जाते तु ठप् वक्ष्यति। एण्याभ्यामिति सिद्धे प्रक्रियालाघवार्थं णकारोच्चारणम्। किं च प्रावृषेण्यमाचक्षाणः प्रावृषेणः। अत्र णकारश्रवणार्थमपि तत्। ण्यन्तात् क्विप्। णिलोपाल्लोपयलोपाः। सर्वत्राण् च तलोपश्च। हैमनमिति। नस्तद्धित इति टिलोपस्तु न भवति। नलोपस्य समुदायलोपपक्षे अन्निति प्रकृतिभावाद् अवयवलोपत्वपक्षे तु यस्येति लोपे तस्याभीयत्वेनासिद्धत्वात् स्थानिवद्भावाद्वा। हैमन्तमिति। ऋत्वणि तकारलोपो न। तस्य सर्वत्रेति प्रतिपदोक्तेनाणा सन्नियोगशिष्टत्वात्। वृत्तिकारास्तु छन्दसि ठञ्। वसन्ताच्च। छन्दसीत्येव। ततः हेमन्ताच्च। इह सर्वत्र ग्रहणमपकृष्यते तेन लोके वेदे च हैमन्तिकम्। ततः। अण् च तलोपश्च। एवं च भाषायामपि रूपत्रयमित्याहुः। एतच्च भाष्यविरुद्धम्। भाष्ये हीदं सूत्रं प्रत्याख्यातम्। तच्चेत्थम्। हेमन्तपर्यायो हेमन्शब्दोऽप्यस्ति। हेमन् हेमन्ताग्नीगन्तिकर्णौ तस्मादेतौ हेमन्तसुप्तः इत्यत्र प्रयोगात्। तत्र भाषायां हेमन् हेमन्तशब्दाभ्यामृत्वणि हैमनं हैमन्तमिति रूपद्वयम्। छन्दसि तु ठञा तृतीयम्। न च तत्र ठञा अणो बाधः छन्दसि सर्वविधीनां वैकल्पिकत्वादिति तस्माल्लोके रूपद्वयमेवेति तत्त्वम्। सायं चिरम् ॥

प्रत्याख्यानासंभव इति भावः। सर्वत्रग्रहणं तु सर्वत्र विभाषा गोरितिवदिति नार्थसाधकम्। न च हेमन्ताच्चेति चेन ऋत्वणोऽनुकर्षणात्तत्सिद्धिः। वसन्ताच्चेति चवदस्यापि छन्दसीत्यनुकर्षकताया औचित्यात् ॥

अङ्ग॰सञ्ज्ञानिमित्तइति त्युशब्दस्यप्रत्ययतयातदवयवोयोयुस्तस्यविधीयमानोऽङ्ग॰रूपसंज्ञिनिमित्तकोऽनादेशोनस्यादित्यन्वयः।सञ्ज्ञायतेइतिसंज्ञा।कर्मण्यङ्.।अङ्ग॰रूपंसंज्ञी
त्य[illegible]र्थः।अङ्गात्परस्ययोरित्यर्थेदोषः।यदागमाइतिन्यायेनागमविशिष्टस्ययोर्ग्रहणेपिनिर्दिश्यमानस्य —————— व्यवहितत्वाद्विशिष्टस्यानिर्दिश्य

नन्वन्तरङ्गत्वात्प्रथमंतुटिमृत्युरित्यादाविवत्युशब्दस्यप्रत्ययतयाअङ्ग॰संज्ञानिमित्तंयोयुस्तस्यविधीयमानोऽनादेशोनस्यात्।नचतुगेवकार्यः।तस्यपूर्वान्ततया प्रातस्तनमित्यत्रविसर्जनीयाभावप्रसङ्गात्।अतआह।तुटः प्रागिति।इत्यादीति।आदिशब्दार्थस्तुघकालतनेष्विति।सायंतनमिति।स्यतेर्घञिसायशब्दोदिव सावसानेरूढः।तस्यप्रत्ययसंनियोगेनमान्तत्वंनिपात्यतेअन्यत्रत्वकारान्तएव।सायाह्नः।आहच।संख्याविसायपूर्वस्येति।भारविश्च।सायमण्डनमभिलषयन्त्य इति।एतच्चवार्त्तिकमतम्।आहहि।सायचिरयोर्मकारान्तत्वंप्रत्ययसन्नियुक्तमिति।भाष्येतुसायंशब्दस्यपाठइहसूत्रेप्रत्याख्यातः। स्वरादिषुपठितात्सायमि तिमान्तात् अव्ययत्वेनैवप्रत्ययेरूपसिद्धेः।नचैवंघञन्तात्कालाठ्ञिअनिष्टरूपापत्तिः।तस्यकालवाचित्वाभावादित्याहुः।यद्यपिकालबोधकत्वमात्रंता त्क्षणिकसाधारणंठ्ञिविधौगृहीतंतच्चउक्तभारविप्रयोगात्सायशब्देप्यस्तितथाप्यनभिधानाठ्ञ्नेतिबोध्यम्।एदन्तत्वमिति।प्राह्णः सोढोस्यप्राह्णेतनइत्याद्यर्थमात त्रहिसप्तमीनास्ति।जाताद्यर्थेतुघकालतनेष्वित्यलुकासिद्धम्।चिरत्नमिति। चिरशब्दस्यसूत्रेउपादानाट्ट्युट्युलावपिस्तः।अग्रादीति।डिमचोडित्वंशक्यमकर्त्तु म्।तत्रजातः।ननुजातादिषुणादयःसिद्धाएवचाक्षुषंरूपमित्यादिसिद्धयेशेषइतिसूत्रस्यलक्षणत्वोक्तेः।अधिकारत्वाच्चघादयःतस्माज्जाताद्यर्थनिर्देशोव्यर्थः।नचजातादिष्वे वेतिनियमःसुवचः।चाक्षुषमित्याद्यसिद्धेः।तत्रास्तेशेतेइत्यादौतुअनभिधानादेवनभविष्यति ॥

मानत्वाच्चाप्राप्तिरितिभावः । अङ्ग॰सञ्ज्ञानिमित्तमि
[illegible]पपाठः।तादृशेर्थेहिउक्तरीत्यादोषस्याभावात्।कालवाचित्वाभावादिति।अवसानवाचित्वादितिभावः।आहुरित्यत्रास्वरुचिबीजंस्वयमेवाह।यद्यपीति।अनभिधानादिति।सायाह्नसायतनयोःसा

येइतिसप्तम्यन्तएवचतस्यप्रयोगोनान्यत्रेत्यर्थस्यभा
ष्येस्पष्टत्वादितिभावः।एवंचसायमण्डनेत्यादिचिन्त्यमेव॥

अणुनाविति। अचेत्यस्याप्युपलक्षणम्। ह्रस्वपाठोपि समर्थयितुमिति। नच टाबन्तानुकरणेन्तरङ्गत्वाद्वृद्धौ ङिप्प्रकृतिभूतमनुकर्तुमशक्यमिति वाच्यम्। अमावस्यदिति सूत्रे पक्षे वृद्ध्यभाव
अङ्गुल्या खनति वृक्षमूलादागतः इत्यादौ यथा। समर्थविभक्तयस्तु आक्षेपादेव लभ्यन्ते। चाक्षुषमित्यत्र तृतीया यथा। तस्मात्तत्र जात इत्यादि सूत्राणि अर्थानीति
चेत्। अत्राहुः। प्राक्षष्ठ्यविस्त्यादीनपवादांस्तत्र तत्र विशेषे वक्तुं जातादयोऽर्थास्तावदवश्यं वक्तव्याः। तेच योगविभागेन विभक्तिविशेषसमभिव्याहारेण चोक्ताः स्पष्टत्वा
र्थे यानि तु निरपवादान्यर्थादेशनानि कृतलब्धक्रीतकुशलादित्यादीनि तानि स्पष्टत्वार्थान्येवेति। पूर्वाह्णक इति। विभाषा पूर्वाह्णापराह्णाभ्यामित्यस्यापवादः। आर्द्रकः मूलक
इति। नक्षत्राणोपवादः। प्रदोषक इति। निशाप्रदोषाभ्यां चेत्यस्यापवादः। अवस्कर इति। औत्सर्गिकस्याणः। केचित्तु संज्ञायां शरदो वुञिति सूत्रस्थं संज्ञाग्रहणम् कृतल
ब्धेति तत्पर्यन्तमनुवर्तयन्तीति वृत्तिकारः। तेषां मते संज्ञायां यथायथं यणादयो घादयश्च बोध्याः। अमावास्यायां वा। सन्धिवेलाद्यणोपवादः। अमावस्यदन्यतरस्या
मिति सूत्रेणामा पूर्वाद्वसेर्ण्यति वृद्धौ पक्षे ह्रस्वो निपात्यते। एकदेशविकृतस्यानन्यतया ह्रस्वपक्षेपि अणुनोस्त एव। आमावस्यः। अमावस्यकः। केचित्तु सन्धिवे
लादिषु इह सूत्रे च ह्रस्वोपधमधीयन्ते। तेषां दीर्घपक्षे न स्यात् विकृतत्वात् प्रकृतेरग्रहणादिति न्यासकारहरदत्तादयः। वस्तुतस्तु अकृतवृद्धेर्ङिप्प्रकृतिभूतस्ये
दंग्रहणमित्याश्रित्य ह्रस्वपाठोपि समर्थयितुं शक्यते। अच। अमावास्याशब्दादकारप्रत्ययः स्यात्। अयमपि प्राग्वतुभ्यां बोध्यः। तदिह अमावास्यायां जा
ते ह्रस्वदीर्घाभ्यां प्रत्ययत्रयेण षड्रूपाणि। श्रविष्ठाफल्गुनी। इह सूत्रे स्वातिशब्दो ह्रस्वान्त इति कैयटहरदत्तादयः। माधवस्तु स्वातीति ष्येति ङीषन्तं पठति। तथाहि।
अणुयास्वविति सूत्रे शैषिकाणां विप्रतिषेधनिरूपणप्रस्तावे सौवात इति भाष्यमुपादाय कैयटेनोक्तम् ॥

एव निपात्यत इत्याशयः [illegible] तीति। स्वातेरुभयं प्राप्नोतीत्युपक्रम्य हि तदुक्तं भाष्ये। माधवस्त्विति। अत्रारुचिबीजं तु रद्धिविरोधः ॥

हरदत्त इति। अत्रारुचिबीजं तु नपुंसकह्रस्वविशिष्टस्य लिङ्गप्रत्ययवैशिष्ट्यासंभवेन परिभाषाप्रवृत्तेर्दुरुपपादत्वम्। तस्मात्सूत्रे समाहारद्वन्द्वगर्भो द्वन्द्वः। तेन स्त्रीलिङ्गयोर्ग्रहणम्। नपुंसकह्रस्वत्वेप्येकदेशविकृतन्यायेन लुगिति तत्त्वम्। क्रीतत्वप्रकारकेति। शेष इत्यनेनास्यापि सिद्धेः पूर्वस्य स्पष्टत्वार्थमिदमुक्तं स्पष्टयैतदर्थलाभार्थमिति तदर्थः। जातलब्धा

भव। र्षेण जाते तु श्रविष्ठेत्यादिना लुक् स्यादिति सन्धिवेलादिसूत्रे हरदत्तेनाप्येवमुक्तम्। न च कृदिकारादिति ङीषन्तात्स्वातीशब्दाज्जातार्थे अणः श्रवणमस्त्विति वाच्यम्। लिङ्गविशिष्टपरिभाषया लुको दुर्वारत्वादिति भावः। माधवस्तु जातार्थेऽपि अङीषन्तस्य सौवात इति रूपमाह। लिङ्गविशिष्टग्रहणे केवलस्याग्रहणात्। एतच्चात स्वातस्य गमन इत्यत्र धातुवृत्तौ स्पष्टम्। श्रविष्ठास्विति। श्रविष्ठा। धनिष्ठा। इत्यादीति। आदिशब्दात् अनुराधः। स्वातिः। तिष्यः। पुनर्वसुः। हस्तः। विशाखः। अषाढः। बहुलः। कृत्तिकापर्यायस्य बहुलाशब्दस्य समाहारद्वन्द्वे नपुंसकह्रस्वत्वेन सूत्रे निर्देशः। उपसंख्यानमिति। प्रकरणाल्लुक् इति बोध्यम्। स्थानान्तेति। गोशालशब्दस्य विभाषासेनेति नपुंसकस्यैव सूत्रे निर्देश इति स्पष्टम्। तस्माद्धृदयीत्वरणलेप्येवमेव, न चैवं स्त्रीत्वपक्षे लुङ्नेति इति भ्रमितव्यम्। लिङ्गविशिष्टपरिभाषया तत्रापि लुक्सिद्धेः। यद्यपि टाबन्तयोः पाठेऽपि न क्षतिः। एकदेशविकृतन्यायेन क्लीबेऽपि लुक्सिद्धेः तथापि लाघवार्थं ह्रस्वपाठ इति हरदत्तः। वत्सशाल इति। वत्सशालायामित्यपि बोध्यम्। इत्यादीति। आदिशब्दाद् अभिजित् आभिजितः। अश्वयुक्। आश्वयुजः। कृतलब्ध। यद्यपि कृतक्रीतत्वे जातलब्धत्वयोर्व्याप्ये तथापि पृथगुपादानं कृतक्रीतत्वप्रकारकेऽपि बोधे उद्देश्ये शैषिकाः साधव इति बोधयितुम्। अत एव जाते लुग्भाजामपि कृते लुङ्नेति बोध्यम्। प्रायभवः। न च तत्र भव इत्यनेन गतार्थता। प्रायभवस्य भवस्य च विशिष्टाविशिष्टत्वाभ्यां भेदात्। उपजान्वादयः सामीप्येऽव्ययीभावाः तेषां समाहारद्वन्द्वे सौत्रं पुंस्त्वम् ॥

भ्यां मन्यथासिद्धिस्त्विह परिहृतेति न विरोधः। तदेवाह। अत एवेति। विशिष्टेति। कादाचित्काभावप्रतियोगित्वविशिष्टं भवनं प्रायभवशब्दार्थः। भवनं तु भवशब्दार्थ इति भावः ॥

ठञ्इति। कालाद्गणइत्यर्थः। समानार्थइति। प्राधान्येतुनविचारः। कर्त्तृसत्तयोरुभयत्रापिबोधादितिभावः। भिन्नार्थाइति। धनवाचीत्यर्थः। आस्तेयमिति। विद्यमानेधनेचभवमित्यसंभूते। इहतन्त्रावृत्त्यादिनाः वक्तुमिराधेयस्याधारात्परिमाणानतिरेकश्चेत्यर्थद्वयमपिगृह्यते। स्रौघ्नइति। स्रुघ्नेसंभाव्यतेतत्परिमाणान्नातिरिच्यतेवायः सेनादिः एवमुच्यते। कोशाड्ढञ्। कौशेयमिति। रूढोयम्। कोशेसंभवस्तुसत्कार्यवादाश्रयणात्। मतान्तरेतुविकारप्रकरणेएण्याढञित्यस्यानन्तरंकोशाच्चेतिपाठ्यम्। तथाचवार्त्तिकम्। विकारेकोशाड्ढञ्संभूतेह्यर्थानुपपत्तिरिति। उप्तेच। योगविभागउत्तरार्थः। आश्वयुज्यावुञ्। उप्तेर्थे। ढञोपवादः। ञकारः स्वरार्थः। उत्तरत्रवृद्ध्यर्थश्च। देयमृणे। ऋणेकिम्। मासेदेयाभिक्षा। तत्रभवः। कालादितिनिवृत्तम्। कालसंबद्धस्यतत्रेत्यस्यनिवृत्तयेपुनस्तत्रग्रहणात्। नचपूर्वसूत्रस्थस्यतदित्यस्यव्यावृत्तयेतत्रग्रहणमितिवाच्यम्। तदस्येतिसूत्रस्थेनउत्तरत्रापिसुपठत्वात्। दिगादिभ्योयत्। दिश्। वर्ग। पूग। पक्ष। धान्य। मित्र। मेधा। अन्तर्। पथिन्। रहस्। अलिक। उखा। साक्षिन्। आदि। अन्त। मुख। जघन। मेघ। यूथ। उदकात्संज्ञायाम्। न्याय। वंश। अनुवंश। वेश। काल। आकाश। दिगादिः मुखजघनशब्दयोरिहपाठः अशरीरावयवार्थः। सेनायामुखेजघनेचभवंमुख्यंजघन्यम्। दृतिकुक्षि। दृतिश्चर्मविकारः शरीरावयवविशेषश्चतत्रभवंदार्तेयम्। कुक्षिशब्दोधूमादिः ततोधूमादिभ्यश्चेतिवुञिप्राप्तेऽनेनढञ्। कलशिर्घटइति। तथाचदण्डाहतंकालशेयमरिष्टमपिगोरसेइत्यमरस्यव्याख्यायांमन्थपात्रंकलशिरित्युक्तम्। कलशिमुदधिगुर्वींपल्लवालोडयन्तिइतिमाघः। वस्तिर्नाभेरधोद्वयोरित्यमरः। तत्रभवंवास्तेयम्। अस्तीतितिङन्तप्रतिरूपकोनिपातः। सचतिङन्तेनसमानार्थोभिन्नार्थश्च। आद्योयथा। अस्तिक्षीरागौः। द्वितीयोयथा। अस्तिमान्। धनवान्नित्यर्थः। तदिहाविशेषात् द्वयोरपिग्रहणम्। आस्तेयमितिन्यासकारहरदत्तौ। त्रिषाहेयंविषास्यादीत्यमरः। ग्रीवाभ्योऽण्। ग्रीवाशब्दोधमनीसङ्घातेवर्त्तते ॥

पइतितदाशयः ॥

म. मू उद्भूतावयवभेदत्वविवक्षयासूत्रेबहुवचनम्।तिरोहितावयवभेदविवक्षायांतुएकवचनान्ता दपिअण्ठञौस्तएव।गम्भीराञ्ञ्यः।पञ्चजनादुपसंख्यानम्।पाञ्चजन्यः।प
२०६ रिमुखादिभ्यश्चेति।दिगादिगणानन्तरंपरिमुखादिगणःपठ्यतेतस्मात्सामर्थ्यादिहसूत्रेऽव्ययीभावपदंतन्मात्रपरमितिनिर्णीयते।नहिपरिमुखादीनांकार्यान्त
रंविहितमस्ति।येनगणपाठश्चरितार्थःस्यात्।परिमुखादिभ्यइत्येवतुनसूत्रितम्।बहुव्रीहितत्पुरुषयोरपिप्रसङ्गात्।अव्ययीभावग्रहणस्योत्तरत्रोपयोगाच्चेतिभा
वः।परिमुखादिगणेप्रतिशाखशब्दोपिबोद्ध्यः तथाचशाखृव्याप्ताविति धातोःप्रतिशाखंभवंप्रातिशाख्यम्।अव्ययीभावाच्चेतिभावार्थेञ्यइतिमाधवः।कर्णललाटात्।अलंका
रेकिम्।कर्ण्यम्।ललाट्यम्।तस्यव्याख्यान।इतिशब्दोवाक्यार्थंपरामृशति।तत्समीपेश्रूयमाणश्चकारस्तत्रभवइतिवाक्यार्थमाक्षिपति।व्याख्यातव्यस्यग्रन्थस्यनामप्रतिपादकंतच्चश
त्यालक्षणयावेत्यत्रनाग्रहः।तस्मात्षष्ठ्यन्ताद्व्याख्यानकरणेसप्तम्यन्तात्तुभवार्थेप्रत्ययाःस्युः।यद्यपितस्येदन्तत्रभवइतिसूत्राभ्यांगतार्थता।तथापिठञादीनपवादान्वक्तुमिवा
वर्थौनिर्दिष्टावेव।प्रसङ्गात्तुअणादिकंविधीयतइतिध्येयम्।आख्यातव्यनाम्नःकिम्।पाटलिपुत्रस्यव्याख्यानीसुकोसला।पाटलिपुत्रंहितयाव्याख्यायते।ईदृक्संनिवेशविशिष्ट
मितिनत्विदंव्याख्यातव्यस्यनामग्रन्थेष्वेवव्याख्येयत्वस्यसुप्रसिद्धत्वात्।नामग्रहणस्यचप्रसिद्ध्युपसङ्ग्रहार्थत्वात्।बह्वचोन्तोदात्ताट्ठञ्।अणोपवादः।बह्वचःकिम्।द्व्यचष्ठकंवक्ष्यति। ए
काच्प्रत्युदाहार्यः।सौपम्।तैङम्।अन्तोदात्तात्किम्।संहितायाःसांहितम्।गतिस्वरेणाद्युदात्तोऽयम्।पौरोडाश।।पित्वान्ङीष्।पौरोडाशिकी।पुरोडाशिकी।दाशृदाने।कर्मणिघञ्।इ
हैवनिपातनादस्यडत्वम्।छन्दसोयदणौ।द्व्यच्लक्षणस्यठकोपवादः।छन्दस्यः।छान्दसः।इहअर्थयोःप्रत्ययाभ्यांयथासंख्यंन।अस्वरितत्वात्।चातुर्होतृकइति।चतुर्होतेतिपृथिवी
होताद्यौरध्वर्युरित्यादिगन्त्रस्यनामधेयम्।आर्त्विकइति।आदिशब्दात्प्राथमिकः आध्वरिकः पौरश्चरणिकः।नामाख्यातग्रहणंसङ्घातविगृहीतार्थमितिवार्त्तिकम्।तत्रविगृहीतग्र
हणमाख्यातार्थम्।नामशब्दात्तुद्व्यच्त्वादेवसिद्धम्।नामिकः।आख्यातिकः।नामाख्यातिकः।अणृगयनादिभ्यः।ठञादेरितिआदिशब्दात्ठक्छयोः।आर्गयनइति।अयनशब्दोभाव रा॰
साधनःतेनसमासेअनोभावकर्मवचनइत्यन्तोदात्तः।अभेदोपचाराद्ग्रन्थेवृत्तिः ॥ २०६

ठञ्प्राप्त इति। बह्वचोन्तोदात्तादित्यनेन। अतदनुबन्धकस्याग्रहणादिति। यद्यपि येनानुबन्धेन सानुबन्धकत्वं द्व्यनुबन्धकत्वं वा तदनुच्चारणे एव तत्प्रवृत्तेरत्र न तत्प्रवृत्तिः। तदनुबन्धके तिशब्दमर्यादया तथैवाऽभात्। सउच्चारित एवानुबन्धो यस्येति तदर्थात्। अतएव कञ्विधायके सूत्रे नित्वेन स्वरसिद्धौ ञित्वं टिड्ढेति सूत्रे विशेषणार्थमन्यथा याविकेत्यत्रापि प्रसज्येतेत्यपि गर्भे इह ठञ्प्राप्तः। औपनिषद इत्यत्राप्येवम्। विद्यान्यायशिक्षाशब्देभ्यो द्व्यचष्ठक्प्राप्तः। व्याकरणशब्दात्तु वृद्धाच्छः। ठगाय। आयः स्वामिग्राह्यो भागः स यस्मिन्नुत्पद्यते तदायस्थानम्। बहुवचननिर्देशः स्वरूपग्रहणनिरासार्थः। वृद्धाच्छं परत्वादयं बाधते। आपणिकः। आकरिकः। विद्यायोनिकृतः संबन्धो येषां तेभ्यो वुञ्स्यात्। अणोऽपवादः छं तु परत्वाद्बाधते। आचार्यकः। मातामहकः। मातुलकः। ऋतष्ठञ्। विद्यायोनिसंबन्धेभ्य इत्येव। तदाह। वुञोऽपवाद इति। उकञिति वक्तव्ये तपरकरणं ठञ्ग्रहणं च चिन्त्यप्रयोजनमिति प्राञ्चः। अत्रेयं चिन्ता। पैतृकी विद्येत्यत्र ङीबर्थं ठञ्। न च टिड्ढेति सूत्रे कञ्ग्रहणेन सिद्धमिति वाच्यम्। यादृशी इत्याद्यसिद्धेः तदनुबन्धकग्रहणेऽतदनुबन्धकस्याग्रहणात्। गोत्रादङ्कवत्। अपत्यप्रत्ययान्तादङ्कवत्प्रत्ययाः स्युः। अङ्के दृष्टस्य सर्वस्यायमतिदेशो न तु साक्षाद्विहितस्यैवेत्याग्रहः। तेन गोत्रचरणाद्वुञिति वुञपि लभ्यते। सहितस्येदमिति सामान्येन विधीयमानोऽपि अञ् ञिजन्तादन्यत्राङ्केऽपि दृष्टः। वैदमित्यादि। सङ्घाङ्केत्युक्तेरञ्यञिञन्तादिहाप्यण्। औपगवकमिति। गोत्रचरणादिति वुञ्। हेतुमनुष्येभ्यः। मनुष्यग्रहणमहेत्वर्थम्। समरूप्यमिति। विभाषागुणेत्यत्र विभाषेति योगविभागादगुणवचनादपि पञ्चमी। मनुष्येभ्य इति बहुवचनं स्वरूपविधिनिरासार्थम्। मयट् च। योगविभागो यथासंख्यनिरासार्थः। टोडिंबर्दः। हैमवती गङ्गेति। हिमवतः प्रकाशते तत्र प्रथमं दृश्यत इति यावत्। विदूराञ्ञ्यः। अणोऽपवादः। वैदूर्य इति। दन्त्यमध्योऽयम्। शाद्वलवत्। न तु नड्वलवन्मूर्धन्यमध्यः। नन्वर्थासंगतिः। वालवायाद्धि असौ प्रभवति विदूरे तु संस्क्रियते। सत्यम्। अत एव समाहितं भाष्ये वालवायो विदूरं चेति। वालवायशब्दः प्रत्ययं लभते विदूरादेशं च। असूत्रे पठितेनादेशेनानुरूपः स्थानी आक्षिप्यते। यद्वन्नदस्यादायिवेति भावः ॥ भाष्यं संगच्छते। सूत्रे च तन्[illegible]कारो भयानुबन्धोपलक्षितस्य च ग्रहणमिति तदाशयस्तथाप्येतत्क्लेशपरिहारार्थमेव ठञ्कृत इति चिन्ताबीजमित्याशयः ॥ ॥

पूर्ववत्करणस्येति। दि[illegible]क्रामत्सु [illegible]यनिष्क्रमणकर्त्तृत्वारोपात्करणस्य द्वारस्य कर्तृत्वं बोध्यम्। तत्र भवद्इत्येवेति। स्थित्यर्थकभुवोपि तत्र ग्रहणादिति भावः। ब्रह्मविवर्त्तत्वादि तद्गच्छति पथिदूतयोः। द्वितीयान्ताद्गन्तरि प्रत्ययः स्यात्स चेत्पन्था दूतो वेत्यर्थः। तत्र साध्वसिश्छिनत्ति काष्ठानि पचन्तीत्यादाविव करणस्य स्वातन्त्र्यविवक्षया पन्थाः करणीभूतमिति क[illegible]स्रौघ्नं कान्यकुब्जद्वारमिति। स्रुघ्नाभिमुखनिष्क्रमणे करणीभूतमिति फलितोर्थः। पूर्ववत्करणस्य कर्तृत्वे प्रत्ययः। तदित्येवेति। अधिकृत्येत्येतदपेक्षया द्वितीयेयम्। शारीरकीय इति। चतुर्लक्षणीसूत्रसंदर्भः। वृद्धाच्छः। शिशुक्रन्द। अत्र वार्त्तिकम्। द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः। दैवासुरम्। राक्षोसुरम्। सोऽस्य निवासः। नन्वस्येति कृद्योगे कर्त्तरि षष्ठी। तथा च विशेषणविशेष्यभावव्यत्यासात् स्तत्कर्त्तृकवासाधिकरणं स्रुघ्न इति विग्रहार्थः। स्रुघ्नाधिकरणकवासकर्तेह वृत्त्यर्थः। तथा च तत्र भवद्इत्येव सिद्धम्। सत्यम्। वासस्य चेतनमात्रकर्त्तृकत्वेन प्रसिद्धत्वात् प्रकारकृतो भेदः। वसन्ति हि प्रेम्णि गुणा न वस्तुनीत्यादौ तूपचारो बोध्यः। अभिजनश्च। अभिजायते एभ्य इति व्युत्पत्त्या अभिजनाः पित्रादयः। पूर्वसूत्रादिह निवास इत्यनुवर्त्तनं तत्सामानाधिकरण्यादभिजनशब्दस्य तत्संबन्धिनि लक्षणा। एवं स्थिते फलितमाह। यत्र पूर्वैरिति। वासुदेवार्जुनाभ्यां वुन्। छाणोरपवादः। अल्पाच्तरमजाद्यदन्तमिति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तमकुर्वन् ज्ञापयति सर्वतोभ्यर्हितं पूर्वमिति। स्यादेतत्। वसुदेवस्यापत्यं वासुदेवः। ऋष्यन्धकेत्यण्। तत्र गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् इत्युत्तरसूत्रेण वुञेवास्तु किमनेन वुना। न ह्यत्र वृद्धौ विशेषः। प्रागेव वृद्धत्वात्। न च वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो दोषः। वुन्यपि नकोपधाया इति निषेधस्येष्यमाणत्वात्। न चाभ्यर्हितं पूर्वमित्येतज्ज्ञापनमेव फलम्। तथा चेह पूर्वनिपातप्रकरण एवाभ्यर्हितग्रहणमात्रं लाघवात्कुर्यादिति। अत्र भाष्यं संज्ञैषा तत्रभवत इति। अयं भावः। सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततोसौ वासुदेवेति विद्वद्भिः परिगीयत इति स्मृतेः। परमात्मेह वासुदेवः सर्वत्रासौ वसत्यन्तर्यामित्वात्सर्वमत्र वसतीति वा सर्वस्य ब्रह्मविवर्त्तत्वात् इति वासु: ॥

७) ति। ब्रह्मोपादानकारणकत्वादित्यर्थः ॥

[illegible]स्यणेति। नराअयनं स्थानं यस्येत्यर्थः। अन्तर्यामितया तेषु स्थितेः। अस्मादेव स्वार्थिकेणि नारायणः। नरसमूहार्थक नारशब्देनायं साधुरित्यन्ये प्रकाशितमिति। प्रथमप्रकाशितमित्यर्थः। अयमेव च प्रकर्षः तत्स्वकृतमन्यकृतं वा। अतस्तेन कृतमित्यनेन गतार्थता। पञ्चेति। ञित् णित् कित् तित् निरनुबन्धकभेदेन पञ्चेत्यर्थः। यद्वाण् ण्यञ्ञ्नञ्स्नञ्स्तत्रोक्ताः पञ्च महोत्सर्गा

बाहुलकादुण्। कोकः पुराणपुरुषो नलिनेशयश्च वासुर्नरायणपुनर्वसु विश्वरूपाः इति त्रिकाण्डशेषः। वासुश्चासौ देवश्चेति विग्रहः। तथा च नेयं गोत्राख्या। नापि स्त्रियाख्या। अतो युक्त एव वुन् विधिः। तेन प्रोक्तम्। प्रकर्षेणोक्तं प्रोक्तम् अध्यापनेनार्थव्याख्यानेन वा प्रकाशितमित्यर्थः। प्रकर्षेणेति वचनान्नेह। देवदत्तेनाध्यापितम्। तित्तिरिवरतन्तु। अणोपवादः। कठचरकाल्लुक्। कठशब्दाद्वैशंपायनान्तेवासित्वाण्णिनिः चरकादण् तयोर्लुक्। कलापिनोऽण्। वैशंपायनान्तेवासित्वात्प्राप्तस्य णिनेरपवादः। इनण्यनपत्य इति प्रकृतिभावे प्राप्ते आह। नान्तस्येति। छगलिनो ढिनुक्। कलाप्यन्तेवासित्वात्प्राप्तस्य णिनेरपवादः। पाराशर्य। मण्डूकप्लुत्याणिनिरिह संबध्यते तद्विषयतेहेष्यते। तदर्थं शौनकादिभ्यश्छन्दसीति सूत्रात् छन्दोग्रहणमप्यनुवर्त्यं सूत्रयोश्छन्दस्त्वं तु गौण्या वृत्त्या बोध्यम्। भिक्षुसूत्रमिति। चतुर्लक्षणीरूपम्। भिक्षुनटसूत्रयोः किम्। पाराशरम्। शैलालम्। कर्मन्दकृशाश्वादिनिः। इहापि छन्दोनुवृत्त्यादि प्राग्वत्। भिक्षुनटसूत्रयोः किम्। कार्मन्दम्। काशाश्वम्। तेनैकदिक्। छन्दसीति निवृत्तम्। पुनस्तेनेत्युक्तेः। तसिश्च। पूर्वोक्ते विषये। उपज्ञाते। उपदेशं विनाज्ञातमुपज्ञातम्। कृते ग्रन्थे। तेनेत्यनुवर्त्तते। तस्येदम्। अणादयः पञ्च महोत्सर्गाः। घादयश्च षष्ठ्यन्तात्संबन्धिनि स्युः। अनन्तरादिष्वनभिधानान्न। वहेरिति। तुरिति तृन्तचोः सामान्यग्रहणम्। ढत्वादीनामसिद्धत्वादलौकिके प्रक्रियावाक्ये पूर्वमिट्। ततो निमित्ताभावान्न ढत्वादि। इडर्थमिदमुपसंख्यानम्। अणतु सिद्ध एवानूद्यते। आग्नीध्र इति। णिदयं प्रत्ययः ॥

७ इत्यर्थः। अनन्तरादिष्विति। संबन्धिविशेषः। णिदयमिति। न तु ञित्। अन्यथेतः स्वार्थे ञ्विधानं व्यर्थं स्यादिति भावः॥ [illegible] तु ञित्प्रत्यये तो[illegible]यां ङीब्वृद्धी स्वार्थिकाञश्चारितार्थ्यं वक्तुं शक्यमिति भावः ॥

अ[illegible]मिन्धे इति।इन्धयतीत्यर्थः।इतिलु[illegible]ति।यथात्रलुक्तथाद्विगोरितिसूत्रेनिरूपितम्।बीजान्तरमाह।अतएवेति।एतत्सामर्थ्यादेवहलादेरपि यतोलुग्भवतीतिभावः।वोढर्यपीति।तस्येत्यस्यसामान्य[illegible]षपरत्वंप्रकृतिसू[illegible]हकल्पनीदंमित्यस्यसामान्यरूपेणविशेषरूपेणचसर्वविशेषबोधकत्वम्।वहतिबोढेतिचसमानार्थमितिभावः।स्पष्टंचेदंतस्यापत्यन्तद्वहतीतिसूत्रभाष्ययोः।स्त्रियामिति। यत्तु[illegible]ग्नीध्रात्तवेत्यादौआद्युदात्तंप्रयुज्यते।तत्स्वार्थेऽञ्पक्षेबोध्यम्।तथाचवार्त्तिकम्।आग्नीध्रसाधारणादञ्इति।अग्निमिन्धेइतिक्विप्।अग्नीत्।ऋत्विग्विशेषः।तमग्निदृतापतःइत्यत्रतुछान्दसंहृस्वत्वंबोध्यम्।सामिधेनीति।षित्वात्ङीष्।हलस्तद्धितस्येतियलोपः।ययाग्निस्समिध्यतेसासमित्।संपदादित्वात्करणेक्विप्।ततःकर्मणिषष्ठ्यन्तात्साधानकरणेतद्धितोयम्।रथाद्यत्।अणोपवादः।रथाद्रथाङ्गे इतिवार्तिकमभिप्रेत्याह।रथ्यंचक्रमिति।अत्रेदमवधेयम्।द्वयोरथयोरङ्गमितिविग्रहेद्विरथ्यम्।रथसीताहलेभ्योयद्विधावितितदन्तविधेरुपसंख्यानाद्यत्।द्विगोर्लुगनपत्येइतिलुक्।यस्तुद्वौरथौवहतिसद्विरथ्यः तद्वहतीतियत्।तस्यप्राग्दीव्यतीयत्वाभावान्नलुक्।अतएवतद्वहतीतिसूत्रेरथग्रहणंसार्थकम्।अन्यथारथाद्यदित्येवरथाङ्गइववोढर्यपीष्यतांकिंतेनेति।ननुद्विगोर्लुगनपत्येइत्यत्राचीत्यस्यापकर्षपक्षेकथमत्रयतोलुगितिचेत्सत्यम्।तद्वहतीत्यत्ररथग्रहणमेवज्ञापकमेतस्ययतोहलादेरपिलुग्भवतीति।अन्यथातत्ररथग्रहणंव्यर्थमेवस्यात्।द्वन्द्वाद्वुन्।अणोपवादःछन्तुपरत्वाद्बाधते।काकोलूकिकेति।काकोलूकस्यवैरमित्यर्थः।वुञन्तंस्त्रियाम्।वैरमैथुनिकादिवुन्इतिस्त्र्यधिकारेऽमरः।कुत्सेत्यादि।कुत्सकुशिकयोर्मैथुनिका।विवाहरूपःसम्बन्धइत्यर्थः।मिथुनंहिदम्पती।तस्यकर्मक्रियानिष्पादनम्।मनोज्ञादित्वाद्वुञ्।तदन्तंचेदंस्त्रियांस्वभावात्।सङ्घाङ्क।पूर्वस्यवुञोऽपवादः।घोषेति।अतएवयथासंख्यमपिनवैषम्यात्।प्रकृतयस्तिस्रःप्रत्ययार्थविशेषणानितुचत्वारि।परंपरेति।यथागवादिनिष्ठःस्वामिनागोद्याःसंबन्धः।साक्षादिति।यथाविद्वानांविद्या।यद्यपिअङ्कलक्षणयोःपर्यायत्वंप्रसिद्धम्।कलङ्कोङ्कोलांछनंचचिह्नंलक्ष्मचलक्षणमितिकोशसिद्धंचतथापिपृथग्ग्रहणसामर्थ्यादिहविशेषपरतेतिभावः।णित्वंङीबर्थंपुंवद्भावनिषेधार्थंच।वैदीविद्यायस्यवैदीविद्यः।विद्यानामसाधारणीयाविद्यातद्वानित्यर्थः।छन्दोगौक्थिकेति।सङ्घादयोनिवृत्ताः।एभ्योऽन्यःस्यात्।तस्येदमर्थे।चरणशब्देभ्योवुञोपवादनत्वौत्सर्गिकस्याणः।धर्माम्नाययोरित्युक्तेर्नेह।छान्दोगंकुलमित्यादि॥समाप्ताःशैषिकाः॥७ स्वभावादितिभावः।क्रियेति।विवाहरूपेत्यर्थः।थुनइति।गोत्रग्रहणानुवृत्त्यागोत्रप्रत्ययान्तानामेवगर्गादीनांग्रहणमित्यर्थः।ङीबर्थमिति।गोत्रेलुगचीत्यलुकावृद्धिसिद्धेरितिभावः।नटादिति।पाक्षिकाच्छस्येतिबोध्यम्।नेहेति।नेदंवुञ्विधिमात्रविषयंसङ्घोचेमानाभा

तस्यग्रहणस्य।तस्येदमित्यत्रसूत्रमयड्वैतयोर्नित्यमिति।मयड्वैतयोरित्यधिकारेनित्यंवृद्धेतीत्यर्थः।एतेनमयड्वैतयोरित्युपन्यासोऽसङ्गतः तस्यपाक्षिकत्वेमाणोपीष्टत्वादित्यपास्तम्।अप्राणीति। अनुवर्णान्तमित्यपिबोद्ध्यम्।आद्युदात्तमिति।अनुदात्तादिभिन्नमित्यर्थः।इदम्।प्राणीत्यादिंबहुश्रुतेः कार्यइति।जितश्चतत्प्रत्ययादितिसूत्रभाष्यप्रामाण्यादिदेवेतिलभ्यते।तत्रहिविकार विकारेपि

तस्यविकारः।घादिसंबद्धस्यतस्यग्रहणस्यनिवृत्तयेतुनतस्येत्युक्तम्।अणादयस्तुननिवर्तन्तेप्राग्दीव्यतः प्राग्भवनादितिविशिष्टावधिपरिच्छेदेनाधिकृतत्वात्।षष्ठ्यन्ताद्विकारेऽणादयः स्युः तत्रप्राणिरजतादिभ्योऽञ्।ओरञ्।अनुदात्तादेश्च।मयड्वैतयोः।नित्यंवृद्धशरादिभ्यः।पिष्टाच्चेत्यादिभिरपवादाविवक्ष्यन्ते।अतःअप्राणिआद्युदात्तंमरुद्वंप्रतिपदमवक्ष्यमाणप्रत्ययंचेहोदाहरणमित्याशयेनतथैवोदाहरति।आश्मइत्यादि।अश्मनभस्मनशब्दौमनिन्प्रत्ययान्तौ।मृदस्तिकन्।त्रयोऽपिनित्स्वरेणाद्युदात्ताः।प्राचीनस्यतस्येत्यस्यनिवृत्तत्वात्तदधिकारेनताशुगादयोऽपिनेह।हालः।सैरः।मायूरइति।प्राणिरजतादिभ्योञित्यञ्।अनुदात्तादेरञः सिद्धत्वादुदात्ताद्यर्थंवृद्धेभ्यमयड्बाधनार्थंचावश्यकमिदम् परत्वादनुदात्तादिष्वपिप्रवर्तते।मौर्वमिति।मूर्वाशब्दः तृणधान्यानांचद्व्यषाम् इत्याद्युदात्तः।पिप्पलशब्दोप्येवम्।लघावन्तेद्वयोश्चेत्युक्तेःप्रयुज्यतेचतथा।तयोरन्यः पिप्पलस्त्वादेतिमन्त्रे।त्रपुजतुनोः।अणस्मादिति।बिल्वादिभ्योणित्यतोऽनुवृत्तेः ओरञ्इत्यस्यापवादोयम्।षित्वान्ङीषिति।माधवस्तुटित्वान्ङीप्।बिल्याह।तस्मादिहशामीलीशब्दस्यादिर्वाउदात्तइतिकश्चिदिदेलस्यंदृष्ट्वालञ्प्रत्ययस्यषित्वरित्वपाठयोःसाध्वसाधुत्वविवेकोबहुश्रुतेःकार्यः।आश्मनमिति।विनापिप्रत्ययंपूर्वोत्तरपदयोर्वालोपोवाच्यइतिवचनादश्मभेदशब्देभेदशब्दस्यलोपेऽश्मन्नितिनिनान्तम[illegible]ष्यते।तथाकल्माषाङ्घ्रेःराज्ञोभार्यायांमदयन्त्यांवसिष्ठेनोत्पादितः क्षेत्रजःसुतोऽश्मकोनामतत्रसंज्ञात्वद्योतकस्यकप्रत्ययस्याभावेऽश्मन्नितिनामभवतितस्यापत्येआश्मनम्।विकारेऽप्याश्मनमित्येवभवति।नवाश्मनोविकारइतिटिलोपःस्यादितिवाच्यम्।प्रसिद्धतरत्वेनपाषाणवाचकस्यैवतत्रग्रहीतुमुचितत्वात्।वस्तुतस्तुतस्येदमितिसामान्यविवक्षायांभविष्यति।पैठासुरेयिवत्॥

ॐ तर्हि[illegible]मा[illegible]तस्यत्यास्यातम्।अन्यथापित्वान्ङीषूतस्यत्याख्याने।आरम्भेत्वञन्तत्वान्ङीपितिफलभेदेतद्सङ्गतिः स्यादिति बोध्यम् ॥

हृदम्। भाषाग्रहणम्। द्व्यच एवेति। विकारावयवयोश्चेत् छन्दसि मयट् तर्हि द्व्यच एवेत्यर्थः। ततश्चान्यत्रार्थे एव छन्दसि बह्वचो मयडिति भावः। विपरीतेति। द्व्यचश्चेद्विकारादौ मयट् तर्हि छन्दस्येवेत्येवनियमार्थः। तेन लोके घृतमयमित्यादिव्यावृत्तिः स्यादिति भावः। समासनिर्देशादिति। अभक्ष्येत्यादौ समासनिर्देशात् एतयोरित्यत्र तदपवादैकशेषनिर्देशाच्चेत्यर्थः। एवं च तयोः पृथगुपस्थित्यविरहादिति। गुडूशब्दो घृतादित्वादन्तोदात्तः। कार्पासमिति। कृञः पास इति पासप्रत्यये सार्वधातुकार्धधातुकयोरिति गुणे रपरे कृते कार्पासीशब्दो जातिलक्षणङीषन्तः। ताभ्यामनुदात्तादेश्चेत्यञं बाधित्वा बिल्वादिभ्योऽण्। भाषायां किम्। खादिरो यूप इति वृत्तिकाराः। यद्यपि मयटो वैकल्पिकत्वात्सिद्धमिदं तथापि वेदे बह्वचः परस्य मयटोऽर्थान्तरत्वमेवेति तात्पर्यग्रहार्थमेवेदम्। ननु द्व्यचश्छन्दसीति सूत्रं द्व्यच एवेति नियमार्थं सत् उक्तार्थे तात्पर्यं ग्राहयिष्यतीति चेत् सत्यम्। विपरीतनियमशङ्कानिवृत्त्यर्थं भाषाग्रहणमिति तत्त्वम्। अधिकारादेव सिद्धे एतयोरिति वचनमित उत्तरेषां प्राणिरजतादिभ्योऽञित्येवमादीनामपि विषये पक्षे प्रवृत्त्यर्थम्। कपोतमयम्। लोहमयम्। इह विकारेणावयवेनैकैकेन सहाभक्ष्याच्छादनयोरिति संबध्यते। समासनिर्देशात्तेन यथासंख्यं न। स्यादेतत्। उत्तरमीमांसायामानन्दमयाधिकरणे भाष्यकारैरन्योऽन्तर आत्मा आनन्दमयः इति श्रुतौ आनन्दमय इति विकारे मयडित्युक्तम्। तत्कथं सङ्गच्छताम्। भाषायामिति सूत्रयता पाणिनिना सह विरोधात्। किं च विकारशब्दान्नेति चेन्न प्राचुर्यादिति सूत्रयतो व्यासस्यापि आनन्दशब्दस्य बह्वच्कतया छन्दसि विकारे मयड् दुर्लभ इत्येवाशय उचितः। एवं स्थितेऽन्नमयादिप्रायपाठोऽप्यकिंचित्करः उभयसंभवस्यैतस्यानिर्णायकत्वात्। तथा च प्राचुर्ये मयटं वदतां प्राचां वृत्तिकृतामेव व्याख्यानं प्रबलं न तु भाष्यकारोक्तमिति चेत्। अत्रोच्यते। श्रीग्रामण्योश्छन्दसीति सूत्रेऽपि यच्छन्दसीत्यंशस्तावत् भगवता भाष्यकारेण प्रत्याख्यातः ॥

षयत्वान्न यथासंख्यमिति भावः। एतयोरित्यनेन विकारावयवयोः क्रमेणोपस्थितिरित्यर्थे मानाभावाच्च। एतेनाद्यन्तावित्यादिवत् पृथगनुपस्थितावपि तत्स्यादित्यपास्तम्। भाषायामितीति। भाषायां मयट् द्व्यचश्छन्दसीति सूत्रपक्षेत्यर्थः। तस्यानिर्णायकत्वादिति। विज्ञानमयान्नरसमयाभ्यां प्रायपाठाच्चेत्यपि बोध्यम् ॥

व्यवस्थितत्वादिति।एवञ्चवामीत्यनेनवैकल्पिकनदीत्वात्ह्रस्वप्राप्तस्यनित्यार्थत्वमितिनवाच्यमितिभावः।यद्यपिसूत्रग्रामणीनामितिप्रयोगेसमाहारद्वन्द्वपूर्वकैकशेषेणसिद्धिमाश्रि
त्यग्रामणीत्यंशेपिभाष्येप्रत्याख्यातस्तथापिव्यवस्थितविभाषाश्रयणेनश्रीत्यंशस्यैवप्रत्याख्यानमित्याशयः।त्याज्येति।व्यवस्थितविभाषयैवसिद्धेः।इत्यादीति।अन्नमयेत्यादिशब्दार्थः

छन्दसिसकलविकल्पानांव्यवस्थितत्वात्।अतएवउक्तंनित्यंछन्दसिबह्वादिभ्यश्च।नित्यंछन्दसिइत्यादयोपिवैयाकरणैरित्थमेवप्रत्याख्याताः न्यायसाम्यात्।एवंस्थिते
तात्पर्यग्रहस्यन्यायानुसन्धानेनैवसिद्धेस्तदर्थंपाणिनिसूत्रारम्भदर्शनाच्चेहभाषायामितित्याज्यंतथाद्व्यचश्छन्दसिनोत्वद्वर्ध्रविल्वादितिद्विसूत्र्यपित्याज्या।सतिहिभाषाग्रहणे
शरमयंबर्हिरित्यादिसिद्ध्यर्थंद्व्यचइत्यारब्धम्।मौञ्जंशिक्यम्।वाध्रचर्मबैल्वोयूपः इत्यादौद्व्यचइतिप्राप्तंप्रतिषेद्धुंनोत्वदितिसूत्रमारब्धम्।उक्तरीत्यातुसर्वमिदंनिष्फलंभाष्य
कारैरेवप्रत्याख्यातप्रायंच।एषैवचवेदान्तसूत्रवृत्तिकृतामपिगतिः तैरपिचानन्दमयादितरेषुविकारेमयटः स्वीकारात्।अन्नमयप्राणमयमनोमयेषुद्व्यच्त्वान्मयट्संभवेपि
विज्ञानमयशब्देविकारेमयडर्थमुक्तप्रकारस्यैवानुसर्त्तव्यत्वात्।तथाचानन्दमयेपिविकारार्थतैवोचिताऐकरूप्यात्।यद्वाप्राचुर्येमयड्पिप्रकृत्यर्थविरोधिनोलेशतोनुवृत्तिला
भात्प्रकृतेविकारार्थः पर्यवस्यतीत्याशयः।अथवानित्यंवृद्धेत्यत्रभाषाग्रहणंनानुवर्त्तते।अनुवृत्तावपिवाभाषायांनित्यंअन्यत्रतुकाचित्कंइत्याश्रित्यमयट्सुसाधः।अतएवशरादि
षुमृच्छब्दपाठोप्यर्थवान्।मोषुवरुणमृन्मयंगृहंराजन्नहंगममितिमन्त्रेदर्शनात्।नचभाषार्थएवमृच्छब्दपाठइतिवाच्यम्।आरम्भसामर्थ्यादेवसिद्धेनित्यग्रहणंयोगविभागेनान्य
त्रापिक्वचिन्नित्यार्थत्वेनैकाचोनित्यमित्युक्त्वावाङ्मयंत्वङ्मयमित्यादेराकरेउदाहृतत्वात्।एवंवदतांमृच्छब्दपाठवैयर्थ्यस्यस्पष्टत्वात्।यद्वा।हेतुमनुष्येभ्यइत्यनुवर्त्तमानेमयड्वेतिसू
त्रेणागतार्थेमयड्विकारइतित्वार्थिकार्थकथनमेवसर्वथापिशंकरभगवत्पादोक्तिरनवद्यैवेतिदिक्।गोश्चपुरीषे॥पुरीषंनविकारोनाप्यवयवः॥

५ विज्ञानमयेत्वत्ररसमयस्याप्युपलक्षणम्।

प्रकृत्यर्थविरोधिनइति।ब्राह्मणाअत्रप्रचुराइत्युक्तेनियमेनान्येषामल्पत्वप्रतीतेरितिभावः।पर्यवस्यतीति।तत्पर्यवसानंकथमितिचिन्त्यम्।स्पष्टत्वादिति।एकाचोनित्यमित्यनेनैवसिद्धेरितिभावः।आर्थिकार्थे

ति।योयतोनिर्गतःसतस्यविकारइतिलोकप्रसिद्धेरितिभावः।

इदमर्थइति।अयञ्चासावर्थश्चेदमर्थस्तेन पुरीषरूपइत्यर्थः।तस्यपुरीषमित्यर्थेप्रत्ययइतियावत्।लिङ्गम्।विकारावयवत्वाभावरूपम्।एतच्चकैयटहरदत्तानुरोधेनोक्तम्।जितश्चेतिसूत्रस्यभाष्या
तुगो[illegible]आहारविकारेगोविकारत्वमारोप्यप्रकीरणावाधएवोक्तइतिदिक्।मयटंबाधितुमिति।योगविभागसिद्धत्वेनक्काचित्कत्वादेकाचोनित्यमितिमयट्सुशक्यवारणइत्यभिमानः।मयट्चेति।उभा
तस्माल्लिङ्गेइदमर्थेयंप्रत्ययः प्रकरणाल्लिङ्गस्यबलीयस्त्वात्।गोपयसोर्यत्।यद्यपिसर्वत्रगोरजादिप्रसङ्गेयत्उक्तस्तथापिमयड्वैतयोरितिपक्षेप्राप्तंमयटंबाधितुंपुनरयंमयड्विधिः।द्रोश्च।
ओरञः एकाचोनित्यमितिमयटश्चापवादोयम्।द्रुवयमिति।द्रोर्विकारभूतंप्रस्थादिपरिमाणमित्यर्थः।आमलकमिति।फलितस्यवृक्षस्यफलमवयवोविकारश्च।तेनान्यतरस्मिन्प्रत्ययः।
कंसीयपरशव्ययोः।परशव्यस्यानुदात्तादित्वादञिसिद्धेलुगर्थंवचनम्।नचयस्येतिलोपेकृतेहलस्तद्धितस्येतियलोपेनसिद्धमितिवाच्यम्।ईतीत्यनुवृत्तेः॥प्राग्दीव्यतीयाः समाप्ताः॥आ
र्हात्प्रभूतादिभ्यइति।उपसंख्यानमित्यनुषज्यते।आर्हेतिपदेएकदेशस्यप्रकृतिभागस्यउच्चारणार्थेनइकारेणआर्हाविति निर्देशः।प्रभूतमार्हेति।क्रियाविशेषणाट्ठक्करिप्रत्ययः।अभ्रेति।
अभ्रिः स्त्रीकाष्ठकुद्दालः इत्यमरः।दीव्यतीत्यादौकालपुरुषसंख्याअविवक्षिता।अदेवीत्।देविष्यतिवाआक्षिकः।एवंदेविष्यसिदेविष्यामिवा।दीव्यन्तिदीव्यथदीव्यामोवाआक्षिकाः।कारकं
तुविवक्षितमेव।अतएवजयतिजितमितिकर्तृकर्मणोः पृथगुपादानम्।संस्कृतम्।योगविभागउत्तरार्थः।कुलत्थकोपधादण्।कुलत्थैः संस्कृतंकौलत्थम्।वाहुलकेति।सूत्रेषकारः सांहिति
कोनत्वनुबन्धइतिनङीष्।तथाचआकर्षात्पर्पादेरित्यादिश्लोकवार्तिकंप्रकरणान्तेवक्ष्यते।निकषोपलइति।सुवर्णपरीक्षार्थः।पाठान्तरमिति।एतच्चभस्त्रादौकपरवषेत्यादिदण्डकेमा
धवेनोपन्यस्तम्।किंतुआकर्षात्पर्पादेरितिवार्तिकस्याननुगुणंतत्रहिनिरेफपाठेइत्यस्य सङ्गतिः स्यात्।येनपीठेनेति।पथ्यगतौहलश्चेतिकरणेघञ्।सपर्यइति।एतच्चमाधवीयोक्तगुञ्ज
लदत्तस्तुखष्यशिल्पशष्पवाष्परूपतर्पतल्पाइतिसूत्रेतर्पशब्दस्थानेपर्पशब्दंपठित्वापिपर्तेः पः पर्यंगृहंवालतणम्।तेनचरणपर्पिकइत्युदाजहार।इहान्तर्गणसूत्रंपादः पच्चे
ति।पादाभ्यांचरतिपदिकः ॥ ७७ श्यामपियेननाप्राप्तिसत्वादितिभावः।परशव्यस्येति।यदन्तत्वेनस्वरितान्तत्वादितिभावः।यत्तुपाक्षिकमपड्आवार्थमितितन्नान्यथैवोपपत्तौशास्त्राबाधे
मानाभावात्॥ इतिप्राग्दीव्यतीयाः॥प्रकृतिभागस्येति।तस्यचतदर्थेलक्षणेतिभावः। स्थानिवत्त्वेनधातुत्वादिकानिर्देशइत्यन्ये ॥

सोस्यैवप्रपञ्चइति। केचित्तुएतद्बलादूर्णसूत्रमनार्षमित्याहुः। पक्षेशीर्षभावइति। सोपिगणेपठ्यते। एकदेशविकृतन्यायेनतुनसिद्धिः। शीर्षभारस्यविकाराभावात्। न्यायसिद्धेइति। छिन्नपुच्छश्ववदित्यन्त्यमूलकैकदेशविकृतन्यायेनेत्यर्थः। यद्वासर्वैःसर्वपदादेशाद्इतिन्यायेनविशिष्टस्यादेशइतिस्थानिवद्भावन्यायसिद्धेत्यर्थः। स्वातन्त्र्येणेतिनिर्वृत्तेर्थेत्रिप्रत्ययान्तान्मप्नित्यंभवत्येवेत्यर्थः। तदविवक्षायामिति। निर्वृत्तेर्थेत्रिप्रत्ययान्तान्मब्भवत्येवेत्यर्थः। प्रकरणादितिभावः। योगंविभज्येति। त्रेर्मप्। त्रिप्रत्ययान्तप्रकृतिकात्तृतीयान्तान्निर्वृत्तेर्थेमबित्यर्थः। ततोनित्यम्। नेदंमप्विधायकम्। नित्यविकर्थन्तुवार्त्तिकंपद्भावइकेचरतावुपसंख्यानमितिसोस्यैवप्रपञ्चः। पर्यअश्वअश्वत्थरथजालन्यायव्यालपादःपत्। श्वागणिकइति। श्वादेरिञिइत्यत्रइकारादिग्रहणंकर्त्तव्यमितिवचनात्इञिद्वारादिकार्येण। धानुष्कइति। वेतनादिगणेधनुर्दण्डेतिपठ्यतेतत्रचसङ्घातविगृहीतार्थमितिसिद्धान्तः। आयुधाच्छच। आयुध्यन्त्यनेनेत्यायुधम्। घञर्थेकविधानमितिकः। उत्सङ्गेनहरतीति। उपादत्तेनयतिवेत्यर्थः। भस्त्रयेति। भस्त्राचर्मविकारःयेनलोहादिध्मायतेजलादिकंचनीयते। शीर्षभारशब्दोत्रपठ्यते। निपातनाच्छीर्षभावःसप्तमीसमासश्चतत्पुरुषेकृतीतिवाअलुक्पक्षेशीर्षभारः। एकदेशविकृतस्येति। वीवधाच्चेतिवक्तव्यमितिवार्त्तिकंतुन्यायसिद्धार्थकथनपरमितिभावः। वृत्तिकृत्तुवीवधशब्दंसूत्रेप्रचिक्षेप॥ क्त्रेर्मम्नित्यम्। नित्यग्रहणंस्वातन्त्र्येणप्रयोगंवारयितुम्। अतएवलौकिकेविग्रहवाक्येक्तिनादीनांप्रयोगोनतुक्त्रेः। तदाह। कृत्वानिर्वृत्तमिति। संख्यावाचीत्रिशब्दस्तुनेहगृह्यतेव्याख्यानात्। प्रत्ययाप्रत्यययोःप्रत्ययस्यग्रहणात्। निर्जाम्रयाणामित्यादिलिङ्गाच्च। ननुनित्यग्रहणेननिर्वृत्तार्थविवक्षायांवाक्यस्यवारणेपितदविवक्षायांस्वातन्त्र्यस्यदुर्वारत्वान्नेदंलिङ्गमितिचेन्न। नित्यमितियोगंविभज्यतत्सामर्थ्यादर्थविशेषानादरेणैवस्वातन्त्र्यवारणात्॥ ७७ ल्पयोर्व्यवस्थानापत्तेः। नापिनिर्वृत्तेमपोनित्यत्वबोधकम्। एकयोगेनसिद्धेः। किंतुनिर्वृत्तार्थेमबपवादेननित्यत्वविधायकम्। नित्यत्वंचायोगव्यवच्छेदः। शङ्खोनित्यंपाण्डुरइतिवत्। तत्रहिनकदाप्यपाण्डुरइतिप्रतीयते। एवंचनिर्वृत्तेर्थेमप्संभवाद्यत्स्येवनकदापिनभवतीत्यर्थः। तेननिर्वृत्तेपिवाक्यंनोन्यथापिस्वतन्त्रस्यप्रयोगोन। [illegible] अर्थविशेषानादरेणैवेति। अतएवत्र्यन्तंमब्विषयमेवयथास्यात्केवलस्यप्रयोगोमाभूदितिभाष्यंसङ्गच्छते। तेनपक्तिःक्रियतेकृत्रिममहत्सुन्दरमितिचन। एवंचायंसूत्रेपिवैयर्थ्यासं[illegible]फलाभावादितिबोध्यम्। तृतीयान्तत्र्यन्तादितिवृत्तिस्तुअलौकिकविग्रहाभिप्रायेण ॥

भावप्रत्ययान्तादिति।निवृत्तेइतिशेषः।नास्मात्तृतीयान्तादिति।तेनैत्वधिकारेपीतिभावः।वचनादिति।अपमित्यशब्दात्प्रत्ययोभवतीतिवचनसामर्थ्यादित्यर्थः।ऊर्ध्वेनेति।अन्वाचिकेत्यर्थः।अत
भावप्रत्ययान्तादिति।एवंचमप्नकर्त्तव्यः।तथाहि।भावप्रत्ययान्तादिमप्।ततःञ्ञः।भावेस्याद्यनुवर्त्तते।नियमार्थंचेदनेननिर्दिश्यतेतावत्वाक्यंनिवर्त्तते।ततःनित्यंअनेनान्यत्रापिस्या
तन्नबाध्यते।ल्यबन्तमिति।उदीचांमाङइतिक्त्वाप्रत्ययेअपेत्यनेनसहगतिसमासात्।मयतेरिदन्यतरस्यामितील्यप्।तथाचनास्मात्तृतीयान्तात्प्रत्ययःकिंतुवचनात्प्रथमान्तादेवेति
भावः।प्रतीपंवर्त्ततइति।प्रतिगताआपोस्मिन्नितिबहुव्रीहिः।ऋक्पूरित्यकारःसमासान्तः।द्व्यन्तरुपसर्गेभ्योपईदितिईत्वम्।व्युत्पत्तिमात्रंचेदम्।प्रतिकूलानुकूलपर्यायाहीमे।ए
वञ्चअप्रतीपलोमकूलशब्दाअविवक्षितार्थाः।ऊदनोर्द्देशेइत्यूर्ध्वंतुनअदेशत्वात्।परिमुखमिति।अपपरीवर्जनइतिपरेःकर्मप्रवचनीयतापञ्चम्यपाङ्परिभिरितिपञ्चमी।अ
पपरिबहिरञ्चवःपञ्चम्येत्यव्ययीभावःततष्ठक्।स्वामिनोमुखंवर्जयित्वायःसेवकोवर्त्ततेसपारिमुखिकः।यदातुसर्वतोभावेपरिशब्दःप्रादिसमासस्तदाप्यतोयतःस्वा
मिमुखन्ततोयोवर्त्ततेसोऽर्थः।एवंपारिपार्श्विकोऽपि।द्विगुणार्थमिति।बहुवृद्ध्युद्देश्यकदानकर्मतयातस्यगर्ह्यत्वम्।वार्द्धुषिकइति।वृद्ध्यर्थंवृद्धिःतांप्रयच्छतीतिविग्रहः
अथकपंवृद्ध्याजीवश्चवार्द्धुषिरित्यमरः।नस्तेनःस्यान्नवार्द्धुषी।वार्द्धुष्यंलवणंक्रियावार्धुषिःसम्पर्कयतेत्यादिच।स्वच्छन्दवाचःकवयइतिहरदत्तः।गर्ह्यंकिम्।द्विगुणंवृद्धिंच
प्रयच्छत्यधमर्णः।कुसीददशैकादशात्ष्ठन्ष्ठचौ।निपात्यतइति।अतएववाक्यमप्यकाराद्येनभवतीतिभावः।तदेवदर्शयति।दशैकादशानिति।संख्यायाअल्पीयस्याइतिपूर्वनिपातः।
उञ्छति।भूमौपतितस्यएकैकस्योपादानमुञ्छः।शब्दंकरोतिइति।प्रत्ययादिविभागेनव्युत्पाद्यतीत्यर्थः।अत्रैवार्थेऽयंप्रत्ययःअभिधानस्वाभाव्यात्।तेनेहन।शब्दंकरोतिखरः।

एवेति।प्रत्ययादिलोपेनैवसिद्धेर्निपातनवैयर्थ्यापत्त्याप्रत्ययसन्नियोगेनैवनिपातनमितिभावः।विशेषणत्वादेकादेशस्यपूर्वनिपातापत्तेराह।संख्याया इति।इदंचद्वन्द्वाद्वन्द्वसाधारण
मितितद्धिताधिकमितिसूत्रेकैयटेस्पष्टम्।एतेनद्वन्द्वबहुव्रीहिमात्रविषयंतदित्यपास्तम् ॥

आरण्यकेति। आरण्याण्ण इति णान्तात् स्वार्थे कः। वुञ् तु न। पथ्यध्यायादिष्वेव तद्विधानात्। विशेष्येति। एकदेशीभवनेनेत्यर्थः। संश्लेषार्थत्वे सप्तमीत्यन्ये। सास्यास्तीति। लिङ्गविशिष्टपरिभाषयादि दार्दुरिक इति। कुलालः। दर्दुरो मृत्पात्रविशेषः। दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः। दर्दुरा चण्डिकायां च ग्रामजाले तु दर्दुरमिति विश्वः। मात्स्यिक इति। मत्स्यस्य ङ्यामिति परिगणनात् सूर्यतिष्येति यलोपेन। मार्गिक इति। आरण्यकचतुष्पात्सु हरिणेषु च वर्तते द्व्यर्थो मृगशब्दः। तत्राद्यस्य विशेषो द्वितीयस्य तु पर्यायो हरिणशब्दः। पदोत्तरपदं गृह्णाति। पदान्तमिति तु नोक्तम्। बहुचूर्णान्माभूत्। धर्मं चरति। चरतिरिहासेवायाम्। न त्वनुष्ठानमात्रे। तेन दैववशाद्धर्मे प्रवृत्तोऽपि दुर्वृत्तो धार्मिक इति नोच्यते। आसेवा हि स्वारसिकी प्रवृत्तिः। एवमग्रेऽपि। समवायान्समवैति। समूहवाचिभ्यो द्वितीयान्तेभ्यष्ठक् स्यात्। समवैतीत्यर्थे। इह समवपूर्वस्य इणोऽर्थः प्रविश्यैकदेशीभवनम्। तत्र गुणभूतं प्रवेशं प्रति प्रकृत्यर्थस्य कर्मता बोध्या। विशेष्यानुरोधेन तु लोके सप्तमी प्रायेण प्रयुज्यते। कुरुक्षेत्रे समवेता इति यथा। सैन्याः सैनिका इति। द्वितीयान्तात् ण्यठकौ। यत्तु सेनायां समवेता ये सैन्यास्ते सैनिकाश्च त इति तत्फलितार्थकथनपरम्। सञ्ज्ञायामिति। ललाटकुक्कुटीशब्दाभ्यां द्वितीयान्ताभ्यां पश्यतीत्यर्थे ठक् स्यात्। सम्यग्ज्ञानं संज्ञा तस्यां प्रसिद्धिविषयीभूतेऽर्थविशेष इति यावत्। लालाटिक इति। दूरे स्थित्वा प्रभोर्ललाटं पश्यति न तु कार्येषूपतिष्ठत इत्यर्थः। लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः इत्यमरः। कौक्कुटीको भिक्षुरिति। सन्न्यासी हि पादविक्षेपपर्याप्तदेशपर्यन्तमेव चक्षुः संयम्य गच्छतीति भावः। मार्दङ्गिक इति। मृदङ्गवादने प्रकृतेर्लक्षणा। मुख्यार्थे प्रवृत्तेस्त्वनभिधानात्। धानुष्क इति। इणः ष इति षः। परश्वधाट्ठञ्च। चाट्ठक्। द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः। आस्तिक इति। अस्तिनास्तिशब्दौ निपातौ। यद्वा। वचनसामर्थ्याद् अस्तीत्याख्यातात् नास्तीति निपाताख्यातसमुदायाच्च प्रत्ययः। दिष्टमित्यादि। दैवं दिष्टं भागधेयमित्यमरः। नालम्बते दैष्टिकतां न निषीदति पौरुषे इति माघः। यत्तु प्राचोक्तम्। प्रमाणानुगा मतिर्दिष्टा सास्यास्तीति दैष्टिक इति। तन्न। आकरविरोधात्। दिष्टशब्दस्य लोके स्वोत्प्रेक्षितार्थपरत्वे च मानाभावात्। किं च। सोऽस्यास्तीति विग्रहोऽप्ययुक्तः। नह्यस्त्यर्थे [illegible] प्रत्ययः स्मर्यते। न वा आस्तिक इत्यत्रेवास्त्यर्थस्य प्रकृत्यर्थतयापीह प्रवेश इत्यास्तां तावत्॥ ७७ ष्टाशब्दात्प्रत्यय इति भावः। मानाभावादिति। पूर्वोक्तकोशविरोधादित्यर्थः। कोशानुपलम्भाच्चेति भावः। दिष्टमिति। अस्य [illegible]ति दैष्टिक इति भाष्यविरोधाच्च। एतेनार्शआद्यचि सिद्धदिष्टाशब्देन सूत्रे समाहारद्वन्द्व इत्यपास्तम्। तावतापि प्रमाणानुगतेत्यर्थालाभाच्च ॥ इति ठकोऽवधिः ॥

म

म·शा· युगंरथ्याङ्ग·मिति।रथसाहचर्यात्तदङ्ग·स्यैवयुगस्यग्रहणमितिभावः।शब्दस्वरूपापेक्षयेति।सौत्रंह्रस्वत्वमित्यपरे।प्राग्युङ्क्ते·ति।तेनसूत्रेजन्याः इतिसविसर्गपाठइतिसूचयति।भाष्येपिजनीशब्दा
२१२ द्वेषापञ्चमीत्युक्तौ एतेननिर्विसर्गंपाठंपठित्वाल्लियामेवास्यसाधुत्वंवदन्तः परास्ताः।सापेक्षत्वादिवेति।तन्मूलकासामर्थ्यादित्यर्थः।इदंप्राचामनुरोधेन।प्रधानस्यसापेक्षत्वात्क्रियामाः
हितंभक्ष्याः।अस्मेतिप्रकृतमपिचतुर्थ्याविपरिणम्यतेहितयोगात्।यद्वा।तदस्मादितीहअपक्कःइत्यम्।प्रकृतिश्चतदीयभक्षणेलाक्षणिकीत्याशयेनाह।अपूपभक्षणंहितमस्मैइति।
श्राणा।इकारउच्चारणार्थः।यवागूरुक्तिकाश्राणाविलेपीतरलाचसेत्यमरः।आवसथात्ष्ठल्।वसतीत्यर्थे।आवसन्त्यस्मिन्निति आवसथः।उपसर्गेवसेरित्यथप्रत्ययः।कुसीदसू
त्रादिति।कुसीदसूत्रोपात्ताभ्यांप्रकृतिभ्यामित्यर्थः।इहयेषांषकारः सांहितिकइतिसंभाव्यतेतेषामेवगणनेष्ठनादेः षित्वमनार्षमितिभ्रमः स्यात्।अतोवार्त्तिककारः सर्वानेव
पर्यजीगणत्।इतिठकोवधिःसमाप्तः।युग्यइति।युगंरथाङ्गम्।तद्वहतीत्यर्थः।प्रासङ्ग·इति।प्रासज्यतेसावितिकर्मणिघञ्।धुरोयड्ढकौ।इहधुरोढक्केत्येवोचितम्।खः सर्वधुरात्।
शब्दस्वरूपापेक्षयानपुंसकनिर्देशः।बभ्रुनिबहुव्रीहाविवितिवत्।सर्वधुरामिति।सर्वाधूः सर्वधुरा।पूर्वकालैकेतिसमासः।ऋक्पूरितिसमासान्तः।परवल्लिङ्ग·मितिस्त्रीत्वम्।
टाप्।एकधुरीणइति।चकारेणखस्यानुकर्षणसामर्थ्यात्पक्षेश्रवणम्।अन्यथाहिचकारंविनैवचप्राकरणिकस्ययतोलुग्विधीयेत।जनीवधूरिति।जायतेऽस्याङ्गर्भइति।जनि
घसिभ्यामिण्।जनिवध्योश्चेतिनवृद्धिः।कृदिकारादितिङीष्।जन्येति।जामातुर्वयस्येत्याहुः।साहिवधूंजामातुः समीपंप्रापयति।कालिदासस्तुवध्वायानवाहेष्वपिप्रायुङ्क्त।यातेति
जन्यानवदत्कुमारीति।पद्याइति।पदस्यतदर्थेइतिपद्भावः।अधनुषाकिम्।चोरंविध्यति।संभाव्यतेहिचोरस्यधनेधनुषः करणता।यदातुधनुषेतिप्रयुज्यतेतदासापेक्षत्वादेवनभव
ति।वशङ्गतः।वशनंवशः।इच्छा।वशिरण्योरुपसंख्यानमित्यप्।मूलमस्याबर्हि।प्रथमान्तादाबर्हिस्तुपाधिकान्मूलशब्दाद्यत्स्यात्।मूल्यामुद्गाः इति।मूलोत्पाटनंविनासुग्रहातुमश
क्याः।मुद्गतोलवनेक्रियमाणेकोशस्थाअपियस्यामवस्थायांपतेयुस्तामवस्थांप्राप्ताः।शुष्कशुष्काइतियावत्।यत्प्रत्ययइति।तेनधेनुष्याशब्दोन्तोदात्तः।यतितुतित्स्वरःस्यादितिभावः ॥
कारकांशेनित्यसापेक्षत्वाच्च।ऽप्राप्तेरेवात्रप्रत्ययः।स्पष्टंचेदंकैयटे।तस्मात्करणप्रयोगेमाभूदित्यर्थमधनुषेति।अन्यथापद्याः शर्कराइत्यत्रापिनस्यात्।संभाव्यतेहितत्रापितैक्ष्ण्यस्यकारणता।चोरंविध्यतीत्यादौ त्वनभिधानान्नेतिदिक् ॥

राम:
२१२

ऋणप्रत्यर्पणादेरिति। ऋणप्रत्यर्पणपर्यन्तमित्यर्थः। कर्त्तरीति। मूलेनानाम्यमित्यत्र कर्त्तरि तृतीया बोध्या। रूढ्योगादिति। प्रीणातीति प्रिय इति व्युत्पत्तेः सूत्रे इति भावः। अलौकिके त्विति। तत्र कृद्यो
गाभावान्न षष्ठीप्राप्तिः। अन्यत्रापीति। जनस्य जल्प इत्यादौ। तदन्तविधिरिति। हल्ँश्चे इति बोध्यम्। जनो जन इति विग्रहे प्रतिशब्दाप्रयोगेण कर्मप्रवचनीययुक्तत्वाभावान्न द्वितीया। न चास्वपदवि
संज्ञायामिति। ऋणप्रत्यर्पणाय या धेनुर्दोहनार्थमुत्तमर्णाय दीयते तस्याः संज्ञेयम्। नौवयोधर्म। अष्टभ्यो यथासंख्यमष्टस्वर्थेषु यत्स्यात्। इह तार्यादियोगे यथासंभवं करणे कर्त्तरि
हेतौ तुल्यार्थयोगे च तृतीया भवतीति सैषेह समर्थविभक्तिरर्थाल्लभ्यते। मूलेनानाम्यमिति। मूलं नामयत्यादीनामुत्पत्तिरूपं वणिग्भिर्नियुक्तं द्रव्यं तेन स्वस्मादतिरिक्तं लाभाख्यं द्रव्यमा
त्मानं प्रति शेषीक्रियते। आङ्पूर्वस्य तु नमतेरभिभवोऽर्थः। तस्मात् पोरदुपधादिति यति प्राप्तेऽत एव निपातनाण्ण्यत्। आनाम्यम्। अभिभवनीयम्। आत्मानं प्रति शेषीकर्त्तव्यम्।
स च लाभाख्यो भाग एव। लोके तु यावता द्रव्येण पाठादिकं विक्रीयते तत्र समुदाये मूल्यशब्दः प्रसिद्धः। एवं च लाभमात्रे व्युत्पादितस्य मूल्यशब्दस्य तद्घटिते समुदाये निरूढलक्षणा
बोध्या। सीतयेति। सीता हलाग्रं तेन समितं सङ्गतं निम्नोन्नतादिरहितं कृतं समीकृतमिति यावत्। तुलया संमितमिति। संमितं परिच्छिन्नं रूढिश्चेयं संज्ञायामित्यधिकारात्। अत ए
व सदृशमात्रे प्रयुज्यते न तुलायामाग्रहः। अत एव च त्रयसा तुल्यः शत्रुरित्यत्र न। स्निग्धो वयस्यस्सवया इत्यमरः। पथ्यमिति। शास्त्रीयात्पथोऽनपेतमित्यर्थः। संज्ञाधिकारान्नेह। पथोऽनपे
तश्चौरः। मार्गादनपेत इत्यर्थः। इच्छयाकृतमिति। छदि संवरण इति चुरादिः। इच्छायामपि वर्त्तते। ततो घञि इच्छापर्यायश्छन्दशब्दः। स्वच्छन्दोच्छलदच्छकच्छेत्यादौ। असुनिरुसा
न्तः। सौत्रप्रकृतिः। यद्यपि वेदे त्रिष्टुबादिषु चास्य शक्तिस्तथापीह न गृह्यते संज्ञाधिकारात्। तत्र निर्माणे इच्छायाः करणत्वात्सामर्थ्यात्तृतीयान्तादिति लभ्यत इति भावः। हृदयस्य।
कृद्योगात्कर्मणि षष्ठी। अलौकिके तद्धितप्रकृतिभागे तु वचनसामर्थ्यादेव। एवमन्यत्रापि बोध्यम्। जनस्य जल्प इति। जल्पशब्दो भावसाधनः। कर्त्तरि षष्ठी। हलस्य कर्ष इति। कर्ष
णं कर्षः। कर्मणि षष्ठी। करणस्य कर्तृत्वविवक्षायां कर्त्तरि वा। रथसीताहलेभ्य इति तदन्तविधिः। द्विहल्यः। त्रिहल्यः ॥ ७ ग्रहत्वे नित्यसमासत्वापत्तिः। अस्वपदविग्रहत्वस्य नित्यत्वे प्र
[illegible]कत्वाभावात् नित्यसमासत्वं परमस्वपदविग्रहत्वं क्वचित् प्रयोजकमित्यन्यत्। स्पष्टं चेदमषडक्षाशितमिति सूत्रे भाष्यपदमञ्जर्योः ॥

वेदूर्थे इति। अत्रारुचिबीजं तु तृतीये ह्नो यद्वधश्चवक्तव्यस्तदितो वेति भाष्यविरोधः। तत्र हि वधशब्दाद्दण्डादिभ्य इति वध्यः साधितः। नहि सपदुत्पत्तिवेलायां द्व्यच्क; उक्थ्यस्तु छान्दसत्वेन साध्य इति दिक्। आद्युदात्तः स्यादिति। उक्थ्य इत्यर्थः। तीर्थ्ये इति। यादौ प्रत्यये विवक्षिते तीर्थे उत्तरपदे समानस्य स इति तदर्थः। समानमिति। समानोदरशब्दे इति शेषः। नानुवर्त्तत इति। अत एवेदं सार्थकम्। अत्र साधुः। साधुरिह प्रवीणो योग्यो वा नोपकर्त्ता तत्र हितं तस्मै हितमित्यनेन भाव्यम्। अग्र्य इति। यत्तु प्राचा अग्रे भवः अग्र्यः। अग्रियः अग्रीयः। इति रूपत्रयमिहोक्तं तन्न। अग्राद्यत् घच्छौ चेति सूत्रद्वयस्य छन्दोविषयत्वात् हि भवे छन्दसीत्यधिकारे पठ्यते। छन्दोधिकारश्च आपादसमाप्तेरिति सिद्धान्तः। लोके तु भवार्थे अग्रिम इत्येव भवति। प्रतिजनमिति। जने जनः इति प्रतिजनम्। यथार्थे यदव्ययमिति वीप्सायामव्ययीभावः। प्रतिजन। इदंयुग। संयुग। पापकुल। परस्यकुल। अमुष्यकुलम्। सर्वजन। विश्वजन। पञ्चजन। परस्यामुष्येति षष्ठ्योर्निपातनादलुक्। गुडादिभ्यष्ठञ्। गुड। कुल्माष। सक्तु। अपूप। मांस। ओदन। इक्षु। वेणु। संग्राम। प्रवास। निवास। इत्। वसनं वसतिरिति। वसेश्चेत्यति प्रत्ययः। स्वस्य पतिः स्वपतिराढ्यः। तस्मिन्साधु स्वापतेयम्। सभाया। यति तु तित्स्वरः स्यात्। क्रतुर्भवत्युक्थ्य इतिवत्। यतो नाव इति तु न यदुत्पत्तिवेलायां द्व्यच्कस्य यदन्तस्य आदिरुदात्तः स्यात् इति व्याख्यानात्। एतच्च वेदभाष्ये स्पष्टम्। यथाश्रुतव्याख्याने तु आद्युदात्तः स्यात्। नमः शष्प्याय च फेन्याय चेत्यादिवत्। इह पक्षद्वये उक्थ्यफेन्यादीनां परस्परसंवादेपि छान्दसत्वेन निर्वाहो बोध्यः। समानतीर्थे वासी। निपातनाण्णिनिः। ग्रहादेराकृतिगणत्वाद्वा। सतीर्थ्य इति। तीर्थे य इति। समानस्य सभावः। तरन्त्यनेनेति तीर्थम्। तरतेस्थक्। तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु। योनौ जलावतारे चेति विश्वः। इह तच्छास्त्रापकवाचिन एव ग्रहणम्। शयितः स्थित इति। शीधातुर्हि स्थितौ दृष्टः जलाशयः कुशेशयमिति। यथा समानमुदरमिति पूर्वापरेत्यादिना तत्पुरुषः ततो यत्। तित्स्वरापवादः ओकारस्योदात्तः। सोदराद्यः। ओ चोदात्त इति नानुवर्त्तते। विभाषोदर इति समासः। तत्र तीर्थ्ये इत्यतो य इत्यनुवर्त्तते सा च विषयसप्तमी। तेन सोदर इति समासात् यः। प्रत्ययःस्वरः। कथं तर्हि अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चतीति मुरारिः। उच्यते सह समानमुदरं यस्येति। नोपसर्जनस्येति सभावः। अतएव यत्र भ्राता सहोदर इत्यपि सिद्धम् इति प्राग्घितीयाः। समाप्ताश्च चातुर्थिकाः॥ ७ न्यथा यति यदाद्युपेस्वरे च विशेषाभावेन पूर्वसूत्रेणैवैकदेशविकृतन्यायेन सिद्धावस्य वैयर्थ्यं स्पष्टमेव। सह समानमिति। सूत्रे तूत्तरपदार्थप्राधान्यस्यैव ग्रहः शयित इत्यन्वयायेति भावः॥ इ

नतुप्रत्ययइत्यादि।तथासतिप्राक्ठञःप्राग्निष्कादितिवावदेदितिभावः।तेषु।वद्बोधकशास्त्रेषु।प्राक्ठञइत्येवमकरणेफलमाह।एवंचेति।अन्यथा।प्रकृतिप्रत्यययोरवधित्वे।सन्निधानाविशेषादिति।प्रतिसूत्रमस्योपस्थितेरित्यर्थः।पर्यायःस्यादिति।शरीरावयवात्।उगवादिभ्यश्चेत्यर्थः।सास्त्विति।प्राग्वतेष्वधिकारान्तरावष्टब्धत्वान्नतुचरमस्योपस्थितिरितिभावः।तदनुगुणत्वादिति।चलनरूपतत्क्रियानुगुणत्वादित्यर्थः।परेण।आदेशासन्नियुक्तेनशरीरादयवत्वाद्दित्वनेन।संप्रसारणाद्वेति।आदिनापूर्वरूपम्।नचसंप्रसारणेषुअनितिस्थितेपूर्वरूपंबाधित्वावार्णादाङ्गमितिन्यायेनप्राप्तटिलोपस्ययस्येत्यनेननिरस्तोपूर्वरूपेपिनपुनष्टिलोपोऽवसरत्वादितिवाच्यम्।तस्यन्यायस्यात्रशास्त्रेऽनाश्रयणात्।निरूपितंचैतदन्यत्रेतिदिक्।सुवचमिति।ऊधस्शब्दादाचारक्विबन्तादात्मनेपदार्थस्तुन।ततआचारक्विपोऽभावात्।ऊ

अयपाश्मिकः।प्राक्क्रीताच्छः।इत्यतःप्रागिति।अर्थोत्रावधित्वेनगृह्यते।नतुप्रत्ययःप्रकृतिर्वा।तेनप्राक्क्रीताद्येऽर्थास्तेषस्योपस्थानम्।अवधिस्सजातीयोह्यवधिमान्भवतियथामासात्परइतिकालः प्रतीयते।ग्रामात्पूर्वइतिदेशः।एवंचसमानेऽर्थेप्रकृतिविशेषाद्धितोयदादिःछस्बाधते।अन्यथायच्छयोःसन्निधानाविशेषात्तव्यत्तव्यानीयरामिवपर्यायःस्यात्।ननुयदादिविषयेच्छोनभविष्यति।विभाषाहविरपूपादिभ्यइतिविभाषाग्रहणाल्लिङ्गादितिचेत्।सत्यम्।एवंसतिअवधिग्रहणमास्तु।छइत्येवास्तु।स्पष्टप्रतिपत्त्यर्थन्तदितिचेत्तर्हिअर्थएवावधित्वेननिर्दिष्टमुचितः।अन्यथाभसितेपिलघुनेनशास्त्रेणाव्याप्तिरितिन्यायमापद्येतेतिदिक्।गवाद्यन्तर्गणसूत्राण्याह।नाभिनभंचेति।नाभिशब्दोयत्प्रत्ययंलभते।नभादेशंचेत्यर्थः।नभ्योऽक्षइति।रथाङ्गंसच्छिद्रंनाभिः।तदनुप्रविष्टः।काष्ठविशेषोऽक्षः।सचतदनुगुणत्वाच्चतस्मैहितः।अञ्जनंतैलाभ्यङ्गः।तदपिलेहनत्वान्नाभयेहितम्।रथेति।शरीरावयवेतुपरेणबाधाच्चेतिभावः।शुन्यमिति।चकारस्यानुक्तसमुच्चयार्थत्वान्नस्तद्धितइतिटिलोपोनयेचाभावकर्मणोरितिप्रकृतिभावस्तुदुर्लभः।संप्रसारणादौकृतेअनुरूपाभावात्।दीर्घपक्षेतद्विधानसामर्थ्यादिटिलोपोमाभूत्।पक्षान्तरेतूक्तैवगतिः।नङ्चेति।नश्चेतिसुवचम् ॥

धन्यशब्दात्क्यच्यात्मनेपदार्थंङित्वमितित्वसङ्गतम्।यंसमुदायंयोवयवोनव्यभिचरतितत्समुदायोपकारकत्वस्तदवयवधर्मोनान्यस्येतिगुप्तिजादिसूत्रेभाष्येस्पष्टमुक्तत्वात्।ङित्वसामर्थ्यात्न्यायबाधत्वस्यनापेक्षयान्यत्रक्लृप्तानङ्एवात्रोच्चारणमित्यस्यैवयुक्तत्वात्।नचास्यानोलाक्षणिकत्वेनयेचेतिप्रकृतिभावेनापत्तौटिलोपानापत्तिः।अणग्रहणेत्तदप्राप्तेः।ध्वनितंचेदमूधसोनङ्कारेलिङ्गाधिकारेवक्तव्यम्।इहमाभूत्।महोधाःपर्जन्यइतिबहुव्रीहेरितिसूत्रस्यभाष्येण।ऊधसोनङितिसमासान्तप्रकरणेसूत्रंतत्रस्त्र्यधिकारेकर्तव्यमितितात्पर्यम्।तत्रनकारइतिवदतासूत्रेऊधस्शब्दविषयेऽकारङकारोऽयर्थावि

निष्पन्नितमात्रेलौकिकत्वन्यायमेवसङ्ग्रहःक्षतइतिदिक् ॥

अ·श· तस्या हविः शब्दस्य। प्रपञ्चार्थ इति। यदा सादृश्येनाऽपूपादयोन्यत्र वर्त्तन्ते तदा गौणमुख्यन्यायेन प्राप्तिरेवास्य न। अन्यत्र तथादृष्टत्वेन प्रपञ्चार्थत्वमेवोचितमिति भावः। कैयटेति। उगवादिभ्य इति
२१४ सूत्रे। लक्षणोचितेति। अदितिमोदनेनेति वाक्यशेषस्य लक्षणातात्पर्यग्राहकत्वात्। प्रसिद्धार्थसमन्वयेन। तत्सम्बन्धरूपेण वृत्त्यन्तरेणेत्यर्थः। आत्मन्विश्वेति। यद्यपि तत्र नकारेणास
ऽधन्य इति। ये चेति प्रकृतिभावः। विभाषा हविरपूपादिभ्यः। हविर्विशेषाणामिह ग्रहणम्। न तु स्वरूपस्य। तस्य गवादिषु पाठात्। ननु विपरीतमेव किं न स्यात्। गवादिषु विशे
षाणां ग्रहणम्। इह तु स्वरूपस्येति चेत् मैवम्। असंजातविरोधित्वेन तत्रैव स्वरूपग्रहणस्य न्याय्यत्वात्। अपूप। तण्डुल। पृथुक। मुसल। सुवर्ण। कटक। कर्णवेष्टक। इत्यादीन् प्र
क्रम्य पठ्यते। अन्नविकारेभ्यश्चेति। अस्यार्थः। अन्नविकाराः। अन्नप्रकाराः। अदनीयविशेषाः। तेभ्यो यद्वा स्यात्। ओदन्याः। ओदनीयाः। एवं च अपूपादीनां केषांचित्पाठः प्रपञ्चा
र्थः। हविरपूपादिभ्यो विभाषा या उगवादिभ्यो यत् पूर्वविप्रतिषेधेन। चरव्यास्तण्डुलाः। सक्तव्या धानाः। चरुर्नाम हविरिति काशिका। स्थालीवचनस्य चरुशब्दस्य तत्रत्येह वि
धिउपचाराद्वृत्तिरिति कैयटहरदत्तादयः। यद्यपीदं निरूढचर्वधिकरणविरुद्धम्। तत्रादित्यश्चरुरित्युपक्रम्य अदितिमोदनेनेति वाक्यशेषश्रवणात्। चरुशब्द ओदने शक्तः।
लोके स्थाल्यामौपचारिक इति सिद्धान्तितत्वात्। तथापि कैयटादीनामयमाशयः। लोके स्थाल्यां प्रयोगस्तावत्सर्वसंमतः। तथा च स्थाल्यामेव शक्तिरस्तु। तदनुरोधेन वेदे ला
क्षणिकत्वोचिता। लोके गृहीतशक्तिकः शब्दो वेदेऽपि बोधक इति स्वीकारात्। उक्तं च। लोकप्रसिद्धार्थसमन्वयेन वृत्त्यन्तरेण प्रतिपादिते सति शक्त्यन्तरं तत्र न कल्पनीय
म्। तथा सतीह कथं नु लक्षणा भवेदिति। नभ्यमिति। नाभि नभं चेति नभादेशस्तु न भवति। तस्य गवादियता संनियोगशिष्टत्वेन रथनाभावेव प्रवृत्तेः। खलयवा। अत्र वृ
षशब्दोऽकारान्तो गृह्यते न तु नकारान्तः। अन्यथा ह्यसंदेहार्थं नलोपमकृत्वैव निर्दिशेत्। आत्मन्विश्वजनेतिवत्। वृषाय हितं वृष्यम् ॥
न्देहायाकारान्तात्मशब्दाभावात्। किं तु प्रकृतिपरिमाणार्थम्। तेनासमासग्रहणज्ञापिततदन्तविधिरत्र नेति वृत्तौ स्पष्टम्। किं च प्रकृते नकारानुच्चारणे नोभयोर्ग्रहणं प्राप्नोति तदु राम:
च्चारणेर्द्धमात्रागौरवं च। तथापि व्याख्यानादेवाकारान्तमात्रग्रहणमिति तत्त्वम् ॥ २१४

आकरः। भाष्यम्। नाङ्गीकृत इति। यथा चेनास्य सङ्ग्रहो वृत्तिकारादिभिरङ्गीकृतस्तथा गवादिषु पाठेन सङ्ग्रहो नाङ्गीकृत इत्यर्थः। स्त्रीलिङ्गादपीति। अजशब्दाद् विशब्दाच्चेत्यर्थः। अब्रह्मण्यमिति। ब्रह्मन्छब्दो ब्राह्मणपर्यायः। इह च पन्शब्दात् ब्राह्मणशब्दाच्च यतः प्राप्तिरेव नास्ति च्छोऽपि अनभिधानान्नेत्याकरः। रथ्येति। रथाय हिता। गवादिषु पाठो नङ्गीकृतः। हितार्थ एव यथा स्यात् अर्थान्तरे माभूदिति। अजाविभ्यां थ्यन्। अजशब्दः पुल्लिङ्ग उपात्तः अत एव द्वन्द्वेऽपीत्यविशब्दस्य पूर्वनिपातं बाधित्वा अजाद्यदन्तमित्यजशब्दस्य पूर्वनिपातः कृतः। लिङ्गविशिष्टपरिभाषया स्त्रीलिङ्गादपि थ्यन् तसिलादिष्विति पुंवद्भावः तत्र थ्यनः परिगणनात् कर्मधारयादेवेति। आत्मानमत्र शरणम्। विश्वजनीयमिति। विश्वस्य जनः सर्वसाधारणो वेषादिः। विश्वो जनोऽस्येति विग्रहेऽपि स एवान्यपदार्थः तस्मै हितमित्यर्थः। पञ्चजनादिति। रथकारपञ्चमाः चत्वारो वर्णाः पञ्चजनाः दिक्संख्ये सञ्ज्ञायामिति समासः। एतत्प्रभृति वार्त्तिकत्रितयमपि कर्मधारयविषयमेव। तेन षष्ठीसमासाद् बहुव्रीहेश्च च्छ एव। पञ्चजनीयः। सर्वजनादिति। पूर्वकालैकसर्वेति तत्पुरुषः। सर्वजनीन इति। साध्वर्थे प्रतिजनादिभ्यः खञिति खञि तु सार्वजनीनवैश्वजनीनौ व्युत्पादितौ। हितार्थे तु ख एव न तु खञ्। मातृभोगीण इति। मातुर्भोगः शरीरम्। तस्मै हितः। यद्यपि अमरेण भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्युक्तम्। तथापि अहेरिति प्रयोगबाहुल्याभिप्रायम्। शक्तिस्तु शरीरमात्रे इत्याकरः। मातृपितृशब्दाभ्यां तु औत्सर्गिकश्छ एव। मात्रीयः पित्रीयः। राजाचार्याभ्यां तु अनभिधानाच्छो न। किन्तु राज्ञे हितम् आचार्याय हितमिति वाक्यमेवेत्याकरः। सर्वादीति। अनुकरणत्वात्सर्वकार्याभावः। माणवीनमिति। अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः इत्यस्याधिकारे वार्त्तिकम्। एतच्च एतत्सूत्रस्य निर्देशसिद्धार्थकथनपरमिति बोध्यम्। चतुर्थ्यन्तादिति। एतच्च सामर्थ्याल्लभ्यते। विकृत्यर्थायां हि प्रकृतौ प्रत्यय उच्यते तच्च तस्यास्तादर्थ्ये चतुर्थ्यैव गम्यते। यद्वा तस्मा इत्यनुवर्तते। छादिषेयाणीति। यदा तु चर्मविकारश्छदिः तदा परत्वाच्चर्मणोऽञ् इत्यञ् प्राप्नोति। पूर्वविप्रतिषेधेन ढञेवेष्यते। छादिषेयं चर्म ॥ ७ विशब्दस्य नित्यस्त्रीत्वात् पुंवत्त्वं नेति केचित्। अन्ये तु तमपि भाषितपुंस्कमिच्छन्ति। तेन षष्ठीति। पञ्चानामित्यत्र संख्येयसापेक्षत्वेऽपि प्रकरणादिना विशिष्टसंख्येयवृत्तित्वावगमे पञ्चजन इत्यत्रापि तत्संभवो बोध्यः। तच्च त्रिकृतेर्विकृत्यर्थत्वं च ॥

आहृत्येति। इदं चोगवादिभ्य इति सूत्रे भाष्ये स्पष्टम्। द्वीपी स्यादिति। इत्यादावेव स्यान्न [illegible]ति भावः। संभावनेति। संभावनेऽलमिति यत्र योगविभागात् उपसंवादाशङ्कयोरित्यत्र

आहृच। यद्धाप्रवज्ञः पूर्वविप्रतिषिद्धं ञ्चेति। एवं च निरवकाशत्वे सत्येव प्रतिपदविधित्वं बलीयस्त्वे प्रयोजकम्। न तु सावकाशत्वे इति सुनिभं तल्लक्ष्यते। तेन स्वंपितड्डाका
नीत्येव युक्तम्। परत्वात् नुम्प्रवृत्तेः प्रतिपदोक्तत्वाद्दीर्घमाश्रित्य स्वांपितड्डाकानीति मतं तु दुर्बलमिति दिक्। चर्मणोऽञ्। चर्मण इति षष्ठी न तु पञ्चमी। तथा हि सति चर्मशब्दाच्चर्मार्था
याम् प्रकृतौ प्रत्ययः स्यात्। चर्मणे द्वीपी इत्यादौ तदाह। चर्मणो या विकृतिरिति। वार्ध्रे इति। वृधिवधिभ्यां रन् इति रन्प्रत्ययमेव वर्ध्रशब्द आद्युदात्तः चर्मवाची तस्य विकार इत्यण् टिड्ढेति ङी
प् वार्ध्री रज्जुः वध्रीति तु वधेरौणादिके ष्ट्रनि। नध्री वध्री वरत्रा स्यादित्यमरः। चञ्चाः पश्यवध्रिकाः पश्येति भाष्यम्। अनुयोऽचं वा ज्ञ्यस्य नामेति वेदे प्रयोगाः। तत्र अवग्रहकाले ह्रस्वस्तु
ङ्याप्पोरिति बोध्यः। तदस्य। स्यादिति संभावने लिङ्। इष्टकानां बहुत्वेन संभाव्यते स्मृत्। प्राकार आसां स्यादिति। देशस्य च गुणेन संभाव्यते। प्राकारोऽस्मिन् स्यादिति। इह प्रकृतिविकार
भावस्तादर्थ्यं च न विवक्षितम्। किंतु योग्यतामात्रं तेन पूर्वस्यायमविषयः। मतुब्विधा विवक्षकत्वात्तद्ग्रहणेन सिद्धे इतिच्छन्दोपादानं स्पष्टार्थम्। कुयतोः पूर्णो विधिः। प्रा
ग्वतेष्ठञ्। ठञ् इत्येव वक्तव्ये प्राग्वतेरिति वचनं मध्ये योऽधिकारवान् अपवादः सर्वभूमिपृथिवीभ्यामणञौ शीर्षच्छेदाद्यच्चेत्येवमादिः तेन विच्छेदेऽपि ठञेव यथा स्या
दित्येतदर्थम्। तेन पारायणतुरायणेत्यादौ ठञ् लभ्यते। नन्वेवं पारायणादिसूत्रे एव ठञ् निर्दिश्यतामिति चेत् न। उत्तरसूत्रे येषां पर्युदासः तेभ्यः क्रीताद्यर्थे ठञ् इष्टत्वा
त् तस्य च प्रकृतसूत्रं विना अलाभात्। तेन गोपुच्छिकः। साप्ततिकः इत्यादौ ठञर्थमिदं सूत्रमिति स्थितम्। यत्तु प्राचा तेन क्रीतं तृतीयान्तात् क्रीताद्यर्थे ठक् स्यात्। सप्तत्या क्रीतः
साप्ततिकः इत्युक्तं तन्न। अगोपुच्छेत्यादिपर्युदासेन ठकोऽसङ्गतत्वात् ॥

भाष्योक्तवचनादिति भावः॥ ॥ कुयतोः पूर्णो विधिः। अपवाद इति। यद्यपि तेठ
अपवादठकोऽपवादास्तथापि अपवादापवादस्य सुतरां तदपवादत्वमिति भावः। पर्युदास इति। गोपुच्छादीनामित्यर्थः ॥

त्रयोदशेति। ठक्ठञौ २। ठन्यतौ ४। कन्ड्वुन्टिठनः ७। अञ् ८ शतमानाय्यण् ९ ख १० ईकन् ११। यणादियत् १२। द्वित्रीतिवार्त्तिकोक्ताण् १३। चेत्येवं त्रयोदशेत्यर्थः। अनन्यार्थस्य। क्रीतात्पूर्वा तिरिक्तार्थरहितस्य। अर्थे चैवेति। वतिशब्देन तदर्थो लक्ष्यते इति भावः। व्याख्यानमेवेति। प्रथमोपस्थितत्यागे मानाभावादिति भावः। अन्ये तु आर्हादित्यनेन यत्त्वर्थग्रहणे विशेषविहित

तेन क्रीतमिति सूत्रस्य त्रयोदशप्रत्ययानधिकृत्य कृतस्य ठञ्मात्रपरत्वेन व्याख्याया असंगतत्वाच्च। यदपि व्याचक्षते। अतः परमार्हाद्गोपुच्छसंख्यापरिमाणाट्ठगित्यधिकृत्यार्हीयान्दर्शयति तेन क्रीतम्। सन्तत्वान्नायं कनादेर्विषय इत्युदाहरति। सप्तत्येत्यादीति। अत्रेदं वक्तव्यम्। तेन क्रीतमित्यस्य ठञादित्रयोदशसाधारणतया आर्हीयान् दर्शयतीत्यवतारिका तावदसङ्गता। अनन्यार्थस्य प्रथमोपस्थितस्य च प्राग्वतेष्ठञित्येतस्योपेक्षानर्हतया प्राग्वतीयानित्यस्य वक्तुमुचितत्वात्। किंच। कनादेरित्यादिशब्दोनुचितः। सन्तत्वस्य कन्विधावेव पर्युदासप्रयोजकत्वात् आदिशब्दग्राह्यस्य दुर्वचत्वात् इति दिक्। यद्यप्यत्र प्रत्ययोऽवधित्वेन गृहीतः तथापि अर्थे चैवोपतिष्ठते। न प्रतिप्रकृति। तेनापवादविषये न भवति। अत्र च ज्ञापकं पूर्वादन्यतरस्यामिति सूत्रेऽन्यतरस्यां ग्रहणम्। आर्हात्। तदर्हतीति। अर्हतीति तिङन्तस्य एकदेशः शबन्तोऽत्रानुक्रियते न तु तदर्हमिति सूत्रान्तर्गतमजन्तमिति भावः। अत्र व्याख्यानमेव शरणमिति हरदत्तः। अत्र श्लोकवार्त्तिकम्। ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः। अस्यार्थः। द्रव्यान्तरपरिच्छिन्नगुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना तुलादावारोपितेन येन सुवर्णादेर्गुरुत्वम् उन्मीयते तदूर्ध्वारोपणादूर्ध्वमानमिति शब्देन विवक्षितं तदुन्मानम्। आरोहपरिणाहाभ्यां स्वगताभ्यां येन काष्ठादिनिर्मितेन व्रीह्यादि परिमीयते तत्परिमाणं प्रस्थादि। परिः सर्वतोभावे। आयामो दैर्घ्यम्। स येन मीयते तत्प्रमाणम्। तच्च क्वचित्तिर्यगवस्थितस्य वस्तुनः यथा वस्त्रादेर्हस्तादि ॥

कनावृत्तेर्बाधे एकवचनास्येति प्रयोगासङ्गतिः। तदग्रहणे प्राग्वतेरित्यनुवृत्त्यैव सिद्धे आर्हा[illegible]स्यावैयर्थ्यमित्यर्हादित्यप्युक्तार्थे प्रमाणमित्याहुः ॥

क्वचिदूर्ध्वाधरेति। तादृशस्योर्ध्वमानत्वादुन्मानत्वमपि। तद्ध्वनयन्नाह। ऊरुद्वयसमिति। यदि तु तस्य प्रमाणत्वमेव स्यात्तदा प्रथमश्चद्वितीयश्चोर्ध्वमाने मतौ ममेत्युक्तेर्द्वयसच् दुर्लभः स्यात्। न चात्र प्रमाणत्वस्यापि सत्त्वात् प्रमाणे लइति लुगापत्तिरिति वाच्यम्। आयामविवक्षायां प्रमाणमित्येतद्भवतीति अत्र भाष्योक्तेर्विद्यमानस्याप्यूर्ध्वाधरभावकृतायामस्याविवक्षया तदप्रसङ्गात्। विवक्षा च प्रयोगानुसारिणीत्यदोषः। संभवमात्रेण तु प्रमाणत्वं तस्योक्तम्। तिर्यगवस्थितवस्तुपरिच्छेदके तु प्रमाणत्वं

क्वचिदूर्ध्वाधरदिगवस्थितस्य। यथाहास्तिनमुदकम्। ऊरुद्वयसमुदकमिति। संख्या तु उन्मानपरिमाणप्रमाणेभ्यः पलादिप्रस्थादिहस्तादिभ्यस्त्रिभ्यो बहिर्भूता एकत्वद्वित्वादिर्बोध्येति। इह संख्यापरिमाणयोरेव प्रकृतत्वेऽपि उन्मानप्रमाणयोर्विवेचनं प्रसङ्गात् कृतमिति बोध्यम्। असमासे निष्कादिभ्यः। निष्कपणपादमाषवाहद्रोणषष्टि इति सप्त निष्कादयः तत्र द्रोणशब्दः परिमाणवाची। षष्टिशब्दः संख्यावाची। ताभ्यां ठञि प्राप्ते वचनम्। इतरेषां तु पञ्चानामुन्मानवचनतया पूर्वसूत्रेण सिद्धे ठकि समासप्रतिषेधार्थं वचनम्। अन्ये त्वाहुः। पूर्वसूत्रे परिच्छेदकमात्रं संख्याभिन्नं परिमाणशब्देन गृह्यते। तेन सर्वेभ्यष्ठञ् एव अपवादः। परिमाणं तु सर्वतः इति भेदेन श्रुत्वादनं तु प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये इत्यादावुपयोक्ष्यत इति। एतच्च पदमञ्जर्यां स्पष्टम्। सुगव्यमिति। उगवादिभ्यो यत्। यवापूप्यमिति। विभाषाहविरपूपादिभ्य इति यत्। न्यासकारस्त्वाह ॥

निर्विवादमेव। त्रिभ्योऽपि बहिर्भूतेति। अनेन संख्यायाः सर्वथा बाह्यत्वं वदतेतरेषां परस्परग्रहणं सूचितम्। तेनोन्मानस्य परिमाणग्रहणेन ग्रहणम्। अत एवापरिमाणबिस्तेति सूत्रे विस्ताचितग्रहणं परिमाणान्तस्येत्यत्र शाणपर्युदासश्चरितार्थ इत्यलम्। एतच्च पदमञ्जर्यामिति। अत्रारुचिबीजं तु भाष्यविरोधः ॥

वृत्तिविरोधादिति। अपूपादिग्रहणं प्रपञ्चार्थमिति हि वृत्तिः। गणसूत्रेऽपि तदन्तविधिरस्त्वेवेति बोध्यम्। उत्तरपदलोपीति। साहित्यं चैकविप्रतिषेधान्वयित्वेन। सूत्रे तु द्वन्द्वगर्भो बहुव्रीहि
अन्नविकारत्वादेव सिद्धे अपूपादीनां प्रतिपदपाठसामर्थ्यात्तदन्तविधिर्नेति तद्वृत्तिविरोधादुपेक्ष्यमिति भावः। इत ऊर्ध्वमिति। संख्यापूर्वपदानामिति किम्। इह माभूत्। परमपारायणं
वर्त्तयति। द्विशूर्पमिति। द्वाभ्यां शूर्पाभ्यां क्रीतमिति तद्धितार्थे द्विगुः। न तावदेषा लुगन्ता प्रकृतिरिति संख्यापूर्वपदादपि शूर्पादञन्यतरस्यामिति अञ्ठञौ वा। अध्यर्द्धपूर्वेति लुक्। द्विशौर्पिकमि
ति। ठञो द्विगुं प्रति निमित्तत्वाभावाल्लुगभावः। परिमाणान्तस्येत्युत्तरपदवृद्धिः। शताच्च। उत्तरसूत्रेण प्राप्तस्य कनोपवादः। अतिशदन्ताया इति। त्यन्तसहिता शदन्तेति उत्तरपदलोपी समासः। पञ्चक
इति लौकिक्याः संख्याया उदाहरणम्। बहुक इति। पारिभाषिक्याः। चात्वारिंशत्क इति। इसुसुक्तान्तात्कः। अर्थवतस्तिशब्दस्य ग्रहणाद्वृत्त्वयवस्य तिशब्दस्य पर्युदासो न। कतिकः। वतोरिड्वा। व
तोरिति पञ्चमी। सा च कन्निति प्रथमायाः षष्ठीं कल्पयतीत्याह। वत्वन्तात्कन्निति। अर्द्धिक इति। अर्द्धशब्दः कार्षापणस्यार्द्धे रूढ इति भागवदपेक्षयाऽसामर्थ्यं न शङ्क्यम्। यद्वा। प्रकरणादिवशेन
भागिविशेषे विज्ञाते सति नास्त्यसामर्थ्यम्। शूर्पात्। ठञोऽपवादः। शूर्पशब्दस्य परिमाणवाचित्वात्। शतमान। ठञ्ठक्कनामिति। शतमानं परिमाणम्। ततष्ठञ्प्राप्तः। विंशत्या क्रीतं विंशतिकम्। सं
ज्ञाशब्दोऽयम्। असंज्ञायां हि विंशतित्रिंशद्भ्यामिति ड्वुन्स्यात्। संज्ञा च यदि परिमाणस्य तदा ठञ्प्राप्तः। अर्थान्तरस्य तर्हि ठक्प्राप्तः। वसनशब्दात्तु ठगेव। सहस्रं संख्या ततः संख्याया अतिशदन्ताया इ
ति कन्प्राप्त इति विवेकः। अध्यर्द्धपूर्व। अध्यारूढमर्द्धं यस्मिन् तत् अध्यर्द्धम्। प्रादिभ्यो धातुजस्येति साधुः। अध्यर्द्धपूर्वं च द्विगुश्चेति समाहारद्वन्द्वः। सौत्रं पुंस्त्वम्। अध्यर्द्धपूर्वाद्द्विगोश्चापरस्येति। अने
न सूत्रे द्विगोरिति पञ्चमीत्युक्तं भवति। एतच्च वृत्तिकारीत्या व्याख्यातम्। तत्र वार्त्तिकम्। द्विगोर्लुकि तन्निमित्तग्रहणम्। द्विगोर्निमित्तं यस्तद्धितः तस्य लुगिति वक्तव्यम्। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशू
र्पम्। द्विशूर्पेण क्रीतं द्विशौर्पिकमित्यत्र पूर्वोदाहृते द्वितीयस्य मा भूत्। तथा। अर्थविशेषासंप्रत्यये अतन्निमित्तादपि। यत्र तद्धितार्थद्विगुना सह अर्थो न भिद्यते तत्र सन्तद्धितो यस्य निमित्तं न भ
वति तस्मादपि द्विगोः परस्य लुगिति वक्तव्यम्। द्वयोः शूर्पयोः समाहारो द्विशूर्पी। तया क्रीतमिति विग्रहेऽपि द्विशूर्पमित्येव यथा स्यात्। वस्तुतस्तु सूत्रे द्विगोरिति षष्ठीमाश्रित्य द्विगोर्निमित्तं यस्तद्धि
त इति व्याख्येयम्। द्विशूर्पेण क्रीतमित्यत्र तु अनभिधानात्प्रत्ययो नेति भाष्यारूढः पन्थाः ॥ ७ रेवेति बोध्यम्। लौकिक्या इति। संख्याग्रहणे कृत्रिमाकृत्रिमन्यायाप्रवृत्तेरिति भावः। प्रथमायाः ष

ष्ठीमिति। नित्यसापेक्षत्वान्नासामर्थ्यमित्यपि बोध्यम्। द्वितीयस्येति। ठञ इत्यर्थः ॥

सश्रूयतएवेति। द्विगुनिमित्तलाभावादितिभावः। संख्यावाचीति। एवंचतत्पूर्वसमासस्यद्विगुत्वात्तेनैवसिद्धम्। सूत्रेचद्विगुसाहचर्याद्ध्यर्द्धपूर्वोपिसमानाधिकरणसमासएवगृ
ह्यते। तत्रास्यसंख्यात्वेनदिक्संख्येइतिनियमादन्यस्याप्राप्तौतद्धितार्थेत्यादिनाद्विगुरेवेतिभावः। उत्तरपदवृद्धिरिति। अध्यर्धसाहस्रमित्यत्रतेनैवतन्निमित्तप्रत्ययोपिसंगृहीतः। अध्यर्द्ध
ग्रहणंचसमासकन्विध्य—र्थमितिवार्त्तिकेसमासविधिशब्देनसमासरूपोविधिस्तन्निमित्तकोविधिश्चगृह्यते। अन्त्यःसस्यापूर्वपदकतदन्तविधिनिमित्तकःप्रत्ययउत्तरपदवृद्धिश्चेतिभावः।
पञ्चकलापिकमिति। एवंपाञ्चलोहितिकमितिबोध्यम्। पञ्चकलापाःपरिमाणमस्यपञ्चलोहिन्योगुञ्जाःपरिमाणमस्येतिविगृह्यतद्धितार्थेतिसमासः। तदस्यपरिमाणमिति
ठञ्। भस्याढेतद्धितइतिपुंवद्भावाल्लोहिनीशब्दस्यककारनकारयोर्निवृत्तिः। परिमाणविशेषस्यनामधेयेएते। असंज्ञाग्रहणंप्रत्ययान्तस्यविशेषणंनतुद्विगोः। एतच्चवृत्तिकृता
वर्णितं। सूत्राशयमनुरुध्योदाहृतम्। भाष्यवार्त्तिकयोस्तुअसंज्ञाग्रहणंप्रत्याख्यातम्। तथाहि। द्विगुविशेषणमसंज्ञाग्रहणंपञ्चकलापपञ्चलोहितशब्दौचद्विगूकृततद्धि
तलुकावेवसन्तौ। यस्तुताभ्यामुत्पद्यतेठक्सश्रूयतएवेति। स्यादेतत्। अध्यर्द्धशब्दःसंख्यावाचीतथाचलोकेगण्यतेएकोध्यर्द्धौद्वाविति। अतएवाध्यर्द्धकमितिकन्अध्यर्द्धकंसमिति। त
द्धितार्थेद्विगुश्चभवति। तत्किमध्यर्द्धपूर्वग्रहणेनेतिचेत्सत्यम्। ज्ञापनार्थमिदम्। संख्याकार्यंकिंचिदस्यनेति। तेनकन्समासोत्तरपदवृद्धिभ्योन्यन्नभवति। तद्यथा। अध्यर्द्धकरोति।
नेह। कृत्वसुचायःसकृत्फलान्ताक्रियामभिनिर्वर्त्त्यपुनस्तामेवकुर्वन्मध्येनिवर्त्ततेसएवमुच्यते। विभाषा। अध्यर्द्धसहस्रमिति। शतमानविंशतिकेतिविहितस्याणोलुक्। तदभा
वेतुसंख्यायाःसंवत्सरसंख्यस्येत्युत्तरपदवृद्धिः इदानीमेवेत्युक्तंअध्यर्द्धशब्दःसंख्यावाचीति। द्वित्रिपूर्वान्निष्कात्। अध्यर्द्धपूर्वग्रहणमुत्तरार्थमनुवृत्तमपिनेहसंबध्यते। द्वि
गोरितितुसंबध्यतएव षष्ठीसमासंव्यावर्त्तयितुम्। अत्रचव्याख्यानमेवशरणम्। अन्यथाऽध्यर्द्धपूर्वात्द्वित्रिपूर्वाच्चनिष्कादितिसमुच्चयःस्यात्। द्विनैष्किकमिति। प्राग्वतेष्ठञ्। म
तान्तरेतुठक्परिमाणान्तस्येत्युत्तरपदवृद्धिः॥ ७७ लुकिचाग्रहणमित्यस्यभाष्यस्यप्रत्ययलुगर्थेनकार्यंज्ञापनार्थंत्वस्त्वित्यर्थइतिनतद्विरोधः। प्राग्वतेष्ठञिति। समासेऽसमासेनिष्कादिभ्य
इतिठकोऽप्राप्तेरितिभावः। मतान्तरेत्विति। असमासेइतिसूत्रेपरिमाणविशेषवाचिनिष्कादीनामेवग्रहणंतत्रतून्मानोरोभूषणादिवाचिनएवग्रहणंप्रसिद्धत्वादितिमतेइत्यर्थः ॥

तस्यैवानुवृत्तिरिति। अर्थाधिकारस्यौचित्यादिति भावः। परिच्छेदकमात्रमिति। उन्मानमपीत्यर्थः। तत्र तद्ग्रहणस्यैव भाष्यसंमतत्वात्। मुख्यमते त्विति। दर्पणकारादिभिर्मुख्यमतत्वेन व्यवहृते त्वित्यर्थः। तुना रुचिर्बोधिता। ——— तद्बीजं तु तस्य भाष्यासंमतत्वम्। पूर्वेणेति। पणपादेत्यनेन। अत्र च भाष्यं प्रमाणमिति। शाणशब्दस्यैव तत्र ग्रहणादिति भावः। अन्यत्रेति। मूल्यद्रव्यभिन्ने करणे कर्तरि चेत्यर्थः। हरदत्त इति। अत्रारुचिस्तु भावसाधनग्रहणेन मानं नापि फलमिति भाष्यस्य संयोगो नामेदं कृत्वेदमवाप्यत इति प्रतीके करण विंशतिकात्खः। शतमानविंशतिकेत्यणि प्राप्ते तस्य च लुकि प्राप्ते खो विधीयते। खार्याः। तदस्य परिमाणमिति ठञि प्राप्ते तस्य लुकि ईकन् विधीयते। प्राण्यङ्गेति पादस्य पदाज्यातिगोपहतेष्वित्यत्र तावत्प्राण्यङ्गस्यैव पादस्य ग्रहणं तस्यैवाज्यादिभिर्गतिवचनैः संबन्धसंभवात्। पद्यतीत्यादावपि तस्यैवानुवृत्तिरिति भावः। इह तु पणमाषाभ्यां साहचर्यात्परिमाणवाचिनो ग्रहणम्। शाणाद्वा। पक्षे ठञिति। यद्यपि शाण उन्मानं तथाप्यार्हादित्यत्र परिमाणग्रहणेन योगरूढस्य परिच्छेदकमात्रं गृह्यत इति वादिनां मते अस्यापि पर्युदासादिति भावः। मुख्यमते तु ठगेव बोध्यः। शाणाद्वेति सूत्रे शताच्चेति वक्तव्यम्। नित्ये प्राप्ते विकल्पार्थम्। अध्यर्द्धशत्यम्। अध्यर्द्धशतम्। पञ्चशतम्। पञ्चशत्यम्। यदाभावे संख्यालक्षणस्य कनो लुक्। शताच्च ठन्यताविति तु न भवति। तत्रासमासग्रहणस्यानुवर्तितत्वात्। द्वित्रिपूर्वादण्च। वार्त्तिकमिदम्। वृत्तिकृता सूत्रेषु प्रक्षिप्तम्। शाणादित्येवेति। शतग्रहणं तु नेह संबध्यते। व्याख्यानात्। अत्र च भाष्यं प्रमाणमिति भावः। यत्तु न्यासकृतोक्तम्। शतशाणाभ्यां वेति सूत्रयितव्ये पणपादेति पूर्वसूत्रे शतग्रहणं क्रियते तस्येदं फलम्। शतशब्दः स्वरितत्वेनानुवर्त्तमानो विशाणाद्वेत्यत्रैव संबध्यते तदुत्तरसूत्रे तु न संबध्यते। तेनाण्नेति। तदेतत्सामर्थ्यावर्णनं सण्विधायके वार्त्तिके सूत्रत्वभ्रमप्रयुक्तमित्यास्तां तावत्। त्रैरूप्यमिति। अणि एकम्। यति द्वितीयम्। ठञो लुकि तृतीयम्। तेन क्रीतम्। तृतीयान्तात् क्रयणकर्मणि वाच्ये ठञादयस्त्रयोदश प्रत्ययाः यथायथं स्युः। ननु देवदत्तेन क्रीतं पाणिनिना क्रीतं सन्तोषेण क्रीतमित्यादावतिप्रसङ्ग इति चेन्न। सत्यम्। करणे तृतीयैवेह समर्थविभक्तिः सापि मूल्यद्रव्यसमर्पकाच्छब्दादुत्पन्ना नान्यापि। अन्यत्र हि अनभिधानान्न प्रत्ययः एतच्च तद्धितादिति महासंज्ञाकरणाल्लभ्यते। तेभ्यः प्रयोगेभ्यो हिता इति व्याख्यानात्। पुत्राच्छ च। कथं पुत्रीयः क्रतुरिति। न हि क्रतुः संयोगेनाप्युत्पात इति चेन्नैवम्। संयुज्यतेऽनेनेति व्युत्पत्त्या हि येन यागादिकरणेन पुरुषाः फलेन संयुज्यन्ते स यागादिरपि संयोगः। न केवलं सम्बन्ध एवेत्याग्रह इति हरदत्तः॥ ७ युत्पत्त्या यागादेरेव संयोगत्वं कैयटेनोक्तम्। धनपतिसंयोगोऽपीदृश एव। तेनापि पुरुषाः फलेन अन्नवासआदिरूपेण संयुज्यन्त एवेति। यथासंख्यनिरासार्थ इति। अनुवृत्तेन सर्वभूमिपृथिवीभ्यामित्यनेनेति भावः॥

नकर्त्तरीति।व्याख्यानादितिभावः।नोद्भावनीयमिति।येत्त्वेनंनित्यसापेक्षंब्रुवतेतेषामपिरूढत्वादस्यैवग्रहणंन्याय्यमितितात्पर्यम्।प्रत्येकमिति।यद्यपितथाविवक्षानव्युत्पत्तिसिद्धातथापिसौत्र
त्वादेवतथाविवक्षांकृत्वाएकवचनंप्रयुक्तमितिभावः।सूत्रेतृतीयोपसर्गश्रमंव्यावर्त्तयति।षष्ठइति।सचहरतियोगेउपसंख्यानंसमानार्थइतिभावः।च्छेदइति।अत्रमानमुत्तरसूत्रेद्व्याढकीति
तस्येश्वरः।तत्रविदितइतिच।योगविभागोयथासंख्यनिरासार्थःउत्तरार्थश्च।तस्यवापः।तस्येतिवापापेक्षयाकर्मणिषष्ठीनकर्त्तरि।तेनदेवदत्तस्यवापःक्षेत्रमित्यादौन।त
दस्मिन्।शुल्कग्रहणंप्रपञ्चार्थम्।तस्याप्याद्यविशेषत्वात्।तथाचशौल्कशालिकइत्यत्रठगायस्थानेभ्यइतिठग्भवति।अर्द्धिकइति।अर्द्धाच्चेतिवक्तव्यमितिठन्प्राप्तः स
तिचतस्मिन्ङीप्स्यात्।इष्यतेतुटाप्।रूपकस्येति।रूपकंकार्षाप-णम्।रूढइति।तथाचभागवदपेक्षत्वेनासामर्थ्यंनोद्भावनीयमितिभावः।व्याख्यान्तरमिति।अत्रपक्षे
भारभूतार्थाभिधायित्वाद्वंशादयोभारशब्देनोच्यन्ते।प्रत्येकसंबन्धविवक्षयासूत्रेएकवचनम्॥वस्नद्रव्याभ्याम्।वस्नोमूल्यम्।संभवत्य।आधारप्रमाणादाधेयप्रमाण
स्ययदनाधिक्यंतदुपसर्जनंधारणंसंभवतेरर्थः।अतःसकर्मत्वात्तदित्यनुवृत्त्यालभ्यमानाद्वितीयासमर्थविभक्तिर्नविरुध्यते।तदाह।यस्मिन्नित्यादि।सूत्रेअवहर
तीत्यत्रषष्ठउपसर्गस्तद्व्याचष्टे।उपसंहरतीति।तत्पचतीति।पचतिग्रहणंसम्भवत्यवहरतिनिवृत्त्यर्थम्।द्रोणप्रमितेव्रीह्यादौद्रोणशब्दः।आढकाचित।पक्षेठ
ञिति।नतुठक्।आढकादीनांपरिमाणत्वात्।द्विगोःष्ठंश्च।ष्ठन्नितिच्छेदः।तदाह।षित्वादिति।अपरिमाणेति।तस्मिन्सूत्रेआचितशब्दस्यसाक्षादुपादानादिति
भावः।तदस्यपरि।इहपरिमाणशब्देनपरिच्छेदकमात्रंगृह्यतेनतुसर्वतोमानमेवंमुत्तरसूत्रेसंख्यायाःपरिमाणेनविशेषणात्।षष्टिर्जीवितपरिमाणमस्य
षाष्टिकः।पञ्चदशमन्त्राइति।साम्नास्तुवीतएकंसामत्र्यृचेक्रियतेइतिहिश्रुतिः।तत्रत्र्यृचस्यपञ्चकृत्वआवृत्त्यापञ्चदशमन्त्राःसप्तदशेस्तोमेअन्त्यायाः
सप्तकृत्वआवृत्तिः।एकविंशेत्र्यृचस्य ॥
भाष्यप्रयोगः।उत्तरसूत्रेइति।अर्थाधिकारानुरोधेनोत्तरसूत्रनिर्णीतार्थग्रहणस्यैवौचित्यमितिभावः।तत्रत्र्यृचस्येति।एकविंशेत्र्यृचस्येतिचपाठः ॥

तिलोपार्थमिति। तिलोपे कृते भत्वाद्तो गुण इति पररूपम्। शतिरिति। अत्र पक्षे निपातनादन्तोदात्तत्वम्। अत एव भाष्ये एषव्युत्पत्तिपक्षोप्युक्तः। शतिजिति पाठस्तु गुरुमतेन। अपदत्वं चेति। तस्फलमनुस्वारः। मन्त्रे भाषायां चेति। तथा चेत्यादि। भाष्ये इति। विग्रहदर्शनान्नित्यग्रहणमनर्थकमिति हि भाष्ये उक्तम्। एवं च छन्दमर्हतीत्यत्रार्थ एवास्य साधुत्वं तच्च तदर्हतीत्यनेनैव सिद्ध डित्करणमेकविंशतिलोपार्थं त्रयस्त्रिंशतादौ टिलोपार्थं च। पङ्क्ति विंशति। पञ्चन्शब्दस्य टिलोपः तिप्रत्ययः। चोः कुरिति कुत्वम्। रूढिशब्दा इति। तथा चात्र नावयवार्थमिनिवेष्टव्यम्। पङ्क्तिशब्दो हि नानार्थः। अस्ति छन्दोविशेषे यस्य पञ्चाक्षराः पञ्चपादाः। अस्ति च क्रमसंनिवेशे ब्राह्मणपङ्क्तिरिति। अस्ति दशसंख्यायाम्। कृतवान् पङ्क्तिरथो विलंघ्य यदिति। दशरथ इत्यर्थः। द्वयोर्दशतोर्विन्भावः शतिश्च प्रत्ययः। अपदत्वं च। द्वौ दशतौ परिमाणमस्य विंशतिः। त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः। चतुर्णां दशतां चत्वारिंभावः। पञ्चानां दशतां पञ्चाभावः। षण्णां दशतां षष् तिश्च प्रत्ययः। अपदत्वं। सप्तानां दशतां सप्तभावः। अष्टानां दशतामशी। नवानां दशतां नवभावः। दशानां दशतां शभावस्तश्च प्रत्यय इति दिक्। पञ्चदशतौ। पञ्चक इति। संख्याया इति कन्। त्रिंशच्चत्वारिंशतोरिति। पञ्चम्यर्थे षष्ठी द्विवचनम्। चत्वारिंशते इति सूत्रपाठे तु समाहारद्वन्द्वात्वं चस्येकवचनम्। अत्र ब्राह्मणसंज्ञायामिति षष्ठीसमासेन निर्देष्टुमुचितम्। एवं हि ब्राह्मणस्य चेत्संज्ञेति स्फुटीभवति। अन्यथा तु यस्य कस्यचित् संज्ञायां ब्राह्मणस्येव प्रयोग इति संभाव्येत। मन्त्रे भाषायां च ड[illegible]स्यात्। दृश्यते तु सः। तस्मादिष्टानुरोधेन व्याख्येयम्। छेदादि। इह नित्यग्रहणं भाष्ये प्रत्याख्यातम्। नित्यग्रहणं कर्तव्यमित्युपलक्षणं सूत्रमेवमास्तु इति तदाशयः। तदर्हतीत्यनेन सिद्धत्वात्। दण्डादिति। पूर्वसूत्राद्यदनुवर्तते तदाह। यत्स्यादिति। केचित्तु दण्डादिभ्यो य इति सूत्रं पठन्ति। तद्भाष्यविरोधादुपेक्ष्यमिति हरदत्तमाधवादयः। तथा हि अद्विधौ हनो वा वधः तद्धितो वेत्युक्तम्। यदि वेह यद्विधीयते तदैतदुपपद्यते। स्वपाद्युदात्तत्वं यत्यपि तद्धिते यतो नावइत्याद्युदात्तत्वमेवेति। यदि त्वत्र यो विधीयेत तदा स्वरो भिद्येत ॥७ मित्याशयेनाह। सूत्रमेवमास्त्विति। क्वचिद्विधाविति। केचित्तु वाग्रहणाकरणलाघवानुरोधेन मृजेर्विभाषेत्यनन्तरमिदं वार्तिकं पठन्ति वधादेशश्च हलन्त इति प्रपन्नास्तन्मतानुसारेणेदम्। अवद्योतु लोके स्वावादयश्चेत्यस्य प्रवृत्तेर्न दोषः। भाष्ये तु यद्विधाविदं वार्तिकं पठितं हन्तेर्वा य

दाडादिभ्यो यद् इति। पाठशुद्धिस्तु भ्रमस्थापि सिध्यतीति लाघवानुसारेणैवमेवोक्तम्। कृत्यस्याप्यर्हे विधानात्स्वार्थभेदस्तयोरिति बोध्यम्। आद्युदात्तत्वमिति। धातुस्वरेणेति शेषः। स्वरोभिद्येतेति। अन्तोदात्तत्वापत्तेः। स्वद्दिधौ हनोवेत्यादि। अग्रेपि यतियतो नाव इत्याद्युदात्तत्वादिति पाठस्तु युक्त एवेति दिक्। यत एवेति। छन्दसि तथैव लक्ष्यदर्शनादिति भावः। त्रिष्कली

यत्तु प्रमाणान्तरोपन्यसनं इभवधमेधशब्दः दण्डादयः ते च छन्दसि यदन्ता आद्युदात्ताः दृश्यन्ते। इभ्यान्नराजा वनान्यत्ति। तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति। अपां मेध्यं यज्ञियमित्यादीनि। तन्न। दण्डादिभ्यो यविधानेपि तस्य भाषायां चरितार्थतया छन्दसि चेत्युत्तरसूत्रेण बाधस्य न्याय्यत्वात्। तेन हि प्रातिपदिकमात्रात् छन्दस्यर्हेतीस्त्यर्थे यद्विधीयते। यप्रत्ययं वदद्भिरपि छन्दसि चेति मण्डूकप्लुत्या यत एव विधेयत्वादिति दिक्। कडंकरदक्षिणाच्छ च। कडङ्गरेति पाठस्तु हरदत्तमाधवादिविरोधादुपेक्ष्यः। स्थालीबिलात्। छ यतावनुवर्तेते। पाकयोग्या इति। त्रिष्कलीकृता इति यावत्। यज्ञं ऋत्विजं वार्हतीति। अर्थीसमर्थो विद्वान्। शास्त्रेणापर्युदस्त इत्यर्थः। देशस्यानेवंविधत्वादुपसंख्यानम्। यज्ञियो देश इति। यज्ञानुष्ठाने योग्य इत्यर्थः। आर्हीयाणां ठगादीनां द्वादशानां गतोऽवधिः। पारायणतुरायण। आदित आरभ्य आन्तादविच्छेदेन वेदस्याध्ययनं पारायणम्। तच्च गुरुशिष्याभ्यां निर्वर्त्यते। अन्यतरासंनिधौ अध्ययनक्रियाया अनुत्पादात् तथापि शिष्य एव प्रत्यय इष्यते। ननु गुरावित्याकरः तद्दर्शयति। पारायणिकश्छात्र इति। तौरायणिको यजमान इति। इदमपि यजमान एवेष्यते। ऋत्विक्तु यद्यपि पुरोडाशादिकं निर्वर्तयति तथापि तत्र नेष्यत इति भावः। त्रिशयीभूतोर्थ इति। संदेग्धरि तु प्रत्ययो नेष्यत इति भावः। तथा च ज्ञानप्रामाण्यं स्वतो न गृह्यते सांशयिकत्वादिति संदिह्यमान एव वृद्धाः प्रयुज्यन्ते। यत्तु सांशयिकः संशयापन्नमानसः इत्यमरेणोक्तं तदपि संशयापन्नं मानसं यस्मिन्विषये इति व्याख्येयमिति भावः। ततोभिगमनमिति। अत्र पञ्चम्यन्तात्प्रत्ययः ॥

कृता इति। त्रिःकण्डनैः संस्कृता इत्यर्थः। वार्त्तिकोक्त तत इत्यस्य सार्वविभक्तिकत्वभ्रमं व्यावर्तयति। अत्र पञ्चम्यन्तादिति ॥

प्रत्याख्यातमिति। विग्रहदर्शनान्नित्यग्रहणानर्थक्यमिति तन्नोक्तं। मूले नित्यं गच्छतीति विग्रहप्रदर्शनं तु वृत्त्यनुरोधेनेति भावः। स्वरूपग्रहणमिहेति। तन्मात्रग्रहणमित्यर्थः। आख्यानमिति। वृत्तिकारादीनामिति शेषः। अवयसीति सूत्रभाष्यात्तु अत्राप्यनुवृत्तिरेव लभ्यते। परत्वादिति। उत्कृष्टत्वादन्तरङ्गत्वादित्यर्थः। एतेन विग्रहवाक्ये एव समासान्तप्रवृत्तेः परत्वमयुक्तमित्यपास्तम्। समासान्ते कृते हन्शब्दान्तद्विगोरभावात् प्रकृतसूत्रस्यैवाप्राप्तिरिति भावः। तत्र शङ्कते। न चेति। समासान्ते इति। तदप्रवृत्तौ हि अह्लोपो न इत्यह्लोपे द्वैयह्निकपन्थो ण्नित्यम्। अत्र नित्यग्रहणं भाष्ये प्रत्याख्यातम्। उत्तरपथेन। चकाराद्गच्छतीति प्रत्ययार्थ आकृष्यते तदाह। उत्तरपथेन गच्छतीति। कालात्। स्वरूपग्रहणमिह न भवति। तमधीष्टो भृतो भूतो भावी। त्यत्यन्तसंयोगे द्वितीयानिर्देशान्मासाद्वयसीत्यादौ मासादीनां कालेन विशेषणाच्च। तेन निर्वृत्तम्। तेनेति करणे तृतीया। चतुर्थ्यन्तर्गते तेन निर्वृत्त इत्यत्र तु कर्त्तरि तृतीयेति विशेषः। उभयत्राप्यन्तर्भावितण्यर्थाद्वृतेः कर्मणि क्तः। मासाद्वयसि। खञो ञित्करणं स्वरार्थं पुंवद्भावप्रतिषेधार्थं च। मासीनाभार्य्याः। द्विगोर्यप्। पित्त्वादनुदात्तः। तेन कालान्ते द्विगाविति पूर्वपदप्रकृतिस्वरोऽवतिष्ठते। यबपीति। अत्र च व्याख्यानं शरणम्। द्वैयह्निक इति। नन्वत्र राजाहःसखिभ्य इति परत्वाट्टचा भाव्यम्। न च महाविभाषया टचो विकल्पः रहतीजात्यंताः समासान्ताश्चेति नित्येषु परिगणनादत आह। समासान्तविधेरिति। द्विवर्षीणो व्याधिरिति। व्याधिशब्देन प्रत्ययार्थस्याचेतनतोक्ता। चित्तवति हि नित्यं लुग्वक्ष्यते। परिक्रय्य इत्यस्य विवरणं जेतुं शक्य इति। महानाम्न्यो नामेति। तथा चाभाषितपुंस्कत्वात्पुंवद्भावो नेति भावः। हरदत्तस्त्विति। यौगिकोऽयं न तु रूढ इति मन्यते। अव्ययसङ्ख्यातादेति। वचनसामर्थ्याद्वाक्यादपि प्रत्यय इति भावः। कालाद्यत्। काल्यं शीतमिति। प्रातःकाले काल्यशब्दस्य व्युत्पत्त्यन्तरं मृग्यम्। प्रकृष्टे ठञ्। प्रकृष्यते यमिति प्रकृष्टः। कर्मणि क्तः। ठञ्ग्रहणं विस्पष्टार्थम्। अन्यथाऽनन्तरस्य यतोऽनुवृत्तिराशङ्क्येत। ठञः पूर्णोऽवधिः ॥

इत्यस्य सिद्धिरिति भावः। मन्यत इति। अत्रारुचिस्तु भाष्यकृतो महानाम्निकमित्यत्र तु पुंवद्भावोदाहरणविरोधः। वाक्यादपीति। अपिना अखण्डाव्ययादिरपि सूचितम्। काल्यशब्दस्येति। पाठेन सिद्ध इत्यर्थः। कल्यशब्दोऽहर्मुखवाचीति संख्याया विधार्थे इति सूत्रे भाष्यकैयटयोः। मृग्यमिति। तदलाभात्तस्याव्युत्पन्नत्वमेवेति तात्पर्यम् ॥ ठञोऽवधिस्समाप्तः ॥

म॰श॰
२२०
ति

नपुंसकमिति। सूत्रे उदाहरणे चेति शेषः। तत्रापि व्यापार — विशेषणत्वात्। लक्षणयेति। एतेन जातिविशिष्टं द्रव्यं ब्राह्मणशब्दार्थो न च तेन क्रियायास्तुल्यत्वमत्यन्तभेदादित्यपास्तम्। सौष्ठवादिश्च साधारणो धर्मः। द्रव्यार्थ इति। गुणपदमक्रियोपलक्षणमित्यर्थः। उपेक्ष्याद् इति। पर्वते षष्ठीसप्तम्योरदर्शनात् तत्र तस्येवेत्यनेनापि न वतिः। भेद्येति। भेद्यं विशेष्यं भेदकं विशेषणं संबन्धस्तयोः संसर्गः उपाधिः षष्ठ्यादिः। तेन तुल्यं क्रिया चेद् वतिः। तुल्यमिति सामान्ये नपुंसकम्। ब्राह्मणेनेति। ब्राह्मणशब्दस्तत्कर्तृकेऽध्ययने लक्षणया वर्तते ब्राह्मणकर्तृकाध्ययनतुल्यमध्ययनं वाक्यार्थः। गुणतुल्ये इति। अक्रियया तुल्य इत्यर्थः। अत एव महानसवदिवतेः साधुत्वरक्षणार्थं प्रतिज्ञावाक्ये वह्निमान् भवितुमर्हतीत्यादिक्रियापदं प्रयुञ्जते वृद्धाः। अर्वाचीनास्तु महानससदृशः पर्वत इति व्याचक्षाणाः सूत्रविरोधादुपेक्ष्याः। ननु तद्रीत्याव्युत्पन्नस्य तादृशबोधोऽप्यनुभवसिद्ध इति चेत् सत्यम्। तादृशेऽर्थे साधुत्वमात्रं निराकुर्मो न तु बोधमपि। तथाहि। भेद्यभेदकसंबन्धोपाधिभेदनियन्त्रितं साधुत्वं तदभावेऽपि बोधो नेह निवार्यते। अव्युत्पन्नस्य साधुभ्योऽप्यबोधात्। व्युत्पन्नस्यासाधुभ्योऽपि बोधाच्च। कस्मात् किं बुध्यत इति न निर्णेतुं शक्यम्। किं तु किंविशेष्यके किंप्रकारके किंसंसर्गके बोधे उद्देश्ये किं साधु किं नेत्येव शास्त्रीयविचारविषयः। उक्तं हि भगवता सत्यामर्थावगतौ शब्दैश्चापशब्दैश्च भक्ष्याभक्ष्यादिवन्नियमः। क्रियद् इति। तत्र तस्येव। द्रव्यगुणादितुल्यार्थ आरम्भः। क्रिया चेदिति नानुवर्तते। तदर्हम्। अर्हशब्दः पचाद्यजन्तः तद्योगे कर्मणि षष्ठी प्राप्ता सौत्रो विभक्तिव्यत्यय इत्येके। अन्ये तु कर्तृकर्मणोरिति षष्ठ्या अनित्यत्वे लिङ्गमिदम्। तेनाध्यायैरामोदमुत्तममिति भट्टिप्रयोगः समाहित इत्याहुः। विधिमर्हतीति। द्वितीयान्तादेव प्रत्यय इति स्फुटीकर्तुं तिङन्तेन विग्रहः। कथं तर्हि ततो यथावद्विहिताध्वराय इति। उच्यते। यथाशब्दो वृत्तिविषये स्वार्थकः। तथात्वं यथात्वमित्यादिप्रयुक्तत्वादिदर्शनात् तथा च द्वितीयान्तादर्हार्थे वतिः। योग्यतामर्हतीति विधानमाख्यानं चेत्यर्थः। क्रियायोगेऽपि सुलभः ॥ ननु मथुरायामिव पाटलिपुत्रेऽधीतेत्यस्य मथुरया तुल्यमधीत इत्यस्य च तुल्यत्वात् पूर्वसूत्रेणैव सिद्धमत आह। द्रव्यगुणादीति इत्याहुरिति। अत्रारुचिबीजं तु भाष्याद्यननुकूलम्। आख्यानं चेति। यथावत् ख्यातत्वायेत्येतदभिप्रायकमिदम्। योग्यं यद्विधानमाख्यानं वा तत्कर्माध्वरादिसंबन्धिनेत्यर्थः ॥

राम:
२२०

द्रव्यत्वादेरिति। पृथिवीत्वमादिग्राह्यम्। प्रयोगोपाधिरिति। वस्तुगत्या प्रकृतिजन्यबोधे प्रकारो यस्तस्य धर्मः त्वेन भानमित्यर्थः। एतावतैव प्रयोगोपाधिरिति व्यवहारः। द्वितीये त्विति। तुनाऽरुचिः सूचिता। तद्बीजं तु सर्वत्र प्रकृतेर्लक्षणार्थानमानम्। किं च। तस्येत्यस्यात्र शब्दपरत्वे गुणवचनेति सूत्रे कर्मणीत्यनेनानन्वयः। भाष्ये तु संज्ञाशब्दे द्रव्यमात्रबोधकत्वमिति मते प्रकृति

तस्य भावस्त्वतलौ। प्रकृती इति। न तु यः कश्चित् धर्मः। घटत्वमित्यत्र द्रव्यत्वादेरभानात्। गोभीव इति। इह गोशब्दोऽर्थपरः स्वरूपपरो वेति पक्षद्वयम्। आद्ये धर्मविशेषः प्रत्ययार्थः। स च धर्मत्वेनैव भासते। प्रकृतिजन्येत्यादिस्तु प्रयोगोपाधिः। द्वितीये। जन्यबोधप्रकारः प्रत्ययार्थः। बोधप्रकारमात्रं वा। जन्यत्वं तु संसर्गः। सर्वं चेदं सूक्ष्मदृशां भाष्यकैयटारूढमेव। एवं स्थिते कृत्तद्धितसमासेषु एकार्थीभावाभ्युपगमात् तदुत्तरत्वतलादिभिरपि उक्तरीत्यैवार्थबोधनिर्वाहे तत्र नापूर्वशक्त्यन्तरकल्प्यं किंतु तत्र प्रकृतिप्रत्यययोः पूर्वोत्तरपदार्थयोश्च संसर्गोऽपि प्राधान्येण प्रकारतया प्रविशति। औपगवो राजपुरुष इत्यादौ तु प्रकृत्यर्थस्य तत्र प्रवेशासंभवात्। पाचक इत्यादावपि कारकाणां प्राधान्यात्। कर्तृत्वादेश्च संबन्धविशेषात्मकत्वात्। तदेतदभिप्रेत्य हरिकारिकायामुक्तम्। कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनेति। विस्तरः शब्दकौस्तुभे बोध्यः। पृथ्वादिभ्यः इमनिज्वा। अणादीति। ये इगन्ता लघुपूर्वाः मृदुप्रभृतयस्तेष्वणः समावेशः। चण्डखण्डादिषु गुणवचनेषु ष्यञः। बालवत्सादिषु वयोवचनस्याञ् इति बोध्यम्। त्वतलौ पूर्वसूत्रेणैव लभ्यौ। वर्णदृढादिभ्यः। गुणवचनत्वादेव सिद्धे इमनिजर्थं वचनम्। औचितीति। ब्राह्मणादेराकृतिगणत्वात्ष्यञ्। हलस्तद्धितस्येति यलोपः। एवं याथाकामी। अत्र गणसूत्रं वेर्यातलाभमतिमनःशारदानाम्। विशब्दादुत्तरे ये यातादयः पंच तदन्तानां समासानामनन्तरः ष्यञ् भवतीत्यर्थः। वियातत्वम्। वियातता। वियातिमा। वैयात्यम्। विलाभत्वम्। विलाभता। विलाभिमा। वैलाभ्यम्। विमतित्वम्। विमतिता। विमतिमा। वैमत्यम् ॥

प्रत्ययार्थयोर्भेदानुपपत्तिमाशङ्क्यायं पक्ष एकदेशिनोक्त इति बोध्यम्। प्रकारतयेति। प्रवृत्तिनिमित्ततयेत्यर्थः। एतन्मूलिकैव संबन्धाभिधानमित्युक्तिरित्यन्यत्र विस्तरः। शब्दकौस्तुभे इहियादेवृत्सूत्रस्य वयोवचनस्याञ् इति। अञ्ग्रहणं तदपवादपुरोहितादियकोऽप्युपलक्षणम्। एतेन बालस्य पुरोहितादिषु पाठेन बालादञ इत्यस्य युक्तमित्यपास्तम्। सिद्धे इति। ष्यञीत्यर्थः ॥

ग्रज्ञत्वादणपीति। इदंचात्र वेत्यनुवर्त्तयतां मते बोध्यम्। एवं सांमतमित्यपि तदनुवृत्तौ तु ष्यञा बाधादण् चिन्त्यः। इत्यादावपीति। आदिना प्राग्दिश्यत इति। अपिः सौलभ्ये। अस्तु वेत्यने
दूरान्तत्वादणपि। वैमतम्। वैमनस्त्वम्। विमनस्तापि च निम्ना वैमनस्यम्। विशारदत्वम्। विशारदता। वैशारद्यम्। विशारदिमा। समो मतिमनसोः। संमतित्वं संमतिता। संमतिमा। सांमत्यम्। पूर्ववदण्। सां
मतमित्यादि। गुणवचनब्राह्मणादिभ्यः कर्मणि च। कर्मेह क्रियाकार्यं च। ब्राह्मणादिराकृतिगण इति। केषांचित्पाठस्तु कार्यान्तरार्थः। तथाहि। अर्हतो नुम्चेति नुमर्थः पाठः। एकभाव त्रिभाव
अन्यभाव इति। एषां पाठः स्वार्थे विधानार्थः। तथा च वार्त्तिकप्रयोगः। अन्यभाव्यं तु कालशब्दव्यवायादिति। यत्तु व्याकरणाधिकरणेऽयं प्रयोग इति भट्टैरुपन्यस्तं तत्पूर्वपक्षि
णः प्रौढिवादमात्रम्। प्रायेण तस्मिन्नघट्टके तादृशप्रयोगमेवोपन्यासात्। तद्यथा। अविरविकन्यायेनेत्युदाहृतं तदपि हि वस्तुतो निर्दोषमेव। अविः अविकः अनयोर्मध्ये विकारादि
प्रत्ययः कप्रत्ययान्तादेव न तु केवलात्। तेन आविकं मांसमिति भवति न तु आवमिति मुत्यादितं। तत्र अविरविकमिति सुबन्तद्वयसमुदाये चरमं सुपं विहाय प्राग्भागमनुकृत्य
अविरविकन्यायेनेति भगवता व्यवहृतं तत्र को नाम दोषः। न हि विभक्तिविशिष्टमेवानुकर्त्तव्यमिति नियमे बीजमस्ति। अस्यवामीयमित्यादि निरूढव्यवहाराच्च। एतेन नासदासीयं
ब्रह्मसूक्तमिति शाङ्करभाष्यप्रयोगोपि व्याख्यातः। आसीदित्यत्र तकारं विहाय प्राग्भागस्यैवानुकरणात्। प्राग्नीश्वरादित्यादावप्यनर्थकस्यैकदेशस्यानुकरणं प्रसिद्धमेव। अस्तु वा आसी
दिति तांतस्यानुकरणं ततः अनुकरणं चानिति परमिति निपातत्वादव्ययत्वे अव्ययानां भमात्रे इति टिलोपः। प्रकृतमनुसरामः। सर्ववेद इति। पूर्वकाले केति समासः। चतुर्वेद इति।
तद्धितार्थे द्विगुः। अणो लुक्। चतुर्विद्य इति। विद्यालक्षणात् सूत्रान्तादिति ठक्। तस्य लुक्। सङ्घातग्रहणमिति। वर्णग्रहणे तु अकारस्य यस्येति लोपे तस्य पूर्वविधौ स्थानिवद्भावादयादेशः
स्यादिति भावः। ननु सङ्घातग्रहणेऽपि अलोन्त्यस्येति कृते नेति चेत्। आरम्भसामर्थ्यात्। नानर्थकेलोन्त्यविधिरिति निषेधाद्वा। कपिज्ञात्योः। इह कपिज्ञाती शब्दौ द्वौ। अर्थावपि द्वौ तयोर्य
थासंख्यं नेष्यते। एवं पत्त्यन्तपुरोहितादिभ्यः। हायनान्तयुवादिभ्यः। द्वन्द्वमनोज्ञादिभ्य इत्यत्रापि बोध्यम्। ब्राह्मणादित्वादिति। यद्यपि ब्राह्मणादिषु राजन्शब्दः केवलः पठ्यते तथाप्ययमेवासेद्
तिप्रतिषेधो ज्ञापयति अस्यत्र राजशब्देन तदन्तविधिरिति। एवं च ब्राह्मणादिपाठस्य समासे चरितार्थत्वात् समासे विशेषविहितो यमेव भवति ॥ ६ चात्र समाधानेऽना नास्या सूचिता। तद्धि जन्तु अनुकरणं

एकीयमतत्वेनेति। अत्राहु चिस्तु बहूनां पाठस्यैवं वैयर्थ्यमापततीति। सुवचमिति। प्राणसंबन्ध्यर्थकस्य प्राण —— कर्तृत्वार्थकस्य च न पर्यायत्वं फले तु न विशेष इत्यन्यदिति भावः। देवदत्तत्वमिति। पारिभाषिकजातित्वस्य तत्राभावादिति भावः। सङ्घातग्रहणमिति। अन्यथा यस्येत्यकारलोपस्यासिद्धत्वात्स्थानिवत्वाच्चेकारान्तस्य भत्वाभावेन यस्येति लोपाप्राप्ताविकारस्य य अत एव अवेष्ट्यधिकरणे राज्ञः कर्म राज्यं ब्राह्मणादित्वात् ष्यञिति शावरभाष्यं भट्टपादैर्दूषितम्। केचित्तु भाष्यं समर्थयमाना इत्थमाहुः। ब्राह्मणादेराकृतिगणत्वादेव तदन्तात् ष्यञि सिद्धे राजन्शब्दस्य तत्र पाठो यकासह समावेशार्थ इति। एतच्च हरदत्तमाधवाभ्यामेकीयमतत्वेनोपनिबद्धम्। प्राणभृज्जातीति। प्राणिजातीयस्यैव सुवचम्। प्राणभृदिति किम्। तृणत्वम्। जातीति किम्। देवदत्तत्वम्। औद्गात्रमिति उद्गात्रादिषु ये ऋत्विग्वचनास्तेभ्यो होत्राभ्यश्छ इति छे प्राप्तेऽनेन विधीयते सुष्ठुदुष्ठुशब्दाभ्यां गुणवचनेष्यञि वधूशब्दाद्दिगन्तलक्षणेणि। शेषेभ्यस्त्वतलौ प्राप्तयोः। श्रोत्रियस्येति। श्रोत्रियं छन्दोऽधीते इति छन्दसः श्रोत्रभावः। ष्यञ्प्रत्यय इति यदा व्याख्यानं तदेह यलोप इति यथाश्रुतम्। यदा तु वाक्यार्थे पदवचनमिति पक्षः। तदा यशब्देनेय इति रूपं लभ्यते। क्वचित्तु यलोपश्चेति पाठः तत्र येति सङ्घातग्रहणं द्रष्टव्यम्। इगन्ताच्च। लघुः पूर्वो वयवो यस्येति प्रातिपदिकविशेषणम्। पूर्वत्वं च संनिधानाद्दिगवधिकमेव। इगन्तात्किम्। घटत्वम्। लघुपूर्वात्किम्। पाण्डुत्वम्। कथं काव्यमिति। यद्यपि कुधातोरोरावश्यके इति ण्यति काव्यमिति सुसाधम्। तथापि कवेः कर्मेत्यर्थे कावमिति स्यादिति प्रश्नः। आभिधानीयकमिति। अभिधेयस्य भावः कर्म वेत्यर्थः। सहायाद्वेति। सूत्रेण नित्ये प्राप्ते विकल्पार्थं वचनम्। गोत्रचरणात्। अपत्याधिकारादन्यत्र लौकिकं गोत्रम्। तेनापत्यप्रत्ययान्तेभ्य इत्यर्थः। प्रवराध्याये पठितेभ्य इत्यपरे। गोत्रं च चरणैः सहेति जातित्वात् प्राणभृज्जातीत्यञि प्राप्ते वचनम्। श्लाघेत्यादि। श्लाघादिषु विषयभूतेष्वित्यर्थः। प्राप्त इति। इणः प्राप्त्यर्थत्वात्। अवगतवान्वेति। अपूर्वस्येणो ज्ञाने प्रसिद्धत्वात्। गार्गिकयेति। आपत्यस्येति यलोपः। होत्राभ्यश्छः। होत्राशब्द इति। जुहोतेस्त्रन्। ब्रह्मणस्त्वः। नेति वाच्य इति। कृत्प्रत्यये प्रतिषिद्धे तस्य भावः त्वतलावित्येव त्वः सिद्धः। विभक्तेरनुच्चारणाल्लाघवं चेति भावः। ब्राह्मणेति। अनेन होत्राभ्य इत्यनुवृत्तेः फलं दर्शितम्। नञ्स्नञोरधिकारः समाप्तः ॥

गोवस्यादिति भावः। इगवधिकमेवेति। तेन कृशानुत्वमित्यत्र न। इत्यपरे इति। इदमेव युक्तम्। विषयभूतेष्विति। श्लाघनं इत्यादिपदान्तरोपादानेन तद्विषयोऽस्त्येवेति भावः। विभक्तेरिति। त्वशब्दोत्तराया इत्यर्थः। नञ्स्नञोरधिकारसमाप्तः ॥

धान्यानाम्। इयम्। धान्यानामित्येषा। निर्द्देशादेवेति। व्रीहिशाल्योरिति धान्यानामिति च षष्ठीनिर्द्देशादेवेत्यर्थः। नन्वलौकिके भवनशब्दयोगाभावेन रूढ्योगलक्षणषष्ठ्या दुर्लभत्वेन क
थं सासमर्थविभक्तिरत आह। अलौकिक इति। न चालौकिके तृतीयेति युक्तम्। प्रत्ययवाच्यभवनस्य क्रियात्वेन तस्या अप्यप्रवृत्तेः। कर्तुरेव शेषत्वविवक्षया षष्ठ्या नु न कापि शङ्का। ननु यव

धान्यानां भवने। भवनापेक्षया कर्त्तरि षष्ठी य[illegible]। भवतिरिहोत्पत्तिवचनः। व्रीहिशाल्योः। निर्द्देशादेव षष्ठी समर्थविभक्तिः। सा च भवनापेक्षया कर्त्तरीत्युक्तमेव॥ अ
लौकिके प्रक्रियावाक्ये तु तद्धितविधावनुवादसामर्थ्यादेवेति बोध्यम्। यवयवक। अत्र प्रत्ययार्थसामर्थ्याल्लभ्या षष्ठी समर्थविभक्तिः। विभाषा। खञि प्राप्ते वचनम्। न
चोमाभङ्गयोर्धान्यत्वे विप्रतिपन्नम्। श णसप्तदशानि धान्यानीति स्मरणात्। तत्र चोमाभङ्गयोरपि पाठादिति भाष्ये स्थितम्। सर्वचर्मणः। अत्र तृतीया समर्थविभक्तिः
सामर्थ्यात्। कृत इति हि प्रत्ययार्थः। तत्र चर्मणः करणत्वमेवोचितम्। यथामुख। दृश्यतेस्मिन्निति दर्शन आदर्शादिः अधिकरणे ल्युट्। ननु असादृश्य इति प्रतिषेधा
त्कथं समासस्तत्राह। निपातनादिति। एतच्च वृत्तिग्रन्थमनुसृत्योक्तम्। भट्टिकाव्ये तु पदार्थानतिवृत्तौ यथाशब्द आश्रितः। तथा च मायामृगं प्रक्रम्योक्तम्। यथामु
खीनः सीतायाः पुप्लुवे बहुलोभयन्निति। यथामुखदर्शन इति। अव्ययीभावस्यापि यथामुखशब्दस्योन्मत्तगङ्गादिवत्सत्त्ववचनत्वात्। कर्मशक्तियोगे सति रू
ढ्योगलक्षणा षष्ठी नाव्ययीभावादित्यम्। सर्वस्येति। संमुखस्येति तु नोक्तम्। प्रत्ययसंनियोगेनान्त्यलोपनिपातनात्। संशब्दस्तु समशब्दस्यार्थे प्रायेण न दृ
श्यते। संमुखो भवेत्यत्राभिमुखो भवेत्यर्थप्रतीतेः। तत्र च खप्रत्ययस्यानिष्टत्वात्। कथं तर्हि संयुगे संमुखीनं तमुद्यन्तं प्रसहेत कः इति भट्टिः ॥

यवकेत्यादौ भिन्नविभक्तित्वाद्धान्यानामित्यस्यासंबन्धेन कासमर्थविभक्तिरत आह। अत्रेति। अलौकिके तु प्राग्वदेव तत्प्रवेशः। नचेति। एवं च खञि प्राप्त इत्यसङ्गतमिति भावः।
पाठादिति। शणपाठेन तयोरपि शणत्वेन तत्र पाठादित्यर्थः। भट्टिकाव्ये त्विति। एवं चोभयप्रामाण्यादुभयोरप्यत्र ग्रहणम्। दर्शनशब्दः कर्मव्युत्पन्नोऽपीति भावः। कर्मशक्तियो
गे सतीति। इदं वृत्त्यभिमतार्थकं। प्रत्ययसन्नियोगेनेति। अत एव भाष्ये सममुखस्य दर्शन इति विग्रहो दर्शितः ॥

साधर्म्यादिति। संमुखीनादर्शादिनेति शेषः। हरदत्त इति। कैयटोप्येवम्। ग्रहणेन ग्रहणादिति। समासान्तानां समासावयवत्वादिति भावः। यस्य चेति। पादसंबन्धिदैर्घ्यसदृशदैर्घ्य-
वतीत्यर्थः। यथार्थ इति। पदेन सदृशीत्यर्थोत्र। स्थलविशेष इति। अयानयपदस्य गतिविशेषे रूढस्य स्थलविशेषे लक्षणेति एतद्भावः। युक्तं चैतदेव। अयः प्रदक्षिणगा-
मनमनयः प्रसव्यम्। प्रदक्षिणं प्रसव्यगामिनां शाराणां यस्मिन् परैः पदानामसमावेशः सोयानय इति भाष्यात्। एकद्यूतकारापेक्षया शारस्य प्रदक्षिणं गमनमयः। द्वितीया-

अभिमुखावस्थानात् साधर्म्यादिति हरदत्तः। सर्वपथीन इति। पूर्वकालैकेति समासः। ऋक्पूरिति समासान्तः। तस्य षष्ठ्यन्त ग्रहणेन ग्रहणात् खः। अनुपदस-
वी। बद्धाभक्ष्यतिनेयेष्विति निपातनात् तिङन्तस्य द्वन्द्वः। अनुशयाम इति। यस्य चायाम इति यथार्थे यदव्ययमिति वाव्ययीभाव इत्यर्थः। स्थलविशेष इति। गतिविशेष
इति व्याख्यान्तरम्। नयतेः प्रधाने कर्मणि यत्। अप्रधाने द्वितीया। अत्रेयं द्यूतशास्त्रमर्यादा। चतस्रो वीथयः। प्रत्येकं द्वादशकोष्ठोपेताः। शारास्तु त्रिंशत् ते च एकैकेन
कितवेन पंचदश स्ववामपार्श्वस्थप्रथमकोष्ठपर्यन्तं प्रदक्षिणप्रसव्यगतिभ्यां नेयाः सर्वेप्ययानयीनाः। ससहायस्य शारस्य परैर्नाक्रम्यते पदम्। असहायस्तु शारेण परकीयेण बा-
ध्यते। एष बहुसंमतोर्थः। यत्तु कैयटेन द्वयोः पर्युदासेन त्रयोदशानामेवायानयीनतेत्याशयेन मतान्तरं केचित्त्वित्यादिनोक्तम् ॥

वेक्षया प्रसव्यं वामापरपर्यायं गमनमनयोरूढ्योच्यते इत्यर्थकेन प्रसव्यमित्यन्तेन शक्यार्थ उक्तः। ततस्तादृशगतिशालिनां शाराणां यस्मिन् पदे युग्मादिपदे स्थितानां परैः परकीयैः शा-
रैस्तत्क्याभूतानां पदानामसमावेशः संबन्धः तद्बाधाभावरूपस्तस्य समयानय इति लक्ष्यार्थो दर्शितः। स इति पुंस्त्वं त्वयानयस्य पुंस्त्वात्। गतिभ्यां नेया इति। सर्वत्र ससहायपदे स्थाप-
नपूर्वकमिति शेषः। ते हि ससहायपदरूपमयानयंस्थानविशेषं प्राप्यैव फलकशिरः प्राप्यन्त इत्ययानयीना इत्युच्यन्त इत्यर्थः तदाह। ससहायस्येति। शेषं द्वादशकोष्ठोपेतत्वम् ॥

केचिन्मते द्वयोः पर्युदासे बीजमाह। प्रदक्षिणप्रसव्यते चेत्यादि। तेच। एकैकं कितवंप्रति दक्षिणप्रसव्यतेच। अत्र मते गतिविशेष एवायानयः। तदुक्तं गतिविशेष इति मतान्तरे
म्। तथाच कैयटः तत्र केचित्स्फूलकशिरस्थस्यैव स्वशारवर्गमाने यस्यायानयीनमित्यभिधानमिच्छन्ति। यस्तु शार एकपार्श्वे एव संचरति तत्र न भवति प्रत्ययः। योहि शारः पार्श्वात्
तन्मते द्वे एव वीथी शेषं प्राग्वत्। प्रदक्षिणप्रसव्यते च एकैकं कितवं प्रति विवक्षिते न तु कंचित्प्रति किंचित्। ते च पङ्क्तिचरमकोष्ठस्थाभ्यां द्वाभ्यामितरेषामेवेति
बोध्यम्। शार इति। शृणंत्यनेन द्यूतकाराः परस्परमिति शारः। द्यूतसाधनविशेषः। बाहुलकाद्घञ्। परोवर। अवरस्येति। आदेरिति शेषः। उत्वे कृते आद्गुणः। अवार
पारङ्गामीति। गमेरिनिः। आङि णिच्चेति बहुलवचनात्केवलादपि णिनिः। भविष्यति गम्यादय इति भविष्यत्कालता। न्यासकारस्तु आवश्यके णिनिः। सोपि भविष्यत्ये
वेत्याह। अद्यश्वीन। अविभक्तिको निर्देशो न तु स्त्रीलिङ्गनिर्देशोयम्। अद्यश्विनो गोसमूहः अद्यश्वीनं गोमण्डलमित्यादावपीष्टत्वात्। आसन्नमित्यर्थ इति। अवा
च्चालंबनेति सूत्रेण आविदूर्ये स्तंभेः षत्वविधानादवष्टब्धशब्दः आसन्नपर इत्यर्थः। अद्यवाश्वो वेति वार्थे समासोऽपि निपातनादेव। गोशब्दो गोः प्रवि[illegible]लक्ष
णया वर्त्तते इति दर्शयति। प्रत्यर्पणपर्यन्तमिति। आगवीन इति। आङ् मर्यादाभिविध्योरित्यव्ययीभावे उपसर्जनह्रस्वत्वे च कृते खप्रत्ययः। ओर्गुणः। गोः पश्चादि
ति। पश्चादर्थेऽव्ययीभावः। पर्याप्तमिति क्रियाविशेषणम्। अत्र हरदत्तः। द्वितीयान्तादिह प्रत्ययः। अनुग्वित्यस्य क्रियाविशेषणत्वात्। न चालङ्गामीत्यस्य सुप्यजा
ताविति णिनिप्रत्ययान्ततया कृद्योगलक्षणा षष्ठी स्यादिति वाच्यम्। क्रियाविशेषणात्तदप्रवृत्तेः। शोभनं पाचक इत्यादौ तथा दर्शनादित्याह। कृत्प्रकृत्यर्थं प्रति हि क
र्मत्वम्। तच्च न भावनामात्रं प्रति। तत्कर्मणो विक्लित्यादेः प्रातिपदिकार्थत्वाभावात्। संकोचे मानाभावाच्च॥ ७ पार्श्वान्तरं नीयते स एवायानयं नीयते अन्यस्त्वयमेव नीयतेऽन
यमेवेति। एतद्ग्रन्थेन द्वे एव वीथीत्यादिलाभः कथमिति द्यूतशास्त्रज्ञैर्बहुश्रुतैर्निर्णेयम्। सोपि भविष्यत्येवेति। भूतवर्त्तमानयोः आवश्यकत्वबोधनस्य व्यर्थत्वात्। एवं चाकेनोरिति षष्ठीनि
षेधाद्द्वितीया। तत्र भविष्यदधिकारविहितणिनेर्ग्रहणे तु न मानम्। अतएवांशंहारीति निर्देशः संगच्छत इति तद्भावः। तत्कर्मण इति। भावनामात्रकर्मण इत्यर्थः। संकोचो प्रकृत्यर्थैकदेशकर्मणो ग्रहणे।

तस्याशयइति।यदितुएवंद्वितीयापिनस्यात्तद्विधावपिसंपूर्णप्रकृत्यर्थकर्मणोग्रहणापत्तेरित्युच्यतेतदाषष्ठीविधौकृत्साहचर्येणधात्वर्थप्रतिभेदेनान्वयियत्कर्मतद्गृह्यते क्रियाविशेषणस्तोकादीनांतुनैवंविधत्वमितिनतत षष्ठी।द्वितीयातुभवत्येवाऽत्रैवतद्विधायकेसाहचर्याभावात्इतितदाशयोबोध्यः।विभक्तित्रयेति।सप्तमीपञ्चमीप्रथमेत्यर्थः।अतएव।कर्मत्वायोगादेव।अस्वपदविग्रहत्वात्।गच्छतीत्यनेनैवविग्रहइतिषष्ठ्यादिशङ्कैवासंगतेतिकेचित्।तन्न।सूत्रेषष्ठीशङ्कासत्त्वात्।अनुगुअलङ्गामीत्यर्थेप्रथमोच्चारितःऽनुगु किंतुविक्लित्त्यनुकूलव्यापाररूपंपूर्णप्रकृत्यर्थप्रतिकर्मणस्तण्डुलादेरेवषष्ठीतितस्याशयः।अत्रेदंवक्तव्यम्।पश्चादर्थेव्ययीभावोयमितिनिर्विवादम्।पश्चादितिचास्तात्यर्थेनिपातितम्।तच्चयद्यपिविभक्तित्रयसाधारणंतथापीहयोग्यताबलात्सप्तम्यर्थवृत्ति ।अतस्तस्यकर्मत्वायोगात्प्रथमान्तादेवेह प्रत्ययउचितः।रूढ्योगलक्षणषष्ठीशङ्काप्यतएवनेति।अभ्यमित्रात्।लक्षणेनाभिप्रतीइतिसमासः।क्रियाविशेषणत्वात्द्वितीयासमर्थविभक्तिः।गोष्ठात्खञ्।गावस्तिष्ठन्त्यस्मिन्नितिगोष्ठः।घञर्थेकविधानमित्यधिकरणेकः।अम्बांबगोभूमीतिषत्वम्।एकाहेनेति।नन्विहग्रहवृदनिश्चिगमश्चेत्यपंबाधित्वापरिमाणाख्यायांसर्वेभ्यइति —— प्राप्नोति।अस्तिचात्रपरिमाणाख्या।एकाहेनेतिपरिच्छेदावगमात्।सत्यम्।अस्मादेवनिपातनादप्।अभ्यस्येति कर्त्तरिषष्ठी।शालीनकौपीने।रूढिशब्दावेतौ।अवयवार्थेतुनातीवाभिनिवेष्टव्यम्।शालाप्रवेशमिति।अप्रागल्भ्यादन्यत्रगन्तुमशक्तः।शालामेवप्रवेष्टुमर्हतीत्यर्थः।कूपपतनमिति।यदकार्यंतस्याच्छादनीयत्वात्कूपावतरणमर्हतीत्यर्थः।तदाच्छादनमिति।वासःखण्डइत्यर्थः।अपरआह।अकार्यशब्देकरोतिःक्रियासामान्यवचनस्तेनलज्जाहेतुत्वेनादृश्यत्वात् पुरुषलिंगंकौपीनम्।अदृश्यत्वात्तदाच्छादनमिति।व्रातेनजीवति ॥५७ शब्दात्प्रत्ययइत्यर्थात्।यदित्वनुगुइतिसूत्रेलुप्तपञ्चम्यन्तंअस्मात्प्रत्ययइत्यर्थस्तदातत्रापिनशङ्केत्यन्ये।अव्ययत्वेनविभक्तिलुकःसत्वेनन कोप्यत्रविचारइत्यन्ये।क्रियाविशेषणत्वादिति।फलद्वाराक्रियान्वयित्वादितिभावः।गामीत्यनेनगच्छतीत्यर्थकेनविग्रहेतुषष्ठ्येवसमर्थविभक्तिरुचितेतिकेचित्।अलंगामिपदेनैषांवाक्यंनेष्यतइतिमतेनंएषुगच्छतीत्यस्वपदविग्रहएवेत्याशयेनमूलेसर्वत्रगच्छतीत्युक्तिः।क्रियाविशेषणत्वादद्वितीयेत्युक्तिश्चेतिबोध्यम् ॥

सङ्घातवाचीति। नानाजातीयानामनियतवृत्तीनां शरीरायासजीविनां सङ्घात इत्यर्थः। भारेति। व्रातपदं तत्कर्मणि लाक्षणिकमित्यर्थः। रत्नौविति। भाष्येप्येवमेव प्रतीयत इति। प्रसिद्ध इत्यर्थः। क्रिया
व्रातशब्दो यद्यपि सङ्घातवाची तथापि अत्रत्यभाष्यादिपर्यालोचनया विवक्षितमर्थमाह। शरीरायासेनेति। भारवहनादिनेत्यर्थः। सप्तभिः पदैरिति। तद्धितार्थे द्विगुः। अथ यत
इत्यर्थे खञ्। हैयंगवीनम्। दोहः क्षीरमिति। गोर्दोह इति षष्ठीसमासः। ह्यस्शब्दस्य तेन सह सुप्सुपेति समासः। ततो विकारे ऽनुदात्तलक्षणस्याञोऽपवादः खञ्। अत्र ह्यस्श
ब्देन कालप्रत्यासत्तिर्विवक्षिता। नवनीतमिति। यद्यपि रत्नौ भाष्यादौ च घृतमित्युक्तं। अमरेणापि। तत्तु हैयंगवीनं यत् ह्योगोदोहोद्भवं घृतमित्युक्तं। तथापि नवनीतमेनत्र
विवक्षितमिति हरदत्तादयः। तस्य पाकः। पाकः परिणामः मूलमुपक्रमः। जाहचो जकारस्य नेत्त्वं प्रयोजनाभावात्। पक्षतिरिति। प्रतिपत्। पक्षिणां पक्षमूलं च। तेन वित्तः। वि
त्तः प्रतीतः। वित्तो भोगप्रत्यययोरिति निपातनात्साधुत्वम्। विद्याचुञ्चुरिति। उकारद्वयगर्भोऽयं प्रत्ययः। विनञ्भ्याम्। नाञोञकारो वृद्ध्यर्थः। स्वरार्थश्च। संप्रोदश्च। चादेः क्रि
याविशिष्टसाधनवाचकात्स्वार्थे प्रत्ययः। रूढिशब्दाश्चैते। अलाबूतिलेत्यादि। भङ्गाभ्य इति पाठः भङ्गाशब्दष्टाबन्तः विकारप्रत्ययापवादोऽयम्। रजसो विकारत्वात्। अला
बूकटमिति। ओरञ्। मयड्वैतयोरिति मयडिह प्राप्तः। तिलोमाशब्दाभ्यां घृतादित्वादन्तोदात्ताभ्यामनुदात्तादेश्चेत्यञ् मयट् च प्राप्तः। उमोर्णयोर्वेति वुञ्। असंज्ञायां तिलयवा
भ्यामिति मयट् चेति हरदत्तः। तत्र तिलशब्दस्य घृतादित्वकल्पने बीजं चिन्त्यम्। तृणधान्यानां च द्व्यषामिति फिट्सूत्रेणाद्युदात्तस्यैव न्याय्यत्वात्। तथैव तद्धितावुदाहृतत्वात्।
तिलाश्च इमे इत्यत्र तथैव वेदे पाठाच्चेति दिक्। भङ्गायास्तृणधान्यानां च द्व्यषामित्याद्युदात्तत्वादण्मयड्वा प्राप्तः। गवां स्थानमिति। तस्येदमित्यर्थे सर्वत्र गोरजादिप्रसङ्गे इति यत् प्राप्तः। सं
घात इति। अप्रस्तुतावयवः समूहः संघातः प्रस्तुतावयवस्तु विस्तारः। कटच्यटचौ द्वावपि सामूहिकानामपवादौ। द्वित्वे इति। प्रकृत्यर्थस्य द्वित्वे द्योत्ये इत्यर्थः। उष्ट्रगोयुगमिति। द्व्यवयव
संघातप्राधान्यादेकवचनं। द्वयंयुगमितिवत्। एवमग्रेऽपि। अवटीटमिति। नासिकासाधने नमने वर्त्तमानात्स्वार्थे प्रत्ययः। क्लिन्नस्य। अत्र वदन्ति। अस्येति न वक्तव्यं क्लिन्ने च सुषी चि
ल्लेपिल्लेपुरुषे तु मत्वर्थे च ॥ ॥ विशिष्टेति। साधनक्रियावाचकादिति भाष्ये साहित्यमात्रं विवक्षितमिति भावः। लोके विपरीतार्थप्रतीतेः। वर्त्तमानादिति। अवशब्दादिति शेषः ॥
नि

अर्द्धआदिष्विति। समुच्चयार्थकान्यतरस्यांग्रहणेन प्राप्तोऽपि मतुप् अनभिधानान्नेति सर्वं भाष्यकैयटयोः स्पष्टम्। प्रमाणे इति। तच्च प्रकृतिविशेषणमर्थद्वारेति भावः। परिच्छेदकमात्रमिति। न त्वायामपरिच्छेदकमेव व्याख्यानादिति भावः। कैयटोऽपि मात्रार्थस्य विशेषणपरिच्छेदकमात्रे स्मरणादिति प्राह। तेन प्रस्थमात्रमित्यादिसिद्धिः। प्रमाणशब्दस्तै

अर्द्धआदिषु सङ्ख्याग्रहणात् इति सूचितत्वात्। अमरोऽप्याह। स्युः क्लिन्नाक्षे चिल्लचुल्लपिल्लाः क्लिन्नेऽक्ष्णि चाप्यमी इति। वार्त्तिकमते तु पुरुषे क्लिन्नत्वादितानां तदवयवे लक्षणा बोध्या। प्रमाणे द्वयसच्। प्रमाणे विद्यमानात् प्रथमान्तात् अस्येति निर्दिश्ये प्रमेयेऽर्थे त्रयः प्रत्ययाः स्युः। प्रमाणमिह परिच्छेदकमात्रं तत्र मात्रच्। द्वयसज्दघ्नचौ तु विशेषे स्मर्येते। तथा च भाष्यम्। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ ममेति। ऊर्ध्वावस्थितेन येन मीयते तदूर्ध्वमानं ऊर्ध्वादि तेन तिर्यङ्मानादौ न भवति। अत एव द्विकाण्डा क्षेत्रभक्तिरिति। अत्र द्वयसचो लुगिति प्राचां ग्रन्थः प्रामादिक इत्यवोचाम। प्रमाणे लः इति। लुक्। एषा पूर्वाचार्यसंज्ञा। प्रमाणत्वेन ये प्रसिद्धा दिष्टिहस्तादयः ततः परस्यैवायं लुक्। शमो दिष्टिर्वितस्तिरिति। एषु मात्रचो लुक् द्वयसज्दघ्नचोरसंभवात्। शमादीनामनूर्ध्वमानत्वात्। द्विगोर्नित्यमिति। द्विगोरप्रमाणत्वात्तदन्तविध्यभावाच्च पूर्वेणाप्राप्तौ लुग्विधीयते

नेति। तत्रैव न प्रसिद्धा आयामपरिच्छेदकादित्यर्थः। अनूर्ध्वमानत्वादिति। शमो दिष्टिरित्यादावनूर्ध्वमानत्वेन वितस्तित्वादित्यर्थः। यदा तूर्ध्वाधरदिगवस्थितवस्तुपरिच्छेदकत्वविवक्षा तदा द्वयसजादि अप्रमाणत्वात्तु तस्य न लुक्। अत एवार्हादिति सूत्रे आयामनिरपेक्षाया प्रमाणमित्येतद्भवतीति भाष्ये उक्तम्। अप्राप्तौ लुगिति। एतत्सामर्थ्यादेव प्रमाणान्तद्विगोर्मात्रच् ॥

म·ई· न हेति। समर्थानामित्यादेरनन्वयेन तत्त्वंबहुमाहाविभाष्यया अप्यसंबन्ध इति भावः। तयावाधिकेति। एतत्सामर्थ्यादेव प्रमाणान्तद्विगोः संशये मात्रच्। न तु परिमाणाद्यन्तात्। अप्राप्तेः। ते
२२५ तथज्ञकुंडवाः स्युर्नवेति संशयेनाक्यमेवेतिदिक्। प्रमाणत्वेनाप्रसिद्धत्वादिति। कदाप्यायामापरिच्छेदकत्वादित्यर्थः। पुरुषात्प्रमाण इतिसूत्रे प्रमाणशब्दस्तु परिच्छेदकमात्रपर इ
तिभावः। अनुमापयतीति। द्विहस्तीति तु चिन्त्यमेवेति भावः। नच द्वौ पुरुषौ प्रमाणमस्याः इत्यर्थे तदस्य परिमाणमिति ठक्ष्ठञोवाद्यर्धपूर्वेति लुकि शास्त्रस्य चारितार्थ्येन कथं तत्सामर्थ्याल्लु
ननु नेह विकल्पः प्रकृतः। तत्किं नित्यग्रहणेनेत्याहुः। अनुपदं वक्ष्यमाणः संशये मात्रच्। शममात्रमित्यादौ यथा न लुप्यते प्रमाणे लद्वयसस्य पूर्वविधिविषयत्वात्। एवं द्विगोर
पि न लुप्येत। इष्यते तु लुक्। द्वौ शमौ स्यातां न वा द्विशम इति। तथा चाधिकसंग्रहार्थं नित्यग्रहणमिति। पुरुषहस्तिभ्यामण्च। इनन्यणपत्य इति प्रकृतिभावः। हास्तिनम्।
अत्र कारिका। द्विगोर्नित्यं लुक्। द्विपुरुषमुदकमित्यादि। यद्यपि प्रमाणे लो द्विगोर्नित्यमित्यस्य नायमनुवादः पुरुषहस्तिनोः शमादिवत्प्रमाणशब्दत्वेनाप्रसिद्धत्वात्। अ
तएव हि पुरुषद्वयसमित्यादौ प्रमाणे लद्वितिलुङ् भवति तथाप्यपूर्वोऽत्र लुग्विधीयते इति हरदत्तः। एतच्चासंगतं मणीवादीनां प्रतिषेध इत्यत्र मुनित्रयानुक्तत्वाद्ग्रामा
ण्यमुक्तवद्भिः न्यायसाम्यादिहापि तथैव वक्तुमुचितत्वात् ! विधीयत इत्यस्यानुमीयत इत्यर्थः। अयं भावः। द्विगोस्तद्धितलुकीत्यनुवर्तमाने पुरुषात्प्रमाणेऽन्यतर
स्यामिति ङीब्विकल्प्यते। तदेव लुकमनुमापयतीति अनुमीयमानश्च लुक् द्वयसजादीनां न त्वणः। ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् द्विगोरणः प्राप्त्यभा
वात्। यत्तदेतेभ्यः। यावानिति। आसर्वनाम्नः इत्यात्वम्। ननु प्रमाण इत्येवानुवर्त्यतां किं परिमाणग्रहणेनेति चेन्न ॥ ७ कृकल्स्यं तत्र हि परिमाणशब्देन परिच्छेदकमात्रमिति
सिद्धान्त इति वाच्यम्। अत एव तद्धितलुकीत्यत्र तद्धितस्य प्रमाणपदमुच्चार्य विहितस्यैव ग्रहणं प्रसज्येतेति वृत्त्यनुसारेणानुमानमित्याशयाद् इति दिक्। ननु प्रमाण इत्येवेति। पूर्वसूत्रे प्र
माणग्रहणं परिच्छेदकमात्रपरं प्रस्थमात्रादिसिद्ध्यर्थम्। इदमपि यावानध्याया वती रज्जुर्यावज्जुलमधिकरणे तावत्त्वे चेति प्रयोगात् परिच्छेदकमात्रं इष्यत इति भावः। आद्येपि किमर्थं राम
परिमाण इत्युच्यते न प्रमाणमित्येव सिद्धमित्युक्तम्। प्रमाणपरिमाणयोरेकार्थत्वमङ्गाप्रश्न इति कैयटः ॥ २९

प्रागेवोक्तत्वादिति। एवं चेद्ध परिमाणग्रहणं सर्वतोमानमात्रार्थकमिति भावः। स्यादेतदिति। अन्यत् प्रमाणमन्यत् परिमाणमित्यत्रत्यभाष्यात् पूर्वसूत्रे प्रमाणशब्देनायामपरिच्छेदकमेव। प्रस्थमात्रमित्याद्यप्यसाधव एवा न प्रमाण इवेव सिद्धमिति भाष्यस्यायमर्थः। तदनुवर्त्य यावानध्वेत्यादिकमेव मुख्यमस्तु परिमाणप्रयोगाः एवोपमानाद्भवन्त्विती तिभावः। विशेषविहित इति। पदादिपुरस्कारेणविहितत्वादिति भावः। भिन्नोपाधिकत्वादिति। परिमाणग्रहणस्य सर्वतोमानपरत्वादिति भावः। नन्वत्र पक्षे मात्रादीति आदिग्र

अत्र वार्त्तिकम्। डावतावर्थवैशेष्यान्निर्देशः पृथगुच्यते। मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोरिति। अस्यार्थः। इह शास्त्रे वतुपं विधाय तस्मिन्परे आत्वं विहितम्। पूर्वाचार्यास्तु डावतुं विदधिरे तद्वैलक्ष्यान्निर्देशोयम्। डावताविति। विशिष्यते इति विशेषस्तस्य भावो वैशेष्यं तस्मादर्थभेदादित्यर्थः। प्रमाणपरिमाणयोर्भेदस्य प्रागेवोक्तत्वादिति भावः। स्यादेतत्। एवं सति यावानध्वा यावती रज्जुरित्यादि न स्यात्। आयामस्तु प्रमाणं स्यादित्युक्तेः। उपमानाद्भविष्यतीति चेत्। तर्हि प्रमाणग्रहणमेवानुवर्त्यताम्। उक्तप्रयोगाश्च मुख्याः सन्तु ये तु परिमाणे प्रयोगाः यावान्धान्यराशिरित्यादयः ते एवोपमानाद्भवन्तु तत्राह। मात्रादीति। विशेषविहितो हि वतुप् मात्रजादीन्बाधेत तेन तन्मात्रमित्यादि न स्यात्। परिमाणग्रहणे सति तु भिन्नोपाधिकत्वाद्बाध्यबाधकभावो नेति भावः। नन्वेवमपि बाधः स्यादेव पूर्वसूत्रे प्रस्थमात्रमित्यादिसिद्धये प्रमाणग्रहस्य परिच्छेदकमात्रपरतया व्याख्यातत्वेन वतुपो विशेषविहितत्वानपायात् ॥

ग्रहणं व्यर्थम्। पूर्वसूत्रे प्रमाणग्रहणेनायामग्रहणे प्रथमश्चेत्यादिना द्वयसज्दघ्नौ प्रमाणादपकृष्योर्ध्वमाने विधीयेते। एवं चायामार्थकप्रमाणग्रहणानुवृत्तावप्युपाधिभेदात् तद्बाधाप्रसक्तेः। न च प्रमाणशब्देनोन्मानस्यापि ग्रहणम्। रूढित्यागे सर्वग्रहणापत्तेः। तदङ्गीकारे उन्मानस्य कथं ग्रहणमतो वार्त्तिकस्याद्यामवतारणिकां सोपस्कारामाह। नन्वेवमपीति ॥

२
म.ए.
२२६

वतुपूर्वेति। येनमात्राद्यनुकर्षः। प्रथमश्लोकस्यादेर्व्यवस्थापकस्यान्तापि प्रवृत्त्यानाः व्यवस्थेति भावः। यावती वृद्धिरिति पाठः। इदं चोन्मानम्। इद्धं ऊर्ध्वदेशाया अपि सत्वेनोन्मानत्वात्। त्रिविधेति। प्रमाणपरिमाणोन्मानेत्यर्थः। भावः सिद्धयेति येनार्थविशेष्यमात्राद्यप्रतिघातयोः संग्रहः। न च वेतनमात्राद्यप्रतिघातः सिद्ध इति वाच्यम्। सर्वतो मानोपाधावनिष्टस्य मानस्य आपन्नस्यात यान्यासस्य कर्तुमशक्यत्वादिति भावः। तदपीति। तावच्छब्दप्रकृतिभूततच्छब्दार्थरूपमपीत्यर्थः। अन्यथा। एकविषयत्वेपि प्रत्ययपरंपरायाम् परिमाणग्रहणे

तस्मादत्र प्रेत्यैव सत्त्वताम्। मास्तु परिमाणग्रहः। अस्तु च प्रमाणे द्वयसज्याधिकारः। एवं च यावती रज्जुः यावान् धान्यराशिः यावती बुद्धिरित्यादि त्रिविधप्रयोगा अपि उपचारं विनैव निर्वहन्तीत्यपरमनुकूलमत आह। भावः सिद्धयेति। डावतोरिति। यच्छब्दान्तं। अर्थभेदेपि तिवत्वन्तान्मात्रजादीनामुत्पत्तिः सिद्ध्यति तत्परिमाणमस्य ताव द्वाभ्यां एवं शान्तेतो। तावत्प्रमाणमस्य कुड्यादेः तावन्मात्रम्। यावद्ग्राहीकृतस्य धान्यादेर्दैर्घ्यं तावदकुड्यादेरपीत्यर्थः। एकविषयत्वे तु वतुपैव विशिष्टस्य प्रमेयस्योक्तत्वात्तदन्तान्मात्रजादयो न स्युः। यस्य हि तावत्प्रमाणं तस्य तदपि। एवं च तावच्छब्द एव प्रयुज्येत। अन्यथा मात्रजादिप्रत्ययमाला प्रसज्येत। किमिदंभ्याम्। कियानिति। इदं किमोरीश्की। यस्येति लोपः। इयानिति। प्रत्ययमात्रमिहाविधीयते। पठन्ति च। उदित्व। उदित्वति परस्मिन् प्रत्यये शास्त्रयोर्नागनवतिविलयंच प्राकृतेपि प्रपञ्चे सपदि पदमुदीतं केवलः प्रत्ययो यत्तदिपदि तिमिमीते कोहदापण्डितोपि। वैयाकरणानामौपनिषदानां च प्रक्रियामाश्रित्य प्रवृत्तो व्याख्येयं श्लोकः। किमः संख्या ॥

वतुतस्य सर्वतोमानपरत्वात्प्रमाणग्रहणाकुरत्वान्न तदर्थसिद्धिः। विषयभेदात्तु तन्मात्रमित्यादौ मात्राद्युत्पत्तिरपि सिद्धा। अर्थभेदेन डावत्वन्तान्मात्राद्युत्पत्तिरपि सिद्धा। यावद्विषयभेदं च प्रत्ययोत्पत्तिः विषयैक्ये तु न। लघुत्वासिद्धेरनकर्मधारयान्मत्वर्थीयइत्येतन्मूलभूतगौरवेणानुत्पत्तेरित्यलम्। परस्मिन् प्रत्यये। प्रत्ययसंज्ञके। परस्मिन् ब्रह्मणि तद्विषयेज्ञाने च। प्रकृतिः प्रत्ययस्य प्रकृतिर्मीयाच। तत्तेवञ्चि निपातने यत्केवलं पदम्। ब्रह्मरूपम्। पदं स्थानं वा इयत्। परिच्छेद्यम् इदम् इत्येतत्। मिमीते। जानाति। औपनिषदाः वेदान्तिनः ॥

रा.म.
२२६

संख्यायाः परिमाणमिति। करणस्य कर्त्तृत्वविवक्षायां षष्ठी। परिच्छेद इति। भावसाधनः परिमाणशब्द इति भावः। तस्मिन्कर्त्तव्ये यः प्रश्न इति। तद्विषयः प्रश्न इति यावत्। परिच्छेदकसंख्याप्रश्नेपि परिच्छेदस्य विषयत्वात्संख्यापरिच्छेदविषये प्रश्ने किमो वर्त्तमानत्वं बोध्यम्। करणतृतीयान्तेन साधनं कृतेति समास इत्यपि वक्तुं शक्यम्। के यमेषामिति। नात्र परिच्छेदकत्वेन संख्या विवक्षिता। एतेन संख्यायाः परिच्छेदकत्वाव्यभिचारात् परिमाणग्रहणं व्यर्थमित्यपास्तम्। कुत्सामात्रं किमर्थस्तदाह। अव्रतानामिति। बाह्यत्वादिति। सति शिष्टत्वेन आद्युदात्तं पदमेकवर्ज्यमिति वचनात्। न चेह उभये इत्यत्रामन्त्रिताद्युदात्तत्वं बाधितुं वचनम्। पुरस्तादपवादन्यायेन चित्स्वरेणैव बाध्यत्वात्तस्मादुदात्तवचनसामर्थ्यादादेरेवायम्। तस्मिन्कर्त्तव्ये यः प्रश्नस्तत्र वर्त्तमानात्किमः अस्येति षष्ठ्यर्थे डतिः स्यात्। संख्यापरिमाणे किम्। क्षेपे मा भूत्। के यमेषां दशानां संख्या। अत्र

प्रवृत्तिनिमित्तस्येवेति। तत्सहचरितधर्मस्याप्युपलक्षणम्। तथेहापीति। तेनैकादशानां घटानां पूरणं जलमित्यत्र न। यदा च यस्तत्संख्यापूरकत्वेन विवक्षितस्तदा संप्रत्ययार्थस्तदाह। एवं चेति। वर्गे गण्यत इति। अनेन तस्य तत्त्वेन विवक्षा दर्शिता। सप्तम्येति। थुक्सूत्रे भाष्ये तु सह विधानमुक्तम्। षट्त्विति। षट् च छन्दसीत्यतोऽनुवृत्त्येति भावः। पूर्वसूत्रे नान्तादिति सूत्रे यथाऽतिशायनेऽकुत्सिते इत्यादिषु प्रवृत्तिनिमित्तस्यैवातिशयादिकं गृह्यतेऽन्तरङ्गत्वात्। तथेहापि। यथा च तत्र याप्यो वैयाकरण इति विग्रहः। याप्यं वैयाकरणत्वमिति तथेहापीति भावः। एवं च स्वक्रमेणाध्यायेषु गण्यमानेषु समर्थः पदविधिरित्यध्यायो यदा चरमङ्गण्यते तदा सोऽप्यष्टमो भवत्येव। नान्तादसंख्यादेर्मट्। डट इति। डडिति प्रथमान्तस्यानुवृत्तस्य नान्तादिति पञ्चम्या षष्ठी कल्प्यत इति भावः। यद्यपीह मटा प्रत्ययत्वेपि न क्षतिः। तथाप्युत्तरत्र मट आगमत्वमेव न्याय्यम्। अनुदात्तता यथा स्यात्। प्रत्ययत्वे हि आद्युदात्तः स्यात्। तथा चैकरूप्येणैव संदर्भव्याख्यानमुचितम्। षट् इति। इह षष्ठीनिर्देशबलात् षडादीनामागमित्वम्। एवं चानुवृत्तो डट् अर्थात् षष्ठ्या विपरिणम्यते। तदाह। डटीति। डट एव थुट् तु न कृतः। षष्ठे जश्त्वापत्तेः। चतुर्थे रेफस्य विसर्गापत्तेश्च। न चैवं पूर्वपूर्वसूत्रेऽपि थुगेवास्त्विति वाच्यम्। पञ्चमः सप्तम इत्यादौ नलोपाभावापत्तेः। आद्यक्षरेति। अन्तर्हितं व्यञ्जनमक्षरं आदेर्व्यञ्जनस्येत्यर्थः। आदेश्च इति व्याख्याने तु द्विर्वचनन्यायेन तकारस्यापि लोपः स्यादिति हरदत्तः। विशेषणविशेष्यभावव्यत्यासेन व्याख्याने प्रमाणं तु द्वितीयतृतीयचतुर्थेति सूत्रे तुर्यणीति निर्देशो बोध्यः। द्वेस्तीयः। डटोऽपवाद इति। डटो हि शब्दस्य वादेशस्तु न भवति द्वितीयेति निर्देशात्। तृतीय इति। रेफस्य ऋकारः संप्रसारणम्। हल इति दीर्घस्तु नाऽण इत्यनुवृत्तेः। त्रेस्तु चेति नोक्तम्। प्रत्ययो माविज्ञायीति। विंशत्यादिभ्यः। इह प्रत्यासत्त्या पङ्क्त्यादिसूत्रे निपातिता विंशत्यादयो गृह्यन्ते न लोकप्रसिद्धाः विप्रकृष्टत्वात् ॥ ७५ थुगेवास्त्विति पाठः। व्यञ्जनस्येति। उत्तरस्य सहितस्येति शेषः। आदेरच इति। व्यञ्जनसहितस्येति शेषः। नन्वत्र व्यञ्जनसहिता च एवाक्षरत्वव्यवहारेणेह व्यत्यासः कृतोऽत आह। विशेषणेत्यादि। द्वितीयेतीति। विभाषा द्वितीयातृतीयेति निर्देशादित्यर्थः। ड्वादेशत्वे तत्र ङीप् प्रसङ्गः द्विशब्दादेशत्वे तु तदश्रवणप्रसङ्ग इति भावः। निपातिता इति। निपातनार्थं पठिता इत्यर्थः। एवं लोकप्रसिद्धा इत्यस्य प्रसिद्धतया लोके व्यवह्रियमाणा इत्यर्थः ॥

भाष्यमतमिति। भाष्ये षष्ठ्याद्येश्चेति सूत्रस्यासंख्यादेरित्यस्यैकषष्ठप्रयोजनमुक्तं तदन्तविध्यभावात्प्राप्तिर्नेत्युक्त्वा इदमेव ज्ञापकमेतत्प्रकरणे तदन्तविधेस्तेनैकविंशतितम इति सिद्धमित्युक्तम्। लौकिकग्रहणे तु तदसंगतिः स्पष्टैव। अयमेव निषेधो ग्रहणवतेत्यस्य प्रत्ययविधिविषयत्वे मानमिति तदाशयः। नैतत्सिद्ध्येदिति। सहस्रादिभ्यस्तमडापत्तिरित्यपि बोध्यम्। किं शतादिग्र

इति भाष्यमतम्। लौकिकानां ग्रहणं तु इति मतम्। एकविंशतितम इति। यद्यपि भाष्यमते ग्रहणवता प्रातिपदिकेन तदन्तविधिर्दुर्लभस्तथापि षष्ठ्याद्येश्चासंख्यादेरिति सूत्रे संख्यादिपर्युदासो ज्ञापयति। इह प्रकरणे तदन्तानामपि ग्रहणमिति। एवं स्थिते एकान्नविंशतेः पूरणः एकान्नविंशतितम इत्यपि सिध्यति। लौकिकानां ग्रहणमिति वृत्तिमते तु नैतत्सिध्येत्। विंशतेः प्रागभावित्वादस्याः संख्यायाः। स्पष्टं चेदं कैयटहरदत्तग्रन्थयोः। यत्तु प्राचीनप्रक्रियाव्याचक्षाणैरुक्तं विंशत्यादयोऽत्र लौकिका गृह्यन्ते न पङ्क्त्यादिसूत्रनिर्दिष्टाः तथा सत्येकविंशत्यादेर्न स्यात् ग्रहणवतेति तदन्तविधिनिषेधात्। एकोनविंशत्यादेरतिप्रसङ्गश्चेति। अत्रेदं वक्तव्यम्। मूलग्रन्थो भाष्यमतसाधारणः तस्यबलाद्वृत्तिमतपरतया नयनं तावद्व्यर्थमनुचितं च। किं च तदन्तविधिप्रतिषेधादतिप्रसङ्गाच्चेति स्वोक्तिः परस्परविरुद्धा। यदि हि तदन्तविधिर्न कुत्रत्यस्तर्ह्यतिप्रसङ्गः। अथ ज्ञापनेन तु तदन्तविधौ लिसद्धाहःस्य कथंचित्स्वोक्तिरपि व्याख्येयेत्यभिमतम्। तदपि न। एकोनविंशतितम इत्यस्येष्टत्वात् तत्रातिव्याप्तेर्दुर्वारत्वात्। प्रत्युत स्वपक्षे तत्राव्याप्तिरेव दोष इत्यास्तां तावत्। इदं त्ववधेयम्। अनारंभो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिष्विति वदता कात्यायनेन यद्यपि पङ्क्त्यादिसूत्रं प्रत्याख्यातं तथापि इहार्थमावश्यकं तत्। अत एव तत्र भाष्यकृतोक्तम्। नासूया कर्तव्या मन्त्रानुगमः क्रियत इति। नित्यं शतादीननु षष्ठ्याद्येश्चेत्युत्तरसूत्रेण सिद्धे किं शतादिग्रहणेनेति चेन्नैवम्। असंख्यादेरिति वक्ष्यति। एतत्तु संख्याद्यर्थम्। तदेतद्ध्वनयन्नुदाहरति। एकशततम इति। मासादेरिति। संख्यावाचित्वाभावेऽपीति भावः। संख्यादेस्त्विति। एतच्च प्राक् शताद्बोध्यम्। नित्यं शतादीत्युक्तत्वात्। मतौ छः। मत्वर्थ इति। मतोर्विषय इत्यर्थः। तेन समर्थविभक्तिः प्रकृतिविशेषणं प्रत्ययार्थश्चेति सर्वं संगृह्यते। तत्र कुशलः। गोषदादिभ्यो वुन् इत्यतो वुननुवर्तते। आकर्षादिभ्यः कन्। वुना सिद्धे कन्ग्रहणमिदन्तार्थम्। अशनिकः। शाकुनिकः। त्सरुकः। त्सरुक इति। हरदत्तस्वरसादिति भावः॥

हणेनेति। न च सहस्रादिसंग्रहार्थम्। उत्तरसूत्रेऽपि पङ्क्त्यादिसूत्रस्य षष्ठ्यादीनामेव ग्रहादिति वाच्यम्। एवमपि शतग्रहणस्यैव वैयर्थ्यापत्तिरित्यभिमानात्। संख्याद्यर्थमिति। सहस्रादिसंग्रहार्थं तदावश्यकमित्यपि बोध्यम्। आवश्यकार्थस्यापि भविष्यदर्थकत्वात्। भूतवर्तमानयोरावश्यकत्वद्योतनस्यैव फलत्वादिति भावः। आवश्यंकारी कटस्येति इति प्रयोगस्तु चिन्त्य एवेति तात्पर्यम् ॥

निषेधादिति। एतदुपपादितम्। क्रियाविशेषणाभ्यामिति। लौकिकविग्रहवाक्याभिप्रायेणबोध्यम्। द्वितीयायांप्राप्तायामिति। इदमर्वाचामनुरोधेन। यद्वितुकर्तृकर्मणोः कृतिअनभिहितइतिसूत्रस्यभाष्यप्रामाण्यादधिकशब्दार्थस्यगुणनामार्थत्वेनाक्रियात्वंतद्योगषष्ठ्यांप्राप्तायामितिबोध्यम्। तत्राधिकपदार्थतयोर्भेदान्वयस्यैवानुभवात्। षष्ठ्यपवादभूतेएवेमे नत्वनन्तरप्रथमापवादभूतइतिबो

उदराट्ठगाद्यूने। अविजिगीषाविति। दिवोविजिगीषायामितितत्रैवनिष्ठानत्वविधानात्। सस्येन। कर्त्तरितृतीयेयम्। परितोजातः परिजातः परिगतइत्यर्थः। अतएवेति। अकेनोरितिनिषेधादितिभावः। तंत्राद् तंत्रंतन्तुवायशलाका। तन्त्यन्तेतन्तवोऽस्मिन्नितिव्युत्पत्तेः। अचिरः कालोऽपहृतस्येति। कालाः परिमाणिनेतिसमासः। ब्राह्मणकोष्णिकेसंज्ञायाम्। ब्राह्मणशब्दादायुधजीवित्वोपाधिकात्प्रथमान्तात्सप्तम्यर्थेकन्प्रत्ययः। अल्पशब्दात्तुअल्पत्वोपाधिकात्तदाह। आयुधेत्यादि। शीतोष्णाभ्याम्। शीतमिवशीतंमंदमित्यर्थः। शीतंहिमन्दतायुक्तम्। सतिशीतेकार्यकारणेऽपाटवाभावात्। उष्णमिवोष्णंशीघ्रमित्यर्थः। क्रियाविशेषणाभ्यांद्वितीयांताभ्यांप्रत्ययः। कृद्योगलक्षणषष्ठीतुक्रियाविशेषणान्नेत्युक्तम्। अधिकम्। अध्यारूढशब्दादिति। गत्यर्थाकर्मकेत्यादिनारुहेः कर्त्तरिकर्मणिचक्तोविहितः। आद्येकर्मणोनभिहितत्वादध्यारूढशब्दयोगेद्वितीया। अध्यारूढोद्रोणः खारीमिति ग्रामंगतइतिवत्। तथाधिकशब्देनापियोगेद्वितीयायांप्राप्तायांयस्मादधिकंतदस्मिन्नधिकमितिचनिर्देशइत्यत्रपञ्चमीसप्तम्योभवतः। द्वितीयेतुकर्मणोभिहितत्वात्प्रथमा। अधिकाखारीद्रोणेन। अनुका। सूत्रेसमाहारद्वन्द्वेलिङ्ग·व्यत्ययः। अन्वभिभ्यामिति। ससाधनक्रियावाचिभ्यामित्याकरः। क्रियाविशिष्टसाधनवाचिभ्यामितितस्यार्थः। कन्निति। स्वार्थे। अनृजुरिति। तिर्यगवस्थानात्पार्श्वेऽनृजुत्वात्धर्म्यादुपायोऽपि। एवमग्रेऽपि। अयःशूलदण्डाजिनशब्दौगौणौ ॥

ध्यम्। सप्तम्याविति। तदस्मिन्नित्यत्रोपश्लिष्टपदाध्याहारात्सप्तमीतिभाष्यारूढोमार्गः। अभिहितत्वादिति। इदमध्यारूढाखारीद्रोणेनेत्यभिप्रायकम्। अधिकाखारीत्यत्रतुसामानाधिकरण्यात्प्रथमा। द्रोणेनेतिहेतौतृतीयेतिभाष्यानुसारेणयुक्तम्। तस्यार्थइति। साधनस्यैवप्राधान्यानुभवात्। आकरेसहशब्दः साहित्यमात्रवाचीतिभावः। गौणौ। तीक्ष्णोपायदर्भयोः ॥

नेष्यत इति। अनभिधानादिति भावः। वृत्तिकृता चेति। तावतिथेनेति वार्त्तिके षष्ठेन रूपेण गृह्णाति षट्क इत्युदाहरणभाष्यतोऽप्येवमेव लभ्यते। तत्रोदाहरणे पूरणप्रत्ययस्यैव लुको दर्शनात्। किंच कनो लुग्वक्तुमशक्यः। स्वहविधानेन वाक्यभेदे मानाभावेन चोद्देश्यत्वानुपपत्तेः। तन्मतेति। अनेन भाष्यविरोधाद्वार्त्तिकमतमनादेयमिति सूचितम्। अद्यभुक्त इति। अद्यश्राद्धभोजने कृत इत्यर्थः। इह शीतोत्सपाम्पीयः शूलदण्डाजिनशब्देभ्यो मुख्यार्थेभ्यः प्रत्ययो नेष्यते। तावतिथं ग्रहणमिति लुग्वा। यथा तस्य पूरणमित्यत्र तस्येति षष्ठ्यन्तानां सामान्यनिर्देशस्तथात्र तावतिथमिति पूरणप्रत्ययान्तानां सामान्यनिर्देशः। कन् स्यादिति। अनन्तरावपि ठक्ठञौ नानुवर्तेते अस्वरितत्वादिति भावः। पूरणप्रत्ययस्येति। न तु कनः। लुग्वाग्रहणानर्थक्यप्रसङ्गात्। पञ्चमं पञ्चमकं इति रूपद्वयं हि तेन साध्यं तत्र समहाविभाषाधिकाराद्विकल्पेन कन उत्पत्त्या सिद्धमेव। तस्मात् लुग्वाग्रहणं कुर्वतः सूत्रकारस्य पूरणप्रत्ययलुगेवाभिमतः। इति कृत्वा तथैव व्याख्यातमिति तद्विरोधेनेहापि व्याख्यातमुदाहृतं च। वार्त्तिककारस्तु कन एव लुगिति व्याख्यानमभिप्रेत्याह। तावतिथं ग्रहणमिति लुग्वावचनानर्थक्यं विभाषाग्रहणादिति। तन्मते द्वितीयकम्। द्वितीयमित्येव रूपं वा ग्राम्। श्रोत्रियंश्छन्दोऽधीते। छन्दःशब्दस्य श्रोत्रभावः घन्प्रत्ययश्च छन्दोऽध्यायिनि निपात्यते। श्राद्धमनेन। श्राद्धशब्दः कर्मनामधेयम् तत्साधने द्रव्ये लक्षणया वर्तते। श्राद्धी श्राद्धिक इति। अद्यतन एवेष्यते। अद्यभुक्ते श्वः श्राद्धिक इति मा भूत्। पूर्वादिनिः। पूर्वमिति क्रियाविशेषणाद्द्वितीयान्तात्प्रत्ययः। छन्दसि। पर्यवस्थातृशब्दाच्छत्रुपर्यायात् स्वार्थे इनिप्रत्ययः। अत्र स्थातृशब्दस्य च परपन्थ इत्येतावादेशौ निपात्येते। अपत्यं परिपन्थिनम्। मा त्वा परिपरी विदत्। उभयत्रापि परिशब्देऽवग्रहः। लोके त्विति। अनुपस्थितपरिपन्थिभिः पार्थिवैरित्यादौ। अनुपदमिति। पदस्य पश्चात्। पश्चादर्थेऽव्ययीभावः। अनुपदी गवामिति। पदापेक्षया षष्ठी। गोपदानामन्वेषणं च गवामेव तेन हिरण्यादावन्वेष्येन भवतीति हरदत्तः। साक्षाद्द्रष्टरि। साक्षाच्छब्दोऽव्ययम्। प्रकृतिवदनुकरणमिति सूत्रे पञ्चम्या लुक्। साक्षीति। अव्ययानां भमात्रे इति टिलोपः। क्षेत्रियच्। परक्षेत्रशब्दात्सप्तम्यन्ताद्घच् परशब्दस्य लोपश्च निपात्यते। क्षेत्रियो व्याधिरिति। किंच क्षेत्रियं विषं यस्य परशरीरे संक्रमय्य चिकित्स्यते ॥ ७ गोः पदादिति। प्राणिनामुपलक्षणम्। गवामिति तस्य पदविशेषणत्वेऽपि नित्यसापेक्षत्वान्न दोषः। तेन हिरण्यादाविति। एतेनान्वेष्टृशब्दात्प्रत्ययो गोशब्दस्य पदादेशो विद्यमानप्रकृतिप्रत्ययमेव चान्वेष्टरि निपातनमित्यपास्तम्। हिरण्यान्वेष्टर्यपि तदापत्तेः ॥

म.श सस्यार्थेमेत्रइति।सस्यनिर्माणायकृष्टेक्षेत्रेइत्यर्थः।अविवक्षितद्वित्वेनयोः प्रथमातिक्रमेकारणाभावेनप्रवृत्त्यानिर्देशेनशास्त्रसंकोचेमानाभावादितिभावः।अतएवाहसस्यस्येत्यर्थेमहानितिसिद्धा
२२९ ति।विवक्षितएवेति।अतएवगयामतीतत्वेनागतत्वेचवामतुपोनसाधुत्वमितिभावः।स्पष्टंचेदंसर्वभाष्ये।खशब्देनापीति।वह्वादिशब्देनापीत्यर्थः।सहस्रगोरपीति।बहुव्रीहिसमासः।राज्ञोवि
अपिचक्षेत्रियाणितृणानियानिसस्यार्थेक्षेत्रेजातानिचिकित्स्यानिविनाश्यानितान्यपि।किंचक्षेत्रियः पारदारिकः।परदाराः परक्षेत्रंतत्रचिकित्स्योनिग्रहीतव्यः।सर्वंचैतदाकरेस्थितम्।इ
न्द्रियमिन्द्र।इन्द्रशब्दाद्घच्। इन्द्रेणदृष्टंज्ञातंममचक्षुर्मेश्रोत्रमित्यादिक्रमेणसृष्टमदृष्टद्वारा।जुष्टंप्रीणितंसेवितंवादत्तंयथायथंविषयेभ्यः।तदस्यास्त्यस्मिन्नितिमतुप्।अस्तीतिपु
रुषवचनेअविवक्षितेकालस्तुविवक्षितएवास्तिशब्दोविषयविशेषलाभार्थः।तथाहि।भूमनिन्दाप्रशंसासुनित्ययोगेतिशायने।संसर्गेस्तिविवक्षायांभवन्तिमतुबादयः॥अस्तिविव
क्षायांयेमतुबादयोविधीयन्तेतेभूमादिष्वेवविषयेषुभवन्तीतिवार्त्तिकार्थः।भूमाबहुत्वंतच्चआपेक्षिकम्।यस्यहियावद् दुचितंतावदेवस्वशब्देनापिप्रतीयते।यथापञ्चभिरपिगो
भिर्देवदत्तस्यबह्व्योगावइतिव्यवहारः।राज्ञस्तुसहस्रगोरपिगावोल्पाइति।गोमान्।यवमान्।इहयवमतीभिरद्भिः यूपंप्रोक्षतीत्यादौजातिमात्रसंबन्धस्यविवक्षितत्वात्।भूमा
भावेमतुप्।भूमादिग्रहणंहिप्रायेणभूमाद्यर्थोपिप्रतीयन्तइत्येवंपरम्।निन्दायाम्।ककुदावर्तिनीकन्या।प्रशंसायाम्।रूपवान्।नित्ययोगे।क्षीरिणोवृक्षाः।अतिशायने।उदरिणीकन्या।सं
सर्गेदण्डी।संसर्गःसंयोगः।तेनसंयुक्तदंडएवोच्यतेनतुगृहावस्थितदण्डोपि।गुणवचनेभ्यइति।गुणेनतदितिचप्रसिद्धाःशुक्लादयएवेहगृह्यन्ते।ननुरूपाद्योपि।मादुपधायाः।मश्चअश्चम
म्।समाहारेद्वन्द्वः।तेनमतुवाक्षिप्तंप्रातिपदिकंविशेष्यतेतदाह।मवर्णावर्णान्तादिति।उपधायाश्चेतिवाक्यान्तरम्।उपधाभूतान्मात्परस्यमतोरित्यर्थः।येननाव्यवधानन्यायेनास्मात्सव्यवहितेपिभव
ति।एवंसूत्रार्थेस्थितेफलितमाह।मवर्णावर्णोपधादिति।अयवः।इदमपिआक्षिप्तस्यप्रातिपदिकस्यविशेषणम्।तदाह।अयवादिति।यत्तुकेचित्।वह्निमहानित्यादिप्रयुंजतेतत्प्रामादिकमेव।
मत्वंतात्तुपोनिषेधात्।अपदान्तत्वेजश्त्वायोगाच्च।प्राणिस्थात्।शिखावान्दीपइति।प्रत्युदाहरणदिगियंदर्शिता।शिखाशब्दस्यव्रीह्यादिपाठेनलचोःप्रसङ्गात्।चूडावान्पुरुषइतितुप्रत्युदा
हार्यम्।प्राण्यङ्गादेवेति।एतच्चेतिकरणानुवृत्तेर्लभ्यते॥ रोपणम्।सहस्रगोभिरित्यपपाठः।संज्ञाभावेनसमासदौर्लभ्यात् टजापत्तेश्च।उच्यतेइति।दण्डीतिपदेनेत्यर्थः।नास्तीति।अतएवाभ्यति

रा.मः
२२९ रेकान्तिकमितिभाष्यंसंगच्छते। चूडावान्पुरुषइत्य
त्रवृक्षोवटादिः॥

तत्रहीति। अतएवभाष्येऽप्येवसूत्रेतद्वार्त्तिकोक्तिः। स्थितमाकरे इति। नचद्युद्रुभ्यांमद्इत्यस्यनित्यत्वार्थंलत् विकल्पात् प्राक् पठितस्यहि नित्यत्वौन्याय्यमिति वाच्यम्। तेषांरूढिशब्दत्वेनतद्र्थस्यमतुपाऽभिधातुमशक्यत्वेनतस्यनित्यत्वसिद्धेः। द्युद्रुभ्यांमोनित्यमित्येवसिद्धेश्च। डित्वादादेशइति। अन्यथाप्रत्ययत्वभ्रमः स्यादितिभावः। अन्तोदात्तमिति। प्रत्ययोलजितिभावः। तद्ध्वनयन्नासिध्मादिभ्यश्च। अत्रवार्त्तिकम्। लजन्यतरस्यामितिसमुच्चयइति। अस्यार्थः। प्राणिस्थादितिसूत्रेणलचिविकल्पितेपक्षेमतुबितिचूडालः चूडावानितिरूपद्वयंयद्यपिसिध्यतितथाऽपिसिध्मादिषुदोषः। तत्रहिसिध्मनिष्पावमांसेत्यादयोयेऽदन्तास्तेभ्यइनिठनौस्याताम्। तस्मादन्यतरस्यांग्रहणंसमुच्चयार्थंनिपातानामनेकार्थत्वात्। तेनमतुप्समुच्चीयतेतस्यैवप्रकृतत्वात्। अस्तिचेहलिङ्गंकेशाद्वोऽन्यतरस्यांग्रहणम्। तद्धिइनिठनोः प्राप्त्यर्थंक्रियते। प्रकृतस्यान्यतरस्यांग्रहणस्यविकल्पार्थत्वेतुएतदनुवृत्त्यैवसिद्धौकिंतेन। क्रियमाणंतुपूर्वस्यान्यतरस्यांग्रहणस्यसमुच्चयार्थतांज्ञापयतीतिस्थितमाकरे। लज्वेति। वाशब्दः समुच्चये। वास्याद्विकल्पोपमयोरेवार्थेऽपिसमुच्चयइतिकोशात्। वातेत्यादि। सिध्माद्यन्तर्गणसूत्रम्। ऊङ्त्वेति। डित्वादन्तादेशः। वातूलइति। अन्तोदात्तम्। यत्तुप्राचाबलादूलः वाताच्चइत्युक्तंतदुपेक्ष्यम्। प्रत्ययस्वरेणमध्योदात्तप्रसङ्गात्। गणसूत्रबलेनान्तोदात्तस्येष्टत्वात्। पार्ष्णिधमन्योर्दीर्घश्च। पार्ष्णीलः। धमनीलः। क्षुद्रजन्तूपतापाच्च। यूकालः। मक्षिकालः। उपतापोरोगः। विपादिकालः इत्यादि। वत्सांसाभ्याम्। कामबलेति। कामबलशब्दौतत्रेमत्वर्थीयाच्प्रत्ययान्तौइतिभावः। वत्सलइति। स्नेहवानित्यर्थः। वृत्तिविषयेवत्सांसशब्दौस्नेहबलयोर्वर्त्तेते। यद्यपीहप्रकरणेसर्वत्रमतुप्समुच्चीयतेतथापीहनेष्यते। मतुबन्तेनअर्थान्तरमेवप्रतीयते। वत्सवतीगौः। अंसवान्दुर्बलः। लोमादि। इहलोमपामपिच्छादिभ्यइतिसुवचम्। नन्दिग्रहिपचादिभ्यइतिवत्। अङ्ग कल्याणइतिगणसूत्रमर्थतः पठति। अङ्गादिति। शाकीपलालीदद्रुह्रस्वत्वंच। महत्शाकंशाकी। तद्वत्शाकिनम्। महत्पलालंपलाली। तद्वत्पलालिनम्। दरिद्रातेर्यालोपश्च। चादूः। दद्रूः त्वग्रोगविशेषः तद्वान्दद्रुणः ॥

ह। यस्त्विति। विपादिकालइति। यद्यपिज्योत्स्नादिभ्योऽणउपसंख्यानमितिवार्त्तिकभाष्येवैपादिकइत्युदाहृतम्। तथापिकौण्डलसाहचर्यात्अहीर्थकमेवेतिहृत्याद्याशयइतिभावः। यद्यपीत्यादितोऽस्पष्टम्। महत्पलालमिति। इदमादर्शकारानुरोधेन। भिन्नानिशालिकोद्रवपलालानिपलालीतिकैयटः पलालक्षोदइत्यन्ये ॥

नानागतज्ञीति। नानाप्रकाराणीत्यर्थः। इतिवदिति। इदं कैयटानुरोधेनाऽपदिकृतपूर्वीत्यादौ कृदन्तमात्रशक्त्यानोपस्थितिरिह तत्स्थेयेत्यु व्यतेतदाषष्ठ्येवेति — वोध्यम्। कर्तृत्युत्पन्नप्रज्ञशब्दात्प्रज्ञाद्यणि सिद्धे किमत्र प्रज्ञाग्रहणेनेत्यत आह। प्रज्ञादिभ्यश्चेति। विच्छिन्नस्येति। यस्य द्रव्यलाभादेर्विच्छिन्नस्यापि प्रतिविधानं पुनः संधानं भवति सा वृत्तिरित्यर्थ इति संप्रदायः। असन्तत्वादिति। विपुण इति। विपुनानाअञ्चतीति। विपक्तिनान्यंस्यसन्तीति विपुणः विप्रुब्रद्रारव्यः कालः। तस्य हि नानागतानि दिनानि सन्ति दिनान्तराणां न्यूनाधिकभावस्य तन्मूलकत्वात्। तथामन्युः वायुः अव्यवस्थितचित्तश्च विपुणशब्दार्थः। इह यदि कृते यणादेशे उत्तरपदलोपः स्यात् तर्हि वलिलोपे विप्स इति स्यात्। अत उक्तमकृतसंध्येरिति। समर्थानामित्यस्यापवादोयम्। प्रज्ञा श्रद्धा। प्राज्ञो व्याकरणमिति। गुणभूतया क्रियया कर्मत्वेन संबन्धः कृद्ग्रहणात्तद्धितप्रयोगे षष्ठी न कृतपूर्वी कटमितिवत्। प्राज्ञेति। प्रज्ञादिभ्यश्चेत्यणि ङीन्न भवति इह तु टाप्। इदमेवेह प्रज्ञाग्रहणस्य फलमिति भावः। वृत्तेश्चेति वार्तिकम्। काशिकाकृतानुवृत्तिशब्दः सूत्रे प्रक्षिप्तः विच्छिन्नस्य प्रतिविधानं वृत्तिः। तपस्वीति। असन्तत्वात् सिद्धे अणा बाधा माभूदिति वचनम्। सहस्रीति। अत्र इनिनाठनपि बाध्यते। ज्यौत्स्न इति। शुक्लपक्षः। तामिस्रः कृष्णपक्षः नरकविशेषश्च। तमः समूहस्तमिस्रम्। मत्वर्थीयो रः। तत्र ह्यवयवभूतानि तमांसि विद्यन्ते। तदस्मिन्नस्तीति रान्ताद् ण। स्त्रियां तु तामिस्री। यत्त्वमरेणोक्तम्। तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्वितेति। तत्र रान्तान्नत्वणन्तमिति न विरोधः। सिकता देशविशेषस्य वक्ष्यमाणत्वादाह। घट इति। अत्र सूत्रद्वयस्योदाहरणममरः संजग्राह। स्त्री शर्करा शर्करिलः शार्करः शर्करावति। देश एवादिमावेवमुन्नेयाः सिकतावति इति। दन्त उन्नत। करयोन्नणदन्तुरान्तरे इत्यादयस्तु प्रयोगा लाक्षणिकाः। ऊषसुषि। समाहारद्वन्द्वे सौत्रं पुंस्त्वम्। ऊषः क्षारेण पांसवः। सुषिश्छिद्रम्। खर इति। महत्कण्ठविवरं खम्। तद्वानित्यर्थः। गर्दभे रूढोयम्। नगरमिति। नगा वृक्षाः पर्वताश्च। जातिशब्दोयम्। तथा च नगरीत्यत्र जातिलक्षणो ङीन् भवति। पाण्डुर इति। पाण्डुः शुक्लो वर्णः तद्वान्। अव्युत्पन्न एवेति। गुणमात्रे गुणिनि च वर्तते। हरिणः पाण्डरः पाण्डुः इत्यमरः। गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीति च। कच्छ्वाः। कच्छूस्त्वग्रोगविशेषः ॥ ७ अदन्तत्वादित्यस्याप्युपलक्षणमेतत्। तत्रा तमःसमूहे। तत्र रान्तमिति। तमोस्त्यस्यामित्यर्थः। लाक्षणिका इति। निम्नोन्नतरूपेर्थे लाक्षणिका इत्यर्थः। ईरिणः पांसवः क्षारमृत्कणा इत्यर्थः ॥

दुर्ईस इति।वृक्षादेवबीजद्वारावृक्षान्तरोत्पत्तेरितिभावः।अन्येतुद्रुःशाखेत्याहुः।अनभिधानादिति।अतएवभाष्ये।तद्ध्यनुवृत्तावेकगविकोनसिद्ध्यतीतिआशङ्क्यसमासान्तेकृतेभविष्यतीतिसमाहितम्।
अन्यथाबहुव्रीहौतदसिद्ध्यातदसंगतिःस्पष्टैव।अर्वाचामनुसारेणाह।अतद्धेवेत्यादि।भाष्याभिप्रायेति।वस्तुतोभाष्याभिप्रायवर्णनानुरूपत्वाद्तद्ध्यस्यनिवृत्तिरेवोचिता।गोविंशतिरेकविंशतिरस्यास्तीति।
द्युद्रुभ्यांमः।द्युमदिति।द्यौरस्यास्तीतिदिवउदित्युत्वम्।केचिद्द्युशब्दमव्युत्पन्नंप्रातिपदिकमुकारान्तंद्योनामधेयमाहुः।द्रुरेस्त्यः।सोस्यास्तीतिजनकंतयेतिद्रुमोपिवृक्षएव।पलाशीद्रुद्रुमागमाइत्यम
रः।इहस्तवदिति।शब्देषुमतुन्नविकल्प्यते।तदर्थस्यमतुपाभिधातुमशक्यत्वात्।इहस्तवदिति।वप्रत्ययोनुवर्त्तते।अर्णवइति।अर्णोजलम्।अर्त्तेरसुनुड्डायणेति।सूत्रेसांदितिकोपणन्नतुरवसादितिव
त्कृतयणादेशस्यानुकरणम्।लक्ष्येयणोभावादितिभावः।प्रयुज्यतेचोभयथा।अधिरोहतिगाण्डिवंमहेषावितिः।गाण्डीवीकनकशिलानिभंभुजाभ्यामितिच।आसुतीवलइति।सुञ्अभिषवेक्ति
न्।आसुतिरभिषवः।परिषद्वलइति।परितःसीदन्तीतिपरिषत्।सत्सूद्विषेतिक्विप्।सदिरप्रतेरितिषत्वम्।पाठान्तरमिति।शृदृभसोदिरित्यदिप्रत्ययोबाहुलकात्सदेरपिभवति।तथाचभाष्यम्।पार्ष
दकृतिरेषातत्रभवताम्।सर्ववेदपार्षदं शास्त्रमितिच।प्रयुज्यतेच।सर्वदेषादश्वावरेति।यर्षद्वलामहाब्रह्मैरनैकदिकाश्रमानितिभट्टिः।समज्यापरिषत्सदितिचन्द्रकोशः।भ्रातृवलइति।वलेइति
सूत्रेणदूत्यनुवृत्तेर्नेहदीर्घः।पुत्रवलादौतुस्यादतआह।संज्ञायामित्यनुवृत्तेरिति।वनगिर्योरितिसूत्रादितिभावः।ज्योत्स्ना।चन्द्रप्रभातत्रावयवीभूतंज्योतिरस्ति।त्रिमत्वर्थीयोपपत्तिः।एतेननमःसमू
हेतमिस्राशब्दोव्याख्यातः।कथंतर्हितमिस्रंतिमिरंतमसमित्यमरः।समूहसमूहिनोरभेदोपचारात्।लील्वमतन्त्रमिति।व्याख्यानमत्रशरणम्।ऊर्जस्विन्गोमिन्इत्यत्रनान्तत्वाभिव्यक्तयेनलोपोनकृतः।तुन्दा
दिभ्यइलच्च।मतुप्चेति।अन्यतरस्यामित्यनुवृत्तेः।अत्रसाङ्गादिवृद्धावितिपठ्यते।विवृद्ध्युपाधिकात्वाङ्गवाचिनःइलजादयःस्युः।विवृद्धौकर्णावस्यकर्णिलः।कर्णीकः।कर्णवान्।एकगोपूर्वात्।ऐकशतिक
इति।एकंचतच्छतंचेतिपूर्वकालेत्यादिनाकर्मधारयः।षष्ठीतत्पुरुषात्बहुव्रीहेर्द्वन्द्वाच्चन।अनभिधानात्।अतइष्येवनेह।एकविंशतिरस्यास्तीति।यत्त्वर्थवत्सूत्रेगोमदिदंनगरमितिमत्वन्तंमत्वर्थीयोलुप्यत
इतिभाष्यमुपादायैकैस्यटोव्याख्यत्।एकगोपूर्वादितिसूत्रेभाष्यकारवचनाल्लोपः।अतइष्विषतत्रनिवृत्तेगोत्रिकादिसिद्ध्यर्थंगागवांसमूहोगोत्रा।सास्मिन्नस्तीतिगोत्रिकमिति।ननुभाष्याभिप्रायवर्णनमात्रंतु
तात्त्विकम्।अन्यथाएकविंशतिः।एकचत्वारिंशद्वासास्तीत्यत्रातिप्रसङ्गात्।ठञ्दौतुनभिधानान्न।किंचानुवृत्तौगोशकटिकोनसिद्ध्यति।शकटशब्देनवृत्तौसिद्धावपिशकटिशब्देनवृत्तौगोशकटिमानित्यस्या

पत्तोरितिप्रकृतसूत्रभाष्येस्वरसूचकत्वात् ॥

पक्षान्तरमिति। अथवामस्त्वान्मत्वर्थीयो लुप्यत इत्यनेनावयवधर्मस्य समुदायेऽध्यारणमात्रादहेतुमुख्येऽर्थवत्त्वे सम्भवति उपचरितस्याश्रयो युक्त इति कैयटे उक्तम्। आतइस्तुग्वृत्तीति। इदं चिन्त्यम्। आतइस्तुग्वृत्तौ यदि एकगोपूर्वादाकारान्तादित्यर्थस्तर्हि ऐकशतिकासिद्धिः। एकगोपूर्वादकारान्तादित्यर्थे अन्यादाकारान्तेऽप्यपि ठञापत्तिरितीति दिक्। ततो निष्पन्नमिति। दीनारादिविति शेषः। अनेनैवापरितोषेण पक्षान्तरमाह। अथवेति। अस्मिंश्च पक्षे गोनिष्कमित्यनभिमतं लभ्यते। अभिमतत्वे तु प्राणिस्थादात इत्यतो मण्डूकप्लुत्या आतइत्यनुवर्त्य समाधेयम्। निष्कग्रहणं मतुपो वाधनार्थम्। कथमेकद्रव्यवानिति। असाधुरेवायम्। एकेन द्रव्यवानिति वा विगृहीतव्यम्। कथमेकदण्डीति। एकदेशिनैकाधिकरण्ये इति निर्देशोत्रापपतिरिनिरपि क्वचिद्भवतीति। रूप्यादाहत। आहतप्रशंसाविशिष्टेऽर्थे वर्तमानाद्रूपशब्दान्मत्वर्थीयप्रत्ययात्। आहतमिति। आहननमाहतं ताडनमित्यर्थः। ततो निष्पन्नं यत्तु रूप्यादि रूप्यं तदपि कार्यकारणोपचारात् आहतमित्युच्यत इति न्यासकारः। हिम्यादिति। भूम्नि यप्। गुण्यादिति। दर्शिग्रहणादिनिरपि। तथा च माघः। गुण्यगुण्य इति नक्जीगणत्। अस्माया। यशस्वीति। तसौ मत्वर्थे इति भत्वाद्रुत्वं न। यशस्वानिति। पूर्वेण नित्यग्रहणेन तत्रासंबद्धमन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमिह संबद्ध्यत एव। तसौ मत्वर्थे इति सूत्रे यशस्वानिति भाष्योदाहरणादिति भावः। क्विन्नन्तत्वादिति। यत्तु प्राचोक्तं चोः कुरिति। तन्न। तदपवादत्वाद्व्रश्चेति षत्वापत्तेरिति भावः। यदि तु व्रश्चेति षत्वं सृजियज्योः पदान्ते क्विन्प्रत्ययस्येति कुत्वस्यापवाद इति निष्कर्षो गृह्येत तदा स्रग्विगादिसूत्रेण पदान्तविषये कुत्वनिपातनादिति बोध्यम्। हृदयाच्चालुरन्यतरस्याम्। अन्यतरस्यांग्रहणं इनिठनोः प्राप्त्यर्थम्। चकारस्तु इडुदितीत्वन्ता। एवमन्यत्रापीति हरदत्तः। तेन हृदयालुशब्दे न्तोदात्तः। शीतोष्णेति। इह चालुरनुवर्तते। यत्तु प्राचोक्तम्। तृप्राभ्य इति। आलुजिति च तदुभयमप्यनाकरत्वादुपेक्ष्यम्। पुरोडाश इति। नतप्राउरुभ्यवसं इति स्वभाष्ये उणादिवृत्तिषु च तथा व्याख्यातत्वादिति भावः। माधव इति सुब्धातुवृत्तौ स्थितमिदम्। हिमाच्चेति। एकारादिरयं प्रत्ययः। वलादिति। सिध्मादिषु मत्वर्थे वातूलवलूलशब्दौ प्रकारान्तरेण व्युत्पादितौ। तथ्यर्थं मरुद्भ्याम्। पितमरुद्भ्यां तत्वार्थम्। हरदत्तस्तु तमिति पठित्वा आद्युदात्तत्वार्थो नकार इत्याह। तच्चिन्त्यम्। मरुत्त्वाद्वस्य मध्योदात्तत्वात्। तथा हि मरुच्छब्दो मृग्रोरुतिरिति उतिप्रत्ययान्तत्वादन्तोदात्तः। तस्मात सापि मध्योदात्तत्वं स्पष्टम्॥ ७) न्यासकार इति। कर्मणि क्तप्रत्यये उपचारं विनापि निर्वाह इत्यरुचिः। तत्र। एकगोपूर्वादिति सूत्रे भाष्योदाहरणादिति। प्रकृत्यैकाजितिसूत्रेऽस्य त्वनर इति भाष्योदाहरणाच्चेत्यपि

आद्युदात्तःस्यादिति।पर्वतशब्देतुनविशेषः।पर्वशब्दस्यवनिबन्तत्वेननब्विषयस्येतिफिट्सूत्रेणचाद्युदात्ततयातपित्तनिचाद्युदात्तत्वात्।पर्व धातोस्तनिअन्तोदात्तोपिपर्वतइत्यन्यत्।अपसिद्धान्तादिति।ददातिवृत्तंवापुनरेतद्भविष्यतिमरुद्भिर्दत्तोमरुत्तइति।एतत्प्रत्याख्यानपरभाष्यविरोधादित्यर्थः।मरुच्छब्दस्योपसर्गत्वविधानसामर्थ्यादजन्तत्वाभावेप्यचउपसर्गादितितत्वम्।मरुतःमरुच्छब्दस्यान्तोदात्तइति।तीयाकर्मणीतिपूर्वपदप्रकृतिस्वरेणमरुत्तोमध्योदात्तइतिफलभेदायात्रापिपित्पाठएव।उपसर्गाश्चाभिवर्जमितिमरुत्तआद्युदात्तत्वंतुन।तत्वेएवोपसर्गत्व ततिनितुनित्स्वरेणाद्युदात्तःस्यात्।नचेष्टापत्तिः।अपसिद्धान्तात्।स्यादेतत्।मरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहेइत्यैतरेयब्राह्मणप्रयोगस्तावत्स्वरांशेउदासीनः।एकश्रुत्यापाठात्।तत्कथमभिमतस्वरावधारणमितिचेत्।प्रथमाद्यायस्याकरग्रन्थेभ्यएवेत्यवेहि।उपसर्गसंज्ञायांहिमरुच्छब्दस्योपसंख्यानंपठ्यते।तत्रमध्यप्याधिकरणबलान्निपातसंज्ञाप्राप्तातथापिसानेष्यते।सत्यांतस्यांनिपाताआद्युदात्ताइतिफिट्स्वरःस्यात्।सचमरुत्तशब्देऽपिश्रूयेत।तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरात्।किंच निपातत्वेसत्यसत्त्वत्वंस्यात्।ननूपसर्गत्वेप्यङ्किविधौकुतोनेतिचेत्।अनभिधानाद्बाहुलकाद्वेत्युत्तरम्।संज्ञाप्रयोजनंतुतत्सामर्थ्यादजन्तत्वाभावेऽपिअचउपसर्गादितितत्वप्रवृत्तिः।नन्वेवंमरुन्नयतीत्यत्रतकारव्यवायेपिणत्वंस्यादितिचेत्सत्यम्।तत्वविधावेवोपसर्गसंज्ञेतिवक्तव्यम्।एवंचाङ्किविधौअपिनेत्यपरमनुकूलम्।एतच्चसर्वंकैयटहरदत्ताभ्यांस्पष्टमुक्तम्।तदनन्तरंतत्प्रत्ययान्ततयापिमरुत्तशब्दस्यव्युत्पादनंकरिष्यतइतिवदन्कैयटःस्पष्टमेवपित्वमाह।यत्तुमत्वर्थीयप्रकरणेहरदत्तआह।मरुतएनन्देयासुर्मरुत्तइतिव्युत्पत्तावपितृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरोभवन्नाद्युदात्तएवभवति।उपसर्गाश्चाभिवर्जमितिफिट्सूत्रादिति।तदतिरभसात्।यतःप्रथमशेषेस्वयमेवाह ॥ ७ स्वीकारादितिभावः।तदेतत्स्वनयन्नाह।स्यादेतदित्यादिना।अव्ययत्वंस्यादिति।तथाचमरुद्भिर्दत्तइतिभाष्यप्रयोगेविभक्तिश्रवणानापत्तिरितिभावः।उत्तरमिति।अतएवतत्त्ववत्तानिभाष्येनोदाहृतानि।तत्त्वविधाविति।अतएवोपसर्गाश्चाभिवर्जमितिफिट्स्वरोपिनमरुच्छब्दस्य।स्पष्टमेवपित्वमाहेति।तत्पक्षेमध्योदात्तत्वेननित्वेनफलभेदापत्तेरितिभावः ॥

उक्तरीत्या।प्रथमश्चोपसर्गाहंरइतरीत्या।नाम्निविंशि।निपातत्वप्रयुक्ताद्युदात्तत्वस्यैवैवादिपाठेनबाधात्।परेतुतत्वविधायेनमरुतउपसंख्यानेनसिद्धेप्रथमेसंज्ञाप्रकरणेपाठोनेकसं
ज्ञालाभाय एवंचनिपातत्वमूलकमाद्युदात्तत्वंदुर्वारम्।तच्चोपसर्गत्वादि अपिधानस्याभाव्यात्तत्त्वविषयएवेतिमरुद्भिर्दत्तइत्युपपद्यते।तस्मान्नित्यपाठएवोचितइत्याहुः।इति

ननूपसर्गसंज्ञायामपिउपसर्गाश्चाभिवर्जमित्याद्युदात्तत्वंस्यादेव।नानेनापूर्वमाद्युदात्तत्वंविधीयतेकिंतर्हिनिपाताइत्येवसिद्धेःभेःप्रतिषेधार्थमेतदिति।तस्मात्त
नोनित्यस्वीकृत्यप्रवृत्तःप्राथमिकोहरदत्तग्रन्थःप्राचीनग्रन्थविरोद्धःपसिद्धान्तग्रस्तश्चेतिस्थितम्।एतेनतनोनकारआद्युदात्तार्थइतिप्राचोग्रन्थव्याचक्षाणामुक्ति
रपिप्रत्युक्ता।इदंत्ववधेयम्।उक्तरीत्याउपसर्गाश्चाभिवर्जमितिफिट्सूत्रंसुत्यजम्।नाभिरित्येवसुवचम्।अतिनिष्कर्षेतुनाभिरित्यपिमास्तु।एवादिष्वभेःसुपठत्वात्।
एवादीनामन्तइतिहिफिट्सूत्रम्।एवमादीनामितिपाठान्तरंतदेतत्सर्वंमाधवेनऋग्भाष्येध्वनितम्।तथाहि।आत्वेतानिषीदतेतिमन्त्रेउपसर्गाश्चाभिवर्जमितिव
चनात्प्रातिपदिकान्तोदात्तत्वमित्युक्त्वामानोमर्ताअभिद्रुहन्नितिमन्त्रेएवमादीनामन्तइत्युपन्यास्यत्।अलंप्रसक्तानुप्रसक्तेन।प्रकृतमनुसरामः।स्वामिन्नैश्व
र्ये।ऐश्वर्यवाचकादिति।स्वशब्दस्यैश्वर्यवाचित्वंएतद्वृत्तिविषयमेवबोध्यम्।कंशंभ्याम्।अत्रप्रथमप्रत्ययेदन्त्योष्ठ्यआदिःनतुपवर्गीयःतदाह।अनुनासिको।व
यावित्ति।तुण्डिवलिवटेर्भः।मूर्धन्योपधइति।तथाचतुडितोडनेइतिधातोर्माधवेनोक्तम्।तुडिः इन्।रुद्रानाभिःसास्तीतिंतुडिलः।तुंदादिभ्यइलचेत्यत्रस्वाङ्गादिव
द्धावितिगणसूत्रेणइलच्।तुन्दिलएवतुण्डिभः।तुण्डिवलिवटेर्भइतिमत्वर्थीयोभइति।वटिभइति।[illegible]नेष्टनेइन्॥इतिमत्वर्थीयाः॥

७) मन्त्रइति।एतन्मन्त्रघटकाभि
शब्देइत्यर्थः।एतद्वृत्तिविषयकमिति।तेननातिप्रसङ्गः।इलजिति।नचविशेषविहितभप्रत्ययेनबाधः।बलादिभ्यइतिसूत्रादर्थाधिकाराश्रयणेनविकल्पार्थकान्यतरस्यांग्रह
णानुवृत्तेः।तुन्दादिसूत्रेचेनेनिठनोःसमुच्चयार्थान्यतरस्यांग्रहणानुवृत्तेस्तेषांविधानात्तेष्वत्रबोध्याः॥ इतिमत्वर्थीयाः॥

सार्वविभक्तिकः।आद्यादित्वात्।तसेश्चेति।तसेति।आद्यादिभ्यः किम्।सर्वनामबहुभ्यः परस्यतसस्तसिलादेश इति तदर्थः।इत्यादिकमिति।तेषु तत्रेत्यत्रैत्वमादिशब्दार्थः।नेहेति।अतस्तकारे इत्यर्थः।उकारेणेति।सहितदर्थं चरितार्थत्वेनेत्संज्ञया निवर्तते।णौ गमिरित्यादौ लिका निर्देशः।गमेरिडितिवत् । धातुस्वरूपभङ्ग·भियातूपधालोपोन।उच्चारणार्थानामपीत्संज्ञायास्तस्य लोप इति सूत्रे एतदोन्।भाष्यारूढोयंपाठः।वृत्तिकारस्तु एतदोश इति पठित्वाशकारः सर्वादेशार्थ इत्याह।द्वाभ्यामिति।सार्वनामत्वात्प्राप्तोऽपि तसिल् अह्वादिभ्य इति पर्युदासान्न।एतेन नूनंमत्तपरं वंश्याद् इत्यत्र तसिलं न भ्रमेण युष्मदस्मदोरनादेश इत्यात्वमाशङ्क्य सार्वविभक्तिकस्तसिरिति परिहृत्य तसेश्चेति न तस्य तसिलादेशे पुनः शेषे लोपमाशङ्क्य सुब्विभक्तावेव स इष्यत इति स्वोत्प्रेक्षयैव समाधानं कुर्वन् कश्चित् दुर्घटवृत्तिकारः परास्तः।पर्युदासविषयत्वाद् इह तसिल्प्रत्ययस्तसिलादेशस्य चोक्तिसंभवाभावात्।सप्तम्यास्त्रल्।इह त्रल्तसिलौ स्वतन्त्रौ प्रत्ययौ न तु सप्तमीपञ्चम्योरादेशौ।तेन कुत्र बहुत्र कुतः बहुतः।इत्यादौ अच्च घेर्ङि·ङीत्यादिकं नेति दिक्।ननु तसिलोऽवकाशः कुतोवहीयते कुतोवरोहति।तसेस्तु ग्रामत आगच्छतीत्यादिरवकाशः।कुत आगच्छतीत्यादावुभयप्रसङ्गे परत्वात्तसिः तस्य विभक्तित्वाभावात् विभक्तिकार्याणि न स्युरिति चेत्।मैवम्।तसेश्चेति सूत्रेण अह्वादिभ्यः किमादिभ्यः परस्य तसेस्तसिलादेशविधानात्।तस्य च विभक्तित्वात्।किमोत्।न विभक्तौ तु स्मादिति नेह प्रवर्तते।थमोरुकारेण मकारपरित्राणार्थेन।नित्यताज्ञापनात्।वाग्रहणमिति।किमोद्वेति सूत्रं पठितव्यं।ततः इह च च्छन्दसीति।यद्यपि भागवृत्तिकारो भाषायां त्रलं नेच्छति।वामनस्याप्यत्रैव स्वरसः तथापि वामनेनोक्तमेकदेशिमतमेवेह पुरस्कृतम्।बहुप्रयोगदर्शनात्।तथाचामरः।साहचर्याद्य कुत्रचित्।श्रीहर्षोऽपि।नान्यत्र कुत्रापि च साभिलाषमिति।वाह च छन्दसि।पूर्वोक्तस्य वाग्रहणायकर्षस्य स्फुटीकरणार्थमिदमुपन्यस्तम्।अधुना प्रत्यय इति।निपातनान्मध्योदात्तोयम्।भाष्यमते चेदम्। वृत्तिकारस्त्वाह।इदमोशभावः धुनाच प्रत्यय इति।सद्यः परुत्।अहनीति।सप्तम्यन्तस्याहन्शब्दस्यार्थो इत्यर्थः।तद्दर्शयति।समाने ह्नि सद्य इति।प्रकारवचने थाल्।सामान्यस्यभेदको विशेषः प्रकारः।यद्यपि प्रकारे गुणवचनस्येत्यत्र सादृश्यं प्रकारः ॥

भाष्ये स्पष्टमुक्तत्वादिति दिक्।इदमिति।छान्दसमपीदमित्यर्थः।वृत्तिकारस्त्वाहेति।भाष्योक्तयोर्द्वयोः पक्षयोर्मध्ये ऽयमेवादरेणाहेत्यर्थः ॥

न. श २३३ अनभिधानादिति। अन्यथा सर्वथेत्यादौ तत्प्रतीतेः। यथा हरिरित्यादौ यत्सदृशो हरिस्तत्प्रकारवान् हर इति बोधापत्तेः। हरिसदृशो हर इति बोधानापत्तेश्च। सिद्धान्ते तु यत्प्रकारवान् हरिस्तत्प्रकारवान् हर इति शब्दबोधेऽपि तेन बोधः फलतीति बोध्यम्। तथाजातीय इति। यदि चात्रापि प्रकारवति स्यात्तदा जातीयोपादानं व्यर्थं स्यादिति भावः॥ ॥प्राग्दिशीयानां पूर्णोऽवधिः॥ ॥विधाशब्दस्येति। तथापि नेह सादृश्यं गृह्यतेऽनभिधानात्। तेन प्रकारेण तथेति प्रथमान्तात्तु न भवति स प्रकारस्तथेति। अनभिधानादिति भावः। किं सर्वनामबहुभ्यो विशेषविहितेनापि थाला जातीयर् न बाध्यते। धर्मभेदात्। प्रकारे हि थाल्। जातीयर् तु तद्वति स्वभावात्। अत एव भाष्ये प्रयुक्तम्। तथाजातीयोऽन्यथाजातीय इति। इदमस्थमुः। अनेन एतेन वेति। द्वितीयान्तादपि थमुर्भवत्येव। इमं वा प्रकारमापन्न इत्थंभूतः। तथा च सौत्रो व्यवहारः। लक्षणेत्थंभूताख्यानेत्यादि। एतेन कथंभूतो व्याख्यातः॥ प्राग्दिशीयानां पूर्णोऽवधिः। पुरः पुरस्तादिति। अथ कथं पश्यामि तामितः इतः पुरतश्च पश्चादिति भवभूतिः। नीरसतरुरिह विलसति पुरतः इति कश्चित्। स्यात्पुरः पुरतोऽग्रत इत्यमरः। पुरतः प्रथमे चाग्रे इति विश्वश्च। चिन्त्यमेतदिति भाषावृत्तिः। कश्चित्तु विभाषा परावराभ्यामिति विभाषाग्रहणं योगाद्विभज्यते। तेन पूर्वशब्दादतसुच्। अस्ताति चेति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात्पुरादेशः। इत्युत्प्रेक्षितवान्। तन्निर्मूलम्। पुरत इति तु समानकालीनं पूर्वकालीनमित्यादिवदप्रामाणिकमेवेति प्रामाणिकाः। संख्याया विधार्थे धा। विधाशब्दस्यार्थो विधार्थः। यद्यप्योदनपिण्डोऽपि विधाशब्देनोच्यते तथापीह न गृह्यते। तेनैकाग्नो विधेत्यादौ न भवति। इह हि विधायामिति वक्तव्ये अर्थग्रहणस्येदं प्रयोजनम्। विधाशब्दोऽयमत्रार्थे प्रसिद्धतरः तत्रैव यथा स्यात्। तादृशश्चार्थः प्रकार एव। स च क्रियाविशेषक एव गृह्यते। अभिधानस्वभावात्। तदाह। क्रियाप्रकारे वर्त्तमानादिति। कथं तर्हि नवधा द्रव्यं त्रेधा गुण इत्यादि। अत्रापि उपदिश्यत इति वा भवतीति वा क्रियाऽध्याहारः। याप्ये पाशप्। कुत्सित इत्यत्रैव नायं विहितः। तिङन्तादपि प्रसङ्गात्। पूरणाद्भागे। पूरणार्थत्वाज्जातीयप्रत्ययः पूरणशब्देनोक्तः। पूरणग्रहणं चोत्तरार्थम्। मुखतीयः पार्श्वतीय इत्यत्र तु अनर्थकत्वादेव न भविष्यति ॥ ७ इदं वृत्त्याद्यनुरोधेनेति बोध्यम्। विधयुक्तगताश्च प्रकारे भवतीति तु भाष्यं विधा विध इति घञर्थे पुल्लिङ्ग इति कैयटश्च। विधशब्दस्यार्थ इति समासः। एवं चैकाग्नो विधेत्यत्र प्रसक्तिरेव न। प्रकार इति। सामान्यस्य भेदको विशेष इत्यर्थः ॥ रा मः २३३

ह्रस्वोपिसाधुरिति।परेतु१

अनिसतित्विति। अत्रप्रागेकादशभ्यइत्यनप्राप्तिः। अतएवविभाषाहितीयेतिसूत्रप्रत्याख्यानंभाष्यकृतोक्तंसंगच्छते। इत्यत्रैवेति। ततःप्राप्तिरित्यर्थः। इतिभावइति। एतद्भाष्येनदृश्यम्। प्राधान्यादिति। तद्विशेषणमितिशेषः। एवंचस्वार्थिकप्रकरणविरोधोभवतीतिमञ्जूषायाम्। एवंविशेषणंन्याय्यम्। भूतपूर्वसंबन्धेयाषष्ठीतदन्तादित्यर्थः। उचितइत्यन्ये। शेतेर्लुडिति। सचकर्त्तरिबाहुलकात्। इतिभाष्यस्वरसस्वभावइत्यन्ये। अबाधकान्यपीति। इदंवृत्त्यनुरोधेन। बाधकान्येवेतिसर्वादिसूत्रेभाष्यात्। एवंचह्रस्वोऽसाधुरेव। अभिभवइति। स्वापेक्षयेतरस्यन्यूनीकरणमित्यर्थः। सकर्मकत्वादितिपुंस्त्वंविवक्षितम्। तेनसमानेप्यर्थेभक्तौविवक्षितायांचतुर्थीपञ्चमीत्येवभवति। अनिसतितुटापिचतुर्थीपंचमेतिप्रसज्येत। भूतपूर्वेचरट्। गोष्ठात्खञित्यत्रैवनोक्तम्। विशेषविहितेनख्यञापरत्वाद्बाधासंभवात्। सन्निधौहिसामान्यविशेषभावःस्फुटीभवति। यद्यपिदूरस्थस्यापिबाधोन्याय्यएवतथापीहगौरवंस्वीकृत्यदूरेपाठसामर्थ्याद्बाधोनेतिभावः। षष्ठ्यारूप्यच। भूतपूर्वेइत्यनुवर्त्ततेतत्रयद्यपिपूर्वसूत्रेङ्याप्प्रातिपदिकस्यविशेषणंतथापीहनतथा। षष्ठ्यन्तार्थस्यविशेषणत्वात्तदाक्षिप्तस्यसंबन्धिनःप्राधान्यात्प्रधानेतरसन्निधौनप्रधानेकार्यसंप्रत्ययस्यन्याय्यत्वात्तदेतदाह। भूतपूर्वेर्थेरूप्यःस्यादिति। अतिशायनेतमबिष्ठनौ। अतिपूर्वाच्छेतेर्ल्युट्। अतिशयनमेवातिशायनम्। अस्मादेवनिर्देशाद्दीर्घःनतुसौत्रः। तेनलोकेपिदीर्घःसाधुः। अबाधकान्यपिनिपातनानि। तेनह्रस्वोपिसाधुः। यद्यपिकेवलःशेतिःस्वप्नेवर्त्ततेतथाप्यतिपूर्वःप्रकर्षे। प्रकर्षश्चात्रनाभिधेयम्। किंत्वभिभवःसकर्मकोह्ययम्। पूर्वान्महाभागतयातिशेतेइतिदर्शनात्। अतिशयश्चनप्रत्ययार्थः। तथाहिसतिलघोरतिशायनंलघुतममितिस्यात्। प्रत्ययार्थस्यप्राधान्यात्। नापिप्रकृत्यर्थः। तथासतिहिप्रकर्षातिशयादिभ्यएवस्यात्। नतुपट्वादेः। किंतुप्रकृत्यर्थविशेषणम्। प्रत्ययस्तुद्योतकः। तदेतदाह। अतिशयविशिष्टेस्वादि ॥ [illegible] कइति। अतएवभाष्येकर्त्तरिल्युटि अतिशायनस्यप्रत्ययार्थत्वपक्षेकालीमतिशेतेकालः कालितरइतिप्राप्नोति कालतरइतिचेष्यतेइतिद्वितीयान्तासत्त्वोपपादनंकृतम्। तथाहिसतीति। भावल्युडन्तत्वेएषदोषः। किंत्विति। अनेनकर्त्तृल्युडन्तताध्वनिता। अतिशयकर्त्तरिवर्त्तमानात्प्रातिपदिकात्स्वार्थेप्रत्ययइतिसमार्थः। अतिशयविशिष्टार्थवृत्तेरित्यस्यतत्कर्तृक[illegible]पार्थवृत्तेरित्यर्थः ॥

१इतराभिभवकर्तृत्वंविवक्ष्यतइत्यर्थः।ततःप्रवर्त्ततइति।

अतिशयोविवक्ष्यतइति।अन्तरङ्गत्वेनपूर्णंपदमुदान्तरेणान्वेतीतिव्युत्पत्त्याचस्वार्थद्रव्यलिङ्गसंख्याकारकप्रयुक्तकार्यलाभोत्तरमित्यर्थस्तदाह।विभक्त्यन्तइति।इत्याहुरिति।अतयतनमारभतइतिभाष्यप्रयोगःसंगच्छते।तद्द्विवचनमिति।नतुरूढोद्विवचनशब्दइतिभावः।तेनास्माकंचदेवदत्तस्यचदेवदत्तोऽभिरूपतरइतिसिद्धम्।अस्मदोर्द्वयोश्चेत्यनेद्व्यवयवेसमुदायेऽस्मदएकस्यातिशयोविवक्ष्यते।तदातरबीयसुनावयवादेवस्येते।परिशेषाद्बहूनांमध्येयदेकदेशस्यनिर्द्धारणंसोऽस्यविषयःतदाहःअयमेषामिति।आढ्यतमइति।सुबन्तात्तमप्।सुपोधात्वितिलुक्।यद्यपिप्रातिपदिकात्तद्धितइतिदृहवृत्तिकारस्यस्वरसःप्रतीयतेतथापितदीयग्रन्थःसुबन्तपरतयाभङ्क्त्वानीतः।अन्यथाहिपूर्वाह्णेतरांतमामित्यादौघकालतनेषुकालनाम्नइतिसप्तम्याअलुग्विधानंबाध्येत।उक्तंचभाष्ये।प्रियकुत्सनादिषुततःप्रवर्त्ततेसोविभक्त्यन्तइति।तिङश्च।तमप्यादिति।इष्टन्तुनोक्तःअजादीगुणवचनादेवेतिनियमात्।तरप्तमपौघः।आतिशायनिकप्रकरणएवतादीघइतिवावाच्येप्रकरणान्तरेगुरुसूत्रकरणंअस्यंतस्वार्थिकस्यापितरपोज्ञापकम्।तेनाल्पाच्तरं।लोपश्चबलवत्तरःइत्यादिसिद्धम्।केचित्तुयोगापेक्षंज्ञापकमित्याश्रित्यइयसुन्प्रत्ययस्यापिक्वचिदत्यन्तस्वार्थिकतेत्याहुः।किमेत्।आमोरुकारोयदित्यज्येततर्हिपचतितरामित्यादौह्रस्वनद्यापइतिनुट्स्यात्।यस्येतिलोपस्यपरेणनुटोबाधात्।सिद्धान्तेत्वनुबन्धपरिभाषयानुड्विधौनास्यग्रहणम्।द्विवचनविभज्योपपदे।द्वयोरर्थयोर्वचनंद्विवचनंकरणेल्युट्कर्मणिषष्ठ्याःसमासः।येनपदेनद्वावर्थावुच्येतेतत्द्विवचनंविभक्तव्यंविभज्यम्।ऋहलोर्ण्यदितिण्यतिप्राप्तेतदपवादोयन्निपात्यतेतेनविभाग्यमितिनभवति।विभाज्यशब्दस्यतुस्मृतिषुप्रयुक्तस्यसाधुत्वंचिन्त्यमितिहरदत्तः।अत्रेयंचिन्ता।यद्यपिण्यत्दुर्लभःनिपातनेनबाधात्।नचनिपातनान्यबाधकानीतिपक्षमाश्रित्यनिर्वाहःशङ्क्यः।।७ नैकस्मिन्नर्थेबहुत्ववद्भावविधानात्स्वस्वनिमित्तकंशास्त्रीयकार्यप्रवर्त्तकोऽनेकत्वनिमित्तकनिवर्त्तकः।नचदन्तोष्ठस्यदन्ताःस्निग्धतराइतिनसिद्ध्येत्समाहारस्यैकत्वात्वर्त्तिपदार्थानांबहुत्वादितिवाच्यम्।वृत्तौविशेषणेषुसंख्यानुपादानात्दन्तोष्ठलक्षणवर्त्तिपदार्थरूपार्थद्वयप्रतिपादकत्वेनाक्षतेः।यन्निपात्यतइति।अपादानेइतिशेषः ॥

दुर्वीरत्वादिति। तस्यस्याभावाच्चेत्यपि बोध्यम्। सूत्रेऽस्मिन्नुत्पादनादिति। हर्यादिभिरिति शेषः। विभजनीये। विभागावधौ। तच्च। उपपदं चानावश्यकमिति। प्रकरणादिना निर्णयादिति भावः। इष्यत इति। अत्राप्यविंशायन इत्यनुवृत्तेर्नियमत्वसंभवस्तेन विनापीति भावः। नत्वपूर्व इति। गौरवादिति भावः। अस्यार्थस्य स्फुटं प्रतिपत्तये छान्दसमप्यत्र व्याख्यातम्। निवृत्तेति। अनुस्यन्त एवेत्यर्थः। एधतिसतिकुलस्य दुर्वीरत्वात्तथापि पर्यंताद्वो यतिविभाज्यत इति सिद्धम्। न चार्थभेदः। निरत्तप्रेषणात्प्राकृतेर्थे णिजिति णेरणाविति सूत्रे व्युत्पादनादिति दिक्। द्विवचनं च विभज्यं चेति द्वन्द्वः। तस्योपपदेन कर्मधारयः। तेन द्व्यर्थवाचके विभजनीये चोपपदे सतीत्यक्षरार्थः। अन्वर्थं चोपपदं। उपोच्चारितं पदमिति। न तु कृत्रिमं। तद्धितविधौ तस्यासंभवात्। तच विग्रहवाक्य एव प्रयुज्यते इत्येतौ तु गतार्थत्वान्नावश्यकम्। एवं स्थिते उपपदग्रहणं स्पष्टार्थम्। इह द्वे उपपदे द्वे च प्रकृती सुप्तिङन्ते। प्रत्ययौ च द्वौ तथापि यथासंख्यं नेष्यते। द्विवचनोपपदमुदाहरति। अनयोरिति। विभज्योपपदमुदाहरति। प्राच्येभ्य इति। पञ्चमी विभक्त इति पञ्चमी। कथं तर्हि पटुद्वयान् पटुरासीत्। एवमप्यस्तु पटुतर इति। अत्राहुः। एकस्यापि धर्मिणो गुणभेदेन भेदाध्या पात्प्रति योग्यपेक्षः प्रकर्षः तदाश्रयश्च प्रत्यय इति। व्यपदिशन्ति च। अन्य एवासि संवृत्तः। कश्चित्स एवासि धनंजय स्वस्तिमिति। अजादी गुणवचनादेवादृष्टतो वधारणार्थ एवकारः। तुश्छन्दसि। पूर्वेण नियमेन व्यावर्तितयोः प्रतिप्रसवोयं। न तु पूर्वो विधिः। तेनोपाधिसंकरो न। दोहीयसीति। इयमनयोरतिशयेन दोग्ध्री। अस्मादेतद्धिते पुंवद्भावः सिद्धप्रत्ययविधाविति वचनान्ङीपि निवृत्ते दोग्धृशब्दात्प्रत्ययः। ततस्तुचि निवृत्ते घत्वजस्त्वयोरपि निवृत्तिः। अलौकिके वाक्ये प्रागेवनयोरप्रवृत्तिरिति तु तत्त्वम्। गुणस्तु प्रवर्तते। लुप्तेः पित्तवि प्रत्ययलक्षणध्रौव्यात्। छान्दसमपि तुरिति सूत्रेण विष्ठवदित्यतिदेशेन लोकेऽप्युपयोक्ष्यमाणत्वादिहोपन्यस्तम्। प्रशस्यस्य श्रः। अजादी इत्यनुवृत्तं सप्तम्या विपरिणम्यत इत्याह। अजाद्योरिति। ज्यादात्। ज्यादुत्तरस्येयसुन आकारादेशः स्यात्। वृद्धस्य च । स्वरूपग्रहणं न तु वृद्धिर्यस्याचामादिरिति परिभाषितस्य। व्याख्यानात्॥ ॐ त्वजस्त्वयोरपि निवृत्तिरिति। सपादसप्ताध्यायीस्थकार्ये प्रवृत्तियोग्यतया प्रवृत्तिः। तदेवाह। प्रागेव तयोरप्रवृत्तिरिति। ध्रौव्यादिति। एभ्यः परत्वात्सपादसप्ताध्यायीस्थत्वाच्चेत्यपि बोध्यम्। तुरिति सूत्रमिति। तुरिष्ठेमेयस्विति सूत्रमित्यर्थः। तस्य छान्दसत्वं तु निमित्तभूते ष्ठेमीयसुनोश्छान्दसत्वादिति बोध्यम्। तुश्छन्दसीत्यस्येष्ठनिपरतः पूर्वकार्यत्वाभावेन णावतिदेशाभावात् ॥

द्रिढिढेश्चेति। न च तद्ग्रहणसामर्थ्यात् एच्यादेराकृतिगणत्वेनेमनि चिन्वर्षिमेतीति वाच्यम्। वर्षादेशस्य चारितार्थ्येन ष्ठनिज्यादेशेन बाधापत्तौ वर्षिष्ठ इत्याद्यनापत्तेः। स्पष्टार्थमिति। ह्रसिष्ठे इकोऽसंअस्थाप्रियस्थिरेति वर्षादेशोऽपि पक्षे भवति। न च तस्येमनि चित्यावकाशता। वृद्धशब्दादिमनि चाभावात्। एवं च इहैव वृद्धस्य वर्षिश्चेति सूत्रयितुमुचितम्। एवं हि द्रिढिढे ग्रहणं न कर्त्तव्यमिति लाघवम्। स्थूलदूर॥ परग्रहणं यविशेषो ह्रसिष्ठ इत्यत्र पूर्वयणादेर्लोपो मा भूदिति। पूर्वग्रहणं तु स्पष्टार्थम्। परस्मिंस्तु सूत्रे सामर्थ्यात् पूर्वस्यैव गुणलाभात्। स्थविष्ठ इति। ननु अत्र ओर्गुण इत्येव सिद्धं तत्किं गुणवचनेनेति चेत् मैवम्। परयणादिलोपस्याभीयत्वेनासिद्धत्वात्। क्षिप्रे ओरभावात्। क्षुद्रे अनन्त्यत्वाच्च। इष्ठस्य यिट् च। पूर्वसूत्रं सम्पूर्णमनुवर्त्तते। तदाह। बहोरित्यादि। भूरादेशः [illegible]स्यापि इष्ठस्यम्। अत्र आदिलोपे कृते यि शब्द आगमः। यद्वा लोपापवादो यकार आगमः। इकारस्तूच्चारणार्थः। पक्षद्वयमपीदं भाष्ये स्थितम्। युवाल्पयोः। युवेति स्वरूपग्रहणं न तु युवसञ्ज्ञस्य। विन्मतोर्लुक्। स्रजिष्ठ इति। विनो लुकि कृते भत्वात् पदकार्याभावः। अस्मादेव ज्ञापकाद्विन्मतोरजादौ। प्रशंसायां रूपप्। प्रकृत्यर्थस्य परिपूर्णतेह प्रशंसा न तु स्तुति। नेनेहापि भवति। चोररूप्योऽयं यद्दस्योरप्यज्ञानं हरति। गुप्तवस्त्वपहरणेन चौर्यं परिपूर्यते। पचतिरूपमिति। क्रियाप्रधानमाख्यातम्। क्रियायाश्चासत्त्वरूपत्वेऽपि एकवचनं भवति। औत्सर्गिकत्वात्। तेन पचतो रूपं पचतिरूपमित्यादि। इह प्रथमैव विभक्त्यंतराणामप्राप्तेरित्याहुः। पश्येत्यादियोगे कर्मणि द्वितीयाप्यस्तीति तत्त्वम्। क्लीबत्वं लोकात्। एवं पचतिकल्पमित्यादावपि बोध्यम्। विभाषा सुपः। सूत्रे सुप इति षष्ठ्यंतं ते षष्ठ्यंतसमर्थप्रत्ययेनेत्युक्तेः। सुबन्तादिति। प्रागिस्य पकृप्यते। तत्र यद्यपि सौत्रस्य पुरस्ताच्छब्दस्य विवरणं तत्समानार्थं तथापि तद्योगे षष्ठी न प्रवर्त्तते अन्यारादिति सूत्रे अञ्चूत्तरपदस्य दिक्शब्दत्वेऽपि षष्ठ्यंतसमर्थप्रत्ययेनेत्येतद्बाधनार्थं पृथग्ग्रहणमिति सिद्धान्तयित्वा प्राक्प्रत्यग्वा ग्रामादित्युदाहृतत्वात्। काशिकायां तु वृत्तावपि पुरस्ताच्छब्दः प्रयुक्तः। अत एव सुबन्तादिति तदुक्तिर्हरदत्तेन भङ्ग्याख्याता ॥

भवादिवत्सेऽपिष्ठादौ प्रत्ययस्येकश्च व्यवधानाद् प्राप्तिशङ्कावारणार्थं पूर्वमात्रस्येत्यर्थकं तदिति भावः। अनन्त्यत्वाच्चेति। इक्परिभाषोपस्थित्या पकारदकारयोर्न गुण इति भावः। औत्सर्गिकत्वादिति। संख्यायास्तिङोऽक्तत्वेऽपि एकवचनमिति योगविभागादिति भावः ॥

भङ्गमेवाह। ल्यब्लोप इति। वैषम्यस्येति। तन्मूलकता प्राक्शब्दस्यैव प्रयोगादिति भावः। प्राक्त्वम्। प्रत्ययस्य पूर्वदेशत्वम्। पुरस्तादेवेति। पुरस्ताच्छब्दावृत्त्यैतदर्थलाभः। अभिधेयवदेवेति। ननु प्रत्यब्लोपस्यापञ्चमी। एवंभूतं सुबन्तं प्रकृतित्वेनाश्रित्येत्यर्थ इति। यत्तु प्राचोग्रन्थं व्याचक्षाणैरुक्तं सुबन्तादिति ल्यब्लोपे पञ्चमीति। तद्रभसात्। न हि हरदत्तेन काशिकाभङ्ग्या नीते स्येव सर्वं तथा नेयम्। वैषम्यस्य स्फुटत्वात्। प्रागेवेति। सौत्रस्तु शब्दो अवधारणे वर्त्तत इति भावः। तेन बहुजेव विकल्पते न तु पूर्वत्वमन्यथा प्राक्त्वं विकल्प्येत। तथा च पक्षे बहुच्चरः स्यात्। भाष्यकारस्त्वाह। तु शब्दस्य नेदं फलम्। तथा हि। उदश्वितोऽन्यतरस्यामित्यादौ प्रत्यय एव विकल्पते। प्रधानत्वात्। न तु परत्वं गुणत्वात्। गुणानां च परार्थत्वादिति न्यायात्। तद्वदिहापि विभाषाग्रहणेन बहुजेव सम्बध्यते। न पुरस्तादित्येतत्। किंतु अवधारणार्थस्य तु शब्दस्येहान्यदेव प्रयोजनम्। पुरस्तादेव सर्वं यथा स्यात्। तेन लिङ्गसंख्ये अपि प्राक्प्रत्ययोत्पत्तेः। प्रकृत्यवस्थायां ये दृष्टे ते एव स्तः प्रयोगश्च प्राक्प्रकृतेरिति। तेन बहुगुणो द्राक्षा लघुर्बहुतर्पणनरः इत्यादौ न विशेष्यनिघ्नता। ननु स्वार्थिकाः प्रकृतितो लिङ्गवचनानि लभन्त इत्येव सिद्धमिति चेत् सत्यम्। एतदेव ज्ञापयति। ईषदसमाप्तौ ये स्वार्थिकाः तेषु अभिधेयवदेव लिङ्गवचने स्त इति। तेन गुडकल्पा द्राक्षा शर्कराकल्पो गुड इत्यादि सिद्धम्। यत्तु काशिकायां बहुगुडेति स्त्रीलिङ्गं पठ्यते तत्प्रामादिकं भाष्यविरोधादिति हरदत्तः। प्रागिवात्कः। सुप इत्यनुवर्त्तते तेन तिङन्तात्को न। अव्ययसर्वनाम्नाम्। तिङश्चेति। मण्डूकप्लुत्येति भावः। ङ्याप्प्रातिपदिकात् सुप इति चानुवर्त्तत एव। कस्य च दः। कान्तात्ययस्येति। सर्वनामग्रहणं तिङ्ग्रहणं च नेह संबध्यते। तयोः कान्तत्वासंभवात्। अधोक् अधेगित्यादौ हि असिद्धं कत्वम्। यद्यपि शक्नोतेर्यङ्लुकि लङि तिपि अशाशगिति संभवति तथापि यङ्लुकोऽसार्वत्रिकत्वात् नेदं लक्ष्यमस्तीति भावः। ओकारसकारेति। अकज्विधौ सुपोऽप्यनुवृत्त्या सर्वनाम्ना सुपा च टेर्विशेषणे कामचारादव्यवस्थाप्रसङ्गे भाष्यकारवचनाद्व्यवस्थाश्रीयते। ओकारसकारेत्यादिस्तु अङ्गो च युष्मदस्मन्यात्र विषयः। तथैव भाष्ये उदाहृतत्वात् ॥ ७८

कृतिवदित्यर्थः। तेन प्रकृतिलिङ्गाद्यतिक्रमो नापतदिति तात्पर्यम्। सुप इति चेति। क्वचित्प्रातिपदिकस्य टेर्ग्रहणं क्वचित्सुबन्तस्य टेरित्यर्थलाभार्थमुभयोरनुवृत्तिरिति बोध्यम् ॥

अविशेषेणेति।विशेषोक्त्यभावेनेत्यर्थः।ननुसुबन्तस्येति।अतएवकादेशःसाकच्कार्थःकःकौकदित्येवमर्थइतिभाष्यंसंगच्छते।हरदत्तइति।अत्रारुचिस्तुभाषितपुंस्काच्चेतिविक
ल्पात्पक्षेइत्त्वाभावसुलभइति।कस्येति।नकस्यापीत्यर्थः।हरदत्तइति।अत्रारुचिस्तुयोगविभागसामर्थ्यात्बह्वचइत्यस्यात्रासंबन्धस्तेनाबह्वचोप्येजौ।ततःकठत्सिद्ध्यर्थश्च कार
इतिस्याशयइति।यस्मिन्विधिरिति।प्रत्यासत्त्योपस्थितप्रकृतप्रत्ययस्यविशेष्यत्वसत्त्वादितिभावः।औपदेशिकप्रातिपदिकस्यार्थेतुनादिग्रहणम्।ठग्रहणवैयर्थ्याशङ्कापरभाष्यासंगतेः
अन्येषांत्वविशेषेणप्रातिपदिकस्यैवरेःप्रागकच्ननुसुबन्तस्य।तेनसर्वकेणइमकेनभवकत्तमित्यादिसिद्ध्यति।शीलेकइति।शीलंस्वभावोनियमश्च।तूष्णीकइति।केण
इतिह्रस्वस्तुन।भाष्यकृतादीर्घस्योदाहृतत्वात्।संज्ञापूर्वकस्यानित्यत्वाद्वा।दुर्घटवृत्तिकारस्तुनकपीत्यत्रनेतियोगविभागादित्याह।नीतौचतद्युक्तात्।हन्तेर्धानकाइ
ति।धानाशब्दःस्त्रीलिङ्गः।तकःकः।केणइतिह्रस्वः।कप्रत्ययान्ताट्टाप्।अत्रप्रत्ययस्थादित्त्वेनभवितव्यम्।प्रायेणतुधानकाइतिपठ्यते।तत्रलिङ्गातिवृत्तिर्द्रष्टव्येतिहरदत्तः।
णचःस्त्रियामञितिसूत्रेस्त्रीग्रहणेनज्ञापितंस्वार्थिकाःप्रकृतिलिङ्गंक्वचिदतिवर्तन्तेऽपीति।तेनेहपुंस्त्वमितिभावः।घनिलचौच।चकाराद्यथाप्राप्तमितिकाशिका।इहपूर्वसू
त्रेणैवठच्विहितः।वावचनाल्लोऽपि।चकारेणतुकस्याप्यनुज्ञातेतिचिन्त्यम्।योगविभागेफलमपिचिन्त्यमितिहरदत्तः।ठाजादौ।समाहारद्वन्द्वेसौत्रंपुंस्त्वम्।आदिग्रहणंचिन्त्य
प्रयोजनंयस्मिन्विधिस्तदादावित्येवसिद्धम्।अस्मिन्प्रकरणइति।प्रत्यासत्त्यातयोरेवार्थयोर्बुद्धौसंनिधानादितिभावः।संर्वतु प्यतइति।एतच्चोर्ध्वग्रहणसामर्थ्याल्लभ्यते।अ
न्यथाआदेःपरस्येतिद्वितीयादचोयःपरस्तस्यादेरेवलोपःस्यात्।ननुठग्रहणंव्यर्थंइकादेशेकृतेजादावित्येवसिद्धत्वादितिचेन्न।उक्तोद्वितीयत्वेततःपरस्यठावस्थायामेवलोपेठ
स्यकादेशार्थंग्रहणात्।इदंध्वनयन्नुदाहरति।वायुकइति।किंचयदाविभ्रगुप्रभृतिभ्यष्ठच् तदाप्रथममिकादेशस्यासंभवेनाजादिलक्षणोलोपोनस्यादितितदर्थमपिठग्रहण
बोध्यम्।प्राचामुपादेःउपेन्द्रदत्तइति॥ ठावस्थायामिति।नित्यत्वादितिभावः।कादेशार्थमिति।नचशेवलिकसिद्धयेठचश्चित्त्वेनसामान्यापेक्षज्ञापकेनसर्वतःपूर्वमिकादेशापत्तिरितिवा
च्यम्।साक्षादनुक्त्याज्ञापकसिद्धस्यासार्वत्रिकत्वेनतस्यैतद्विषयेऽप्रवृत्तेः।एवंरीत्याफलान्तरमपिसंभवतीत्याह।किंचेति।असंभवेनेति।कादेशेनबाधादितिभावः।तदर्थमपीति।तत्रापिकादेशात्पू

र्वंनित्यत्वाल्लोपेइकादेशेचित्रकइतिरूपसिद्धिरिति
भावः॥

दोषश्चेति। एकारश्रवणापत्तेरिति भावः। अकृतव्यूहपरिभाषयेति। यदि गुणो न स्यात् तर्हीकारादेर्लोपः स्यादिति गुणनिमित्तविनाशसंभावनासत्त्वादिति भावः। ज्ञापकस्य। अकृतसन्धेरित्यस्य। विशेषपरत्वादिति। अस्वार्थिकप्रत्ययविषयत्वादित्यर्थः। दिगर्थस्तु नेन्दूस्यपरस्येति ज्ञापकेन पूर्वोत्तरपदनिमित्तकार्यापेक्षयान्तरङ्गस्याप्येकादेशस्य पूर्वमप्रवृत्तेर्न दोष इति। दृहोदाहरणमिति। अत एव नामपदं चरितार्थम्। अकृतव्यूहपरिभाषयेति। अस्य पदापीत्यादिः। इदमुपलक्षणम्। एकादेशपर्यन्तं सपादसप्ताध्यायीस्थकार्यप्रवृत्तियोग्यतयाऽकृत्वाऽप्रस्यादेतत्। कृतसंधेरुपेन्द्रशब्दादेकादेशस्य पूर्वान्ततया ग्रहणात् उपादेरिति विधीयमानौ प्रत्ययौ स्तां नाम। लोपस्तु नकारादेरेव स्यात्। ततश्च उपड उपक इति रूपे न स्याताम्। एवं घनिलच्ठच्स्वपि दोष एव तत्स्यादिदेव द्वितीयमच्प्रत्ययं चेदिति वार्तिकं च कुशुचितमिति चेत्सत्यम्। प्रकारान्तरेणैव निर्वाहसंभवान्नोक्तम्। तथा हि। अकृतव्यूहपरिभाषया आद्गुणात्पूर्वमेव प्रत्ययः। न च परिनिष्ठितत्वपरेण समर्थग्रहणेन सोऽस्त्विति वैष्णु माणिरित्यत्रैव परिभाषाबाधः स्फुटः। प्राग्दिव इति सूत्रे समर्थग्रहणं निवृत्तमित्युक्तत्वात्। गुरुज्ञापकबलेन समर्थपरिग्रहणप्रत्यासत्त्या न पक्षेऽपि ज्ञापकस्य विशेषपरत्वादिति दिक्। उपेन्द्रः। उपगुरूपकर्त्वेत्यादिषु उपडादीनां च त्रयाणां रूपाणां तास्वपि प्रकरणादिना विशेषोऽवसेयः॥ जातिनाम्नः। ये शब्दा जात्यन्तरेषु प्रसिद्धा मनुष्येषु नामत्वेन विनियुक्ताः तदुदाहरणम्। द्वितीयमिति। एचः। तस्य अक्षरमिति प्राचां संज्ञा। वाय्वाशीरिति। वायुराशीर्यस्येति विग्रहः। वायिक इति। यद्यत्र द्वितीयादच ऊर्ध्वस्य लोपः स्यात् तदाऽकृतव्यूहपरिभाषया वायु आ इक इति स्थिते यस्येति लोपे तस्य स्थानिवत्त्वादाकारान्तस्य भत्वेऽन्तर्वर्तिनीं विभक्तिमाश्रित्य वकारान्तस्य पदत्वेन कुत्वजश्त्वयोः कृतयोः वागिक इति स्यात्। उत्तरपदलोपे तु अजादेशत्वेन स्थानिवत्त्वाभावात् तुल्यावधिकया भसंज्ञया पदसंज्ञा बाध्यते ॥ ७५ वृत्तिरित्यपि बोध्यम्। यस्येति लोपे इति। अस्यासिद्धत्वात्तथापीति शेषः। इकं निमित्तीकृत्य चान्ते भसंज्ञासत्त्वात् कुत्वाप्रवृत्त्या तत्सिद्धिरिति भावः। स्थानिवत्त्वादिति। न चास्यापि स्थानिवद्भावस्य परम्परया पदान्तविधिबाधकतया भत्वेऽपि न पदान्तेति स्थानिवत्त्वनिषेध इति वाच्यम्। षडिकेऽपि दोषापत्तेः। यदि तु द्वितीयादच ऊर्ध्वं भाष्यस्य लोपविधायकवचनप्रामाण्यादुक्ते स्थानिवत्त्वं तर्हि प्रकृतेऽपि तुल्यम् ॥

इष्यत इति। एतच्च स्वादिष्विति सूत्रे भाष्ये स्पष्टम्। एवं चैकाक्षरपूर्वपदानामिति वार्त्तिकं षट्शब्दातिरिक्तविषयकमिति भावः। धर्मान्तराणाम्। चापलादीनाम्। अश्वेनाश्वायामुत्पन्नत्वादीनां च। कयोरन्यतर इत्यादि। इत्यर्थे कतरो भयोरित्यादिप्रयोगः स्यादिति भावः। एकस्येति किमिति। इमा मे द्वयोरेकस्यैव निर्द्धारणादिति प्रश्नः। कर्मणीति। द्विकर्मको

तत्रापि तद्धिताश्रयायाः अपवादत्वादेव बाधः। विभक्त्याश्रयात्तु एकसंज्ञाधिकारात्परत्वादाद्यत इति विवेकः। कथमिति। अत्राप्युत्तरपदलोपे जश्त्वं न स्यादिति प्रश्नः। षड् इति। अत्र सोरेव लोप इष्यते। न लोपसंख्यानिक इत्यर्थः। वत्सोक्षाश्व। तत्तुल्यत्वं न्यूनता। सा च प्रवृत्तिनिमित्तस्य प्रत्यासत्तेः। क्वचित्तु तत्सहचरितधर्मान्तराणाम्। तत्र वत्सः प्रथमवयाः। वयसश्च प्रथमस्य न्यूनत्वं नाम वयोन्तरप्राप्तिः। तदाह। द्वितीयमिति। तरुण उक्षा। तारुण्यस्य च तत्तुल्यत्वं तृतीयवयःप्राप्तिः। अश्वेनाश्वायामुत्पन्नोऽश्वः। अश्वत्वं च जातिः। तत्सहचरितस्योक्तधर्मस्य न्यूनत्वम्। अन्यपितृकत्वात्। तथा च गर्दभेनाश्वायामुत्पादितोऽश्वतरः। ऋषभो भारस्य वोढा। मन्दशक्तिस्तु ऋषभतरः। किंयत्तदः। निर्द्धार्यमाणवाचिभ्यः प्रत्ययोऽयम्। अभिधानस्वभावात्। नेह। कयोरन्यतरो देवदत्तः ययोस्तयोरिति। एकस्येति किम्। द्वयोरिति कर्मणि षष्ठी माभूत्। तथा हि सति अस्मिन् ग्रामे कौ देवदत्तयज्ञदत्तावित्यत्रापि स्यात्। वा बहूनाम्। जातिपरिप्रश्ने इति समाहारद्वन्द्वः। तत्र जातावितिसर्वेषां विशेषणं परिप्रश्नग्रहणं तु योग्यताबलात् किम एव विशेषणं तत्र क्षेपनिवृत्त्यर्थम्। तत्र जातिग्रहणं प्रायोभिप्रायम्। बहूनां निर्द्धारणेऽपि डतरच् इष्टत्वात्। तथा च वार्त्तिकम्। किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाख्यानर्थक्यमिति ॥ ७ निर्द्धारण इत्यर्थः स्यात्तदेति भावः। इत्यत्रापीति। अपिरेवार्थः। अत्रैव स्यादिति न त्वेकनिर्द्धारण इति भावः। डतमच् इष्टत्वादिति। अत एव कतरकतमाविति सूत्रे जातिपरिप्रश्नग्रहणं सार्थकम्। न च कतरशब्दार्थम्। कतमसाहचर्येणोपपत्तेः। अत एव कतमः कतमैषामाढ्यमेति द्वित्वप्रकरणेऽष्टमे भाष्यप्रयोगः संगच्छते। इष्टत्वादिति। बहुष्वासीनेषु कश्चित् कंचित् पृच्छति कतरो देवदत्त इति प्रत्यय इति सूत्रे भाष्यप्रयोगादिति भावः ॥

इति वचनकर्त्तव्यमिति। जातिग्रहणाकर्त्तव्यत्वे तात्पर्यम्। परिप्रश्नग्रहणं तु क्षेपार्थनिवृत्तये आवश्यकमिति बोध्यम्। आकर इतीति। पूर्वसूत्रस्य द्वयोरित्यस्य प्रत्याख्यानभाष्यव्याख्यावसरे कैयटे इत्यर्थः। अनुवृत्तेरुक्तत्वादिति। अत एवापक्षेप इति सूत्रे कैयट एतयोरर्थयोर्विशेष इति भाष्यप्रयोगः संगच्छते। तस्मादयः प्रागवक्षेपणे कनो नित्याद् इति तु प्राचि अत्र कैयटः। द्वयोरिति जातिपरिप्रश्न इति वचनकर्त्तव्यमिति भाव इति। तदेतदाह। प्रत्याख्यानमाकर इति। तथा च कतमो भवतामध्यापकः शूरो देवदत्तो वेति सिद्धम्। महाविभाषयेति। समर्थप्रथमग्रहणयोः प्राग्दिश इति सूत्रे निवृत्तत्वेऽपि वाग्रहणानुवृत्तेरुक्तत्वादिति भावः। एतेन वाग्रहणस्यापि निवृत्तिरिति प्राचो ग्रन्थव्याचक्षाणानामुपेक्षणीयतां ध्वनयति। किमोऽस्मिन्निति। द्वयोरित्यस्य प्रत्याख्यातत्वादिति भावः। प्रागिवीयानां पूर्णोऽवधिः। अश्वक इति। नायं स्वार्थिकः अश्वशब्दो ह्यश्व एव वर्त्तते। कन्प्रत्ययस्तु प्रतिकृतिरूपे सदृशे इत्येके। अन्ये तु गौर्वाहीक इतिवत् अश्वशब्दः सादृश्यनिबन्धनादभेदोपचारात्प्रतिकृतौ वर्त्तते। कन्प्रत्ययस्तु औपचारिकत्वद्योतक इत्याहुः। प्रतिकृतौ किम्। गौरिव गवयः। तृणचर्मकाष्ठादिनिर्मितं प्रतिमापरपर्यायं वस्तु प्रतिकृतिः। गवयस्तु नैवम्। अश्वसदृशस्येति प्रकृतिप्रत्ययसमुदायसंज्ञेति बोध्यम्। वासुदेव इत्यादि। याः प्रतिमाः प्रतिगृह्य गृहाद्गृहं भिक्षमाणा अटन्ति ता एवमुच्यन्ते। देवलकानामित्यनेन त एव भिक्षवोऽभिप्रेताः। यास्त्वायतनेषु प्रतिष्ठाप्यन्ते पूज्यन्ते च। तासु तु सूत्रान्तरेण लुक्। तदुक्तम्। अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च। इवे प्रतिकृतौ लोपः कनो देवपथादिविति। अर्चासु शिवः। विष्णुः। चित्रकर्मणि। अर्जुनः। दुर्योधनः। ध्वजेषु। कपिः। गरुडः। सिंहः। हस्तिकानिति। ईदृशमेव विषयमभिप्रेत्य पठन्ति। रामं सीतां लक्ष्मणं जीविकार्थे विक्रीणीते यो नरस्तं च धिक् धिक्। अस्मिन्पद्ये योपशब्दान्न वेति व्यर्थप्रश्नं पण्डितं तं च धिक् धिगिति। द्रव्यं च भव्ये। द्रुशब्दादिवार्थे यत्। समांच तद्विषयात्। कः स्यादिति। इवार्थे इति बोध्यम्। पूगाञ्य इत्यतः प्राक् इवेत्यधिकारात् ॥ ७ कमिति भावः॥ प्रागिवीयानां पूर्णोऽवधिः॥ द्योतक इत्याहुरिति। सूत्राक्षरैः शब्दमर्यादया एतदर्थालाभोऽत्रारुचिः। पूर्वव्याख्याने स्वार्थिकप्रकरणविरोध इति बोध्यम्॥

सा

तद्विषयादित्यस्य तद्विषयसद्भावं प्रकृत्यादित्यर्थस्तथैवं भाष्ये उदाहरणात्तत्फलमाह। शस्त्रीश्यामइति। एकएवेति। पूर्वपदभूतएवशब्दइवार्थविषयो नोत्तरपदभूतस्तद्विषयइत्यर्थः। एकए
वेवार्थइत्यस्य समासस्य पुनर्नेवार्थवृत्तित्विति कश्चिद्भ्राम्येदतः स्वोक्तिं व्याचष्टे। समेति। सएवेत्यर्थः। समासोत्तरमिवार्थयोगसंभवेपि समासे द्वाविवार्थौ नान्तर्भूताविस्यर्थः। स्यातन्मं काकतालः
उपाद्यन्तसंयोगः। काकतालीमस्थान् विग्रहः। काकतालमिवेति। आकरइति। विग्रहस्य भाष्ये दर्शनमत्रारुचिः। समुदायइति। कनन्तइत्यर्थः। कनन्तात् छो नेति भावः। समुदायस्योद्भूतावयवभेदत्वा
शस्त्रीश्यामेत्यादौ त्वेकएवइवार्थः सच समासेन्तर्भूतइति छो न भवति। काकतालीयइति। प्रकृतसूत्रादेवज्ञापकादिवार्थे समासः। सुप्सुपेति वा। उभयथापि विशेषणसंज्ञाविनिर्मुक्तः। स
च च्छप्रत्ययविधयस्स्वते न स्यात्तस्योपाद्यन्तरयोगो विग्रहश्च नेत्याकरः। पूगाञ्ञ्यः। अग्रामणीपूर्वादिति किम्। देवदत्तो ग्रामणीर्येषां ते देवदत्तकाः। स एषां ग्रामणीरिति कन्। अत्र स
मुदायः पूगवचनः। व्रातच्फञोः। उत्सेधजीवित्वं व्रातस्य पूगाद्विशेषः। पार्शवइति। पर्शुरिति जनपदशब्दः ततो पत्ये द्व्यञ्मगधेत्यण् बहुत्वे तद्राजत्वाल्लुक्। पुनः संघवि
वक्षायामनेनाण्। यौधेयइति। युद्ध्यते सौ युधा। युधेरिगुपधलक्षणः कः। युधाया अपत्यं द्व्यचइति ढक्। तदन्तात्संघरूपविवक्षायामनेनाञ्। आद्युदात्तत्वम्। किंच।
यौधेयस्याङ्को लक्षणं वा यौधेयः। संघाङ्कलक्षणेष्वण्। एवं यौधेयादिषु पेटगन्ताः तेषु स —— जनद्वयमूह्यम्। यौधेयाइति। अञो लुक्। अन्तोदात्तम्। पादशलस्य। तद्धि
तार्थइति। समासइति। यद्यपि प्रकृत्युपाधिर्वीप्सा तथापि तु नो दोत्सेति तद्धितार्थो भवत्येवेति भावः। द्वौ द्वौ पादौ ददातीति। समर्पणमात्रमिह ददातेरर्थः। नतु परस्वत्वा
पादनपर्यन्तं तथात्वेहि उत्तरसूत्रविषयत्वं स्यात् ॥७॥ दृढवचनम्। उत्सेधजीवित्वमिति। शरीरायासेनजीवित्वमित्यर्थः। संघविवक्षायामिति। सङ्घलक्षकत्वेइत्यर्थः। आयुध
जीविसंघाद्विलानुवृत्तेरिति भावः। किंच यौधेयस्याङ्कइत्यादिग्रन्थो हरदत्तानुरोधेन। स्त्रीपुंसाभ्यामिति सूत्रे भाष्ये संघाङ्केति सूत्रे ऽप्यपत्यरूपगोत्रस्यैवग्रहणमित्युक्तेरिदं चिन्त्यमप्र
कृत्युपाधिरिति। प्रकृत्यर्थोपाधिरित्यर्थः। समर्पणमात्रमिति। रजकायवस्त्रं ददातीतिवत्। उत्तरसूत्रेति। तत्रव्यवसर्गपदेन मुख्यादानस्यैवग्रहणात्। केचित्तु दानार्थकददातियोगेपि
वीप्साविवक्षायामन्तरङ्गत्वाद्यमेववुन्। तस्य पदान्तरप्रतिपाद्यदण्डव्यवसर्गयोगनिमित्तकत्वेन बहिरङ्गत्वात्। शानुवुन्धोसैवेत्यस्यान्तरङ्गत्वमित्याहुः ॥

आहरिति। अत्रारुचिस्तु सूत्राक्षरास्वारस्यम्। तथाहि सतिव्यवसृज्योरित्येववदेत्। स्त्रीलिङ्गमिति। स्त्रीत्वमित्यर्थः। सूत्रेऽनुल्लेखादिदमयुक्तमत आह। यद्वेति। स्वभावतोनुन्नन्तंस्त्रि यामित्यन्यत्। उभयत्रापीति। उभयवतीत्यर्थः। व्याप्तिरिति। अशेषतः संबन्ध इत्यर्थः। सामिवचनेनेति। प्रकृतेः समस्तत्वे पितद्वयवेनेत्यर्थः। असमस्तत्वे तत्संनिहितेनेत्यर्थः। म केचित्तु व्यवसृजतेर्ङीतोः प्रयोगे सत्येव उत्तरसूत्रस्य प्रवृत्तिमाहुः। दण्डव्यवसर्गयोश्च। अत्राप्युदाहरणे तद्धितार्थ इति समासः स्त्रीलिङ्गं च तद्धितार्थः । यद्वा प्रकृत्यर्थे एव तद्धितार्थः स्वार्थिकत्वाद्वुनः। स्थूलादिभ्यः। प्रकारो भेदः सादृश्यं च उभयत्रापि यथासंभवङ्कन्। चञ्चत्क इति। चञ्चति श्चलनकर्मा। चञ्चन्नेव कश्चिच्चञ्चत्कः। एवं बृहद्विशेषो बृहत्कः। यद्वा अचञ्चन्न बृहन्नपि प्रभाविशेषाच्चञ्चन्निव बृहन्निव मणिविशेषो लक्ष्यते सोऽर्थः। सुरक इति। केण इति ह्रस्वः। छिन्नकमिति। ईषत् छिन्नमित्यर्थः। प्रकृतिवाच्ययाक्रियया क्तप्रत्ययवाच्यस्य साधनस्य व्याप्तिरत्यन्तगतिः सेह नास्ति। न सामिवचने। प्रकृत्यैवेति। सामिवचनेनेत्यर्थः। अषडक्षीणमिति। अविद्यमानानि षडक्षीण्यस्मिन्निति बहुव्रीहिः। अक्षिशब्दोऽत्र श्रोत्रेन्द्रिये वर्त्तते। बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्। मन्त्रो मन्त्रणम्। आशितंगवीनमिति। अश्नातेराङ्पूर्वादाशितः कर्त्तेति ज्ञापकात्कर्त्तरि क्तः। ण्यन्तात्कर्मणि वा। उभयथापि प्रभूतयवसमिति फलितोऽर्थः। अलंपुरुषीणः। प्रतिमल्लादिः। ईश्वराधीन इति। अधिशब्दः शौण्डादिरित्युक्तम्। प्राक्तन इति। अवक्षेपणे कन्निति विहितात्। प्राग्वुन इति। पादशत इति विहितात्। आमांद्य इति। किमेत्तिङव्ययघादामित्यादयः। बृहतीजात्यन्ता इति। बृहतीशब्देन बृहत्याआच्छादन इति विहितः कन्नुपलक्ष्यते। जात्यन्तशब्देन जात्यन्ताच्छेतिच्छः। बहुवचननिर्देशात्पाशबादीनां ग्रहणम्। यो हि वैयाकरणपाशादिशब्दैरर्थः प्रतीयते न सो प्रकृतिमात्रेण अतस्तेपि तमबादिवन्नित्याए वेतिस्थितमाकरे। मूलेऽवाचकप्रयोगस्तु आर्षग्रन्थानुवादत्वान्न दोषाय। विभाषाञ्चेः। दिक्चासौ स्त्री चेति कर्मधारयः। प्राचीना ब्राह्मणीति ॥

न्त्रणम्। कर्त्तव्यार्थविषयो विचारः। न तु गायत्र्यादिमन्त्र इत्यर्थः। योहीति। क्रुत्वादिरूप इत्यर्थः। आकरे। अत्रैव कैयटादिग्रन्थे। ध्वनितं चेदृशानां नित्यत्वं नित्यं कौटिल्ये गतावित्यत्र भाष्ये। डतरडतमयोस्त्वत्यन्तस्वार्थिकत्वेन ताभ्यां विनापि प्रकृत्यास्वार्थप्रतिपादनं शक्यं कर्त्तुमिति तयोर्न नित्यत्वम्। अवाचकेति। बृहतीशब्दे हि कनोऽवाचक इत्यर्थः ॥

स॰श॰ २३९

क्रियेत्यादि।प्रकर्षेणगतिशीलः पूर्वदेशस्यापूर्वकालिकीतिचार्थप्रत्ययात्।संख्यावाचित्वेपीति।अपिनारुचिर्बोधिता तद्बीजंतु बहुशब्दवन्नायंसंख्यावाची।अतएवबहुगणेतिसूत्रेबह्वादीन्प्रकृत्यासंख्यासंख्येत्याहिसंख्यावदितिगम्यतेइतिभाष्येउक्तम्।संख्यात्वंचनियतविषयपरिच्छेदविशेषहेतुत्वम्।नचबहुत्वादौतत्।बहुत्वादिकंचत्र्यादिसंख्याव्यापको धर्मविशेषः।क्रियानिमित्तोदेशकालनिमित्तोवा।अयंशब्दः।प्राचीनमिति।प्राच्यांदिशिइत्यर्थेदिक्शब्देभ्यइत्यस्तातिः।अञ्चेर्लुगितिलुक्।लुक्तद्धितलुकीतिङीपोलुक्।तद्धितश्चासर्वविभक्तिरित्यव्ययत्वात्स्त्रीत्वाभावः।खेतुकृतेस्वभावान्नपुंसकत्वम्।ब्राह्मणजातीयइति।भावप्रधानोब्राह्मणशब्दः ब्राह्मणत्वजात्याधारभूतःपिण्डइत्यर्थः।ब्राह्मण जातिरितिषष्ठीतत्पुरुषः।भावप्रधानेनसहकर्मधारयोवा।जातिरिति।अयंभावः।बन्धुशब्दोद्विविधः।रूढोयौगिकश्च।तत्राद्येज्ञात्यादिषुप्रसिद्धःआप्तपर्यायःपुल्लिङ्गएव।सनेहगृह्यते।बन्धुनीतिनपुंसकनिर्देशात्।किंतुक्रियाशब्दोयम्।बध्नातेऽस्मिन्जातिरितिविग्रहः।शृस्वृस्निहीत्यादिनाअधिकरणेउप्रत्ययः।पितृस्थानीयइति।स्थानंसंबन्धविशेषः।पदमितियस्यप्रसिद्धिः।पितुरिवस्थानमस्येतिबहुव्रीहिः।गोस्थानमिति।स्थानंदेशः।इतिकरणोविवक्षार्थः।तेनतुल्यस्थानशब्दात्छोन।अनुगादिनः।अस्मादेवनिपातनात्स्थिनिरितिइहउत्तरसूत्रेचहरदत्तः।वस्तुतस्तुसुप्यजातावितिसूत्रेणैवात्रणिनिरितितत्रैववक्ष्यामः।संख्यायाः।अभ्यावृत्तिशब्देनद्वितीयादिप्रवृत्तिग्रहणेषट्कृत्वःप्रवृत्तौपञ्चकृत्वइतिस्यात्।अतोत्रविवक्षितमर्थमाह।अभ्यावृत्तिर्जन्मेति।भूरिवारानिति।भूरिशब्दस्यलौकिकसंख्यावाचित्वेपिनेहग्रहणम्।बहुगणेतिसूत्रेबहुगणस्यनियमार्थत्वात्।अनियतसंख्यावाचित्वेइवतितर्हिबहोरेवेतिनियमशरीरम्।रूपेविशेषाभावेऽपिवस्तुगतिमनुरुध्याहसंयोगान्तस्येति।प्राचोग्रन्थंनिरस्यति।नत्विति।यदिसोरुकारउच्चारणार्थस्तर्हिनिरनुबन्धकत्वात्सएवग्राह्योनतुसुच्।यदितुउकारइत्तथापिसुज्ग्रहोदुर्लभः।सुचउकारस्योच्चारणार्थत्वात्।अथायमपिइत्संज्ञकइतिदुराग्रहः तथापितदनुबन्धक परि भाषयादोषएव किंचसुतिसीतिसाहचर्याद्विभक्तयएवतत्रगृह्यन्तेतदाह।सिचइवेति।बहुधादिवसस्यभुङ्क्ते इति।कृत्वोर्थप्रयोगेकालेधिकरणइतिषष्ठीइतिहरदत्तः॥ ७ एवंचबहुगणेतिसूत्रंविस्पष्टार्थमेवेति।दुर्लभइति।अनुनासिकत्वविशिष्टस्यैवतत्रग्रहात्इतिभावः।अयमपीत्संज्ञकइति।विधेयविषयेउच्चारणार्थस्यापीत्संज्ञालोपावितितस्यलोपइतिसूत्रेभाष्योक्तेरितिभावः ॥

राम॰ २३९

निष्कर्षविरोधादिति। तत्सूत्रस्य तदीयनिष्कर्षविरोधादित्यर्थः। द्विवस्तदर्थस्येत्यादौ प्रेष्यब्रुवोरित्यत्र च शेषइत्यस्य — निरस्या कृत्वोर्थेति सूत्रेपि तस्यासंबन्ध इति हरदत्ताशयोत्रेत्यन्ये। प्रथमान्तादिति। प्रचुरार्थबोधकात् इत्यर्थः। तदाह। प्रकृतेद्योत्य इति। तद्ग्रहणं व्यर्थमिति। प्रकृतवचने वर्त्तमानस्य प्रथमान्तत्वमेव संभवतीति भावः। उच्यमानतेति। न चैवं वचनशब्दीयप्रकृतिप्रत्ययार्थयोः प्रकृत्यर्थस्य मयट्प्रकृत्यर्थविशेषणतात्ल्युडर्थस्य विधेयप्रत्ययविशेषणतेत्यस्यान्याय्यत्वमिति वाच्यम्। प्रकृतेति लुप्तसप्तम्यन्तं भिन्नं पदं वचने इति च प्रत्ययार्थः। कस्य वचनाधिक

एतच्च प्रामादिकं शेषाधिकारबलेनाष्टसूत्र्याः समासनिवृत्तिफलकतया तिङन्तेनोदाहरणमिति प्रागुक्तनिष्कर्षविरोधात्। तत्प्रकृतवचने मयट्। प्राचुर्येणेति। यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढः तथापीह वचनग्रहणादयं विशेषो लभ्यते। तद्धियादृशस्य प्रकृतस्य लोके मयटा वचनं प्रत्यायनं तत्र यथा स्यादित्येवमर्थम्। आद्येति। प्रथमान्तात्प्रकृते द्योत्ये प्रत्ययः स्वार्थिकत्वात्प्रकृतितो लिङ्गम्। अस्मिन्पक्षे तद्ग्रहणं व्यर्थम्। द्वितीये इति। अस्मिन्पक्षे उच्यमानता प्रकृतता च प्रकृत्यर्थविशेषणं ल्युटोक्तमधिकरणत्वं तु मयडर्थः। अतएव विशेष्यनिघ्नता। तदाह। अन्नमयो यज्ञ इति। अन्नं प्रकृतमुच्यतेस्मिन्नित्यर्थः। यत्तु प्राचोक्तं तदिति प्रथमासमर्थात्प्राचुर्येण प्रस्तुतमन्नेत्यर्थे मयट् स्यादिति। यच्च व्याचख्युः प्राचुर्येणेत्यादि प्रत्ययार्थविशेषणमिति। तत्रेदं वक्तव्यम्। वच्यर्थत्यागान्न्यूनता अधिकरणस्य क्रियासाकाङ्क्षत्वेन तदध्याहारे गौरवं चेति मूले दोषः। टीकायां तु प्रकृत्यर्थेति वक्तव्ये प्रत्ययार्थेत्युक्तिः रभसकृता आकरविरुद्धा चेत्यास्तां तावत्। निपातसमुदाय इति। उपदेशपारंपर्ये वर्त्तते ॥ ९७

रणइत्याकाङ्क्षायां प्रकृत्यर्थस्यैव लाभात्तस्यैवोच्यमानतेत्याशयेनैवमुक्तेः। ल्युटोक्तमिति। ल्युडन्तोक्तं वचनाधिकरणत्वमित्यर्थः। मयडर्थ इति। न चैवं स्वार्थिकप्रकरणविरोधः। आद्ये तत्प्रकरणपाठस्य चारितार्थ्यात्। वस्तुत उच्यमानता प्रकृत्यर्थस्य प्रासङ्गिकी। अतएव निजामयोध्यामपि पावनीमयं भवन्नयोध्यापतिनावनीपतिरिति सिद्धम्। भवतीप्रचुर इति हि तत्रार्थः। भवत्या पूर्णहृदय इति यावत्। अतएवानन्दमयाधिकरणे विकारशब्दान्नेति चेन्न प्राचुर्यादिति सूत्रं तन्मयट्परतया वृत्तिकृद्भिर्व्याख्यातम्। न हि तत्रोच्यमानता स्वारसिकी भातीति दिक् ॥

नूचनाच्चेति।सुप्सुपेतिसमासस्तेन प्रातिपदिकत्वमित्यन्ये।कण्ड्वादियगन्तादिति। नेतेभ्यः कर्तरि क्विप्। दृश्यत इति कण्ड्वादिसूत्रस्थभाष्यं तु अजन्तकण्ड्वादिपरम्। तत्रैवानिष्ठानां प्रागुद्भा-
वितत्वात्।कण्डूरित्यादौ कर्त्रर्थो न वगमात्तेभ्यः क्विबिति तदाशयं कैयट आह। नच प्रकृते तत् दृष्टं। भिषगित्युक्ते कर्त्रर्थावगमादित्याशयः। पितर एव देवतेति। त्यज्यमानद्रव्योद्देश्या इत्य-
र्थः। अत एव सूत्रा देवताशब्दस्य परनिपातः। फलान्तरमाहेति। एवं च तत्रा जिति पाठे पि न दोष इति भावः। स्वसमानाधिकरणेति। अत्र सामानाधिकरण्यं देशिकं ग्राह्यम्। तेन यावद्द्राश्रयम-

वचनाच्चा प्रातिपदिकादपि प्रत्ययः। भेषजमिति। भिषज्यतेः कण्ड्वादियगन्तात् क्विप्। भिषक्। भिषजामिदं भेषजम्। अस्मादेव निपातनादेकारः। पितृदेवत्यमिति। पितर ए-
वदेवतेति कर्मधारयः ततो यत्। अर्घ्यमिति। मूल्ये पूजाविधावर्घ इत्यमरः। आग्नीध्रमिति। अग्नीधः शरणे रण्भं चेति अन्तोदात्तं शैषिके शुण्ड्यादित्वं तस्मादञ्। आद्यु-
दात्तत्वं फलम्। फलान्तरमाह। स्त्रियामिति। समानं धारणमस्याः साधारणी। अनेकं प्रत्यविशिष्टसंबन्धात्। पृषोदरादित्वात् समानस्य सभावः। ततोऽञ्। ङीप्। अञभा-
वे टाप्। वर्णे चानित्ये। अनित्यत्वमिह स्वसमानाधिकरणध्वंसप्रतियोगित्वम्। अत एव रक्ते इत्युत्तरसूत्रं सार्थकम्। लाक्षादिना रक्ते लोहितस्य यावदाश्रयमव-
स्थानेन नित्यतया पूर्वेणासिद्धेः। लिङ्गबाधनं चेति। प्रातिपदिकात्तद्धिता इति पक्षे प्रतिपदविधानमात्रेणापवादत्वमिति पक्षं चाश्रित्येदं वार्त्तिकम्। अत्र च वेत्ये-
व विधेयं शिष्टानुवादः प्रतिपदविहितेन कना लिङ्गनिमित्तस्य प्रत्ययस्य नित्यं बाधः प्राप्तः स वा वक्तव्य इत्यर्थः। न च ङ्याप्प्रग्रहणसामर्थ्यादिष्टसिद्धिः। एतश्चेत-
शब्दाभ्यामत्यन्तस्वार्थिके कनि प्राप्ते तद्बाधेन चरितार्थत्वात्। वस्तुतस्तु सुबन्तात्तद्धिताः निरवकाशत्वेनैवापवादत्वं तथा चेदं वार्त्तिकं न कर्त्तव्यम् ॥

नवस्थितमित्यर्थः। यावदाश्रयमवस्थानेनेति। रञ्जनद्रव्यान्तरेण वर्णान्तरानुत्पादने इति शेषः। यद्वा पूर्वरूपाणामभिभव एव तत्र न तु नाश इति भावः। प्रातिपदिकात्तद्धिता इति।
अत्यन्तस्वार्थिकादिति शेषः। इति पक्षे चेति। अन्तरङ्गत्वाद्बाधकत्वमित्यपि बोध्यम्। स्त्रीत्वनिरपेक्षत्वेनास्यान्तरङ्गत्वम्। प्रतिपदेति। अन्तरङ्गेणेत्यपि बोध्यम्। इत एव ज्ञापकाद-
त्यन्तस्वार्थिकानारभ्य ङ्याबिति निवृत्तमिति भाष्यानुसारी मार्गः। न चेत्यादिरक्तो चाभेत्यन्तं तु रक्षिताद्यनुरोधेनेति दिक् ॥

ह्रस्वत्वंचेति।दीर्घस्येतिशेषः।लुक्यपिश्रवणार्थमिति।इदमित्वप्रकरणस्थकेपटानुरोधेन।वक्तुमुचितमिति।मात्रालाघवपर्यालोचनेइतिशेषः।तिङ्श्चेत्यस्यमण्डूकानुवृत्तिकल्पनेतमाद्यपि प्राक्कनोनित्यादितिमच्छब्दसाधुत्वायैषामग्रहणायव्याख्यानाश्रयणेचगौरवंयद्यालोच्यतेतदानवक्तुमुचितम्।एतेनगोष्ठात्खञितिसूत्रोक्तरीत्यारूपपोनेनाबाधार्थमेवैवंपाठःस्यादितिरूपपोऽपवादइत्ययुक्तमित्यपास्तम्।प्रायिकंचेति।व्यवस्थितविभाषामूलकत्वादितिभावः।व्याचक्षतइति।यदितुसमासपदंसंज्ञापरंतदानिर्देशादेवशसित्यन्ये।

अतएवङ्याब्ग्रहणंव्यर्थमितिस्वप्नीतिरूपंप्रबलमितिअवोचाम।उपायेति।उपायशब्दष्ठकंलभतेह्रस्वत्वंचेत्यर्थः।अकस्मादितीहपठ्यतेतद्वान्तंनतुतान्तंतेनकादेशोन।अव्ययत्वाट्टिलोपः।आकस्मिकम्।वाचिकमिति।अतिवर्तन्तेअपिस्वार्थिकाःक्वचिल्लिङ्गमितिनपुंसकत्वम्।मृदस्तिकन्।प्रत्ययस्यादित्येवसिद्धेइकारोच्चारणंप्रक्रियालाघवार्थम्।टापोलुक्यपिश्रवणार्थंच।पञ्चभिर्मृत्तिकाभिःक्रीतःपञ्चमृत्तिकोघटः।सस्नौ।इहप्रशंसायांरूपप्इत्यस्यानन्तरंरेकज्येष्ठाभ्यांतिल् तातिलौचच्छन्दसिमृदःसस्नौतिकंश्चेतिवक्तुमुचितम्।तथातुनकृतमित्येव।बहूल्पार्थात्।कारकात्किम्।बहूनांस्वामी।अर्थग्रहणात्पर्यायेभ्योविशेषेभ्यश्चभूरिशोददातीतित्रिंशः।मङ्गलेति।प्रायिकंचैतत्।अन्यत्रापिहिदृश्यते।अपेतापोढमुक्तपतितापत्रस्तैरल्पशइतिकारकत्वंतुसमसनक्रियांप्रतिपन्नस्याःकर्मत्वात्।तदभिधायित्वाच्चाल्पशब्दस्य।तथाचव्याचक्षते।अल्पापञ्चमीसमस्यतइति।परिमाणशब्दादिति॥तथाचएकवचनग्रहणेनवृत्तावेकार्थतानियता: परिमाणशब्दाएवगृह्यन्तेइतिभावः।अतएवप्रत्युदाहरति।घटंघटमिति।घटाद्वयोहिजातिशब्दानेकार्थाभवन्ति।जातियोगस्यएकानेकसाधारणत्वात्।किंत्वभेदैकत्वसंख्यासुपादइते।एतच्चसर्वंजयादित्यमतेनोक्तम् ॥ ७७ एकार्थेतेति।वृत्तावेकत्वसंख्याविशिष्टस्यैवार्थस्यबोधकाइत्यर्थः।नेकार्थाइति।एकत्वविशिष्टस्यैवार्थस्यबोधकानेत्यर्थः।किंत्वभेदैकत्वसंख्यामिति।भेदशब्देनैतत्सहचरितंद्वित्वादिएकत्वंचनोपादइतइत्यर्थः।एतच्चान्यत्रप्रपञ्चितम्।एवंचवृत्तिजन्यबोधेसर्वथासंख्यायाअभानेपिपश्चान्मनसाप्रत्यक्षाइत्यादावेकत्वविशिष्टस्यैवभानंशब्दशक्तिस्वभावादितितत्रैवशास्इतिभावः।घटशब्दानुघटंघटमितिवत्।घटौघटौददातीत्यपिबोधोदुर्वारइतितात्पर्यम्।जयादित्येति।प्रथमद्वितीयपञ्चमषष्ठाजयादित्यकृतवृत्तयः।इतरेवामनकृतवृत्तयइत्यभियुक्ताः ॥

जातिशब्देभ्योपीति। तेभ्योपि वृत्तौ पश्चान्मनसैकत्वविशिष्टस्यबोधइतिभावः।अतएवपदशः स्वरशइति शिष्टप्रयोगः।नह्यत्रेति। एवंभूतानांब्राह्मणानांसहस्रस्यापिपरिषत्वंनविद्यतइतित
दर्थादितिभावः।वीप्सायास्त्वेवेति।एवमेवयुक्तम्।तेषामत्यन्ताप्रुङ्खत्वस्यप्रतिपाद्यत्वात्।द्व्यचोऽवरमिति।द्व्यजपेक्षयान्यूनमित्यर्थइति तद्व्याख्यातारः।द्व्यचोनस्यंभावीति।नतुततोन्यूनतेति
वामनस्तुमन्यतेजातिशब्देभ्योपिभवत्येवेति।तथाचजश्शसोश्शिरितिसूत्रे जसासहचरितस्यशसोग्रहणादिहनभवति।कुण्डशोददाति।वनशः प्रविशतीति।अथकथंमेकैकशः पि
तृसंयुक्तानिइतिद्विर्वचनशसोः सहप्रयोगइतिचेत्।छन्दोवदृषयः कुर्वन्तीतिहरदत्तः।अतएवसुपइतिसूत्रेएकैकशइतिप्राचोग्रन्थः प्रामादिकइत्यवोचाम।द्वयोर्द्वयोरिति।
कथंतर्हिअव्रतानाममन्त्राणांजातिमात्रोपजीविनाम्।सहस्रशस्समेतानांपरिषत्वंनविद्यतेइति।नह्यत्रवीप्सास्तिनापिकारकत्वमितिचेत्।अत्राहुः।सहस्रंसहस्रंयेसमेताः तेषामपिप
रिषत्वंनेत्यर्थः।तथाचसमवायक्रियांप्रतिकर्तृत्वंवीप्साचास्त्येवेति।एतेनएकशएकवचनादिसंज्ञानिस्युरितिव्याख्यातम्।एकशब्दार्थस्यअस्तिक्रियांप्रतिकर्तृत्वात्।क्रस्ततः प्रती
ति।प्रतिनिधिप्रतिदानेचयस्मादितिपञ्चमी।आद्यादिभ्यइति।तस्मादितउदात्तमर्धह्रस्वमित्येतदत्रलिङ्गम्।वक्तव्यमिति।वृत्तिकारस्तुअभूततद्भावइतिसूत्रमद्येप्रचिक्षेप।अहर्मनः।
च्विश्चेति।पूर्वेणसिद्धस्यापिच्वेरनुवादोयंलोपस्यतत्सन्नियोगशिष्टत्वार्थम्।विभाषासातीति।विभाष्यतेविकल्प्यते इतिविभाषा।गुरोश्चहलइत्यकारः ततष्टाप्।नत्विदमव्ययम्।द्वयोर्विभाषयो
र्मध्येपयसस्तुविभाषयेत्यादौविभक्तेर्दर्शनात्।डाचिविवक्षितइति।परस्परम्यांतुअन्योन्याश्रयःस्यात्।डाचिकृतेद्वित्वेसतिद्व्यजवरार्द्धतात्स्यांचसत्यांडाजितिभावः।खरटखरटाकरोती
ति।खरटदित्यस्यद्वित्वादिपूर्ववत्।द्व्यजवरार्द्धादित्युक्तेऽत्रनस्यात्।नह्यस्यार्द्धंद्व्यच्।किंतुत्र्यच्।यत्तुप्राचोक्तंटिलोपेसतिद्व्यचोवरंयत्तदर्द्धंयस्येतितन्न।सत्यन्तस्यनिर्मूलत्वात्।खरटखरटाक
रोतीत्यादौअव्याप्तेश्चायदपिव्याचख्युः।परमापकर्षेक्रियमाणेद्व्यचोऽवधंभाव्यपकर्षोविवक्षितइत्याह।टिलोपेसतीत्यादि।तदपिउक्तदोषादाकरविरोधाच्चोपेक्ष्यम्।बीजेनसहेति।वृत्ति
विषयेबीजशब्दोबीजावापसहितेविलेखनेवर्तते।समयाच्च।कालंयापयतीत्यर्थइति।हरदत्तस्त्वाह ॥ तदर्थः।उक्तदोषात्।सत्यन्तस्यनिर्मूलत्वरूपात्।पटपटाकरोतीत्यस्यासिद्धिश्च।टिलो
पेसतुतदर्द्धस्यैकाच्त्वात्इतिबोध्यम्।वर्ततेइति।एतेनबीजेनसहभुवः कर्षणेबीजानामपिकर्षणेदृष्टासिद्धिःकर्मकस्येत्यपास्तम्।इत्यर्थइतीति।वृत्तौसमयशब्दस्तद्यापनेवृत्तिः।भूस्यादिःकर्त्री

कृष्यैकालसमयंयापयतीतिभावः ॥

समयोनियमइति।निर्णयस्तस्यापनायामित्यर्थः।कर्त्तव्यस्यावसरप्राप्तिःसमयः।सएवनियमइत्यन्ये।कर्मव्यापारेत्यादि।निवृत्तप्रेषणादित्यर्थः।हेतुमण्णिचि।पुनस्तत्रैवव्यापारेइत्यर्थः॥ इतितद्धितप्रक्रिया॥इत्येवमादीनामिति।साकाङ्क्षत्वादित्यनेनान्वयः।स्वरूपेति।द्वेइतीत्यादिः।ननुवाक्यधात्वोर्द्वित्ववारणायावश्यकेनपदस्येत्यपकर्षणेनैवसिद्धेसर्वस्येतिव्यर्थमतआह।सर्वशब्दस्येति।ननुक

समयोनियमः॥अद्यकर्त्तव्यत्वेननिर्णीतमर्थंविघटयितुमद्यमेपारवश्यंश्वोस्यसमयः इत्येवंयोबहुषुदिवसेष्वाहसएवमुच्यतेइति।सपत्रनिष्पत्रात्।पतत्यनेनेतिपत्रम्।शराणांपुंखगतोबर्हः।सपत्रंनिष्पत्रंवाकरोतिभूतलमिति।पत्राणिपर्णानि।शूलात्पाके।पाकेकिम्।शूलंकरोतिकदन्नम्।शूलमुदररोगः।सत्याद्शपथे।भाण्डरत्नादिद्रव्यजातम्।क्रेतव्यमिति।मयैतद्ग्राह्यमितिबुद्ध्यापरीक्षादिनासत्यंकारद्रव्यप्रदानेनचदृढंकरोतीत्यर्थः।तथैवतथ्यम्।पादार्घाभ्यांचेतिचकारस्यानुक्तसमुच्चयार्थत्वात्स्वार्थेयत्।परिवापणमिति।

कर्मव्यापारमात्रवाचिनोवपेर्हेतुमण्णिचिल्युट्।मङ्गल्यमुण्डनेनेति।चौलदीक्षादेः।भद्राच्चेति।भद्रादित्यर्थग्रहणमितितुनोक्तम्।मङ्गलादिभ्योपिप्रसङ्गात्।इतितद्धितप्रक्रिया॥सर्वस्यद्वे।नित्यवीप्सयोरित्येवमादीनांविधेयकार्यिणोरनिर्देशेनसाकाङ्क्षत्वात्स्वरितत्वाच्चाधिकारोयम्।तदाहद्वेइत्यधिकृत्येति।एतदर्थरूपमधिकृत्येत्यर्थः।स्वरूपग्रहणंतुनभवति।नाम्रेडितस्यान्त्यस्यतुवेतिलिङ्गात्।सर्वशब्दोऽवयवकात्स्न्र्येसर्वावयवोपेतस्यद्वित्वंनतुकश्चिदप्यवयवोवर्ज्यइत्यर्थः।इहद्वेइत्यस्यसंख्यापेक्षायांशब्दरूपेगृह्येते।शब्दानुशासन प्रस्तावात्सर्वस्येतिस्थानषष्ठी।सोयंस्थानेद्विर्वचनपक्षः।यदितुउच्चारणमेवसंख्येयंतदास्थान्यादेशभावोनास्ति।निवृत्तिधर्माहिस्थानी।सर्वंचेन्निवर्त्तेतकिमुच्चार्येतअतःसर्वस्येतिअध्याहृतोच्चारणशब्दापेक्षयाकर्त्तृकर्मणोःकृतीतिकर्मणिषष्ठी।सर्वंद्विरुच्चारयेदितिफलितोर्थः।सोयंद्विःप्रयोगोद्विर्वचनमितिपक्षः।नन्वाद्येपक्षेस्थानिवद्भावेनसमुदायस्यैवपदत्वंस्यात् नावयवयोःततश्चपदकार्याणिनस्युः ॥ ७ ष्विदिति।यद्यपिविनिगमनाविरहेणैकाज्द्विर्वचनन्यायेनसर्वावयवद्वित्वंसिद्धं॰तयास्यद्वित्वस्यस्थानेद्विर्वचनत्वलाभार्थंपुनस्तदुच्चारणम्।अन्यथाषाष्ठद्वित्ववद्द्विःप्रयोगएवस्यादितिबोध्यम्।तदाह।सर्वस्येति।स्थानषष्ठीति।तेचशब्दरूपेप्रत्यासत्त्यास्थानेन्तरतमपरिभाषयाचस्थानिसमानाकारपदरूपेएवेतिबोध्यम्।कर्मणिषष्ठीति।एवंचस्थानषष्ठीत्वाभावेनतस्यस्थानिनाप्रसक्तिरेवेतिबोध्यम्।पूर्वरूपत्वमित्यादौ नीतिपाठः ॥

प्रत्युक्तप्रेतेति।अज्ञायमानेत्यर्थः।द्विर्वचनमनुपपन्नंस्यादिति।द्विरितिसुजन्तमेवोच्येतेतिभावः।द्विरावृत आदेशोभवतीत्यर्थः।द्वेपदेइति।तेचोक्तरीत्यास्थानिसदृशाएवेतिनदोषः।प्रत्येकंपदसं
ज्ञेतितेनाग्रेग्र इत्यादौपूर्वरूपादिसिद्धम्।एकान्नद्विर्वचनन्यायस्यतुनविषयः।समुदायपदत्वेनावयवानामननुग्रहात्।प्रत्येकमपिविहितत्वबुद्धिसत्त्वेनतदसत्त्वेश्च।नचानेकपदान्तरत्व
स्यापिसत्त्वेनकथंमापचसिपचसिदेवदत्तेत्यादावेकान्तरतेतिवाच्यम्।विशिष्टस्यापिवक्ष्यमाणरीत्यापदत्वेनेकान्तरेभवतीतिविशिष्टार्थसत्त्वेनादोषात्।द्विःपठ्यतेइति।द्विःप्रयुज्यतेइत्यर्थः।अर्थ
भेदाभावादितिभावः।ततश्चयस्मादिति।यःपरस्मात्तिङ्सपूर्वस्मादपिभवतीतिभावः।लक्ष्यभेदाद्वित्वासूर्वप्रवृत्तत्वेपिलक्ष्येलक्षणस्येतिन्यायस्याविषयः।यत्तुप्रथमसिपःप्रकृतिमध्येप्रवेशेनतद्ग्र
तद्यथा।अपचन्नपचन्नितिङमुट्।वृक्षान्वृक्षानितिपदान्तस्येतिणत्वनिषेधः।अग्रेअग्रेएङःपदान्तादितिपूर्वरूपत्वमित्यादि।किंचापदान्तत्वप्रयुक्तानिकार्याणिस्युः।तद्यथा
अश्नींताश्नीत।अतोगुणेइतिपररूपंस्यादितिचेत्।अत्राहुः।यदिप्रत्यस्तमितावयवभेदःसमुदायएकएवआदेशःस्यात्द्वेइतिद्विवचनमनुपपन्नंस्यात्।अतोद्वेइतिवचनात्एकस्य
पदस्यस्थानेद्वेपदेसमुदितेयुगपदादेशेनविधीयेते।तत्रस्थानिवद्भावेनसमुदायस्यपदत्वम्।अतएवचावयवयोरपीतिनकश्चिद्दोषः।द्विःप्रयोगपक्षेतुप्रत्येकंपदसंज्ञास्त्येव।समुदा
यस्यत्वित्थम्।पचसिपचसीत्यादौहिसएवधातुःप्रत्ययश्चद्विःपठ्यते।ततश्चयस्मात्प्रत्ययोविहितःतदादितदन्तमितिविधीयमानापदसंज्ञासमुदायस्यापिवर्त्तते।तेनावग्रहादिसिद्धि
ति।यद्यपीहसमुदायस्यैवपदत्वंनावयवानामितिभाष्यस्वरसस्तथापिभाष्यंभङ्क्त्वानेयमवयवेपदकार्याणांप्रागुक्तानांनिर्वाह्यत्वात् इत्यन्यत्रविस्तरः॥७॥ हणाद्वितीयपक्षःप्रत्ययमध्यपा
तेनतद्ग्रहणेनग्रहणाद्वासमुदायस्यपदत्वमिति।तन्न।एकैकस्यैकप्रकृतितादिपर्यायाधिकरणत्वेनतत्समुदायमध्यपतितस्यतद्ग्रहणेनग्रहणायोगात्।तदन्तसंज्ञासूत्रेभाष्येस्यन्यायस्यनेदमदसोर
कोरितिज्ञापकमूलकत्वोक्त्याशास्त्रीयमध्यपातविषयत्वाच्च।पौनःपुन्यमित्यादितुकृताष्टमिकद्वित्वात्प्रातिपदिकत्वेपिकस्कादिषुकौतस्कुत शब्दपाठेनतद्धितइतिज्ञापनेनसिद्धमितिभावः।ते
नेति।अवयवस्यपदत्वेनेत्यर्थः।पुनःपुनर्ज्ञायमानापुराणीत्यादौपदावयवत्वविशिष्टपदत्वेनावग्रहसिद्धिः।अवान्तरपदत्वेएवावग्रहादितिभावः।आदिनापौनःपुनिकइत्यत्रसमुदायस्यसुबन्तत्वा
त्तत्सिद्धेःसंग्रहइत्यभिमानः।भाष्यस्वरसइति।समुदायवाक्यपरिसमाप्तिस्तयापदत्वमितिहितत्रोक्तम्।भङ्क्त्वेति।नयापिपदत्वमित्येवमित्यर्थः ॥

नित्यतायामिति। पौनपुन्य इत्यर्थः। बाध्येतेति। भृशार्थ इति वक्तव्ये क्रियासमभि   हारग्रहणं तु एतदपकर्षे एव ज्ञापकमिति भावः। परिगृहीतसाधनेति। तिङन्तवाच्येत्यर्थः। तिङन्तस्यैवलोकेऽर्थबोधकत्वेन प्रतीतस्यैव चार्थस्य बहिर्भूताभीक्ष्ण्याद्याकाङ्क्षासंभवादिति भावः। नानाकारकेति। आभीक्ष्ण्याद्यपेक्षया तदाकाङ्क्षाया अन्तरङ्गत्वेनेति भावः। उक्तमेव विवृणोति। किं चे सर्वस्येति किम्। स्वादिष्विति पदसंज्ञामादयच्चस्साभ्यामित्यादौ प्रकृतिभागमात्रस्य माभूत्। नित्यवीप्सयोः। द्योत्ये इति। नपुंसकमनपुंसकेनेत्येकशेषः। एकवद्भावश्च बोध्यः। पदस्येति। वक्ष्यमाणमिहापकृष्टव्यमिति भावः। तेन नित्यतायां विधीयमानं द्विर्वचनं धातुमात्रस्य न भवति। किंच पदस्योच्यमानं द्विर्वचनं बहिरङ्गमन्तरङ्गं धातोर्यङं न बाधते। अन्यथा हि भृशार्थे सावकाशोयं पौनःपुन्ये परेण द्विर्वचनेन बाध्येत। यत्तु वदन्ति परिगृहीतसाधना क्रियाव्यवहारोपयोगिनी तदनभिधानाच्च धातुमात्रस्य द्वित्वं नेति तच्चिन्त्यम्। उक्तरीत्या नानाकारकविशिष्टक्रियासमर्पकस्य वाक्यस्यैव द्वित्वापत्तेः। किंच भावार्थकलकारान्तानामव्ययकृतां च त्वदुक्तरीत्या द्वित्वं न स्यात्। ननु तत्र नित्यतावगत्यनन्तरं पदान्तरैः साधनाकाङ्क्षापरिपूर्यत इति चेत् तर्हि तत्रैव धातुमात्रस्य द्वित्वं केन वार्यताम्। किंच तद्वदेव कर्तृकर्मलकारस्थलेपि धातुमात्रद्वित्वं दुर्वारमित्यास्तां तावत्। नन्वेवं पदाधिकारस्यापकर्षे सगतिकस्य द्विर्वचनं न स्यादिति चेन्न। वार्तिककारवचनादेव तत्सिद्धेः। तवापि ह्येषैव गतिः। यत्तु वदन्ति प्रपचति प्रपचतीत्यादौ धातूपसर्गसमुदायः क्रियाविशेषवाची अडादिव्यवस्थार्थं परं धातूपसर्गयोः पृथक्कल्पनं तत्त्वं क्रियाधर्मो नित्यता समुदायस्येति तस्यैव द्विर्वचनमित्यादि। अत्रेदं वक्तव्यम्। कल्पितेनैव पृथक्त्वेन यथाडागमः षत्वं द्वित्वं तु व्यवतिष्ठते। एवमाष्टमिकद्वित्वस्यापि प्रवर्तिको वार्येत। क्रियाधर्मो नित्यत्वमित्यपि व्यर्थ उपन्यासः। लकारार्थयोः कर्तृकर्मणोरपि क्रियानिरूप्यतया विशिष्टादेव लकारापत्तेः। तस्य धातुत्वं नास्तीति चेत्। तर्हि न स्युरेवलादयः। तद्विधीनां निरुपसर्गे चरितार्थत्वात्। इदं त्ववधेयम्। सगतिकस्य द्वित्वे एकपद्यं नास्त्येव। अस्थानिनः पदत्वाभावेन आदेशेपि तस्य दौर्लभ्यात् ॥

त्यादि[illegible]त्यतावगत्यनन्तरमिति। यङन्ते साधनसंबन्धात्प्रागपि धातोर्नित्यतासंबन्धदर्शनादिति भावः। आबाधादिविषये वाक्यद्वित्ववारणार्थमपकर्ष आवश्यक इत्यपि बोध्यम्। वार्त्तिकेति। सगतिके[illegible]ति वक्तव्यमिति हि तद्वचनम्। विशिष्टदेव। उपसर्गविशिष्टदेव। आभीक्ष्ण्यस्य क्रियाविशेषधर्मत्ववत्तयोरपि क्रियाविशेषनिरूप्यत्वादिति भावः ॥

म.श. सङ्घातस्य तत्र पदत्वमिति। पचति प्रपचतीत्यस्योक्तरीत्या तिङन्तत्वादित्यर्थः। नस्रतिरिति। नच मन्दप्रति एकस्यैव घटस्य द्विः प्रयोगे घटो घट इत्यादौ अर्थभेदाभावेन पदत्वापत्तौ आम्रघटोयं
२४३ सदर्थ[illegible]रिति त्वत्रैकान्तरताख्यादिति वाच्यम्। अनभिधानात्। ध्वनितं चेदं भाष्ये। ननु तावत तिङन्तत्वेपि तदनन्तरं सति शिष्टत्वान्नत्वरूपस्यापत्तिः। नचेष्टापत्तिः। स्थाने द्विर्वचनपक्षे दुर्लभ न
त्वादिति चेन्न। तस्यक्षेप्युद्भूतावयवभेदसमुदायस्यैवादेशत्वेन समुदायेतिङन्तत्वस्य सुलभत्वेनेष्टापत्तेरित एवचारुचिं तेराह। वस्तुतस्त्विति। पौनः पुन्यमित्यादि। तत्र हि पुनः पुनर्भवितरि
वर्त्तमानात्पुनः पुनः शब्दाद्भावेभावे च प्रत्ययः। अन्तरङ्गत्वादिति। लुक्त्वाचे त्यपि बोध्यम्। एवं च यत्र संघाते पूर्वो भागः पदमिति नियमार्थेन समासग्रहणेना प्रातिपदिकत्वात्स्वत्ययानु

द्विः प्रयोगपक्षेतु प्रथमगतिं विहायावशिष्टस्य समुदायस्य पदत्वप्राप्तं तस्मिन् सत्यपि नस्रतिः। वस्तुतस्त्विह द्विः प्रयोगपक्षो दुर्बलः पौनः पुन्यं पौनः पुनिकइ
ति समुदायात्ष्यञ्ठञोरनुत्पत्तिप्रसङ्गात्। तत्र हि अन्तरङ्गत्वादव्ययात्सुपो लुकि द्वित्वं प्रवर्त्तते। किंच तत्रैकपद्याभावे पुनः पुनर्जायमाना पुराणीत्या दावग्रहोऽ व
पि न सिद्ध्येदित्यत्र विस्तरः। आभीक्ष्ण्यमिति। तद्धि क्रियाविशेषणं तेन तद्द्योतनार्थं द्वित्वं क्रियाप्रधानानामेव न्याय्यं क्रियाप्राधान्यं चाख्याते त्वि कृदि शेषेच॥
अव्ययकृतोभावे इति वक्ष्यमाणत्वादितिभावः ॥ ७ त्स्यापत्तिः। तत्र पदशब्दस्यार्थवत्परत्वमिति भाष्यसंमतपक्षेपि दोष एव। आद्यस्याप्यर्थवत्वात्। बोधावृत्तिस्तुद्य

वित्यादिवन्न, स्थाने द्विर्वचनेतु स्थानिवद्भावात्प्रातिपदिकत्वं, नङिसंबुद्ध्योरिति ज्ञापकेन प्रत्ययलक्षणेनाप्रत्यय इति निषेधाप्रवृत्तिज्ञापनात्स्थानिनः प्रातिपदिकत्वे आदेशेऽतिदेशेन त
त्तौल भ्यात्। कालबोधकप्रातिपदिकप्रकृतिक सुबन्तत्वमप्युद्भूतावयवभेदसमुदायस्यादेशत्वादुक्तरीत्या सुलभम्। अतएवकस्कादिषु कौतस्कुतपाठश्चरितार्थः। ऐकपद्याभावे इ
ति। तदभाववादिनां मते इत्यर्थः। वस्तुतस्तन्मतमसंगतमिति प्रागुक्तमित्याद्यावेव दोषौ बोध्यौ। अन्यत्र विस्तर इति। अयंभावः। यद्यपि कौतस्कुतपाठेन कृताशमिकद्वित्वादप्रातिपदि राम:
कत्वेपि तद्धितोत्पत्तिरित्यपि वक्तुं शक्यम्। तथापि स्थाने द्विर्वचनतायामेव ज्ञापकत्वमुचितमिति ॥ २४३

इतियावदिति। तस्यांयोगरूढोयमितिभावः। प्रयोक्तृधर्म इति। अभिधेयधर्मत्वे हि पीडितवीप्सादिशब्दानामेव स्यान्न गतरक्षादीनां ततश्च शास्त्रस्याल्पविषयत्वं स्यादिति भावः। व्याप्तिरेवेति। न तदिच्छाधीतिभावः। आधिकारिकमिति। बुद्धिस्थपृथक्संख्यायुक्तनानावस्तुविषयमित्यर्थः। पृथक्संख्यायुक्ते इत्युक्तेर्जात्यभिप्रायेण प्रयोगे न द्वित्वम्। एकशेषविषये च न। तच्च तेषां क्रियागुणद्रव्याभ्यां वेर्युगपदन्वये प्रतीयते। तत्र बुद्धिस्थेत्यस्य फलमाह। सर्वेत्यादिना। एवं च सर्ववृक्षसेचनाभावेपि न क्षतिः। पृथक्संख्यायुक्ते इत्यस्य फलं दर्शयितुमाह। एकशेषेत्विति। अ वीप्सायामिति। व्याप्तुमिच्छा वीप्सा। व्याप्तिं प्रतिपिपादयिषेति यावत्। सा च प्रयोक्तृधर्मः आबाधवत्। गतगत इत्युक्तेपि प्रियस्य विरगमनादिना पीडितो वाक्यं प्रयुङ्क्ते इति यथा प्रतीयते तथा वृक्षवृक्षं सिञ्चतीत्यादावपि व्याप्तिं बुबोधयिषोरिदं वाक्यमित्यवगमात्। शाब्दबोधविषयस्तु व्याप्तिरेव सा च कार्त्स्न्यम्। तच्च आधिकारिकं सर्वे ब्राह्मणाः आमन्त्रिता इत्यादौ यथा। न हि सा शास्त्रीयादिप्रयोगेपि असंकुचं द्रष्टुं नितानिपन्तु शक्या। उपपदादिमहिम्ना संकोचस्यावश्यकत्वात्। यत्र तु संकोचकं नास्ति तत्रासंकोच इष्ट एव। जातोजातो निधनमुपैतीति च। न चैवं वृक्षंवृक्षमित्यादौ बहुवचनप्रसङ्गः। बहूनां भानेऽपि बहुत्वसंख्यायास्तत्राभानात्। प्रत्येकनिष्ठमेकत्वमेव हि तत्र भासते। अत एव प्रत्येकं विधेयसंबन्धो लभ्यते। तथाहि। ब्राह्मणाय ब्राह्मणाय शतं देयमित्युक्ते प्रत्येकं शतं दीयते। एकशेषे तु नैवम्। ब्राह्मणेभ्यः शतं देयमित्युक्ते नियमेन प्रत्येकं शतं देयमित्यर्थस्यालाभात्। अत एवैकशेषे एकवचनं न। यदा तु परिगृहीतद्वित्वानां वीप्सा तदा ब्राह्मणाभ्यां ब्राह्मणाभ्यां शतं देयमिति भवत्येव। एवं त्रिभ्यस्त्रिभ्यः इत्याद्यप्यूह्यम्। तदयं निर्गलितोर्थः। द्विर्वचनैकशेषयोरनेकप्रतीतिर्नियता। किंतु आद्ये एकत्वं द्वित्वं बहुत्वं वा व्यवस्थितमेव प्रतीयते पदार्थकार्त्स्न्यं च। द्वितीये तु द्वित्वबहुत्वे एव प्रतीयेते। कार्त्स्न्यं तु नेति। स्यादेतत्। परिगृहीतैकत्वानामपि बहुत्वमभिधातुं द्विर्वचनादुत्तरकालं बहुवचनोत्पत्तिरस्तु। तथा हि। एकशेषे यथान्येषामर्थः शिष्टेन गम्यते तद्वदत्र द्विशेषेपि शिष्टाभ्यामितरार्थधीः ॥ त एव बुद्धिविषयाणां बहूनां मध्ये कतिपयानामेव वृक्षाणां शोभनत्वे प्रतिपाद्ये न द्वित्वं यथा सिञ्चने पञ्चमासाः शोभना इति। एवं कस्मैचिदेकः कस्मैचिद्द्वौ कस्मैचित्त्रय इत्यर्थप्रतिपादनेच्छायाम् [illegible] फ इत्येव प्रयोगो न द्वित्वम्। यदा त्वेको दत्त इति विवक्षा तदा द्वित्वम्। नैत्रद्व्योदाहरणं राज्ञो राज्ञः पुरुष इति। इतरार्थधीरिति। एवं च तयोर्विशेषाभाव इति शेषः ॥

सरि[illegible]तुरेति।अत्रस्थानिवद्भावेनप्रातिपदिकत्वम्।प्रत्ययलक्षणेनाप्रत्ययइतिनिषेधाप्रवृत्तेः।योषायोषेत्यादौएकादेशस्यपूर्वान्ततयास्थानिनस्तत्त्वेनकृतद्वित्वेनतत्सुलभमिति।एकै
कमित्यादासमासत्वातिदेशेनप्रातिपदिकत्वस्यसत्त्वाच्चेत्यपिबोध्यम्।इतिद्विगिति।एकशेषेतुनपरिगृहीतैकत्वादीनांभानम्।प्रातिपदिकानामेवतत्रवृत्तेः।तत्रव्यक्तिपक्षेव्याप्तिप्रतिपि
पत्तुवदन्ति।अप्रातिपदिकत्वान्नभविष्यतीतितद्व्यापकम्।सरित्सारि[illegible]योषायोषेत्यादौउक्तदोषानिस्तारादितिचेत्।अत्रोच्यते।अन्तरङ्गैकसंख्यावरुद्धोहिरुक्तार्थः सं
ख्यान्तरेनिराकाङ्क्षएव।नहिवस्तुगत्याबहुत्वमस्तीत्येतावतैवतस्यशाब्दबोधआपादयितुंशक्यते।असत्त्वार्थकेष्वपितदापत्तेः।अयोग्यंतदितिचेत्समंप्रकृतेपि।अत्रचलि
ङ्गमेकैकस्यप्राचामितिनिर्देशइतिदिक्।परेर्वर्जने।अत्रवार्त्तिकम्।परेरसमासेनेह।परित्रिगर्त्तंवृष्टोदेवः।वेतिचवक्तव्यम्।तथाचकारकेषूदाहृतम्।अपहरेः परिहरेः संसारइति
।उपर्यध्यधसः।कथंतर्हिउपरिशिरसोघटंधारयतीति।अत्राहुः।औत्तराधर्यमात्रमिहविवक्षितम्।नतुसामीप्यम्।अतोवस्तुतस्तत्त्वेपिनद्वित्वम्।विवक्षाहिशब्दप्रधानंकारणम्।
अत्रचउपज्ञोपक्रमंतदाद्याचिख्यासायामितिसन्नन्तप्रयोगोज्ञापकइति।वाक्यादेः।सुन्दरसुन्दरेत्यादि।स्वरितमाम्रेडितेसूयासंमतिकोपकुत्सनेषु।आम्रेडितंभर्त्सनेइतिसूत्रा
भ्यांयथायथंप्राप्तः प्लुतःवैकल्पिकत्वान्नेहकृतः।उक्तंहिप्राक्सर्वः प्लुतोवैकल्पिकइति॥एकंबहुव्रीहिवत्।द्वेइत्यनुवर्त्तते।तच्चानुवाद्यसमर्पकंतदाह।द्विरुक्तइति।तेनेति।यद्य
प्येतौबहुव्रीहौविशिष्यनविहितौतथापितत्सदृशावित्येतावतैवातिदिश्येतेइतिभावः।समुदायात्सुबिति।तच्चैकवचनमेव।यथाचैतत्तथाप्रागेवोक्तम्।पूर्वभागेइति।नतूत्तरभा
गेपि।तथाहि।द्वेधात्रपुंवद्भावः सर्वनाम्नोवृत्तिमात्रेइतिवास्त्रियाः पुंवदितिवा।तत्राद्यः पूर्वभागस्यैवभस्त्रैषेतिज्ञापकादित्युक्तम्।द्वितीयस्तुसमानाधिकरणपरत्वेविधीयते।न
चोत्तरभागस्यतदस्तीतिभावः।एतेनेहसूत्रेद्वेइत्यस्यानुवृत्तौएकेत्यत्रपुंवद्भावापादनंहरदत्तादिभिःकृतंप्रत्युक्तम्।एकैकयेत्यत्रपूर्वभागेटापोनिवृत्तिरितिस्वग्रन्थविरोधाच्च ॥
यादयिषायामनेकेतावत्प्रयोगेप्राप्तेयेननाप्राप्तिन्यायेनेदंशास्त्रंद्व्यात्मकादेशबोधनद्वारानेकप्रयोगस्यासाधुत्वबोधकम्।तदुक्तंभाष्येनिवर्त्तकत्वाद्वेति।अनुवाद्यसमर्पकमिति।इदंसूत्रंवीप्साया
मेवप्रवर्त्तते।वीप्साग्रहणमनुवर्त्यवीप्सायांद्वित्वंबहुव्रीहिवद्भावश्चेतिभाष्योक्तेः।एवंचतेनैवद्वित्वस्यसिद्धत्वात्पुनरनेनविधानमफलंगुरुचेतिभावः।हरदत्तादीत्यादिनाकैयटः ॥

स्पष्टार्थेति।स्पष्टप्रयोजनेत्यर्थः।अतएवतन्मयामोक्तमितिभावः।तच्चैकदृत्यादौबहुव्रीहिवद्भावेनसुब्लुगभावः।अन्यथासस्यादेः।द्विपदिइत्यादेरिवविभक्तिरहितस्यैवसाधुत्वंस्यात्।न
चपुनःसुप्त्वस्यैवलक्षणस्येतिन्यायात्।अनेनचप्रातिपदिकत्वातिदेशेतेनैवसुब्लोपतदुत्पत्तीसिद्धेइतिअनेनसुपःपृथगनतिदेशात्कार्यातिदेशेलक्षणभेदात्पुनःसुबिति
नवाच्यम्।नचप्रत्ययान्तत्वात्कथंप्रातिपदिकत्वम्।द्वित्वेकृतेपिसमत्वात्।स्थानिवद्भावेनतस्यापिप्रत्ययान्तत्वात्।लुप्तेप्येकदेशविकृतन्यायेनतत्त्वात्।यदितुबहुव्रीहिवद्भावा
त्प्रत्ययान्तत्वेपितत्रदृष्टत्वमात्रेणसूत्रभाष्यप्रामाण्यात्प्रातिपदिकत्वंतर्हिप्रकृतेपितुल्यं,स्पष्टंचेदंभाष्ये। सुब्लोपपुंवद्भावाविलत्रतन्निमित्तंप्रातिपादिकत्वंलक्ष्यते।अन्यथासु

हेइत्यनुवृत्तिस्तुस्पष्टार्था।उत्तरार्थेत्यन्यदेतत्।आबाधेचाइहेति।बहुव्रीहिवद्भावादित्यनुषज्यते।तथाचस्त्रियाःपुंवदितिप्रवर्त्तते।नचेदमुत्तरपदंनेतिवाच्यम्।अतिदे
शत्वेनैवउत्तरपदत्वस्यापिलाभात्।ननेत्यत्रनलोपोनञइत्यपितर्हिस्यादितिचेत्।मैवम्।अत्रहिउत्तरपदाधिकाराविशेषेपिनञःसाक्षान्निर्दिष्टेनकार्यित्वेननिमित्तभावो
वाध्यते।तथाचभद्रहृदोभद्रहृदइत्यत्रअचोरहाभ्यामितिरेफस्यद्वित्वप्रसङ्गेआकरेउक्तम्।नेमौरहौकार्यिणौकिंतुनिमित्तमेतौद्विर्वचनस्येति।नन्वेवमपिधूर्ध्रूः।पन्थाःपन्था
इत्यादौसमासान्तःस्यादितिचेत्।न।समासान्ततद्धितयादित्यतःसमासादित्यनुवर्तमाने।समासान्ताइतिपुनःसमासग्रहणंहिसमासाधिकारविहितोयः समासःतत्प
रिग्रहार्थम् ॥

ॐ वृत्तिरपिवक्तव्यास्यात्।यत्तुएकद्वसन्त्रान्तोदात्तत्वंतत्फलम्।सह्याद्युदात्तः।पूर्वपदोत्तरपदयोरभावात्प्रकृतिस्वरप्राप्तेरिति।तन्न।व्यपदेशिवद्भावेनपू
र्वपदत्वसत्त्वात्इतितात्पर्यम्।बाध्यतइति।इदंचप्राचामनुरोधेन।यदितुत[illegible]ण्डिन्यन्यायोयेननाप्राप्तिविषयएव।स्पष्टञ्चेदंतद्धितेष्वचामितिसूत्रेभाष्येअचोरहाभ्यामित्यत्राचःपर
रेफस्यानचिचेत्यनेनावश्यंकार्यप्राप्तंनिमित्तत्वंचाज्ञातमेवज्ञाप्यतइतिविधेयमेवेतितत्रास्तिन्यायविषयः।प्रकृतेतुनिमित्तत्वमस्यनावश्यंप्राप्तमितिनायंतस्यविषयइत्युच्यतेतदा
रात्रे[illegible]तोत्रविभाषापदमनुवर्त्यव्यवस्थितविभाषाश्रयणेननान्तरीयकादाविवनलोपोवारणीयः।नभ्राण्नपादितितुप्रपञ्चार्थमेवेतिदिक्।धूर्ध्रूःपथिमथ्याइतिपाठः ॥

द्विति। तृतीयेस्तु नन्वेत्यादौ नऽस्तुथ्यामिति स्वयोपिना। तत्रैव न समास इत्यतः समासग्रहणापकर्षणेन मुख्यसमास एव तत्प्रवृत्तेः। तत्र समासग्रहणापकर्षसामर्थ्यादेव समासान्तोदात्तस्या पिनाक्षिपुत्राहो प्रकृत्येत्यादेरपि समासस्येस्तु त्वस्या मुख्यसमासस्यैव प्रवृत्तेः। आम्रेडितस्वरतत्पुरुषयोर्विशेषाभावेन नदतिदेशाभावाच्च। अत्र कार्यमिति देशेपि अतिदिश्यमानकार्याणामुत्पत्तिदेश एव देश इति सिद्धान्तादाम्रेडितानुदात्तत्वं सर्वस्वरबाधकं नऽस्तुथ्यामिति तु इतरस्वरस्यैवास्यापवादः स्यादिति बोध्यम्। अत एव भाष्ये सुब्लोपपुंवद्भावावेव प्रयोजनत्वेनो तेनातिदेशिके समासान्तानामप्रवृत्तेरिति दिक्। प्रकारे गुणवचनस्य। यद्यपि भेदोऽपि प्रकार इत्युच्यते बहुभिः प्रकारैर्भुङ्क्ते बहुभिर्विशेषैरित्यवगमात्। तथापि ह विवक्षितमर्थमाह। सादृश्ये इति। अत्र च व्याख्यानं शरणम्। अस्ति च सादृश्ये प्रकारशब्दः ब्राह्मणप्रकारोऽयं माणवकः ब्राह्मणसदृश इत्यवगमात्। पुंवद्भाव इति पुंवत्कर्मधारयेत्यादिसूत्रात्। न च कोपधादिष्वपि प्रवर्त्तेतेते न बहुव्रीहिवद्भावे प्रकृते कर्मधारयवद्भावोक्तिर्व्यर्थेति बोध्यम्। पटुपटुरिति। इह द्वित्वेन जातीयरो बाधो नेष्यते इति वामनः। अन्यथा ब्राह्मणजातीय इत्यादावगुणवचनेऽपि भेदरूपेऽर्थे सावकाशो जातीयर् गुणवचने तु सादृश्ये परेण द्वित्वेन बाध्येतेति भावः। अस्मादित्यस्तु जातीयर्विधौ विशेष एव प्रकारशब्दार्थ इत्याह। गुणवचनस्येति किम्। सिंहो माणवकः। अग्निर्माणवकः। यद्यपीह अग्निसिंहशब्दाभ्यां जघन्यवृत्त्या गुणो गम्यते तथापि गुणवचनग्रहणसामर्थ्यात् मुख्यवृत्त्या गुणपराणामेव द्वित्वं न त्वन्येषामित्याकरः। नवं नवं प्रीतिरहो करोतीत्यत्र वीप्सायां द्वित्वम्। अनेन तु द्वित्वे सुब्लुक् स्यात्। यथा नवनवा वनवाडुभिरादद इति पुंवद्भावः। कथं भीतभीत इव शीतमयूख इति भारविः ॥ ७ क्ताविति। कोपधादिष्वपीति। निषेधविषयेऽर्थः। तेन प्रियासदृशी स्वार्थे प्रियेत्यादिसिद्धिः। भेदरूपेऽर्थे इति। भेदसादृश्ययोरुभयोरपि जातीयरो विधानादिति भावः। परेणेति। जातीयरः स्वार्थिकत्वेन गुणवचनजातीयान्ते सावकाशत्वं द्वित्वस्येति भावः। न च जातीयरा सादृश्यस्योक्तत्वेन तदन्ते द्वित्वस्याप्रवृत्तेः कथमस्य सावकाशता भेदेऽपि तस्य विधानेन लोटे वासहायेन सादृश्यस्यवक्तुमशक्यत्वात्। भेदार्थकजातीयान्ते ततः सादृश्यविवक्षायां चारितार्थ्याच्चेति तात्पर्यम्। अन्यथानवकाशत्वेनेति बोध्यम्। आकर इति। भाष्यमित्यर्थः। पुंवद्भाव इति। यथात्र पुंवत्त्वं भवति तथा सुब्लुक् स्यादिति भावः ॥

द्वित्वायोगादिति। गुणवचनत्वाभावाच्चेत्यपि बोध्यम्। एवंच पूर्वखण्डे विभक्तिश्रवणं स्यादिति भावः। अतिरभसेति। तादृशवचनानुपलम्भादिति भावः। अवस्थासु। तद्विशेषेषु। स्नुक्प्रान्तैरिति। सादृश्येन द्वित्वमिति भावः। कथंचिद्व्याख्येयमिति। एकं मन्दपदमतिशयलक्षकम्। कमलानि कमलानीतिवदिति परे। वीप्साभावादिति। एकस्यैकमेव मूलम्। इतरेषां तूपरिसन्निवेशापे इवशब्देन सादृश्यस्योक्ततयेह प्रकारे द्वित्वायोगात्लक्षणया भीतेभ्यो भीत इति कथंचिद्व्याख्येयम्। तेनातिभीत इति फलितम्। यत्तु आधिक्ये द्वे इति वार्त्तिकेन भीतभीतादौ द्वित्वमिति दुर्घटवृत्तिकारादिभिरुक्तं तदतिरभसोक्तिमात्रम्। अथ कथं खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्येति मेघदूतः। एकस्यापि खेदावस्थासु क्षयावस्थासु च भेदं परिकल्प्य वीप्सा बोध्या। अथ कथं मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वामिति मेघः। मन्दमन्दमुदितः प्रययौ खमितिवत्स्नुक्प्रान्तैः वीप्सार्थस्याभासं भवादिति चेत्सत्यम्। स्वतो मन्दगामिनं त्वां पवनो मन्दं नुदतीति कथंचिद्व्याख्येयम्। सिद्धस्य गतेश्चिन्तनीयत्वात्। आनुपूर्व्येति वीप्साभावादारम्भः। न्यायसिद्ध इति। यावद्भिः शब्दैः से बोद्धोर्थमवगच्छति तावतां प्रयोक्तव्यत्वादिति भावः। कर्मव्यतिहार इति। क्रियाविनिमय इत्यर्थः। द्वे इति। नित्यमेवेदं द्वित्वम्। बाहुलकं तु समासवद्भावस्यैव। सुपः सुर्वक्तव्य इति। अत्र केचित्। द्वितीयादीनामेवेदं स्वादेशविधानम्। अत एवोत्तरदलेऽपि द्वितीयादय एव न तु प्रथमा तत्राप्येकवचनमेव न तु वचनान्तरम्। एतच्च दुर्गपरिशिष्टकण्ठाभरणादिष्वर्वाचीनग्रन्थेषु स्पष्टम्। तदेतदुक्तं प्राचा द्वितीयैकवचनान्तत्वं परपदस्येति। एतच्च सर्वमपाणिनीयं भाष्यादावनुक्तत्वात्। तदेतद्ध्वनयन् वचनान्तरमुदाहरति। अन्योन्यावित्यादि। माघ इति। स च भाष्यानुगुण एवेति भावः। तथा चार्वाचीनमतं कवयोऽपि नानुरुन्धन्ति इत्युक्तम्। तथा च भारविः। क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैरिति प्रायुङ्क्त। अत्र हि अदृष्टः परस्परो यैरिति विग्रहे प्रथमान्तता स्पष्टैवेति दिक्। तृतीयादिषु पुंवदिति प्राचो ग्रन्थं परिष्कुर्वन्नाह। अत्र केचि[illegible] ॥ ७ ॥ सो गौणो मूलव्यपदेशः। न चैकरूपं भागानां स्थौल्यं किंतु यथामूलमुपचीयते स्थौल्यमिति तद्भाव इति भावः। समासवद्भावस्यैवेति। तत्र लक्ष्यभेदेन क्वचित्प्रवृत्तिरेव क्व[illegible]दप्रवृत्तिरेव। अतएव भाष्येऽन्यशब्दस्य समासवद्भावरहितमेवोदाहरणमितरशब्दस्य तत्सहितमेव दत्तम्। वचनान्तरमिति। द्वितीयादीनामिति शेषः ॥

एक[illegible]निबन्धेति। एकार्थीभावयोग्यद्वितीयाभावादुभयत्रापि वृत्तित्वाभाव इति तत्त्वम्। एतेन यां यां प्रिय इत्यत्र न द्वित्वं किं तु द्वावेव यच्छब्दौ भिन्नभिन्नरूपेणैव बुद्धिस्थकान्तानां पराम[illegible]ाविति सर्वासां नम्रमुखीत्वप्रतीतिरित्यपास्तम्। प्रेक्षणविषययत्तदर्थव्यापकत्वस्य नम्रमुखीत्वेऽपि प्रत्ययेन शाब्दप्राप्तेर्दुर्वारत्वाच्च ईदृशे विषये द्विर्वचनसाधुताया एवशाल्ले णबोधाच्च। मन्येतसेति। यत्पदद्वित्वेन वीप्सितार्थोपस्थित्यैकेनापि तत्पदेन पूर्वोपस्थितरूपेण परामर्शोपपत्त्या प्रयोजनाभावान्न तत्पदे वीप्सात्र। कश्चित्तु स्पष्टत्वाय तच्छब्देऽपि द्वित्वम्। व्यञ्जनान्मपि यस्याचः कार्यमुच्यते तं तं भजन्त इत्यजादेरिति सूत्रे भाष्यप्रयोगात्। रभसादिति। द्विर्वचनस्य वृत्तित्वाभावः। पूर्वपदे एवैतस्य प्रवृत्तिस्वारभस्यबीजम्। परस्परव्याघातादिति। तृतीयादिषु वस्तुस्थितिमाह। अन्येत्विति। अतिप्रसङ्गादिति। तथा च एकशेषप्रतिबन्द्या द्विर्वचनस्यापि वृत्तित्वमाश्रियतहुलेन पुंवद्भावो न शङ्क्यः लक्ष्यविरोधात्। कारकं चेद्विजानीयाद्यां यां मन्येत साभवेत्। इत्यकथितसूत्रस्थभाष्यविरोधाच्चेति भावः। यत्तु प्राचोग्रन्थं व्याचक्षाणो हक्तमन्योन्यमित्यादावन्यामन्यामिति द्विर्वचने कृते सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पूर्वोत्तरपदयोरपि पुंवद्भाव इत्यादि तत्सर्वं रभसात्। एतच्च मूल एव ध्वनितम्। यच्चापि तृतीयादिषु पुंवदिति प्राचोग्रन्थं व्याचक्षाणा आहुस्तृतीयादिषु पुंवद्भावो विशेषस्तेन टापन्। अत्र तृतीयादिष्विति अविवक्षितम्। द्वितीयायामपि पुंवत्त्वस्येष्टत्वादिति तच्चिन्त्यम्। पुंवत्त्वं विशेष इति विशेषाभिधानमविवक्षितमिति च स्वोक्तेः परस्परव्याघातात्। मूलकृता पुंवद्भावस्यास्पष्टत्वात्तद्ग्रन्थस्याञ्जस्येनैव व्याख्यातत्वाच्चेति दिक्। यथायथमिति। न लोकेति षष्ठीनिषेधः। सिद्धान्तकौमुदीव्याख्येयं प्रौढमनोरमा॥ समाप्तं तत्र पूर्वार्द्धं तेन तुष्यतु शंकरः॥ इति श्रीभट्टोजिदीक्षितविरचितायां प्रौढमनोरमायां सिद्धान्तकौमुदीव्याख्यायां पूर्वार्द्धं समाप्तिमगात् ॥ ७ विशेष इत्युक्तेः न्यग्रविशेषाभाव इति लभ्यते। तृतीयादिष्वित्यस्याभावे सर्वत्रैव तल्लाभे तस्य विशेषत्वभङ्ग इति भावः। अस्पष्टत्वादिति। पुंवद्रूपमिति हि तेनोक्तमिति भावः। आञ्जस्येनेत्येवेति। अत्र केचिदित्यादिना मदुक्तया मूलस्यारीत्येति भावः। विस्तरस्त्वस्मत्कृते शब्दरत्ने मदन्तेवासिकृतशब्देन्दुशेखरमञ्जूषयोश्च द्रष्टव्य इति शुभम्॥ * ॥ इति श्रीमद्दीक्षितभट्टोजिपौत्रदीक्षितहरिविरचिते प्रौढमनोरमाव्याख्याने लघुशब्दरत्ने सुबन्तं समाप्तम्॥ * ॥ नमस्तस्मै गणेशाय नरकुञ्जररूपिणे। यश्चागस्त्यायते नित्यं विघ्नसागरशोषणे॥ श्रीगुरुचरणसरोजाभ्यां नमः ॥ * ॥

॥ श्रीविश्वेश्वरो जयति ॥

॥ मनोरमाशब्दरत्नयोरुत्तरार्द्धम् ॥

॥ श्रीसंकष्टनाशिनी विजयतेतराम् ॥

श्रीगणे[illegible]नमः॥ ग्रन्थमध्येकृतमिति॥ मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषकाणीत्यादि भाष्योक्तफलोद्देशेनेत्यर्थः। ताभ्यां वित्तैरिति। ते
नाव[illegible]तिचणप्। वेदाद्ध्यापनेकर्तृत्वेन तदुक्तानुष्ठानकर्तृत्वेन च प्रसिद्धैरित्यर्थः। श्रुतिसिद्धत्वेपीति। एष आत्मापहतपाप्मेत्यादिश्रुतिसिद्धत्वेपीत्यर्थः। पारमार्थिकत्वादिति। नेह ना
नास्ति किंचनेति श्रुतेरिति भावः। निरूढं प्रसिद्धम्। तत्सर्वमिति। मूलं[illegible]रम्भं चेत्यर्थः। तत्र मूले इदम्। नस्वतन्त्रं सूत्रम्। गुप्तिज्किद्भ्य इत्यादौ वक्ष्यमाणे तद्संबन्धात् हेतुमति चेत्या

श्रीगणेशायनमः॥ ग्रन्थमध्येकृतं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नाति। श्रोत्रेति। हायनान्तयुवादिभ्योणिति सूत्रे श्रोत्रियस्य यलोपश्चेति वार्तिकाच्छ्रोत्रं श्रोत्रियत्वम्।
आर्हन्ती योग्यता। गुणवचनब्राह्मणादिभ्यः कर्मणि चेति सूत्रे अर्हतो नुम्च्चेत्युक्तेः। ताभ्यां वित्तैः। किं च गुण्यैर्गुणवद्भिः। रूपादाहतप्रशंसयोर्यबिति सूत्रे अन्येभ्योपि दृश्यत इत्यु
क्तागुण्या ब्राह्मणादित्वस्य भाष्यादावुदाहृतत्वात्। नोच्यमान इति। स्तौतेर्यङन्तात्कर्मणि शानच्। अपिशब्देनापाततो विरोधं ध्वनयति। वस्तुतस्तु न विरोधः। स्तुतिप्र
योजकीभूतानामनन्तकल्याणगुणानां श्रुतिसिद्धत्वेपि वियदादिवद्व्यावहारिकत्वात्। तदभावस्य पारमार्थिकत्वात्। एतच्चोत्तरमीमांसायां निरूढमेव। पूर्वार्द्ध इति।
हलन्तेषु क्विन्नादिषु त्यादन्तं तु प्रासङ्गिकमिति भावः। अथेति। इहापि कृत्सुणवः स्त्रियामञ् अणिनुण इत्यादि प्रासङ्गिकं बोध्यम्। प्राधान्येन तु तृतीयाध्यायस्था एवे
होच्यन्त इति भावः। इह प्राचा धातोः आ तृतीयाध्यायान्तवक्ष्यमाणाः प्रत्यया धातोर्ज्ञेया इत्युक्तम्। यङ्धोधातुग्रहणं योगविभागेन व्याचष्ट इति तद्व्याख्यातृभिरुक्तं
तत्सर्वमिहोपेक्षितं योगविभागस्य निर्बीजत्वात्। दशेति। अनुबन्धवैलक्षण्यादिति भावः। प्रदर्श्यत इति। यद्यपि पञ्चमलकारे रूपाणीह नव्युत्पाद्यन्ते तथापि
स्वरूपेण लकारः प्रदर्श्यते। तथापि लः कर्मणि लस्येत्यादिसूत्रविषयतां व्युत्पादयितुमिति भावः ॥

दौ तद्संबन्धाच्च। व्याख्यानमप्यसंगतमित्याह। योगविभागस्येति। तच्चप्रकृत्यर्थेति। प्रतिधातु अनन्तलडादेशानां शक्तिकल्पनापेक्षयैकधातोरेव शक्तिकल्पने लाघवादिति भावः। तु
ल्ययुक्त्या कर्त्रादीनामपि धातुवाच्यत्वं प्रत्ययास्तु द्योतका अत एव तेषां विशेषणत्वमिति परे। तस्यालटः। स्फुटमिति। भावकर्मकर्तृरूपमित्यर्थः ॥

द्योत्य एवेति। तद्बीजं तूक्तम्। निरूढः। भाष्यादिप्रसिद्धः। अनुमातुं शक्यत इति। गुणः कृतात्मसंस्कार इति न्यायेन भावकर्मणोः कर्त्तरीति लविशेषणम्। तत्र वर्त्तमानस्येत्यर्थ इति भावः। तयोरेव लस्य स्थाने कर्मणि कृत्यक्तखलर्थाः भावे कर्मकेभ्य इति न्यासः कार्यः। अनुदात्तङित इति कर्त्तरि कर्मव्यतिहारे इत्युत्तरमेव पठनीयमिति तात्पर्यम्। इत्येवास्त्विति। भावकर्मणोरित्युत्तरं भावे कर्मकेभ्य इति नियमार्थकार्यमित्यर्थः। विपरीतेति। एवं च कर्त्तरि नस्यादिति भावः। चकार इति। स च कर्मणोऽसंभवात्कर्तुः समुच्चायक इति नोक्तदोष इति भा

वर्त्तमाने लट्। वर्त्तमान इति प्रकृत्यर्थविशेषणं तदाह। वर्त्तमाने त्यादि। लट् स्यादिति। तस्य वाच्यं तु उत्तरसूत्रे स्पष्टम्। वर्त्तमानकालस्तु द्योत्यः। एवं लङादिष्वपि भूतादिकालो यथायथं द्योत्य एवेति निरूढः पन्थाः। वस्तुतस्तु वाच्यत्वेपि न क्षतिरिति विद्यादिसूत्रे वक्ष्यामः। लः कर्मणि च। चात्कर्त्तरीत्यनुकृष्यते। सकर्मकविषयं चेदम्। अकर्मकेषु कर्मणीलं शास्यबाधितत्वात्। उत्तरवाक्येन तत्र विशेषविधानाच्च। तदेतदाह। सकर्मकेभ्य इति। भावे चेति चकारेणापि कर्त्तैवानुकृष्यते न कर्म असंभवात्। तदाह। भावे कर्त्तरि चेति। यद्यपि भावकर्मणोरात्मनेपदविधानाच्छेषात्कर्त्तरीति परस्मैपदविधानाच्च ज्ञापका अकाराणां भावकर्मकर्त्तारोऽर्था अनुमातुं शक्यन्ते तथापि असत्यस्मिन्सूत्रे सकर्मकेभ्योपि घञादिवद्भावे लकाराः स्युः। ततश्च घटं क्रियते देवदत्तेनेत्यादि प्रसज्येत। तन्निवृत्त्यर्थमिदं सूत्रम्। न चैवम् कर्मकेभ्यो भावे इत्येवास्तु भावे अकर्मकेभ्य एवेति नियमार्थमिति वाच्यम्। भावे एवेति विपरीतनियमापत्तेः। तस्माद्भावे चेति चकार आवश्यकः। न चैवं भावे चेत्याद्येवास्तु इति वाच्यम्। भावे इव कर्त्तर्यपि अकर्मकेभ्य एवेति नियमापत्तौ सकर्मकेभ्यः कर्त्तरि लकाराभावापत्तेः। नन्वेवमपि लश्चेत्यस्य। कर्मणि तु ज्ञापकाद्भविष्यतीति चेत् ॥ ७७

वः। न च भावकर्मणोरित्यस्य स्थाने कर्मणि भावे कर्मकेभ्य इति विधायकमस्त्विति वाच्यम्। एवं वचने आनुमानिकत्वेन कल्पने च लाघवाभावात्। इत्याद्येवास्त्विति। भावकर्मणोरित्युत्तरमिति भावः। लश्चेत्यस्त्विति। कर्त्तरि कृत्। लश्च। [illegible]ऽकर्मकेभ्य इति न्यासोस्तु भावे इत्यादि विधायकमेवेति भावः। ज्ञापकादिति। कर्मणीति कर्मार्थकत्वानुवादेन तङ्विधानात् ज्ञापकादित्यर्थः ॥

वैय[illegible]ादिति। नच तत्र कर्मणि चकृत्से स्यादस्तु चेन पूर्व[illegible]त्रानुकर्ष इति वाच्यम्। लाघवाभावादिति तात्पर्यम्। गौरवादिति। अनन्तकृतीनां शक्यतावच्छेदकत्वेनानुगमः तासां [illegible]त्वेनानुगमे च गौरवमित्यर्थः। तल्लाभाच्चेति। एवं चा[illegible]लभ्यतया तत्र शक्तिर्वक्तुमशक्येति भावः। नामार्थयोरिति। समानविभक्तिकनामार्थयोरित्यर्थः। न्यायादिति।

उत्तरसूत्रे तयोरित्यनेन परामर्शार्थं कर्मणीत्यस्यावश्यकतयाक्षेपकानुसरणे शास्त्रवैयर्थ्यात्। तस्माद्यथान्यासमेव रमणीयम्। अत्र नैयायिकाः। लकाराणां कृतावेव शक्तिर्लाघवात्। न तु कर्त्तरि। कृतिमतः कर्त्तृत्वेन तत्र शक्तौ गौरवात्। प्रथमान्तपदेनैव तल्लाभाच्च। देवदत्तः पचतीत्यत्र हि देवदत्तो विशेष्यः यत्नो विशेषणम्। आश्रयत्वं तु संसर्ग इति। तन्न। पचन्तं देवदत्तं पश्य। पचते देवदत्ताय देहीत्यादौ शतृशानजादीनामपि तिबादिवल्लादेशत्वाविशेषेण तेभ्यः कृतिमात्रबोधापत्तेः न चेष्टापत्तिः। तत्राभेदसंसर्गस्यैव वक्तव्यतया कर्त्तृत्वस्यैव त्वयाप्यभ्युपगमात्। नामार्थयोरभेदस्यैव संसर्गत्वात्। नन्वत एव गौरवप्रामाणिकतया शत्रादीनां कर्त्तरि शक्तिः। तिबादीनां तु कृतावेवेति वैषम्यमिति चेत्। मैवम्। स्थान्येव वाचको लाघवान्न त्वादेशो गौरवादिति हि तव मतम्। अत एव रामइत्यादौ सुप्त्वेनैकत्वे शक्तिरित्यादित्वदीयानां व्यवहारः। एवं स्थिते तिबादीनां शत्रादीनां च स्मारकतयातिपिस्थानीयत्वं बोधकस्तु लकार एव स च शत्रादौ नो कर्त्तरि शक्त इति स्थिते तिङन्ते कथं कृतिं बोधयेत्। अन्याय्यश्चानेकार्थत्वमिति न्यायात्। अथ वैयाकरणरीतिमाश्रित्य सर्वत्रादेशा एव वाचका इति ब्रूषे तर्हि घटं घटेन हरे व विस्रो वेत्यादिषु सर्वे पदादेशा इति न्यायेन पदस्फोटो वाक्यस्फोटश्च सिद्ध्येदिति ॥

किंच त्वया लत्वं शक्ततावच्छेदकं वाच्यं तच्च न तदज्ञानतोऽपि बोधात्। किंच स्थानिनां कुरुचडादिभेदेनानैयत्याद्व्यवहृतत्वाच्च तेषु शक्तिग्रहो दुरुपपाद इत्यपि बोध्यम्। इत्यादिष्विति। आदिना वः नद्दिनि। न्यायेनेति। तथा हरेवेत्यादौ पूर्वरूपादिस्थाने व्याकरणान्तरे पदलोपादीनां विधानाद्व्याकरणानां कलहे पदसंमोहे नार्थस्यापि संमोहाद्बोधानापत्तौ समुदाय एव शक्तिकल्पनापत्त्येत्यपि बोध्यम् ॥

त्वानिष्टमिति। ननु प्रत्येकं पदानामवधृतशक्तिकानां समुदायेन यथाव्युत्पत्ति स्थितानां तदर्थोपस्थानद्वारा वाक्यार्थबोधसंभवान्न तयोरापत्तिरित्यरुचेराह। किंचेति। लक्ष्यमिति। एवं चलाप नाकृतानमपि कृतिर्वाच्या स्यात्। न च केवलकर्तौ प्रयोगाभावः। आख्यातेपि समत्वात्। पक्वा जातइत्यादेः सत्वाच्च। ननु भावांशे तवापि कृत्तिङोर्वैषम्यं दुर्वारम सत्वभूते भावआख्यातार्थः सत्वभूतस्तु कृदर्थइति। किंच नामार्थयोरिति व्युत्पत्तौ नामपदेन सत्वप्रधानस्य ग्रहणं किंच नामार्थयोरित्यस्य नामजन्यप्रतीतिविशेष्ययोरित्यर्थइति न दोषइत्यरुचेराह। किंचेति। प्रमहत्त्वानिष्टम्। किंच। कर्तरि कृदिति यत्कर्तृग्रहणं तदेव लः कर्मणीति सूत्रे चकारेणानुकृष्यते तत्कथं ण्वुलादीनां लकाराणां च शक्तौ वैलक्षण्यम्। न च नामार्थयोरभेदः संसर्गएव ण्वुलादौ कर्तुर्वाच्यत्वे बीजमिति वाच्यम्। पचति रूपं पचतिकल्पं देवदत्तइत्याद्यनुरोधेन तिङ्स्वपि कर्तुरेव वाच्यतौचित्यात्। ननु तिङ्प्रत्ययो न नामेति चेत्। अकोपि नेति तुल्यम्। अकारान्तं नामेति चेत्। रूपबाद्यन्तमपि नामेति तुल्यम्। किंच युष्मदि समानाधिकरणे मध्यमः। अस्मद्युत्तम इति सामानाधिकरण्यप्रयुक्तपुरुषव्यवस्था। अभिहिते कर्तरि प्रथमेत्यादिकं च कर्तुर्वाच्यतायां प्रमाणम्। यत्तु अनभिहितइत्यस्य अनभिहितसंख्याकेइत्यर्थवर्णनं तन्न। कृत्तद्धितसमासेषु संख्याभिधानस्याप्रसिद्धत्वात्। अपि च धातूपात्तव्यापाराश्रयः कर्ता। तत्राश्रयमात्रं कृतां लकाराणां चार्थः न तु व्यापारोपि तस्य धातुनैव लब्धत्वात्। अतएव कर्ता कारकइत्यादावपि नानन्वयः। रथो गच्छतीत्यादावपि न कदाचिदनुपपत्तिः। एवं स्थिते कृतौ शक्तिरित्यस्योक्तिसंभवएव नास्ति कृतेरपि व्यापारविशेषतया प्रायेण धातुतएव [illegible]। कचित्तु तथापि तस्यास्त्यक्तव्यत्वात् ॥ ७ ॥ माणमिति। एवं च पाचको देवदत्तइत्यादाविव देवदत्तः पच[illegible]दावपि युष्मद्युपपदइति सूत्रानुवादबोधितत्व[illegible]नुभवसिद्धसामानाधिकरण्यानुभवेन धर्मिणो वाच्यत्वमिति भावः॥ अन्यादृशसामानाधिकरण्यं तु न शब्दार्थः प्राधान्यानुरोधात् कृतेर्वाच्यतेति न युक्तं प्रत्ययार्थः प्रधानमित्यस्याजेत्यादौ व्यभिचारात्। आश्रयमात्रमिति। आश्रयतानामनन्तत्वेपि आश्रयतात्वमखण्डं शक्यतावच्छेदकं नामनुगमकमिति न शक्यतावच्छेदकानुगमः॥ आश्रयत्वमेव शक्तिविशेषणं [illegible]मखण्डमेकं समवायवदित्यमेनानन्वयइति। स च तु धातुनाप्र[illegible] न चेत्कृतेर्बोधनादनन्वयः स्यादिति भावः ॥

न

म-श व्यापारेलक्षणायाइति।यदितुव्यापारस्यधातुनैवोक्ततयातत्राश्रयत्वेलक्षणेत्युच्यते।तदासर्वत्रतदेवशक्यमस्तुकिमनेनप्रयासेन[illegible]ः।संबन्धरूपलक्षणास्तानानुभवात्॥क्वचि
२४९ दिति।स्त्रे[illegible]च्छतिःकर्त्रेत्यादौ।किंचकर्मलकारेतवकःप्रत्ययार्थेनफलंतस्यधातुतएवलाभात्नकृतिस्तस्याभिहितत्वेनपच्यते[illegible]त्यादौतृतीयानापत्तेः।नचाश्रयत्वंसर्वत्रतस्यै
व[illegible]चित्यात्प्रथमान्तलभ्यआश्रयइत्यपिन।आश्रयत्वा[illegible]शक्तिमत्त्वेनततोऽलाभात्।कर्त्रधिकरणेइति।तत्रहिआख्यातार्थोनकर्त्ताप्राधान्यापत्तेः॥किंतुफलावच्छिन्नव्यापारानु
एतेनकर्त्रधिकरणेआख्यातत्वंकर्तुर्निरस्तमज्ञ्यमाना[illegible]शानजर्थत्वंस्वीकुर्वन्तोमीमांसकाःप्रत्युक्ताः।यत्तुतैरुक्तंशानजंशेकर्त्तरिकृदितिव्याकरणंशक्तिग्राह
कमस्तीति।तन्न।[illegible]वाक्यशेषोह्ययमनिर्दिष्टार्थेषुण्वुलादिष्वेवोपतिष्ठतेनतुशत्रादिषुतस्यान्यथैवतेषांनिराकाङ्क्षत्वात्।आकाङ्क्षितविधानंज्यायइतिन्यायात्।अन्यथाने
नश्यमानेआस्यमानेचार्मगतइत्यादौभावेक्रियमाणइत्यादौकर्मणिचशानचोऽदौर्लभ्यापत्तेश्च।किंच।कर्तरिकृदितियत्कर्तृग्रहणंतस्यैवलःकर्मणीत्यत्राप्यनुवृत्तेःकृता
तिङांचवैलक्षण्यंदुर्लभमित्यवोचाम।यत्तुभट्टपादाआहुः।कर्तरियदेकत्वंतत्रतिविस्यादिक्रमेणलःकर्मणीत्यस्यद्व्येकयोरित्यादेश्चैकवाक्यतयाआख्यातानांचकर्तुर्वाच्यतासूत्राद
यातीति।तन्न।स्वमतेहिवचनादिसंख्याह्यादेशनिष्ठा।ततश्चलद्विधिनाद्व्येकयोरित्यस्यएकवाक्यतास्तु।नचतत्रकर्तरीत्यस्तियत्तल्लादिविशेषणतयाकथंचिन्नीयेत।ननुलविधि
विवादिविद्व्योरपिएकवाक्यतास्तीतिचेत्सत्यम्।वाक्यैकवाक्यतात्वा।लविधिलभ्यलकारानुवादेनआदेशविधेःप्रवृत्तत्वात्।तथाचलविधौश्रूयमाणंकर्तृग्रहणंकथंसं
रम्यांविधिनष्टु ॥ ७ कृसोव्यापारःकृत्यादिरूपःसचव्यापारत्वेनैवातएवजानातिर्योगच्छतीत्यादौनलक्षणा।कालान्वयोधात्वर्थेव्यापारेआख्यातार्थेपिवाऽऽश्रयेनेध
स्तुलक्षणयालक्षितमादायैववचसमानाधिकरण्योपपत्तिः।लःकर्मणीत्यादिकंतुलाक्षणिकार्थानुशासनमितिउक्तम्।निराकाङ्क्षत्वादिति।अर्थोऽयंइतिशेषः।कर्मणिचेति।चनश्यमा
नेआस्यमानेगतइत्यादौभावेचेत्यर्थः।एकवाक्यतयेति।कर्तृगतेद्वित्वेइत्यादिक्रमेणैवकर्तुर्विशेषणत्वावगमतेत्यर्थः।नहिधिना तिप्तस्झीत्यादिना।विशेषणतयेति।तेनगु शक:
णानांचपरार्थत्वादितिन्यायविरोधोपिसूचितः।लविधिःलःकर्मणीत्यादि।सत्यमिति।उक्तन्यायविरोधेनतत्त्वेपितदन्वयासंभवइतिभावः ॥ २४

नहि तत्रेति। नचावान्तरवाक्यार्थान्वितस्य तदेकवाक्यतायामावृत्त्या एकत्वादिविशेषणत्वमपीति वाच्यम्। आवृत्तौ मानाभावान्निराकाङ्क्षत्वाच्च। आदेशानामेवेति। नतु लस्येत्यर्थः। नतु शत्रादीनामिति। एवं च तेषामनिर्दिष्टार्थकत्वात्स्वार्थे आपत्तिरिति भावः। कर्मणि शानजिति। भावे तु न दुर्लभः। भावपदार्थे संख्यानन्वयात्। ननु लः कर्मणीत्यनेनास्यैकवाक्यतयान्त

नहि तत्र सस्लोपस्यापकमस्ति लकारस्य द्विर्वचनादिसंज्ञाविनिर्मुक्तत्वात्। स्यादेतत्। लः कर्मणि चेति सूत्रे ल इति लङ्लटोर्लकारानुबन्धयोः न सामान्यग्रहणं किं तु लत्वं शानुबन्धलकारसामान्यग्रहणमिति तावन्निर्विवादम्। तत्र ल इति जसन्तं माभूत्। किंतु ङसन्तमस्तु। लः परस्मैपदमितिवत्। आदेशापेक्षा चेयं षष्ठी। लस्य य आदेशः सकर्मणि चेत्यादिकेन विहितस्य लस्येहानुवाद इति चेत्। वर्त्तमाने लडित्यादिभिरिति गृहाण। एवं च कर्त्तरि यदेकत्वमिति भट्टपादोक्तयोजनिकानिर्बाधैवेति चेत्। मैवम्। ल इत्यस्य षष्ठ्यन्तत्वे आदेशानामेवार्थ उक्तः स्यात् सोऽपि तिबादीनामेव न तु शत्रादीनां तेषां द्विवचनादिसंज्ञाविरहात्। द्व्येकयोरित्यादिना स्वैकवाक्यतायास्त्वयोक्तत्वात्। नच त्वदुक्तरीत्या कर्त्तरि कृदित्यनेन निर्वाहः। भावकर्मणि शानचो दुर्लभत्वापत्तेरुक्तत्वात्। न च शानज्विधिना सहात्मनेपदव्यवस्थापकानामेकवाक्यतया भावकर्मणोरित्यनेनेष्टसिद्धिः। सकर्मकादपि भावे शानजापत्तेः। किंच। आसविषयस्य लकारस्यार्थो न निर्दिष्टः स्यात्तस्य हि लुगादेशः। नचाभावरूपस्य द्विवचनादिसंज्ञाविनिर्मुक्तस्य च तस्यार्थादेशनं युज्यते लभ्यते वा। ततश्च सोऽपि कर्त्तर्येव स्यात्। तदर्थानुप्रयुज्यमानोऽपि तदनुरोधेन कर्त्तृप्रत्ययान्त एव स्यात्। इष्यते तु भावकर्मणोरपि। अपि च जसन्तत्वे श्रुतेनैव संबन्धः। षष्ठ्यन्तत्वे त्वादेश इत्यध्याहार्यमिति गौरवम्। अत एव ल इति प्रथमान्ततयैव व्याख्यानं पुरस्[illegible]हरदत्तेन चोक्तरीत्या लः कर्मणीति सूत्रे आदेशा अप्यनुवाच्या इति फलितं ते च लस्येत्यपि कृत्यतिङ्सङ्गीति [illegible]तिविहिताः ॥ ५६ कर्मकेभ्यो भावे शानज् अत[illegible]ह। किंचेति। युज्यते इति। तदा हि द्विवचनत्वाद्यभावेनेति भावः। नन्वास इत्यनेन लः कर्मणीत्यस्यैकवाक्यत्वाल्लुक्प्र द्धेन तत्सहचरितामन्तलक्षणेन न दोष इत्यरुचेराहापि चेति। जसन्तत्वे इति। प्रथमान्तलोपलक्षणमेतत् तदाह। प्रथमान्तत्वे चेति ॥

आकरे इति। पदमञ्जर्यामित्यर्थः। भाष्यस्वरसोप्येवमेव। तदेकवाक्यतयेति। परिपूर्णवाक्यस्यैवानुवाद्यसमर्पकत्वान्महावाक्यार्थबोधं प्रति कारणत्वाच्चेति भावः। इदानीमिति। महावाक्यार्थबोधकाले इत्यर्थः। व्यर्थेति। तिप्तस[illegible]कयोरेकवाक्यतयैव द्वित्वादेर्वाच्यतायाः सिद्धत्वात्। न च कर्मादेरुक्तत्वबोधनेन मीमांसकमतसिद्धिरेव फलम्। मतसिद्धौ पुनरन्वयः। पुनरन्वये च मतसिद्धिरित्यन्योन्याश्रयादिति भावः। अनिष्टावहेति। गौरवात्कर्मणि शानचो दौर्लभ्यापत्तेश्च संख्यायाः परिच्छेदकत्वेनैकस्मिन्[illegible]

तथा च तदेकवाक्यतयैव पदविशेषपुरुषविशेषव्यवस्थापकानामिव वचनविशेषव्यवस्थापकस्यापि प्रवृत्तिध्रौव्ये पुनरिदानीं प्रवृत्तिर्निर्मूला व्यर्था अनिष्टावहा वेत्यास्तां तावत्। अत्रेदमवधेयम्। भावे चाकर्मकेभ्य इत्यत्राविवक्षितकर्मकाणामपि ग्रहणमिष्टं तथा च णेरणाविति सूत्रे नेह पच्यते नेह भुज्यते इति भावे लकार इति हरदत्तः। अत्यन्ताविद्यमानकर्मकाणामेवेह ग्रहणं नेह पच्यत इत्यादौ तु कर्मण्येव लकारः गम्यमानत्वाच्च न तत्प्रयुज्यते इति मतान्तरम्। एतच्च गतिबुद्ध्यादिसूत्रे हरदत्तग्रन्थे स्पष्टम्। पक्षद्वयमपीदं भाष्यकैयटहरिग्रन्थारूढं क्षोदक्षमं चेति प्रपञ्चितं शब्दकौस्तुभे। यत्त्वत्राविवक्षितकर्मकाणां भावे लकार इति प्रसादग्रन्थमनूद्य भाष्यादिविरोधोद्भावनेन दूषयाञ्चक्रुः। तच्चिन्त्यम्। पक्षद्वयमप्याकरसंमतमित्युक्तत्वात्। किंच विवक्षितकर्मणोऽप्यकर्मका इति पक्ष एव प्रबलः ॥

७ विशेषणतामात्र एवौचित्याच्चेति भावः। ग्रहणमिष्टमिति। कृतपूर्वी कटमित्यस्य कर्तृकर्मणोरिति सूत्रे मातुः स्मर्यत इत्यादौ कर्मणोऽविवक्षया भावे लस्याधीगर्थेति सूत्रे भाष्ये उदाहृतत्वादिति भावः। न च कृतपूर्वी कटमितिवत् पूर्वमविवक्षितकर्मतया भावे प्रत्यये घटं क्रियमाणं देवदत्तेनेत्यादिप्रयोगो दुर्वारः। विवक्षायाः प्रयोगाधीनत्वात् ईदृशी विवक्षा कृतपूर्वीत्यादिवृत्तिविशेषमात्रविषये त्वर्थस्य कर्तृकर्मणोरिति सूत्रे भाष्ये ध्वनितत्वाच्चेति ध्वनयन्नाह। प्रबल इति ॥

इति सूत्रे इति। तत्र हि वृत्तं पारायणस्येत्यत्र वृत्तेर्भावे क्तोऽकर्मकत्वान्न तु ण्यन्तात्सकर्मकत्वादिति भाष्यमुपादाय कैयटेनेदमुक्तं न त्वेतदविवक्षितकर्मणामत्र ग्रहणे प्रतिकूलं ण्यन्तादप्यविवक्षितकर्मकाद्भावे क्तप्रत्ययसंभवाद् दर्शयते भवद् इत्यादौ ण्यन्तेऽविवक्षितकर्मकतादर्शनादिति चेन्न। एवं हि वृत्तिवृत्त्याः समानार्थतया वृत्तिर्नैवोदिता। यस्य विभाषेति निषेधात् वृत्तं पारायणस्येत्यादिसिद्धौ ण्यन्तस्याविवक्षितकर्मतया निरर्थकणिच्त्वात्तादृशे विषये प्रयोगकल्पने मानाभाव इत्याशयात्। अन्यथेति। सकर्मकेभ्योऽपि तत्प्रवृत्तावित्यर्थः। कृतपूर्वी कटमित्यादिवन्नैते प्रयोगा इत्यनुपदमेवोक्तम्। एवञ्च कृतपूर्वीत्यादिसिद्धयेऽविवक्षितकर्मकाणां तत्र ग्रहणमावश्यकमिति तात्पर्यम्। भावे क्तादि

तथा हि। समानकर्तृकेषु तुमुन् इति सूत्रे इच्छता क्रियत इति भावे लडुक्तो हरदत्तेन वक्ष्यते च तत्र स्वयमपि तथैव। अपि च णेरध्ययने वृत्तमिति सूत्रे नपुंसके भावे क्तोऽप्यकर्मकेभ्य एव तयोरेव कृत्यक्तखलर्था इत्यत्र क्तमात्रस्य ग्रहणात्। तत्र भावे चाकर्मकेभ्य इत्यनुवर्त्तनात्। अन्यथा घटं कृतमित्यपि प्रसज्येतेति कैयटहरदत्तादिभिः सिद्धान्तितम्। एवं स्थिते पीता गावो भुक्ता ब्राह्मण इत्यादौ भावे क्तान्तादर्शआद्यजिति निष्ठाप्रकरणे स्वयमेव वक्ष्यमाणमादिकर्मणि क्त इति सूत्रे हरदत्तेन वक्ष्यमाणं कृतपूर्वीत्यत्र भावे क्त इति कैयटाद्युक्तञ्च कथं सङ्गच्छताम्। कथं च गतान्तिरश्चीनमित्यादयः प्रयोगाः। यद्यप्यविवक्षितकर्माणोऽपीह सूत्रेऽकर्मकग्रहणेन गृह्येरन्। गतिबुद्धीति सूत्रे तु न गृह्यन्त इत्युक्तत्वेन देवदत्तेन पाचयतीति सिद्धम्॥ ति। अनेनैव चैतेषां परस्परग्रन्थविरोधमात्रदर्शनेन त्वयं सिद्धान्त इति भ्रमितव्यम्। कर्त्तरि कृदिति सूत्रभाष्यात्पीतमुदकं येषां विभक्तं धनं येषामिति कर्मक्तान्तादर्शआद्यजिति प्रतीयते। तत्र स्वकैयटाच्चेति बोध्यम्। गतन्तिरश्चीनमिति। अयमभ्युच्चयः। गत्यर्थाकर्मकेत्यनेन तेभ्यो भावे क्तस्य विशेषतो विधानादित्यन्यत्र प्रपञ्चितम्। इत्युक्तमिति। प्राचीनैरिति शेषः। निवृत्तप्रेषणपक्षस्तृतीयकक्षायां लावयति केदारं देवदत्त इति कैयटादिप्रयोगात्। देवदत्तेन पाचयतीति। अविवक्षितकर्मकात्पचेर्णिचीदं रूपं, वस्तुतः प्रयोगानुसारित्वाद्विवक्षाया अत्र तादृशाविवक्षैव न। अन्यथोक्तकैयटप्रयोगविरोधो दुष्परिहरः स्यादिति बोध्यम्॥

सूत्रेपि न गृह्यत इति। अत्र च आशितः कर्त्तेति सूत्रस्थं भाष्यं मानम्। तत्र ह्याङ्पूर्वादशेः सकर्मकत्वात्कर्त्तर्यप्राप्तः क्तो निपात्यते इत्युक्तम्। अन्यथा मातुः स्वार्थं त इतिवद् विवक्षितकर्मकत्वेना कर्मकत्वात् सूत्रेणैव सिद्धे निपातनं व्यर्थं स्यादिति भावः। प्रयुक्ते। [illegible]तव कर्त्राद्यर्थविहितलकारप्रसिद्धेरिति भावः। अन्योन्याश्रयापत्तेरिति। कर्त्राद्यर्थविहितलानुवादेनादेशविधिस्तत स्थानिकादेशानुवादेन अर्थविधौ स्थान्यर्थाभिधानसमर्थस्यैवादेशतेति न्यायेन लस्य तदर्थविहितत्वकल्पनमित्यन्योन्याश्रय इत्यभिमानः। न भवतीति। लस्य त परस्मैपदमित्याद्यनुवादसामर्थ्यादिति भावः। दोषान्तरमप्याह फलाभावादिति। णल इत्युपलक्षणं थलोपि ज्ञापनात्। न चासञ्ज्ञातविरोधन्यायेन स एव श्रवणार्थोस्तु बभूथाततन्थेति निर्देशेन थलो लस्वे गत्यर्थाकर्मकेति सूत्रेपि न गृह्यते। दत्तवान् पक्ववानित्याद्यर्थे दत्तः पक्व इत्यापत्तेः। इह तु ग्रहणे न कोपि दोष इत्यास्तां तावत्। लस्यालुनातिचूडाल इत्यादौ कुतो नेति चेत्। अत्राहुः। लः कर्मणि चेत्यत्र निर्दिष्टानां कर्त्राद्यर्थानामनुवृत्तेः कर्त्राद्यर्थविहितस्य लस्येह ग्रहणमिति अतोपि आदेशानुवादेन तत्रार्थविधिरिति कल्पना प्रयुक्ता अन्योन्याश्रयापत्तेरिति बोध्यम्। यद्वा धातोरित्यधिकारात् धातोर्विहितस्यैव लस्येह ग्रहणम्। लस्येत्संज्ञा तु न भवति फलाभावात्। न चाश्रवणमेव फलम्। आदेशविधिनैव तल्लाभात्। नापि लित्स्वरः फलम्। णलो लित्त्वेन तदभावस्य ज्ञापनादिति दिक्। तिप्तस्झिसमाहारद्वन्द्वः पृथक्स्यादानि वा। इटष्टकार इटो दिति विशेषणार्थः। एरत् इति ह्युच्यमाने एधेसहीत्यत्रापि स्यात् आगमलिङ्गन्तु न भवति। सप्तदशभिरादेशैः समभिव्याहारात्। महिङो ङकारः तिङ् तङिति प्रत्याहारार्थः समुदायानुबन्धः न त्ववयवानुबन्धः व्याख्यानात्॥ त्सञ्ज्ञावश्यकत्वादिति भावः। एधेमहीत्यत्रापीति। तकाराभावे तत्र लिङ इत्यनुवृत्तावपि इवर्णान्तस्य लिङो दित्यर्थः स्यात् प्रत्ययाप्रत्यययोरित्यस्या अर्थवत्परिभाषायाश्च वर्णग्रहणेऽप्रवृत्तिरित्यङ्गसंज्ञासूत्रे कैयटेन स्पष्टमुक्तेरिति भावः। समभिहारादिति साहचर्यादित्यर्थः। व्याख्यानादिति। एतेन स्वसमस्य काराद् मिपः पकारेण प्रत्याहारं कृत्वा [illegible]स्य पान्तान्तानाम इति सूत्रपितुमुचितमित्यपास्तम्। तथा सति मिपः पित्त्वानापत्तेः। इदमेव ज्ञापयति इह सूत्रे संभावितसमुदायानुबन्धसंनान्तावयवानुबन्धत्वमिति। एतेन प्रत्याहारार्थानुबन्धस्थानिवदादिसूत्रस्य भाष्यविरोधः। तत्र ह्यय इत्यकारस्य प्रत्याहारार्थत्वमुक्तम्। इष्यते चाय चिचित्कार्यमपीति परास्तं प्रकृते ज्ञापकबलेन तथाङ्गीकारेप्यन्यत्र तथाङ्गीकारे मानाभावात् ॥

संपप्रच्छिमहे इति। संपूर्वात्कर्त्तरि तङ्। वव्रश्चिमहे इत्यत्र कर्मणि। अन्यत्राव्यभिचारादिति। द्वन्द्वसाधुत्वायानुदात्तांशे शब्दान्वयसत्त्वेपि तस्यानैष्फल्यं बोधयितुं अनुदात्तांशे उपदेशे इत्यस्यासंबन्धः इति प्राञ्च इति। अत्राहुः चिबीजं तु विभक्तिविपरिणामकल्पने गौरवमिति। धातोराक्षेप इति। इदं च भिन्नवाक्यतया सामान्यशास्त्रविहितानामनेन नियमस्तदभावे पर्यायेण प्रसक्तस्य सर्वस्यानेन निवृत्तिः क्रियत इति न भुक्तवन्तमित्यादिन्यायविरोधो लुगादिनेव नियमेनापि जातस्य निवृत्त्यङ्गीका

तेन संपप्रच्छिमहे वव्रश्चिमहे इत्यत्र ग्रहिज्येति संप्रसारणं न। तथा इषेः कर्मण्याशीर्लिङि एषिषीमहि। अत्र क्ङिति चेति गुणनिषेधो न। तङानौ लः इति षष्ठ्यन्तानुवृत्तेर्लादेश एवानयोर्गृह्यत इत्याह। शानन्कानचौ चेति। तेन ताच्छील्यादिषु चानश परस्मैपदिभ्योपि भवति। कतीह निघ्नानाः अनुदात्तङितः। द्वन्द्वान्ते श्रूयमाणइच्छब्दः प्रत्येकं संबध्यते। तत्रानुदात्तांशे तदन्तविधेः फलाभावात्। अंशान्तर एव तदन्तग्रहणम्। तदाह। उपदेश इत्यादि। उपदेशेजनुनासिक इति सूत्रात् उपदेशग्रहणमनुवृत्तं तदपि ङित्यंश एव संबध्यते। —— नान्यत्राव्यभिचारादिति भावः। तदन्तविधिलाभार्थं विशेष्यमाह। धातोरिति। एतच्च भूवादय इति सूत्रान्मण्डूकप्लुत्यानुवृत्तस्य धातोरित्यस्य विभक्तिपरिणामाल्लभ्यत इति प्राञ्चः। वस्तुतस्तु इकोझलित्यत्र सनो धातोरिवेहात्मनेपदेन लकारधात्वोराक्षेपो बोध्यः। तिङादेशत्वात्। लस्य च धातोर्विधानात्। उपदेश इति किं। चुकुटिषति। गाङ्कुटादिभ्य इति सन आतिदेशिकं ङित्वम्। धातोः किम्। चङ्ङभ्यां माभूत्। अदुद्रुवत्। अवोचत्। ॥

एहानविशेष इति मतेन लक्ष्यानुसाराच्चासिद्धस्यापि शाब्दबोधे अनुदात्तिदं प्रकरणं। तिबादिविधिना सहैकवाक्यतयानुदात्तङितो धातोर्विहितस्य लस्य स्थाने एकत्वेऽगम्ये आत्मनेपदैकवचनं तदित्यादिक्रमेण व्याख्यानाद्विधायकमिति पक्षस्तदा विशेष्यलाभः स्पष्ट एव। आत्मनेपदशब्दादौ च भाविसंज्ञाश्रयणमत्र पक्षे तत्र सर्वेषां खलेकपोतन्यायेनैकवाक्यता एतदभावे प्राप्तातिप्रसङ्गपरिहारेण पूर्वं एतेषां नियमत्वव्यवहार इति बोध्यम् ॥

ज्ञापितत्वादिति। अन्यथान्तरङ्गत्वात्सामान्य तःतिवादिषु सर्वस्माविशेषाद्यपेक्षनियमापेक्षयान्तोङ्लादिकरणेष्वनुदात्तेत्यादेर्विहितविशेषणत्वे मानाभावेन तेन व्यवधानान्नि
यमाप्रवृत्तौ सामान्यविधिः सर्वेषां सिद्धो तद्वैयर्थ्यं स्पष्टमेवेति भावः। अत्र पक्षे दङ्गा इत्यत्र स्येदिति विषयसप्तमी ज्ञेया। यङन्तादिति। अन्यथा यङाद्यन्तसमुदायस्य तिङ्निरूपि
नाङ्त्वानापत्तावङाद्यव्यवस्थादिति भावः। विशेषणमिति। तेनत्वे क्लिश्य इत्यर्थ इति बोध्यम्। अन्ये तु ग्रहणमिदमेकवाक्यतया विधायकमित्यर्थस्य ज्ञापकम्। तत्र धातोरिति प
ज्ञम्या। —विहितविशेषणत्वेन तत्समानाधिकरणस्यानुदात्तङित इत्यादेरपि तत्त्वमेव तेन चङ्ङोर्न दोषः तदन्तस्य धातुत्वाभावाच्च। वृद्भ्य इत्यादौ स्येदिति च विषयसप्त
ननु वृद्भ्यः स्यसनोरिति सूत्रे स्यग्रहणे न विकरणेभ्यो नियमो बलीयानिति ज्ञापितत्वात् चङ्ङोर्न दोष इति चेत् सत्यम्। स्यग्रहणं विकरणव्यवधानेपि
नियमप्रवृत्तिं ज्ञापयतीति पक्षे चङ्ङोर्दोषः स्यादेव। अयञ्च पक्षः शादेः शित इति सूत्रे भाष्यकैयटयोः स्पष्टः। किंच तदन्तविधिलाभार्थमपि धातुग्रहणम्। फल
न्तु यङन्तादीयङन्ताच्चात्मनेपदसिद्धिः। बोभूयते। क्रूतीयते। कथं तर्हि शेत इति, व्यपदेशिवद्भावेन शीङो ङिदन्तत्वात्। चित्रीयते इत्यादौ तु अवयवेऽचरितार्थेन ङका
रेण क्यजन्तस्य विशेषणं तेन व्यपदेशिवद्भावेन ङिदन्तत्वेति बोध्यम्। स्वरितञितः। कर्त्तारमभिप्रैति गच्छतीति कर्त्रभिप्रायम्। कर्मण्यण्। तिङस्त्रीणि। ननु तिङः षट्
त्रिकाः सञ्ज्ञास्तु तिस्र इति यथासंख्यं न प्राप्नोत्यत आह। उभयोरिति। परस्मैपदमात्मनेपदमिति चानुवर्त्तते। तेन पदद्वये प्रत्येकं सञ्ज्ञा प्रवर्त्तते इति भावः। ननु प्रथममध्य
मोत्तमा इत्यत्र कृतद्वन्द्वानामेकशेषमाश्रित्य सञ्ज्ञा अपि षडिति कुतो नाश्रीयत इति चेत्। एकशेषाश्रयणे गौरवात् वैयर्थ्याच्चेति गृहाण ॥
मीति तद्विषये विकल्पसिद्धिरित्याहुः। इदं च सूत्रं नाम धातोर्न प्रवर्त्तते। एतद्विषयस्य तस्यानभिधानात्। ध्वनितं चेदं लोहितादिसूत्रे१ क्यष इत्यस्य स्थाने वा — दिसूत्रिते। आचारक्विब
न्तस्य शब्दादौ दोषस्य स्पष्टत्वेन भाष्यासङ्गतिः। बहुव्रीहेरूधस इति सूत्रे भाष्येपि ध्वनितमिति निरूपितम्। अवगल्भत इत्यादौ त्वनुदात्तत्वानुनासिकत्वप्रतिज्ञासामर्थ्यात्प्रवृत्तिः।
चित्रीयत इत्यादावयवेऽचरितार्थेन ङकारेण क्यजन्तविशेषणतया व्यपदेशिवद्भावेन ङिदन्तता बोध्या। इति चानुवर्त्तते इति। तच्च षष्ठ्यन्ततया विपरिणम्यत इति भावः ॥

१ क्यषः ककारषकारप्रत्याख्यानपरभाष्येण। अन्यथा वा

ज्ञापकानुसरणे त्विति। प्रथमादिसञ्ज्ञया परस्मैपदसञ्ज्ञाया बाधे हि परस्मैपदानां विहितो णलेव दुर्लभ इति भावः। पर्यायः स्यादिति। तथा चादानीं स्याद्वाडुत्तमस्येला इ
सिद्धिरिति भावः। प्रागुक्तरीत्येति। सुप इति सूत्रोक्तरीत्येत्यर्थः। इत्यस्य व्याख्यानमिति। स्थानं प्रसङ्ग इति सुप्रदीतितदर्थ इति भावः। त्वां पश्यतीति। तिङ् वाच्यकारकस्यावि
त्वयापि हि परस्मैपदात्मनेपदग्रहणमनुवर्त्यमेव अन्यथा शतृक्वस्वोः सावकाशा परस्मैपदसञ्ज्ञा प्रथमादिसञ्ज्ञया बाध्येत। णलुत्तमो वेत्यादिज्ञापकानु
सरणे तु सुतरां प्रतिपत्तिगौरवम्। तान्येकवचनातानीत्यस्य व्याख्यातम्। लभ्येत्यादि। अन्यथा एकसञ्ज्ञाधिकारात्प्रथमादिसञ्ज्ञानां एकवचनादिसञ्ज्ञानां च
पर्यायः स्यात् इति भावः। प्रत्येकमिति। यत्तु प्राचा एकैकश इत्युक्तं तदशुद्धमिति सुप इति सूत्रे वोचाम। माधवदुर्घटग्रन्थावपि एकैकश इति समर्थयितुं प्रव
त्तौ प्रागुक्तरीत्या प्रामादिकावेवेत्यवधेयम्। युष्मदि स्थानिनीत्यस्य व्याख्यानमप्रयुज्यमान इति। समानाधिकरणे किं। त्वां पश्यति त्वया क्रियते। तिङ्शित्। धात्व
धिकारेति किं। हरीन्। यासः सार्वधातुकमपि ङिदिति ङित्वे घेर्ङितीति गुणः स्यात्। लिहः स्रियः इत्यादौ सार्वधातुके यक् च स्यात्। यत्तु वदन्ति। वारिणी इति शीभाव
स्य सार्वधातुकत्वाल्लघूपधगुणः स्यादिति तन्न। क्ङितीति निषेधात् इगन्तत्वप्रयुक्तस्य नुमः गुणः प्रयोजकत्वे सन्निपातपरिभाषाविरोधाच्च। झोन्तः। आय
ने नीयि य इति सूत्रात्प्रत्ययग्रहणमनुवर्तते। आदिः ग्रहणं निवृत्तम्। अन्यथा शयातै इति न सिध्येत्। शीङो लेट्। लेटोडाटावित्यादि कृते इस्थानादि
लात्तदेतदाह। प्रत्ययावयवस्येति। एतेन प्रत्ययादेरस्येति प्राचो ग्रन्थः प्रत्युक्तः ॥
त्वं हि सामानाधिकरण्यं तिङर्थः भेदान्वयित्वमिति याव[illegible]न्वित्वं त्वक ङकारादावित्यर्थे न गुणो वारयितुं शक्य इत्यरुचेराह लिह इति। लघूपधेति। वृद्धौ त्वेति पू
र्वविप्रतिषेधेन सार्वधातुकेति गुणं सार्वधातुकसञ्ज्ञा सा नेष्टत्वेन समं बाधितान्गुणस्य तौ जानीयामिति भावः। ननु विभाषोर्णोरित्यादि पूर्वोत्तरसाहचर्येण धातोः परस्यैव
ङित्वेप्याह। कृन्तत्वेति। इत्यादि कृते इति। लावस्थायामेवादिनिर्दिश्यमानपरिभाषया लस्य झीत्यादेशे कृते इति भावः ॥

१अन्यथानत्तद्धि..स्वार्थिकत्वादेः। अत एवेति। आदेशत्वद्वागमेत्वेपि अवयवानामानर्थक्यस्य सत्त्वादेव।

नियम इति। एवं च तद्धितस्यापि प्रत्ययत्वमर्थवत्त्वं चेत्यादिग्रहणानुवृत्तावपि न दोष इति भावः। घुग्रहणेनेति। इदमुपलक्षणं दाधातुग्रहणेन पुग्विशिष्टस्य घुत्वमित्यपि बोध्यम। अवयवत्वायोगादिति। अत एवोस्य पदान्तादिति सूत्रे भाष्ये भिद्युरित्युसोनर्थकत्वमुक्तम्॥ इडागमापत्तेरिति। न चार्धधातुकस्येडित्यादौ आर्धधातुके न धातोराक्षेपाद्धातोः परस्यार्धधातुकस्येत्यर्थान्न दोष इति वाच्यम्। आर्धधातुकसंज्ञायां धातुविहितत्वस्यैव निमित्तत्वेन विहितपञ्चम्यन्तस्यैवाक्षेपापत्तौ दोषतादवस्थ्यान्नत्वङ्गादिति। अङ्गाधिकारादिति यत्तु व्याचक्षते आडागमे कृते अस्तु नाम तत्सहितोपि प्रत्ययो न तु तत्सहित एवेति नियमः। अन्यथा प्रणिदापयतीति पुकि कृते दा इत्यस्यानर्थकत्वादधातुत्वाच्च घुसंज्ञा न स्यात्। अत एव कैयटेनोक्तम्। अनागमकानां सागमका आदेशा भवन्तीत्येतत्तु नित्यतासमर्थनायैवोक्तं प्रक्रिया——दशायां त्वागमागमिभाव एवेति। अत्रेदं वक्तव्यम्। प्रणिदापयतीत्यादौ पुगागमात्प्रागेव घुसंज्ञाप्रवृत्तौ पुग्विशिष्टस्यापि घुग्रहणे च ग्रहणान्न कश्चिद्दोषः। यदागमास्तद्ग्रहणेन गृह्यन्ते इति न्यायात्। यत्तूक्तम्। कृतेप्यागमे तत्सहितस्यैव प्रत्ययत्वमिति नियमो नास्तीति तन्न। अवयवविनिर्मुक्तस्यावयवित्वायोगात्। अन्यथा भूयास्तामित्यादौ नामादीनामिडागमापत्तेः। नन्वङ्गात्परस्य इट यासुडन्तं त्वनाङ्गमिति चेन्न। भवामि भविष्यामीत्यादौ विकरणान्तस्येव तदादिग्रहणबलेन लभ्यते यासुडन्तस्यापि अङ्गताया दुर्वारत्वात्। कैयटग्रन्थोपन्यासस्तु रूपेवानहि ते न कृतेप्यागमे तद्विनिर्मुक्तस्य प्रत्ययत्वमिति त्वदभिमतं लभ्यते किंच। लविषीयेत्यत्र विशेषहितत्वात्सीयुटि कृते लिङ इट् तस्यागमेनादित्वविघातात् प्रत्ययाद्युदात्तत्वं न प्राप्नोतीत्याशङ्क्य प्रत्ययस्वरे कर्तव्ये आगमा अविद्यमानवदित्यतिदेश आद्युदात्तश्चेति सूत्रे भाष्यादौ स्वीकृतः। न चैतत्केवलस्यापि प्रत्ययत्वे युज्यते इत्यलमाकरविरुद्धग्रन्थसमर्थनाभिनिवेशेन ॥ ७ भावः। दुर्वारत्वादिति। अङ्गनिमित्तस्यार्धधातुकस्येत्यर्थे दोषाच्चेत्यपि बोध्यम्। सीयुटीकृते इति। लावस्थायामिति शेषः। इडिति। इडादेशादित्यर्थः। युज्यत इति। तदयुक्तत्वं प्रकृतसूत्रे भाष्ये ध्वनितम्। स्यसिच्सूत्रे कैयटे च स्पष्टम्। एतेनागमे कृते तद्विहितस्यार्थवत्त्वमिति येन विधिरिति सूत्रस्थकैयटोक्तमपास्तम्। अनिनस्मन्ग्रहणानीति सूत्रोक्तादित्यनर्थकेनेति तत्सूत्रस्थभाष्यविरोधाच्चेति दिक् ॥

प्लुतो मा भूदिति। न चानन्त्यस्य पदस्य टेरिति तदर्थात्कथं पचामीत्यादौ तस्याप्तिरिति वाच्यम्। दीर्घग्रहणसामर्थ्येनान्त्यविषय एव तत्संबन्धात्वाक्यटेः पोः क्लृप्तसंबन्धत्यागे मानाभावात्। तेन वाक्यस्यानन्त्यस्य पदस्याचः प्लुतः स्यादन्त्यस्य पदस्य च टेरिति तदर्थः। आदिति तपरकरणेन तु तद्व्यावृत्तिः प्लुतस्यासिद्धत्वात्। अत एव गौः पूरित्यादौ दीर्घः। अन्यथा तस्यापि दुदिति परत्वसामर्थ्यादप्रवृत्तिः स्याद्दीर्घग्रहणे तु तत्सामर्थ्यादसिद्धस्यापि बाधः आकारान्तरप्रश्लेषेण वारणन्तु क्लिष्टं तत्र तात्पर्यग्राहकाभावात्। अस्तु वा तदुपायान्तरमिति भावः। एतच्च हरदत्तानुरोधेनोक्तम्। वस्तुतद्दूरं चिन्त्य। ज्ञाजनोर्जेति सूत्रे जायते जाय ——— नीत्यादौ ह्रस्वादेशेप्यतो यञीति दीर्घेण सिद्धे दीर्घनिर्देशस्याङ्गवृत्तौ परिभाषाज्ञापकत्वपरिभा

अतो दीर्घो यञि। सार्वधातुके किम्। केशवः। अङ्गना। अत आदिति वक्तव्ये दीर्घग्रहणं दीर्घ एव यथा स्यात्। अनन्त्यस्यापि प्रश्नाख्यानयोरिति प्लुतो मा भूदित्येतदर्थम्। अपाक्षीरोदनं देवदत्त ननु पचामि भोः। परोक्षे। यद्यपि क्रिया सर्वा परोक्षैव। उक्तं हि भाष्ये। क्रियानामत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुमिति। तथापि तदनुकूलशक्तिमतां व्यापाराविशिष्टानां साधनानां पारोक्ष्यमिह विवक्षितम्। तेन क्रियानाविष्टसाधनमात्रप्रत्यक्षेपि लिड् भवत्येव। अयं पपाच त्वं पेचिथेति। एवं त्वमापारस्यापि वर्तमानतादशायां व्यासङ्गादिना स्वयमप्रतिसन्धाने ततः कार्येणानुमितौ भवत्येव। बहुजगद पुरस्तात्तस्य मत्ता किलाहमितिवत् ॥

ष्यविरोधात्। दीर्घेजा नाम्योद् त्यादौ प्लुतानापत्त्या तत्साधनेन जा इति दीर्घोच्चारणस्य सार्थक्यात्तस्माद्वैकल्पिकत्वेनेदृशे विषये प्लुताप्रवृत्तिरुचिता दीर्घग्रहणं हलि लोप इति सूत्रे हल्य इति विकल्पे लोपग्रहणवदिति बोध्यमिति दिक्। क्रियासर्वेति। अवयवक्रियासमूहरूपा चेत्यर्थः। अत्यन्तापरदृष्टेत्यस्यावयवशः समूहश्च अपरेण प्रमाणेन प्रत्यक्षेणादृष्टेत्यर्थः। पूर्वापरीभूतावयवेति तल्लक्षणकथनं एकैकक्षणस्तु[illegible]सूक्ष्मकालत्वाद् परइत्यत एव पिण्डीभूता निदर्शयितुमशक्या पिण्डीभावस्यैवाभावादिति भावः।। अत एवैतच्चक्षे भाष्ये सामावनुमानगम्येति। पश्य मृगो धावतीत्यादौ पश्येत्यस्य ज्ञानसामान्यपरत्वं तस्याः फलानुमेयत्वादिति बोध्यम्। एवं चाव्यावर्तकत्वात्परोक्ष इति विशेषणमनुपपन्नमिति भावः।। शक्तिमतामिति। तां विना व्यापारावेशासंभवादिति भावः ॥

एवकारइति॥अन्यथैकसञ्ज्ञाधिकारादन्यत्रसत्वेनसञ्ज्ञासमावेशःस्यादितिभावः।ननुधातोरितिसूत्रेन्नाथेतिपतसद्गीत्यादौधातोरित्यस्यविहितविशेषणतायाउक्तत्वेने
हाप्यधाकारात्तथैवापत्तौआदिरित्यस्याप्रवृत्तिरित्यरुचेराहद्वयेतिलोपःस्यादिति।सन्निपातपरिभाषायास्तुनैत्तद्विषयेप्रवृत्तिःअविभरित्याद्यसिद्धापत्तेरितिभावः।अन्तर
ङ्गत्वादितिप्रत्ययविशेषापेक्षहलङ्यादिलोपापेक्षयावर्णमात्राश्रयत्वेनतस्यान्तरङ्गत्वमितिभावः।प्राप्तेरेवाभावादिति।वलिलोपेवग्रहणप्रत्याख्यानेनतदप्राप्तेश्चेत्यपि
लिट्च।लङः शाकटायनस्यैवेतिसूत्रादेवकारोनुवर्त्तते।तदाह।आर्द्धधातुकसञ्ज्ञएवेति।परस्मैपदानाम्।अत्रयशब्दस्यअकारोविधीयमानोस्यस्यप्राप्तो
ति।नचविधिवैयर्थ्यंयथासंख्यसंपादनेनकृतार्थत्वात्।अत्राहुः।धातोरित्यधिकारादादेःपरस्येतिव्यञ्जनमात्रस्यकृतेइयोरतोगुणइतिपररूपम्।यद्वाइयो
रकारयोःपररूपेणसूत्रेनिर्द्देशः।अनेकाल्त्वात्सर्वादेशः।भुवोवु।अचीतिकिम्।अभूत्।अभूः।वुकिसतिलोपोव्योरितिबाधित्वापरत्वाद्हल्ङ्यादिलोपः
स्यात्।स्यादेतत्।हल्ङ्यादिलोपादन्तरङ्गत्वाद्वलिलोपएवभविष्यति।तथाचमव्यतेर्यङ्लुगन्ताल्लङितिप्सिपोःअमामत्।अमामइतिमाधवादिभिरुक्तं
एवंचाज्ग्रहणमूदुपधायाइत्युत्तरार्थमनुवर्त्तमानमिहाप्युपरंजकतयावृत्तिकारादिभिरुपयोजितम्।नत्वावश्यकमित्येवनिष्कर्षउचितमितिचेन्नैवम्।हल्
ङ्यादिलोपस्यैववुकोपिवह्वपेक्षत्वेनबहिरङ्गतयाअसिद्धत्वेसतिवलिलोपस्यप्राप्तेरेवाभावात्तस्मादज्ग्रहणमिहार्थमपीत्येवयुक्तम्।अजादेरिति।नबहु
व्रीहेःषष्ठी।इन्दिद्रीयिषत्यत्रदकारस्यनन्द्राइतिद्वित्वनिषेधापत्तेः।किंतुकर्मधारयादेषापञ्चमीतदाह।आदिभूतादिति।भूव्भूविति।अत्रधात्ववयवत्वंप्राथम्य
व्यपदेशिवद्भावेनबोध्यम्।यद्यपीहचत्वारएकाचःतत्रावयवास्त्रयः।भूः।ऊ।ऊव्इतिसमुदायश्चतुर्थः ॥७ बोध्यम्।एवंञ्चमाधवाद्युदाहृतंचिन्त्यमेवेतिदिक्।निषे
धापत्तेरिति।स्पष्टंचेदंसंयोगसञ्ज्ञासूत्रेभाष्येकर्मधारयादितिराजदन्तादित्वात्सौत्रत्वाद्वाविशेषणस्याप्यादिशब्दस्यपरनिपातइतिभावः।चत्वारएकाचइति।निमौचत्वारएकाचइति
भाष्यस्यैकदेशयुक्तरीत्येदम्।व्यपदेशिवद्भावस्यासहायेएवप्रवृत्त्यैतत्कैयटेऊकारेएकाच्त्वोपपत्त्यभावात्संभवनामात्रेणत्वेकदेशितातयोक्तमितिबोध्यम् ॥

द्विरुच्यन्तएवेति।अवयवद्वित्वेहिसमुदायस्यावयवान्तरस्यचाननुग्रहःस्पष्टएवेतिभावः।पुनःपुनःप्रवृत्त्यासर्वावयवानुग्रहःशक्यइति तुन र्वाच्यम्। ¯¯ एकवारन्द्वित्वेलक्ष्येलक्षणस्येतिन्यायेनपुनर्द्वित्वाप्रवृत्तेःएकाचोभावेनपुनस्तदप्रवृत्तेः।युगपत्तुसर्वेषांद्विःप्रयोगोशक्यःवाचःक्रमवृत्तित्वात्।प्रकरणेइति।पूर्वोभ्यासइत्यस्याप्यधिकारसूत्रत्वादेतदर्थलाभः।बभुर्जहुरित्यादौवाहुलकादभ्यासकार्यमितिभाष्येतुकृदादीनांकादेर्द्वित्वंवक्तव्यम्।वक्रुर्वभुर्जहुर्यमुरित्याद्युदाहृतम्।एवञ्चाणादिषुद्वित्व

तथापिसमुदायैकाचएवद्वित्वम्।तस्मिन्हिद्विरुच्यमानेत्रयोप्यवयवाःद्विरुच्यन्तएव।वृक्षचलनेसर्वावयवचलनवत्।पूर्वोभ्यासः।अत्रेति।एकाचोद्वेइतिप्रकरणे।हलादिः।अभ्यासस्येति।जातिपरोनिर्देशः।तेनाटतुरित्यादौटकारादिनिवृत्तिःसिद्ध्यति।क्वचिदभ्यासेआदेर्हलःसत्त्वमाश्रित्यसर्वत्रानादेर्लोपविधानात्।भवतेरः।अत्रप्राचोक्तम्।भवतेरितिकर्तृनिर्देशाद्भावकर्मणोर्नात्वमिति।व्याख्यातञ्चपौत्रेणकर्त्रर्थयोर्लिपृशापोर्निर्देशादित्यर्थ इतितन्न।धातुनिर्देशमात्रेपि पोविधानात्।शपश्चविकरणत्वेनानर्थत्वात्।कर्त्रर्थकेपरेविहितस्यापितस्यश्तिपःशित्वसामर्थ्यादेवेहप्रवृत्तेः।अन्यथात्वदुक्तरीत्याउपसर्गात्सुनोतिसुवतीत्यादीनामपिभावकर्मणोरप्रवृत्तौसर्वोपप्लवएवस्यात्।अपसिद्धान्तश्चायमितिस्पष्टमेवाकरदृशाम्।प्रयुञ्जतेचकर्मण्यप्यकारंकवयः।तस्मातपत्रंविभरांबभूवेविभावरीभिर्विभरांबभूविरइत्यादि।असिद्धवदत्रा।अभिविधावाङ्। ॥

विधानमनार्षमितिलभ्यते।लोपविधानादिति।इदञ्चाजादेरितिसूत्रेभाष्येस्पष्टम्।अनर्थकत्वादिति।स्वस्यअर्थवाचकत्वाभावाद्वाचकस्यकस्यचिद्भावेनद्योतकताभावाच्चेतिभावः।तस्यशपः।शित्वसामर्थ्यादेवेति।इदंकैयटाद्यनुरोधेन,वस्तुतउपसर्गात्सुनोतीत्यादिनिर्देशाज्ज्ञापकादेवविकरणः शत्वस्यच धादेशार्थमादेशवदित्यात्वप्रतिषेधार्थंकृदादिभ्यइतिइडा द्यर्थञ्चारितार्थ्यादितिबोध्यम्।इदञ्चेकृत्स तण्णाविति वार्त्तिकमूलएवस्फुटीभविष्यति ॥

भाधिकारमिति। अर्थवतो भशब्दस्य ग्रहणादिति भावः। नन्वं स्वविधित्वे आभात् ग्रहणमसिद्धवदितो निर्देशार्थं यं प्रत्यसिद्धत्वं तन्निर्देशार्थं च स्यात्। विनिगमनाविरहात् एव
ज्ञाभीयं माभीयेऽसिद्धमित्यर्थलाभेऽपि समानाश्रयत्वं न लभ्येतात्र ग्रहणस्यानर्थकं स्यात्। अत्र सूत्रे निमित्तानुल्लेखादित्यत आह। अधिकारश्चायमिति। समानाश्रयेति। अत्र पदेन
यत्रानुवृत्तिः तत्सूत्रस्थसप्तम्यन्तोल्लिखितो निमित्तसमुदायः। [illegible] तेः सप्तमी चैवैषयिकी इदमेवाभिप्रेत्य निमित्तत्वं यथा कथंचिन्न तु कार्यिभिन्नत्वेनैव सप्तम्यन्तोल्लि
भाधिकारमभिव्याप्येत्यर्थः। अधिकारश्चायम्। अत्र ग्रहणं समानाश्रयप्रतिपत्त्यर्थम्। भाद्ग्रहणं विषयनिर्देशार्थम्। एवञ्चानुदात्तोपदेशेत्यत्रास्योप
स्यानेऽस्य यमर्थो भवति। एषामनुनासिकस्य लोपः स्याज्झलादौ क्ङिति परे स चासिद्धो भवति। अत्र झलादौ क्ङित्येव निमित्ते सति यदाभीयं प्राप्नोति तस्मि
न्कर्त्तव्य इति। नन्वस्याधिकारे यत्र यन्नोपस्थानं तत एवारभ्य यदाभीयं तस्मिन्नेव कर्त्तव्येऽसिद्धत्वं स्यान्न तु ततः पूर्वस्मिन्नपि ततश्च यसोरित्येव पूर्वस्मिन्
धित्वे कर्त्तव्ये नासिद्धं स्यादिति चेन्न भवेदयं दोषः शब्दाधिकारे अयन्त्वर्थाधिकारः। ततश्चेह श्नान्नलोप इत्यवधिर्निर्णीतः। स एव प्रतिसूत्रमुपतिष्ठते। तदे
तत्सकलमभिप्रेत्याह। इत ऊर्द्धमिति। अत्रापि शास्त्रासिद्धत्वमेवाकरे स्थितम्। तेन एधि शाधीत्यत्र स्थानिनो झलन्तत्वबुद्धेरनिवर्तितत्वान्न निर्वचनं धि
त्वं सिद्ध्यति। यत्तु प्राचा कार्यासिद्धत्वमुक्तं तत्सामादिकम्। समानाश्रय इति किम्। पपुषः। चिच्युषः। लुलुवुषः। इह वसोः संप्रसारणमाल्लोपे यणि उवङि कृ
र्तव्ये नासिद्धम् ॥ ७॥ खितत्वेनैवेत्याग्रह इति प्राञ्चस्तेन लुको हिस्थानिकत्वेऽपि जहीत्यादावसिद्धत्वसिद्धिः। विषयेति। असिद्धवदिवतीयं प्रत्यसिद्धत्वं तस्य चेत्यर्थः। अव
पिलाभस्तु अङ्गस्येत्यादाविव व्याख्यानत एव भविष्यतीति भावः। अर्थाधिकार इति। शब्दाधिकारे शब्दार्थयोः कल्पनार्थाधिकारे तु शब्दमात्रस्येति लाघवादिति भावः। इह पदार्थ
माह। श्नान्नलोप इति। इत्यत्रेत्यर्थः। अवधिरिति। यं यं प्रत्यसिद्धत्वं वदिया आभात्वदवोध्यो निर्णीत इत्यर्थः। स एवेति। तावान्सर्व इत्यर्थः। तत्सामादिकमिति। तदा हि देवदत्तहन्तृहतन्या
येन धित्वं न स्यादिति भावः। न च जनसनेति सूत्रभाष्योक्तरीत्या परत्वाद्द्वित्वे कृते शाभाव इति वाच्यम्। धिभावविषयपरिहारेण शाभावस्य विषयाभावेन परत्वाप्रवृत्तेः ॥

आल्लोपादीनिहीति।अयंभावः।वसोरितिसूत्रेः सिद्धवत्सूत्रानुवृत्त्यासंप्रसारणस्यासिद्धत्वंवाच्यम्।तच्चान्नेत्यनेनोपस्थितसंप्रसारणसूत्रगृहीताश्रयाश्रितंप्रत्येवताद्दृशंचनाल्लोपादिसंप्रसारणनिमित्तभूतविभक्त्यनिमित्तत्वात्असिद्धपरिभाषया.तुनतस्याऊठ्सूत्रेनिष्पन्नत्वेनबहिरङ्गान्तरङ्गयोरुभयोरप्यसिद्धतयातदप्राप्तेः॥आश्रयत्वादिति।समानाश्रयत्व च — तस्ययोगप्राप्तासिद्धत्वाश्रयशास्त्रीयशब्दरूपनिमित्तरूपसमुदायापेक्षयाः न्यूनानतिरिक्ताश्रयत्वंतत्रपप्रुषद्त्यादौन्यूनः चाख्यायितेत्यादावधिकः तत्रयङ्निमित्तंयेविभाषेत्यालंतृज्निमित्तेयस्यहलइतिलोपेनासिद्धमतिरिक्तमपिपूर्वविद्युपात्ततावच्छेदकरूपेणाश्रितञ्चेत्तदपिसमानाश्रयमेवसमानशब्दस्वारस्यात्अतएव आल्लोपादीनिहिकसौसंप्रसारणन्तुविभक्तावितित्याश्रयत्वात्।वुकोवुकच्छास्त्रस्य।एवमग्रेपि।वुग्युटाविति।युटउदाहरणन्तुदिदीये।बभूवेति।अत्रप्राचाइन्धिभवतिभ्याञ्चेतिसूत्रंपितोपिलिटः कित्त्वार्थंव्याख्यायाचोञ्णितीतिवृद्धिप्राप्तौक्ङितिचेतिनिषेधइत्युक्तंतदुपेक्षितमिग्लक्षणयोरेवगुणवृद्ध्योर्निषेधइतिसिद्धान्तात्।नचकित्त्वसामर्थ्याद्निग्लक्षणायाअपिवृद्धेर्निषेधइतिवाच्यम्।णलिउत्तमेणलिचगुणनिषेधेनकित्त्वस्यचरितार्थत्वात्।सूत्रन्तुप्रत्याख्यातमाकरि।तथाचवार्तिकम्।इन्धेश्छन्दोविषयत्वाद्भुवोवुकोनित्यत्वात्ताभ्यांलिटः किद्वचनानर्थक्यमिति।बभूविवेति।श्युकः कितीतिनिषेधेप्राप्तेक्रादिनियमादिट्।अनेकमवेति।सार्वधातुकादिकमिकोविशेषणंनत्वङ्गस्येतिभावः।रिच।अङ्गाक्षिप्तस्यप्रत्ययस्यरेफेणविशेषणात्यस्मिन्विधिरितितदादिविधिः।तदिदमाह।एदाविति ॥ ७ चिणोलुकि।चिणोलुगसिद्धइतिलीईयतीसत्रयस्येतिलोपापेक्षयाल्लियाइती यङि अधिकस्यलीशब्दस्यापेक्षणाद्ध्याश्रयत्वमित्यङ्गसञ्ज्ञासूत्रभाष्येनितञ्चसङ्गच्छतइतिदिक्।वार्तिकमिति।एतेनङिद्वत्प्रवर्त्यातिदेशद्वयसामर्थ्याद्निग्लक्षणायाअपिनिषेधइतिपरास्तम्।भुवोवुकोनित्यत्वेनैवसिद्धेः भाष्यविरोधाच्चनचद्विर्वचनेचीत्यस्यप्रवृत्त्याद्वित्वात्पूर्वंगुणवृद्ध्योरभावेवुकोनिर्विघ्नत्वान्नित्यत्वादितिहेतुर्वार्तिकोक्तोसङ्गतइतिवाच्यम्।तत्रद्वित्वेकर्त्तव्येइतिवाक्यशेषेणवुकिकर्त्तव्येतत्स्वरत्वेमानाभावेनपरत्वात्तयोः प्राप्तौतस्यनिर्विघ्नत्वादितिदिक् ॥

असंभवादिति। नचव्यतिरेइत्यत्रास्तेः कर्मव्यतिहारेलिटस्तङिझस्येरेचिइरयोरेइतिरेआदेशेसंभवोस्तीतिवाच्यम्। छन्दसितथाप्रयोगानुपलम्भात्। अस्त्यर्थस्यव्यतीहाराद्युपपादनाच्चेतिभावः। लृटोबाधापत्तेरिति। तुमुन्विधावपिभविष्यतिगम्यादयइत्यतोभविष्यतीत्यनुवृत्तेः शयिष्यतइत्यत्रभावेभविष्यतिलृएवंहरिष्यमीतिव्रजनीत्यादौण्वुलाबाधापत्तिरपिबोध्या। शेषेचेतिसत्वेहिचकाराल्लृडपितत्रविशेषविहितइतिनदोषइतिभावः। ननुतदभावेपिवासरूपविधिनानदोषोतआह। लुडादिषितिक्तल्युट्तुमुन्खलर्थेष्वित्यर्थः। अत्रतुमुनण्वुलोप्युपलक्षणंवक्ष्यतइतिकृदन्तइतिशेषः। इदमपीति। शेषेचेतिग्रहणमप्यस्यर्थः।

प्राग्वदिति। तासेर्लोपइत्यर्थः। अस्तु नेहसंबध्यते। ततोरादेः प्रत्ययस्यासंभवात्। लृट्शे। तुमुण्वुलौक्रियायांक्रियार्थायामिति प्रागुक्तंततोन्यः शेषइत्याह। असत्यामिति। वार्थमाह। सत्यामिति। अत्रहरदत्तः। अस्वरितत्वादेवक्रियार्थायामित्यादिनानुवर्त्तते। एवञ्चशेषेचेतिसुत्यजमित्याह। तच्चिन्त्यम्। शयिष्यतइतिस्थीयतइत्यादौतुमुनालृटोबाधापत्तेः। क्तल्युडादिषुवासरूपविधेरभावात्। अत्रचज्ञापकंवक्ष्यते। इदमपिज्ञापकमित्युदेतत्। यत्तुप्राचाभविष्यतीतिव्रजतीत्युदाहृतम्। तन्न। तत्रतुमुनोप्राप्तेः भावेहिसः। समानकर्त्तृकेषुवेतिवक्ष्यते। आशिषिलिङ्लोटौ। ननुविध्यादिसूत्रएवसंप्रश्नप्रार्थनाशीष्विच्यताम्। किमनेनसूत्रेणेतिचेत्। मैवम्। इहहिक्तिच्चेत्युत्तरसूत्रार्थमाशिषीतितावदावश्यकम्। लिङ्लोटावपीहैवविधेयौ विध्यादिसूत्रेआशीर्ग्रहणेहिस्मेलोडित्यादिनास्वविषयेपरत्वाद्बाधःस्यात्। सिद्धान्तेतुपरत्वा विधिःस्मेलोडित्यादेर्बाधकइतिमहान्विशेषः॥

पीत्यर्थः। वक्ष्यतइति। नन्वेवमपिण्वुल्प्राप्नोतीतिचेन्न। ण्वुलोपिशब्दशक्तिस्वाभाव्यात्बाहुलकेनसमानकर्तृकेष्वेवेष्टेरितिभावः। बाधःस्यादिति। लिङ इतिशेषः। नन्वाधीष्टेचेतिसूत्रारम्भात्स्मेलोडित्यत्रवध्यादयोनानुवर्त्तन्ते। किंतुप्रैषादयएवेतिकथमाशिषिप्राप्तिरितिवाच्यम्। प्रैषाशीरर्थयोर्युगपद्विवक्षायांपरत्वादनेनलिङोबाधापत्तेः। किंचतस्यांलिङ्लोड्भ्यांपरत्वात्कृत्यबाधार्थमपीदमावश्यकम्। नह्यत्रनयुगपद्विवक्षेत्यत्रमानमस्तीतिभावः॥

ङितद्वन्नुरुस्येति। नित्यं ङितद्वत् ततः सिजभ्यस्तेत्यत्राश्रयमनुवर्त्तमानस्येति भावः। स्पष्टं चेदमातद्वत्त्वं भाष्ये। नन्वत्र ङितद्वत्त्वस्यानुवृत्तौ अधुरस्थुरित्यत्र लुङ्यपि परत्वाद्विकल्पापत्तिः। न चात इति सूत्रेण नित्यतया जुस्विधानान्निस्तारः। एवमातद्वत्त्वस्य विद्ध्यर्थत्वे भूवन्नित्यादौ जुसभावापत्तेरिति चेन्न। भाष्यप्रामाण्येन पूर्वविप्रतिषेधकल्पनेन दोषाभावात्। लङ इति पदोच्चारणपेक्षयेष्टवाचिपरशब्दाश्रयणे गौरवाभावादिति दिक्। तस्यैवेति। योगविभागसामर्थ्याज्जुस्समान्यस्य नियम इति बोध्यम्। अड् गार्ग्यगालवयोरित्यदः सर्वेषामिति च लङ एव विधीयमानावप्यडागमेनातिदिश्येते। अष्टकसार्वधातुकाभावात् अतिप्रसङ्गादिति। वैयधिकरण्यापत्तेश्चेत्यपि बोध्यम्। परस्मैपदेष्विकारस्येत्यत्र किं परस्मैपदेष्विकारस्येत्यत्र किं परस्मैपलोटो ल। षष्ठ्यन्तादिति। लोट इत्युपमेये षष्ठीदर्शनात्तदाह। तेनेति। अडाटौ तु नातिदिश्येते। न हि तौ लङः क्रियेते। किन्तु लङि अङ्गस्येति भावः। स्यादेतत्। यान्तु वान्त्वित्यत्र लङः शाकटायनस्येति जुस्स्यात्। जुहुवु विदन्तु सिजभ्यस्तेति जुस्स्यात्। अत्राहुः। विदो लटो वेति वाग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणान्न जुस्। यद्वा लङः शाकटायनस्येति सूत्रे ङितद्वत्त्वानुवृत्त्यैव सिद्धे लङ्ग्रहणमतिरिच्यते। तद्धि भज्यते। नियमार्थं अत्र लङेव यो लङ् तस्यैव झेर्जुस् न तु लङ्वद्भावेन यो लङ् तस्येति नोक्तदोषः। सकारान्तस्येति। प्राचा तु ङिल्लकारोत्तमसकारस्येति व्याख्यातं तन्न। भूयासमित्यादावतिप्रसङ्गादिति भावः। इतश्च। परस्मैपदेष्वित्यनुवृत्तम्। षष्ठ्येकवचनान्ततया विपरिणमय्य इत इत्यनेन विशेष्यते। तदाह। परस्मैपदमिकारान्तं यत्तस्येति। यत्तु प्राचा परस्मैपदेष्विकारस्य लोप इत्युक्तं तन्न। भवेदित्यादावतिव्याप्तेः। ननु ईयुरीर्घादिरस्तु। एवं च नोक्तातिव्याप्तिः। इतश्चेति लित्परकरणात्। अत एवाबोभवीदित्यादावपि न दोष इति चेत् ॥ ७ देषु परेष्वित्यर्थः उत तेषु विद्यमानस्येति। नाद्यः। अभवदित्यादावव्याप्तेः। नान्त्य इत्याह भवेदित्यादावपि अत्रेय इकारः ङित्वाद्गुणं बाधित्वा लोपापत्तिरित्यस्याप्यध्याहारे तु तदपेक्षया षष्ठ्या विपरिणाम एव न्याय्य इति भावः। न सलोप इत्येव सूत्रं कार्यम्। लिङः सलोप इत्यतो लोपपदानुवृत्त्या आतः परस्य यादेः सस्यान्त्यस्य लोप इत्यर्थस्तेनाकारलोपे न सिद्धे दकारोच्चारणसामर्थ्याल्लोपाभावः आतो ङित इति निर्देश एवैकार्थ इति वाच्यम्। नानर्थक इति निषेधेन सर्वलोपापत्तेः ॥

म·श्र· मेवमिति॥ तदपेक्षया विभक्तिविपरिणामस्यैवन्याय्यत्वात्। इतश्च लोपः परस्मैपदेष्विति सूत्रे परस्मैपदेष्विति त्वस्य षष्ठ्यर्थत्वाच्चेति भावः। दोषान्तरमप्याह। रुदेरिति। न चार्धधातुकस्येड्
२५३ त्यत्रेडित्यस्य वर्त्तमाने पुनरिड्ग्रहणादडिडेवेति नियमस्य दीधीवेवीटामित्यत्र भाष्ये उक्तत्वेन न दोष इति वाच्यम्। प्रत्यासत्त्याङ्गमेव तेन वार्यत इति स्पष्टम्॥ तत्रैकेयटोक्तेः। अन्य
थाऽलावीदित्यत्र दीर्घानापत्तिः। सिज्लोप एकादेशे सिद्ध इति वार्त्तिकेन प्रत्यासत्त्याश्रयणमेव तत्र ज्ञाप्यत इत्युचितम्। वस्तुतस्तु आर्द्धधातुकस्येडिति सूत्रस्थेड्ग्रहणप्रत्याख्यानप
धी· रेण नेड्वशीति सूत्रस्थभाष्यविरोधेन दीधीवेवीति सूत्रस्य भाष्यस्यैकदेश्युक्तित्वात् तत्रत्येड्ग्रहणप्रत्याख्यानाय तदुक्तम्। तत्र इड्ग्रहणं कृत्वा गुरुतरयत्नमाश्रित्यात्रत्येड्ग्रहणप्रत्या
मेवम्। रुदेर्लङि अरुदितामित्यादौ दोषश्चोद्यात्। विधिनियमम्। द्योत्येषु वाच्येषु वेति। पक्षद्वयस्यापि भाष्ये स्वीकृतत्वादिति भावः। अत्राद्ये उपपत्तिं ब्रूमः। विध्यादीनां प्रत्ययार्थ
त्वं नोचितम्। तथा हि सति कर्त्रादीनामर्थानां लकारान्तरे चरितार्थानां विध्यादयोऽर्था बाधकाः स्युः। तथा च लिङा कर्त्रादीनामभिधानं न स्यात्। ततश्च द्विवचनबहुवचने न स्याताम्। श
बादयश्च न स्युः। पुरुषव्यवस्था च न स्यात्। अभिहितत्वप्रयुक्तस्तृतीयादिविरहश्च न सिद्ध्येदिति। द्वितीये त्वियमुपपत्तिः। विध्यादिभिः कर्त्रादयो न बाध्यन्ते विरोधाभावात्। लः क
र्मणीत्यत्र सर्वलकारसङ्ग्रहार्थं ल इति बहुवचननिर्देशाच्च ॥ ५ ख्यानस्यानौचित्यात्। यदि लङ्गापेक्षतया प्रकृतिप्रत्ययविशेषापेक्षतया च बहिरङ्गत्वादिटोऽसिद्ध
त्वादरुदितामित्यत्र लोपाप्राप्तिरित्युच्यते। तदा वैयधिकरण्यादेरन्याय्यत्वमित्येव दोषो बोध्यः। लकारान्तरे इति। लङादिष्वित्यर्थः। कालस्तु द्योत्य एवेति भावः। शबादयश्चे
ति। कर्त्रर्थे सार्वधातुके परे तद्विधानादिति भावः। पुरुषेति। युष्मदादेस्तिङ्वाच्यकारकवाचित्वरूपसामानाधिकरण्याभावादिति भावः। ननु सत्यपि संभवे बाधवतीति न्याये
न विरोधाभावेऽपि बाधकत्वं स्यादत आह। बहुवचननिर्देशाच्चेति। लः कर्मणीत्यस्य सर्वान्तेकरणेन सर्वलकारोद्देशेन तदर्थबोधनात्ते—षां बाध इत्यपि बोध्यम्। एतेनोच्चारणार्थ
कारेण ल इत्येकवचनमिति भाष्यकैयटोक्तपक्षे दोष इत्यपास्तम्। न चात्र पक्षे निमन्त्रयेद्भवन्तमिति न स्यान्निमन्त्रणाया उक्तत्वादिति वाच्यम्। प्रद्योतकनिष्ठयोर्निमन्त्रणामन्त्रणयो रामः
रन्ययोरेवावश्यकर्तव्यत्वादिलक्षणयोः प्रत्ययार्थत्वस्वीकारात्। यद्वाऽर्हे कृत्यतृचश्चेत्यनेनैतद्देशविषये लिङ्लोटाविति बोध्यम् ॥ + ॥ ४ विरहश्चेति। चैत्र पचेदित्यादौ दोषलेशोऽपि विष २५७
यभावेनोपादानात्कर्त्रादीनां च लादेशवाच्यत्वान्न बाधप्रसक्तिरिति भावः ४

दिगिति। दिगर्थस्तु कालावाचकेष्वमाङ्लुङादिषु सावकाशता धात्वर्थभावनायाः कालाकाङ्क्षत्वेपि धात्वेण तेषां तद्वाचकत्वाद्बोधनेन तत्र चारितार्थ्यसंभवात्। अतो द्योतकतैव युक्ता। किंच प्रचेत्स्यादौ प्रत्ययं विनापि प्रवर्त्तनाप्रतीतापि चतुर्भिर्हलैः कृषतीत्यादौ प्रवर्त्तनाया अपि धात्वर्थस्य दृष्टत्वाच्च सैव युक्ता। कर्त्रादीनामपि द्योत्यत्वमिति मते च तत्त्वमेव युक्तमिति। प्रवर्त्तनात्वस्येति। प्रवर्त्तना च प्रवृत्त्यनुकूलो व्यापारः स च लोके लिङादिघटितशब्दप्रयोगरूपः वेदे लिङादिसमभिव्याहाररूपः शब्दनिष्ठः अयमेव शाब्दी भावनेत्युच्यते। शब्दरूपत्वात् प्रेरणत्वेन च तस्य लोडादिवाच्यता तेन रूपेण तस्य शब्दनिष्ठत्वाच्छब्दनिष्ठ इति चोच्यते। प्रेरणात्वेन सविषयपदार्थस्यायदृष्टसाधनत्वन्तु न प्रवर्त्तनेत्यन्यत्र निरूपितम्। च

किंच कर्त्रादयोपि निरवकाशाः। न च लडादयोवकाशः न्यायसाम्येन विध्यादिवद्वर्त्तमानत्वभूतत्वादेरपि तत्तल्लकारवाच्यत्वात्। न चैवं धात्वर्थं प्रति वर्त्तमानत्वादेः प्रत्ययार्थतया विशेष्यत्वं स्यादिति वाच्यम्। कर्त्रादावपि तुल्यत्वात्। ननु प्रत्ययार्थप्राधान्यमौत्सर्गिकमप्यास्थातत्यज्यत इति चेत्तर्हि तत एव नोक्तदोषावकाश इति दिक्। प्रवर्त्तनायामिति। प्रवर्त्तनात्वस्य विध्यादिचतुष्टयेऽनुस्यूतत्वादिति भावः। एवञ्चात्रोपात्तव्यापारस्य विषयविषयिभावेन द्वैधान्वयेनासामर्थ्यमाह कालिङादय इति पर्य्यवसानात्। द्योतकतापक्ष एव ज्यायान् ॥

चतुष्टय इति। पञ्चालिच्छाविशेष इति न तदनुस्यूतं प्रवर्तनात्वम्। अनुस्यूतत्वादिति तदतिरिक्तांशस्य प्रकरणादिरूपप्रमाणान्तरलभ्यत्वान्न शक्यत्वम्॥ न चैवं प्रैषादिग्रहणं व्यर्थं निमन्त्रणादौ कुत्साभावार्थं तत्स्यावश्यकत्वाल्लङ्विधानं तु प्राप्तकालार्थमिति भावः। तत्र द्योतकतापक्षे प्रयोजकव्यापारोपि पचेदित्यादौ धात्वर्थः तस्यापि पाकानुकूलत्वात् तत्र फलानुकूलत्वेनोपस्थितव्यापाराणामद्ध्ये प्रयोजकव्यापारस्य विषयितया विशेषणत्वेनान्वयः इतरविषयतया विशेष्यत्वेन। एवञ्चैकाश्रयिका प्रवर्त्तनाविषयीभूता पाकानुकूला क्रियेत्यादिक्रमेण पचेदित्यादौ बोधस्तदाह। एवं धात्विति। ज्यायानिति। वाच्यत्वे हि णिचीव तस्या धात्वर्थं प्रति विशेषणत्वापत्तौ देवदत्तस्य प्रधानभूतधात्वर्थानाश्रयत्वेनाकर्तृत्वे तत्र कर्त्तरि लिङाद्यनापत्तिः॥ न च प्रत्ययार्थप्राधान्यस्यास्थात्यागे न निर्वाहः द्योतकत्वस्यैवौचित्यात् ॥

एवंणिच्यपीति॥तत्वमिति॥अत्रवदन्ति।एवंहिलिङ्गोवप्रवर्त्तनायाविशेषणतापत्तिः द्योत्येर्थेविशेषणतायाएवन्याय्यत्वात्॥किंचैवन्तदर्थस्याप्राधान्येतदाश्रयस्यकर्तृत्वाना
पत्तौप्रयोजककर्त्तरिण्यन्ताल्लकारानापत्तिः।किंचगमितोग्रामंदेवदत्तोयज्ञदत्तेनेत्यादौप्रधानीभूतव्यापाराश्रयत्वेनप्रयोज्यस्यकर्तृत्वानापत्तिः।ममतुधातुनेदान्नदोषइ
तिस्पष्टम् हेतुमतिचेत्यत्रभाष्येइत्यन्यत्रविस्तरः।अवोचामेति।टिड्ढेतिसूत्रइतिशेषः।लिङ्भक्तत्वादिति।लस्यभेदाच्छास्त्रस्यपुनःप्रवृत्तिरितिभावः।दुर्लभत्वादिति व्य।
एवंणिच्यपीतितत्त्वम्।प्रार्थनम्।याञ्चा।क्वचिदिति।ज्ञापकफलन्तुवक्ष्यमाणेत्यादौरिङ्गुणिल्लक्षणङीवभावइत्यवोचाम।सुड्तिथोःतकारादिकारउ
च्चारणार्थः।लिङः।स।सेतिलुप्तषष्ठीकम्।अनन्त्यस्येत्यनेनविशेष्यतेतदाह।अनन्त्यस्यसस्येति।सकारद्वयस्यापीति।अवयवावयवस्यसमुदायप्रत्यवयव
त्वयासुटोपिलिङ्भक्तत्वादितिभावः।आशीर्लिङेति।भूयास्तामित्यादाविविभावः नन्वनचिचेतिसकारद्वित्वेनापीदंसिद्धम्।नचसकारत्रित्वंफलम्।उच्चार
णेविशेषस्यदुर्लभत्वात्।किंचसुटिकृतेस्कोरितियासुटःसकारोलुप्यतेझलिपरेयःसंयोगःस्तदादित्वात्अतआह।स्फुटतरन्त्विति।एधिषीष्टेत्यादा
वितिभावः।अतोयेयः।सार्वधातुकेतिकिम्।चिकीर्ष्यात्।भवेत्।सार्वधातुकानन्तुवृत्तौहिमध्येपवादन्यायेनातोलोपएवबाध्येत।भवेदित्या
दौतुपरत्वाद्दीर्घःस्यात्।अन्तरङ्गत्वादिति।प्रत्ययमात्रापेक्षत्वादितिभावः।व्याख्येयमिति।एतच्चविप्रतिषेधसूत्रेभाष्येस्पष्टम्।आर्द्धधातुकेतिएवकारो
दोद्यः।किदाशिषि।ङित्वेनैवगुणवृद्धिप्रतिषेधेसिद्धेकिद्वचनमिज्यादित्यादौसंप्रसारणार्थंजागर्यादित्वन्त्रगुणार्थंच।जागर्त्तेर्गुणोहिङितिपर्युदासस्ते ॥
ज्ञनपरस्यैकस्यानेकस्यचोच्चारणेविशेषाभावइतिभाष्योक्तेः सुटिकृतेझल्परसंयोगादित्वेनयासुटःसस्यलोपाच्चेत्यपिबोध्यम्।बाध्येतेति।एवञ्चात्रैवत्वादितिभा
वः।विषयभेदेप्यानर्थक्यप्रतिहतानांविपरीतंबलाबलमितिदीर्घादेर्बाधः।बाधकत्वसामान्याच्चापवादत्वव्यवहारइतिबोध्यम्।प्रत्ययमात्रेति।इयादेशस्तुआङ्गत्वात्सकृ
तिप्रत्ययोभयापेक्षत्वेनबहिरङ्गइतिभावः।नन्वनेनार्धधातुकत्वेप्येकसञ्ज्ञाधिकारादन्यत्रसञ्ज्ञाविरहादतआहएकवकारइति।लङःशाकटायनस्यैतिसूत्रादनुवृत्तेतिभावः ॥

बाध्यत इति। अत एव ङ्यासुडिति नास्त्रि तथा सति आतिदेशिकेनानेन कित्वेनौपदेशिकङित्वस्य बाधनापत्तिरिति भावः। झल्परेति। इदं भूयास्तामित्यादौ। सुडस्त्विति। सुट इत्यर्थः। चार्थे न तु नायासुटः सस्य सङ्ग्रहः। इदं भूयादित्येतद्विषयम्। पदान्तेति। इयोरेव संयोगत्वे प्रथमं सुटः पश्चाद्यासुट इति बोध्यम्। त्रयाणां संयोगत्वे प्रथमं यासुटः पश्चादियोः संयोगमाश्रित्य सुट इति बोध्यमिति भावः। झलो लोपस्तु नात्र उदस्मादिति ज्ञापकेन सिच एव तेन लोपात्। इत्येवमिति। चशब्दस्येत्यर्थकत्वादेतल्लाभः। सुड्यासुटोरिति। सुट्लोपस्यासिद्धत्वादागमसत्वेत इहितस्य प्रत्ययत्वाभावादिति भावः। हलन्त्यायाः प्रकृतेरित्यनुच्चयहेतुः। उच्चारणार्थ इति॥ नन्विसंज्ञाया अपीदित्कार्यार्थत्वस्यासंभवादिति भावः। स चासंभवः। प्रकृतसूत्रभाष्य एव निरूपित इत्य ङित्वञ्चेह विशेषविहितेन कित्वेन बाध्यते। सलोप इति। झल्परसंयोगादित्वेन यासुटः सस्य लोपः। सुटस्तु पदान्तसंयोगादित्वेनेति भावः। इग्लक्षणे इति। इक इत्येवं विहिते इत्यर्थः। इक्लक्षणे किम्। लैगवायनः। लिगोर्नडादित्वात्फक्। इहादिवृद्धेर्गुणस्य च वस्तुगत्या इक्स्थानिकत्वेपि न निषेधः। भूयादिति। इह स्कोरिति लोपस्यासिद्धत्वात्तकारस्य संयोगान्तलोपः प्राप्तः। पदान्तसंयोगादिलोपेनानवकाशेन बाध्यते। नन्वेवमपि संयोगादिलोपस्य पूर्वत्रासिद्धमित्यसिद्धत्वाद्धल्ङ्यादिलोपः स्यादिति चेन्नैवम्। सुड्यासुटोः सतोस्ताभ्यां विशिष्टस्यैव प्रत्ययत्वेनापृक्तत्वाभावात्। हलन्त्यायाः परत्वाभावाच्चेति दिक्। च्लि लुङि। इकार उच्चारणार्थः। शबाद्यपवाद इति। आदिशब्दात्तत्तद्गणप्रयुक्तानां श्यन्नादीनाम्। इचाविति। तत्रेदित्वे प्रयोजनममंस्तेत्यत्रानिदितामित्युपधालोपाभावः। गापाविति। गातीति श्तिपा विकरणशून्यस्य निर्देशाल्लुग्विकरणादेशो गृह्यते। लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ग्रहणमिति परिभाषया पिबतिर्गृह्यते न तु पातिरित्यर्थः ॥ अन्यत्र विस्तरः॥ उपधालोपाभाव इति। नुम्स्तु मगोः पादान्त इत्यतोन्त इत्यनुवर्त्यान्तेदित इति व्याख्यानादिति भावः। सिच्तासावनिदितौ वक्तुं शक्यौ। हनः सिजिति कित्वविधानाच्च नामंस्तेत्यादौ लोप इति इदितो नुमित्यत्र भाष्ये। चित्वन्तु माहिलावीत्यत्रेटः प्राप्तमागमानुदात्तत्वं बाधितुं बोध्यम्। च्लिसिचोरन्यतरस्य चित्वं शक्यमकर्तुम्। विकरणशून्यस्येति। इदमपि वृद्धव्याख्यानमूलकम्। न्यायेन विकरणप्राप्तेर्गामादाग्रहणे ष्विति तु न प्रवर्त्तते। अनित्यत्वात्तस्य केवलगाग्रहणविषयत्वाच्च तस्याः साहचर्येण स्वाभाविकाकारान्तस्य ग्रहणमिति तत्त्वम् ॥

म.भू.
२५९

व्यवधानादिति। यङ्लुक् छान्दस इति भावः। तस्मात् साहचर्येण दीर्घान्तस्य षूङो दादेर्ग्रहणम्। प्राञ्चां व्याख्याने लिङीति। अस्तेः सिचश्चेति अस्ति सिजिति द्वन्द्व इति तेषां व्याख्यानम्। अनेनास्तेस्य लुप्तषष्ठ्यन्तपदत्वे नैतौ दोषौ किन्तु प्रागुक्तावेवेति सूचयति। सकार इति। लुप्तपञ्चम्यन्त इति शेषः। अस्तीति निर्देश इति। अस्तीति हि सकारको निर्देश

सुवो। षूङ् प्राणिगर्भविमोचने। सुवतिसूयत्योस्तु न ग्रहणम्। तिङ्विकरणेन व्यवधानात्। अस्ति सिचो। अत्र प्राञ्चः। अस्तेः सिचश्च परस्येति व्याचख्युः तच्चिन्त्यम्। अस्तेर्भूरिति भूभावे स्थानिवद्भावेनास्तितया तत्रातिप्रसङ्गात्। गातिस्थेति सिचो लुक्यपि स्थानिवद्भावेन अगाद् स्थाद् अभूदित्यादौ सर्वत्रातिप्रसङ्गाच्च तदेतद्ध्वनयन्नाचष्टे। सिचश्च अस्तेश्चेति। एवञ्च स[illegible]सान्तप्रसङ्गो नास्तीत्यपरमनुकूलम्। अस्तिश्च सिच्चेति प्राचां व्याख्याने द्वन्द्वाच्चुदषहान्तादिति टच् स्यात्। सिचश्चास्याल्पाच्तरत्वेन पूर्वनिपातः स्यादिति भावः। विद्यमानादिति। तेन लुप्तास्तिचः कृतभूभावादस्तेर्नेति भावः। भाष्यकारास्त्वाहुः। अस्ति सिचोऽपृक्त इति हि सकारको निर्देश इति। अत्र माधवः। अस्स् इति समुदायस्याधातुतया तिप्प्रत्ययो न स्यादिति। तद्भ्रमोक्तिमात्रम्। इत्थं हि भाष्याशयः। सिच इत्यस्यानन्तरं सकारः प्रश्लिष्यते न तु श्तिपः प्राक्। अत एव सिचोऽपृक्त इति हि सकारको निर्देश इत्युक्तं भाष्ये। अन्यथा अस्तीति निर्देश इत्येव ब्रूयात्। एवञ्च सान्तादस्तेः सान्तात् सिच इति चार्थो निर्बाध एव। द्वितीयश्च सकारो लुप्यते। संयोगान्तस्य पदान्तस्येति व्याख्यानात्। न च तस्यासिद्धत्वाद्रुत्वं दुर्लभमिति वाच्यम्। संयोगान्तलोपो रोरुत्वे इति वार्तिकेनासिद्धत्वनिषेधात्। संयोगान्तं यत्पदमिति व्याख्याने तु नेह संयोगान्तस्य लोपः ॥

इति ब्रूयादित्यर्थः। इति व्याख्याने त्विति। संयोगान्तस्य पदान्तस्येति व्याख्याने तु ध्वसोरेद्धाविति सूत्रे हि सकारको निर्देश इति भाष्यासङ्गतिः। तवसतेस्संयोगान्तलोपस्य दुर्वारत्वेन शकारद्वयाभावात्तदसङ्गतिः स्पष्टैवेति भावः ॥

रामः
२५९

रुत्वे कृते इति। रुद्वये कृते इत्यर्थः। नत्वेकोरुद्वे योस्थाने ‾ नलभ्यते। सुद्वयस्य भिन्नत्वेन सत्वत्तासन्त्वपदत्वाभावेन रुत्वाप्राप्तेः। जातिपरनिर्देशेनेति। तदाश्रयादेव तज्ज्ञा साश्रयस्य सत्वस्य सि
द्धत्वं सुलभमिति भावः॥ एतेन जातिनिर्देशेपि व्यक्तिद्वारा स्थानित्वं वाच्यम्। तेन व्यक्तिमात्रस्य सिद्धत्वज्ञापनेऽस्त्विवोर्व्येद्वसादौ चारितार्थ्येन सस्य कान्तरे तज्ज्ञापनेन मानमिति परास्तम्। इह यंशे इति। आश्रयात्पू
र्वत्रासिद्धमिति सूत्रस्य पूर्वग्रहणेन रोरिति पदग्रहणेपि ह्रस्वं दंश्रु रसिद्धत्वस्य दुर्वारत्वादिति भावः। ननु वर्णग्रहणे तानि ग्रहणं यतो न सा यता ऽन्यत्र जातिग्रहणे दुर्लभमिति चेन्न। अनुकरणं चेति सूत्रे
भाष्येऽनुकरणाकृतिर्निर्दिश्यते। यथा ते प्राग्धातोरित्यादौ गत्याकृतिरि [illegible] तद्भाष्यप्रामाण्येनान्यत्र जातिग्रहणवदेतद्भाष्यप्रामाण्येनात्रापि जातिग्रहणस्य सुलभत्वमित्याशयात्। यदि तु रोरुच्चारणप्रस
ङ्गे उः प्रयोक्तव्य इत्यर्थात् जातेरुच्चारणप्रसङ्गाभावेनेदृशे विषये जात्याश्रयणमशक्यं ध्वनितं चेदं नपुंसकस्य झलच इति सूत्रे भाष्ये तदा तु सौत्रः सुलोपः द्विरुकार इति तु पर्यालोचनकालापेक्षया इदं बो
किंतु सकारद्वयस्यापि रुत्वे कृते ऽतो रोरित्यनेन एकस्य उकारे [illegible] त्यति। विधेयविशेषणस्यैकत्वस्य पश्चेकत्वनविवक्षितत्वा ‾ दिति जातिपरनिर्देशेनातः परत्वस्य पूर्वत्वस्य च संभवः।
तानच परत्वाद्धशि चेति प्रथमस्यैव रो ‾ ः स्यादिति वाच्यम्। रुत्वस्यासिद्धत्वात् हशपरत्वाभावात्। न चाश्रयात्सिद्धत्वमिति वाच्यम्। स्यान्तरे तथात्वेपि निमित्तीभूतहशंशे तदसंभवादिति संक्षेपः।
विसर्गस्तु शद्कौ सुभे बोध्यः। अपृक्तस्य हल इति। यत्तु प्राचोक्तम्। अपृक्तस्य सार्वधातुकस्येति। तन्न। रोधिपि इत्यादावतिव्याप्तेः। सार्वधातुकग्रहणस्यावश्यंभावाच्च। आतः। सिज्ग्रहणमनुवर्तते।
सिचि आकारान्त परस्मैपदेषु इति। तत्र प्रत्ययलक्षणेन सिचःपरत्वम्। आकारस्तु श्रुत्या। एवं स्थिते फलितमाह। सिज्लुकीति। पूर्वसूत्रेण सिद्धे नियमोयमित्याह। आदन्तादेवेति। प्रागेवेति। न परतो नापि व्य
वहितादिति भावः। अतएव छन्दसि परेपि व्यवहिताश्चेति सूत्रितम्॥ कथमात्मनेपादस्य कम्। संहितायां सद्दृश्यस्य तत्सद्भ्यभावात्। तदाह। विसर्ग इति। निलोडित्येवेति। आङ्विशिष्टस्तु यदागमा
इति न्यायेन सिद्धिः। उपसर्गेनेस्तु नग्रहणं नेर्गदेत्युत्तरसूत्रे पुनर्निग्रहणात्पूर्वानोः किनिनिष्ठा वद्भावेन यत्वे प्रपूनिरित्यत्र तु न दोषः। लोड्त्वाभावात् लाक्षणिकत्वाच्च। अनित्यतां ज्ञापयितुमिति। इदं भाष्यकृतापि न दृ
श्यते। तस्त्यर्तुकामस्येत्यादेरसाधुत्वमेवोचितम्। किंच ज्ञापिते चारितार्थ्यमपि दुरुपपादम्। आङागमग्रहणत्व प्रयोगाः प्रसिद्धेः आग्रहणन्तु लोड्ग्रहणवदितितत्व माउपसर्गग्रहणादिति च याशब्दस्य क्रियायोग
कृत्वाभावेन तं प्रति प्रशब्दस्योपसर्गत्वाभावादिति भावः। प्रभवाणीत्यादौ आनिं प्रत्यनुपसर्गत्वेन तदर्थं प्रत्युपसर्गत्वान्न क्षतिः। निरासमेतां नयातितत्तुल्यं निरानिद्यादौ लोड्ग्रहणाभावे उपसर्गो [illegible]

[illegible] वणत्वं प्रत्ययाप्रत्यययोरिति परिभाषया प्रत्ययस्यैव ग्रह
णादिति बोध्यम् [illegible] भाष्ये

आकरविरुद्धमिति॥ गतिश्चेति सूत्रस्थभाष्यविरुद्धमिति भावः। रभसेति। तद्धि रोधादेवेति भावः। प्रनिचखादेति॥ प्रनिपेक्ष्यतीत्यादेरप्युपलक्षणमिदम्। प्रनिचकृशेद्विति। अयं
हि आदेशोपदेशे खादिः स्यान्नुपदेशे णान्तश्चेति भावः। अत्र च ज्ञापक इति। अर्थसहितधातुपाठः पाणिनीय इति पक्षस्येत्संज्ञाप्रकरणस्य भाष्यसंमतत्वादिति भावः। उपलक्षण
त्वेप्यर्थसहितपाठः क्रियावाचित्वबोधार्थ इति बोध्यम्। अर्थरहितोपि पाठः पाणिनीय इति धातुसञ्ज्ञासूत्रे भाष्ये तिबादिभिरिति अतद्गुणसंविज्ञानबहुव्रीहिणा तादिभिरित्यर्थः।
आनि लोट्। निलोडित्येव सिद्धे आनिग्रहणमागमशास्त्रस्यानित्यतां ज्ञापयितुं तेन सागरन्तर्त्तुकामस्येत्यादि सिद्धम्। लोड्ग्रहणं स्पष्टार्थम्। प्रकृष्टावपायेणान्नानि प्रव
पानि मांसानीत्यत्र तूपसर्गग्रहणादर्थवद्ग्रहणं च न भविष्यति। दुरः षत्वेति। यत्तु प्राचोक्तं दुरः परस्य णत्वं नेति केचिदिति। तन्न। एवं हि सिद्धान्ते णत्वं स्यात्तच्चाकरविरुद्ध
मिति भावः। यदपि भवत्येव णत्वमिति व्याचख्युः। तदपि रभसमात्रम्। अन्तःशब्दस्येति। अन्तःशब्दस्याङ्किधाविध्यप्युपसंख्यानमेतत्तु प्रकृतानुपयोगादुपेक्षितम्। भि
दादिपाठेन प्रसङ्गश्चेद्धिति निपातनेनैव गतार्थत्वाच्च। शेषे विभाषा। नेर्गदनद इति सूत्रापेक्षया शेषपदमित्याह। गदनदादेरिति। उपदेशे किम्। प्रनिचकार। प्रनिखादेत्यत्रापि नि
षेधो यथा स्यात्। अषान्ते किम्। प्रतिपिनष्टि। उपदेशग्रहणात्प्रनिचकृशेऽत्रापि निषेधः। उपलक्षणमिति। कुर्दखुर्दक्रीडायामेवेत्येवकारोऽत्र ज्ञापकः। यागादिति। भूवादिसूत्रे
धान्यानां भवन इति सूत्रे चाकरे स्पष्टमिदम्। टित आत्मने। प्रकृते तिबादिभिरात्मनेपदानां विशेषणान्नेह। पचमानो यजमानः। एवं तु टितस्तङ्घाटेरित्येव वक्तुमुचित
म्। आमः। लक्षणप्रतिपदोक्तपरिभाषया नेह। अमृगत्यादिषु। आम आमतुः। तिबाद्यपवादत्वाल्लावस्थायामेवायं लुक्। तेनामन्तस्यातिङन्तत्वान्न निघातः। ततः परस्य निघा
तश्च। लिटः कृत्वात्प्रत्ययलक्षणेन कृदन्ततया प्रातिपदिकत्वमामन्तस्याव्ययत्वात्तु सुपो लुक् ॥
लक्षणेति॥ संनिपातपरिभाषया प्रत्ययग्रहणपरिभाषया चेत्यपि बोध्यम्। अपवादत्वादिति। अन्तरङ्गानपीति न्यायाच्चेत्यपि बोध्यम्। अव्ययत्वादिति। आम इत्यनेनैव लुक् तन्न हि लेरिति नानु
वर्त्तते॥ अतएव विदाङ्कुर्वन्त्वित्यादौ लोटो लुक् सिद्धिरित्यन्ये। सुपो लुगिति। तेन तस्य पदत्वात्कारयाञ्चकारेत्यादौ पदात्परत्वनिबन्धनश्चकारस्य निघात इति भावः ॥

कथं तर्हीति। अनुप्रशब्दाभ्यां विपरीतव्यवहितप्रयोगनि— वारणादिति भावः। सकर्मकत्वादिति। फलव्यधिकरणवाचित्वादिति भावः। एवमकर्मकसमभिव्याहारे कृञोऽप्यकर्मकत्वं बोध्यम्। अन्यत्र कर्मप्रत्ययसमभिव्याहारे फलव्यापारयोर्व्यत्यासेपि आम्समभिहारेन— व्यत्यास आमन्तार्थस्यापि व्यत्यासो वेति नाभेदान्वयानुपपत्तिरिति वदन्ति। सार्वधातुक एवेति। तासिसाहचर्यादस्तेरपि सार्वधातुक एव एति हत्वमित्यर्थः। एतत्सार्वसत्त्वाभिधाने बोध्यम्। सिद्धेरिति। एधांचकारेत्येतद्या वृत्तौ सिद्धायामित्यर्थः। एतेनैधाञ्चक्रद कृञ्चानु। कथं तर्हि तं पातयां प्रथममास पपात पश्चात्। संयोजयां विधिवदास समेतबन्धुः। प्रभ्रंशयां यो नहुषं चकारेत्यादि। प्रमाद एवायम्। न च विपरीतप्रयोगनिवृत्तिमात्रं सूत्रस्य तात्पर्यमस्त्विति वाच्यम्। विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं चेति वार्त्तिकविरोधात्। अभेदान्वय इति। एवञ्चाम्प्रकृत्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्य फलम्। अत एवानुप्रयुज्यमानयोर्भ्वस्त्योरामन्तवशेन सकर्मकत्वात्ताभ्यां कर्मणि लिट्। तथा च माघः। तस्यातपत्रं विभरांबभूवे इति। श्रीहर्षश्च। तपस्तु पूर्तौ वपिमेदसां भराद्विभावरीभिर्विभरांबभूविरे इति। अस्तेस्तु भावकर्मणोस्तङि एशि इटि च रूपे विप्रतिपद्यन्ते। तथाहि। उभयत्रापि ह एतीति हादेशे कृते एधामाहे ईसामाहे इति केचित्। तासिसाहचर्याद्दिद्यो वहत्वमित्यन्ये। साहचर्याद्देव सार्वधातुक एवशाति हत्वम्। ननूक्तद्वयेपि। तेन एधामासे ईसामासे इत्येव रूपमित्यपरे। वाक्यभेदेनेति। अत्र चाम्प्रत्ययवदिति वचनमेव प्रमाणम्। अन्यथा पूर्ववदित्यनुवृत्त्यैव सिद्धे किं तेन। द्विर्वचनेऽचि। द्वित्वनिमित्ते चीति। द्विर्वचनशब्दस्य तन्निमित्ते लक्षणा। तां विना अचासामानाधिकरण्यायोगादिति भावः। यद्वा। द्विरुच्यतेस्मिन्निति द्विर्वचनम् ॥

त्यादौ परगामिनि क्रियाफले प्राप्तस्य विधानेपि इन्द्राञ्चकारेत्यादौ कर्तृगामिनि क्रियाफले प्राप्तस्य निवारणमशक्यमित्यपास्तम्॥ लक्षणाया जघन्यत्वादाह। यद्वेति। अधिकरणे ल्युडिति भावः। इदमेव युक्तम्। अन्येपि वृत्तिद्वयकल्पनागौरवात् ॥

तद्भावेति

म॰ पा॰ २६१ सर्वमिति।एवञ्च द्वित्वे जादिप्रत्ययस्य निमित्तत्वे अचोऽपि सत्त्वं णण्यचो निमित्तत्वे तदादिप्रत्ययस्यापीति भावः।तस्मान्नेति च तद्वतीत्येतावता निमित्तत्वं न तु तस्य योजकत्वेनेती
तिभावः।यद्यत्र स्थानिवत्त्वं न स्यात्स्यादेव तस्य द्वित्वमिति कात्स्न्यनिकं च गृह्यत इत्यपि बोद्ध्यमिति सम्बन्धः।रित्यत्र भाष्ये स्पष्टम्।इतिनेति।ज्ञापकस्य सजातीयापेक्षत्वेनेत्यपि बोद्ध्य

अथवा द्विर्वचनमस्त्वस्मिन्नित्यर्थीआद्यचा।इह तन्मात्रस्याद्याश्रयणेन कालावधारणमपि क्रियते इत्याह।द्वित्वे कर्तव्ये इति।कृते तु द्वित्वे यथायथमादेशः स्यादेवेत्यर्थः।द्वित्वनिमित्ते किम्।दुद्यूषति।नह्यूठ् द्वित्वनिमित्तम्।नन्वेवं चक्रतुरित्यत्र यणस्यादेव।अतुसो द्वित्वनिमित्तत्वेऽप्यकारस्यातथात्वात्।सूत्रन्तु चक्रे इत्या द्वैऽस्यावकाशमिति चेत्सत्यम्।इह निमित्तशब्देन साक्षाद्वा समुदायघटकतया वा द्वित्वप्रयोजकं सर्वं गृह्यते लक्ष्यानुरोधात्।एतच्च ठस्येक इति सूत्रे कैय्यटग्रन्थे स्पष्टम्।अत एव ऊर्णोतेः सनि सनीवन्तेतीट्पक्षे विभाषोर्णोरिति ङित्त्वविरहे ऊर्णुनविषतीति सिद्धम्।सन्नन्तस्य द्वित्वविधानेऽपि सनो द्वित्वप्रयोजकत्वेन तस्मिन्नाप्नोर्गुणावादेशयोर्द्वित्वे कर्तव्ये निषेधात्तदाहुः।तद्भावभावितामात्रेणेह निमित्तत्वमिति।नन्वेवमरिरिषतीति न सिद्ध्येत्।ऋधातोस्सनि स्मिपूङ्ञ्वशांसनीति इटि कृते इस्शब्दनिमित्तकस्य गुणस्य निषेधेऽजादेर्द्वितीयस्येति इसो द्वित्वप्रसङ्गात्।इष्यते तु रिस्शब्दस्य द्वित्वम्।सत्यम्।नेह इस्शब्दो द्वित्वनिमित्तम्।कार्यित्वात् नहि कार्यी निमित्ततयाश्रीयते।स्थण्डिलाच्छयितरि व्रते इति ज्ञापकात्।अन्यथा शीङो ङित्त्वेन क्ङिति चेति गुणनिषेधापत्तेः।न चैवं सन्नन्तस्य कार्यित्वादूर्णुनविषतीत्यपि न स्यादिति वाच्यम्।मत्वर्थीयेन इनिना कार्यमनुभवत एव कार्यित्वलाभात्।ऊर्णोतेर्हि नुशब्द एव द्वित्वरूपं कार्यमनुभवति न तु सना।अरिरिषतीत्यत्र तु रिस्शब्दः कार्यभागिति वैषम्यात्।अचीति किम्।जेघ्रीयते।देध्मीयते।शाशास्यते।इह ई घ्राध्मोरितीकारः।अपङ्क्ष्विक्ङितीति यङादेशश्च निषिध्येत इति प्राञ्चः ॥

म्।कार्यित्वलाभादिति।तथा च तस्यैव निमित्ततयानाश्रयणमिति भावः।द्वितीयाजवधिकस्येति।नरभार्यावद्यञ्जनामीति तद्वधिकस्य द्वित्वमिति षाष्ठभाष्योक्तेरिति भावः ॥

राम: २६१

द्वित्वनिमित्तत्वाभावादिति।नचयङि·परतईत्वमितितन्निमित्तस्ययङोविशिष्टस्यद्वित्वनिमित्तत्वमस्त्येव।अवयवस्यकार्यित्वेपिनतस्यैत्वंप्रतिनिमित्तत्वंनहिकार्यीनिमित्तत्वेनेत्यत्रापियथाकथंचिन्निमित्तत्वंकार्यित्वञ्चग्राह्यतइत्यत्रमानमस्तिजेघ्रीयतइत्यादेःप्रत्युदाहरणत्वपरभाष्यप्रामाण्येनतत्रनिमित्तकार्यिपदयोर्मुख्यार्थत्वस्यैवांगीकारादितिवाच्यम्।अरिरिषतीत्यस्याप्यसिद्धेः।नहितत्रगुणनिमित्तस्यार्धधातुकसञ्ज्ञस्यसशब्दस्याकारविशिष्टस्यद्वित्वंप्रतिकार्यित्वंशङ्कितरीत्यत्रापिइकारस्यैवकार्यित्वेनज्ञापकस्याशिथिलत्वापत्तेश्च।यदितत्रगन्ताङ्गस्येत्यर्थात्सर्वस्यकार्यित्वन्तर्हिअत्रापियङन्तस्यद्वित्वमित्यर्थात्तुल्यम्।तस्मान्नहिकार्यीत्यत्रापियथाकथंचिन्निमित्तत्वादिग्राह्यतइतियुक्तम्।अचीतिव्यर्थमित्यस्यजेघ्रीयतइत्याद्यर्थंव्यर्थमित्यर्थः।आधिजगेइतितुप्रयोजनंङाङ्लिटीत्यत्रद्वित्वकारकनिर्देशाश्रयणात्तत्सत्त्वावस्थायांप्रवृत्तेः।नचतस्यविषयसप्तमीत्वाङ्गीकारेणा मै

वस्तुतस्तुअचीतिव्यर्थम्।घ्रीयध्मीयश्य्यइतिद्वितीयाज्वधिकस्यैकाचःकार्यितयायङोद्वित्वनिमित्तत्वाभावात्।अचःकिम्।असूषुपत।इहस्वापेश्चङीतिसंप्रसारणेनिषिद्धेऽभ्यासेउवर्णोनश्रूयेत।नचद्वित्वेकृतेपुनःसंप्रसारणम्।नसंप्रसारणइतिनिषेधात्॥

मिनिकत्वंतद्भावभाविता मात्रेणेवतद्बुद्धिभावभावितामात्रेणापिनिमित्तत्वस्ययुक्तत्वादस्त्वत्रोपात्तलिङ्बुद्धिभावएवनिमित्तमित्यज्निमित्तत्वाभावःसर्वत्रैवचात्रशास्त्रेबुद्धिरुतमेवनिमित्तत्वमितिस्पष्टंहिगोर्लुगितिसूत्रेमनोरमायाम्।अतएवाङ्गाधिकारेआर्धधातुकइत्यादीनांविषयसप्तमीत्वेपिपरदेशस्यविषयकबुद्धिभावेनजायमानतया।परनिमित्तत्वेनतद्विषयेचःपरस्मिन्नितिस्थानिवत्त्वप्रवृत्तिः इदमेवाचीतिईदृशनिमित्तत्वाश्रयणेलिङ्गंध्वनितञ्चेदंप्रकृतसूत्रेऽचोयदितिसूत्रेचभाष्येइत्यन्यत्रविस्तरः।निषिद्धइति।द्विर्वचनेचीत्यनेनेतिभावः।पुनःसंप्रसारणमिति।द्युतिस्वाप्योरित्यनेनेतिभावः।निषेधादिति।अस्यचेद्व्यवहितेपिप्रवृत्तिरितिस्पष्टमेवाकरविदाम्।इदमपिप्राचामनुरोधेनसंप्रसारणग्रहणसामर्थ्यादेकवर्णव्यवधानेयूनइत्यादावस्तुप्रवृत्तिः।प्रकृतेप्रवृत्तौतुनमानमितिवक्तुंशक्यत्वात्प्रत्युदाहरणान्तरंत्वन्यत्रोक्तम् ॥

रूपातिदेशेति। नचात्रेट्पक्षे द्वित्वात्पूर्वमियङः प्रवृत्त्या द्वित्वे कार्ये स्थानिरूपातिदेशेपि यणित्त्वे मानाभावेन निन्युरित्यसिद्धिरिति वाच्यम्। आभीयत्वेनेयङः सिद्ध्यायण
प्रवृत्तेः। संप्रत्युदात्तत्वादिति। नच विहितविशेषणान्निस्तारः। धातुस्वरस्य दुर्वारत्वेनासंभवापत्तेः। अनेकाच्त्वादिति। एवञ्च निषेधो न स्यादिति भावः। एकाचो विहित
स्येत्यर्थेनापीदं सुसाधम्। नच तदा लावस्थायामडिति पक्षे अकार्षीदित्यादौ दोषः। च्लिसिचोरपि स्यतासिवल्लावस्थायामेव प्रवृत्त्याङ्गसञ्ज्ञानिरपेक्षत्वेनान्तरङ्गत्वादि
यद्यपीहाजादेशः स्थानिवत्स्यादिति रूपातिदेशपरतया सूत्रे व्याख्यानं काशिकादौ प्रसिद्धं फलं च तुल्यमेव तथापि स्थानिवद्ग्रहणं निवर्त्य नञ्चा
नुवर्त्य निषेधपरतया व्याख्यानमपि भाष्यारूढं लघु चेति तदेवाश्रितम्। एवं हि सति स्थानिवदिति शब्दाधिकारप्रयुक्तक्लेशो नास्ति। न पदान्तेति निषेधा
नन्तरं पाठश्चानुगृहीतो भवतीति दिक्। उभयान्वयीति। मध्ये पाठात्पूर्वोत्तराभ्यां संबध्यत इत्यर्थः। तत्रोत्तरान्वयफलं कर्त्तुङ्गन्तुमित्यादाविण्निषेधः। नित्स्व
रेण संप्रत्युदात्तत्वात्। पूर्वान्वयफलन्तु बिभित्सतिपिपक्षतीत्यादौ निषेधः। द्वित्वे कृतेऽनेकाच्त्वात्। स्यादेतत्। विशेष्यदलमेव तर्हि मास्त्विति शङ्कते। एकाचः
किम्। ननु बिभित्सतीत्यादितौल्याद्यङ्लुक्यपि स्यादेव तत्राह। स्मरन्तिहीति। श्लिपाशपेत्यादि। श्लिपा यथा। स्वतिहन्तियातिवातिद्रातिप्सातीत्यादि। श
पा। सनीवन्तेति सूत्रे भरेति। अनुबन्धेन निर्देशो द्विधा। स्वरूपेणेत्संज्ञकत्वेन च। आद्यो यथा। शीङः सार्वधातुके गुणः दीङो युडिति। द्वितीयस्त्वनुदा
त्तङित इत्यादि। अत एव नाग्लोपिशास्वृदितामिति सूत्रे शासेर्यङ्लुकि न प्रवर्त्तते स्वरूपेणानुबन्धनिर्देशात्। सूत्रे शासिग्रहणं प्रत्याख्याय ऋशा
सु इति ऋदित्त्वं पठनीय इति मते तु इत्संज्ञकत्वेनानुबन्धनिर्देशात् ॥ ७ करणोत्तरमेवाडादिप्रवृत्तेः स्पष्टं चेदमेकाचो द्वे इत्यत्र भाष्ये। तर्हि मास्त्वि
ति। उपदेशेऽनुदात्तस्यैकाच्त्वव्यभिचारादिति भावः। नच वधिआरत्यर्थन्ततात्तत्सामर्थ्येनोपदेशमात्रे एकाचो ग्रहणादिति वाच्यम्। आद्युदात्तनिपातनेनासिद्धेरित्य
भिमानात्स्वरूपेणेति शासु इति पाठात्। सूत्रे। नाग्लोपीति सूत्रे। इत्संज्ञकत्वेनेति। ऋदित्पदेन तद्ग्रहणादिति भावः ॥

नपठ्यतेइति।पाठेप्यनित्यत्वेनवारणमन्यथायङ्‌लुगन्तेभूवादयइतिसनाद्यन्ताइतिधातुत्वंनस्यात्‌गणनिर्दिष्टत्वात्‌।अनित्यत्वेमानञ्चपक्षेवागुणोयङ्‌लुकोरित्यादि। अतएवयङ्‌लुकिद्वित्वंअभ्यासादिसिद्ध्यति।एतन्मूलएवयत्रैकाज्ग्रहणंकिञ्चिदितिपाठःश्वीदितइतिसूत्रेकैयटेइत्यन्ये।अनुदात्तपाठस्यैवेति।नचानुदात्तत्वमन्तोदात्तत्वबा धनार्थंमत्वर्थलक्षणयैवोपपत्तौशास्त्रबाधेमानाभावात्‌।सूत्रकारेणेति।भाष्यवार्त्तिककृतोरप्युपलक्षणमेतत्‌।एतेनवधादेशे[illegible]शआद्युदात्तत्वनिपातनमूलकःसंज्ञ

येतुयङ्‌लुकमपीच्छन्तितैःशासेरुकारोनपठ्यते।गणेनयथा।बेभिदीति।चेच्छिदीति।रुधादिभ्यःश्नम्‌।एकाज्ग्रहणंप्रकृतसूत्रे।तेनबेभिदिता।चेच्छिदिता।अत्रेणिनि षेधोन।एतच्चेति।ननु[illegible]प्राप्त्यपेक्षायांशीकथमिदंज्ञापकमितिचेत्‌।एकदेशानुमतिद्वारापूर्वाचार्यपठितपरिभाषायाःज्ञापनस्यगतिकारकोपपदानामित्या दौदृष्टत्वात्‌।अनन्यार्थैःश्तिपादिनिर्देशैर्ज्ञापनसंभवाच्च।तद्भूतइति।नचमत्वर्थलक्षणायांमानाभावः।वसत्यादीनामनुदात्तपाठस्यैवतत्रमानत्वात्‌।वधेरिति।अ स्तुनद्यास्त्वयोःनिट्कारिकास्वदन्तपर्युदासउक्तोव्याघ्रभूतिनासएवचप्राचानुसृतःसद्भिरुपेक्षितः।सूत्राननुगुणत्वात्‌।तथाहि।कर्त्ताहन्तेत्यादौसर्वेसर्वपदादेशा इतिन्यायेनकरित्यादिरादेशः।तस्ययथास्थान्युपदेशंगृहीत्वानिषेधःप्रवर्त्तते।एवंवधादेशेपिप्रवर्त्तमानःकेनवार्यताम्‌।अदन्तपर्युदाससामर्थ्येनेतिचेत्‌।न।सू त्रकारेणदेशेपर्युदस्तत्वादितिभावः।इणःषीध्वम्‌।इण्कोरित्यधिकारेपिपुनरिण्ग्रहणंकवर्गनिरस्त्यर्थम्‌।तेनेहन।पक्षीध्वम्‌ ॥

न्तानामितिचादन्तानामप्युदात्तोपदेशत्वाभावबोधनात्‌।तच्चकथादिष्वस्तीतिवधादेशेउदात्तनिपातनसामर्थ्यादित्युपास्तम्‌।यत्तुहनोवधेत्यत्रास्यव्यञ्जनान्तत्वेइड्विधिर्वाच्यः अदन्तत्वेतुनदोषइतिभाष्येउक्तं,तत्तुउपदेशेनेकाच्त्वात्तन्निषेधाभावादिट्सिद्धिरित्येवंपरतयाकैयटेनव्याख्यातम्‌ ॥

म·शु· विहितानामिति। एवञ्चाङ्गादिति न कर्तव्यमिति लाघवमिति भावः। नत्सीध्वमिति। इणन्ताद्विहितानां षीध्वमादीनामित्यर्थे षीध्वमः साक्षाद्विधानासंभवः। सीयुटः प्रत्यय
२६३ विधानोत्तरकालत्वात्। तस्माद्धस्यविहितस्य षत्वसीयुड्व्योम्यतात्तस्येति वाच्यम्। साच यदि धत्वं न स्यात् स्यादेव षत्वमिति प्रकृते ण्यस्ये चेत्यभिमानेनेदं च विषीध्वमिति सा
न्तमिहाङ्गेनेणन्तम्। इणन्तादङ्गादिति स्वरूपकथनमिदम्। इति केचिदिति। अत्रारुचिबीजन्तु भाष्येऽस्यादर्शनं सूत्रान्तरस्थेन गोबलीवर्दन्यायग्रहणे च न दृढतरं मानमिति।

अङ्गात्परेषामिति। विहितानामिति तु नोक्तम्। अदिढ्वमित्यादावव्याप्तेः। लिहदुहनहां ढत्वघत्वधत्वेषु लिढीध्वम्। धुक्षीध्वम्। नत्सीध्वमित्यत्रातिव्याप्तेश्च। अङ्गात्किम्। वेविषीध्वम्। अर्थवद्ग्रहणादेव सिद्धे क्वचिदर्थवद्ग्रहणपरिभाषा न प्रवर्तत इति ज्ञापनार्थमिदम्। तेनानिनस्मन्नित्यादि सिद्धम्। एधिषीध्वमिति। इणः षीध्वमिति ढत्वं तु न भवति। षीध्वं भक्तस्येडागमस्य तद्ग्रहणेन ग्रहणादिणन्तादङ्गात्परत्वाभावात्। विभाषेट इतीटो विशिष्य ग्रहणात्। गोबलीवर्दन्याये नेट् अतिरिक्त एवेति इह ग्राह्य इति केचित्तदाह। इड्विन्न इति ऋदन्तैरिति। अकारस्तूपेक्षितः तद्बीजन्तूक्तमेव। अदन्ता भूप्रभृतयः। ऋदन्ताः कृतप्रभृतयः। यु मिश्रणामिश्रणयोः। रु शब्दे। रुङ् गतौ। रेषणे चेत्यपि केचित्। क्ष्णु तेजने। शीङ् स्वप्ने। स्नु प्रस्रवणे। णु स्तुतौ। टुक्षु शब्दे। टुओश्वि गतिवृद्ध्योः। डीङ् विहायसा गतौ। श्रिञ् सेवायाम्। वृङ् संभक्तौ। वृञ् वरणे। निहता अनुदात्ताः। इदानीं हलन्ताः कान्तादिक्रमेणाह। शक्लृ शक्तौ। कान्त एकः। खगघङान्ता न सन्त्येव। चान्ता अपि पकारात्प्राचीना ये वर्णास्तदादयो न सन्तीत्याशयेनाह। पच इति। डुपचष् पाके। पच व्यक्तीकरणे ॥

रेषणे चेत्यपि केचिदिति। अत्रारुचिबीजन्तु निरनुबन्धकत्वेन साहचर्येण च युमिश्रणे इति लुग्विकरणस्यैव ग्रहणमुचितम्। परिभाषाद्वयेन लुग्विकरणपरिभाषाबाधात्। शमः
अतएव समनत्स्याम्यथयोऊं किं न करोष्येसत्त्वहीनवदिति भट्टिः सङ्गच्छते ॥ २६३

द्वावपीति। इदंदुर्गवर्धमानादिरीत्या। अन्यैस्तस्येदित्वस्वीकारेण भाष्येनिर्दिष्टत्वात्केनतद्ग्रहासंभवात्। अतएवपचिविस्तारसंवचनइतिचुरादेरिदित्वात् णिजभावे पिनग्रहणम्। युजिर्योगइति।

द्वावपि। फलभाद्योनसन्नीत्याशयेनाह। मुचीति। एवमग्रेपिबोध्यम्। मुच्लृमोक्षणे। रिचिर्विरेचने। रिचवियोजनसंपर्चनयोरितिपौजादिकश्च। वचपरिभाषणे। वुवोचविरपि। वचियौजादिकेपिस्याद्वावपीत्येके। विचिर्पृथग्भावे। षिचूक्षरणे। चान्ताःषट्। प्रच्छज्ञीप्सायाम्। छान्तएकः। त्यजहानौ। णिजिर्शौचपोषणयोः। भजसेवायाम्। भञ्जोआमर्दने। भुजपालनाभ्यवहारयोः। भुजोकौटिल्यइतिच। भ्रस्जपाके। टुमस्जोशुद्धौ। यजदेवपूजादौ। युजिर्योगे। रुजोभङ्गे। विजिर्पृथग्भावे। षञ्जसङ्गे। सृजविसर्गे। जान्ताःपञ्चदश। अदभक्षणे। क्षुदिर्सम्पेषणे। खिददैन्ये। खिद्यति। खिन्दति। खिन्नन्निश्च। छिदिर्द्वैधीकरणे। तुदव्यथने। नुदप्रेरणे। पदगतौ। भिदिर्विदारणे। विदसत्तायाम्। विदविचारणे। शद्लृशातने। षद्लृविशरणादिषु। ञिष्विदागात्रप्रक्षरणे। स्कन्दिर्गतिशोषणयोः। हदपुरीषोत्सर्गे। दान्ताःपञ्चदश। क्रुधकोपे। क्षुधबुभुक्षायाम्। बुधअवगमने। बन्धबन्धने। युधसंप्रहारे। रुधिर्आवरणे। अनोरुधकामेइतिदिवादिश्च। राधसंसिद्धौ। व्यधताडने। शुधशौचे। साधसंसिद्धौ। षिधसंराद्धौ। धान्ताएकादश। मनज्ञानेदिवादिः। हनहिंसागत्योः। नान्तौद्वौ। आप्लृव्याप्तौ। क्षिपप्रेरणे। दिवादिस्तुदादिश्च। छुपस्पर्शे। तपसन्तापे। तपऐश्वर्येदिवादिः। तपदाहेइत्यपिणिजभावपक्षे। तिपक्षरणे। तृपप्रीणने। दृपहर्षविमोचनयोः। दृभीरग्रादौवेट्कौ। इहपाठस्त्वनुदात्तेत्स्वेसेतदर्थः। लिपउपदेहे। लुप्लृछेदने। टुवपबीजसन्ताने। शपउपालम्भे। ञिष्वप्शये। सृप्लृगतौ। पान्तास्त्रयोदश। यभमैथुने। रभराभस्ये। डुलभष्प्राप्तौ। भान्तास्त्रयः। गम्लृगतौ। णमप्रह्वत्वेशब्देच। यमुउपरमे। रमुक्रीडायाम्। मान्ताश्चत्वारः। क्रुशआक्रोशे। दंशदशने। दिशअतिसर्जने। दृशिर्प्रेक्षणे। मृशआमर्शने। रिशरुशहिंसायाम्। लिशअल्पीभावे। लिशगतौच। विशप्रवेशने। स्पृशसंस्पर्शने। शान्तादश। कृषविलेखने। भौवादिकतौदादिकौ। त्विषुदीप्तौ। तुषतुष्टौ। द्विषअप्रीतौ। दुषवैरूप्ये। पुषपुष्टौ। पिष्लृसंचूर्णने ॥ ७ युजसमाधावित्यस्य। पिनग्रहणं

ध्यम्। विनिगमनाविरहात् भाष्येयुजि[illegible]धात्वेकदेशेकारविशिष्टस्यैवग्रहणंनतिकानिर्देशादितियुक्तम्। इकानिर्देशस्यैवक्रमात् ॥

विषिशिषी।जोहोत्यादिकरौधादिकौ॥विषविप्रयोगे इतिक्रादिरयीतिन्यासः।कचच्छजा इति।पूर्वार्द्धे पान्तानां कान्तचान्ता इत्यादिरर्थः उत्तरार्द्धेक ञ्च ईका१ण१५ण१५टाः

विऌृव्याप्तौ।शिऌृविशेषणे।इहजिषुविषुमिषु इतिकषखषशिषेतिच दण्डकद्वये पठितौ भ्वादी अपि।विशिशिषीग्राह्याविति माधवादयः।नेतिबोपदेवादयः।शुष
शोषणे।श्लिषआलिङ्गने।षान्ताएकादश।घस्लृअदने।शब्विकरणः प्रकृत्यन्तरम्।अत्तेरादेशस्यतुस्थान्युपदेशेऽनुदात्तेनापिसिद्धम्।वसनिवासे।सान्तौद्वौ।दहभस्मीकर
णे।दिहउपचये।दुहप्रपूरणे।दुहिरितिभ्वादिस्तुनेहगृह्यतइतिसंप्रदायः।णहबन्धने।मिहसेचने।रुहजन्मनिप्रादुर्भावेच।लिहआस्वादने।वहप्रापणे।हान्ताअष्टौ।क
चच्छजादधनपाभमशाःषसहाःक्रमात्।कञ्चकौषणटाःख डोगघञाःष्टखवेः स्मृता इतिसङ्ग्रहः।तृप्यतिदृप्यतीत्यत्रश्यनानिर्देशस्यफलमाह।तुदादाविति।अन्यनिवृत्तये इ
ति।निवर्तनीयास्तु।जिष्विदास्नेहनमोहनयोः।पदस्थैर्ये।सेधतिबोधतीचेतिभ्वादिकाः।मनुअवबोधने।तानादिकः।पुषपुष्टौ।पोषतिःपुष्णातिश्च।श्लिषदाहे।भ्वादिकः।
वसआच्छादने।आदादिकः।एतेसेटः।युजबन्धनेतुक्र्यादिः।अनिट्।तथा।अन्यनिवृत्तयेसानुबन्धानिर्दिष्टा इत्यर्थः।तथाहि।णिजिशुद्धावित्यदादिः।ओविजीभयसञ्चलनयो
रितितुदादिः।शक्नोतिश्वसेडेव।यद्यपिमाधवादयःशकातेरप्यनिड्त्वमिच्छन्तितथापिचन्द्रगोमिप्रभृतीनांमतेनबोध्यम्।अतएवबोपदेवोधातुद्वयेनरूपद्वयंफलतीत्याशये
नशक्नोतिशक्यत्योर्द्वयोरपिऌकारमनुबन्धमासजत्।विन्दतिरिति।लाभार्थः।इष्ट इति।अनिट्त्वेनेष्ट इत्यर्थः।तथाचचान्द्रसूत्रम्।विदेर्लुक इति।भाष्यानुक्ता इति।अनु
क्ताःनतुप्रत्याख्याताः।तथाचभाष्यमप्युपलक्षणतयानेयम्।तेनरक्तंरागात्।शुष्कधृष्टौ।क्तेननञ्विशिष्टेनानञ् इत्यादिसौत्रव्यवहारात्तन्त्रान्तरसंवादाच्च।अतुंप्रतिपत्तु
मित्यादिसार्वलौकिकव्यवहाराच्चेतिभावः।शपूर्वा इत्यतद्गुणसंविज्ञानोबहुव्रीहिः।तेनशारोनशेषः किंतुखयामेवेतिबोध्यम् ॥ ७ ११खो डो १३ ग ३ घ ४ ञ १०ट ११

ख ट इत्यर्थःकादयःक्रमेणैकादिसंख्यापरा इति बोध्यम्।ओविजीति।नचास्यईदित्त्वसामर्थ्यादेवसेट्त्वावधारणेविजिरितिसानुबन्धपाठोव्यर्थ इतिवाच्यम्।ततएवैवंपाठात्॥

आस्पदमिति। प्रसिद्धिकरं नामग्रामादि वा। यथा मया प्रतिष्ठा लब्धेति स्थापनेति यथा त्वयास्य प्रतिष्ठा कृतेति। अवस्थानमिति। ——— यथा कृते प्रतिष्ठेति एकत्र स्थापनं मण्यादेः सूत्रादेर्वा। सन्दर्भ इति। शब्दानामित्यर्थः तन्त्रावृत्त्यादिनेति। वक्तुः तन्त्रेणोच्चारणं बोद्धुरावृत्त्या बोध इत्यर्थः। आदिनैकशेषावृत्ती। असंभवाच्चेति। अभ्यासादेशस्यासंगात्। आस्पदं स्थापना अवस्थानं वा प्रतिष्ठा। एकत्र स्थापनं सन्दर्भो वा ग्रन्थः। नाथ नाधृ। उपतापो रोगः। उपघात इत्यन्ये। आशिष्येवेति। अनुदात्तेत्वादेव सिद्धे नियमार्थं वार्त्तिकमित्यर्थः। अत एक हल। तन्त्रावृत्त्यादिना लिटि त्यादेशविशेषणमेत्वस्य निमित्तं चेत्याह। लिण्निमित्ते ति। किति लिटीति च। यत्तु प्राग्लिट्कृताभ्यासादेशहीनस्येति व्याख्यातम्। तन्न। अभ्यासग्रहणस्याधिक्यात्। आदिग्रहणस्यायोगेन न्यूनत्वाच्च। पेचतुरित्यादौ हलादिःशेषेणाभ्यासस्यानादेर्हलो लुप्ततयाऽसंभवाच्च। अभ्यासैकदेशस्यादेशः स न तु कृत्स्नस्याभ्यासस्येति चेत्तर्हि व्यावर्त्याप्रसिद्धिः। चकणतुरित्यादावप्येकदेशस्यैव चुत्वादिप्रवृत्तेः। भदि। कल्याणं मङ्गलम्। सुखमात्मगुणः। मदि स्तुति। मोदो हर्षः। मदो गर्वः। स्वप्नमालस्यम्। मदी हर्षे दिवादौ। हर्षक्लेशनयोर्घटादौ। मदतृप्तियोगे चुरादौ। न शसदद। शसु हिंसायाम्। दन्त्यान्तः। यत्तु प्राचा शशेति तालव्यान्तं पठित्वा शश प्लुतगताविति धाताविदं सूत्रं संचारितं तदाकरविरोधादुपेक्ष्यम्। गुणशब्देन भावितस्येति। अवयवावयविभावः षष्ठ्यर्थः। भावितत्वञ्च प्रयोज्यत्वम्। साक्षात्परंपरासाधारणम्। तथाहि। शशरतुः पपरतुरित्यादौ गुणशब्देन अर् क्रियते तदवयवोऽकारः। लुलविथेत्यादौ तु गुणशब्देन ओकारः। तस्यावादेशस्तदवयवोऽकारः। सकर्मक इति। यथा। स्वदस्व हव्यान्यनुभवेत्यर्थः। अकर्मक इति। यथा। अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारेति। न स्वदते न रोचत इत्यर्थः ॥ ७ भव इत्यर्थः। घटादाविति। अपूर्वो घटादौ पठ्यत इति मतेनेदं यद्वाऽस्वदिवादिपठित एवानूद्यत इति शेषः। तेन सन्नापिक्ष इति भावः। गुणशब्देनारिति। उरण् रपर इति सूत्रे पैकवाक्यतया ऋकारान्ताङ्गस्य ऋकारस्यार्गुणो भवतीति विधानादिति भावः। तदवयवोऽकार इति। न शसददवादिगुणानामित्येव सिद्धे गुणग्रहणसामर्थ्याद्गुणशब्देन भावितस्याऽकारमादाय लुलविथेत्यादावपि प्रवृत्तिरिति भावः ॥

अव्यवहितपराविति। पर्युदासस्य सदृशग्राहित्वाद्व्यवधानांशलाभः। स्त्यै शब्दे इति। स्त्यै ष्ट्यै इति द्विः पाठः पर्युदासे मूलम्। सेवृ षेवृ इति द्वयोः पाठस्त्वनार्षः। ससतेति। स धात्वादेः षः। यदि तु धातव एव दन्त्यादयः पठ्येरन् तदा ण्यन्ताच्चङि असिष्वदत्। सिषेधेत्यादौ आदेशप्रत्यययोरिति षत्वं न स्यात्। अतः षोपदेशान्पठित्वा सादेशः क्रियते। येषां त्वनुवर्तनेष्टं ते दन्त्यादय एव पठ्यन्ते। सृ गताविति यथा। एवं स्थिते धातुपाठे शुद्धैव तालव्यादिव्यवस्थावत् षोपदेशव्यवस्थाप्युचिता। तथापि साधादिषु सादिपाठस्यैव दृश्यमानतया पाठस्य संकीर्णत्वाल्लक्षणमुखेन षोपदेशत्वं व्यवस्थापयति। सेगित्यादि। दन्त्यश्च अच् च दन्त्याचौ। तौ अन्तौ। अव्यवहितपरौ यस्य सः। दन्त्याजन्तः। सः षकार आदिर्येषां ते एकाचः षोपदेशा बोध्याः। तथा च ष्ठा गतिनिवृत्तौ। षिध गत्यामित्यादौ पठ्यमानः षकारः शुद्ध एव साधादौ तु सांप्रतमपठ्यमानोपि षकारः प्राक्स्थित इत्यनुमेयमिति भावः। दन्त्येत्यादि किम्। त्रुस्कुन्दे। एकाचः किम्। सोसूच्यते। सोसूत्र्यते। सूचसूत्रौ चुरादावदन्तौ। अतिव्याप्तिवारणायाह। सेगित्यादि। सेकृ गतौ। स्रेकृ गतौ। सृ गतौ। स्तृञ् आच्छादने। सृज विसर्गे। स्तॄञ् आच्छादने। स्त्यै शब्दसङ्घातयोः। एभ्योन्यानुक्तलक्षणेनासङ्गृहीतान्स्मिङ्धातून्सङ्ग्राहिकया सङ्गृह्णाति। षष्कित्यादि। षष्क गतौ। ञिष्विदा गात्रप्रक्षरणे। स्वद आस्वादने। षञ्ज परिष्वङ्गे। ञिष्वप् शये। ष्मिङ् ईषद्धसने। एते षोपदेशा इत्यन्वयः। प्राचा तु एकाच इति नोक्तम्। तन्न। सूचिसूत्र्यादावतिव्याप्तिः स्पष्टैव। यत्तु व्याख्यातार आहुः। येषां स्त एव षकारादित्वं पठ्यते ष्ठिवादीनां तेषां टवर्गद्वितीयत्वपक्षेपि षोपदेशत्वं न निवर्तते। नह्येत एव षोपदेशा नान्य इति नियम्यते। तथा हि सति ष्ठिवेर्द्वितीयष्ठकार इति पक्षे सत्वनिषेधोऽनर्थकः स्यात्। नाप्येते षोपदेशा एवेत्ययोगोपि व्यवच्छिद्यते। सेवति दन्त्यादिरप्यस्तीति मैत्रेयन्यासकारादिभिरुक्तत्वात्संभवमात्राभिधानमेतदिति। अत्रेदं वक्तव्यम्। यद्ययोगान्ययोगौ न व्यवच्छेद्यौ तर्हि व्यर्थमेवेदम्। अविवेकस्य तदवस्थत्वात्। किंच। विवेचनाय षोपदेशत्वलक्षणेन बोधयतीति स्वोक्तावतारिकाप्यसङ्गता ॥

७ भासतिस्यादिति शेषः। लक्षणस्यायोगान्ययोगव्यवच्छेदकत्वस्वभावत्वात्। अन्यथा लक्षणत्वमेव हीयेतेति भावः ॥

व्याहतैवेति। अयोगो न व्यवच्छिद्यत इति स्वोक्तेरस्यार्थः। षोपदेशत्वमात्रेद्यते इत्यस्य तद्योगो व्यवच्छिद्यत इत्यर्थात् इति भावः। प्रत्याख्यानार्थमेवेति। एवं हि तत्र भाष्यं ष्टि
वेरपि द्वितीयषकार इति सत्वे कृते ष्टुत्वेन सिद्धन्तेष्टीव्यत इति तर्हि न सिध्यति। द्वितीयषकारकोपि स्वीक्रियते तेष्टीव्यते तेष्टीव्यत इत्युभयसिद्ध्यर्थन्तस्य तर्हि सत्वं प्राप्नोति। ए

अपि च। धातुपाठे येषामादौ षकारो न पठ्यते साह्यतिस्यलस्यादीनान्तेषामनेन षोपदेशत्वमात्रे द्यत इति स्वोक्तिरपि व्याहतैव। यत्त्वन्ययोगव्यवच्छेदे ष्ठिवेः सत्त्वनि
षेधानर्थक्यं स्यादित्युक्तम्। तन्न। सत्वनिषेधप्रत्याख्यानार्थमेवाकरे द्वितीयषकार इति पक्षस्य प्रक्रान्तत्वेनेष्टापत्तेः। यदप्ययोगव्यवच्छेदे सेवतिर्दन्त्यादिरपीति मैत्रे
यादिमतविरोधोद्भावनम्। तदपि न। सेवृ ष्ठेवृ इति धातुद्वयपाठवादिनां द्वितीयधातुपाठसामर्थ्येन धातुलोपपत्तेः। तादृशयत्नविशेषविरहे योगव्यवच्छेदस्य निर्दो
षत्वादिति दिक्। ह्लादी २७ ईदित्वं श्वीदितो निष्ठायामितीडभावार्थं ह्लादो निष्ठायामित्युपधाह्रस्वः। आह्लन्नः। आह्लन्नवान्। स्वद आस्वादने। २८ अषोपदेशत्वाद सिस्वदत्।
षकाररहितोऽप्ययमिति। तथा च प्रयुज्यते। मधुस्नुतङ्घृतमिव सुपूतमिति। मन्थ विलोडने ४२ हिंसायाङ्क्के शनयोदुपीत्येके। अयं क्र्यादौ च दृह चाग्रे निरनुषङ्ग इति।
षिध गत्याम्। ४७ अयमुदिदिति काश्यपादयः। तदुक्तिविरोधादयुक्तमिति माधवः। तथाहि। अनिट्कारिकासु सिध्यतिबुध्यत्योः श्यना निर्देशात्सिधितं बुधितमिति वृत्ता
वुदाहृतम्। ऊदित्वे तु उदितो वेति क्त्वायामिड्विकल्पात्। निष्ठायामिण्न स्यात्। यस्य विभाषेति निषेधात्। अत एव न्यासपदमञ्जर्यामपि सिधेरूदित्वमनार्षमित्युक्तम्। उपस
र्गात्सुनोति। सुनोत्यादीनां पञ्चानां श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थस्तेनाभिसोषवीतीत्यादौ षत्वं नेत्याकरः ॥

वं तर्हि द्विषकारकः सः आद्यस्य सत्वे कृते ष्टुत्वेन सिद्धं ष्टिवलिट् ष्टीव्यते इत्यत्र तर्हि षुट् प्रसज्येत। एवन्तर्हि यादौ ष्ठिवु षष्कतौ इति। तादृशयत्नेति। धातुद्वयपाठरूपेत्यर्थः। एकधातुपाठेऽयो
गव्यवच्छेदस्य निर्दुष्टत्वादिति भावः। आकार इति। अन्नारुचिवीजन्तु सेतीति लोभत्योः घार्पूर्वा इतिरवयः शेषेण तयोः फलाभावेन पञ्चानामित्यसङ्गतमिति ॥

तद्बीजान्तरमप्याह। स्यादिष्वेवेति। नच गणनिर्दिष्टास्त्यादिष्वित्यस्य यङ्लुक्यप्राप्तिः गणपाठप्रसिद्धगणनिर्देशस्यैवात्र ग्रहात् अत्र तूपसर्गात्सुनोतीति सूत्रस्थस्यादीनां ग्रहणम्। न चा
भ्यासेनस्वनिमित्ताक्षेपात्तत्र परेत्तियमो नचैतद्यङ्लुगन्तद्रूति वाच्यम्। सन्यङन्तस्य द्वित्वविधानेन नैनतत्परत्वाक्षेपात्। यङ्गन्ते भ्यासस्य द्वित्वनिमित्तपरत्वासंभवेन तेन तदाक्षेप
संभदाश्चतदन्तत्वाक्षेपेतु दोषः एवनेति दिक्। ण्यन्तादपि नामधातुरिति शेषः। इत्याहुरिति। अत्रारुचिबीजन्तु णिलोपे सति स्यस्यैकाच्त्वेपि आचारक्विबन्ताद्यङ्। लुग् विधानेनमानम
सिद्धसूत्रस्य भाष्यविरुद्धं च तदिति। हरदत्त इति। तादृशयङ्लुक्सत्त्वे दृढतरमानाभावो रुचिः। मतान्तरमिति। अत्रारुचिबीजन्तु गत्यर्थे षत्वप्रवृत्त्या तस्य चारितार्थ्येन गतिभिन्नार्थे षित्त्वपा
स्यादिष्वेवाभ्यासस्य षत्वम्। नतु सुनोत्यादिष्विति नियमेनापि गतार्थमेतत्। सेनयेति। ण्यन्तः। सेनयाअभियाति अभिषेणयति। शपानिर्देशो यङ्ङिवृत्त्यर्थः। नचानेका
च्त्वे नयङ्संभवः क्वौ णिलोपे ततः आचारे — यङः संभवादित्याहुः। स्विपेति। शपानिर्देशो यङ्लुङ्निवृत्त्यर्थो देवादिकनिवृत्त्यर्थश्चेति हरदत्तः। तेन प्रतिसेषिधीतीत्यत्राभ्या
सेषत्वंन। अत्र माधवेन मतान्तरमुपन्यस्तम्। सिद्ध्यतीति निवृत्त्यर्थएवायं शपानिर्देशः। स्त्रिपाशपेति निषेधस्तु नेह प्रवर्त्तते। सेधतेर्गताविति निषेधसूत्रेपि शपानिर्देशान्ज्ञापका
त्। सहि यङ्लुकि षत्वपरित्राणेनार्थवान्नत्वन्यथेति। इण्कोरित्यधिकृतं तत्रोपसर्गैः कवर्गस्यासंभवादिणेव संबध्यते। तात्स्थ्यात्ताच्छब्द्यमित्याह। उपसर्गस्यादिति। इणन्तादुपसर्गा
दिति तु नस्यास्यातम्। निःषुणोति निःषेधतीत्यादावव्याप्तेः। सिद्धान्ते तु नुम्विसर्जनीयशर्व्यवायेपीति षत्वं भवत्येव। यत्तु दुष्षुणोति दुःषेधतीत्यादि प्राक्तनउदाजहुस्तच्चिन्त्यम्। दुरः षत्वणत्वयो
रुपसर्गत्वप्रतिषेधात्॥ ७) श्येति निषेधबाधे मानाभाव इति। भवत्येवेति। तवत्तु विरोधात्तत्सम्भव एव नस्यादिति भावः। दुर इति। षत्वणत्वयोः रुत्वस्यासिद्धत्वेन तद्विषयोपसर्गत्वप्रतिषेधपरे दुरः
षेधेति वार्तिके कृतरेफसान्तस्यापि ग्रहणे न सान्तयोरपि तन्निषेधात्। अतएव सुषामादिषु दुष्टशब्दपाठश्चरितार्थः। सह्यपदुःसु घुस्थः कुरिति दुःपूर्वकस्याधातोः कुप्रत्यये साधुः। अन्यथा दुस्पूर्वकादेव
कुप्रत्ययमङ्गीकृत्योपसर्गादित्येव षत्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव। नचास्य रूढत्वेनावयवार्थाभावादुपसर्गत्वाभावः। अत्यन्तरूढेषु निष्ठादिषु षत्वानापत्तेः। अर्थबलारोपेणेति चेत्प्रकृतेपि तुल्यं दुरः षा
ठस्तु दुरयत इत्यादौ रुत्वस्यासिद्धत्वेन लत्वाभावार्थं दुरस्तु दुलयत इति रूपं यत्र तु रुत्वमसिद्धं निःकुषइत्यादौ तत्र रान्तग्रहणेपि न सान्तग्रहणमिति भावः। आविर्दूर्यमिति। सामीप्यमित्यर्थः॥

निपातनादिति। यत्त्वर्थीभावेऽव्ययीभावस्य नञ्तत्पुरुषेण सह विकल्पादव्ययीभावात् ष्यञ् सुलभ इति तत्र धर्मिपराविदूरशब्देनाव्ययीभावेऽर्थासङ्गतेः। धर्मपरे तस्मिंस्तु ष्यञो नैक यत्क्रियायुक्तास्तं प्रत्येवोपसर्गा इत्युक्तम्। तेनेह न। निर्गतः सावकोऽस्मान्निःसावकः। ण्यन्तेऽत्र प्रादीनां प्रकृत्यर्थविशेषकत्वेऽभिषावयति। ण्यर्थविशेषकत्वे तु सुनोतिं प्रत्यनुपसर्गत्वाभावान्न षत्वम्। अभिसावयति। एवं सनादिष्वप्यूह्यम्। स्यादिष्वभ्यासेन प्राक्सितादिति च वक्ष्यते। तत्र सौत्रक्रमत्यागे नास्योपजीव्यत्वात्सौत्रक्रमेणैव षत्वप्रकरणं व्याचष्टे। सदिरप्रतेः। षष्ठ्यर्थे प्रथमेत्याह। सदेरिति। स्तन्भेः सौत्रस्यैवेति। स्तन्भुस्कुन्भु इति सूत्रे निर्दिष्टस्य रोधनार्थस्य। न तु ष्टभि स्कभि प्रतिबन्ध इति पठिष्यमाणस्येति भावः। एतच्च लक्षणप्रतिपदोक्तपरिभाषया लभ्यते। षत्वविधौ हि नकारविशिष्टरूपमुपात्तं तच्च सौत्रस्य प्रत्यक्षम्। इदं तु लाक्षणिकम्। तेन विस्तम्भते इत्यादौ षत्वं न। नन्वेवमुत्तम्भते इत्यादौ उदः स्थास्तम्भोः पूर्वस्येति न प्रवर्तेत इति चेत्। न। तत्र हि स्थास्तम्भोरिति मकारविशिष्टरूपमुपात्तं तच्चोभयोरपि लाक्षणिकमिति विशेषादुभयग्रहणात्। एतच्च सर्वं माधवग्रन्थे स्पष्टम्। ननु सदिस्तन्भोरित्येव कुतो न सूत्रितं तत्राह। योगेति। अवाच्चेति सूत्रे सदेः संबन्धो माभूदिति भावः। नानुवर्तेत इति। स्तन्भेरित्यत्रेत्यर्थः। तथा च तदर्थोऽपि योगविभाग इति भावः। अवाच्च। आलम्बनमाश्रयणम्। यथा यष्टिमवष्टभ्यास्ते। अविदूरस्य भाव आविदूर्यम्। न नञ्पूर्वात्तत्पुरुषादिति निषेधे प्राप्ते अत एव निपातनाद्भावप्रत्ययः। वेश्च। विष्वणति मांसम्। भोजने किम्। विस्वनति वीणा। परिनिविभ्यः। षेव षेस शब्दौ। भुङ्क्ते इत्यर्थे वने। षिञ् बन्धने। क्तान्तः। अजन्तत्वविषितः विषयः। प्रत्ययविशिष्टग्रहणं किम्। विसिनोति। यत्तु केचित्। विषिण्वन्तीति विषयादिति प्रयुञ्जते तन्न विग्रहे षत्वणत्वे प्रामादिके। षिवु तन्तुसन्ताने। षह मर्षणे। सुट् आगमः। परिष्करोतीति यथा। स्तुस्वञ्ज्योरुपसर्गात्सुनोतीत्येव सिद्धे पर्यादिपूर्वयोरेतयोः सिवादीनां वाड्व्यवायेऽपीति विकल्पार्थं पुनर्वचनम्। स्यादिषु। इदं वाक्यं। यद्यपि निषिधे — स्यादिष्वभ्यासस्योपसर्गात्सुनोतीत्यनेन न सिद्धमभ्यासात्परस्य त्वादेशप्रत्यययोरिति तथापि ॥ लिङ्क्तापत्तिरिति भावः ॥

स॰शृ॰ २६७

॥ग्रुं वाक्यमिति। स्थादिष्वभ्यासेन चेत्येतदित्यर्थः। अत्र व्यवायेपीत्यनुवर्तते। अपिनाऽव्यवायेपि। सेनयति। अत्र सेनाशब्दस्याव्युत्पन्नत्वेनादेशसकाराभाव इति भावः। अवर्णान्तेति तन्त्रे पर्यपरत्वाभावादिति भावः। न च पूर्वत्रासिद्धत्वस्य द्वित्वे निषेधात् पूर्वस्मात्तु उपसर्गेणेति पक्षेन्तरङ्गत्वात्पूर्वं षत्वे कृते षत्वानामेव द्वित्वे घितष्ठाविति रूपस्य सिद्धेरेतद्वचनं विनापीति वाच्यम्। पूर्वधातुः साधनेनेति पक्षस्य मुख्यत्वादिति बोध्यम्। एकपदेति। पदस्यैकत्वविवक्षणात् अखण्डैकपदेत्यर्थः। तेन सोमसुत् स्तौतीत्यादौ समासेपि नेति बोध्यम्।

आद्यं वाक्यं फलत्रयार्थम्। तथा हि। अषोपदेशार्थम्। सेनया अभियातुमिच्छति अभिषिषेणयति। अवर्णान्ताभ्यासार्थं च। अर्थासनङ्गोत्रमिदोषितष्ठौ। षणि प्रतिषिद्धार्थं च। अभिषिषिक्षति। षिच क्षरणे। स्तौतिण्योरेवेति नियमान्निवर्तितषत्वं तदप्युपसर्गमाश्रित्य भवति। अभ्यासस्येति द्वितीयवाक्यं तु नियमार्थम्। स्थादिष्वेवाभ्यासस्य षत्वं न सुनोत्यादिष्विति। तत्फलं तु षू प्रेरणे। अभिसुसूषति। अत्रोक्तनियमादभ्याससकारस्य षत्वं न। द्वितीयस्य तु स्तौतिण्योरेवेति नियमान्न। षोऽन्तकर्मणि। अभिसिषासति। दृह षणो। भावादभ्यासात्परस्य षत्वं पूर्वस्य तु न। उक्तनियमात्। षिधू शास्त्रे। ४८ शास्त्रं शासनमिति। अन्ये तु शास्त्रविषयकज्ञानमित्याहुः। माङ्गल्यं मङ्गलक्रिया। स्वार्थे ष्यञ्। ञिफला। ञिफलि। सस्य लोपः स्यादिति। पदस्येति वर्तते। तत्र प्रत्यासत्तेः झलः ञिफलिसस्येति निर्दिष्टानां त्रयाणामेकपदसंबन्धित्वे विधिरयम्। न तु सोमसुत् स्यातेत्यादौ। णोपदेशास्त्विति। नद शब्दे। नट अवस्यन्दने चुरादिः। यस्तु नट नृत्ताविति घटादिः स नेह गृह्यते। नाटीति दीर्घनिर्देशात्। नाथनाध्याञ्चादौ। टुनदि समृद्धौ। नक नाशने ॥

उरस्येति ज्ञापकाज्झलादौ प्रत्यये एवायं लोप इत्यन्ये। घटादिरिति। भ्वाद्यनुवादरूप इत्यर्थः। न च घटादेश्चुरादेरेवानुवाद इति वाच्यम्। नान्ये मितो हेताविति ज्ञपादिपञ्चकव्यतिरिक्तस्य स्वार्थणिजन्तस्य मित्त्वनिषेधात्। एवञ्च यस्य नाटीत्येव रूपं तस्मात्र ष[illegible]दासः भौवादिकस्य नटयतिनाटयतीति रूपद्वयसत्त्वेन प्रनाटयतीत्यादौ नाटिरूपेपि णत्वं भवत्येव। वाक्यार्थाभिनयं कुर्वतीत्यर्थ इति भावः ॥

राम: २६७

एधतिरिति। भूसहित एधतिरित्यर्थः। महाव्याहृतिसत्तारूपब्रह्मस्मारकत्वेन चोभयोर्माङ्गलिकत्वमितिभावः। षोडयतीति। षोडन्तमाचष्टे इति णिचि टिलोपे पचाद्यचि षोडमात्म
नइच्छती—ति क्यचि रूपमिति कैयटः। एतच्चेति। सूत्रस्थस्य धातुग्रहणं चेत्यपि बोध्यम्। उपदेशोऽस्तीति षकारादिभ्यः आचारक्विप् नास्त्येवान्यथा सुब्धातुत्वाभावाद्धात्विकारस्य सा

नृ नये। नृती गात्रविक्षेपे। एभ्योऽभिन्नादित्यर्थः। दन्दशूक क्रियायामिति। दन्दशूककर्तृकायां क्रियायामित्यर्थः। क्लिदि परिदेवने। ७४। अस्यानुदात्तेत्सु पठितस्येह
पाठः परस्मैपदार्थः। स्वरितेत्सु तु पाठो न कृतः। क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदं यथा स्यात्। शुन्ध शुद्धौ। ७५। अयं शौचकर्मणि शुजादौ। शुध शौच इति दिवादौ च
निद्। प्रथमं माङ्गलिक एधतिरुक्तस्तदनुरोधेनैव तवर्गीयान्तान्पठित्वा मातृकापाठक्रमेणाह। अथेति। सुआत्विति। सुआत्तूदाहरणं षोड्यति षण्डयतीत्यादि। ए
तच्च वार्तिकभाष्ये प्रत्याख्यातम्। तथाहि। धात्वादेरिति सूत्रे उपदेश इति वर्तते। न च सुआत्रूनामुपदेशोऽस्ति। ष्ठिवु ष्वष्कतीतु षकारादौ। लोपो व्योरिति यलोपः।
यत्तु प्राचा सुआतु ष्ट्यै ष्वष्केत्युक्तम्। ष्ट्यायतीत्युदाहृतं च। तदनाकरम्। भाष्यवार्त्तिकयोः ष्ट्यै इत्यस्य सत्वनिषेधाभावात्। स्त्यः प्रपूर्वस्य। प्रस्त्योऽन्यतरस्यामित्या
दौ स्त्यारूपापन्नयोर्द्वयोर्ग्रहणमिति वृत्त्यादिमहाग्रन्थविरोधाच्च। एवञ्चोभयोरपि स्त्यायति प्रस्तीतः। प्रस्तीमदित्यादिरूपाणि तुल्यान्येव। यत्तु वदन्ति। धा
तु पाठे स्त्यै ष्ट्यै इति ष्टकारपाठसामर्थ्यात्सत्वं नेत्याशय इति। तन्न। तिष्ट्यासति। अतिष्ट्यत् इत्यादौ षत्वप्रवृत्त्या चरितार्थत्वस्य माधवादिग्रन्थेषु स्पष्टत्वात्। राघृ ला
घृ द्राघृ। अत्र द्राघृ आयामे इत्यपि पठ्यते। आयामो दैर्घ्यमिति कौशिकः। कदर्थनमिति स्वामी। उख उखि। सकृत्प्रवृत्तत्वादिति। यत्तु माधवेनोक्तमभ्याससमानाश्र
यत्वेनान्तरङ्गे ह्रस्वे कर्तव्ये पूर्वं पराश्रयस्य बहिरङ्गस्य सवर्णदीर्घस्यासिद्धत्वाद्ध्रस्वो नेति ॥ ७७ न प्रत्याख्यानेन तु नेति फलभेदः स्यादिति भावः। द्वयोरिति। आत्वेनो
भयोरपि लाक्षणिकतया लक्षणप्रतिपदोक्तपरिभाषानवसर इति भावः। षत्वप्रवृत्त्येति। ष्ट्यै इत्यस्य तिष्ट्यासतीत्यादाविति भावः ॥

तच्चिन्त्यमिति। द्विमात्रवृद्ध्यभावेपि पर्जन्यन्यायेन ह्रस्वो दुर्वार इति भावः। दूषणान्तरमाह। ह्रस्वस्येति। पूर्वं प्रवृत्तिस्तु वार्णादाङ्गं न्यायेनेति मूले स्पष्टम्। सत्वादपीति। ह्रस्वादिभ्य
ति इति भावः। अपि नाहचिर्बोधिता। तस्मात्तु चरकालप्रवृत्तिकेऽजानन्तर्य एव तस्य वृत्तिरिति सिद्धान्तविरोधात् प्रागुक्त एव हेतुरिति बोध्यम्। गतिविशेष इति। उत्तर

तच्चिन्त्यम्। ह्रस्वस्याङ्गत्वेन बहिरङ्गत्वात्। आसप्तमसमाप्तेरङ्गाधिकार इति सिद्धान्तात्। प्रागभ्यासविकारेभ्य इति पक्षस्य स्वयमग्रे त्यागसिद्ध्यापत्त्या दूषितत्वात्। अत एव नाभ्यासादीनां ह्रस्वत्वे इति वार्त्तिककृतान्तवद्भावप्रतिषेध आरब्धः। किञ्च। यत्रान्तरङ्गे बहिरङ्गे वा चोदनान्तर्यं तत्र नाजानन्तर्य इति निषेध स्यासत्वादसिद्धत्वं दुर्वचमिति। इह उख उखीति दण्डकानन्तरन्त्वगि कम्पने इति पठ्यते तत्र गतौ प्राक् पठितस्य गतिविशेषेपि वृत्तिं बोधयितुम्। अत एव अनतिप्रयोजनत्वादुपेक्ष्यम्। षच सेचने सेवने च। यद्यपि सेचन इत्येव प्रायेण पठ्यते तथापि सेवनार्थोपि प्रामाणिकः। यं पूरवो वृत्रहणं सचन्ते इत्यादौ भट्टभास्करादिभिस्तथैव व्याख्यानादिति भावः। अयं समवाये सरिते इष्यते। लोचृ दर्शने। ऋदित्। अलुलोचत्। पचि व्यक्तीकरणे। इदित्। अनिदिदिति दुर्गवर्द्धमानप्रभृतयः। न्यासकारस्त्वनिदितं परस्मैपदिनञ्च मन्यते तथा च तिङ्गोत्रादीनीति सूत्रे पचति गोत्रमित्युपादाय पच व्यक्तीकरणे इति व्याख्यत्। एतान्येवैकदेशिमतानि गृहीत्वा निद्धारिकाव्याख्यायामस्यापि ग्रहणमित्यवोचाम सम्मतकारादयोपि अनिट्प्रसङ्गे द्वयोर्ग्रहणमूचुः। पचि विस्तारवचने इति चुरादौ। ऋज गतौ। अर्जनं प्राधान्येन। उपार्जनन्तु प्रासङ्गिकम्। अयं पाठो मैत्रेयस्य। क्षीरस्वामिप्रभृतयस्तु अर्जने इति पेठुः। त्रुड्डि धाविति। तत्र हि द्विहल्ग्रहणङ्गोपास्येह शास्य हलः परिग्रहार्थम्। अन्यथा तस्मान्नुडित्येव ब्रूयात् ॥

दियसंयोगानुकूलव्यापारत्वमुभयोः सममित्यभिमानः। एकदेशिमतानीति। अनेन वस्तुतस्त्वासु ग्रहणमनुचितमिति सूचितम् ॥

न चाटतुरित्यादाविति। आटेत्यस्याप्युपलक्षणमिदम्। भाष्यकैयटयोरिति। एओङ्सूत्रे इति शेषः। विकल्पितत्वादिति। परे तु फणादिष्वपि भ्राजृ इति पठन्ते। एवञ्चास्यानुव
न चाटतुरित्यादावतिप्रसङ्गः। अभ्रातेश्चेत्यनेनैकहलोपदि भवति तर्हि अभ्रातेरेवेति नियमात्। न चास्य अभ्रातिमात्रनिवृत्त्यर्थत्वं शङ्क्यम्। तथात्वे हि नाभ्र इत्ये
वब्रूयात्। यद्वा। हि हल्ग्रहणं प्रत्याख्यायते। अवर्णोपधस्य यदि भवति अभ्रातेरेवेति नियमात्सर्वं सिद्धमिति भाष्यकैयटयोः स्पष्टम्। ऋजि भृजी। द्वितीय ईदि
त्। श्वीदितो निष्ठायामिति नेट्। भृक्तः। भृक्तवान्। भ्रस्ज पाक इति तौदादिकस्य भृष्टवान्। ऋञ्जाञ्जके इति। समन्तात ऋञ्जिण्योस्तु आनृञ्जे इत्युदाहृतन्त
त्वामादिकमिति भावः। एजृ भ्रेजृ भ्राजृ। अत्र न्यासकारः। अवश्यपठितव्येन फणादिकेन भ्राजत इत्यादिसिद्धेरिह पाठोऽनार्थ इत्याह। तन्न। व्रश्चेति षत्व
विरहार्थमिह पाठात्। तत्र हि राजसाहचर्यात्फणादेरेव ग्रहणमिति स्थितम्। यद्वान्यासेऽपि इवशब्देनायमर्थः सूच्यते। इह भ्राजेर्ऋदित्वमनुदात्तेत्त्वमात्रफ
लम्। भ्राजभासेत्यादिना चङ्परे णावुपधाह्रस्वस्य विकल्पितत्वात्। अबिभ्रजत्। अबभ्राजत्। अत्र रेजिरपि क्वचिल्लक्ष्यते तदनार्षम्। रेजते अग्ने पृथिवी मखे
भ्यः। इत्यत्र राजतेर्भ्राजतेश्च समत्वमिति भट्टभास्करोक्तेः। क्रुच शब्दे। अयं गताविति स्वामी। ज्वलादौ तु दादौ णार्थो चुरादौ। ग्लुञ्चु षस्ज गतौ। आत्मनेपद्य
पीति। हेतुमति सूत्रे यदभिप्रायेण सस्जत इति भाष्यप्रयोगादिति भावः। गुजि अव्यक्ते शब्दे। अयमादिदपीति शाकटायनादयः। गुञ्जा शब्द इति
तुदादौ। अर्च पूजायाम्। अयं चुरादौ स्वरितेत्। इह पाठस्तु कर्तृगे फलेपि परस्मैपदार्थः। शाकटायनस्त्वयमात्मनेपदीत्याह। प्रयोजनं त्वकर्तृगे
त पिलेतङ्। एतच्च सर्वमिह माधवेनोक्तम्। चुरादौ तु तेनैवात्रस्य ग्रन्थस्य विपरीतमुक्तं तत्र परिनिष्ठितरूपे विवादाभावेऽपि वद्धाभासो दुर्वार
एवेति ध्येयम् ॥
प्र तरमस्तु एवञ्च भ्राजभासेति सूत्रे भ्राजिग्रहणं मास्तु धातुभेदेन रूपद्वयसिद्धेरित्याहुः ॥

म·श्र· समानाश्रयत्वञ्चेति। समानकार्यिकत्वमित्यर्थः। इदं स्वरूपकथनं न तु समाननिमित्तकत्वमित्यर्थः। विभिन्ननिमित्तकेपि इत्यायेत्यादौ बहुशः प्रवृत्तिदर्शनादिति बोध्यम्।
२६९ संवीतिद्विति। असञ्ज्ञायाङ्क्तिन्नन्तम्। सञ्ज्ञायां स्त्रीलिङ्गे भावादौ समजेति क्यपाभाव्यमिति बोध्यम्। यङ्‌ नस्यादिति। हलादित्वाभावात् धात्वन्तरस्यत्वे तत्समानार्थस्यार्धधातुके
प्रयोग एव नास्तीति भावः। इदञ्चार्धधातुक इति सूत्रे भाष्ये स्पष्टम्। विषयत्वापहारादिति। ज्ञानविषयत्वापहारादित्यर्थस्तदाह। नार्धधातुकाभिव्यक्तिरिति। प्रत्ययलक्षणन्तु

युच्छ प्रमादे। युच्छतीति। अन्तरङ्गत्वात्तु किं अलघूपधत्वान्न गुणः। न च वार्णादाङ्गं बलीय इति वाच्यम्। यत्राङ्गवार्णयोर्युगपत्प्राप्तिः समानाश्रयत्वञ्च तत्रैव तथेति कैय्यटादिभिः सिद्धान्तितत्वात्। इह च वैपरीत्यात्। उञ्छे इति। उञ्छतीति सूत्रे उञ्छिनोतीत्यर्थः इति न्यासः। बदराण्युञ्छति। बादरिकः श्यामाकानुञ्छति श्यामाकिक इत्युदाहरतो वृत्तिकारस्यापि व्यापित्वेनोञ्चयनार्थत्वमेवाभिप्रेतम्। ध्रज ध्रजि। षडप्येते तवर्गचतुर्थादयः। तरङ्गिणीकारादयस्तु आद्योदन्त्योष्ठ्यादिरित्याहुः। तर्ज भर्त्सने। अयमुरादावपि। अजेर्वी। दीर्घान्त आदेशः। ह्रस्वान्तपाठे तु संवीतं संवीतिरित्यादि न सिद्ध्येत्। आर्धधातुके विषयेइति। तेन प्रत्ययोत्पत्तेः प्रागेव वीभावे हलादित्वाद्यङि वेवीयते इत्यादि सिद्ध्यति। परसप्तम्यान्तु यङ् नस्यादिति भावः। यङ्लुकृत्वस्मान्न भवति। यतो लुक्या यङः आर्धधातुकस्य विषयत्वापहारान्नार्धधातुकाभिव्यक्तिरिति वीभावस्यैव प्रसङ्गः। एतच्च न नुमतेति सूत्रे कैयटे स्पष्टम्। कस भृ डुकृञ् करणे। कृञ् हिंसायाम्। द्वयोरपि ग्रहणम्। एवं भृ इति भरति बिभर्त्योः। वृ इति वृङ् वृञोः। इह कृसभृवृणाम् एकाच उपदेश इति प्रकृत्याश्रयेन निषेधे प्राप्ते वृङ् वृञोस्तु श्र्युकः कितीति प्रत्ययाश्रये प्राप्ते नियमोयमित्याह। क्रादीनान्तुर्णमिति ॥

न नुमतेति निषेधात् इट्योरपीति। व्याख्यानादिति भावः। नियमोयमिति। अष्टानामपि नियमार्थत्वन्तु न। तुष्टोथेत्यादौ भारद्वाजनियमेनेडापत्तेः रामः
स च नेष्ट इति नेड्वशी सूत्रे भाष्ये स्पष्टं नियमाद्विधेर्बलवत्वाच्च। कृसभृवृ इति च लुप्तषष्ठीकं पृथक्पदं क्रादिषु चतुर्षु विनिगमनाविरहेण सर्वेषामेव नियमार्थत्वम् ॥ २६९

नञ्प्रापितस्यैवेति। क्रादिषु तस्यैव प्राप्तेरिति भावः। एकमेवेति। अत एवोपदेशेऽत्वत इति सूत्रे नित्यानिट्त्वस्यार्त्तिर्व्यावर्त्यत्वेन भाष्ये उक्तः। अन्यथा तद्भावे ऋतो भारद्वाजस्येति विकल्पः तत्त्वेऽप्यूदित्वप्रयुक्तविकल्पस्यैव सत्वेन तदसङ्गतिः स्पष्टैव। ननु क्रादिनियमेन तत्त्वे नित्य इडिति विशेषोऽस्त्येवेति इदमेवमतं युक्तमिति भावः। विपरीत इति। अष्टानामपीति शेषः। अत एव स्तुत इति निर्देशप्रदर्शनमग्रे। न च ऋतो भारद्वाजस्येति नियमप्रापितस्येटो निषेधाय क्रादिग्रहणं विद्धार्थमिति वाच्यम्। तथापि सति स्तुद्रुस्नुश्रुक्ष्णुतो।

निषेध इति। नेड्वशीति प्रक्रमात् नञाप्रापितस्यैवाभावस्यायं नियमो न तु विभाषाबललभ्यस्यापि। तेन सिषेधिथ। सिषेद्ध। सिषिधिव। सिषिध्वेत्याद्युभयं भवति। केचित्तु यो वा कश्चिदिडभावः प्रतिषेधनिबन्धनो विकल्पनिबन्धनो वा सर्वो बाध्यत इति मन्वानाः सिषेधिथेत्यादि एकमेव रूपं न त्वनिट्कमपीत्याहुः। ननु विपरीत एवानियमोऽस्तु। क्रादिभ्यश्चेदिण्न तर्हि लिट्येवेति। मैवम्। कृते ग्रन्थे तमधीष्टाभृतः। परिवृतो रथः। स्तुतस्तोमयोरित्यादिनिर्देशविरोधापत्तेः। स्यादेतत्। अस्तु प्रकृत्याश्रयस्य नियमः प्रत्ययाश्रयस्य तु न संभवति। वृग्रहणस्य वैयर्थ्यं त्वाप्राप्तनिषेधप्रापकत्वात्। न ह्यत्र प्रकृत्याश्रयः प्राप्नोति। वृञ उदात्तत्वात्। नापि प्रत्ययाश्रयः। थलोऽकित्त्वात्। एवञ्च बभूविथेत्यादौ श्र्युकः कितीति निषेधो दुर्वार इति चेत्। मैवम्। बभूथाततन्थजगृभ्मववर्थेति निगम इति सूत्रेण छन्दसि ववर्थेति निपातनात् भाषायां वृञस्थलि इटः स्वीकर्तव्यतया वृञ इडभावस्याविषयत्वायोगात्। वमादीनाञ्चाकित्त्वेन नियमस्य सुस्थत्वात्। अचस्तास्वत्। उपदेश इति। एतच्चोत्तरसूत्रादिहापकृष्यते। नित्यग्रहणमनिटो विशेषणम् ॥

भारद्वाजस्येत्येव पठेदिति भावः। विरोधापत्तेरिति। किंच कृञादीनामनुदात्तपाठवैयर्थ्यापत्तिरित्यपि बोध्यम्। न संभवतीति। वृङमादाय तत्संभवेऽपि वृञमादाय निषेधसंभव इति भावः। अपकृष्यत इति। एतच्च ऋतो भारद्वाजस्येति सूत्रे स्पष्टम्। तदपकर्षे च धेड आदेर्दधिथेत्यादिसिद्धये अजग्रहणम्। एतेनोपदेशे एजन्तानामात्वविधानेनेजन्तात्सर्वत्र थलोऽसंभवेन कृग्रहणमेव युक्तमित्यपास्तम् ॥

अपेक्षायामिति। अजन्तस्य धातोः प्रयोगमात्रावच्छेदेनेड्भावप्रसिद्धेस्तथापेक्षेति भावः। एवं थल्यपीति तेन तासौ दृष्टस्येड्भावस्य थल्यतिदेशः। तेनादेर्घस्लादेशे जघसिथेत्यत्रोच्चस्मिथेत्यत्र च नित्यमिट्। न चानयोस्तासेरभावेन विशेषणाभावप्रयुक्तो विशिष्टाभावोऽस्त्वेवेति वाच्यम्। तादृथ्ये चेत्यतस्तासीत्यस्य न वृद्धा इत्यतो नञ श्चानुवृत्त्यैव तासि नित्यानिटस्थलीण्वेत्यर्थेनैव सिद्धे तास्वदित्यनेन यस्य तासाविड्भावो दृष्टस्तस्यैव थल्यतिदेशान्न दोषः। स्थानिवद्भावेन तु न तासौ नित्यानिट्त्वातिदेशो शास्त्रीयत्वात्

कृ नित्यमनिडित्यपेक्षायान्तासेः सन्निधानात्तत्रैवेति विज्ञायते तासि चक्लृप इति सन्निहितं वाऽनुवर्त्तत इत्याह तासौ नित्यानिडिति। तास्वदिति सप्तम्यन्ता इतिः। यथा तासौ न भवति एवं थल्यपीत्यर्थः। नित्यमनिटः किम्। दुधविथ। नायं तासौ नित्यमनिट्। स्वरत्यादिना विकल्पितेट्त्वात्। अस्य थलि नित्यमिडिति काशिका। एतच्च विकल्पनिबन्धनस्यापीड्भावस्य क्रादिनियमेन निवृत्तिरिति पक्षे बोद्धम्। निषेधनिबन्धनस्यैवेति पक्षे तु नित्यग्रहणाभावे स्वरतेस्थलीड्विकल्पो न स्यादिति बोध्यम्। किं च। उत्तरार्थमपि नित्यग्रहणम्। तेन क्रमेरपि चक्रमिथेति भवति। न हि क्रमिस्तासौ नित्यानिट्। स्नुक्रमोरनात्मनेपदनिमित्ते इति वचनात्परस्मैपदे सेट्कत्वात्। उपदेश इत्यपकर्षस्य फलन्तु भारद्वाजसूत्रे स्फुटीभविष्यति। उपदेशेऽत्वतः। उपदेशे किम्। कर्षीच कर्षिथ। अत्वतः किम्। भेत्ता। बिभेदिथ। तपरकरणं किम्। राद्धा। रराधिथ। तासौ किम्। जिघृक्षति। जग्रहिथ। नित्यानिटः किम्। अङ्क्ता। अञ्जिता। आनञ्जिथ। चक्रमिथ। ऋतो भारद्वाजस्य। दीर्घान्ते प्रतावत्वाद्यन्निषेधः ऋत इति तपरकरणात्। ह्रस्वान्तेषु अच स्तास्वदित्येव सिद्धः। वृङ्‌वृञौ यद्यपि सेटौ तथापि वृङः थल् नास्ति। आत्मनेपदित्वात् ॥

इति भावः। थलि नित्यमिडिति। नित्यग्रहणाभावे भारद्वाजनियमेन विकल्पः स्यादिति भावः। इति पक्षे त्विति तु नावृत्तिविरोधादयं पक्षोऽयुक्त इति सूचितम्। अत्वतः किमिति। अत्वतस्तास्वत्थल्यनिटो नित्यमुपदेश इत्येव कार्यमिति प्रश्नः। अजन्तात्वभिन्नोज्वान् व्यावर्त्य इत्युत्तरम् ॥

ड्राभाव्यमिति। न च क्रादन्तेषु विकल्पेन निषेधार्थमिति वाच्यम्। अचस्तास्वदिति सामान्यसूत्रप्रणयनेन भारद्वाजातिरिक्तैरप्यदन्ते निषेधस्यैवाङ्गीकारेण स्मृत्यन्तरानुसन्धानद्वारा विकल्पस्य कृतप्रमाणकत्वादिति भावः। तस्येति। उपदेशेऽत्वत इत्यस्येत्यर्थः। इहेति। ऋत इति सूत्रे। एवञ्चैतस्य दसंबन्धवान्यद्विनिषेध इत्यर्थादुक्तार्थलाभ इति भावः। इदमत्रे वृञस्तु छन्दसि ववर्थेति निपातनाद्भाषायामिडभाव्यम्। न च हन्तादिषु परत्वान्नित्यत्वाच्च गुणे रपरत्वे च कृतेऽजन्तत्वादचस्त्व। स्वदित्यस्याप्रवृत्तिरिति वाच्यम्। तत्रोपदेशग्रहणस्यापकर्षणात्। तस्मान्नियमोयमित्याह। ऋदन्तस्यैवेति। स्यादेतत्। स्तुद्रुस्रुश्रुवामपि थलि भारद्वाजनियमादिट् स्यात्। न च क्रादिसूत्रे स्त्वादीनाञ्चतुर्णां ग्रहणेनास्य बाध उचितः। येन नाप्राप्तिन्यायेन वमादौ क्रादिनियमप्रापितस्यैव बाधौचित्यादित्याशङ्क्याह। न चेति। नन्वेवमुपदेशेऽत्वत इत्यस्यैव बाधः स्यात्। क्रादन्तेषु तस्य प्रसङ्ग एव नास्तीति यदि तर्ह्यचस्तास्वदित्यस्यैवस्यानत्कर्षयोगद्वयमपि न स्यादित्युक्त। अत्राहुः। द्वयोरनन्तरमस्यारम्भादाद्यज्ञासेनिट्स्यलोऽनिषेधः स भारद्वाजस्य मते ऋकारान्तस्यैवेति व्याख्यानात्सर्वेष्टसिद्धिरिति। एवञ्चेह तास्वत्यस्यानिटो नित्यं स्मासीत्यनुवर्त्तत इति फलितोर्थः। यद्वा। क्रादिसूत्रे स्तुप्रभृतीनां ग्रहणमेव इड्द्वयस्यापि बाधकमस्तु। पुरस्तात्प्रतिषेधकाण्डकरणसामर्थ्यात्। अनाश्रितविधानविशेषमिण्मात्रमनारभ्याधीतेन प्रतिषेधेन यथा बाध्येतेत्येतदर्थं हि तत्। पक्षद्वयमपीदमाकरे स्थितमिति मूले द्युपनिबद्धम्। एवजमन्ये। अत्र केचित्कजमद इति पठन्ति। राजृ कम्पने। दीप्तौ लात्मनेपदी गतः। टुओस्फूर्जा। द्वितीयश्चुः। स्फूर्जेर्थः। ओकारो निष्ठानत्वार्थः। स्फूर्गणः स्फूर्गणवान्। आदितश्चेत्यनिट्वम्। स्फूर्गणं स्फूर्जितं वानेन। विभाषाभावादिकर्मणोरिति षेट् ॥ ७७ ॥ कसूत्रे भाष्ये ध्वनितम्। इड्द्वयस्यापीति। क्रादिनियमभारद्वाजनियमप्रापितस्यापीत्यर्थः। अनाश्रितेति। न आश्रितो विधानविशेषो येन नाप्राप्तिरूपो यस्य तदित्यर्थः। इण्मात्रमिति। अनन्तरमनन्तरञ्चेत्यर्थः। अनारभ्याधीतेनेति। विधिमनारभ्याधीतेनेत्यर्थः। इदं वस्वेकाजाद्घसामित्यत्र भाष्ये स्पष्टम्। तदाह। पक्षद्वयमपीति। मूलेपीति। तत्रान्त्यः क्रादिसूत्रे आद्योऽत्रेति बोध्यम् ॥

न.धा. मदनेचेति।मदनंचित्तविकारविशेषः।गर्द्धांतुमदिरानूनमः इत्यत्र इति।प्रथमस्मिस्त्यर्थः।अग्रंपुरस्तादुपरिपरिमाणेपलस्यच।आलम्बनेस।मूर्ध्नेचग्नास्येत्यत्रतन्त्रंसकम्।अधि
२७१ अस्यूदीर्घोनिर्देशोनोपधायाञ्चेति दीर्घस्यानित्यत्वज्ञापनान्मूर्च्छति।हुर्च्छति।इत्यपिभवतीतिकेचित्।क्षिक्षये।अस्याजन्तेषुपाठउचितः।क्षिनिवासगत्योरिति
तुदादौक्षीषूहिंसायामितिक्र्यादौक्षिणुहिंसायामितितनादौ।बोपदेवस्तुक्षिक्षयैश्वर्ययोरितिभ्वादिम्।क्षिषूहिंसायामितिस्वादिंवैदिकंञ्चाह।लजलजि।लज्या
त्।लज्यात्।ओलजीओलस्जीव्रीडनेइतितुदादौ।लजप्रकाशनइतिकथादौ।लज्जीतिपटपुटादिदण्डकेभाषार्थः।तुजिपालने।भाषार्थोऽयंयुजादौ।गजगजि।
गजमदनेचअयञ्चुरादावपिशब्दार्थः।गर्जशब्देइत्यग्रे।वजव्रज।ववजतुः।वव्रजतुः।अदादेःपधइति।तथाचनन्द्राइतिद्वित्वनिषेधाद्दकारंविहायटिशब्दस्य
द्वित्वेटकारस्यष्टुत्वेचर्त्वेच।अट्टिटिषते।आट्टिटदित्यादिसिध्यति।नचपरत्वात्प्रागेवष्टुत्वम्।असिद्धत्वात्।यदाहुः।पूर्वत्रासिद्धेनास्तिविप्रतिषेधोऽभावादुत्त
रस्येति।नचान्तरङ्गत्वात्टुत्वंस्यादेवेतिवाच्यम्।सत्यपितस्मिन्शास्त्रासिद्धतयाद्कारएवायमितिबुद्ध्याद्वित्वनिषेधात्।नचपूर्वत्रासिद्धीयमद्वित्वेइतिनि
षेधःशङ्क्यः।द्वित्वेहिसः।नतुद्वित्वनिषेधेपीतिभावः।तोपधइति।तथाचपूर्वत्रासिद्धीयमद्विर्वचनइतिष्टुत्वस्यासिद्धत्वाद्दकारद्वयसहितस्यद्वित्वेहलादिशे
षेअटिट्टिषते।आटिट्टदित्यादिसिध्यतीतिभावः।अयमनादरेचुरादिः।घट्टचलने।अयञ्चुरादावपि।स्फुट।अयंकुटादावपि।विशरणार्थोऽयंपरस्मैपदि
षु।भेदनार्थश्चुरादौ।वठिएकचर्यायाम्।एकचर्याअसहायगमनम्।वण्ठरण्डाकल्पइतिइङश्चेतिसूत्रेभाष्यम्।अयमनिदित्स्यादित्यर्थः।परस्मैपदिषु।
मठिकठिशोके।मठमदनिवासयोः।कठकृच्छ्रजीवनेइत्यग्रेपरस्मैपदिष्वनिर्दिष्टौ।कठशोकइतिचुरादौ।हिठविबाधायाम्।अमुंपरस्मैपदिष्वपिपठन्ति।वि
बाधनंशाठ्यम्।कुडिदाहे।वैकल्प्यार्थःपरस्मैपदिषुपठिष्यते ॥ [illegible] केचप्रधानेऽन्त्यप्रथमेचाभिधेयवदितिमेदिनी।इङश्चेतिसूत्रेइति।सूत्रविषयइत्यर्थः। राम
परिमाणाख्यायामितिसूत्रेइङश्चेतिसूत्रमुपादायनञु¯ यमिङेकृएववण्ठरण्डाकल्पइतिभाष्योक्तेरेवमुक्तम्।विबाधनमिति।विबाधेतिभावेप्रत्ययइतिभावः ॥ २७

ढिः पाठस्येति। हुडि सङ्घात इति पूर्वं पाठात् व्यवहार इति। वश्प्रत्याहारस्येति शेषः। सवृद्धिकेति। निसंवृद्धियुतस्येत्यर्थः। एतदुपपादितुम्। पठत्यन्ता इति। अत हुणसंवि बाल्यार्थः कुटादौ। रक्षणार्थश्चुरादौ। वडि विभाजने। मडि च। अत्र द्वितीयो वेष्टनेऽपि। अत एव पृथक् पठितः। मडि भूषायामित्यग्रे परस्मैपदिषु। णौ हर्षे च। भडि परिभाषणे। कल्याणार्थश्चुरादौ। पिडि। अयञ्चुरादावपि। मुडि खण्डनार्थः परस्मैपदिषु। तुडि। अयमनिदित् परस्मैपदिषु। हुडि। वरणं स्वीकारः। स्फुडि विकसन इत्येके पठन्ति। युक्तं चैतत्। हुण्डे द्विः पीठस्यैव सध्यात्। वरणसङ्घातयोरिति पाठस्यैवोचित्यात्। चडि कोपे। अयं चुरादावपि। शडि। तालव्योष्मादिः। शण्डो सुरपुरोहितः। पडि गतौ। नाशार्थश्चुरादौ। कडि मदे। भेदने चुरादिः। अनिदिदिहैव। तुदादौ च परस्मैपदी। खडि मन्थे। खुडि इत्येके। खडि भेदने इति चुरादौ। हेडृ होडृ। हेड वेष्टने इति घटादौ। होडृ गतौ। वित्यग्रे परस्मैपदी। बाडृ। बशादिरिति। पवर्गीयेणैव वृत्तिकृता व्यवहारो न तु दन्त्योष्ठ्येन। तथा सति व्यावर्त्यालाभात्। वेशाद्युक्तिर्यथा स्यात्। शाडृ। डलयोरैक्याच्छालत इति काश्यपः। अत एव मैत्रेयेण शालो शाले सुदाहृतं। शौट गर्वे। अस्योणादिषु ईरन् वक्ष्यते। तदेतदति शौटीर्यमौडुलोमेर्नमृष्यतीति कल्पतरुः। यौटृ बन्धे। यणादिः। कटे। अयमनेदिदये। किट खिट त्रासे। त्रासो भयोत्पादनम्। किटिर्गतौ पठिष्यते। इह पाठस्त्वर्थभेदात्। केचिदिह न पठन्ति। चटे इत्येके। जठज्वरः। जेटतुः। जझटतुः। शट नृत्तौ। णोपदेशोऽयम्। तत्पर्युदासेन टीतिसवृद्धिकनिर्देशेनावश्यदानार्थस्य चौरादिकस्यैव ग्रहणात्। हट दीप्तौ। हाटकम्। सञ्ज्ञायाञ्चेति ण्वुल्। बाहुलकादक्रियामपि। षठ स्टौ। अजन्तादाप्। लुट विलोडने। अयं दिवादावपि। भाषार्थश्चुरादौ प्रतिघाते युतादौ स्तेयार्थः परस्मैपदिषु। डान्तोऽयमित्येक इति। यद्यपीतः प्रभृति पठत्यन्ताः पवर्गतृतीयान्ता इति कौशिककाश्यपादयो वदन्ति ते चास्मादनन्तरं पिंड हडीति पठन्ति। तथापि पिटक हाटक चेटी विटप्रभृतिषु टवर्गप्रथमस्यैव प्रसिद्धत्वाद्देशान्तरे तन्मतमुपेक्षितम्। चिट। इन्। चेटिः। कृदिकारादिति ङीष्। चेटी। विटः। इगुपधलक्षणः कः। विटः प्रक्षिप्येति। उदाहरन्तीति वक्ष्यमाणेन संबध्यते। इयत्तुरिति। द्वित्वे कृते एरनेकाच इति यणं बाधित्वान्तरङ्गत्वात्सवर्णदीर्घः ॥ ७ ज्ञानो बहुव्रीहिः ॥

तत इयङिति। अचिश्नुधातु इत्यनेन। अभ्यासस्येति तु न। तस्य प्रत्यासत्त्योत्तरखण्डावयवाच्यत्व एव प्रवृत्तेरिति भावः। स्थानितयेति। समानकार्यिकत्वमेव समानाश्रयत्वं न तु समाननिमित्तकत्वम्। इयायेत्याद्यसिद्धेरिति भावः। अत एवेति। अनेन पूर्वमतस्यायुक्तत्वं ध्वनयति। असवर्णेति। तद्घटितसूत्रारम्भसामर्थ्यादित्यर्थः। तेन ह्यभ्यासस्य तर्त इयङ्। केचित्तु वार्णादाङ्गं बलीय इति दीर्घं बाधित्वा यण्। न चेह समानाश्रयत्वं नास्तीति वाच्यम्। अभ्यासोत्तरस्य इकारस्य सवर्णदीर्घयणौ प्रति। स्थानितया तयोः समानाश्रयत्वात्। अत एव दीर्घ इणः कितीति दीर्घो विधीयते। न तु णल्यतोः अभ्यासस्येयङ् दुर्लभः। तस्मिन्कर्तव्ये ऽचः परस्मिन्निति वृद्धिगुणयोः स्थानिवद्भावेनासवर्णे इति प्रतिषेधादिति चेन्नैवम्। असवर्णग्रहणसामर्थ्यादेव स्थानिवत्त्वस्याप्रवृत्तेः। ननु नास्ति सामर्थ्यम्। इयर्ति। इयत इत्यादौ सावकाशत्वादिति चेन्नैवम्। न ह्येकमुदाहरणं योगारम्भं प्रयोजयति। अन्यथा हि अभ्यासस्यार्ताविति ब्रूयात्। अकृत्सार्वेति दीर्घः। ईयात्। मडि भूषायाम्। मण्डते इति विभागे गतम्। कुडि। टवर्गतृतीयान्तः। प्रथमान्त इत्येके। मुठाडान्त इत्येके। पकारादिडान्त इत्यन्ये। क्षीरस्वामी तु द्वावपि इदितौ पपाठ। तुडि। तुदेति दुर्गः। तुड तोडने। तोडनं दारणं हिंसनञ्च। गडि वदनैकदेशे। टवर्गीयप्रकरणादिहायं न्याय्य एव। अन्तस्थादिषु पञ्चतेन तिङि षय इति केषांचिन्मतं दूषयितुं वृत्तिकृद्भिरुपन्यस्तः। लिङ्सिचावात्मनेपदेषु। अत्रात्मनेपदग्रहणं सिचो विशेषणं न तु लिङः ऽसंभवात्। तदाह। आत्मनेपदपरः सिजेति। नपृ कम्पने च। अस्य पूर्वत्र पाठस्त्यक्तुं शक्यः। केचित्तु पूर्वत्रादिपृ देपृ इति पठन्ति। केपृ। मतौ चेति पृथक्पाठसामर्थ्याद् द्विर्लभ्यत इति स्वामी। मेपृ रेपृ लेपृ गताविति। अयं पाठः स्वामिनः। मैत्रेयस्तु नेपृ लेपृ सेचने। रेपृ प्लवगतावित्याह। हेपृ धेपृ इत्यपि केचित् ॥ ७ ज्ञापनेन तूत्तरखण्डादेशस्य तत्कार्यप्रतिबन्धकीभूतं स्थानित्वं नेति ज्ञाप्यते ऽतत एवारिरिप्रियादित्यत्र स्थानिवत्त्वेनेयङ् भवत्येव। तस्याभ्यासकार्यप्रतिबन्धकत्वाभावादिति भावः। अभ्यासस्यार्ताविति। यङ्लुकि तु श्तिपा शपेति निषेधान्नित्यत्वान्न दोषः। वस्तुत ऋ इत्येव वक्तव्यं योरित्यनुवर्तते। गुणो यणिति साहचर्याद्व्याख्यानाच्च ऋधातोरेव ग्रहणम्। अर्तेरिवर्णस्येयङित्यर्थ इत्युचितम्। विस्तरस्त्वन्यत्र द्रष्टव्यः। असम्भवादिति। तस्यात्मनेपदपरत्वासंभवादित्यर्थः ॥

मद्भास्करइति।अन्येतुत्रीण्यम्बकानिनेत्राणियस्येतितद्युत्पत्तिमाहुः।उचितमिति।पदलाघवादितिभावः।परन्तुनकृतमनुदात्तङितइत्यादौतदनुवृत्तयेधातोःकर्मणइत्यादौधातुपदार्थसन्देहनिवृत्तयेचेतिशेषः।उपदेशग्रहणानुवृत्तेरिति।एकदेशेस्वरितत्वप्रतिज्ञानादितिभावः।तत्रकस्योपदेशइत्याकाङ्क्षायामुपस्थितत्वादार्धधातुकइत्यस्यविभक्तिविपरिणामेनसंबध्यतइतिबोध्यम्।वार्त्तिककृतेति।स्यसिच्सूत्रेवधभावात्सीयुटिचिण्वत्त्वंविप्रतिषेधेनेतिवदतेत्यर्थः।अन्यथाआदेशानामन्तरङ्गत्वेनविप्रतिषेधासङ्गतिःस्यादितिभावः।

स्यपल्यूलनेनवासः पल्यूलयेयुरितितैत्तिरीयाणांसंहिता।पल्यूलनंशोधनद्रव्यमितिभाष्यम्।ऊनपरि।अस्माण्णौचङिनशब्दस्यद्वित्वमिष्टन्तद्दुर्लभम्॥ ७ वव्याख्यानंन।पित्स इ
वइतिबोध्यम्।सोत्तव्याख्यानफलन्तुउच्चारणार्थानामित्संज्ञात्वबोधनमेव।धात्वन्तरेति।षान्त्वसामप्रयोगेइत्यस्यस्थानेषामसान्त्वप्रयोगेइतिपठतांमतेनेदम्।पल्यूलेति।द्वावपिपवर्गीयौ।शोधन

इत्यक्षितिसात्वकोतिप्रसिद्धम् ॥

द्वित्वात्परत्वादिति।अन्तरङ्गत्वादित्यर्थः।उक्तार्थेज्ञापकमिति।उर्दु ऋजु अञ्जु प्रभृतिभ्यआचारक्विबन्तेभ्यः सनोनभिधानञ्ज्ञापकपरभाष्यप्रामाण्यादितिभावः।उडुडावयिषतीति।दूंद्व्याख्याद्
र्शोक्तत्वादुदाहृतन्नत्वाचारक्विबन्तानिजादिस्त्विष्टदन्तंमानमस्ति।केचित्तुचुलुम्पादिवदुडुवतिराकाशगमनानुकूलव्यापारार्थकोधातुः।पक्षिणंउडावयतीत्येवंलोकव्यवहारादितिव
द्वित्वात्परत्वादल्लोपात्।नचद्विर्वचनेऽचीतिसूत्रेणद्वित्वकर्तव्येअल्लोपस्यस्थानिवद्भावोनिषेधोवेहलभ्यते।णिचोद्वित्वनिमित्तत्वाभावादतआह।ओःपुयणित्यादि।णिचोद्वित्वनिमि
त्तत्वाभावेपितन्निमित्तकस्याजादेशस्यनिषेधःस्थानिवत्त्वंवातिदेशेनसाध्यते।लिङ्गञ्चओःपुयण्जीति सूत्रमितियथाश्रुतग्राहिणः।तेषामयमाशयः।तेनहिसूत्रेणविभावयिषति।
लिलावयिषतिजिजावयिषतीत्यादावभ्यासोवर्णस्यत्वंविधीयतेतज्ज्ञापिच्वेवपवर्गयणजानामवर्णपराणान्तत्रैवसंभवादिति।नत्वेतद्युक्तम्।पिपविषते।पिपविषतीत्यत्रसूत्र
स्यचरितार्थत्वात्।तथाहिपूङोयौतेश्चसनिस्मिपूङ्रञ्ज्वशामितिसनीवन्तर्धेतिचसूत्राभ्यामिट्कृतेद्विर्वचनेऽचीतिसूत्रस्यप्रवृत्तौह्रस्वाभ्यासेउकारः।तस्मात्संपूर्णसूत्रस्यज्ञापक
त्वोक्तिरसङ्गता।अतआह।वर्गप्रत्याहारेत्यादि।अबीभवत्।अमीमवत्।अरीरवत्।अलीलवत्।अजीजवत्।बिभावयिषतीत्यादिसिद्धिर्हिवर्गादिग्रहणस्यफलंवाच्यम्।सातत्राभ्या
सेउवर्णस्यदुर्लभत्वात्।अकारस्यसत्त्वेतदुक्तौचेन्नरूपसिद्धेश्चदुरुपपादम्।अतोवर्गादिग्रहणंव्यर्थंसदुक्तार्थेज्ञापकमित्यर्थः।ज्ञापनफलंतुयत्रओःपुयणित्यस्याप्राप्तिस्त
त्रबोध्यम्।तद्यथा।चुक्षावयिषति।उडुरिवाचरतिउडुवति।ततोणौसन्।उडुडावयिषति।चङि।औडूडवत्।नुनावयिषति।अनूनवत्।ऊर्णुनावयिषति।और्णूनवत्।पुस्फारयिष
ति।अपुस्फुरदित्यादि।तदेतत्सकलमभिप्रेत्यभगवताकात्यायनेनोक्तम्।ओःपुयण्जिषुवचनंज्ञापकंणौस्थानिवद्भावस्येति।यतश्चालिनातुल्यजातीयस्यज्ञापकमितिपवर्गादे
रन्यस्मिन्नपिहल्यवर्णपरएवस्थानिवत्त्वमित्यचिकीर्षदित्यादौनातिव्याप्तिरितिसिद्धान्तितम्।अत्रावर्णपरत्वंकिंणित्त्वप्रवृत्तिवेलायांविवक्षितम्।किंवापरिनिष्ठितेरूपे।नाद्यः
पुस्फावयिषतीत्यादौतदभावात्।नद्वितीयः।औनूनवदित्यादौतदभावादित्याशङ्क्याह।प्रक्रियायामित्यादि।क्वचिदवर्णपरत्वंविवक्षितम्।नत्वमुकत्रैवेत्याग्रहेबीजमस्तीतिभावः ॥
दन्ति।सिद्धान्तितमिति।तथाचभाष्येउक्तंओःपुयण्जिषुवचनंज्ञापकंणौस्थानिवद्भावस्यप्रत्येतत्ज्ञाप्यतेःचिकीर्षदत्रापिप्राप्नोतितुल्यजातीयस्यज्ञापकम्।कश्चतुल्यजातीयोयथाजातीयकाःपु

यणञ्जपः कथंसजातीयकार्ये तेऽवर्णपरा इति ॥

व्यर्थएवस्यादिति।उवर्णादेशत्वाभावेनतत्रतदःप्राप्तेरितिभावः।ननुपरिहारबलादेवोवर्णादेशादस्यर्थलाभस्तथाहिज्ञापकस्यसजातीयापेक्षत्वेनप्रुयण्जीनांपरिनिष्ठितरूपेस्वोवर्णादेशावर्णपरत्वस्यसंभवेनतद्भाष्यतस्तदर्थलाभइत्यरुचेराह।किंचलोपइति।भाष्यस्थानर्णेत्यस्यतथालाक्षणिकतयाव्याख्यानेनमानमित्यपिबोध्यम्।नन्वभ्यासात्पूर्वंसन्नियोगशिष्टन्यायेनलोपाऽप्रयत्तुप्राचाकेचिदेवमाहुरित्यादिनाउवर्णादेशस्यस्थानिवत्त्वान्नान्यत्रेतिमतमुपन्यस्तम्।तन्नकेचिदित्युक्त्यैवदुर्बलत्वंस्पष्टंअवगम्यते ।तद्बीजन्तुभाष्यादिविरोधएव।तथाहि।अस्मिन्पक्षेअचिकीर्तदित्यादौस्थानिवत्त्वप्रसङ्गएवनास्ति।उवर्णादेशत्वाभावात्।तथाचोत्तरभागेअवर्णाभावादितिभाष्यकारोक्तःपरिहारोव्यर्थएवस्यात्।किंच।लोपःपिबतेरित्सूत्रेअपीप्यदित्यत्रपिबतेर्णौयुकिचङिउपधालोपेवतस्यस्थानिवत्त्वात्।पापूशब्दस्यद्विरुक्तिरितिरत्नग्रन्थोविरुद्ध्येत।अपिच।पूर्वत्रासिद्धमितिसूत्रेकाशियांवहेःक्तान्ताण्णिचिचङिऔजढदित्युदाहृत्यतच्चिन्त्यमस्तुऔजिढदित्युक्तम्।तत्रैवन्यासकृताणौकृतस्यटिलोपस्यस्थानिवद्भावइतिव्याख्यातन्तदुभयंविरुद्ध्येत।किंचयुक्तिकायुष्कजङ्घावक्षाणिमानौजदत्तयेतिवैयाघ्रपद्यवार्त्तिकमपिविरुद्ध्येतेतिदिक्।यत्तुप्राचोग्रन्थंव्याचक्षाणैर्हरदत्तकाशिकाकारैस्तमुदाहृत्यत्रिमुनिमतमुत्तरपक्षयन्नाहकेचिदेवमाहुरिति।एवंवक्ष्यमाणंकेचिद्भाष्यतत्त्वविदद्दित्यादितत्सर्वंवोपदेवग्रन्थस्वहाजाद्यप्रवृत्तप्रमादग्रन्थमूलकमितिमूलाशुद्धेरेवोपेक्षणीयम्।तथाहि।वोपदेवेनकाम्यकामधेनौअङ्कधातोर्णिच्यल्लोपेचङिस्थानिवत्त्वात्कशब्दस्यद्वित्वेआञ्चकदितिरूपमेकीयमतत्वेनोपन्यस्यमुनित्रयविरुद्धमितिदूषितम्।द्विर्वचनेऽचीतिहिपाणिनेःसूत्रम्।तच्चद्विर्वचनपदादृस्याकात्यायनेनव्याख्यातम्।तथातुष्ठावयिषतीत्यादावव्याप्तिस्तेनैवओःपुयण्जीतिज्ञापकबलेनपरिहृता।पतञ्जलिनाचावर्णपरएवहलिस्थानिवत्त्वमित्याश्रित्यातिव्याप्तिरुद्धृता।एवञ्चवदताउवर्णादेशस्यैवस्थानिवद्भावोभिप्रेतः।किंचकात्यायनेनोक्तपूर्वविप्रतिषेधखण्डनपरभाष्यस्वरसेनाप्ययमर्थोलभ्यते।षाष्ठद्वित्वप्रकरणान्तेहिपूर्वविप्रतिषेधःपठ्यते॥ उक्तेःसाऽसङ्गतैवेत्यरुचेराह।अपिचेति।ननुपूर्वैरुक्तिग्रन्थोप्यसङ्गतोस्त्वित्यतआह।किंचयुक्तिकेति।इदञ्चपूर्वत्रासिद्धमित्यस्यप्रयोजनकथनपरम्।तत्राद्येनिष्ठाकत्वस्यासिद्धत्वादुदीचामातइतिविकल्पाभावः।द्वितीयेनकोपधायाइतिपुंवत्वनिषेधाभावः।इदञ्चिन्त्यम्।कोपधप्रतिषेधेतद्धितवुग्ग्रहणात्।तृतीयेनिष्ठानत्वस्यासिद्धत्वान्मतोर्मस्यवत्वाभावः।क्षामशब्दादिनन्तान्मतुप्अन्त्येकुहोश्चुरित्यस्यप्रवृत्तिः।इतिवदतोवर्णेति।
२२तिग्रन्थवदयं

[illegible] ॥

यार्त्तिकाशयइति। यियविषतइत्याद्यर्थवचनावश्यकतोभयोरपिसमा। वार्त्तिकस्त्वद्विर्वचनेचीत्यस्यानुमानिकस्यचखण्डनतात्पर्यकन्त्वविरुद्धंस्यात् तन्नातोलोपस्याऽगुणनादितिभावः। ओदौदादेशस्येत्यत्रसमानाधिकरणबहुव्रीह्यङ्गीकारेचुक्षावयिषतीत्यादौदोषः स्यादतआह। ओदौतोरिति। इदञ्चवचनमुत्तरस्यातइत्युत्तरं पाठ्यन्तेनोदितिना पूर्वमितिबोद्ध्यम्। फलान्तरद्विर्वचनंयणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यइति। तथाचदध्यत्रेत्यादौसावकाशोयण् चयनञ्चायको। लवनम्। लावकइत्यादौचायवायावः। गौदःकम्बलः इत्यादावाल्लोपः। श्नेघ्नघ्नइत्यादावुपधालोपः। कारणाहारणेत्यादौणिलोपः। निपूर्त्तइत्यादावुत्वञ्चेत्येतानिनव। विभिदतुरित्यादौसावकाशेनद्वित्वेनपूर्वविप्रतिषेधाद्बाध्यन्ते। तेनचक्रतुश्चिचायलुलाव। चिचयिथ। लुलविथ। पपतुः। तस्थतुः। जग्मतुः। जघ्नतुः। आटिटत्। ततुरिर्जगुरित्यादिसिद्धम्। एवञ्चद्विर्वचनेचीतिसूत्रंनारम्भणीयमितिवार्त्तिकाशयः। भाष्यकारस्त्वाह। उक्तरीत्याचक्रतुरित्यादिसिद्ध्यतुं । चुक्षावयिषतीत्यादौत्वन्तरङ्गत्वाद्व्यादौकृते अभ्यासेइत्वंस्यादेतन्नह्यन्तरङ्गेणसहविप्रतिषेधः। अतुल्यबलत्वात्। तथाचत्वयेत्थंवचनंकर्त्तव्यं। ओदौदादेशस्यचुटुतुश्रादेरभ्यासस्यातउद्भवतीति। ओदौतोरादेशोयस्मिन्नङ्गे तस्ययोऽभ्यासः चुटुतुशरादिस्तदकारस्योत्त्वादित्यर्थः। चुक्षावयिषति। उड्डावयिषति। तुतावयिषति। ऊर्णुनावयिषति। युयावयिषति। पुस्फारयिषतीत्यादि। एवञ्चसूत्रमतमेवप्रबलमिति। एवंवदतोभाष्यकारस्यओजढदाञ्चकदित्यादावभ्यासेऽकारोयदिसम्मतः स्यात्तर्हितदर्थंयत्नान्तरमास्थेयमितिवार्त्तिककारंप्रतिगौरवान्तरङ्गंयनापादयेत्। तस्मादल्लोपस्यस्थानिवत्त्वंभाष्यकाराणामनभिमतमितिनिर्णीयते। वामनादयस्तुमहाभाष्यविसंवादादुपेक्ष्याइति। एतच्चसर्वंबोपदेवग्रन्थपर्यालोचनयापर्यवस्यतीतिसत्यमेवकिन्तुबोपदेवस्यैवेहमहान्प्रमादः नतुवामनादीनाम्। तथाहि। यत्तावदुक्तं अवर्णपरस्यहलिस्थानिवत्त्वंवदताउवर्णादेशस्यैवतदभिप्रेतमिति। तन्न। आञ्चकदित्यादावपिद्विरुक्तौप्रक्रियादशायामभ्यासोत्तरखण्डेऽवर्णस्यसुलभत्वात्। ननुनासौप्रयोगेसमवैतीतिचेत् किन्ततः। नहिप्रयोगसमवायित्वम् ॥

म्। वचनान्तरकरणरूपम्। भाष्यकाराणामिति। ज्ञापकस्यसजातीयापेक्षत्वात्सूत्रकारस्याप्यसंमतमितिबोद्धव्यम् ॥

विशेषणंभाष्येदत्तमिति।अपूर्वतद्दानेतुगौरवमितिभावः।ओः पुयण्जिष्वित्यत्रओरित्युक्तिसुसूत्रैकदेशग्रहणान्नाधिके इति नतद्बलेनकुकल्पनाभिनिवेशः कार्यइतिबोध्यम्।विशेषणादानेच परिनिष्ठितरूपार्थशास्त्रारम्भेणतत्रत्यावर्णपरत्वमिवप्रक्रियादशायांशास्त्रप्रवृत्यातत्रत्यस्यापिग्रहीतुमौचित्येनवार्तिकेपुस्फारयिषतीतिसिद्धयेचुटुतुशरादित्वस्यैवावर्णपरत्वस्याप्यऽनियतस्यैवग्रहीतुमौचित्येनचविनिगमनाविरहेणसर्वत्रप्रवृत्तिरित्याह।एवञ्चेति।बहवइति।निन्यतुरित्यस्यसिद्धयेइयङ्पाठः कर्त्तव्योजग्लावित्यादिसिद्धयेवृद्धिपाठःकर्त्तव्यइत्येवंरूपाइत्यर्थः। अन्यानप्याह।तद्यथेति।आल्लोपादीनामिति।यणोपिनित्यतानोह्या।आरम्भणीयत्वादिति।इष्टानिष्टविवेकस्यलक्षणैकचक्षुष्कैर्वचनमन्तरेणज्ञातुमशक्यत्वादितिभावः।सुतरामिति।नित्यबाधाये विशेषणंभाष्येदत्तम्।एवञ्चनुनावयिषतीत्यादौद्वित्वप्रवृत्तिवेलायामवर्णाभावेपिपश्चाद्भाविनन्तमाश्रित्ययथास्थानिवत्त्वादिकंप्रवर्त्ततेतथेहपश्चात्तद्विरहेपिप्रक्रियादशायान्तत्त्वादितिनकोपिदोषः।एतच्चसुध्यातुरत्तौकीर्त्तयतेर्धातुवृत्तौचमाधवग्रन्थेस्पष्टम्।यदप्युक्तंवार्त्तिकदूषणपरभाष्यस्वरसोत्रमानमिति।तदपिन।भाष्येहिदूषणदिङ्मात्रमुक्तम्।नतुदूषणान्तरंनास्तीति।तथाहि।बहवस्तत्रदोषाः।तद्यथाविप्रतिषेधएवतावदयुक्तः।आल्लोपादीनांनित्यत्वात्।द्वित्वस्यानित्यत्वेनातुल्यबलत्वात्।किंचपूर्वविप्रतिषेधेसर्वत्रवचनस्यारम्भणीयत्वादिहतुसुतरान्तथेतिकृलाघवम्।अपिचक्रियमाणंवचनंनित्यानित्यान्तरङ्गानपिबाधेत।ततश्चनिनवनीषिषतिदिद्वनीषिणतीत्यादावप्यभ्यासेउकारःश्रूयेत।यदितुओदौदादेशस्येत्यादिवचनङ्गत्वातदेवान्तरङ्गाणामबाधेज्ञापकंब्रूषेतर्हितदेववचनंनिनवनीषिषतीत्यादावपिप्रवर्त्तेतेतितद्दूषणतादवस्थ्यम्।तद्वारणायचयत्नान्तरमास्थेयम्।एवंस्थितेओजढदित्यादावभ्यासेअकारादेशोविधेयःस्यादित्यपिवार्त्तिकमतेदूषणान्तरमस्तु।तस्मादित्थंवार्त्तिकंस्वयमूहनीयम्॥ ७७ त्यर्थः।एकाचःप्रथमस्येत्यादिनासिद्धित्वापेक्षयाजणादीनामन्तरङ्गत्वात्तद्बाधायेत्यपिबोध्यम्।यत्नान्तरमिति।अभ्यासविशेषणंसनीतिपूरणीयम्।तेननिर्दिष्टपरिभाषयाऽनेकव्यवधानेनदोषइतिभावः।किंचजोःसौत्रान्नुणिचिसनिलुङिचजिजावयिषति अजीजवदित्यत्रौदौदादेशस्येत्यनेनाभ्यासेउत्वापत्तिस्तदर्थमोःपुयण्जिष्वित्यत्रजग्रहणंकार्यम्।नचतत्रवचनेचकारएवपठनीयोनतुशब्दइतिवाच्यम्।गुङ्घुङ्भ्यांणिचिचङिसनिचाऽजूगवदित्यादौदोषापत्तेः।किञ्चाऽभ्यासविशेषणेसनीतिकृतेपितुनावयिषतीत्यादौवारितार्थ्येनतुष्टवयिषतीत्यादावनापत्तिः।षकारेणाधिकेनव्यवधानादितिबोध्यम्।एवंस्थितइति।दोषपरभाष्यस्यउपल

ष्णत्वावश्यकत्वेइत्यर्थः ॥

णिचइति।उपलक्षणंणिङोपितेनाक्षस्वदितिसिद्ध्यति।श्रोत्रियाः।यथाश्रुतग्राहिणः।अजन्तस्येति।जकारान्तस्यास्ट्क्षणपवर्गपरभिन्नस्येत्यर्थः।तन्नसन्यतइत्यनेनैवसिद्धेरितिभ
ओदैदादेरास्यतुइतुशदादेरभ्यासस्योत्वमिति।ततःअज्झोपवतोणिचोन्।अज्झोपवतोङ्गस्याभ्यासस्यणिचोःत्यात्।औजढत्।आञ्जकत्।एवंस्थितेवामनन्यासकारादिग्रन्थाःवै
याघ्रपद्यवार्त्तिकञ्चभाष्याविरोधेनसमर्थितंभवति।सरस्वतीकण्ठाभरणग्रन्थोप्यत्रैवानुकूलः।यद्यपिवोपदेवेनोक्तंवैयाघ्रपद्यवार्त्तिकेऔजिढदित्येवपाठःसांप्रदायिकः
।श्रोत्रियास्तुप्रमादाज्जिस्थानेजंपठन्तीतितदप्येतेनप्रत्युक्तम्।उक्तरीत्यासर्वसौष्ठवेश्रोत्रियाणांप्रमादइत्यस्यैवप्रामादिकत्वात्।यद्यपिबोपदेवेनसोकेर्थैउपष्टम्भक
तयोपन्यस्तम्।दुर्गगुप्तेनदुर्गटीकायांत्रिलोचनदासेनकातन्त्रपञ्जिकायांवर्द्धमानमिश्रेणकातन्त्रविस्तरेहेमसूरिणाहैमव्याकरणे।एतच्चज्ञापकंसज्ञान्तस्यापवर्ग
परस्यावर्णएववेदितव्यमितिप्रदर्शितमिति।अभिनवशाकटायनेनशब्दानुशासनेणिचनिमित्तावपिप्राग्दि।तच्चावर्णपरइतिप्रदर्शितमिति।तदेतत्सर्वंवामनादीनां
प्रतिकूलम्।प्रक्रियादशायामवर्णपरमस्तीत्युक्तत्वात्।तस्मात् अञ्जकदित्येवन्याय्यमितिस्थितम्।यत्तुअदन्तेषुऊनधातोर्माधवीयधातुवृत्तौनोनयतिध्वनयती
तिसूत्रेकाशिकापदमञ्जर्योरुभयोरौनिनदित्यभ्यासइकारसहितइञ्श्लिष्यते।तत्सर्वंलिपिप्रमादप्रयुक्तमेव।स्थलान्तरस्थग्रन्थमाधववामनग्रन्थविरुद्ध
त्वात्।तदेतत्सकलमभिप्रेत्याह।प्रकृतेत्विति।औननदिति।नोनयतिध्वनयत्येलयत्यर्दयतिभ्यइतिचङ्निषेधस्तुनेहकृतः।तद्गुणेच्छन्दसीतिपूर्वसूत्राच्छ
न्दसीत्यनुवृत्तेः।तस्योदाहरणन्तुमात्वायतोजरितुःकाममूनयीः।मात्वाग्निर्ध्वनयीदूमगन्धिरित्यादि।अत्रसिचिवृद्धिर्न। ह्म्यन्तेतिसूत्रेण्यन्तेतन्निषेधात्।यत्तु
प्राचाइममपिलोकइत्युपनिबद्धम्।यच्चव्याचख्युःछन्दसीतिनानुवर्त्ततेविभाषाधेट्श्व्योरितिविभाषाग्रहणञ्चानुवर्त्ततइतितन्न।सूत्रेनजोवैयर्थ्यापत्तेः व
त्वादिसर्वग्रन्थविरोधाच्च।अतएवछन्दसीतिनानुवर्त्ततइतिकेचिदुत्प्रेक्षापिप्रत्युक्ता।तथाचभट्टिः।येनार्द्दिदद्देत्यपुरम्पिनाकीतिप्रायुङ्क्त।अतित्वेनदिति।अनेकाच्त्वेनाषो
पदेशत्वात्षत्वन्न।मृग।मार्गयतिमार्गतीतिमार्गेरावधीयस्य ॥७ वः।इमम्।चङ्तन्निषेधरूपम्।अतएवेति।इत्यादिविरोधादेवेत्यर्थः।एतेननोनयतीतिसूत्रेऊनयत्यादीनांपरस्पर

साहचर्याद्रुरादीनामेवग्रहणम्।आर्दिददितिप्रयोगस्तु
भार्देर्हलुमण्णावितिपरास्तम् ॥

अकारफलस्येति।गर्ववान् बभूवेत्यर्थे गर्वाञ्चकारेत्याम्रूपस्येत्यर्थः।आकारइति।पक्षपरिग्रहइत्यस्यस्थाने पक्षापरिग्रह इतिपठितं मतद्वयम्।इकारश्चिन्त्यादेः ईकारोरक्षीइत्यस्य उकारोवञ्चुइत्यस्य।तस्यैव पाठान्तरे ऊकारइतिबोध्यम्।ननुवाक्यशेषंसमर्थयिष्यामहे संप्रश्नप्रार्थनेषित्यादिप्रयोगाल्लोपाभावस्यैवकल्पनानुचितेत्यतआह।वस्तुतः सोपिनेअदन्तत्वसामर्थ्यादिति।अयंभावः कथयतिगणयतीत्यादावुपधावृद्धिनिवारणेनाचकथदित्यादावग्लोपित्वाद्दीर्घसन्वद्भावविरहेण सारभामप्रभृतीनामुपधाह्रस्वव्यावर्त्तनेन ग्रहमृगप्रभृतीनामुपधागुणव्यावर्त्तनेन चादन्तत्वंसार्थकम्।गर्वादीनान्तु अदन्तत्वे प्रागुक्तफलासंभवात् णिज्विकल्पोऽनुमीयते।युक्तञ्चैतत्।चिन्त्यतेऽङ्गादित्वंसामान्यापेक्षज्ञापकमितिमतेइहापिअकारफलस्यस्पष्टत्वात् विशेषापेक्षज्ञापकमितिमतेपितत्रतत्रआकारइकारईकारःउकारऊकारश्चेत्यनुबन्धाःयथाज्ञापकतयास्वीकृताः।यथाच अविशब्दनइतिनिषेधः तथा अदन्तताप्यस्तु।एवंसतिमतद्वयेप्येकरूपफललाभात्।यत्तुवोपदेवेनोक्तं अग्लोपित्वंस्थानिवत्त्वंस्थानिवत्त्वञ्चादन्तत्वप्रयोजनम्।यत्रत्वेतेनविद्येतेतत्राल्लोपविकल्पनमिति।अत्रेदंवक्तव्यम्।विकल्पस्तावदनेकदोषदुष्टोनिर्मूलश्च।लोपाभावस्यैवसुवचत्वात्।वस्तुतस्तु सोपिन।अन्यत्र क्लृप्तेनणिज्विकल्पेनैवकृतार्थत्वेऽपूर्वस्यलोपबाधस्यकल्पनायाअन्याय्यत्वात्।यत्तुअदन्तत्वसार्थकत्वायवाल्लोपइतिप्राचोग्रन्थव्याचक्षाणैरुक्तंवाचनिकएवात्रविकल्पइतितद्व्याहतम्।निर्मूलश्चायदिवाचनिकः तर्हिअदन्तत्वसार्थक्यायेति कथमन्वियात्।किंच कस्येदंवचनन्त्वहृलेमवाचनिकतोच्यतइतिनकिञ्चिदेतत्।एवञ्च गर्वापयतइत्याद्युदाहरणमप्यसाध्वेव।अङ्कापयतीत्यादिसुतराम्।अङ्कयतेरकारस्यप्रागुक्तरीत्या आञ्चकारस्याभ्यासे वर्णश्रवणेनकृतार्थत्वात्।एवमर्थापयतेइत्यपि।यत्तुआर्त्तिथयतेति प्राचोदाहृतंतत्तुसुतरामशुद्धम्।आर्त्तथयतेत्यत्राभ्यासेऽकारश्रवणात्।चङ्परेणाविलस्याङ्गंलघुंप्रतिवाविशेषणमितिपक्षद्वयेपिदीर्घोलघोरितिदीर्घस्यदुर्वारत्वाच्च ॥

तिाअल्लोपविकल्पोऽपिनेत्यर्थः।लोपबाधस्येति।पाक्षिकस्येत्यर्थः।अन्यथादादिषपितेणामित्संज्ञाबाधएवस्यादितिभावः।सुतरामशुद्धमिति।पुकोभ्यासेह्रस्वस्यचासङ्गतेरितिभावः।तदुपपादयति।आर्त्तथतेत्यत्रेति।आकारश्रवणादिति।तस्माद्धेतोरल्लोपबाधेमानाभावेनपुकोदुर्लभत्वमितिभावः।आर्त्तथयतेतिक्वाचित्कोपपाठः।अभ्यासेह्रस्वासङ्गतिमाह॥चङ्परेइति ॥

आवश्यकत्वादिति।तेनोनधातौअल्लोपस्यैवाङ्गीकारादिति भावः।वृद्धाविति।परत्वादिति भावः।व्यवधानमिति।एवञ्चङ्परणिपरलघुपरत्वासंभव इति भावः।भाष्यसम्मते पक्षे दोषोऽस्त्येवेति शङ्कते।चङ्परे इति।इति गृहाणेति।द्विःप्रयोगपक्षेऽनादिष्टादचः पूर्वत्वमस्त्येवेति यदि तदाभ्यासस्य कार्ये कर्त्तव्ये धात्ववयवादेशस्य तत्रातिबन्धकस्थानिवत्त्वं नेत्यर्थस्याभ्यासस्यासवर्ण इति सूत्रस्यास यदपि व्याचख्युः।हलादेरित्युक्ते नैदीर्घ इति तदपि न।हलादेरित्यस्य निर्मूलतया उक्तत्वात्।नन्वेवं गयत्र हि रुच्यते इति माधवोक्तरीत्या नेह दीर्घ इति चेन्न।तन्मते अल्लोपस्यावश्यकत्वादिति दिक्।परत्वाद्वृद्धाविति।लोपः शब्दान्तरप्राप्त्या अनित्यः।वृद्धिरनित्येति तु स्पष्टमेव।उभयोरनित्ययोर्वृद्धौ कृतायामौकारस्यावादेशात्पूर्वमेव परत्वाद्वर्णादाङ्गस्य बलीयस्त्वाच्च औलोप इत्यर्थः।एवञ्चानग्लोपित्वाद्दीर्घसन्वद्भावौ स्तः।न च टिलोपस्य स्थानिवद्भावेन व्यवधानं शङ्क्यम्।तथाप्यङ्गस्य णिच्परत्वानपायात्।चङ्परे णौ यल्लघ्विति पक्षे कथमिति चेत् अभ्यासस्यादिष्टादचः पूर्वत्वेन स्थानिवत्त्वमेव नास्तीति गृहाण।अत एव मुण्डमिश्रेति सूत्रे हलिकल्योरदन्तनिपातनं भाष्यवार्त्तिकयोराश्रितमिति भावः।वृद्धेर्लोप इति।शब्दान्तरप्राप्तौ सत्यामपि कृताकृतप्रसङ्गित्वमात्रेणेह नित्यत्वं स्वीक्रियते।भुवो वुको नित्यत्वादित्यत्र यथेति भावः।इह भाष्यद्वयस्य परस्परविरोधे परत्वाद्वृद्धिरिति मुख्यः पक्षः।वृद्धेर्लोपो बलीयानिति तु प्रौढिवादमात्रमिति हरदत्तः।तद्विपरीतं कैयटः।भाष्यद्वयप्रामाण्याद्वृद्धेः पूर्वं पश्चाद्वा कामचारेण टिलोपे रूपद्वयमपि साध्विति मतान्तरम्।मतत्रयमपीदं सुधातुरत्रै माधवेनोपनिबद्धम्।अयञ्च मतभेदो णिजभिन्नविषयः।णेर्णिचि तु ण्यल्लोपाविति पूर्वविप्रतिषेधान्निष्कर्षरीत्या अपवादत्वाद्वा प्रागेव णिलोपः।उपधाह्रस्वत्वे सन्वद्भावदीर्घयोश्च णेर्णिचीत्युपसंख्यानात्।ण्याकृतिनिर्देशाद्वा अवीवददित्येव रूपमित्यवधेयम्।लडर्थे त्विति।तेन ण्यन्ताद्भावकर्मणोर्भूतभविष्यतोर्द्वित्वबहुत्वयोश्च प्रत्ययाः सिद्ध्यन्तीति भावः।कंसवधमाचष्टे इति।ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात्कंसवधशब्दः कृदन्तः।ततो णिच्।अप्रत्ययस्य लुक्।तस्यैव या प्रकृतिः हन् इति तस्या विकारपरित्यागेन स्वेन रूपेणावस्थानं तदेतदाह।अहन् इति ॥

वर्णग्रहणेन ज्ञापनान्न दोष इत्यवधेयम्।आश्रितमिति।एतदर्थज्ञापनार्थमेवेति भावः।न च यथेष्टं नामधातुष्विति द्वितीयस्य द्वित्वेऽकललदित्यभ्यासेऽकारश्रवणार्थं तच्चरितार्थम्।एकाचत्र यसन्निधान एव यथेष्टमित्यस्य प्रवृत्तेरित्यन्यत्र निरूपितम्।रूपद्वयमपीति।लक्ष्यभेदेनेति भावः।ण्याकृतीति।ते प्राग्धातोरित्यत्र गत्याकृतिनिर्देशवदिति भावः ॥

नतुलुप्यमानंस्यकृतइति।तथासतितत्प्रकृत्यर्थेयादृशंकारकन्तादृशंणिच्प्रकृत्यर्थे पीत्यर्थः।स्यात्सचदुष्टः कंसंङ्घातयतीत्यत्रषष्ठ्यायत्तेस्तदाह।तथासतीति।अतिदेश
द्वयेनापीति।प्रकृतिवत्कारकमित्येतावतापिधातावनन्तर्भूतत्वबोधनद्वारातद्रहितणिजन्तस्यधातुत्वेनतयोःसिद्धिःकार्यातिदेशेननतयोःसिद्धिस्तुस्पष्टैवेतिभावः।असङ्कीर्णेति।द्वितीया
दिकङ्कारकातिदेशस्यफलं।णिचोधातुप्रत्ययत्वाभावात्कुत्सत्वादिकार्यातिदेशस्यफलमितिभावः।द्वितीयादिकमित्यादि।शब्दार्थौदेवदत्तेनपाचयतीत्यादौतृतीया।कुत्सत्वादिकमि
त्यितद्गति।हेतुमतिचःप्रकृतेरिति।नतुलुप्यमानस्यकृतः तथासतिहेतुमतसौयादृशन्तस्यातिदेशोनलभ्येतदृश्यतेचसः तथैवभाष्यकारेणोदाहृतत्वादितिभा
वः।इहद्वयमतिद्विष्टङ्कारकङ्कार्यञ्च।तत्राद्यद्विवचनेऽतिदेशद्वयेनापिसिद्धतः।असङ्कीर्णोदाहरणन्तुद्वितीयादिकम्।कुत्सत्वादिकञ्चेतिविवेकः।इहकं
सवधसुभद्राहरणादिनिरूढोपाख्यानएवणिजितिनाग्रहः।किंतुप्रतिपादनमात्रेतेनराजागमनमाचष्टेराजानमागमयति।यद्यपीहस्वप्रकृतौराजाकर्त्तास्तितथा
पिगमेर्हेतुमत्सौगतिबुद्धीतिकर्मीभूतःतद्वदिहापि।राजानमित्यस्यप्रकृतिभागोयद्यप्यन्तर्वर्त्तिन्याषष्ठ्याप्रत्ययलक्षणेनपदन्तथापिनकारश्रवणंभवत्येवार
पातिदेशबलात्।देवदत्तपाकमाचष्टेदेवदत्तेनपाचयतीत्यत्रतृतीयैवभवति।गतिबुद्धीतिनियमेनकर्मत्वापहारेकर्त्तृत्वस्यैवस्थितेरितिदिक्।कर्त्तृग्रहणस्य
फलमाह।नत्विति।कत्रिति।कर्त्तृग्रहणाभावेचक्षुषापश्यतिचक्षयतीत्यादावेवस्यात्।नतुकरिभिरवबध्नातिअवकरयतीत्यादौलोकेइन्द्रियाणामेवकरण
त्वेनसुप्रसिद्धत्वादितिभावः।सङ्ग्राम।सङ्ग्रामेतिप्रातिपदिकंयुद्धार्थकङ्कृञर्थेणिच रमते।अनुदात्तेदिति।भृशादिभ्योभुवीतिसूत्रेकैयटहरदत्ताभ्यान्तथोक्तत्वा
दितिभावः।एतेनास्यानुदात्तेत्वमपाणिनीयमितिमाधवोक्तिःप्रत्युक्ता।नचैवंभाष्योक्तमुपसर्गपृथक्करणज्ञापकंभज्येतेतिवाच्यम्।युद्धेसंग्रामशब्दइत्युक्तैव ॥
त्यादिनाराज

नमगिमयतीत्यादावल्लोपाभावः।प्रातिपदिकमिति।प्रातिपदिकाधिकारादिदंल्भ्यम्।कैयटेति।अवयस्संङ्ग्रामयतेःसोपसर्गादुत्पत्तिंकृत्वा।असङ्ग्रामयतशूरइत्येवमर्थन्नियमार्थेसङ्ग्रामयते

रेविशेषोपसर्गान्नाल्लात्वोऽप्युतौदितिभाष्यग्रुपाद्य
यतेनोत्ताभित्यभिमानः ॥

सामर्थ्यादिति।केवलग्रामशब्दस्यलोकेशुद्धेप्रयोगाभावादितिभावः।सामर्थ्येनसमस्तस्यविशिष्टस्यैवोद्देश्यकोटौप्रवेशात्सनाद्यन्ताइत्यत्रतदादिनियमसत्त्वेपिसङ्ग्रामेति
विशिष्टस्यधातुत्वसिद्धिः।नचेदंणिजर्थमित्यनुबन्धासञ्जनेमानाभावः।तत्करोतीत्येवसिद्धेः।नचास्यसमानोपसर्गत्वङ्ग्रामशब्दार्थस्यक्रियात्वाभावादितिवाच्यम्।सोपस
र्गादित्यस्यसोपसर्गसमानाकारादित्यर्थेनादोषात्।मैत्रेयइति।अत्रारुचिबीजन्तुअनयोरखण्डत्वेनेतद्घटकसुदुरोरुपसर्गसमानाकारत्वेपिपूर्वपदत्वाभावः।अतएव

सामर्थ्यात्तंपूर्वस्यलाभेतद्विशिष्टपाठोज्ञापकइतिभाष्याशयात्।नन्वेवमप्यससङ्ग्रामतेतिनसिद्ध्येत्।।अग्लोपित्वाभावेनोपधाह्रस्वापत्तेरित्याश
ङ्क्याह।अकारप्रश्लेषादिति।।स्तोमश्लाघायाम्।अग्निष्टोमः।अग्नेःस्तुत्स्तोमेतिषत्वम्।सुखदुःखतत्क्रियायाम्।तच्छब्देनसुखदुःखेप्रातिपदिकार्थौनिर्दिश्येते।
प्रातिपदिकाद्धात्वर्थइतिसिद्धेऽनयोःपाठःसोपसर्गात्प्रत्ययार्थइतिमैत्रेयः।रूपरूपक्रियायाम्।निरूपयतीत्यनेकार्थत्वाद्विचारणेयम्।ग्रन्थान्तइति।धातु
पाठस्यान्तेइत्यर्थः।।इतिचुरादयः।। हेतुमतिच।प्रेषणादाविति।आदिशब्दादध्येषणेतत्समर्थाचरणेच।तत्रभृत्यादेर्निकृष्टस्यप्रवर्त्तनाप्रेषणमाज्ञेत्यर्थः।
गुर्वादेराराध्यस्यप्रवर्त्तनाअध्येषणंप्रार्थनेत्यर्थः।तत्समर्थाचरणमपिबहुधा।अनुमतिरुपदेशोनुग्रहइति।तत्रयस्यानुमतिंविनाक्रियाननिष्पद्यते।
सोनुमतिमात्रेणप्रयोजकः।यथाराजावैद्यादिस्तुज्वरितःकषायम्पिबेदि तिउपदेशमात्रेण।यस्तुकेनचिज्जिघांसितंपलायमानंनिरुणद्धिसो
पिहन्तुरनुग्राहकत्वेन।अमीचसर्वेविशेषाअर्थप्रकरणादिगम्याः।सर्वानुगतंप्रवर्त्तनासामान्यंणिचोर्थः।नन्वेवंणिचोलोडादीनाञ्च ।।

दुःखशब्देइदुपधस्येतिषत्वंनविसर्गान्तस्यपदत्वाभावात्।व्युत्पन्नत्वेसुधातोर्दुलधातोःखेन्त्येधात्वन्तस्यविसर्गोबाहुलकात्बहुलमन्यत्रापीतिणिलुगितिबोध्यम्।यदापि
दुःपूर्वात्खनतेर्डेदुःखमितितदापीतएवनिपातनाण्णत्वाभावइतिबोध्यम्।एतेनात्रषत्वमङ्गीकृत्यदुष्खेनेत्यादौणत्वाभावःषात्पदान्तादितिनिषेधादितिजिनेन्द्रादय
स्तत्परास्तम्।। ।।इतिचुरादयः।।अनुग्राहकत्वेनेति।अचेतनोप्यनुग्राहकत्वेनप्रयोजकौ।यथाभिक्षावासयतिकारीषोग्निरध्यापयतीत्यादौ ।।

नपर्य्यायःप्राप्नोतितथापि१

पर्य्यायप्रसङ्ग इति।लोडादिघटितशब्दप्रयोगरूपाप्रवर्त्तनैवप्रवर्त्तनात्वेनलोड्वाच्येतियद्यपिकैयटानुसारेणेदम्।वस्तुतःसमुच्चयप्रसङ्ग एवात्रपूर्वपक्षोऽतएवलोटोक्तला
स्त्रेषणस्यणिज्नेतिसमाधानान्तरपरंभाष्यंसङ्गच्छते।नहिपर्य्यायस्यतथायुक्त्यावारणमितितत्त्वम्।एतेनेष्टसाधनत्वंलोडाद्यर्थइत्यपास्तम्।णिजन्तेतदभावात्।कर्त्तृत्वेनेति।स्व
व्यापाराविष्टत्वेनेत्यर्थः।प्रवृत्त्युपहितेति।प्रयोज्याविष्टप्रवृत्त्यनुकूलेत्यर्थः।प्रवृत्त्याविष्टप्रयोज्यविषयेतियावत्।केवलात्विति।तदनाविष्टप्रयोज्यविषयेत्यर्थः।द्रव्यमात्रस्येति।व्या

पर्य्यायत्वप्रसङ्गः ततश्चएच्छतुमांभवानितिवक्तव्येणिजपिप्रयुज्येतेतिचेन्नकर्त्तुःप्रयोजकोहिहेतुःप्रैषविषयस्तुनाद्यापिकर्त्तृत्वेनावधारितः।तथाचप्रयोज्य
प्रवृत्त्युपहितप्रयुक्तिर्णिजर्थः केवलातुलोडर्थइतिविवेकः।उक्तञ्च।द्रव्यमात्रस्यतुप्रैषेपृच्छ्यादेर्लोड्विधीयते।सक्रियस्यप्रयोगस्तुयदासविषयोणिचइति।
किंचप्रयोक्तृधर्मःप्रयुक्तिर्लोडर्थः।अनियतकर्त्तृकाणिजर्थः।पचेतिहिवक्तेवप्रेरकः।पाचयतीत्यादौतुकर्त्ताभिन्नोपीतिदिक्।अजीजवदिति।जुगतौ॥सौत्रो
धातुर्जुचङ्क्म्येत्यत्रनिर्दिष्टः।त्ववतिश्च।अपरेइत्यनुवर्त्ततेनतुपुयण्जीतिपवर्गजकारयोरसंभवात्।यणःसंभवेप्यव्यभिचारात्तदाह।अवर्णपरेध्वात्वक्षरेइति।
अक्षरशब्दोवर्णपरः।अक्षरन्नक्षरंविद्यादित्युपक्रम्यवर्णञ्चाङः पूर्वसूत्रइतिभाष्योक्तेः।मतान्तरेइति।अङ्ग पत्रहिरुच्यतेइतिमतेचङ् परेणौयल्लघुइति
मतेचेत्यर्थः।यत्तुप्राचोक्तम्।सुध्यातोरनेकाच्त्वसन्त्वद्वावीवेतिकेचिदिति।तत्रानेकाचइत्यंशेकामयतावुक्तोङ्गस्येतिकर्मणिषष्ठीअवयवषष्ठीचेतिव्याख्यानभे
दोमूलमितिबोध्यम्।यत्तुप्राचव्युः।णौयदङ्गंयल्लघुइतिव्याख्याभेदोत्रमूलमिति।तन्न।एवंहिसतिअर्थमाख्यत् आर्त्तीथपदित्यत्रविकल्पोनलभ्येत ॥

पारानाविष्टस्येत्यर्थः।सक्रियस्यव्यापाराविष्टस्य।प्रयोगःप्रेरणा।प्रयुक्तिःप्रेरणा।वक्तेवेति।तादृशशब्दप्रयोगस्यैवप्रेरणात्वादितिभावः।वर्णपरइति।नतुचतुरक्षरयतावाचक्षरलोकयेत्य
नेनाक्षरसमुदायपरोव्याख्यानादितिभावः।इतिमतेचेति।इदमेवभाष्यसंमतमित्युक्तम्।इतिव्याख्याभेदइति।माधवादिकृतइतिभावः।विकल्पोनलभ्येतेति।त्वदभिमतइतिशेषः।तत्रहितै
रूपद्वयमुक्तम्।वस्तुतोऽस्यलुङ्यनभिधानमेवअतएवभाष्योक्तापुडाउक्पक्षयोर्नफलभेदइतिध्येयम्।अस्यचनसुध्यातुत्वे णिचःप्रातिपदिकादेवविधानात्।अतोनानेकाज्ग्रहणक्रमविरोधः

मुख्यसिद्धान्तेति।चङ्परेणौयल्लघ्वित्यर्थरूपभाष्यसिद्धान्तेत्यर्थः।अनेकाचइति।अनेकाचोवेतिमूलग्रन्थेत्यर्थः।दीर्घःस्यादिति।पक्षेदीर्घःस्यादितिभावः।समकक्षत्वमिति।व्याख्याविकल्पे
नसन्वद्भाववैकल्पिकत्वेनेत्यर्थः।दीर्घाभावंनिश्चित्येति।अहलादित्वादितिभावः।परमतेति।भाष्यातिरिक्तमतेत्यर्थः।हलादेरपीति।अनेकाचोहलादेरित्यर्थः।परमोपक्रमेति।अजादेरेवदी
र्घाभावेहितदर्थसिद्धंस्यात्।नान्यथेति।हलादेरपिदीर्घाभावेतद्विरोधःस्पष्टएवेतिभावः।अतिशिथिलत्वेनेति।प्रत्येकातिरिक्तयत्किंचिद्वर्णसमुदायस्यावयवत्वेमानाभावादितिभावः।असङ्ग-

नचमुख्यसिद्धान्तरीत्याइष्टापत्तिः।अनेकाचइतिव्याख्येयग्रन्थविरोधात्।किंचसन्वद्भावेनसहदीर्घोपितुल्ययोगक्षेमः।व्याख्याविकल्परूपबीजसाम्यादितीहैवव्याचख्युः।
एवञ्चऊर्णोतेरपिचङ्परेणौदीर्घःस्यात्।नचेष्टापत्तिः।दीर्घोलघोरितिसूत्रेप्राचाहलादेरितिव्याख्यातत्वात्।अशुद्धमपितद्ग्रन्थंसमर्थयितुंप्रवृत्तैर्व्याख्यातृभिरपितत्रन्याय
सिद्धमिदमित्युक्तत्वात्।तत्रैवचकास्त्यूर्णोत्योःसमकक्षत्वमभिप्रेत्यऊर्णोतेश्चदीर्घाभावंनिश्चित्यचकास्तेर्दीर्घोदाहरणन्तुपरमताभिप्रायेणकथंचिन्नेयमितिस्वयमेवोपसं
हृतत्वाच्च।एवञ्चहलादेरपिदीर्घाभावेसिद्धेहलादेरित्यर्थसिद्धमितिपरमोपक्रमविरोधेनावयवावयवःसमुदायंप्रत्यवयवोनेत्यादितदुपन्यस्तन्यायस्यचातिशिथिल
त्वेनतद्ग्रन्थस्यासङ्गतत्वात्तत्रैवावोचाम॥इदानीन्तुतत्रस्यान्यस्यतदीयग्रन्थयोरेवपरस्परविरोधइतिब्रूमः।यदपिवदन्ति।सन्वद्भवत्यस्मिन्नितिव्युत्पत्त्यासन्वद्भावस्यनिमित्तं
योलघुःसचेतिव्याख्यानात्लघुत्वस्यैवविकल्पोतिदिश्यते।तेनलघुत्वपक्षेदीर्घसन्वद्भावौद्वावपिस्तः।तदभावेतुद्वावपिनेति।तदपिन।निर्मूलत्वात्।नहिप्रागुक्तव्याख्या
भेदेनलघुत्वविकल्पोलभ्यते।वचनन्तुमहतांनास्त्येव।अथाप्यर्वाचीनस्यकस्यचित्स्यात्तर्ह्यतिप्रसङ्गः।अजजागरदित्यत्रापिजाशब्दस्यलघुत्वापत्तेः।ननुप्राप्तविभा
षेयमितिचेन्न।उभयत्रविभाषात्वस्यदुर्वारत्वात्।लाघवपुरस्कारेतुभावतात्पर्यकतालाभेनाप्राप्तविभाषात्वध्रौव्याच्चेत्यास्तान्तावत् ॥

ततामिति।हलादेरित्यस्यार्थसिद्धत्वाभावात्।परस्परविरोधइति।ऊर्णोतेर्दीर्घस्तत्रबलेनवारितोऽत्रचस्वीकृतइत्येवंविरोधइत्यर्थः।प्राप्तविभाषेयमिति।लघुत्वविकल्पइत्यस्यप्रा
प्तह्रस्वविकल्पइत्यर्थइतिभावः।भावतात्पर्यकतेति।प्राप्तविभाषायामभावेतात्पर्येणतत्ज्ञानेचप्रतियोगिज्ञानस्यकारणत्वेनगौरवमितिभावः ॥

तद्वाच्येति। उभयत्रापि णेर्णिच्युपसंख्यानस्य तन्त्रोक्तत्वादितिभावः। अर्वाचीनमत इति। पूर्वान्वयि। तत्परत्वाभावाच्चेति। अभ्यासस्येति शेषः। ततो णिलोप इति। एवञ्चाभ्यासस्यानादिष्टादचः पूर्वत्वमस्त्येवेति भावः। व्याख्याद्वये इति। रूपस्थानिवत्त्वे निषेधे चेत्यर्थः। पृथगुपादानादिति। निमित्तत्वेनोपादानादित्यर्थः। आबाधे चेति द्वित्वे बहुव्रीहिवद्भावे पीति पाठः। कर्मधारयवद्भावे पीति क्वाचित्कः पाठो लेख द्वयोरिति। ह्रस्वदीर्घयोरित्यर्थः। एतच्च प्रकृताभिप्रायम्। अवीवदद्वीणां परिवादकेनेत्यादौ तु सन्वद्भावस्यापि दृष्टमेव पूर्वपक्षसिद्धान्तौ द्रष्टव्यौ। ण्याकृतीति। तथा च णावङ्गस्य चुर इत्यस्य नास्त्यल्लोप इति भावः। यत्तु प्राचा रूपान्तरमुदाहृतम्। अचुचोरदिति। तद्भाष्यविरोधादुपेक्ष्यम्। औन्दिददिति। अत्र प्रसादकृत्। अजादित्वाद्दीर्घो लघोरिति नार्वाचीनमते स्वमते तु स्यादेवेति। एवञ्च वदता आटिटत्। आशिशत् इत्यादौ सर्वत्र सिद्धान्ते दीर्घो भवतीत्युक्तम्। सोयं महान्प्रमादः। चङ्परे णौ यदङ्गं उन्द् अट् इत्यादि तस्येह द्वित्वाभावात् तदीयस्य दीर्घभाजोऽभावाच्च। चङ्परे णौ यल्लघु तत्परत्वाभावाच्च। तदिह माधवहरदत्तकैयटादिसकलमतेपि दीर्घस्योक्तिसंभवाभावे कथं दीर्घ इष्टापत्तिः कृतेति न विद्मः। स्यादेतत्। द्विःप्रयोगो द्विर्वचनं षाष्ठमिति निर्विवादम्। अन्यथा आटिटदित्यादौ णिलोपो न स्यात्। एवं स्थिते द्वितीयप्रयोगविषयीभूतस्याङ्गस्य परं णिचम्प्रति तदादिग्रहणादाटिदित्यङ्गम्। एवञ्च चङ्परे यदङ्गं तदीयो योऽभ्यासस्तस्येति पक्षे कथन्न दीर्घ इति चेत् अत्र वदन्ति। लघोः परे हि दीर्घः। लघुश्चेह णिच् तल्लोपः प्रथममेव प्रवृत्तः। नित्यत्वादन्तरङ्गत्वाच्च वर्णाश्रयत्वाच्च प्रत्ययलक्षणन्नास्ति। स्थानिवद्भावोपि न भवति। अभ्यासस्यादिष्टादचः पूर्वत्वात्। दीर्घविधौ तन्निषेधाच्चेति। अत्रेदं वक्तव्यम्। चङ्मेव लघुमाश्रित्य तर्हि दीर्घोस्तु। किं च णिचः स्थानिवद्भावेपि सुलभः। यत्तूक्तं अभ्यासस्यादिष्टादचः पूर्वत्वादिति तन्न। टिशब्दस्य हि द्वित्वम्। ततो णिलोपः। एतच्च द्विर्वचनेचीति सूत्रस्य व्याख्याद्वयेपि तुल्यम्। यदप्युक्तं दीर्घविधौ निषेधादिति। तदपि न। निषेधस्याष्टमिकदीर्घविषयत्वात्। अत एव हि पूर्वत्रासिद्धीयेन स्थानिवदित्याश्रित्य दीर्घग्रहणं भाष्ये प्रत्याख्यातम्। तस्माद्दीर्घस्य दुर्वारतया नेदं प्रसादखण्डनं सम्यगिति किं तर्हि सम्यगिति चेत् उच्यते। दीर्घो लघोरित्यत्र चङ्परस्य णेः पृथगुपादानात्तदितर एव लघुः कार्यी। तक्रकौण्डिन्यन्यायात्। यथा द्वित्वविधौ रहाभ्यामित्युपादानाद्रेफेतरस्यैव परः कार्यित्वन्तद्वत्। यथा वा नलोपो नञ इति सूत्रे नञ्भिन्नस्यैवोत्तरपदस्य निमित्तत्वादाबाधे चेति द्वित्वे कर्मधारयवद्भावेपि नञेत्यत्र नलोपो नेति हरदत्तादिभिरुक्तं तथेहापि ॥ ७ कप्रमादात्। ननु दधिदानेऽवश्यंप्राप्तेत कस्य विधानादस्परफलस्यैव संज्ञार्थित्वे प्राप्ते निमित्तत्वोक्तेर्बाध उचितः। प्रकृते णिचो लघोरित्यनेन ग्रहणे को न्यायः। अत एव करोतीत्यादौ गुणः अन्यथा तेन न्यायेन कृभिन्नस्यैवार्धधातुकादेर्निमित्तत्वं स्यात्। नलोपो नञ इत्यत्रापि नञो निमित्तत्वं नावश्यंप्राप्तमिति कल्पन्तन्नैतन्न्यायावसरः किं च निमित्तभूतस्यापि प्रत्ययस्य भवामीत्यादावङ्गे प्रवेशो दृष्टस्तथा णिचोपि तदादिग्रहणात्कार्यिकोटौ प्रवेशो दुर्वारः ॥

इत्यरुचेराह। सञ्ज्ञा चेति। उद्धृतत्वादिति। तन्मध्यपतितन्यायाप्रवृत्तेरित्यर्थः। अन्यथा अन्तरङ्गत्वेन प्रथमोपस्थितमादायैवाङ्गत्वं न तु द्वितीयमित्यर्थानङ्गीकारे। किं बहुनेति। तन्मध्यपति
तन्यायाप्रवृत्तेरित्यर्थः। न्यायलभ्येति। विरोधन्यायलब्धतन्मध्यपतितन्यायाप्रवृत्तिरूपेऽर्थ इत्यर्थः। अत एवेति। अङ्गत्वाभावादेवेत्यर्थः। तक्रकौण्डिन्यन्यायेति। अङ्गत्वमङ्गीकृत्य यथाप्रो
दीर्घस्त्वयाऽनेन न्यायेन वारितस्तथेत्यर्थः। परे तु अन्तरङ्गस्य प्रथमोपस्थितस्याभ्यासावयवणिच आनर्थक्यात्प्रत्ययत्वाभावेन तमादायाङ्गत्वं दुर्लभम्। किञ्चैवं प्रतीषिषतीत्यादावित्वाना
पत्तिः प्रत्यासत्त्या सन्निमित्तकाङ्गावयवाभ्यासस्यातस्तेनेत्वविधानात्। अज्झनेति दीर्घस्तु न हनादिसाहचर्येणार्थवदजन्ताङ्गस्यैव तेन दीर्घविधानात्। द्वितीयपक्षे पूर्वभागस्याङ्गत्वे
वस्तुतस्तु आटिटदित्यादौ णिज्निमित्ताङ्गसञ्ज्ञा प्रथमणिचः प्राचीनस्यैव न तु तद्विशिष्टस्य। एकस्यैव हि णिचो द्विःप्रयोगः। तथा चाङ्गसञ्ज्ञाया निमित्तभूतो णिच् कथमङ्ग
[illegible]टौ प्रविशेत्। सञ्ज्ञा वा प्रथमोपस्थितं कथं निमित्ततया न गृह्णीयात्। अन्तरङ्गस्यापेक्षायां बीजाभावात्। न च द्वित्वात्प्रागेव प्रवृत्ताङ्गसञ्ज्ञा तन्मध्यपतितमाद्यणिच
मप्यवगाहत इति युक्तम्। द्वितीये टकारान्तर्भावेण प्रत्ययत इति वैपरीत्यस्यापि सुवचत्वात्। ननु यथोभयत आश्रये नान्तादिवत् विरोधात्तथेहापि प्रत्ययांशेऽङ्गांशे वा तन्म
ध्यपतितन्यायस्याप्रवृत्तिरिति चेत्। सत्यम्। तावतापि त्वदुक्तदोषस्योद्धृतत्वात्। युक्तञ्चैतत्। अन्यथा प्रतीषिषतीत्यादौ द्वितीयसनं प्रति प्राचीनसनन्तस्याङ्गत्वेऽज्झनगमा
मिति दीर्घः स्यात्। किं बहुना जिगीषा जिघांसेत्यादावप्यभ्यासस्य दीर्घः स्यात्। सनः सकारेण विशिष्टस्य द्वित्वे धातोर्द्वितीयभागस्य सनन्तर्भावे हलादिशेषे एकदेशविकृतन्याये
नाभ्यासोत्तरभागस्य प्रत्ययत्वे प्राचीनस्याङ्गताध्रौव्यात्। एवञ्च न्यायलभ्येऽर्थे यदि वो जिगीषायामित्यादिनिर्देशोऽपि लिङ्गं बोध्यम्। अत एवाटिटदित्यादौ लघूपधगुणोऽपि न। अभ्य
सादेव सः। न च णौ चङ्युपधाह्रस्वेन निर्वाहः। तक्रकौण्डिन्यन्यायेन दीर्घस्यैव ह्रस्वस्यापि दुर्लभत्वादिति दिक् ॥ ७ प्यनर्थकत्वात्। अङ्गत्वं तु विकरणविशिष्टेऽनर्थकेऽपि दृष्टमेव। तस्मादेकाचो
द्वे इति सूत्रशेषभाष्योक्तन्यायेनोत्तरमेवमादाय प्राक्तनसमुदायस्यैवाङ्गत्वमुचितं द्विःप्रयोगत्वात्। द्वितीयेऽपि ततो विहितत्वबुद्ध्यनपायात्। न चैवं समुदायस्यैवेति कुतः पूर्वसनमादाय धातोरप्यङ्गत्वेऽ
ज्झनेति दीर्घापत्तिरिति वाच्यम्। तस्यानर्थकत्वात्। आटिटदित्यादौ गुणस्तु बहिरङ्गस्य चङ्निमित्तद्वित्वस्यासिद्धत्वान्न। दीर्घो लघोरिति दीर्घस्तु न। चङ्परे णौ यल्लघु इति भाष्यमते प्राप्तेर्व्यासङ्गा। नत्वेन

दोषादेवासङ्गतम्। यद्वाऽस्मादेव भाष्यप्रयोगाच्चङ्णिनिबन्ध
वलघुत्वग्रहात् इति न दोष इत्याहुः ॥

म·श·
२०३

लावस्थायामिति।द्विलकारकनिर्द्देशादितिभावः।प्रथममिति।द्विलादितिशेषः॥द्वितीयस्येति।एकाचइतिशेषः।अनुवृत्तिर्मास्त्विति।द्वितीयस्येत्यस्यानुवृत्त्यानित्यन्द्वितीयस्येत्यर्थलाभइत्यभिमानः।दकारस्यापीति।रेफस्यतुनिषेधेप्यक्षतिरितिभावः।नचैवमपीति।धातोरादिभूतादचःपरानित्यन्द्वितीयस्यैकाचोवयवभूताःसंयोगादयोन्द्राद्विर्नेत्यर्थादिन्दिद्रीयिषतीत्यादौनदोषः।प्रकृतेचनिषेधाप्रवृत्तिरूपोदोषइतिभावः।पूर्ववर्त्तिमात्रपरमिति।पूर्ववर्त्यचःपरान्द्राद्इत्यर्थः।अवयवपरत्वेहिधातोरादिभूतादचइत्यर्थःस्यादितिभावः।अत्रकेचित्।चन्द्रीयतेःसनिनन्द्राइतिनिअजादेरित्येवेति।नन्द्राइतिसूत्रेअजादेरित्यनुवर्त्ततएवेत्यर्थः।अदिद्रपदिति।ननुलावस्थायामेवाडितिभाष्यकारोक्तपक्षेअजादित्वमस्त्येव।न्याय्यश्चप्रथममट्।परत्वादन्तरङ्गत्वाच्च।सत्यम्।द्वितीयस्येत्यप्यनुवर्त्ततेनित्यन्द्वितीयस्येतितदर्थः।धातुसञ्ज्ञाप्रवृत्तिकालेइतियावत्।एतच्चतदनुवृत्तिसामर्थ्याल्लभ्यते।नचैवमजादेरित्यस्यानुवृत्तिर्मास्त्वितिवाच्यम्।इन्दिद्रीयिषतीत्यत्रदकारस्यापिद्वित्वनिषेधापत्तेः।नचैवमपिचन्दिद्रीयिषतीत्यत्रदोषःस्यादेवेतिवाच्यम्।अजादेरितिहिकर्मधारयात्सप्तमीत्युक्तम्।इहत्वअचइत्येवानुवर्त्यैकदेशेस्वरितत्वप्रतिज्ञानात्।अथवादेरित्यप्यनुवर्त्ततान्तच्चनावयवपरङ्किन्तुपूर्ववर्त्तिमात्रपरंशब्दाधिकाराश्रयणात्।नन्वेवमुत्तरार्थतयाद्वितीयग्रहणस्यसार्थकत्वेस्थितेद्वितीयस्येतिनवक्तव्यंभवतीतिभाष्यंविरुध्येतेतिचेन्न।यत्रसूत्रेपठितन्तत्रमास्त्वितितदाशयात्।कणरणेत्यादि।अत्रप्राचोग्रन्थंव्याचक्षाणाआहुः।अजीहिठदित्यत्रउपधाह्रस्वेएचइकितस्यस्थानिवत्त्वाद्द्वित्वेऽभ्यासह्रस्वदीर्घसुत्वादीति।तन्न।ओःपुयणितिज्ञापकस्यअचिकीर्त्तदित्यत्रातिव्याप्तिवारणायविशेषविषमतायाभाष्येएवस्पष्टत्वेनस्वयमपिप्राक्तथैवंवर्णितत्वेनेहस्थानिवद्भावायोगात्।विशेषश्चावर्णवदुत्तरखण्डत्वंउवर्णादेशत्वंनेत्यन्यइतत्।एतेनस्तौतिण्योरितिसूत्रेसिषेचयिषतीत्यत्रसिचेर्हेतुमण्णौगुणेसनिइटिगुणायादेशयोः ॥ ७ षेधप्रवृत्तौनमानम्।नचसंयोगसञ्ज्ञासूत्रेभाष्येबहूनांसन्निपातेद्वयोःसंयोगसञ्ज्ञायामिन्दिद्रीयिषतीत्यत्रदोषमाशङ्क्यनवाज्विधेरितिसमाहितम्।अचःपरस्यनिषेधविधिरितितदर्थइतितदेवभाष्यंमानमितिवाच्यम्।अजादेरितिवर्त्ततेइतितद्व्याख्यानभाष्येउक्तत्वेनतस्याऽमानत्वात्तस्यभाष्यस्यभङ्ग्याव्याख्यानेनमानमित्याहुः॥

राम:
२०३

णौकृतस्येति।इदंत्वनुसारेण।अभ्यासेत्वसन्नियोगशिष्टोपधालोपस्यद्वित्वोत्तरमेवप्रवृत्तेरिति दिक्।तथैवेति।यक्कानिर्देशएवेत्यर्थः।इतिवदन्तीति।अत्राहुर्दिवऔत्सूत्रस्थभाष्यविरोधकृतयोर्णौकृतस्यस्थानिवत्वेनसिच्शब्दस्यद्वित्वमितिवदन्न्यासकारोऽपिप्रत्युक्तः।अतएवउक्तन्यासबलेनज्ञापकस्यसामान्यविषयत्वम्।अचिकीर्त्तदित्यस्यसिद्धयेअनित्यत्वंशरणीकुर्वन्क्षीरदेवोऽपिप्रत्युक्तः।अजीहिठत्सिषेचयिषतीत्यादिरूपन्तुइकारैकारविशिष्टस्यद्वित्वेऽपिसिद्ध्यतीतिस्पष्टमेव।एतच्चसर्वंसुधातौप्रपञ्चितंमाधवेनेतिदिक्

अपीप्यदिति।णौकृतस्योपधालोपस्यस्थानिवत्वात्प्याय्शब्दस्यद्वित्वेहलादिशेषेईत्वम्।इहाग्लोपित्वादलघुपरत्वाच्चसन्वदित्त्वदीर्घाप्राप्तेरीत्वंविधीयते।व्लेपयतीति।व्लीवरणे।रीङ्स्रये।क्नूयिशब्दे।क्ष्मायीविधूनने।तिष्ठतेरित्।इहातिष्ठिपदितिप्राचोग्रन्थंव्याचक्षाणः णौकृतस्यातिष्ठतेरित्त्वस्यस्थानिवद्भावात्स्थाप्शब्दस्यद्वित्वमित्याहुः।तदस्मदुक्तरीत्याप्रक्रिया[illegible]वर्णेवदुत्तरखण्डत्वेनवस्तुतःसम्यगेव।किन्तुतेषांपरस्परव्याघातावहम्।परिनिष्ठितरूपेऽवर्णपरतायास्तैरुपजीवनात्।कथमन्यथाउवर्णादेशएवेतिबोपदेवमतंभाष्यमतत्वेनप्रागयूपुजन्नितिसुधीभिराकलनीयम्।श्तिपानिर्देशोयङ्लुङ्निवृत्त्यर्थः।अत्रास्थयत्।पुकोपवादइति।एवञ्चपालरक्षणइतिधातुनापालयतीतिरूपेसिद्धेलुगागमस्यपुग्निवृत्तिरेवफलमितिभावः।एवंवोविधूननेजुगित्यत्रापिबोध्यम्।वाजयतीतिरूपस्यवजगतावितिधातुनासिद्धत्वात्।विभाषालीयतेरिति।आत्वविधायकस्मारितम्।लिलोः।लीयतेरिति।लीश्लेषणेक्र्यादिः।उभयोरपियक्कानिर्देशोनतुश्यना।तथाहिसतिलीङ्इत्येवावक्ष्यत्।एतच्चविभाषालीयतइतिसूत्रेप्राचाङ्ग्रन्थेस्पष्टम्।लीलोरित्यस्यवृत्तावपितथैवोचितम्।सूत्रेहिलिलीङोर्द्वयोरपिग्रहणंनिरनुबन्धपरिभाषायाःप्रत्ययविषयत्वात् इतिवदन्ति। प्रयोज्यकर्त्रीति। यद्यपिप्रथमणिजर्थेप्रतिमनुष्यवागेवप्रयोजिका अतएवालंप्रवृत्तम्।तथापिद्वितीयणिजर्थाभिप्रायेणेदमुक्तम् ॥

।अन्येतुनिरनुबन्धकत्वात्क्र्यादेरेवलीत्यस्यग्रहणेप्रतिपदोक्तत्वाद्वलातेरेवग्रहणेधातुद्वयेनरूपद्वयसिद्धौअन्यतरस्याङ्ग्रहणसामर्थ्यादत्रव्यवस्थापकन्यायाप्रवृत्तिरित्युभाभ्यामप्युभयग्रहणंल्लीलीङोर्लातेःकृतात्वलीयतेश्चेतिहेतुमण्णावेवपूर्वोत्तरसाहचर्येणास्यप्रवृत्तेश्चौरादिकस्यनग्रहणमित्याहुः ॥

५लीङ्श्लेषणेदिवादिः

म-श-
३०४

णिनिमित्तस्येति। विषयसप्तम्यामपि तद्धिते द्विगुनिमित्तत्ववन्निमित्तत्वमस्तीति भावः। आष्यारूढत्वादिति। नन्द्रा इति सूत्रस्थभाष्यारूढत्वादित्यर्थः ॥ ॥ ॥ ॥ ॥
अध्यजीगपदिति। इह णिनिमित्तस्य गाङो द्वित्वे कर्त्तव्ये स्थानिवद्भावो निषेधो वा नास्ति। सति हि तस्मिन्नजादेर्द्वितीयस्येति णिच एव द्वित्वं स्यात्। ततश्च न प्रक्रियायां नत्वा परिनिष्ठिते रूपे ऽवर्णवदुत्तरखण्डमस्तीति कीर्त्तयति साम्यात्। ज्ञपादिरिति। तेन मित्त्वाद्ध्रस्व इति भावः। स्वादेस्तु मित्त्वं नास्तीत्युदाहरति। चापयतीत्यादि। इतिकार्थ इति। व्याख्यानद्वयस्यापि भाष्यारूढत्वादिति भावः। णकारस्येति। रेफस्य नन्द्रा इत्यनेन वारणादिति भावः। सन्नन्ते प्रवर्त्तते इति। यद्यपि सन्नन्तं धात्वन्तरं तथापि वचनसामर्थ्यात्तत्र प्रवृत्तिरिति भावः। तृतीयाभावेनेति। इहोपन्यासस्तु आद्यव्याख्यानमादाय प्रकृतोपयोगादिति भावः। इह मूल एव रूपद्वयव्युत्पादनेन प्राचो ग्रन्थोपि अर्थाद्व्याख्यातः। प्राचो ग्रन्थं त्वन्याचक्षाणास्तु तद्ग्रन्थस्य तत्सौत्रग्रन्थस्य च प्रामादिकत्वं महता प्रबन्धेन प्रत्यपीपदन्। तथा च तदीयो ग्रन्थः। क्वचित्तु ऐर्षिष्यदिति षकारादेरपि द्वित्वमुदाह्रियते। तद्भ्रान्तप्रक्षिप्तत्वादुपेक्ष्यम्। अमे चकारणं अथवा तृतीयस्यैकाचः षकारस्येत्यर्थः इति प्राचो व्याख्यानम्। तथा हि। यदि तृतीयवर्णस्येति व्याख्यायेत, ततः कथमैर्षिष्यदिति षकारादेर्द्वितीयस्यैकाचः स्यात्। न च तृतीयस्य वर्णस्येति व्याख्यातुमुचितम्। अध्याहारप्रसङ्गात्। तृतीयस्यैकाच इति ग्रन्थस्वारस्यभङ्गाच्च। तथा च कस्य तृतीयस्य केचिदाहुर्व्यञ्जनस्येति। अपरे पुनराहुस्तृतीयस्यैकाच इति। इति न्यासकारहरदत्तौ व्याख्यातारम्। तृतीयस्येति। तृतीयव्यञ्जनसहितस्यैकाच इत्यर्थः। अत्र षकारस्य द्विर्वचनं न भवति। अपरे पुनरिति। अस्मिन्पक्षे ईर्ष्यतेः सनि कृते इति व्याख्येयम्। अन्यथा तत्संबन्धिनस्तृतीयस्यैकाचोऽसंभवात्। माधवोप्येवम्। तस्मादैर्षिष[illegible]ष्येकमेवात्र रूपं साधीयो न त्वैर्षिष्यदिति ण्यन्ते तृतीयस्यैकाचोऽसंभवात्। न चादिकृते तमेवापेक्ष्य षकारादिस्तृतीय एकाजिति वाच्यम्। अन्तरङ्गत्वादाटश्चेति वृद्ध्या तद्विघातात्। अन्तरङ्गत्वादेव वृद्धेरसिद्धत्वमपि नास्ति। नापि स्थानिवद्भावः। वृद्धेः पूर्वस्य पूर्वस्माद्विधेरभावादिति न युक्तमुत्पश्याम इति। इह क्वचित्त्वित्यादिना न युक्तमुत्पश्याम इत्यन्तेन तदीयग्रन्थेन मूलटीकयोः को दोष उपन्यस्त इति विभावनायामुक्तरूपं प्रकृतवार्त्तिकेन न सिद्ध्यतीति मूले दोषः ॥

रामः
३०४

सोऽष्टवादिति। षकारस्येति एवकार इति वत्समुदायात्कार इति भावः॥ ॥इति ण्यन्तप्रक्रिया॥ ॥प्रवृत्तिभेदेनेति। आवृत्त्येत्यर्थः। अजन्तस्येति। अत्रार्थे प्रत्याहारबहुवचनयोः प्रमाणत्वं टीकायां तु षकारस्य तृतीयैकाचत्वोक्तिरयुक्ते दोष इति लभ्यते। तत्र न तावदाद्यः। प्रकृतवार्त्तिकस्य तत्राप्रवृत्तावपि अजादेर्द्वितीयस्य। नन्द्राद् इति सूत्राभ्यां रूपसिद्धेरप्रसूहत्वात्। नापि द्वितीयः। सनन्ताभिप्रायेण टीकाग्रन्थस्य सौष्टवात्। सर्वञ्चैतदिह मूल एव ध्वनितम्। मात्सर्य्यमुत्सार्य्य गुणगृह्यैराकलनीयम्। निवृत्तेति। तथाचोक्तम्। निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजुच्यते इति। तेनेति। यत्तु चक्षिङो ङित्करणं अनुदात्तेत्वप्रयुक्तस्यात्मनेपदस्यानित्यतां ज्ञापयतीत्युक्त्वा तेन प्रार्थयन्तीति सिद्धमिति माधवादिभिरुक्तं तदसिस्यवीयः। तस्यागर्वादात्मनेपदविधानात्। यद्यपि तरङ्गिण्याङ्गणकृतमात्मनेपदमनित्यमिति ज्ञापनार्थञ्च चक्षिङो ङकार इति तदपि न। चक्षिङो गणकृतात्मनेपदस्यासंभावितया मूलशैथिल्यात्। यदप्याहुः। प्रार्थनं प्रार्थः तं कुर्वन्ति प्रार्थयन्तीति तदपि न। धातुसञ्ज्ञानिमित्ते प्रत्यये कर्त्तव्ये उपसर्गाणां पृथक्करणस्य ज्ञापयिष्यमाणतया अर्थवेदसत्यानामित्यापुकौ दुर्वारत्वादिति दिक्॥ इति हेतुमण्ण्यन्तप्रक्रिया॥ धातोः कर्मणः। इच्छायामिति श्रुतत्वात्कर्मत्वं समानकर्तृकत्वञ्च तदपेक्ष्यमेव गृह्यत इत्याशयेनाह। इषिकर्मण इत्यादि। यिसनोरिति। प्रागुक्तव्याख्याविकल्पादिति भावः। अज्झनगमः। सामान्येन ग्रहणात् गम्लृ गतावित्यस्मात्सञ्जिगंसते इत्यत्रापि स्यादत आह। अजादेशगमेरिति। सनि च इङश्चेति सूत्राभ्यां विहितस्येणिङोरादेशस्य। इण्वदिक इति। इक आदेशस्य चेत्यर्थः। एतच्च सूत्रेऽज्ग्रहणाल्लभ्यते। तथाहि। इह सनीत्येव वक्तव्यम्। दीर्घश्रुत्योपस्थितेनाच इत्यनेनाङ्गस्य विशेषणात् अजन्ताङ्गस्य दीर्घः। चिचीषति। ततः हनिगम्योः एवञ्चाज्ग्रहणमतिरिच्यमानं प्रकृतिभेदेन गमेर्विशेषणार्थम् अजन्ताङ्गस्य दीर्घो भवति। अजादेशगमेश्चेति। इट्स। ऋदन्तादिति। चिकीर्षतीत्यादौ तु अज्झनगमामिति दीर्घे कृते नेदं प्रवर्त्तते उपदेशाधिकारात् लाक्षणिकत्वाद्वाऽतएवोदाहरति। दुध्यूर्षतीति। ध्वृ कौटिल्ये। अज्झनेति दीर्घे उदोष्ठ्यपूर्वस्येत्युत्वं रपरत्वं हलि चेति दीर्घः ॥

बोद्ध्यम्। लाक्षणिकत्वाद्वेति। वर्णग्रहणेपि तत्प्रवृत्तेरोत्त्वत्रस्य भाष्यसम्मतत्वाच्चात्राऽप्रवृत्तिज्ञापकस्यानित्यत्वे एव तात्पर्यमिति भावः। सन्निपातपरिभाषाविरोधान्नेत्यपि बोद्ध्यम् ॥

ऋतश्चसंयोगादेरित्यत्रेति। इड्विधायकेसूत्रइत्यर्थः। भाष्यमिति। सन्निधायकसूत्रेइतिशेषः। शेषे। शेषाधिकारे॥ ॥इतिसन्नन्तप्रक्रिया॥ ॥किञ्चेति। अन्यच्चेत्यर्थः। अनित्यतानेनेति। अन्यथा ग त्यर्थेभ्यः कौटिल्येविशेषविहितेनयङाक्रियासमभिव्याहारार्थयङ्लुकःकौण्डिन्यन्यायेनबाधेसिद्धेनित्यग्रहणंव्यर्थस्यादितिभावः। इदमत्रत्यकैयटानुरोधेन। परेतुक्रियासमभिव्याहाराद्ये यत्तुप्राचाऋतश्चसंयोगादेरित्यत्रलिङ्सिचोरितिप्रकृतेपिइट्सनिचेत्यतोमण्डूकप्लुत्यासनीत्यप्यनुवर्त्यदिध्वरिषतीतिरूपान्तरमुदाहृतम्। तन्न। सनीत्यस्यानुवृत्तेरनाक रत्वात्। आत्मनेपदेष्वित्यनुवृत्तेः परस्मैपदान्तोदाहरणस्योक्तिसंभवाभावाच्च। स्मिपूङ् पूङोङकारोच्चारणंपूञोव्यावृत्त्यर्थन्तेनतस्यपुपूषतीत्येव। सनिग्रहेतीण्निषेधात्। अत्राञ्जेरशेश्चऊदित्वाद्विकल्पेप्राप्तेपूङउगन्तत्वान्निषेधेप्राप्तेच स्मिङोस्तुअनिट्त्वादप्राप्तेवचनम्। सिस्मयिषतइति। स्तौतिण्योरितिनियमान्नषः। शैषिकादित्यादिभाष्य म्। शेषेभवः शैषिकः। अध्यात्मादित्वाट्ठञ्। मत्वर्थेभवोमत्वर्थीयः। गहादित्वाच्छः। मत्वर्थोस्यास्तीतिमत्वर्थिकः। अतइनिठनावितिठन्॥ इतिसन्नन्तप्रक्रिया॥ यस्य हलः। सङ्घातग्रहणमिति। तेनाहयीदमय्योदित्यादौनातिप्रसङ्गः। किंच। अर्थवद्ग्रहणपरिभाषयापुत्रकास्येत्यत्रनातिप्रसङ्गइतिभावः। यकारपरस्येति। एतेना [illegible]त्मत् आरर्यत् इतिप्राचामुदाहरणंव्याख्यातम्। भाष्योदाहरणस्यसामान्यापेक्षत्वात्। नित्यङ्कौ॥ नित्यशब्दोऽवधारणार्थइत्याह। कौटिल्यएवेति। त क्रकौण्डिन्यन्यायस्यानित्यतानेनज्ञाप्यते। तेनपूजितोयःसुरासुरैरित्यादौभूतेक्तः सिद्ध्यति। अन्यथामतिबुद्धिपूजार्थेभ्यश्चेतिवर्त्तमानेक्तेनबाध्येत। ततश्चकर्त्तरि तृतीयानस्यात्। तस्यचवर्त्तमानइतिषष्ठ्याबाधात्। जपजभदह। पसगतौसौत्रः। दन्त्यान्तोयमिति। स्पशबाधनस्पर्शनयोरितिधातोर्माधवः। सचेस्कीयतइति। अत्रप्राचोग्रन्थेपठ्यतेसुटोबहिरङ्गत्वान्नसंयोगादित्वेनगुणइति। तन्न। परत्वाद्द्वित्वेकृतेततोऽडभ्यासव्यवायेपीत्यभ्यासात्परस्यसुटिकृतेसाभ्याससङ्घस्यासंयोगादि त्वमदन्तत्वञ्चनास्तीतिगुणप्राप्तेरभावात्॥ ७ यङोऽचयातहनेर्धातोरित्यर्थेनात्रवाच्यलनविधेयत्वन्तक्रकौडिन्यन्यायस्यविधेयविषयोऽचरितार्थविषयश्चेतिस्पष्टंमिदंचो स्यात्सूत्रेभाष्ये। नाप्यत्राऽचारितार्थ्यम्। क्रियासमभिव्याहाराविवक्षायांचारितार्थ्यात्। नित्यग्रहणन्त्वनभिधानमाश्रित्यभाष्येप्रत्याख्यातमित्याहुः। परत्वादिति। द्वित्वादित्यादिः। पूर्वस्यातु

[illegible]
राम: ३०५

नचेति। द्वित्वादिति। द्वित्वनिमित्तयङ इत्यर्थः। परत्वादिति। उत्कृष्टत्वादन्तरङ्गत्वादित्यर्थः। सुटि कृते इति। ततो यङीति शेषः। रीङ्प्रवृत्तेः प्रागिति। अपवादत्वादिति भावः। द्वित्वाच्च पर
त्वादिति बोध्यम्। ।गुणेति। यङि चेत्यनेनेति भावः। कृतयोरेव सुडिति। सुट्निमित्तोपसर्गयोग इत्यर्थः। एवञ्च पूर्वस्मात्तुः साधनेनेति पक्ष एवेति पूर्वं यङि द्वित्वे रीङि सुट्प्राप्त
पदिति भावः। अत्रैवार्थे ज्ञापकान्तरमाह। अत एवेति। संयोगादित्वाभावादिति। पश्चात्तु सुटि अङ्गस्य संयोगादित्वाभावादित्यर्थः। भाष्यकृतेति। तेन ह्यड्भ्यासव्यवायेऽपीति प्रत्याख्यायते अत्र पक्षे
स्वमते गुणाभावस्तु यङि चेत्यत्रापि नित्यग्रहणानुवृत्त्या बोध्यः। भाष्योक्तनिषेधवचनादेव वा। प्रत्ययोत्पत्तिवेलायां संयोगादित्वस्य विवक्षणात् सञ्चस्करतुरित्यादौ गुणसिद्धिः सस्वरतुरिति न
नच संस्कृ इत्यस्यामेवावस्थायां द्वित्वात्परत्वात्तु सुटि कृते रीङ्प्रवृत्तेः प्राक् गुणप्राप्तिः शङ्कनीया। अड्भ्यासव्यवायेऽपीत्यस्यारम्भेणाड्भ्यासयोः कृतयोरेव सुट् न प्रागि
तिनिर्णयात्। अत एव सञ्चस्करतुरित्यत्र संयोगादित्वाभावाद्गुणो न सिध्यतीति संयोगोपधग्रहणं कर्त्तव्यमित्युपसंख्यायते। नच भाष्यकृता पूर्वस्मात्तुरुपसर्गेणेति दर्श
नेसुटोऽन्तरङ्गत्वोक्तेः ससुट्कस्यैव द्वित्वाभ्युपगमात् गुणप्राप्तिरिति वाच्यम्। तन्मते सुटो बहिरङ्गत्वादिति परिहारविरोधादित्यलं तावता। स्तिचो यङि। अभ्यासस्य का
रस्योपसर्गात्सुनोतीति ततः परस्य तु स्यादिष्वभ्यासेन चेति प्राप्तं षत्वं निषिध्यति। न कवतेर्यङि। कोरित्येवं व्याख्ये शपा निर्देशस्य फलमाह। कौतिकुवत्योस्त्विति। कुशब्द
इत्यादेः कूङ् शब्दे इति तुदादेश्च निवृत्तिः फलमिति भावः। यद्यपि कोरित्युक्तेऽपि तौदादिकस्य प्रसङ्गो नास्ति दीर्घान्तत्वात्। तथापि कौतिव्यावर्त्यर्थं क्रियमाणः शपानि
र्देशः कुवतिमपि व्यावर्त्तयतीत्यत्र तात्पर्यम्। नच लुग्विकरणपरिभाषया निर्वाहः ॥ दिति बोध्यम्। निषिध्यत इति। यद्यप्युपसर्गात्सुनोतीत्यादिनिषेधबाधकत्व
यापि येन नाप्राप्तिन्यायेन सात्पदाद्योरिति निषेधस्यैव बाधकं अयन्तु निषेधः सर्वबाधको व्याख्यानात् एतदर्थमेवोपसर्गादित्यनन्तरं निषेधप्रकरणङ्कृतं आदेशप्रत्यययोरित्येतन्मा
त्रबाधकत्वे हि तत्प्रागेव कुर्य्यादिति भावः। शपा निर्देशस्येति। यङ्लुङ्निवृत्तिस्तु न फलं यङः परत्वाभावात्। नच यङन्ताद्वि भाष्यमते यङो वम्बलोपाङ्गीकारात्तन्मते तत्र व्यावर्त्य
र्थः सः। श्तिपा निर्देशेन सिद्धेर्यङ्लुग्व्यावर्त्तकेनेतरव्यावर्त्तावपि बाधकाभावाच्च ॥

म·श· निरनुबन्धकेति।साप्रत्ययविधिविषयेतितुभूवादिसूत्रस्थभाष्यविरुद्धत्वादसङ्गतमितिभावः।कुङ् इत्येवेति।नचपर्यायेषुलाघवगौरवाभावः।कवतेरित्यस्यानुबन्धर
३०६ हितधातुमात्रार्थत्वेनपर्यायत्वाभावादितिदिक्।कुत्वेनेति।अभ्यासाच्चेतिकुत्वेनेत्यर्थः।ननुहिन्वोरिकारोच्चारणेनोत्वबाधवत्हकारोच्चारणसामर्थ्यात्घ्नीभावेकुत्वंनस्या
दितिचेन्न।णत्वबाधकल्पनापेक्षयाहकारोच्चारणंकुत्वप्रवृत्त्यर्थमित्यस्यैवकल्पयितुंयुक्तत्वात्।तत्रतुयेननाप्राप्तिन्यायेनहिन्वोरपवादत्वेनेकारोच्चारणस्यतद्बाधक

निरनुबन्धकपरिभाषायाअपिजागरूकत्वेनउभयग्रहणध्रौव्यात्।वस्तुतस्तुकुङ् इत्येवसुवचम्।हन्तेर्हिंसायामित्यादियद्यपिघ्नीभावेऽपिकृतेकुत्वेनजेघ्नी
यतेइतिसिद्ध्यतितथापिप्रक्रियालाघवायघ्नीत्युक्तम्।अत्रचदिग्यादेशेनैवघ्नीभावेनद्वित्वंनबाध्यतेविषयभेदात्।यङन्तावयवस्यहिद्वितीयाजवधिकस्यद्वि
त्वंप्रकृतिमात्रस्यघ्नीति।वेवीयतेइति।हलइतिवाअकृत्सार्वेतिदीर्घः।चायःकी।दीर्घोच्चारणंयङ्गर्थम्।अतएवनलुमतेतिनिषेधोऽपितत्रनप्रवर्तते।चेकीतः।
ईघ्रा।दीर्घोच्चारणंप्राग्वत्।यत्तुवदन्तिप्रक्रियालाघवार्थमितितन्न।चायःकीत्यत्रापितथात्वापत्तेः।ननुमाधवग्रन्थबलेनवैषम्यंस्वीकुर्मइतिचेन्न।युक्तिविरो
धेतस्यापित्याज्यत्वात्।शाशय्यतइति।परत्वादन्तरङ्गत्वाच्चयङादेशेकृतेद्वित्वम्॥ इतियङन्तप्रक्रिया ॥

त्वमेवयुक्तम्।विषयभेदादिति।अपवादत्वेनबाधेविषयैक्यापेक्षणादितिभावः।एकवचनेगुणसत्त्वेनविशेषाभावादाह।चेकीतइति।प्राग्वदिति।नन्वस्यचावित्युत्तरा
र्न्त्वदावश्यकमतोनलुमतेतिनिषेधबाधेनमानम्:।न्वतत्रापिचाविति दीर्घेणेष्टसिद्धिः।ईत्वस्ययेनानाप्राप्तिन्यायेनदीर्घापवादत्वात्।दीर्घान्तेऽपिपर्जन्यवल्लक्षणप्रवृत्तादी
र्घप्राप्तेरितिचेन्न।इष्टापत्तेः।तद्ध्वनयन्नाह।तस्यापीति।दीर्घोच्चारणंप्राग्वदितिवदतोऽपीत्यर्थः।नन्वसंभवरूपविरोधाभावात्परत्वमसङ्गतमतआह।अन्तरङ्गत्वाच्चेति। रामः
यक्ङितीतिविषयसप्तमीत्यन्तरङ्गत्वमितिभावः ॥ ॥ इतियङन्तप्रक्रिया ॥ श्रीगुरुचरणाभ्यांनमः ॥ ३०६

ज्ञापकमाश्रित्येति। तच्चपूर्वमुपपादितम्। ज्ञापकत्वाच्चेति। दाधर्त्तीतिसूत्रेहि तन्निपातनंभूधातोश्छन्दसि लोऽस्यैवगुणाभावो नान्यत्रेत्येतदर्थमितिस्पष्टंभाष्ये। तत्रसङ्को
चेम्नानाभावेनयङ्लुकिछन्दसिलङादाविवलोट्यपिगुणोबाध्यते। नचक्वान्यत्रमाभूत् बोभवतीतिलेटिभाष्येउदाहरणाच्छन्दोविषयकएवनियमः स्यादितिवा
च्यम्। तस्योपलक्षणत्वादितिदिक्। गुणनिषेधः सिद्ध्यतीति। धात्वंशलोपनिमित्तत्वादार्द्धधातुकस्येतिभावः। तद्व्याहतमिति। सप्तम्यन्तप्रत्ययेपरतः पूर्वकार्यत्वेना
यङो। अचीतिनप्रत्याहारोगृह्यतेकिन्तुप्रत्ययः यङः साहचर्यात्तदाह। अच्प्रत्ययइति। चकाराद्धलमित्यनुकृष्यते। येतुच्छन्दसीत्यनुकर्षयन्तितैरपि
भाषायांयङ्लुक्क्वचित्स्वीकर्त्तव्यएव। हुश्नुवोस्सार्वधातुकइतिसूत्रेहुश्नुग्रहणंप्रत्याचक्षाणेनवार्त्तिककृतातदनभ्युपगमेपिहुश्नुग्रहणंज्ञापकमाश्रित्य
भाष्यकारैस्तदभ्युपगमात्। यथोत्तरंमुनीनांप्रामाण्यात्। बोभूतुइति। निपातनस्यापिज्ञापकत्वाच्च। एतच्चमूलएवस्फुटीभविष्यति। अनैमित्तिकोयमिति।
बहुलग्रहणेनक्रियमाणइत्यर्थः। अचप्रत्ययेविधीयमानस्तुतन्निमित्तकइतिस्पष्टमेव। तेनलोलुवः पोपुव इत्यादौनधातुलोपइतिगुणनिषेधः सिद्ध्यति।
यङन्तत्वादिति। सन्यङोरितिषष्ठीव्याख्यानादितिभावः। प्राचातुतत्रसप्तमीव्याख्यायइहानङ्गकार्यत्वान्नलुमतेतिद्वित्वानिषेधइत्युक्तम्। तद्व्याहतम्। य
त्तुतसौत्रेणव्याख्यातमङ्गाधिकारेऽविहितत्वादित्यर्थइति। तन्न। नलुमतेतिसूत्रेंऽगाधिकारोनगृह्यतेकिन्त्वाङ्गमनाङ्गंवाप्रत्ययेपरेपूर्वस्यविधीयमानंस
र्वमितिभाष्यादौनिर्णीतत्वात्। अन्यथाराजपुरुषादौनलोपाद्यसिद्धिप्रसङ्गादितिदिक्। नन्वेकाचइतिविधीयमानंद्वित्वंरितपाशपेत्यादिनानिषिध्यते
तिचेन्न। गुणोयङ्लुकोरुग्रिकौचलुकीत्याद्यभ्यासकार्यविधिभिर्द्वित्वानिषेधस्यज्ञापनात्। धातुत्वादिति। क्विबन्तेष्विवप्रत्ययोसतेः ॥
नङ्गकार्यत्वोक्तिर्विरुद्धेतिभावः। नलोपाद्यसिद्धीति। आङ्गस्यैवनिषेधेयचिभमित्यस्यानङ्गत्वा– न्निषेधाभावेभत्वेननलोपोनस्यादितिभावः। द्वित्वाऽनिषेधस्येति। त
त्परिभाषाभावस्यैवज्ञापकमित्यन्ये ॥

प्राक्प्रवृत्तायाइति। यङन्तइति शेषः। निरपवादत्वेनेति। एकदेशविकृतन्यायेनावस्थितत्वादिति भावः। यथोद्देशेदम्। भूवादिसूत्रेति। चर्करीतमित्यस्यादादौ पाठेन यङ्लुङ-
न्तस्यभ्वादित्वादिति भावः। वर्णमात्रवृत्तिरूपेति। प्राधान्येन तद्वृत्तिरूपावच्छिन्नाश्रयमित्यर्थः। विध्यर्थमिति। यत्र प्रत्ययः प्राधान्येनाश्रीयते तत्राल्विधौ विध्यर्थः। यथा तृणे
प्राक्प्रवृत्ताया धातुसंज्ञायाः निरपवादत्वेनावस्थितत्वात्कार्यकालपक्षेपि भूवादिसूत्रप्रवृत्तेश्चेति भावः। यत्तु व्याचख्युः प्रत्ययलक्षणेन धातुत्वमिति। तदन्याय्यम्। उप-
देशेनसिद्धे दुर्बलस्यातिदेशस्यानादर्तव्यत्वात्। यत्रहीति। यत्त्वेतदर्थप्रतिपादकं माधवग्रन्थमनूद्य प्राचोग्रन्थं व्याचक्षाणैरुक्तम्। तदेतदाकरविरुद्धम्। यत्तु दाध-
र्तिसूत्रेभाष्यम्। तेतिक्ते इति किं निपात्यते तिजेर्यङ्लुगन्तस्यात्मनेपदं निपात्यते। नैतदस्ति प्रयोजनम्। सिद्धमात्मनेपदम्। अनुदात्तङित आत्मनेपदमिति नियमार्थन्त-
र्हिभविष्यति। अत्रैव यङ्लुगन्तस्यात्मनेपदं भवति नान्यत्रेति। क्व माभूत्। वेभिदीति चेच्छिदीति इति। तथा च वामनोपि तेतिक्ते इति तिजेर्यङ्लुगन्तस्यात्मनेपदं निपात्यते।
यङो ङित्वात्प्रत्ययलक्षणेन यङ्लुगन्तस्यात्मनेपदमन्यत्र न भवतीत्येतदेव ज्ञापकमिति। उपपादितञ्च कैयटहरदत्ताभ्याम्। यद्यप्यनुदात्तङित इति ङित्वनिमित्त-
मात्मनेपदं न प्रत्ययनिमित्तम्। तथापि लोलूयत इत्यादौ यङन्तादात्मनेपदन्तत्प्रत्ययस्य ङित्वादिति प्रत्ययलक्षणं भवत्येव। न चैवङ्गोहितमित्यवाद्योपि स्युरिति
शङ्क्यम्। वर्णमात्रवृत्तिरूपाश्रयस्यैव द्वितीयप्रत्ययग्रहणेन व्यावर्तितत्वात्। यदुक्ततेवर्णाश्रये नास्ति प्रत्ययलक्षणमिति। ङित्वन्तु समुदायवृत्ति न वर्णमात्रवृ-
त्तीति न व्यावर्त्यत इति। इह तंदत्तदित्यादिना न व्यावर्त्यत इत्यन्तेन संदर्भेण माधवं प्रति किन्दूषणमभिधित्सितम्। आकरविरोधो युक्तिविरोधो वा। नाद्यः।
प्रत्ययलोप इ‾ति सूत्रं हि विध्यर्थं नियमार्थञ्चेति पक्षद्वयमाकरे उपन्यस्तम्। आद्ये यत्र वर्णस्य विशेषणतया आश्रयणन्तत्सिद्धिः फलम्। यथा तृणेढि इत्य-
त्र इमागमस्य। द्वितीये तु सुदृषदित्यत्र सोर्मनसी अलोमोषसी ॥ ७७ ङित्यादौ हलादौ पिति सार्वधातुके विधीयमानईमीति भावः। नियमार्थमिति। यत्रप्रत्यय-
स्यासाधारणं रूपमाश्रीयते तदेव कार्यं प्रत्ययलोपे, न तु प्रत्ययाप्रत्ययसाधारणमित्येवं नियमार्थमित्यर्थः ॥

असन्त्वस्येति। असन्त्त्वं हि प्रत्ययाप्रत्ययसाधारणम्। अभ्युच्चयवादमात्रमिति। तृणह इति सूत्रेऽचिनेत्यनुवर्त्त्य तृणहानि इत्यादिव्यावृत्तौ हलीत्यननुवृत्त्याऽतृणेडित्यादिसिद्धान्तफलाभावादिति भावः। प्रथमपक्षेति। वार्त्तिकसंमतविधिपक्षेत्यर्थः। अनास्थेति। पूर्वपक्षानुसारेण दुर्बलसमाधानत्वादिति भावः। वस्तुतो वार्त्तिकानुसार्येकदेशिनः शङ्कायास्तदनुसार्येकदेशिन एव तत्समाधानं न सिद्धान्तिन इत्यदोषः। आत्मनेपदमित्येव सिद्धान्तयुक्तिरिति बोध्यम्। न च यत्र प्रत्ययस्य निषेधस्तत्रैवेति नियमोऽस्तु एवं च्ले इदं भाष्यं मुख्यपक्षाभिप्र इत्यसन्तस्य प्रयुक्तस्वरस्य स्थानिवत्त्वबलेन प्रापितस्य निवृत्तिः फलम्। तन्नाद्यः पक्षोऽभ्युच्चयवादमात्रं द्वितीयस्तु मुख्य इति भाष्यकैयटपदमञ्जर्यादिषु स्थितम्। एवं स्थिते दाधर्त्तिसूत्रस्थं भवदुपन्यस्तं भाष्यं प्रथमपक्षाभिप्रायेण। अत एव हि नियमार्थं तर्हि भविष्यतीति वदता भाष्यकारेण तत्रानास्था ध्वनिता। अन्यथा — तर्हीति भविष्यतीति च न ब्रूयात्। एतेन तदनुसारिणो वृत्तिकैयटहरदत्तादिग्रन्था अपि व्याख्याताः। माधवस्तु द्वितीयपक्षाभिप्रायेण प्रवृत्तः। तथा च मुख्यपक्षपातिनि माधवग्रन्थेऽभ्युच्चयपक्षबलेनाकरविरोधोद्भावनं कथमौचितीं लभेत नापि युक्तिविरोधः। संभावितानां विरोधानामाकर एव बोधकत्वात्। भवद्भिरिह विशिष्य तदनुपन्यासाच्चेति दिक्। यद्यपि वदन्ति अदादिषु चर्करीतं परस्मैपदीति परस्मैपदग्रहणं भाष्यकारोक्तनियमसिद्धपरस्मैपदानुवादः। अदादित्वमात्रं तु विधीयत इति। अत्रेदं वक्तव्यम्। परस्मैपदीति पाठ एव तावत्प्रायेण नास्ति नियमसिद्धमित्यप्यसङ्गतम्। अप्राप्तेर्वोक्तत्वात्। एवं चानुवादोऽपि नास्त्येव। अदादित्वविधानं व्यर्थम्। न हि अदादीनामपि अदादित्वं विधीयते। तत्र पाठमात्रेण तन्निर्वाहात्। तदेतत्सकलं ध्वनयति। चर्करीतं चेत्यदादौ पाठाच्छपो लुगिति ॥

यकमेवेति वाच्यम्। राजेत्यादौ पदत्वापत्तेः। आकर एव बोधकत्वादिति। तदुद्धारप्रकारश्च अचिनेत्याद्यनुवृत्तिरूप उक्तः। वस्तुतस्तिजेरनुदात्तत्वादेतिक्ते इत्यत्राप्युदात्तेत्वात् ङ्मिति शङ्कार्थः। रितपाशपेति निषेधस्तु नास्त्येवेति नियमेन वारणमिति भाष्यार्थः। ननु परस्मैपदीति पाठाभावेऽपि चर्करीतमित्यस्य परस्मैपदिसमभिव्याहारेण पाठात् यङ्लुगन्तस्य परस्मैपदित्वं बोध्यते एवेत्यत आह। नियमसिद्धेति। तन्निर्वाहात्। अदादित्वनिर्वाहात्। अदादौ पाठादिति। एवं श्यनाद्यप्रवृत्तिरित्यपि बोध्यम् ॥

अजहल्लक्षणेति।यङ्यङ्लुक्साधारणधर्मेणेत्यर्थः।बीजाभावाच्चेति।शक्यार्थान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वातद्बीजम्।छन्दस्येवेति।लोट्येवेत्यपिबोध्यम्।न्यायसिद्धमिति।ननुतेनसिद्धान्ते नप्रत्येकंद्वयोस्तत्त्वंनसमुदायस्यान्यथेच्छयापर्यवसितिर्द्विःप्रयोगेपिविशिष्टस्यधातुत्वापत्तावयचत्वस्यचदित्यादेरपिसाधुत्वापत्तिर्युक्तेस्तुल्यत्वात्।अतएवदद्यतेरितिसूत्रेद्वित्वेकृतेपरस्यभूभावे यङोवा।अत्रव्याचख्युः।यङन्ताद्धलादिपित्सार्वधातुकेनसंभवतीतियङ्शब्देनयङ्लुगन्तंलक्ष्यतइति।तद्व्यर्थंप्रत्ययलक्षणेनयङन्तत्वानपायात्।कथमन्यथायङ्लुकिसन्यङोरितिद्वित्वप्रवर्त्तते।नहितत्रापियङ्लुग्लक्ष्यते।श्रूयमाणेयङिद्वित्वाभावप्रसङ्गात्।नचकाकेभ्योदधीत्यत्रेवाजहल्लक्षणा।तत्रदध्युपघातकत्वस्येवेहोभयसाधारणस्यलक्ष्यतावच्छेदकस्याभावात्। युगपद्वृत्तिद्वयस्यचायोगात्।लक्षणायांबीजाभावाच्च।प्राचातद्व्याख्यातृभिर्वातत्रलक्षणानुक्तेश्चैतदेतद्ध्वनयन्नाह।यङन्तात्परस्येति।छन्दसिनिपातनादिति।भूसुवोरितिनिषेधश्छन्दस्येवेतिनियम्यतइत्यर्थः।द्विःप्रयोगइति।तथाचप्रकृतिग्रहणेयङ्लुगन्तग्रहणंन्यायसिद्धमितिभावः।यत्तुमाधवेनोक्तंभाषायांगुणप्रवृत्तिंज्ञापयितुङ्क्रियमाणंबोभूत्वितिनिपातनञ्ज्ञापकमस्याःपरिभाषायाइति।तन्न।असत्यामुक्तपरिभाषायांबोभूत्वित्यत्रभूसुवोरित्यस्याप्राप्त्यागुणनिषेधार्थतयानिपातनस्यचरितार्थत्वात्।यत्तुप्राचोक्तन्धातुग्रहणोक्तंयङ्लुकिवेतिकेचिदितिनैतत्त्रिमुनिमतम्।नापिन्यायसिद्धमित्युपेक्षितम्।असंयोगात्परस्यलिटोवाकित्त्वम्।रुदसुनुधातूनांक्रिटंविनेड्वा।भृस्तुद्रुच्छस्यश्युः।परस्यतादेरार्द्धधातुकस्येड्वेत्यादीनामपि प्राचातत्रतत्रोपन्यस्तानामर्वाचीनमतानामेषैवगतिः।किंबहुनाकाशकृत्स्नादिमतानामपिमुनित्रयविरोधेइदानीमग्रहणमेव।दृश्यन्तेहिनियतकालाःस्मृतयः।यथाकलौपाराशरीस्मृतिरिति।एतच्चशताच्चठन्यतावशतइतिसूत्रेकैयटहरदत्तादिग्रन्थेस्पष्टम्।मुनित्रयमद्ध्येपियथोत्तरंप्रामाण्यमाश्रित्यभाष्यानुरोधेनैवव्यवस्थेतितत्त्वम्।एतच्चभर्तृहरिकैयटहरदत्तादिसकलसंमतम्।अतोर्वाचीनम्यत्किञ्चिद्वचनंपुरस्कृत्यानेकरूपोत्प्रेक्षयामनोनखेदनीयमितिदिक् ॥ ७७ पूर्वस्याश्रवणंप्राप्नोतीत्याशङ्क्यार्द्धधातुकविषयसप्तम्यापरिहृतम्।अन्यथात्वदुक्तरीत्यासमुदायस्यैवादेशापत्तिरेकाच्द्विर्वचनन्यायेनेतितदसङ्गतिःस्पष्टैवेतिचेन्न।उत्तरखण्डमादायैवयथायोगन्तत्तत्कार्यप्रवृत्तेः भूसुवोरित्यत्रतदन्ताङ्गस्येत्यर्थाद्वाप्राप्तिरयमेवमूलार्थः।एवञ्चहन्तेर्यङ्लुगन्ताल्लिङिवध्यादितिरूपमितिमाधवोक्तमसङ्गतमित्यन्यत्रविस्तरः ॥

दिगिति। दिगर्थस्तु यथेष्टं नामधातुष्वित्येव सिद्धे कण्ड्वादेस्तृतीयस्येत्यस्य नियामकत्वापत्तौ गौरवम्। ममतु विद्धार्थत्वं स्पष्टमेव। नामशब्दस्य सुबन्तपरत्वे तु तद्प्राप्त्यामूलविरोधः। किंच कण्डूरित्यादौ सत्त्वभूतार्थाभिधानात् यक्समभिव्याहारे चासत्त्वभूतार्थाभिधायित्वादर्थभेदेन शब्दभेदाच्च द्वैविध्य एव पर्यवसानम्। दूषिए तेनावश्यकत्वाल्लाघवाच्चार्द्धधातुकत्वमेव यकः किं त्वेन ज्ञाप्यत इति प्रत्युक्तम्। अप्रकृतस्यार्द्धधातुकत्वस्य कल्पने प्रकृतधात्वधिकारत्यागे च विपरीतगौरवस्योद्भटत्वात्। यङादीनामिव यकोप्यार्द्धधातुकत्वसञ्ज्ञाया अनायाससिद्धत्वाच्च। नापीदं भाष्यानुगुणम्। धातुप्रकरणादित्यादिभाष्येण सह विरोधस्य स्पष्टत्वात्। नापि व्याख्येयग्रन्थानुगुणम्। द्वैविध्यग्रन्थस्य हृदयशून्यत्वापत्तेः। यत्तु व्याख्यातं यगन्ताः सन्तो धातव इत्यादि तदपि न। यगन्ताः कण्ड्वादय इत्यस्य व्याहतत्वात्। नहि यगागमो येन तद्विशिष्टः कण्ड्वादिः स्यात्। कण्ड्वादय इत्यस्य तद्विशिष्टसमुदायोर्थ इति चेत्। तर्हि नासौ प्रातिपदिकमिति स्पष्टमेव। किंच सकलप्रातिपदिकानां क्वजादिप्रकृतितया कण्ड्वादितुल्यद्वैविध्यसत्त्वात्। किमेषामेव विशिष्य तत्कथनेन तस्माद्यथाकरमेव गुणगृह्येर्ग्रहीतुमुचितमिति दिक्। अस्तु। केचिन्मनस्सुपतापे इति पठन्ति। तत्रापि मनस इत्यर्थनिर्देशान्तर्गतमेव। ॥ एवं पूर्वभावे इति पूर्वशब्दोपि पूर्वभावेः पूर्वत्वम्। केचित्तु मनस पूर्वे इति धातुं मत्वा मनस्यति पूर्मतीत्युदाजह्रुः। तच्च मतं धातुचन्द्रोदये समर्थितं शब्दकौस्तुभे तु दूषितन्तत एवावधार्यम् ॥ इति कण्ड्वादयः॥ प्रथमस्य लुपलक्षणम्। अजादेस्तु द्वितीयस्येत्यपि बोध्यम्। यथेष्टमिति तु नेह प्राप्तं नामधातुत्वस्य निराकृतत्वात्। अत एव मूले कण्ड्वादयो नामधातुषु नोक्ताः। किंतु तान्समाप्य पृथगेवोक्ताः। प्राचस्तु तन्मध्ये पाठो दुष्ट एव। अतः परस्मैवेति। हेतुमण्णिच्प्रकरणे व्युत्पादितमेतत्। षत्वन्नास्तीति। आदेशोयः सकारस्तस्य हि षत्वमुक्तमयन्त्वादेशस्यावयवो नत्वादेश इति भावः ॥ इति प्रत्ययमाला ॥

तमिति। वृत्त्यर्थनिर्देशरहितगणपाठे सुलेट्लोट्लोलादित्येव पाठात् तत् दूषितमिति भावः॥ इति कण्ड्वादयः॥ श्रीरामः ॥ प्रत्ययमालाच ॥

परस्परकरणमपीति। अपिनाऽन्यकर्मणोऽन्येन करणसङ्ग्रहः। उत्तरार्थमिति। भावकर्मणोः सामान्यसूत्रेणैव सिद्धा सामर्थ्यादेवास्य कर्तरि प्रवृत्तिः सिद्धेति भावः। षत्वनिषेध इति। प्रत्ययसकारत्वादुपसर्गप्रादुर्भ्यामिति षत्वमपि नेति बोध्यम्। एकदेशेति। व्यपदेशिवद्भावेन पदत्वमपि सुलभम्। अर्थग्रहणसामर्थ्यादिति। गतिहिंसयोरित्येव तत्र वर्त्तमानेभ्यो धातुभ्य इत्यर्थेनेष्टसिद्धेरिति भावः। वहेस्त्विति। नियोप्युपलक्षणम्। अजाग्रामादिसंयोगानुकूलदेवदत्तादिनिष्ठो व्यापारो वहत्याद्यर्थः। गतिस्तु ग्रामादिसंयोगानुकूलकर्त्तृनिष्ठो व्यापार इत्यगत्यर्थत्वमिति भावः। कर्त्तरि कर्म। परस्परकरणमपि कर्मव्यतिहारः। संप्रहरन्ते राजानः॥ कर्त्तृग्रहणमुत्तरार्थम्। व्यतिस्त इति। यच्च परत्वाभान्नषः व्यतिस्स इति। सात्पदाद्योरिति षत्वनिषेधः। एकदेशविकृतन्न्यायेन प्रत्ययमात्रस्य पदत्वात्। न गतिहिंसार्थेभ्यः कर्मव्यतिहारे आत्मनेपदं न। हरतेरिति। अर्थग्रहणसामर्थ्याद्धि ये शब्दान्तरनिरपेक्षा एव गतिहिंसयोर्वर्त्तन्ते त इह गृह्यन्ते। हरतिस्तूपसर्गवशाद्धिंसायां वर्त्तत इति न तस्यायं प्रतिषेध इति वार्त्तिकं नारम्भणीयमित्याहुः। कथन्तर्हि ततः संप्रहरिष्यन्तौ दृष्ट्वा कर्णधनञ्जयाविति। अत्राहुः। योत्स्यमानाविति विवक्षितं न तु कर्मव्यतिहारः। वहेस्तु नायं निषेधः। अगत्यर्थत्वात्। प्रापणं हि वहेरर्थः गतिप्रतीतिस्त्वाक्षेपात्। इतरेत। लौकिके शब्दव्यवहारे लाघवं प्रयत्नानादरादितरेतरादिशब्दाः व्यतीत्युपसर्गौ च कर्मव्यतिहारद्योतनाय समुच्चीयेते। तथात्मनेपदमपि समुच्चीयेतेति निषेधोऽयमारभ्यते। संपद्विनिमये चाभेदधतुर्थवनद्वयमित्यत्र तु करणविनिमये सत्यपि क्रियाविनिमयस्याऽविवक्षितत्वान्न तङ्। नेर्विशः। कथं न्यविशतेति। अटा व्यवधानात्। न च स्वाङ्गमव्यवधायकमिति वाच्यम्। अङ्गभक्तस्याटो विकरणान्तप्रत्ययग्रवत्वेऽपि धातुप्रत्ययावयवत्वात्। सत्यम्। लावस्थायामडिति भाष्यमते तावन्न कश्चिद्दोषः। मतान्तरे तूपसर्गनियमेऽड्वाच्य उपसंख्यानमिति वार्त्तिकमस्तीति दिक्। अर्थवद्ग्रहणपरिभाषया लक्षणप्रतिपदोक्तपरिभाषया वा नेरुपसर्गस्य ग्रहणम्। तेनेह न। मधूनि विशन्ति भ्रमराः। कथन्तर्हि इत्युक्त्वा मैथिलीं भर्त्तुरङ्के निविशती भयादिति। अङ्गानि विशतीमिति पठनीयमित्याहुः॥ ७ आक्षेपादिति। तद्व्यापारमात्रेणाजाव्यापारं विनाऽजाग्रामसंयोगासंभवादिति भावः। न कश्चिद्दोष इति। यद्यपि स्यादयोपि लावस्थायान्तथापि परत्वादडेव अतोऽङ्गसञ्ज्ञापेक्षत्ववत्स्यादेर्धातुसञ्ज्ञापेक्षत्वेन समत्वात्। कृताकृतप्रसङ्गित्वमात्रेण शब्दान्तरस्य प्राप्तिवत् शब्दान्तरात्प्राप्त्या च नित्यता अनित्यता चोभयोः समा। वार्त्तिकपरत्वादडेव

मन्नीति। नेरिति षष्ठी परिव्यवेभ्य इत्यादावपि पञ्चम्यर्थे पञ्चमीत्यपि भाष्ये स्पष्टम् ॥

इत्यादेरिति।आदिना।विभाषाभावादिकर्मैकादित्यादि।नैरर्थ्येन च पदान्तरसंबन्धनिमित्तकार्यपदसंस्कारपक्षानाश्रयणञ्ज्ञाप्यत इति भावः।अत्रस्मृतावितिः।स्मरणपूर्वमाददातीत्यर्थः।सिद्धत्वायत्तु दुर्घटवृत्तावुक्तं पदसंस्कारपक्षाश्रयणाददोष इति।तन्न।पदान्तरसमभिव्याहारे नियमप्रवृत्तेर्दुर्वारत्वात्।अन्यथा युष्मदस्मत्सामानाधिकरण्येपि त्वदुक्तरीत्या प्रथमपुरुषापत्तेः।वालिक्षायामित्यादेर्वैयर्थ्यापत्तेश्चेति दिक्।आङोदः।कथन्तर्हि व्याददते विहगा इति मुखं स्वकीयमिति।कर्त्रभिप्राये भविष्यति।एतेन मुखं व्याददाय स्वपितीत्यत्र सुप्ताव्याददत्त इति व्यत्यासेन प्रयोग इति प्रेत्यभावपरीक्षायां वाचस्पतिप्रयोगोऽपि व्याख्यातः।आङोङि द्विःशिष्टस्य ग्रहणान्नेह।भिक्षामाददाति।अत्रस्मृतावाकार इति हरदत्तः।एतेन प्रतीकमाददतीति विवरणग्रन्थो व्याख्यातः।शिक्षेर्जिज्ञासायाम्।शिक्षविद्योपादाने इत्यस्य नेह ग्रहणम्।अनुदात्तेत्त्वादेव सिद्धत्वात्।किंतु शकेः सन्नन्तस्य।सनिमीमेतीस्।तदेतदाह।धनुर्विषय इत्यादिना।नियमार्थमिति।न चैवं नाथतेरनुदात्तेत्त्वं व्यर्थमिति वाच्यम्।तस्य नाथत इति युजर्थत्वात्।मातुरनुहरतीति।सादृश्यमात्रमिह विवक्षितम्।न तु प्रकारताच्छील्यम्।शपउपालम्भे।कथन्तर्हि नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामीति।अत्राहुः।स्वाशयं प्रकाशयामीत्येवं तावदिह विवक्षितं न तु शपथ इति।प्रकाशने।स्थेयो विवादपदनिर्णेता।तिष्ठन्तेऽस्मिन्निति व्युत्पत्तेः।बाहुलकादधिकरणेऽचो यत्।उदोनू।उत्पूर्वात्तिष्ठतेरनूर्ध्वे परिस्पन्दे वर्त्तमानादित्यर्थः।इह परिस्पन्दस्यानूर्ध्वत्वं नामोपरिदेशसंयोगफलकत्वाभावः।यद्यप्युदोनूर्ध्व इत्युक्तेपि क्रियावाचकत्वं लभ्यत एव तथापि परिस्पन्दतालाभार्थं कर्मपदम्।तदेतदाह।ईहायामेवेति।समो गम्यृच्छि।वृत्तिकारस्तु समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्य इति पठित्वा दृशेरुपसंख्यानमाह।तत्र वार्त्तिकानुपूर्वीभङ्गः।केषाञ्चिदेव सूत्रे प्रक्षेपे दृशेरेव बहिष्कारे बीजाभावात् मुनित्रयानुसारिणा तदुपेक्षैवोचितेति भावः।ग्रामं सङ्गच्छतीति।कथन्तर्हि तच्चैक्यं समगच्छतेति।आर्षत्वात्।यद्वा चतुर्वर्णादित्वात्स्वार्थे ष्यञ्।एकं समपद्यतेत्यर्थः ॥ दिति।न च नियमार्थम्।विधित्वौचित्यात्।सादृश्यमात्रमिति।एतच्च तद्धितार्थेत्यत्र भाष्ये स्पष्टम्।न तु शपथ इति इति।एतद्वृत्त्यनुरोधेन।भाष्ये शप उपलंभन इति पाठात्।उपलम्भनं प्रकाशनमिति कैयटाच्च ॥

साहचर्यादिति। व्याख्यानसहकृतादितिभावः।तादृशेनहिलुग्विकरणपरिभाषाबाध्यते।अतएवभाष्येसंविद्रतइत्युदाहृतम्।किंचवेत्तेर्विभाषेतिरुड्विधानेनवेत्तेरात्मनेपदमावश्यकन्तत्र
वेत्तेरेवेति।परस्मैपदिभ्यांसाहचर्यादितिभावः।विन्दतिर्हिस्वरितेत्।सत्ताविचारणार्थयोस्त्वनुदात्तेत्त्वादेवसिद्धम्।अङ्·विधौत्विति।लुप्तविकरणेनशासिनासाहचर्यादिति
भावः।गन्धनंहिंसेति।गन्धअर्दने।अर्दहिंसायामितिचुरादौपाठादितिभावः।सहसावर्त्ततेसाहसिकः।ओजःसहोंभसावर्त्ततइतिठक्।तस्यकर्मसाहसिक्यम्।ष्यञ्।तदेत
दाह।तेषुसहसेति।नचैवंपरदारानितिकर्मणोऽनन्वयःशङ्क्यः।साहसिक्यस्यप्रयोगोपाधित्वात्।धात्वर्थस्तुवशीकरणम्।एधोदकस्येति।एधाश्चउदकञ्चएषांसमा
हारः।यद्वा।एधांसिचदकञ्चेतिविग्रहः।उदकपर्यायोदकशब्दोप्यस्ति।तथाचहलायुधः।आपस्तोयंघनरसपयःपुष्करंमेघपुष्पंकंपानीयंसलिलमुदकंवारिवाःशंवरं
च।अर्णःपाथःकुशंजलवनक्षारमंभोंवुनीरंप्रोक्तंप्राज्ञैर्भुवनममृतञ्जीवनीयंदकञ्चेति।अभिभवेचेति।येत्वभिभवेछन्दसीतिपठन्तितेषामपिछन्दसीतिप्रायोवा
दइतिहरदत्तः।माणवकमुपनयतइति।विनिन्युरेनङ्गरवोगुरुप्रियमित्यत्रतुआचार्य्यकरणस्याविवक्षितत्वान्नतङ्।हर्म्यतलादिति।भाष्येतुहर्म्यतलमितिप्रचुर
पाठः।तत्रोद्गमपूर्विकायांव्याप्तौक्रमिर्दृष्टव्यः।कथन्तर्हिनभस्तमाक्रामतिचन्द्रमाःक्रमादिति।व्याप्तिमात्रमिहक्रमेरर्थोनतूद्गमनम्।अतोनतङ्।प्रोपाभ्याम्।उ
पक्रमतइति।उपपराभ्यामितितुनेहप्रवर्त्तते।वृत्त्याद्यर्थाभावात्।अप्राप्तविभाषेति।नचवृत्त्यादिसूत्रंसोपसर्गेचरितार्थमियन्तूभयत्रविभाषास्त्वितिवाच्यम्।उ
पपराभ्यामितिनियमस्योक्तत्वात्।अनुवदतेकठःकलापस्येतिअनुःसादृश्ये।तेनकलापस्येतितुल्यार्थयोगेशेषलक्षणाषष्ठी।समस्तृतीया।संपूर्वाच्चरतेस्तृ
तीयान्तेनयुक्तादित्यर्थः।दाण।भाष्येत्विदंसूत्रंप्रत्याख्यातम्।तथाहि।योदास्यासहभुञ्जानस्तयादत्तंस्वयंभुङ्क्तेस्वयञ्चतस्यैददातितत्रायंप्रयोगइष्यते ॥
हिनिर्देशादेवलुग्विकरणग्रहणमितिभावः।अनन्वयःशङ्क्यइति।सहसाप्रवृत्तिरेवप्रकुरुतेइत्यस्यार्थस्तत्रचसप्तम्युचितेतिभावः।सहसेत्यस्यबलात्कारेणाऽविचारेण
वेत्यर्थः।क्रमिर्दृष्टव्यइति।उद्गममात्रेऽकर्मकत्वमितिभावः।तत्रायमिति।अशिष्टव्यवहारेपरस्परकरणरूपेकर्मव्यतिहारेचेत्यर्थः ॥

तत्रस्वीकारमात्रे इति। अत एव इह कस्मान्न भवति स्वंशाटकान्तमुपयच्छतीति भाष्यं सङ्गच्छते। णेरणौ। क्रियापर इति। उत्तरवाक्येनाणौ कर्मणः कर्तृत्वविधानादिति भावः। ननु कर्मपदस्य क्रियापरत्वे कर्मवत्कर्मणेत्यस्याग्रे णेरणावनाध्याने इत्येव सूत्रणीयं स्यादणौ कर्मस्य क्रियया तुल्यक्रियः एव कर्ता ण्यन्ते कर्मवदिति सूत्रार्थ इति चेन्न। विषवदिदोष्याप तत्र च सहयुक्ते तृतीया। कर्मव्यतिहारे तङ्। दानपूर्वके भोगे दाण धातुर्बोध्य इति। एतेन कर्मव्यतिहारोदाहरणेषु व्यतिशब्दप्रयोग आवश्यक इति भ्राम्यन्तः प्रत्युक्ताः। समइति षष्ठीति। दास्या संयच्छते इत्युदाहृत्य शिष्टव्यवहारे तु ब्राह्मणीभ्यः संप्रयच्छतीति प्रत्युदाहरन् भाष्यकार इह व्याख्याने प्रमाणम्। उपा। स्वकरणं स्वीकार इति। यत्तु वृत्तिकृतोक्तं पाणिग्रहणमेवेष्यते। तेनेह न। परभार्यामुपयच्छति। दासीत्वेन स्वीकरोतीत्यर्थ इति। तद्भाष्यविरुद्धं तत्र स्वीकारे आत्मनेपदस्योक्तत्वात् इति भावः। तथा च भट्टिः। प्रायुङ्क्त उपायंस्त महास्त्राणीति। समः। समो गम्यृच्छिभ्यामित्यतो विच्छिद्य पाठः सकर्मकादपि विधानार्थ इति ध्वनयन्नुदाहरति। सङ्क्ष्णुते शस्त्रमिति। भुजो। भक्षण इति वक्तव्ये अनवन इति वचनमर्थान्तरेऽपि तङर्थमिति ध्वनयन्नुदाहरति। बुभुजे पृथिवीपाल इति। इहेति। उपभोग इत्युपलक्षणम्। आत्मसाक्षात्करणस्यापि। इह च रुधादेरेव ग्रहणम्। अनवन इति प्रतिषेधात्। संयोगो विप्रयोगश्चेत्युपक्रम्य विशेषस्मृतिहेतव इत्यभियुक्तोक्त्यानुभवबलेन च संसर्गाभावद्विप्रयोगस्यापि विशेषावधारणोपायत्वात्। तेन भुजकौटिल्य इत्यस्य तु तुदादेः परस्मैपदमेव। विभुजति पाणिम्। णेरणौ। इह स्यादित्यन्तेन णौ इति व्याख्यातम्। अणौ यत्कर्म णौ चेदिति भिन्नवाक्यम्। कर्मशब्दः क्रियापरः कर्त्तरि कर्मव्यतिहार इतिवत्। तदेतद्व्याचष्टे णौ या क्रिया सैव चेदिति। सकर्त्तेति वा व्याख्यान्तरम्। अणावित्यादि चेच्छब्दान्तमिहानुवर्त्तते कर्मशब्दश्च कारकविशेषपरः शब्दाधिकाराश्रयणात्तदेतद्व्याचष्टे णौ यदित्यादिना। अनाध्यान इत्यंशं व्याचष्टे न त्विति। इह प्रसज्यप्रतिषेधो नातीव दुष्यतीति व्याख्यातः। न तु तत्राभिनिवेष्टव्यम्। पर्युदासस्य न्याय्यत्वात्। लक्ष्यविसंवादाभावाच्चापूर्वविप्रतिषेधेनेति ॥५४॥ सेः। सैव चेदिति। सामर्थ्यादेवकारलाभः। अध्यारोपितप्रेषणद्वितीयकक्ष्यायामधिकप्रवेशेऽपि तत्सत्ताया अपरित्यागात्सैव वैयर्थ्यापत्तेः। अनुवर्त्तते इति। यद्यप्येकयोगेनानुवृत्तिरिति इको गुणेत्यत्र भाष्ये उक्तं तथाप्यत्र वाक्यभेदसत्त्वात्स्वरितत्वसामर्थ्याद्वाकाङ्क्षावशाच्च संबन्ध इति भावः ॥

भाष्योदाहरणमिति।नचायंभाष्यप्रयोगः।क्रियाफलेस्यपर[illegible]मिति।एवञ्चकर्त्तृगामिनिक्रियाफलेपल्लोद्णावकर्मकेत्यस्यप्रवृत्तौनकिंचिद्बाधकमितिवाच्यम्।तदर्थमावश्यकस्यपरगामि
त्वेपिपरत्वात्प्रवृत्तेर्दुर्वारत्वात्।नहिकर्त्रभिप्रायेइतितत्रानुवर्त्ततेफलाभावादितिभावः।नचाणावकर्मकादित्यत्रोद्देश्यतानवच्छेदकावच्छेदेनान्वयस्यव्युत्पत्तिसिद्धतयाऽण्यन्तावस्थात्वावच्छे
देनाकर्मकत्वप्रतीतेस्तत्रतद्प्राप्तिः।राजानंपश्यतीत्यस्यापितद्ण्यन्तावस्थात्वादितिवाच्यम्।सामानाधिकरण्येनान्वयभ्रमवारणायतदङ्गीकारादित्यभिमानः।विभाषोपपदेनेत्यस्यविषयेऽ
स्यैवप्रवृत्तेः[illegible]मानसत्वेनतद्विषयोवाचनिकएवसइतिबोध्यम्।अन्यत्रभावक्रिययोःपर्यायत्वदर्शनादाह।अपरिस्पन्देति।विषयत्वापादनंविषयत्वापत्त्यनुकूलोव्यापारः।अंशद्वयेति
अत्रचप्रमाणंदर्शयतेराजेतिभाष्योदाहरणम्।अणावकर्मकादितिप्राप्नोति।निवृत्तप्रेषणत्वेनाकर्मकत्वादितिभावः।नन्वेतत्सूत्रंकर्मवत्कर्मणेत्यनेनैवगतार्थमित्याशङ्क्या
ह।कर्तृस्थेत्यादि।अपरिस्पन्दनसाधनसाध्योभावः।सपरिस्पन्दसाधनसाध्याक्रिया।तत्रकर्मस्थभावेषुकर्मस्थक्रियेषुचकर्मवदित्यतिदेशःप्रवर्त्ततेनत्वन्यत्रेतिसिद्धान्तयिष्य
तइतिभावः।तत्रकर्तृस्थभावकमुदाहरति।पश्यतीत्यादि।ज्ञानविशेषविषयत्वापत्त्युपसर्जनविषयत्वापादनवचनोदृशिः।सकर्मकाणामंशद्वयाभिधायितायाआवश्यक
त्वात्।धातूपात्तव्यापाराश्रयःकर्त्ता।व्यापारव्यधिकरणधातूपात्तफलशालिकर्मेतिसिद्धान्तात्।तदेतदाह।चाक्षुषेत्यादि।प्रेरणेति।सौकर्यविवक्षयेतिभावः।पश्यतिभावइ
ति।कर्त्तरिलट्।उक्तञ्च।निवृत्तप्रेषणंकर्मस्वक्रियावयवेस्थितम्।निवर्त्तमानेकर्मत्वेस्वेकर्तृत्वेवतिष्ठतेइति॥इहकर्मवदित्यतिदेशस्याप्रवृत्तेःकर्मकर्त्तरियथापर्यंशावाद्यस्ते
नशुद्धेनकर्त्रारूपंतुल्यम्।ततइति।विषयत्वापत्तिमात्रवृत्तेर्दृशेरित्यर्थम्।तुल्योर्थइति।विषमयोःप्रेषणप्रतीतेसमयोश्चतत्त्यागादितिभाव·।तत्रतृतीयेति।आद्यद्वितीययोस्तुण्यन्त
त्वाभावादुक्तिसंभवएवनास्तीतिभावः।क्रियासाम्येपीति।प्रथमकस्यपासहेत्यर्थः॥ ७ फलव्यापाररूपेत्यर्थः।नचचतुर्थकस्यायांफलमात्रवाचकत्वेनाणौक्रियेत्यंशाभावेनोदाहरणत्वा
नुपपत्तिः।धात्वर्थस्यैवतत्रक्रियाशब्देनग्रहणात्।यद्वातत्रापितत्सामानाधिकरण्यव्यापारप्रतीतिरस्तिअंशद्वयेत्यस्यव्यधिकरणांशद्वयेत्यर्थः।निवृत्तप्रेषणम्।त्यक्तप्रेषणधात्वर्थफलाश्रयम्।स्व
क्रियावयवे।स्वनिष्ठकर्मतानियामकधातुवाच्यैकदेशेफलरूपेतत्समानाधिकरणव्यापाररूपेवाआधेयतयास्थितमित्यर्थः।निवर्त्तमानेइति।प्रकृतधात्वर्थव्यापारव्यधिकरणफलाश्रयत्वाभा
वादितिभावः।अवतिष्ठतेइति।प्रधानभूतधात्वर्थाश्रयत्वादितिभावः।विषयत्वापत्तिमात्रेति।तत्समानाधिकरणव्यापारवाचकादित्यर्थः ॥

न्यूनाधिकभावेति। विनिगमनाविरहादेवकारेणोभयोरपि व्यवच्छेद इति भावः। एवकारस्यान्ययोगव्यवच्छेदपरत्वादाह। अधिकेति। एवञ्चाण्यन्तावस्थावाक्यद्वयेपि प्रत्यस्मस्त्येकैकस्याह्वेञादीनां मते
पि न दोषः। न्यूनत्वमात्रव्यवच्छेदस्तु नोक्तः असंभवात्। अध्यारोपितप्रेषणद्वितीयकक्ष्यायां सूत्रस्य दुर्वारत्वेन व्यवच्छेद्यवाक्यवैयर्थ्यापतेश्च। कर्मत्वावस्थायां कर्मनिष्ठफलव्यापारयोरुभयोरपि
द्वितीयायामादायेति। अणौ या क्रिया सैव चेदित्यस्य न्यूनाधिकभावव्यवच्छेदपरत्वेदं बोध्यम्। अधिकव्यवच्छेदमात्रपरत्वे तु प्रथमामप्यादाय तत्संभवात्। कर्तृस्थक्रियमुदाहरति। एव
मित्यादिना। इत्थं निवृत्तप्रेषणप्रक्रियां व्युत्पाद्य अध्यारोपितप्रेषणक्रियायामाह। यद्वेति। हेतुत्वारोपादिति। अत्रापि सौकर्यविवक्षैव बीजम्। प्रेषणांशत्यागेन प्रेषणान्तरारोपेणापि सौ
कर्यप्रतीतेरनुभवसिद्धत्वादिति भावः। अर्थः प्राग्वदिति। उदाहरणीभूतयोश्चरमकक्ष्ययो पक्षद्वयेपि प्रेषणांशभानाभावादिति भावः। आधिक्यादिति। अस्मिन्पक्षे णौ चेत्सा क्रियेत्यनेनाधि
क्यमात्रं व्यवच्छिद्यते न तु न्यूनत्वमपि। अन्यथा तृतीयकक्ष्यायामपि न स्यात्। प्रकृते तु पातप्रेषणांशत्यागेन न्यूनताध्रौव्यादिति भावः। णेरिति किम्। आरोहन्तीति निवृत्तप्रेषणान्माभूत्। न
च णौ चेदिति वाक्यशेषे श्रुतत्वात् णेरेव भविष्यतीति वाच्यम्। अणावित्यस्यापि श्रुतत्वात्। किंच उत्तरार्थमवश्यं णेरिति वाच्यमेव तदिहैव स्पष्टार्थमुक्तम्। अणौ यदित्यादि चेदित्यन्तं किम्।
अध्यारोपितप्रेषणपक्षे द्वितीयकक्ष्यायां माभूत्। अणौ यत्कर्म णौ चेत्स कर्तेति किम्। निवृत्तप्रेषणपक्षे तृतीयकक्ष्यायां माभूत्। वाक्यार्थत्रितयं सूत्रे द्वौ च पक्षावुदाहृतौ। कक्ष्यास्ततस्तिस्रश्च
पक्षयोर्या उदाहृताः॥ १॥ प्रथमस्य तृतीये हि तृतीयेन निवारिता। द्वितीयस्य द्वितीयायां तु द्वितीयेनेति सङ्ग्रहः॥ २॥ यापयतु माणवकमेकरेणुरारोहयते निषादिनमिति। ननु णिचश्चेति सिद्धम्।
न तु प्रकृतसूत्रस्य विषयः। अध्यारोपितप्रेषणद्वितीयकक्ष्यारूपत्वात्। एतेन स संततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुतामिति व्याख्यातम्। बन्धुता तं पश्यति स तां दर्शयते।
यद्वा। बन्धुताकृताधिपत्यामिव लोकः पश्यति स तु दर्शयति। उभयथापि णिचश्चेत्येव तङ्। न तु प्रकृतसूत्रेणेति दिक्। अत्रेदमवधेयम्। कर्मशब्दोऽत्र क्रियापर इति क्वाप्याऽऽकरग्रन्थेष्वपि नो
क्तं तथापि न्याय्यत्वात् श्रुतिन्यायानुगुण्याद्बाधकाभावाच्चेह तथोक्तम्॥ ७ धातुवाच्यत्वेनाकर्मकाणामंशद्वयाभिधायकत्वेपि नाधिक्यमिति बोध्यम्। आधिक्यमात्रं व्यवच्छिद्यते इति। एतदेव न्या
य्यमित्युक्तम्। अन्यथाविरुद्धस्य श्रुतत्वेपि यथा वाराणस्यां वरो मथुरायामस्ति चेद्विवाहो भवतीत्युक्ते विवाहाधिकरणत्वं मथुराया एव प्रतीयते न तु श्रुताया अपि वाराणस्यास्तथा अणौ या क्रिया सा णौ चे
त्क्रिया तत्र यत्कर्म तच्चेण्णौ कर्ता इत्युक्ते ण्यन्ताधिकरणत्वमेवात्मनेपदस्य प्रतीयते न त्वण्यन्ताधिकरणत्वमत आह। किंचेति ॥

णौकर्मत्वंप्रतिपाद्यतेइति।अणौद्विकर्मकाणामेवउदाहरणत्वसंभवइतिभावः।कर्त्तृत्वप्रतिपादनादिति।अणौयत्कर्मसकर्त्तेतिवाक्येउद्देश्यतावच्छेदकावच्छेदेनविधेयान्वयस्यौत्सर्गिकत्वेनकर्मत्वावच्छेदेकर्तृत्वविधानेनकर्मसत्ताप्रतिपादनस्यकर्तुंशक्यत्वेनकर्मान्तरनिवृत्तिपरत्वस्यवक्तुमशक्यत्वादितिभावः।अणौकर्त्तृत्वादिति।कर्त्तृकर्मेतरकर्माभावस्यैवभवताविवक्षितत्वादितिभावः।ननुस्थलरूपमत्राधिकंकर्म।तस्यमूलभूताण्यन्तावस्थामनुष्याआरोहयमाणंहस्तिनंआरोहयन्तीत्येवंसौकर्यातिशयप्रतिपादनायप्रेरणावद्धिवत्तत्प्रतिपादनायै

प्राचांग्रन्थास्तुसर्वेपिप्रायेणशिथिलाइहइतिज्ञात्वाकृतङ्किंचित्स्वातन्त्र्यङ्क्षम्यतांबुधैः।तथाहि।इहसूत्रेअणौयत्कर्मणौचेत्तदेवकर्मेतिकर्मान्तरनिवृत्तिःक्रियतेनत्वणौकर्मणोणौकर्तृत्वंप्रतिपाद्यते।सकर्त्तेतिवाक्यान्तरेणतस्यकर्त्तृत्वप्रतिपादनात्।एकैकस्याङ्क्रियायांकर्त्तृत्वकर्मत्वाऽसंभवात्।नचैवंदर्शयतेभृत्यान्राजेतिभाष्यविरोधः।भृत्यरूपस्यकर्मणःसत्त्वादितिवाच्यम्।अणौयेकर्त्तृकर्मणीतद्भिन्नकर्मव्युदासेतात्पर्यात्।अत्रचोक्तभाष्यस्यैवप्रमाणत्वात्।एवञ्चस्मारयत्येनंवनगुल्मःस्वयमेवेतिकोकिलस्यकर्मत्वेपिप्रत्युदाहरणंयुज्यतइतितावत्कैयटेनोक्तम्।तच्चेत्थंव्याख्यातृभिःपरिष्कृतम्।कर्त्तरिकर्मेत्यतःकर्त्तरीत्यनुवृत्तंप्रथमयाविपरिणम्यते।यच्चयच्चयदितिनपुंसकमनपुंसकेनेत्येकशेषः।तेनाणौकर्मकर्त्राणौकर्मत्वेप्यदोषः।एवञ्चकरेणुरारोह्यतेनिषादिनमितिमाघप्रयोगोप्युपपद्यतइति।अत्रेदंवक्तव्यम्।एवंवर्णयतांकैयटादीनांप्रकृतसूत्रस्थभाष्यवार्त्तिकग्रन्थाःसर्वएवविरुध्यन्ते।आरोहयमाणोहस्तीस्थलमारोहयतिमनुष्यानित्यत्रातिव्याप्तिशङ्कायांमनुष्यानितिकर्मणःसत्त्वान्नातिव्याप्तिरितिहिप्रथमप्रघट्टकेस्थितम्।कर्मकर्त्तृत्वात्सिद्धमितिशङ्कायांकृविणोर्निवृत्त्यर्थंनियमोयमितिद्वितीयप्रघट्टके।कर्त्तृस्थभावकार्थमिदंसूत्रमितितृतीयेप्रघट्टके।तत्राद्योविरुद्धः।मनुष्याणामणौकर्त्तृत्वात्।वफलांशवृद्ध्यादिकर्मकत्वकरणात्।एवञ्चोर्ध्वदेशःतत्स्थंवस्तुतदुभयसंयोगानुकूलोव्यापारोधात्वर्थः।स्थलशब्देनगजपृष्ठस्थंकाष्ठमयमुपवेशनस्थानमुच्यते।आरोहन्तिहस्तिनंहस्तिपकाइतित्वारोहयमाणइत्यस्यैवमूलभूतम्।आरोहयमाणइत्यन्तंसूत्रोदाहरणप्रदर्शनम्।दृष्टान्तार्थंहस्तीतिमध्यमणिन्यायेनोभयान्वयि।यथातत्रानेनात्मनेपदञ्जायतेतथात्रापिस्यादितिप्रथमप्रघट्टकाशयइतिचेन्न।मनुष्याःस्थलमारोहन्तीतितन्मूलण्यन्तावस्थाप्रदर्शनपरतद्व्याख्यानग्रन्थविरोधात् ॥

इतएववास्वरस्यादाह।द्वितीयोपीति।एवञ्चसकर्मकस्थलेकर्मवद्भावप्राप्त्यातेनसिद्धमितिमद्भुमविरोधःस्पष्टएव।ननुअद्धारोपितप्रेषणतृतीयकक्षायांकर्तुःसमानधातौकर्मस्थक्रियया
तुल्यक्रियत्वाभावेनकर्मवद्भावाप्रवृत्त्याकर्मकर्तृत्वात्सिद्धमित्यसङ्गतंकर्मवत्कर्मणेत्यत्रप्रत्यासत्त्यायत्रधातौपूर्वकर्तुःकर्मवद्भावस्तस्मिन्धातौकर्मस्थक्रिययातुल्यक्रियत्वग्रहणा
दितिचेन्न।निवृत्तप्रेषणपक्षमादायतत्प्रवृत्तिसंभवात्।हस्तीन्यमवतीत्यर्थबुद्धेकश्चिद्धस्तिनंन्यमभावयतीत्यस्यार्थस्यानियततयाभावेनतदर्थबोधकशब्दमात्रोपस्थितावयमेवग्राह्यो
यंनेतिअत्रविनिगमनाविरहात्।नहिपक्षद्वयमूलकःप्रयोगोन्यतरपक्षमादायैवोपपाद्यइत्यत्रमानमस्तीत्याशयइत्यन्यत्रविस्तरः।अतएवनेति।कर्मवद्भावप्राप्तेरेवतृतीयोपिद्वय
द्वितीयोपिविरुद्धः।लटुक्तरीत्याकर्मवद्भावस्यैवाभावात्।कर्मवत्कर्मकाणामितिहिवार्तिकम्।अतएवनतृतीयोपि।किंचैतदेस्यविस्मृतिरेवेत्यंसत्यापततीतिम
हानयंमहतामपिप्रमादः।कर्मान्तरनिवृत्तिपरस्यवाक्यस्यनिष्फलत्वमेवस्यात्।उदाहरणदौर्लभ्यात्।नह्ययोगेकर्तृकर्मणीतद्भिन्नकर्मणोसंभवतियदनेनव्याव
र्त्येत।यदपिजयादित्येनोक्तम्।यत्तग्रहणमनन्यकर्मार्थम्।आरोहन्तिहस्तिनंहस्तिपकाः।आरोहयमाणोहस्तीस्थलमारोहयतिमनुष्यानितिणिलेनैवंगृहीत्वाश
नचप्रकृत्यन्तर्गतस्यणेरभावेकर्मणोहस्तिनएवतिङ्प्रकृतिभूतण्यन्तार्थकर्तृत्वादितितस्याशयः।तदपिन।प्रत्यासत्त्यैवगतार्थत्वात्।तथाहिद्वाविहणिचौ।तत्रा
द्येकृतमेवात्मनेपदम्।आरोहयमाणइति।द्वितीयेतुअणौकर्मणःस्थलस्यणौकर्तृत्वाभावात्प्राप्तिरेवनास्ति ॥७॥ इत्यलमनाविरुद्धजल्पैः।किंचेति।मनुष्याःस्थलमारोह
न्तीतितन्मूलण्यन्तावस्थाप्रदर्शनपरतद्व्याख्यातग्रन्थरीत्येदम्।यत्तग्रहणमिति।अणौयत्कर्मसचेण्णौकर्ताइत्यर्थउक्तरीत्यानिष्फलत्वेनग्राह्यम्।कर्मव्याप्येति[illegible]पुंसकयोर्भ
तमितिरुद्रकोशात्कर्मशब्दःपुंस्यपिनतुस्थलमारोहन्तिमनुष्याइत्यण्यन्तावस्थायांकर्मणःस्थलस्यणौकर्तृत्वाभावात्कथमत्रप्राप्तिरित्यतआह।णिलेनेति।प्राप्तिरेवनास्तीति।नियतो
पस्थितत्वेनोदाहरणभूतण्यन्तमूलस्यैवात्यन्तप्राणावित्वेनग्रहीतुमुचितत्वमितिभावः।किंचणिलेवैकवङ्क्षहेतावश्य[illegible]गौकर्मणोणौकर्तृत्व[illegible]तिपादयत्यणौकर्मातिरिक्तकर्म
तापिसर्वत्रवक्तुंशक्यत्वात्आरोहयमाणइत्यत्रात्मनेपदोपसक्तिरित्यपिबोध्यम् ॥

निर्विषयतापत्तेश्चेति। यत्तु ग्रहणमनन्यकर्मार्थमित्यनेनैव [illegible] तोक्तेरुक्ते च आत्मनेपदवारणे सिद्धे समानक्रियत्वबोधकपदस्य वैयर्थ्यापत्तिः। न च तत्र क्रियाशब्दो धातुपरस्तेन धातुभेदे प्रवृत्तिर्नेति वाच्यम्। कर्मवत्कर्मणेत्यस्येवास्यापि धातुभेदे प्रत्यासत्त्यैव वारणसंभवात्। धात्वन्तरघटितकक्ष्यायास्तन्मूलत्वाभावाच्चेत्यपि बोध्यम्। उक्तरीत्येति। समानक्रियत्वाभावादिति भावः। द्वितीयकक्ष्यायामतिव्याप्तेरिति। मद्यापि यदपि हरदत्तेनोदाहृतम् आरोहन्ति हस्तिनं हस्तिपकाः तानारोहयति हस्तीति तदपि न। एतद्धि अध्यारोपितप्रेषणपक्षस्य द्वितीयकक्ष्यायां रूपम्। तत्र च समानक्रियत्वमेव नास्ति। णिच्व्यापारान्तरोपादानात्। ततः किमिति चेत्तत्त्वग्रन्थविरोधः। तथा हि। णौ चेद्ग्रहणं समानक्रियार्थमिति हि जयादित्यग्रन्थः। णिच्प्रकृत्युपात्तक्रियायामेव यथा स्यात्। प्रयोजकाभावलक्षणे भिन्नक्रियाभेदे माभूदित्येतदर्थं णौ चेदित्यत्र अणावित्यनुवर्त्य अणौ यत् प्रतिपाद्यं वस्तु णौ चेत्तदेव प्रतिपाद्यमिति व्याख्येयमिति हरदत्तग्रन्थः। तथा च तेनैव गतार्थत्वात् यत्तग्रहणमनन्यकर्मार्थमिति जयादित्यग्रन्थस्य तद्व्याख्यातृग्रन्थानां च निर्विषयतापत्तेश्चेति। यदपि जयादित्येनोक्तम् आकर्तेति किम्। आरोहन्ति हस्तिनं हस्तिपकाः तानारोहयति महामात्र इति। तदप्येतेन प्रत्युक्तम्। यत्त्वत्र हरदत्तेन कर्मान्तरसद्भावादेव न भविष्यतीत्यादि विचारितं तद्धेयमेव। उक्तरीत्योदाहरणस्योक्तिसंभवाभावादिति दिक्। यत्तु प्राचा अणौ यत्कर्म स एव ण्यन्तस्य कर्ता चेत्येकवाक्यतयैव व्याख्यातम्। तन्न। अध्यारोपितप्रेषणे द्वितीयकक्ष्यायामतिव्याप्तेः। यद्यपि प्रसादकृता अणौ यत्कर्मेत्यादि खण्डानेव यत्र छित्त्वा जयादित्यवैयाकरणानुसारेणैव मूलग्रन्थोऽयं व्याख्यातः तथापि मूलाशुद्धेः सर्वाशुद्धिर्दुर्निवारैव। यदपि प्रसादग्रन्थोपष्टम्भेन प्राचोक्तग्रन्थं व्याचक्षाणा आहुः णौ चेद्ग्रहणं समानक्रियार्थमिति वाक्यार्थो भाष्यकारेणनाश्रितः। प्रयोजनाभावात्। तथाहि ण्यन्तादात्मनेपदं भवति। अणौ यत्कर्म णौ चेत्स कर्तेत्युक्ते प्रत्यासत्तेरेतल्लभ्यते। येन णिचा ण्यन्तादात्मनेपदं विधित्सितं तस्यैव णिचोऽण्यन्ते तत्प्रकृतिभूते धातौ यत्कर्म स एव चेत्कर्ता तस्मिन्नेव ण्यन्त इति। ततश्च यथा आरोहन्ति हस्तिनं हस्तिपकाः आरोहयमाणो हस्ती भीतांश्चेत्यत्र तिसूत्रेणैवात्र धातुभेदे न भवति॥ एवं प्रयोज्यप्रयोजकभावभेदेऽपि न भविष्यति। अत एव तृतीयवाक्यार्थो भाष्ये नादृतस्तेनाचार्यैरप्युपेक्षितः। स एव ण्यन्तस्य कर्ता चेदिति एकवाक्यतस्यैव प्रतीतेः स्वारसिकत्वात्। एवं च अध्याहारव्यवहितान्वयकल्पनाभ्यां वाक्यार्थद्वयोपक्षेपवर्णनं प्राचोक्तमनादेयम्। अनर्थकानेकक्लिष्टकल्पनापत्तेः। न चात्र पक्षे णौ चेद्ग्रहणं व्यर्थम्। असति हि तस्मिन्नणौ यत्कर्म स कर्तेत्युक्ते एकवाक्यतयैवासंबन्धः स्यात्। ततश्च कर्मान्तरनिवृत्तिर्न कृता स्यात्। अतः कर्मान्तरनिवर्त्तकवाक्यभेदापादकं णौ चेद्ग्रहणमवश्यं कर्त्तव्यमिति। अत्रेदं वक्तव्यम्। भाष्यकारेणनाश्रितत्वमसिद्धम्। भाष्यस्थानां कर्मशब्दानां क्रियापरत्वम्। कर्ता चेदिति वाक्ये तु कारकपरत्वमित्याश्रित्यैव भाष्यव्याख्यानाश्रितत्वात्। अन्यथा सूत्रसमाप्तिपर्यन्तं सकलस्य भाष्यग्रन्थस्यासंभवदुक्तिकत्वापत्तेः॥ ७६ ध्यानशीलात्प्रथमप्रपट्टकस्य भाष्योदाहरणेऽप्यतिव्याप्तेरित्यपि बोध्यम्। भट्टेति। कर्मान्तरनिवृत्तिपरतयापि व्याख्यानमित्यर्थः। एवं प्रयोज्यतिते नाध्यारोपितप्रेषणपक्षतृतीयकक्ष्यायां नटोऽपि इति तद्ग्रन्थेऽस्पष्टम्। द्वितीयवाक्यार्थ इति। समानक्रियत्वघटित इत्यर्थः। अध्याहार इति। प्रतिपाद्यं वस्त्वित्यादेः। व्यवहितान्वय इति। अणौ यदित्यस्य व्यवहितस्य णौ चेदित्यन्यत्रान्वयः।

कुत्रस्यश्चेति। अध्यारोपितप्रेषणपक्षाभावे तैस्तयोक्तेरितिभावः। परस्परव्याहतमिति। एतदेवात्रदूषणंसारम्। निष्फलतायाइति। स्थलमारोहयतीत्यादेः समानक्रियत्वाभावेनैववारणात्। निष्कर्षइति। मद्री
त्येत्यादिः। प्राथमिकबोधमादायेति। लक्षणातात्पर्यग्राहकतयेत्यपिबोध्यम्। सार्थक्येति। प्रयोगसार्थक्येत्यर्थः। णिचः कर्मपदस्यचेति। णिजन्तसज्ज्ञानविषयोभवतीत्यर्थेलक्षणाया णिजन्तपरगमाया
पदप्युक्तंप्रयोजनाभावादित्यादिनभविष्यतीत्यन्तम्। तदक्लिरमसात्। अध्यारोपितप्रेषणेहिअणौहस्तीकर्मतन्नैवणौसएवकर्तेतिस्पष्टम्। तमश्वकथंप्रयासत्वात्तदुदाहरणम्। कुत्रस्यश्च
प्रयोज्यप्रयोजकभावेभेदः। ननुणिजर्थाधिक्यंब्रूमइतिचेत्। किंततः। नह्येतावताणौकर्तुर्णौकर्मत्वङ्गतम्। दृष्टान्तश्चातिविषमः। रुहिसिधिप्रकृतिकयोर्णिचोस्तत्रभिन्नत्वात्। यद्यपिए
कवाक्यत्वप्रतीतेःस्वारसिकत्वादित्युक्त्वाकर्मान्तरनिवर्तकवाक्यभेदापादकंणौचेद्ग्रहणमित्युक्तम्। तदपिपरस्परव्याहतमितिस्पष्टमेव। अगत्यातत्स्वीकृतमितिचेन्न। तस्यनिष्फलता
याउक्तत्वात्। कैयटाद्यनुरोधेनैवंब्रूमइतिचेत्। प्रसादकारोपितर्हिजयादित्यन्यासकारहरदत्ताद्यनुरोधेनमूलग्रन्थमभांक्षीदिति किंतेनापराद्धम्। तस्मात्कैयटप्रभृतिअर्वाचीनप
र्यन्तंसर्वेषांग्रन्थाद्दृहशिथिलाएवेतिस्थितम्। निष्कर्षस्तुमुनित्रयाविरोधेनकृतएव। स्यादेतत्। कर्मकर्तरिमूलोदाहरणानि। कर्मवद्वा वस्तुकर्तृस्थभावक्रियात्वान्नेतिसिद्धान्त
शरीरंभाष्यवृत्त्यादिनिष्कर्षेस्थितम्। एवञ्चउदाहरणप्रत्युदाहरणयोरकर्मत्वस्यावश्यकतयाभाष्यवृत्त्यादिषुकर्मप्रयोगोनुपपन्नः। दृश्यन्तेचसः दर्शयतेभृत्यान्राजेतिभाष्ये। स्मरयत्ये
नंवनगुल्मःस्वयमेवेतिभाष्यवृत्त्योः। तस्यकागतिरितिचेत्। अत्राहुः। अविवक्षितमिहकर्मेति। तेषामयंभावः। गभीरायांनद्यांघोषइत्यत्रगभीरनदीपदार्थयोरभेदबोधानन्तरन्तीरल
क्षणायामपिप्राथमिकबोधमादायगभीरपदसार्थक्यवदिहाप्यध्यारोपितप्रेषणपक्षेद्वितीयकक्ष्यायांकर्मण्यन्वितेततोणिजर्थस्येवकर्मणोपित्यागेणिचःकर्मपदस्यचप्राथमिकबो
धमादायसार्थक्यंस्वज्ञाप्यसंबन्धोलक्षणेत्युपगमात्। ज्ञाप्यस्यचेहविशिष्टवाक्यार्थरूपत्वात्। एषैवचार्थवादेप्राशस्त्यलक्षणायाङ्गतिः। सएषसिद्धान्तव्याख्योपायः। स्थापनेतुशब्दप्र
योगेकर्मविनिर्मुक्तमेवप्रयोक्तुमुचितमितिदिक्॥ ७ वश्यकत्वात्। एवंणिजुत्पत्तयेदर्शनानुकूलभृत्यनिष्ठव्यापारविषयाप्रेरणेतिबोधस्यात्मनेपदापावश्यकत्वेनतदभिप्रायेणेनमित्यस्यप्रयो
गइतिभावः। स्वज्ञाप्येति। काकज्ञाप्यवाद्यार्थसंबन्धेत्यर्थे[illegible]त्यकर्मिकाराजकर्तृकादर्शनविषयाप्रेरणैर्थकस्यवाक्यस्यस्वार्थसंबद्धेराजकर्तृकदर्शनविषयीभवनमित्यर्थेलक्षणेतिभावः ॥
स

भृत्यादीनस्माद्दर्शयते भृत्यान् राजेत्यादिलक्ष्यस्य कर्मरूपाणाम्। शुद्धाभेदेति। द्वितीयकक्ष्यया सहास्त्यनर्थाभेदाङ्गीकारादित्यर्थः। कर्मवाक्यस्य। उदाहरणभूतकर्मघटितवाक्यस्य। तादर्थ्याऽश्रयणात्।
प्रथमबोधार्थत्वाश्रयणात्। इहविशेषेति। उत्कण्ठापूर्वकस्मरणरूपविशेषस्यार्थः। उच्चारणवृत्तिरिति। असकृदुच्चारणवृत्तिरित्यर्थः। अत्रात्मनेपदन्तात्पर्यग्राहकम्। अतएवनिसर्गीप्त्येरि
तिद्विलचा। स्मरतेरिति। मित्संज्ञकस्येति शेषः। तेनाभिज्ञः स्मारयति देवदत्तेनेत्येव।। नयागफलमिति। अशुत्यालोकतो वा यदुद्देशेन यागपाकादिप्रवृत्तिर्बोध्यते तत्फलमिति भावः। प्रसिद्धार्थस्य प्र
भृत्यादीनां परित्यागाच्छुद्धाभेदपरिग्रहात्। कर्मवाक्यस्य तादर्थ्याश्रयणान्निस्तरेत्सुधीः।।१।। सर्वत्रेदं मूलमेव ध्वनितम्। प्रकृतमनुसरामः। स्मरति वनगुल्ममिति। अत्रापि विस्मरयतेन
मिति भाष्यवृत्त्योः प्रयुक्तम्। तच्च प्राथमिकबोधाभिप्रायेणेत्युक्तमेव तदध्यारोपितप्रेषणपक्ष एव। पक्षान्तरे कोकिलस्य कर्मत्वाऽसंभवात्। यद्यपि गतिबुद्धीति सूत्रे ज्ञानसामान्यार्थ
कानामेव ग्रहणात्स्मरतेश्चेह विशेषवाचित्वादणौ कर्तुः कोकिलस्य तत्रापि कर्मत्वं दुर्लभम्। तथाप्येतद्भाष्यबलादेव गतिबुद्ध्यादिसूत्रे स्मरतेरपि परिग्रहो बोध्यः। णिच्श्चेत्यात्मनेपदं मिथ्येति।
इह करोतिरुच्चारणार्थत्वादकर्मकः ण्यन्तस्तूच्चारणवृत्तिः सकर्मकः। स्वरितञितः। ऋत्विज इति। दक्षिणादिकं तु न यागफलम्। उक्तं हि हरिणा। यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पच
दयः। तत्प्रधानं फलं तेषामलाभादि प्रयोजनमिति।। पचापाकः केचित्तु प्रयोजकव्यापारवृत्तिभ्यो धातुभ्यस्तद्द्योतकमात्मनेपदमनेन विधीयते। कुरुते कारयतीत्यर्थः। कारयते इ
त्यत्र तु प्रयोजकव्यापारद्वयमर्थः। णिजन्तादपि चियया। कर्त्रभिप्राय इति सूत्रांशोऽपि कर्तृपदस्य हेतुकर्तृपरत्वादुक्तार्थतात्पर्यक एवेत्याहुः। उक्तं च हरिणा। क्रियाप्रवृत्तावारब्धा ताः के
श्चित्स्वार्थपरार्थता। असतीवासतीवापि विवक्षितनिबन्धना।।१।। केचित्तु कर्त्रभिप्रायेणिचा सह विकल्प्यते। आत्मनेपदमन्येषां तदर्थाप्रवृत्तिर्यथा।।२।। कोऽपि स पचते धत्ते चिनोति
चिनुतेपि च। आप्तप्रयोगाद्दृश्यन्ते येषु ण्यर्थोऽभिधीयत इति।। असतीवेत्यनेन कमलवनोद्घाटनं कुर्वते ये इत्यादयः प्रयोगाः समर्थिताः। तत्रापि स्वार्थताविवक्षायाः संभवात्। ण्यर्थस्य वाच
कत्वे तर्कं वा आत्मनेपदमिति मतद्वयसङ्ग्रहो तु डुकृञ्चिविदिति श्लोकः। चिनोति चिनुत इति। सङ्ग्रहाति संज्ञाहयति चेति क्रमेणार्थः। णिचश्च। अत्र कश्चित्। लम्भयतेः स्वरितेत्करणात् ज्ञापका
त् चुरादिणिजन्तादिदमात्मनेपदं नेति मन्यते।।७।। स्वार्थमाहेतुकर्तृपरत्वादिति। अभिप्रायः प्रेरणाक्रियारूपफलगते प्रयोजककर्तृप्रेरणाविषयत्वे द्योत्ये आत्मनेपदमिति सूत्रार्थ इति भावः। इत्याहु
रिति। अत्रारुचिबीजन्तु भाष्यानुक्तत्वम्। किञ्चान्तर्भावितण्यर्थतयैव तदुपपत्तौ प्रयोजकव्यापारे आत्मनेपदविधाने मानाभावः। परस्मैपदेऽपि पञ्चभिर्हलैः कर्षतीत्यादौ तत्प्रतीतये अन्तर्भावितण्यर्था

[illegible]

१ न्याय्यमेवेति॥आधृषीयत्वेन पक्षे णिजभावादिति भावः॥

नचलनार्थत्वमिति।किन्तु स्यन्दनार्थत्वमिति भावः।स्यन्दनत्वञ्च द्रवद्रव्यजन्यतावच्छेदकं चलनत्वव्याप्यजातिविशेषरूपमिति चलनार्थत्वमिति बोध्यम्।अयथकपमिति।निगरणशब्देन भक्षणमिव न पादमीति सूत्रेण ग्रहणात्पानमपि गृह्यते।यद्यपि द्रवद्रव्यस्य गलादधःकरणं पानं तथापि द्रवः द्रव्यस्योपलक्षणत्वेन धात्वर्थत्वाभावान्निगरणार्थत्वमस्त्येवेति भावः।वस्तुतः पानेना आहचास्वरितत्वात्तु हि क्यादौ लशिश्लेकष्टुरादिष्विति।तन्नेति बहवः।चन्द्रो हि णिजभावपक्षे स्वरितेत्त्वं चरितार्थमित्याह।मैत्रेयादयस्तु स्वरितेत्त्वमनाकरमित्याहुः। तदेतत्सर्वं हरदत्तोपि सञ्जग्राह।एषविधिर्नचुरादिणिजन्तात्स्यादिति कश्चन निश्चिनुते स्म।आप्तवचोत्र न किंचन दृष्टं लक्ष्यते स्वरितेत्त्वमनार्षमिति॥समुदाङ्।आङ्पूर्वकस्य वचनं सकर्मकार्थम्।अकर्मके त्वाङो यम हन इत्येव सिद्धम्।अनुप।अकर्मकाच्चेत्येव सिद्धे वचनमिदं सकर्मकार्थमिति ध्वनयन्नुदाहरति।गाम्नानीत इति॥इत्यात्मनेपदम्।।परेर्मृषः।योजादिकस्येति।सहिस्वरितेत्।शाकटायनमते त्वनुदात्तेत्।उभयथापि न्याय्यमेवेह ग्रहणम्।उपाच्च।सकर्मकविषयमिदमुत्तरसूत्रानुरोधात्।अतएवाहस्य उदत्तमिति।बुधयुध।इह प्रद्रुस्रूणां यदा न चलनार्थत्वं तदर्थं ग्रहणम्।चलने तु उत्तरसूत्रेणास्तिद्धम्।निगरण।निगरणं भक्षणम्।अदेः प्रतिषेध इति।एतच्च ग निबुद्धौ इति सूत्रे भाष्य उक्तम्।वृत्तिकृते हस्वस्थले योजितम्।अथ कथम्।नपीयतां नामचकोरजिह्वयाकथञ्चिदेतन्मुखचन्द्रचन्द्रिका।इमाङ्गिमाचामयसेन च सुपीचिरञ्चकोरस्सभवन्नु खस्य शी इति श्रीहर्षः।आङ्पूर्वाच्चमेरनेन परस्मैपदे चित्यात्।सत्यम्।आचामयेति लोडन्तं न्क्किव्यात्।नाचामयेरिति व्याख्येयम्।अस्मी ईः लक्ष्मीः तया सह वर्त्तमाना सेः।ततः संबोधने सु।सलक्ष्मीके हे दमयन्ति इत्यर्थः।अणावकः।अणौ किं आरोहयमाणं प्रयुङ्क्ते आरोहयते।णेरणाविति सूत्रेउदाहरणत्वेन योऽकर्मको निर्णीतस्तस्माद्द्वितीये णौ माभूत्।स हि णावकर्मकः।न्यग्भवती त्यर्थे पर्यैस्तु न स्योक्तत्वात् ॥

नपिपासानिवृत्त्यनुकूलो व्यापारः।भक्षणन्तु निवर्त्तको व्यापारः।सर्वेषामिन्द्रियाणां बुभुक्षापिपासे स्यैतरेयोपनिषदि स्पष्टम्।संबोधने सुरिति।पञ्चमी समासस्यानि लत्याएङ् ह्रस्वादेर्निर्सुङिलोप इति भावः।अणौ किमिति।न च तदभावे विशेषणद्वयविशिष्टात् ण्यन्तादित्यर्थं मूलोक्तोदाहरणे परस्मैपदानुपपत्तिः।बुधादिसूत्र साहचर्येण

वस्तुतः निकण्यन्तादिलिङ्गा स्पष्ट इति पक्षः॥

स॰श॰ तदतिरभसादिति।नस्यभ्वादेः पाठादितिभावः।निवृत्तप्रेषणतयेति।निवृत्तधात्वर्थस्य धिकरणप्रेषणतयेत्यर्थः।समानाधिकरणप्रेरणयाचणिचः साधुत्वमितिकेचित्।भेदस्येति।चुरादिणि
३२॰१ केचित्तुस्वार्थण्यन्ताद्धेतुमण्णावित्यस्यप्रत्युदाहरणमाहुः।तद्भाष्यादिविरुद्धम्।तथाहि।बुधादिसूत्रादिहणेरित्यनुवर्त्तते।बुधादिभ्यश्चहेतुमण्णिरेवसंभवतीतितद्
न्तादेवायंविधिः।अणावितिनिषेधोऽपिप्रत्यासत्तेस्तस्यैवन्याय्यः तेनचुरादिण्यन्ताद्धेतुमण्णौपरस्मैपदंभवत्येवेतिभाष्यादौस्थितम्।अतएवचेतयमानंप्रयुङ्क्ते चेतयत
इतिकेषांचित्प्रत्युदाहरणंवृत्तिकृतादूषितम्।तत्रचितसञ्चेतनेइतिचुरादिष्वाकुस्मीयेधातुर्बोध्यः।यत्तुन्यासकारहरदत्ताभ्यांव्याख्यातञ्चितीसञ्ज्ञानेचुरादिरकर्मक
इतितदतिरभसात्।एतेनरूपयतेहरिरितिप्राचःप्रत्युदाहरणंप्रत्युक्तम्।रूपरूपकरणेचुरादिः।रूपाख्यस्यकर्मणोधात्वर्थेऽन्तर्भावादकर्मकः।ततोहेतुमण्णिचिवृत्ति
कारदूषितेनचेतयतइत्यनेनसमानयोगक्षेमत्वात्।वस्तुतस्तुउभयमपिसमर्थयितुंशक्यम्।तथाहि।स्वार्थण्यन्तादेकस्मिन्नेवहेतुमण्णौचेतयतिरूपयतीत्यस्तुना
पि म।तयोर्निवृत्तप्रेषणतयाऽकर्मकतामाश्रित्यद्वितीयेहेतुमण्णौतुप्रत्युदाहरणत्वङ्केनवार्यते।युक्तञ्चैतत्।रूपयन्तंप्रयोजयतीतिविगृह्णताप्राचायुक्तिणिज्भ्यांप्रकृ
तिद्वयंवदताहेतुमण्णिद्वयस्यविवक्षितत्वात्।हेतुमण्णेरेकत्वेहिप्रयुङ्क्ते इतिशुद्धेनयुजिनैवव्यग्रहीष्यत् नतुणिजन्तेनेतिदिक्।यत्तुप्रसादकृतोक्तंणिग्रहणेणिजातेराश्र
यणात्भेदस्याविवक्षयेदमितितन्नभाष्यादिविरोधादुपेक्ष्यमेव। धापयेतइति।प्रत्यवसानार्थत्वात्शिशुमित्यस्यकर्मत्वम्।समीचीइति।प्रथमाद्विवचनम्।वाच्छन्दसी
तिपूर्वसवर्णदीर्घः॥इतिपदव्यवस्था॥भावोभावनेति।उत्सर्गाद्भवतेर्णिजन्तात् एरजितिभावः।एरजण्यन्तानामितित्वनार्षम्।कल्यादिभ्यःप्रतिषेधमात्रंहिभाष्येस्थि
तम्।कल्पोसञ्ज्ञोर्थइतित्रयरावोदाहृताश्चेत्यवधेयम्।भवतेरुत्पत्त्यर्थत्वंण्यन्तस्यभवतेःशुद्धेनकरोतिनातुल्यार्थत्वञ्चदर्शयति।उत्पादनाक्रियेति।धातुत्वेनेति।तच्चजा
तिः।वृद्धिसूत्रेआदैच्शब्दस्यजातिशब्दत्वादितिवदताकैयटेनतथाध्वनितत्वात्तूहेलाराजीयादौस्पष्टन्तथाभिधानाद्वेतिभावः॥ ७ चूहेतुमण्ण्योरित्यर्थः।तत्तुभाष्येति।तत्र रा॰मः
हिचुरादिण्यन्ताद्धेतुमण्णौपरस्मैपदमुक्तम्॥ ॥इतिपदव्यवस्था॥ ॥एरजिति।ततएवयुचिभावनेतिबोध्यम्।तथाध्वनितत्वादिति।सञ्ज्ञाशब्दानाञ्जातिशब्दत्वस्यध्वनितत्वादितिभावः। ३२॰१

भावनाप्रतीयतइति।नचविध्यर्थप्रवर्त्तनयासाक्षिप्यतइतिवाच्यम्।विध्यभावेपितत्प्रतीतेः।नहितव्यादयोविधावेवेतिनियमः।पक्तेत्यादौविधिसंभावनायाअप्यभावाच्च।ननुमास्तुतत्रत
त्प्रतीतिरतआह।कारकेति।हेत्वन्तरमाह।अस्तिचेति।तदुपपादयति।किङ्कर्त्तव्यमित्यादिना।पक्तेत्यादेःपाककृत्वेत्यादिविचारणाच्चेत्यपिबोध्यम्।नचतत्रकर्त्तृकर्मभ्यान्तदाक्षेपः।पक्ते
त्यत्रतद्प्रतीतेर्दुर्वारत्वात्।किंचाक्षिप्तायांपदार्थान्तरस्यान्वयापत्तिः।अन्यथाधूमोयंज्वलतीत्यपियोग्यंस्यात्।किंचतद्देवाक्षेपेणपचतीत्यादावपितत्प्रतीतिसिद्धावनन्यलभ्यस्यश
ब्दार्थतयातिङान्तत्रशक्त्यनापत्तेः।नचतत्रापिप्रत्ययवाच्याभावना।तत्रकाष्ठैःपाकइत्यापत्तेः।कर्त्तृव्यापारस्त्विति।शब्दशक्तिस्वाभाव्याद्धात्वर्थसमानाधिकरणभावनैवतत्राख्यातार्थः।अ
धातुवाच्येति।एतेनभावनातिङ्प्रत्ययवाच्येतिमीमांसकमतन्त्वग्राह्यमितिध्वनयति।तथाहि।भोक्तव्यमित्यादौतिङन्तत्वंविनापिभावनाप्रतीयतेकारकापेक्षाचदृश्यते।अस्तिचक
रोतिसामानाधिकरण्यम्।किङ्कर्त्तव्यम्।भोक्तव्यम्।किङ्कृतवान्।भुक्तवान्।किंच।भावयतिघटमितिवत्स्वरसतेभवतिघटमित्यपिस्यात्।तुल्यार्थत्वात्।दृष्टान्तेहिकर्त्तुःकुंभकार
स्यव्यापारंयाजाचष्टेदार्ष्टान्तिकेत्वाख्यातप्रत्ययः।ननुप्रयोजकव्यापारोणिजर्थःकर्त्तृव्यापारस्त्वाख्यातार्थइतिवैषम्यमितिचेत्।कारकचक्रप्रयोक्तुःकर्त्तृत्वेघटस्यातथा
त्वात्।यदितुधातुनोक्तक्रियेनित्यंकारकेकर्तृतेष्यतइतिभर्तृहरिप्रतिपादितरीत्याप्राधान्येनधातूपात्तव्यापारत्वरूपंकर्तृत्वन्तवापिसम्मतंकस्तर्हीदानीमाख्यातार्थः।
व्यापारस्यधातुनैवाभिहितत्वात्।अपिच।धातोःसकर्मकाकर्मकत्वविभागउच्छिद्येत।अकर्मकाच्चेत्यादिसूत्राणिचविरुध्येरन्।ननुसिद्धान्तेपिक्रियायाःकर्मापेक्षानिय
मात्कथमकर्मकतेतिचेत्।फलव्यापारयोःसामानाधिकरण्यवैयधिकरण्याभ्यांसकर्मकाकर्मकविभागाभ्युपगमात्।किंच।ज्योतिष्टोमयाजीत्यादौकरणेयजइतिणिनि
रस्मत्पक्षएवसङ्गच्छते॥७ त्वभौविलण्यर्थतातुनसर्वत्रेतिनतदापत्तिरितिभावः।ननुतिङ्योगेतिङर्थभावनाश्रयत्वमेवतन्मतेकर्त्तृत्वन्तदर्थभावनाव्यधिकरणफलवाचकत्वञ्
धातूनांसकर्मकत्वन्तत्समानाधिकरणार्थवाचकत्वञ्चाकर्मकत्वम्।भावनाचव्यापारसामान्यन्तुकृतिरितिरथोगच्छतीत्यादौनदोषइत्यरुचेराह।किंचज्योतिष्टोमेति।अस्मत्पक्षएवेति
परमतेतुतदसङ्गतिः।प्रत्यासत्त्यासमर्थःपदविधिरितिपरिभाषणेनचयज्यर्थनिरूपितकरणेउपपदेतन्निरूपितकर्त्तरिवाच्येणिनिरितितदर्थः।सचतन्मतेऽसङ्गतइतिस्पष्टमेव।

तदुपात्तांशान्तरस्य।यज्युपात्तस्यागरूपस्य।भाव्यतयेति।पचतीत्यादावित्यर्थः।करणतयेति।शब्दशक्तिस्वभावादितिभावः।स्त्रीत्वस्येति।यदितत्रटाबादीनांद्योतकतयाविशेषणत्वन्तर्हि धातुत्वेनधातूपात्तांभावनांप्रतियजित्वेनतदुपात्तस्यांशान्तरस्यकरणत्वात्पचादयोहिधातुत्वेनभावनामाहुः।तच्चांशान्तरंभावनांप्रतिप्रायेणभाव्यतयासङ्गच्छते।ज्योतिष्टोमयाजीत्यादौतुकरणतया।ज्योतिष्टोमाख्येनयागेनस्वर्गंभावितवानित्यर्थप्रतीतेः।स्पष्टञ्चेदंणिनिविधौहरदत्तग्रन्थे।एतेनद्व्यर्थःपचिरितिभाष्यंव्याख्यातम्।भट्टिश्चाह।विभज्यसेनांपरमार्थकर्मासेनापतींश्चापिपुरन्दरोयान्।नियोजयामाससशत्रुसैन्येकरोतिरर्थेष्विवसर्वधातूनिति।ननुक्रियायाधात्वर्थत्वेपचतीत्यादावेककर्त्तृका वर्त्तमानापचिक्रियेतिक्रियाविशेष्यकोबोधोनस्यात्।प्रत्ययार्थंप्रतिप्रकृत्यर्थस्यविशेषणतयाऔपगवादौक्लृप्तत्वादितिचेन्न।प्रत्ययार्थःप्रधानमितिह्युत्सर्गः।सचेहत्यज्यते।क्रियाप्रधानमाख्यातमितिस्मरणात्।पाचिकेत्यादौस्त्रीत्वस्यविशेषणत्वाभ्युपगमाच्च।प्रस्तुतेतवैवपचतीत्यादावनुपपत्तिः।पचन्तंपश्येत्यादौयत्तुशानचोःकर्तृप्राधान्यस्यसर्वसम्मततयातिङ्क्ष्वपितथात्वापत्तेः।शत्रादीनान्तिङाञ्चलादेशत्वस्याविशिष्टत्वाच्च।आदेशानाञ्चस्थानिस्मारकत्वेस्थान्यर्थाभिधायित्वेवार्थैक्यध्रौव्यात्।अतएवहियुष्मदिसमानाधिकरणेमध्यमःअस्मद्युत्तमइत्यादिपुरुषव्यवस्थासङ्गच्छते।अभिहितेकर्त्तरिप्रथमेत्यादिच।नचससानाधिकरणद्रव्यनेनस्वाभिधेयसंख्यान्वयित्वमभिहितशब्देनचाभिहितसंख्याकत्वंविवक्षितमितिवाच्यम्।सूत्राननुगुण्यात्।कृत्तद्धितसमासैःसंख्याया अनभिधानात्तदभिहितेपितृतीयाप्रसङ्गाच्च।नचकृत्स्वनभिधानमेवकर्त्तुरनभिधानमितिवाच्यम्।भावार्थकलकारेपिकर्त्तरिप्रथमापत्तेरितिदिक् ॥

प्रकृतेपितथावक्तुंशक्यम्।कृतीति।भावनेत्यर्थः।दिगिति।तदर्थस्तुभावलकारेकर्त्रादिकारकान्वयानापत्तिः।तत्रापितस्यावाच्यत्वेतदन्वयिनिसंख्यान्वयाङ्गीकारेणद्विवचनाद्यापत्तेः।किंचसमानकर्त्तृकयोःपूर्वकालेइतिसूत्रासङ्गतिः।समानकर्त्तृकक्रिययोःपूर्वकालवृत्तिक्रियायांवर्त्तमानाद्धातोःक्त्वेतितदर्थादिति ॥

न सामानाधिकरण्यमिति। असत्वभूतक्रियायाः सत्वार्थकयुष्मदादिसामानाधिकरण्यासंभव इति भावः। भाष्यमिति। यकृत्सूत्रे इति आदिः। द्रव्यधर्मानिति। एवञ्च घटादिपदप्रतिपाद्यघ
टादिद्रव्ये इव लिङ्गादिहेतुना घञन्तादिप्रतिपाद्ये सत्वमनुमीयत इति भावः। इदमप्यव्ययकृदतिरिक्तविषयम्। कृत्येषु नपुंसके तरलिङ्गयोगाभावेनासत्वव्यवहारः केषाञ्चिदिति बो
ध्यम्। अनन्वितास्मादिति कारकाणामसत्वभूतक्रियान्वयित्वनियमादिति भावः। घञादौ। घञाद्यन्ते। आख्यातशब्दे। तिङन्ते क्रियाप्रधानेवा। भागाभ्याम्। प्रकृतिप्रत्ययाभ्याम्। साध्यम्। क्रिया
धात्वर्थः। साधनं कारकं प्रत्ययार्थः। सुपआदिष्विति। सिद्धत्वसाध्यत्वोभयविशिष्टो धात्वर्थो घञन्तवाच्यः सिद्धत्वरूपो धर्मश्च घञ्द्योत्यस्तदाह। साध्यत्वेनेत्यादि। सत्वभावस्त्विति। तथा च
सामानाधिकरण्याभावादिति। भावाभिधायिनो हि लकारस्य कापि न सामानाधिकरण्यं कर्माभिधायिनस्तु तत्संभवात्पुरुषत्रयमपि स्यात्ययमुदाहरिष्यते। लिङ्गाच्चेति। कृद्वाच्या
या तु सत्वरूपत्वमिष्टमेव। तथा च भाष्यम्। कृदभिहितो भावो द्रव्यवत्प्रकाशते इति। द्रव्यधर्मान् लिङ्गसंख्याकारकादीन् गृह्णातीत्यर्थः। अत एव पाकं पाकेनेत्यादौ यथायथमन्विती
यादयः। न चैवमोदनस्य पाक इति कर्मणि षष्ठ्यनन्वितास्यादिति वाच्यम्। घञादावपि प्रकृतिभागस्यासत्वापन्नक्रियाभिधायित्वाभ्युपगतात्। उक्तञ्च हरिणा। आख्यातशब्दे भागाभ्यां
साध्यसाधनवर्तिता। प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः। साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। सत्वभावस्तु यस्तस्याः स घञादिनिबन्धन इति। यत्तु अमृतरसप्रस्यं
न्दमाध्वीकभूरिति कुसुमाञ्जलिश्लोकेऽमृतस्य रसः। रस्यमानममृतमिति यावदिति व्याख्यानं तत्रोपष्टम्भकत्वेन कृदभिहितो भावो द्रव्यवत्प्रकाशत इति वर्धमानेनोपन्यस्तं प्रा
चीनग्रन्थं व्याचक्षाणैश्चानुमोदितं न तत्सर्वमतिरभसात्। तथा हि। रस इति न भावे कृत्। रस्यमान इति विवरणेन सह विरोधात्। यत्तु द्रव्यवदित्यस्य द्रव्यविशेष्यिकां प्रतीतिं जनयतीत्यर्थ
वर्णनं तदपि निर्मूलमनुशासनविरुद्धं चेति दिक्। ॥ ७ कर्तरि कृदिति सूत्रे भाष्ये इदं सूत्रं भावाव्ययकृत्यर्थम्। न च भावे घञिति नियमात् अन्ये कृतो भाव इति वाच्यम्। अन्यः स भावो वाच्यः प्रकृत्यर्था
त्। एतद्भावे हि इमे आभ्यन्तरे स्युरित्युक्तम्। पाकेन कृतमित्यादिव्यवहाराच्च स्त्रियामित्यादिना भावविशेषणाच्च। वर्धमानेनेति। द्रव्यवदित्यस्य द्रव्यविशेष्यिकां प्रतीतिं जनयतीति तदर्थ इति तदाश
यः। तदाह। यत्त्वित्यादिना। दिग्मिति। तदर्थस्तु रसपदस्य द्रव्यपरत्वे कर्मधारयेण तस्य पूर्वनिपातापत्तिः। अमृतादिवद्रसशब्दस्य रूढत्वाच्च। किं च सर्वत्र भाव एवमेवापत्तौ कर्मणि प्रत्ययविधानेनोपप
त्तौ भावप्रत्ययविधानवैयर्थ्यञ्चेति ॥

मैद्राव यमादिति। उपमानानां बहुत्वे नोपमेयेऽपि तिङर्थेऽपि बहुत्वारोपेण प्रत्ययः अन्यथोपमाने बहुत्वोपादानवैयर्थ्यं स्यादिति भावः। लिङ्गेति। लिङ्गाभावमादायभिन्नतिङ नार्थे कर्तृकर्माति
रिक्तकारकत्वाभावमादाय चाऽसत्वमिति भावः। व्यवहिताश्चेति। सदृट् चिण्वच्चेत्येवंरूप इत्यर्थः। पूर्ववाक्ये इति। उत्तरवाक्ये चेत्यपि बोध्यम्। तत्राद्योदाहरणं हरिः सेव्यः लब्धकाम्येति। अत्र
एकवचनमेवेति। प्रायोक्षादोयम्। भाष्ये उद्वासिका आस्यन्ते हतशायिकाः शय्यन्त इत्यत्र बहुवचनस्य स्वीकारात्। उष्ट्राणां हि आसिकाः स्वस्वतएव विलक्षणाः हत्ताश्च नाना प्रकाराः घोर
नेउष्ट्रानावतानाः विकीर्णकेशाः तिस्रश्च तसश्च। तत्रश्च यादृशानि हतानां शयनानि तादृशानि देवदत्तादिभिः क्रियन्त इत्यर्थः। अत्र सादृश्याद्यवगमाद् आख्यातवाच्यस्यापि भावस्य भेदा
वगमाद्बहुवचनम्। आसिकाः शायिका इति च द्वितीया बहुवचनम्। क्रियाविशेषणत्वेन कर्मत्वात्। नचैवं क्लीबत्वमेकवचनं च स्यादिति वाच्यम्। स्त्रियां क्तिन्नित्यधिकारात् स्त्रीत्वा
वधारणेन सामान्ये नपुंसकमित्यस्याप्रवृत्तेः। बहुत्वावधारणेन एकवचनाप्रवृत्तेश्च। नचैवं सप्तम लोकविरुद्धेति वाच्यम्। लिङ्ग· क्रियानाधारकारकयोगाभावमात्रे तात्पर्य
मित्युक्तत्वात्। स्यसिची। यद्यप्यजादयो द्वन्द्वेन निर्दिष्टास्तथाप्युपदेश इत्यस्य च एव विशेषणं हनादीनामव्यभिचारात्तदाह। उपदेशे योऽजिति। अत्र प्राचा उपदेशेऽजन्तेभ्यो हना
देश्च परेषां स्यादीनामिड्वा स्यात्। सदृट् चिण्वच्चेति व्याख्यातं तन्न। सूत्रे हि स्यादयः सप्तम्या निर्दिष्टाः अजादयश्च षष्ठ्या। चिण्वद्भावश्च प्रधान शिष्टः इट् तु चकारेण तत्सन्नियो
गशिष्टः चिण्वदिति च सप्तम्यन्ताद्वतिः। स्यसिच्सीयुट्तासिष्विति प्रतियोगिनि सप्तमी निर्देशात्। नचैतस्य सर्वस्य भङ्गे न विपरीतव्याख्याने बीजमस्ति। चशब्दस्य व्यवहिता
न्वयो निर्मूलः। स्यादेतत्। सूत्रस्वरसानुरोधेनैवं स्यात्। अडादिवत्। अत इड्विधिवाक्ये स्यादीनामिति विभक्तिविपरिणाम आवश्यकः इति चेत्। सत्यम्। पूर्ववाक्ये च
रितार्थस्य उत्तरत्र विपरिणामो न्याय्य एव। तत्र तु यथाश्रुतविभक्तेरचरितार्थत्वात् अनुचितो विपरिणामः ॥
स्यतु कर्त्तृकर्मणी गुणश्चानिर्दिष्ट इत्यर्थवत्सूत्रस्य भाष्य प्रयोगः। अचरितार्थत्वादिति। सर्वथाऽचारितार्थत्वादित्यर्थः ॥

इत्यपि प्रयोक्तुमुचितमिति। स्वायत्ते शब्दप्रयोगे इतिभावः। इडप्युदात्तः स्यादिति। एवञ्चेडन्तस्याङ्गत्वाभावात्ततः परस्य प्रत्ययत्वाभावाच्च लुकोऽप्राप्तिरितिभावः। प्रत्ययत्वाभ्युपगमादिति। एवञ्च तदादिग्रहणेनाङ्गत्वमपि सुलभमितिभावः। उक्तस्यापीति। इटइवइटः परस्यापि चिणिदृष्टप्रत्ययत्वमिव चिणः परेऽपि दृष्टप्रत्ययत्वस्याऽतिदेशसंभवादितिभावः।

तथाहि। हरिः सेव्यः तद्वत्काश्चेति प्रयोगे उत्तरवाक्ये सेव्या इति विपरिणामं दृष्ट्वा न हरिः सेव्या इत्यपि प्रयोक्तुमुचितम्। यदप्याहुः [illegible] विबहुलं दर्शनादिति। तदपि भक्तिवादमात्रमितिस्पष्टमेव। किंच। प्राचां व्याख्याने चिण्वदिति तृतीयान्ताद्वतिः। तत्र यथा पूर्व[illegible]ते। एवं स्वस्य स्वस्मात्परस्य च कार्यमतिदिश्येत। ततश्च चिणि वेडप्युदात्तः स्यात्। चिणः परस्येव इटः परस्यापि लुक्प्रवर्त्तेत। ननु बा[illegible]नेन प्रत्ययावयवतया प्रत्ययत्वाभावादिति चेन्न। कृते प्यागमेऽवशिष्टस्य त्वया प्रत्ययत्वाभ्युपगमात् झोन्त इति सूत्रे प्राचां ग्रन्थव्याचक्षाणैस्तथैव निर्णीतत्वात्। किञ्च वृद्ध्यादिकार्यस्य प्रत्यये परे विहितस्य इटि परे कथं निर्वाह इत्याशङ्क्य चिणि दृष्टस्य सर्वस्यैवातिदेशे प्रत्ययत्वस्याप्यतिदेशान्न दोष इति। तत्प्राचां ग्रन्थव्याचक्षाणा एवाहुः। तत्कथमुक्तस्यापि प्रत्ययत्वं न लभ्येत। यत्तु वदन्ति। चिणो लुकि चिण्वदिटोऽसिद्धत्वादिति। तदपि न। नहि चिण्वदित्यतिदेशं प्रति इडसिद्धः। अतिदेशस्य निर्विषयत्वापत्तेः। तथा च लुकोऽपि वृद्ध्यादिसमकक्षत्वेनातिदेशो दुर्वार एवेत्यलमतिक्षोदेन। ननु यदि चिणि दृष्टमात्रस्यातिदेशस्तर्हि हनिणिङादेशा अपि स्युः। घानिष्यते। आयिष्यते। अध्यायिष्यते इति। मैवम्। अङ्गाधिकारबलेनाङ्गस्यैवातिदेशात्। नचैते आङ्गाः। तदेतदाह। अङ्गकार्यमिति। सीयुट इति। तथा च सीयुट्शब्देन तद्विशिष्टं लक्ष्यत इति भावः ॥

निर्विषयत्वापत्तेरिति। चिण्वदित्यस्य कार्यातिदेशतयाऽनेनातिदिश्यमानकार्याणामाभीयत्वेन तत्रेटोऽसिद्धत्वेऽतिदेशस्य निर्विषयतापत्तिरितिभावः। अङ्गादिति। अङ्गाधिकारस्यादित्यर्थः। सीयुण्मात्रस्यार्धधातुकत्वासंभवादाह। तथा चेति ॥

विधिलिङिति। प्रस्नुवीते स्वयम्। तत्र हि कर्मकर्तरि न दुहेति यक्‌निषेधः। प्रकृते च हनादिसाहचर्येणाजन्तधातुरूपाङ्गस्यैव ग्रहणम्। एतेन यकाख्य बधानद्स्याऽप्रवृत्तौ कथं विधिलिङो व्यावर्त्यत्वमित्यपास्तम्। वलादित्वं नास्तीति। लिङः सलोप इति सलोपादिति भावः। निरपेक्षो ह्यसाविति। अतो नित्योऽसाविति भावः। परः। सार्वत्रिकः। अनित्य इति। तत्सापेक्षत्वादिति भावः। एवञ्च ऋद्धनोरित्यादेरपि तत्सापेक्षत्वादनित्यत्वं बोध्यम्। तदन्तत्वमस्त्येवेति। अङ्गस्य धातोर्वेति शे-

आर्द्धधातुक इत्यनेन व्यावर्त्यस्तु विधिलिङ्। न च तत्र वलादित्वं नास्तीति वाच्यम्। तस्येहानपेक्षणात्। यदाहुः। नित्यश्चायं वल्‌निमित्तो विघातीति। अस्यार्थः। भाविष्यत इत्यादौ भूस्य इति स्थिते परमपि वलादिलक्षणमिटं बाधित्वा चिण्वदिडेव भवति। सत्यामपि शब्दान्तरप्राप्तौ कृताकृतप्रसङ्गित्वमात्रेण भुवो वुक इव नित्यत्वाद्वलादित्वनिरपेक्षो ह्यसौ॥ परस्त्वनित्यः। अस्मिन्कृते वलादित्वविघातात्। एवञ्च नित्यत्वात्तैङ्भ्योऽप्ययमेवेड्भवति। एतेन उपदेश इति किम्। भाविष्यते। अत्र गुणावादेशयोः कृतयोर्नेस्यादिति प्रसादग्रन्थः प्रत्युक्तः। चिण्वदिटो विषये वल्‌निमित्तस्याप्रवृत्तेरेवादेशस्यासंभवात्। गुणमात्रे प्रवृत्ते त्वजन्तत्वानपायात्। उपदेशग्रहणफलन्तु मूल एव स्फुटीभविष्यति। चिण्वदिट इति। ननु ण्यन्तस्य धातोरुपदेशाभावात्कथमिह चिण्वदिट्। न च णेरुपदेशादुपदेशे योऽच् तदन्तत्वमस्त्येवेति वाच्यम्। आरिता स्मारितेत्यादौ परत्वान्नित्यत्वाच्च रपरे गुणे कृते चिण्वदिडभावापत्तेः। न हि रान्तस्योपदेशे योऽच् तदन्तत्वमस्तीति चेन्नैवम्॥ ७ षः। न च ण्यल्लोपाविति पूर्वविप्रतिषेधेन गुणं बाधित्वाणि-

लोपप्रवृत्त्याऽल्विधौ स्थानिवत्त्वाभावेनोपदेशे योऽच् तदन्तत्वन्दुरुपपादमिति वाच्यम्। गुणात्परत्वादार्द्धधातुकस्येडित्यस्य प्राप्तस्य तन्नित्यत्वेन बाधित्वा चिण्वदिट एव प्रवृत्तेर्न दोष इति भावः। न हि रान्तस्येति। भूनीप्रभृतीनामपि गुणे उपदेशे योऽच् तदन्ताभावाच्चेत्यपि बोध्यम्। उपदेशग्रहणसामर्थ्यादिति। तत्सामर्थ्यादादेशद्वारापि तदन्तत्वं विवक्षितमिति भावः॥

यदजन्तन्तस्येति। तदन्ताङ्गस्येत्यर्थः। उपदेशग्रहणसामर्थ्याच्छब्दरूपं विशेष्यमादाय वा तदन्तविधिः। तेन चाङ्गस्य विशेषणात्पुनस्तदन्तविधिरिति भावः। प्रकारान्तरमाह। व्यधिकरणेति। एवमन्वयोपि तत्सामर्थ्यादेव बोध्यः। अपदेशिवद्भाव इति। तेन णिचो जन्तत्वमिति भावः। यद्वा अण्यन्तेङ्गमेवाङ्गावयवस्तेन न्यायेनेति भावः। कारितेत्यत्र तदन्ताङ्गत्वमपदेशिवद्भावेन। आरितेत्यत्रोभयमप्यपदेशिवद्भावेन। स्मारितेत्यत्रोभयमपि मुख्यमेवातदन्ताङ्गस्येति व्याख्याने इति बोध्यम्। चिण्वद्वृद्धिरिति। चिण्वद्भावप्रयोजनं वृद्धिरित्यर्थः। वृद्धिरन्त्यवृद्धिरुपधावृद्धिश्च। दीर्घश्चोक्त इति। शासिताशमितेत्यादौ। अत्र दीर्घे चिण्वत्त्वं नासिद्धमाभीय उपदेशे योजिति व्याख्याने तु उपदेशग्रहणसामर्थ्यादेव आरितेत्यादौ प्रवृत्तिर्णीकारात् अस्तु वा उपदेशे यदजन्तन्तस्येति व्याख्यानम्। अङ्गस्येति व्यधिकरणषष्ठी। अङ्गावयवस्याजन्तस्येति। कारिष्यन्त इत्यादौ चापदेशिवद्भावः सर्वथापि णिजन्ते चिण्वद्भावोस्त्येव। तदाहुः। चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति। इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघातीति। यत्तु ण्यन्तत्वेनाजन्तत्वं चिण्वदिडिति प्राचो ग्रन्थं व्याचक्षाणैरुक्तम्। ण्यन्तस्यात्वन्तरम्। तदुपदेशावस्थायां भवत्ययमजन्त इति। तन्न्यायविरुद्धम्। लोकविरुद्धञ्च। उपदेशो हि साक्षादुच्चारणं न च ण्यन्तस्य तदस्ति। किंच धात्वादेः षः स इत्यत्र सुब्धातोः प्रतिषेधो मुक्तः। उपदेशग्रहणबलेन तत्प्रत्याख्यातमाकरे स्थितम्। स्वयमपि तत्र तथैवोक्तम्। तदिदानीं विरुद्धेनेति दिक्। आतो युक्। चिण्कृतोः। किम्। चोडिः। वालाकिः। बाह्वादित्वादिञ्। ददौ। अदायिषातामिति। स्थाध्वोरिच्चेत्येतद्बाधित्वा परत्वाच्चिण्वदिटि कृतेऽझलादित्वात्सन्नैत्याहुः ॥

सिद्धत्वस्यानित्यत्वात्। इट् चेति। स च प्रयोजनमित्यर्थः। इश्धातोश्चिण्वत्सन्नियोगशिष्टेट्प्रवृत्तिरेव चिण्वत्त्वप्रयोजनमित्यर्थः। चादिट् च इत्यत्रोपस्थितत्वादिडेव गृह्यते। एवं च णिलोपश्चान्तेऽयमसिद्धो नान्यत्र। अत एव सत्सूत्रप्रत्याख्याने चेन णिलोपः साधितो भाष्ये इति बोध्यम्। चोडिरिति। न चाचामादेरित्यनुवृत्त्या निस्तारः। दरिद्रायके दोषापत्तेः। ददाविति। औत्वन्तूत्तमे णित्त्वाभावपक्षे चरितार्थमिति भावः। अझलादित्वादिति। इको झलित्यत्र तदनुवृत्तेरिति भावः ॥

अनुवृत्तावप्याह। सत्यपीति। विशेष इति॥ इति। वाक्यार्थबोधकाले बाधकाऽभावेन हन्तेरपि सीयुटा संबन्धेन तस्य निरवकाशत्वात्तस्य संस्कारवेलोपस्थितव बाधः। सीयुट्त्तु तदंशविषये चरितार्थ इति भावः। व्याख्यान इति। निरवकाशत्वरूपस्य बाधबीजस्याभावादिति भावः। ग्रन्थार्थेति। निरवकाशत्वरूपेऽस्यर्थः। परस

स[illegible]स्मिन्नेह काचित्क्षतिः। अनिग्लक्षण[illegible]रूपनिषेधेः। आशीर्लिङीति। ननु लुङि तत्रोभयोरपि वैकल्पिकतया येन नाप्राप्तिन्यायाभावादिति भावः। विशेषविहितत्वादिति। लिङीति हि पदद्वयसाधारणम्। सीयुट्त्वात्मनेपद एवेति विशेष इति भावः। एतेन स्य सिच्सूत्रे प्रतिपदविधेर्बलीयस्त्वाच्चिण्वद्भाव इति कैयटग्रन्थो व्याख्यातः। यत्तु तत्र नागेशोक्तम्। अत्र यद्यपि वध्यादेशोपि प्रतिपदविधिस्तथापि विप्रतिषेधाच्चिण्वद्भाव इत्याशय इति। यच्च तत्परिष्कारार्थं प्राचोग्रन्थं व्याचक्षाणैरुक्तम्। यद्यपि परात्वं [illegible] बलीयस्तथापि परशब्दस्येष्टवाचित्वाच्चिण्वद्भावेन व्यवस्थेति तस्याप्याशय इति। तदेतत्सर्वं कैयटग्रन्थापर्यालोचनमूलकमिति मूल एव ध्वनितम्। पक्षे [illegible]षीष्टेति। इह प्राचा पक्षे वधादेश इत्युक्तं तत्सम्यगेव यत्तु तत्र तत्सौत्रेणोक्तं वधादेश इति परमतम्। स्वमते तु वधादेशोऽत्र न भवत्येव। तथा चोक्तं महाभाष्ये। चिण्वद्भावे कृते पुनः प्रसङ्गाद्वधभावः कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा। हनि णिङादेशप्रतिषेधश्चेति। तदेतद्भाष्यार्थानवबोधविजृम्भितम्। लिङीति परसप्तमीम्। स्यसिच्सूत्रे आर्द्धधातुक इत्यस्यासंबन्धश्च प्रौढिवादेन सीयुटस्य प्रवृत्तं वधभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेनेति वार्त्तिकं व्याचक्षाणेन भाष्यकृता चिण्वद्भावपक्षे खलु वधादेशाभाव उक्तः ॥

ͦ सप्तमीमिति। विषयसप्तम्यामन्तरङ्गत्वेन विप्रतिषेधायोग इति भावः। इत्यस्यासंबन्धश्चेति। तत्संबन्धे हि सीयुड्यात्मनेपदस्य विशेषविहितत्वाच्चिण्वत्त्वस्यापवादत्वेनाऽयुक्तो विप्रतिषेध इति भावः ॥

रूपाऽनन्यस्येति। एतत्सुष्ठु पास्पद इत्यत्रोपपादितम्। अष्टत्रिंशत्संख्यासर्वथादुरुपपादैवेत्याह। अष्टत्रिंशदिति। घटादिरिति। घटादावनूदित इत्यर्थः। कैयटग्रन्थे इति। अत्रारुचिबीजं तु ऊकालोच्कमेर्णिङिति सूत्रभाष्यप्रामाण्येन घटादावस्य पाठोऽसांप्रदायिक इत्यन्यत्र निरूपितम्। यङोऽल्लोपस्येति। यन्तु चिण्वद्भावविरहेऽपि। तत्कथं स्यसिच्सूत्रारूढमपि विकल्पं विस्मृत्य मुडमपि मूलमभ्युङ्गीक्रियते। यदपि हन्निणिङादेशेत्याद्युक्तम् तदपि न। अनाङ्गस्याप्यतिदेशे प्राप्ते वार्त्तिककृताद्यानिष्पतेरित्यादौ तदुक्तेः भाष्यकृताऽङ्गाधिकारबलेन तत्समाधानाच्च। न च लिङि लुङि च साक्षादुद्दिष्टस्य वधेरतिदेशापत्तिः। उदाहृतश्चात्र वधादेशः भाष्यकारप्रभृतिमाधवान्तैस्सर्वैरेवेति दिक्। अहसातामिति। चिण्वदिटोऽभावे हनः सिजिति कित्वादनुदात्तोपदेशेत्यनुनासिकलोपः। चतुर्भिरधिकं शतमिति। यत्तु [illegible]सलोपो वा सस्यद इति केचिदिति पुनर्द्वित्वमिति वा प्रामाणिकद्वयं सञ्चार्य लोपविकल्पादिप्रपञ्चेनेह अष्टत्रिंशद्रूपाणि भवन्तीति वदन्ति। तत्रोक्तिसंभवं न पश्यामः। पुनर्द्वित्वे रूपानन्त्यस्य दुर्वारत्वात्। अष्टत्रिंशद्याख्याया एव पुरस्कारे मूलाभावाच्चेत्यास्तान्तावत्। अवष्टभ्येति। तदपि पूर्वत्रासिद्धमिति सूत्रसिद्धार्थकथनमित्युक्तन्न विस्मर्त्तव्यम्। अस्मिन्निष्कृष्टपक्षे चिण्णमुलोरिति सूत्रे दीर्घग्रहणं कर्त्तव्यमेव। तथाहि। हेड अनादरे घटादिः। एचइक्। हिडयति। अत्र चिण्णमुलोः कृतयोर्ह्रस्वविकल्पमते। अहिडि। अहेडीति स्यात्। दीर्घे तु। अहिडि। अहीडि इति भवति। एतच्च चिण्णमुलोरिति सूत्रे कैयटग्रन्थे कमेर्णिङिति सूत्रे हरदत्तग्रन्थे च स्पष्टम्। दीर्घो नास्तीति। यङोऽल्लोपस्य स्थानिवत्त्वेन णिच्स्वरलाभावादुपधावृद्धेरप्रवृत्तेरिति भावः। नोदात्तोः। कथन्तर्हि हरे यदक्रामि पदैककेन खमिति श्रीहर्षः। प्रमाद एवायम्। यदि समाधेयमेवेत्याग्रहस्तर्हि निवृत्तप्रेषणात्स्वार्थे णिचि मितत्वाच्चिण्वो ह्रस्वः ॥

ङ्लुकि दीर्घो भजस्तेश्च। न हि यङ्यङ्लुकोरर्थे स्वरे वा विशेष इति भाष्ययोर्न विरोध इति भावः ॥

सञ्ज्ञापूर्वकेति। घञर्थके साधुरित्यन्ये॥ ॥ इति भावकर्मप्रक्रिया॥ ॥ फलांशेति। व्यापारसमानाधिकरणफलांशेत्यर्थः। किंतु कर्त्तृत्वमेवेति। कर्त्तृत्वाप्राप्तेः
कथमुद्यमउपरम इति। सञ्ज्ञापूर्वकविधेरनित्यत्वात्। तथा च निर्दिश्यते। अडउद्यमने। यमउपरमे इति। अथ ये द्विकर्मकास्तेषु कस्य कस्य लार्थाः
किम्मुख्ये कर्मणि उत गौणे किं वोभयोरिति सन्देहे व्यवस्थामाह। द्विकर्मकाणान्त्विति॥ ॥ इति भावकर्मप्रक्रिया॥ ॥ प्राकृतकर्मका अपीति फलाद्भि
न्नव्यापारपरत्वे हि देवदत्तादिनिष्ठव्यापारव्यधिकरणविक्लितिद्विधाभवनन्यग्भवनादिफलाश्रयाणामोदनादीनां कर्मत्वमुचितम्। कर्त्तुरीप्सि
ततमत्वात्। व्यापारांशपरित्यागेन फलांशमात्रपरत्वे तु पच्भिदिरुहामपि राध्यति द्विधाभवति न्यग्भवतीत्यादिविवरणविषयीभूतानां राध्यत्या
दिवदेवाकर्मकता। न ह्यस्यामवस्थायामोदनादेः कर्मत्वं संभवति किंतु कर्त्तृत्वमेव स्वतन्त्रः कर्त्तेति लक्षणात्। एतच्च णेरणाविति सूत्र एव प्रपञ्चितम्।
स्यादेतत्। द्विकर्मकाणामेकस्य कर्मणः प्राधान्यविवक्षायामपि अपरेण सकर्मकत्वमस्त्येव। स्वयं प्रदुग्धेस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मे
दिनीत्यादौ यथेति चेत्। सत्यम्। एककर्मकाणामेवाकर्मकताया उच्यमानत्वान्न दोषः। तदेतद्ध्वनयति। प्रायेणेति। अकर्मकत्वमुक्त्वा तदस्य फलमाह। ते
भ्यो भाव इति। भावे चाकर्मकेभ्य इत्युक्तेरिति भावः। कर्मवत्। कर्मशब्देन कर्मस्था क्रिया लक्ष्यते तदाह। कर्मस्थयेति। लकारवाच्य इति। लकारेणोप
स्थापित इत्यर्थः। द्विलकारादिति। अयं भावः। तत्र यो बहुलल्लिङ्याशिष्यङिति संहितया पाठे परसवर्णविधिलब्धलकारोपरि लद्वयं न व्यञ्जनपर
स्यैकस्यानेकस्य चोच्चारणे विशेषोऽस्तीति भाष्योक्तेः। यद्वा। लुप्तनिर्दिष्टो लकारः। लोपस्तु संयोगान्तस्येति ॥ पर्त्वाच्चेति भावः। कर्मस्थाक्रियेति। क्रि
यायाः कर्मणा साधनेन तुल्यत्वासंभवादिति भावः। लकारेणेति। लस्थानिकादेशेनेत्यर्थः। लद्वयाश्रवणादाह। न व्यञ्जनयेति ॥

पक्षान्तरेण। यणः प्रतिषेधो वाच्य इति वार्तिकादिपक्षेणेत्यर्थः। तदुपस्थाप्यलम्। तस्यानिकादेशोपस्थाप्यलम्। कर्त्तेति पदलाभोपायमाह। कर्त्तरीति। क
र्त्तृस्थ इत्यर्थ इति। यथा दर्शनारोहणाभ्यां विषयेन्यग्भूते च विशेषानुपलम्भात्कर्त्तृस्थतेति भावः। अन्येषामित्यस्यामन्येषां वनमित्यर्थमभिप्रेत्याह। उद्देश्य

अङःसाहचर्यमिति। अङःसंबन्धइत्यर्थः तेन यस्माच्छासेरङ् तत्रैवैत्वमिति भावः। दृष्टोयइति। परस्मैपदे दृष्टेभ्यः सर्त्यादिभ्यः परस्यच्लेरङित्यर्थइत्यभिमानः। वस्तुतः परस्मैपदे एवाङित्यत्र निरूपितम्। पावनइत्यस्य वनिपा सिद्धिमाश्रित्येत्वमवकारादावित्यस्य भाष्ये प्रत्याख्यानादाह। भाष्यकारीयेति। इतिपक्षइति। धीर्दीपातेर्ध्यायतेर्वेति। ध्याय क्विजुपेछन्दसि। आतोमनिन्क्वनिब्वनिपश्चेत्यधिकृत्याह। अन्येभ्योपीति। सुशर्मेति। सुष्ठु शृणातीति विग्रहः। प्रातःएतीति प्रातरित्वा। वाहभ्रडिति। वाहाद्भ्रंतं भ्रश्यतीति विग्रहः। वृत्तौतु वहाभ्रडिति पाठः। वहस्कन्धः। अन्येषामपि दृश्यत इति पूर्वपदान्तस्य दीर्घ इति हरदत्तः। आशास इति। आशिषि लिङित्यादिनिर्देशेनेदं सिद्धम्। नच शास इदङ्हलोरित्येव वाच्यम्। तत्र परस्मैपदिन एव शासेर्ग्रहणात्। तद्बीजन्तु आङःसाहचर्यम्। यद्यपि सर्त्तिशास्तीति सूत्रे पृथग्योगकरणात् परस्मैपदेप्यङिति सिद्धान्तः तथाप्युत्तरार्थतया परस्मैपदग्रहणानुवृत्तेरप्याकरे स्पष्टतया परस्मैपदे दृष्टोयं शासिः तस्मात्परस्याङिति निष्कर्षः। अत एवाशास्ते इत्यादौ नेत्वमिति भावः। सुम्नाविति। ओःसुपीति यण्। स्वःकचा। शंस्थाइति। क्विपि लुप्ते घुमास्थेतीत्वं न स्थानिवद्भावस्यानल्विधाविति निषेधात्। प्रत्ययलक्षणसूत्रन्तु नियमार्थमिति निष्कर्षात्। यत्तु कैयटेनोक्तमीत्वमवकारादाविति वचनात् भाष्यकारीयोदाहरणप्रामाण्याद्वा प्रत्ययलक्षणेनईत्वेति। तत्तु अवर्णे ङित्वादिसिद्धये प्रत्ययप्राधान्येऽल्विध्यर्थं प्रत्ययलक्षणसूत्रमिति पक्षे बोध्यम्। एतेन मित्राणि शास्ति मित्रशीरित्यत्रेत्वं व्याख्यातम्। निष्कर्षेतु शास इत् ङ्किति। ततः अङिति नियमार्थमिदम्। अजादौ चेदङ्येव नान्यत्रेति। हल्ग्रहणं मास्तु इत्यवधेयम्। स्यादेतत्। सुपि स्थः क्विप्चेति सूत्राभ्यां कक्विपोसिद्धौ तत्राह। शासीति ॥

तेः संप्रसारणमिति वार्त्तिकस्य भाष्यात् घुमास्थेत्यत्र हलीत्यस्यानजादावित्यर्थे लक्षणेति पक्षे इत्यपि बोध्यम्। तत्पक्षे प्रत्ययलक्षणसूत्रस्य नियमार्थत्वेपि स्थानिवद्भावस्य सुलभत्वात्। एतेन प्रत्ययलक्षणसूत्रस्याल्विधौ विध्यर्थत्वेन। निष्कर्षेत्विति। नियमार्थत्वेत्वित्यर्थः। कक्विपाविति। वासरूपन्यायेनेति भावः ॥

कृजष्टमिति। शङ्करोतीति नच्चीला शङ्करापरिव्राजिकेत्यत्र परत्वात्प्राप्तमित्यर्थः। बाधेनेति। नच कस्य परत्वाद्बाधेन सरूपतया च वासरूपाप्रवृत्त्यानित्यबाधेपि क्विप्तेन न्यायेन सुलभ इति वाच्यम्। धातुग्रहणाद्धि व्यन्तरकल्पनेन तत्सामर्थ्याद्धेत्वादिषु परत्वात्प्राप्तस्य टस्येव वासरूपन्यायेन पक्षप्राप्तक्विपोप्यत्र बाधात्। नच पुरस्तादपवादन्यायेन टस्यैवायं बाधको न क्विप इति वाच्यम्। येन नाप्राप्तिन्यायेन क्विप एव बाध इत्यस्यापि वक्तुं शक्यत्वात्तस्माद्बाधसामान्यचिन्तयोभयोरपि स बाधक इति। स्थः कचेति। बाधकबाधनार्थम्। नच स्थः कचेति चोल्यर्थः। वासरूपन्यायेन कस्याभावे क्विपः सिद्धेरिति वाच्यम्। अस्य धातुग्रहणप्राप्ताजपवादत्वेपि क्विबपवादत्वाभावेन धातुग्रहणबाधितक्विपं विना साधयितुमशक्यत्वादिति स्पष्टं भाष्ये। इति भविष्यतीति। अन्तवत्त्वेन धातुत्वाच्छंस्थ इत्यादावातो धातोरिति लोपसिद्धिः स्थानिव

धातुग्रहणसामर्थ्याद्धि धातुमात्राद्भवन्नच् प्रत्ययो हेत्वादिषु कृजष्टं यथा बाधते तथा तिष्ठतेः कः क्विपमपि बाधेतेति भावः। नन्वेवं शमि धातोरित्यस्यानन्तरं स्थः कचेति सूत्र्यताम्। चकारेणाचि समुच्चिते सवर्णदीर्घेण संस्थादिति भविष्यति। एवञ्चोत्सर्गापवादयोः समानदेशतया सन्दर्भशुद्धिः इत्वाभावार्थञ्च न यतनीयमिति महल्लाघवमिति चेत्। मैवम्। अच्कावशक्ताविति सूत्रेण अशंस्थ इत्यत्रोत्तरपदान्तोदात्तत्वापत्तेः ॥

त्वन्तु न। अपूर्वविधित्वादिति भावः। ईत्वाभावार्थञ्चेति। धातुग्रहणसामर्थ्यात्क्विपोप्राप्तेरिति भावः। मैवमिति। अयं भावः। पूर्वधर्मावच्छिन्नोद्देश्यकविधिस्त्वेन कृदतिङिति सूत्रस्य भाष्यरीत्या स्थानिवत्त्वस्य दुर्वारत्वात्। नचाधियावित्यादौ वियङ्ङनया रीत्या पूर्वरूपस्य स्थानिवत्त्वं स्यादिति वाच्यम्। आकारात्पूर्ववृत्तिधर्मावच्छिन्नोद्देश्यकत्वाभावात्। इवर्णान्तधातोर्हि सः। एतेन जुहुवतुरित्याद्यसिद्धिरत्र पक्षे इत्यपास्तम्। धियावित्यत्रैकादेशस्थाने हल इति दीर्घप्रवृत्तेश्च। भी ई भिय इति स्थानिवत्सूत्रस्य भाष्ये तु सौत्रत्वादियङ् लोके त्वीदृशप्रयोगोऽसाधुरेव। परनिमित्त इत्यत्र परोऽस्थानिभूत एव गृह्यत इत्यत्र न मानम्। तत्र कौण्डिन्यन्यायस्यापवादविषयत्वेनेदृशविषयेऽप्रवृत्तेरिति दूषणान्तरमाह। अच्काविस्यादि ॥

म॰श॰
३४७

गतिकारकेति।स्याधातोरन्तर्भावितण्यर्थलेशंशब्दार्थस्यकर्मत्वेनकारकत्वमितिभावः।उपसर्गान्तरमिति।पञ्चम्यन्तोपसर्गपदेनभिन्नवाच्यन्तरशब्दस्यसमासत्वेनोप
कृद्ग्रहणेगतिःकारकपूर्वस्यापीतिअर्थस्याशब्दस्याजन्तत्वात्क्विबन्तेननञ्समासेतुनञ्पूर्वपदप्रकृतिस्वरःसिद्ध्यति।आमन्त्रयितेति।ताच्छील्यस्यविवक्षितत्वा
त्तृन्।अतएवब्राह्मणानितिकर्मणिषष्ठीनकृता।भाष्यविरोधादिति।उक्तंहिभाष्ये।सुपीतिवर्तमानेपुनःसुब्ग्रहणंकिमर्थम्।अनुपसर्गइत्येवन्तदभूत्।इदंसुप्मात्रे
यथास्यात्।उदासारिण्यःप्रत्यासारिण्यइति।प्रसिद्धश्चेति।एवञ्चव्यापीत्यादिप्रयोगाअपिनिर्बाधाएव।अमरश्चप्रागुक्तः।लिङ्गशेषविधिर्व्यापीविशेषैर्यद्यबाधितइ
ति।यत्तुतत्वपदार्थीटीकायांव्यापीत्याङ्प्रश्लेषादुदासारिण्यःप्रत्यासारिण्यइतिवत्साधुइत्युक्तम्।तस्योक्तिसंभवमपिचिकीर्षताभ्रमपरंपराशरणीकर्त्तव्या।न
याहिसुबुक्तिरुपसर्गनिवृत्त्यर्थेतितावदेकोभ्रमः।तथासतिपाणिनीयानुसारिणीमित्यादौअसङ्गतिमाशङ्क्यउपसर्गग्रहणंकेवलोपसर्गपरम्।इहतुपाणिनीयादि
पदान्तरमप्यस्तीतिप्रसादादिग्रन्थंपुरस्कृत्यतत्रत्यकेवलपदस्यअसहायपरतंयानेकोपसर्गसद्भावेणिनिर्भवत्येवेत्यपरोभ्रमः।एवंसतिउत्पतिष्यामाङिःसर्त्ते
रुपसंख्यानमितिस्वोपजीव्यग्रन्थविरोधापर्यालोचनम्।उपसर्गेपीत्येतदंशव्यावृत्तिफलकमिहसुब्ग्रहणमितिवृत्तिमतेउपसर्गान्तरङ्ञिदाश्रित्यैवणिनिः
प्रवर्त्तते।नत्वनेकमप्युपसर्गमितिमतशरीरस्यापर्यालोचनंचतन्मूलमित्यास्तान्तावत्।साधुकारिणीति।एतच्चज्ञापकसिद्धम्।आक्वेरितिसूत्रेहितच्छीलात्त्यक्
साधुकारीगृह्यते।तच्चताच्छील्यंविनापिणिनौसत्येवसङ्गच्छते।ब्रह्मणिवदइति।वाचनिकमेवेदम्।अताच्छील्यार्थमितिएतच्चकैयटहरदत्तादिग्रन्थेस्पष्टम्।य
त्तुभट्टवार्त्तिकेब्रह्मवादिशब्दस्यतच्छीलतद्धर्मतत्साधुकारिपरतयाव्याख्यानंदृष्ट्वाआक्वेरित्यधिकारेणिनिविधायकंवार्त्तिकमस्तिइतिकेचिद्भ्राम्यन्तितद्भाष्यादर्श
नप्रयुक्तम्।भट्टपादानान्त्वयमाशयः।सुप्यजाताविितिसूत्रेणताच्छील्येणिनिः।उपसंख्यानेनज्ञापकेनवासाधुकारिणिआवश्यकाधमर्ण्ययोर्णिनिरितिआवश्य
केणिनिस्तुतद्धर्मेपर्यवस्यति॥७सर्गभिन्नमित्यर्थः।णिनौसत्येवेति।साधुकारिशब्देइतिशेषः।साधुकारिणीतिब्रह्मवादिशब्देणिनिरितिशेषः।णिनिस्त्विति।तत्रैवशब्देइ

रामः
३४७

यद्यपि णिनिरिति। अनेन वार्त्तिकचारितार्थ्यं दर्शितम्। नत्विति। अत एवात्ममान इति सूत्रे यगर्थे कर्मकर्तृग्रहणमिति वार्त्तिकं श्यनैव सिद्धिमाश्रित्य भाष्ये प्रत्याख्यातम्। अन्यथा तनादेः प्रत्ययवारणाय वार्त्तिकमावश्यकमेव स्यात्। कर्मणि षष्ठ्येति। कर्तृषष्ठ्या तु न समासः आत्मग्रहणसामर्थ्यादिति भावः। इति प्राप्तमिति। वत्कर्मधारयेत्यस्य न प्राप्तिः समानाधि——कारस्यस्यैव कर्मधारयत्वात्। अत्राभेदान्वयाभावेपि पूर्वपदार्थस्यैवोत्तरपदेनाभिधानाद्वस्तुतः सामानाधिकण्यम्
एवञ्च ब्राह्मणिवद् इति वार्त्तिकेन ताच्छील्यादिविरहे यद्यपि णिनिरुपसंख्यातस्तथापि प्रागुक्तरीत्या ताच्छील्यादिष्वर्थेषु सुलभ इति। एवञ्च फलितार्थकथनपरं भट्टवार्त्तिकं न त्वाक्रेरिति सूत्रव्यापारदर्शनपरमिति स्थितम्। मनः। बहुलग्रहणानुवृत्तेरिह दैवादिकस्यैव ग्रहणं न तु तानादिकस्य। तेनोत्तरसूत्रे खशि श्यनैव भवति न तु प्रत्ययस्तदाह। मन्यतेरिति। आत्ममाने। मननं मानः। आत्मशब्दः स्वपरः कर्मणि षष्ठ्या समासः। तदाह। स्वकर्मक इत्यादि। प्रत्ययार्थत्वेन संनिहितः कर्त्ता त्वपदार्थः। चादिति। यद्यपि वासरूपविधिना लभ्यत एव णिनिस्तथाप्यविच्छेदाय समुच्चीयते तेन करणे यज इत्यादौ णिनिश्चानुवर्त्तते न तु खशिति भावः। पण्डितमात्मानमिति। एकस्याप्यात्मनः स्वरूपेण कर्तृत्वं पण्डितत्वविशिष्टरूपेण च कर्मत्वं बोध्यम्। कालिंमन्येति। स्त्रियाः पुंवदिति प्राप्तं पुंवद्भावं बाधित्वा परत्वात् ह्रस्वः। यत्त्वं न क्यङ्मानिनोश्चेति प्राप्तः पुंवद्भावं प्रसादकृतो क्तन्त्वामादिकमेव। दिवामन्येति। अधिकरणशक्तिप्रधानस्याप्यस्य वृत्तिस्वभावात्कर्मत्वम्। इच एकाचः। अम्ग्रहणमिहावर्त्तते। तत्रैकेन अम् विधीयते। अपरेण प्रत्ययो विशेष्यते तदाह। स्वाद्यम्वदिति। भाष्यकारेति। अयं भावः ॥
त्वेवा। एकविशेष्यकप्रतीतिजनकत्वस्यैव सामानाधिकरण्यपदार्थत्वात्। अत एव चान्तेमहद्भूतेत्यादौ प्रकृतेः कर्तृत्वेप्यमहच्छब्दार्थस्यैवामहच्छब्देनाभिधानात्सामानाधिकरण्यप्रयुक्तपुंवत्त्वसिद्धिरिति दिक्। प्रत्ययः। प्रत्यय इति सूत्रस्य प्रत्ययपदार्थरूप इत्यर्थः ॥

ति

Sanskrit University Balmiki Campus Kathmandu

स्त्रियांवर्त्तत इति।पुंयोगादितिसूत्रबलात्स्वलिङ्गत्यागेनस्त्रियांवर्त्तत इत्यर्थः।तथेहेति।भाष्यप्रामाण्यादितिशेषः।अस्विधिसामर्थ्यादिति।समाससञ्ज्ञाप्रातिपदिकसञ्ज्ञोत्तरमङ्गेजातस्यतन्मध्यपतितत्वात्तत्ग्रहणेनग्रहहणेपितदवयवत्वाभावज्ञापनेनेतिभावः।नचस्वमोरित्यस्याप्यर्थवदमोग्रहणज्ञापनद्वाराःप्रवृत्तिःस्यादितिवाच्यम्।येननाप्राप्त्यामध्येपवादन्यायेनचसामासिकस्याप्रवृत्तिनिमित्तज्ञापनेपिस्वमोरित्यस्याप्रवृत्तिनिमित्तार्थज्ञापनेमानाभावात्।अर्थवत्परिभाषात्वनित्यत्वादत्रनप्रवर्त्तते।नचान्तरङ्गेलुक्ययमसिद्धः उत्तरपदाधिकारेन्तरङ्गपरिभाषायाअप्रवृत्तेरन्यथापरन्तपइत्यादावनुस्वारो यथाप्रष्टाद्यःशब्दाःपुंयोगात्स्त्रियांवर्त्तन्ते प्रष्टीगणिकेतितथेहश्रीशब्दःपरित्यक्तस्वलिङ्गःक्लीबःसन्कुलेवर्त्तते तत्रह्रस्वोनपुंसकइतिह्रस्वःपुम्तुन।अपवादेनामाबाधात्।स्वमोर्नपुंसकादित्यमोलुक्।नचैवंगांमन्यतइत्यादावपिसुपोधातुप्रातिप्रदिकयोरितिलुक्स्यादितिवाच्यम्।अस्विधिसामर्थ्यादेवतद्बाधात्।श्रीशब्दस्येहक्लीबत्वेप्रमाणन्तुभाष्यमेवेतिदिक्।भूते।धात्वर्थस्यविशेषणमिदम्।धातोरित्यधिकारात्।भूतार्थविद्यमानाद्धातोरित्यर्थः।सोमेनेति।सोमेनलताविशेषेणयागङ्कृतवानित्यर्थः।अग्निष्टोमेनेति।अग्निष्टोमसंस्थाकेनयागेनापूर्वंभावितवानित्यर्थः।उक्तञ्चकाशिकायाम् ॥ ७ नस्यादितिस्पष्टंभाष्ये।यत्रप्रातिपदिकस्यैवलक्षणामानसिद्धातत्रस्वलिङ्गत्यागोयत्रतुपदस्यलक्षणातत्रस्वलिङ्गात्यागइतिमर्यादेतिदिक्।वस्तुतउत्तरपदाधिकारेएषापरिभाषानास्तीत्युक्तिर्भाष्येउक्तिप्रत्युक्तिक्रमेणपूर्वपक्षिणइतिस्पष्टन्तद्विदाम्।अतएवक्रियाद्याकार्यकालपक्षेपिनअन्तरङ्गपरिभाषाप्रवृत्तिरित्यस्यविसर्जनीयसूत्रेभाष्येसिद्धान्तितत्वान्नेदंयुक्तमित्यपास्तम्।पूर्वपक्ष्युक्तित्वेनेष्टापत्तेः।एवञ्चामोसिद्धत्वाल्लुगभावेश्रियंमन्यइत्येवात्रान्तरङ्गपरिभाषायाअप्रवृत्तौमानाभावादितिबोध्यम् ॥

करणमितीति।यजेस्त्यागकरणकव्यापारे शक्तिस्तत्र व्यापाररूपभावनायाभाव्याकाङ्क्षायान्धात्वर्थस्यकरणत्वेनैवोपस्थितेः स्वतःपुरुषार्थत्वाभावाच्च सुखरूपः स्वर्गोभाव्यत्वे
नान्वेति। त्यागस्यकरणत्वञ्च भावनाभाव्यनिर्वर्त्तकत्वमेव।सर्वत्रकरणानामीदृशमेवकरणत्वम्।संस्थावचनस्यापिज्योतिष्टोमशब्दस्यतद्व्यारोपेणत्यागसामानाधिक
अग्निष्टोमःफलभावनायांकरणमिति।एतच्च भावकर्मप्रक्रियायामेवोपपादितम्।कर्मणिहनः।पितृव्यघातीति।अत्रकाशिका॥कुत्सितग्रहणंकर्त्तव्यम्।इहमाभूत्।चोरंह
तवानिति।यद्यपीदंभाष्येनास्तितथापिशब्दशक्तिस्वाभाव्याल्लभ्यतइत्याहुः।चतुर्विधइति।अयमाशयः।इहसूत्रेश्रुतत्वात्पूर्वंब्रह्मादयउद्देश्याःततोनन्तरंप्रकृतित्वाद्धन्तिः
ततःपरिशेषाद्भूतइति।क्विप्सर्वान्तेनिर्देश्यःविधेयत्वात्।तदेवंवचनव्यक्तिःब्रह्मादिषूपपदेषुहन्तेर्भूतेक्विबिति।एवंस्थितेयत्रैवकारस्ततोन्यत्रनियमइतिन्यायेननियमो
त्रभवन्अनन्तरेभवति।ततश्चब्रह्मादिष्वेवेत्यवधारणेहन्तेस्तदनन्तरंनिर्दिष्टत्वाद् उपपदान्तरसंबन्धनिवृत्तिफलोनियमोभवति।ब्रह्मादिषुहन्तेरेवभूतइतितुअनन्तरत्वा
विशेषेऽपिप्राधान्यादुपपदनियमः ब्रह्मादिषुहन्तेर्भूतएवक्विबितितुआनन्तर्य्यङ्घिःपृहन्त्योरपिशिष्टोपिप्राधान्यात्प्रत्ययनियमः।ब्रह्मादिषुहन्तेर्भूतेक्विबेवेतिवचनव्यक्तौकाल
नियमः।सोयंप्रकृत्युपपदप्रत्ययकालनियमानांविवेकः।अगृह्यमाणविशेषत्वात्तुचतुर्विधस्यापीहग्रहणम्।तत्रब्रह्मादिष्वेवहन्तेरितिप्रकृतिनियमेभूतइत्याश्रयणात्।काला
न्तरेउपपदान्तरेपिभवत्येव।पुरुषंहन्तिहनिष्यतिवापुरुषहाऽरिः।हयोरिहयोगविचक्षणः।ब्रह्मादिषुहन्तेरेवेत्युपपदनियमेपिभूतइत्याश्रयणात्।कालान्तरेधात्वन्तरादपिभव
त्येव।वृत्रंजयतिजेष्यतिवावृत्रजिदिति।भूतएवक्विबितिप्रत्ययनियमेपिब्रह्मादिष्वित्युक्तेः।पुरुषहाअरिहेतिप्राग्वत्।भूतेक्विबेवेतिकालनियमेपिउपपदान्तरेभूतेपिप्रत्ययान्तरं
भवत्येव।पितृव्यंहतवान्पितृव्यघातीति।सोपपदश्चप्रत्ययोनियमेनव्यावर्त्यते।निष्ठातुभवत्येववृत्रंहतवानिति॥ ऽरण्यात्करणत्वम्।स्वर्गादेःकर्मत्वमपिभाव्यत्वरूपमेव।नतुफ
लाश्रयत्वरूपम्।अतएवेदृशानांकामान्तपदेनैवोल्लेखइतिदिक्।लभ्यतइति।एवङ्कुमारशीर्षयोरितिसूत्रमपिकृत्स्नायामिति भूतइतिसूत्रेभाष्येध्वनितम्।ततःपरिशेषादिति।तस्य
उद्देश्यत्वेनक्विपःपूर्वमेवनिवेशादितिभावः।इत्यवधारणेइति।इतिनियमेइत्यर्थः।कालनियमइति।आनन्तर्यादितिभावः।निष्ठात्विति।मध्येपवादन्यायेनतन्निवृत्तेरभावादितिभावः॥

प्रकृतिकालेति।तथाचभाष्यम्।उभयतोनियमोयंब्रह्मादिषेवेति।क्विबेवेति।दिगिति।दिगर्थस्तुदृशिग्रहणेननिर्वाहस्यागतिकगतित्वात्विधायकत्वमेवैषांभाष्येतूदासीनमिति।अनेनै भाष्यकारस्तुप्रकृतिकालनियमावेवअशिश्रियत्।तस्यायमाशयः।धातुकालौहिनेहसूत्रेश्रुतौकिंतुप्रकरणलक्षणजघन्यप्रमाणेनोपस्थितौ।अतस्तयोरेवउपरोधोन्याय्यः।नतूपपदप्रत्यययोःश्रुत्युपस्थापितत्वात्।एवंन्यायोपष्टम्भेनभाष्येणसहविरोधात्वृत्तिमतमुपेक्ष्यमेवेतिकैयटेस्थितम्।यत्त्विहहरदत्तेनोक्तम्धातूपपदविषयंनियमद्वयंभाष्येप्रदर्शितमिति।तत्रधातुकालविषयमितिवक्तव्येउपपदग्रहणंप्रामादिकमित्यवधेयम्।सुकर्म।त्रिविधइति।धातुनियमस्त्विहनेष्यतइतिभावः।सोमेसुञः।इहापिचतुर्विधोनियमइतिवृत्तिः।एवमुत्तरसूत्रेपि।कर्मण्यग्न्याख्यायाम्।श्येनविदिति।समुदायोयमाहवनीयधारणार्थेइष्टकानिर्मितस्थलविशेषेनिरूढः।दृशेःक्वनिप्।अन्येभ्योपिदृश्यतइतिसिद्धेनियमार्थमिदंक्वनिबेवयथास्यात्।तत्सहनिर्दिष्टंमनिनादिसोपपदंचा णादिमाभूदिति।निष्ठातुभवत्येवपरंदृष्टवानिति।एवंस्थितेविश्वदृश्वनयनावयमेवेत्यादौविश्वंपश्यन्तीतिलटाविग्रहेपिनक्षतिः।प्रत्ययान्तरनिवृत्त्यर्थंसूत्रमित्येववृत्तिकारादिभिर्व्याख्यातत्वात्।कालान्तरनिवृत्त्यर्थत्वस्यचाभियुक्तैरनुक्तत्वादितिदिक्।मन्दुरायामिति।वाजिशालातुमन्दुरेत्यमरः।पुमनुजेति।इहजनिःसकर्मकः।अनुरोधविशिष्ट-जननवृत्तित्वात्।अन्येष्वपिदृश्यन्ते।अपिशब्दइति।यत्तुअन्तात्यन्ताध्वेतिप्रकरणेअन्यत्रापिदृश्यतइत्युपसंख्यातंतद्भूतकालंविनापियथास्यादित्येवमर्थम्।वस्तुतस्तुप्रकृतसूत्रस्थस्यअपिग्रहणस्यसर्वोपाधिव्यभिचारार्थत्वात्तद्वार्त्तिकमनेनैवगतार्थंविभावितञ्चेदमिकोगुणवृद्धीतिसूत्रेजनेर्डंप्रक्रम्यगमेरप्यपण्डोवक्तव्यइतिवदताभाष्यकारेण।एवञ्चप्रकृतसूत्रस्थमन्येभ्योपिदृश्यतइतिवार्त्तिकमपिगतार्थंबोध्यम्।निष्ठायामण्यदर्थे।भावकर्मणोरिति।यद्यपियाज्याकृगित्यादौकरणादपिबाहुलकाद्ण्यद्भवतितथापितयोरेवेतिवचनाद्भावकर्मणोरेवसाक्षादुपात्तोऽर्थ इतिसएवेहविवक्षितइतिभावः।क्षिक्षयेक्षिनिवासगत्योः।द्वयोरपिग्रहणम्।क्षितःकामइति।अन्त-र्भावितण्यर्थात्कर्मणिक्तः।एतच्चअक्षितोतिसनेदिममितिमन्त्रव्याख्यायांमाधवग्रन्थेस्पष्टम् ॥ ७५ वेति।अन्येष्वपीतिसूत्रेण।द्वयोरपीति।क्षीहिंसायामित्यस्यापिग्रहणंबोध्यम् ॥

निष्ठेति।एकदेशत्वादिति भावः।द्वाविंशतिरिति।यद्यपि गृघ इत्येतावपि तत्र दृश्येते तथाप्येकीयमतन्त्वादिति भावः।रदाभ्यामित्यनेन तत्र सिद्धिरित्यन्ये।पुनातेरिति।पूञ इत्यर्थः।कप्रत्यये चेति।भावेतुस्तितङ्गामेनेलुदाहार्यम्।रदाभ्याम्।इह रदाभ्यामित्यनेन तकारो विशेष्यते न निष्ठा तेन चरितं मुदित – मित्यत्र न।तकारस्येटा व्यवहितत्वात्।तदेतदाह।परस्य निष्ठातस्येति।एकविंशतेरिति।क्र्यादिषु ल्वादयो द्वाविंशतिः।तन्मध्ये पूञं विहाय ल्वादयो ज्ञेयाः।जीन इति।सिद्धत्वान्नित्यत्वाच्च संप्रसारणे कृते संयोगादेरित्यस्याप्राप्तिः।गून इति।गुपुरीषोत्सर्गे।विनष्टा इति।धातूनामनेकार्थत्वात्पुनातेर्विनाशे वृत्तिः।सिनो ग्रासः इति।पिण्डीक्रियमाणो ग्रासो यदा दध्यादिव्यञ्जनवशाद्बन्धनेनुकूलो भवति तदा कर्मण एव कर्तृत्वं बोध्यम्।यस्य विभाषा।यस्येत्यार्द्धधातुकापेक्षा षष्ठी यद्वा यस्यार्द्धधातुकस्येत्यर्थः।उदक्तमिति।उत्थितमित्यर्थः।द्यून इति।क्षीण इत्यर्थः।द्यूतमिति।विजिगीषया हि तत्राक्षाः पात्यन्त इति गम्यते विजिगीषा।क्षीबादिष्विति।क्षीबृ मदे।कृश तनुत्वे।लाघृ शक्तौ।उत्पूर्वः।एभ्यः क्तः।ननु फुल्ल विकसने अस्मात् उल्लाघेश्च पचाद्यचि इतराभ्यामिगुपधलक्षणे कप्रत्यये च फुल्लादयः सिद्ध्यन्ति तत्किं सूत्रेणेत्यत आह।सूत्रितन्त्विति।निवृत्त्यर्थमित्युपलक्षणं फुल्लवानिति रूपस्य निष्ठा च द्व्यजनादिति स्वरस्य च सिद्ध्यर्थमिति बोध्यम्।वेत्तेस्त्विति।तथा च भाष्यम्।वेतेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते। वेतेर्विन्नश्च वित्तश्च भोगे वित्तश्च विन्दतेरिति।पूर्त इति।श्र्युकः कितीति नेट्।मूर्त इति।आदितश्चेति।मत्त इति।श्वीदित इति।भुज्यत इति भोगः प्रतीयत इति प्रत्यय इति।कर्मसाधनावेताविति व्याचष्टे।नास्य प्रतीतेर्वेति।भित्तं शकलम्।भिदेः क्ते नत्वाभावो निपात्यते।भित्तं शकलखडे इत्यमरः।भिन्नमन्यदिति।विदीर्णमित्यर्थः।ऋणमाधमर्ण्ये।अधमं दुःखप्रदमृणं यस्य सोधमर्णस्तस्य भाव आधमर्ण्यम्।तेन च व्यवहारविशेषो लक्ष्यते।तेनोत्तमर्णोपि सिद्ध्यति।धातोरुत्तमर्ण इति निर्देशश्चेह लिङ्गम्।स्फायः स्फी।कथं तर्हि स्फीतिका म इति।स्फीत इति प्रसिद्धिः स्फीतिः।आख्यानण्यन्तादचइः।यस्येति।निरः कुष इति विकल्पितेट्त्वादिति भावः।उषित इति।यजादित्वात्संप्रसारणम्।शासिवसीति षः।क्षुधित इति।एवञ्च तस्यालमेषा क्षुधितस्येति प्रयोगमुट्टङ्कु।क्षुधे भावे क्विपि तारकादित्वादितजिति यद्धातुवृत्तिषूक्तन्तद्दृष्टेवा।समानन्यायतया क्षुधितादावुपयोक्ष्यत इति वा बोध्यम्।अञ्चेः उदित्वात् क्त्वायां विकल्पे प्राप्ते निष्ठायां यस्य विभाषेति वचनम्।अञ्चित इति।नाञ्चेः पूजायामिति नलोपनिषेधः।लुभः।तीषसहेति।क्त्वायां विकल्पो निष्ठायां निषेधे च प्राप्ते वचनम्।पूङश्च।श्र्युकः कितीति निषेधे प्राप्ते वचनम्।पूङः क्त्वा च।उत्तरार्थमिति ॥ ७ भावे चानर्थकप्रत्यये चेत्यपि बोध्यम्।रूपस्येति।इदं वृत्तिकारोक्तेःस्यभिप्रायेण।भाष्यमिति।वित्तो भोगे इति सूत्रे इति शेषः।आदितश्चेतीत्यस्यानिडिति शेषः ॥

स·श· अन्यथेति।यद्यपिकर्त्तासिद्धस्तथापितद्गतनिमित्तत्वस्यविधेयत्वेनविशेषविहितेनकर्त्तृगतनिमित्तत्वेनभावकर्मगतङ्कःनिरूपितंनिमित्तत्वंबाध्यतइतिभावः।विकल्पेप्राप्तेइति।धृषेरादि
३५० दित्तुनत्कासेडित्येवसिद्धमितिभावः।क्त्वैवेति।नतुनिष्ठा।चानुकृष्टत्वादितिभावः।शेश्वितइति।एरनेकाचइतियण्।चादिति।अन्यथातक्रकौण्डिन्यन्यायेनबाधः
स्यादितिभावः।भ्वादिरिति।स्नेहनमोचनयोरितिपठितः।स्विद्यतेस्त्विति।गात्रप्रक्षरणेपठितस्य।नचायमपिञीदितिवाच्यम्।हरदत्तग्रन्थविरोधादितिभावः।अत्रहरद
त्तः।ञिष्विदास्नेहनमोचनयोरितिदिवादिर्गृह्यतेनतुञिष्विदाअव्यक्तेशब्दइतिभ्वादिरपिमिदिनासाहचर्यादित्याह ।तच्चिन्त्यम्।भ्वादिष्वपिमिदेःपठ्यमानत्वात्।तस्माद
विशेषादुभयोर्ग्रहणंन्याय्यम्।तदेतदाह॥दिवादौभ्वादौचेति।स्विदादीनामादितश्चेतिनिषेधात्सेण्निष्ठादुर्लभेत्यतआदिकर्मणिनिष्ठोदाहृता।क्षुब्धस्वान्त।अनायाससाध्य
इति।क्षुण्णमौषधजातमुष्णोदकेप्रक्षिप्यसद्योभिषुत्यंपूत्वायत्पीयतेतत्फाण्टमित्याहुः।वेदभाष्यइति।तद्वैनवनीतंभवतिघृतंवैदेवानांफाण्टंमनुष्याणामितिशतपथश्रुते
र्व्याख्यायामित्यर्थः।अन्यत्रेति।मन्थादेरवाच्यइत्यर्थः।वाहितमिति।बाहृप्रयत्ने।धृषिशसीवैयात्ये।विरुद्धंयातोवियातःअविनीतःतस्यभावोवैयात्यम्।नियमार्थश्चेदंवचनम्।
ञिधृषाप्रागल्भ्ये।शसुहिंसायां।अनयोरादितश्च यस्यविभाषेतिसूत्राभ्यामिट्प्रतिषेधसिद्धेः।तदेतदाह।अविनयएवेति।नास्तीति।अनभिधानादितिभावः।अत्रप्रमाणमाह।अ
तएवेति।अतएवनियमार्थमिदंसूत्रमितिवृत्तिः।अन्यथाविभाषाभावादिकर्मणोरितिविकल्पेप्राप्तेनित्यार्थंस्यादितिभावः।माधवस्त्विति।एवंहरदत्तोक्तंचिन्त्यमुद्धृतमितिभा
वः।दृढस्थुल।बलमस्यास्तीतिबलः।अर्शआद्यच्।तदाह।बलवतीति।तस्येति।तकारस्येत्यर्थः।हस्येति।ननुहोढइतिढत्वेढोढेलोपेनैवसिद्धमितिचेत्।मैवम्।तथाहिसतिढ
लोपस्यासिद्धत्वेनद्रढिमेत्यत्ररऋतोहलादेर्लघोरितिरभावोनस्यात्।परिदृढ्यइत्यत्रल्यपिलघुपूर्वादितिअयादेशोनस्यात्।परिदृढस्यापत्यंपारिदृढीकन्येत्य
त्रगुरूपोत्तमलक्षणःष्यङ्स्यात्।अतोऽसिद्धत्वनिवृत्तयेहलोपोनिपात्यतइतिभाष्यादौस्थितम्।अतएवढ्लोपइतिसूत्रेअणःकिंदृढइतिप्राचोग्रन्थस्यप्रामादिकताम रा·पः
वोचाम ॥ ७) त्वादितिभावः।चिन्त्यमुद्धृतमिति।अवैयात्येभावादावादित्वफलस्यसत्त्वादितिभावः।होढइतिढत्वेइति।घत्वाभावमात्रंनिपात्यतामितिभावः ॥ ३५०

धातुविशेषणार्थइति।श्यन्निर्देशस्तु।धातुविशेषणार्थइतिभावः।अभ्युपेत्येति।श्तिपंविनापिसेवेत्यादौश्नानिर्देशवत्श्यनानिर्देशस्यकर्त्तुंशक्यत्वेनश्तिपनिर्देशादिडभावमभ्युप्रभो।निपातनमिति।हलोपेप्रयोजनमितिप्राग्वदेवबोध्यम्।कृच्छ्रगहनयोःकषः।कृच्छ्रंदुःखन्तत्कारणञ्चगृह्यते।कषतिर्हिंसार्थः।कष्टोमोहइति।दुःखहेतुरित्यर्थः।अभेः।अविदूरस्यभावआविदूर्यंब्राह्मणादित्वात्ष्यञ्।अस्मादेवनिर्देशान्ननञ्पूर्वादितिनिषेधोनभवति।सामीप्यइत्येवतुनोक्तम्।नातिदूरस्यासङ्ग्रहापत्तेः।तदेतत्ध्वनयन्व्याचष्टे।नातिदूरमासन्नञ्चेति।एवञ्चसामीप्येइतिव्याचक्षाणस्यप्राचोन्यूनतेतिभावः।णेः।अधीयतइत्यध्ययनम्।बहुलवचनात्कर्मणिल्युट्।वादान्त।शमुदमुउपशमे।पुरीआप्यायने।दिवादिश्चुरादिश्च।दसुउपक्षये।स्पशबाधने।छदअपवारणे।ज्ञपिर्मित्त्वज्ञायामुक्तः।रुष्यम।रुषरोषे।अस्यतीषसहेतिविकल्पितेट्त्वात् यस्यविभाषेतिनिषेधे विधीयते।अमगत्यादिषु।अमरोगेइतिचौरादिकस्तुनगृह्यते।एकाचइत्यधिकारादित्याहुः।तूर्णइति।ञित्वरासंभ्रमे।ज्वरत्वरेत्यूठ्।आदितश्चेतिनिषेधेप्राप्तेविकल्पः।आदित्वस्यफलन्तुआत्मनेपदमात्रम्।तदेतदाह।फलमन्दमिति।तथाचएधत्यादिवत्ह्रस्वानुबन्धत्वमेवव्याख्यमितिभावः।संघुष्टइति।अविशब्दनेपिसंपूर्वस्यपरत्वादयंविकल्पएव।आस्वान्तइति।आङ्पूर्वस्यस्वनेर्मनोभिधानेप्ययमेवविकल्पःपरत्वात्।प्रह्लन्नइति।ह्लादीसुखे।ईदित्वान्नेट्।द्यतिस्यति।श्तिपानिर्देशोधातुविशेषणार्थः।नहितेनविनाश्यन्सुलभः।यत्तुप्रसादकृतोक्तंश्तिपानिर्देशोयङ्लुङ्निवृत्त्यर्थः।दादत्तः सासातइति।तन्न।यङ्लुकिहीटाभाव्यम्।दादितःसासितइति।तन्नेतिकितोतिवचनान्नास्तिप्रसङ्गः।अभ्युपेत्यब्रूमः।दोदद्घोरितिविधीयमानआदेशःअनेकाल्त्वात्सर्वस्येतिनिर्विवादम्।तथाचसाभ्यासस्यप्रवर्त्तेत।हन्तेर्यङ्लुगन्तस्येवबाधेः।तस्मात्दादत्तइतित्वदुदाहृतंरूपंकथमुक्तिसंभवंलभेत।दधातेर्हिः।श्तिपानिर्देशोघेटोनिवृत्त्यर्थः।तीत्यनुवृत्तेर्यङ्लुकिन।दाधितः।अत्रापिप्रसादकृताश्तिपानिर्देशस्ययङ्लुङ्निवृत्त्यर्थत्वाद्दाधीतइतिघुमास्थेतीत्वमुदाहृतंतन्त्वपूर्ववदेवहेयम्।दोदद्घोः।दद्दआदेशस्यान्तएवनतुतदधान्तः।संहितायास्तुल्यत्वेपिप्रक्रियायान्दोषादितिप्राञ्चः ॥ ७ ॥ पेत्येत्यर्थः।साभ्यासस्येति।उतत्रमाधवरीत्येतिबोध्यम् ॥

तथाचाहुरिति। भाष्यकृत इति शेषः। आवर्त्तत इति। एतेनादेः परस्येत्यादेस्तः स्यादित्यपास्तम्। विवक्षितेति। प्राप्तापन्ने चेति सूत्रप्रयोगादिति भावः। भाजनम्। भोजनपात्रम्। तथाचाहुः। तान्ते दोषो दीर्घत्वाख्यो दान्ते दोषो निष्ठानत्वम्। धान्ते दोषो धत्वाख्यः स्यान्निर्दोषत्वात्स्यान्तो ग्राह्य इति। तदनुसारेणाह। दथ्यूस्यादिति। वस्तुतस्तु सर्वे पक्षा इह सूपपादा इत्याह। तान्तो वेत्यादिना। अव उपसर्गात्तः। अव इत्यावर्त्तते। तत्रैकं पञ्चम्यन्तमुपसर्गं विशिनष्टि। अपरं षष्ठ्यन्तं स्थानिलाभायेति व्याचष्टे। अजन्तादित्यादिना। यद्वा द्वितकारकोयमादेशः। तेनानेकाल्त्वात्सर्वस्य द्योर्भविष्यति। अव इति तु अनावृत्तं पञ्चम्यन्तमेवास्तु। नचैवं अपो भीत्युत्तरसूत्रेपि सर्वादेशत्वापत्तिः। अव इत्यनुवर्त्य अचः परस्य यकारस्यादेशविधानं तत्रान्त्यस्य संयोगान्तलोपे पूर्वस्य जश्त्वे रूपसिद्धेः। अवदत्तमिति। आदिकर्मणीत्येतत्प्रदत्तमित्यस्यैव विशेषणम्। धीतमिति। दधातेर्हिरित्यत्र श्नुविकरणस्य निर्देशाद्धेटो हिर्न। नापि दत्। तद्धि घोदे इत्युपादानादिति भावः। झरो झरीति। अनेन पाक्षिको धलोप इत्यर्थः। प्रकृत इति। कर्त्तुमारब्धवानित्यर्थः। नदीस्न इति नदीस्नाने कुशल इत्यर्थः। गङ्गां प्राप्त इति। प्रपूर्व आप्लृ व्याप्तौ। प्राप्तिरपीह सूत्रे गतिशब्देन विवक्षितेति भावः। उपोषित इति। वसतिक्षुधो रिडितीट्। शासिवसीति षः। मुकुन्दस्येति। आस्यतेऽस्मिन्नित्यासितं आसनमित्यर्थः। यायतेऽस्मिन्निति यातं मार्गः। भुज्यतेऽस्मिन्निति भुक्तम्। भाजनम्। अधिकरणवाचिनश्चेति त्रिष्वपि कर्त्तरि षष्ठी। स्विण्णः। इद्ध इति। आदितश्च। श्वीदित इति नेट्। इष्ट इति। तीषसहेति वेट्। क्त्वाद्यस्य विभाषेति नेट्। सुयजोर्ङ्वनिप्। इह सुत्वगतौ सुप्रसवैश्वर्ययोरिति निरनुबन्धकयोर्ग्रहणं प्राप्तमनभिधानादुभयपदिनासाहचर्याद्वा न भवतीत्याह। सुनोतेरिति। ङकारः सुनोतेर्गुणप्रतिषेधार्थः पकारः स्वरार्थस्तुगर्थश्च। छन्दसि लिडिति सूत्रस्यार्थमाह। भूतसामान्य इति। नच छन्दसि लुङ्लङ्लिट इत्यनेनैव गतार्थता। धातुसंबन्ध इत्यधिकारे स विधिः। इदन्तु धातुसंबन्धं विनापि भवतीति विशेषात्। त्रिमुनिमननमिति सूत्रकृता छन्दसीति प्रक्रान्तत्वादुत्तरसूत्रे भाषाग्रहणाच्च ॥७५ इदं त्विति। नचानेन सिद्धे तत्र तिङ्ग्रहणं व्यर्थं लुङ्लङ्भ्यां बाधापत्तेः। अनुबन्धातिरिक्तकृत्तोपदेशिकासरूपत्वस्यैव वासरूपसूत्रे ग्रहणेन तस्येहाप्रवृत्तेरत एव लिटा लुङ् बाध्यत इति दिक् ॥

सिद्धान्तितत्वादिति। आरिवानित्यादौ गुणस्तु ऋच्छत्यृतामित्यत्र ऋकारप्रश्लेषेण ऋधातोः पुनर्विधानाद्बोध्यः। हरदत्तेत्यादि। अत्राहुर्विबीजन्तु विभाषापूर्वाह्णेति सूत्रेभाष्ये पपुषआगतं पपिवद्रूप्यमिति लौकिकविग्रहे क्वसुप्रयोगात् लोकेपि क्वसुः उक्तभाष्यप्रामाण्यात्संयोगान्तेभ्यश्छन्दस्येव क्वसुः कानच्तु छन्दस्येव। उत्तरसूत्रन्तेभ्योन्यत्र क्वचिदेवेत्यर्थज्ञापनार्थमिति। गतानुगतिकतयेति। गतमनुलक्षीकृत्य गतिर्यस्य तत्त्वेनेत्यर्थः। द्वित्वाभावादिति। आदिनेड्भावदीर्घठत्वानि। अयंवृत्तिग्रन्थोपि क्वसोर्लो भाष्यवार्त्तिकयोरपि क्वसुकानचोश्छन्दस्युभयथेति वचनात्सार्वधातुकत्वेन सार्वधातुकमपिदिति ङित्वादेव आजिवानित्यादौ नलोपादीनाङ्ङित्कार्याणामन्यथासिद्धिमाशङ्क्य तितीर्वान् निस्तिराण इत्यादौ ऋच्छत्यृतामिति प्राप्तस्य गुणस्य बाधनार्थं ङित्करणमिति सिद्धान्तितत्वात्। अत एव कित्करणसामर्थ्याद्भाषायामपि क्वसुकानचौस्त इति केषाञ्चिदुत्प्रेक्षा नादर्त्तव्येति हरदत्तमाधवादिग्रन्थेस्पष्टमिति भावः। कवयस्त्विति। गतानुगतिकमेति भावः। अत्र प्राचा दाश्वान्साह्वान्मीढ्वांश्चेति सूत्रमुपन्यस्तम्। तच्च यद्यपि छन्दसि भाषायाञ्चाविशेषेण वर्त्तत इति वृत्त्यादौ स्थितं तथापीहोपेक्षितम्। छन्दस्येव प्राचुर्येण दाश्वानित्यादिप्रयोगाणामुपलम्भात्। उक्तसूत्रस्य द्वित्वाभावादिनिपातनमात्रोपक्षीणत्वात् क्वसोश्च छान्दसतायानिर्णीतत्वात्। अनेनैव क्वसोरपि विधाने गौरवात्। यदाहुः। अल्पार्थविधिसन्तुष्टोनानेकार्थविधिक्षम इति। अतएव हि तत्सूत्रमनावश्यकम्। तथाच पदकाराः। साह्वान्विश्वा इति मन्त्रे साह्वानिति ह्रस्वञ्चिच्छिदुरिति दिक्। उपेयिवाननाश्वान्। इडिति। वलादिलक्षण एवेट्। नेड्वशि कृतीति प्रतिषिद्धः क्रादिनियमात्प्राप्तः वस्वेकाजाद्घसामिति सूत्रेण कृतद्वित्वानांएकाचामादन्तानाङ्घसेश्च वसोरिट् स्यान्नान्येषामिति नियच्छता प्रतिषिद्धः। केप्रवृत्तौ साधक इति बोध्यम्। दिगिति। दिगर्थस्तु पदविभागस्यापि लौकिकत्वात्तत्र दीर्घस्यौचित्येपि तदभावात् पृषोदरादित्वस्यावश्यकत्वेन तेनैव सर्वसिद्धाविदं व्यर्थमिति। वस्तुतो न लक्षणेन पदकारा अनुवर्त्त्या इति न्यायेन तथा पदपाठो भ्रान्त्यैवेति बोध्यम्। नेड्वशीति इट्मेकाच उपदेश इत्यस्याप्युपलक्षणम् ॥

इतिपक्षेइति।अत्रारुचिबीजन्तुईयतुरित्यादौयणादेशेस्सावकाशः अचःपरस्मिन्नितिपूर्वस्यैवविधौनपूर्वपरविधौ।एवञ्चसवर्णदीर्घेकृतेऽकादिनियमादिटिकृतदीर्घस्यैवादेशोनिपातनादितिबोध्यम्।तेनेति।अकृतव्यूहपरिभाषयेतिभावः।वस्तुतइद्यपिनक्षतिरितिनिरूपितम्।व्याख्यानमेवेति।अतएवैकादिष्टस्यईयुभवतीतिभाष्येदीर्घोच्चारणमसम्यिङ्गतिबोध्यम्।सामानाधिकरण्यमिति।अप्रथमान्तेनेत्यादिः।आदेशयोरितितिङ्रूपादेशोपस्थाप्यकर्त्तृकर्मणोरप्रथमान्तसामानाधिकरण्याभावादाहशतृशानचोरिति।न नित्यत्वात्हिल्वेकृतेऽनेका।चूत्वात्नचसवर्णदीर्घेणेका चूत्वंदीर्घइणःकितीतिदीर्घेकृतेनत्वा।मर्थ्यात्सवर्णदीर्घाभावइतिपक्षाश्रयणात्सएवेट्इहप्रतिप्रसूयतेनापूर्वोविधीयते।तेनसंप्रसारणविषयेनभवति।अतएवोदाहरति।उपेयुषइति।अविवक्षितमिति।व्याख्यानमेवात्रशरणम्।वचेःकर्त्तरीति।नतुभावकर्मणोः।एतच्चनिपातनाल्लभ्यम्।लटःशतृशानचौ।सामानाधिकरण्येसतीति।यद्यपिकेवलस्यलटःप्रयोगाभावात्सामानाधिकरण्यन्दुर्लभम्।तथापिआदेशयोःशतृशानचोस्तद्द्वारास्थानिन्यपितत्कल्प्यते।पचन्तमिति।विक्लृत्यनुकूलवर्त्तमानव्यापाराश्रयमित्यर्थः।पचन्नितिविग्रहप्रदर्शनन्तुईषत्साम्येन।क्रियाप्रधानमाख्यातंसत्वप्रधानानिनामानीतिसिद्धान्तात्।आनेमुक्अतोयेयइतिसूत्रादनुवृत्तंपञ्चम्यन्तमपिअतइतिपदंषष्ठ्याविपरिणम्यते।आनइतिसप्तमीबलात्नचविपरीतंशङ्क्यंपञ्चम्याःपूर्वसूत्रेचरितार्थत्वात्।सप्तम्याश्चाचरितार्थत्वात्।तदेतदाह।अङ्गस्यातइति।यत्तुप्राचा अदन्ताङ्गस्येतिव्याख्यातन्तन्न।पचमानइत्यादौअदुपदेशाल्लसार्वधातुकमनुदात्तमितिशानचःस्वरस्यासिद्धिप्रसङ्गात्।तत्पक्षेहिअङ्गभक्तोमुक्सचतदेवनव्यवदध्यात्।तदवयवमकारन्तुव्यवदध्यादेवस्पष्टञ्चैतदाकरे।लङिति।यद्यपिप्रथमान्तंप्रकृतंतथापिषष्ठ्याविपरिणम्यतइतिभावः।पुनरिति।एवंहिपुनर्विधिःसम्पद्यते।सचप्रथमेनाप्राप्तेपिक्वचित्प्रवृत्त्यर्थइतिभावः॥७ तस्यानिलकारेप्रकृत्यर्थप्रतिप्रधानभूतकर्त्राद्यभिधायकत्वमेवकल्प्यते।एवञ्चकल्पितसामानाधिकरण्यानुवादेनशत्रादिविधिरितिभावः।इतिसिद्धान्तादिति।वस्तुतोविग्रहेकृत्यनुसार्येवविशेष्यविशेषणभावः।क्रियाप्रधानमितितुलोकेऽर्थबोधायप्रयुज्यमानाख्यातविषयमेवेतिनिरूपितम्।व्यवदध्यादेवेति।स्वरोद्देश्यकविधेरभावात्हल्स्वरप्राप्तेरभावाच्चनव्यञ्जनस्याविद्यमानवत्त्वम्।एवंहिपुनरिति।इदंरस्यनुसारि।भाष्येतुतदभावेप्रत्ययान्तरत्वमेववस्यादेवञ्चकर्मणिशानजन्तस्यानुअतो लटःशतृशानचावितियोगविभागेनायमर्थःसाध्यइत्युक्तम् ॥

अनुबन्धग्रहणेति।एकानुबन्धकेत्यस्याप्युपलक्षणम्।नत्विति।लटइतिनिवृत्तेरितिभावः।वासरूपन्यायेनेति।नचभिन्नार्थत्वादनयोर्नतिङपवादत्वन्तिङि·हिसंख्यापुरुषाद्यर्थेपि
भासतेनकृतीतिवाच्यम्।पुरुषाद्यर्थस्यसमभिव्याहृतपदेनसंख्यायास्तदुत्तरसुपाप्रतीत्याऽविशेषादितिभावः।लादेशेष्विति।प्रत्ययविषयत्वात्तस्यादेशेऽप्रवृत्तेरितिभावः।अ
प्रथमेति।उपलक्षणमिदम्।अप्रथमान्तेनसामानाधिकरण्याभावेपीत्यर्थः।तेनकुर्वतोऽपत्यङ्कौर्वतः।कुर्वतोभक्तिःकुर्वद्भक्तिः।कुर्वाणभक्तिरितिप्रत्ययोत्तरपदयोरपि
सिद्ध्यन्ति।विदेःशतुर्वसुः।स्थानिवत्त्वादेवसिद्धेवसोरुगित्करणंवसोःसंप्रसारणमित्यत्रक्वसोरपिसामान्यग्रहणार्थम्।अनुबन्धग्रहणपरिभाषापितत्सामर्थ्यादेवन
प्रवर्त्तते।पूङ्यजोः।ण्वुलादिवत्स्वतन्त्रोयन्नतुशत्रादिवल्लादेशस्तस्माद्धिसतिवेतिवाच्यंस्यात्।पचतेयजतेइतितिङोपियथास्युः।नचैवंवासरूपन्यायेननिर्वाहः।लादेशे
षुतद्भावस्यआकारेस्थितत्वात्।किंचलादेशत्वेभावकर्मणोरपिस्यात्।कर्त्तर्य्येवचेष्यते।एवञ्चानशःवक्ष्यमाणशतुश्चस्वातन्त्र्यंबोध्यम्।यत्तुशानन्नोलादेशत्वेनसार्वधातु
कानुदात्तत्वंस्यादितिवदन्तितच्चिन्त्यम्।नित्स्वरस्यजागरूकत्वात्।अनुदात्तत्वेइष्टापत्तेश्चेत्यास्तान्तावत् । नन्वेषांलादेशत्वाभावेसोमंपवमानइत्यादौकर्मणिषष्ठी
स्यादितिचेत्मैवम्।नलोकेतिसूत्रेतृन्नितिप्रत्याहारनिर्देशइत्युक्तत्वात्।ताच्छील्य।चानशोलादेशत्वाभावेनअनात्मनेपदत्वात्परस्मैपदिभ्योपिविधानमितिध्वनयन्नु
दाहरति।शत्रुंनिघ्नानइति।सुञोयज्ञसंयोगे।सुनोतेःशतृप्रत्ययःस्यात्।यज्ञेनसंयुज्यमानेवृत्तिश्चेत्।नन्विहसुञोयज्ञेइत्येवास्तुयज्ञविषयकश्चेत्सुनोत्यर्थइतिव्याख्यायसु
रांसुनोतीत्यादेर्व्यावर्त्तयितुंशक्यत्वात्।अत्राहुःसंयोगग्रहणंप्रधानकर्तृसंप्रत्ययार्थम्।तेनयजमानादन्यत्रनभवतीतिएवञ्चाप्रधानेकर्त्तरिलटःशतृशानचावित्यनेनापि
नभवति।संयोगग्रहणसामर्थ्यादितिहरदत्तः।यःसुन्वन्तमवतीत्यादिनामेकवचनान्तानामधिकारिपरत्वंनिर्बाधनम्।बहुवचनान्तानान्तुस्थलविशेषएवसंभवतीति
दर्शयितुमुदाहरति।सर्वेसुन्वन्तइति।तद्व्याचष्टेसर्वइत्यादिना।अर्हः।प्रशंसायाङ्किम्।अर्हतिचोरोवधम्।आक्वेः।शीलादीनाम्प्रत्ययार्थविशेषणंसमर्थयितुंनिर्दिष्टैस्त्रिभिःत
च्छब्दैःप्रकृतिभूतधात्वर्थोनिर्दिश्यते॥ ७) बन्धग्रहणपरिभाषेति।एकानुबन्धकपरिभाषेत्यर्थः।स्वातन्त्र्यमिति।लटइत्यस्यनिवृत्तेरितिभावः।यज्ञेनसंप्रयुज्यमानेइति।कर्त्तरिश

त्रन्तस्येतिशेषः।अप्रधानेऽर्त्विक्षु॥अधिकारीति।य
जमानेत्यर्थः ॥

इत्येवेति।पृथक्पाठेनेत्यर्थः।प्रत्ययमात्रइति।अत्रारुचिबीजन्तूदात्तपाठस्यबहुसंमतत्वाभावः।साहचर्याच्चेति।चिणुणकर्मकाणामितिभाष्योक्तेः। ———— सक
र्मकाच्चेत्यपिबोध्यम्।इतिविशेषइति।नचतच्छीलादिषुतत्रबाधकःवासरूपन्यायेनसिद्धेरितिभावः।ण्यन्तस्यचेतिपूर्वसूत्रस्यप्रत्ययान्तसाहचर्यात्तुदेवतेरितिभावः।नसिध्येदिति।नचतत्रति
अलङ्कृञ्निराकृञ्इतिकरोतेर्ग्रहणंप्रसिद्धेर्नहिंसार्थस्य।इहपच्यादयस्त्रयउत्पूर्वाःपठ्यन्ते।तत्रोदःपचपतमदइत्येववक्तव्येप्रत्येकमुत्पूर्वस्यपाठउपसर्गान्तरनिवृत्त्यर्थः।तेन
समुत्पतिष्णुरितिनभवतीत्याहुः।इहपचेरनन्तरंपतिस्तान्तःपठ्यतेतुप्राचाभट्टिः।उत्पतिष्णुसहिष्णूचचेरतुःखरदूषणाविति कालिदासोऽपि।मस्तनुरन्ध्रसुगणानामेलानामुत्पतिष्ण
वइति।केचित्तुतत्स्थानेदान्तंपठित्वापदगतावित्यस्मात्प्रत्ययमाहुः।पारयिष्णवइति।अयामन्ताल्वाय्येत्य यःनेतदिति।चकारस्यानुक्तसमुच्चयार्थत्वमित्यर्थः।गकारेति।नन्वेवङ्कारच
र्त्वस्यासिद्धत्वयाहशिचेसुलंस्यादितिनेत्सत्सम्।सौत्रोऽयंनिर्देशः।तथाचवार्त्तिकम्।गित्वान्नस्थईकारःक्ङित्तोरीत्वशासनात्।गुणाभावस्त्रिषुस्मार्यःश्र्युकोऽनिट्त्वंगकोरितोरिति।त्र
सि।त्रसुरिति।नेड्वशीतिनेट्।श्रमित्यश्रभ्यः।इतिशब्दआद्यर्थः।संश्चापरिदेवीतिदेवदेवनेभ्वादिः।ण्यन्तस्यदीव्यतेस्तुनेहग्रहणम्।लाक्षणिकत्वात्।अण्यन्तःसाहचर्याच्च।वीकषाकष
हिंसार्थः।लसश्लेषणक्रीडनयोः।कत्थश्लाघायाम्।स्रम्भुविश्वासे।अपेचलषः।लषकान्तौ।प्रमाथीति।मन्थेविलोडने।निन्दहिंस।इहसूत्रेविनाशीतिविपूर्वस्यनशेर्ण्यन्तस्यभाविना
णिलोपेननिर्देशः।अकारस्त्वागन्तुकः।केचित्तुविनाशीतिण्यन्तमेवपठन्ति।परिवादीतुवदेर्ण्यन्तपाठोनिर्विवादएव।असूयतिःकण्ड्वादियगन्तः।निन्दादीनामसूयान्तानांसमा
हारद्वन्द्वेसौत्रंपुंस्त्वम्।स्यादेतत्।असूयतेरेववुञ्विधेयोनेतरेभ्यः।निन्दादीनांण्वुलैवसिद्धेः।नहितत्रलित्स्वरञित्स्वरयोर्विशेषोऽस्ति।उभयथाप्याद्युदात्तत्वात्।असूयतेस्तुण्वुलि
प्रत्ययात्पूर्वमुदात्तंवुञितुआदिरुदात्तइतिविशेषःतत्राह।ण्वुलिति।तज्जादयोऽन्नेति।नकेवलंण्वुल्विषयमेवज्ञापकंकिंतुप्रत्ययमात्रविषयकमित्यर्थः।देविक्रुशोः।दीव्यतेर्हेतुमण्य
न्तस्यदिवुकूजनेइत्यस्यचुरादिण्यन्तस्यचग्रहणम्।शब्दनइति।शब्दशब्दनेचुरादिः।अनुदात्तेतश्चहलादेः।आदिग्रहणाभावेहलन्तादित्यर्थःस्यात्।ततश्चजुगुप्सनइत्यादिनसिद्ध्येत्।
अस्तिचेहानुदात्तेत्त्वम्।गुपादिष्ववयवेषुअचरितार्थस्यानुबन्धस्यसमुदायविशेषकत्वात्।जुचङ्क्रम्यक्रमिद्रमीयङन्तौ॥ तिस्नुरित्यादिवत्परत्वादुःप्राप्नोतीतिवाच्यंएधादिभ्योयुजभावस्य

फलस्यस्वत्वेनाक्षतेः।मूलत्त्वुवृत्त्यनुरोधेनचेनानुक्तस
मुच्चयार्थेनजुगुप्सनादौगुजिइत्यन्ये ॥

यथाश्रुतभाष्यमिति।भवतिहिरेणयुचःसमावेशइतिहिभाष्येउक्तम्।त्रयाणामेवेति।त्रयाणामपीत्यर्थः।व्याख्यानादितिरूढिप्रकारास्ताच्छीलिकाइत्याढ्येतिसूत्रेभाष्योक्तेरितिभावः ॥ परस्परमिति।निन्दादिसूत्रेहितच्छीलादिष्ववासरूपविधिनातृजादयोनेतिज्ञापितमिहतुताच्छीलिकेष्वपरस्परंवासरूपविधिर्नेतिविवेकइतिभावः।नयः।अयमयतयनयगतावितिपठितस्यनयतेर्नायंनिर्देशः।अनुदात्तेत्त्वादेवयुचःसिद्धत्वात्।किंतुनेतिपृथक्पदमितिमत्वाह।यकारान्तादिति।क्नूयिता।क्ष्मायितेति।क्नूयीशब्दे।क्ष्मायीविधूनने।सूददीपदीक्षश्च।ताच्छीलिकेष्विति।परस्परमितिभावः।प्रायिकमिति।नकेवलंयथाश्रुतंभाष्यमवलंब्ययुज्ञयोरेवसमावेशइतिमन्तव्यम्।किंतुप्रायिकत्वएवभाष्यतात्पर्यम्।तेनगमेर्लषपतपदेत्युकञ्विषयेतृन्नपि।गन्तागामुकः।वौकषलसेतिघिनुण्विषयेयुजपिविकत्थीविकत्थनइत्यादिसिद्ध्यतीतिभावः।जल्पभिक्ष।कुट्टछेदने।लुण्ठस्तेयेचौरादिको।जिदृक्षि।जिजयेजिअभिभवे।दृङादरे।क्षिक्षये।क्षिनिवासगत्योः।श्रिञ्सेवायां।विपूर्वः।व्यथभयसञ्चलनयोर्नञ्पूर्वःनिपातनान्नञोधातुनासमासेनलोपेततःप्रत्ययः।प्रसवीति।षूप्रेरणेअस्मादिनिः।सूतिसूयत्योस्तुसानुबन्धत्वान्नेहग्रहणम्।जिदृक्षीत्यत्रैवप्रजुंपठित्वापूर्वसूत्रेत्यक्तुमुचितम्।एवंहिपृथग्विभक्तिश्चकारोमास्त्वितिसुवचनम्।स्पृहिगृही।तत्पूर्वइति।तच्छब्दस्यसमासोपिनिपातनादितिबोध्यम्।दाधेट्।डुदाञ्दोदेङान्त्रयाणामेवग्रहणमित्याहुः।भञ्जभास।भङ्गुरइति।भञ्जेःकर्मकर्त्तर्य्येवअभिधानस्वभावादित्याहुः।विदिभिदि।विदेर्ज्ञानार्थस्यैवग्रहणम्।नलाभाद्यर्थस्यव्याख्यानात्।छिदुरमिति।कर्मकर्त्तरीतिवृत्तिः।नैतद्भाष्येदृष्टम्।तथाचमाघः।मुख्येकर्त्तरिप्रायुङ्क्त।प्रियतमायवपुर्गुरुमत्सरच्छिदुरयादुरयाचितमङ्गनाइति।जागरूकः।जागुरितिपञ्चम्यन्तंनव्याचष्टे।जागर्त्तेरिति।जागरूकइतिसिद्धरूपमेवनतुनिपातितंउत्तरत्रऊकस्याननुवृत्तिप्रसङ्गात्।यजजप।जञ्जपूकइति।जपजभदहदशभञ्जपशाञ्चेतिनुक्।वावदूकशब्दस्तुउलूकादयश्चेत्यत्रवक्ष्यते।माधवस्त्वाह।कुर्वादिगणेवावदूकेतिपाठादेवयङन्ताद्वदेरूकप्रत्ययइति।सनाशंसा।सनितिप्रत्ययग्रहणात्तदन्तग्रहणम्।षणुदाने।षणसंभक्ताविति धात्वोस्तुनेहग्रहणम् ॥

स्यथाप्रत्ययपोरितिन्यायलब्धेऽर्थेलिङ्गमप्याह।गर्गादिष्विति।आङः शंस्विति।आङा सह निर्देशात्तुल्यार्थशंसेर्नग्रहणमितिभावः।कथमिति।लोकेकथमितिप्रश्नः।स्वरूपाबाधेनै
ति।अतस्वकिकिनोर्विधानञ्चरितार्थमितिभावः।नचलिङ्वदतिदेशाद्भावकर्मणोरप्येतौस्याताम्।उत्पन्नयोः कार्यातिदेशात्उत्पत्तिश्चकर्त्तरिकृदित्येकवाक्यतयाकर्त्तर्येव।वर्त्त
गर्गादिषुविजिगीषुशब्दस्यपाठात्।आङः शंसुइच्छायाम्।विन्दुरिच्छुः।वेत्तेरिति।ज्ञानार्थस्यैवग्रहणान्नेतरेषाम्।एवमिषेरपीच्छार्थस्यैवग्रहणंनतुइष्णातीष्यत्योः
अनभिधानात्।निपातनाद्वेतिभावः।क्याच्छन्दसि।कित्यःक्यइतिव्याख्यानात्कण्ड्वादियगपिगृह्यतेतेनतुरण्यवोऽङ्गिरसोनक्षन्त।सपर्य्येमसपर्य्यवः।यमस्ययोनोश
कुनेभुरण्युमित्यादिसिद्धम्।अथकथंसन्तःप्रणयिवाक्यानिगृह्णन्तिह्यनसूयवइतिभट्टपादाः।मृगय्वादिषुअसूयुशब्दोद्रष्टव्यः।सुम्नयुरितिनच्छन्दस्यपुत्रस्येतिनिषे
धात्क्यचिचेतिईत्वमकृत्सार्वेतिदीर्घश्चनभवति।आदृ।आदितिदकारोमुखसुखार्थः।नत्वेयत्तकारः।तेनतात्परत्वाभावात्ऋइत्यनेनदीर्घोपिगृह्यतेतेनततुरिर्जगुरिः तरतेर्गि
रतेश्चबहुलंछन्दसीतुत्वेरूपमितिप्राञ्चः।वस्तुतस्तुआदित्यादिप्रकृतिविशेषग्रहणमुदाहरणप्रपञ्चमात्रङ्किकिनौलिट्चेत्येतावन्मात्रन्तुविवक्षितम्।तथाचवार्त्तिक
म्।किकिनावुत्सर्गश्छन्दसिसदादिभ्योदर्शनादितिउदाहृतञ्चभाष्येसेदिर्नेमिरित्यादिएवंस्थितेआदितितपरकरणेपिनक्षतिरितिध्वनयन्नाह।आदन्तादृदन्तादिति।ब
भ्रिर्वज्रमिति।नलोकेतिषष्ठीनिषेधाद्द्वितीया।किकिनोःस्यानेतिबादयस्तुनलिङ्वदित्यतिदेशेनस्वरूपाबाधेनैवकार्यातिदेशात्।छान्दससूत्रद्वयोपन्यसनंभाषायामित्यादि
वार्त्तिकविशेषविवेचनार्थम्।इहचवार्त्तिकेगमिर्यद्यपिनदृश्यतेतथापिधातुवृत्तौक्वचिद्धनिपुस्तकेचदर्शनादुपन्यस्तः।नीगभावश्चेति।नीग्वञ्चित्यादिनाप्राप्तस्यनीगागम
स्याभावइत्यर्थः।श्रयतिहरिंश्रीरिति।प्राचातुश्रयन्त्येनामितिकर्मणिक्विबुदाहृतः।तत्रकर्त्तरिकृदितिसूत्रविरोधःस्पष्टएव।बाहुलकन्तुअगतिकगतिः।एतेनश्रीयतेइतिश्रीरि

तिकर्मणितिङाविग्रहोनतुश्रयतीतिकर्त्रर्थेकर्मणिक्विपोविधानादितिप्राचोग्रन्थव्याचक्षाणोक्तिरपिप्रत्युक्ता।अतएवजुहूरित्यस्यजुहोत्यनयेतिप्राचाविग्रहोप्युपेक्ष्यः।त
थाचजुहूरित्यत्रहरदत्तेनोक्तङ्करणस्यात्रकर्त्तृत्वविवक्षेति।एतेनधीरितिव्याख्यातम्॥ ७मानइत्यधिकारेणभूतकालोपिनानिर्दिश्यतइतिदिक्।बाहुलकन्त्विति।ताभ्यामन्यत्रोणादयइ

गति
लुक्केरूणादिक्विपःकर्मण्यपिसत्त्वमित्य
कागनिरिश्वोढाम् ॥

नोर्देशादिति।शोवादंष्ट्रेमणिरितिभाष्यप्रयोगाच्चैसपिबोध्यम्।एतच्चरत्नानुसारेण।दशेतिशपानिर्देशोदंशसञ्ज्ञेतिनलोपइत्यनिदितामितिसूत्रेभाष्ये।दशनाइति।औणादिकक्युनासिद्ध
ध्रुवः सञ्ज्ञान्तरयोः।धनिकेस्यादिति।तेनग्रामयोरन्तरेपत्तिष्ठतितत्रनेतिभावः।एतच्चदृशिग्रहणानुवृत्तेर्लभ्यते।नन्वेवंप्रतिभूशब्दः सञ्ज्ञेतिफलितम्।तत्रसञ्ज्ञायामित्येवसिद्धेकिम
न्तरग्रहणेन।अत्राहुः।यावद्द्रव्यभाविन्यः सञ्ज्ञाः।प्रतिभूशब्दस्तुसत्येवतस्मिन्नृणप्रदानेनिवर्त्ततेइति।दाम्नी।दशेतिनलोपिनोनिर्देशोज्ञापकंक्वचिदक्ङित्यपिदंशेर्नलोपोभवति
इतितेनस्युरिदशनादन्ताः।दंशदशनेइतिसिद्धम्।नचसन्निधानात्क्रून्येवनलोपः स्यादितिवाच्यम्।शुनोदन्तदंष्ट्रेतिनिर्देशात्।तच्चेदिति।एतेनहलसूकरयोरभिधेयमुउपपद
त्वञ्चनिरस्यति।मुखमित्यर्थइति।तत्रैवरूढेरितिभावः।अर्त्तिलूधूसूधूइतिकुटादिरेवगृह्यतेनिरनुबन्धकत्वात्।अतएवगाङ्कुटेतिङित्वात्गुणनिषेधेउवङ्।तदाह।धुरि
इति
त्र मिति॥अथोणादयः॥कृवापा।कारुः शिल्पिनिकारकेधरणिकोशमभिप्रेत्याह।कारुरित्यादि।आद्येयोगरूढिः।द्वितीयेतुयोगमात्रमितिविवेकः।अतएवद्वितीयेथालर्थप्र
तिकारकान्वयोभवत्येव।तथाचभट्टिः।राघवस्यततःकार्यङ्कारुर्वानरपुङ्गवः।सर्ववानरसेनानामाश्वागमनमादिशत्इति।पायुःपुंसि।गुदन्त्वपानंपायुर्नेत्यमरः।पिबत्यनेन
तैलादिकमितिविग्रहः।पातिरक्षतीतिविग्रहेरक्षकोपि।तथाचमन्त्रः।भुवस्तस्यस्वतवाःपायुरग्नेइति।स्वतवान्पायावितिरुत्वम्।जायुरिति।भेषजौषधभैषज्यान्यगदोजायुरि
त्यपीत्यमरः।साहचर्यात्पुंस्त्वम्।मायुपित्तङ्कफःश्लेष्मेत्यमरः।शब्दोपिमायुः।पत्यशुर्मायुमकृतगोमायुरेकोअजमायुरेकइत्यादौवेदभाष्यकारादिभिस्तथैवव्याख्यानात्।स्वदतेरोच
तेइतिस्वादुः।विशेष्यनिघ्नोयम्।एवंसाधुरपि।आशुशीघ्रमिति।विलम्बाभावमात्रपरत्वेक्लीबन्तद्विशिष्टद्रव्यपरत्वेतुत्रिलिङ्गम्।अथशीघ्रमित्युपक्रम्यक्लीबेशीघ्राद्यसत्वेस्यात्रिष्वेषां
भेद्यगामियत्इत्यमरः।व्रीहौतुपुंस्येव।छन्दसीणः।उणनुवर्त्तते।मानआयाविति।आयुशब्दोमनुष्यपर्यायेषुवैदिकनिघण्टौपठितः।अतएवत्वामग्नेप्रथममायुमायवेमानस्लोक
इत्यादिमन्त्रेषुवेदभाष्येतथैवव्याख्यातम्।अर्वाचीनास्तुछन्दसीणइतिसूत्रंबहुलवचनाद्भाषायामपिप्रवर्त्ततइतिस्वीकृत्यआयुर्जीवितकालोवाइत्यमरग्रन्थेआयुशब्दस्तुका
रान्तंव्याचख्युः।वायुनाजगदायुनेतिवर्णविवेकः।एतेर्णिच्चेत्युसत्ययेसकारान्तोवक्ष्यमाणआयुःशब्दस्तुलोकवेदयोर्निर्विवादएव ॥ ७म्।अतएवततुन्नरर्मदशानमित्यमरःस

ङ्क्तेइतिबोध्यम्।अथोणादयः॥

अर्वाचिनास्त्विति। अत्राहुर्विबीजन्तुलोके एषामसाधुत्वमेव। बाहुलकात्तत्रप्रवृत्तौ
मानभावइति॥ शाकविशेषइति। अरुईत्याख्यः। गलन्तिका। सच्छिद्रघटे लोहमये दर्व्याकारे सच्छिद्रे भाषायां झ्ररणेत्याख्ये च। तरन्तिनरकमिति। तरतिजलमज्ञेष्वपि बोध्यम्। चरु
अतएवजटाआयुरस्येतिविग्रहे रप्रत्ययं हत्वा जटायुषमितिप्रयोगः। कथन्तर्हि मा वधिष्ट। जटायुं मामिति भट्टिः। तटीं विज्ञस्याद्रेरभजत जटायोः प्रथमजइति विस्मयवर्ण
नेअभिनेन्द्रवतिचेत्। अर्वाचीनमतेतावदिदमेव। वस्तुतस्तु जरां याति प्राप्नोतीति जटायुः मृगय्वादित्वात्कः। आयातीत्यायुः। जटायुषा जटायुस्त्वविद्यादायुन्तआयुषेति
द्विरूपकोशः। चाट्विति। चटु चाटु प्रियं वाक्यमिति हेमचन्द्रः। चाटुचारुतकसंभ्रममासाङ्कार्मणत्वमगमद्भ्रमणेषितिमाघः। चाटुर्नरिप्रियोक्तिः स्यादिति रत्नमालाकोशः। नरि
पुंसिचकरचवहुचाटूनंप्रौढयोषिद्वदस्येतिमाघः। इहसूत्रे रहिमपिपठित्वाराडुरित्येके। ब्राडुलकादितितु बहवः। सस्येति। किंशारुर्नासस्यशूके विशिखेकङ्कपक्षिणीतिमेदि
नीकोशः। त्रोरश्वलः। त्रइतितरतेःषष्ठ्यानिर्देशः। केचित्तुत्रोरिति छित्वारुधातोरपिप्रश्लेषादिइयर्तिअर्यतेवा। आलुः शाकविशेषोघटीचेत्याहुः। कर्कर्यालुर्गलन्तिकेत्यमरः।
भृमृशी। अरुरिति। अरुः स्वर्णेहरेपुंसीतिमेदिनी। अरुर्नाकनकयोरितिहेमचन्द्रः। शयुरिति। अजगरेशयुर्वा सइत्युभौइत्यमरः। तरुरिति। तरन्तिनरकमनेनरोपकाः। चरुहे
रिति। अनवस्त्राविचान्तरेरूष्मपक्वओदनइतियाज्ञिकाः। त्रिरवर्वेधिकरणेष्वेवं उगवादिभ्योयदितिसूत्रे कैयटस्त्वाह। स्थालीपाचीचरुशब्दस्तात्स्थ्यादोदनेभाक्तइति। बिम्बप्रकाशे
तुचरुर्भाण्डेचहव्यान्नेइतिनानार्थेनोक्तः। अथपुमान्चरुर्हव्यान्नभाण्डयोरितिमेदिनीच। हव्यपाकेचरुःपुमानित्यमरग्रन्थेकर्मार्थघञन्तेनकर्मधारयमधिकरणार्थघञन्तेषष्ठी
तत्पुरुषञ्चाश्रित्यद्वेधाव्याचक्षाणाः स्वाम्यादयोपिनानार्थेदीयामनुकूलाः। तनुः कायेत्वचिस्त्रीस्यात्त्रिष्वल्पेविरहेकृशे। धनुः पुमान्प्रियालद्रौराशिभेदेशरासनेइतिनान्तेमेदिनी॥
विम्बप्रकाशमुदाहरन्ति। धनुषाचेत्यादि। स्यात्तनुस्तनुषासार्द्धमित्यतःसार्धमित्यनुषज्यते। शुद्धवंशजनितोपिगुणस्यस्यानतामनुभवन्नपिशक्तः। क्षिप्तुरेनमृजुमाशुविपक्षंसाय
कमितिश्रीहर्षश्लोकशेषः। धनुर्वंशविशुद्धोपिनिर्गुण किङ्करिष्यतीतिधन्वन्तरिः। केचित्तुइहसूत्रेधनिन्नपठन्ति। तेषांमतेसकारान्तधनुःशब्दमेवाश्रित्योक्तग्रन्थानिर्वाह्याः। तस्यापिधं
स्वात्॥ ७ भाण्डेचेति। भाण्डंचरुस्थाल्येवा। कर्मार्थघञन्तेनकर्मधारयमधिकरणघञन्तेनषष्ठीतत्पुरुषश्चेतिपाठः। प्रियालद्रौ। भाषयाचिरौंजीत्याख्ये। राशये। मेषायाः ॥
२। धनुरिवेति।

कटुरोहिणी। कटुकीलता औषधिविशेषः। राजिका। लईइति प्रसिद्धम्। अकार्यम्। पापम्। स्वरे। तीक्ष्णो। आद्युदात्तदर्शनादिति। यद्यपि न पुंविषयस्येत्याद्युदात्तत्वं सिद्धमत्र तथापि पुंस्याद्युदात्तार्थं न पे
उक्तं ह्यमरेण। अथास्त्रियौ धनुश्चापाविति। किन्त्वरइति। तुरङ्गवदनो मयुरित्यमरः। मीनातिमिन्नो तीत्यालन्तुनेह बाहुलकात्। कटतिरसनामिति कटुः। कटुः स्त्री कटुरोहिण्यां लताराजिक
योरपि। नपुंसकमकार्ये स्यात्पुंल्लिङ्गोरणमात्रके। त्रिषु तद्वत्सुगन्ध्योश्च मत्सरेपि खरेपि चेति मेदिनी। बटतीति। बटुर्द्विजसुतः स्मृत इति संसारावर्त्तात्। नटबटुरिति तूपचारात्। दन्त्योष्ठ्या
दिरयम्। कल्पद्रुमादिप्रामाण्यात्। अभिख्याप्येति। यद्यपि फलिपाटीत्यादिसूत्रे यावदनुवर्त्तत इति न्यासग्रन्थेन मर्यादीकृत्येत्यपि प्रतीयते। तथापि अभिख्याप्येत्येवोचितम्। पिबतं सो
म्यं मधुं इत्यादौ मधुशब्दस्याद्युदात्तनादर्शनात्। वोतो गुणवचनादिति सूत्रे हरदत्तेन अभिख्याप्येतिस्य पृष्ठम् अभिधानाच्चेति भावः। त्रपुसीसमिति। नह्यग्निं दग्धात्रपते लज्जात इत्वात्। त्रपुसीस
करङ्गयोरिति मेदिनीकोशः। हनुरिति। हनुः पुमान् परोगण्डादिति वररुचिकोशः। स्त्रीलिङ्गोप्ययम्। हनुर्हट्टविलासिन्यां मृत्यावस्त्रगदे स्त्रियाम्। द्वयोः कपोलावयवे इति मेदिनी। अति
शायने मतुप्। हनुमान्। अन्येषामपि दृश्यते इति दीर्घग्रहणात् पाक्षिको दीर्घः। हनूमान्। स्नेहेन बध्नातीति बन्धुः। प्रज्ञादित्वात् बान्धवः। मनुराद्रिराजो मन्त्रश्च बिन्दुः पवर्गीयादिः। कन्दुरिति।
स्कन्दत्यस्मिन् जनता पद् इति व्युत्पत्त्या भोगस्थानमित्याहुः। अमरस्त्वाह। क्लीबेऽम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियामिति। कन्दुर्वा ना इति पूर्वेणान्वयाद्धा पुमानित्यर्थः। स्कन्देर
सुम्वात् जलीनिरज्जुः स्त्रियां रज्जुर्वेण्यां गुणे योषिदिति मेदिनी। आगमस्तकारस्य ष्टुत्वेन शः जस्त्वेन जः। तर्कुरिति। कृन्तत्यनेनेति विग्रहः। तर्कुटी सूत्रला तर्कुरिति हारावलीकोशः। फ
लिपाटि। एकापि षष्ठी विषयभेदाद्भिद्यते। गुणागमे हि फलेरवयवषष्ठी पञ्चादेशचतुष्टयविधौ तु पाद्यादिभ्यः स्थानषष्ठी। साधनयोर्विधौ अन्त्योऽत्युपसंह्रियत इति विवेकः। अनागमका
नां सागमका आदेशा इति पक्षे तु स्थानषष्ठ्येवेति बोध्यम्। फल्गुवसारे भिधेयवत्। नदीभेदे मलधा स्त्रीति मेदिनी। वलेर्गुक्। वल संवरणे इति दन्त्योष्ठ्यादिः
।। यत्तूज्ज्वलदत्तेन सूत्रे पवर्गीयादिं पठित्वा बलप्राणन इत्युपन्यस्तं तल्लक्ष्यविरोधादुपेक्ष्यम्। अयं नाभावदति वल्गुवो गृहे इत्यादौ दन्त्योष्ठ्यपाठस्यातिर्विवादत्वात्।
धरणिकोशस्थमाह। बभ्रुरित्यादि। बभ्रुर्वैश्वानरे मूलपाणौ च गरुडध्वजे। विशालेन कुले पुंसि पिङ्गलेत्वाभिधेयवत् इति मेदिनीकोशः। अन्यतोपीति। भः कुश्चेति वक्तव्ये प्राकृ प्रत्य
यनिर्देशादित्याहुः।। ७ वयुक्तमिति भावः। गण्डात्। कपोलात्। हट्टविलासिनी औषधिः ।।

अक्षेति प्रकृतिसंसृष्टेन चकारेण प्रकृत्यन्तरसमुच्चयाच्चेति बोध्यम्। एभिदि। पुरुः प्राज्ये अभिधेयवत्। पुंसि स्याद्देवलोके च नृपभेदपरागयोरिति मेदिनी। विधुरित्यादि विश्वकोशः। इह सूत्रे धृषिकृषिभ्यश्चेति पठित्वा हृषु हर्षे। तृषी ग्निशनिराहृषोपि हृषभ इति केचित्। कङ्गोः। करोतीति। केचित्तु सूत्रे कृ इति दीर्घं पठित्वा किरतीति विग्रहं कुर्वन्ति। कुरुर्नृपान्तरे भक्ते पुमान् पुंभूम्नि नीवृति इति मेदिनी। सुषामेत्यादि। एतच्च न्यासाद्यनुरोधेनोक्तम्। वार्तिककृता तु स्थास्थिन्स्थूनामुपसंख्यातम्। अपटुः पुंसि बाले च वाच्यमेस्यादन्यलिङ्गक इति मेदिनी। अर्जिदृशि। अर्ज अर्जने। अस्य कृजिरादेशः। दृशेः पशिः। कमेस्तुगागमः। अम रोगगत्यादिषु। अस्य धुगागमः। पशि नाशने। सौत्रो धातुः। अस्य दीर्घः। बाधृ लोडने। अस्य हादेशः। षड्भ्योपि कुप्रत्ययः स्यादित्यर्थः। अविशेषणेति। चादिगणे तु पश्चिति पठितम्। पशु दृश्यर्थमव्ययमिति धरणिः। कन्तुः कन्दर्पः। इः कंतुर्मकराङ्क इति त्रिकाण्डशेषः। पांसुरिति। पडि पसि नाशने चुरादिर्दन्त्यान्तः। स्त्रीपुंसयोरित्युक्तमित्यमरेण। द्वौ परौ द्वयोर्भुजबाहू इति। परौ द्वौ भुजबाहुशब्दौ द्वयोः स्त्रीपुंसयोरिति तदर्थः। अकारान्तोप्ययम्। अत एव बाहोः प्रभुजयोः पुमानिति दामोदरः। बाहा भुजःऽपुमान् स्यान्नभे दाश्च वृषवाजुषि इति मेदिन्याम्। टावन्तोप्ययम्। प्रथिम्रदि। प्रथते इति पृथुः। पृथुः स्यान्महति त्रिषु त्वक्पत्र्यां कृष्णजीरे च पुमान् नृपान्तरे इति मेदिनी। म्रदि तु शक्यते अकठिनत्वादिति मृदुः कोमलः। भृगुः पुमान् मुनौ हरे तटे शुक्रे इति मेदिनी। भृगुः शुक्रे प्रपाते च जमदग्न्यौ पिनाकिनीति कोशान्तरम्। लघुरिति। एकायां स्त्री लघुः क्लीबं शीघ्रे कृष्णागुरुण्यपि इति त्रिकाण्डशेषः। लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत् क्लीबम्। शीघ्रे कृष्णागुरुणि स्पृक्कानामौषधौ तु स्त्रीति मेदिनी। नृपभेद इति। एतेनावेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवमिति व्याख्यातम्। बहुरिति। बहुस्त्र्यादिसंख्यासु विपुले त्वभिधेयवत् इति मेदिनी। ऊरुर्जङ्घेति उज्ज्वलदत्तः। तन्न। तयोर्भेदात्। ऊर्णूयते आच्छाद्यते इत्यूरुः। कर्मणि प्रत्ययः। ऊरुर्महदिति कर्त्तरि प्रत्ययः। उद्यत इति। स हि यावत्कार्यं श्लिष्यति लगति व्याप्रियत इति यावत्। परशुरपीति। पर्शुः परशुना सहेति विश्वः। हरिद्रुरेव इति। दारुहरिद्रा इत्येके तद्धनिति। शुद्रुभ्यां मः। खरुशब्दस्य क्रूरो मूर्ख इत्यर्थः इयन्दशपादीवृत्त्यनुसारेणोक्तम्। खरुः पतिंवरा कन्येत्यपि बोध्यम्। खरुर्दन्ते हरे दर्पे हये श्वेते तु वाच्यवत् इति विश्वत्रिकाण्डशेषौ। शङ्कुरिति। शकि शङ्कायाम्। शङ्कतेस्मादिति शङ्कुः। कीले गरे शस्त्रे संख्यापादपभेदयोः। यादोभेदे च पापे च स्थाणावपि च हस्तक इति विश्वः। पीयुरिति पीयुः काले रवौ घूके इति मेदिनी। कृमिविशेष इति। नीलङ्गुः कृमिजातौ स्यात् भ्रमराली प्रसूनयोरिति विश्वः॥

अलगदो रक्तविकारः। स्वेदनी॥ करार्दीनि भाषायाम्। भर्जनं मृत्पात्रम्। वेणी स्त्रीणां केशविन्यासः। तर्कुटी। सूत्रवेष्टनस्य टेकुई इत्याख्यस्य नाम। विषयभेदाद्भिद्यते इति सोत्रत्वान्न साधुत्वं पाठान्तरमिति। नीलङ्गुरपि नीलाङ्गुरिति विश्वः। धातोरपीति। केचित्तु नीलशब्दे उपपदे गमेष्टिलोप उपपदस्य मुम् दीर्घश्च पाक्षिको निपात्यत इत्याहुः। शिशुचिसेन भुपुंसकमिति वररुचिः। मृगस्त्वादयश्च। मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनीति मेदिनी। मृगयुर्ब्रह्मणि ख्यातो गोमायुव्याधयोरपि। देवयुर्धार्मिके ख्यातो देवयुर्लोकयात्रिक इति विश्वः। आकृतिगण इति। तेन पील प्रतिष्टम्भे अस्मात्कुः। पीलुर्गजे द्रुमे काण्डे परमाणुप्रसूनयोरिति विश्वः। भट्टास्तु पीलुशब्दस्य रसे आर्यप्रसिद्धिः। गजे तु म्लेच्छप्रसिद्धिरित्याश्रित्य व्यवजह्रुः। कडिमदे। कण्डुरित्यादिर्बोध्यम्। वाशुरा रात्रिरिति वाश्यन्ते अस्यामिति विग्रहः। वाशुरो गर्दभे ललने। वाशुरा वासिता रात्र्योरिति मेदिनी। चङ्कुर इति। चकिः सौत्रो धातुः। चङ्कुरः स्यन्दने वृक्षे इति मेदिनी। अङ्कुरो रुधिरे लोम्नि पानीयेऽभिनवोद्भिदि इति च। खर्जूरेति। अङ्कुरोऽङ्कुर एव चेति विश्वप्रकाशः। व्यथेः। व्यथभयसञ्चलनयोः। अस्मादुरच् कित् स्याद्धातोः संप्रसारणञ्च। आदृशपाद्यां तु धः किच्चेति पठित्वा धकारमन्त्यादेशं विधाय विधुरो न भिक्षुरित्युदाहृतं माधवेनापि तदेवानुसृतम्। न त्वेतद्युक्तम्। त्वमेषां विथुराशयासि। अतिविद्धा विथुरेणाविदस्लादस्वादिमन्त्रेषु थकारपाठस्य निर्विवादत्वात्। यदपि माधवेनोक्तं विदिभिदीत्यत्र व्यथेः संप्रसारणञ्चेति वचनात् कुरचि थान्तरूपमिति तदतिस्थवीयः। कुरज्विधायके सूत्रे व्यथे रूपसंख्यानस्याप्रसिद्धत्वात्। तस्मादिह धः किच्चेति एवाय दीपाठं पुरस्कुर्वन्तः प्रसादकाराद्योऽप्युपेक्ष्याः। कथन्तर्हि विधुर इति प्रयोगस्य निर्वाह इति चेत्। धुरो विगत इति प्रादिसमासेनेत्यवधेहि। समासान्ताइति सूत्रे वृत्तिपदमञ्जर्यां तथैवोक्तत्वात्। मकुर इति। मकि मण्डने। अस्मादुरच्। नलोपश्च। बाहुलकादिति। धातोरुपधायाः पक्षे उकार इति भावः। मुकुरो मकुरोऽपि चेति विश्वः। मुकुरः स्यान्मकुरवद् दर्पणे बकुलद्रुमे। कुलालदण्ड इति मेदिनी च। धातोरिति। केचित्तु गुणो दुगागमश्च निपात्यते इत्याहुः। कर्बुरमिति। कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः। कर्बुरा कृष्णवृन्तायां शबले पुनरन्यवत् इति मेदिनी। मसेश्च। मसूरा मसुरा वा नाऽवेश्याव्रीहिप्रभेदयोः। मसूरी पापरोगे स्यादुपधाने पुनः पुमानिति मेदिनी। बोद्धव्यः इति पक्षे त्विति। शुकपदस्य तद्विशिष्टलक्षणेति भावः। असारं गकम्। नदीभेदो नदीविशेषः गयास्थः। मलपूर्व इति विशेषः। निर्विवादत्वादिति। वबयोरैक्याद्धलायुवल्तु च सुन्दरम्॥

श्वशुर इति। पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोरित्यमरः। अविष इति। राजा समुद्रश्च। महिषो महान्। तुरीयस्यामसमाहिषो विभक्ति। उत माता महिषमन्ववेनत्। टित्वान्ङीप्। महिषी राजपुत्री। रुहेः। रोहिषो मृगभेदः स्याद्रोहिषश्च तृणं मतमिति संसारावर्त्तः। वेदभाष्यमिति। इन्द्रो मित्रस्य तविषीम्। इन्द्रस्यात्र तविषीभ्य इत्यादिमन्त्रेष्विति भावः। वैदिकनिघण्टौ ओजः पाज इत्यादिषु बलनामसु तविषीशब्दस्य पाठश्चेह मूलमिति बोध्यम्। तविषः शोभनाकारे भेलेऽब्धिव्यवसाययोः। तविषी देवकन्यायां पुंसि स्वर्गे महोदधौ। तविषी चेन्द्रकन्यायां ना स्वर्गाम्बुधिकाञ्चने इति मेदिनी। किलेर्वुक् च। किल श्वैत्यक्रीडनयोः। किल्बिषं पापरोगयोः। अपराधेऽपीति मेदिनी। इषिरोऽग्निरिति। आहार इत्यन्ये। छिदिरः पावके रज्जौ करवाले परश्वधे। मन्दिरं नगरेऽगारे क्लीबं ना मकरालये। चन्दिरो नेकपे चन्द्रे। तिमिरं ध्वान्ते नेत्रामयान्तरे। मिहिरः सूर्यबुधयोः। मुदिरः काममूर्खयोः। रुधिरोऽङ्गारके पुंसि क्लीबन्तु कुङ्कुमासृजोः। शुषिरं वंशवाद्यादौ विवरे च नपुंसकम्। मूषिके ना स्त्रियां नील्यौषधौ रन्ध्रान्विते त्रिषु। आशिरो वीतिहोत्रे स्याद्राक्षसे भास्करे पुमान् इति मेदिनी। अजिरमङ्गणमिति। अङ्गेः स्नुटि अनादेशस्य बाहुलकाण्णत्वमित्येके। अन्ये तु विश्वकोशाद्युपष्टम्भेन दन्त्यमेवेच्छन्ति। इह दशपादीवृत्तौ नञ्पूर्वस्य जीर्यतेरत्र वर्णलोपो निपात्यते इत्युक्तं तदपि ग्राह्यम्। आशुन्दूतमजिरं प्रत्नमीड्यमित्यादौ न जीर्यतीत्यजिर इत्यर्थस्यानुगुणत्वात्। अजिरं प्राङ्गणे कार्यविषये दर्दुरेऽनिले। शिशिरो ना हिमे न स्त्री ना चन्द्रे दन्तधावन इति मेदिनी। शिबिरमिति। शेरतेऽस्मिन् [illegible]तानि। निवेशः शिबिरं षण्ढमित्यमरः। सलिकलि। कलिल इति। मिश्रो गहनश्च। महिलेति। महिला फलिनी स्त्रियोरिति मेदिनी। एणो हरेति। तथा च दमयन्तीकाव्ये परमहेलारतो व्यापारदारिक इति परमहेला स्त्री। अथ च परमा उत्कृष्टा हेला क्रीडा तत्र रत इत्यर्थः। कपिल इति। कपिला रेणुकायाञ्च शिंशपा गोविशेषयोः। पुण्डरीककरिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम्। ना नले वासुदेवे च मुनिभेदे च कुक्कुरे इति मेदिनी। रेणुकेह लताविशेषः। हरेणुरेणुका कौन्ती कपिला भस्मगन्धिनीत्यमरात्। मिथिलादयश्च। मथि विलोडने अकुरस्येलं निपातनात्। कठेर इति । ।कठ कृच्छ्रजीवने। कुठि च। द्वितीयस्य इदित्त्वान्नुमि प्राप्ते आह। बाहुलकादिति। कबेरोत च। गुपादिसूत्रादारभ्य एतदन्तानि सप्त सूत्राणि केषाञ्चिदसंमतानि। कपोत इति। कपोतः स्याच्चित्रकण्ठे पारावतविहङ्गयोरिति मेदिनी। कपोतः पक्षिमात्रेऽपीति त्रिकाण्डशेषः। अन्नोतवच्छिलं ग्रामादिकम्। यत्कपोतः पदमग्नौ कृणोति। देवाः कपोत इषितो यदिच्छन् इत्यादौ सर्वत्र प्रत्ययस्वरेण मध्योदात्तस्यैव पठ्यमानत्वात्। कठोर इति। कठिनः पूर्णश्च। कठोरताराधिपलाञ्छनच्छविरिति माघः। किशोर इति। किशोरोऽश्वस्य शावके। तैलपर्ण्यां

मधोचस्यात्तरुणावस्य सूर्ययोरितिमेदिनी।कटोलइति।कटेवर्षावरणयोः।केचित्तुसेकडिंपठन्ति।कडिमदो।कण्डोलःपिटकः।चण्डालस्त्री।चण्डालिकातुकण्डोलवी चण्डालवल्लकीत्यमरः।पटोलइति।पटोलंवस्त्रभेदेनौषधौज्योत्स्नान्तुयोषितिइतिमेदिनी।कल्लशब्देबाहुलकाद्तोप्यांलच।कल्लोलःपुंसिहर्षेस्यान्महत्सूर्मिषुवारिणइतिमेदिनी।स्यन्दे:।सिन्दूरस्तरुभेदेस्यात्सिन्दूरंरक्तचूर्णके।सिन्दूरीरोचनारक्तचेल्लिकाधातकीषुचेतिमेदिनी।विश्वप्रकाशो।सितनि।सेतुरालौकुमारकइतिमेदिनी।सेतुरालौ।स्त्रियांपुमानिति।मण्डन्दधिभवंमस्तुइतिचामरः।धातुनेन्द्रियेषुच।शब्दयोनिमहाभूततद्गुणेषुरसादिषु।मनःशिलादौश्लेष्मादौविशेषाद्गैरिकेस्त्रिचेतिमेदिनी।श्लेष्मादिरसरक्तादिमहाभूतानितद्गुणाः। इन्द्रियाण्यश्मविकृतिशब्दयोनिश्चधातवइत्यमरः।अर्त्तेश्चतुः।तुनिप्रकृतेअन्तोदात्तत्वार्थन्तुक्रियते।ऋतुनायज्ञम्।यऋतुर्जनानामित्यादि। ऋतुर्वर्षादिषट्सुच। आर्त्तवेभासिचपुमानितिमेदिनी।कुसिमनि।कमिग्रहणंप्रपञ्चार्थम्।अर्जिदृशीत्यादिनाकुप्रत्ययेतुकित्त्वात्।मन्तुरिति।मन्तुःपुंस्यपराधेपिमनुष्येपिप्रजापतावितिमेदिनी।दीर्घत्वाङ्कुशमितिमन्त्रस्यवेदभाष्येतुमन्तुमइतिमन्तुशीनन्तहान्हेइन्द्रेतिव्याख्यातम्।गातुर्नाकोकिलेभृङ्गे।गन्धर्वेत्रिपुरोषणेइतिमेदिनी।भानुर्नाकिरणेसूर्येइतिच।चायःकिः।केतुर्नारुक्पताकारिग्रहोत्पातेषुलक्ष्मणीतिमेदिनी।अमुःशरीरमिति।अभिलषितार्थश्च।आप्तव्यत्वात्।अतस्यचआप्तोर्यामशब्दस्याभिलषितार्थप्रापकइत्यवयवार्थमाहुः।कृञःकतुः।क्रतुर्यज्ञेमुनौपुंसीतिमेदिनी।एधिवह्योश्चतुः।चित्वादन्तोदात्तः।स्योनंपत्येवहतुंकृणुष्व।वहतुःपथिकेवृषभेपुमानितिमेदिनी।आतृकन्।जैवातृकःपुमान्।सोमेकृपकायुष्मतोस्त्रियामितिमेदिनी।।कृषिचमि।रभसकोशस्थमाह।कर्षूरित्यादि।कर्षूःपुमान्।करीषाग्नौस्त्रियाङ्कुल्याल्पखातयोरितिमेदिनी।सर्जूर्वणिजि।विद्युतिस्त्रियांस्वर्गोविधोरुद्रेइति।खर्जूःकीटान्तरेस्मृता।खर्जूरीपादपेकण्डूमितिच।मृजे।मर्जूःस्त्रियांशुद्धौधावकेपिचेतिमेदिनी।वहः।वधूःस्नुषानवोढास्त्रीभार्यास्पृक्काङ्गनासुचेतिविश्वः।स्पृक्काचमहिलावधूरितित्रिकाण्डशेषः।कषेः।कषशिखेतिदण्डकेपठितः।कच्छ्वान्तुपामपामाविचर्चिकेत्यमरः।णिकनि।कासगतौ।कासूर्वि लवाविस्यात्तथाशक्त्यायुधेस्त्रियामितिमेदिनी।कासूःशक्त्यायुधेरुग्विद्धुधीविकलवाविस्यादितिहेमचन्द्रः।नलंबतेअलाबूः।त्रोदुट्च।तर्दूरिति।नेद्रुशीतिनेदूः।बरमनादा

म॰ श॰ पिङ्गलो।वर्णविशेषेप्राज्यम्।बहुपरागयोरिति।परागः कौसुमेरेणौ।स्नानीयादौरजस्यपीतिबोद्धव्यम्।भक्ते ओदने।नीवृति।जनपदे।स्थास्थिन्स्थूनामिति।संप्रतिभाष्येस्थास्थिन्स्थूणामितिपठ्य
३५ तेसव्येष्ठाः परमेष्ठीसव्येष्ठासारथिरितिचोदाहृतम्।तङ्किं चेदं।भाष्यनयानैकमितितिचिन्त्यमेतत्।वामे।प्रतिकूलेसुन्दरेचाद्दृश्यर्थमिति।।सव्यगर्थमित्यपिबोद्धव्यम्।लक्ष्म्यामङ्गलइतिप्रसिद्धाया
म्।शुक्रो।दैत्यगुरौ।प्रपातः करारडाइतिलोकप्रसिद्धः।टक्का।औषधिविशेषः।पादपभेदयोरिति।सस्नुवेस्वास्येदरक्षे।घूके।पक्षिविशेषे।क्रिमिजातौ।सोनकीडेतिभाषयाप्रसिद्धो।भ्रमराली।
भाषयाभेवरइतिप्रसिद्धा।गोमायुः शृङ्गालः।काण्डेबाणे।वाशितेतिस्त्रीकरिणीचेत्यर्थः।नवोद्धृतम्।नवीनरक्षः।प्रादिसमासेनेति।अधेरपिबहुलकादुरच्संप्रसारणेइत्यन्ये।अथवेरेवनाड्डुल
कात्यशेषकारइतिपरे।कृष्णवृन्ता।भाषयापाडलीत्याख्या।।पामरोगः।शीतलाभेलोजलतरणद्रव्यम्।व्यवसायोनिश्चयः।मकरालयः समुद्रः।अनेकपोहस्ती।कुङ्कुमे।केसरोनल्योषधाविति।ज
केचित्तुत्रोड्केतिपठित्वाधातोर्ड्गागममाहुः।तेषामधातोर्गुणोदुर्लभः चकारबलेनवासाधनीयः।डुगागमात्पूर्वंयस्यात्प्रनन्तदपिभवतीतिव्याख्यानात्।दरिद्रातेः।इश्व
आश्वेतिश्वोजदेवस्तुयलोपइतिरेफादिकंपदंछित्वाद्वेधाव्याख्यात।रिश्च आश्वा।दद्रूः।रश्वदश्व आश्वा।अन्यथावाधेन्त्यसदेशस्येतिद्वितीयरेफलोपः।दद्रूः।मृगव्यादित्वाद्दु
र्ह्रस्वान्तश्च।दर्दुणोदर्दुरोगीत्यादित्यमरः।इत्युज्ज्वलादिरूपाणि।अन्दूद्दंभू।अन्दूबन्धनमिति।उदिदबन्धने।अन्दूः स्त्रियांस्यान्निगडेप्रभेदेभूषणस्यचेतिमेदिनी।।अन्दु
कोहस्तिनिगडइत्यमरः।सञ्ज्ञायाङ्कन्।कणइतिह्रस्वः।केचित्तुअमगतौ अस्यदुक्अन्दूवुडिरितिव्याचख्युः।दृभीग्रन्थेइतितुदादिः।दृंभूरिति।सन्दर्भकर्त्रीत्यर्थः।कृयकद्
लन्यो।अस्यरूपाणि।हृहूवदित्युक्तम्।कैयटोप्यत्रानुकूलः ।।७ लोपरिस्थेशाकविशेषेप्रवालवल्ल्यामित्यर्थः।।विषयेदेशे।दन्तधावनेखदिरवृक्षे।फलिनीतिप्रियङ्गुः फलिनीफली
।रेणुकालतानाविशेषः।पुण्डरीककरिण्यां अग्निकोणस्थदिग्गजभार्यायाम्।द्वितीयस्येति।कुटी।निधातोरित्यर्थः।पिटकइति।पिटकः पेटकः पेटी।कुण्डोलवीणा।भाषयाकिङ्गरीत्याख्या।रक्त
वेल्लिका।पुष्पविशेषः।धातकीधातुः।आलिर्जलबन्धनम्।कुमारो।वरणाख्योवृक्षः।शब्दयोनीति।भूसत्तायामित्यादिः।महाभूतानि।पृथिव्यादीनि।तद्गुणागन्धादयः।श्लेष्मादौश्लेष्मवातपि रा॰ भ॰
त्तेषु।रसरक्तादि।रसरक्तमांसमेदोमज्जास्थिशुक्राणि।अश्मन्तिदन्तिहरितालादिः।आर्त्तवम्।स्त्रीपुष्पम्।रोषणे।सक्रोधे।लक्ष्मणि।चिन्हे।कृषकः।कृषीवलः ।। ३५६

इत्याहुरिति। अत्रारुचिबीजन्तु क्विपाति डे निपातनवैयर्थ्यम्। लाक्षणिकत्वादस्य मुख्ये वार्त्तिके ग्रहणाभावेनेको यणचीति यण औचित्यञ्च। कुश इति सौत्र इति। कुशान् लातीति कुशल इत्य माधवादयस्तु हृद शब्दे उपपदेऽस्मुवः क्विप्प्रत्ययः। उपपदस्य हृदन्तादेशो निपात्यते। पद्दादन्निति नान्तमव्ययं हृदार्थकमुपपदं हृन्भूः तरुः सर्पः कपिर्वेति व्याख्याय हृन्करोतिय णाव र्णाभूवद्रूपमस्येत्याहुः। हृस्वोपीति। उदाहृतञ्च विक्रमादित्येन। तस्याजंबोः फलरसो नदीभूयप्रवर्त्तत इति। यत्तु पारिणतजंबुफलोपभोगहृष्टा इति भारविप्रयोगं हृस्वान्तत्वे साधकत्वेनोदाजहुः। तन्न। इको हृस्वोऽङ्यो इति सूत्रेण गतार्थत्वात्। दधिमिति। केचित्तु दधातेरित्वन्द्वित्वं षुक् च निपात्यते। दधात्यसौ दाधीपुरित्याहुः। उज्वलदत्तोक्तं पाठमाह। केचिदिरिति। एतच्चकैयटमाधवादिमहाग्रन्थविरोधमित्यवधेयम्। अत एव दंभूः स्त्री सर्पचक्रयोरिति भान्ते मेदिनी। मरुदिति। प्रज्ञादित्वादणि मारुतोपि मरुत्शब्दो प्यन्त्युतन्तोस्ति। तथा च विक्रमादित्यकोषः। मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत् इति। संसारावर्त्तश्च। कोयं वातिस दाक्षिणात्यमरुत् इति कविराजः। अत्रानुपपत्तिमत्वाद्दाक्षिणात्यपवन इति पाठं कल्पयन्त्यल्पदृश्वान इति वर्णविवेकः। गरुदिति। यवादिरयम्। तेन मतुपो वत्वं न। गरुत्मान्। ग्रीवा मुद्रा च। गरुत्स्त्री स्वबुर्णलक्ष्योरिति मेदिनी। विश्वकोशमाह। हरिदिति। हरिद्दिशि स्त्रियां पुंसि हयवर्ण्णविशेषयोः। अस्त्रियां स्यात्तृणे चेति मेदिनी। कपस्येति। एते जगतेरोहिद्भूतारिरमविषु मृष्यस्य वपुषेति पुष्पदन्तप्रयोगो व्याख्यातः। रोहिन्मृग्याङ्गनाभेदे स्त्री नाक इति मेदिनी। शमेर्ढः। बाहुलकादिति। यद्यपि नेड्वशि कृतीतीट्निषेधः सुवचः तथापि नेड्रमनादाविति परिगणनादेवमुक्तम्। शण्ढः स्यात्पुंसि गोपतौ। आकृष्टाङ्गे वर्षवरे तृतीयप्रकृतावपीति मेदिनी। कमठ इति। कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकमिति मेदिनी। जरठ इति। जॄष्वयोहानौ। जरठः कठिने पाण्डौ कर्कशेप्यभिधेयवदिति विश्वमेदिन्यौ। जरठः कठिने जीर्णे इति वैजयन्ती। शमेः खः। शंखो निधौ ललाटास्थिकंबौ न स्त्रीत्यमरः। शङ्खः कंबौ न योषिन्नाभालास्थि निधिभिन्नखे इति मेदिनी। कपेष्ठः। कण्ठो गले सन्निधाने ध्वनौ मदनपादपे इति विश्वमेदिन्यौ। फलत्रिकमिति। त्रिपलान्पला च सेति विश्वः। त्रिफलाशब्दसमानार्थस्त्रफलाशब्द इति द्विगोरिति सूत्रे रक्षितः। शपेः। शप आक्रोशे। वृषादिभ्यश्चित्। शः। द्राक्षावरवर्ण्णाश्ववृषलाश्वजयन्यजा इत्यमरः। वृषलस्तु रंगे शूद्र इति हेमचन्द्रः। पललमिति। पल गतौ। पललं तिलचूर्णे च पङ्के मांसे नपुंसकम्। नराक्षसे इति मेदिनी ॥ ८६ न्योमृतीयाप्रकृतिर्जेन्मक्लीबः। उदारावक्रयोरिति ॥

उदारेव कसीने चेत्यर्थः। पुष्पभित्। पुष्पविशेषः गोदारणे। हले। तृणराजः। स्तालिः। कुलपाथेयमत्सरे इति समाहारद्वन्द्वः तेषु इत्यर्थः। पृश्निरोषधिविशेष इत्यर्थः। डिंबिका। भाषया सरलः पूतिकाष्ठेनाथोदारावक्रयोस्त्रिष्विति मेदिनी। सरला विरलायन्ते घनायन्ते कलिद्रुमाः। न शमी न च पुन्नागा अस्मिन् संसारकानने इत्यभियुक्तप्रयोगः। कमेरिति। बाहुलकादिलच् नानुषजते। कंबलो नागराजे स्यात् सास्नाप्रावारयोरपि। कृमावप्युत्तरासङ्गे सलिले तु नपुंसकमिति मेदिनी। मुसलं स्यादयोग्रे च पुंनपुंसकयोः स्त्रियाम्। तालमूल्यामाखुपर्णी गृहगोधिकयोरपीति मेदिन्याम्। मूर्द्धन्यमध्योप्ययमिति वर्णदेशना। मुसखण्डन इति धातोर्दन्त्यान्तेषु मूर्द्धन्यान्तेषु च वोपदेवात्रेयादिभिः पठितत्वात्। उज्ज्वलदत्तादयस्तु तालव्यमध्यमप्याहुः। अत एव मुसली मुशली पि चेति। विश्वकोशे तु शली पि चेति पाठान्तरम्। लङ्गेरिति। बाहुलकादिलच् एवमग्रेपि। लाङ्गलं तालहलयोः पुष्पभिद्गृहदारुणोः। लाङ्गली गृहपिप्पल्यामिति हेमचन्द्रः। लाङ्गली तोयपिप्पल्यां क्लीबं तु कुसुमान्तरे। गोदारणे तृणराजगृहे दारुविशेषयोरिति मेदिनी। कुड्मलो मुकुले पुंसि न द्वयोर्नरकान्तरे। कोमलं मृदुले जले इति चा। बाहुलकादन्यत्रापि। तथा कुसश्लेषणे दन्त्यान्तो निर्विवादः। वोपदेवमते तालव्यान्तोपि। गुणः कोसलः कोशलो वा देशविशेषः। रडेः कोसलेति सूत्रे तु दन्त्यपाठ एव सांप्रदायिकः। संब संबन्धे। शंब च। सम्बलं शंबलम्। शंबलोऽस्त्री संबलवत्। कुलपाथेयमत्सरे इति मेदिनी। कदि आह्वाने। नलोपः। गौरादित्वात् ङीष्। मदान्दोलितकर्पूरकदलीदलसन्निभा। विश्रामाय श्रमापन्नानाहूयन्तमिवाध्वगामिति काशीखण्डम्। अजादेराकृतिगणत्वाट्टाबपि। कदला कदलो पृश्न्यां कदली कदलौ पुनः। रंभावृक्षे च कदली पताकामृगभेदयोः। कदला डिंबिकायाञ्चेति मेदिनी। पिजि हिंसायाम्। न्यङ्क्वादित्वात् कुत्वम्। पिङ्गलो नागभिद्रुद्रचण्डांशुपारिपार्श्वके। निधिभेदे कपावग्नौ पुंसि स्यात् कपिलेऽन्यवत्। स्त्रियां वेश्याविशेषे च करिण्यां कुमुदस्य चेति मेदिनी। कुश इति सौत्रो धातुः। कुशलः शिक्षिते त्रिषु। क्षेमे च सुकृते चापि पर्याप्तौ च नपुंसकमिति मेदिनी। कमु कान्तौ। कमलं सलिले ताम्रे जलजे व्योम्नि भेषजे। मृगभेदे तु कमलः कमला श्रीवरस्त्रियोरिति विश्वमेदिन्यौ। मडि भूषायाम्। मण्डलं परिधौ कोठे देशे द्वादशराजके। क्लीबेऽथ निवहे बिंबे त्रिषु पुंसि तु कुक्कुरे इति मेदिनी। कोठो मण्डलमित्यमरः। बिंबे। स्त्री मण्डलं त्रिष्विति। कुडि दाहे। पट गतौ। कोठे दने। कुण्डलं कर्णभूषायां पाशेपि वलयेपि च ॥ ७५ धाडि इत्युच्यते। पाशश्चोरणां बधसाधनं सूत्रमयम् ॥

परिच्छदे। शिबिकाद्याछादने। प्रस्तरान्तरे इति। पाषाणविशेषदृषदर्थः। रुद्रदारको विधारेति प्रसिद्धः। पांसुला व्यभिचारिणी। हस्तिसंवाहो हस्तिकवचम् ॥ ॥ ॥ ॥

अथ पटलम्पिटके च परिच्छदे। छदिर्दिग्रोगतिलके क्लीबं वृन्दे पुनर्नना। छलं स्खलितशाठ्ययोरिति मेदिनी। मृजेटि लोपश्च। मलो स्त्री पापविट्किट्टे कृपणे त्वभिधेयवत् इति मेदिनी॥ त्रुपेः। चपलः पारदे मीने विं के प्रस्तरचौरे च। चपला कमला विद्युत्पुंश्चलीपिप्पलीषु च। नपुंसके तु शीघ्रे स्याद्वाच्यवत्तरले चले इति मेदिनी। शाकिशम्योः। शकलं खण्डे रोहितादीनां त्वचि च तद्योगात् छकली मत्स्यः। मत्स्यान् शकलानिति भाष्यम्। शकलं त्वचि खण्डे स्यात् रागवस्तुनि वल्कले इति मेदिनी। शामलं शकृदेनसोरिति नानार्थरत्नमाला। कोगुग्। छगलं नीलवस्त्रे ना छागले स्त्री वृद्धदारके इति मेदिनी। छगलच्छागे छगली रुद्रदारकभेषजे इति हेमचन्द्रः। अमन्ताड्डः। अमिति प्रत्याहारः। त्रिभ्य एव कणमाइति वृत्तिकारोक्तिस्तु अशाद्याधीस्य मात्रविषया। दण्ड इति। बाहुलकात् त्रुदृ इति नेत्तत्स्ना। दण्डो स्त्री लगुडेपि स्यादित्यमरः। दण्डो सैन्यार्कपार्श्वगाविति त्रिकाण्डशेषः। एण्डा मूषिकपर्ण्यां त्वविधवायां च योषिति। खण्डो स्त्री शकलेनेक्षुविकारमणिभेदयोः। मण्डः पञ्चाङ्गुले शाकभेदे क्लीबन्तु मस्तुनि। चण्डा तु पांसुलायां स्त्री त्रिषु हस्तादिवर्जिते। अण्डमुष्के च वेश्यां स्यात् षण्डं पद्मादिसङ्घाते न स्त्री स्याद्गोपतौ पुमान्। गण्डः स्यात्पुंसि खड्गिनि। ग्रहयोगप्रभेदे च वीथ्यङ्गे पिटकेपि च। विह्वीरकपोलेषु हयभूषणबुद्बुदे। खण्डोला तिन्तिणीवृक्षे यमकिङ्करदैत्ययोः। चण्डी कात्यायनी देव्यां हिंस्राकोपनयोषितोः। चण्डा धनहरीशङ्खपुष्प्योस्त्रिषु तिकोपने। तीव्रेपि। पण्डः शण्ढे स्थिपि स्त्री स्यादिति मेदिनी। फण गतौ। फण्डः। प्रज्ञादित्वादण्। फाण्डं सुन्दरम्। कादिभ्यः कित्। कुण्डमिति। कुणशब्दोपकरणयोः। किलात्वगुणः। कुण्डमग्न्यालये मानभेदे देवजलाशये। कुण्डी कमण्डलो जारात्सपालीतिसुते पुमान्। पिठरे तु नना इति मेदिनी। काण्डमिति। कमुकान्तो। अनुनासिकस्य क्वीति दीर्घः। काण्डोस्त्री दण्डबाणार्ववर्गावसरवारिष्वित्यमरः। अर्वा कुत्सितः। अतएव काण्डस्तम्बे तरुस्कन्धे बाणे च रदनीरयोः। कुत्सिते रस्रमिन्नाडीवृन्दे रहस्ति न स्त्रियामिति मेदिनी। गुडो गोले सुपाकयोरित्यमरः। गुडा स्नुही। तद्वत्केशा अस्य गुडाकेशः शिवः। जटाधारित्वात्। गुडः स्याद्गोलके हस्तिसन्नाहे सुविकारयोः। गुडा स्नुह्यां च कथिता गुटिका यास्त्रयोषितीति मेदिनी। स्थाचुति। लचासिद्धे आलच् आ। कारश्चिन्त्यप्रयोजनः। चित्स्वरं बाधितुं त्वापक्षे आद्युदात्तार्थ इत्येके। स्थालं भाजनभेदेपि स्थाली स्यात्पाटलोखयोरिति मेदिनी। चात्वालो यज्ञकुण्डे स्यात् दर्भे चेति विश्वः। मार्जालीयः स्मृतः शूद्रे बिडाले कायशोधने इति मेदिनी। पाताले त्रिति। उपभारुद्धिः। पाताल नागलोके स्याद्विवरे वडवानले इति मेदिनी। चडि कोपे इत्यस्य तु इदित्वान्नुमि अदुपधत्वाभावान्न वृद्धिः ॥

नागरे। अ मिङ्गो धूम्याटो भ्रमरः। षिङ्गो विटः ॥

यत्तु माधवग्रन्थे पतिचण्डिस्यामालन्निति पठित्वा पातालशब्दे बाहुलकाद् डिमुक्ता आलजिति वृद्ध्यर्थं न्नितङ्के विसलठन्निदस्तुपन्यस्य चण्डालशब्देपि हृङ्डिः स्यादिति दूषितम्। तदतिरभसात्। एके इस्य परितोषाद्वादनं म्। तद्धी जन्तुकुलालवरुडकर्मारनिषादचण्डालमित्रामित्रेभ्यः छन्दसीद् इति चण्डात्स्वार्थेणं विदधता वार्त्तिके न तद्भाष्ये याचसहविरोध इति बोद्ध्यम्। तमिवि विषितमुकाङ्क्षायाम्। विशप्रवेशने। विडआक्रोशे। मृणहिंसायाम्। कुलसंस्त्याने। कपिचलने निर्देशान्नलोपः। पलगतौ। पचिविस्तारे। तमालस्तिलके खड्गे तापिच्छे वारुणद्रुमे। विशालालिन्द्रवारुण्यां स्वर्जायिन्यान्तु योषिति। नृपवत्समिदोः पुंसि स्थूलेप्यभिधेयवत्। बिडालो नेत्रपिण्डे स्यात् वृषदंशके पुमान्। मृणालं नलदे क्लीबपुनपुंसकयोर्बिशे। कुलालः कक्कुभे कुम्भकारे स्त्री लज्जनान्तरे। कपालोऽस्त्री शिरोऽस्थि स्यात् घटादेः शकले व्रजे। पञ्चालीपुत्रिकागीत्योः स्त्रियां पुंभूम्नि नीवृतीति मेदिनी। बाहुलकात् पतेरपि शाला। शलचलनेऽस्मात् घञ्जिकायां शाला निशाना मिति निपातनात् स्त्रीत्वमिति न्यासकारः। बोपदेवस्तु शालङ् कत्थने इति पपाठ। शाला द्रुस्कन्धशाखायां गेहैकदेशयोः। नाम्न्येषे इति मेदिनी। पतेर्बाहुलकादर्थान्तरेपि। पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः। क्लीबं सूते इति मेदिनी। सूते पारदे इत्यर्थः। तरङ्ग स्तुरगादीनामुत्काले वस्त्रभङ्गयोरिति विश्वः। विडङ्ग इति। विडङ्गाक्रोशे। विडङ्गः कृमिसङ्घघ्नो विडङ्गो नागरेऽन्यवत् इति विश्वः। विडङ्ग त्रिषविज्ञे स्यात् कृमिघ्ने पुन्नपुंसकमिति मेदिनी। मृदङ्ग इति। मृदक्षोदे। मृदङ्गः पटहे घोषइति मेदिनी। कुरङ्ग इति। कुविक्षेपे। बाहुलकादुत्वम्। कुरशब्दे इति वास्तु। सारङ्गः पुंसि हरिणे चातके च मतङ्गजे। शबले त्रिषु इति मेदिनी। बाहुलकात् नन्नये। अयनारङ्गः पिप्पली रसो यमजप्राणिनिकटे नागरङ्ग द्रुमेपि चेति मेदिनी। गन् गम्यद्योः। बाहुलकादमेरपि। अङ्ग ङ्गान्त्रउपाये च प्रतीके चाप्रधानके। अङ्गो देशविशेषे स्यादङ्ग संबोधनेऽव्ययमिति विश्वः। अंगङ्गान्त्रप्रतीकोपाययोः पुंभूम्नि नीवृति। क्लीबैकत्वेत्वप्रधाने त्रिषङ्ग वति चान्तिक इति मेदिनी। छागृ छायते छिद्यते छागः। पूयते सुखं यज्ञार्थमनेन पूगस्तु क्रमुके वृन्दे इति मेदिनी। खड् भेदने। खड्गो गण्डकशृङ्गे स्यात् निस्त्रिंशेङ्ग गण्डकेपि चेति शब्दतरङ्गिणी। खड्गो गण्डकशृङ्गासि बुद्धभेदेषु गण्डके इति मेदिनी। भृञ्जः। किं दूहणं स्पष्टार्थम्। अनुवृत्त्यैव लाभात्। भृङ्गो धूम्याट् षिङ्गयोः। मधुव्रते भृङ्ग राजे पुंसि भृङ्ग·द्रु·ड्लचिद् इति मेदिनी। शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात् कूर्चशीर्षके। स्त्री विषाया स्वर्णमीनभेदयोः ऋषभौषधौ इति मेदिनी। शृङ्ग विषाणमाख्याते शैलाग्रे जलयन्त्रके। मीनौषधिसुवर्णानां भेदे स्त्री प्रयुज्यते। इति उत्पलिनीकोशः ॥

सूहः असेमारवना। इत्यस्याभवति नेति। पद्यन्तो दानत्वमसेष्यमेतद्दानदपि वाकुलकादेः ब्रह्मा। वाग्गुला विति। अधोमुखतयाविशकारिणि पक्षिणि ॥

अण्डनूरुस्य। करण्डो मधुकोशासिकारण्डे उद्दालटके इति मेदिनी। वरण्डो। पन्तरावेदौ समूहमुखरोगयोरिति विश्वमेदिन्यौ। वा उलूलकात्वरतेः। तरण्डो बडिशीसूत्रबद्धकाष्ठादिकेऽस्त्रव इति मेदिनी । शरद्वारातस्त्रीवत्सरेष्वृतौ। दरतात्स्त्रियां प्रपाते च भये पर्वतयोरपि। असत्तुस्त्री भास्वरे योनाविति च मेदिनी। उके अंबसुलाभिके इति मन्त्रस्य व्याख्यायां भसद्भग इति वेदभाष्यम्। जायन्याः पत्नीः संयाजयन्ति भसद्र्यां पाहि स्त्रियः इत्यत्र भसज्जघनमिति व्याख्यातारः। दृणातेः। दृषन्निः पेषणशिलापट्टप्रस्तरयोः स्त्रियामिति मेदिनी। अर्त्तिस्तु सोमस्तुहिमदीधितौ। वानरे च कुबेरे च पितृदेवे समीरणे। वसुप्रभेदकर्पूरे नीरे सोमलतौषधौ इति मेदिनी। धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ। अहिंसोपनिषन्न्याये ना धनुर्यज्ञसोमपे इति च। धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतावितिविश्वः। क्षौमं मदे दुकूले स्त्री क्षौमवल्कलजांशुके। शरणे जङ्गिजे इति मेदिनी। भामः क्रोधेरवौ दीप्तौ। यामस्तु पुंसि प्रहरे संयमेपि च कीर्त्तितः। वामस्तु ने पुंसि हरे कामदेवे पयोधरे। वल्गुप्रतीपसव्येषु त्रिषु नार्यां स्त्रियामथ। वामी शृगाली वडवा रासभी करभीषु च। पद्मोऽस्त्री पद्मके व्यूहनिधिसंख्यान्तरे नु जे। नानागे इति मेदिनी। यस पूजायामिति। यच्चूज्वलदहेनयस्भसहसनयोरित्युपन्यस्तमसत्तु तिस्य च वर्गतृतीयादित्वात्। न चलस्यमपि तथैवेति भ्रमितव्यम्। अक्षीभ्यान्ते नासिकाभ्यामिति मन्त्रे यस्मशब्दस्यान्तस्थादित्वनिर्णयात्। न च तदुपन्यस्तधातुस्यन्तस्यादिरिति भ्रमितव्यम्। जक्षत्। क्रीडन्। रममाण इत्यादिप्रयोगेण तथा कविकल्पद्रुमादिभिः सह विरोधादिति दिक्। मनिन्प्रत्यये तु नान्तः। राजयक्ष्मेव रोगाणामिति माघः। यक्ष्मणापि परिहाणिराययाविति रघुः। दशयादीरन्तो मुदुहसूत्रे पक्षीति पवर्गीयादिपाठे वा सौत्रो धातुः बाहुलकान्नकारस्य नेत्वम् ज्ञात इत्युक्ता अक्षिपक्ष्मेत्युदाहृतं तत्र। पक्षपरिग्रहे त्वस्पलाम्नि नामतार्थत्वात्। नेमः क्लीबेवधौ गर्त्ते प्राकारे कैतवेपि चेति मेदिनी। नेमस्त्वर्द्धे प्राकारगर्त्तयोरपौ कैतवे चेति हेमचन्द्रः। जहातेः। जिह्मस्तु कुटिले मन्दे क्लीबं तगरपादपे इति मेदिनी। अवतेः। ओमं प्रश्नेऽङ्गीकृतौ रोषे इति विश्वः। प्रसेरान्तः। ग्रसु अदने। अतो मनिन्। धातोराकारश्च। ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वक इति विश्वः। शब्दादिपूर्वको ग्रामशब्दः वृन्दे। शब्दे ग्रामो गुणग्राम इति यथा। संपूर्वो यं युद्धे। तदुक्तम्। संपूर्वः संयुगे स्मृत इति। उर्मनगरमिति। उन्मासूर्यकाल यजमानादिति लेकतुमन्त्रे इति वेदभाष्यम् । स्थोरामेरिति। सूत्रतन्तुरित्यन्येषु मन्तेजसि सूर्ये वा इति मेदिनी। शुष्मं बलमिति वेदभाष्ये। शुष्म इति शुष्मोऽपथुपिसंशुगेर इति मेदिनी। दस्युस्तु यजमाने स्यादपि चौरे हुताशने इति च। नपूपणमिति। सभाष्ये तु दस्मो दर्शनीय इति व्याख्यातम्। त्रिशुस्यामाहारित्वसोमस्यामास्यामाप्रकारिका निघण्टुस्थमः।

मालामोऽस्त्री मागस्त्यवारिदे स्व इद दारके। पिके चन्द्रे स्याद् इदिलेः प्रतिसू
नो इति विश्वा मरिचे सिन्धुलवणे क्लीबं स्त्री गुणादितो मधौ। अथ स्थलाङ्
नायाःत्रिषु क्षोव पिता मुलौ ॥

निरङ्किका। चिधाराख्या। इतिउणादिषुप्रथमः पादः ॥

यमुना। यान्त्रिपासा सा पाण्डुः सान्त्रिवृत्तिकौ षंधौ। नीलेका यामिति मेदिनी। ईर्ममिति। ईरगतौ। व्रणोस्त्रियामीर्ममरुः क्लीबे इत्यमरः। जनजनने। जन्मस्। मनिचन्तस्तुनान्सः। जनुर्जननजन्मानीत्यमरः। उभयसाधारणः। युजिरुचि। रुक्मन्तु काञ्चने लोहे इति विश्वमेदिन्यौ। हन्तेर्हिंच। हिमन्तुषारमलयोद्भवयोः स्यान्नपुंसकम्। शीतलेवाच्यलिङ्गं इति मेदिनी। भीष्मो गाङ्गेयघोररसाः। भी। भीमोम्लवेतसे घोरे शंभौ मध्यमपाण्डवे। घर्मः स्यादातपे ग्रीष्मेप्युष्णस्वेदाम्भसोरपि। ग्रीष्म ऊष्मर्तुभेदयोरिति च। अशूप्रुषि। अश्वः पुंभेदवाजिनोरिति विश्वः। लट्वा करञ्जभेदे स्यात्फलेवाद्ये खगान्तरे इति विश्वमेदिन्यौ। कण्वं पापे मुनौ पुंसि कण्वं बीजाद्यशीघुषु। विश्वा त्वतिविषायां स्त्री जगति स्यान्नपुंसकम्। ना नागरे पुंसि देवप्रभेदे स्थ्यखिले त्रिषु इति मेदिनी। इण्शीभ्याम्। शेवं सुखमिति वेदभाष्यम्। ह्रस्वइति। ह्रस्व शब्दे। ह्रस्वोन्यकृखर्वयोस्त्रिषु इति मेदिनी। शेवयह्वाः। दशपादीवृत्तिरीत्या हा। यान्त्यनेनेति। अन्येतु यजतेर्जकारस्य हकारो निपात्यत इत्याहुः। यह्वशब्दो वैदिकनिघण्टौ महन्नामसु पठितः। प्रवोजह्वं पुरूणाम्। यह्वं महान्तमिति वेदभाष्यम्। मीवेति। वेदभाष्येतु अमीवा इति[illegible]त्वा अमरोगे इत्याहुः। इदन्त्वयुक्तम्। अमीवहा वास्तोष्पते इत्यादिमन्त्रास्त्वानुकूलाः। कनिन्युवृषि। युवा स्यात्तरुणे श्रेष्ठे निसर्गबलशालिनि। वृषा कर्णे महेन्द्रे ना इति मेदिनी। तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठतट् इत्यमरः। राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ। यक्षे शक्रे च पुंसि स्यादिति मेदिनी। समानो मरुधन्वानौ इत्यमरः। अथास्त्रियाम्। धनुश्चापौ धन्वशरासनकोदण्डकार्मुकमिति। धन्वा तु मरुदेशे ना क्लीबे चापे स्थलेपि चेति मेदिनी। धन्वि गत्यर्थः सौत्रो धातुः। द्यु अभिगमने। द्युवा सूर्यः। प्रतिदिवेति। प्रतिदीव्ने द्यूतन्आकृतानि इति मन्त्रेतु प्रतिदिवा कितव इति व्याख्यातम्। श्वन्नुक्षन्। कनिन्प्रत्ययश्च इति। नायं निदिति भावः। एतच्च हसन्तशब्दप्रकरणे मघवन्शब्दे व्युत्पादितम्। केचित्तु नित्यस्वीकृत्योसन्नादीनास्[illegible]निपातनमाहुः। तद्गौरवादुपेक्षितम्। श्वेति। इकारलोपो निपात्यते। पूषेति। पूष वृद्धौ। क्लेदौषधिशशाङ्कयोरिति यादवः। मूर्धेति। मूर्धा ना मस्तकोस्त्रियामित्यमरः। मज्जेति। टाबन्तोप्ययम्। उभयास्त्रीस्युमापि मज्जो मज्जपा महे इति द्विरूपकोशात्। अर्यमा तु पुमान्सूर्ये पितृदेवान्तरेपि चेति मेदिनी। परिज्मायत इत्यादि। एतच्च दशपाद्यनुरोधेनोक्तम्। परिज्मानं सुखं रथमिति मन्त्रस्य वेदभाष्येतु परिज्मा परितो गन्ता। अजेः परिपूर्वस्य श्वन्नुक्षन्नित्यादिना मन्प्रत्ययः। अकारलोपः। आद्युदात्तत्वञ्च निपात्यत इत्युक्तम्। उज्ज्वलदत्तस्तु परिज्मेति पठित्वा जु इति सौत्रो धातुः। परिपूर्वः। यणादेशः। परिज्मा चन्द्र इत्याह। तल्लक्ष्यविरोधादुपेक्ष्यम्। मातरिश्वेति। सप्तम्या अलुक् उदात्तत्वञ्च निपात्यते। इह मघवविषये संप्रसारणन्न भवति। मघवेति। सनेः। मिनन्तः। लरलोनकुत्वं वाचकस्यैव मघशब्दस्य तदन्तस्य च ग्रहणात्। इह सूत्रान्त इति शब्दस्यार्थः। तेनास्यभोपि पश्चाद्दर्शनङ्किनि। दशपाद्यान्तु इति शब्दो न पठ्यते। इत्युणादिषु प्रथमः पादः ॥

नेभे इति। इभस्य गानिसर्गः। कालस्मानेति। अष्टादश निमेषाः काष्ठाः। पुटःभेदोऽस्तनजलस्याकस्माद्परिनिर्गमः ॥

कुहूभ्याम्। करेणुरिभ्यां स्त्री नेभे इत्यमरः। करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे इति मेदिनी। गन्धेति। कलापश्चेति बोध्यम्। कलापस्तु सनीनकः। हरेणुः खण्डके चास्त्रियामिति वैश्यवर्गेऽमरः। हरेणुर्ना सतीने स्त्री रेणुका कुलयोषितोरिति मेदिनीविश्वप्रकाशौ। कुष्ठं रोगे सुगन्धे चेति विश्वः। नीथेनीथे मघवानं सुतासः इति मन्त्रे नीथशब्दस्यान्तोदात्तत्वं बाहुलकात्। नीथेनीथे स्तोत्रे इति वेदभाष्यम्। रथः पुमानवयवे स्यन्दने वेतसेऽपि चेति मेदिनी। रथः स्यात्स्यन्दने काये चरणे वेतसेऽपि चेति विश्वः। काष्ठा दारुहरिद्रायाङ्कालमानप्रकर्षयोः स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकमिति मेदिनी। उषिकुषि। कोष्ठः कुसूले चात्मीये मध्ये कुक्षेर्गृहस्य च। गाथा श्लोके संस्कृतान्यभाषायां शेषवृत्तयोरिति मेदिनी। अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः। अर्थो विषयार्थनयोर्द्धनकारणवस्तुषु। अभिधेये च शब्दानां निवृत्तौ च प्रयोजने इति मेदिनी। शोथः श्वयथुः। श्रुगतौ। सर्त्तेर्णित्। सार्थो वणिक्समूहे स्यादिति सङ्घातमात्रकेऽइति मेदिनीविश्वप्रकाशौ। जृवृञ्। जरूथः सुरविशेष इति वेदभाष्यम्। वरूथं स्यात्तनुत्राणे रथगोपनवेश्मनोरिति हेमचन्द्रः। वरूथो रथगुप्तौ स्यात् वरूथं रथवेश्मनोरिति विश्वः। पातृ। तुत्थोऽग्नावञ्जने तुत्था नीली सूक्ष्मैलयोरपीति विश्वः। तुत्थमञ्जनभेदे स्यात् नीलीसूक्ष्मैलयोः स्त्रियाम्। सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकमिति मेदिनी। अर्त्तेर्निरि। द्रोघवाचस्ते निर्ऋथं सचन्तामिति मन्त्रे निर्ऋथो हिंसेति वेदभाष्यम्। निशीथस्तु पुमानर्द्धरात्रे स्याद्रात्रिमात्रे चेति मेदिनी। प्रति त्यञ्चारुमध्वरमिति मन्त्रे गोपीथः सोमपानमिति वेदभाष्यम्। यास्कोऽप्येवम्। तीर्थमिति तु वृत्तिकारः। अवगाथ इति। गाङो ह्रस्वत्वनिपातनात्। समीथः। समिथशब्दः सङ्ग्रामपर्यायेषु वैदिकनिघण्टौ पठितः। श्रिये जात इति मन्त्रे समिथा युद्धानीति वेदभाष्यम्। युक्तञ्चैतत्। सम्यगेति जयायास्मिन् इति व्युत्पत्तेः। संपूर्वस्य इणः क्थन्। आद्यन्तस्य लोकेऽपि युद्धार्थत्वदर्शनाच्च। उक्तं ह्यमरेण समीत्याजिसमिद्युधः इति। पृष्ठ। पृषु सेचने। पृष्ठं तु चरमं तनोरित्यमरः। पृष्ठञ्चास्तुसमात्रेऽपि देहस्यावयवान्तरे इति मेदिनी। स्तोत्रविशेषेऽपि पृष्ठम्। चित्राधिकरणे पृष्ठैः स्तुवत इत्यादौ तथापि निर्णयात्। गूथमिति। गु पुरीषोत्सर्गे। निपातनाद्दीर्घः। एवं यूथेऽपि। यूथन्तिर्यक्समूहे स्त्री पुष्पभेदे च योषितीति मेदिनी। यूथी पुष्पप्रभेदे स्यात् मागध्याञ्च करण्डके। यूथन्तिर्यक्समूहेऽपि वृन्दमात्रेऽपि भाषितमिति विश्वः। प्रुङ् गतौ। निपातनादगुणः। प्रोथोऽस्त्री हयघोणायां ना कट्यामध्वगे त्रिष्विति मेदिनी। स्फायितञ्चि। द्वात्रिंशत इति। दशपाद्यान्तु त्रयस्त्रिंशदुक्ताः। दंभिवहीति पठित्वा वह प्रापणे। उदः अनड्वानित्युदाहरणात्। माधवोऽप्येवम् ॥

उपविश्य। मूषकपर्यायाक्लिन्नेनन्तार्द्रे। पुगस्येति। शुचरतीति भूत्रः। आतोनुपसर्गे इति कः। पृषोदरादित्वाद्वर्णव्यत्यय इति भावः। आभीलम्। कृच्छ्रम्। सान्तपनादिप्रायश्चित्तार्थव्रतम्। नृशंसो घातुकः। स्फारमिति। नेड्वशीति नेट्। वलि यलोपः। स्फारः स्यात्स्फिविकटे करकादेश्च बुद्बुदे इति मेदिनी। तक्रमिति। तञ्चूसङ्कोचे। वक्रः स्याज्जटिले क्रूरे पुटभेदे शनैश्चरे इति विश्वः। वक्रः शनैश्चरे पुंसि पुटभेदे नपुंसकम्। शक्रः प्रमाने देवराजे कुटजार्जुनभूरुहोरिति मेदिनी। क्षुद्र इति। क्षुदिर् संपेषणे। क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत्। क्षुद्रा व्यङ्गा नटी कण्टकारिकासरघासु च। चाङ्गेरीवेश्ययोर्हिंस्रामक्षिकामात्रयोरपीति मेदिनी। तृप्रः पुरोडाश इति। ननु प्राउरुत्वमसं इति मन्त्रे वेदभाष्यकारैः प्रकृतसूत्रे उज्ज्वलदत्तादिभिश्च त्स्यव्याख्यानम्। दृपपाठे तु तृप्रमाज्यं क्लिष्टञ्चेत्युक्तम्। तृप्रं दुःखमिति सुधातुवृत्तौ माधवः। हिमं दुःखमित्यादि शब्दार्णवः। दस्यति रोगान् क्षिपतीति दस्रः। दस्रः खरेऽश्विनीसुते इति मेदिनी। दस्रः खरे चाश्विनयोरिति विश्वः। भूयोभिप्रायेति। माधवस्तु। वृत्तिस्वरसमनुरुध्य अविन्दउस्रिया इति मन्त्रे बाहुलकात्स्रत्वं नेति व्याचष्टे। उस्रो वृषे च किरणे उस्रार्जुन्युपचित्रयोरिति मेदिनी। उस्रा गवि पवित्रायामुस्रस्तु किरणे स्मृत इति विश्वः। वास्रो ना दिवसे क्लीबं मन्दिरे च चतुष्पथे इति मेदनी। वाश्रो रासभपक्षिणोरित्येके। माधवस्तु वाश्रेव विद्युन्मिमातीति मन्त्रे शब्दयुक्ता प्रस्नुतस्तना धेनुर्वाश्रेति व्याख्यत्। शुभ्रं स्यादभ्रके क्लीबमुदीप्ते शुक्लयोस्त्रिषु इति मेदिनी। चुक्रमिति। चक तृप्तौ। चुक्रस्त्वम्लेऽम्लवेतसे। चुक्री चाङ्गेरिकायां स्यात् वृक्षाम्ले चुक्रमिष्यते इति विश्वः। चुक्रं वृक्षाम्ले चाङ्गेर्यां स्त्री पुंस्यम्लेऽम्लवेतसे इति मेदिनी। अर्देर्दीर्घश्च। आर्द्रा नक्षत्रभेदे स्यात्स्त्रियाङ्क्लिन्नेऽभिधेयवत् इति मेदिनी। शुचेर्दश्च। शूद्रो वृषलः। अहहारेत्वा शूद्रेति श्रुतौ तु रूढेर्बाधात् योग एव पुरस्कृतः। तथा चोत्तरतन्त्रे भगवता व्यासेन सूत्रितम्। शुगस्य तदनादरश्रवणादिति। कृतेः। अन्त्यस्य च्छः। क्रू तु सर्वस्य। अनेकाल्त्वात्। कृच्छ्रमाख्यातमाभीले पापसान्तपनादिनोरिति विश्वमेदिन्यौ। क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवदिति च। बहुलमन्यत्रापि। सञ्ज्ञायां रहयति वर्द्धयति प्रजाः ब्रह्मा। शं सुखं भावयति शम्भुः। शोषयति शुष्मेत्यादि। छन्दसि। वर्द्धन्तु त्वा सुष्टुतयः। पद्मा जजान। बाहुलकादसञ्ज्ञायां छन्दसोऽपि कविदित्याशयेनोदाहरति वान्तीत्यादि। जोरी च। जीरः खड्गे वणिग्द्रव्ये इति विश्वः। जीरस्तु जरणे ना [illegible] इति मेदिनी। ज्यश्चेति। तथा च न धातुलोप इति सूत्रे जीवेरदानुरित्यस्य प्रत्याख्यानार्थं नैतज्जीवे रूपं किन्तु रक्किज्यः संप्रसारणमिति भाष्ये उक्तम्॥

चषकः। सुरापानपात्रम्। चीरी। विकटदेशप्रेषितपत्रम्। सेत्रवये क्षेत्ररक्षणार्थे कुड्ये। कोकिलाक्षस्तालमखाणा। कोलो बदरी। कृष्णा पिप्पली। रोचने गोरोचनाख्ये ॥ ॥
सुरः सुराचषकमद्ययोः। पुंल्लिङ्गः स्त्रिदिवेशे स्यादिति मेदिनी। सुरो देवे सुरा मद्ये चषके पि सुरा क्वचिदिति विश्वः। सुवति प्रेरयति कर्मणि लोकमिति सूरः सूर्यः। धीरो धैर्यान्विते स्वैरे बुधे क्लीबं
तु कुङ्कुमे। स्त्रियां श्रवणतुल्यायामिति मेदिनी। गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽर्थलुब्धके इति च। शुषिरं तालव्यादिर्गर्त्यर्थः। शारः स्यात् द्वैधभटे इति मेदिनी। शूरश्चारुभटे सूर्ये इति
विश्वहेमचन्द्रौ। शारः शूरश्च नरणाविति द्विरूपेषु विश्वः। सीरोऽर्कहलयोः पुंसि चीरी झिल्ल्यां, नपुंसकम्। गोस्तने वस्त्रभेदे चीरे रेखालेखनभेदयोरिति मेदिनी। चीरस्तु गोस्तने वस्त्रे
चूडायां सीसके पि च। चिरीलुक्कादिका झिल्लीति विश्वः। वाचिन्येः। विध्रं तु विमलात्मकमिति विशेष्यनिघ्नेष्वमरः। वप्रः पित्रि केदारे वप्रः प्राकाररोधसोरिति धरणिरन्तिदेवौ। त
प्रस्तावे पुमान् स्त्री वेणुक्षेत्रचये तटे इति मेदिनी। ... जगत्यादिषु। ... ज्याघ्नः प्रष्ठिभिरं क्षीणइति मन्त्रे ... आगतिमन्तो ... इति भाष्यम्। पु
वीपता ... ल्यात्स्त्रि——विति विश्वः। अग्रं पुरस्तादुपरि परिमाणे पलस्य च। आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम्। अधिके च प्रधाने च प्रथमे चाभिधेयवदिति मेदिनी। सु
रस्यान्तरेदनद्रव्ये कोकिलः स्याच्च गोक्षुरे इति विश्वमेदिन्यौ। क्षुरः कोलदलेशफे भद्रः शिवे खञ्जरीटे वृषभे मेरुकदम्बके। करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः। कान्ते च स्त्रियां रास्ना रू
साव्योमनदीषु च। तिथिभेदे प्रसारिण्याङ्कटफलानन्तयोरपि। त्रिषु श्रेष्ठे च साधौ च नपुंसि करणान्तरे। उग्रः शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे। स्त्री वचायां रुद्रयोषिदिति मेदिनी। भेलः प्लवे भीरुके
च निर्बुद्धे मुनिभेदयोरिति विश्वः। भेलः प्लवे मणौ पुंसि भीरौ बुद्धे च वाच्यवत्। शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान्। रेतोक्षिरुग्भिदोः क्लीबं शुक्लो योगान्तरे सिते। नपुंसकं तु रजते गौरः पी
तेऽरुणे श्वेते विशुद्धे चाभिधेयवत्। ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे। गौरी त्वस्त्रातरजःकन्याशङ्करभार्ययोः। रोचनीरजनीपिङ्गाप्रियङ्गुवसुधासु च। आपगायां विशेषे पि पादसांपातियोषि
ति इति मेदिनी। नदीभेदे च गौरी स्यादरुणस्य च योषिनीति विश्वः। अष्टवर्षा तु या दत्ता श्रुतशीलसमन्विते। सा गौरी तत्सुतो यस्तु स गौरः परिकीर्तित इति ब्रह्माण्डवचनं श्राद्धकाण्डे हेमाद्रिणोदाहृतम्।
क्षीने भेऽरः शुभ्राचार इति भाष्यव्याख्यानम्। दूराभ्युदये सुराप्सु चेति मेदिनी। मालं क्षेत्रे जने माला मालापुष्पादिदामनीति विश्वः। मालं क्षेत्रे स्त्रियां पङ्क्तौ स्रजोर्जान्यन्तरे पुमानिति मेदिनी। मालमुन्नतभू
तलमित्युत्पलः। क्षेत्रमारुह्य मालमिति मेघदूतः। मणिपूर्वोऽयमर्थान्तरेऽपि रूढः। मेखिमालास्मृता हारे स्त्री ... न्तरे इति विश्वः। बाहुलकात्तिजनिशाने रन् दीर्घलक्ष्णाप्नवः। नीशा तु कट

३इसुकुद्को

निलान्ते। अतिशये। व्यवहरतीत्यर्थइति। तेनदीव्यतीतिसूत्रेणेत्यर्थः। स्तब्धो नम्रः। यस्यापत्यमिति। यस्यकुण्डिनस्यवाचकान्नान्तकुण्डिन्शब्दात्ङीपितस्याअपत्यमित्यर्थः। कुण्डिनात्तुयञ् दुर्लभः। कुण्डि
त्रिषत्स्वसेनितान्तेचकटौइतिमेदिनी। सभिकसः। सङ्कुसुकोऽस्थिरेइतिविशेष्यनिघ्नेअमरः। कुन्। अपूर्वस्यनिरुपपदस्य अपिशब्दात्सोपपदस्यअर्थद्वारकसंबन्धेषष्ठीप्रकृतिप्रत्ययार्थयोः क्रिया
कारकभावात्। रजकोधावकेशुकेइतिविश्वः। रजकौधावकशुकाविति हेमचन्द्रः। कुट्टछेदने। इक्षून्कुट्टयतिगौडिकः। चषकोस्त्रीसुरापात्रेमद्यमाद्यप्रभेदयोरितिमेदिनी। लमकः। ऋषिविशेषः।
कृषेः कार्षकः कृषीबलः कृषकः सएवकृषकः पुंसिफालेस्यात्कर्षकेत्वभिधेयवत् इतिमेदिनी। स्त्रीकुशीकुशिकः फालइतिरत्नकोशः। उदकञ्च उन्दी क्लेदने। ननुकुन्शिल्पीत्यादिनागतार्थमि
दमतआह। प्रपञ्चेति। प्राङि। सञ्ज्ञात्सउपपदस्य। आङि पणि। नचनेनैवसिद्धेप्राङीत्यत्रपणिग्रहणंव्यर्थमितिचेन्न। उपसर्गान्तरनिरासार्थत्वात्। आपणिकइति। वणिक् नित्स्वरेणाद्युदात्तः। आपणे
नव्यवहरतीत्यर्थेठकितुकित्त्वादन्तोदात्तः। श्यास्त्या। श्येनः पत्रिणिपाण्डुरेइतिमेदिनी। स्त्येनश्चोरः। स्तेनचौर्येइतिचौरादिकात्स्वाद्यचितुनिर्यकारोपि। केचित्तुस्त्यायूनांपतमेइत्यादिप्रयोगोप
लम्भेननिर्यकारस्यापिष्टे धातोर्भ्वादिषुमाधवादिभिः स्वीकृतत्वात्प्रकृतसूत्रेपितमेवपठन्तः स्तेनशब्दोनिर्यकारएवेत्याहुः। हरिणः पुंसिसारङ्गे विशदेत्वभिधेयवत्। हरिणीहरितायाञ्चनारी
भिद्वृत्तभेदयोः सुवर्णप्रतिमायाञ्चेतिमेदिनी। रजेः किच्च। रजिनंकल्मषेक्लीबङ्कशेनाकुटिलेन्यवदितिमेदिनी। अजिनञ्चर्मकृत्तिः स्त्रीत्यमरः। कठिनमिति। कठकृच्छ्रजीवने। कठिनमपिनिष्ठुरेस्या
त्स्तब्धेतुनपुंसकंस्यात्स्थाल्याम्। कठिनीखटिकायामपिकठिनागुडशर्करायाञ्चेतिमेदिनी। मलमल्लधारणे। मलिनन्दूषितेकृष्णेऽङ्कतुमत्यान्तुयोषितिइतिमेदिनी। कुण्डिनमिति। नमर्दङ्कुण्डितम
ण्डजोययावितिश्रीहर्षः। कुण्डिनऋषिः यस्यापत्यंकौण्डिन्यः। परुषिपर्वणिदिनंखण्डितमितितैत्तिरीयश्रुत्यर्थः। द्रुदक्षिभ्यान्तुगतौ। दक्षवृद्धौ। द्रविणंतद्वयोर्वित्तेकाञ्चनेचपराक्रमे। दक्षि
णोदक्षिणोद्भूतसरलछन्दवर्तिषु। अवामेत्रिषुयज्ञादिविधिदानेदिशिस्त्रियामितिमेदिनी। दक्षिणःसरलोदारपरछन्दानुवर्तिषु । घा
च्यवद्दक्षिणावाचीयज्ञदानप्रतिष्ठयोरितिविश्वः। अर्त्तेः। इरिणंशून्यमूषरमित्यमरः। इरिणन्तुखरेशून्येपीतिमेदिनी। तुहिनमिति। तुहिर्अर्दने। लघूपधगुणेकृतेह्रस्वः। तलिपुलिभ्याञ्च।
तलप्रतिष्ठायाम्। पुलमहत्वे। नलिनंविरलेस्तोकेस्वच्छेपिवाच्यलिङ्गकमितिमेदिनी। महेः। कुतस्त्वमिन्द्रमाहिनसन्नितिमन्त्रेमाहिनोमहनीयः पूजनीयइतिवेदभाष्यम्। ७ नीसेवगर्गादेपाठात्ध्व

केवलग्रहणादिति। उच्चरितसमकालग्रहणादित्यर्थः अयन्तु पालवयवस्तरिस्तरीरतिवनदुदाहरणमिति भावः। इत्यवेयमिति। तन्न तत्त्वभाष्ये तु रसेरघानाराधिः रश्मिरित्युक्तम्। तिनिशो वृक्षः क्विब्वि। इच्छतीति प्राट्। क्रुः। प्राड् इति शः। प्राशौ। प्राशः। श्री रिति। कृदिकारादिति ङीष् तु नच त्वतलयोर्यद्कारादिति व्याख्यानात्। कृदन्तं यदिकारान्तमिति पक्षेपि कारग्रहणेन तत्सामर्थ्यादेव केवलग्रहणात्। दुर्घटस्तु ङीषि श्रीमित्यपि रक्षितदृच्छतीत्याह। श्रीर्वेशरचनाशोभाभारतीसरलद्रुमे। लक्ष्म्यां त्रिवर्गसंपत्तिविधोपकरणेषु च। विभूतौ च मतौ च स्त्री इति मेदिनी। जूः। का शेत्यादिसूत्रोदाहृतत्वात्। हुवः। चातुः क्विप्। दीर्घौ। स्रुवः कः। स्रु गतौ। स्रुवो यज्ञपात्रविशेषः। अयं स्रुवोभिजिघर्ति। स्रुवेण पार्वणे जुहोतीत्यादौ प्रसिद्धः। विद्धि। स्रुव इत्येव योगविभाग उत्तरार्थः। तमोतेः। वद् इति सङ्घातग्रहणम्। तदाह वशब्देति। स्त्रियान्तु लगस्रग्धरे इत्यमरः। केशवोक्तमाह। गौर्नेत्यादि। गोः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्। स्त्री सौरभेयी दृग्बाणदिग्वाग्भूष्वप्सु भूम्नि चेति मेदिनी। द्यौरिति। कर्तर्य्यधिकरणे वा प्रत्ययः। दोरिति। त्रिलिङ्गोयमिति प्रागेवोक्तम्। जक्षित्स हो हरिन्। जसु रये स्तुर्य्यपि म्यथुर्गामिति मन्त्रो जसु

रयेश्चाम्लायेति नीचायमानञ्जसुरिं नश्येनमित्यत्र जसुरिर्दुःखितम्। श्ये वन्नश्येनपक्षिणमिवेति उतस्य वाजी सहुर्ऋतावेति मन्त्रे सहुरिः सहनशील इति च वेदभाष्यम्। सुप्। सवनन्त्वध्वरे स्नाने सोमनिर्दलनेपि चेति मेदिनी। रवणः शब्दने स्वरे इति च। वरणस्तिक्तशाकेपि प्राकारे वरणं वृतौ विति विश्वः। वरणे वरुणः सेतुस्तिक्तशाकः कुमारक इत्यमरः। अशेरशूच्। जिह्वेति। रस आस्वादने चौरादिकः। ततो नन्द्यादित्वाल्ल्युः। ण्यासश्रन्थेति युच्। अथ रसनं स्वादने ध्वनौ। जिह्वायान्तु न पुंसि स्यात् रास्नायां रसनास्त्रियामिति मेदिनी। एषा दन्त्यतालव्यमध्ययोरर्थव्यवस्था भूरिप्रयोगाभिप्रायेणोक्ता। वस्तुतस्तु द्वावप्यर्थद्वयोस्साधू। तथाहि। तालव्या अपि दन्त्याश्च शंबशंबलशूकराः। रशना विच जिह्वायामिति विश्वकोशात् जिह्वामुभयम्। रसनं निस्वने स्वादे रसना काञ्चिजिह्वयोरित्यजयधरणिकोशाभ्याङ्क्वाप्युभयं साधु। रसनं स्वदने चाथ रसना काञ्चिजिह्वयोः। रसनं स्रापि रास्नायां इति विश्वप्रकाशाच्चेति दिक्। एवञ्च हसूत्रे अशू व्याप्तौ अश भोजने इति धातुद्वयमपि ग्राह्यम्। रस आस्वादने रस शब्दे इति धातुभ्यां बहुलमन्यत्रापीत्यनुपदं वक्ष्यमाणो युच्। तेन सर्वत्रावयवार्थानुगमः। पिसृपपद इत्यवधेयम्। उन्देः। ओदनं नस्त्रियां भक्ते बलायामोदनी स्त्रियामिति मेदिनी। बहुलम्। स्यन्दनन्तु सुतौ नीरे निशिते नारथेऽस्त्रियामिति मेदिनी। रोचना रक्तकह्लारे गोपित्तवरयोषितोः। रोचनः कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिषु इति च। चदि आह्लादने। चन्दनं मलयोद्भवे। चन्दनः कपिभेदे स्यान्नदीभेदे तु चन्दनी इति विश्वः। चन्दनी तु नदीभेदे चन्दनोऽस्त्री मलयजे भद्रकाल्यां नपुंसकं इति मेदिनी ॥ ७ शेषः कूटशाल्मल्याम्। यमहारस्य शाल्मल्याम् ॥

म.श.
१६४

जीवद्रुमोविजयसारः।आवलिः।पङ्क्तिः ॥
भद्रकाली ओषधीविशेषः।भद्रकालीतुगन्धोल्याङ्गा।त्यायम्यामपिस्त्रियामितिमेदिनी।असुक्षेपणे।असन्तक्षेपणेक्लीबंपुंसिस्याज्जीवकद्रुमेइतिमेदिनी।अतसातत्यगमने।राजपूर्वः।रा
जातनः।क्षीरिकायांप्रियालेकिंशुकेपिचेतिविश्वमेदिन्यौ।एवमन्येपिद्रष्टव्याः।रञ्जेः।क्युन्।बाहुलकात्कृपेरपि।लत्वाभावश्च।कृपणः।भूसू॰।बहुलवचनाद्भाषायामपि।भुवनंविष्टपेपिस्या
त्सलिलेगगनेजनेइतिमेदिनी।कृपृ।निधनंस्यात्कुलेनाशेइतिमेदिनी।निधनङ्कुलनाशयोरितिहेमचन्द्रः।धृषेः।धिषणस्त्रिदशाचार्येधिषणाधिषणोपिचइतिमेदिनी।वर्त्तमाने।पृषन्मृ
गेपुमान्बिन्दौनद्योःपृषतोपिना।अनयोश्चत्रिषुश्वेतबिन्दुयुक्तेपृथाविमौइतिमेदिनी।बृहतीक्षुद्रवार्त्ताक्यांकण्टकार्याञ्चवाचिच।वारिधान्यांमहत्याञ्चछन्दोवसनभेदयोरिति
विश्वः।शतृवद्भावादुगिदचामितिनुम्।बृहन्विपुलः।महतीवल्लकीभेदेराज्येतुस्यान्नपुंसकम्।तत्त्वभेदेपुमान्श्रेष्ठेवाच्यवदितिमेदिनी।महतीनारदवीणा।अवेक्षमाणंमहतींमुहुर्मु
हुरितिमाघः।जगत्स्याद्विष्टपेक्लीबंवायौनाजङ्गमेत्रिषु।जगतीभुवनेक्ष्मायांछन्दोभेदेजनेपिचेतिमेदिनी।तत्रवायुवाचिनःपुल्लिङ्गस्यनुमिजगन्जगन्तौजगन्तः।इत्यादि।द्युगमिजुहो
तीनांद्वेचेतिद्युत्यादित्वस्यतुनुमभावात्।जगत्जगतावित्यादि।तज्जिनोतेरिति।सुभूतिचन्द्रस्तुसंपूर्वात्कृपतेःसंक्लदित्याह।तपत्छत्रमिति।चन्द्रमाइत्यन्ये।दिवमध्यस्तपदिन्द्रव
स्वेतिमन्त्रेतुतपत्शब्दोयौगिकः।तप्यतिसर्वः।वेदभाष्येतुतौदादिकात्तृपतेःशतृप्रत्ययेआगमशास्त्रस्यानित्यत्वान्नुमभावइत्युक्तम्।तत्प्रौढिवादमात्रम्।एतेनत्वमस्यप्राह्णपाद
तंपतत्रिवेत्यादिमन्त्रान्तरंव्याख्यातम्।गौरित्यनुवृत्तौवेहद्गर्भोपघातिनीत्यमरः।ऋन्दस्यसानच्।शुगतौ।जृष्वयोहानौ।एतेनप्रसन्नइत्यादिमन्त्रद्वयेपिशासानशब्दस्यगन्तुपरतासौ
ष्टवेबाहुलकोपष्टम्भेनक्लिष्टव्याख्यानंनातीवादर्त्तव्यम्।ऋञ्जिवृधि।ऋजिभर्जने।इदित्वान्नुम्।अतएवनलोपाभावः।एवञ्चअयंमन्दिसहीचपूर्वसूत्रएवपठितुंयोग्याः।किन्तुउर
स्थावेवोपयुज्यते।उत्तरसूत्रेपिगुणग्रहणंसुलभम्।अर्त्तेः।शृदृः।वृधेः।किदित्युक्तौसर्वसामञ्जस्यात्।ऋञ्जसानोमेघइति।ऋञ्जसानःउरु— वारउक्थैः।अस्मिन्— मन्दसानावृषभे
वस्इत्यादिमन्त्राणांभाष्येतुयौगिकार्थएवपुरस्कृतः।अर्त्तेः।धातोर्गुणः।प्रत्ययस्यसुडागमः।आसाविपदर्शसानायशारुमितिमन्त्रस्यभाष्येअर्शसानायशत्रूणांहिंसित्रेइतिव्याख्यातम्।
वृधिवृधि——— बाहुलकात्कृपेरपि।कृपाणःखड्गः।कृपाणेनकर्पयंकारंकृपणःसहमाण्यते।परेषान्दानसमयेयःस्वकोशंनविमुञ्चति।हृषेः।पुषोघ्याद्युत्सर्जुहराणमेन्द्रइतिम

श्वितेर्दश्च। श्विता वर्णे। अस्मात्तनन्तादान च् सनो लुक् नकं। स्पदकारः। किदित्यनुवृत्तेर्न गुणः। पुण्यकर्मेति। स हि उज्ज्वलो भवितुमिच्छति। शिश्विदानोऽकृष्णकर्मेति विशेष्यनिघ्नः अमरः। अकृष्णं शुक्लं शुद्धमित्यर्थः। इह क्षीरस्वामी प्रकृतसूत्रं विस्मृत्य श्विदि श्वैत्ये अस्माल्लिटः कानजिति व्याख्यत्। तत्तु च्छम्। कानचश्छान्दसत्वात् इदित्वेन नलोपानुपपत्तेश्चेति दिक्। कृष्णकर्मेत्यमरे पाठान्तरम्। पापकर्मेत्यर्थः। तत्रावयवार्थानुगमबलेन बोद्धाः। शुद्धो भवितुमिच्छतीत्युक्ताहि इदानीं स शुद्ध इति गम्यते। तृन्तृचौ। अप्तृन्निति सूत्रेण न्नादि पाठेन ज्ञापितम्। औणादिकयोस्तृन्तृचोस्तत्र ग्रहणमिति। अतोत्र दीर्घो नेत्युदाहरति। संस्तरा विस्तादि। नित्यादाद्युदात्तः। तथा च मन्त्रः। ग्रावग्राभ उत शंस्ता सुविप्रः आदि शब्दात् शासु अनुशिष्टौ। शास्ति विनयतीति शास्ता। न शास्ता बुद्धः। शास्तरौ। शास्तरः। शास्ता समन्तभद्रे नाशासके पुनरन्यवदिति मेदिनी। प्र पूर्वस्य तु अप्तृन्निति दीर्घः। प्रशास्तारौ प्रशास्तारः। स चाशूद्रश्च वैश्याजे प्रतीहारे च सारथौ। भुजिष्यातनयेपि स्यात् नियुक्ते वेधसोः पुमानिति मेदिनीकोशानुसारेणाह। वैश्यायामिति। अमरस्तु क्षत्रियां च शूद्रजे इत्याह। याज्ञवल्क्योपि। क्षत्रियामागधं वैश्यात् शूद्रात्तु क्षत्तारमेव चेति। इह बहुलमन्यत्रापीति प्रपञ्चार्थत्वात् उपेक्षितम्। न प्नेति। नञः प्रकृतिभावः। पतेरच्छब्दलोपः। त्वष्टा पुमान्देवशिल्पिनस्पोरादित्यभिदपीति मेदिनी। जायामातीत्यन्तर्भावितण्यर्थः। सुज्यसे। असु क्षेपणे। असदीप्यादिषु। आभ्यां सुज्जि उपपदे क्त्न्। यतेः। यती प्रयत्ने। नञि च नन्देः। उपाप्यूषाननन्दा च ननान्दा च प्रकीर्तितेति द्विरूपेषु। देवृः देवेति भ्रातृस्तनुवर्तनोस्वामिनो देवरः देवाविव्यमरः। देवधवे देवरि स्यापवचेचेति श्रीहर्षः। नयतेः। ऋञः पुमांसः पञ्चजनाः पुरुषाः पुरुषा नरा इत्यमरः। सर्वे ~ । ऋरडिश्चेत्यनुवर्तते। सर्वेष्टेति। तत्पुरुषे कृतीति सप्तम्या अलुक्। अर्त्तिसाधमिः सौत्रः। अरणिर्वह्निमन्थे नाहयोर्निर्मन्थ्यदारुणीति मेदिनी। सरणिः श्रेणिवर्त्मनोरिति दन्त्यादौ रभसः। सरणिः पङ्क्तौ मार्गे चेति मेदिनी। शॄ हिंसायाम्। ततः शरणिरित्येके। धारणिरित्येके। शरणिः पथि चावलाविति तालव्यादावजयः। इमामग्ने शरणिंमिति मन्त्रे शरणिं हिंसां व्रतलोपरूपां मीमृषः क्षमस्वेति वेदभाष्यम्। धमनी तु शिरायां हट्टविलासिन्यां च योषिति। अशनिः स्त्रीपुंसयोः स्यात् पञ्चतापां पञ्चावपि। तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम्। रजनीनीकिनीरात्रिर्हरिद्राजतुकासु चेति मेदिनी। कुमारीलताविशेषः। तरणी रामतरणी कर्णिका चारुकेसरा। सहा कुमारी गन्धाढ्या चेति धन्वन्तरिनिघण्टुः। रज्जेर्नलोपोपि बाहुलकात्। कृषेरादेशश्च चः। चर्षणिर्जन इति। वैदिकनिघण्टौ चर्षणिशब्दस्य मनुष्यनामसु पाठात्। उभासंप्रचर्षणीधृतः। प्रचर्षणिः स्वः इत्यादिमन्त्राणां भाष्ये तथैव व्याख्यानाच्च। अत एव आदेश्च च इति दशपादीवृत्तिपाठ एवेह पुरस्कृतः। उज्ज्वलदत्तस्तु आदेश्च ध इति पठित्वा धर्षणी बन्धकीति व्याख्यत्। तन्न। तथा सति धृषेरित्येव सूत्रं स्यात्। प्रागल्भ्यरूपावयवार्थानुगमात्। आदेश्च ध इत्येव पाठस्य सामञ्जस्यापत्तेश्च ॥

जित्वरोजयशीलः। दुर्गते दरिद्रे ॥
वर्त्तनिरिति। ऋदिकारादिति पक्षे ङीष्। सरणिः पद्धतिः पद्या वर्त्तन्येकपदीत्यमरः। क्षिपणिरायुधमिति। उतस्यवाजीक्षिपणिं तुरण्यति इति मन्त्रस्य वेदभाष्ये तु क्षिपणिं क्षेपणमनु तुरण्यति त्वरे
यति गन्तुमिति व्याख्यातम्। अर्चिरिति। सान्तम्। तमर्चिषा स्फूर्जयन्निति मन्त्रः। नयनमिव सनिद्रघूर्णितं दैपमर्चिरिति माघः। ज्वालाभासोर्न पुंस्यर्चिरिति नानार्थसान्तेष्वमरः। इदन्तोपीति। णिजन्ता
दच इरिति भावः। अर्चिर्हेतिः शिखा स्त्रियामित्यमरः। रोचिः शोचिरुभे क्लीबे इति च। छाद्यतेऽनया च्छदिः। छदिः स्त्रियामेवेति लिङ्गानुशासनसूत्रम्। एवञ्च पटलं च्छदिरित्यमरः। अन्ये पटलसाह
चर्यात् छदिषः क्लीबतां वदन्त उपेक्ष्याः। दंहेः। बर्हिः पुंसि हुताशने। न स्त्री कुशे इति मेदिनी। द्युतेः। ज्योतिरग्नौ दिनकरे। पुमान्नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोरिति मेदिनी। वसौरुचेः। बाहुलकाले
वलादपि। रोचिः शोचिरुभे क्लीबे। अर्त्तिपृ। व्रणोः स्त्रियामीर्मरुः क्लीबे इत्यमरः। ग्रन्थिर्नापर्वपरुषी इति च। वपुः क्लीबं तनुः शस्ताकृतावपीति मेदिनी। तनुः शरीरम्। तनुषे तनुषेनङ्गमिति सुबन्धुः।
स्यात्तनुस्तनुषा सार्द्धं स्यत्नुषा च धनुर्विदुरिति द्विरूपेषु विश्वः। अथा स्त्रियामप्सु तु स्माप्राबित्यमरः। धनुः पियाले ना न स्त्री राशिभेदे शरासने। धनुर्द्धरे त्रिष्विति सान्ते मेदिनी। चक्षेः। शिल्वात्सार्वधातुकत्वे ख्याञ्
न चक्षते रूपमनुभवन्त्यनेनेति चक्षुः। मुहेः। मुहुः पुनः पुनः शश्वत् अभीक्ष्णमसकृत् समाः इत्यव्ययेष्वमरः। अस्मात् सरं बहुलमन्यत्रापीति सूत्रं स्पष्टत्वात्त्यक्तम्। कृगृश्नेरुतः। कर्बुरः। क्रव्यात्कर्बुरो
यातुरक्षसी इति शब्दार्णवः। शर्वरी यामिनी स्त्रियोरिति मेदिनी। वर्वरः पामरे केशविन्यासे नीवृदन्तरे। वर्वरः फञ्जिकायान्तु वर्वरा शाकपुष्पयोरिति विश्वः। वर्वरः पामरे केशचक्रले नीवृदन्तरे। फ
ञ्जिकायां पुमान् शाकभेदपुष्पभिदोः स्त्रियामिति मेदिनी। चत्वरं स्थण्डिले ङ्नेइति च। नौसदेः। घरजनुवर्त्तते। सदिरप्रतेरिति षत्वम्। निषद्वरः स्मरे पङ्के निशायान्तु निषद्वरीति मेदिनी। इत्युणादि
षु द्वितीयः पादः॥ छित्वरश्छेदने द्रव्ये धूर्त्ते वैरिणि च त्रिष्विति मेदिनी। डुधाञ्। अन्त्यस्य इत्वम्। एवं पापान इत्यादीनामित्येके। अन्ये तु पीवमीवतीवनीवस्थौल्ये शब्यः अस्य पेलोपो स्योरिति वलोपमाहुः।
पीवरः कच्छपे स्थूले इति मेदिनी। तीवरो नाम्बुधौ व्याधे इति च। स्यान्नीवरो वणिजके ऽस्त्रेऽपि च दृश्यते। इति मेदिनी विश्वप्रकाशौ। कट्वरङ्कुत्सिते वाच्यलिङ्गन्तक्रे न पुंसकमिति मेदिनी। बाहुलकादुपपूर्वा
ज्जुहोतेरुकारलोपः। उपह्वरं समीपे स्यादिकान्तेऽपि नपुंसकमिति मेदिनी। उपह्वरो रथ इति केचित्। तदुपश्य स्तनमिति मन्त्रे तु उपह्वरे उपगन्तव्ये समीपे देशे। ह्वृ कौटिल्ये गतिविशेषवाचिना धातुना ग
तिमात्रमिह लक्ष्यते। ततोधिकरणे यः कृदुत्तरपदप्रकृतिस्वरत्वमिति भाष्ये व्याख्यातम्। इण्सिञ्जि। इनः पत्यौ नृपार्कयोः। जिनोऽर्हति च बुद्धे च पुंसि स्यात्त्रिषु जित्वरे इति मेदिनी। दीनामूषिकयोषायान्तु
गनेकातरेऽन्यवत् इति विश्वः। उष्णो ग्रीष्मे पुमान्दक्षाशीतयोरन्यलिङ्गक इति मेदिनी। फेनमीनौ। डिण्डीरोऽब्धिकफः फेन इत्यमरः। मीनो राश्यन्तरे मत्स्ये इति विश्वः। कृषेः। कृसः सत्यवती पुंके श

कणा॥पिप्पली।एवञ्चसूत्रेवर्णग्रहणञ्चित्स्यप्रयोजनम्।अवक्रयोमूल्यम्।काष्ठांबुवाहिनी।क्षेत्रसेचनार्थंनौकाकारंकाष्ठम्।आजिमुष्का।ऊ स्त विशेषः।कूपकःशुष्कनद्यादौजलार्थंकृतोगर्त्तः।मृन्मानंमृ
ष।कृष्णास्यात्द्रौपदीनीलीकृष्णाद्राक्षासुयोषिति।मेचकेवाच्यलिङ्गःस्यात् क्लीबमरिचलोहयोरितिमेदिनी।ब्रध्नःसूर्यःबुध्नःशिफायांरुद्रेचेतिविश्वः।बुध्नोनामूलरुद्रयोरितिमेदिनी।धाणुधानाष्ट
श्यवेप्रोक्ता।धान्याकेभिनवोद्भिदिइतिविश्वः।पर्णपत्रेकिंशुकेनाइतिमेदिनी।वस्नस्त्ववक्रयेपुंसिवेतनेस्यान्नपुंसकमितिच।वेनइति।लुण्ठाकःप्रजापतिश्च।सपूर्व्यामहानामितिमन्त्रेमनोः
पुत्रेपिप्रसिद्धः।लक्षणमित्यादि।लक्षणलक्ष्मणशब्दौद्वावपिनामचिह्नयोःक्लीबौ।रामभ्रातरिपुंलिङ्गौ हंसयोषायांलक्षणासारसयोषायांलक्ष्मणाइतिव्यवस्थेत्यर्थः।लक्षणंनाम्निचि
ह्नेचसारस्यांलक्ष्मणाक्वचित्लक्ष्मणात्वौषधीभेदेसारस्यामपियोषिति।रामभ्रातरिपुंसिस्यात्सश्रीकेचाभिधेयवदितिमेदिनी।कोशेतुसारस्यामपिनिर्मकारःस्वीकृतः।चेन्नेति।लघूपधगु
णः।बाहुलकादिति।एतच्चक्रुःश्रूडितिसूत्रेरनोयेनविधिरितिसूत्रेकैयटग्रन्थेस्पष्टम्।स्योनःकिरणसूर्ययोरितिमेदिनी।कृवृ।कर्णःपृथाज्येष्ठसुतसुवर्णाद्रौश्रुतावपीतिविश्वमेदिन्यौ।वृ
ञ्वरणे।दीर्घपाठेतुवृवरणे।वर्णोद्विजातिशुक्लादियशोगुणकथासुच।स्तुतौना।नस्त्रियांभेदेरूपाक्षरविलेपनेइतिमेदिनी।विश्वमेदिनीस्थमाह।जर्णइति।जर्णोजीर्णद्रुमेदुषितिहेमचन्द्रः।
द्रोणः।स्त्रियामाढकेस्यात्आढकादिचतुष्टये।पुमान्कृपीपतौकृष्णकाकेस्त्रीनीरदन्तरे।स्त्रियांकाष्ठांबुवाहिन्यांगवादन्यामपीष्यते।अन्नंभक्तंचभुक्तेस्यात्।स्वप्नःस्वापेप्रसुप्तस्यविज्ञाने
दर्शनेपुमानितिमेदिनी।धेट्इत्त्वा।धेनानद्यांनदेपुमान्इतिमेदिनी।धेनःसमुद्रेनद्याञ्चधेनाइतिविश्वः।श्लोकोधारेत्यादिषुसप्तपञ्चाशत्संख्याकेषुवाङ्नामसुधेनेतिवैदिकनिघण्टौपठित
म्।अतएवधेना।जिगातिदाशुषे।इन्द्रधेनाभिरिहमादयस्वइत्यादिषुधेनावागितिव्याख्यातंभाष्ये।तृषिशुषि।ञितृषपिपासायाम्।तृष्णालिप्सापिपासयोरितिविश्वः।सुजः।सूनाधोजिह्वि
कापिचेतिनान्तेअमरः।सूनंप्रसवपुष्पयोः।सूनापुत्र्यांवधस्थानगलशुण्डिकयोःस्त्रियामितिमेदिनी।रत्नेरत्नञ्च।रत्नंस्वजातिश्रेष्ठेपिमणावपिनपुंसकमितिमेदिनी। च्युप्नुव ङ्ग
नौ।अनेकार्थत्वादिहभाषणे।च्यवन्तेभाषन्तेनेनेतिविग्रहः।दशपाद्यान्तु[illegible]पःकिन्नेतिपठ्यते।चुपमन्दायाङ्गतौ।चोपतीतिचुप्योमन्दगमनकर्त्ता।सुशुः।सूपोव्यञ्जनसूदयोरितिमेदिनी।सू
र्पमिति।बाहुलकादुत्वंरपरत्वंहलिचेतिदीर्घः।प्रस्फोटनंतुशूर्पमस्त्रीत्यमरः।दशपाद्यान्तु।सुशुभ्यश्च।सशृभ्यांमूड्चेतिपठित्वासूर्पशूर्पञ्चव्युत्पादितन्द्विरूपकोशेषूभयदर्शनात्कुसुभ्याञ्च।
कुशब्दे।युमिश्रणे।आम्भ्यांयःसन्नन्ति।धातोर्दीर्घत्वञ्च।कूपःकूपकमृन्मानगर्त्तान्तुगुणवृक्षकेइतिमेदिनी।खष्यःक्रोधेबलात्कृताविति विश्वः॥ ७ कृतंमानपात्रंद्रुणारक्षकः नौकादेर्गुणरव

म॰ प्र॰
२६६

जल्पाकं बहुबक्ता।कार्मुकम्धनुः।विक्रान्तो धीरः।अर्कपर्णोऽर्कवृक्षः।ग्रन्थिपर्णी।कुकुरौन्धाख्ये भाषया ॥
शष्पं बालतृणेपि च।उसिस्यात्प्रतिभाहानावितिमेदिनी।विश्वोक्तिमाह।बाष्पइति।बाष्पमूष्मणि चाश्रुणीति कोशान्तरमपि प्रेत्याह।बाष्पश्चेति।रूपं स्वभावे सौन्दर्ये नालिकेपशुशब्दयोः।ग्रन्थ
रनैनाटकादौ आकरश्लोकयोरपीति विश्वमेदिन्यौ।तल्पमट्टे कलत्रे च शयनीये च नष्टयोरिति मेदिनी।अमरोक्तमाह।तल्पमिति।स्तनिहृषि।स्तनगदी देवशब्दे चुरादिण्यन्तौ।हृषतुष्टौ।पुषपुष्टौ।म
दीहर्षग्लेपनयोः घटादिः।स्तनयित्नुः पुमान्वारिधरेपि स्तनितेपि चेति मेदिनी।हर्षयित्नुः सुते हेम्नि पोषयित्नुः पिके द्विजे।स्तनयित्नुः पयोवाहे तद्वन्मृगरोगयोरिति विश्वः।गदयित्नुः पुमा
न्कामे जल्पाके कार्मुकेपि चेति विश्वमेदिन्यौ।मदयित्नुः कामदेवे पुमान्मद्ये नपुंसकमिति मेदिनी।कृहनिभ्यां क्नुः।कृत्नुरिति कर्त्तेत्यर्थः।कित्वान्नगुणः।हत्नुरिति।अनुदात्तेत्यादिना अनु
नासिकलोपः।एवमुत्तरत्र गमेरपि।शस्त्रञ्चेति चाद्दन्तादशपादीरत्नौ तुक्रुरिति तकाररहितं पठित्वा कृणुः कर्ता हनुर्वक्त्रैकदेशः।बाहुलकान्नलोपः।गमेस्तु जिगन्तुरित्युदाहृतम्।तस्मात्तत्सर्वंप्रामा
दिकम्।लक्ष्यविसंवादात्।तथा च श्रूयते।सुरूपकृत्नुमूतये।ज्येष्ठराजं भरे कृत्नुम्।अयञ्जुत्नुरगृभीतः।मा नो वधाय हत्नवे।मृगं न भीममुपहत्नुमुग्रम्।यो नः सनुत्य उत वा जिगत्नुरित्यादि।अत एव हन्ति
धातुं वृण्वता माधवेन उपहत्नुरित्युदाहृतम्।क्नोः कित्वादनुनासिकलोप इत्युक्तम्।यत्तु तेनैव सुरूपकृत्नुमिति मन्त्रं विवृण्वता तकारोपजनश्छान्दस इत्युक्तम्।तद्दशपादीरत्निमनुसृत्य न तु
वस्तुस्थितिमनुरुध्येति सहृदयैराकलनीयम्।दाभाभ्यां नुः।दानुर्दातरि विक्रान्तेइति मेदिनी।भानुरश्मिदिवाकरौ।विसमरः।वचेः।वग्नुर्वक्ता।धेटः।धेनुः स्यान्नवसूतिकेत्यमरः।विश्वोक्तिमाह।सन्नुरि
नि।जहातेः।जह्नुः स्यात्पुंसि राजर्षिभेदे च मधुसूदने इति मेदिनी।विश्वोक्तिमाह।स्थाणुरिति।स्थाणुः कीलेहरे पुमान् अस्त्री ध्रुवेइति मेदिनी।अजिव्रू।वेणुर्नृपान्तरे वंशे इति विश्वः।रेणुः स्त्रीपुंसयोर्धू
लौ पुल्लिङ्गः पर्पटे ———— पुनरिति मेदिनी।विषेः किच्च।चकारान्नित्।आद्युदात्तः।विष्णुरित्यप्रविष्णवे सूषम्।कृदा।कर्कः कर्के तलेवह्नौ शुक्लाश्वे दर्पणे घटे इति विश्वमेदिन्यौ।एका
नयन्तरे कल्कुं नवजातरजः स्त्रियाम्।संपूर्णेन्दुतिथावपीति मेदिनी।राकातु सरदिन्तरे।राका नवरजः कन्या पूर्णेन्दुः पूर्णिमापि चेति विश्वः।इहदाधाराएषाङ्कः।पा इति ह्रस्वोपि बाहुलकान्ने
तिबोध्यम्।अर्कोऽर्कपर्णे स्फुटिके रवौ ताम्रे दिवस्पतौ इति विश्वमेदिन्यौ।कल्कोऽस्त्री घृततैलादिशेषे दम्भे बिभीतके।विट्किट्टयोश्च पापे च त्रिषु पापाशये पुनरिति मेदिनी।बाहुलकाद्रमेरपि कः।रङ्कः
कृपणमन्दयोरिति मेदिनी।कपिलकादित्वाल्लत्वण्टा।पालङ्कारसः पुरीशाग्वाणानि नीकुलटासु चेति विश्वमेदिन्यौ।स्तृशो।स्तृकाबाणोत्पलवाता इति हेमचन्द्रः।स्तृकं संशायपविमिन्द्रतिग्ममा इति मन्त्रस्य
वेदभाष्ये तु सर्वसरणशीलम्।पविं वज्रं सशायसंस्यक्तां तीक्ष्णीकृत्येति व्याख्यातम्।गमेर्भकं छिद्रे च कालेचेति मेदिनी।सुष्कौ।गोक्षकवृक्षेस्यान्तसङ्घातेत्वषणेपि चेति मेदिनी।शुको व्यासस्तुते कीरे रावणस्य च स

लिं॥णि॥शिरीषपादस्पेपुंसिग्रन्थिपर्णं नपुंसकम्॥

राम:
२६६

टी०।शल्कोमत्स्यत्वक्।पीठसर्पीपङ्गुः।रक्तिकागुञ्जा।नाकुर्वल्मीकम्।इतोमनुष्येति।कदिकारादित्युचितम्।प्रत्ययसञ्ज्ञायाइतिपरत्वेनेत्येवयुक्तम्॥ मू०॥वल्कंवल्कलशल्कयोरितिच।
उल्काज्वालादिभावस्तोधितिभूतिचन्द्रः।इत्यभे।एकंसंख्यान्तरेश्रेष्ठेकेवलेतरयोस्त्रिषितिमेदिनी।काकःस्याद्वायसेवृक्षप्रभेदेपीठसर्पिणि।शिरोबक्षालनेमानप्रभेदेद्वीपभेदयोः।काकाकाकाकना।
सा।कृष्णकोलीकाकजङ्घयोः।रक्तिका।पामलध्वाङ्क्षकाकमाच्यायोषिति।कंसुरतबन्धेस्यात्काकामपिसंहनाविति विश्वमेदिन्यौ।पाकःपरिणतौशिशौ।केशस्यजरसाशौक्ल्यंस्थाल्यादौचनेपिच।शल्कस्तु
शकलेवल्केइतिमेदिनी।शल्केरचिमिस्थानइतिमन्त्रेकाण्डखण्डेरितिव्याख्यातारः।मर्कइति।मर्चिःसौत्रोधातुरितिबहवः।दर्मशब्देचौरादिकइतिसिद्धचोन्त्यात्सूत्रेकेयटः।मर्तेर्मर्तस्तेमर्चयतिद्वयेनेतिग
त्रेमर्चयतिविधेयीकरोतिमर्त्तयतीतिवेदभाष्यम्।नचैवंणिलोपस्यस्थानिवद्भावात्कुत्वंनस्यादितिवाच्यम्।पूर्वत्रासिद्धेतदभावात्।बाहुलकात्स्यतेःकन्।शाकोद्वीपान्तरेपिच।शक्तौद्रुमविशे
षेपुमान्हरितकेत्रियामितिमेदिनी।मोहः।निहाकागोधिकास्तमेइत्यमरः।शाकंनश्यनिहाकयेतिरितिश्रुतिः।निष्कमस्त्रीसाष्टहेमशतेदीनारकर्षयोः।वक्षोलङ्करणेहेममात्रेहेमपलेपिचेतिमे
दिनी।स्यमेःस्यमुशब्दे।स्यमीका।मिसीकापीरवी।स्यमीकोनाकुवृक्षयोरितिमेदिनी।अजियुरुभ्यःकन्।स्फायादीर्घश्च।तत्सामर्थ्याद्गुणाभावः।शकेः।शकुन्तिपक्षिशकुनिशकुन्तशकुनाद्विजाइत्यमरः।
शकुनस्तुपुमान्पक्षिमात्रपक्षिविशेषयोः।शुभशंसिनिमित्तेचशकुनंस्यान्नपुंसकमितिमेदिनी।शकुन्तःकीटभेदेस्याद्भासपक्षिविहङ्गयोरिति।शकुनिःपुंसिविहगेसौबलेकरणान्तरेइतिचाबा
हुलकात्कमेरपिप्रत्ययादिलोपेकुशब्दादेशः।कुन्तिः।इतोमनुष्यजातेरितिङीष्।कुन्तीपाण्डुप्रियायांस्त्रीशल्लक्यांगुग्गुलुद्रुमेइतिमेदिनी।कन्युनः।क्षिपण्युस्तुपुमान्देहेसुरभौवास्त्रलिङ्गक
इतिमेदिनी।भुवन्युःस्यात्पुमान्मानौज्वलनेशशलाञ्छनेइतिविश्वमेदिन्यौ।वृजः।करुणस्तुरसेवृक्षेकृपायांकरुणामतेतिविश्वमेदिन्यौ।वरुणस्तरुभेदेस्यात्प्रतीचीपतिसूर्ययोरितिवि
श्वः।दारुणोरसभेदेनाप्रिघ्रतुस्याद्ध्यावत्इतिमेदिनी।ऋतेश्च।तरुणङ्कुञ्जपुमान्रुचकेयूनिचत्रिषितिमेदिनी।तरुणीतलुनीस्त्रियांचेतिद्विरूपेषुविश्वः।क्षुधिपिशि।पिशुनङ्कुङ्कुमेस्मृतम्।
कापिवक्रेचकाकेनासूचककूरयोस्त्रिषु।एकोयंदिशुनास्त्रीस्यादितिमेदिनी।मिथुनंस्त्रद्वयोराशिभेदेस्त्रीपुंसयुग्मकेइतिच।फलेः।फल्गुनस्तुगुडाकेशेनदीजार्जुनभूरुहे।तमस्यसञ्ज्ञमासेत
त्पूर्णिमायाञ्चफाल्गुनीतिमेदिनी।अणश्चेति।प ।दित्वात्सप्तेणित्यर्थः।फल्गुनःफाल्गुनेर्जुनइतिद्विरूपकोशः।अर्शेलयच्।वा।अशभोजनेअस्मादुनन्धातोर्लशादेशश्च।लशुनंमहाकन्दः।
उशनालशुनंवेम्लकन्दलंविश्वमश्चवदितिमद्धनः।लस्मेपुविश्वः।लस्वेतिपाठस्तुप्रामादिकः।अजेर्णिलुक्।अत्रणेरनिटीतिलोपेनसिद्धेणिलुक्चेसुक्तेःफलञ्चियम्।अर्जुनःककुभेपार्थेकार्त्तवीर्ये

मपूरकोः।मातुरेकस्तुमेस्याइवल्केपुनरन्यवनान्तुरकेन्तृणेने
गोमेसप्पर्जुनागवि।दुषाप्यांग्रहदानघाङ्‌दिन्मामपिच

दो।जराजरा मांसी।लक्षविशेषादित्रिबाहिष्ठसंवत्सरेतिस्व।विधायकन्तूपायान्तरं बो।अग्रे मूल॥कचिन्दूतिविश्वमेदिन्यौ।अर्त्तेश्च।अरुणोव्यक्तरागेर्के संध्यारागेर्कसारथौ।निःशब्देकपिले कुष्ठभेदेनागुणिनित्रिषु।अरुणातिविषाश्यामामञ्जिष्ठात्रिवृतासुचेतिमेदिनी।अजिय मि।विश्वानिदेववयुनानिविद्वानितिमन्त्रेवयुनानिप्रज्ञानानीतिवेदभाष्यम्।वैदिकनिघण्टौप्रज्ञापर्यायेप्रशस्यपर्यायेचवयुनशब्दःपठितः।वृतु।वर्सन्त्समिति।तितुत्रेतिनेट्।षत्वन्तुनभवति।बाहुलकेनषत्वेकर्त्तव्येप्रत्ययसञ्ज्ञायाअप्रवृत्तेः।कक्षशब्देतुषत्वंभवत्येव।एतच्चसर्वंगादेशप्रत्यययोरितिसूत्रेभाष्यकैयटपदमञ्जरीषुस्पष्टमेव।उणादिवृत्तिकृतस्तुसर्वेपीहषत्वमुदाजह्रुः।तेषामयमाशयः।अस्तुभाष्यप्रामाण्याद्वर्सन्त्समितिदन्त्योपिसाधुः।बाहुलकबलात्स्यषत्वाभावस्यपाक्षिकत्वेपिबाधकाभावात्सक्षेपत्वमस्तु।वृषितृषिभ्याङ्·पिपच्चादेरचिघञर्थेकप्रत्ययेवावर्षतर्षशब्दयोदुर्वारत्वात्।अत्विथौभयादीनामुपसंख्यानंनपुंसकेक्तादिनिवृत्त्यर्थमित्सत्रदर्षमित्साकेरेउदाहृतत्वाच्चेतितस्मादिहद्विरूपताफलिता।वर्षाः स्त्रीभारतादौ स्याज्जंबुद्वीपाब्दवृष्टिषु।प्रावट्काले स्त्रियांभूम्नि इतिमेदिनी।तर्षोलिप्सोदन्ययोरितिच।पुन्नादौ तर्णकेवर्षेवत्सःक्लीबन्तुवक्षसिइतित्रिकाण्डशेषः।हंसःस्यान्मानसौकसि।निर्लोभनृपविष्णवर्कपरमात्मसुमत्सरे।योगभेदेमन्त्रभेदेशरीरमरुदन्तरे।तुरङ्गभप्रभेदेचेतिमेदिनी।कंसोऽस्त्रीतैजसद्रव्येकांस्येमानेऽसुरेतुनेतिच।कंसोदैत्यान्तरेस्मृतः।कांस्येपात्रेचमानभेदेचकीर्त्तितइतिविश्वः।कक्षास्यादन्तरीयस्यपश्चादञ्चलपल्लवे।स्पर्द्धायांनातुदोर्मूलकच्छवीरुदृणेषुचेतिमेदिनी।प्लुषेः।प्लक्षोजटीगर्दभाण्डद्वीपभित्कुञ्जराशनेइतिमेदिनी।प्लक्षोद्वीपविशेषेस्यात्सर्कटीगर्दभाण्डयोः।पिप्पलेद्वारपार्श्वेचगृहस्यपरिकीर्तितइतिविश्वः।मानेमांसंस्यादामिषेक्लीबंकक्कोली।जटयोःस्त्रियामितिमेदिनी।अक्षः।अथाक्षमिन्द्रिये।नाद्यूताङ्गेकर्षचक्रेव्यवहारेकलिद्रुमेइत्यमरः।अक्षोज्ञानात्मशकटव्यवहारेषुपाशके।रुद्राक्षेन्द्राक्षयोःसर्पेबिभीतककरायपि।चक्रेकर्षेपुमान्क्लीबन्तुत्थसौवर्चलेन्द्रियेइतिमेदिनी।सुवृश्चि।ऋक्षःपर्वतभेदेस्याद्भल्लूकेश्योणाकेपुंसिना।क्षतेवध्यानेन्यलिङ्गंनक्षत्रेचनपुंसकमितिमेदिनी।ऋषेर्जातौ।नियमार्थमिदंसूत्रं।कं।पेजोतावेवेति।तेनान्येभ्यःकेवलयौगिकत्वेपिप्रत्ययः।उन्दिगुधि।गुत्सःस्यात्स्तबकेस्तबेहारभिद्ग्रन्थिपर्णयोरितिमेदिनी।गुत्सश्च।गुत्सोगुच्छोगुलुच्छवदितिद्विरूपकोशात्।स्याद्गुच्छःस्तबकेस्तबेहारभेदकलापयोरितिचवर्गद्वितीयान्तमेदिनीकोशाच्च।गृधिपण्योः।गृधेश्छत्वेनसिद्धेभष्भावनिवृत्त्यर्थेदकारविधिः।पक्षोमासार्द्धकेपार्श्वेग्रहेसाध्यविरोधयोः।केशादेःपरतोवृन्देबलेसखिसहाययोः।चुल्लीरन्ध्रेपरेऽपिराजकुञ्जरपार्श्वयोरितिविश्वमेदिन्यौ।अंशेःसरः।अक्षरंस्यादपवर्गेपरमब्रह्मवर्णयोरितिहेमचन्द्रः।उज्ज्वलदत्तादयस्तुअशेःसरान्नेतिपेठुः।तन्नानित्वरापत्तेः।इष्यतेसुप्रत्ययस्वरेणाक्ष

मू०॥लानिषष्टिश्चाक्षराणीतियजुषिचतथैवपाठात्।अतएवद्वितीयाह्निकान्ते।अस्योतेर्वाक्षरोत्सरमितिभाष्यकृतोक्तम्।सपूर्वाच्चित्।पूर्वेणसहितःसपूर्वः।इद्वत्सरायपरिवत्सरायसंपूर्वाइतिपठस्तुलक्ष्यविरोधादुपेक्ष्यः।कृधू।कृत्सरइत्यादिहारावलीस्थम्।धूसरीकिन्नरीभेदेनागरेत्रिषुपाण्डुरेइतिमेदिनी।मत्सरामक्षिकायांस्यान्मात्सर्यक्रोधयोःपुमान्।असह्यपरसंपत्तौकृपणेचाभिधेयवत्इति।मत्सरोन्यशुभद्वेषेतद्वत्कृपणयोस्त्रिष्वितिअमरः।अथमत्सरः।असह्यपरसंपत्तौमात्सर्येकृपणेक्रुधीतिविश्वः।वेदेतुयोगंपुरस्कृत्यप्रयुज्यते।इदुमिन्द्रायमत्सरम्।तंसिञ्चवोमत्सरमिन्दुपानमित्यादि।मत्सरंहर्षहेतुमितितद्भाष्यम्।अमरोक्तिमाह।तसरइति।अनुदात्तोपदेशेत्यादिनाऽनुनासिकलोपः।त्सरःत्सरुकइति।त्सरन्तोयथाधारायाम्त्सरंत्सरुस्त्रिजित्सरुगमितिमेदिनी।अन्तरात्मजवःसन्तुपत्याइतिमन्त्रस्यवेदभाष्येतुत्सरुःकपटकइतिव्याख्यातम्।पीयुक्वणिभ्याम्।राजादनप्रियालुःस्यादित्यमरः।प्रियालःस्यात्प्रियालवदितिद्विरूपकोशः।बाहुलकाद्दृञ्जेरपिकालनानलोपः।न्यङ्क्वादित्वात्कुत्वम्।भगालंनरमस्तकम्।मत्वर्थेइनिः।चण्डीकान्तोभगालीचलेलिहानोवृषध्वजइतिराजशेखरः।कठिकुषिभ्याम्।कठकृच्छ्रजीवने।कुषनिष्कर्षे।कुषाकुःकपिवद्ध्यर्केनापरेत्वाप्तिनित्रिष्वितिमेदिनी।उज्ज्वलदत्तस्तुकठिकुषिभ्यामितिपठित्वाकषशिखेतिदण्डकधातुमुपन्यस्यकषाकुरित्युदाजहार।तत्कोशविरुद्धम्।मेदिनीकोशेउकारप्रक्रमेपाठात्।सर्त्तेः।सदाकुर्नानिलेचक्रेज्वलनेप्रतिसूर्यकेइतिमेदिनी।वृत्तेः।वार्ताकुरपिवार्ताकेन्त्याकोपिचदृश्यतेइतिद्विरूपेविश्वः।वार्ताकीहिङ्गुलीसिंहीभण्टाकीदुःप्रधर्षिणीत्यमरः।वार्ताकंपित्तलंकिंचिदङ्गारपरिपाचितमितिवैद्यकशास्त्रम्।पर्देः।विश्वोक्तिमाह।पदाकुरित्यादि।पृदाकुर्वृश्चिकेव्याघ्रेसर्पेचित्रकयोःपुमानितिमेदिनी।सृयुः।सरण्युस्तुपुमान्वारिवाहेस्यान्मातरिश्वनिइतिमेदिनी।सरण्युरस्यसूनुरश्वइतिमन्त्रस्यभाष्येतुसरण्युःशीघ्रगामीतिव्याख्यातम्।यवागूरुस्त्रिकाश्राणाविलेपीतरलाचसेत्यमरः।वचक्नुस्तुपुमान्विप्रेवावदूकेभिधेयवदितिमेदिनी।ऋषिविशेषेप्ययम्।यस्यकन्यावाचक्नवीतिप्रसिद्धा।आनकः।भयानकःस्मृतोव्याघ्रेरसेराहौभयङ्करेइतिमेदिनी।शिंघाणकइति।शिघिआघ्राणे।शिङ्घाणंकाचपात्रेस्यात्लोहनासिकयोर्मलइतिविश्वः।शिङ्घाणःफेनडिण्डीरेनकरेतश्चपिच्छलइतिविक्रमादित्यकोशः।हारावलीस्थमाह।शिंघाणमिति।उल्मुकमितिच।दर्विःकम्बिःखजाकाचेत्यमरः।ह्रियःकुक्।प्रत्ययोपयङ्कारोगुणनिषेधार्थः।हस्तिम्।हस्तःकरेकरिकरेसप्रकोष्ठेकरेपिच।ऋक्षेकेशात्परोव्रातेइतिमेदिनी।मर्त्योभूर्लोकः।तत्रभवोमर्त्यः।दिगादेराकृतिगणत्वाद्यत्।गर्तस्त्रिगर्तभेदेस्यादवटेचक्रकन्दरे।एतःकर्बुरेआगते।अन्तःस्वरूपेनाशेवानस्त्रीशेषेन्तिकेत्रिषु।दन्तोदकटकेकुब्जेदशनेचौषधौस्त्रियामितिमेदिनी।लोतमश्रुणिचोरितेइतिविश्वः।कक्कवतइतिसूत्रेलोतोमेषइतिकैयटः।पोतःशिशौ

वहित्रे चेति विश्वमेदिन्यौ।धूर्त इति।धूर्वी हिंसायाम्।लोपो
व्योरिति वलोपः।क्लिन्नास्य तु दृ

टी॰॥ बहुलावलरुर्लहंसो राख्यः। शैलजं शिलाजतुः। कुचन्दनम्। रक्तचन्दनम्। नदान्तरे। ब्रह्मपुत्राख्ये॥ मू॰॥ क्विप्पक्षे तु राल्लोप इति लोपः। हलि चेति दीर्घः। धूर्त्तन्तु खण्डे लवणे धत्तूरे नाशिते त्रिष्विति मेदिनी। तनिमृङ्भ्याम्। ततं वीणादिकं वाद्यमित्यमरः। अथ ततं व्याप्ते विस्तृते च त्रिलिङ्गकम्। क्लीबं वीणादिवाद्ये स्यात् पुंलिङ्गस्तु समीरणे। मृतन्तु याचिते मृत्यौ क्लीबं मृत्युमति त्रिष्विति मेदिनी। अञ्जिघ्रि। अक्तं परिच्छन्नम्। अक्तपरिमाणस्य वाचक इति भाष्यस्य कैयटेन तथा व्याख्यातत्वात्। अत्र व्यक्तं प्राप्ते च सङ्कुले इति विश्वप्रकाशे लिपिभ्रमात् अक्तं व्याप्ते च सङ्कुले इत्युदाहरन्तु नलदयो भ्रान्तत्वादुपेक्ष्याः। तथा च मेदिन्यां क्काराद्दिप्रक्रमे व्यक्तन्तु व्याकुले व्याप्ते इत्युक्तम्। घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत्। सितमवसिते बद्धे धवले त्रिषु शर्करायां स्त्रीति मेदिनी। स्नृगतौ। बाहुलकात् क्तः। स्नुतमुञ्छशिले जले। संस्वेदीत्वे पूजिते स्यादिति मेदिनी। दुतनिभ्याम्। दूतः प्रेष्यः। गौरादित्वात् ङीष्। दूती। अथ कथन्तेन दूतिविदितं निषेदुषीमिति रघुः। दूङ् परितापे। अस्मात् क्तिच्। दूत्यान्दूतिरपि स्मृतेति द्विरूपकोशः। ततोऽनुकम्पे जनके इति विश्वमेदिन्यौ। बाहुलकात् शीङोऽपि। शीता लाङ्गलपद्धतिः। रामपत्नी च। शीता नभःसरिति लाङ्गलपद्धतौ च। शीता दशाननारिपोः सहधर्मिणी च। शीतं स्मृतं हिमगुणे च तद्वति च। शीतोऽलसे च बहुवारतरौ च दृष्ट इति तालव्यादौ धरणिः। शीता दन्त्यादिरपि। सीता लाङ्गलपद्धतिः। वैदेही स्वर्गगङ्गासु इति मेदिनीकोशात्। सीता लाङ्गलरेखा स्यात् व्योमगङ्गा च जानकी इति दन्त्यादौ रभसकोशाच्च। अत्रसक्तं सूत्रम्। जेर्मूट् चोदात्तः। जिजये। अतः क्तस्तस्य मूडागमः स चोदात्तः धातोर्दीर्घश्च। जीमूतस्सेव भवति। जीमूतोऽद्रौ भूतिकरे देवताडे पयोधरे इति मेदिनी। वेणी खरा गरी देवताडो जीमूत इत्यपि इत्यमरः। जीमूतः स्याद्वृत्तिकरे शक्रेऽद्रौ घोषके घने इति विश्वः। इदं तु नमनार्थमिति पुरुषोत्तमः। अत एव आकरे पृषोदरादिषु जीमूतशब्द उदाहृतः। लोष्टमिति। लोष्टानि लेष्टवः पुंसि इत्यमरः। अत्र पुंसीत्युभयान्वयि। तेन पुन्नपुंसकलिङ्गोऽयम्। तथा च स्थानेऽन्तरतमः सूत्रे भाष्यम्। लोष्टः क्षिप्तो बाहुवेगङ्गत्वा इत्यादि। अत एव लोष्टुः एंढेऽपि लोष्टः स्यादिति द्रुस्काण्डे वोपालितः। पलितं शैलजे तापे केशपाके च कर्दमे इति मेदिनी। हरिता स्त्री च दूर्वायां हरितवर्णयुतेऽन्यवदिति च। रुहेः। रोहितं कुङ्कुमे रक्ते ऋजुशक्रशरासने। पुंसि स्यान्मीनमृगयोर्भेदे रोहितकद्रुमे। रोहितं रक्तगोशीर्षकुङ्कुमाति कुचन्दने। पुमान्नदान्तरे भौमे वर्णे च त्रिषु तद्वतीति मेदिनी। पिशेः। पिशितं मांसं मांस्यां स्त्रीति मेदिनी। मांस्यां जटामांस्याम्। तथा च। जटा च पिशिता पेशीति धन्वन्तरिः। श्रुदक्षि। उद्यतस्तु देभवक्षिश्रवाय्य इति मन्त्रे श्रवाय्यो मन्त्रैः श्रवणीय इति वेदभाष्यम्। दक्षाय्यो यो दम आस नित्यः। विश्वस्य त्यस्य सस्थ हयाप्यस्य राजन्। मित्र इव यो दिधिषाय्यो भूदित्यादिषु विधेयोगिकार्थ एव भाष्ये पुरस्कृतः। उज्ज्वलदत्तस्तु दधिषाय्य इति सूत्रं पठित्वा दधिपूर्वात् स्यातेराय्यः षत्वञ्च दधिषाय्यो घृतं इत्याख्यात्। दशपादीवृत्तिकारस्तु दधिशब्दस्य द्वित्वङ्गुणाभावः। अत एवाभ्यासस्यानि पात्यत इत्याह। प्रसादकारादयोऽप्येवमेव प्रतिपन्नाः। तदेतत्सर्वं छन्दस्य विरोधाद्वेदभाष्यविरोधाच्चोपेक्ष्यम्। स्तुषेय्यं स्तोतव्यम्। पुरुवर्पसम्। बहुरूपमिति वेदभाष्यम्॥

टी०। दुर्वर्णरूप्यम्।

मू०। यत्तूज्ज्वलदत्तेनस्तुवः केप्यइति पठित्वा कित्वाद्गुणाभावउवङादेशौस्तुवेय्यः पुरन्दरइत्युक्तम्। तन्न। वेदतद्भाष्यादिविरोधात्। तस्मादिहक्षेय्यप्रत्ययं पठन्दशपादीवृत्तिकृदेवव्याख्याता
न्। पर्जन्योमेघशब्देपिध्वनदंबुदशक्रयोरितिमेदिनी॥ अजयकोशस्यमाह। वदान्यइत्यादि। अमिनक्षि। नक्षगतौ। विधिः प्रकृत्यन्तरम्। नक्षन्निति। नभ्राण्नपादितिसूत्रेनञः प्रकृतिभावउक्तः। स्वदेः
सौत्रान्ननिनञ्समासेयुत्यस्यन्तस्त्वात्दितिवोदात्तम्। यजत्रोयष्टव्यदेवता। सतोवायुर्वीतेगच्छतांसंयजत्रैरङ्गानीतिमन्त्रेतथादर्शनात्। गडेः। गडसेचनेकलत्रंश्रोणिभार्ययोरित्यमरः। वजत्रमित्। नि
त्वादन्तोदात्तः। वदत्रापान्दार्वानहूमानः। सुविदेः कत्रः। इहप्रायेणकत्रन्नितिनितं पठन्ति तत्रमादिकमुत्रहस्तैः सुविदत्राणिऐत्यादौनित्स्वरादर्शनात्। कृदुत्तरपदप्रकृतिस्वरेणप्रत्ययस्वरस्यै
वदर्शनाच्च। धन्वयपत्यस्तत्रऋत्वेतिमन्त्रेपितथैवदृष्टत्वात्। कृत्रेणीयमरण्यमितिवेदभाष्यम्। भृम्। भञ्जध्वरयेमृङ् प्राणत्यागे। इशिक्षिप्रेक्षणे। दशपादयान्तुभृ इणीङितिपठित्वादङ्आदेशेकृयते
दरतः शेतेशायतइत्युदाहृतंतन्न। कृशान्तमग्निस्पर्शनंदहन्तम्। तरणिर्विश्वदर्शतः। दैव्योदर्शितोरथइत्यादिमन्त्रेस्तद्भाष्येणचविरोधात्। भरलोनाययम्लेषुनैनानटे। रामानुजेयदीपन्तौ इतिमेदिनी॥
यजतस्त्रसिगिति उज्ज्वलदत्तग्रन्थेऽनोक्तम्। त्रिनौ अग्निनायजतहिरण्यशस्यंयजतोवृहन्तमित्यादिषुयजतशब्दोयष्टव्यपरतयैववेदभाष्येव्याख्यातः। पर्वतः पादपेंऽशुसिराप्रचलम्रच
भेदयोः। देवमुन्यन्तरेशैलेइतिमेदिनी। हर्यतोऽश्वइति। एतदपिहर्यकान्तौगतौचेतिधात्वर्थवृत्तिकारोक्तिश्चानुसत्योक्तमथपरित्वंहर्यतंहरिम्। यहर्यतायपृश्वेइत्यादिमन्त्रेषुहर्यतः सर्वैः
स्पृहणीयइतिवेदभाष्यम्। पृषिरञ्जि। पृषतमृगेपुमान्विप्रुषैनद्वयोः पृषतोपिना। अनयोश्चत्रिषुश्वेतबिन्दुयुक्तेप्युभाविमौ। रजतन्त्रिषुशुक्लेस्यात् क्लीबंहारेचदुर्वर्णइतिमेदिनी॥ शीङ्। शपि उ
ज्ज्वलदत्तेनानपञ्जसो वह्निः पचतेअन्येस्तुनन्दिः। वक्ष्यमाणदृशयोरन्यतरंवेदादावुपलभ्यबहुश्रुतेः पाठोनिर्णेयः। बाहुलकादिति। शमथः शान्तिमन्त्रिणोरितिमेदिनी। दमथस्तुपुमान्दण्डेदमेचप
रिकीर्तितइति। रुदिविदि। विदथोयोगिकृति नोपीतिमेदिनी। अत्रोज्ज्वलदत्तः। रुविदिभ्यांङ्कित्तिपठित्वारोतीतिरुवथः श्वेतुदाजहार। दशपादवृत्तिकारस्तुरुदिविदिभ्यांङ्कित्तिपपा
ठ। किंचोपसर्गेवसेरित्येवंरूपमुत्तरसूत्रन्द्वावपिनपेठतुः। तथाहि। शीङ्शयेतिसूत्रानन्तरंसोपसर्गाद्वसेः भृञश्चितरुदिविदिभ्यांङ्कि न्। इत्युज्ज्वलदत्तस्यसूत्रपाठः। अन्यस्यतुशीङः शयेतिसू
त्रानन्तरंआङिवसेः। भृञश्चित्रुदिविदिभ्यांङ्कित्इतिसूत्रपाठः। तदेतत्पाठद्वयंभाष्यादिविरोधादुपेक्षितम्। तथाहि। गाङ्कुटादिसूत्रेकेपुनश्चक्रुः दयः चङ् अङ् नजिङ् अवद् नङः इतिभा
[illegible] इतिकेयटेनव्याख्यातम्। एवञ्चाकिदितिपठतांसूत्रविपर्यासञ्चकुर्वतांभाष्यादिविरोधः स्पष्टएवेत्यास्तान्तावत् ॥

४दिकारभेवानरभिदीति।

टी०।पिष्टके।माषचूर्णे।शूकशिम्बी।कपिकच्छुः।नागसंभवम्।सिन्दूरम्।चूर्णम्।पटवासः।कनकालुः।स्वर्णजलपात्रम्।सहाघृतकुमारी।इतितृतीयः ॥

मू०।भाष्यकैयटमतेपिडि·दित्यस्यानुवृत्तेः फलक्लिन्नम्।अत्यविचमि।गौरादित्वात्ङीष्।अतसीस्यादुमासुमेत्यमरः।चमसोयज्ञपात्रस्यभेदेऽस्त्रीपिष्टकेस्त्रियाम्।पनसःकण्टकिफलेकण्टके वानरान्तरे।स्त्रियांरोगप्रभेदेस्यादितिमेदिनी।वेञस्तुट्च।दशपादीवृत्तौतुवियस्तुट्चेतिपठित्वावीगत्यादिष्वितिधातुरुदाहृतः।वहिसुभ्याम्।अजगरेशयुर्वाहसइत्युभावित्यमरः।वातुक्लीवेदिवसवासराविति च।कृशद्।करभोमणिबन्धादिकनिष्ठान्ते तत्सुते।शरभस्तुपशोर्भि' मेदिनी।समौपतङ्गशलभावित्यमरः।करभःकरिशावकइतिच।गर्दभश्वेतकुमुदेगर्दभोगन्धभिद्यपि।रासभे गर्दभीक्षुद्रजन्तुरोगप्रभेदयोरितिमेदिनी।ऋषिदृभ्यांकित्।ऋषभस्त्वौषधान्तरे । स्वरभिद्वृषयोःकर्णरन्ध्रगर्दभपुच्छयोः।उत्तरस्थःस्मृतःश्रेष्ठेस्त्रीनरकारयोषिति।शूकशिंभ्यांशिरालायांविधवायांकपिकच्छ्वामलेतिमेदिनी।ऋषभःश्रेष्ठवृषयोरितिच।रासिवल्लिभ्याञ्च।रासृशब्दे।वल्लसंवरणे।वल्लभोदयितेध्यक्षेसल्लक्षणतुरङ्गमेइतिचमेदिनी।जृविशिभ्यांझच्।बाहुलकादहेतेरपिस्मृच्।अर्हन्तःक्षपणकोजिनइतिविक्रमादित्यकोशः।तृभूइइहनन्दिर्ण्यन्तः।तदाह।नन्दयन्तइति।उज्ज्वलदत्तस्तुनन्द न्तइत्युदाहृत्यपूर्वसूत्रेणगतार्थतामाशङ्क्य अनाशीरर्थनन्दिग्रहणमित्याह।तन्न।इहाप्याशिषीत्यस्यस्यथमेवानुवर्त्तितत्वात्।बाहुलकादिति।जर्जरंशैवलेशक्रध्वजेत्रिषुजरन्तरे।झर्झरःस्यात्कलियुगेवाद्यभेदेनदान्तरेइतिमेदिनी।अर्त्तिकमि।अररश्छदकपाटयोः।भ्रमरःकामुकेभृङ्गेवत्सरञ्चामरेस्त्रियांतुमञ्जरीमृगभेदयोरितिमेदिनी।वासरइति।वसेर्णन्तात्सरः।केचित्तुसूत्रेवाशिष्यइतितालव्यंपठित्वावाशृशब्देवाश्यस्यतेवाशरः।कोकिलइत्याहुः।अङ्गिमदि।अङ्गारउल्मुकेनस्त्रीपुंल्लिङ्गस्तुमहीसुतेइतिमेदिनी।मन्दारःस्यात्सुरद्रुमे।पारिभद्रेऽर्कपर्णेचमन्दारोहस्तिधूर्त्तयोरितिच।मदिरस्तुत्यादावित्यस्माद्बाहुलकादारुरपि।पारिभद्रेतुमन्दारुर्मदारुःपारिजातकइतिशब्दार्णवः।गडेः।कडारःकपिलेदासेइतिमेदिनी।शृङ्गारभृङ्गारौ।शृङ्गारःसुरतेनाट्यरसेचगजमण्डने।नपुंसकंलवङ्गेपिनागसंभवचूर्णयोरितिमेदिनी।भृङ्गारीझिल्लिकायांस्यात्कनकालौपुनःपुमानितिच।कञ्जिमृजिभ्याम्।कञ्जारोजठरेसूर्येविरिञ्चौवारणेमुनाविति।विश्वमेदिन्यौ।मार्जारओतौखट्वाङ्गेइतिच।कमेः।कुमारःस्यात्शुकेस्कन्देयुवराजेऽश्ववारके।बालकेवरुणाद्रौनानदयोर्जात्यकाञ्चने।कुमारीशैलतनयावनमाल्योर्नदीभिदि।सहायराजिताकन्याजंबूद्वीपेषुचस्त्रियामितिमेदिनी।विश्वप्रकाशेतुकुमारीरामतरणीतिपाठः।रामतरणीलताविशेषः।सहेतिप्रसिद्धः।तरणीरामतरणीकर्णिकाचारुकेसरा।सहाकुमारीगन्धाढ्येतिधन्वन्तरिनिघण्टुः।जंबुद्वीपसहाकन्याकुमार्य्योथाश्ववारके।बा

षेचकुमारोभर्त्तृदारकेइतित्रि
लकेकार्त्तिके
काण्डशेषः ॥

टी॰।कुशपुत्रे।रामपौत्रे।गजकर्णिका।गजशुण्डाग्रम् ॥ मू॰॥ तुषारस्तुहिनंहिमम्।कासारःसरसीसरः।कुणेः।कुणपः पूतिगन्धेशवेपिचमेदिनी।विटपविष्टपइति ।ःविटपोनस्त्रियांस्तम्बशाखाविस्तारपल्लवे।क्षियधिपेचेतिमेदिनी।आदेःपरइति।एतच्चोज्वलदत्तरीत्योक्तं।अन्येतुसूत्रेविष्टपेतिदन्त्योष्ठ्यादिमेवपठन्ति।युक्तञ्चैतत्।यत्रब्रघ्नस्यविष्टपमित्यादौतथादर्शनात्।उलपोनस्त्रीगुल्मिन्यांनातृणान्तरेइतिमेदिनी।लत्तिकेति।लतिःसौतःइष्टकेति।इष्टकेषीकामलानामितिनिर्देशात्प्रत्ययस्थादितिनेत्त्वम्।अर्त्तिगृ।गर्भभ्रूणेर्भकेकुक्षौसन्धौपनसकण्टकेइतिमेदिनी।दूणः इभः स्तम्बेरमःपद्मीत्यमरः।लक्षिमुट्चालक्षदर्शनाङ्कनयोः।चुरादिण्यन्तः।अस्मादीप्रत्ययःस्यात्।तस्यमुडागमश्चणिलोपः।लक्ष्मीःसंपत्तिशोभयोः।ऋद्धौषधौचपद्मायांवृद्धिनामौषधेपिच।फलिन्यांस्त्रीतिमेदिनी।इत्युणादिवृत्तौतृतीयःपादः।।अयमिति।।द्विचतुःषट्पदोरगाः।इत्यमरेणोभयलिङ्गोक्तेः।सुभूतिचन्द्रादिभिरपिवातप्रमीशब्दस्यद्विलिङ्गतोक्तेश्चेतिभावः।तत्रकृदिकारादितिपाक्षिकोङीष्।कैश्चिदिष्यतेनहिकारग्रहणेकेवलग्रहणमितिमुनित्रयेणपरिभाषितम्।अतएववातप्रमीश्रीलक्ष्मीतिपक्षेङ्यन्तास्तुसाधवइतिरक्षितः।एतच्चदुर्घटग्रन्थेस्पष्टम्।आशीराश्यहिदंष्ट्रायांलक्ष्मीलेक्ष्मीहरित्स्त्रियामितिद्विरूपकोशः।अतएवाशीविषोविषधरइतिसङ्गच्छते।आशीमिवकलामिन्दोरितिराजशेखरः।आशीर्हिताशंसाहिदंष्ट्रयोरितिसान्तोऽमरात्।सान्तोप्याशीःशब्दइत्यन्यदेतत्।बद्धेति।मुष्ट्यातुबद्धयासरत्निःस्यादित्यमरः।सहस्तइत्यर्थः।प्रसङ्गादाह।अरत्निरिति।नरत्निरिति।नरलिरितिनञ्समासः।दशपादीवृत्तौतुदृहसूत्रेअर्त्तेरत्निचमकितंविधायग्रत्निःसाधितः।उज्ज्वलदत्तानुसारेणाह।वायूरात्रिश्चेति।दृहशब्दोमेघः।अशनिश्चेतिअपिबोद्ध्यम्।आविष्करणोमितन्यतुर्नेरटिमितिमन्त्रेतन्यतुगर्ज्जितमितिचमन्त्रेतन्यतुस्तन्यतुरशनिरितिवेदभाष्येव्याख्यातत्वात्।अञ्जलिस्तुपुमान्हस्तसंपुटेकुटवेपिचेतिमेदिनी।स्थविरान्त्रमिति।वनिष्टोर्दययाविधौतिमन्त्रस्यभाष्येतथोक्तत्वात्।अञ्जिष्ठइति।केचिदञ्जेरिष्णुचमिच्छन्ति।तेषामञ्जिष्णुरित्युदाहरणम्।मदेरिति।मत्स्योमीनेथपुंभूम्निदेशइतिमेदिनी।अतिथिःकुशपुत्रेस्यात्पुमानागन्तुकेत्रिषु।अङ्गुलिःकरशाखायांकर्णिकायांगजस्यचेतिमेदिनी।कवसःसन्नाहः।कङ्कटजातिश्चअवइति।कवचौदुर्गभाण्डेचसन्नाहेपर्पटेपिचेतिमेदिनी।पुषः।पुष्यतेःकरन्स्यात्।सचकित्।पुष्करंखेम्बुपद्मयोः।तूर्यवक्त्रेखड्गफलेहस्तिहस्ताग्रकाण्डयोः।कुष्ठौषधेद्वीपतीर्थभेदयोश्चनपुंसकम्।नारागनागविहगनृपभेदेषुवारुणौइतिमेदिनी।कलंच।पुष्यतेःकलन्कित्स्यात्।पुष्कलस्तुपूर्णश्रेष्ठेइतिहेमचन्द्रः।मन्थाइति।पथिमथीलात्वम।इतोत्सर्वनामस्थाने।मन्थामन्थनदण्डेचवज्रेवातेपिचस्मृतः।पन्थाइति।पथेगतावस्मात्मन्चाद्यचिअकारान्तोप्यस्ति।वाटःपथश्चमार्गश्चेतिसुभूतिचन्द्रपुरुषोत्तमौ।ऋचिलचः।किरोरिस्यात्सकिरौप्रोक्तः।पथःपथीतिद्विरूपेषुविश्वः।इहऋभवोदेवाःक्षयन्त्यस्मिन्नितिविग्रहेऽन्येभ्योपिदृश्यतइतिडः।ऋभुक्षःस्वर्गवज्रयोरितिविश्वः ॥

टीनवाल्हीकम्।केसरम्॥ मू०॥ ततोमत्वर्थीयेइनिः।ऋभुक्षिन्नितिनान्तंप्रातिपदिकम्।आलाले।ऋभुक्षाःइन्द्रः।ऋभुक्षाणौऋभुक्षाणइत्युज्ज्वलदत्तः।दशपाद्यान्तुअर्त्तेर्भुक्षिनगितिसूत्रमुपन्यस्तम्।ऋभुक्षणमिन्द्रमाहुवउतयइतिमन्त्रस्यवेदभाष्येपितत्सूत्रमुदाहृतम्।अत्रायं विवेकः।आद्यमन्तेचोदात्तत्वंन्याय्यम्।अवग्रहाभावेबाहुलकात्।द्वितीयेतुअवग्रहाभावोन्याय्यः। अन्तोदात्तस्तुबाहुलकात्इति।खजाकइति।खजमन्योबलाकावकपङ्क्तिःस्याद्बलाकाबिसकण्ठिका।बलाकाकामुकीप्रोक्ताबलाकश्चबकोमतइतिविश्वशाश्वतौ।शलाकाशल्यमदनसारिकाशल्लकीषुचेतिमेदिनी।पताकावैजयन्त्यांस्यात्सौभाग्यनाटकाङ्कयोरितिच।पताकीवैजयन्त्यांस्यात्सौभाग्येङ्कध्वजेपिचेतिविश्वः।पिनाकादयश्च।पिनाकोऽस्त्रीरुद्रचापेपांसुवर्षत्रिशूलयोरिति मेदिनी।अमरोक्तिमाह।क्लीबेति।किञ्चपिष्लसञ्चूर्णने।षकारस्यणत्वन्धातोर्युगागमः।पिण्याकोऽस्त्रीतिलकल्केहिङ्गुबाह्लीकसिह्लकेइतिमेदिनी।अमरोक्तिमाह।दूषिकेति।किञ्चदूषयतेस्त्वइरितिईप्रत्ययेदूषिः।कृदिकारादितिङीष्।दूषीउभाभ्यामपिस्वार्थेकनिदूषिकाह्रस्वमन्द्वौवा।केणइतिङीषोह्रस्वादेशात्।पिचण्डीदूषिकादूषिःपिचाटश्चदृशोमलमितिविक्रमादित्यकोशः।दूषिकातूलिकायाञ्चमलेस्याल्लोचनस्यचेतिमेदिनी । अनिहृषिभ्याम्।अनीकोऽस्त्रीगणेसैन्येपीतिमेदिनी।हृषीकंविषयीन्द्रियमित्यमरः।पर्फरादेर्ईइति।उज्ज्वलदत्तरीत्योक्तम्।वस्तुतस्तुधातोर्द्वित्वंउकारस्याकारःसलोपः।रुक्त्वाभ्यासस्येतिदशपाद्युक्तमेवन्याय्यम्।चरेर्नुम्चेत्युच्चरश्चाभ्यानुरोधेनहेरुकेसादेरनुवृत्तेर्न्याय्यत्वात्।किसलयमिति।नैतोशेवतुर्फरीपर्फरी केतिमन्त्रस्यवेदभाष्येतुञिफलाविशरणेपॄपालनपूरणयोःपर्वपूरणेएषामन्यतमस्यनिपातनमिदमाश्रित्यधानूर्णाविदारयितारोस्तोतृणांपालकाविशर्थस्यपूरयितारौचेतिव्याख्यातम्।तिन्तिडीकइति।तिमेर्मकारस्यडकारः।अभ्यासस्यतुक्च।तिन्तिडीचिञ्चाम्लिकेत्यमरेतुशब्दान्तरम्।तथाचतिंतिडीचाम्लिकाचिञ्चातिन्तिडीकाकपिप्रियेतिवाचस्पतिः।अम्लीकाचाम्लिकाचिञ्चातिन्तिडीकाचतिन्तिडाइतिचन्द्रः।अम्लिकाचुक्रिकाचुक्रासाम्लाशुक्लाथशुक्लिका।अम्लिकाचिञ्चिकाचिञ्चातिन्तिडीकाचतिन्तिडेतिधन्वन्तरिनिघण्टुः।यत्तुउज्ज्वलदत्तेनोक्तंउपदंशस्तृतीयायामितिसूत्रेतिन्तिडोपदंशंभुङ्क्ते इतिभाष्यप्रयोगात्साधुतेतितदुपेक्ष्यम्।उपदंशइतिसूत्रस्यभाष्यकारैरस्पृष्टत्वात्तदुदाहृतप्रयोगस्यभाष्येकुत्राप्यभावाच्च।भ्रमरश्चञ्चरीकःस्याद्रोलंबोमधुसूदनः । इन्दिन्दिरःपुष्पकीटोमधुद्रोमधुकेशटइतित्रिकाण्डशेषः।कर्कर्यालुर्गलन्तिकेत्यमरः।पुण्डरीकंसितांभोजेसितच्छत्रेचभेषजे।पुंसिव्याघ्रेचदिग्नागेकोशकारान्तरेपिचेतिमेदिनी।ईषेः।ईषिकास्यादिषीकापिवानामुजवनामुञ्जावितिद्विरूपकोशः।सर्तेः।सृणीकास्यन्दिनीलालास्यादित्यमरः।मृडःकीकः गादन्तोदात्तः।कीकनित्युज्ज्वलदत्तादिपाठस्तुप्रामादिकः।मलीकेअस्यसुमतौस्याम।मृलीकावप्रियवन्तानइत्यादिषुचित्स्वरस्यैवदर्शनात्।अलीकमप्रियेपिस्यात्दिवस्त्रीनपुं

वैलक्ष्यः। विस्मयान्वितः। किशोरः। अश्वकुमारः। एकादशमारभ्यापञ्चदशाङ्कुमार इत्यन्ये ॥ मू० ॥ अलीकमप्रियेभालेवितथेइतिहेमचन्द्रः। तथाचप्रयुज्यते। तेदृष्टिमात्रपतिताअपि
कस्यनात्रक्षोभायपक्ष्मलदृशामलकाःखलाश्च। नीचाः सदैवसविलासमलीकलग्नायेकालताकुटिलताश्चनसस्त्यजन्तीति। अलीकमप्रियाकार्यवैलस्येपिपीठके। नानागरेइतिमेदि
नी। वलीकनीध्रेपटलप्रान्तेइत्यमरः। वलतेसृगागमेवल्मीकम्। वामलूरश्चनाकुश्चवल्मीकःपुन्नपुंसकमित्यमरः। वहृस्वेर्टद्विश्च। वाहीकोगौः। वाहश्च। सुप्रपूर्वादिणस्तुइच। सुप्रतीकः। शा
म्यते। शमीकः ऋषिः एवमन्ये प्यूह्याः। तदाह। इत्यादीति। शृङ्। गूथंपुरीषंवर्चस्कमस्त्रीविष्ठाविषौस्त्रियामित्यमरः। अर्जेः। अमरोक्तिमाह। ऋजीषमिति। किंच। उद्धतरसः सोमलतायाः शे
षोपि ऋजीषम्। एतच्च ऋजीषिणंवपणंसंसतश्रिये। आसत्योयातुमघवाँ ऋजीषीइत्यादिमन्त्रभाष्येस्पष्टम्। अयमिति। ईषन्प्रत्ययः अरुट्चतस्यागमः इत्यर्थः। वोपालितोक्तिमाह। अम्बरी
षइत्यादि। अम्बरीषंरणेभ्राष्ट्रेक्लीबंपुंसिनृपान्तरे। नरकस्यप्रभेदेचकिशोरेभास्करेपिच। आम्रातकेत्रुतापेचेतिमेदिनी। कृशृङ्। करीरोवंशाङ्कुरे क्लीवृक्षभिद्घटयोःपुमान्। करीराचीरिकायाञ्च
दन्तमूलेचदन्तिनामितिमेदिनी। शरीरंवर्ष्मविग्रहइत्यमरः। अर्द्धर्चादित्वात्शरीरोपि। बाहुलकात्हिडिगत्यनादरयोः। हिण्डतेइतस्ततोगच्छतीतिहिण्डीरः। हिण्डीरोब्धिकफःफेनइत्यम
रः। डिण्डीरोपिचहिण्डीरइतिद्विरूपकोशः। किर्मीरजंबीरनूपीरादयोप्येवंबोध्याः। किर्मीरोनागरङ्गेचकर्बुरेराक्षसान्तरेइतिमेदिनी। जम्बीरःप्रस्थपुष्पेस्यात्तथादन्तशठेद्रुमेइतिच। उशीरंवीर
णमूलम्। उशीरोपिमूलेस्योशीरमस्त्रियाम्। अभयंनलदंसेव्यमित्यमरः। कुटीरमिति। कपिलकादित्वाल्लत्वे कुलीरःकर्कटकः। घसेः। क्षीरमिति। उपधालोपः। कत्वंषत्वम्। क्षीरन्दुग्धेचनीरेचेतिवि
श्वः। गमेरिति। निम्नङ्गभीरङ्गम्भीरमित्यमरः। पचस्फुलिमच्। कर्त्तर्ययङ्कृत्यप्रकृत्ययेशुरिदुपसंख्यासः। शेरलेनेनशीधुः मद्यविशेषः मैरेयमासवःसीधुरित्यमरः अर्द्धर्चादिपाठात्क्लीबञ्च। पुन्नपुंसक
योर्दारुजीवातुस्याग्शीधवइतित्रिकाण्डशेषः। शीलंस्वभावेसद्वृत्तेइतिमेदिनी। जलनीलीतुशेवालंशेवलइत्यमरः। शेवलंपद्मकाष्ठेस्यात्शेवलेतुपुमानयमितिमेदिनी। शब्दार्णवोक्तिमा
ह। शेवालमित्यादि। उलूकादयश्च। उलूकःपुंसिकाकारौविन्द्रेभारतयोधिनिइतिमेदिनी। वादेर्यङन्तादूकः। वाचोयुक्तिपटुर्वाग्मीवावदूकश्चवक्तरीत्यमरः। शमेर्बुक्। शम्बूकोगजकुम्भान्ते
घोंघेचशूद्रतापसेइतिमेदिनी। बाहुलकादुकप्रत्ययेह्रस्वमध्योपि। जम्बूकंजम्बूकंप्राहुःशम्बूकमपिशम्बुकमितिद्विरूपकोशः। जम्बूकजम्बूकादयोप्यत्रैवद्रष्टव्याः। जम्बूकःफेरवेनीचेपश्चिमा
शापतावपीतिविश्वमेदिन्यौ। बन्धूकंबन्धुजीवेस्याद्बन्धूकःपीतसारकेइतिच। शलिमण्डि। सौगन्धिककत्तुकल्हारमित्याद्युपक्रम्यशालूकमेषाकन्दःस्यादित्यमरः। एषांसौगन्धिकादीनाङ्केरवा
न्तानांकन्दोमूलमित्यर्थः। निपोमिः। नेमिर्नातिनिशेकूपत्रिकाचक्रान्तयोःस्त्रियामितिमेदिनी। बाहुलकादन्यतोपि। याप्रापणे। यामिःस्वसृकुलस्त्रियोरित्यन्तस्यादौरभसः। यामिःकुलस्त्रीस्वस्रोः
स्त्रीत्यन्तस्यादौमेदिनी। जेसये। जामिःस्वसृकुलस्त्रियोरितिन्नवर्गातृतीयादिरजयकोशः। चवर्गादिरपिप्रोक्ता यामिःस्वसृकुलस्त्रियोरितिद्विरूपेषुविश्वः। अर्त्तेरूच्च। उच्चैस्तुषितम्। ऊर्मिःस्त्री
पुंसयोर्वीच्यां प्रकाशेवेगभङ्गयोः। वस्त्रसङ्कोचरेखायांवेदनापीडयोरपीतिमेदिनी। भवन्तिभूतान्यस्यामितिभूमिः। भूमिर्वसुन्धरायांस्यात्स्थानमात्रेपिचस्त्रियामितिमेदिनी। अश्नोतेःरश्मिःपुमा
न्दीधितौस्यात्पक्ष्मप्रग्रहयोरपीतिमेदिनी। वीज्या। अमरोक्तमाह। वेणिरित्यादि। वेणीकेशस्यबन्धेपिनद्यादेरन्तरेदेवताडेइतिमेदिनी। वेणीखरागरीदेवताडोजीमूतइत्यपीत्यमरः ॥

सू०।ज्यानिर्हानौलवत्याञ्चेतिविश्वः।जूर्णिःस्त्रीरोगः।सृवृषि।अङ्कुशोऽस्त्रीसृणिःस्त्रियामित्यमरः।सृणिःस्यादङ्कुशेपुमानितिकोशान्तरम्।अतएवआरक्षमग्नवचमत्यसृणिंशिताग्रमितिमाघः।वृष्णिस्तुयादवेमेषेवृष्णिःपाखण्डचण्डयोरितिविश्वः।ऐन्द्रवृष्णिंषोडशिनितृतीयमितिश्रुतौवृष्णिंमेषमित्यर्थः।अङ्गेः।अग्निर्वैश्वानरोपिस्याच्चित्रकाख्यौषधौपुमानितिमेदिनी।श्रेणिः।श्रेणिःस्त्रीपुंसयोःपङ्क्तौसमानैःशिल्पिसंहतावितिच।कटिःश्रोणिःककुद्मतीत्यमरः।योनिःस्त्रीपुंसयोश्चस्यादाकरेस्मरमन्दिरेइतिमेदिनी।घृणिघृष्णि।घृसेचनेतिप्रत्ययेगुणाभावश्च।घृणिःपुनः।अंशुज्वालातरङ्गेषुइतिहेमचन्द्रः।पृश्निरल्पतनावित्यमरः।पार्ष्णिःस्यादुन्मदःस्त्रियाम्।स्त्रियान्द्वयोःसैन्यपृष्ठेपादग्रन्थ्यधरेपिचेतिमेदिनी।भूर्णिर्धरणीति।तज्ज्ञानमूर्णिरितिमन्त्रेस्सामर्थ्येतुभूर्णिर्धर्ता।पोषकोवेतिव्याख्यातम्।दिवोद्वे।दीदिविर्धिषणान्नयोरितिविश्वः।दीदिविर्नाधिषणे नेतदस्त्रियामितिमेदिनी।धिषणोबृहस्पतिः।दीदिविर्द्वादशकरश्चक्षाःसुरगुरुर्गुरुरितित्रिकाण्डशेषः।दीदिविर्द्वादशार्चिःस्याज्जीवःप्राक्फल्गुनीसुतइतिहारावली।ओदनोऽस्त्रीसदीदिविरित्यमरः।अत्रसदीदिविर्दीदिविःसहितइतिव्याख्यानंन्याय्यम्।सइतिच्छेदेतुअस्त्रियामितिनलभ्येत।नतत्रअन्नेतदस्त्रियामितिमेदिनी।ग्रन्थोविरुद्ध्येतेतिद्ध्येयम्।गोपामृतस्यदीदिविमितिमन्त्रेतुद्योतमानमित्यर्थः।कृविघृषि।एतेनक्रिन्नतानिपात्यन्ते।घृष्विर्वराहइति। उग्रस्यपुनःस्थविरस्यघृष्वेरितिमन्त्रेतुघृष्वेःकामानावर्षकस्येत्यर्थः।घृषुसेचनेइतिधात्वर्थानुगमः।तच्छविःशोभारुचोर्योषिदितिमेदिनी।अस्यचाषःकिकीदिविरित्यमरः।विनिमयइति।किकिदीविःकिर्कीदिविरितिद्विरूपकोशः।पातेः।पतिर्धवेनात्रिषीशेइतिमेदिनी।शकेः।उच्चारावस्करौशमलंशकृत्।गूथंपुरीषंवर्चस्कमस्त्रीविष्ठाविशौस्त्रियामित्यमरः।अमेरतिः।अथामतिःपुंसिहिमदीधितिकालयोरितिमेदिनी।अमितिश्चामतिःकालइतिद्विरूपेषुविश्वः।वहिवसि।वहतिःसचिवेगवीतिविश्वः।वसतिःस्यात्स्त्रियांवासेयामिन्याञ्चनिकेतनेइतिमेदिनी।अमरोक्तिमाह।प्रादेशनस्तितारमेः।रमतिर्नायकेनाकेपुंसिस्यादितिमेदिनी।वृत्तिकारोक्तकोशान्तरमाह।रमतिरित्यादि।नित्यमाद्युदात्तार्थम्।रन्तिरस्तिरमतिरसि।सूङःक्रिः।धीमान्सूरिःकृतीकृष्टिर्लब्धवर्णोविचक्षणःइत्यमरः।दशपाद्यान्तुसूङोरिन्दीर्घश्चेतिपाठः।तत्ररिनोनकारोनानुबन्धःउत्तरसूत्रेप्रत्ययान्तरारम्भात्।अनुबन्धत्वेहिलाघवादिहैवक्रिन्नुच्येत।तथासतिसूरीसूरिणौसूरिणइत्यादिरूपम्।अतएवाभिधानमालायांसूरीतिनान्तमुदाहृतमित्यवधेयम्।यत्तुदशपाद्यांवृत्तिकारैर्नित्यंस्त्रीकृत्यसूरिभिःसुदाहृतम्।तदेतेनप्रत्युक्तम्।स्वरविरुद्धमपि।सदापश्यन्तिसूरयः। ——— विसूरयोदधतोविश्वमायुरित्यादौसूरिशब्दस्यान्तोदात्तत्वात्।अदिशदि।अद्रयोद्रुमशैलार्काइत्यमरः।भूरिर्नावासुदेवेचहरेचपरमेष्ठिने।नपुंसकंसुवर्णेचप्राज्येस्याद्वाच्यलिङ्गवदितिमेदिनी ॥

प्रमीला।आलस्यम्।पुन्नागः।केसरः।कर्बुरः।एतरक्षसोः ॥

उतन्द्रिय

वंक्रिरिति।वकि कौटिल्ये।तन्द्रिरिति।कृदिकारादित्ति पक्षेङीष्।तन्द्री।निद्राप्रमीलयोरिति मेदिनी।तन्द्रीतन्द्र्यामिति द्विरूपकोशः।विभज्य नक्तन्दिवमस्ततन्द्रिणेति भारविः।राशदिभ्याम्।अत्रिर्नाभोधरेजिह्वावितिमेदिनी।अत्रिमग्रउपमाङ्केनुमयेइति मन्त्रस्य वेदभाष्ये तु उपामासुपमानभूतङ्केतुं प्रख्यातं अत्रिं एतन्नामकं राजर्षिमिति व्याख्यातम्।अदेस्त्रिनिश्च।अत्री भक्षकः।अत्रिः।ऋषिविशेषः।उज्वलदत्तस्तु अदेस्त्रिन् इति पठित्वा अत्रिरित्युदाजहार तन्न।त्रिपैव सिद्धे प्रत्ययान्तरवैयर्थ्यात्।गोवर्द्धनस्तु अदेस्त्रिन्निचेति पठित्वा निदिति वचनान्नकारस्य नेत्संज्ञा।अत्री।अत्रिणौ।अत्रिण इत्याह।तदपि न।आद्युदात्तापत्तेः।न चेष्टापत्तिः। जहीन्यत्रिणंपणिम्।दूरे वा ये अन्ति वा के चिदत्रिणः।अग्ने हंसि न्यत्रिणमित्यादावन्तोदात्तस्य निर्विवादत्वात्।दशपादीरत्नोतु अदेस्त्रिनिश्चेति पठित्वा चकारात्त्रिवित्युक्तम्।तदपि न।त्रिनिचश्चित्वस्य व्यर्थत्वात्।इकारेण वकार परित्राणे सति प्रत्ययस्वरेणैवेष्टसिद्धेः।अत एव वधैर्दुःशंसानिति मन्त्रस्य भाष्ये अदेस्त्रिनिश्चेति माधवः।ननु मताङ्कस्येति सूत्रे कैयटोप्येवमेवाहेति दिक्।पतत्रिरिति। पक्षवाचकात्पतत्रशब्दान्मत्वर्थे इति तु पतत्री पतत्रिणावित्यादि।मृकणिभ्यामीचिः।मरीचिः कृपणेद्वारषिभेदे च दृश्यत इति विश्वः।मरीचिर्मुनि भेदे ना गभस्तावनपुंसकमिति मेदिनी।कणीचिः पुष्पितलताकुञ्जयोः शकटे स्त्रियामिति च।वेञः।वीचिः स्वल्पतरङ्गे स्यादवकाशे सुखे द्वयोरिति विश्वमेदिन्यौ।पुरः।पुरुषः पुरुषे साङ्ख्यगे च पुन्नागपदपे इति विश्वमेदिन्यौ।पृनहि।पुरुषं ङ्कुर्दुरेरूक्षेनि सुरोक्तौ च वाच्यवदिति मेदिनी।नहुषो राजविशेषे नागभिद्यपीति हेमचन्द्रः।चित्स्वरेणान्तोदात्तत्वे प्राप्ते ग्रामादित्वाद्वृषादित्वाद्वा आद्युदात्तोयम्।एतच्च देवा अकृण्वन्नहुषस्य विश्पतिमिति मन्त्रस्य भाष्ये स्पष्टम्।कलुषं त्वाविलेना सोरिति विश्वः।पीयेः।पीयूषं सप्तदिवसावधिक्षीरे तथामृते इति मेदिनी।पियूष इत्यादिस्त्वमरः।मस्तेः पिटकः पेटकः पेटा मञ्जूषेत्यमरः।गण्डेश्च।गण्डूषो मुखपूर्त्तौ भपुष्करप्रसृतोन्मिते इति मेदिनी।अर्तेररुः॥उकारान्तोयं प्रत्ययः।न तु सकारान्त इति स्फोटयति।अररु इत्यादिना।युवंस्त्रैनत्।कंविघावारसुभ्वरमर्त्याम्।अपारहमदेवयजनोजजि इत्यादिमन्त्रे पुप्रुत थादर्शनात् ॥

टी०। शेफोलिङ्गम् ॥

यत्तु मानः ध्वंसो अररुष इति मन्त्रस्य भाष्ये मान्तोयमिति माधवेनोक्तं तत्प्रौढिवादमात्रं न तु वास्तवम्। पदस्याद्युदात्तत्वानुपपत्तिप्रसङ्गात्। उक्तप्रयोगस्य कुसन्तेन राति
नानञ्समासे सौष्ठवात्। गुरुद्वेषो अररुषे दधन्तीत्यत्र स्वयमेव तथा व्याख्यानात्। येनो अग्ने अररिवां अघायुरित्यादिमन्त्रान्तरसंवादाच्चेति दिक्। क्लीबे नः शकटोस्त्री स्या
दित्यमरः। करटो गजगण्डे स्यात्कुसुम्भे निन्द्यजीविनि। एकादशाहादिश्राद्धे दुर्दुरूढेपि वायसे इति मेदिनी। ककदि। करम्भो मिश्रिते बान्तो भान्तस्तु दधिसक्तुष्विति विश्वः।
कदम्बनिकुरम्बे स्यान्नीपसर्षपयोः पुमानिति मेदिनी। कलम्बोशाकभेदे स्यात्कदम्बशरयोः पुमानिति च। कदेः। कादम्बः स्यात्पुमान्पक्षिविशेषे सायकेपिनेति मे
दिनी। कलि। कलमः पुंसि लेखन्यां शालौ पाटच्चरे पि चेति मेदिनी। कुपेर्वा। कुप क्रोधे। अतः किन्दच्। वकारान्तादेशश्च वा। तन्तुवायः कुविन्दः स्यादित्यमरः। बाहुलकात्
अलभूषणादौ। अलिन्दः। यस्यामलिन्देषु न चक्रुरेव मुग्धाङ्गना गोमयगोमुखानि इति माघः। प्रज्ञादित्वादणि दीर्घादित्ययम्। निषङ्गथिरिति च। जोरितिकुलम्। आभुर
स्य निषङ्गथिः। रथकूबर इत्यर्थः। सर्त्तेः। नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिरित्यमरः। खर्जिपिञ्जादिभ्यः। खर्ज मार्जने एवमादिभ्य ऊरः। पिञ्ज हिंसायाम्। एवमा
दिभ्य ऊलच्। खर्जूरं रूप्यफलयोः खर्जूरः कीटवृक्षयोरिति मेदिनीहेमचन्द्रौ। कृपू सामर्थ्ये। बाहुलकाल्लत्वाभावः। अथ कर्पूरमस्त्रियाम्। घनसारश्चन्द्रसंज्ञः सिताभ्रो
हिमवालुकेत्यमरः। वल्ल संवरणे। वल्लूरम्। उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकमित्यमरः। एवं शालूरमण्डूरादयः। भेके मण्डूकवर्षाभूशालूरप्लवदर्दुरा इत्यमरः।
अथ मण्डूरम्। शिङ्घाणमपि तन्मले इति चात्र तन्मले तस्य पूर्वोक्तस्य लोहस्य मल इत्यर्थः।   लाङ्गूलं पुच्छशेफसोरिति मेदिनी। कुसूल इति। कुस श्लेषणे। दन्त्यसकारवा
न्। कुसूलश्च कुसीदश्च मध्यदन्त्यमुदाहृतमिति विश्वः। ताम्बूलादयोप्यत्र। तमु ग्लानौ। नुग्दीर्घत्वञ्च। ताम्बूली नागवल्ल्यां स्त्री क्रमुके तु नपुंसकमिति मेदिनी। शॄ हिंसायाम्।
धातोर्वृद्धिः। दुगागमश्च। शार्दूलो राक्षसान्तरे। व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थित इति मेदिनी विश्वप्रकाशौ। उत्तरस्थित उत्तरपदम्। राजशार्दूल इति यथा। दुगतौ। कुङ् श
ब्दे। अनयोः कुकूच्। दुकूलं श्लक्ष्णवस्त्रे स्यात्क्षौमे चेति मेदिनी। कुकूलं शङ्कुसंकीर्णश्वभ्रे ना तु तुषानले इति विश्वमेदिन्यौ। शिरीषादपि मृद्वङ्गी केयमायतलोचना। अयङ्कु चक्कू

लाङ्गिककर्कशो मदनानलः इति प्रयोगश्च ॥

अप्रकाण्डद्रुमेमूलहीनरसः।कुसीदकोवृद्धिजीवी ॥

कुःसघ्रद्दीर्घश्च।कूचः स्तनः ।कुचकुचौ स्तनेमतावितिविश्वः।कूचीति।टित्वान्ङीप्।सर्मीणः।दूणः सम्युपदे चट् स्यात्।दीर्घत्वञ्च धातोः।सिवेः। सूचीतु सिवनद्रव्ये आङ्गि का।भिनपान्तरेइतिमेदिनी।शमेः शंवः स्यात्मुसलाग्रस्थलोहमण्डगलके पवौ।मुभावि ते त्रिषितिविश्वमेदिन्यौ।उल्वादयश्च।गर्भाशयो जरायुः स्यादुल्वञ्च कललो स्त्रि या मित्यमरः।शुल्वमिति।शुच शोके।लत्वादि प्राग्वत्।शुल्वन्तास्र्येयज्ञकार्मण्याचारेजलसंनिधावितिमेदिनीहेमचन्द्रौ।वेते र्नुमागमो ह्रस्वत्वञ्च।विंवस्तु प्रतिविंवे स्यात्मण्डलेपुन्नपुंसकम्।विंविकायाः फलेक्लीबङ्कलासे पुनः पुमानितिमेदिनी।स्थस्तः।स्तम्बो गुल्मे तृणादीनामप्रकाण्डद्रुमेपि चेति विश्वः।स्तम्बोप्रकाण्डद्रुमगु च्छयोरितिमेदिनी।स्याद्गुच्छकस्तु स्त— व कइत्यमरः।शाशपि।शादः स्यात्कर्दमे शष्प इति मेदिनी।अब्दः संवत्सरेवारिवाहमुस्तकयोः पुमान्।कुन्दोमाघ्येऽस्त्रीमुकु न्देभ्रमिनिर्द्धान्तरेपुनाइतिच।वलिमलि।वलयः कण्ठरोगे नाकङ्कणे पुन्नपुंसकमितिमेदिनी।मलयः पर्वतान्तरे।शैलांशे देशआरामे त्रिवृतायान्तु योषितीतिच।आत्म जलनयस्ः [illegible] सुतः पुत्र इत्यमरः।हृञोः ह्रियते विषयैः हृदयम्।हरमा।चन्द्रोक्तिमाहंसंवत्सरेत्यादि।सञ्चादयश्च।रुप्रत्ययान्तानिपात्यन्ते।जनीप्रादुर्भावे।नकारस्तत् कारः।उत्सुत्सस्यसन्धिः।सन्धीतस्यै वज्रतुणीइत्यमरः।तस्यपूर्वोक्तस्य स्कन्धस्यसन्धीत्यर्थः।रुशातिभ्याम्।रुरुर्दैत्ये मृगेपि चेति मेदिनी।जनिदा।नवभ्यो धासंख्य नवस्ः [illegible] जनेरि[illegible]।दइकारोच्चारणमुत्तरार्थम्।जनेरिट्यसिद्धत्वात्।सणिरिति।नित्स्वरेणाद्युदात्तोयम्।सत्रमिभ्याङ्किरिति निप्रत्ययेत्वन्तोदात्तः।मत्स्य इति।अन्तोदा त्तोयम्।कोन्यञ्जीतिसूत्रेतुआद्युदात्तः साधितः।पण्ड इति।पमष्ट म— वैकल्ये।बाहुलकात्सत्वाभावः।ष्ट्वामोढ इति सूत्रेतुतालव्यादिः साधितः।सापंसायोभवेत्कोशः कोशमंडश्च स ड वदितिद्विरूपकोषाः।कैयटस्तु नसे कइतिसूत्रेश ढ इति प्रतीकमुपादाय जनि दान्युस इत्यनेनढप्रत्ययेश ढः इत्याह।नटीनीलोषधीस्त्रीस्यात्शैलू षाशोक योःस्मृगानितिमेदिनी।अन्ये प्योपिदृश्यन्ते।इत्यनादयोनुवर्तते।कुसेः।कुस श्लेषणे।कुसुम्भं हेमनिमहारजनेनाकमण्डलौ इति मेदिनी।कुसुमं स्त्रीरजोनेत्ररोग योः फलपुष्पयोरितिच।कुसीदस्त्रीवनेवृद्ध्यां क्लीवन्त्रिषुकुसीदके इति च।इह सूत्रेतत्तीपोह्रस्वादिदीर्घादिश्चतन्त्रेणोपात्तः।वृषाकप्यग्नी इति सूत्रेह्रस्व एवेति वृत्तौ हरदत्तादिग्र

वार

मः
३७२

इदृगाण्डेच

पारलौकिककुसीदमसीदृदिति श्रीहर्षः।उक्तश्च गाण्ड्यजगादिसूत्रे ह्रस्वदीर्घयोस्तन्त्रेण निर्देशो वामनेनेतिदिक्।उज्वलदत्तमतेनाह।नृञोतुक्चेति।दृश्यापाघान्तुसानसिध र्मसीनिपठितावाधृञोनुक्च धर्मासिर्लोकपालइतिव्याख्यातम्।युक्तश्चैतत्।धर्मसिंभूरिधायसमित्यादिदर्शनात्। तण्डुलइति।उलच्प्रत्ययः नुमागमः।त्रेधातण्डुलान्विभजेन्।।चित्स्वरःतण्डुलस्यों धान्यादिनिकरे पुमानितिमेदिनी।अङ्कुश इति अयमपि चित्स्वरेणान्तोदात्तः। तथाच मन्त्रः।दीर्घह्यङ्कुशं यथेति।चषेरालइति।प्रत्ययस्वरेणाद्युदात्तः उज्ज्वलदत्तादयस्तु आलजिदितिचितमाहुः।मन्त्रश्च चषालं ये अश्वयूपाय तक्षति।चषालवनः स्वरवः पृथिव्याम् इत्यादौ चित्स्वरादर्शनात्।अमरोक्तिमाह चषालइति।इल्वलइति।इलस्वप्नप्रेरणयोः वलच् गुणाभावः।इल्वला तारका भेदे ना भेदे दैत्यमत्स्ययोरितिमेदिनी।इल्वलाः तच्छिरोदेशे तारकाभिवसन्ति याइत्यमरः।तत्रेल्वका इति पाठान्तरम्।नत्वइवि प्रीणने।स्मात् उक्कन् शिल्पिसञ्ज्ञयोरिति।कुर्निलोपश्च पिबते बलचांनुगागमः।ह्रस्वलञ्च।पिबन्त्यस्मिन्पल्वलम्।वेशन्तः पल्वलञ्चाल्पसरइत्यमरः।इकारइति।रपरत्वाभावो रवोप्यप्रत्ययश्चेतिवोध्यम्।धिष्ण्यं स्थाने गृहे भेऽग्नाविनामरः धिष्ण्यं स्थानाग्निसग्नेसु ऋक्षे शक्तौ चेतिमेदिनी।धिष्ण्यं स्थाने गृहे भे ऋक्षे च।धिष्ण्योऽग्नौ धिष्ण्यमालयेइतिधरणिः।शलीति।शल्येतुनस्त्रियाम्।द्वौ क्लीवन्त्वेडे पुतो मरो मदनद्रुमविधौ नैतिमेदिनी।मूशकि।मूङ् बन्धने।शङ्कुशकौ।अविशब्दे।मूलम्।शिफाद्ययोः।मूलं वित्तेन्तिकेइतिमेदिनी।शङ्कुः प्रियंवदइति विशेष्यनिघ्नः मरः।अस्त्रीरसविशेषे स्यादस्त्रीत्वारिकौषधावि विमेदिनी।माच्छ्रा।मापास्याच्छाबरीवुद्धोर्मीयः पीताम्बरे सुरेइतिमेदिनी।छापलात्तन पामाघेप्रतिविम्बार्कयोपितोः।पालनो क्लो च पोः कान्तिसच्छोभापङ्क्तिषु स्त्रियामितिविश्वमेदिन्यौ।वृक्षादीनां फलं सस्यमित्यमरः।सञ्ज्ञावामेनाप्रतीपेवेतिमेदिनी।जनेयेक्।जन्यं हट्टे परीवादे सङ्ग्रामे च नपुंसकम्।जन्या मातृवयस्यायां जन्यः स्याज्जनके पुमान्।त्रिषु स्याद्यजनित्रोश्च नवोढाज्ञातिभृत्ययोः।वरस्निग्धे इतिमेदिनी।अघ्न्यादयश्च।कौतेङ्कृकुङ्ग मित्युज्वलदत्तादय। एतेनाव — इत्याद्युदात्तः।ज्यक्प्रत्ययान्तोदात्त इत्यन्ये।इति निघातेवात त्राणइति सूत्रे वृत्तिः।गुणप्रतिषेधार्थः ककारानुङ्कारस्येत्वं नेति तत्रैव हदन्तः।एवं स्थिते यगन्ताइति प्रायो वादः।अडागमइति।नञ्पूर्वो ङ्नेर्यगि निपातो बोध्यम्।अघ्न्यइति।यन्तुगघ्न्यस्य मूर्द्धनीतिमन्त्रे वेदभाष्यकारैरुक्तम्।हन्तुमश

क्योऽभ्रः पठत इति त्वकृतसूत्रमभिप्रेत्यैव ॥

रामः
३७२

२ सन्धाने

यत्तु अहननमघ्न्यत्वमर्हतीत्यर्थे छन्दसि चेति य. इति तत्रैवोक्तं तु पाश्चात्परतया बोद्धम्। माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी। अर्जुन्यघ्न्या रोहिणी स्यादित्यम
र॥ संपूर्वाद्धाञोऽङ्क्। आतो लोपः। सन्ध्या पितृप्रसूनद्योश्चिन्तामर्यादयोरपि। प्रतिज्ञायां च सन्ध्या च कुसुमान्तर इति विश्वः। संध्या पितृप्रसूनद्यन्तरयोर्युगसन्धि‾षि इति मेदि
नी। सन्ध्या कुमारिकानार्योरोषधीराशिभेदयोरिति विश्वमेदिन्यौ। वन्ध्येति। वन्ध बन्धने। वन्ध्यस्त्वफलवृक्षादौ स्त्रियां स्यादप्रजस्त्रियामिति ‾ मेदिनी। स्नामदि। जवौ तुर
ङ्गमे पुंसि कुरस्तिते वाच्यलिङ्गकः इति मेदिनी। पर्वं क्लीबं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे। दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपि इति च। अङ्गुलिरिति। अङ्गतश्च आरोहतन्दशातश
करीमर्भमेसादिमन्त्र्यास्मायांस्वश्रम्। शर्करीच्छन्दसो भेदे नदीमेखलयोरपीति मेदिनी। सर्वधातुभ्य इन्। यतिरिति। यती प्रयत्ने। यतिः स्त्री पाठविच्छेदे विकारपतिनोः
पुमानिति मेदिनी। कोटिः स्त्री धनुषोऽग्रेऽश्री संख्याभेदप्रकर्षयोः। बोधिः पुंसि समाधेश्च भेदे पिप्पलपादपे। नन्दिरिति ‾ ङ्ग आनन्दे स्त्री नन्दिकेश्वरे पुमान्। कलिः
स्त्री कलिकायां ना शूराजिकलहे युगे इति च। इह इन्निसेवसम्भ्रम् अधिकन्तु प्रक्षिप्तं व्यर्थञ्च। एवं सर्वधातुभ्य इन्नित्यादावपि। अत एव दशपाद्यां इन्निसेव पठितमिति दिक्।
हृपिषि। हरतेः कीलेयने श्वा च। इरिति प्राप्ते इतरेषान्तु इगुपधादिति किले प्राप्ते वचनम्। हरिस्त्विन्द्रार्कवाताश्वशुकभेकयमाहिषु। कपौ सिंहे हरेऽजेऽंशौ शक्रे लोकान्तरे पुमान्। वाच्यवल्लि
ङ्ग हरितो रिति मेदिनी। वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः। गात्रानुलेपनी दीपदशा दीपेषु योषिति। वेदिः स्यात्पण्डिते पुमान्। स्त्रियामङ्गुलिमुद्रायां स्यात्परिष्कृतभूतले इति च।
कीर्तिः प्रसादयशसोर्विकारे कर्दमेऽपि चेति विश्वः। सारसवनाविहितानवका विलसन्ति च, तिनोकडुः। सरसीवकी। त्रिशेषगतवर्तिभूविविक्रमादित्य इति कविप्रयोगः। इगुपधा
त्कितात् इनः कित्त्वं विधीयते। केचित्तु किरिति पठित्वा इनोऽपवादः किप्रत्यय इत्याहुः। तन्न। प्रत्ययस्वरेण प्रातिपदि ‾ कानामन्तोदात्ततापत्तेः। न चेष्टापत्तिः। अग्निः पूर्वेभिरृषिभिः
कर्षि विप्रः कार्येन। प्रविर्विप्रः शुचिः कविः। इत्यादौ ऋषि शुचि प्रभृतीनामाद्युदात्तत्वदर्शनात्। कथं तर्हि अक्षैर्मा दीव्यः कृषिमित्कृषस्वेत्यादौ कृषिशब्दस्यान्तोदात्ततेति चेत्।
इकृष्यादिभ्य इति क्प्रत्यये सति निग्रहात्। ऋषी गतौ। ऋषिर्वेदे वशिष्ठादौ दीधितौ च पुमानयम्। शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि इति मेदिनी ।।

मू०। यत्तु माधवेन अग्निः पूर्व्वेभिरित्यृग्व्याख्यावसरे ऋषिशब्दस्येत्वस्य यान्तत्वमङ्गीकृत्य ऋष्यन्धकेति निपातनाल्लघूपधगुणाभाव इत्युक्तं तत्स्वकृतसूत्रविस्मरणमूलकत्वादुपेक्ष्यमेव। भृसिञ्भ्यां यथा वसवो जुषन्तेति मन्त्रे भूमिं भ्रमणशीलन्दरिद्रञ्जनमिति वेदभाष्यम्। क्रमितमि। क्रमु पादविक्षेपे। क्रमिर्ना क्रिमिवत् कीटे लाक्षायाङ्मिले खरे इति विश्वमेदिन्यौ। पारतं पारदं वासो वासरः। क्रिमिवत्कृमिः इति द्विरूपकोशः। तिमिरिति। तमु काङ्क्षायाम्। अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिङ्गिलः। तिमिङ्गिलगिलोप्यस्ति तद्गिलोप्यस्ति लक्ष्मणेति बालरामायणे सप्तमाङ्के रामवाक्यम्। शितिः कृष्णे सिते भूर्जे इति विश्वः। शितिर्भूर्जे ना रसितासितयोस्त्रिष्विति मेदिनी। मनेः। मुनिः पुंसि वसिष्ठादौ वङ्गसेनतरौ जिने इति मेदिनी। वर्णेः विलिर्दैत्यप्रभेदे च करे चामरदण्डयोः। उपदारे पुमान् स्त्री तु जरयाश्लथचर्मणि गृहदाहप्रभेदे च जठरावयवेपि चेति मेदिनी। वसिवपि। एभ्यो इष्य इः स्यात्। वासिरिति दन्त्यसः। सूत्रे अष्टमस्तु तालव्यशः। इयमपि च्छेदनसाधने प्रयुज्यते। वास्यादीनामिवकरणानाङ्कृत्स्वापार्थत्वनियमादिति वैशेषिकाः। वाश्यर्थमिस्यन्नस्कोपि तिसलोपः प्राप्नोतीति भाष्यम्। वाशीमन्तस्त इष्मिमन्तो मनीषिणः इति मन्त्रः। राजिः स्त्री पङ्क्तिरेखयोरिति मेदिनी। इहचादीति ण्यन्तो निर्दिष्टः। बाहुलकाद् ण्यन्तादपि। तथा च भूवादिसूत्रे वदन्ति। विवादयो वा चलाका इति न्यासकारादयः। वारिर्वीगजबन्धन्योः स्त्रीक्लीबेस्तु निबालके। वारी स्याजद्रुजबन्धन्याङ्कलश्यामपि योषितीति च। वारिः स्यूतास स्वस्त्यां वारि ह्रीबेरनीरयोः। वारी घटीभवन्धन्योरिति विश्वः। दारिः पथिकसन्तानघूतादिभङ्गयोः स्त्रियामिति मेदिनी। खटतेः खाटिः। खाटिस्त्वसद्रूहेपि स्यात् किणे शवरथे स्त्रियामिति मेदिनी। नहो भश्च। स्त्रियामिति लिङ्गानुशासने। स्त्रियामित्यधिकारे नाभिः क्षत्रिय इति सूत्रितत्वादिति भावः। केचिदिति। तथा च मेदिनी। नाभिर्मुख्यनृपे चक्रमध्य क्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात् स्त्रियाङ्कस्तूरिकामदे इति। भारविस्त्वप्रायुङ्क्त। समुघसत्पङ्कजकोशकोमलैरुपाहृतश्रीन्युपनीविनाभिभिरिति। अशः। शारिर्नाऽक्षोपकरणे स्त्रियां शकुनिकान्तरे युद्धार्थगजपर्याणे व्यवहारान्तरेपि चेति मेदिनी। कपिलकादित्वाल्लत्वम्। शालिस्तु कलमादौ च गन्धमार्जारके पुमानिति मेदिनी। कृञः। कारिः स्त्रियां क्रियायां स्याद्वाच्यलिङ्गस्तु शिल्पिनीति मेदिनी ॥

सचोदात्त इति। इञो मण्डूकप्लुतौ सचोदात्त इति ज्ञापकस्यानाश्रयणादित्यन्वयः। वकाराद्यनेकेति। वसिवपीति सूत्रे इति शेषः। धातूनामनेकार्थत्वादर्थभेदार्थं पाठद्वयमपि न युक्तम्। या
ज्ञानिघसिभ्यामिणः। प्रत्ययान्तरकरणं स्वरार्थम्। यच्च घासिञ्ज घासः। ओजिजम्भ मुः सुकृतेन तमर्ण। इत्यादौ घस्याजिपाणिप्रतिभृतीनामन्तोदात्तत्वात्। जनिरिति स्त्रीलिङ्गम्।
कृदिकारादिति ङीषि। जनी सीमन्तिनीवध्वोरुत्पत्तावोषधीभिदीति मेदिनी। आजिः समक्ष्मो युद्ध इति विश्वः। शराः रिरातिसाटि इत्यमरः। पादे च। पादेऽपि पदेऽज्यति
भ्यामिणः। पादस्य पद् आज्यातिगोपहतेषु इति पदादेशः। अत एव निर्देशाट्टाहुलकाद् ह्रस्वे वीभावेन पदातिः पत्तिः पदगः पादातिकः पदाजपः। पदाश्च पदिकश्चेत्यमरः। अशि। राशि
मेषादिपुञ्जयोरिति मेदिनी। ओ पुंसि अंशुप्रहीकू पउद्यास्तु पुंसि वेत्यमरः। नौ। स्त्री कटीवस्त्रबन्धेपि नीवीपरिपणेपि चेत्यमरः। परिपणं मूलधनम्। समाने। इणस्यादिति। य
तूज्ज्वलदत्तेनोक्तम्। इत्यस्यात्सचोदात्त इति। न च इणः सन्निधानात्। इञो विच्छिन्नत्वात्। यदपि तेनैव ञ्नोऽन्य इति। पूर्वसूत्रे उक्तं इञेवानुवर्तते न त्विणः। उत्तरत्रोदात्तवचनात्। ज्ञा
पकादित्ति तदपि न। सचोदात्त इति हि नायं प्रत्ययनिर्देशः न च इञ्: किं तु समानशब्दस्य स्थाने विधेयं निर्देष्टुं शब्दस्वरूपपरः। तथा च कथं ज्ञापकता। यदपि सइञिति व्याख्याय
समानस्य सभाव इति प्रक्रियास्मरणमात्रं तन्न। तदपि न। विधायकाभावात्। यदपि स्वरमञ्जर्यां काराादिभिः समानस्य छन्दसीति सूत्रेण युक्तं तदपि न। लोके सखिशब्दस्यासा
धुतापत्तेः। अपि च। सखायः सखायमब्रवीत्। सखा सखायमजयत्। सखायस्त्वा वृणीमहे। सा सखा सखिभ्य ईड्यः। इत्यादिमन्त्रेषु सर्वत्र सखिशब्द आद्युदात्त एवेति निर्विवादम्। एवं च इञ्
उदात्त इति व्याख्यानं वेदवार्त्तानभिज्ञत्वप्रयुक्तमेव। तथा च ज्ञापकोपन्यासोपि गर्भस्राव एवगतः। अपि चात्र सख्य इणि ... सख्युस्तावद्भिः सचेत्यादिना शब्दतोऽर्थतश्च गौ
रवप्रसङ्गात्। अपि च। इणित्यपि मास्तु। नौव्यय इत्यादि त्रिसूत्री जनिघसिभ्यामित्यतः प्रागेव पठ्यताम्। एवं हि महदेव लाघवम्। सचोदात्त इति मण्डूकप्लुतौ ज्ञापकस्यानाश्रयणा
त्। न च वातेर्डिच्चेति डित्वेऽजीवनार्थकमित्यपपाठ इति चेत्। तर्हि णप्रकरणानन्तरमेव इञ्प्रकरणं सर्वं पठ्यताम्। नौव्याइति सूत्रे इञ्प्रत्ययस्ताम्। आङि श्रीत्यस्यानन्तरं वसिवपीत्यादि
पठ्यताम्। इष्टाऽनुवर्त्तिष्यते न तु डित्वम्। वकाराद्यनेकधातुपाठवैयर्थ्यापत्तेरिति दिक्। ॥ ७ दिवाश्यो: समानार्थकत्वाच्चेति भावः ॥

म.प
२७

३७५

कृष्णोरिवेति। केचित्त्वनयोरितृन्नतेइच्छातोरित्यनेन चाल्पस्पष्टः। प्रकृतसूत्रेणेति प्रक्रियास्मरणपरतयाहरदत्तग्रन्थं योजयन्ति। तत्तदक्षरस्वरस विरुद्धम्। गिरिजकं शिलाजतु। सिंहिकासु।
तस्मादस्य दुक्तैव व्याख्या सुधीभिरादर्तव्या। दृशपादीरत्तिग्रन्थाः ख्याधातोर्माधवग्रन्थः। यस्तेसखिभ्य आ च रम्। इत्यादीन् मन्त्रान् व्याचख्युः।। नांवेद्भाष्यकृताम नेकप्रब
इकस्थितायन्याम्प्रेहात्तुकूलादित्यवधेयम्। अग्निकोणः। रअमरोक्तिमाहंस्त्रियइति। एवञ्चसुप्रातःसुश्वेतिसूत्रे चतुश्चेति तालव्यपाठ एव। केषाञ्चिद्दन्त्यपाठस्तु एतन्
सूत्रानालोचनमूलक इत्यवधेयम्। नचैनावत्ताचतुरस्रमिति दन्त्यप्रयोगोऽस्तु इति अमितव्यम्। अकारान्तेन दन्त्यगर्भेणास्रशब्देन विग्रहे तल्लोपत्वात्। नचनादशाशब्देऽपि वि
प्रतिपन्नत्वम्। अस्लः कोणे कचे पुंसि क्लीबमस्रुणि शोणिते इति मेदिनीकोशात्। अहिर्वृत्रासुरे सर्पे इति मेदिनी। अचदः। कुङ् शब्दे। कविर्वाल्मीकिशुक्रयोः। सूरौ काव्यकरेऽसि
स्यात्खलीनेतुयोपितीतिमेदिनी। खनिकपि। खनिः स्त्रियामाकरःस्यादित्यमरः। ण्यन्तादचइति प्रत्ययेखानिरपि। खनिरेवमन्ताखानारितिद्विरूपकोशः। ग्रन्थिस्तु ग्रन्थिर
वर्णेन्यरुकुभे — दपर्वणोरितिमेदिनी। वृत्ते च्छन्दसि। बाहुलकात्लोकेपि। वर्त्तिर्भेषजनिर्माणेनयनाञ्जनलेखयोः। गात्रानुलेपनीदीपशाद्दशादीपेषु योषितीतिमे
दिनी। कृग। यस्तुनपदान्तेति सूत्रे न्यासकारहरदत्ताभ्यां कृषियोगियोरित्यत्रकृग्रोरिवेत्युपन्यस्तम्। तत्क्वचित्पाठदिवलिखुअन्वेषणीयम्। कुर्वोः गुर्वोः कृग्रोरवेतिवा
पाठः शोधनीयः। वसहः सूकरोघृष्टिः कोलः पोत्रीकिरिःकिटिरित्यमरः। इगुपधज्ञाप्रीतिकप्रत्ययेकिरोपि। लविलञ्चः किरोपि स्यात्किरौ प्रोक्तः पथः पथिइति द्विरूप
कोशः। गिरिर्नोनेत्रकृज्मिदि। अद्रौ। गिरिजके योषि द्वी गौर्पूर्ज्येपुनस्त्रियामितिमेदिनी। कुटिरितिङीषितुकुटीकुटः। कोटे पुमानस्त्रीघटेस्त्रीपुंसयोर्गृहे। कुटीस्यात्कुम्भदास्यांञ्चसु
रायाञ्चगुच्छके इति मेदिनी। कपिर्नासिहूके शाखामृगेचमधुसूदने इति च। सर्वधातुभ्यः। कर्मव्याप्ये क्रियायाञ्च पुंनपुंसकयोर्मतमिति रुद्रः। वर्मकुलोवफलाके इतिमे
दिनी। बृंहेः। ब्रह्मतत्त्वतपोवेदेन द्वयोः पुंसि वेधसि। ऋत्विग्योगभिदोर्विप्रे इति मेदिनी। अभ्मति। भाषायाम्दीप्यते। छन्दसीतितु शक्तिनैवान्वेति। हृभृ। धारिमेति। शृहिंसाया
म्। एतच्चोज्वलदत्तरीत्योक्तम्। दशपादीव्याख्यानुसृणातिने रूप ते। तत्स्थानेसः प्रत्ययश्च द्विदीर्घादिनिश्चस्ते। सूत्राई मन्त्रितिं छन्दो ग्रहणञ्चानुवर्तितम्।। ५ लोहवाणइति सिद्धम्।

प.भः
२७१

टी०।विष्टपम्।जगत् ॥ मू०॥ शुक्रज्यैतत्।पिष्टतान्नोभरीमभिः वातस्य सर्गो अभवत्सरीमणि।स्तीर्णं बर्हिः सुष्टरीमा जुषाणा॥ यस्यामतिर्भा अदिद्युतत्सत्तीमनि हिरण्यपाणिः। इ
त्यादिमन्त्राणान्तद्रष्टृस्य चानुगुणत्वादुक्तप्रयोगाणांभाषायामदर्शनेनच्छन्दोनुवृत्तेर्न्याय्यत्वाच्च।अतएवैवंसर्वत्रग्रहणङ्करिष्यति।नासन्नीमन्।सद्मेति।मनिन्नन्ता इति शे
षः।नामेति।म्ना अभ्यासे मलोपः।सीमेति।सीमसीमे स्त्रियामुभे इत्यमरः।पाम्नाति।पिबतेः पुगागमः बाहुलकादन्यतोपि।यक्ष पूजायाम्।क्षयः शोषश्च यक्ष्मा चेत्यमरः।षूप्रेरणे।सो
मा चन्द्रः।डुधाञ्।धाम देहे गृहे रश्मौ स्थाने जन्म प्रभावयोरिति मेदिनी।सुशर्मेति।कृदुत्तरपदस्वरेणान्तोदात्तं पदम्।मनिन्नित्युभयोदात्तं स्यात्।सुष्टुम्नुपातीद्।लिङि ग्रहः।स्वनिदुः
सयति दुरद्वेषत्वात्साम।साम क्लीबमुपायस्य भेदे वेदान्तरेपि चेति मेदिनी।आत्मा पुंसि स्वभावेपि प्रयत्नमनसोरपि।धृतावपि मनीषायां शरीरब्रह्मणोरपि इति च।हनिषङ्क्षि
काभ्यस्य शालीस्यादिति हारावली।कबरः पाठकः।बवयोरैक्यात्कबरी केशविन्यासः।जातपदेति ङीष्।अन्यत्र कबरा।गौरउडचा।इदं सूत्रङ्केचिन्न पठन्ति।अतएव गरुताड्य
न इति विग्रहः।डप्रत्यये पृषोदरादित्वाल्लोपे गरुडशब्दं स्तुत्यादयन्ति।इन्देः कमिः।उज्ज्वलदत्तस्तु कमिन्निति नित्तं पपाठ तन्न।इदन्त्यस्यात्र मिन्द्र पानम्।इदन्ते सोमं मधु इ
सादेनित्स्वराभावात्।दशपाद्यान्तु इणोदमगिति सूत्रितम्।इदमिति।सर्वनामशब्दोयं प्रत्यक्षपरामर्शी।कायतेर्डिमिः।प्रयोजनाभावादेव मकारस्येत्संज्ञाविरहे सिद्धे इकार
उच्चारणार्थः।दशपाद्यान्तु डिमित्येव सूत्रितम्।किमिति सर्वनाम । ।दशपाद्यान्तु ड्मिरित्येव सूत्रम्।अत एवाधिदं प्रक्षिप्तमित्याहुः।असु क्षेपणे।अस्त्रं प्रहरणे चापे क
रवाले नपुंसकमिति मेदिनी।पत्त्रा।पत्त्रन्तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोरिति मेदिनी।पिबतेः पात्रम्।पित्त्वान्ङीप्। पात्र्यमत्रे त्रिषु क्लीबं स्रुवादौ राजमन्त्रिणि।तीरद्वयान्तरे
योग्ये इति मेदिनी।अस्त्रि।क्लीबे वरीणं आष्टोना इत्यमरः।वैष्टुं विष्टपम्।उष्ट्रः क्रमेलकः।उष्ट्रक्रमेलकमयमहाङ्गा इत्यमरः।सिविमुच्योः ष्ट्रन्।त्रेमूत्रिभ्याञ्चुणादिष्वन्ताभ्यामेर चाशिद्धे
स्तरार्थमिदं सूत्रम्।न च घञन्तत्तिद्धिः।अचा घञो बाधात्।सूत्रन्तु सूचनाग्रन्थे इति सूत्रं तन्तुव्यवस्थयोरिति विश्वः।अशिवि।आन्ध्रमिति।अनुनासिकस्य क्विझलोरिति दीर्घः।क्वि
न्नासुपर्णीगोतुम्बीसुभद्रादन्तिकासु च।मायायां सर्षपे नस्त्रनदीभेदेषु च स्त्रियाम्।तिलकालेख्ययोः क्लीबं बंधुराद्भुतयोरपि।तद्युक्तयोस्त्वन्यलिङ्गमिति मेदिनी।निम
[illegible] यो· अर्थेपञ्चमीति च।पास्त्रोमोदात्यपो· कीयाचकरिकायाञ्च योषितीति च ॥

दी॰गव्यम्।गोसङ्घः।हस्तसूत्रकम्।विवाहादौ हस्ते बध्यमानं सूत्रम् ॥ भृ॰॥ प्रत्ययस्वरेणैते न्तोदात्ताः।शुनआन्त्राणि पेचे।विन्नन्देवानाम्।मित्रं त्रयम।शास्त्रस्य शस्त्रमसि इत्यादि।पुनातीति पुत्रः।पुन्नरकात्तस्मात् त्रायते इति तु व्युत्पत्त्यन्तरम्।स्त्रीति।डित्वात् टिलोपः।वलि लोपः।टित्वात् ङीप्।स्त्री योषिदबला योषा नारी सीमन्तिनी वधूरित्यमरः।गुध्र गुङ् शब्दे।गोत्रा भूगव्ययोर्गोत्रः शैले गोत्रं कुलाख्ययोः।संभावनीयबोधे च कानने क्षेत्रवर्त्मसु इति मेदिनी।सत्रमाच्छादने यज्ञे सदादाने च कैतवे इति विश्वः।सत्रं यज्ञे सदादानाच्छादनारण्यकैतवे इति मेदिनी।हुयामा।होत्राशब्दः ऋत्विक्ष्वपि स्त्रीलिङ्ग इति होत्राभ्यः [illegible]कृ इति सूत्रे हरदत्तादयः।श्रूयते च।कारादङ्गो नाग्भिनावामिति [illegible] होत्रं हविः।यात्रा तु यातने मिस्यात् गमनोत्सवयोः स्त्रियाम्।मात्रा कर्णविभूषायां वित्ते माने परिच्छदे।अक्षरावयवे स्वल्पे क्लीबं कार्त्स्न्येऽवधारणे इति मेदिनी।कर्णशब्दग्रहो श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः इत्यमरः।भस्त्रा चर्मप्रसेविकेति च।गमेः।गात्रमङ्गे करेण्वोरुसंवेशमागजङ्घादिविभागेऽपि समीरितमिति विश्वः।चारित्रमिति।इत्रप्रत्यये चरित्रमित्युक्तम्।न च ततस्स्वप्रज्ञाद्यणा सिद्धे किमनेनेति वाच्यम्।स्वरे विशेषात्।धवित्रीं गौरादित्वाद्ङीष्। अमेः।इत्रएवानुवर्त्तते नोत्रः।आः समिण्।समयानिकषाशब्दौ समीपवाचकौ।बाहुलकात् दुषेः दोषा।दिवेर्गुणाभावश्च।दिवा।स्वदेर्धश्च।स्वधेत्यादि।[illegible]क्तम्ह्।चिक्कणमिति।सूचेः।सूक्ष्ममिति।णिलोपे कृते कुत्वादि।सूक्ष्मं स्यात्कणके ध्यात्मे पुंस्यणौ त्रिषु चाल्पके इति मेदिनी।पातेः डित्वाद्टिलोपः।उकारनकारयोस्तु [illegible] सोसुङिति सूत्रे वोचाम।यत्तूज्वलदत्तेनोक्तम्।उकार उच्चारणार्थ इति।तदाकरविरुद्धत्वादुपेक्ष्यम्।पुंसोसुङिति सूत्रे न्यासरक्षिताभ्यां पुनातेर्मक्सुन् ह्रस्वश्चेति पठितत्वात्।[illegible]डुम्सुन्नित्यन्ये।भाष्ये तु सूतेः सुप्रसवे पुमानित्युक्तम्।उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता इति तु तत्त्वम्।ऋचि भुजि।भुजिष्यस्तु स्वतन्त्रे च हस्तसूत्रकदासयोः।स्त्रियान्दासीगणिकयोरिति मेदिनी। वसेस्तिः।वस्तिर्द्वयोर्निरूहे नाभ्यधोभूमिदशासु चेति मेदिनी।अगस्तिः कुम्भयोनौ च वङ्गसेनतरौ पुमानिति च।सावसेः।असभुवि।बहुलवचनान्नभावः।वौतसेः।अङ्गुष्ठस्य कनिष्ठस्याद्वितस्तिर्द्वादशाङ्गुले इत्यमरः।स्त्रीपुंसयोर्वितस्तिः स्यादित्यमरमाला।दृणातेः।दृतिश्चर्मपुटे मत्स्ये ना इति मेदिनी।कृतृकृपि कपि[illegible]दाभ्य इति पठित्वा कंपीट इति चतुर्थमुदाहृतम्।कपोरोल इत्यत्र न्यासे तु कृपिभ्यामिति पठ्यते।अतस्त्वरतिरत्र प्रक्षिप्त इति कश्चित्।तरतेश्चेति पृथक् पठित्वा तिरीटः कूलवृक्ष इति कश्चिद्व्याख्यत् ॥

ही।सैंहिकेयोराहुः॥ मू०॥ रुचिवचि।उचिनन्तुभवेन्यस्तेमितेज्ञातेसमञ्जसेइतिमेदिनी॥कुटिकुषि॥कुड्मलोमुकूलेपुंसिनंद्वयोर्नरकान्तरेइतिमेदिनी॥कुष्मलंच्छ्
दनंविकशितमित्यन्ये।सर्वेधातुभ्योसुन्।दशपाद्य।दिघसुनइत्येवसूत्रम्।सरइति।अयंस्त्रियामपि।गौरा।बिलान्डीष्।सरसीतुमहासरइतिशब्दार्णवः।महान्तिसरांसिस
रस्यइतिभाष्यम्।पयइति।पीङ्पाने।पयःस्यात्क्षीरनीरयोरितिमेदिनी।वर्चदीप्तौ।वर्चोनपुंसकंरूपेविष्ठायामपितेजसिपुंसिचन्द्रस्यतनयेइतिमे–दिनी।णभहिंसायाम्
औवादिकः।क्रैयादिकश्च।तपसन्तापे।षहमर्षणे।महपूजायाम्।तमुग्लानौ।रञ्जरागे।एभ्यःषड्भ्यःअसुनिसान्तम्।अचूकथोरदन्तमपि।नभन्तुनभसासार्द्धन्तपन्तुतपसास
हः।सहश्चसहसासार्द्धंमहश्चमहसासह–तमेनचतमःप्रोक्तंरजेनापिरजसासममितिद्विरूपकोशः। तपोलोकान्तरेपिच।चान्द्रायणादौधर्मेचपुमान्शिशिरमाघयोः।स
होबलेज्योतिषिचपुंसिहेमन्तमार्गयोरितिमेदिनी॥महउत्सवतेजसोरितिच।तमःक्लीबङ्गुणेशोकेसैंहिकेयान्धकारयोरितिरभसः।तमोध्वान्तेगुणेशोकेक्लीबंवानावि
धुन्तुदेइतिमेदिनी॥नभोरजसीतुव्याख्यास्येते।रुदिर।रोदश्चरोदसीचापिदिविभूमौपृथक्सहप्रयोगेप्यनयोरोदस्यावपिरोदसी।इतिविश्वः।वीगत्यादिषु।वयःपक्षिणि
बाल्यादौयौवनेचनपुंसुकमितिमेदिनी।अनप्राणने।अनोभक्तन्तत्कानञ्च।अनोभ्यासःसरसोजातिसञ्ज्ञयोरितिठच्।पाकस्थानंमहानसमित्यमरः।रेपोवद्यमिति।अरेपसात
च्चेतिमन्त्रेनिरवद्ययेतिभाष्यम्।उब्जार्जवे।ओजोदीप्तौ।अवष्टम्भेप्रकाशबलयोरपीतिमेदिनी।श्रयतेः।उत्तमाङ्गंशिरःशीर्षमित्यमरः।शृणातेर्वाअर्थेकप्रत्ययेअदन्तोपिवीचीशिरोदन्तोरजोवा
योऽजन्तेलिकेशान्तस्म्।पिण्डन्दद्याद्गयाशिरेइतिवायवीये।कुण्डलोद्धृष्टगण्डोमाङ्कुमाराणान्तरस्विनाम्।निचकर्त्तशिरान्द्रोणिर्नालेभ्यइवपङ्कजानितिमहाभारतम्।अर्त्तेः।उरो।वत्स
ञ्चवक्षश्चेत्यमरः।रिचेः।इहदशपाद्यादौवृत्तौतुतुड्नानुवर्त्तितःरिकः।रेकसीइत्युदाहृतञ्च।तन्न।उत्तरसूत्रेनुडनुवृत्तेर्निर्विवादत्वात्।गण्डकत्तुतौमानाभावात्।लस्याविसंवादाच्च।उज्वलद
त्तेनतुरिचेर्धैनेचिक्लिद्देतिपठित्वानुठम्।चानुवस्येकित्वाद्गुणाभावनुठश्चुल्लेनञ्कारेरिञ्चमितिसाधितम्।तदपिन।उक्तोदाहरणस्यलोकवेदयोरप्रसिद्धत्वात्।निरित्यंकारेकृणेअमर्त्यःपरि
पर्य्यहत्यणास्परेक्णः।रेक्णःस्वत्वस्मिपातामममेतिइत्यादिमन्त्रेषुरेक्णइतिशब्दस्यप्रसिद्धत्वात्।वैदिकनिघण्टौचवसुवर्णपर्यायेषुतथापाठात्।वेदभाष्यादिषुप्रकृतसूत्रेणतस्यसाधित
त्वाच्चेतिदिक्।चायतेः।क्नोदधिधप्यसासुतेदधिषलश्चतःइत्यादिमन्त्रेषुचनःशब्दःप्रसिद्धःएतेनचणोऽन्नमित्युदाहृत्यबाहुलकाणत्वमितिवदन्तोदशपादीवृत्तिकारास्तदनुगाःप्र

स॰श॰ पतद्गृहे। भाष्याणपि कदाचीत्यास्ये। मा भूदिति। अकाररेफादिभ्यश्चेद्भिरभ्यो रेवेति नियमेनेत्यर्थः। द्विवद्भावीति। अत्रारुष्विधीजत्तनु अमोरुद्दतिप्रयोगवारणाय सूत्रस्थानरूपकाले
३७७ वर्णो रूपमिति। प्रन्तर्हि ममदे वा अभिवर्षपर्षे सा भूरित्यादिमन्त्रेषु प्रसिद्धमिदम्। शेपः स्याद्गणं पेलमिति सुभूतिचन्द्रः। अकारान्तोप्ययमिति शेपपुच्छलाङ्गूलेषु शुनद्रत्यना
बोचाम। शेपः। शेपो च शेफश्च शेपं प्रोक्तः शेफसेति द्विरूपकोशः। स्तुरीभ्यां स्रोतोम्बु वेगेन्द्रिययोरिति विश्वः। रेतः शुक्रे पारदे चेति मेदिनी। पातेः जुट्। चवर्गतृतीयादिः। उज्ज्वलद
त्तस्तु जुट् चेत्यन्तस्यादि पपाठ। तन्न। पिपाजसा पृथुना। पृथुपाजा अमर्त्यः इत्यादिमन्त्रतद्भाष्यविरोधात्। अदेः। मिष्टान्नस्त्री भक्तमन्धोन्नमित्यमरः। द्विजातिशेषेण यदेतदन्ध
सेति भारविः। समन्धसा ममदः पृष्ठ्ये नेति श्रुतिः। स्कन्देश्च। असुन् धश्चान्तादेशः। आपः कर्माख्यायाम्। असुनाह्रस्वश्च धातोः प्रत्ययस्य नुडागमस्तु वा। अप्नस्वतीमश्विना। अपांसि
सिषक्तिन्नधिसंन्दधुः। बाहुलकादित्युपलक्षणम्। ह्रस्वत्वं टो वा स्त इति व्याख्यानादित्यपि बोध्यम्। तथा चतुर्थे कतमे पिनपुंसकमापः इति कोशमुदाहृत्य सर्वसापेंमयज्ञगादिति
प्रयोगो दुर्घटवृत्तौ समर्थितः। रूपे। आप्नोतेरसुन्। ह्रस्वत्वम्च धातोः प्रत्ययस्य जुट् चेत्यर्थः। अन्न इति। मूलाज्जशः स्नसि। नहेः। दिवि गगने। नभो व्योम्नि नभो मेघे घ्राणे वर्णे च पतद्ग्रहे।
घ्राणे मृणालसूत्रे च वर्षासु च नभः स्मृतमिति विश्वः। नभः क्लीबं व्योम्नि पुमान्। घने घ्राणश्रावणवर्षासु विसतन्तौ पतद्ग्रहे इति मेदिनी। नभन्तु नभसा सार्द्धमिति द्विरूपकोशः।
इकारान्तोपि। विश्वोक्तिमाह। आग इति। अमेः। अमन्ति गच्छन्त्यधोनेनेत्यंहः दुरितम्। रंहो वेगः। अहिरहिभ्यामसुना सिद्धे। घिरघिभ्यामसुनि अङ्घोरङ्घः इति मा भूदिति सूत्र
द्वयमिति गोवर्द्धनः। तथा चस्यान्नजोप्यचतुर्थलमंहसो रंहस स्तथेति द्विरूपकोशः। एवञ्च दन्त्यान्ताः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमङ्घो विघातमिति। रङ्घः सङ्घः सुराणा
ञ्जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीति प्रसन्नोन्वहमहिमरुचेः सोवतात्स्यन्दनो व इति घकारपाठोनुप्रासरसिकानां प्रामादिक इति वदन्ति। देशे हवा। रहस्तले रते गुह्य इति मे
दिनी। अञ्चति। अङ्कः। अङ्कसी। अङ्कांसि। अङ्कः। अङ्कसी। अङ्कांसि। योगः। योगसी। योगांसि। उच समवाये। अस्मादसुनि बाहुलकात्कवत्वं न्यङ्क्वादित्वाद्वा। ओकः आश्रयमात्रेपि मन्दि
रेपि नपुंसकमिति मेदिनी। भूरञ्जिभ्याम्। भुवः अन्तरिक्षम्। षष्ठ्यन्तप्रतिरूपकमव्ययमिदम्। रजो रेणुः। रजः क्लीबं गुणान्तरे। आर्तवे च परागे च रेणुमात्रेपि दृश्यत इति मेदिनी। श॰
धनर्थेकप्रत्यये तु अकारान्तोप्ययम्। रजोयं रजसा सार्द्धं स्त्रीपुष्पगुणधूलिषु स्याज्जयकोशः। विरजां नदीम्। विरजान्दीक्षामिति। चन्देः। छन्देः। छन्दः पद्यप्रभेदेपि स्वैराचाराभिलाषयोरिति ३७७
मेदिनी॥ ५ ननियमार्थत्वे मानमिति। एवञ्चाहोरङ्घ इत्यपि साध्येवेति। इति चतुर्थः पादः॥

मू०॥ अकारान्तोपि। छन्दावभिप्रायवशावित्यमरद्विरूपकोशौ। पचिवचिभ्याम्। पक्षः। पक्षसी। पक्षांसि। अनीकाधिकरणे पूर्वोत्तरे द्वे पक्षसी इति शबरस्वाम्यादयः। माधवस्तु पक्षपरिग्रहे इत्यस्मादसुन्। पक्षः कद्दिः। संवत्सराईजेलाह। वहिहा। अत्र पूर्वसूत्रात्सुटमनुवर्त्तयतोज्ज्वलदत्तादीनां मते नोदाहरणमाह। वक्षा इत्यादि। प्राञ्च इति। सकलवृत्तिकृतः प्रसादकापदपत्रेत्यर्थः। एतस्मात्सुक्तम्। उक्तोदाहरणानि हन्त बह्लोके दृश्यन्ते। नत्वा संभवन्ति। छन्दसीति सूत्रात्। वेदे तु विपरीतमेवास्तीत्याह। वस्तुतस्त्विति। वेदभाष्यकाराश्चेह सासिजरूत्सवधेयम्। मिथुनेसिः। सुपयाः सुस्रोताः। इत्याद्युदाहरणम्। विधाञः। वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनि इति मेदिनी। नोधा इति। सद्योभवद्दीर्घायनोधा इति मन्त्रे नोधाऋषिर्भवतीति निरुक्तम्। नवन्दधातीति तु नैरुक्तं व्युत्पत्त्यन्तरं बोध्यम्। अत्र स्वरसूत्रम्। गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वञ्चेति। कृदुत्तरपदप्रकृतिस्वरापवादोयम्। चन्द्रो। चन्द्रं रजतमम्रतञ्च। तदिव भीयते चन्द्रमा इति वा भीयते इति दासीभारादित्वात्साधने हरदत्तः। पुरसि च। पुरोधास्तु पुरोहितः इत्यमरः। पुरूरवाः बुधसुतः राजर्षिश्च पुरुरवा इत्यपि। विद्यात्पुरुरवः शब्दे रुकारस्यापि दीर्घतामिति द्विरूपकोशः। नृचक्षाः इति। शिद्वेत्युक्ते सार्वधातुकसञ्ज्ञा। अतः श्याजन्। उषः किन्। दशपाद्यान्तु वसः किदिति पाठः वदन्ति सूर्येण सहेत्युषा। अपो भीति सूत्रे उषसश्चेष्यते इति वार्त्तिकस्य समुषद्भिरित्युदाहरणं विवृण्वद्भिर्हरदत्तादिभिरयं पाठः पुरस्कृतः। दमेरुनसिः। सप्तार्चिर्दमुनाः शुक्र इत्यमरः। पक्षे अन्येषामपि दृश्यत इति दीर्घः। जुष्टो दमूनाः। दमूनसङ्गृहपतिं वरेण्यम्। दशपाद्यान्तु सूत्रे एव दीर्घः पठ्यते तन्मते पक्षे ह्रस्वो बाहुलकाद्बोध्यः। प्रायेणेति। स्त्रियां बहुष्वप्सरस इत्यमरः। स्त्रियां बहुष्वप्सरसः स्यादेकत्वेप्सरा अपीति शब्दार्णवः। अप्सरःस्वप्सराः प्रोक्ताः सुमनाः सुमनः सुचेति द्विरूपकोशः। एकाप्सरः प्रार्थितयोर्विवाद इति रघुः। विदिभुजिभ्यां विश्वे। घ इत्यस्य रूपपरत्वात्स्मिन्नादेशो न कृतः। उदाहरणं विश्वं वेत्ति विन्दति भुङ्क्ते इति विग्रहः। अत्रोज्ज्वलदत्तेन विश्ववेदाः अग्निः विश्वभोजाः इन्द्रः तत्पुरुषे कृतीति सप्तम्या अलुगित्युक्तम्। तन्न। स्मिन्नादेशस्य दुर्वारत्वात्। सुमृडीको भवतु विश्ववेदाः। पूषा भगः प्रभृथे विश्वभोजा इत्यादिमन्त्रेषु सुपो लुक एव दर्शनात्। इत्यन्तरेषु तथैवोदाहरणाच्च। वशेः। उशनाभार्गवः कविरित्यमरः॥ इत्युणादिषु चतुर्थः पादः॥ अद्भुतमिति। अत इत्यव्ययमाकस्मिकार्थे। तस्मिन्नुपपदे भुवः प्रत्ययः। गुह्यते परितो वेष्ट्यते प्राणिभिरिति। गोधूमो ना गरड़े स्यादोषधीव्रीहिभेदयोरिति मेदिनी। मसेः। मसी परिणामे। स्थूरो मनुष्य इति। स्थूरस्य राय्यो बृहतो य ईशे इति मन्त्रे तु योगपुरस्कारात् स्थिरस्य इत्यर्थः ॥

टी०।शिफावृक्षमूलस्।पर्शुगणेपार्श्वास्थिसमूहे।इतिपञ्चमः ॥ मू० ॥ रसमकोशस्यमाह।वातिरिति। वजलुटि।यद्यपिसानसिचर्णसीतिसूत्रेतण्डुलशब्दोनिपा
तितस्तथापिप्रत्ययस्वरेणमध्योदात्तःसः।अयन्तुचित्स्वरेणान्तोदात्तइतिविवेकः।दंसेःनः नकारस्य।दासःशूद्रेदानपात्रेभृत्यधीवरयोरपीतिविश्वः।दंशोस्याकैवर्त्तेदाशधीवरावित्यमरः।पू
ञः।पुण्यंमनोज्ञेभिहितंतथासुकृतधर्मयोरितिविश्वः।अर्त्तेः।मेढ्रोरभ्रोरणो र्णायुमेषवृष्णयएडकेइत्यमरः।डित्त्वनेः।सुखंनिःसरणेवक्त्रेप्रारम्भोपाययोरितिविश्वः।संज्ञान्तरेनाट
कादेःशब्देपिचनपुंसकमितिमेदिनी।अमेःसन्।स्कन्धोभुजशिरोंसोस्त्रीत्यमरः।अंसःस्कन्धेविभागेचेतिदन्त्यान्तेविश्वः।मुहेः।अज्ञेमूढयथाजातमूर्खवैधेयबालिशाइत्यमरः।नहेः।
नखःकररुहेशण्ठेगन्धद्रव्येनखंनखीतिविश्वः।नखोस्त्रीक्लीबयोःशुक्तौनखरेपुंनपुंसकमितिमेदिनी।शीङः।ह्रस्वविधिसामर्थ्याद्गुणोन।शिखाशाखाबर्हिचूडालाङ्गलिक्य
ग्रमात्रके।चूडामात्रेशिफायाञ्चज्वालायांप्रपदेपिचेतिमेदिनी।माङः।मयूखस्त्विट्करज्वालास्वित्यमरः।गुल्फइति।तद्ग्रन्थीघुटिकेगुल्फावित्यमरः।तयोःपादयोर्ग्रन्थीइत्यर्थः।स्व
शेः।पार्श्वङ्कक्षाधरे चक्रोपान्तोपशुगणेपिचेतिविश्वमेदिन्यौ।श्मनि।तद्वृद्धौश्मश्रुपुंमुखेइत्यमरः।पुरुषस्यमुखेतेषांरोम्णांवृद्धौश्मश्रुशब्दोवर्त्ततेइत्यर्थः ———— अश्चाद
यश्च।अशूव्याप्तौ।रुन्त्रस्ययः।नञ्पूर्वात्त्रपतेर्डुन्वा।यत्तुअश्नोतेर्डुन्रुट्चेत्युज्ज्वलदत्तेनोक्तन्तन्न।धातुलोपापत्तेः।तदभावोपिनिपात्यतइतिचेत्तर्हिडित्वोत्प्रेक्षणंनिष्फलमितिदि
क्।जनेष्टन्लोपश्चेति।अलोन्त्यस्य।जटालग्नकचेमूलेमांसीप्लक्षेपुनर्जटीतिमेदिनी।हन्तेः।चादच्अभ्यासकार्यम् । ———— अभ्यासाच्चेतिकुत्वम्।अमरोक्तिमाह।पश्चादि
ति।जघनञ्चस्त्रियाःश्रोणिपुरोभागेकटावपीतिमेदिनी।क्लिशेः।केशःस्यात्पुंसिवरुणेह्रीवेरेकुन्तलेपिचेतिमेदिनी।फलेः।पलितंशैलजेतापेकेशपाकेचकर्दमेइतिमेदिनी।पलि
तञ्जरसाशौक्ल्यङ्केशादावित्यमरः।कृञादिभ्यः।करकस्तुपुमान्पक्षिविशेषेदाडिमेपिचद्वयोर्मेघोपलेनस्त्रीकरकेचकमण्डलौ।इतिमेदिनी।कटकइति।कुनशिल्पिसञ्ज्ञयोरिति
कुन।प्ययंसिद्धः।गुणभाजइहैवोदाहार्याः।गुणनिषेधभाजस्तुकुनि।उदासीनास्तुयत्रकुत्रचिदितिभावः।नॄनये।नरकःपुंसिनिरयेदेवरातिप्रभेदयोरितिमेदिनी।उदयनाचार्यस्तु
नचनरकाण्यवनसन्तीतिक्लीबंप्रयुञ्जते।तत्रमूलंमृग्यम्।सृगतौ।सरकोऽस्त्रीशीधुपात्रेशीधु पानेसुशीधुनोरितिमेदिनी।कुरशब्दे।कोरकोऽस्त्रीकुड्मलेस्यात्कक्कोलकमृणालयोरि
तिमेदिनी।विचकारकोरकाणीतिमाघः ॥

मू०।कोरकः पुमानितिअमरस्यप्रमादः । अपवरकावरकादयोपीहैवबोद्धाः
चीकयतेरिति।बाहुलकबलाल्लओयमर्थः।एवमनुपदंवक्ष्यमाणपचिमच्योरित्यपिबोद्ध्यम्।कीचकोदैत्यभिद्वाताहतसस्वनवंशयोः।पेचकोगजलाङ्गूलमूलोपान्तेचकौशिके।मेचकस्तु म
यूरस्यचन्द्रकेश्यामलेपुमान्।तद्युक्तेवाच्यवत्क्लीबंस्रोतोऽञ्जनान्धकारयोरितिमेदिनी।जनेःजठरः कठिनेऽपिस्यादित्यमरः।जठरोनस्त्रियांकुक्षौबद्धककर्कटयोस्त्रिषितिमेदिनी।ढचि।अ
ठरःकुक्कुटेवण्ठेचेतिमेदिनी।ऊर्ज्जि।नमूर्द्दरलक्षणतायनेनेतिमन्त्रः।हर्यतेः।हर्यगतिकान्त्योः।हिरण्यरेतसिद्रव्येशातकुम्भवराटयोः।अक्षयेमानभेदेस्यादकुप्येचनपुंसकमितिमेदिनी।ज
नेः।तुइल्लविभक्तिकम्।तुप्रत्ययः।रेफश्चान्तादेशः।ऊर्णोतेः।ऊर्णामेषादिलोम्निस्यादावर्त्तेचान्तराभ्रुवोरित्यमरः।भ्रुवोर्मध्येयआवर्त्तस्तस्मिन्नित्यर्थः।अन्तरान्तरेणेतिद्वितीया।दधातेः।धा
न्यंव्रीहिषुधान्याकेइतिमेदिनी।तनोतेः।चालनीतितउःपुमानित्यमरः।चालनन्तितउस्तुक्तमितिकोशान्तरम्।तितउपरिपवनंभवतीतिपस्पशायांभाष्यम्।स्याद्वास्तुहिङ्गुलितउइतिपुंनपुं
सकवर्गेत्रिकाण्डशेषः।अर्भकः।अर्भकःकथितोबालेमूर्खेपिचकृशेपिच।पृथुकःपुंसिचिपिटेशिशौस्यादभिधेयवत्।पाकःपरिणतौशिशौ।केशस्यजरसाशौक्ल्येस्थाल्यादौपचनेपिचेतिमेदि
नी।अवद्य।निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः।कुपूयकुत्सितावद्यखेटगर्ह्याणकाःसमाःइतिसर्वत्रामरः।अधमःस्यात्गर्ह्यऊनेपीतिमेदिनी।अर्वातुरङ्गमेपुंसिकुत्सितेवाच्य
लिङ्गकः।रेफोरवर्णेपुंसिस्यात्कुत्सितेपुनरन्यवदितिचालो रीडोः।लिप्तंविषाक्तेभुक्तेचवाच्यवत्स्याद्दिलेपिते।इतिविश्वः।क्लिशेः।कीनाशःकर्षकःक्षुद्रोपांशुघातिषुवाच्यवत्।यमे
नादितिमेदिनी।ईश्वरइति।स्त्रियांणित्त्वान्ङीप्।ईश्वरीमध्योदात्ता।वनिपीङीब्रयोस्तुआद्युदात्ता।पुंयोगलक्षणेङीषिअन्तोदात्ता।स्थेशभासेतिवरजन्तादपिईश्वरेतिविवेकः।ईश्वरोमन्मथे
शंभौनाथेस्वामिनिवाच्यवत्।ईश्वरीचेश्वरोमायामितिमेदिनी।ईश्वरःशङ्करेधीशेतस्यत्वामीश्वरीश्वरेतिबोपालितः।विन्यस्तमङ्गलमहौषधिरीश्वरायाइतिभारविः।दशपाद्यान्तुसूत्रान्तरम
पि।हन्तेरन्घश्च।रन्प्रत्ययःस्याद्घश्चादेशः।हन्यतेगम्यतेऽतिथिभिःघरःगृहम्।प्रातरिति।अतसातत्यगमने।प्रपूर्वःस्वरादिपाठादव्ययत्वम्।दहेः।नगोमहीरुहेशैलेभास्करेपवनाशनेइतिमेदिनी।
सिचेः।सिंहःकण्ठीरवेराशौसत्तमेचोत्तरस्थितः।सिंहीक्षुद्रावृहत्योःस्याद्वासकेराहुमातरीतिविश्वः।हिंसेर्वर्णव्यत्ययतःसिंहइतिव्युत्पत्त्यन्तरम्।व्याङि।व्याघ्रःस्यात्पुंसिशार्दूलेरक्तैरण्डकरञ्ज
योःश्रेष्ठेतराद्युत्तरस्थःकण्टकार्यांस्त्रियोषितीतिमेदिनी।हन्तेः।घोरंभीमेहरेघोरइतिविश्वः।ग्रहेः।ग्रहणीरुक्प्रवाहिकेत्यमरः।प्रथेः।प्रथमस्तुभवेदादौप्रधानेपिचवाच्यवदितिमेदिनी।प्रथमचरम
निसर्वनामतात्स्येजसःशीप्रथमाः।चरेश्चाचरमे।चरमाः।प्रथिचरिभ्यामितिसुवचम्।मङ्गेरलच्उरववरवेलादिदण्डकेमगिःपठ्यते।मङ्गलासितदूर्वायामुमायांपुंसिभूमिजे।नपुंसकन्तुकल्याणेसर्वा
प्रथमे।१

[illegible] कथादयस्त्वारो [illegible] पाठ्युणादिषु [illegible] माणा [illegible]
न्नविलयमस्त [illegible] सितुक्षवचासुचारोचनाभासथोर्दाघिद्धौकशीवका [illegible] प्रासादकानिपत्यानाम् [illegible] नामद [illegible]
पिनेक प्रघट्टकस्या किन्तु विच्छिद्येति स्पष्टमेव। तत्रापि प्रमादलेशतो दर्शयामः। भजो ण्विरिति ण्विप्रकर [illegible] सित [illegible]। वहश्चेत्युपन्यस्य परौ व्रजेः षः पदान्ते [illegible] इति ताव
न्प्राचोग्रन्थः। तद्व्याख्यानस्तोत्रेण पञ्चपाद्युणादिसूत्रे इदं पठ्यत इत्युक्तम्। तन्न। किब्‌ चीति किब्दीर्घोऽप्रकरणे परौ व्रजेरिति सूत्रस्य पाठात्। अस्मिंश्च पञ्चपादीदशपाद्योरेकवाक्यत्वात्। यदपि प्रा
चोग्रन्थे क्वचित्स्वरूपते विंशिति तदप्य पाणिनीयत्वादुपेक्ष्यम्। एतेन प्रघट्टकान्तरेष्वरुदुपरि व्रजान्दीर्घश्चेति केचिदिति प्राचोग्रन्थोऽपि प्रत्युक्तः। सूत्रारूढे सर्वसंमते चार्थे केचिदित्युक्तेरप्रामाणिकत्वात्। य
दपि धनर्लिचस्सिङ् वपिन्नविजनियजेरुस्स इति पठितन्तदप्यनाकरम्। तथाहि। जनेरुसिः। अर्ति पृ वपि यजि तनि धनि तपिभ्यो नित्। एतेर्णिच्च। चक्षेः शिच्चेति सर्वसम्मतः पाठः। वपंपितस्मै वपुश्चेव
पुष्टं इत्यादिसन्नेषां युदात्ततायाअनुकूलश्च। वेदभाष्येष्वेवमेव स्थितम्। इति द्वितीये प्रमादाः। तृतीयेऽपि स्तनि दूषि पुषि गदि मदि हृदिभ्यो णेरित्नुच् इति प्राचा पठितम्। तन्न दूषि हृदी प्राचां द
निरुताङ्घ्येकापि न पठितौ। दूषयित्नुः हृदयित्नुरिति प्रयोगोप्याकरे न दृष्टः। स्तनि हृषि पुषि मुदि गदि मदिभ्यः इति हि पञ्चपादीपाठः। घुषि गन्धि मण्डि जनि नन्दिभ्य इति दशपाद्यामधिकमित्य
न्यदेतत्। यदपि स्थुदक्षिस्पृहिगृहिदृजिभ्य आय्य इति पठित्वा दारय्यः प्राचोक्तं तदपि नादृजिग्रहणस्याकरविरुद्धत्वात्। यदपि जॄविशिभ्यां झच् गण्डि मण्डि जनि नन्दिभ्यश्चेत्युक्त्वा गण्डस्तो जनय
न्त इत्युदाहृतं प्राचा। अञ्जरण्ड यन्त इति प्रतीकमुपादाय मेघनादसितिव्याख्यायगडिवदनैकदेश इति व्याख्यातृभिर्विवृतं तत्तदेतत्सर्वं प्रामादिकम्। तथाहि उणादिवृत्तिपुस्तकेतिनिरन्तु नदम् पठित्वा गड
सेचने इति विवृतं अयामन्तेति सूत्रे वृत्तिन्यासहरदत्तादिसकलग्रन्थेष्वेवम्। माधवग्रन्थेष्वेवमेव। युक्तं चैतत्। मेघ इति व्याख्यानं प्रति — सेचनार्थस्यैवानुगुणत्वात्। जनेः पाठोऽप्यप्रामाणिकः। जि
धातुं पठित्वाजयन्तः पाकशासनिरिति सर्वैर्विवृतत्वात्। अप्रसिद्धत्वाच्च॥ इति तृतीये प्राचः प्रमादाः॥ यदपि कृगॄस्तञ्जागृभ्यः किन्। कीर्विः गीर्विः स्त
विरिति तदपि लिपिभ्रमप्रयुक्तमेव। कॄ विक्षेपे। गॄ निगरणे। स्तञ्ज आच्छादने इति प्राचोग्रन्थं विरचयता युक्तिरपि मूलाधृतैव हेया॥ जॄगृस्तृजागृभ्यः क्विन्निति पाठ उणादिवृत्तिकृतां माधवा
पृजगाय्य इति

टी०॥ भावेतुमुनिति। अत एव तुमर्थे सेसेनिति सूत्रे तुमर्थ इति चरितार्थम्। अत्र च भावोऽसत्वभूत एव। अव्ययार्थे लिङ्गाद्यभावेन प्रत्ययार्थे वैलक्षण्यानुभवात्। भाद्
मू०॥ जीविः पशुः। शीर्दिर्हिंस्रः। स्त्रीविरध्वर्युरिति च तत्त द्रून्येषूदाहृतम्। स्तृ इत्यस्य दीर्घान्तत्वे एव हि ऋत इद्धातोरितीत्वं लभ्यते न तु ह्रस्वान्तत्वेपि तस्माद्व्याकर
मेव ग्रहीतुमुचितमिति दिक्। ग्लाज्याहाल्वरिभ्यो निरित्यप्यनाकरम्। वीज्याग्रृरिभ्यो निरिति पठित्वा सूत्रद्वयानन्तरं वहिश्रातिसूत्रे ग्लाहाल्वरिभ्यो निदिति सूत्रितत्वात्। तूर्णी
रप्यः सदानव इत्यादावाद्युदात्तदर्शनाच्च। न च स्त्रियाङ्क्तिन्नित्यधिकारस्थं वार्त्तिकमेवेदं प्राचोदाहृतं न तूणादिस्थमिति वाच्यम्। एवमपि त्वरतेः पाठस्यानुचितत्वात्। नह्य
सौ वार्त्तिकेऽस्तीति दिक्। एवं संस्त्यायतेड्डिति प्राचोदाहृतमप्यनाकरम्। स्त्यायतेड्डिडित्येव सूत्रस्याकरे पञ्चपाद्यां दशपाद्यां च उपलम्भात्। संस्त्याने स्त्यायतेर्ड्रट्
स्त्रीसूते सप्रसवे पुमानिति तु भाष्ये श्लोकपाठः स एवं माधवेनोपन्यस्तः। न तु सूत्रपाठस्य तथात्वं दृश्यते। एतद्व्यन्यव्याख्यातृणामपि प्रमादा ऊह्याः। यथा पाणिन्या
दिमुनीनिति व्याचक्षाणैरुक्तम्। मनेरुच्चोपधाया इति। नह्येवंविधं सूत्रं पञ्चपाद्यादावप्यस्ति। अत इत्यनुवर्त्तमाने मनेरुच्चेति सूत्रितत्वात् इति दिक्॥ इति चतुर्थप्राचः
प्रमादाः॥ उणादयो बहुलम्। वर्त्तमाने लडित्यतो वर्त्तमानग्रहणम्। पुवः संज्ञायामित्यतः संज्ञाग्रहणञ्चानुवर्त्तते तदाह। एते इति। बहुलग्रहणस्य फलमाह।
केचिदिति। हृपेरुलजुक्तः शङ्केरप्यूह्यते शङ्कुलेति दर्शनात्। किंच फिडफिड्डौ कुत्रापि न विहितौ। अर्त्तेरूह्येते ऋफिडः ऋफिड्ड इति। संज्ञास्विति। अनादिप्र
युक्तास्वेव न तु सर्वत्रेत्याहुः। कार्याद्गुणप्रतिषेधादिकात् अनुबन्धङ्ककारादिकं विद्यात्। तेनाफिडफिड्डौ कितावूह्याविति भावः। अनूबन्धमित्यत्र उपसर्ग
स्य घञीति दीर्घः। एतदुणादिषु शास्त्रं शासितव्यम्। भूतेपि दृश्यन्ते। नन्वेवं वर्त्तमानग्रहणमेव निवर्त्यताम्। इदञ्चोत्तरञ्च सूत्रं त्यज्यतामविशेषात्काल[illegible]
प्रत्ययलाभादिति चेत् सत्यम्। बाहुल्येन वर्त्तमाने क्वचिदेव भूतभविष्यतोरिति विवेकप्रदर्शनायेदमित्याहुः। तुमुन्ण्वुलौ। क्रियाअर्थः प्रयोजनं यस्याः सा
क्रियार्था तस्याम्। अत्र अयं सिद्धान्तः। तुमुन्ण्वुलोः कृत्त्वाविशेषेपि अव्ययकृतो भाव इति वचनात् भावे तुमुन्। ण्वुल् तु कर्त्तरि। ॥
वचनाच्चेत्यनेन सत्वभूते भावे घञादीनामेव विधानाच्चेति भावः ॥

टी॰॥ प्रत्ययद्योत्यमिति। उभयत्रापीतिभावः॥ मतभेदेनेति। अर्थाध्याहारवादे संसर्गः शब्दाध्याहारवादे तु प्रकार इत्यर्थ इत्येके। कर्मप्रवचनीयवत् द्योतकत्वे संसर्गः प्रादिवद्योतकप्रकृत्यर्थस्य उद्देश्यत्वन्तु प्रत्ययद्योत्यम्। तच्च संसर्गः प्रकारो वा मतभेदेन। लिङ्विधौ भाष्ये क्रियादीनां वाच्यत्वमिति पक्षस्याप्युक्ततया तद्रीत्या इहोद्देश्यत्वं प्रत्ययार्थः। प्रकृत्युपपदार्थयोः समानकर्तृकत्वमपीहाभिधानबललभ्य प्रयोगोपाधि। तुमुन्प्रकृत्यर्थस्तु उपपदार्थप्रतिविशेषणम्। ण्वुलि प्रकृत्यर्थो ण्वुलर्थे ण्वुलर्थस्तु कारकद्वारा उपपदार्थे विशेषणम्। कृष्णं द्रष्टुमिति। कृष्णकर्मकभविष्यद्दर्शनार्थमित्यर्थः। दर्शको यातीति। भविष्यद्दर्शनकर्तृकर्तृकन्तदुद्देश्यकञ्च यानमित्यर्थः। क्रियायाङ्किम्। भिक्षिष्य इत्यस्य जटाः। इह भिक्षार्था जटाः ताश्च द्रव्यं न तु क्रिया। भिक्षितुञ्जटा इति प्रयोगस्तु धारयतीत्यध्याहारेण योज्यः। क्रियार्थायाङ्किम्। धावतस्ते पतिष्यति दण्डः। अस्त्यत्र धावत इति क्रिया न त्वसौ दण्डपातनार्था। उद्देशेन हि तादर्थ्यं विवक्ष्यते न हेतुत्वमात्रेण। समानकर्तृकेषु तुमुन्। अक्रियार्थेति। भोक्तुमिच्छतीत्यत्र हि भोजनविषयिणीच्छा प्रतीयते न तु भोजनार्था। तदुद्देशेनानुष्ठीयमानत्वन्तादर्थ्यम्। उद्देशश्चेच्छा। न च भोजनेच्छापि तयैवानुष्ठीयते आत्माश्रयात्। अतः पूर्वेणाप्राप्तिरिति भावः। यत्तु वदन्ति समानकर्तृकेष्विति विशेषं समर्थयितुमयमारम्भः। तेन देवदत्तेन भोक्तुमिच्छति यज्ञदत्त इति न भवतीति। अत्रेदं वक्तव्यम्। तुमुन्ण्वुलाविति विधिरपि भिन्नकर्तृकेषु नेष्यते। पुत्रं भोजयितुं माता गच्छतीति वक्तव्ये पुत्रेण भोक्तुमित्यप्रयोगात्। सेयं व्यवस्था शब्दशक्तिस्वाभाव्यात् बहुलग्रहणाद्वा सिद्धेत्यन्यदेतत्॥ एवं स्थिते प्रकृतसूत्रे तादर्थ्याभावे पि विध्यर्थमित्येव ज्यायः॥

∽ त्वे प्रकार इत्यर्थ इत्यन्ये। प्रकार एवेति पक्ष एवमुक्त इत्याह॥ लिङ्विधाविति॥ अभिधानेति॥ प्रयोगस्वभावबललभ्य इत्यर्थः॥ अनभिधानादन्यत्र प्रयोगो नेति यावत्। प्रयोगोपाधिरिति। समुदायशक्य इत्यर्थः। विविच्यते। गम्यते। तदुद्देश्यकं हि तदर्थमित्युच्यते न तज्जनकमात्रमित्याशयः। न तु भोजनार्थेति। दर्शनेच्छाया यथा दर्शनमनुष्ठेयं न तथा भोजनेच्छया इच्छानुष्ठेयेत्यर्थः। इत्येव ज्याय इति। समानकर्तृकेष्विति स्पष्टार्थमेवेति भावः॥

टी०॥ नियच्छतीति। यस्तुमुन्समानकर्तृके उपपदे इत्यर्थो हि नोपस्येति भावः। विश्वतोमुखत्वमनेकार्थत्वं इह चलटेति। अन्यथा तदुपादानवैयर्थ्यमिति भावः। नन्वविवक्षितक

मू०॥ वस्तुतस्तु तन्त्रावृत्त्याद्याश्रयणेन प्रकृतसूत्रं प्रागुक्तोऽपि तुमुनि समानकर्तृकतां नियच्छति। सूत्रे विश्वतोमुखत्वस्यालंकरणत्वात्। स्वरितेनाधिकार इत्यादिसूत्राणां भाष्य एव तथा योजितत्वात् लक्ष्यस्य निर्विवादत्वात्। ननु धातोः कर्मण इति सूत्रेऽनभिधानबलेन समानकर्तृकादित्यं यो वार्त्तिके प्रत्याख्यातः। तत्किमिह तन्त्राद्याश्रयणेनेति चेत्। मैवम्। तत्रैव भाष्यकृता अगतिकगतिरेषा यदनभिधानमित्युक्तत्वादिति दिक्। अत्र काशिका। इच्छन् करोतीत्यत्रानभिधानान्नेति। अस्यार्थः। उक्तविषये इच्छन् कर्तुमिति न भवति। इच्छन् कर्तुं इच्छतीत्यादौ तुमुन्ण्वुलाविति सूत्रेण स्यादेवेति। अत्रेदं वक्तव्यम्। करोतीत्यर्थे तु तुमुनः प्राप्तिरेव नास्ति तस्य भावार्थकत्वात्। इह च लटा कर्तृप्रतीतेः। यत्तु हरदत्तेनोक्तं इच्छता क्रियत इत्यत्र प्रसङ्ग इति। यच्च परिष्कुर्वन्ति। कर्म। विवक्षायां भावे प्रसङ्ग इति तच्चिन्त्यम्। अविवक्षितकर्मणां भावे लो न। किंतु कर्मसामान्य एवेति लः कर्मणि सूत्रस्य स्वग्रन्थविरोधात्। किंच भावे लस्यापि वर्त्तमानकालता निर्विवादा। न चेयं तुमुना लभ्यते। किंच इच्छन् कर्तुमिति प्रयोगो नेष्यत इति रिक्तं वचः। कर्तुमिच्छन्निति प्रयोगस्य सकलसम्मतत्वात्। यदा तु पूर्व्यो श्वाहर पात्रं पात्रमाहरेत्यादाविवक्षेच्छायन्तत्वात्तुमुन्प्रकृत्यर्थस्योपपदार्थं प्रति विशेष्यतापि स्यादिति चेन्न। आपादकाभावात्। अव्ययकृत्प्रकृत्यर्थानां क्रियान्तरं प्रति विशेषणतायाः काशिकादौ क्लृप्ततया तथैवाभ्युपत्तेश्चेति दिक्। इच्छासन्नन्तस्य विग्रहे सर्वत्रायमेव तुमुन् प्रयुज्यते। कर्मत्वसमानकर्तृकत्वयोरिच्छाप्राधान्यस्य च सन्नन्ते दृष्टस्येहापि तौल्यात्। वृत्तिसमानार्थकवाक्यस्य न्याय्यत्वादित्यवधेयम्। [illegible] ॥ [illegible]

[illegible]पि भावे लः षष्ठीप्रकरणस्थभाष्याल्लभ्यते इति न्यायेऽर्थे स्वग्रन्थविरोधो न दूषणमत आह। किंचेति। अक्रियार्थकर्मे[illegible]न चायं तुमुनेति। तत्र करोत्यर्थे समभिव्याहृतक्रियापेक्षयाभविष्यत्वस्यैव प्रतीतेरिति भावः। कर्तुं [illegible]मिति कर्तुमिच्छन्नस्तीति तदर्थः। अस्येच्छाप्राधान्येन च प्रवृत्तिरित्यर्थमा[illegible]दिति भावः। न्याय्यत्वादिति। सन्नन्तेनैव तत्समा[illegible] तुमुनः क्रियार्थेनापीति भावः। अत एव सन्नन्त

[illegible]नाविच्छतीति[illegible]समानार्थकत्वेनान्वयस्येति
॥ [illegible]

अयमपीतिः अतएवायंस्वार्थिकइतिभूवादिसूत्रेकैयटः।बाधेप्राप्तेवचनमिति।यद्यप्ययंभावोऽसत्वभूतोघञादिवाच्यस्तुसत्वभूतस्तथाप्यस्यैवविषयविभागस्यस्फुटंबोधनायेदमि
तिभावः।कर्तृत्वविवक्षेति।तेनायङ्कर्तरीतिभावः।इत्यादाविवेति।मितांह्रस्वइत्यत्रवेत्यनुवर्त्यव्यवस्थितविभाषयेतिभावः।नथालिति।अन्यथेत्यादिः।परिच्छित्तिरिति।इयतेत्यर्थः।प
अयमप्यऽक्रियार्थोपपदार्थारम्भः।भोक्तुंशक्नोति।धृष्णोति।जानातीत्यत्रभुज्यर्थोविषयतयासंबद्ध्यते।प्रावीण्यञ्चगम्यते। ग्लायतीतितदशक्तिः।घटतेअर्हतीतियोग्यता।
७ आरभते।क्रमतेउत्सहतेभोक्तुमितिभुजेरुद्यमावस्था।लभतेइत्यप्रत्याख्यानम्।अस्तीत्यादौतुसंभवमात्रम्।भाववचनाश्च।क्रियार्थोपपदेविशेषविहितेनतुमुनाखविषयेघञा
दीनांबाधेप्राप्तेवचनम्।यागायेति।यष्टुमित्यर्थः।तुमर्थाच्चभाववचनादितिचतुर्थी।पदरुजा।पद्यतेसाविति।करणस्यात्रकर्तृत्वविवक्षा[illegible]द्याः।सस्थिरो।सर्त्तेरिति।भ्वादेह्लादे
श्चग्रहणम्।स्थिरेकर्त्तरीति।एतेनस्थिरग्रहणंप्रत्ययार्थस्यकर्तुर्विशेषणम्। ननूपदमितिदर्शयति।अर्द्धर्चादिषुसारशब्दस्यपाठश्चेहप्रमाणम्।व्याधीत्यादि।अस्थिर
र्थम्।विसारोमत्स्यइति।विविधंसरतीतिकृत्वा।सारोबलमिति।अत्राप्यन्तर्भावितण्यर्थोधातुः।सारयतिचेष्टयतीतिकृत्वा।बलवान्हिचेष्टते।अपाणिनीयमिति।श्र
मेःशुद्धाह्वजिवृद्धेर्दुर्लभत्वादितिभावः।यदितुधुर्यान्विश्रामयेत्यादाविवणिचिवृद्धिमाश्रित्यणिजन्तादेरच्क्रियतेतदारूपंसिद्ध्यत्येव।अर्थस्तुभिद्यतइतिभावः।निष्प्रे
षणाधातोःप्राकृतेर्थेणिजितिविवक्षायान्तुनदोषइत्यवधेयम्। अवोदइति।उन्दीक्लेदनेअवपूर्वः घञ्नलोपोनिपात्यते। एधइति। इन्धेर्घञिनलोपोगु
णश्चनिपात्यते। नधातुलोपइतिप्रतिषेधःस्यात् । ओद्मइति।उन्देरौणादिकेमन्प्रत्ययेनलोपोगुणश्च।श्रन्थेरिति।प्रपूर्वस्यहिमपूर्वत्वंचघञिनिबोद्ध्यम्।प
रिमाणाख्यायांसर्वेभ्यः।परिमाणंपरिच्छित्ति आख्यानमाख्याउक्तिःपरिच्छित्तेरुक्तौसत्यामित्यर्थः।कस्यपुनःपरिच्छित्तिःप्रत्ययार्थस्य।तण्डुलनिचायइति।निचा
यतेराशीक्रियतेइतिनिचायः।अत्रराश्येकत्वेनसमुदायिनांपरिच्छित्तिर्गम्यते।एरचिप्राप्तेघञ् ॥ ५ रिच्छित्तेरिति।तदुक्तिश्चोदाहरणेषेकादिशब्दैःस्पष्टैव।समुदायिनामिति।त
ण्डुलपदेनकर्मधारयइतिसमुदायिनएवप्रत्ययार्थइतिभावः।तत्परिच्छित्तिश्चैकराशिविषयत्वेनेतिबोद्ध्यम्।एरचीति।निश्चायइतिपाठेग्रहवृदइत्यपोबाधइतिबोद्ध्यम्।तस्यपरिमाणा

आर्थिकमिति।एवंराश्येकत्वमपिबोध्यम्।कर्मणीति।इदञ्चित्यम्।अकर्त्तरिचेतिसूत्रेपर्युदासेनैवकारकलाभेपुनस्तद्ग्रहणंपरिमाणाख्यायामित्यस्यकारकएवप्रवृत्तिर्नतुभावइत्यर्थंते नेहनसैकातिलोच्छितिर्देखुती।एवञ्चघञनुक्रमणमजपूविषयेऽवचनेहिस्त्रीप्रत्ययान्नम्प्य प।वादविज्ञानमितितत्सूत्रस्थवार्त्तिकंनकार्यमितिभाष्यंसङ्गच्छते।अन्यथाकर्मणि क्तिनोबाधाभावायत्तद्वचनस्यावश्यकत्वेनभाष्यासङ्गतिःस्पष्टैव।तस्मात्परिमाणाख्यायांभावेएवक्तिन्नकारकेऽनभिधानादित्यावश्यकम्।अत्राप्यकर्त्तरीत्यनुवृत्त्यातत्रव्याख्यात निष्पूयतेशोध्यतेतुषाद्यपनयनेनयस्तण्डुलादिःसनिष्पावः।शूर्पेणेतिकरणतृतीयान्तस्यकर्त्तृकरणेकृताबहुलमितिसमासः।अत्रशूर्पसंख्ययातण्डुलादेरपिपरिच्छित्तिः।शूर्पहित्वन्तुआर्थिकन्नतुशाब्दम्।यद्यप्यत्रनिरभ्योःपूल्वोरितिघञ्लभ्यतेतथापिसर्वग्रहणबलादनेनापिभवितुमर्हतीतिभावः।मुख्योदाहरणमाह।द्वौकाराविति।कृविक्षेपेकर्मणिघञ्।विक्षिप्तोधान्यादिराशिःकारः।इहप्रकृत्याश्रयएनापवादोबाध्यतेनत्वर्थाश्रयः।सर्वेभ्यइतिपञ्चमीनिर्देशात्।तेनेहन।एकातिलोच्छितिः।कर्मणिभावेवाक्तिन्।ऊर्द्धिकृतोराशीकृतइत्यर्थः।तदेतत्सूचयितुमजपोरित्युक्तम्।दारजारौ।यद्यपिदारयतेःपचाद्यचासिद्धंस्वरश्चतुल्यःकर्षोत्वतइतिघञ्प्रन्तोदात्तत्वात्तथाप्यकावशङ्कावितिस्वरेदारयितुमिदम्।णिलुकेति।लोपेहिसतिघञाश्रयावृद्धिर्नस्यात्णिलोपस्यस्थानिवद्भावात्।नचणिन्निमित्तैवसास्तुइतिवाच्यंमार्जारशब्देमित्त्वाह्रस्वइतिह्रस्वापत्तेः।लुकितुसतितस्याःपरनिमित्तकत्वात्क्विलुगुपधेतिप्रतिषेधाद्वास्थानिवत्त्वाभावान्नदोषइतिभावः।यत्तुवदन्तिदीर्यन्तेऽनेनेतिदाराः।जीर्यतेऽनेनेतिजारइतिअण्यन्ताभ्यामेवकरणेघञासिद्धत्वान्नैतदादर्त्तव्यमिति।तदतिस्थवीयः।अपवादस्यऋदोरबित्यपोविषयेउत्सर्गस्यघञोदुर्लभत्वात्।अपवादोपिपरेणल्युटाबाधादिहदुर्लभइत्यन्यदेतत् ॥ ७ ॥ मित्यन्यत्।नदोषइति।यद्यपिक्रादिजॄधातोर्ण्यन्तात्कर्त्तरिघञितस्यामित्त्वात्णिलोपेनेनसिद्धेलुग्विधानंव्यर्थंतथाप्येतद्वार्त्तिकभाष्यप्रामाण्यान्नसांप्रदायिकःसइतिभावः।नैतदिति।एतद्वचनंनकार्यमित्यर्थः।ल्युटेत्युपलक्षणंघस्यापि।यदितुनैतदादर्त्तव्यमित्यस्यकर्त्तरीत्यस्यस्थानेकरणेइतिपठित्वातत्रचापवादंघञमण्यन्तादित्थायणिलुकेत्यंशोनादर्त्तव्यइतिव्याख्यायतेतदासम्यगेवस्पष्टञ्चेदंभाष्ये ॥

अक्षेष्वपीति। अक्षकरणकद्यूतसाधनेष्वपीत्यर्थः। अयमेव घञिति। राजसमीपे। मि। आप्यशायनस्य पर्यायइत्यर्थे के गजो पंथ्राय इत्याद्यिति भावः। अग्न्यादीति। आदिनाइष्टकाः। अपादाने स्त्रियामिति। घञनुक्रमणमजपोर्विषय इति वचनात्। स्त्रियामप्राप्तो घञ् विधीयते। उपाध्यायेत्यादि। यास्वयमध्यापयति तस्यामिदं रूपद्वयम्। पुंयोगे तु ङीषेवा। आनुगागमश्च ध्याक्षिक इत्युक्तम्। अकृतनीशार इति। उपसर्गस्य घञीति दीर्घः। अथ कथं शरदस्सिणप्रसव्यगाःमिनांशारणामिति अत्राहुः। अतएव वार्त्तिकप्रयोगात् असेषपिशरणाते र्घञिति। यज्ञेस्तमिस्तुवः। अधिकरणे ल्युट्। एवादो घञ्। प्रथने। विस्तारः स्तर्यगायतिः। छन्दोनाम्नि च। शब्दविषयत्वात्पूर्वेणाप्राप्ते वचनम्। अत्रके चिद्वावितिनानुवर्त्तयन्ति तेन प्रस्तारपङ्क्तिरित्यादि सिद्धम्। उदिग्रहः। घञ्स्यात्। ग्रहवृदृनिश्चिगमश्चेति प्राप्तस्याप्यपवादः। परिन्योः। परावन्याः इह हि परिग्रहणङ्क्रियते। सकृदेव तु कर्त्तव्यम्। तथाहि। परौ नियो द्यूते। इणोनुपात्यये। नावश्रेषे इति सूत्ररचनास्तु। सत्यम्। तथा न कृतमित्येव। न्युयोः। ननु पूर्वसूत्रेणे अनुपात्यये पर्यायशब्दोन्युत्पादितः एवञ्चेह पर्यायग्रहणं व्यर्थं अनुपात्यय इत्यस्यानुवृत्ति संभवात् इति चेत्। अत्राहुः। पर्यायग्रहणं पुनर्विधानार्थम्। तेनाभिविधिविवक्षायां परमपीनुर्णा बाधित्वा अयमेव घञ् भवतीति। आकायमिति। आचीयतेऽस्मिन्नग्न्यादि। अधिकरणे घञ्। अग्निस्थलविशेषश्चिन्वीत नचयने नानिब्यादस्येदितिश्रुत्यर्थः। सङ्घे च। उत्तरे च अधरे च उत्तराधराः। तेषां भाव औत्तराधर्यम्। सूकरेति। स्तनयानापचदोत्तराधरभावेन सूकराः शेरते तत देवं प्रत्युदाहरणम्। यदा तु भिक्षुवत्पृथक्पृथगेवावतिष्ठन्ते तदेहापि भवत्येव घञ्। कर्मव्यतीहारे। अन्नवर्त्तमानाद्धातोरित्यर्थः। भावेण जिति। कर्त्तव्यर्जिते कारके तु न भवत्यनभिधानात् इत्याहुः। प्राचा तु भावादावित्युक्तं तद्पेक्ष्य आकारविशेषात्। व्यावक्रोशीति। क्रुश आह्वाने। हसे हसने। णिजन्ताभ्यामञ्। स च कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया सोपसर्गाद्भवति। न क्तितब्वादादिवृद्धिः नञ्स्वाङ्ग्यामिति तु न कर्मव्यतिहार इति निषिद्धम्। स्यादेतत्। स्त्रियाङ्क्तिनिति प्रकरणेणञ्विधेयः। एवञ्च स्त्रियामिति न वाच्यमिति लाघवमिति चेन्नैवम्। अस्त्रियामिति वासरूपविधिपर्युदासापत्तेः। इष्यते हि व्यावक्रुष्टिरिति क्तिन्नपि। ननु येन नाप्राप्तिन्यायेन क्तिन एवापवादोयं णच्। युक्तादम्भोप्येवम्। [illegible] प्रत्यात् विप्रतिषेधाद्युजादयः प्राप्नुवन्ति। इष्यते तु णजेव॥ अग्निस्थलविशेषमिति। अग्न्याधारस्थलविशेषमित्यर्थः। दृश्यते हीति। ध्वनितञ्चेदं वासरूपसूत्रे भाष्ये प्रकृ[illegible] भाष्यन्तु न्यायानुगृहीत तद्भाष्यविरोधादेकदेशयुक्तिरिति भावः॥

वाऽऽप्त इति। वासरूप इत्यस्य बाधनार्थेति भावः। नपुंसक इत्युत्तरमेव वक्तव्यम्। खलर्थविषये भावे खलादयो मा भूवन्निति। अत एव भाष्ये उक्तं येऽस्य बाधकास्तद्विषये ग्रहणमि
त्यथा। श्रावयोरित्यत्र ण्यासश्रन्थेति युच् प्राप्तः। ल्युत्वत्र गुरोश्च हल इत्यकारः प्राप्तः। क्वचित्त्वाकार एवेष्यते न तु णच्। व्यतीक्षा व्यतीहेति यथा। सैषा व्यवस्था न्यायतो
दुर्लभापि कृत्यल्युट इति बाहुलके न समर्थनीयेति स्थितमाकरे। एवं श्वावकुशिक्तिन्नपितथैवास्तु। मास्तु च प्रकरणभेदेन क्लिष्टामिस्युक्तिरिति चेत्। सत्यम्। यावत्संशे बाहु
लकं विनैव निर्वाहस्तत्संशास्तु बाहुलके न निर्वाहं स्वीकृत्य तदुपायानां प्रत्याख्याने घञादिविषयकानेकवचनवैयर्थ्यापत्तेरित्यालानं तावत्। सांराविणमिति। इनुणन्तात्स्वार्
थेऽण् इत्यर्थः। संशब्दोऽभिविधिद्योतकः। पूर्ववत्स्त्रीलिङ्गादय। स्वभावतश्चेदमिनुणन्तं नपुंसकम्। अनेन नपुंसके भावे क्तो घञ् चेति उभयं वासरूपन्यायेन प्राप्तं पुनर्भाव
ग्रहणसामर्थ्याद्बाध्यते। न च कर्तृभिन्नकारकनिवृत्तये भावग्रहणमिति वाच्यम्। पूर्वसूत्र इव शब्दशक्तिस्वाभाव्यादेव कारक इनुणोऽप्रवृत्तेः। ल्युडादयस्तु भावेऽपि दृष्यन्ते। सं
राविणमिति। तच्च बाहुलकाल्लभ्यत इत्याकरः। आक्रोशे। ग्रहवृदृनिश्चिगमश्चेत्यपि प्राप्तेऽयमारम्भः। अवग्रहपदः स्येति। अवच्छेदविशेष इत्यर्थः। निग्रहो निरोधः। पात्रप्रग्राहेणेति।
भिक्षायामुपादानेन पात्रं गृहीत्वेति यावत्। लिप्सायाम्। प्रग्राहो देवदत्तस्य। प्रकर्षोऽभिनिवेश इत्यर्थः। निवराकन्येति। ग्रहवृदृ इत्यादिना कर्मण्यप्। ननु स्त्रीत्वविशिष्टक
र्मणि परत्वात् क्तिना भाव्यम्। अजब्भ्यां स्त्रीखलना इत्युक्तेः। अत आह क्तिन्विषयेऽपीति। एवञ्च घञजबन्ताः पुंसीति प्रायिकमिदं द्रष्टव्यम्। रश्मौ चेति। रश्मावाकटादिसंबद्धायां रज्जौ र
श्मिशब्दो वर्तते। न तु रज्जुमात्रे। इह बहुकर्तृको ग्रहेरुपात्तः। सकृदेव तु वक्तुं शक्यः। नपादि। उदि ग्रहः। समि मुष्टौ। आक्रोशेऽवन्योः। प्रे लिप्सायाम्। परौ यज्ञे। अवे वर्षप्रतिबन्धे विभाषा।
प्रे वणिजामित्यादि। परौ भुवोऽवज्ञाने। ह्रस्वस्यानन्तरं आङि रुप्लुवोरित्यस्तु। तथा तु न कृतमित्येव। क्तादिनिवृत्त्यर्थमिति। परत्वाद्धि क्तल्युटौ प्राप्तौ। तथा च पूर्वविप्रतिषेधोऽयं फलितः।
एवञ्च वासरूपन्यायो नास्ति। अनपवादत्वादिति भावः। वर्षमिति। वृषभो वर्षणादिति भाष्यकारप्रयोगाल्ल्युडपि भवतीति कैयटादयः। एतच्च वृष्टिमात्रविषयकं बोध्यम्। अत ए
व भीत्रार्थानामिति सूत्रे भयं भीरिति न्यासग्रन्थमनुपादाय भयनमिति। क्वचित्कोपपाठ इत्यनुन्यासादयः ॥ ७ ॥ ति। आकर इति। भाष्यमित्यर्थः। अयमारम्भ इति। घञर्थ इत्यर्थः। तत्र
हि नित्यमित्याः इति तद्धितेषु व्याख्यानमिदम् ॥

प॰श॰ अरणेइति।नचपरत्वात्ल्युटाबाधापत्तिर्बाहुलकेनतदप्रवृत्तेः।अतएवप्रस्थादावधिकरणेकउक्तआकरे।अख्नना।अक्तिरित्यादयः।करणेक्तिन्।सुजाद्यन्ताअपिबाहुलकेनैवबोध्याः
३८३ ऋदोरप्।नायमकारःकिंतर्हिदकारोनिरभ्योःपूल्वोरित्यारम्भात्।।इत्याशयेनदीर्घान्तादप्युदाहरति।लवःपवइति।वशिरण्योरिति।घञिप्राप्तेवचनम्।वशनंवशः।रण
न्तिशब्दायन्तेऽस्मिन्नितिरणःसङ्ग्रामः।व्यध्यतइतिविध्यसः।वैश्वदेवशिष्टमन्नम्।घासश्चतुष्पदांभक्ष्यम्।शष्पंबालतृणंघासइत्यमरः।उपजापोमन्त्रभेदः।प्रजनेसर्त्तेः।प्र
जननंप्रजनः।भावेघञ्।जनिवध्योश्चेतिवृद्धिप्रतिषेधः।यद्वा।ण्यन्तादेरच्।प्रशब्दोऽत्रधात्वर्थविपरीतयति।यथाप्रतिष्ठतइत्यत्रप्रादुर्भावस्यवैपरीत्यम्।ग्रहणम्।तच्चप्र
अमन्द्वितीयादिकंयेत्यत्रनाग्रहइत्येके।हरदत्तस्वरसोऽप्येवम्।वृत्तौतुप्रथमग्रहणमितिव्याख्यातम्।उत्तरोग्रन्थःस्पष्टार्थः।ड्वितःक्त्रिः।अपमिति।तथाचपाकेननिर्वृत्तमितिवि
गृह्यते।नतुपक्त्रेनेति।यत्तुप्राचोक्तंभावादावितितन्नेतिभावः।क्त्रेर्मप्।तद्धितेषुव्याख्यातमिदम्।नित्यग्रहणादिति।नत्रहिनित्यमितियोगोविभज्यते।तत्सामर्थ्यादर्थविशेषा
नादरेणेक्रमविषयत्वंनिर्णीयते।एकयोगत्वेतुनिर्वृत्तेइत्यधिकं।यत्निर्वृत्तार्थस्यविवक्षायांवाक्यवारणेऽपितदविवक्षायांस्वातन्त्र्यप्रसज्येतेतिभावः।यजयाचाभावेकर्त्तरि
कारकेच।अतएवयज्ञेनयज्ञमयजन्तेत्यत्रइज्यतइतियज्ञइतिव्याचक्षते।उपसर्गेघोःकिः।बाहुलकात्कर्त्तर्यपीतिमाधवः।अतएवउपसमीपेस्वधर्ममादधातीतिउपा
धिरितिव्याचक्षते।वस्तुतस्तुतत्रकरणेप्रत्ययः।सुवचःतदेतदाह।उपाधीयतेऽनेनेति।एवंविधानाविश्वस्यद्विधिरित्यत्रापिमाभूत्किः।विध विधानेइत्यस्मादिगुपधा
त्किदितिइगन्तरूपसिद्धेः।स्त्रियाङ्क्तिन्।घञोऽपवादइति।यत्तुप्राचोग्रन्थेव्याचक्षाणाआहुः।भाष्येत्वधिकःकारोऽधिकारइतिघञप्युदाहृतइतितदितिरभसात्।
नहितत्रस्त्रीत्वविशिष्टोभावोऽर्थःकिंतुपुंस्त्वविशिष्टइतिध्येयम्।अजपोत्विति।तयोरवकाशः।चयः।लवः।क्तिनोऽवकाशः।कृतिः।हृतिः।चिनोतिस्तौतिभ्यां
स्त्रियामुभयप्रसङ्गेपरत्वात्क्तिन्नित्यर्थः।श्रुयजि परत्वात्ल्युटिप्राप्तेवचनम्।श्रुतिःश्रोत्रम्।क्तिन्नपीति।अस्त्रियामितिप्रतिषेधात्वासरूपविधेरभावा राय॰
दिदमुक्तम्।अङ्इति।स्यादिभ्यआतश्चोपसर्गेइतिकः॥ भावेनुपसर्गस्य।आहवइति।एतेनवायज्ञायाह्वोत्यस्यामृचिहवशब्दव्याख्यावसरेह्वयतिधातोर्बहुलंछन्दसी ३८३
तिसंप्रसारणेसत्युकारान्तत्वादृदोरबित्यबितिवदन्तोवेदभाष्यकाराःप्रमुक्ताः ॥

प्राप्तस्येति भाव इति। पुरस्तादपवादन्यायेनेति भावः। तेनाण्वुलिञोः स्या। पिकास्या याममिति सिद्धानि। नकारस्येति। त्वम्येक चेति सूत्रस्य भाष्यादिदं लभ्यते। अत्रेति। कीर्त्तेर्ण्यन्तत्वादिति
भावः। भरणं भृत्येति. अस्मादयं भाव एवेति भञोऽसंज्ञायामिति सूत्रस्य भाष्यस्वरसः। अन्यत्र त्विति। संप्रदानादेः। ताभ्यामन्यत्रेत्यस्य तु नात्र विषयस्तत्रोणादि
पचेस्तु णिद्विदादिभ्य इति प्राप्तस्येति भावः। इत्वाभाव इति। यति स्यतीत्यादिना प्राप्तस्येत्वस्याभाव इत्यर्थः। हन्तेरिति। नकारस्येत्वम्। हिनोतेस्तु गुण इति बोध्यम्। कीर्त्तिरिति। अत्र ण्यास
श्रन्थेति युचि प्राप्ते क्तिन्निपात्यते उदात्तत्वात्। तां सुते कीर्त्तिम्। व्रजयजोर्भावे क्यप्। क्यप उदात्त इत्येव। पिकरणन्तु उत्तरत्र तु गर्भमुद्गलपार्श्वेति। तथा हि उद्धोत्तायत इति भावः। भर
णं भृत्या। जीविका। कुमारभृत्यागर्भिण्याः परिचर्याभिधीयत इति हारावली। कुमारभृत्या कुशलैरधिष्ठिते इति रघुः। सञ्ज्ञायां क्तिन्मतिः। आसुतिः। सूतिः। तथा चमवहृतमासतिबुद्धि
पूजार्थेभ्यश्च। कर्मणि भृतौ। रजः कृष्यासुतीत्यादि। एते न उक्तसोत्रप्रयोगादेव एपोसा। पुनर्निवृत्तिर्दुर्घटाद्युक्तिः प्रयुक्ता। क्रियेति। यदा भावकर्मणोः शः तदा सार्वधातुके यक्। रि
ङ् शयग्लिङ्क्षु इति रिङादेशः। अन्यत्र तु यगभावे शे परतो रिङादेशे कृते इयङ्। इच्छा। भाव इति। नत्व कर्तरि कारके णीत्यर्थः। परिचर्येति। कथं तर्हि धन्यानां गिरिजस्तमामभवती
चर्येयमाह्लादत इति मुरारिः। अत्र केचित्। गदमदचरेति यता न च वासरूपविधेरस्त्र्यधिकारे पर्युदासात् क्तिन्नायतो बाधः स्यादिति वाच्यम्। बाध्यबाधकयोर्द्वयोरपि स्त्र्यधि
कारस्थत्वे सत्येव स्त्रियामिति पर्युदासप्रवृत्तेः। अत एव काशिकायां कृत्यमास्येत्याशङ्क्य ऋहलोर्ण्यदिति समाध्याय वासरूपविधिप्रतिषेधस्तु स्त्रीप्रकरणविषयस्तेनोत्सर्गाप
वादस्येत्युक्तमित्याहुः। अस्मिन्पक्षे घञादयोऽपि स्त्रियां स्युः। तथा च कल्युपनपुंसके भावे स्त्रियां क्तिन्नादयो यतः। अतो घञजपाः पुंसि परिशेषादिति स्थितिरिति सिद्धान्तो
व्याकुप्येत। अतोऽपवादप्राप्तस्य स्त्र्यधिकारस्थत्वेऽपि वासरूपविधिर्नेत्येव न्याय्यम् ॥ प्रान्ते न प्रसिद्धौ ण्यादिपाठस्यानां विधेयसमर्पकोणत्वादिन वाक्यस्यानामेव ग्रहण
दिहान्यत्र पञ्चितनम्। अत एवौ पीड्या। यद्यत्र पादानेघमिति इङश्चेत्यप्रभात्येध्वमिति नमाकरणम्। पिकरणयोस्तु न शोल्युटा बाधादिति दिक्। इत्येव न्याय्यमिति। किं च यतनण्यमोऽपि
पित्रवार्यकयोः स्त्रीलाक्षया इलकामपणमावश्यकम्। किं च वासरूपसूत्रेऽसरूपपदेनापवादस्यैव ग्रहणे नास्त्रियामित्यस्यापि तद्विशेषणान्तेन न्याय्येति बोध्यम् ॥

स·रा· मत्वर्थोलस्यन इति। मवोः सौ ओलुगिति तत्त्वम्। व्याख्यानादिति। बाहुलकादिति भावः। निष्ठायां वासेट् इति। न चैवमाशंसेऽस्यनुपपन्नमिति वाच्यम्। आशंसायामिति निर्देशेसा[illegible]। नि
१८४ अस्याचर्यादत्वादितु बाहुलकादिति दिक्। यकारनिवृत्तिरिति। हलादिशेषस्तु नास्ति। यान्ते द्वित्वे धातुद्वित्वे वाभ्याससञ्ज्ञास्वीकारात्। इह तु तदुभयाभावादिति भावः। अटाट्यतेति। य
दा तु यङन्तात् प्रत्ययादिल्लकारस्तदा अतो लोपे यलोपे च अटाटेति बोध्यम्। नागर्जेति। सार्वधातुके यक्। जाग्रोऽविचिण्णल्ङित्सु गुणः। गुरोश्च हलः। प्रकृतस्य धातोर्हला विशेषणात्त
दन्तविधौ हलन्तधातुर्लभ्यते। न चायं गुरुहरिमिति भवति। अक्षिशोपो द्विगुरुः। अतो मत्वर्थोत्त्यतेन राद्धा। गुरुमत इति। ननु विपरीतमस्तु। गुर्वन्तात् हलन्तत इति। मैवम्। वैशापाम
नध्वनि। आशंसायां भूतवच्चेत्यादिनिर्देशात्। षिद्भिदादिभ्योऽङ्। कथं तर्हि मधुसुरभि मुखाब्जगन्धलब्धेरिति माघः। प्रेक्षोपलब्धिरित्यमरश्च। भिदादङिलभेस्येव ह्युचितम्। सत्यम्। अ
नर्थकास्तु प्रतिवर्णमर्थानुपलब्धेरिति भाष्यवार्तिकप्रयोगात् बाहुलकाद्वा क्तिन्नपि बोध्यः। एतेन ग्लिरुपात्तिरित्यादयोऽपि व्याख्याताः। वृत्तिकृतां तु क्तिन्नावादिभ्य इति वचनं पु
रस्कृत्य सर्वं समाहितम्। एवं कुण्ड्यादिगणस्य कण्डूतिरिति क्तिन् समर्थितः। किं त्वेतत्सर्वं भाष्यविरोधादुपेक्ष्यम्। तथाहि आवादिभ्यश्चेति क्तिन्नुपसंख्यानं निष्ठायां वा सेटोऽका[illegible]
च नास्ति इष्टमिति च वतो वार्तिककारस्य गुरोश्च हल इति प्रवृत्तिस्थल एव आवादिभ्यश्चेति क्तिन्नभिमतः। तत्कथं लभेत्यङोऽविषये उपासनेनिष्ठुचेश्च विषये स्यात्। अथापि आवादेराकृ
तिगणत्वं स्वीकृत्य बाहुलकलभ्योऽपि आवादिकृत्सो निक्षिप्येत। उपेयप्रतिपत्त्यर्था उपायाः अव्यवस्थिता इति न्यायात्। तथापि कण्डूतिरिति क्तिन्नन्तोदाहरणमयुक्तमेव। न[illegible]सूत्र
स्य भाष्यविरोधात्। तत्र हि कण्डूतिरित्युदाहृत्यैतदस्ति प्रयोजनम्। कण्डूयेस्तेन भवितव्यमिति निर्द्धार्य क्तिच्क्तौ चेति क्तिचि ब्राह्मणकण्डूतिरित्युदाहृतम्। न चैवं विधेः भाष्यकृद्भि
रेकस्य दृष्टनिराकृतेर्थे बहुलग्रहणं प्रभवति। एतेन वृत्तिकारानुगामिनः प्राचो ग्रन्थः प्रत्युक्त इत्यवधेयम्। भिदेति। एवमादयः अजन्ताः समुदाया एव गणे पठ्यन्ते। न त्वये प्रकृतिभाग
लोभिसादि एते न सूत्रे निर्दिष्टाः। गणे विशिष्टपाठस्तु लोकप्रसिद्धार्थविशेषकस्य कविरलाक्षणिककार्यस्य संग्रहार्थः। प्रकृतयस्तु भिदिर् विदारणे। छिदिर् द्वैधीकरणे। विद राम
र्णे। क्षिप प्रेरणे। गूहू संवरणे। डुधाञ् धारणपोषणयोः। मेदृ मेधृ हिंसासंक्लेशनयोः। ऋ गतौ ॥ ७) त्यवसीभ्यामुक्तत्र लोकप्रसिद्धार्थविशेषानाह द्वैधीकरणे इत्यादि ॥ २९

ट। ॥

धातावित्ति। वृद्धिरित्याद्यभिप्रायम्। अलास्य णिकक्कार्थो [illegible] पचमसुञ्जदरार्बूति। इदमुपलक्षणं मृजेः पाक्षिकवृद्ध्यभावः। कृपेः संप्रसारणमित्यपि बोध्यम्। लाभार्थ इति। सकर्मकाकारविकरणमन्दिसाहचर्याद्वा तस्मात्वेति भावः। बहुलमितीति। अत एव कचिद्धात्वर्थनिर्देशेऽपि प्रच्छतौ सुप्तात्तादिभ्य इति वार्त्तिकप्रयोगात्। अत एव वेसतेर्नाशब्दमिति व्याहृञ् हरणे। क्षि क्षये। क्षि निवासगत्योरिति च। तृ प्लवनतरणयोः। धृञ् धारणे। लिख अक्षरविन्यासे। चुद प्रेरणे। पीड अवगाहने। डुवप बीजसन्ताने। वस निवासे। मृजू शुद्धौ। कृप कृपायामिति वेदितव्याः। भित्तिरन्यति। भिद्यत इति भित्तिः कुड्यम्। छिदेति। द्वैधीकरणे। अन्यत्र तुच्छित्तिच्छिद्रमस्रुहादरीओषधिविशेषश्च। अन्यत्र रूढिः। आर्थे त्वे अनया अश्वा आरा। प्रतोदः। आर्त्तिरन्याः। आङोर्त्तेश्च। उपसर्गादनिधानादिति वृद्धिः। आराहाक्कारानाराधारेति पञ्चसुञ्चदणोङीति गुणे दीर्घत्वं निपात्यते। लिखेस्तु गुणः। लकारस्य पक्षे रेफश्चरेखा लेखा च। चुदेर्ईलन्दीर्घत्वञ्च चूडा। चिन्ति पूजि। चकारोऽनुक्तसमुच्चयार्थः। तेन तोलयते तुलेति हरदत्तः। घट्टि बन्धि। विदिर्लाभार्थे गृह्यते। ज्ञानार्थस्य तु संवित्तिः। विद् चेतनाख्यान निवासे। विनितुलादिनास्माने पि सिद्धम्। प्रच्छर्दिकेति। छर्द वमने। प्रवाहिति। प्रवाहयति मुहुर्मुहुः प्रवर्त्तयतीति ग्रहणी। चर्चिकेति। चर्च अध्ययने। प्रत्ययोपसर्गाभ्यां रोगप्रतीतिः। विपोर्त्तिरिति। विपः पीडा। अर्द हिंसायाम्। तिमुत्रेतिनिर्देशात्। आसिकाशायिकेति। आसनं शयनं इत्यर्थः। इकृष्तिपौ। धातोर्निर्देशोऽनुकरणम्। बहुलमित्यनुवृत्तेः क्वचिन्न। गुपतिज्किद्भ्यः सन्। पचतिरिति। उपसर्गात्सुनोतिसुवतिध्यायतेः संप्रसारणं चेत्यादिनिर्देशादकर्त्तर्यपि चिन्यपि परे शबादयः। एवं भावकर्मवाचिन्यपि क्वचिद्यक्। विभाषालीयतेरिति निर्देशात् बहिलीलीङो र्यकानिर्देशादनुक्रमः। यस्तु प्राचा शित्करणसामर्थ्याच्छबादयद्गुरुक्त स्तन्न। पिबतिर्ग्लायतिरित्यादौ पिबाद्यादेशप्रवृत्त्या आलनिवृत्त्या च शित्त्वस्य चरितार्थत्वात् सकृत्संसङ्गच्छते। आलनिवृत्त्यावेति। इदं तु तिनेत्यनेनापि सुप्रसारणदति भावः। इकः कित्वेऽपि वचिस्वपीत्यादौ न संप्रसारणं प्रसिद्धत्वेन शब्दातिरिक्तार्थपरे घेव न त्वत्र वृत्तेरिति बोध्यम्। इगित्वं तु चर्त्वभूतो गकारः पुनर्निर्दिष्टइत्यस्य ॥

ईवेदनति

५।पामा।अ

वर्णानुकरणादिति।प्रतिपादनार्थकनिर्देशपदानुवृत्त्यावर्णस्यैवयत्रप्रतिपाद्यत्वंतत्रैवायमितिभावः।चकारइति।सूत्रेचकारोविवक्षितइत्यादौसमुदायप्रतिपादनेतात्पर्यादितिभावः।उक्तस्यकारकरणस्यप्रयोजनमितिविभाषामृगेतिसूत्रस्थभाष्यप्रयोगइत्यपिबोध्यम्।एतेनकरणंकारश्चस्यकारइतिसमासेनेदंसिद्धमित्यपास्तम्।नन्वाकारपरत्वात्स्याल्लोपोतआह।अपत्यावर्णादिति।वर्णानुकरणादित्यर्थः।ननुवर्णादुच्चार्य्यमाणादिति।तथाहिसतिअकारइत्यादावेवस्यात्।नतुककारइत्यादौसङ्घातस्योच्चारणात्।अनुकार्यन्त्विहवर्णमात्रम्।अकारस्योच्चारणार्थत्वात्कथन्तर्हिएवकारश्चकारइत्यादि । ——— अत्राहुः।क्वचित्सङ्घातादपिवषट्कारइतिसूत्रनिर्देशात्।सर्वेचकाराःप्रत्याख्यायन्तइतिभाष्यात्।बहुलवचनाच्चेति।वस्तुतस्तुविभाषाग्रेप्रथमपूर्वेषुकर्त्तरिकृद्धित्यादौपुनःपुनर्भाष्यकारैरुक्तत्वात्एवकारःसाधुश्चकारवत्।इहकारप्रत्ययस्यधातो रविहितत्वेपिअधिकारवलात्कृत्त्वज्ञानेनकृदन्तत्वात्प्रातिपदिकत्वंप्रयोजनाभावान्नककारस्येत्सञ्ज्ञा।आर्द्धधातुकसञ्ज्ञाभावान्नेट्।अस्यच्चाविसादौनप्रत्ययोबाहुलकादेव।रादिफ।वासरूपविधिनाकारोपि।रकारादौनिनाशानिभृएवतोममपार्वति।अकारलोपइति।अतद्धितपरत्वादभत्वाच्चयस्येतिलोपस्याप्राप्तिः।प्रातिपदिकत्वन्तुकृदत्वात्पूर्ववद्बोध्यम्।बाहुलकान्नेहकुः।तसौमत्वर्थेइति।बाहुलकादेवमतुवर्थेशब्दादपि।शैषिकान्मतुवर्थीयादितियथा।अन्येतुनैतत्कृदन्तम्।किन्तुमतुवर्थेभावइतिविगृह्यगहादित्वाच्छेतद्धितान्तमेवेत्याहुः।इणजादिभ्यः।धात्वर्थनिर्देशेण्वुलोऽपवादोयम्।एवमग्रेपि।आजिरिति।बाहुलकादजेर्वीभावोन।सञ्ज्ञायाम्।अधिकरणेण्वुलर्थआरम्भः।उद्दालकश्लेष्मातकः।तस्यपुष्पाणिभज्यन्तेयस्यांक्रीडायांसातथा।विभाषाख्यानपरिप्रश्नयोरिञ्च।अल्पाच्तरत्वेनसूत्रेआख्यानशब्दस्यपूर्वनिपातेपिआख्यानस्यप्रश्नपूर्वकतयाआर्थङ्कममनुसत्यव्याचष्टे।परिप्रश्नेआख्यानेचेति।परिपाटीति।पटगतौ।परिपूर्वः।इणजादिभ्यइतीण्।कृदिकारादितिङीष्।आक्रोशःशपनम्।नपुंसकेभावेक्तः।ननुतयोरेवकृत्यक्तखलर्थाइत्येवसिद्धम्।अत्राहुः।भूतेइत्यधिकृत्यनिष्ठेतिसूत्रेणविहितस्यक्तस्यभावोऽर्थस्तेनविहितः।अनेनतुकालसामान्येनपुंसकेभावेक्तोविधीयते।अतएवायंस्वविषयेपरत्वात्घञजपांबाधकः।परिशेषात्तेषांपुंविषयत्वंसिद्धमीत्युक्तम् ॥ ७७ च्चेति।गहादित्वाच्छइतिमत्वर्थीयस्याप्येवंसिद्धाविदंवचनंव्यर्थमित्यन्ये।तस्यपुष्पाणीति।नित्यङ्क्रीडेतिसमासः।इत्येवसिद्धमिति।एवञ्चात्रभावेइतिव्यर्थमितिशङ्काशयः।अतएवेति।कालसामान्येविधानादेवेत्यर्थः ॥

असंनिधानादिति।विशिष्टार्थनिर्देशेनतयोरेवेत्यस्याप्रवृत्तेरितिभावः।प्रायेणेत्यस्यकृत्यमाह।क्वचित्त्विति।अत्रपक्षेरुचिवीजन्तुअत्रभावग्रहणमकर्तृकारकव्यावृत्त्यर्थङ्कृत्यस्तुठइति तावद्भावेअकर्त्तरिकारकेइत्यनुवर्त्ततइत्यर्थस्त्वेतद्भावग्रहणमूलकएवेतितध्वनयन्नाह।अन्येत्विति।ननुतस्यसूत्रस्यभावेएवनतत्रचाकर्मकेभ्यएवेत्यर्थइ येतात्पर्येण्याद्यांशस्यफला भावादप्रवृत्तौतत्सहचरितेतरांशस्याप्यप्रवृत्तिरतआह।तथाहीति।भावोपीति।अपिनाकर्म।अतएवतद्विधायकेकर्त्तरीत्यस्यनसंबन्धः अविशिष्टइतिञीतः क्तइतिवदस्यापिपूर्व स्यादेतत्।इहभावेचाकर्मकेभ्यइत्यस्याससंनिधानात्सकर्मकेभ्योप्ययंस्यात्घञादिवदितिचेत्इष्टापत्तिः।गतन्तिरश्चीनमित्यादिदर्शनात्।नन्वेवन्तद्योगेक र्मणिद्वितीयास्यात्।कृद्योगलक्षणषष्ठ्यानलोकेतिनिषेधात्।एवञ्चघटङ्कृतंवृक्षच्छिन्नमित्यादिप्रसज्ज्येतेतिचेत्न।नपुंसकेभावेक्तस्ययोगेषष्ठ्या उपसं ख्यातत्वात्।ननुशेषविवक्षामाश्रित्यप्रत्याख्यातंतदाकरेइतिचेत्तर्हितत्प्रामाण्यात्तत्रप्रायेणशेषविवक्षैवेत्यस्तु।क्वचित्तुद्वितीयापिदृश्यते।भ्रान्तन्देशमनेक दुर्गविषममितियथा।अन्येत्वाहुः।अयमपिक्तोऽकर्मकेभ्यएव।तथाहि।तयोरेवेतिसूत्रेभावेचाकर्मकेभ्यइत्यनुवृत्तंवाक्यभेदेनव्याख्येयम्।तद्यथा।कृत्यादयो येतत्तत्सूत्रविहिताःताननूद्यभावकर्मणोरेवेत्यर्थविधायकमेकंवाक्यन्तेननिष्ठेतिविहितस्यक्तस्यभावोप्यर्थोलब्ध अनुवृत्तेनवाक्यान्तरेणतुभावेयोयङ्क्तइ त्यनूद्याकर्मकेभ्यइतिविषयोव्यवस्थाप्यते।सचानुवादोनिष्ठेतिनपुंसकेभावेक्तइतिचविहितयोःक्तप्रत्यययोरविशिष्टः।आशितःकर्त्तेतिसूत्रस्थंभाष्यकैयटा दिकञ्चात्रानुगुणम्।अस्मिंश्चपक्षेअविवक्षितकर्मत्वेनाकर्मकतामाश्रित्यगतम्।भुक्तमित्यादिसमर्थनीयमितिदिक्॥ ७ मुपस्थितेस्तुल्यत्वादितिभावः।आशितःक र्त्तेति।तद्धि आशितशब्दे आद्युदात्तविधायकम्।नत्रहिकर्त्तरिक्तोनिपातनादितिभाष्येउक्तम्।सकर्मकत्वादशेःकर्त्तर्यप्राप्तःक्तोनिपात्यतइतिकैयटेउक्तम्।यदितुअयंसकर्मकेभ्यःस्या त्तदाभावेक्तंकृत्वाततअर्शआद्यचिकर्त्रर्थकत्वसंभवान्निपातनपर्यन्तस्यावनंव्यर्थंस्यादितिभावः।किंचकर्त्तृकर्मणोरितिसूत्रेकृतपूर्वीकटमित्यत्रभावेक्तसिद्धयेऽविवक्षितकर्मकत्वा श्रयणंभाष्येकृतन्तदसङ्गतिरित्यपिबोध्यम्।समर्थनीयमिति।भ्रान्तंदेशमित्यपिकृतपूर्वीकटमितिवद्भावेक्तेसाधु।वस्तुतस्तत्रगत्यर्थत्वात्सकर्मकत्वेपिभावेक्तःतेनतेभ्योविशि ष्टयोरर्थयोस्तद्विधानात्।तयोरित्यत्रनतस्यक्तस्यग्रहणम्।पूर्वोपस्थितेःक्तेस्तस्यनिराकाङ्क्षत्वात्इत्यलम् ॥

॥दिति

कर्मणीति।संस्पर्शादित्यपेक्ष्येति भावः।कर्तृत्वञ्च प्रत्यासत्त्या विधेयप्रकृत्यर्थनिरूपितं बोध्यम्।एरजिति।पदः घञोऽप्यत्र ग्रहणमित्यन्ये।उपसर्गादिवेति।खलघञोरेवेति नियमस्तु
कर्मणि च।कर्तुरिति कर्मणि षष्ठी।उभयप्राप्तौ कर्मणीति नियमात्।येनेति तृतीयां तदाह।येन स्पृश्यमानस्येत्यादि।नपुंसके भावे इति बोध्यम्।अत एवाह।पूर्वेणेति।नेहेति।
णिजर्थप्रतीतिभावः।करणाधिकरणयोश्च।येन नाप्राप्तिन्यायेन घञोऽपवादोऽयम्।अजपो स्त्रीप्रत्ययांश्च परत्वाद्बाधते उक्तं हि।अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषे
धेनेति।आकुर्वन्तीति।एत्य कुर्वन्ति व्यवहारमस्मिन्न् इत्याकरः।उत्पत्तिस्थानम्।गोचरो देश इति।तथा च भारविः।उपारताः पश्चिमरात्रगोचरा इति।विषयपर्यायोऽप्ययम्।त
था च प्रयुञ्जते।उपादानगोचरस्थानमिति।सञ्चरन्तेऽनेनेति।समस्तृतीयायुक्तादित्यात्मनेपदम्।एतेन सञ्चरन्तीति प्राचः परस्मैपदपाठः प्रयुक्तः।अवहारेत्यादि।वृत्तिकार
स्तु आधारावायपशब्दौ सूत्रे प्रक्षिप्य चकारेणावहारशब्दं सञ्जग्राह।तन्नवैरूप्यं निर्मूलम्।उदङ्कोऽनुदके।हलश्चेति सिद्धे उदकप्रतिषेधार्थं वचनम्।उदकोदञ्चन इति।ननु पुंसि
सञ्ज्ञायामिति घेप्राप्ते घञ् विहितः।उदके तु घञ्प्रतिषिद्धे घ एव स्यादिति चेन्नैवम्।प्रतिषेधसामर्थ्यात् घस्याऽप्रवृत्तेः।नहि हि घे घञि वा रूपे विशेषोऽस्ति।न च स्वरे विशेषः।
घे हि सति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्ता घञ्यपि थाथादिस्वरेण तथैवेति।जालम्।जलघातने।ज्वलितिकसन्तेभ्यो ण इति जालशब्दः सिद्धः।अतस्तन्निपातनमि
हन शक्यम्।खनो घ च।घित्करणमिति।नहि खनः घञोरिति कुत्वार्हः कश्चिदवयवोऽस्ति येन घित्करणमिहोपयुज्येतेति भावः।एतद् इति।आखनादयः पञ्चेत्यर्थः।ईषद्दुःसु
षु।इह सामान्योक्तावपि योग्यताबलात् विशेषणस्य विषयविभागो लभ्यते।कृच्छ्रार्थे दुरि।अकृच्छ्रार्थयोरितरयोरिति तदेतद्दर्शयति।कृच्छ्रे दुष्कर इत्यादिना।भवतेति।नञो
केति षष्ठीनिषेधात् कर्तरि तृतीया।कृच्छ्रेत्यादि किम्।ईषत्कार्यम्।अल्पमित्यर्थः।निमीति।मीनातिमिनोतिदीङां ल्यपि च।विभाषा लीयतेरिति प्राप्तं निषिध्यते।निमय इत्यादि
।एरच्।उपसर्गात् खलुघञोः।लभेश्चेत्येव सिद्धे नियमार्थमिदम्।उपसर्गादेव खलघञोरिति तदेतदाह।उपसर्गादेवेति।कर्तृकर्मणोश्च भूकृञोः।चकारः सन्नियोगा
र्थः।यदा कर्तृकर्मणोरीषदादीनाञ्च युगपत् प्रयोगः तदा प्रत्ययो यथा स्यात्।न च कर्तृकर्मणोः प्रत्ययार्थत्वमेवास्त्विति वाच्यम् ॥ ७ नव्याख्यानादिति भावः ॥

वैयर्थ्यापत्तेरिति।किञ्चचोपित्यर्थः।यदुनञ्चशब्दस्तत्सदृशसमुच्चयाङ्गीकारेणोपपदसमुच्चयासंभवादित्यपिबोध्यम्।च्व्यर्थासङ्गतेरिति।अभूततद्भावस्यसत्वार्थएवसंभवोनतुप्रा
च्य्यर्थे।एवमघटोघटःकरोतीत्यर्थेघटीकरोतीत्यस्यासंभवइतिभावः।अव्यवहितप्राक्त्वमेवेति।उत्तराङ्ग-विकलत्वस्यतत्स्यादित्युत्तरस्येत्यस्यप्रवृत्तेरितिभावः।सुमःसंभवादिति।ईषदा
तथात्वेईषदादीनामेवोपपदत्वात्खलःखित्वस्यवैयर्थ्यापत्तेः।सुमर्थेहि तत्।सुमचानव्ययस्यविधीयते।तस्मात्कर्तृकर्मणोरित्युपपदमेव।तदेतदाह।ईषदा
दिषुचेति।इहकर्तृकर्मणीद्वेभूकृञौचद्वौतयोर्यथासंख्यंप्राप्तंस्वीकृतञ्चतथैववृत्तिकृता।अनुसृतञ्चतदेवन्यासकारहरदत्तमाधवादिभिः।एवञ्चप्राचापितथैवोक्तम्।
तद्व्याख्यातृभिस्तथैवानुमोदितन्तदेतत्सर्वंनादर्त्तव्यमितिध्वनयन्नाह।यथासंख्यंनेष्यतइति।एतच्चयथासंख्यसूत्रेभाष्यएवस्पष्टमितिभावः।स्यादेतत्।च्व्यर्थयोरितितावत्
द्वैवसूत्रेभाष्यवार्त्तिकयोःस्पष्टम्।एवञ्चयथासंख्यनिराकरणस्यफलन्दुर्वचम्।नहिभवतेःकर्मणिसंभवः।प्रायेणाकर्मकत्वात्।प्राप्त्यनुभवादिषुसकर्मकत्वेपिच्व्यर्थासङ्गतेः।नापि
करोतेःकर्तरिसंभवः।च्व्यर्थासङ्गतेरेवेतिचेत्।तत्किंयथासंख्यसूत्रस्थंभाष्यादिकमपार्थकमितिब्रूषे।ननुनस्यगतिंपृच्छामीतिचेत्शृणु।अन्तर्भावितण्यर्थस्यभवतेःकरोतिना
कर्मकर्तृविषयस्यकरोतेश्चभवतिना तुल्यार्थतया।भवतेःकर्मणिकरोतेःकर्तरिचोपपदेखलप्रत्ययसिद्धेरेवयथासंख्यनिराकरणस्यफलमित्यवधेहि।स्यादेतत्।उपपदयो
र्मध्येपूर्वापरीभावव्यवस्थानसिद्ध्यति।कर्तृकर्मणीहिभूकृञोरव्यवहितेदृष्येते।विपरीतञ्चप्राप्नोति।तेप्राग्धातोरितिवचनेनसुदुरोःप्राक्त्वावश्यंभावात्।नचव्यवहितेपिप्राक्त्वम
स्त्येवेतिवाच्यम्।छन्दसिपरेपिव्यवहिताश्चेतिसूत्रारम्भेणह्यव्यवहितप्राक्त्वमेवार्थइतिस्वीकारात्।नचैवंखलःखित्वस्यवैयर्थ्यंस्यादितिवाच्यम्।कृद्ग्रहणेगतिकारकपूर्वस्या
पिग्रहणमितिसुदुर्भ्यांविशिष्टस्यखिदन्ततयातत्पूर्वस्याकूलमुद्रुजादाविवमुमःसंभवात्।किंचईषच्छब्दस्यगत्यादिसञ्ज्ञारहितत्वेनतेप्राग्इत्येतत्सूत्राविषयतयाव्य
वहितप्रयोगसंभवेनतत्रमुमर्थंखित्वमस्तु ॥ ७ ॥ आढ्यंभवइत्यादौईषत्पूर्वंदुःसु [illegible] मितितेप्राग्धातोरितिसूत्रस्थभाष्यस्वरसः।गत्यादीति।आदिनोपसर्गत्व
हेतिव्यवहिताश्चेतिसूत्रविषयोभाष्य [illegible] कृन्नदीसननुक्तत्वाल्लौकिकेगतिकारकेतिनप्रयोग [illegible] तिपक्षयोगनियमपक्षयोर्नफलभेदइत्याहुः ॥

इह तदभ्युपगमे इति।अधिकारादूर्ध्वं ङ्किद्वासरूपविधेरभाव एव तेन ज्ञाप्यत इति भावः।मेङ् इति।ङविशिष्टस्येत्यर्थः।इ व्यतीहारे तस्यैव वृत्तिर्न तु माङ इति भावः।समासे इति।ग
तस्यां दिष्टव्यवस्था कथं लभ्येतेति चेत्।अत्राहुः।बहुलग्रहणानुवृत्त्या दुराढ्यंभवमित्यादिभाष्योदाहरणाच्च इष्टव्यवस्थासिद्धिरिति।तदेतत्सकलमभिप्रेत्याह।कर्तृकर्म
णीचेति।भवतेः कर्तर्युदाहरति।अनाढ्येनेति।कर्मणि तु अनाढ्य आढ्यो भूयत इति विग्रहः।भाव्यत इति तदर्थः।एवमग्रेऽपि विग्रहद्वयमुन्नेयम्।

यत्तु प्राचा अदुराढ्येन दुराढ्येन भूयत इत्यादि विगृहीतम्।तन्न।ह्यर्थविशेष
कस्य दुरः आढ्यशब्देन सह सामर्थ्याभावात् समासायोगात्।प्रत्युदाहरणे तु ते प्राग्धातोरित्यस्य निर्बाधत्वादाह।सूप्यत इति।काशिकायान्तु स्वाढ्येन भूयत इत्युक्तन्त
त्वामादिकमिति हरदत्तः।क्तिच्क्तौ।प्राचा तु क्तिच्क्तौ चेति पठित्वा क्तिच्कञ्च स्यादिति व्याख्याय यदुक्तिः क्तिचा बाधा माभूदिति पठितन्तदाकरविरोधादुपेक्ष्यम्।क्ति
चश्चकारेन क्तिचो तिविशेषणार्थमिति प्राञ्चः।तन्न।एकानुबन्धकपरिभाषयैव क्तिनोऽप्राप्तेः सिद्धेरिति हरदत्तः।यत्तु वदन्ति तितुत्रेत्यत्र क्तिन्क्तिचोः सामान्यग्रहणार्थ
श्चकारः अन्यथैकानुबन्धकत्वात् अस्यैव ग्रहणं स्यान्न क्तिन इति।तन्न।तितुत्रेति सूत्रे नुबन्धविशिष्टरूपानुच्चारणेनोक्तपरिभाषाया उक्तिसंभवस्यैवाभावात्।एतेन तितुत्रे
ति सूत्रे एकानुबन्धकत्वात् क्तिच एव ग्रहोत ततश्च रोदितीति इण्न स्यात् इति शङ्का।कृतीत्यनुवृत्त्या तत्समाधानञ्चेति द्वयमपि प्रत्युक्तम्।भूतिरिति यद्यपीह परत्वात् श्र्युकः कितीत्येव दूषणनि
र्धोन्याय्यः।तथापि वन्तितन्त्योरावश्यकत्वात् फले विशेषाभावाच्च तितुत्रेत्युपन्यस्तम्।यन्तिरित्यादि।यम उपरमे।रम क्रीडायाम्।वनु याचने।तनु विस्तारे।अलङ्कृञोः।पूजार्थ
मिति।ननु विकल्पार्थमस्तु।अलंकृदित्वाऽलंरोदनेनेति रूपद्वयं हीष्यत इति चेन्न।।वासरूपन्यायेनैव सिद्धेः।ननु स्युटि वासरूपन्यायो नास्ति।क्तल्युट्तुमुन्खलर्थेषु नेति सि
द्धान्तात् इति चेन्न।क्तल्युडादयोऽपवादभूताः खलाद्यं नित्यं बाधन्त इति हि तस्यार्थः।इह तु ल्युटोऽपवादः क्त्वेति वैषम्यात्।ननु प्रैषादिषु कृत्यवचनेन त्वधिकारादूर्ध्वं वासरूपविधि
र्नावश्यमस्तीति ज्ञापितमिति चेत्।किं ततः।इह तदभ्युपगमे बाधकाभावात्।अलन्दत्त्वेति।अपात्रेन देयमित्यर्थः।उदीचाम्।मेङः कृत्वा त्वस्यायं निर्देशो नानुबन्धकृतमनेजन्तत्वमिति
ज्ञापयति।तेन पुरुषस्याद्वेषो व्यद्वाविति पर्युदासः सिद्ध्यति।अयमित्येति।समासेन नञ्पूर्वे इति वक्ष्यमाणेन क्त्वो ल्यप् ॥ तिसमासे इत्यर्थः ॥

परावरेति।अवरशब्दोऽत्रपूर्वत्वनिवाची।परावरशब्दयोःसंबन्धिशब्दत्वाद्यदपेक्षंपरावरत्वंगम्यतेतत्रोपरावराभ्यांयोगोबोध्यः।सचक्रियाद्वारकत्वे नसाक्षाद्ध।क्रिययामवां
स्यन्तरग्रहणे।तत्रगृहस्यक्रियाद्वारकःसंबन्धोययाक्रिययावातद्वाचकात्क्त्वाः आद्योदाहरणेस्थितइतिशेषः।पूर्वत्वादिकञ्च त—त्तत्स्वरूपतत्तदवधिभेदेनभिन्नन्तदाह।
दक्षिणदेशस्थानामिति।प्राप्तिविरहेति।प्राप्तिप्रागभावेत्यर्थः।सचसामानाधिकरण्यसंबन्धेनपर्वतकर्तृकास्थितावन्वेतितदाह।विशिष्टदेशस्यइति।फलितमाह।
अन्वेति।अत्रपरभूतयानुद्याःप्राप्येत्येतद्वारकोयोगःपर्वतस्यगम्यते।अतिक्रम्येत्युदाहरणेदक्षिणदेशस्थपुरुषकर्तृकपर्वतकर्मकप्राप्तिध्वंससमानाधिकरणान
दे।कर्तृकास्थितिरित्यर्थस्तदाह।पर्वतस्येति।भियन्ते इति।उक्तरीत्येतिभावः।साक्षात्क्रिययान्वयेत्विदमुदाहरणम्।अवेर्मासमितिविग्रहश्चाविकशब्दादुत्पत्तिरिति।
परावरयोगेच।अप्राप्येति।दक्षिणदेशस्थानाङ्ग-ङ्गामप्राप्यविन्ध्यः।गङ्गाप्राप्तिविरहविशिष्टदेशस्थइत्यर्थः।अत्रविन्ध्यात्परागङ्गेतिगम्यते।अतिक्रम्ये
ति।पर्वतस्यपरस्तादित्यर्थः।प्रागुक्तेएवविषयेअयमपिप्रयोगः।विशेषणविशेष्यसंसर्गास्तुभिद्यन्तइतिस्पष्टमेव।इहत्रिसूत्र्यांविधेयस्यक्त्वाप्रत्ययस्यय
द्यपिभावमात्रंअर्थस्तथापिद्वितीयक्रियायाःपूर्वकालत्वस्यचाभावात् । अलङ्खल्वोरितिपरापरेतिचालभ्यते।उदीचामितितुपूर्वकालत्वाभावादिनिवि
वेकः।एवञ्चेहमध्यंविहायसूत्रद्वयेअधिकारलभ्यस्यातुसंबन्धइत्येतन्नसंबन्धनीयम्।कथञ्चित्संबन्धनीयमित्याग्रहेतुअपूर्वकालार्थेवत्रिसूत्रीत्यवधेयम्॥
विग्रहो— भिन्नत्वेनज्ञानन्तदुत्तरकालिकीप्रत्ययकर्तृकोत्पत्तिरित्यर्थः।परावरत्वञ्चात्रतादृशज्ञानोत्तरकालिकत्वात्प्रत्यययोस्तत्त्वेलौकिकव्यवहारादेवसिद्धम्।असमानकर्तृक
लात्समानकर्तृकयोरित्यस्याप्राप्तिःस्पष्टञ्चेदङ्खलयवेतिसूत्रेकैयटे।द्वितीयक्रियायाइति।क्त्वाप्रकृत्यर्थक्रिययान्वितायाइत्यर्थः।पूर्वकालत्वस्यचेति।परावरेतिसूत्रविष
येसमानकर्तृकत्वस्यचाभावइत्यपिबोध्यम्।कथञ्चिदिति।परावरेतिसूत्रविषयेस्थितिक्रियामादायपरावरद्वयाद्यविषयेपिअध्याहृतक्रियामादायास्यसंबन्धसंभव
इतिभावः।परावरयोर्योगस्तत्तत्कारकक्रियायोगेनैवेतिअस्येनधात्वर्थसंबन्धइतिबोध्यम् ॥

समानकर्त्तृकत्वमिति। समानशब्द एकवाची। तन्निरूपितशक्तेर्भेदाद्विशिष्टभेदेन सादृश्यं एवञ्चैककर्त्तृकत्वं फलतीत्यन्ये। तुमर्थ इत्यनुवृत्तेर्वेति। तदनुवृत्त्याएवाङ्कर्त्रर्थत्वा
भावे बोधिते विशेष्यार्थानिर्देशात्स्वार्थे सचसंभवएवेतिभावः। किन्त्विति। अतएवभावे इत्युपेक्ष्य तुमर्थे इत्युक्तम्। संसर्गश्चेति। भोजनोत्तरकालिकं व्रजनमिति बोध इति भावः। विशे
समानकर्त्तृकयोः। इह धात्वधिकारेपि समानकर्त्तृकत्वं क्रिययोरेव संभवतीत्याशयेनाह। धात्वर्थयोरिति। निर्द्धारणे षष्ठी सप्तमी वा। पूर्वः कालो यस्यार्थस्य तस्मि
न्नित्यर्थः। क्त्वास्यादिति। सच भावे अव्ययकृत इति वचनात्। तुमर्थ इत्यनुवृत्तेर्वा। न च सोपि भाव इति कथं लभ्यतामिति वाच्यम्। तुमर्थे सेसेनिति ज्ञापकेन तल्लाभात्। तथा
हि। कर्त्तरि कृदिति कर्त्तरि प्रसक्तौ तुमर्थ इत्युच्यते। तथा च तुमर्थो न कर्त्तेति स्थिते भाव एव पर्यवस्यति। अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति न्यायात्। अयमिह निष्क
र्षः। भावोपि घञादाविव नेह सिद्धावस्थः किंतु साध्यावस्थः स च धातुनैव लब्धः। क्त्वाप्रकृत्यर्थभूता क्रिया च क्रियान्तरं प्रति विशेषणम्। धातुसंबन्धाधिकारात्। संसर्गश्चे
ह सामानाधिकरण्यमुत्तरकालत्वञ्च। न त्वत्र संसर्गविशेषे तात्पर्यग्राहकाः क्त्वाणमुलादयः। अत्र समानकर्त्तृकयोरिति सूत्रांशेन सामानाधिकरण्यमुपनिबद्धम्।
धातूपात्तव्यापाराश्रयस्य कर्त्तृतया तथा पर्यवसानात्। निर्द्धारणविभक्त्या च द्योत्यत्वं स्फुटीकृतम्। अन्यथा हि समाने कर्त्तरीत्येव ब्रूयात्। निर्द्धारणविभक्तिबलादेव पूर्व
काल ¯ इत्यस्य बहुव्रीहित्वं निर्णीयते। निर्द्धारणस्य सजातीयविषयतानि¯यमेन निर्द्धार्यमाणस्य क्रियात्वलाभात्। अत एव तत्र विद्यमानादिति व्याख्यानम्। एवञ्च कर्म
धारयमाश्रित्य पूर्वस्मिन्काले वास्यक्त्वा भवतीति केषाञ्चिद्व्याख्यानमयुक्तमेव। किञ्च पूर्वकालो न वाच्यः तद्विशेष्यकबोधापत्तेः। न चेष्टापत्तिः। क्रियाप्राधान्यविरहेण आभी
क्ष्ण्यादिलाभावापत्तेः। न च गुणीभूतक्रियामाश्रित्य तदिति वाच्यम्। पाचकादावतिप्रसङ्गात् ॥ ७ षणनिष्ठः संसर्ग इति मतं पूर्वकालकं व्रजनमिति बोध इत्यूह्यम्।
समानकर्त्तृकेति। स च कप्रत्ययदर्शनात् बहुव्रीहिरिति भावः। बहुव्रीहित्वमिति। व्यापाराश्रयान्यपदार्थ इति भावः। तद्विशेष्यकमिति भोजनपूर्वकालकं व्रजनमिति रीत्येति भावः

२ पूर्वकालः संसर्गः। भोजन

सत्र इत्यविषयेइति।क्रियासमभिहारादिलोटीसर्पः।लाघवाच्चेति।परंपरयाचप्रत्ययार्थस्येतरत्रान्वयापसंबन्धान्तरकल्पनागौरवमितिभावः।यद्यपिप्रत्ययार्थस्यप्राधान्यमिति
ननियमआख्यातेव्यभिचारात्।तथापिकर्मधारयत्वेपूर्वकालेइत्यस्यैवपदार्थभूतइत्येवसिद्धेःभूतत्वस्यसमभिव्याहृतक्रियापेक्षत्वेनवपूर्वकालवत्इतिदिक्।परेतुपूर्वकालेइतित
द्गुणसंविज्ञानोबहुव्रीहिःपूर्वकालविशिष्टक्रियावाचकाद्धातोरित्यर्थःएवञ्चपूर्वकालप्रकारकोबोधः।वर्तमानकालादेर्लडादिवत्तस्यक्त्वाद्योतकः।अतएवपूर्वंभुङ्क्तेपश्चाद्व्रज
तीत्यत्रनक्त्वा।पूर्वशब्देनक्रियागतपूर्वकालस्योक्ततयाधातोःपूर्वकालविशिष्टक्रियावृत्तित्वाभावात्।पूर्वकालेद्योत्येहिक्त्वानतुविषयेइतिभाष्यकैयटयोःस्पष्टम्।उक्तार्था
नामितिन्यायस्यतुनात्रविषयःतस्यानित्यत्वात्एतदेवध्वनयताभाष्यकृतोक्तम्।इहकस्मान्नभवतिआस्यतेभोक्तुमिति।अन्यथातत्रतुमुनातादर्थ्यबोधद्वारापूर्वकालत्वस्यासनेद्यो
अपिच।एवंसतिधातुसंबन्धइत्यस्यबाधापत्तिः।नचपरंपरासंबन्धस्तस्यार्थः।अधिकृतस्यतस्ययथाविध्यनुप्रयोगइत्यादिसूत्रद्वयविषयेसाक्षात्संबन्धपरतायादृष्टत्वात्।
तथात्वेलाघवाच्च।अतएववाक्यार्थस्यानापन्नसंबन्धएवेहद्योत्येनतुपदार्थभूतइतिकर्मप्रवचनीयाद्वैषम्यम्।तत्रहिउपपदविभक्तेःषष्ठ्यपवादतयासंबन्धस्यपदा
र्थत्वेसिद्धेक्रियाद्योतकोनायंनसंबन्धस्यवाचकः।नापिक्रियापदाक्षेपीसंबन्धस्यतुभेदकइतिस्वीकृतम्।किंचपूर्वत्रक्त्वाप्रत्ययस्यकालोनवाच्यइतितदैकरूप्यायेहा
पितथैवोचितम्।नहिसप्तमीनिर्देशमात्रेणवाच्यत्वंलभ्यते ॥ ७ नित्यत्वात्तदप्रवृत्तेःतदसङ्गतिःस्पष्टैव।उक्तञ्चकैयटेनआसेःपूर्वकालत्वाद्भावस्यचप्रतिपाद्यत्वात्[illegible]भो
क्तुमितिप्राप्नोतीतिभावइति।वासरूपन्यायेनलडितिसमाहितमित्यन्यत्।क्त्वाभावेपूर्वकालविशिष्टक्रियावाचकत्वन्तुसमभिव्याहारादितितदाशयः।नहितत्रासनोत्तरकालिकं
भोजनमितिबोधःकस्यापिसंमतःभोजनफलकंपूर्वकालमासनमितिबोधस्तुभाष्यसंमतः।अन्येभ्योभोक्तृभ्यःपूर्वंभुङ्क्ते।अन्येभ्योव्रजितृभ्योनन्तरंव्रजतीत्यर्थेतुपूर्वंभुक्त्वापश्चाद्व्रज
तीत्युचितमेवेत्याहुः।समानकर्तृकत्वन्तुनक्त्वार्थःसामानाधिकरण्यसंसर्गेणान्वयेनतस्यार्थाल्लाभेनान्यलभ्यत्वात्तथाभुक्त्वैवतृप्तोनपीत्वाधीत्यतिष्ठतीत्यादौ[illegible]नादि
भानेपिमानान्तरगम्यत्वान्नतस्यक्त्वाद्योत्यता ॥

त.श.
३८९

इतिन्यायादिति। यत्तु अनेनन्यायेनाख्यातोपस्थितक्रियाविशेषणत्वे एवायंसाधुरिति। तन्न तृज्वत्क्रोष्टुरितिसूत्रस्थ गाहस्यत्वंचोपकाशत्वमितिभाष्यप्रयोगे शास्त्रशब्दप्रति
पादकशास्त्रकरणकशासनक्रियापेक्षयोर्वैकाल्याश्रयः प्रत्ययइतिकैयटोक्तेः। अतएवभुक्त्वागतइत्यादिप्रयोगोपपत्तिः। क्रियान्तरान्वितक्रियायांनान्त्वप्रत्ययस्यैवमूलतात्पर्यस्त
उदोनूर्ध्वकर्मणि। कर्तृस्थे चाशरीरेकर्मणि। प्रथनेवावशब्दे। गोत्रचरणात्श्लाघात्याकारतद्वेतेषुइत्यादौसहस्रशोव्यभिचारात्। तत्रानुशासनत्वस्यत्वद्विषेयावगति
राक्षेपादेवभवत्वन्नत्वलभ्यत्वमितियदितर्ह्याह। पितुल्यमितिदिक्। हित्वमिति। ननुअमीषांब्राह्मणानांपूर्वमानयेत्युक्ते मध्यमोनानीयतेतथेहापिबहुक्रियासमभिव्याहा
रेमध्यमक्रियावाचकात्प्रत्ययोनस्यादितिचेत्तमैवम्। इहहिआख्यातवाच्यक्रियाप्रधानम्। तांप्रतिक्त्वान्तोपस्थिताःसर्वाएवविशेषणम्। ननुतासांपरस्परसंबन्धः
गुणानांपरार्थत्वादितिन्यायात्। अतएवनियतप्रयोगः स्नात्वाभुक्त्वापीत्वाव्रजति। पीत्वास्नात्वाभुक्त्वाव्रजति। इत्यादि। स्वरतिसूतीतिविकल्पेप्राप्ते आह। स्वरत्यादेरिति। स्कु
न्त्वेति। एकाचइतिनेट्। मृडमृदा। मृडसुखने। मृदक्षोदे। गु[illegible]रिवेष्टने। गुधरोषे चा। कुषनिष्कर्षे। क्लिशहिंसायांदिवादिः। क्लिशूविबाधनेक्र्यादिः। वदव्यक्तायांवाचि। वसनि
वासे। उषित्वेति। वसतिक्षुधोरितीट्। यजादित्वात्संप्रसारणम्। शासिवसतीतिषः। नोपधात्। अन्तग्रहणंस्पष्टार्थम्। कोथित्वारेफित्वेति। कुथपूतीभावे। रिफकत्थनयुद्ध
निन्दाहिंसादानेषु। इहरलोव्युपधादितिविकल्पोपिनभवति। नोपधग्रहणसामर्थ्यात्। लुञ्चित्वेति। लुञ्चअपनयने। ऋतित्वेति। ऋतिःसौत्रोघृणार्थः। तस्मादार्धधातुकवि
षयेइयङोविकल्पनात्तदभावेकित्वमनेनविकल्प्यते। तृषिमृषि। ञितृषपिपासायाम्। मृषतितिक्षायाम्। कृशतनूकरणे। काश्यपग्रहणंपूजार्थंवेतिहिवर्तते। उ
दितोवेतिविकल्पेप्राप्तेआह। अञ्चेरिति। अञ्चित्वेति। नक्त्वासेडितिकित्वाभावान्नलोपोन। ॥ यदुक्तंभाष्येःनक्त्वासेडितिवक्तव्यम्। नवक्तव्यंसर्वेषामत्रव्रजिक्रियांप्रतिपौर्वकाल
त्वमतएवानियतःप्रयोगइतिनचरुफन्रफत्वसाधारण्यार्थंनोपधग्रहणमितिवाच्यंतस्मिन्कृतेऽपिनक्त्वेतिनिषेधेनाकित्वस्याशेनदुर्वारतयाद्वितीयस्थानेनविकल्पेनक्त्वाकि
त्वमस्यदुर्वारतयाचविशेषाभावात्। नचचुरादीनामनित्यण्यन्ततयाणिजभावेएषप्रसंगइतिअस्यचरितार्थमितिवाच्यम्। सर्वेषामनित्यण्यन्तत्वेमानाभावात् ॥

एभः
३८९

तत्पूर्वपदं यस्येति। क्तान्तोत्तरपदकस्येत्यर्थः। तेन परमकृतेत्यादौ लालाकालकइत्यादौ मयूरव्यंसकादिसमासेन नदोष इतिभावः। अनञ्इत्वे च सिद्धे पूर्वग्रहणमर्थमिति ध्व
नितमनञोवापरस्येतिभाष्येण ———— ।क्रमश्चक्त्वीति। अनुनासिकस्येत्यस्याप्युपलक्षणमिदम्। इट्त्वस्याप्यभावइति। तादिकित्वाभावेनत्वपिकृतेत इत्याह्वः।
एवञ्चेहनाञ्चेः पूजायामितिनलोपोनेतिप्रसादोक्तिर्निर्विषया। जॄव्रश्च्योः। जॄइत्यस्मात्श्र्युकः कितीतिनिषेधे प्राप्तेव्रश्चेरुदित्वाद्विकल्पे प्राप्तेवचनम्। खात्वाखनित्वे
ति। उदितोवेतिवेट्। जग्ध्वेति। व्यरोभःरीतिपाक्षिकोधलोपः। समासे — नञ्। नञ्सदृशमव्ययन्तत्पूर्वपदंयस्येतिव्याचष्टे। अव्ययेति। प्रकृत्येति। प्रशब्दः क्त्वा
कृत्यर्थगतं प्रकर्षं द्योतयन् कुगतिप्रादयइतिस्कान्तेननित्यंसमस्यते। षत्वन्तुकोरसिद्धः। कोसिचदिति। एङः पदान्तादतीतिपूर्वरूपमेकादेशः। तस्यान्तादि
वच्चेतिपरादिवद्भावादोसिचदितिपदम्। तेनसकारस्यापदादित्वात्सात्पदाद्योरितिनिषेधाभावात्षत्वंप्राप्तंएकादेशस्यासिद्धत्वेअकारेणव्यवधानान्नइणः
परत्वाभावान्नभवति। प्रासङ्गिकंषत्वमुदाहृत्यप्रकृतंत्व्यपिकार्यमुदाहरति। अधीत्येति। विधायेति। दधातेर्हिः। प्रदाय। दोदद्घोरितिन। प्रखन्य। जनसनखना
त्वेन। प्रस्थाय। द्यतिस्यतीतीत्वम्। प्रक्रम्य। क्रमश्चक्त्वीतिदीर्घोन। आपृच्छ्य। प्रदीव्य। च्छ्वोःशूठौ। नाइड्भावस्तुप्रखन्यप्रदीव्येत्यादावेवबोध्यः। नल्पि। कश्चन्द्रे
निपीययस्येति। पीङ्पानेदिवादिरित्यदोषः। इहप्रशायप्रस्थायेत्यत्रशाछोरन्यतरस्यामितिप्राप्तस्येत्वस्याप्यभावोबोध्यः। विगणय्येति। नल्विहणोकृतस्यालो
पस्यपूर्वस्माद्विधिंप्रतिस्थानिवद्भावात्लघुपूर्वात्परत्वंनास्ति। नचारम्भसामर्थ्यम्। अनुगमय्येत्यादौमित्त्वचरितार्थत्वात्। अत्रोच्यते। पूर्वस्माद्विधौस्थानिवत्त्वम
नित्यंनिष्ठायांसेटीतिलिङ्गात्। तथाहि। तत्रसेटीतिपदंनतावदनिङ्व्यावृत्त्यर्थम्। णिजन्तात्तदसंभवात्। ननुसञ्ज्ञापितःपशुरित्यत्रयस्यविभाषेतीण्निषेधेसंभ
वत्येवानिट्त्वम्। सनीवन्तेतिविकल्पितेट्कत्वादितिचेन्न। यस्यविभाषेत्यत्रएकाचइत्यनुवृत्तेः। अन्यथादरिद्रितइतीण्नस्यात्॥ ऽ ल्यपः पूर्वमपिनाम्नरङ्गानपीतिन्याया
त्। आरम्भसामर्थ्यमिति। तेनचस्थानिवद्भावकृतव्यवधानेपिप्रवृत्तिरितिभावः। दरिद्रितइति। तन्नियतिदरिद्रानीतिविकल्पितेट्त्वादितिभावः॥

स·सु·
३९०

भाष्योदाहरणबलेनेति। एकाचउपदेश इत्यत्र विहितविशेषणपक्षे सेटीति चिन्त्यप्रयोजनमिति तद्भावः॥ अथवेत्यादि। अचः परस्मिन्निति सूत्रस्य कैयटानुसारेणोक्तं वस्तुतस्
चिन्त्यमिति प्रागेव निवेदितम्। दिगिति। दिगर्थस्तु लघुः पूर्वो यस्मादिति बहुव्रीहावव ॱवधिमतः साजात्येन वर्णस्यान्यपदार्थतया वर्णजातिग्रहणान्न दोषः न चैवं प्रचिकीर्षी
तस्मात् कालावधारणार्थं सेड्ग्रहणम्। इट्कृते णिलोपो न तु ततः प्रागिति। अन्यथा कारितमित्यादौ णिलोपे कृते एकाच उपदेश इतीण्निषेधः स्यादिति। यदि तु
पूर्वस्माद्विधौ स्थानिवत्त्वं तर्हि णिचा व्यवधानान्निषेधप्राप्तिरेव नास्ति इति सेटीत्यनर्थकं सत्तस्यानित्यतां ज्ञापयतीति स्थितम्। एतच्च वस्वेकाजिति सूत्रे कैयटे
नानितेरन्त इति सूत्रे हरदत्तेन च स्पष्टमेवोक्तम्। माधवस्तु परिवृढय्य गत इत्यत्र आभीयत्वेनासिद्धतामाशङ्क्य व्याश्रयत्वेन परिहृत्य पूर्वस्मादपीति स्थानिवत्त्व
माशङ्क्य प्रवेभिदय्य प्रस्तनय्येत्यादि भाष्योदाहरणबलेन तदभावमाह। अथवा पूर्वस्मादपीति पञ्चमीसमासपक्षस्त्यज्यतान्तदीयोदाहरणानां बेभिदितः माथि
तिकः अपीपचन्नित्येषां प्रकारान्तरेणैव निर्वाहस्य प्रागेवोक्तत्वाच्छब्दकौस्तुभे प्रपञ्चितत्वाच्चेति दिक्। प्रणमय्येति। मितां ह्रस्वः। प्रवेभिदय्येति। भिदेर्यङन्ताल्
णिचि अल्लोपे यस्य हल इति यलोपः। न च ह्रस्वयलोपाल्लोपानामाभीयत्वेनासिद्धत्वाल्लघुपूर्वात्परो णिर्नास्तीति वाच्यम्। व्याश्रयत्वात्। ह्रस्वादयो हि णौ णेरया
देशस्तु ल्यपि परत इति। विभाषापः। आप्नोतेरिति। इङादेशस्य तु लाक्षणिकत्वान्नेह ग्रहणमिति भावः। प्राप्येति। एतेन अयमयोगिवधूवधपातकैर्भ्रमि
मवाप्य दिवः खलु पात्यते इति व्याख्यानम्। अवाप्येत्यस्यावाप्येत्यर्थात्। एतेन तत्रान्तर्भावितण्यर्थतेति क्लेशमनुभवन्तः परास्ताः। कथमिति। ल्यबादेशस्य
स्थानिभूतः क्त्वाप्रत्ययोऽत्र दुर्लभः। तद्विधौ। पूर्वकाले तु क्त्वः। न चेह तदस्ति पूर्वं ह्यसौ स्वपिति पश्चाद्व्यादत्ते यदैव हसति तदैव संमीलयतीति प्रश्नः ॥
सादौ दोषः। जातिग्रहणे नैकग्रहणेऽपि वर्णद्वयस्यैव ग्रहणात्। अत एव सन्निमीमेत्युत्तरं दम्भ ईच्च आप्ज्ञप्यृधामिति दम्भेरपीत्वाभ्यां न लोपसंयोगादिलोपाभ्यां सिद्धं दम्भ इच्चे
ति इत्वविधानं चरितार्थं इत्यादौ इसन्मेति वर्णत्रयसत्त्वेन कित्वानापत्तेः। अद्उअपेहीत्यादावपि द्वयोरे[illegible]वापत्तौ आकरतात्पर्यम् ॥

३९०

अन्येभ्यो भोक्तुम्भ्य इति। साधनपौर्वकाल्यविषयाणामेवाग्रादीनां ग्रहणमत्रेति समानकर्तृकयोरिति सूत्रे भाष्ये कैयटाभ्यामुक्तत्वादिति भावः। णमुल्लिति। तत्सूत्रविहितत्वो
पलक्षणम्। स्वादुङ्कारमिति। खितीति ह्रस्वे मुमिति भावः। एते दोषा इति। ङीषि स्वादीङ्कारमिति प्रसज्येतेति विशेषः। न च प्रत्ययसंनियोगेन मुमो विधानादन्तरङ्गत्वेन पूर्वं
समाधत्ते। व्यादानेति। एतेन ईश्वरः सर्वव्याप्यवर्तते। ज्ञात्वेति। इष्टी त्वायपि व्याख्यातम्। श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते। इत्यादौ समानकर्तृकतानि
र्वाहार्थं स्थितस्येत्यादि यथासंभवमध्याहार्यम्। पायंपायमिति। आतो युक्। नादीर्घ इति। गमेर्ण्यन्तात्णमुलि मितां ह्रस्व इति ह्रस्वे च कृते वा दीर्घ इत्यर्थः। ण्य
न्तस्यांशिति। यत्तु प्राचा ण्यन्तजागर्तेश्चिण्णमुलोर्वा वृद्धिरिति मतमुपन्यस्तम्। तदपाणिनीयमिति भावः। न यदि। अनाकाङ्क्ष इति। पचाद्यजन्तेन नञ्समासः।
न दृश्यति। नाकाङ्क्षे चेदिति। इहेति। नन्वनन्तरस्येति न्यायात् णमुल् माभूत् क्त्वा तु सूत्रान्तरेण स्यादेवेति चेन्न। पूर्वकाले यत्प्राप्नोति तन्नेति व्याख्यानेन प्र
करणापेक्षयैव प्रतिषेधाभ्युपगमात्। विभाषाग्रेप्रथमपूर्वेषु। यद्यप्यग्रशब्दो देशविशेषवचनोऽप्यस्ति प्रभोरग्रे भुङ्क्ते इति तथापीह कालविशेषवाच्येव
गृह्यते प्रथमशब्दसाहचर्यात्। अग्रे इति सप्तम्यन्तस्यानुकरणम्। अत एव विभक्तेर्लुङ्न कृतः। अस्य चामीयमिति यत्। अग्रेभोजमिति। अन्येभ्यो भोक्तृभ्यः पूर्वं
भुङ्क्ते इत्यर्थः। यदि तु अग्रेप्रभृतिभिर्व्रजनादिक्रियापेक्षं भुज्यादेः पूर्वकालत्वमुच्येत तदा क्त्वाणमुलौ न स्यातामेव ताभ्यां द्योत्यस्य पूर्वकालत्वस्य अग्रेप्रभृति
भिरेव निर्णीतत्वात्। स्वादुमीत्यर्थग्रहणं व्याख्यानादित्याह। स्वाद्वर्थेष्विति। मान्तत्वमिति। ननु मास्तु णमुल्त्वं मुमेवानुवर्तताम्। अकृते हि यदिति मुम्भविष्यते
वञ्च मान्तत्वनिपातनं व्यर्थमिति चेत् मैवम्। तथाहि। सति च मान्तस्य मुम्न स्यात्। अनव्ययस्येति वचनात्। ततश्च स्वादुङ्कारमित्यत्र चौ चेति दीर्घः स्यात्। संपन्ना
दिषु अस्य च्वाविती त्वं स्यात्। किंच स्त्रियां वोतो गुणवचनादिति ङीषपि स्यात्। ततश्च स्वादीकारमिति प्रसज्येत। मुमः स्वरूपेण विधाने त्वेते दोषाः अतः स्वादुमीति रूपं
निपात्यते ॥ ७७ प्रकृतौ नैते दोषा इति वाच्यम्। सुबन्तस्योपपदत्वेन प्रियवशवदादिषु ततः प्रवर्तते सौ विभक्त्यन्तादिति भाष्योक्तरीत्या स्वार्थद्रव्यलिङ्गसंख्यानाकमिकत्वेन सुपः

बा° १ ऊणः प्रत्यादेशादिति भावः ॥

निपात्यतइति।ननुनिपातनमाश्रित्यखमुञेवविधीयता।किंणमुलेतिचेन्न।खमुञिअन्यथार्थमेवनिपातनंस्यादितिङीप्बाधानापत्तेः।णमुलिलपूर्वंविधीयमानन्तत्वंसर्वार्थंउत्तरार्थञ्चणमुलितिकैयटादयः।भावप्रत्ययमात्रेति।एतत्प्रकरणस्यभावप्रत्ययमात्रविषयकंनिपातनमितिहरदत्तोक्तेरितिभावः।परेतुणमुल्विषयमेवनिपातनं अतएवास्वादुङ्कृत्वेतिभाष्यंसङ्गच्छते।अन्यथासाक्षात्प्रभृतिषितिसूत्रभाष्योक्तरीत्यामान्तत्वनिपातनमित्यस्यस्वादुशब्दस्यस्वादुमादेशइत्यर्थेलिङ्गविशिष्टपरिभाषया ततश्चानजन्तत्वान्नेत्वदीर्घौनवाङीष्निपातनञ्चभावप्रत्ययविषयकम्।तेनस्वादुङ्कृत्वेत्यपिसिद्धम्।व्यर्थत्वादिति।निष्प्रयोजनत्वादित्यर्थः।तदेवदर्शयति। इत्थंभुङ्क्तइत्यर्थइति।फलितार्थकथनमेतत्शाब्दबोधेतुवैलक्षण्यमस्त्येव।तथाहिक्रियासामान्यवचनःकरोति।तदीयश्चप्रकारोन्यथादिशब्दचतुष्टयेनोच्यते। एवञ्चान्यथाकारमित्यादिभिश्चतुर्भिःप्रकारविशेषविशिष्टाक्रियाबोध्यते।साचभुजुपात्तफलविशिष्टक्रियांप्रतिविशेषणतयासंबध्यते।एकस्यापि।क्रियायाविशेषणोपरागेणभिन्नायाविशेषणविशेष्यभावसंभवात्कथन्तर्हिसिद्धाप्रयोगश्चेदित्युक्तमितिचेत्।अनतिप्रयोजनत्वादितिगृहाण।नत्विहसर्वथानिष्फलत्वमिति। अभिधेयशून्यत्वमितिवाभ्रमितव्यम्।भेदनिबन्धनस्यपौर्वकालस्यसमानकर्त्तृकत्वस्यचाभावेणमुलएवदुर्लभत्वात्।धातुसंबन्धाधिकारबाधापत्तेश्च।अथापिवचनसामर्थ्याण्णमुल्।अपार्थकमेवणमुलन्तंप्रयोक्ष्यतइतिब्रूषेएवमपिवासरूपविधिलभ्यःपाक्षिकःक्त्वानसिद्ध्येत्।नचेष्टापत्तिः।भाष्यकृतैवतत्रप्रयुक्तत्वात्। एतेनव्याकरणा — धिकरणेअन्यथाकृत्वाविदितंअन्यथाकृत्वापरिहारः।कथङ्कृत्वाबाधकंइत्यादिभाष्यप्रयोगानुदाहृत्यतेषांप्रामादिकतांवदन्तोभट्टपादाअपिपूर्वपक्षेस्थित्वाप्रौढिमात्रञ्चक्रुरित्यवधेयम्।नतुतदुक्तिःपारमार्थिकत्वेनग्राह्या।सूत्रकारवचनबलेन णमुलन्तंअपार्थकंप्रयोक्तव्यमितिस्वीकारेभाष्यकारवचनबलेनक्त्वान्तेपितथात्वस्यसुवचत्वात्॥ ७७ तस्यापितद्वादेशापत्तावसागतिःस्पष्टैवेतिहरदत्तोक्तिरसङ्गता।स्वान्दुङ्कृत्वेत्यस्यस्वादुमन्नंकृत्वेत्यर्थः।उपपदत्वाभावान्नसमासइत्याहुः।इत्यपीति।स्वादुङ्कारमित्यपेरर्थः।विशेषणतयेति।अभेदेनेत्यर्थः।सर्वथाभेदाभावेविशेषणविशेष्यभावासंभवादाह।एकस्याअपीति ॥

क्वाप्यपार्थकतानेति। अर्थवत्त्वे संभवति तथा कल्पनानुचितात्वेत्यपि बोध्यम्। इत्थमेवेति। सत्यानृतमिथुनीकरणं विना लोकव्यवहारासिद्धेरिति भावः। दर्शनविषयीभूता इति। क्वाक वस्तुतः क्वाप्यपार्थकतानेत्युक्तत्वात्। नच ओपाधिकभेदमादाय स्वाप्रत्ययनिर्वाहस्य सांप्रदायिकत्वं शङ्क्यम्। भाष्यकाराद्यधिकस्य सांप्रदायिकस्याप्रसिद्धत्वात्। तद भिप्रायस्य यथा तथयोर्स्त्विति सूत्रे हरदत्तादिभिरित्थमेव विवृतत्वात्। उत्तरमीमांसायापि अन्योन्यस्मिन् अन्योन्यात्मकतामध्यस्य सत्यानृते मिथुनीकृत्य लोकव्यवहार इति भाष्यकारैः प्रयुक्तत्वात् तत्रापि विवरणादावित्थमेव समर्थितत्वाच्चेति दिक्। शिरोऽन्यथाकृत्वेति। इह हिकरोतेरभावे भुजिक्रियागत एव प्रकारो गम्यते न तु शिरसोऽन्यथाकरणम्। अत आवश्यककरोतिरिति भावः। यथाकारमिति। प्रष्टुमनर्हः सन् यदि पृच्छति तदेदमुत्तरम्। अत्रापि वासरूपन्यायेन पक्षे क्त्वा बोध्यः। कन्यादर्शनमिति। अत्र दर्शनविषयीभूतानां सर्वासां कन्यानां वाक्यार्थेऽन्वयात्साकल्यं बोध्यम्। सर्वा इति। दर्शनविषयीभूताः सर्वा इत्यर्थः। अतिशयप्रतिपादनपरमेतत्। जानातीत्यादि। सत्तार्थस्य विदेरकर्मकत्वान्नेह ग्रहणम्। किन्त्वितरेषामिति भावः। यावति विन्द— जीवोः। विदेर्लाभार्थस्यानुकरणन्तस्य विन्दतीत्यादौ शे मुचादीनामिति नुमस्ति। यावल्लभत इति। असाकल्यमनेन दर्शयति। साकल्ये हि पूर्वेणैव सिद्धम्। चर्मोदरयोः। कर्मणीत्येवेति। एवञ्च पूरेरिति ण्यन्तस्य निर्देशः। न तु केवलस्याकर्मकत्वादिति भावः। उदरमिति। उदरपूरणविशिष्टभुजिक्रियार्थः। इह पूर्वकाल इति न संबध्यतेऽसंभवात्। अप्रतीतेश्च। एवमन्यत्रापि यथासंभवं बोध्यम्। चेलेक्नोपेः। आख्यानादर्थग्रहणमित्याह। चेलार्थेष्विति। चेलक्नोपमिति। यथा वर्षणे चेलानि शब्दायन्ते तथा वृष्ट इत्यर्थः। निमूलमिति। निर्गतं मूलमस्य निमूलम्। सह मूलेन समूलम्। विशेषणविशेष्यभाव इति णमुल् प्रकृत्या अनुप्रयुज्यमानधातुना च यद्यप्येक एवार्थ उपस्थितस्तथापि उपपदार्थविशिष्टो णमुल्प्रकृत्यर्थोऽनुप्रयोगार्थं प्रति विशेषणमिति भावः। स्नेहने पिषः। शुष्कचूर्णेति सूत्र एव स्नेहनं ग्रहणं न कृतम्। तत्र हि कर्मणि दृशिविदोरिति सूत्रात्कर्मणीत्यनुवर्त्तते इह तु पूर्वसूत्रात्करण इति। सञ्ज्ञायाम्। अनधिकरणार्थमारम्भः। मूलकेनोपदंशमिति। अयमर्थः। मूलकेन भुङ्क्ते। किं कृत्वा उपदंश्य किमुपदंश्य अर्थान्मूलकमिति। वचनसामर्थ्यादिति ॥ ७ ल्यमपि तदपेक्षयैव बोध्यम्। शब्दायन्ते इति। धातूनामनेकार्थत्वाद्द्रीद्रीकरणं क्नोपेरर्थ इत्यन्ये। प्रतिविशेषणमिति। अत्र प्रकरणे शाब्दबोधमात्रीयङ्किंचिद्वैलक्षण्यं। क्त्वणमुलन्तानामनुशासनबलात्साधुत्वं बोध्यम् ॥

तर्हिकरणेइत्येवेति।एतेनदन्तैःउपदंशम्भुङ्क्ते इत्यादौवचनस्यचरितार्थमितिपरास्तम्।नचदध्नासहसक्तून्भुङ्क्ते इत्यर्थेदध्युपदंशंसक्तून्भुङ्क्ते इत्येतदस्तिह्यर्थन्तृतीयाग्रहण
स्यचरितार्थम्।तादृशेविषये उपदंशनिरूपितार्थकर्मत्वस्यापिसत्त्वेनोपपदविभक्तेरितिन्यायेनतृतीयायादुर्लभत्वात्।नचवचनसामर्थ्यात्समासप्रत्ययाद्युपपचाव
पिमूलकेनोपदंशमित्यत्रसमासाभावपक्षेकृद्ग्रहणपरिभाषयाविशिष्टेप्रातिपदिकसञ्ज्ञापादनंसमासग्रहणकृतनियमेनवारणञ्चासङ्गतंस्यात्।प्रत्यासत्त्या
यदिहितृतीयान्तेनशाब्देअन्वयेसत्येवप्रत्ययोभवेत्तर्हिकरणइत्येवब्रूयात्।करणेहनइतिवदितिभावः।कालयतीति।कलविक्षेपेचुरादिः।दण्डताडमि
ति।तडप्रतिघातेचुरादिरेव।उपपूर्वस्यइति।सूत्रेपीडादीनांसमाहारद्वन्द्वङ्त्वा।उपपूर्वःपीडादिरितिउत्तरपदलोपीसमासइतिभावः।पुंस्त्वन्तुसौत्रम्।प
ञ्चम्यर्थेप्रथमा।कर्षेतिशपानिर्देशः।कृतोपधागुणस्योच्चारणात्।फलन्तुतुदादेर्व्युदासः।यद्यपिविलेखनएवसोऽपिपठ्यतेतथापिक्षेत्रविषयएवविलेखनेत
स्यवृत्तिः।पञ्चभिर्हलैःकृषतीतिदर्शनात्।एवञ्चतौदादिकात्क्त्वाप्रत्ययएवभवति।क्षेत्रेउपकृष्य।हलेनोपकृष्य।नत्विहणमुलितिस्थितमाकरे।समासत्तौ।
केशग्राहमिति।सन्निकर्षप्रतिपादनपरमेतत्।केशेषुग्रहणंभवतुवामाभूत्।द्व्यङ्गुलोत्कर्षमिति।द्वयोरङ्गुल्योःसमाहारोद्व्यङ्गुलम्।तत्पुरुषस्याङ्गुलेरि
त्यच्समासान्तः।द्व्यङ्गुलेनोत्कृष्यपरिच्छिद्येत्यर्थः।ह्रस्वःखण्डःखण्डिका।द्वितीयायाञ्च।अथकथमनुदात्तंपदमेकवर्जमिति।नह्यत्रत्वरागम्यते।अत्राहुः।इ
हापित्वरानविवक्षिता।तथाहि।परिभाषेयम्।तेनोदात्तःस्वरितोवायत्रविधीयतेतत्रसमकालमेवैकमचंवर्जयित्वापरिशिष्टमनुदात्तंकर्तव्यंनविलंबितव्यमि
ति।यष्टिग्राहमिति।एवंनामयुद्धायत्वरन्तेयदासन्नह्ययष्ट्यादिकंअपिगृहीत्वाधावन्तिनायुद्धंप्रतीक्षन्तइतिभावः ॥७ कृत्स्नस्यपार्थनिरूपितकारकत्वस्यैव
ग्रहणादितिवाच्यम्।उपदेशेकर्मत्वेनाप्यर्थान्वयसत्त्वात्तन्निरूपितकारकत्वाक्षतेः।विभक्तिस्तुप्रधानानुरोधिनीतृतीयैवनपरत्वाद्वेतिबोध्यम्।स्थितमाकरेइति।धनुर
भिरिभिरसह्यंमुष्टिपीडन्धानेइतिभट्टिप्रयोगेतुनणमुलन्तंकिंतुघञन्तंक्रियाविशेषणत्वाच्चद्वितीयेतिबोध्यम्।नविलम्बिनञमिति।एतच्चहरदत्तग्रन्थस्वरसोऽत्रत्वात्तस

अनृजुत्वादिति। गमनप्रतिबन्धकत्वमनृजुत्वं अग्रतःस्थितकाष्ठमित्यर्थः। तत्रयद्यपीति। तस्प्रत्ययान्ते स्वाङ्गे उपपदे इत्यर्थस्तूचितः। च्वेति। प्रत्यययोः प्रकृत्योश्चेत्यर्थः।
नेष्यतइति। यथासंख्यसूत्रस्य भाष्यप्रामाण्यादितिभावः। नार्थइति। वस्तुतस्तदनित्यत्वज्ञापकम्। तेनस्तनः किचीत्यादौ सन्धातोर्ग्रहणं सिद्ध्यति। अस्तुवर्त्मेति। एकाद
भवाये। अयथाभिप्रेतशब्द आख्यानक्रियाविशेषणम्। यथाभिप्रेतंनभवति तथाऽऽख्याने इत्यर्थः। तदेतदाहायथेत्यादिना। नीचैःकृत्येति। यद्यपीहप्रियाख्या
नमभिप्रेतं तस्यापि तत्प्रकारस्य नीचैस्त्वस्याभिप्रेतत्वमस्त्येवेति भव्यमुदाहरणम्। अतएव अयथाभिप्रेताख्याने इति सूत्रितम्। नपुनरप्रियाख्याने इति।
तिर्यक्कृत्वेति। अनृजुत्वादग्रतःस्थितं पार्श्वस्थितमित्यर्थः। स्वाङ्गेतस्प्रत्यये कृभ्वोः। तस्चासौप्रत्ययश्चेति कर्मधारयः। तस्प्रत्यये परतो यत्स्वाङ्गं तस्मिन्नुपपदे इति
प्राञ्चः। तत्र यद्यपि स्वाङ्गमात्रं नोपपदं तथापि तस्मिन्नित्येतत्प्रकृतिप्रत्ययसमुदायपरमिति बोध्यम्। इह यथासंख्यं नेष्यते इति ध्वनयन्नुदाहरति। मुखतःकार
मिति। मुखतोभूयेति च। आद्यादित्वात्तस्प्रत्ययेनतसिः। प्रत्ययग्रहणंकिम्। मुखेतस्यति मुखतः। तसु उपक्षये। क्विप्। अधातोरित्युक्तेरत्वसन्तेति दीर्घो न। मुखतः
कृत्वागतइति काशिका। एतच्च प्रत्ययाप्रत्यययोः परिभाषामनाश्रित्योक्तम्। वस्तुतस्तु नार्थः प्रत्ययग्रहणेन। नाधार्थ। नार्थौ नानाञौ। धार्था धमुञादयः। द्वैधङ्कृत्वा। द्वै
धङ्कारम्। द्वैधंभूय। द्वैधंभावम्। यद्यपि धमुञादिविधौ ध इत्यनुवर्त्यते यामादेशालाश्रयणात्स्थानिवद्भावेनापि सिद्धम्। तथापि धमुञन्तात्स्वार्थे डदर्शनमिति
डप्रत्ययान्तस्य संग्रहार्थमर्थग्रहणम्। द्वैधीकृत्येत्यादि। तूष्णीमि ॥ कृञोनिवृत्त्यर्थं भूग्रहणम्। अन्वच्यानुलोम्ये। नत्विह अचइत्यकारलोपे चाविति दीर्घे अनूची
तिनिर्देष्टुमुचितम्। उदक्प्रतीचोयदितिवत्। स्यादेतत्। अचइत्यर्थवतोग्रहणं सचार्थोलोकप्रसिद्ध एव गृह्यते। अभिव्यक्तपदार्था ये इति न्यायात्। अतोनुकर
णेनभविष्यतीति। एवन्तर्हि क्षिपेर्दीर्घादित्यादावियङादिकं नस्यात्। प्रकृतिवदनुकरणमित्यतिदेशाद्भवतीतिचेत्। तर्ह्यत्राप्यतिदेशादेवास्तु। एवञ्च तिर्यच्यपव
र्गइतिसूत्रेपि तिरश्चीत्येव निर्देष्टुमुचितं इतिचेत्तुल्यम्। प्रकृतिवदित्यतिदेशस्य वैकल्पिकत्वाददोषः॥ ७ इष्यतइतिभावः। सिद्धमिति। एवञ्च धांशे नार्थग्रहणे
योगइतिभावः। निरनुबन्धकपरिभाषाया अनित्यत्वेतु नांशेपिनोपयोग [illegible] ग्रहणमिति। अतएव च्व्यर्थइति नानुवर्तत इतिभावः ॥

ए· ९३

३८७

इति प्रागेवेति। सौत्रो निर्देश इति भाष्यं इत एव प्रकृतिवदित्यतिदेशः। नित्य इति न द्वावः। किंतु त्वैवेति। उपपदसमासोऽपि नेति बोध्यम्। निशिवम्। विस्तरस्तु बृहच्छब्दरत्ने मदन्तेवासिकृते बृहच्छब्देन्दुशेखरादौ च द्रष्टव्यः॥ इति कृदन्तं संपूर्णम्॥ तेष्वपीति। निर्द्धारणे सप्तमी। तासुद्यान्तगताः केचिदपीत्यर्थः। नियम्यत इति। अत्र पक्षे ते इत्य वैकल्पिकत्वं तु यत्तदेतेभ्य इति सूत्रे त्यदाद्यत्वस्य करणादेकशेषाभावदर्शनाच्च निर्णीयते इति प्रागेव प्रपञ्चितम्। अयमन इत्यादि। अन्वक्शब्दस्य आनुकूल्यमात्रे विश्रान्तेर्देशविशेषे प्रमाणं नास्तीति सूचयितुमिदम्। ष्टश्ट तोभूत्वेति। इह अनुकूलो ऽननुकूलो नेति शब्देन स्पृश्यते। अन्वक्शब्दस्य देशविशेषमात्रे पर्यवसानात्। प्रमाणान्तरेण क्वचिदानुकूल्यलाभेऽपि अन्वक्शब्दस्य तत्समर्पणे व्यापारविरहात्। णमुल्। न। किन्तु त्वैवेति व्यवस्था बोध्या॥ इति कृदन्तप्रक्रिया समाप्ता॥ श्रीगणेशाय नमः॥ अथ वैदिकशब्देषु विशेषमाह। षष्ठीयुक्त इति। वृषन्निति। कनिन्युवृषीति। कनिनन्तस्य वृषन्शब्दस्य भत्वमुपसंख्यायते। तत्फलन्तु नलोपस्य णत्वनिषेधस्य चाभावः। लोके तु वृषन्सुः। वृषाण्वः। उभयसंज्ञानीति। अयस्मयादिषु अक्वतेत्यादयः समुदाया एव बोध्याः। तेन जस्त्वमस्तु। कुत्वं माभूदिति वैपरीत्यं न प्रसज्यत इति बोध्यम्। नेनमिति। वाचामिनाः प्रभवः। तेष्वपि एनं विद्वांसं न हिन्वन्ति विवदितुं न गच्छन्तीत्यर्थः। ते प्राग्धातोः। ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्या इति प्रयोगो नियम्यते। अस्यापवादः छन्दसीत्यादि सूत्रद्वयम्। इह संज्ञानियमपक्षोऽपि भाष्ये स्थितः। तथा हि। ते इत्यनेन प्रादीनुपनिपत्यर्यन्तात्स्वरूपेण परामृश्य धातोः प्राक्प्रयुक्तानामेवैषां संज्ञेति व्याख्येयम्। एवञ्च छन्दसीत्यादिसूत्रद्वयं न कर्तव्यम्। न चैवं लोकेऽपि यथेष्टं प्रयोगापत्तिः। क्वचिदिष्टापत्तेः। तथा च माघः। वारुणीमदविशङ्कमथाविश्वसुखो भवदसाविवराग इति भवति प्रेत्यादि तु नापादनीयम्। अनभिधानात्। सूत्रस्य प्रयोगनियमार्थत्वेऽपि घटश्च पट इत्यादीनामनभिधानेनैव वारणीयत्वात्। एवञ्च कर्तृकर्मणोश्चेति सूत्रे स्वाढ्येन भूयत इति वृत्तिग्रन्थोऽप्यस्मिन्पक्षे सङ्गच्छत इति दिक्। इति प्रथमोऽध्यायः॥ स्वजातिपरत्वेन व्याहतमित्यादौ न दोषः। अत एव गतिरनन्तर इत्यत्रानन्तरग्रहणं चरितार्थम्। एषां संज्ञेति। न तु सूत्रैकवाक्यतयेति भावः। सूत्रद्वयमिति। अनुकरणञ्चेति सूत्रे नितिपरग्रहणञ्चेत्यपि बोध्यम्। वृत्तिग्रन्थोऽपीति। सुकटंकराणीति भाष्यग्रन्थोऽप्यर्थः॥ इति प्रथमोऽध्यायः॥

ए.भ:
३९३

भिन्नेति।यवाग्वेतितृतीयाग्निहोत्रमितिद्वितीयेतिभावः।भेदमात्रस्येति।स्वरूपभेदमात्रस्येत्यर्थः।भिन्नार्थकविभक्त्यवरुद्धयोरिवनतथान्वयइतिभावः।एकविभक्तिकत्वनियमइति।एकस्या कृतेश्चरितंप्रयोगोनद्वितीयस्यास्त्वयस्याश्चभवतीतिकृञ्चानुप्रयुज्यतइतिसूत्रभाष्येउक्तत्वादितिभावः।करणेद्वितीयेति।अयंभावः।अग्निहोत्रशब्दःकर्मनामधेयंसएषयज्ञःपञ्चविधोऽग्निहोत्रंदर्शपूर्णमासावित्यादिदर्शनात्।हूयतेनेत्यज्यतेऽस्मिन्नितिहोत्रंअग्नेर्होत्रमितिसमासः।अतएवकेषाञ्चिदन्तोदात्तपाठः।श्रुतौ।यवाग्वाख्यमिति।नचयवाग्वग्निहोत्रशब्दयोर्भिन्नविभक्त्यवरुद्धतयातदर्थयोरभेदान्वयोनसंभवतीतिवाच्यम्।विभक्त्योर्भेदेपिकर्मार्थकतयाऽविशेषेणविरुद्धार्थकत्वात्। विभक्तिभेदमात्रस्याकिञ्चित्करत्वादितिभावः।यद्यपिगत्यर्थकर्मणिद्वितीयाचतुर्थ्यौदिवःकर्मचेत्यादीनामुदाहरणेषुत्रिभक्तिविकल्पेपिविशेषणविशेष्ययोरेकविभक्तिकत्वनियमोलोकेदृष्टस्तथापिवेदेनास्तीतिद्योत्यम्।प्राभाकरास्तुतृतीयाचहोरितिसूत्रेणकरणेद्वितीयाविधीयतइत्याहुः।तन्न।तत्रसूत्राक्षरानुगुणंनवाभाष्याद्यगुणमित्युपेक्ष्यम्।हनतिशयतइति।हन्तिशेतेइत्यर्थः।नाध्वंत्रायध्वम्।दाति।ददाति।विवष्टिवष्टि।इहसप्तमान्तेवक्ष्यमाणेनबहुलंछन्दसीतिसूत्रेणाभ्यासस्येकारोबोध्यः।मन्त्रेघस।ह्वरकौटिल्ये।अस्यकृतगुणस्यानुकरणंह्वरेति।अकारस्तूच्चारणार्थः।अज्ञनेति।अजनिषतेत्यर्थः।एतरेयब्राह्मणेहरिश्चन्द्रंप्रतिवरुणस्येदंवचनम्।विभाषेति।एतेनइहसूत्रेसिचइत्यनुवर्त्यसिचःस्थानिभूतयोर्लिरितिव्याख्यानात्लिङ्लिटोर्नेतिहरदत्तग्रन्थःपरास्तः।लोपस्यवैकल्पिकतयाछन्दसिचरूपान्तरस्यानापाद्यतयासिजनुवृत्तेर्वैफल्यात्।द्वितीयोऽध्यायः।आद्येषुचतुर्ष्विति।तत्रापिसहिजन्निरभिभ्योणिजन्तेभ्यआम्।विनोनेस्तुशुद्धादितिबोध्यम्।लोकइति।वेदेपिपाक्षिकमिदंबोध्यम्।विदाङ्कुर्वन्त्वितिपूर्वसूत्रादन्यतरस्यांग्रहणस्येहानुवृत्तेः।पावयांक्रिति।पवतेःपुनातेर्वाणिजन्तादाशीर्लिङिआम्।क्रियादित्यनुप्रयोगः॥ ७ अग्निहोत्राख्येनेष्टंभावयेदित्यर्थइतितत्रसूत्रेति॥कर्मणीत्यधिकारात्।नापिभाष्येति।नतृतीयाविधानार्थमिदंद्वितीयातुकर्मणीत्येवसिद्धेतिसिद्धान्तिनोक्तम्।विवष्टीति।वष्टीतिप्राप्तम्।वैफल्यादिति।एवञ्चलिग्रहणमपिव्यर्थम्।सिचइत्यनुवर्त्यतस्यैवलुकासिद्धेः।आदितःसिचइत्यस्यवैकल्पिकतयारूपान्तरस्यानापाद्यत्वेनतदप्रवृत्त्यर्थंलिग्रहणमित्यपिनशङ्क्यमित्यपिबोध्यम्।इतिद्वितीयः॥

प्रागुक्तेविति।कृञोलुङि·मन्त्रेघसेतिच्लेर्लुकिसार्वधातुकगुणेइत्यपिबोध्यम्।इदंपक्षेत्विति।नेटीतिवृद्धिप्रतिषेधाद्गुणोत्रपक्षे।चुरादावदन्तइति।तस्मात्णिचिचङि·णौकृतस्याल्लोपस्यस्थानिवत्त्वान्नशब्दस्यद्वित्वंअग्लोपित्वान्नसन्वद्भावदीर्घोपधाह्रस्वत्वानि।तत्प्रौढिवादमात्रमिति।सञ्ज्ञापूर्वकविधेरनित्यतायाभाष्यसंमतत्वाच्चेत्यपिबोध्यम्।अविदामक्रन्निति।विदेर्लुङ्याम्।गुणाभावः।लुङन्तकरोत्यनुप्रयोगः।मन्त्रेघसेतिच्लेर्लुक्।झोन्तः।अकरिति।प्रागुक्तेतुतिपिसार्वधातुकगुणेहल्ङ्यादिलोपः इतिविशेषः।गुपेः।आयप्रत्ययाभावस्थलएवेदंसूत्रेकेवलस्योच्चारणात्।अगौप्समिति।ऊदित्वादिडभावपक्षेवदव्रजेतिवृद्धिः।झलोझलीतिसिचोलोपः।इट्पक्षेतुअगोपिष्टम्।आयप्रत्ययपक्षे·गोपायिष्टम्।इत्यस्त्वादिछन्दसि।भाषायान्तुचङ्·न्तवर्जेयिलान्तेषयेनेतिविवेकः।त्वायन्तस्त्वामिच्छतः।जरितुःस्तोतुर्ममकाममाभेलार्णमाऊनयीः।ऊनंमाकार्षीरित्यर्थः।माऊननूइतिभाषायाम्।ऊनपरिहाणेचुरादावदन्तः।ध्वनशब्दे।चुरादिरदन्तः।घटादिर्नीन्तश्च।भाषायान्तुअदध्वनत्।घटादेरदिध्वनत्।इलप्रेरणेचुरादिः।ऐलयीत्।भाषायान्तुऐलिलत्।अर्दगतौयाचनेच।अर्दहिंसायाम्।हेतुमणिच्।आर्दयीत्।भाषायान्त्वार्दिदत्।यत्तुप्राचानोनयतीतिसूत्रेलौकिकेपिसञ्चारयतादृशमपिलोकइत्युक्तम्।तन्न।छन्दसीत्यस्यानुवृत्तेः।काशिकादिमहाग्रन्थ॥संमतत्वात्।वैयात्यात्तदननुवृत्तौतुचङोदुर्लभत्वात्।यत्तुविभाषाधेट्ध्योरितिविभाषाग्रहणमिहानुवर्तते।ननुछन्दसीतितदाशयवर्णनम्।तदपिन।सूत्रेनञोवैयर्थ्यापत्तेरित्यास्तान्तावत्।अमरदिति।व्यत्ययेनपरस्मैपदम्।यत्तानोरितियत्तु इमामृचंव्याचक्षाणैरुक्तम्इद्देलङि·शपिसञ्ज्ञापूर्वकोविधिरनित्यइतिलघूपधगुणोनभवतीति।तन्नप्रौढिवादमात्रम्।लोकेतुअकार्षीत्।अमृत्।अदारीत्।अकृक्षत्।छन्दसिनिष्ट।क्यपिप्राप्तइति।ऋदुपधाच्चेति।सूत्रेणेतिभावः।ब्रह्म।गिवदेरिति।नचयत्येवदीर्घोनिपात्यतामितिवाच्यम्।यतोनावइत्याद्युदात्तापत्तेरितिभावः।अत्रश्लोकवार्तिकम्।निष्टर्क्येव्यत्ययंविद्यान्निसःषत्वंनिपातनात्।ण्यदायादेशइत्येतौउपचाय्येनिपातितौ।ण्यदेकस्माच्चतुर्भ्यःक्यप्चतुर्भ्यश्चयतोविधिः।ण्यदेकस्माद्यशब्दश्चद्वौक्यपौण्यद्विधिश्चतुः।व्यत्ययमिति।आद्यन्तविपर्यासमित्यर्थः।चतुर्भ्यइति।देवहूयादिषुचतुर्षुचतुर्भ्योधातुभ्यःक्यप्।उपसर्गभेदान्नयतेर्भेदः।द्वौक्यपाविति।द्वाभ्यांधातुभ्यांद्वावितिभावः॥ ऽ) दारीदिति।सूत्रेदृइतिदीर्घपाठेइदंह्रस्वपाठे — दृतेतिबोध्यम्।आद्यन्तविप — र्यासमिति।प्रत्ययस्यव्यत्ययमित्यपिबोध्यम्।तदुक्तंफलंनिपा

तन्नादिति।नग्रु[illegible]यो महद्योगहूपेनपत्तेरेव प्रकृतिला
[illegible]तुर्भद्रस्य[illegible]नमत आह॥ उपसर्गभेदादिति ॥

न्याय्यत्वाच्चेति। अकारविशिष्टयोरेव सूत्रे पाठाच्चेत्यपि बोध्यम्। पादान्त इति सूत्रस्थन्यासे नाद्यपादादावपीष्टत्वेनेदं निन्द्यम्। निपातनमिति। धातूपपदसमुदायानामिति बोध्यम्। वहेः कर्मणीति। श्वेतवाहवद् इति श्वेतवा इन्द्रः। उक्थ इति। उक्थैः शंसति उक्थशाः। कर्मणि चेति। पुरो दाश्यते पुरोडाशाः। सम्प्रसारणे कृते इति। पदस्य विभज्यान्वाख्याने ऽन्तवतुरिति सुबन्तमात्रं चतुरो वारान् पदिभीयत इत्यर्थः। छन्दसि। वन षण सम्भक्तौ। इति भ्वादिगणे सह निर्दिष्टौ गृह्येते। नतु वनु याचने षणु दाने इति तनादिकौ। सानुबन्धकत्वात् सहपठितयोरेव ग्रहणस्य न्याय्यत्वाच्च। ब्रह्मवनिमिति। ब्रह्मवनिति। सेत्रवनति। गोसनमिति विग्रहः। सुषामादित्वात्षत्वम्। अहमेवमाह्यमत्यन्ते उपपदे वहेस्तु इत्सात्परादनो। जनसन। जनेर्जनने। जनी प्रादुर्भावे। द्वयोरपि ग्रहणम्। षणु दाने षण सम्भक्तौ। द्वयोरपि ग्रहणमित्याहुः। अत्र च व्याख्यानं शरणमित्यन्ये। । श्वेतादिपूर्वेभ्यो वहादिभ्यो विन्स्यात्। अत्र णिकार्थं निपातनम्। श्वेतशब्दे कर्तृवाचिनि उपपदे वहेः कर्मणि प्रत्ययः। उक्थे कर्मणि करणे वा उपपदे शंसतेः प्रत्ययः। नलोपश्च। दाशृ दाने। अस्य पुरस्पूर्वस्यादेर्डत्वं कर्मणि च प्रत्ययः। अवयाः। चकारादुक्थशाः। एतच्च पाक्षिकम्। तथा च कैयटादयः। उक्थशा इत्यपि संबुद्धौ निपातनं कर्त्तव्यमुपदिशन्ते। नवस्तीति। अररिवानिति। रा दाने लिटः क्वसुः। वस्वेकाजाद्घसामिति नीट्। आद्यन्तवत्त्वात्। नञ् तत्पुरुषे ऽव्ययपूर्वपदप्रकृतिस्वरः। दीर्घादटीति नकारस्य रुत्वम्। आतोटि नित्यमिति रोः पूर्वस्यातो नित्यमनुनासिकः। भविषयेतु वसोः सम्प्रसारणे कृते वलादित्वाभावादिडभावः। एतेन मानःशंसो अररुषः इत्यादि व्याख्यातम्। प्रसङ्गाद्यासुशब्दं साधयितुमाह। छन्दसीति। आत्मनः इति विशेषणाद्प्राप्तिः। अयासुरिति। अयपस्यादित्तिवपस्यमाणे मा कारादेशः। जवसावितिः हृदोरपो वा योत्वादर्थविशीयते। लोटो डादौ। आगमो सह इति। तौ च पर्याये न तु भोगपर्यना ऽन्यप्रित्सामर्थ्यात्। अन्यथा दीर्घे कृते विशेषाभावात्। आङ्नमस्येतिसुः आन्यङ्कपुत्रापि चैत्यनुवर्त्तत इत्याशयेनाह। मोचयितावितिः तस्कलन्तु। यद्यो त्या अश्नवैकेति छन्दसी उर्वरा पुंसुर्वेनेद्यादो गुणः। एतौ तु पि द्रहणमानुवर्त्तिसम्। नत्र स्नसुर्णयमेतिसार्वधातुकत्वादिकरणः ॥ ४५ इङ्परिभाषाया अनित्यत्वान्नाम्यपेमनित्यत्वात्संप्रसारणे कृते इत्यर्थः। जवसुवयोर्ज्सप्रकृती। स्वरार्थमिति। एव

अह पाठोजव सो कन्हीयस्यपाठः प्रामादिक
इति भाववित्रिकरणाद्विकारयैवेतद्स्यादे ॥

विकरणस्य गुण इति। करोतेरुत्वाभावश्चेत्यपि बोध्यम्। कृविन्नेति। गुपा इति शेषः। एतस्येमदमिति। तिपो ठक्सिपदृ इति बोध्यम्। आडिति। वस इति शेषः। आडिति लेट् इत्यर्थः। जि आर्द्धधातुकत्वान्ङित्वाभावात् विकरणस्य गुणः। अतएव कृचिन्ना। तनूरुत्वातरुषियत्कृष्वेवेते। तारिषदिति। तिप इकारलोपः। सिप इद्। जोषिषदिति। जुषी प्रीतिसेवनयोः। अनुदात्तेत्। प्रत्ययेत्र परस्मैपदम्। कुरवावेति। कृञो लेटो वस उः। गुणो रपरः। आट्। अडित्वादिति विकरणस्य गुणः। करोतेरुत्वाभावश्च। मादयैते इति। मदी हर्षे। णिजन्ताल्लेट्। आकारस्येति। प्रथमस्येत्यर्थः। द्वितीयस्य तु टित आत्मनेपदानामित्येत्वमेव नित्यत्वात्। न च शब्दान्तरप्राप्त्या अनित्यत्वम्। कृताकृतप्रसङ्गित्वमात्रेण क्वचिन्नित्यत्वाश्रयणात्। उत्तरसूत्रे अन्यत्रेति लिङ्गाच्च। वैतो। अन्यत्वं किमपेक्ष्येत्याकाङ्क्षायां पूर्वसूत्रविषयादिति लभ्यते। सन्निधानात्तदाह। आत इत्यादि। ईशे इति। ईश ऐश्वर्ये। उत्तमैकवचनमिदं। इतश्च लोपो नास्ति परस्मैपदेष्वित्युक्तेः। टेरेत्वे तस्य ऐ। रगृह्णान्तादिति। ग्रहेः कर्मणि लेट्। आट् यक्। संप्रसारणम्। झोन्तः। पणवन्ध इति। यदि मे भवानिदं कुर्यात्तर्हि एतत्सह दास्यामीति। समयकरणं पणबन्धः। आशङ्कासंभवना। अहमेवेति। त्रिपुरविजये देवैः प्रार्थितस्य रुद्रस्येदं वचनम्। पशवः संसारिणः। नेदिति। इच्छन्द आशङ्कां द्योतयति। जिह्मचरणेन नरकपातः सम्भाव्यते। समाभूदित्यर्थः। द्वौ विकरणाविति। तत्र शप्श्यावयः। सिप्तु बाहुलकात्। एतेन समर्थयजिह्मजे। अस्मा अविदुः। से माम विद्धि इत्यादिव्याख्यातम्। अवरस्पणो अस्माल्लोटि बाहुलकात्सिपः प्रतने। तरुषेमेति। उप्रत्ययान्तस्याषिपं प्रत्ययङ्गत्वात् सार्वधातुकार्द्धधातुकयोरिति गुणः प्राप्तः स्मिन्नन्तस्य शापिलघूपधगुणश्च प्राप्तो बाहुलकान्न भवति। तरुष्यन्तीति प्राप्नोति। यत्तु सुपां सुलुगिति सूत्रे हरदत्तेनोक्तं ष्यण्वन्तीति प्राप्त इति तु युक्तः पाठ इति। तच्चिन्त्यम्। श्नुप्रत्ययस्य वैकल्पिकतया हि शपः सोष्टवेन बहुवचनमात्रे व्यत्ययमभिव्यङ्क्तुं नक्षन्तीति भाष्यकाशिकारूढपाठस्यैव न्याय्यत्वात्। कृणुहीति। तेन दोषतीत्यादौ विधीयमानानां ष्ठगादीनां देवनादिकर्तृवाचकत्वादेवमुक्तं न तु हि कारकवाचित्वे आग्रहः। कृत्तद्धितमात्रे तात्पर्यात्। तथा च किमो विहितोऽडति यच्छब्दादपि भवति। त्वमेत्यमतितेजा तवेदः। विश्वेदेवासो मनुषो यतिष्ठन। आद्यगम। नाच्छीलिके षुव्याख्यातमिदम्। विशेषाभिदित्सया स्मार्यते। लिङ्ङ्गावादिति। असंयोगाल्लिट् किदिति कित्वं सिद्धमिति भावः। ननु त्वं सिध्वं सिप्रभृतिभ्यः किं कि नोः संयोगात्परत्वेन कित्त्वं सार्थकमिति चेत्॥ ७ ह्मचरणेनेति। जिह्मं कुटिलं पापम्। त्वं सुध्वं सुप्रभृतिभ्य इति।

अगुणे इति। गुणाभावे इत्यर्थः। इयङिति श्रिञ्सेवायामित्यस्माण्ण्यन्तादिति मदेरिति शेषः। विशस्यपीति। अपिना बाहुलकाद्यगभावमात्रमित्यपि सूचितम्। लस्येति। पिबध्यै इसन्नाद्यु तादृशलक्ष्यस्याकरे अनुदाहृतत्वात्। यदि तु तादृशलक्ष्ये प्रमाणमस्ति तर्हि छन्दस्युभयथेति लिटः सार्वधातुकत्वस्यापि सत्वेन सार्वधातुकमपिदिति ङित्वाल्लिटु मितिभावः। ननु रिर्जगुरिरिति। ह्वर्वमने चीति स्यानिवद्भावादादेशप्रतिषेधाद्वास्तृ गृ इत्यनयोर्हलन्तत्व उत्तरदले उत्वेपि अभ्यासे उरदत्वं निर्बाधमात्रमर्थः। पञ्चदश प्रत्यया विधीयन्ते तन्त्रा से सेन्। असे असेन्। अध्यै अध्यैन्। कध्यै कध्यैन्। शध्यै शध्यैन्। एषान्दशानान्द्वयोर्द्वयोरूपाविशेषेपि स्वरे विशेषः। इतरेषु पञ्चसु रूपविशेषः स्पष्ट एव। वक्षे इति। वचः से। कुत्वम्। षत्वम्। एषे इति। इणो गुणः। नित्त्वादाद्युदात्तः। प्रेषे इति। इणः क्से। कित्त्वाद्गुणे आद्गुणः। श्रियसे इति। इयङ्। नित्त्वादाद्युदात्तः। इह मन्त्रे मध्योदात्तः पठ्यते तत्र बाहुलकात्प्रत्ययस्वरो बोध्यः। मादयध्यै इति। ण्यन्तात् शध्यै तस्य भाववाचि सार्वधातुकत्वाद्यक्प्रसङ्गे व्यत्ययेन शप्। गुणायादेशौ प्रत्ययस्वरः। पिबध्यै इति। यक्। तस्य बहुलं छन्दसीति लुगिति हरदत्तः। पूर्वं बध्यस्य येन यकः प्रसङ्गे शबित्यपि सुवचम्। यत्तु प्राचो ग्रन्थं व्याचक्षाणैर्मादयध्यै इत्यत्र यकं स्वीकृत्य व्यत्ययेन लुक् शप् चेति स्वीकृतं तद्दोषग्रस्तम्। यच्च काशिकायां शध्यै शध्यैं पिबध्यै मादयध्यै इत्युदाहृतम्। अन्येष्वेतदेवानुसृत्य तत्तद्युक्रमेण योजनीयम्। अन्यथा लक्षविसंवादात्। सूतवे इति। ङित्त्वान्न गुणः। दशमे मासि सूतवे इति मन्त्रे तु न तवे इति पदमाद्युदात्तं पठ्यते। तत्र स्वरव्यत्ययः। यद्वा। तवेन्प्रत्यये तित्स्वरः। गुणाभावस्तु बाहुलकात्। यद्वा। छन्दस्युभयथेति सार्वधातुकत्वे सार्वधातुकमपिदिति ङित्त्वं बोध्यम्। प्रयै इति। प्रपूर्वाद्यातेः कैप्रत्ययः। रुहिष्यै नञ्पूर्वाद्युर्यम्। दृशे विख्ये च। योगविभागे फलञ्चिन्त्यम्। कैप्रत्ययः। कित्त्वाद्दृशेर्न गुणः। ख्यातेरातो लोपः। विलिखे इति। कित्त्वान्न गुणः। त्वातोसुन्कसुन इत्यव्ययत्वाद्विभक्तेर्लुक्। न त्तुमनेति निषेधादत्वसन्तस्येति दीर्घो न। कृत्यार्थे। भावकर्मणोरित्यर्थः। यद्यपि भव्यगेयादिषु कर्त्ता वह्यं करणं स्नानीयं चूर्णमित्यादौ करणं दानीयो विप्र इत्यत्र संप्रदानञ्च कृत्यानामर्थस्तथापि कृत्यत्वेन रूपेण न कर्त्रादिषु विधिरस्ति किन्तु विशिष्यैव। बाहुलकाद्वा। कृत्यतयात्तु भावकर्मणोरेव। तयोरेवेति सूत्रात् ॥ ७ दात्तपाठादितिभावः। ङित्त्वं बोध्यमिति। एतच्च तवेङ्व्यर्थ इति भावः। इत्यव्ययत्वादिति। अन्यत्र कृन्मेजन्त इत्यव्ययत्वं बोध्यम्। सनन्तादिति केन्प्रत्ययः ॥

प.६

४३४

इत्यर्थ इति। रुरुत्वनी तिबोध्यम्। रेफस्य विसर्ग इति। एवञ्च लत्र कस्त्वमिति रूपमिति भावः। खश प्रत्यय इति। चक्षिङ इत्यादिः। इत्याह्वविति। सन्निष्ठ नेपितृयज्ञ इत्यादि शब्दार्थः। इ
अतः प्रतिपदोक्तस्यैव कृत्सार्थस्येह ग्रहणं न्याय्यं न म्लेच्छितवै। न म्लेच्छितव्यमित्यर्थः। दिदृक्षेण्य इति। दृशेः सन्नन्तात्। अतो लोपः। कत्वमिति। कृत्स्यमित्यर्थः। यत्तु कृञो विचि
गुणे रपरत्वे तस्य भाव इति त्वप्रत्यय इति व्याचख्युस्तेषां तत्र रेफस्य विसर्गो दुर्वारः। आद्युदात्तता न दुर्लभेति दिक्। वचसे च। खश् प्रत्ययः। खित्वात्सार्वधातुकत्वं तेन रूपाभा
देशो न। भावलक्षणे। संस्थादीनामवधित्वेन लक्षणत्वं बोध्यम्। आसमाप्तेरिति। संपूर्वो हि तिष्ठतिः समाप्तौ रूढः। यति पृच्छ्यः मण्डः सन्तिष्ठते इत्यादौ दर्शनात्। आतमि
तोरिति। तमु ग्लानौ। सपि तदोः। सग्लु गतौ। उतृदिर् हिंसानादरयोः। विसृप इति। गमनादित्यर्थः। यत्नु व्याचख्युर्विसर्पितुं मा नर्दितुमित्यर्थ इति तन्न। असुपे सति कृत्वा
तृ भावलक्षण इत्यस्य त्रस्येवा। अतएव म ‍त्र ते चिद्भिश्रिषः पुराजत्रुभ्य आतृदः। सन्धाता सन्धिं मघवा पुरूवसुरिष्कर्त्ता विहृतं पुनः। अयं मन्त्रो वेदभाष्ये इत्थं व्याख्या
तः। इन्द्र अभिश्रिषः अभिश्लेषणात्सन्धानद्रव्यात् त्वं ते चिद्धि ल नापि जत्रुभ्यः ग्रीवाभ्यः अतृदः आतर्दनात् रुधिरनिःसारणात्सुरा पूर्वमेव संधिसन्धातव्यस्य सन्धाता
संयोजयिता विहृतं विश्लिष्टं पुनरिष्कर्त्ता निष्कर्त्ता संस्कर्त्तेति। माद्यथोक्तमेवमन्तो मम्। इति तृ नीयम् इ प्रत्ययान्तमिति। नेनकि वनाक्ङीपा यस्मात् लित्स्वर इति।
आनुगाकारस्योदात्तत्वमित्यर्थः। यत्तु न्यासकृतोक्तं मुद्गलानीशब्दे द्वितीय उदात्त इति न द्वैवाद्यावग्रयुक्तमेव। लितीति प्रत्ययात्पूर्वस्य विधीयमानं संनिहितं मानुकं
विहाय द्वितीये प्रवर्त्तत इत्यत्र बीजाभावात्। सकलवैदिकपाठविरोधाच्चेत्याहुस्तान्नावक्न। अविष्य इति। आविर्भूत इत्यर्थः। द्व्यचश्छन्दसि। मयङ्गैतयोर्भाषायामित्युक्तेर्वेदे अ
भाषायां विधीयते। नोत्वत्। द्व्यच इति प्राप्तः प्रतिषिध्यते। मौञ्जमिति। औत्सर्गिकोऽण्। चर्म्मेति। वर्धेनपिप्योरनादश्चम्। सभाशब्दात्सप्तम्यन्तात् ढः स्यात्साध्वर्थे। पाथसीति। पा
थोऽन्तरिक्षमिति रविकारः। पातिभूतान्यवकाशदानेनेति व्युत्पत्तेः। यद्यपि पाने जले जुट्च। उदके युट्च। अग्ने चेति। अग्न्योदकयोः पाथःशब्दोऽसुन्नादिस्तथापि बाहुलका
दन्तरिक्षेऽपीति भावः। वैशन्तीभ्य इति। वेशन्तः पल्वलम्। पिशेर्झच। अग्रात्यत्। घच्छन्दसि। त्येनसिद्धे घआदिभिर्बाधा माभूदिति यद्विधीयते। अघिप इति। घच्प्रत्ययो रु समः
दाहरणम्। अन्तोदात्तमाद्युदात्तम्। रक्षोयातूनाम्। षष्ठीबहुवचनान्ताभ्यां रक्षस्शब्दयातुशब्दाभ्यां हननकरणीभूता इत्यर्थे यत्स्यात्। रक्षस्येति। रक्षोहननी॥ ७ति तत्त्वेप:। २६६

एवं यातव्येति। यातूनां हननीत्यर्थः। कृद्योगे कर्मणि षष्ठी। यातु रक्षसी पर्यायौ। बहुवचनान्ताद्विधानं स्तुत्यर्थं बहूनान्तेषां हनने हि स्तुतिर्भवति। हविष्येति। अत्र उगवादिभ्यो
यत्। मत्वन्तप्रकृतिकादिति। तद्धानिसुके रिदेलब्धम्। सवितुरित्यादिक इति। यद्यपि तत्र मन्त्रे पदान्तराणि सन्ति तथापि तत्प्रकृतिकमत्वन्तात्प्रत्ययो न प्रयोगानुसरणार्थं
तिशब्दात्। उपचारादिति। छान्दसोऽयमुपचारः। अश्विन् शब्दवन्तस्तथापि सामान्यापेक्षयैकवचनम्। उदाहरणे दृन्नण्यनपत्य इति प्रकृतिभावः। अथवेति। इदमश्विन्त्वम्। उ
एवं यातव्या। हविष्या इति। हविर्भ्यो हिता हविष्या तस्याः प्रशंसनमित्यर्थः। यस्येति लोपे कृते हलो यमां यमि लोप इति यलोपः। मासा यामण्। पूर्वसूत्रापवादः। तद्धानास
म्। मत्वन्तप्रकृतिकात्प्रथमान्तादुपधानकरणीभूतमन्त्रार्थकात् इष्टकारूपे संबन्धिनि मत्। स्यात्। मतोश्च लुक्। वर्चस्वानिति। वर्चशब्दोऽस्मिन्नस्ति वर्चस्वान्स
र्द्देवस्तस्मात् सवितुरित्यादिकः। उपधीयन्तेऽनेनेत्युपधानः। अथ कथं सर्वरूपदधाति प्राणभृत उपदधातीति। स इष्ट्याः प्राणभृत्यादिति हि प्राप्नोति। सत्यम्। स इष्ट्यादि श
ब्दानान्तह्वन्मन्त्रोपधेया इष्टकास्तूपचारात्प्रयोगः। ननु तद्धितमेतदित्यवधेहि। पूर्वोत्तरमीमांसयोस्तु तद्धितपरतया प्रतीयमाना ग्रन्थाः भक्त्या व्याख्येयाः।
अश्विमानण्। अश्विमच्छब्दादुक्तेऽर्थेऽण् स्यात् यतोऽपवादः। मतोर्लुक्। आश्विनीरिति। अश्विन्शब्दवान्मन्त्र उपधानो यासां ता इत्यर्थः। मूर्द्धन्वतीरिति। अतो नुडि
ति नुडागमः। अग्रेद्म मन्त्रधेयम्। सूत्रे एव यस्या इत्यनुपपन्नं तद्धानासामिति यत्प्रत्ययस्य छन्दस्येव विहितत्वात्। एवं च छन्दोयत्सूत्राणीति भाष्यकारैः
दमेव ज्ञापकम्। अथवा सामान्यापेक्षं ज्ञापकं छान्दसा अपि कश्चिद्भाषायां भवन्तीति। तेन समुपस्थित परिपन्थिभिः पार्थिवैरित्यादि सिद्धम्। यथासंख्यमिति। वृत्ति
कारस्तु यत्खं चेति सूत्रं व्यभजत्। पूर्वैः कृतम्। मत्वर्थ इति मिथ्यक्तम्। चात्खदिति वृत्तिकारः। यलुक्तुनानुवर्त्तते। एतदपि पूर्वत्र योगविभागस्य फलमिति तेषां मत
म्। यत्खाविति भाष्यपाठे तु यलप्यनुवर्त्ततां तथा च पूर्वीणाद्व्यपि रूपं बोध्यम्। पूर्व्यादिलाद्युदात्तत्वं [illegible] हस्तेणा समित इति पाठान्तरे। मतौ च। त ः स हूरन
भ्यो विनीनीद्व्यस्यापवादः। सोममर्हतीति यः। कथन्तर्हि श्रीतामिते सोम्येति रघुः। छन्दोऽधिकारात्॥ ७ के इष्ट्यां सिद्धे ज्ञापकत्वासंभवात्। वृत्तिकारस्त्विति। अत्रारुचिबीज
म् यथासंख्यसूत्रस्य भाष्यविरोधः॥ पूर्वाद्दिनीति। पदिवेदेलित्वरविशिष्टः प्रयोगो मास्तीत्युच्यते वदेकदेशानुवृत्तिर्बोध्या। पाठान्तरमिति। पाठद्वयेपि तुल्य इत्यर्थः समासः।

कथन्तर्हीति। अत्रछन्दोऽधिकारादिति भावः॥

सोमइवेति। सोमः कर्पूरचन्द्रयोः स्वार्थे ष्यञिति। चातुर्वर्ण्यादित्वादिति भावः। पथ्या योग्यमिति। आगत पञ्चमीप्रकृतेप्रथ मामद्वयोः षष्ठीति बोध्यम्। इति चतुर्थः। साद्म्य
मिति। सदनमर्हतीत्यर्थः। प्रयोजनं यस्येति। धाताविलेव शब्दे कार्यस्यासंभवादर्थग्रहणे सिद्धेऽर्थपदं स्पष्टार्थमिति भावः। उपसर्गा हि क्रियासत्त्वे तद्विशेषकाः स यथा अ
उच्यते। सोमइव सोम्यः। शाखादित्वाद्यः। तत्र साधुरिति। यद्वा। सोम्येत्यादिर्वृद्धिपाठे तु स्वार्थे ष्यञ्। मये च। आगतविकारावयवप्रकृताः मयडर्थाः। पथ्यायोगं
पञ्चमी षष्ठी प्रथमाः समर्थविभक्तयः। शिवशर्मभाषायां तु शन्तातिप्रभृतीनां प्रयोगश्चिन्त्य इत्याहुः। इति चतुर्थः। त्वावत इति। त्वमिव त्वावान्। तस्य प्रत्य
योत्तरपदयोश्चेति त्वादेशः। आसर्वनाम्न इत्यात्वम्। एतेन मावत इति व्याख्यातम्। साद्म्यमिति। अन्येषामपीति दीर्घः। छन्दसि घस्। सकारः सितिचेति पदत्वार्थः।
तेन भत्वाभावाद्दोर्गुणो न। न चैवं पक्षे इकोऽसवर्ण इति शाकल्यापत्तिः। छन्दसि दृष्टस्यैवानुविधेयत्वात्। वार्त्तिककृता सन्नित्यसमासयोर्नेति तन्निषेधाच्च। उ
पसर्गा। इह धातुशब्देन धातुवाच्या क्रियालक्ष्यते सा अर्थः प्रयोजनं यस्य साधनस्य तस्मिन्नित्यर्थः। तदाह। धात्वर्थविशिष्ट इति। छन्दसि या पर्यवस्थातृश
ब्दात्। स्वार्थे इनिप्रत्ययः। अवस्थातृशब्दस्य। पन्थपर इत्यादेशो च निपात्यते। अष्ट्रावीति। अशेष्ट्रन्। अष्ट्रा दंष्ट्रा। करिष्ट इति। तुरिष्टेमेयःस्विति लोपः।
इति पञ्चमः। स्पर्द्धेर्लङीति। स्पर्द्ध सङ्घर्षे। द्विर्वचनं अकारलोपः रेफस्य संप्रसारणञ्च निपात्यते। अस्पर्द्धेथामिति भाषायाम्। प्रकृत्यान्तः। अयं पाठः
षाष्ठभाष्यानुगुणः। शाकलसूत्रे ह्रस्वश्चेति चकारेण प्रकृत्येत्यनुकृष्यत इति भाष्ये दर्शनात्। इको गुणवृद्धी इति सूत्रे तु नान्तः पादमिति पाठः पुरस्कृ
तः। अयमपि षाष्ठभाष्ये स्पष्टः। अस्मिंश्च पक्षे राडः पदान्तादतीति पूर्वरूपं निषिध्यते। तस्मिंश्च निषिद्धे एचोऽयवायाव इत्यपि न भवति ॥
गच्छतीत्यादौ तदस्त्येव तु क्रियाविशिष्टसाधनबोधकाः यथा निक्षो शां विरित्यादौ तत्र यत्र क्रिया यदा श्रवणं तत्रैव यथा स्यादित्यर्थं धात्वर्थ इतीति तात्पर्यम्। अष्ट्रेति।
दंष्ट्रा पर्यायो यच्छन्दो विषयः इति पञ्चमः। संप्रसारणञ्चेति। एवञ्चापस्पर्धेथामित्येकं पदन्तिङ्ङतिङ इति निघातस्य यद्वृत्तान्नित्यमिति प्रतिषेधे आद्युदात्तम् ॥

क्वचिन्नेतीति। अष्टावसरत्वादिति भावः। प्रकृतसूत्रभाष्ये तु पदान्तादेङोतीत्यनुवर्त्य पदान्तस्यैङोऽति यत् प्राप्नोति तस्य सर्वस्यायं निषेध इति व्याख्यातं अष्टावसरत्वायस्तुनास्येव तोसदित्यादिनिर्देशादिति तदाशयः। पूर्वपद्यान्ते इति। पद्यमिति पदस्य सञ्ज्ञा। आकारादेश इति। न चैवं छन्दोग्रहणं व्यर्थमाकारादेशस्य छन्दस्येव सत्त्वादिति वाच्यम्। सप्त बाधके निषिद्धे बाह्यमपि क्वचिन्नेति स्वीकारात्। पादस्ये हनश्लोकस्य। वा छन्दसीत्यतो मण्डूकप्लुत्या छन्दसीत्यस्यानुवृत्तेः। तदाह। अत्र्यपादेति। एङः पदान्तादतीति सूत्रादेङ् इति पञ्चम्यन्तमनुवृत्तं प्रथमया विपरिणम्यत इत्याह। एङ् प्रकृत्येति। अन्तःपादं किमिति। अत्र चोत्स्येव किं नोक्तमिति प्रश्नः। एते चेन्नीत्यत्र पूर्वपदस्यान्ते एङ् अकारस्तु परपदस्यादौ। अतो निमित्तनिमित्तिनोः पादमध्यस्थत्वं नास्ति। अस्मात्। अवरक्षपो आशीर्लिङ्। अवद्यादिति पञ्चम्यन्तम्। अवक्रमुरिति। अवपूर्वस्य क्रमेर्लिपि छन्दसि चेति निदित्वाभावः। कचित्तु अवचक्रमुरिति पठ्यते तदयुक्तम्। त्रस्यविरोधात्। अव्रतेति। इङ् वृत्तो मन्त्रेघसेति च्लेर्लुकि द्व्यस्य अल्लादेशो यण्। अवस्य वर इति। अवेरसुन्। ततः क्यच्। क्याच्छन्दसीत्युः। स्यश्छन्दसि। स्वदः प्रथमान्तस्यानुकरणम्। ह्रस्वात्। इमन्नर्हि महिषिन्नं पुरुश्चन्द्रं विविद्वान्। पृथुश्चन्द्रमवसे चर्षणिप्राः। अधिश्चन्द्रं रहत्वश्रुरिति। नह्यत्रोत्तरपदमस्ति उदात्तद्वयदर्शनात्। पदकारैर्विभज्यैव पाठाच्च सत्यम्। बाहुलकात्समाधेयम्। प्राप्तिशास्त्रे तु विशिष्य विहितम्। पुरुः ष्वधि पूर्वेषु शकाति उपजायते। ह्रस्वे च पूर्वपद्यान्ते चन्द्रशब्दे परे स्त रा इति। अन्तरेति। मध्ये इत्यर्थः। तथा चाभक्तः शकार इति भावः। पाणिनीये तु टित्वाल्लिङ्गादागम एव। स च चन्द्रशब्दस्य उभयनिर्देशो बलीयानिति सिद्धान्तात्। पितरा। पूर्वपदस्य अराङादेशो निपात्यते उत्तरपदे तु सुपां सुलुगित्यादिना विभक्तेराकारादेशः। ऋतो ङिसर्वनामस्थानयोरिति गुणः। सधमा। सधेस्स विभक्तिको निर्देशः। सह माद्यन्ति देवा अस्मिन्निति सधमादो यज्ञः। मदोऽनुपसर्ग इत्यपि प्राप्ते अजब्यां स्त्री खननाद् इति तद्बाधके ग्युरि हलश्चेति घञ्। सूत्रे मादेत्यकार उच्चारणार्थः। तेन माद्यतेः क्विबन्तस्य मादिति यद्रूपं तत्रापि भवति। आत्वा वहन्तो हरयो युञ्जाना अर्वागिन्द्रस्य धूमादो वहन्तु। सादृश्ये। तुनितनीयमिति। भूरि चक्रेति मन्त्रे हिंसाहेत्वाद्युदात्तं पठ्यते। तद्भाष्ये च शत्रूणामपि भवितेति व्याख्यातम्। तविलन्तोदात्तं स्यात्। क्तप्रत्ययान्तानां पितुस्वरे दोषोऽर्थासङ्गतिश्च स्यात्। तस्मात् नन्तत्वैव युक्तेति भावः। सूत्रे इति शब्दः प्रकारार्थस्तेन निष्ठायामपि निपातनं बोध्यम् ॥ ७ थे सत्वात्। अन्यथोत्तरखण्डे आकारोऽपि निपात्यत इति समाध्येत। सादेति। सादेत्यर्थकम् ॥

प·प्र·
३८८

माचेदंसूत्रमिति।निपातातिरिक्तेगन्तविषयत्वुलस्यंनवेदेदितिभावः।अतएव।मन्त्रइत्यस्यानुवर्त्तनादेव।इहेति।अमाङ्योगेपीत्यर्थः।उपधालोपइति।सलोपयत्वेइत्यपिबोध्यम्।इतिष
अषाह्लोअग्नेरषभः।अषाह्लमुग्रंसहमानम्।अषाल्हयुत्सुपृतनासु।अषाल्हायसहमानायेत्यादि।यत्तुहरदत्तेनसूत्रेसादेतिह्रस्वान्तमेवेतिनिर्णीयदीर्घान्तमपिलक्ष्यंयद्य
त्तितदाअन्यतरस्यांसूत्रेछिलाइतरदितिशब्देनसङ्ग्राह्यमितिवर्णितम्।तत्रयदीतिसन्दिग्धोक्तिरुक्तलक्ष्योऽपिनप्रयुक्ता।यदपिवृत्तिकृतातचिरूपमित्युक्तंतत्स्वरव्यत्यया
भिप्रायेणकथञ्चिन्नेयम्।प्रमादएवेतितुहरदत्तः।उदात्तप्रयोगनिर्वाहार्थंबह्वृचप्रातिशाख्यस्थप्रमेयमाह।अंचोरिति।अस्यआचार्यस्यऊष्मपार्श्वप्रयुक्तःसह्रकारतामि
तीत्यन्वयः।स्थानिवदादेशोपिसोमेतिभावः।ओषधेश्चानचकृदिकारादितिङीषागतार्थताअन्तोदात्ततापत्तेः।इष्यतेत्वाद्युदात्तः।लघावन्तेद्वयोश्चेतिफिट्सूत्रात्।चितु
घइतिस्वरूपग्रहणंनतरप्तमपोः छन्दसिघशब्दस्यैवदीर्घदर्शनात्।उतवेति।भार्यायाभ्रातास्यालः ततः पञ्चमी।शृणोतेति।तप्तनप्तनथनाश्चेतितबादेशः।पित्वान्नङित्व
मा ऊरुष्याः णइति।ऊरुष्येतिकण्ड्वादियगन्तोरक्षणार्थकः।सेर्हिः।अतोहेरितिलुक्।इकः।सुञीतिनिपातस्यग्रहणम्।तस्यचअकारइहैवविशेषणार्थः।नचनिपातस्येति
तिसूत्रेणगतार्थतातत्रातइत्यनुवृत्तेरितिभावः।वस्तुतस्तुमास्त्वनुवृत्तिः।माचेदंसूत्रम्।नचातिप्रसङ्गः।अतइत्यनुवृत्तादपि।अधतेविश्वम्।अधद्रमितम्।तमित्वेवसमम
नादवतिप्रसङ्गाद्बाहुलकेनसमाधानस्यचेहापिसुलभत्वादितिदिक्।शक्तेतिन्वइत्यामह्यम्।रुषबहुवचनम्।शमिता।इहमन्त्रइत्यनुवर्त्ततइतिकाशिका।अतएवशमिये
तेत्यर्थइतिविवरणंसङ्गच्छते।जनिष्टाइति।इहअडागमोन।माङ्योगेप्यडागममुदाहरति।मावइति।वःयुष्माकंस्तेत्रेभार्यायापरेषांवीर्याणिउग्रानिमाभूवन्नित्यर्थः।ऊ
पेःकर्मणिलुङ्।अत्ययेनपरस्मैपदम्।एतच्चकाशिकानुरोधेनोदाहृतम्।अब्यथनन्तुवासुरिस्येवदृश्यते।माङ्ग्याटस्तुउदाहरणान्तरमन्वेषणीयम्।तनिपत्योः।छन्दसिकि
म्।वितेनिरे।येतिमा।घसिभसोः।हलादावजादौचक्ङितिअनयोरुपधालोपइष्टः।अतअचीत्याक्रुष्टंवृत्तिकारेणसूत्रेचकारःप्रक्षिप्तोनत्वसावार्षः।तथाचवार्त्तिकम्।हलग्रह
णमनर्थकमन्यत्रापिदर्शनादिति।सग्धिरिति।अदेःक्तिन्।बहुलंछन्दसीतिघस्लादेशः।उपधालोपेकृतेझलोझलीतिसलोपः।धत्वञ्जश्त्वम्।समानस्यसभावः।बब्धामिति।
भसेर्लोट्।ताम्।श्नुः।परंनित्यमप्युपधालोपंबाधित्वाबाहुलकाच्छ्लुप्रथमद्वित्वन्ततउपधालोपइत्यादि।अजादौ।अग्निर्वनानिबप्सति।अभ्यासदीर्घश्चेति।तुजादित्वादितिभावः।म

॥ शब्देऽसिवातस्मासिद्धत्वाद्यस्येतिलोपोन ॥

स्वरः
३८८

ऋदृशोऽङीति। इरित्वादङ्। नयुष्मे इति। नयुष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः अवद्यमाधिदीधरदिति मन्त्रः॥ मू०॥ अकृत्सार्वेति दीर्घस्तु अङ्गवृत्तपरिभाषया नेति भा
वः। यद्यमकारस्मात्रस्य लोपः। ततो यस्येति लोपे कृते प्रत्ययाकारस्याश्रवणम् इति षष्ठः। अदृश्रमिति। बाहुलकादेवाङ्। ऋदृशोऽङीति गुणो नेत्येके। भाष्ये तु गुणं वारयितुं दृशेरङ्
वक्तव्य इत्युक्तम्। व्यत्ययेन प्रथमपुरुषबहुवचनस्थाने उत्तमपुरुषैकवचनं वा द्रष्टव्यम्। शाखान्तरे तु अदृश्रन्नित्येव पठ्यत इति माधवः। त्वा पिन्दसि। अपिशब्दाल्लबपिस च
समासे यद्यपि पूर्वेणैव सिद्धः तथाप्यसमासे तेन न प्राप्यते। एतदर्थमेव ह्यपिशब्दः अन्यथा वा छन्दसीत्येव ब्रूयात्। तथा च छन्दोनुविदधानाः कल्पसूत्रकाराः प्रयुञ्जते आम्रे
नाभ्रिणी अग्ने इति। याज्ञवल्क्यश्चाह। एवं विनामकं पूज्येति। सुपांसु। पन्था इति। व्यत्ययो बहुलमित्येव सिद्धमिदम्। उक्तं हि तत्र सुप्तिङुपग्रहेत्यादि। तस्यैव त्वयं प्रपञ्चः। पूर्वसव
र्णवृत्तिः। इकारः। प्रमाणत आन्तरतम्यात्। ततः सवर्णदीर्घः। अर्चामसि वीर ब्रह्मवाहो यादेव विद्मतात्त्वा महान्तमिति बह्वृचाः। अग्नयात्तादिति। अम आत्। न विभक्तौ तुस्माः। सुपा स्वा
स्म्यमिति प्राप्त इति। यत्तु काशिकायामुक्तं यूयं वयमिति प्राप्त इति। सोयं महान् प्रमादः। तथा हि। नयुष्मे इति। ऋज्रभ्र्मे ऋक्षाम्वमेध— म्नो राज्ञो दानं स्तूयते। सुस्थां आतिथिविम्बस्भी
शङ्कोसि आम्रमेधेषु पेशसः इत्युपक्रमात्। वाजमित्यन्ननाम। अन्नदानेन ये सर्वेषां बन्धवः तेषां संबोधनं हे वाजबन्धवः। युष्मे युष्मासु। अधि इति सप्तम्यर्थानुवादी। वि
भक्त्यर्थे। अव्ययीभावस्तु यद्यपि नित्यसमासस्तथापि बाहुलकादिह न। तिनित्सुश्च ना। निन्दने च्छा शीलोपि। निन्दतेर्न लोपः सन्नड्भावश्च बाहुलकात्। मर्त्यः। अवद्यं नधा
रयति। भवदनुसन्धानमात्रेणैव निष्पाद्यत्वादिति भावः। निनित्सुरपीत्युक्त्या किमुत निन्दन्निति गम्यते। स हि पुण्यश्लोकानामगृह्णन्नस्तु तरां शुद्ध इति भावः। द्वितीयमन्त्रोपि
देवताप्रार्थ्यते हे इन्द्राबृहस्पती अस्मभ्यं रयिं धत्तमिति दधातिर्दानार्थः। न चास्मिन्मन्त्रद्वये यूयं वयमित्यस्य कश्चिदुक्तिसंभवोस्ति। किं च जसः शे इति पक्षे यूयवयौ शी इति केन वारणी
यम्। बाहुलकादिति चेत्। सोपि समस्थाने सम्भः। एतेन काशिकानुगामिनः प्राचोपि ग्रन्थः प्रत्युक्तः। ता अनुच्छ्येति। ताः बह्वीः षड्विंशतिरस्य वङ्क्रय इति हि प्रक्रम्य इदमपि गृध्रेषे पठितम्। नन्व
नुपूर्वात्तिष्ठते आतश्चोपसर्गे इति अङ्। बाधित्वा स्थागापापचो भाव इति क्तिना भाव्यमिति चेत्। सत्यम्। पूर्वपरेतिसूत्रे व्यस्यायामिति निर्देशादङ्पि ——— भविष्यति। सामान्यापेक्षत्वाप
काश्रयणात्। तदेतद्ध्वनयति। व्यवस्थावदिति। बाहुल्ये इति प्राप्त इति। यत्तु काशिकायां प्रवाहुणेति प्राप्त इत्युक्तं प्राचा तानुसृतं तत्सर्वं समासस्मेमाँ हत्वाद्वेयम्। प्रेति हि न समस्तं पृथक्स्वरदर्शना
[illegible]कारेपि विधपठ्यमानत्वाच्च। अतएवायमनात्मयोरिति ह्येयम्। एतेन प्रवाहशब्दात् तृतीयेपि व्याचक्षाणो न्यासकारः प्रत्युक्तः। स्वग्नयेति। अयाचोऽकारः। सुपि चेति दीर्घ निरसर्थः ॥

म·प्र·
३९९

उप्रत्ययइति।कवेरिति।घोषःवस्याकारोतोलोपइतिचबोध्यम्।इतरेतरयोगद्वन्द्वइति।समाहारद्वन्द्वेत्वेकशेषेतुह्रस्वान्तत्वादेवनुट्सिद्धः।ग्रामणीग्रहणमपिव्यर्थम्।छन्दसीतितुगो
मिवादेशस्येति।ननुद्वितीयैकवचनस्य।छन्दसिदृष्टानुविधानादितिभावः।प्रामादिकीति।लक्ष्येवकारपाठस्यनिर्विवादत्वादिदंभाष्येपिप्रकृतसूत्रस्यमत्लोपमात्रपरतोक्तेश्च
तिभावः।कृणुतादिति।धिन्विकृण्व्योरच्चेत्युप्रत्ययः।सुनोतनेति।पित्त्वेसतिङित्त्वाभावाद्गुणः।दधातनेति।ङित्त्वाभावाच्छ्नाभ्यस्तयोरातइत्यालोपोन।जुषध्वमिति।काशिकायांप्राचो
ग्रन्थेचजुषतेतिप्रामादिकमितिभावः।आज्जसेः।जसेरितिपूर्वाचार्यानुरोधेननिर्देशः।श्रीग्रामण्योः।श्रीणामिति।वामीतिनदीत्वविकल्पात्रूपद्वयंप्राप्तमितिप्राञ्चः।त
च्चिन्त्यम्।छन्दसिदृष्टस्यनुटःसिद्धेः।अभावस्यचापादयितुमशक्यत्वात्।तस्माद्धर्म्यमेवेतितत्त्वम्।सूताश्चग्रामण्यश्चेतिइतरेतरयोगद्वन्द्वः।कीदृङ्ङिति।किन्प्रत्ययस्यकुरि
तिनकारस्यङकारः।स्ववानिति।अवतेरसुन्स्वस्अवोयस्येतिविग्रहः।तुधातुःसौत्रोवृद्ध्यर्थः।ततोऽसुन्।स्वतवोवृद्धिर्यस्येतिविग्रहः।तनूरिरिति।तरतेःकिन्।उत्वम्।
तस्यद्विर्वचनेवीतिस्थानिवद्भावात्तृइत्यस्यद्वित्वम्।उरदत्वम्।कुहोः।आगन्तुनाइकारेणगुणेनचनिर्देशइत्याहुः।अतएवज्ञापकात्धातुनिर्देशेकिदिकारइत्यपिसुवच
म्।सोमेइद्गुणाविति।ह्वइत्यादेशस्याभावोपिबोध्यः।अष्टादशेति।क्षमितेःपाठपक्षेतुएकोनविंशतिः।चतेइति।चतशब्दोपिउजासहआद्गुणः।निपातेनसहएको
कृत्यच्छन्दस्तुपदकाराणांसंप्रदायसिद्धः।भूयामोइतिमन्त्रेभूयामोइतियथा।अश्व्यास्याविशस्तेति।अन्येषामपीतिदीर्घः।बभूथ।वृजःक्त्रादिसूत्रेणेड्भावेसिद्धेनिगम
एवेतिनियमार्थंनिपातनम्।तदेतदाह।भाषायान्तुववर्थेति।सर्वमाइति।अस्तेर्लङितिपि।ईडभावेअपृक्तत्वाद्धल्ङ्यादिलोपः।रुत्वविसर्गौ।संहितायान्तुभो
भगोरितियत्वम्।लोपःशाकल्यस्येतियलोपः।नछन्दसि।इहयदिआनन्तर्यादीत्वमाप्नोतिनिषिद्धेततर्हिअकृत्सार्वेतिदीर्घःस्यात्।अपवादाभावेपुनरुत्सर्गस्थितेः।
अतआह।ईत्वदीर्घेनेति।क्वचिदयदुक्तन्तनेतिव्याख्यानादितिभावः।अत्रज्ञापकंतुनुपदमेववक्ष्यतिदुष्टीयतीति।प्रकृतिमात्रेतात्पर्यम्।उप्रत्ययसमानार्थेनतुना
दुष्टीयितेत्यादिवाबोध्यम्।देवसुम्नयोः ॥७७ पादान्तइतिसूत्रेस्मत्वादस्यैवग्रहणार्थमावश्यकमितिबोध्यम्।किन्प्रत्ययस्येति।त्यदादिषुदृशइतिकिन्।भू
यामोइतियथेति।तत्रापिभूयामेत्यस्योत्रआद्गुणः।हल्ङ्यादिलोपइति।शपस्तुलुक् ॥

प्र·यः
३९९

टीन। शाखान्तर इति पाठः। शाखान्तरमात्र इत्यपपाठः। इति सप्तमः ॥ मू०॥ ननु देवाञ्जिगातीति प्रत्युदाहरणमङ्ग इयं विकल्पं यजुषि काठक इत्यंशद्वयस्यापि तत्राभावादित्याशङ्क्याह। बह्वृचानामस्तीति। तत्रेदं दृष्टमिति भावः। काठक इति किम्। यजुर्वेदे पि शाखान्तरमात्रे मा भूत्। अत्र सुम्नयुरिदमस्ति। कव्यध्वर। कवि अध्वर पृतना एषामन्त्यस्य लोपः स्यात्क्यचि परे न च्विविषये। सुग[illegible]दिगणे प्यध्वर्युशब्दः पठ्यते तह्युसत्यन्तरं बोद्धव्यम्। वसुधितमिति। वसूनां धातारं प्रदातारमित्यर्थ इति वेदभाष्यम्। समुषद्भिरिति। वसन्तीत्युषसः। सहवासिनः। तैः संभूयेत्यर्थः। वेदभाष्ये तु उषद्भिर्ज्वलद्भी रश्मिभिः। उषदाहे। लटः शत्रादेशे शपि प्राप्ते व्यत्ययेन श इत्युक्तम्। तदुपायान्तरं बोद्धव्यम्। नकवतेरिति। अनुवृत्त्यर्थ उपन्यासः। कृषेश्छन्दसि। लोके तु विकल्प्यते कृषीवलः। आद्यास्त्रय इति। धृङः। शपः श्लुः। अभ्यासस्य दीर्घः परस्मैपदत्वं निपात्यते। तस्यैव यङ्लुकि रुगभावमात्रमिति वा। तत्र पक्षे मा भूदित्येतदर्थं दर्धर्त्तीति रुक् निपातितः। दर्धर्षीत्यत्र तु यङ्लुक्पक्षे न किंचिन्निपात्यम्। किंतु द्वावेव धारयतेः श्लुणिलुक्श्लुः आद्ये अभ्यासदीर्घः। इतरत्र रुगागमश्च निपात्यते। इति सप्तमः। प्रसमुपोदः। पादपूरणे किम्। प्रदेवन्देव्या धिया। छन्दसीरः। कथन्तर्हि कृणुत नो अध्वरं श्रुष्टिमन्तम्। यो अद्रिमां उदनिमादयन्तीति। छन्दसि सर्वे विधयो विकल्प्यन्त इत्यदोषः। अक्षण्वन्त इति। अक्षिशब्दान्मतुप्। छन्दस्यपि दृश्यत इत्यनङ्। नुटोऽसिद्धत्वात्पूर्वेण लोपः। भूतपूर्वगत्या नुट्। ननु तस्यैव वत्वप्रसङ्गः। वत्वं प्रत्यसिद्धत्वात् यदि पूर्वान्तो नुट् क्रियेत णत्वं न स्यात्। तस्मान्नुडेवोचितः। नन्वेवं अवग्रहे दोषः स्यात्। अक्षण्विति णान्तं ह्यवगृह्णन्ति। अस्येयकारान्तं अवगृहीतुमुचितमिति चेत्सत्यम्। न लक्षणेन पदकारा अनुवर्त्याः। पदकारैर्नाम लक्षणमनुवर्त्तनीयम्। तस्मात् यथालक्षणं पदं कर्त्तव्यमिति महाभाष्ये स्थितम्। किंच देवयन्तः ईयिवांसमित्यादौ पदत्वं विनापि बहुलमवग्रहः क्रियते पूर्वेभिरग्निनेत्यादौ सत्यपि पदत्वे न क्रियत इति प्रागेवोक्तम्। भूरिदावत्तर इति। आतो मनिन्निति वनिप्। अत्राप्यवग्रहः प्राग्वत्। रथीतर इति। रथशब्दान्मत्वर्थे इनिः तदन्तात्तरप्। नकारलोपे कृते ईकारः। यदि तु नलोपापवादेन नकारस्य स्थाने ईद्विधीयेत तदा तस्यासिद्धत्वात्सवर्णदीर्घो न लभ्येत। एतेन नकारस्य इकारादेशे सति सवर्णदीर्घत्वमिति न्यासग्रन्थः प्रत्युक्तः। रथीतममिति। इह तु पदकाराः ह्रस्वान्तमवगृह्णन्ति। अन्येषामपीति संहितायां दीर्घ इति तदाशयः ॥

म॰ग्रा॰
५००

टी॰।समर्थनीयत्वादिति।त्वयापीतिशेषः।उत्वमिति।निपातनादितिशेषः।अम्नरस्त्वमिति इति।इतिप्रयोगादितिशेषः।कथंसङ्गच्छन्त इति।एवञ्चते चिन्त्या इतिभावः।चिन्त्यमि
ति।चिन्ताबीजन्तु ह्रस्वव्रीहिकालयोरित्यत्रसामान्यग्रहणार्थंङित्वमिति।प्राचीनग्रन्थैरितिदीर्घोकितइतिसूत्रस्यभाष्यादिग्रन्थैरित्यर्थः।व्यवस्थिततयेतिछन्दसि।सर्वविधीनांवैकल्पि
उम्देर्नञ्पूर्वस्येति।यद्यपिहृद्विदोन्ध्रेतिसूत्रेणैतत्सिद्धंनत्वंछन्दसिपाक्षिकमपिनत्वंमाभूदितिनिपातनाश्रयणम्।सर्वविकल्पानांछन्दसिव्यवस्थिततयाविपरीतापादनस्यासम्भ
वात्।अनुत्तमस्यैत्यत्रविभाषाप्रविभाडन्द्यापातविपरीत्यादिमन्त्रेषुनत्वाभावस्यैवदृश्यमानत्वात्।यदितुक्वचित्तत्वमेपिदृश्येततर्हितस्यबाहुलकादिनापिसमर्थनीयत्वात्।तथापिभाषायान
नुत्वमितिमतस्यानित्यत्वंनिपातनस्यफलमित्याह।अनुत्तमितियत्तच्छन्दस्येवेतिव्याख्यानादितिभावः।त्वरतेरिति।ज्वरत्वरेत्यूठ्।तुर्वीत्यस्येति।राल्लोपः।सइत्यस्येति।उत्वंरपरत्वन्तूरूपरूपरइत्ये
वसिद्धत्वात्कार्यकालपक्षाश्रयणेनपरिभाषाणामसिद्धप्रकरणेपिप्रवृत्तेः।उभययेतिव्याचष्टे।रुर्वेतिनिरेरुत्वेप्राप्तेपक्षेरेफार्थमिदम्।अम्नःशब्दईषदर्थे।अम्नरस्त्वमितः।भुवश्चमहाव्याहृतेरितिग्रह
णंतस्यप्रतिपदोक्तपरिभाषयाअनित्यत्वज्ञापनार्थन्तेनक्लापयतीत्यादौपुक्सिध्यति।मतुवः।अनुबन्धपरित्यागेनसकारान्तस्यवसुइत्यस्यमतुनासहद्वन्द्वः।अल्पाच्तरस्यापिसौत्रःपरनिपातः।
मदत्वइति।उभइतिवत्तसौमत्वर्थइतिभत्वंहशिवोमेदिनमितिसंयोगान्तलोपोरुत्वेसिद्धोवक्षम्इतिवचनाद्रुशिचेत्युत्वम्प्रसङ्गादाहराभ्यामिति।अनुबन्धस्येति।अतएववनोरचेतिसू
त्रेपिसामान्यग्रहणमुक्तम्।यत्तुचिन्त्यम्।उक्तरीत्याह्रस्वव्रीहिकालयोरितिसूत्रेसामान्यग्रहणस्यनिर्बाधत्वेनज्ञातेःककारःसामान्यग्रहणनिर्वाहार्थइतिप्राचाङ्ग्रन्थाःकथंसङ्गच्छन्तइति।
किंचककारस्यफलमपिचिन्त्यम्।यद्यपिमङ्लुकिदीर्घोकितइतिदीर्घस्याप्रवृत्तिःकिन्त्वसामर्थ्यादिसूत्रेव्यासम्भवतितथापिप्राचीनग्रन्थैःसहलक्ष्येविसंवादोदुर्वारइतिदिक्।देवाअच्छे
तिअनुपदंवक्ष्यमाणेनानोटीतिसूत्रेणानुनासिकः।तदस्यास्यनपक्षेतुअत्रानुनासिकइतिसूत्रेणेतिविवेकः।नेहेति।एतेनमहान्हिसइतिबह्वृचानांपाठोव्याख्यातः।आकरेतुमहांहीत्युदा
हृतम्।तच्छाखान्तरेअन्वेषणीयम्।एवमृतिविकल्पस्यैवव्यवस्थिततयाप्रकृतसूत्रत्यागेनमहल्लाघवम्।सूत्रारम्भेतुव्यत्ययोपिशरणीकरणीयइतिमहान्क्लेशइतिभावः।छन्दसिविकल्प
व्यवस्थयैवसिद्धेःप्रेत्यादिकंस्पष्टार्थमितितत्त्वम्।एवमुत्तरसूत्राण्यपिद्विवसष्टियाइति।अत्रपरिःस्वेसोमावसहेः।चकारोनुक्तसमुच्चयार्थइत्याशयेनाह।वदिति।कृतीषाहमिति।कृतियत्र
स्यान्येषामपीतिशेषः।इत्यष्टमः॥ ॐ कृत्वादितिभावः।विकल्पव्यवस्थयेति।व्यवस्थितविकल्पेनेतियावत्।इत्यष्टमः॥इतिश्रीमद्दीक्षितभट्टोजीपौत्रदीक्षितवीरेश्वरपुत्र
दीक्षितहरिविरचितेलघुशब्दरत्नेवैदिकीसमाप्ता॥ श्रीगङ्गाविश्वेश्वराभ्यांनमः।ग्रन्थसंख्यासंवत् १९३५ मितीफाल्गुणसुदी ७ अधिगच्छतिशास्त्रार्थःस्मरतिप्रबुधालिचा। य
कपापपातकस्तस्मैनमोस्तुगुरवेसदा॥ १॥ गुरुचरणसरोजाभ्यांनमः॥ संकष्टनाशिनीविजयतेतराम् ॥

रामः
५००

साधारणप्रकृतिप्रत्ययसमासतिङन्तविषयकतयापञ्चभिःप्रकरणैरुदात्तादिस्वरान्व्युत्पादयितु साधारणस्वरांस्तावदाह।अनुदात्त
मिति।एकवर्जमिति।द्वितीयायांचेतिणमुल्।ननुतत्रपरीक्षायामित्यनुवर्त्ततइतिचेत्सत्यम्।इहाप्यस्तिपरीक्षातथाहि।अत्रोदात्तादि
विधीयते।तत्रतत्समकालमेवशिष्टमनुदात्तंकर्त्तव्यंनविलंबितव्यमिति।एतच्चद्वितीयायाञ्चेतिसूत्रेहरदत्तादिभिरुक्तम्।यद्यपरीक्षायामि
तिप्रायिकम्।एतच्चात्रैवसूत्रेहरदत्तादिग्रन्थेस्पष्टम्।परिभाषेयमिति।अधिकारत्वेतुयद्यपिषाष्ठस्वरेनकश्चिद्दोषःतथापिस्थलान्तरवर्नि
षुदोषएव।आद्युदात्तश्चेत्येवमादिषुहिअस्यानुपस्थानाच्छेषनिघातोनलभ्येत।किंचएकवर्जमितिव्यर्थंस्यात्।तत्तत्सूत्रविधेयानांवचनसाम
र्थ्यादेवनिघाताप्रवृत्तेरितिभावः।परिभाषायालिङ्गापेक्षायामाह।स्वरविधीति।एकवर्जमित्यनेनहिअनुदात्तस्यवर्जनंव्यर्थम्।अतःपरिशे
षादुदात्तस्वरितावेववर्ज्येतेइतितद्विधावेवास्योपस्थानमितिभावः।तमेकमेचमिति।एकग्रहणन्तुविधीयमानस्योपलक्षणम्।तेनतवैवान्तश्च
युगपदित्यादौद्वयोर्वर्जनम्।इन्द्राबृहस्पतीइत्यत्रदेवताद्वन्द्वेचेतिसूत्रेणपदद्वयस्यापिप्रकृतिस्वरेविधेयेत्रयाणांवर्जनम्।बृहस्पतिशब्दोहिव
नस्पत्यादित्वाद्युदात्तःइतिबोध्यम्।गोपायतमितिगुपूइत्यस्यधातोरित्यन्तोदात्तःततआयप्रत्ययःप्रत्ययस्वरेणाद्युदात्तःततोधातुलेंगकाराकारउदा
त्तःसचप्रागुक्तयोरुदात्तयोःसतोःपश्चात्प्रवृत्तत्वात्सतिशिष्टःअतोबलवान्।तस्यशबकारेणापउदात्तादनुदात्तस्येतिस्वरितःस्यादेतत्।तमितिस्व
रितमाश्रित्यशेषनिघातोस्तुनचसन्निपातपरिभाषायानिर्वाहः।तस्याःअनित्यत्वेनस्वरविधावप्रवृत्तेः।अन्यथाचोदात्तादुत्तरपदस्यान्यतरस्यांहृन्द्र्या
म्नत्रुबिस्यादिभिरपिस्वरेकृतेशेषनिघातोनप्रवर्त्तेतेतिबहुव्याकुलीस्यात्।किंचअग्नेभर्द्दैकरिष्यसीत्यादौस्मप्रत्ययादीनांनिघातःकेनवार्येत।नहि
तत्रसन्निपातपरिभाषायाउक्तिसंभवोस्तिअपिचसदेवाएहवक्षतीत्यत्रएकादेशउदात्तेनोदात्तइतिकृतेहकाराकारोनिहन्येतएवमुदात्तस्वरित

म- योऽर्यण इति स्वरिते कृते त्याग्निर्ज्जातवेदसमित्यत्राग्निशब्दस्यैकारेणनिहन्येतिचेत्। अत्रोच्यते। यथोद्देशपक्षाश्रयणेनेयंपरिभाषात्रिपाद्यांनप्रव स्वरः
र्त्तते। तव्यतस्तित्वंयतोनावइतिसूत्रस्येहज्ञापकम्। परिभाषान्तराणितुकार्यकालपक्षाश्रयात्प्रवर्त्तन्तएव। अतोनकश्चित्प्रागुक्तदोषः। सतिशि
ष्टेति। एतच्चन्यायसिद्धन्तथाहि। यथोद्देशपक्षमवलंब्यप्रवृत्तायाअप्यस्याः उदात्तस्वरितेविधिभिःसहवाक्यैकवाक्यतास्त्येव। उत्सर्गस्यापवादस्य
वापस्यैवयत्रचरमाप्राप्तिस्तदेकवाक्यतापन्नयानयालक्ष्यंव्यवस्थाप्यते। अतएवऔपगवत्वमित्यत्राण्प्रत्ययेचआवृत्त्याद्युदात्तश्चेतिप्रवर्त्तमानं
स्वस्यैवप्रथमप्रवृत्तिबाधेनद्वितीयप्रवृत्त्यालक्ष्यंपरिनिष्ठापयतिइतिदिक्। अन्यत्रेति। अत्रचज्ञापकन्तासेःपरस्यलसार्वधातुकस्यनिघातविधा
नम्। अन्यथालृकारमात्रापेक्षत्वादन्तरङ्गत्वेनपरत्वेनचतिबादिषुकृतेषुक्रियमाणस्यतासेःस्वरस्यसतिशिष्टत्वाच्छेषनिघातेनैवसिद्धेरनर्थक
न्तत्स्यात्। गृणीतइति। अन्तोदात्तंपदम्। अत्रलसार्वधातुकनिघातोनास्ति। अदुपदेशादिति। तपरकरणात्। श्नाप्रत्ययस्यादन्तत्वाभावात्। तिङः इ
तिनिघातस्तुनभवति। यद्वृत्तान्नित्यमितिनिषेधात्। सहिव्यवहितेपिप्रवर्त्ततइतिवक्ष्यते। इहचसहोतायस्यरोदसीइतिपूर्वचरणेयद्वृत्तम
स्तीतिदिक्। देवीमिति। पचादिषुदेवडितिटित्करणाद्दिङीप्। चौउदात्तनिवृत्तीति। कृदुत्तरपदप्रकृतिस्वरेणउदात्तस्याऽस्यमकारस्याचइ
तिलोपेसति। अनुदात्तस्यचेतिसूत्रेणोदात्तःप्राप्तःतस्यायमपवादइत्यर्थः। [illegible]इति। मेदशब्दास्वरत्वमाश्रित्यगङ्गेप्रभृतीनान्त्रयाणामनुदा
त्तः। सचपदपाठेस्पष्टएव। संहितायान्तुस्वरितात्संहितायामितिवक्ष्यमाणाप्रचयापरनामधेयाएकश्रुतिःप्रवर्त्तते। नामन्त्रिते। सामान्यवचन
पदंव्याचष्टे। विशेष्यमिति। विशेष्यसमर्पकमित्यर्थः। अग्नेत्रातरिति। अग्निरिहविशेष्यः। त्राणकर्त्तेतितुविशेषणम्। अग्नेभ्रातःसहस्कृतेतिमन्त्रे राम:
तुशुचिव्रतेतिविशेष्यत्वेनविवक्षितम्। अतोऽग्नेइत्यस्यअविद्यमानवद्भावात्भ्रातरित्यस्यनिघातः। एवन्ततउत्तरेषामितिबोध्यम्। देवीःषडि १

ति। अत्र देवीरित्यामन्त्रितत्वाविद्यमानवत् तेन षडित्यस्य निघातः। अव्ययीभावस्य त्विति। एतच्च अव्ययीभावश्चेति सञ्ज्ञासूत्रे भाष्ये स्पष्टम्। अभ्यमीति। उपसर्गाश्चाभिवर्जमित्युक्तेरभिशब्दोऽन्तोदात्तः। तस्य नित्यवीप्सयोरिति द्वित्वम्। अनुदात्तं चेति परस्यानुदात्तत्वं यणि कृते उदात्तयणः परत्वात्स्वरितः। खलपूशब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः ततः सप्तम्येकवचनस्य उदात्तयणो हल्पूर्वादिति प्राप्तस्योदात्तस्य नोङ्धात्वोरिति निषेधः ततो नेन स्वरितः। तस्य यणि ततः परस्य आशाशब्दाकारस्यानेनैव स्वरितः आशाशब्दोऽप्यन्तोदात्तः। आशाया अदिगाख्या चेदिति फिट्सूत्रात्। अस्येति। आशाशब्दप्रथमाकारस्यानिकस्येत्यर्थः। शेषेति। शाशब्दस्य निघातो नेत्यर्थः। स्यादेतत्। यणादेशं प्रति स्वरितस्यासिद्धत्वात् स्थानिन्येव यण् प्रवृत्तः। तथा ओजढदित्यत्र हतृशब्दे द्वित्वं प्रवर्तते। न तु ढशब्दे। न च स्वरितयणः परस्येत्याश्रयणात्सिद्धत्वं शङ्क्यम्। अतिप्रसङ्गात्। उदात्तादनुदात्तस्य स्वरितत्वमनेन यत्र क्रियते तत्रापि ह्यसिद्धत्वन्न स्यात्। न चेष्टापत्तिः। लक्ष्यविरोधात्। प्रत्यग्निरूपसामन्त्रमस्व द्वित्यादौ स्वरितादर्शनात्। न च नोदात्तस्वरितोदयमिति निषेधः शङ्क्यः। अनन्तरस्येति न्यायेनोदात्तादनुदात्तस्येति यत्र प्राप्तिः तन्मात्रस्य निषेधात्। अन्यथा खलप्वाशा। न्या आग्निम्। पाह्यस्मान्। इत्यादावपि निषेधापत्तेः। तस्मादिह समाधानान्तरमेव वाच्यमिति चेत्। अत्राहुर्भाष्यकाराः॥ योगविभागः कर्तव्यः। उदात्तयणः परस्यानुदात्तस्य स्वरितः स्यात्। ततः स्वरितयणः। इह पूर्वमनुवर्तते। उदात्तयण इत्येव योऽभिनिर्वृत्तस्स्वरितस्तद्यणः परस्येत्यर्थः। एवञ्चास्यैव आश्रयात्सिद्धत्वं नान्यस्य। यद्वा स्वरितग्रहणं न करिष्यते खलप्वाशेत्यादावपि उदात्तयणः परत्वादेव सिद्धत्वात्। न च स्वरितयणाव्यवधानं शङ्क्यम्। स्वरविधौ व्यञ्जनस्याविद्यमानवद्भावादिति। यत्तु काशिकायामुक्तं व्यञ्जनस्य ह्यविद्यमानवद्भावो न त्वच इह तु स्थानिवद्भावादजेव। न च स्वरविधौ तन्निषेधः। स्वरदीर्घयलोपेषु लोपाजादेश एवेति सिद्धान्तात्। तस्मात्स्वरितग्रहणं न करिष्यत इत्यसङ्गतम्।

म॰ योगविभागपक्षः परमवशिष्यते। सोपि न उदात्तादनुदात्तस्येति यः स्वरितः तत्स्थानिकाद्यणः परस्यापि स्वरितत्वदर्शनात्। पठ्यते हि तैत्तिरीये। यास्ते स्वरः
२ विश्वाः समिधः सन्त्वग्ने इति। तस्माद्भाष्यस्यं पक्षद्वयमपि न सङ्गच्छत इति। सोयं वृत्तिकृतो महान्व्यामोहः। भाष्योक्तपक्षद्वयस्यापि क्षोदक्षमत्वात्
तथाहि। योगविभागपक्षे सन्त्यग्न इत्यत्र नानुपपत्तिः। सकाराकारमाश्रित्य उदात्तादनुदात्तस्येत्येवाग्निशब्दाकारस्य स्वरितसिद्धेः। न च स्थानिव
द्भावादचाव्यवधानं पूर्वस्माद्विधाविति पञ्चमीसमासस्य प्रत्याख्यानात्त्वीकारेपि वा निष्ठायां सेटीति ज्ञापकं नानित्यत्वात्। सार्वत्रिकत्वाभ्युपग
मेपि पूर्वत्रासिद्धीये तदभावात्। अत एव प्रत्यग्निरित्यादौ स्वरितत्वेन प्रवर्त्तते नोदात्तस्वरितेत्यादिना निषेधात्। यदि हि संलग्न इत्यत्र प्रकृतसूत्रं
प्रवर्त्तेत तर्हि निरपवादत्वात्साह्यस्मानित्यत्रेव प्रत्यग्निरित्यत्रापि तस्य प्रवृत्तिं को वारयेत्। एवं स्वरितग्रहणप्रत्याख्यानपक्षोपि साधुरेव पूर्वत्रा
सिद्धीये न स्थानिवदित्यस्य जागरूकत्वेन वृत्तिकारोक्तदोषस्य निरवकाशत्वादिति मात्सर्यमुत्सार्य सुधीभिराकलनीयम्। एतेन दध्याशपति इ
त्याह। इति स्वरितयणः स्वरितत्वे उदाहरणद्वयं वदन् यथाश्रुतं वृत्तिग्रन्थं चाम्रेडयन्स्वरमञ्जरीकारः प्रत्युक्तः लोपाजादेशा एव न स्थानिवदि
ति नियमो हि स्वरविधौ नेति प्रतिपदोक्तस्यैव निषेधस्य न तु पूर्वत्रासिद्धीयत्वप्रयुक्तस्यापि एकादेश उदात्तेनोदात्तः उदात्तयोरेव स्थानित्वे आ
न्तरतम्यादेव सिद्धम्। अन्यतरस्य अनुदात्तत्वे स्वरितत्वे वा सिद्धं तूभयान्तर्यादिति न्यायेनान्तरतम्यात्स्वरिते प्राप्ते विधिरयमिति ध्वनयन्नु
मु दाहरणद्वयमाह। वोश्वा। इत्यादि। अत्र व इत्यनुदात्तम्। बहुवचनस्य वस्नसाविति अत्रानुदात्तं सर्वमपादादावित्यधिकारात्। अश्वशब्द आद्यु
दात्तः अशेः क्वनित्युस्यादितत्वात्। क्वेति। किमोत् तित्स्वरितम्। अवरशब्दः स्वाङ्गशिटामित्याद्युदात्तः। स्यादेतत्। क्वावरमित्युदाहरणमयुक्तम्। रामः
एकादेश उदात्तेनोदात्त इति सूत्रे पूर्वसूत्रादनुदात्तस्येत्यस्यानुवृत्तेः काशिकायामुक्तत्वात्। तस्यादित इति सूत्रे स्वरितोदात्तार्थश्चेति वार्त्तिकस्य त २

त्रभाष्यकैयटादीनाञ्च तथैव स्वरसादिति चेत् सत्यम्। इह सर्वे प्राचाङ्ग्रन्थाः अभ्युच्चयमात्रपरतया कथञ्चिन्नेयाः। वस्तुतस्तु अनुदात्तग्रहणं नानुवर्त्तत एव निष्फलत्वात्। लक्ष्यविरोधाच्च क्कावरमित्यादौ बह्वृचानां उदात्तपाठस्य निर्वादत्वात्। तैत्तिरीयाणामपि। याज्ञैवेनमेतत्याप्यापस्तीत्यत्राङ्प्रश्लेषे द्वितीयाक्षरस्योदात्तत्वात्। अतएव बह्वृचप्रातिशाख्ये उदात्तवत्येकीभाव उदात्तं सन्ध्यमक्षरम्। अनुदात्तोदये पुनः स्वरितं स्वरितोपधे इति श्लोके पूर्वार्द्धे अनुदात्तग्रहणं न कृतम्। किन्तु तत्र वृत्तस्य पूर्वान्वयभ्रमं वारयितुं पुनःशब्दः प्रयुक्तः। शौनकीये स्वराष्टकेऽपि एकादेशमुदात्तेन तत्त्वमेव नयेत्स्वरमित्युक्तमिति दिक्॥ इकारयोरिति। ह्रस्वयोरेवेत्यर्थः। अस्य श्लोकस्य इत्यत्र तु ईयत इति दीर्घस्य प्रश्लेषात्स्वरितः। इयञ्च बह्वृचानां व्यवस्थोक्ता। अन्येषामपि तदीयप्रातिशाख्यानुसारेण बोध्या। नोदात्तः। उदयशब्दः परशब्देन समानार्थः प्रातिशाख्येषु प्रसिद्धः। लाघवार्थं परशब्दे प्रयोक्तव्ये मङ्गलार्थमुदयशब्दः प्रयुक्तः। तथा च भाष्यम्। मंगलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्त इत्यादि। एवञ्च वृद्धिरित्यादौ शिवशमिति मध्ये स्वरितोदयमिति चान्ते पाणिनीये मङ्गलं कृतम्। यद्यपि नञ्द्वयन्यस्ता गार्ग्यादीनामेवेति विपरीतनियमशङ्कां वारयितुं नञ्द्वयान्तर्भावः। आगच्छ भो इति। अत्र माणवकशब्दस्य देः प्लुतो वैकल्पिकत्वान्न कृतः। पक्षे सोऽपि बोध्यः। स चोदात्तः। प्लुत उदात्त इत्यधिकारात् एकश्रुतिप्लुताभ्यां अवयवभेदेन वाक्ये समुच्चिताभ्यां दूरात्संबोधनं द्योत्यते। विभाषा छन्दसि। अत्र तन्त्रेण आवृत्त्या वा अच्छन्दसीति नञ् प्रश्लिष्य भाषायामपि ऐच्छिको विकल्पो बोध्यः। तथा च दाण्डिनायनादिसूत्रे भाष्यम्। एकश्रुतिर्हि स्वरसर्वनामेत्यादि अतएवाभियुक्तानां विरुद्धस्वरकतत्पुरुषबहुव्रीह्याद्याश्रयणेन श्लिष्टकाव्यादिनिर्माणं सङ्गच्छते। यस्य शान्तेघ्नेतोधावति अलुब्धसानां यातेनेकार्थवाक्यमिति भाष्यञ्च। तथा च काव्यप्रकाशे वेद इव लोके स्वरो न विशेषावसायहेतुरित्युक्तम्। एकश्रुत्या व्यवहारादिति तस्याशयः। किमर्थन्तर्हि इत्यस्य पो

तममितिप्रक्रमस्यविभाषाभाषायामितिसूत्रितमितिचेत्त्रैस्वर्येणप्रक्रमेपाक्षिकानुदात्तलाभायेतिगृहाण।वेतिप्रकृतेविभाषाग्रहणङ्कुर्वन्सूत्रकारोपितन्मादिकमभिप्रैति।एतेनभाषायांस्वरानुरोधोनास्त्येवेतिभाष्यन्तःपरास्ताः।स्वरविधिषुछन्दोधिकाराभावात्।एए स्यच।वाभाषायाम्।इतिकिंसूत्रस्यत्वत्युपोसमम्।विभाषाभाषायामितिषाष्ठस्य।एवंविधानामन्येषामपिनिर्विषयत्वापत्तेश्च।किमर्थन्तर्हिवैदिकप्रक्रियायांस्वरत्वसुत्वादनंप्रक्रान्तमितिचेत्वेदेतस्यावश्यकत्वात्।ननुलोकेसर्वथानुपयोगादितिगृहाण।इमंमेइति।ननुमेइतिस्वरितत्वविधायकन्त्रिपादीस्थत्वादसिद्धंस्यात्।नचस्वरितादित्याश्रयात्सिद्धत्वम्।कवःसुक्तेत्यादौचरितार्थत्वाद् इतिचेत्।नतस्मादितदृत्यारभ्यनवसूत्र्याःस्वस्थानादुत्कृष्यशात्वान्तेभाष्यवार्त्तिकयोर्निवेशितत्वात्।नसुब्रह्मण्यायामितिसूत्रेस्वरितस्यतूदात्तइतिवदताएतत्काण्डोलर्षस्यज्ञापितत्वाच्च।नचसुब्रह्मण्योमितिसिद्धःस्वरितोस्तीतिवाच्यम्।तत्रएकादशउदात्तेनेतिसूत्रप्रवृत्तेरावश्यकत्वात्।तत्रह्यनुदात्तग्रहणंनानुवर्ततइत्यवोचाम॥प्राचांरीत्यानुदेवब्रह्मणोरनुदात्तइतिसूत्रंज्ञापकमितिदिक्।सन्नतरइति।सन्नोनुदात्तःतदाह।अनुदात्ततरःस्यादिति।इतिसाधारणस्वरप्रकरणंप्रथमम्।प्रकृतिर्द्विधाधातुःप्रातिपदिकञ्च।तत्रधातुस्वरानाह।धातोरिति।अदाद्यन्तगणइति।आगणान्तादितिभावः।अभ्यस्तानामादिः।आदिरित्यनुवर्त्तमानेपुनरादिग्रहणंनित्यार्थम्।अचीतिकिन्दद्यात्।अनिटि,किंजक्षिथ।अनुदात्तेच।बहुव्रीहिरयम्।तेनमाह्निस्मदधात्।दधात्यत्रइत्यादौलोपयणादेशयोःकृतयोरपिआद्युदात्तःसिद्ध्यतीत्याशयेनाह।अविद्यमानेतिभीह्री।प्रत्ययेइत्येववक्तव्येपूर्वग्रहणंज्ञापयति।सोवर्यःसप्तम्यस्तदन्तसप्तम्यइति।ज्ञापकेचमतद्वयम्।सामान्यापेक्षंविशेषापेक्षञ्चेति।आद्येत्रित्यादिर्नित्यमित्यादावपितदन्तसप्तम्येव।द्वितीयेतुयत्रतदन्तग्रहणंसत्वाभ्यांफलेभेदः।तत्रैवतदन्तसप्तमी।भीह्रीत्यत्रहिपूर्वग्रहणाभावेतदन्ततस्यकार्यित्वेप्रत्ययान्तानांभ्यादीनामलोन्त्यस्यभवत्युदात्तःप्र

त्ययान्तस्यस्यात्।सप्तम्यर्थपुरस्कारेतुपेतमपहायभ्यादीनामेवउदात्तःस्यादितिस्पष्टफलभेदः।उपोत्तमंरितिचङन्यतरस्यामित्यत्राप्येवमेव।ञ्नित्यादिर्नित्यंपथिमथोःसर्वनामस्थानेइत्यादौतुनास्तिफलभेदः।तदन्तग्रहणेसत्यसतिचप्रकृतेरादेरेवउदात्तत्वात्।अतस्तत्रपरसप्तम्येवेतिदिक्।लोलूयन्तोलूपमिति।लोइत्युदात्तःलूइतिस्वरितःततश्चत्वारप्रचयाः।लित्स्वरइति।अत्राम्रेडितान्तर्गतस्यलूशब्दस्योदात्तःनचतस्मिन्कर्त्तव्येऽल्लोपस्यस्थानिवद्भावःशङ्क्यःस्वरितविधौतन्निषेधात्।शेषनिघातः।अचःकर्त्तव्यकिं।इहकीर्यतइत्यादौइत्वेरपरत्वेचसतिअयंस्वरइष्टःतन्निर्वाहार्थन्तास्यनुदात्तेतिसूत्रेसमासैकदेशोऽप्युपदेशशब्दइहानुवर्त्यते।सप्तम्याचविपरिणम्यतेतदाह।उपदेशेऽजन्तानामिति।नन्वेवंएवन्द्वादशधाजज्ञेइत्यादाविवान्तर्भूतण्यर्थात्कर्तृकर्मविषयात्जनेर्लटिजायतेस्वयमेवेत्यत्रएषस्वरोनस्यादितिचेन्नैवम्।यइतिविषयसप्तमीमाश्रित्यप्रत्ययोत्पत्तेःप्रागेवआत्वप्रवृत्तेरित्याहुः।लूयतइति।आदिमध्यौपर्यायेणोदात्तौ।माहिचीकरतामिति।अदुपदेशात्परत्वेनलसार्वधातुकानुदात्तत्वेकृतेचङएवस्वरेप्राप्तेपक्षेधात्वकारउदात्तःउपोत्तमग्रहणानुवर्तनात्द्व्योर्न।माहिदधत्।इतिधातुस्वराः।तेचप्रायेणकृत्तद्धितबले नैवज्ञेयाः।उणादिषुतुउणादिप्रत्ययैःअव्युत्पत्तिपक्षेपिफिट्सूत्रैः।क्वचित्तुविशिष्यविधानादितिविवेकः।अतएवकर्मण्यणितिसूत्रेमांसशब्दस्यनविषयस्येतिफिट्स्वरमाशङ्क्यमनेर्दीर्घश्चेत्यौणादिकसप्रत्ययान्तत्वादन्तोदात्तताकैयटेनोक्ता।मांसमेकः।पिंशतीत्यादौतल्लभ्यमपितथैव।यत्तुआज्यशब्दव्युत्पादनावसरेकैयटेननविषयस्येतिसञ्चारितन्तत्प्रौढिवादमात्रम्।स्वरनिर्वाहस्तुण्यत्स्वंपरित्यज्यआङ्पूर्वात्क्यनितिपक्षस्यसिद्धान्ततत्वादेवेतिदिक्।कर्षात्वतःञ्नित्यादिर्नित्यमित्यस्यापवादःस्थानिवत्वादिति।स्वरविधौनेतिनिषेधस्तुनास्ति।लोपाजादेशएवेतिनियमात्।झल्युपोत्तमम्।षट्त्रिचतुर्भ्योहलादिरित्यस्यापवादः।सर्वस्यसुपि।सर्वशब्दउञ्छादिष न्तोदात्तोनिपातितः।सर्वस्यविकारःसार्वइत्यत्रअ

म॰ नुदात्तादिप्रकृतिकसुबन्तलक्षणोऽन्यथा स्यादिति ङ्याप्सूत्रे भाष्ये स्थितम्। अत्र वर्णन्तु सर्वत्रैव आद्युदात्तस्यैव। प्रत्ययलक्षणेनापि सर्वस्वरस्येष्यमा स्वं र॰
४ णत्वात्। पथिमथोः। पथिमथिशब्दौ उणादिषु इनिप्रत्ययान्तौ नित्त्वादिति॥ गमेरिनिरित्यधिकारे मन्थः। पतस्थ चेति सूत्रितत्वात्। तत्र प्रत्ययस्वरेणा
न्तोदात्ते प्राप्ते विधिरयम्। स्वेक्षयद् इति। क्षि निवासगत्योः। अस्मादधिकरणे घः। निवासे किम्। व्याधेः क्षयः। क्षि क्षये। एरजन्तः। जयोश्च इति। जयतेर्घः
करणं किम्। जयो ब्राह्मणानाम्। भावे एरच्। वृषादीनाञ्च। वृषु सेचने इगुपधलक्षणः कः आकृतिगण इति। फिट्सूत्रे युग्रामादीनाञ्चेति सूत्रितम्।
ग्रामादिरप्याकृतिगणः। एवञ्च अविहितलक्षणस्याद्युदात्तस्य वृषादित्वं ग्रामादित्वं वा। बोध्यम् अन्तोदात्तत्वस्य तु उञ्छादित्वं घृतादित्वञ्चेति दि
क्। एवञ्च द्वाभ्यामेव सूत्राभ्यां सर्वसिद्धौ इतरसूत्रद्वयप्रणयनम् कर्त्तृभेदान्न दोषायेति बोध्यम्। आशितः कर्त्ता। कर्तृवाचीति सकर्मकादप्यशेः
कर्त्तरि क्तः उपधादीर्घश्चानेनैव सूत्रेण निपात्यत इति भाष्ये स्थितम्। अत एव कृषन्निति मन्त्रस्य वेदभाष्ये कृषन् कृषिं कुर्वन् फालः कृषीवलस्योपकार
ङ्करोतीति व्याख्यातम्। वृत्तिकारस्तु। अशेराङ्पूर्वादविवक्षितकर्मत्वेनाकर्मकत्वात् कर्त्तरि क्तः। तत्र थाथघञिति प्राप्तः स्वरोऽनेन बाध्यत इत्याह। त
क्लिष्टम्। अविवक्षितकर्मकेभ्योपि कर्त्तरि क्ते दत्तवान् पक्ववानित्यर्थे दत्तः पक्व इत्यापत्तेः। आशित इत्यवग्रहापत्तेश्च। अपर आह। कर्त्तेत्यनेन भूत
पूर्वगत्या अणौ कर्त्ता णौ कर्मीभूत एव विवक्षितः। तथा च ण्यन्तात्कर्मण्येवायङ्ः इति। जुष्टार्पिते। जुषी प्रीतिसेवनयोः। श्वीदितो निष्ठायामिति इट्
प्रतिषेधः। अर्त्तेर्णिच्। अर्त्तिह्रीति पुक्। आनके वलङ्गतार्थत्वमात्रं किं तु आरभ्यमाणे सूत्रे दोषोऽप्यस्तीत्याह। अर्पिता। षष्ठि रित्यादिना युष्मदस्मदोर्ङसि।
ङयि च। पृथग्योगकरणं यथासंख्यशङ्कानिरासार्थम्॥ ईड वन्द। पूर्वसूत्रे ह्यनुबन्धकस्याग्रहणात् ण्यन्ते धुतिस्वर एव प्राप्ते वचनम्। विभाषा राम॰
वेः। वेणुशब्दो नित्स्वरेण नित्यमाद्युदात्तः प्राप्तः स्थोऽणुरित्यनुवर्त्तमाने अजिवृरीभ्यो निच्चेति नित्त्वादित्वात्। इन्धानशब्दो यदि चानशन्तः तदा चित्त्वा ४

दन्तोदात्तः। अयशानजन्तः। तर्हि लसार्वधातुकानुदात्तत्वे कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः। श्नसोरल्लोप इति श्नमोकारस्य उदात्तस्य लोपात्। सर्वथापि अप्राप्तमाद्युदात्तत्वं पक्षे विधीयते। त्रयः पचाद्यजन्ता इति। कुह विस्मापने। श्वठ असम्यग्भाषणे। चोरादिकावदन्तौ। कथ हिंसायाम्। मतोः पूर्वमिति। शब्दरूपापेक्षया नपुंसकस्य आदित्वस्य विशेषणम्। केचित्तु सूत्रे पूर्वशब्दं पुल्लिङ्गमेव पठन्ति। उदाहरणे चातुरर्थिको नद्यां मतुप्। मतौ बह्वचो नजिरादीनां शरादीनाञ्चेति दीर्घः। अहीवतीति। सञ्ज्ञायामिति वलम्। उत्तरो ग्रन्थः स्पष्टार्थः। क्वचित्तु विशेष उच्यते। द्वितीयपादे तृणधान्यानाम्। तिला इति। यत्तु अलाबूतिलोमेति रजसि कृटज्विधौ हरदत्तेनोक्तन्तिलशब्दो घृतादित्वादन्तोदात्त इति तच्चिन्त्यम्। तिलाश्चमे इत्यत्र आद्युदात्तस्यैव पठ्यमानत्वात्। प्राणिनम्। कुपूर्वम्। यत्तु कुपूर्वाणामिति पाठमुपन्यस्य कवर्गात्पूर्वे तन्मध्ये आदिरिति न्यासकारहरदत्तौ तस्य समूह इति सूत्रे प्रोचतुः तच्चिन्त्यम्। सर्वनामत्वेन सुटि सति कुपूर्वेषामिति प्रयोगापत्तेः। सौत्रत्वं वा शरणीकर्त्तव्यम्। लघावन्ते द्वयोश्च। इह आदिशब्दो न संबध्यते। तेनादेरपि गुरोरुदात्तः अत एव वृषाकपीति शब्दस्य गुरुरुदात्त इति वृषाकप्यग्नीति सूत्रे वृत्त्यादिग्रन्थेषु विभावितत्वञ्च गुरूणां मध्ये य आदिः इत्यर्थोऽस्त्विति वाच्यम्। अन्यतो ङीषिति सूत्रे सारङ्गकल्माषशब्दौ लघावन्त इत्यादिना मध्योदात्ताविति हरदत्तादिग्रन्थविरोधात्। कल्याण इति। पर्यायेण आदिमध्यावुदात्तौ॥ चतुर्थपादे॥ उपसर्गाश्चाभिवर्जम्। इहा। माभिरिलेवसुवचम्। इतरेषां पूर्वेण सिद्धत्वात्। वस्तुतस्तु तदपि मास्तु। एवमादिषु अभेः सुपठत्वात्। आत्वेति मन्त्रे उपसर्गाश्चाभिवर्जमिति वचनात्त्वाति पदिकान्तोदात्तत्वमित्युक्त्वा मानो मर्त्ता अभिद्रुवन्निति मन्त्रे एवमादीनामन्त इति वदता —— वेदभाष्यकृता ध्वनितमेतत्। यथेति पदान्ते। यत्तु स्वरमञ्जरीकृता पुराजीवगृभो यथाश्वाजन्तौ। अग्नयोथेत्युपन्यस्य लित्स्वरमाशङ्क्य आव्ययिकप्रसिद्धिमात्रेणात्र सर्वानुदात्तत्वमित्युक्तम्। फिट्सूत्रेषु तुरीयः पादः। इति प्रकृति

स्वरविषयकंद्वितीयंप्रकरणम्।अथप्रत्ययस्वराः कर्त्तव्य मिति।तव्यत्प्रत्ययःतस्यतित्वात्स्वरितोवक्ष्यतेननुतव्यस्यापिआद्युदात्तेशेषनिघातेकृते
उदात्तादनुदात्तस्येतिस्वरितोभवत्येवेतिचेत्सत्यङ्किन्त्वयमसिद्धःतित्स्वरस्तुसिद्धइतिशेषनिघातप्रवृत्त्यप्रवृत्तिभ्यांमहान्फलेविशेषः।तव्यतस्ति
त्वमेवचशेषनिघातपरिभाषायायोद्देशंप्रवृत्तौज्ञापकमितिज्ञेयम्।युच्छतीति।युच्छप्रमादे।अन्यकेइति।अकच्ततःपरश्चिदुदात्तःएवंयकेत
कदित्वत्रापि।अकचश्चित्त्वमेवचचितःप्रकृतेरित्युक्तेऽर्थेलिङ्गम्।अन्यथातस्यैकाच्त्वादनर्थकन्तत्स्यात्।कौञ्जायनाइति।कुञ्जस्यापत्यानिबहूनि।गो
त्रेकुञ्जादिभ्यश्च्फञ्।व्रातच्फञोरस्त्रियामितिञ्यः।ञ्यादयस्तद्राजाः।बहुत्वेलुक्।इहच्फञश्चकारोव्रातच्फञोरितिविशेषणेचरितार्थः।ञका
रोवृद्धौ।ततश्चचित्स्वरंबाधित्वापरत्वात्ञित्स्वरःप्राप्तःसोनेनबाध्यते।तिसृभ्योजसः।अर्थगतंबहुत्वंशब्देआरोप्यबहुवचननिर्देशः।अन्तोदात्तस्य
त्रिशब्दस्यआदेशस्तिसृशब्दोपितथातस्यअचिरऋतइतिकृतेउदात्तस्वरितयोर्यणइतिजसःस्वरितत्वंप्राप्तम् अनेनबाध्यते।अन्तोदात्तात्।नित्य
शब्दःस्वर्यतेतेनाधिकारगतिर्भवतीत्याशयेनाहनित्याधिकारेति।अनित्यसमासेकिम्।अग्निचिता।उपपदसमासः।कृदुत्तरपदप्रकृतिस्वरेण
चित्त्वेकृदुदात्तः।अधिकारग्रहणंकिम्।विग्रहाभावमात्रेणयोनित्यसमासस्तत्रपर्युदासोमाभूत्।अवाचाब्राह्मणेन।बहुव्रीहौनञ्सुभ्यामित्युत्त
रपदान्तोदात्तत्वम्।अत्रविभक्तेर्वैकल्पिकउदात्तोभवत्येव।दधीवइति।दध्यंचतिदध्यङ्।तस्यऋत्विगादिनाक्विन्।शसःपरिग्रहार्थमिति।प्रशादिरि
त्येवतुनोक्तम्।नपुंसकेशसिमाभूत्।सुटिचयथास्यादिति।ऊठीति उपधाभूतऊठग्रह्यतेनत्वन्त्यइत्यर्थः।पञ्चमीनिर्देशादन्तस्यैवग्रहणेप्राप्तेवच
नम्।माभ्यामिति।पूर्वार्द्धेचैवबभ्रुशब्देनोक्तयोरिहइद ———— मापरामर्शोप्यन्वादेशोस्त्येव।अन्वादेशश्चकथितानुकथनमात्र
म्।नत्विदमाकथितस्येदमेवानुकथनमितिभाष्योक्तेः।नन्वेवमपित्वावेकाच इतिस्वरःप्राप्नोति।नचेहान्तोदात्तादित्यस्यानुवृत्तिसामर्थ्यात्सोपिनप्र

४मन्यथाअन्तोदात्तं

वर्त्ततइतिवाच्यम्।शसोव्यावृत्त्यासामर्थ्योपिपक्षयात्।नहिशस्सिसावेकाचइतिप्राप्नोति।इष्यतेचतत्रानुदात्तएवयदीमेनांउषतोअभ्यवर्षीत्‌ह नामैनाँइतिलशायदब्रवीत्।अन्यैरेवान्कन्यानामभिःस्वरत्।इत्यादौतथैवपाठात् तस्माद्‌दाभ्यामित्यादेरन्वादेशेकथंसर्वानुदात्ततेतिचेत्।उच्यते।ऊडिदमितिसूत्रेएकाचइत्यनुवर्त्तते।पदादिविशेषणार्थम्।अतएवनिशूपर्यन्ताःषडेवगृह्यन्तेनतुततःपरेपि।तेषामनेकाच्त्वात् तेन ग्रीवायांबद्धो पिकक्षआसनिमत्स्यनदीनउदनिक्षियन्तमित्यत्रआसन्युदतीतिमध्योदात्तंस्यात्।नचान्तोदात्तास्वरत्वमेवेहविभक्तेर्दुर्लभमितिवाच्यम्।स्थान्यन्तरतम्येनादेशानामप्यन्तोदात्तत्वात्।आस्यशब्दस्यण्यदन्ततयातित्स्वरेणस्वरितान्तत्वेपिपद्न्नोमासितादिसूत्रेपदाद्यादेशानामन्तोदात्ततानिपातनाश्रयणात्।एवंस्थितेशसिएनादेशस्यापिएकाज्ग्रहणेनैववारितत्वादन्तोदात्तग्रहणस्यसामर्थ्यनिर्बाधम्।तेनाभ्यामित्यादौसर्वानुदात्ततासुस्थेति।यद्वासावेकाचइतिसूत्रेअन्तोदात्तादित्यपकृष्यताम्।तथाचअशादेशेकृतेप्रसङ्गएवनास्तीतिदिक्।अष्टनोदीर्घात्।अष्टन्शब्दोघृतादित्वादन्तोदात्तः।तेनोत्तरार्थतयानुवर्त्तमानस्यान्तोदात्तादित्यस्येहापिनान्वयः।मण्डूकप्लुतिर्वास्तु।दीर्घात्किं।अष्टभिः।इहझल्युपोत्तममितिस्वरः।शतुरनुमोनद्यजादी।अशासंत्वाविदुषीरास्मिन्नहन्‌यस्यैवंविदुषोग्निहोत्रंजुह्वति।अत्रवस्वादेशस्यस्थानिवद्भावेनशतृत्वान्ततःपरयोर्नदीविभक्त्योरुदात्तःप्राप्तःसनेष्यते।तथाचस्थानिवत्सूत्रेवार्त्तिककृतास्वरेचवस्वादेशेइतिनिषेधःपठितः।उदात्तयणोहल्पूर्वात्।उदात्तस्वरितयोरितिस्वरितेप्राप्तेआरम्भः।ह्रस्वनुड्भ्याम्।अक्षण्वन्तइति।छन्दस्यपिदृश्यतइत्यनङ्।अतोनुडितिनुट्।पूर्वनकारस्यलोपःनेष्यतइति।हलस्वरप्राप्तावितिभाष्योक्तेरितिभावः।रेवानिति।रयिरस्यास्तीतिमतुप्।रयेर्मतौबहुलमितिसंप्रसारणंपूर्वत्वम्।आद्गुणःततोह्रस्वाभावाद्वचनम्। नामन्य।अग्नीनामित्यादौ।परत्वान्नित्यत्वाच्चदीर्घेकृतेह्रस्वाभावान्नेदंस्यात्।वचनन्तुतिसृणांचतसृणामित्यादौ।

म· ६

सावकाशम्। अतआह मतुपीति। प्रथमान्तमनुवृत्तम्। सप्तम्या विपरिणम्यत इति भावः। षट्त्रि। हलादिः। किं। चतस्रः पश्य। नगोश्वन्। इहान
न्तरस्य प्रतिषेधासंभवात् सर्वस्यैव षाष्ठिकस्वरस्यायं प्रतिषेध इत्याह। प्रागुक्तमिति। एवञ्च वीरवत्तममित्यत्र ह्रस्वनुड्भ्यां मतुबिति न भवति।
यत्तु स्वरमञ्जर्यान्तृतीयादिविभक्तेरुदात्तत्वन्न भवतीति नगोश्वन् सूत्रे विवृतन्तदनेन प्रत्युक्तं लक्ष्यविरोधात्। उदात्तनिवृत्तिस्वरस्य तु प्रति
षेधो नेष्यते। देवी। कुमारीत्यादिनामन्तोदात्तत्वस्य भाष्ये तत्र तत्र दर्शितत्वात्। वेदेपि दर्शनाच्च। तन्निर्वाहार्थन्नगोश्वन्निति सूत्रे अनुदात्तस्य चे
त्येतदितरेषामेवानुवृत्त्या निषेद्ध्यसङ्कोचो व्याख्येयः। अनुदात्तस्येत्यंशो वाक्यभेदेन पुनर्विधानार्थ इति व्याख्येयम्। शुनश्चिच्छेपमिति। अत्र चि
दिति पदं संहितापाठे बाहुलकात् शुनःशेपशब्दस्य मध्ये प्रक्षिप्यते। उक्तञ्च प्रातिशाख्ये। शुनश्चिच्छेपं निदितं नराशंसम्पूषणम्। नराशंस
न्दैव्यं चेत्यतानुपूर्व्यसंहिता इति। पदकाले तु शुनःशेपं चित् इति पठ्यते। शेपपुच्छलाङ्गूलेषु शुन इत्यलुक्। वनस्पत्यादित्वादुभयपदप्रकृति
स्वरः। प्रथमैकेति। नन्विह साबेकाच इत्यत्रैव सुपो ग्रहणम्। तत्र यत्तदोस्त्रियामवर्णान्तत्वेपि लिङ्गान्तरे एकारान्तत्वादिति भावः। राट्। राजा। पर
मराजा। अङित्वञ्चतेः क्विबन्तस्य सनकारस्य ग्रहणं विषयावधारणार्थम्। यत्र नलोपो नास्ति तत्रैव प्रतिषेधो यथा स्यात्। प्राची प्राङ्भ्याम्। [illegible]गतौ तु वि
भक्त्युदात्तः स्यादेव॥ प्राचा प्राचे। क्रुङ्। क्विन्नन्त एव। क्रुञ्चा परमक्रुञ्चा। कृत्। करोतिः। कृन्ततिर्वा क्विबन्ता। यत्त्विह काशिकायां सुगुना सुगुभ्यामित्यु
दाहृत्य अन्तोदात्तादुत्तरपदादिति प्राप्तः प्रतिषिद्ध्यत इत्युक्तं तद्भाष्यवार्त्तिकविरुद्धं स्थानिवत्सूत्रशेषे हि गोः पूर्वणित्वात्वस्वरेष्विति वार्त्तिकेन
भाष्ये च स्वरे कर्त्तव्ये निषेद्धव्ये वा गोशब्दस्यादेशो न स्थानिवदिति निर्णीतम्। द्युभिरिति। सावेकाच इति ऊडिदमिति वा प्राप्तः स्वरो निषिद्ध्यते। नृ
चा। अत्र झलादिरिति प्राचां रीत्या झलदित्यस्यानुवृत्तिमाश्रित्योक्तम्। वस्तुतस्तु झलीति नानुवर्त्तते। तेन य एक इन्नर्यःपोसीसत्र नरीत्यस्याद्युदात्तत्वं

स्वरः

रामः
६

सङ्गच्छते। एवं सति दिवोऽझलिति सूत्रमपि शक्यमकर्त्तुन्तथाहि। इत्थं सूत्र्यन्ताम्। अष्टनो दीर्घात्। दिवो जादिः। शतुरनुमो नदीचेति। किंचैवं ऊडिदमितिसूत्रे दिवो ग्रहणं मास्त्विस्य परं लाघवं यत्तु हरदत्तेन गोश्वन्निति सूत्रे नरीत्यस्यान्तोदात्तमुक्तन्दिवो झलिति सूत्रे च झलग्रहणस्योत्तरत्रावश्यकत्वमुक्तम्। तदुभयं चिन्त्यम्। नित्स्वरितम्। ऋतइत् उदोष्ठ्येति। सूत्रद्वयेपि ओदिति सूत्रे च तकार उच्चारणार्थः। अतो नेट् प्रवर्त्तते। विस्तरः शब्दकौस्तुभे बोध्यः। तास्यनुदात्तेत्। तास्यादीनां समाहारद्वन्द्वः। उपदिश्यत इत्युपदेशः। ङिदिति कर्मधारयः। इत्संज्ञकङकारेण च उपदिश्यमानत्वविशेषणात्तदन्तविधिः। कर्त्तेति। लुट्। आत्मनेपदप्रथमस्य डारौरसः। तासिः एकवचने उदात्तनिवृत्ति स्वरेपि इतरयोः फले विशेषः। ङितइति। अस्मादुपदेशविशेषणत्वान्नेह। शृणुतञ्जरितुर्हवम्। सुनुत आ च धावत। अत्र श्नुरतिदेशेन ङित् नन्वनुबन्धानामनेकान्तत्वात्। चक्षिङोपि कथं ङान्तत्वमिति चेत् विशेषणसामर्थ्याद्भविष्यति। अथवा ङिदंशे तदन्तत्वस्य बाधे मत्वर्थमत्र लक्ष्यते। चनस्यतमिति। चनो नाम। तदात्मनकृतं इत्यर्थः। क्वचलोट्थसस्तम्। धापास्तचानुबन्धस्यानेकान्तत्वाददुपदेशः। चित्स्वरोपीति। परत्वादिति भावः। हत इति अनुदात्तोपदेशेति नलोपे कृते हन्तिरदन्तः न तूपदेशे। थलि च। आदिर्णमुलीति सूत्रादन्यतरस्यामित्यनुवर्त्तमाने वाग्रहणम् कार्यविकल्पार्थं सत् आदेरपि कार्यं प्रापयतीत्याह। आदिर्वेति। त्रयाणामप्येषामुदात्तो भवतु। ननु युगपत्। अन्तश्चतवै युगपदित्यादौ युगपद्ग्रहणाल्लिङ्गात्। एवं स्थिते। अन्यतरस्यामित्यनुवृत्तेः फलमाह। यदेति। सेटीति किं ययाथ। इड्ग्रहणन्तु यदा इडागमः तदा तस्योदात्तार्थं स्यात्। ततश्च यथा लुलविथेत्यादौ चतुर्णामुदात्तत्वेपि पपिथेत्यत्र त्रयाणां भवति एवमिडभावेपि स्यात्। आहवनीय इति। बाहुलकादधिकरणे अनीयर्। प्रीणनार्थात्कर्मणि वा। ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरः। इति प्रत्ययस्वरप्रकरणन्तृतीयम्। नपर्यायेणे व——यज्ञश्रियमिति। षष्ठीतत्पुरुषः। श्रीशब्देकारस्य उदात्ते कृते आन्तरतम्या

त् इकारोप्युदात्तः। चित्रेति। श्रूयत इति श्रवः कीर्त्तिः। चित्रं श्रवो यस्य चित्रश्रवाः। ततस्तमप्। समपाद इति समशब्दः त्वत्वसमसिमेत्यनुच्चानीति फिट्सूत्रेणानुदात्तः हरदत्तस्त्वाह। सुजोडमबिति। पादशब्दो वृषादित्वादाद्युदात्तः। मन्द्रं यत्तत्त्वमिति। मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु। ण्यन्ताल्लट्। शत्रादेशः तस्य छन्दस्युभयथेत्यार्द्धधातुकत्वेन शबभावाद् उपदेशादिति निघातो न। अतः प्रत्ययाद्युदात्तत्वमेव णेरनिटीति णिलोपस्तु न। तं प्रति सार्वधातुकत्वाश्रयणात्। न चैवं वैपरीत्यमापादनीयम्। छन्दसि दृष्टानुविधानात्। इत्थं मन्दयच्छब्दोन्तोदात्तः। तत्पुरुष इति। स्यादेतत्। परमकारकं परमकारकेण परमकारके इत्यत्रातिप्रसङ्गः। द्वितीयातृतीयासप्तम्यन्तपूर्वपदत्वात्। नहि विशेषणसमासः प्रथमान्तानामेवेति नियमोस्तीत्यसकृदुक्तत्वात्। सत्यं लक्षणप्रतिपदोक्तपरिभाषया तृतीयादिशब्दोच्चारणपूर्वकं विहितस्यैव समासस्येह ग्रहणान्नोक्तदोषः। अव्यये इति। निपातत्वादेव सिद्धे नञ्ग्रहणं परस्यापि बाधनार्थम्। तेन अकरणिरित्यादौ कृत्स्वरो न। अव्यथीत्यत्रापि एवम्। किं च अतिस्र इत्यत्र तिसृभ्यो जस इति शिष्टोपि विभक्तिस्वरो नञ्स्वरेण बाध्यते। अपि च। अचत्वारः। अनड्वाहः इत्यत्र सतिशिष्टोपि आम उदात्तो बाध्यत इति बोध्यम्। कुग्रहणन्तु चादिषु पाठाभावात् स्तुतस्तुत्यादिष्वेव कुः पापः। इह तु न पापः। एवञ्चाव्ययत्वमपि तस्य सिध्यति। स्नात्वेति। मूर्ध्न्यं सकादिरयम्। नन्वेवन्तत्रैवाद्युदात्तत्वं निपात्यतामिति चेन्मैवम्। साभिकृतस्वयं द्योतमित्यादिवारणायेह परिगणनस्यावश्यकत्वात्। सदृशप्रतिरूपयोः। ननु पित्रा सदृश इति विग्रहे तृतीयान्तं पूर्वपदन्तत्र तत्पुरुषे तुल्यार्थेत्येव सिद्धम्। न च तुल्यार्थयोगे षष्ठ्या अपि विहितत्वेन षष्ठीसमासार्थमिदमिति वाच्यम्। तत्रानभिधानात् षष्ठीसमासो नेत्यपि सुवचत्वादिति चेत्। मैवम्। अलुक्समासानुरोधेन षष्ठीसमासस्वीकारावश्यकत्वात्। तद्यथा। दास्याः सदृशः वृषल्याः सदृशः षष्ठ्या आक्रोशे इत्यलुक्। दासीवृषलीशब्दयोरन्तोदात्तयोरुदात्तयणो हल्पूर्वादिति विभक्तिरुदात्ता। नसादृश्य

मिति। यत्र हि प्रतियोगिविशेषसमर्पणार्थम्पूर्वपदम्। तेनैव सादृश्यस्य समासार्थतेति सादृश्यग्रहणसामर्थ्यादाश्रीयत इति भावः। गृहपतिरिति। गेहे क इति कप्रत्ययस्वरेण गृहशब्दोन्तोदात्तः। पञ्चारत्निरिति। पञ्च अरत्नयः प्रमाणमस्येति तद्धितार्थे द्विगुः। प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लोपः। संख्या इह राजन्यबहुवचनेति पूर्वसूत्रात् द्वन्द्व इत्यनुवर्त्तते। कार्त्तौ। कुर्भूमिः तत्र जाताः कुजाः तान्याति कुजपः। कृतस्य कुजपस्य च अपत्यमित्यर्थे ऋष्यणन्तावेतौ। कुरुगार्हपते॥ इह पण्यकम्बलान्ताः सप्त समासाः। तत्र आदितो द्वयोः षष्ठ्याः सौत्रो लुक्। इतरेषां पञ्चानां षष्ठ्याः स्थाने प्रथमैकवचनम्। दासीभाराणामिति बहुवचननिर्देशादाद्यर्थोवगम्यते तदाह। एषामिति। कुरूणाङ्गार्हपतम्। कुरुशब्दोन्तोदात्तः। कृग्रोरुच्चेत्युप्रत्ययान्तत्वात्। रिक्तगुर्वादय कर्मधारयाः। श्रीर्यस्यास्तीति तत् श्लीलम्। सिध्मादेराकृतिगणत्वाल्लच्। कृपो रो ल इत्यत्र कपिलकादीनामुपसंख्यानाल्लत्वम्। न श्लीलेति नञ्समासे आद्युदात्तो श्लीलशब्दः। अश्लीला चासौ दृढरूपा च लावण्यरहितापि कुञ्जत्वादिरहितात् संस्थानमात्रेण दृढेत्यर्थः। पारेवडवेवा। निपातनादिवार्थे समासः विभक्त्यलोपश्च। पारशब्दो घृतादिः। तिलशब्दान्मत्वर्थीय इति। पृषोदरादित्वात्ति शब्दस्य द्विर्वचनम्। तितिलिनोऽपत्यम्। अण् नस्तद्धित इति टिलोपः। तैतिलानां कद्रूः। पण्यशब्दो अवद्यपण्येति तदन्तत्वादाद्युदात्तः। न च द्वितीयाकृत्या इत्येव सिद्धमिति वाच्यम्। प्रतिपदोक्ते कृत्यतुल्याख्या अजात्येति समासे तत्प्रवृत्तेः। इह तु विशेषणं विशेष्येणेति समासः। ननु अजात्येति प्रतिषेधसामर्थ्याद् दुर्लभोऽसाविति चेत्। अत्राहुः अजात्येति न जातिप्रतिषेधार्थं किं तु न्यायसिद्धार्थानुवादमात्रम्। न चानुवादस्य सर्वथा नैष्फल्यं गुणक्रियावाचिनां नियमेन पूर्वनिपातप्रसङ्गे कृत्यान्तस्य पूर्वनिपातार्थं सूत्रमिति। तुल्यादनेन च रितार्थत्वात्। दास्या भारो दासीभारः। यूपदार्विति। यूपशब्द आद्युदात्तः। कुयुभ्यां वेत्यत्र निदित्यनुवृत्तेः। त्वोतास इति। त्वया ऊताः रक्षिताः त्वोतासः। प्रत्ययोत्तरपदयोश्चेति मपर्यन्तस्य त्वादेशे दकारलोपश्छान्द

म॰ ८ स्वर

सः अवतेः क्तः। ज्वरत्वरेत्यूठ्। एत्येधत्यूठ्स्विति वृद्धेरिडागमस्य वाभावश्छान्दसः। पूर्वपदप्रकृतिस्वरे कृते एकादेश उदात्तेनोदात्तः। ततः स्वरितं प्र
नयो। गतिरनन्तरः। गतिशब्दः क्तिजन्तः न तु क्तिन्नन्तः। अनन्तर इति पुल्लिङ्गनिर्देशात्। निपातनाच्चानुनासिकलोपः। पुरोहितमिति। अत्र समासान्तो
दात्तत्वं अव्ययपूर्वपदप्रकृतिस्वरत्वं कृत्स्वरः थाथादिस्वरः इत्येतेषु प्राप्तेषु पूर्वपदप्रकृतिस्वरोनेन विधीयते। पूर्वपदञ्चेहान्तोदात्तत्वम्। पूर्वाधरावरा
णामसीति असिप्रत्ययस्वरेण। अनन्तर इति किम्। अभ्युद्धृतः। इह हृतशब्दस्य उच्छब्देन समासे पुरोहितमित्यत्रेव गतिस्वरेण आद्युदात्तः॥ उद्धृतशा
ब्दः तस्य पुनरभिशब्देन समासः। तत्र च कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया उद्धृतशब्दः क्तान्त उत्तरपदम्। एवं स्थिते समासान्तोदा
त्तत्वे प्राप्ते तदपवादे कृत्स्वरे तदपवादस्थाथादिस्वरः प्राप्तः तमपोह्याभेर्गतिस्वरः स्यात्सोनन्तरग्रहणेन वार्यते। नन्वनन्तरग्रहणेनापि दुर्वारोसौ
कृद्ग्रहणपरिभाषया उद्धृतशब्दस्य क्तान्तत्वे अभेस्तदानन्तर्यस्य सत्त्वादिति चेन्नैवम्। अनन्तरग्रहणसामर्थ्याद्धि धातोरनन्तरो गतिराश्रीयते। अ
भिश्च न तथेति। नन्वेवस्माभूदभे स्वरः इष्टसिद्धिस्तु कथम्। अभ्युद्धृतशब्दे हि उच्छब्दस्य स्वर इष्यते। संसृष्टन्धनमुभयं समाकृतम्। इति मन्त्रे समा
कृतशब्दे आङः स्वरदर्शनात्। न चासौ प्रकृतसूत्रेण सिद्ध्यति। प्रथमसमासे तत्स्वरवृत्तावपि द्वितीयसमासे थाथादिस्वरस्य प्राप्तेरुक्तत्वात्। न च तं
बाधित्वा गतिस्वरः प्रवर्त्तत इति वाच्यम्। द्वितीयसमासे उदः पूर्वपदत्वाभावात्। अत्रोच्यते। धातोरनन्तर इति व्याख्यानादेव पूर्वपदस्वरं विनापि स्वरो
यं प्रवर्त्तते न हि क्तमप्रकृतिभूतं धातुं प्रति पूर्वपदत्वङ्गतेः संभवति। तस्मादभ्युद्धृतं समाकृतमित्यादि तावत्सुस्थम्। इदं त्ववशिष्यते। उक्तरीत्या दूरा
दागत इत्यादौ कारकपूर्वेपि गतिस्वरः स्यात्। इष्यते तु थाथादिस्वरः। तदर्थङ्कारकाद्दत्तश्रुतयोरिति सूत्रे कारकादिति योगो विभज्यते। क्तग्रहणङ्गति
ग्रहणञ्चानुवर्त्तते। कारकात्परं क्तान्तं सगतिकमुत्तरपदं अन्तोदात्तं स्यादित्यर्थः। तत्र दूराद्गत इत्यादौ थाथादिसूत्रेणैव सिद्धत्वात्। दूरादागत इत्यादे

राम: ८

गतिरनन्तरइत्यस्यबाधनार्थमेवेदंसूत्रमितिदिक्।तादौचाननुक्तीतिव्यर्थम्।तत्राह।गतेरयंस्वरोविधीयते।गतिसञ्ज्ञाचधातुमाक्षिपतिस
वप्रत्ययविशिष्टएवप्रयोगार्हः।प्रत्ययश्चेहपरिशेषात्कृत्एवेति।चेत्तल्यम्।कृद्ग्रहणङ्कृत्सञ्ज्ञाप्रकृतिकालोपलक्षणम्।तेनकृदुपदेशेतादि
त्वलाभात्प्रलपितादित्यादिसिद्धमिति।स्वरप्रवृत्तिवेलायान्तादित्वाभावेपिपूर्वन्तत्त्वात्।आदिग्रहणन्तुशक्यमकर्तुम्।यस्मिन्विधिरित्येवसिद्धेः
।अताविति किम्।आगन्तुः।स्यादेतत्।अतावितिपर्युदासःक्तिनएवोचितः।नविन्धेअस्यसुष्टुतिम्।सुहवांसुष्टुतीहुवे॥वृष्णोचोदस्वसुष्टुतिमित्यपा
सेराकेसुमतयःइत्यादौगतिस्वरादर्शनादितिचेत्।मैवम्।उदाहृतःप्रयोगेषु।उपायान्तरस्यैवानुसर्त्तव्यत्वात्।नह्यतावितिपर्युदासमात्रेणतन्नि
र्वाहः।कृदुत्तरपदप्रकृतिस्वरेणधातोरुदात्ततापत्तेः।अन्तोदात्ततायाश्चतत्रेष्टत्वात्।किंच।अतावितिक्तिनःपर्युदासेप्रभूतौसङ्गतिमित्यादौगतिस्व
रेणनसिद्ध्येत्।तस्मात्पुनरेवायंपर्युदासःइतिस्थितम्।कातर्हिसुष्टुतेर्गतिरितिचेत्शृणु।स्तोत्रकरणीभूतायाऋचःसाध्यसिद्धिंनीतिविवक्षितत्ववि
वक्षायांक्तिजन्तमिदम्।नतुक्तिन्नन्तम्।यत्तुकेचित्।मन्क्तिन्व्याख्यानेत्यादिनाअन्तोदात्तमित्याहुस्तन्न।तत्रकारकादित्यस्यवृत्तिकृतानुव
र्त्तितत्वात्।प्रभूतावित्यादिसिद्ध्येतदनुवृत्तेर्न्याय्यत्वाच्चेतिदिक्।तवैव।कृत्स्वरापवादोयम्।अन्तउदात्तइतियद्यपिउदात्तग्रहणंनानुवर्त्तते।त
थापिगतिःप्रकृत्याभवतीत्युक्तेउदात्तोबुद्धिमारोहतिसएवान्तस्यभवतीतिभावः।प्रत्ययश्चइति।कृदुत्तरपदप्रकृतिस्वरःपरत्वादिति।चुस्वर
स्यावकाशःसाकद्रीचीअस्यावकाशः।येपराञ्चःउभयप्रसङ्गेपरत्वादयमित्यर्थः।ननुचुस्वरःसतिशिष्टः।भसञ्ज्ञायामल्लोपेचकृतेप्राप्तत्वात्तस्य
मानायमस्मिन्प्रतिषेधः।किंतर्हिइष्टिरेवेतिहरदत्तः।चोरनिगतोऽस्तावप्रत्ययइतिवार्त्तिकग्रन्थोपिइष्टिपरतयैवव्याख्येयइतितदाशयः।इहापिमू
लेपरत्वादित्यस्यइष्टत्वादित्यर्थः।न्यङ्गितिउदात्तस्वरितयोर्यणइतिस्वरितः।दिवोदासायेति।दिवश्चदासेइतिषष्ठ्याअलुक्।नञोजरमरमित्रमृ

म॰ ६

३ न

ताः। नञ्सुभ्यामित्यस्यापवादः। जरणं जरः। ऋदोरप्। मरणं मरः। अस्मादेव निपातनादप्। त्रिभि द्वौ स्ते हवौ। ग्रः। मित्रम्। मृडो नपुंसके भावे क्तः। सूत्रे तु शब्दपरत्वात्पुंस्त्वम्। अमित्रमिति। मध्योदात्तोयम्। एतेन अमित्रस्य व्यथया मन्युमिन्द्र इत्यादि व्याख्यातम्। अमे द्विषतीति इन्नच्प्रत्यये तु अन्तोदात्त उक्तः। नञ्तत्पुरुषेणाद्युदात्तोपि। न च तस्य परवल्लिङ्गतापत्तिः। भृत्यामित्रवृत्रमेघाः। पुंसीति लिङ्गानुशासनसूत्रात्। एवञ्च ईश्वरी शक्रद्यादिशब्दवदमित्रशब्दोपि त्रिविधः। यत्तु द्विषोऽमित्र इति सूत्रे हरदत्तेन दोषद्वयमुक्तं क्लीबत्वमाद्युदात्तत्वञ्च स्यादिति। तदापातत एवेत्यवधेयम्। सोर्मनसी। सुकर्माण इत्यादि। यद्यपि आद्युदात्तं द्व्यच्छन्दसीत्यनेन सिद्धमिदम्। तथापि सुप्रथिमेत्यादिबह्वजर्थमछन्दोर्थञ्च सूत्रमिति बोध्यम्। गतिकारकोपपदात्कृत्। इह शितेर्नित्याबह्वज्बहुव्रीहावभसत्। इति पूर्वसूत्रस्थं बहुव्रीहिग्रहणं नानुवर्त्तते स्वरितत्वात्। किन्तु अव्यवहितमपि तत्पुरुषग्रहणं तत्पुरुषे शालायां नपुंसके इति सूत्रादनुवर्त्तत इत्याह। तत्पुरुष इति। प्रकारक इति। कुगतीति समासः। लित्स्वरेणोत्तरपदस्याद्युदात्तम्। नृवाहसेति। नॄन् वहतः इति विग्रहः। वसेर्णिदिति सूत्राण्णिदित्यनुवृत्तेः असुनो णित्वादुपधावृद्धिः। णित्स्वरेणोत्तरपदस्याद्युदात्तम्। उच्चैःकारमिति। णमुल् विधावुच्चैरित्युपपदम्। इह कृद्ग्रहणमाकरे प्रत्याख्यातम्। तथा च वार्त्तिकम्। गत्यादिभ्यः प्रकृतिस्वरे कृद्ग्रहणानर्थक्यमन्यस्योत्तरपदस्याभावादिति। तत्रेदं विचार्यते। तिङन्तसमासे अयं स्वरो भवति न वेति। आद्यो यः शंबरस्य शरद्यन्वविन्दत योजातः पर्यभूषत इत्यादि। प्रयोगाणां सौष्ठवेपि। यत्रानरो देवयन्तो युगानि वितन्वते इत्यत्र श्रूयमाणमन्तोदात्तत्वन्न सङ्गच्छते। कृद्ग्रहणं कुर्वतां सूत्रकृताविरोधश्च। सहेति योगं विभज्य तत्पुरुषसंज्ञातः प्रागेव तिङ्समासं कृतवतो भाष्यकृतोपि प्रतिकूलमिदमिति दोषत्रयम्। द्वितीये तु समासान्तोदात्तत्वेन वितन्वत इत्यस्य सिद्धावपि। अन्वविन्दत। पर्यभूषत इत्यादौ उत्तरपदाद्युदात्तत्वन्न सिध्येत्। कृद्ग्रहणं प्रत्याचक्षाणेन तत्पुरुषाधिका

स्वर॰

राम॰ ६

रितिङ्समासंविदधताकात्यायनेनविरोधश्चेतिद्वौदोषौ।किंचकैयटहरदत्तादयोप्यत्रउत्तरपदप्रकृतिस्वरस्यवार्त्तामप्यकृत्वासमासान्तोदात्तत्व
मात्रंभवतिनवेतिसंदिग्धमेवव्यवजह्रुः।तथाचसहसुपेत्यत्रकैयटः।अनुव्यचलदित्यत्रसमाससुक्त्वाशाकलप्रतिषेधंतत्फलमभिधायसमा
सान्तोदात्तत्वन्तुनभवतितिङ्ङ्तिङइतिनिघातेनबाधितत्वादितिकेचिदाहुरित्युक्ता।एवंसतिअनुप्राविशदित्युदाहरणंभाष्योक्तंनिष्फलं
स्यात्।तस्मात्सतिशिष्टत्वात्समासान्तोदात्तत्वेनभाव्यमित्यपरेइत्युक्तात्तत्रतिङःएकत्वस्योक्तत्वात्प्रातिपदिकत्वेपिसुबनुत्पत्तिरित्युक्ताअन्ये
त्विसुपक्रम्यवचनग्रहणादुक्तेप्येकत्वेसोरुत्पत्तिंहल्ङ्यादिलोपंचाविधायतदुपष्टंभार्थम्।अतएवैकपद्यादामनुप्राविशदेवदत्तेत्यामए
कान्तरमामन्त्रितमितिनिघातप्रतिषेधःसञ्ज्ञायाःप्रयोजनमस्त्येवेतितिङन्तनिघातवादिनआहुरित्युपसञ्जहार।हरदत्तोप्येवंकैयटोक्ति
मात्रमन्ववादीत्।एवंहिवदताकिंपरत्वान्निघातःउतसतिशिष्टत्वात्समासान्तोदात्तइतिनावधारितम्।तदापिअनुव्यचलदित्यादौयथातथा
स्तु।योजातइत्यादौनुयद्वृत्तान्नित्यमितिनिघातेनिषिद्धेसमासान्तोदात्तत्वंकेनवार्यताम्।किंचद्वितीयपक्षेअत्यायाहिशश्वतोवयन्तेइत्यत्रआ
ङुदात्तःकथंनिर्वाह्यः।अपिचसुधेयदिण्णानआयुधान्सघायमाणोनिरिणातीत्यत्रचनिशब्दोनिहन्यतेवितन्वतइत्यत्रविशब्दश्चेतितावन्निर्विवादम्।
समासान्तोदात्तत्वन्तुरिणातीत्यत्रनातन्वतइत्यत्रतुभवतीतिवैषम्यन्दुरुपपादमितिमहत्सङ्कटम्।अत्रेदन्तत्वम्।वार्त्तिकमतेता
वदाद्यएवपक्षःकृद्ग्रहणस्यप्रत्याख्यानात्।तत्पुरुषत्वाभ्युपगमाच्च।वितन्वतइत्यत्रतुत्रिचक्रादित्वादन्तोदात्तत्वंकल्प्यम्।अत्यायाहीत्यत्र
तुतिङ्ङ्तिङइतिनिघातेआङासमासःउत्तरपदस्योदात्तशून्यतयागतिस्वराभावादव्ययपूर्वपदप्रकृतिस्वरेणआङुदात्तः।ततोअतिशब्देन
समासेकृतेकृद्ग्रहणप्रत्याख्यानात्उत्तरपदप्रकृतिस्वरेणेष्टसिद्धिः।निरिणातीत्यत्रतुयच्छब्दयोगेनिघातनिषेधात्पूर्ववदेवेष्टसिद्धम्।भाष्यम

तेतुतत्पुरुषत्वाभावात् गतिस्वरस्याप्यपूर्वपदप्रकृतिस्वरस्य चाभावे समासान्तोदात्तत्वेनैव वितन्वतइति सिद्धम्। अन्वविन्दत् निरिणातीत्यादौ उत्तरपदप्रकृतिस्वरत्वन्तु बाहुलकात्समाधेयम्। नित्यङ्क्रीडेत्यत्र नित्यमिति योगं विभज्य लक्ष्यानुरोधेन क्वचित्तत्पुरुषतावा स्वीकर्त्तव्या। अत एवोदात्तवते त्यस्य भाष्ये द्विःपाठः सङ्गच्छते। अप्रसूतिराशचीभिः। उपप्रेतकुशिका इत्यादौ तु समासो न कृतः। गतिर्गतावितितु सर्वविधीनां छन्दसि विकल्पात्त्वन्तम्। अपदादावित्यधिकाराद्वेति दिक्। बृहच्छन्द इति। अन्तोदात्तो ह्यसौ। इन्द्रक्रतुर्हि ते बृहन् इत्यादौ तथादर्शनात्। तनूनपादिति। तनूशब्दोन्तोदात्तः तस्येहाद्युदात्तत्वन्निपात्यते। तनूनपादुच्यते। गर्भ आसुर इत्यादौ तथादर्शनात्। तनूनपात् पथ ऋतस्येत्यत्र तु पाष्ठ आमन्त्रितस्वरो बोध्यः। नरा एनं शंसन्तीति नराशंसः। नृनये। अस्मात् पाशंसतेर्घञ्। नोत्तरपदे। इह पृथिव्यादि पर्युदासो ज्ञापयति। स्वरविधौ व्यञ्जनमविद्यमानवदिति। तेनाग्निमीळे इत्यादौ स्वरितः सिध्यति। थाथघञ्॥ आवसथः प्रभेदः दूरादागतः. प्रत्ययः. प्रबलः प्रलवित्रम्. प्रवृषः पुरुष्टुति। तृतीयातत्पुरुषे तु तृतीया कर्मणीति सूत्रेण कर्मणि क्तान्ते उत्तरपदे तृतीयान्तस्य पूर्वपदस्य प्रकृतिस्वरः स्यादिति भावः। बहोर्नं बहुमलो देशः। बहुजरः। इह नञो जरेत्येतदतिदिश्यते। वरादिश्छन्दसि बहुलम्। उरुक्षयेति। उरूणाम्बहूनां क्षयो निवास इत्याद्युदात्तः क्षयशब्दः। समासस्येत्यन्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वं प्राप्तं तस्याथादिस्वरेण बाधितम्। अतो बाहुलके [illegible]द्युदात्तत्वमिति वेदभाष्ये स्थितम्। एतच्च क्षि निवासगत्योरिति धातोर्बाहुलकादधिकरणे एरजिति माधवमते नोक्तं। वस्तुतस्तु घप्रत्ययान्तः क्षयशब्द इति हरदत्तोक्तरीत्याथाथादिस्वरस्येहाप्राप्त्या कृदुत्तरपदप्रकृतिस्वरेणैवेदं सिद्धम्। परादिश्चेत्यस्योदाहरणन्तु चोदयित्री सूनृतानामिति बोध्यम्। ऊन परिहाणे। चुरादिष्वदन्तः। णिच्। क्विप्। सुतरामूनयत्यप्रियमिति सूनृ प्रियम्। तदृतञ्च सूनृतम्। अयस्मयादीनीति भत्वान्नलोपो नाऽ

ष्टिहत्यचेति। मुष्ट्या हननं मुष्टिहत्या। हनस्त चेति सुबन्त उपपदे क्यप्। कृदुत्तरपदस्वरोऽत्र प्राप्तः। चिचक इति। बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरः प्राप्तः। विश्वायुरिति। विश्वमायुर्यस्मिन्ननेनेति बहुव्रीहिः विश्वशब्दः क्वन्प्रत्ययान्तः। पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमिह प्राप्तम्॥ इति समासस्वरप्रकरणम्॥ तिङ् तिङः। अतिङः किम्। पचति भवति। पाको भवतीत्यर्थः। वस्तुतस्तु अतिङ्ग्रहणं व्यर्थम्। समानवाक्याधिकारस्य वार्त्तिकोक्तस्यावश्यकत्वात्। निपातैः। यदित्यादीनां यत्रेत्यन्तानां द्वन्द्वे तृतीयायाः सौत्रो लुक्। न तु युक्तशब्देन समासः। निपातैरिति विशेषणस्यानन्वयापत्तेः। यद्यपदार्थे च हेतौ च विचारे यदि चेच्चणः। हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः। क्वचित्प्रश्नेऽन्निषेधे प्रशंसायाङ् विस्मृतः। यत्रेत्याधारे तत्रमूले केचिदुदाहृताः। अन्येऽप्यूह्याः। यथा। हन्त करोति। कथन्तर्हि हन्ताहं —— पृथिवीमिमां निदधानीह वेह वा। अत्र दधानीति तिङन्तस्य निघातनिषेधः प्राप्नोति। सत्यं बाहुलकान्निघातः। एतेन हन्तो नु किमाससे इति व्याख्यातम्। हन्तो इत्यखण्डनिपातो बोध्यः। तथैव पदकारैः पाठात्। नेच्चेच्चेदौ तु निपातसमाहारात्मकौ। नेदेवमायुजन्नत्र देवाः। अन्यश्चेन्नाभिगच्छति। अत्र नञ्चाभ्यां विच्छिद्य इच्छब्दस्य पदकाले पाठात्। चणिति। चेदर्थ एव णित्। समुच्चयादौ त्वणित्। इन्द्रश्च मृळयाति नः। इन्द्रश्चेदस्मात्सुखयेदित्यर्थः। त्वञ्च सोम नो वशो जीवातुं न मरामहे। हे सोम त्वञ्चेन्नो जीवातुं वशाः वश्यः कामयेथा इत्यर्थः। निपातैः किम्। यत्कूजति शाकटम्। एतीति यत्। इणः शतरि। इणो यणिति यण्। ननु प्रतिपदोक्तत्वाद्यदादिभिः साहचर्यान्निपात एव ग्रहीष्यते सत्यम्। ज्ञापनार्थमिदम्। अत्र प्रकरणे उक्तरीत्या सङ्कोचो नेति तेन यावद्यथाभ्यामिति सूत्रे यत्तदेतेभ्य इति वत्वन्तोऽपि यावच्छब्दो गृह्यते। तथा च प्रयुज्यते। तावदुषो राधो अस्मभ्यं रास्व यावत्स्तोतृभ्यो अरदो गृणाना। अत्रारद इत्यट्स्वरेणाद्युदात्तम्। युक्तग्रहणङ्किम्। अन्वाचिते मा भूत्। यत्र क्व च ते मनो दक्षं दधस उत्तरम्। इह यत्रेत्यस्योत्तरमित्यनेन साक्षात्सम्बन्धः। दध धारणे अनुदात्तेत्। थासस्से इति। अदुपदेशात्

रत्वात्के इत्यस्या निघातः। मद्योदात्तं पदम्। किंवृत्तञ्च। इह जात्वपूर्वमिति पूर्वसूत्रात् पूर्वग्रहणमनुवर्त्तते तद्व्याचष्टे अविद्यमानेति। तेनेह न। देवदत्तः किंचिस्यविति। नान्यैरिति। यदिहन्त्तेत्यादिभिरित्यर्थः। उत्तरवाक्ययोरिति। दिवो वा पार्थिवादधि। इन्द्रं महो वा रजसः। इत्येतयोरित्यर्थः। इन्द्रं श्रतिसातिम्यन दानं अधीमहे। आधिक्येन यावामहे। वैदिकनिघण्टौ याञ्चाकर्मसु ईमहे इति पाठात्। कस्माल्लोकादित्याकाङ्क्षायामाह। इतोस्मात्पार्थिवात् वा दिवो वा महो महतः। प्रौढाद् रजसो रञ्जकात्। अन्तरिक्षलोकाद्वेति मन्त्रार्थः। ननु श्रुतस्यैव तिङन्तस्योत्तरत्रानुषङ्गः तत्कथं प्राथम्यमिति चेत् अनुषक्तस्यापि औपाधिकभेदं पुरस्कृत्य प्राथम्याश्रयणेन निघातनिषेधस्य छन्दसि बहुशो दृष्टत्वात्। एतच्चेहैव मन्त्रे नियन्मुष्टिहत्ययेति मन्त्रे च वेदभाष्ये स्पष्टत्वात्। इन्द्र वाजेष्विति। अवेति तिङन्तस्येह निघातः। निघाताभावस्य तु उदाहरणान्तरं बोध्यम्। यद्वृत्तान्नित्यम्। यद्वृत्तात्परमिति अव्यवधानांशस्तु नेहापेक्षते। तेन यो जात एव पर्य्यभूषत् इत्यादौ निघातनिषेधः सिध्यति। अत्र प्रमाणन्तु पूजनात्पूजितमिति सूत्रे पूजितग्रहणम्। तथाहि। पूजनात् पूजितमनुदात्तमिति सूत्रेण काष्ठाध्यापकः दारुणाध्यापकः परमाध्यापक इत्यादौ अनुदात्तता विधीयते तत्र काष्ठादिभ्य इति वार्त्तिकम्। वृत्तिकृता सूत्रावयवत्वेन पठितम्। उदाहरणेषु मयूरव्यंसकादित्वात्समास इति वृत्तिमतम्। असमासे एव क्रियाविशेषणीभूतानां दारुणमित्यादीनां मलोपो निपात्यत इति भाष्यवार्त्तिकयोः स्वरसः। ———— कैयटादयोप्येवम्। उभयथापि पूजनादित्येव पूजितपरिग्रहे सिद्धे पूजितग्रहणमनन्तरप्रतिपत्त्यर्थं सत् ज्ञापयति। इह प्रकरणे पञ्चमीनिर्देशेप्यानन्तर्यं नाश्रीयत इति॥ इति तिङन्तस्वरनिरूपणप्रकरणं पञ्चमम्॥

संहितायामिति। तयोर्य्वावचि संहितायामिति सूत्रे संहिताग्रहणस्याशास्त्रसमाप्तेरधिकृतत्वात्। स्वरितविधेस्तु तदन्तर्भूतत्वादिति भावः। नन्वसंहितायाङ्कालव्यवायादेव स्वरितो न भविष्यति तत्किमुक्तेन संहिताधिकारेणेति चेत्। मैवम्। संहिताधिकारबहिर्भूतानां कालव्यवायेपि प्रवृत्तिं ज्ञापयितुं तदार

म्भात्। तेनाग्नाविष्णू इत्यग्नाविष्णू इत्यादावग्रहेपि आनङादयः पदविभागे वत्व[illegible]त्वादयः। अग्निमीळ्इत्यत्र पदविभागेपि निघातश्च सिद्ध्यति। संहिताधिकारस्थन्तु यणादिकं स्वरितप्रचयादिकं न चेति विवेकः। नन्वेवं पुरःअहितमिति विग्रहे हि शब्दस्य स्वरितत्वं बह्वृचैः पठ्यमानन्न सिद्ध्येदिति चेत्मैवम्। तदीयप्रातिशाख्ये विशिष्य विधानात्। उक्तं हि यथा सन्धीयमानानामनेकीभवतां स्वरः। उपदिष्टस्तथा विद्यादक्षराणाम विग्रह इति। नन्वेवमुपङ्गन्तवै अन्वेतवा इत्यादीनामवग्रहे उत्तरखण्डाद्यवर्णस्य प्रचयः स्यादिति चेन्न। पद्यादींस्तूदात्तानामसंहितवदुत्तरानिति विशेषवचनात्। एवं रत्नधातमम्। अललाभवन्तीरित्यादीनाक्रमकाले इतिशब्दोत्तरभागे प्रचयो न प्रवर्तते। परिग्रहेत्वनार्षान्तात्तेनैवेकास्वरीकृतात्। परेषां न्यासमाचारं व्यालिस्तौ चेत्स्वरौ परावितिवचनात्। इत्थमन्यत्रापि मुनित्रयवचांसि तत्तत्प्रातिशाख्यानि तद्व्याख्यातृगिरो निरुक्तादिग्रन्थांश्च पर्यालोच्य तत्त्वं निर्णेयम्। तदाह। यथाशास्त्रमुन्नेयमिति। अखण्डमपि यत्सर्वं ङ्कृत् तद्धितपरं परम्॥ अशेषशास्त्रसंवेद्यमक्षरन्तदुपास्महे॥१॥ सिद्धान्तकौमुदीव्याख्या सेयं प्रौढमनोरमा॥ भट्टोजीदीक्षितकृतिर्भूयाद्विश्वेशतुष्टये॥२॥ इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन रचितायां प्रौढमनोरमायामुत्तरार्द्धं समाप्तम् ॥

॥ विद्योदयो निराकुर्यादविद्यातिमिरं सदा ॥
॥ सहस्रांशुरिवात्रोऽंशुद्राकिरणराजिभिः ॥

॥ संवत १९३१ ॥

॥ शुभं भूयात् ॥

॥ इतिश्राद्धरत्नसंवलितमनोरमा समाप्ता ॥

४०५८

कथं तर्हीति। अनुप्रशब्दाभ्यां विपरीतव्यवहितप्रयोगनि— वारणादिति भावः। सकर्मकत्वादिति। फलव्यधिकरणवाचित्वादिति भावः। एवमकर्मकसमभिव्याहारे कृञोऽप्यकर्मकत्वं बोध्यम्। अन्यत्र कर्मप्रत्ययसमभिव्याहारे फलव्यापारयोर्व्यस्तत्वेऽपि आमसमभिहारे न— व्यत्यास आमन्तार्थस्यापि व्यत्यासो वेति नाभेदान्वयानुपपत्तिरिति वदन्ति। सार्वधातुक एवेति। तासिसाहचर्याल्लेरपि सार्वधातुक एव एति हत्वमित्यर्थः। एतत्सर्वं सत्यभिधाने बोध्यम्। सिद्धेरिति। एधांचकारेत्येतस्या वृत्तौ सिद्धायामित्यर्थः। एतेनैधाञ्चक्रद्रुन्नानु।

कथं तर्हीति। पातयांप्रथममास पपात पश्चात्। संयोजयां विधिवदास समेतबन्धुः। प्रभ्रंशयां यो नहुषं चकारेत्यादि। प्रमाद एवायम्। न च विपरीतप्रयोगनिवृत्तिमात्रे सूत्रस्य तात्पर्यमस्त्विति वाच्यम्। विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं चेति वार्त्तिकविरोधात्। अभेदान्वय इति। एवञ्चाम्प्रकृत्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्य फलम्। अत एवानुप्रयुज्यमानयोर्भूस्त्योरामन्तवशेन सकर्मकत्वात्ताभ्यां कर्मणि लिट्। तथा च माघः। तस्यातपत्रं बिभरांबभूवे इति। श्रीहर्षश्च। तपस्तु पूर्त्तावपि मेदसां भराविभावरीभिर्बिभरांबभूविरे इति। अस्तेस्तु भावकर्मणोस्तङि एशिरिटि च रूपे विप्रतिपद्यन्ते। तथाहि। उभयत्रापि हएतीति हादेशे कृते एधामाहे ईक्षामाहे इति केचित्। तासिसाहचर्यादिद्ये वहत्वमित्यन्ये। साहचर्यादेव सार्वधातुक एवेति हत्वम्। ननूक्तद्वयेपि। तेनैधामासे ईक्षामासे इत्येव रूपमित्यपरे। वाक्यभेदेनेति। अत्र चाम्प्रत्ययवदिति वचनमेव प्रमाणम्। अन्यथा पूर्ववदित्यनुवृत्त्यैव सिद्धे किं तेन। द्विर्वचने चा। द्वित्वनिमित्ते चेति। द्विर्वचनशब्दस्य तन्निमित्ते लक्षणा। तां विना अचा सामानाधिकरण्यायोगादिति भावः। यद्वा। द्विरुच्यते अस्मिन्निति द्विर्वचनम् ॥

आदौ परगामिनि क्रियाफले प्राप्तस्य विधाने पिद्राञ्चकारेत्यादौ कर्तृगामिनि क्रियाफले प्राप्तस्य निवारणमशक्यमित्यपास्तम्। लक्षणाया जघन्यत्वादाह। यद्वेति। अधिकरणे ल्युडिति भावः। इदमेव युक्तम्। अन्येपि वृत्तिद्वयकल्पनागौरवात् ॥

तद्भावेत्ति

स॰ श्रा॰ सर्वमिति। एवञ्च द्वित्वे जादिप्रत्ययस्य निमित्तत्वे अचोपि तत्त्वं पण्यचो निमित्तत्वे तदादिप्रत्ययस्यापीति भावः। तस्मात्स्तिच तद्वतीत्वेतावता निमित्तत्वं नतु तत्प्रयोजकत्वेनेती
२६१ तिभावः। यद्यत्र स्थानित्वं न स्यात् स्यादेव तस्य द्वित्वमिति काल्पनिकं च गृह्यत इत्यपि बोध्यमिति सम्यङ्डोरित्यत्र भाष्ये स्पष्टम्। इत्तिनेति। ज्ञापकस्य सजातीयापेक्षत्वेनेत्यपि बोध्य

अथवा द्विर्वचनमस्त्यस्मिन्निति मत्वर्थीय आद्यच्। इह तन्त्रावृत्त्याद्याश्रयणेन कालावधारणमपि क्रियत इत्याह। द्वित्वे कर्तव्ये इति। कृते तु द्वित्वे यथायथमादेशाः स्यादेवेत्यर्थः। द्वित्वनिमित्ते किम्। दुद्यूषति। न ह्यूठ् द्वित्वनिमित्तम्। नन्वेवं चक्रतुरित्यत्र यण् स्यादेव। अतुसो द्वित्वनिमित्तत्वेप्यकारस्यातथात्वात्। सूत्रन्तु चक्रे इत्यादौ सावकाशमिति चेत् सत्यम्। इह निमित्तशब्देन साक्षाद्वा समुदायघटकतया वा द्वित्वप्रयोजकं सर्वं गृह्यते लक्ष्यानुरोधात्। एतच्च ठस्येक इति सूत्रे कैयटग्रन्थे स्पष्टम्। अत एव ऊर्णोतेः सनि सनीवन्तेति इट्पक्षे विभाषोर्णोरिति ङित्वविरहे ऊर्णुनविषतीति सिद्धम्। सन्नन्तस्य द्वित्वविधानेपि सनो द्वित्वप्रयोजकत्वेन तस्मिन्नाप्नुयोर्गुणावादेशयोर्द्वित्वे कर्तव्ये निषेधात्तदाहुः। तद्भावभाविता मात्रेणेह तन्निमित्तत्वमिति। नन्वेवमरिरिषतीति न सिद्ध्येत्। ऋधातोस्सनि स्मिपूङ्रञ्ज्वशां सनीति इटि कृते इस्शब्दनिमित्तकस्य गुणस्य निषेधे जादेर्द्वितीयस्येति इसो द्वित्वप्रसङ्गात्। इष्यते तु रिस्शब्दस्य द्वित्वम्। सत्यम्। नेह इस्शब्दो द्वित्वनिमित्तम्। कार्यित्वात्। न हि कार्यी निमित्ततयाश्रीयते। स्थण्डिलाच्छयितरि व्रते इति ज्ञापकात्। अन्यथा शीङो ङित्वे न क्ङिति चेति गुणनिषेधापत्तेः। नचैवं सन्नन्तस्य कार्यित्वादूर्णुनविषतीत्यपि न स्यादिति वाच्यम्। मत्वर्थीयेन इनिना कार्यमनुभवत एव कार्यित्वलाभात्। ऊर्णोतेर्हि नुशब्द एव द्वित्वरूपं कार्यमनुभवति न तु सना। अरिरिषतीत्यत्र तु रिस्शब्दः कार्यभागिति वैषम्यात्। अचीति किम्। जेघ्रीयते। देध्मीयते। शाशास्यते। इह ई घ्राध्मोरितीकारः। अयङ्यि क्ङिती राम:
यङादेशश्च निषिध्येत इति प्राञ्चः ॥ २६१

म्। कार्यित्वलाभादिति। तथा च तस्यैव निमित्ततया नाश्रयणमिति भावः। द्वितीयाजवधिकस्येति। नरभार्यावद्यञ्जनामीति तद्वधिकस्य द्वित्वमिति षाष्ठभाष्योक्तेरिति भावः ॥

द्वित्वनिमित्तत्वाभावादिति। न च यङि परतद्वित्वमिति तन्निमित्तस्य यङो विशिष्टस्य द्वित्वनिमित्तत्वमस्त्येव। अवयवस्य कार्यित्वेपि न तस्येत्थं प्रति निमित्तत्वं न हि कार्यी निमित्तत्वेनेत्यत्रापि यथाकथंचिन्निमित्तत्वं कार्यित्वञ्च गृह्यत इत्यत्र मानमस्ति जेघ्रीयत इत्यादेः प्रत्युदाहरणत्वपरभाष्यप्रामाण्येन तत्र निमित्तकार्यिपदयोर्मुख्यार्थत्वस्यैवाङ्गीकारादिति वाच्यम्। अरिरिषतीत्यस्याप्यसिद्धेः। न हि तत्र गुणनिमित्तस्यार्द्धधातुकसञ्ज्ञस्य सशब्दस्याकारविशिष्टस्य द्वित्वं प्रति कार्यित्वं घ्रायितरीत्यत्रापि इकारस्यैव कार्यित्वेन ज्ञापकस्य शिथिलत्वापत्तेश्च। यदि तत्र गन्ताङ्गस्येत्यर्थात् सर्वस्य कार्यित्वं तर्ह्यत्रापि यङन्तस्य द्वित्वमित्यर्थात्तुल्यम्। तस्मान्न हि कार्यीत्यत्रापि यथाकथंचिन्निमित्तत्वादि गृह्यत इति युक्तम्। अचीति व्यर्थमित्यस्य जेघ्रीयत इत्याद्यर्थंत्यर्थमित्यर्थः। अधिजगे इति तु प्रयोजनं गाङ्लिटीत्यत्र द्वित्वकारकनिर्देशाश्रयणात्तत्सत्त्वात्तस्यापि प्रवृत्तेः। न च तस्य विषयसप्तमीत्वाङ्गीकारेणानै

वस्तुतस्तु अचीति व्यर्थम्। घ्रीयृघ्रीयशय्य इति द्वितीयाजवधिकस्यैकाचः कार्यितया यङो द्वित्वनिमित्तत्वाभावात्। अचः किम्। असूषुपत। इह स्वापेश्चङीति संप्रसारणे निषिद्धेऽभ्यासे उवर्णो न श्रूयेत। न च द्वित्वे कृते पुनः संप्रसारणम्। न संप्रसारण इति निषेधात्॥

मितिदात्वं तद्भावभावितामात्रेणेव तद्बुद्धिभावभावितामात्रेणापि निमित्तत्वस्य युक्तत्वात् तस्तत्रोपात्तलिङ्बुद्धिभाव एव निमित्तमित्यज्निमित्तत्वाभावः सर्वथैव वा शास्त्रे बुद्धिकृतमेव निमित्तत्वमिति स्पष्टं हि गोर्लुगिति सूत्रे मनोरमायाम्। अत एवाङ्गाधिकारे आर्धधातुक इत्यादीनां विषयसप्तमीत्वेपि परदेशस्य विषयकबुद्धिभावेन जायमानतया परनिमित्तत्वे न तद्विषयेचः परस्मिन्निति स्थानिवत्त्वप्रवृत्तिः इदमेवाचीति ईदृशनिमित्तत्वाश्रयणे लिङ्गं ध्वनितञ्चेदं प्रकृतसूत्रे ऽचो यदिति सूत्रे च भाष्ये इत्यन्यत्र विस्तरः। निषिद्धे इति। द्विर्वचनेचीत्यनेनेति भावः। पुनः संप्रसारणमिति। द्युतिस्वाप्योरित्यनेनेति भावः। निषेधादिति। अस्य च व्यवहितेपि प्रवृत्तिरिति स्पष्टमेवाकरविदाम्। इदमपि प्राचामनुरोधेन संप्रसारणग्रहणसामर्थ्यादेकवर्णव्यवधाने यून इत्यादावस्तु प्रवृत्तिः। प्रकृते प्रवृत्तौ तु न मानमिति वक्तुं शक्यत्वात् प्रत्युदाहरणान्तरन्त्वन्यत्रोक्तम् ॥

म·प्र·
२६२

रूपातिदेशेति। नचात्र क्ङिपक्षे द्वित्वात्पूर्वमियङः प्रवृत्त्या द्वित्वे कार्ये स्थानिरूपातिदेशेपि यणितत्त्वे मानाभावेन निन्युरित्यसिद्धिरिति वाच्यम्। आभीयत्वेनेयङः सिद्धायणप्रवृत्तेः। संप्रत्युदात्तत्वादिति। नच विहितविशेषणान्निस्तारः। धातुस्वरस्य दुर्वारत्वेनासंभवापत्तेः। अनेकाच्त्वादिति। एवञ्च निषेधो न स्यादिति भावः। एकाचो विहितस्येत्यर्थे नापीदं सुसाधम्। नच तदा लावस्थायामडिति पक्षे अकार्षीदित्यादौ दोषः। झिसिचोरपि स्यतासिवल्लावस्थायामेव प्रवृत्त्याङ्गसञ्ज्ञानिरपेक्षत्वेनान्तरङ्गत्वाद्धि

यद्यपि हाजादेशः स्थानिवत्त्वादिति रूपातिदेशपरतया सूत्रे व्याख्यानं काशिकादौ प्रसिद्धं फलं च तुल्यमेव तथापि स्थानिवद्ग्रहणं निवर्त्य नञश्चानुवर्त्य निषेधपरतया व्याख्यानमपि भाष्यारूढं लघु चेति तदेवाश्रितम्। एवं हि सति स्थानिवदिति शब्दाधिकारप्रयुक्तक्लेशो नास्ति। न पदान्तेति निषेधानन्तरं पाठश्चानुगृहीतो भवतीति दिक्। उभयान्वयीति। मध्ये पाठात्पूर्वोत्तराभ्यां संबध्यत इत्यर्थः। तत्रोत्तरान्वयफलं कर्तुं हन्तुमित्यादाविण्निषेधः। नित्स्वरेण संप्रत्युदात्तत्वात्। पूर्वान्वयफलं तु बिभित्सतीति पिपक्षतीत्यादौ निषेधः। द्वित्वे कृतेऽनेकाच्त्वात्। स्यादेतत्। विशेष्यदलमेव तर्हि मास्त्विति शङ्कते। एकाचः किम्। ननु बिभित्सतीत्यादितौल्याद्यङ्लुक्यपि स्यादेव तत्राह। स्मरन्तिहीति। श्तिपाशपेत्यादि। श्तिपा यथा। स्यति हन्ति याति वाति द्राति प्सातीत्यादि। शपा। सनीवन्तेति सूत्रे भरेति। अनुबन्धेन निर्देशो द्विधा। स्वरूपेणेत्सञ्ज्ञकत्वेन च। आद्यो यथा। शीङः सार्वधातुके गुणः दीङो युडिति। द्वितीयस्त्वनुदात्तङित इत्यादि। अत एव नाग्लोपिशास्वृदितामिति सूत्रे शासेर्यङ्लुकि न प्रवर्तते स्वरूपेणानुबन्धनिर्देशात्। सूत्रे शासिग्रहणं प्रत्याख्याय ऋशासु इति ऋदित्सु पठनीय इति मते तु इत्सञ्ज्ञकत्वेनानुबन्धनिर्देशात् ॥ ७ करणोत्तरमेवाडादिप्रवृत्तेः स्पष्टं चेदमेकाचो द्वे इत्यत्र भाष्ये। तर्हि मास्त्विति। उपदेशेऽनुदात्तस्यैकाच्त्वव्यभिचारादिति भावः। नच वधिव्यावृत्त्यर्थन्तत्तत्सामर्थ्येनोपदेशमात्रे एकाचो ग्रहणादिति वाच्यम्। आद्युदात्तनिपातनेनासिद्धेरित्यभिमानात्स्वरूपेणेति शासु इति पाठात्। सूत्रे। नाग्लोपीति सूत्रे। इत्सञ्ज्ञकत्वेनेति। ऋदित्पदेन तद्ग्रहणादिति भावः ॥

रामः
२६२

नपठ्यतेइति। पाठेप्यनित्यत्वेनवारणमन्यथायङ्लुगन्तेभूवादयइतिस्तनाद्यन्तादितिधातुत्वंनस्यात्गणनिर्दिष्टत्वात्। अनित्यत्वेमानञ्चयस्तोवागुणोयङ्लुकोरित्यादि। अतएवयङ्लुकिद्वित्वंभष्भावादिसिद्धमिति। एतन्मूलएवयत्रैकाज्ग्रहणंकिञ्चिदितिपाठः स्वीदितइतिसूत्रेकैयटेइत्यन्ये। अनुदात्तपाठस्यैवेति। नचानुदात्तमन्तोदात्तत्वबाधनार्थंमत्वेर्थलक्षणयैवोपपत्तौशास्त्रत्वबाधेमानाभावात्। सूत्रकारेणेति। भाष्यवार्त्तिककृतोरप्युपलक्षणमेतत्। एतेनवधादेशे[illegible]शआद्युदात्तत्वनिपातनमूलकःसऊदात्त

येतुयङ्लुकमपीच्छन्तितैः शासेरुकारोनपठ्यते। गणेनयथा। वेभिदीति। चेच्छिदीति। रुधादिभ्यः श्नम्। एकाज्ग्रहणंप्रकृतसूत्रे। तेनबेभिदिता। चेच्छिदिता। अत्रेण्निषेधोन। एतच्चेति। ननुश्तिपाशपेत्याद्यंशेकथमिदंज्ञापकमितिचेत्। ऐकदेशानुमतिद्वारापूर्वाचार्यपठितपरिभाषायाः ज्ञापनस्यगतिकारकोपपदानामित्यादौदृष्टत्वात्। अनन्यार्थैः श्तिपादिनिर्देशैर्ज्ञापनसंभवाच्च। नहूतइति। नचमत्वर्थलक्षणायांमानाभावः। वसस्यादीनामनुदात्तपाठस्यैवतत्रमानत्वात्। वधेरिति। यस्तुनद्यारृतयेः निङ्कारिकास्वदन्तपर्युदासउक्तोव्याघ्रभूतिनासएवचप्राचानुसृतः सद्दहोपेक्षितः। सूत्रानानुगुणत्वात्। तथाहि। कर्त्ताहन्तेत्यादौ। सर्वेसर्वपदादेशाइतिन्यायेनकरित्यादिरादेशः। तस्ययथास्थान्युपदेशंगृहीत्वानिषेधः प्रवर्त्तते। एवंवधादेशेपिप्रवर्त्तमानः केनवार्यताम्। अदन्तपर्युदाससामर्थ्येनेतिचेत्। न। सूत्रकारेणदेशेपर्युदस्तत्वादितिभावः। इणः षीध्वम्। इण्कोरित्यधिकारेपिपुनरिण्ग्रहणंकवर्गनिरासार्थम्। तेनेहन। पक्षीध्वम् ॥

न्तानामितिचादन्तानामप्युदात्तोपदेशत्वाभावबोधनात् तच्चकथादिषुस्थितोवधादेशेउदात्तनिपातनसामर्थ्यादित्यपास्तम्। यत्तुहनोवधस्यत्रास्य[illegible]नान्तत्वेइड्विधिर्वा[illegible] अदन्तत्वेतुनदोषइतिभाष्येउक्तं, तन्नउपदेशेनेकाच्त्वात्प्रतिषेधाभावादिट्सिद्धिरित्येवंपरतयाकैयटेनव्याख्यातम् ॥

विहितानामिति।एवञ्चाङ्गादितिनकर्त्तव्यमिति लाघवमितिभावः।नत्वीध्वमिति।इणन्ताद्विहितानांषीध्वमादीनामित्यर्थेषीध्वमः सासाद्विधानासंभवः सीयुटः षत्वस्यच विधानोत्तरकालत्वात्।तस्माद्यस्यविहितस्यषत्वमीयुड्योग्यतातस्येतिवाच्यम्।साचयदिधत्वंनस्यात् स्यादेवषत्वमितिप्रकृतेप्यस्त्येवेत्यभिमानेनेदं ढ विषीध्वमितिया न्तमिहाङ्गेनेणन्तम्।इणन्तादङ्गादिति स्वरूपकथनमिदम्।इतिकेचिदिति।अत्रारुचिबीजन्तुभाष्येऽस्यादर्शनंसूत्रान्तरस्थेनगोबलीवर्दन्यायग्रहणेचनदृढतरंमानमिति।

अङ्गात्परेषामिति।विहितानामितितुनोक्तम्।अरिद्धमित्यादावव्याप्तेः।लिहदुहनहां ढत्वघत्वधत्वेषुलिढ्वीध्वम्।धुक्षीध्वम्।नत्सीध्वमित्यत्रातिव्याप्तेश्च।अङ्गात्किम्।वेविषीध्वम्।अर्थवद्ग्रहणादेवसिद्धेक्वचिदर्थवद्ग्रहणपरिभाषानप्रवर्त्ततइतिज्ञापनार्थमिदम्।तेनानिनस्मन्नित्यादिसिद्धम्।एधिषीध्वमिति।इणः षीध्वमितिढत्वंतुनभवति।षीध्वंभक्तस्येडागमस्यतद्ग्रहणेनग्रहणादिणन्तादङ्गात्परत्वाभावात्।विभाषेटइतीटोविशिष्यग्रहात्।गोबलीवर्दन्याये नेड्व्यतिरिक्तएवेणिहग्राह्यइतिकेचित्तदाह।इड्भिन्नइति।ऊदृदन्तैरिति।अकारस्तूपेक्षितः तद्बीजन्तूक्तमेव।ऊदन्ताभूप्रभृतयः।ॠदन्ताः कॄतॄप्रभृतयः।युमिश्रणामिश्रणयोः।रु शब्दे।रुङ् गतौ।रेषणेचेत्यपिकेचित्।क्ष्णुतेजने।शीङ् स्वप्ने।ष्णुप्रस्रवणे।णु स्तुतौ।टुक्षु शब्दे।टुओश्वि गतिवृद्ध्योः।डीङ् विहायसागतौ।श्रिञ् सेवायाम्।वृङ् संभक्तौ।वृञ् वरणे।निहताः अनुदात्ताः इदानींहलन्ताः कान्तादिक्रमेणाह।शक्लृ शक्तौ।कान्तएकः।खगघङान्तानसन्त्येव।चान्ताअपिपकारात्प्राचीनायेवर्णास्तदादयोनसन्तीत्याशयेनाह।पच इति।डुपचष् पाके।पच व्यक्तीकरणे ॥

रेषणेचेत्यपिकेचिदिति।अत्रारुचिबीजन्तुनिरनुबन्धकत्वेनसाहचर्येणचयुमिश्रणेइतिलुग्विकरणस्यैवग्रहणमुचितम्।परिभाषाद्वयेनलुग्विकरणपरिभाषाबाधात्। अतएवसनत्यास्यथयोर्द्धं किंनकरोष्येसत्वहीनवदितिभट्टिः सङ्गच्छते ॥

ह्वावपीति। द्वंद्वं दुर्गवर्धमानादिरीत्या। अन्यैस्तस्येदित्वस्वीकारेण भाष्ये निदित्पाठेन तद्ग्रहासंभवात्। अतएव पचिविस्तारवचने इति चुरादेरिदित्वात् णिजभावेपि नग्रहणम्। युजिर्योग इति।

ह्वावपि। फलभाद्योनसन्नीत्याशयेनाह। युजीति। एवमग्रेपि बोध्यम्। मुच्लृ मोक्षणे। रिचिर् विरेचने। रिच वियोजनसंपर्चनयोरिति यौजादिकस्य। वच परिभाषणे। ब्रुवो वचिरपि। वचिर्यौजादिके। पिम्बादावपीत्येके। विचिर् पृथग्भावे। षिच क्षरणे। चान्ताः षट्। प्रच्छ ज्ञीप्सायाम्। छान्त एकः। त्यज हानौ। णिजिर् शौचपोषणयोः। भज सेवायाम्। भञ्जो आमर्दने। भुज पालनाभ्यवहारयोः। भुजो कौटिल्य इति च। भ्रस्ज पाके। टुमस्जो शुद्धौ। यज देवपूजादौ। युजिर् योगे। रुजो भङ्गे। विजिर् पृथग्भावे। षञ्ज सङ्गे। सृज विसर्गे। जान्ताः पञ्चदश। अद भक्षणे। क्षुदिर् सम्पेषणे। खिद दैन्ये। खिद्यति। खिन्दति। खिनत्तिश्चा। छिदिर् द्वैधीकरणे। तुद व्यथने। नुद प्रेरणे। पद गतौ। भिदिर् विदारणे। विद सत्तायाम्। विद विचारणे। शद्लृ शातने। षद्लृ विशरणादिषु। ञिष्विदा गात्रप्रस्रणे। स्कन्दिर् गतिशोषणयोः। हद पुरीषोत्सर्गे। दान्ताः पञ्चदश। क्रुध कोपे। क्षुध बु------क्षायाम्। बुध अवगमने। बन्ध बन्धने। युध संप्रहारे। रुधिर् आवरणे। अनोरुध कामे इति दिवादिश्च। राध संसिद्धौ। व्यध ताडने। शुध शौचे। साध संसिद्धौ। षिध संराद्धौ। धान्ता एकादश। मन ज्ञाने दिवादिः। हन हिंसागत्योः। नान्तौ द्वौ। आप्लृ व्याप्तौ। क्षिप प्रेरणे। दिवादिस्तुदादिश्च। छुप स्पर्शे। तप सन्तापे। तप ऐश्वर्ये दिवादिः। तप दाहे इत्यपि णिजभावपक्षे। तिप क्षरणे। तृप प्रीणने। दृप हर्षविमोचनयोः। दृपौ रधादौ वेट्कौ। इह पाठस्त्वनुदात्तेत्त्वस्यैतदर्थः। लिप उपदेहे। लुप्लृ छेदने। डुवप बीजसन्ताने। शप उपालम्भे। ञिष्वप शये। सृप्लृ गतौ। पान्तास्त्रयोदश। यभ मैथुने। रभ राभस्ये। डुलभष् प्राप्तौ। भान्तास्त्रयः। गम्लृ गतौ। णम प्रह्वत्वे शब्दे च। यम उपरमे। रम क्रीडायाम्। मान्ताश्चत्वारः। क्रुश आक्रोशे। दंश दशने। दिश अतिसर्जने। दृशिर् प्रेक्षणे। मृश आमर्शने। रिश कश हिंसायाम्। लिश अल्पीभावे। लिश गतौ च। विश प्रवेशने। स्पृश संस्पर्शने। शान्ता दश। कृष विलेखने। भौवादिकस्तौदादिकौ। त्विष दीप्तौ। तुष तुष्टौ। द्विष अप्रीतौ। दुष वैरूप्ये। पुष पुष्टौ। पिष्लृ संचूर्णने ॥

युजसमाधावित्यस्यापि ग्रहणं बोध्यम्। विनिगमनाविरहात्। भाष्ये युजीति धात्वेकदेशेकारविशिष्टस्यैव ग्रहणं न लिकानिर्देशादित्युक्तम्। इकानिर्देशस्यैवक्रमात् ॥

विषिशिषी।जौहोत्यादिकरौधादिकौ॥विषविप्रयोगेइतिक्र्यादिरपीतिन्यासः।कचच्छजाद्इति।पूर्वार्द्धेपात्तानांकान्तचान्ताद्इत्यादिरर्थःउत्तरार्द्धेक चद्का१ण१५ण१५टाः

विश्लृव्याप्तौ।शिष्लृविशेषणे।इहजिषुविषुमिषुइतिकषखषशिषेतिचदण्डकद्वयेपठितौभ्वादीअपि।विशिशिषीग्राह्यावितिमाधवादयः।नेतिबोपदेवादयः।शुष
शोषणे।श्लिषआलिङ्गने।षान्ताएकादश।घस्लृअदने।शब्विकरणःप्रकृत्यन्तरम्।अत्तेरादेशस्तुस्थान्युपदेशेऽनुदात्तेनापिसिद्धम्।वसनिवासे।सान्तौद्वौ।दहभस्मीकर
णे।दिहउपचये।दुहप्रपूरणे।दुहिरितिभ्वादिस्तुनेहगृह्यतइतिसंप्रदायः।णहबन्धने।मिहसेचने।रुहजन्मनिप्रादुर्भावेच।लिहआस्वादने।वहप्रापणे।हान्ताअष्टौ।क
चच्छजादधनपाभमशाःषसहाःक्रमात्।कगकौषणटाःख डोगघजाष्टखवैःस्मृताइतिसङ्ग्रहः।तृप्यतिदृप्यतीत्यत्रश्यनानिर्देशस्यफलमाह।तुदादाविति।अन्यनिरसयेइ
ति।निवर्तनीयास्तु।ञिष्विदास्नेहनमोहनयोः।पदस्थैर्ये।सेधतिबोधतीचेतिभ्वादिकाः।मनुअवबोधने।तानादिकः।पुषपुष्टौ।पोषतिःपुष्णातिश्च।श्लिषदाहे।भ्वादिकः।
वसआच्छादने।आदादिकः।एतेसेटः।युजबन्धनेतुक्र्यादिः।अनिट्।तथा।अन्यनिवृत्तयेसानुबन्धानिर्दिष्टाइत्यर्थः।तथाहि।णिजिशुद्धौनित्यदादिः।ओविजीभयसञ्चलनयो
रितितुदादिः।शक्यतिश्चसेडेव।यद्यपिमाधवादयःशक्यतेरप्यनिट्त्वमिच्छन्तितथापिचन्द्रगोमिप्रभृतीनांमतेनबोद्ध्यम्।अतएवबोपदेवोधातुद्वयेनरूपद्वयंफलतीत्याशये
नशक्नोतिशक्यत्योर्द्वयोरपिलृकारमनुबन्धमासजत्।विन्दतिरिति।लाभार्थः।इष्टइति।अनिट्त्वेनेष्टइत्यर्थः।तथाचचान्द्रसूत्रम्।विदेरलुकइति।भाष्यानुक्ताइति।अनु
क्ताःनतुप्रत्याख्याताः।तथाचभाष्यमप्युपलक्षणतयानेयम्।तेनरक्तंरागात्।शुष्कधृष्टौ।क्तेननञ्विशिष्टेनानञ्इत्यादिसौत्रव्यवहारात्तन्त्रान्तरसंवादाच्च।अस्तुप्रतिपत्तु
मित्यादिसार्वलौकिकव्यवहाराच्चेतिभावः।शपूर्वाइत्यतद्गुणसंविज्ञानोबहुव्रीहिः।तेनशरोनशेषःकिंतुखयामेवेतिबोद्ध्यम् ॥

७ ११खो डो१३ग३घ४ञ१०ट११

ख प इत्यर्थःकादयःक्रमेणैकादिसंख्यापराइति बोद्ध्यम्।ओविजीति।नचास्यईदित्वसामर्थ्यादेवसेट्त्वावधारणेविजिरितिसानुबन्धपाठोव्यर्थइतिवाच्यम्।नतस्यै[illegible]॥

आस्पदमिति। प्रसिद्धिकरं नामग्रामादि वा। यथा मया प्रतिष्ठा लब्धेति स्थापनेति यथा त्वया स्वप्रतिष्ठा कृतेति। अवस्थानमिति। ——— यथा कृते प्रतिष्ठेति एकत्र स्थापनं मण्यादेः सूत्रादेर्वा। सन्दर्भ इति। शब्दानामित्यर्थः तन्त्रावृत्त्यादिनेति। वक्तुः तन्त्रेणोच्चारणं बोद्धुरावृत्त्या बोध इत्यर्थः। आदिनैकशेषावृत्ती। असंभवाच्चेति। अभ्यासादेशस्याङ्गाध। आस्पदं स्थापना अवस्थानं वा प्रतिष्ठा। एकत्र स्थापनं सन्दर्भो वा ग्रन्थः। नाथ नाधृ। उपतापो रोगः। उपघात इत्यन्ये। आशिष्येवेति। अनुदात्तेत्त्वादेव सिद्धे नियमार्थं वार्तिकमित्यर्थः। अत एकहल्। तन्त्रावृत्त्यादिना लिटि त्यादेशविशेषणमेतस्य निमित्तं चेत्याह। लिण्निमित्ते इति। किति लिटीति च। यत्तु प्राग्लिट्कृताभ्यासादेशहीनस्येति व्याख्यातम्। तन्न। अभ्यासग्रहणस्याधिक्यात्। आदिग्रहणस्यागेन न्यूनत्वाच्च। पेचतुरित्यादौ हलादिःशेषेणाभ्यासस्यानादेर्हे लोलुप्तनयाः संभवाच्च। अभ्यासैकदेशस्यादेशः स न तु कृत्स्नस्याभ्यासस्येति चेत्तर्हि व्यावर्त्याप्रसिद्धिः। चकणतुरित्यादावप्येकदेशस्यैव चुत्वादिप्रवृत्तेः। भदि। कल्याणं मङ्गलम्। सुखमात्मगुणः। मदिस्तुति। मोदो हर्षः। मदो गर्वः। स्वप्नमालस्यम्। मदी हर्षे दिवादौ। हर्षग्लेपनयोर्घटादौ। मद तृप्तियोगे चुरादौ। न शसददः। शसु हिंसायाम्। दन्त्यान्तः। यत्तु प्राचा शशेति तालव्यान्तं पठित्वा शश प्लुतगताविति धाताविदं सूत्रं संचारितं तदाकरविरोधादुपेक्ष्यम्। गुणशब्देन भावितस्येति। अवयवावयविभावः षष्ठ्यर्थः। भावितत्वञ्च प्रयोज्यत्वम्। सा साक्षात्परम्परासाधारणम्। तथाहि। शशारतुः पपरतुरित्यादौ गुणशब्देन अर् क्रियते तदवयवोऽकारः। लुलविथेत्यादौ तु गुणशब्देन ओकारः। तस्यावादेशस्तदवयवोऽकारः। सकर्मक इति। यथा। स्वदस्व हव्यान्यनुभवेत्यर्थः। अकर्मक इति। यथा। अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारेति। न स्वदते न रोचत इत्यर्थः ॥ ७ भव इत्यर्थः। घटादाविति। अपूर्वो घटादौ पठ्यत इति मते नेदं यद्वा स्वदिवादि पठित एवानूद्यत इति शेषः। नैनसनाधिक इति भावः। गुणशब्देनारिति। उरण् रपर इति सूत्रे एकवाक्यतयाऽऽकारान्ताङ्गस्य ऋकारस्य गुणो भवतीति विधानादिति भावः। तदवयवोऽकार इति। न शसददवादीनामित्येव सिद्धे गुणग्रहणसामर्थ्याद्गुणशब्देन भावितस्यानिकारमादाय लुलविथेत्यादावपि प्रवृत्तिरिति भावः ॥

म·शु·
२६५

अव्यवहितपराविति। पर्युदासस्य सदृशग्राहित्वाद्व्यवधानांशलाभः। स्त्यै शब्दे इति। स्त्यै ष्ट्यै इति द्विः पाठः पर्युदासे मूलम्। सेवृ षेवृ इति द्वयोः पाठस्त्वनार्षः। षसेनि [illegible]

धात्वादेः षः। यदि तु धातव एव दन्त्यादयः पठ्येरन् तदा ण्यन्ताच्चङि असिषदत्। सिषेधेत्यादौ आदेशप्रत्यययोरिति षत्वं न स्यात्। अतः षोपदेशान्पठित्वा सादेशः क्रियते। येषां तु षत्वं नेष्यन्ते दन्त्यादय एव पठ्यन्ते। सृ गताविति यथा। एवं स्थिते धातुपाठशुद्धौ वतालव्यादिव्यवस्थावत् षोपदेशव्यवस्थाप्युचिता। तथापि साधादिशुद्धादिपाठस्यैव दृश्यमानतया पाठस्य संकीर्णत्वाल्लक्षणमुखेन षोपदेशत्वं व्यवस्थापयति। सेगित्यादि। दन्त्यश्च अच्च दन्त्याचौ। तौ अन्तौ। अव्यहितपरौ यस्य सः। दन्त्याजन्तः। सः सकार आदिर्येषां ते एकाचः षोपदेशा बोध्याः। तथा च ष्ठा गतिनिवृत्तौ। षिध गत्यामित्यादौ पठ्यमानः षकारः शुद्ध एव साधादौ तु सांप्रतम पठ्यमानोपि षकारः प्राक्स्थित इत्यनुमेयमिति भावः। दन्त्येत्यादि किम्। चुस्कुन्दे। एकाचः किम्। सोसूच्यते। सोसूत्र्यते। सूचिसूत्रौ चुरादावदन्तौ। अतिव्याप्तिवारणायाह। सेगित्यादि। सेकृ गतौ। स्रङ्गतौ। सृ गतौ। स्तृञ् आच्छादने। सृज विसर्गे। स्तॄञ् आच्छादने। स्त्यै शब्दसङ्घातयोः। एभ्योन्याननुक्तलक्षणेनासङ्गृहीतान्स्मिङ्धातून्स्मिङ्ग्राहिकया सङ्गृह्णाति। ष्वष्कित्यादि। ष्वष्क गतौ। ञिष्विदा गात्रप्रक्षरणे। स्वद आस्वादने। षञ्ज परिष्वङ्गे। ञिष्वप् शये। ष्मिङ् ईषद्धसने। एते षोपदेशा इत्यन्वयः। प्राचा तु एकाच इति नोक्तम्। तन्न। सूविसृत्यादावतिव्याप्तेः स्पष्टैव। यत्तु व्याख्यातार आहुः। येषां खल एव षकारादित्वं पठ्यते ष्ठिवादीनां तेषां णटवर्गद्वितीयत्वपक्षेपि षोपदेशत्वं न निवर्तते। न ह्येत एव षोपदेशा नान्य इति नियम्यते। तथा हि सति ष्ठिवेर्द्वितीयष्ठकार इति पक्षे सत्वनिषेधोऽनर्थकः स्यात्। नाप्येते षोपदेशा एवेत्ययोगोपि व्यवच्छिद्यते। सेवतिर्दन्त्यादिरप्यस्तीति मैत्रेयन्यासकारादिभिरुक्तत्वात्संभवमात्राभिधानमेतदिति। अत्रेदं वक्तव्यम्। यद्ययोगान्ययोगौ न व्यवच्छेद्यौ तर्हि व्यर्थमेवेदम्। अविवेकस्य तदवस्थत्वात्। किंच। विवेचनाय षोपदेशत्वलक्षणेन बोधयतीति सोक्तावतारिकाप्यसङ्गता ॥

धासतिस्यादिति शेषः। लक्षणस्यायोगान्ययोगव्यवच्छेदकत्वस्वभावत्वात्। अन्यथा लक्षणत्वमेव हीयतेति भावः ॥

रामः
२६५

व्याहतैवेति। अयोगो न व्यवच्छिद्यत इति स्वोक्तेस्त्वर्थः। षोपदेशत्वमावेद्यते इत्यस्य तद्योगो व्यवच्छिद्यत इत्यर्थात् इति भावः। प्रत्याख्यानार्थमेवेति। एवं हि तन्त्रभाष्यं ष्ठिवेरपि द्वितीयष्टकार इति सत्वे कृते ष्टुत्वेन सिद्धन्ते ष्ठीव्यत इति तर्हि न सिद्ध्यति। द्वितीयथकारकोपि स्वीक्रियते ते ष्ठीव्यते ते ष्ठीव्यत इत्युभयसिद्ध्यर्थं तस्य तर्हि सत्वं प्राप्नोति। ए

अपि च। धातुपाठे येषामादौ षकारो न पठ्यते साद्यतिस्यलस्यादीनान्तेषामनेन षोपदेशत्वमावेद्यत इति स्वोक्तिरप्याहतैव। यत्त्वन्ययोगव्यवच्छेदे ष्ठिवेः सत्वनिषेधानर्थक्यं स्यादित्युक्तम्। तन्न। सत्वनिषेधप्रत्याख्यानार्थमेवाकरे द्वितीयष्ठकार इति पक्षस्य प्रक्रान्तत्वेनेष्टापत्तेः। यद्यप्ययोगव्यवच्छेदे सेवतिर्दन्त्यादिरपीति मैत्रेयादिमतविरोधोद्भावनम्। तदपि न। सेवृ ष्ठेवृ इति धातुद्वयपाठवादिनां द्वितीयधातुपाठसामर्थ्येन धातुत्वोपपत्तेः। तादृशयत्नविशेषविरहे योगव्यवच्छेदस्य निर्देशत्वादिति दिक्। ह्लादी २७ ईदित्वं श्वीदितो निष्ठायामितीड्भावार्थं ह्लादो निष्ठायामित्युपधाह्रस्वः। आह्लन्नः। आह्लन्नवान्। स्वद आस्वादने। २८ अषोपदेशत्वात् सिस्वदत्। यकाररहितोप्ययमिति। तथा च प्रयुज्यते। मधुस्नुतङ्गतमिव सुपूतमिति। मन्थ विलोडने ४२ हिंसासंक्लेशनयोः पीलके। अयं क्र्यादौ पठ इह चाग्रे निरनुषङ्गः पठितः। विमन्थाम्। ४७ अयमुदिदिति काश्यपादयः। तदुक्तिविरोधादयुक्तमिति माधवः। तथा हि। अनिट्कारिकासु सिध्यतिबुध्यत्योः श्यना निर्देशात् सिधितं बुधितमिति वृत्तावुदाहृतम्। ऊदित्वे तु उदितो वेति क्त्वायामिड्विकल्पात्। निष्ठायामिण्न स्यात्। यस्य विभाषेति निषेधात्। अत एव न्यासपदमञ्जर्यापि सिधेरुदित्वमनार्षमित्युक्तम्। उपसर्गात्सुनोतीति। सुनोत्यादीनां पञ्चानां श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थस्तेनाभिसोषवीतीत्यादौ षत्वं नेत्याकरः ॥

वं तर्हि द्विषकारकः सः आद्यस्य सत्वे कृते ष्टुत्वेन सिद्धं ष्ठिवलिट् ष्ठीवते इत्यत्र तर्हि धुट् प्रसज्येत। एवं तर्हि यादौ रिश्रुष ष्कनादिति। तादृशयत्नेन। धातुद्वयपाठरूपेत्यर्थः। एकधातुपाठेऽयोगव्यवच्छेदस्य निर्दुष्टत्वादिति भावः। आकार इति। अन्नाह विवीजन्तु स्रोतिस्रोभत्योः शर्पूर्व इति स्वयः शेषेण तयोः फलाभावेन पञ्चानामित्यसङ्गतमिति ॥

तद्बीजान्तरमप्याह। स्यादिष्वेवेति। नचगणनिर्देशात्स्यादिष्वित्यस्य यङ्‌लुक्यप्राप्तिः गणपाठप्रसिद्धगणनिर्देशस्यैवात्रग्रहात् अत्रतूपसर्गात्सुनोतीतिसूत्रस्थस्यादीनां ग्रहणम्। न चा
भ्यासेनस्वनिमित्ताक्षेपात्तत्र परेति यमो न चैतद्यङ्लुगन्तद्‌ति वाच्यम्। सन्यङन्तस्यद्वित्वविधानेन तेन तस्यरत्वाक्षेपात्। यङ्गन्तेभ्यासस्यद्वित्वनिमित्तपरत्वासंभवेन तेन तदाक्षेपा
संभवाच्चतदन्तत्वाक्षेपेतुदोषः एवनेतिदिक्। ण्यन्ता इति नामधातुरिति शेषः। इत्याहुरिति। अत्रारुचिबीजन्तु णिलोपे सनिस्यस्यैकाच्त्वेपि आचारक्विबन्ताद्यङ्। लुग् विधानेन मानम
सिद्धसूत्रस्यभाष्यविरुद्धं च तदिति। हरदत्तइति। तादृशयङ्लुक् सत्वे दृढतरमानाभावोऽरुचिः। मतान्तरमिति। अत्रारुचिबीजन्तु गत्यर्थे षत्वप्रवृत्त्यातस्यचारितार्थ्ये न गतिभिन्नार्थेष्विप
स्यादिष्वेवाभ्यासस्यषत्वम्। नतु सुनोत्यादिष्विति नियमेनापिगतार्थमेतत्। सेनयेति। ण्यन्तः। सेनया अभियाति अभिषेणयति। शपानिर्देशो यङ्लुङ्निवृत्त्यर्थः। न चानेका
च्त्वे न यङ्संभवः क्वौणिलोपे ततः आचारे यङः संभवादित्याहुः। सिधेति। शपानिर्देशो यङ्लुङ्निवृत्त्यर्थो दैवादिकनिवृत्त्यर्थश्चेति हरदत्तः। तेन प्रतिसेषिधीतीत्यत्राभ्या
सेषत्वं न। अत्र माधवेन मतान्तरमुपन्यस्तम्। सिद्ध्यतीति निवृत्त्यर्थ एवायं शपानिर्देशः। स्निपाशयेति निषेधस्तु नेह प्रवर्त्तते। सेधतेर्गतावितिनिषेधसूत्रे श्निपानिर्देशात्स्वापका
त्। सहि यङ्लुकि षत्वपरित्राणेनार्थवान्नत्वन्यथेति। इण्कोरित्यधिकृतं तत्रोपसर्गेकवर्गस्यासंभवादिणेवसंबध्यते। तात्स्थ्याच्चाच्छ द्य मित्याह। उपसर्गस्यादिति। इणन्तादुपसर्गा
दिति तु नव्याख्यातम्। निःषुणोतीति निःषेधतीत्यादावव्याप्तेः सिद्धान्तेतुनुम्विसर्जनीयशर्व्यवायेपीति षत्वं भवत्येव। यत्तुदुष्षुणोतिदुःषेधतीत्यादि प्राञ्च उदाजहुस्तच्चिन्त्यम्। दुरः षत्वणत्वयो
रुपसर्गत्वप्रतिषेधात् ॥ ७ शयेति निषेधबाधेमानाभावइति। भवत्येवेति। तवत्तुविरोधात्तत्सम्भवएव नस्यादिति भावः। दुरइति। षत्वणत्वयोः रुत्वस्यासिद्धत्वेन तद्विषयोपसर्गत्वप्रतिषेधपरे दुरः
षेवेति वार्तिके कृतरेफसान्तस्यापिग्रहणे नसान्तयोरपितन्निषेधात्। अतएवसुषामादिषुदुष्टशब्दपाठश्चरितार्थः सह्यपदुः सु घुस्थः कुरिति दुःपूर्वकस्याधातोः कुप्रत्ययेसाधुः। अन्यथा दुस्पूर्वकादेव
कुप्रत्ययमङ्गीकृत्योपसर्गादित्येवषत्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव। नचास्यरूढत्वेनावयवार्थाभावादुपसर्गत्वाभावः। अत्यन्तरूढेषु निष्ठादिषु षत्वानापत्तेः। अर्थवत्वारोपेणेति चेत्प्रकृतेपि तुल्यं दुसः पा
ठस्तु दुरयतइत्यादौ रुत्वस्यासिद्धत्वेन लत्वाभावार्थः दुरस्तु दुलयतइति रूपं यत्र तु रुत्वमसिद्धं निरः कुषइत्यादौ तत्रान्तग्रहणेपि नसान्तग्रहणमिति भावः। आविदूर्यमिति। सामीप्यमित्यर्थः ॥

निपातनादिति।यत्त्वर्थाभावेऽव्ययीभावस्यनञ्तत्पुरुषेणसहविकल्पादव्ययीभावात्पक्षेसुलभइतितन्नधर्मिपराविदूरशब्देनाव्ययीभावेऽर्थासङ्गतेः।धर्मपरेतस्मिंस्तुपक्षेऽवैकयत्ति।मात्रुकास्तंप्रत्येवोपसर्गादुक्तम्।तेनेहन।निर्गतःसावकोऽस्मात्।निःसावकः।ण्यन्तेतुप्रादीनांप्रकृत्यर्थविशेषकत्वेऽभिषावयति।ण्यर्थविशेषकत्वेतुसुनोतिंप्रत्यनुपसर्गत्वाभावान्नषत्वम्।अभिसावयति।एवंसनादिष्वप्यूह्यम्।स्यादिष्वभ्यासेनप्राक्सितादितिचवक्ष्यते।तत्रसौत्रक्रमज्ञानस्योपजीव्यत्वात्सौत्रक्रमेणैवषत्वप्रकरणंव्याचष्टे।सदिरप्रतेः।पञ्चम्यर्थेप्रथमेत्याह।सदेरिति।स्तन्भेः।सौत्रस्यैवेति।स्तन्भुस्तुन्भुइतिसूत्रेनिर्दिष्टस्यरोधनार्थस्य।नतुष्टभिस्कभिप्रतिबन्धइतिपठिष्यमाणस्येतिभावः।एतच्चलक्षणप्रतिपदोक्तपरिभाषयालभ्यते।षत्वविधौहिनकारविशिष्टरूपमुपात्तन्तच्चसौत्रस्यप्रत्यक्षम्।इदितस्तुलाक्षणिकम्।तेनाविस्तम्भतेइत्यादौषत्वंन।नन्वेवमुत्तंभतेइत्यादौउदःस्थास्तम्भोःपूर्वस्येतिनप्रवर्त्तेतइतिचेत्।न।तत्रहिस्थास्तम्भोरितिमकारविशिष्टंरूपमुपात्तन्तच्चोभयोरपिलाक्षणिकमित्यविशेषादुभयग्रहणात्।एतच्चसर्वंमाधवग्रन्थेस्पष्टम्।ननुसदिस्तन्भोरित्येवंकुतोनसूत्रितंतत्राह।योगेति।अवाच्चेतिसूत्रेसदेःसंबन्धोमाभूदितिभावः।नानुवर्त्ततइति।स्तन्भेरित्यत्रेत्यर्थः।तथाचैतदर्थोपियोगविभागइतिभावः।अवाच्च।आलम्बनमाश्रयणम्।यथायष्टिमवष्टभ्यास्ते।अविदूरस्यभावआविदूर्यम्।ननञ्पूर्वात्तत्पुरुषादितिनिषेधेप्राप्तेअतएवनिपातनाद्भावप्रत्ययः।वेश्च।विष्वणतिमांसम्।भोजनेकिम्।विस्वनतिवीणा।परिनिविभ्यः।षेवषेसशब्दः।भुङ्क्तेइत्यर्थेवने।षिञ्बन्धने।क्तान्तः।अजन्तश्चविषितःषिपयः।प्रत्ययविशिष्टग्रहणंकिम्।विसिनोति।यत्तुकेचित्।विषिण्वन्तीतिविषयाइतिप्रयुञ्जतेतत्रविग्रहेषत्वणत्वेप्रामादिके।षिवुतन्तुसन्ताने।षहमर्षणे।सुट्आगमः।परिष्करोतीतियथा।स्तुस्वञ्ज्योरुपसर्गात्सुनोतीत्येवसिद्धेपर्यादिपूर्वयोरेतयोःसिवादीनांवाड्व्यवायेपीतिविकल्पार्थंपुनर्वचनम्।स्यादिषु।हेत्वादौ।यद्यपिनिषेधे—स्यादिष्वभ्यासस्योपसर्गात्सुनोतीत्यनेनसिद्धमभ्यासात्परस्यत्वादेशप्रसङ्गयोरितितथापि ॥

स्पिकार्थमितिभावः ॥

आद्यंवाक्यमिति।स्थादिष्वभ्यासेनचेत्येतदित्यर्थः।अत्रक्षमवायेपीत्यनुवर्तते।अपिनाऽव्यवायेपि।सेनयतीति।अत्रसेनाशब्दस्याव्युत्पन्नत्वेनादेशसकाराभावइतिभावः।अवर्णान्तेतितन्त्रेणपरत्वाभावादितिभावः।नचपूर्वत्रासिद्धत्वस्यद्वित्वेनिषेधात्।पूर्वम्धातुरुपसर्गेणेतिपक्षेन्तरङ्गत्वात्पूर्वंषत्वेकृतषत्वानामेवद्वित्वेधितष्ठावित्यस्यसिद्धिरेतद्वचनंविनापीतिवाच्यम्।पूर्वंधातुःसाधनेनेतिपक्षस्यमुख्यत्वादितिबोध्यम्।एकपदेति।पदस्येत्येकत्वविवक्षणात् अखण्डैकपदेत्यर्थः।तेनसोमसुत्स्वितिरित्यादौसमासेपिनेतिबोध्यम्।

आद्यंवाक्यंफलत्रयार्थम्।तथाहि।अषोपदेशार्थम्।सेनयाअभियातुमिच्छतिअभिषिषेषति।अवर्णान्ताभ्यासार्थञ्च।अर्थीसनङ्गोत्रमिदोधितष्ठौ।यणि प्रतिषिद्धर्थञ्च।अभिषिषिक्षति।षिचक्षरणे।स्तौतिण्योरेवेतिनियमान्निवर्तितषत्वंतदुपसर्गमाश्रित्यभवति।अभ्यासस्येतिद्वितीयवाक्यन्तुनियमार्थम्।स्थादिष्वेवाभ्यासस्यषत्वंनसुनोत्यादिष्विति।तत्फलन्तुषूप्रेरणे।अभिसुसूषति।अत्रोक्तनियमादभ्याससकारस्यषत्वंन।द्वितीयस्यतुस्तौतिण्योरेवेतिनियमान्न।षोऽन्तकर्मणि।अभिसिषासति।षूहषणे।भावादभ्यासात्परस्यषत्वंपूर्वस्यतुन।उक्तनियमात्।षिधूशास्त्रे।४८ शास्त्रंशासनमिति।अन्येतुशास्त्रविषयकज्ञानमित्याहुः।माङ्गल्यंमङ्गलक्रिया।स्वार्थेष्यञ्।झलोझलि।सस्यलोपःस्यादिति।पदस्येतिवर्तते।तत्रप्रत्यासत्तेर्झलःझलिसस्येतिनिर्दिष्टानान्त्रयाणामेकपदसंबन्धित्वविधिरयम्।नतुसोमसुत्स्थातेत्यादौ।णोपदेशास्त्विति। नद शब्दे।नटअवस्यन्दनेचुरादिः। यस्तुनटनृत्ताविति घटादिः सनेह गृह्यते।नाटीतिदीर्घनिर्देशात्।नाथृनाधृयाञ्चादौ।टुनदिसमृद्धौ। नक्कनाशने ॥

उरस्येतिज्ञापकाज्झलादौप्रत्ययेएवायंलोपइत्यन्ये।घटादिरिति।भ्वाद्यनुवादरूपइत्यर्थः। नचघटादौचुरादेरेवानुवादइतिवाच्यम्।नान्येमितोहेताविति ज्ञपादिपञ्चकव्यतिरिक्तस्यस्वार्थणिजन्तस्यमित्वनिषेधात्।एवञ्चयस्यनाटीत्येवरूपंतस्यात्रपर्युदासःभौवादिकस्यनटयतिनाटयतीतिरूपद्वयसंत्त्वेनप्रनाटयतीत्यादौनाटिरूपेपिणत्वंभवत्येव।वाक्यार्थाभिनयंकारयतीत्यर्थइतिभावः ॥

एधतिरिति। भूसहित एधतिरित्यर्थः। महान्त्याहेति सत्तारूपब्रह्मस्मारकत्वेन चोभयोर्माङ्गलिकत्वमिति भावः। षोडयतीति। षोडन्तमाचष्ट इति णिचि टिलोपे पचाद्यचि षोडश्चात्मनद्युक्ती – तिवपविरूपमिति कैयटः। एतच्चेति सूत्रस्थस्यान्यग्रहणं चेत्यपि बोध्यम्। उपदेशोऽस्तीति षकारादिभ्यः आचारक्विबन्तात्स्ये वान्यथा सुब्धातुत्वाभावाद्वृत्तिकारस्यास्या

नृ नये। नृती गात्रविक्षेपे। एभ्यो णिचाद्यर्थः। दन्दशूक क्रियायामिति। दन्दशूककर्तृकायां क्रियायामित्यर्थः। क्लिदि परिदेवने। ७४। अस्यानुदात्तेत्सु पठितस्येह पाठः परस्मैपदार्थः। स्वरितेत्सु तु पाठो न कृतः। क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदं यथा स्यात्। मुञ्च मुञ्जे। ७५। अयं शौचकर्मणि मुञ्जादौ। मुध शौच इति दिवादाव निर्हाप्रथमं माङ्गलिक एधतिरुक्तस्तदनुरोधेनैव तवर्गीयान्तान्पठित्वा मान्तानां पाठक्रमेणाह। अथेति। सुब्धात्विति। सुब्धातूदाहरणं षोडयति षण्डयतीत्यादि। एतच्च वार्तिकं भाष्ये प्रत्याख्यातम्। तथाहि। धात्वादेरिति सूत्रे उपदेश इति वर्तते। न च सुब्धातूनामुपदेशोऽस्ति। ष्ठिवु ष्वष्कतीतु यकारादौ। लोपो व्योरिति यलोपः। यत्तु प्राचा सुब्धातु ष्ठ्यै ष्वष्केत्युक्तम्। ष्ट्यायतीत्युदाहृतं च। तदनाकरम्। भाष्यवार्त्तिकयोः ष्ट्यै इत्यस्य सत्वनिषेधाभावात्। स्त्यः प्रपूर्वस्य। प्रस्तोऽन्यतरस्यामित्यतो स्त्यारूपापन्नयोर्द्वयोर्ग्रहणमिति वृत्त्यादिमहाग्रन्थविरोधाच्च। एवञ्चोभयोरपि स्त्यायतिः प्रस्तीतः। प्रस्तीमदित्यादिरूपाणि तुल्यान्येव। यत्तु नन्दि। धातुपाठे स्त्यै ष्ट्यै इति षकारोऽसामर्थ्यात्सत्वं नेत्याशय इति। तच्च। तिष्ट्यासति। अतिष्ट्यत् इत्यादौ षत्वप्रवृत्त्या चरितार्थत्वस्य माधवादिग्रन्थेषु स्पष्टत्वात्। राघृ लाघृ द्राघृ। अत्र द्राघृ आयामे इत्यपि पठ्यते। आयामो दैर्घ्यमिति कौशिकः। कदर्थनमिति स्वामी। उख उखि। स्कृत्वं वृत्तत्वादिति। यत्तु माधवेनोक्तमभ्यासमात्राश्रयत्वेनान्तरङ्गे ह्रस्वे कर्तव्ये पूर्वपराश्रयस्य बहिरङ्गस्य सवर्णदीर्घस्यासिद्धत्वाद्ध्रस्वो नेति ॥

७७ न प्रस्त्यास्त्यानेत्युनेति फलभेदः स्यादिति भावः। ह्वयोरिति। आत्वेनोभयोरपि लाक्षणिकतया लक्षणप्रतिपदोक्तपरिभाषानवसर इति भावः। षत्वप्रवृत्त्येति। स्त्यै इत्यस्य तिस्त्यासतीत्यादीति भावः ॥

तच्चिन्त्यमिति। हिमात्रवृष्ट्यभावेपिपर्जन्यन्यायेनह्रस्वोदुर्वारइतिभावः। दूषणान्तरमाह। ह्रस्वस्येति। पूर्वंप्रवृत्तिस्तुवार्णादाङ्गंन्यायेनेतिमूलेस्पष्टम्। असत्वादपीति। हरदत्तादिभि
तेइतिभावः। अपिनारुचिर्बोधिता। तस्मात्तुचरकालप्रवृत्तिकैर्ज्ञानन्तर्येएवलत्वप्रवृत्तिरितिसिद्धान्तविरोधात्प्रागुक्तएवहेतुरितिबोध्यम्। गतिविशेषइति। उत्तर

तच्चिन्त्यम्। ह्रस्वस्याङ्गत्वेनबहिरङ्गत्वात्। आसप्तमसमाप्तेरङ्गाधिकारइतिसिद्धान्तात्। प्रागभ्यासविकारेभ्यइतिपक्षस्यचग्रस्तत्वादसिद्धापत्त्यादूषितत्वात्। अतएवनाभ्यासादीनांह्रस्वत्वेइतिवार्त्तिककृतान्तवद्भावप्रतिषेधआरम्भः। किञ्चाप्यन्तरङ्गेबहिरङ्गेवायोरानन्तर्यमन्तरेणनाऽऽनन्तर्येइतिनिषेधस्यासत्वादसिद्धत्वन्दुर्वचमिति। इहउखउखीतिदण्डकानन्तरन्त्वगिकम्पनेइतिपठ्यतेततगतौप्राकुपठितस्यगतिविशेषेपिवृत्तिंबोधयितुम्। अतएवभनतिप्रयोजनत्वादुपेक्ष्यम्। षचसेचनेसेवनेवा। यद्यपिसेचनइत्येवप्रायेणपठ्यतेतथापिसेवनंमोपिप्रामाणिकः। यंभूरवोरत्नग्रहणंसचन्तेइत्यादौभट्टभास्करादिभिस्तथैवव्याख्यानादितिभावः। अयंसमवायेस्वरितेत्दृश्यते। लोचृदर्शने। ऋदित्। अलुलोचत्। षचिव्यक्तीकरणे। इदित्। अनिदिदितिदुर्गवर्द्धमानप्रभृतयः। न्यासकारस्त्वनिदितंपरस्मैपदिनञ्चमन्यतेतथाचतिङोगोत्रादीनीतिसूत्रेपचतिगोत्रमित्युपादायपचव्यक्तीकरणेइतिव्याख्यत्। एतान्येवैकदेशिमतानिगृहीत्वानिद्धारिकाव्याख्यायामस्यापिग्रहणमित्युक्तं। वामसंमतकौशादयोपिअनिट्प्रसङ्गेइयोर्ग्रहणसूत्रः। षचिविस्तारवचनेइतिचुरादौ। ऋजगति। अर्जनंप्राधान्येन। उपार्जनन्तुप्रासङ्गिकम्। अयंपाठोमैत्रेयस्य। क्षीरस्वामिप्रभृतयस्तुअर्जनेत्वितिपेठुः। ऋञ्जिधाविति। तत्रहिइद्दल्ग्रहणङ्गोणस्येहशस्यहलुः परिग्रहार्थम्। अन्यथातस्मान्नुडित्येवब्रूयात् ॥

देशसंयोगानुकूलव्यापारत्वमुभयोः सममित्यभिमानः। एकदेशिमतानीति। अनेनवस्तुतस्तस्यासुग्रहणमनुचितमितिसूचितम् ॥

नचाटतुरित्यादाविति। आटेत्यस्याप्युपलक्षणमिदम्। भाष्यकैयटयोरिति। एओङ्सूत्रे इति शेषः। विकल्पितत्वादिति। परं तु फणादिष्वपि भ्रातृ इति पठ्यते। एवञ्चास्मात्तु न
नचाटतुरित्यादावतिप्रसङ्गः। अश्नोतेश्चेत्यनेनैकहलो यदि भवति तर्हि अश्नोतेरेवेति नियमात्। नचास्य अश्नातिमात्रनिरस्यर्थत्वं शङ्क्यम्। तथात्वे हि नाश्नस्ये
व ब्रूयात्। यद्वा। द्विहल्ग्रहणं प्रत्याख्यायते। अवर्णोपधस्य यदि भवति अश्नोतेरेवेति नियमात्सर्वं सिद्धमिति भाष्यकैयटयोः स्पष्टम्। ऋजि भृजी। द्वितीय ईदि
त्। श्वीदितो निष्ठायामिति नेट्। भृक्तः। भृक्तवान्। भ्रस्ज पाक इति तौदादिकस्य। भृष्टवान्। ऋञ्जाञ्चक्रे इति। संमतातरङ्गिण्योस्तु आनृञ्जे इत्युदाहृतं तत्
प्रामादिकमिति भावः। एजृ भ्रेजृ भ्राजृ। अत्र न्यासकारः। अवश्यपठितव्येन फणादिकेन भ्राजत इत्यादिसिद्धेरिह पाठोऽनार्थ इत्याह।। तन्न। भ्रश्चेति षत्व
विरहार्थमिह पाठात्। तत्र हि राजसाहचर्यात्फणादेरेव ग्रहणमिति स्थितम्। यद्वा न्यासेऽपि इवशब्देनायमर्थः सूच्यते। इह भ्राजेर्ऋदित्वमनुदात्तेत्त्वमात्रफ
लम्। भ्राजभासेत्यादिना चङ्परे णावुपधाह्रस्वस्य विकल्पितत्वात्। अबिभ्रजत्। अबभ्राजत्। अत्र रेजिरपि कश्चित्पठ्यते तदनार्षम्। रेजते अग्ने पृथिवी मखे
भ्यः इत्यत्र राजतेश्छान्दसमेत्वमिति भट्टभास्करोक्तेः। क्रुच शब्दे। अयं गताविति स्वामी। ज्वलादौ तुदादौ णार्थो युजादौ। ग्लुञ्चु षस्ज गतौ। आत्मनेपद्य
पीति। हेतुमति सूत्रे यदभिप्राये ससज्जत इति भाष्यप्रयोगादिति भावः। गुजि अव्यक्ते शब्दे। अयमादिदपीति शाकटायनादयः। गुञ्ज शब्द इति
तुदादौ। अर्च पूजायाम्। अयं युजादौ स्वरितेत्। इह पाठस्तु कर्तृगे फलेऽपि परस्मैपदार्थः। शाकटायनस्त्वयमात्मनेपदीत्याह। प्रयोजनं त्वकर्तृगे
त पिँलेतङ्। एतच्च सर्वमिहैव माधवेनोक्तम्। युजादौ तु तेनैवात्रत्यस्वग्रन्थविपरीतमुक्तं तत्र परिनिष्ठितरूपे विवादाभावेऽपि तद्व्याख्यानो दुर्वार
एवेति ध्येयम् ॥

स्य तरमस्तु एवञ्च भ्राजभासेति सूत्रे भ्राजिग्रहणमास्तु धातुभेदेन रूपद्वयसिद्धेरित्याहुः ॥

समानाश्रयत्वमिति। समानकार्यिकत्वमित्यर्थः। इदं स्वरूपकथनं न तु समाननिमित्तकत्वमित्यर्थः। विभिन्ननिमित्तकेऽपि द्यायेत्यादौ बहुशः प्रवृत्तिदर्शनादिति बोध्यम्। संवीतिरिति। असञ्ज्ञायाङ्क्तिन्नन्तम्। सञ्ज्ञायां स्त्रीलिङ्गे भावादौ समजेति क्यपा भाव्यमिति बोध्यम्। यङ् न स्यादिति। हलादित्वाभावात् धात्वन्तरस्यत्वेन तत्समानार्थस्यार्धधातुके प्रयोग एव नास्तीति भावः। इदञ्चार्धधातुक इति सूत्रे भाष्ये स्पष्टम्। विषयत्वापहारादिति। ज्ञानविषयत्वापहारादित्यर्थस्तदाह। नार्धधातुकाभिव्यक्तिरिति। प्रत्ययलक्षणन्तु

पुच्छ प्रमादे। पुच्छतीति। अन्तरङ्गत्वात्तु किअलघूपधत्वान्न गुणः। न च वार्णादाङ्गम्बलीय इति वाच्यम्। यत्राङ्गवार्णयोर्युगपत्प्राप्तिः समानाश्रयत्वञ्च तत्रैव तस्येति कैयटादिभिः सिद्धान्तितत्वात्। इह च वैपरीत्यात्। उञ्छे इति। उञ्छतीति सूत्रे उच्चिनोतीत्यर्थः इति न्यासः। बदराण्युञ्छति। बादरिकः श्यामाकानुञ्छति श्यामाकिक इत्युदाहरतोऽपि त्रिस्वरस्यापि व्यापित्वेनोच्चयनार्थत्वमेवाभिप्रेतम्। भ्रज भ्रजि। पञ्चैते तवर्गचतुर्थादयः। तरङ्गिणीकारादयस्तु आद्यौ दन्त्योष्ठ्यादी इत्याहुः। तर्ज भर्त्सने। अपमृत्युराद्यामपि। अजेर्वी। दीर्घान्त आदेशः। ह्रस्वान्तपाठे तु संवीतं संवीतिरित्यादि न सिध्येत्। आर्धधातुके विषये इति। तेन प्रत्ययोत्पत्तेः प्रागेव वीभावे हलादित्वाद्यङि वेवीयते इत्यादि सिध्यति। परसप्तम्यान्तु यङ् न स्यादिति भावः। यङ्लुक्त्वस्मान्न भवति। यतो लुका यङः आर्धधातुकस्य विषयत्वापहारान्नार्धधातुकाभिव्यक्तिरिति वीभावस्यैव प्रसङ्गः। एतच्च न लुमतेति सूत्रे कैयटे स्पष्टम्। कृसृभृ। डुकृञ् करणे। कृञ् हिंसायाम्। द्वयोरपि ग्रहणम्। एवं भृ इति भरति बिभर्ति। वृ इति वृङ्वृञोः। इह कृसृभृवृ एषां एकाच उपदेश इति प्रकृत्याश्रयेण निषेधे प्राप्ते वृङ्वृञोस्तु श्र्युकः कितीति प्रत्ययाश्रये प्राप्ते नियमोऽयमित्याह। क्रादीनाञ्चतुर्णामिति ॥

ॐ न लुमतेति निषेधात् द्वयोरपीति। व्याख्यानादिति भावः। नियमोऽयमिति। अष्टानामपि नियमार्थत्वन्तु न। तुष्टोथेत्यादौ भारद्वाजनियमेनेडापत्तेः। सवनेष्ट इति नेड् शीत्यत्र भाष्ये स्पष्टं नियमाद्विधेर्बलवत्त्वाच्च। कृसृभृवृ इति च लुप्तषष्ठीकं एकपदं क्रादिषु चतुर्षु विनिगमनाविरहेण सर्वेषामेव नियमार्थत्वम् ॥

नञ्प्रापितस्यैवेति। क्रादिषु तस्यैव प्राप्तेरिति भावः। एकमेवेति। अतएवोपदेशेऽत्वत इति सूत्रे नित्यानिट इत्यस्यार्त्तिर्व्यावर्त्त्यत्वेन भाष्ये उक्तः। अन्यथा तद्भावे क्रतो भारद्वाजस्येति विकल्पः तत्सत्वेप्यूदित्वप्रयुक्तविकल्पस्यैव सत्वेन तदसङ्गतिः स्पष्टैव। न तु क्रादिनियमेन तत्सत्वे नित्य इडिति विशेषोऽस्त्येवेति इदमेव मतं युक्तमिति भावः। विपरीत इति। अष्टानामपीति शेषः। अतएव स्तुत इति निर्देशप्रदर्शनमग्रे। न च क्रतो भारद्वाजस्येति नियमप्रापितस्येटो निषेधाय क्रादिग्रहणं विध्यर्थमिति वाच्यम्। तथाहि सति स्तुद्रुस्रुश्रुक्रतो

निषेध इति। नेड्वशीति प्रक्रमात् नञा प्रापितस्यैवाभावस्यायं नियमो न तु विभाषाबललभ्यस्यापि। तेन सिषेधिथ। सिषेद्ध। सिषिधिव। सिषिध्वेत्याद्युभयं भवति। केचित्तु यावान्कश्चिदिडभावः प्रतिषेधनिबन्धनो विकल्पनिबन्धनो वा स सर्वो बाध्यत इति मन्वानाः सिषेधिथेत्यादि एकमेव रूपं न त्वनिट्कमपीत्याहुः। ननु विपरीत एव नियमोऽस्तु। क्रादिभ्य एवेण्न तर्हि लिट्येवेति। मैवम्। कृते ग्रन्थे तमधीष्टो भृतः। परिवृतो रथः। स्तुतस्तोमयोरित्यादिनिर्देशविरोधापत्तेः। स्यादेतत्। अस्तु प्रकृत्याश्रयस्य नियमः प्रत्ययाश्रयस्तु न संभवति। वृग्रहणस्य वैयर्थ्यात्। अप्राप्तनिषेधप्रापकत्वात्। न ह्यत्र प्रकृत्याश्रयः प्राप्नोति। वृञ उदात्तत्वात्। नापि प्रत्ययाश्रयः। थलोऽकित्वात्। एवञ्च बभूविवेत्यादौ श्र्युकः कितीति निषेधो दुर्वार इति चेत्। मैवम्। बभूथाततन्थजगृभ्मववर्थेति निगम इति सूत्रेण छन्दसि ववर्थेति निपातनात्। भाषायां वृञस्थल इटः स्वीकर्त्तव्यतया वृग्रहणस्य थल्विषयत्वायोगात्। वमादीनाञ्च कित्वेन नियमस्य सुस्थत्वात्। अचस्तास्वत्। उपदेश इति। एतच्चोत्तरसूत्रादिहापकृष्यते। नित्यग्रहणमनिटो विशेषणम्॥

भारद्वाजस्येत्येव पठेदिति भावः। विरोधापत्तेरिति। किंच कृञादीनामनुदात्तपाठवैयर्थ्यापत्तिरित्यपि बोध्यम्। न संभवतीति। वृङमादाय तत्संभवेपि वृञमादाय विधेः संभव इति भावः। अपकृष्यत इति। एतच्च क्रतो भारद्वाजस्येति सूत्रे स्पष्टम्। तदपकर्षे च धेडादेर्दधिथेत्यादिसिद्धयेऽज्ग्रहणम्। एतेनोपदेशे एजन्तानामात्वविधाने नैजन्तास्वरत्रस्य लोः संभवेन कृग्रहणमेव युक्तमित्यपास्तम्॥

अपेक्षायामिति। अजन्तस्य धातोः प्रयोगमात्रावच्छेदेनेडभावाप्रसिद्धेस्तथापेक्षेति भावः। एवं थल्यपीति तेन तासौ दृष्टस्येडभावस्य थल्यतिदेशः। तेनादेर्घस्लादेशे जघसिथेत्यत्रोचसिथेत्यत्र च नित्यमिट्। न चानयोस्तासेरभावेन विशेषणाभावप्रयुक्तो विशिष्टाभावोऽस्त्येवेति वाच्यम्। तादर्थ्ये सेत्यतस्तासीत्यस्यनड्व इत्यतो नञ्श्चानुवृत्त्यैव नासिनित्यानिटस्थलीण्वेत्यर्थेनैव सिद्धे तास्वदित्यनेन यस्य तासाविडभावो दृष्टस्तस्यैव थल्यतिदेशान्न दोषः। स्थानिवद्भावेन तु न तासौ नित्यानिट्त्वातिदेशोऽशास्त्रीयत्वात्

क्व नित्यमनिडित्यपेक्षायान्तासेः सन्निधानात्तत्रैवेति विज्ञायते। तासि च क्लृप इति सन्निहितं वानुवर्त्तत इत्याह तासौ नित्यानिडिति। तास्वदिति सप्तम्यन्ताद्वतिः। यथा तासौ न भवति एवं थल्यपीत्यर्थः। नित्यमनिटः किम्। दुधविथ नायं तासौ नित्यमनिट्। स्वरत्यादिना विकल्पितेट्त्वात्। अस्य थलि नित्यमिडिति काशिका॥ एतच्च विकल्पनिबन्धनस्यापीडभावस्य क्रादिनियमेन निवृत्तिरिति पक्षे बोध्यम्। निषेधनिबन्धनस्यैवेति पक्षे तु नित्यग्रहणाभावे स्वरतेस्थलीड्विकल्पो न स्यादिति बोध्यम्। किं च। उत्तरार्थमपि नित्यग्रहणम्। तेन क्रमेरपि चक्रमिथेति भवति। न हि क्रमिस्तासौ नित्यानिट्। स्नुक्रमोरनात्मनेपदनिमित्ते इति वचनात्परस्मैपदे सेट्कत्वात्। उपदेश इत्यपकर्षस्य फलन्तु भारद्वाजसूत्रे स्फुटीभविष्यति। उपदेशेऽत्वतः। उपदेशे किम्। क्रष्टा चकर्षिथ। अत्वतः किम्। भेत्ता। बिभेदिथ। तपरकरणं किम्। राद्धा। रराधिथ। तासौ किम्। जिघृक्षति। जग्रहिथ। नित्यानिटः किम्। अञ्जा। अञ्जिता। आनञ्जिथ। चक्रमिथ। ऋतो भारद्वाजस्य। दीर्घान्तेषु तावन्नायं निषेधः। ऋत इति तपरकरणात्। ह्रस्वान्तेषु अचस्तास्वदित्येव सिद्धः। वृङ्‌वृञौ यद्यपि सेटौ तथापि वृङः स्थल् नास्ति। आत्मनेपदित्वात् ॥

इति भावः। थलि नित्यमिडिति। नित्यग्रहणाभावे भारद्वाजनियमेन विकल्पः स्यादिति भावः। इति पक्षे त्विति तुना वृत्तिविरोधादयं पक्षोऽयुक्त इति सूचितम्। अत्वतः किमिति। अत्वतस्तास्वत्थल्यनिटो नित्यमुपदेशे इत्येव कार्यमिति प्रश्नः। अजन्तात्वभिन्नोज्ज्वान् व्यावर्त्य इत्युत्तरम् ॥

ड्दाभाव्यमिति। न च क्रादन्तेषु विकल्पेन निषेधार्थमिति वाच्यम्। अचस्तास्वदिति सामान्यसूत्रप्रणयनेन भारद्वाजातिरिक्तैरृदन्ते निषेधस्यैवाङ्गीकारेण स्मृत्यन्तरानुसन्धानदाराविकल्पस्य क्रमप्राप्तत्वादिति भावः। तस्येति। उपदेशेऽत्वतस्तस्येत्यर्थः। इडेति। ऋतइतिसूत्रे। एवञ्चैतस्य इट्सम्बन्धवान्यदिण्निषेध इत्यर्थादुक्तार्थलाभ इति भावः। इदमत्रेरजस्तु छन्दसि ववर्थेति निपातनाद्भाषायामिडाभाव्यम्। न च हन्नादिषु परत्वान्नित्यत्वाच्च गुणे रपरत्वे चकृतेः नजन्तत्वादचस्तास्वदित्यस्याप्रवृत्तिरितिवाच्यम्। तत्रोपदेशग्रहणस्यापकर्षणात्। तस्मान्नियमोऽयमित्याह। ऋदन्तस्यैवेति। स्यादेतत्। स्तुद्रुस्रुश्रुवामपि थलि भारद्वाजनियमादिट् स्यात्। न च क्रादिसूत्रे स्त्वादीनाञ्चतुर्णां ग्रहणेनास्य बाध उचितः। येन नाप्राप्तिन्यायेन क्रमादौ क्रादिनियमप्रापितस्यैव बाधौचित्यादित्याशङ्क्याह। न चेति। न चैवमुपदेशेऽत्वतइत्स्यैव बाधः स्यात्। क्रादन्तेषु तस्य प्रसङ्ग एव नास्तीति यदि तर्ह्यचस्तास्वदित्यस्यैव स्यात्तत्कथं योगद्वयप्रापितस्येत्युक्तम्। अत्राहुः। द्वयोरनन्तरमस्यारम्भाद्बाधज्ञासोऽनिटस्य थलोऽण्निषेधः स भारद्वाजस्य मते ऋकारान्तस्यैवेति व्याख्यानात्त्वैष्टसिद्धिरिति। एवञ्चेह तास्वत्थल्यनिटो नित्यं स। सीत्यनुवर्त्तत इति फलितोऽर्थः। यद्वा। क्रादिसूत्रे स्तुप्रभृतीनां ग्रहणमेव इड्द्वयस्यापि बाधकमस्तु। पुरस्तात्प्रतिषेधकाण्डकरणसामर्थ्यात्। अनाश्रितविधानविशेषमिण्मात्रमनारभ्याधीतेन प्रतिषेधेन यथा बाध्येतेत्येतदर्थं हि तत्। पक्षद्वयमपीदमाकरे स्थितमिति मूलेऽप्युपनिबद्धम्। खज मन्थे। अत्र केचित् कजमद इति पठन्ति। राज् कम्पने। दीप्तौ त्वात्मनेपदी गतः। टुओस्फूर्जा। द्वितोऽथुच्। स्फूर्जथुः। ओकारो निष्ठानत्वार्थः। स्फूर्णः स्फूर्णवान्। आदितश्चेत्यनिट्त्वम्। स्फूर्णं स्फूर्जितं वानेन। विभाषाभावादिकर्मणोरिति वेट्॥ ॐ इह सूत्रे भाष्ये ध्वनितम्। इड्द्वयस्यापीति। क्रादिनियमभारद्वाजनियमप्रापितस्यापीत्यर्थः। अनाश्रितेति। न आश्रितो विधानविशेषो येन नाप्राप्तिरूपो यस्य तदित्यर्थः। इण्मात्रमिति। अनन्तरमनन्तरत्वेत्यर्थः। अनारभ्याधीतेनेति। विधिमनारभ्याधीतेनेत्यर्थः। इदं च सेकाजाहुसामित्यत्र भाष्ये स्पष्टम्। तदाह। पक्षद्वयमपीति। मूलेपीति। तत्रास्य क्रादिसूत्रे आद्यो नेति बोध्यम्॥

मर्दनेचेति।मर्दनंत्विचविकारविशेषः।गन्धात्तुमर्दिताग्रहणात्त्वग्इतिप्रथमनिबन्धः।अग्रेपुरस्तात्परिपरिमाणेपलस्यच।आलम्बनेसमूहेपक्षान्तेऽस्यामङ्गुंस्कम्।अधि
अस्यदीर्घानिर्देशोनोपधायाश्चेतिदीर्घस्यानित्यत्वज्ञापनार्थः।इतिकुर्वन्ति।त्युपिभवतीतिकेचित्।क्षिक्षये।अस्याजन्तेऽपाठः।चतः।क्षिनिवासगत्योरिति
तुदादौक्षिपूहिंसायामितिक्र्यादौक्षिणुहिंसायामितितनादौ।बोपदेवस्तुक्षिक्षयैश्वर्ययोरितिभ्वादिम्।क्षिपूहिंसायामितिस्वादिंवैदिकंज्याह।लजलजि।लज्या
त्।लज्यात्।ओलजीओलस्जीव्रीडनेइतितुदादौ।लजप्रकाशनइतिकथादौ।लज्जीतिपटपुटादिदण्डकेभाषार्थः।तुजिपालने।भाषार्थोयंचुजादौ।गजगजि।
गजमदनेचअयंचुरादावपिशब्दार्थः।गर्जशब्देइत्यग्रे।वजव्रज।ववजतुः।वव्रजतुः।अद।दोपंधइति।तथाचनन्द्राद्इतिद्वित्वनिषेधात्इकारंविहायटिशब्दस्य
द्वित्वेदकारस्यष्टुत्वेचर्त्वेच।अट्टिटिषते।आट्टिटदित्यादिसिध्यति।नचपरत्वात्प्रागेवष्टुत्वम्।असिद्धत्वात्।यदाहुः।पूर्वत्रासिद्धेनास्तिविप्रतिषेधोभावादुत्त
रस्येति।नचान्तरङ्गत्वात्ष्टुत्वंस्यादेवेतिवाच्यम्।सत्यपितस्मिन्शास्त्रासिद्धतयादकारएवायमितिबुद्ध्याद्वित्वनिषेधात्।नचपूर्वत्रासिद्धीयमद्वित्वेइतिनि
षेधःशङ्क्यः।द्वित्वेहिसः।नतुद्वित्वनिषेधेपीतिभावः।तोपधइति।तथाचपूर्वत्रासिद्धीयमद्विर्वचनइतिष्टुत्वस्यासिद्धत्वात्दकारद्वयसहितस्यद्वित्वेहलादिशे
षेअटिट्टिषते।आटिट्टदित्यादिसिध्यतीतिभावः।अयमनादरेचुरादिः।घट्टचलने।अयंचुरादावपि।स्फुट।अयंकुटादावपि।विशरणार्थोग्रेपरस्मैपदि
षु।भेदनार्थश्चुरादौ।चटिएकचर्यायाम्।एकचर्याअसहायगमनम्।वण्ठरण्डाकल्पइतिइङश्चेतिसूत्रेभाष्यम्।अयमनिदित्स्यौत्स्यार्थः।परस्मैपदिषु।
मठिकठिशोके।मठमदनिवासयोः।कठकृच्छ्रजीवनेइत्यग्रेपरस्मैपदिषुनिर्दिष्टौ।कठशोकइतिचुरादौ।हिठविबाधायाम्।अमुंपरस्मैपदिष्वपिपठन्ति।वि
बाधनंशाठ्यम्।कुडिदाहे।वैकल्प्यार्थःपरस्मैपदिषुपठिष्यते ॥ ७ केचप्रधानेचप्रथमेचाभिधेयवदितिमेदिनी।इङश्चेतिसूत्रेइति।सूत्रविषयइत्यर्थः।
परिमाणाख्यायामितिसूत्रेइङश्चेतिसूत्रमुपादायनञ्— यमिङःकृएववण्ठरण्डाकल्पइतिभाष्योक्तेरेवमुक्तम्।विबाधनमिति।विबाधेतिभावेप्रत्ययइतिभावः ॥

द्विःपाठस्येति।हुडिसङ्घातइतिपूर्वंपाठात्।व्यवहारइति।वश्प्रत्याहारस्येतिशेषः।सवृद्धिकेति।निसंवृद्धिपुतस्येत्यर्थः।एतदुपपादितुम्।पठत्यन्तादिति।अतहुणसंविबाल्यार्थःकुटादौ।रक्षणार्थश्चुरादौ।वडिविभाजने।मडिच।अत्रद्वितीयोवेष्टनेपि।अतएवपृथक्पठितः।मडिभूषायामित्यग्रेपरस्मैपदिषु।णौहर्षेच।भडिपरिभाषणे।कल्याणार्थश्चुरादौ।पिडि।अयञ्चुरादावपि।मुडिखण्डनार्थःपरस्मैपदिषु।तुडि।अयमनिदित्परस्मैपदिषु।हुडि।वरणंस्वीकारः।स्फुडिविकसनइत्येकेपठन्ति।अयुक्तंचैतत्।हुण्डेर्द्विःपाठस्यवैयर्थ्यात्।वरणसङ्घातयोरितिपाठस्यैवोचितत्वात्।चडिकोपे।अयंचुरादावपि।शडि।तालव्योष्मादिः।शण्डोसुरपुरोहितः।पडिगतौ।नाशनार्थश्चुरादौ।कडिमदे।भेदनेचुरादिः।अनिदिदिहैव।तुदादौचपरस्मैपदी।खडिमन्थे।खुडिइत्येके।खडिभेदनेइतिचुरादौ।हेडृहोडृ।हेडवेष्टनेइतिघटादौ।होडृगतावित्यग्रेपरस्मैपदी।बाडृ।बशादिरिति।पवर्गीयेणैववृत्तिकृताव्यवहारोनतुदन्त्योष्ठ्येन।तथासतियावत्यालाभात्।वेशाद्युक्तिर्यथास्यात्।शाडृ।डलयोरैक्याच्छालतेइतिकाश्यपः।अतएवमैत्रेयेणशालोशालेसुदाहृतौ।शौइहवर्गे।अस्योणादिषुड्रन्वक्ष्यते।तदेतदति।शौडीर्यमौडुलोमेर्नमृष्यतीतिकल्पतरुः।यौटृबन्धे।यणादिः।कटे।अयमनेदिदग्रे।किटखिटत्रासे।त्रासोभयोत्पादनम्।किटिर्गतौपठिष्यते।इहपाठस्त्वर्थभेदात्।केचिदिहनपठन्ति।चटेइत्येके।जटझट।जेटतुः।जझटतुः।नटनृत्तौ।णोपदेशोयम्।नत्पर्युदासेन।टीतिसवृद्धिकनिर्देशेनावश्यदर्शनार्थस्यचौरादिकस्यैवग्रहणात्।हटदीप्तौ।हाटकम्।सञ्ज्ञायाञ्चेतिण्वुल्।बाहुलकात्स्त्रियामपि।षट।सटा।अजन्तात्टाप्।लुटविलोडने।अयन्दिवादावपि।भाषार्थश्चुरादौ।प्रतिघातेचुतादौ।स्तेयार्थःपरस्मैपदिषु।डान्तोयमित्येकइति।यद्यपीतःप्रभृतिपठन्त्यन्ताएवर्मतृतीयान्ताइतिकौशिककाश्यपादयोवदन्तितेचास्मादनन्तरंपिडिहडीतिपठन्ति।तथापिपिटकहाटकचेटीविटप्रभृतिषुटवर्गप्रथमस्यैवप्रसिद्धत्वाद्ग्रन्थान्तरेतन्मतमुपेक्षितम्।चिट।इन्।चेटिः।कृदिकारादक्तिनइतिङीष्।चेटी।विटः।इगुपधलक्षणःकः।विटःप्रश्लिष्येति।उदाहरन्तीतिवक्ष्यमाणेनसंबध्यते।इयतुरिति।द्वित्वेकृतेएरनेकाचइतियणंबाधित्वान्तरङ्गत्वात्सवर्णदीर्घः ॥ ७ ज्ञानोबहुव्रीहिः ॥

ततइयङिति। अचिश्नुधातुइत्यनेन। अभ्यासस्येतितु न। तस्य प्रत्यासत्त्योत्तरखण्डावयवाच्परत्व एव प्रवृत्तेरिति भावः। स्थानितयेति। समानकार्यिकत्वमेव समानाश्रयत्वं नतु समाननिमित्तकत्वम्। इयायेत्याद्यसिद्धेरिति भावः। अतएवेति। अनेन पूर्वमतस्यायुक्तत्वं ध्वनयति। असवर्णेति। तद्धि तत्सूत्रारम्भसामर्थ्यादित्यर्थः। तेन ह्यभ्यासस्य तत इयङ्। केचित्तु वार्णादाङ्गं बलीय इति दीर्घं बाधित्वा यण्। न चेह समानाश्रयत्वं नास्तीति वाच्यम्। अभ्यासोत्तरस्य इकारस्य सवर्णदीर्घयणौ प्रति। स्थानितया तयोः समानाश्रयत्वात्। अतएव दीर्घ इणः कितीति दीर्घो विधीयते। न तु णल्यलोः अभ्यासस्येयङ् दुर्लभः। तस्मिन्कर्तव्ये ऽचः परस्मिन्निति वृद्धिगुणयोः स्थानिवद्भावेनासवर्णे इति प्रतिषेधादिति चेन्नैवम्। असवर्णग्रहणसामर्थ्यादेव स्थानिवत्त्वस्याप्रवृत्तेः। ननु नास्ति सामर्थ्यम्। इयर्ति। इयृत इत्यादौ सावकाशत्वादिति चेन्मैवम्। नह्येकमुदाहरणं योगारम्भं प्रयोजयति। अन्यथा हि अभ्यासस्यानीविति ब्रूयात्। अकृत्सार्वेति दीर्घः। ईयात्। मडि भूषायाम्। मण्डते इति विभागे गतम्। कुडि। टवर्गतृतीयान्तः। प्रथमान्त इत्येके। मुठाडान्त इत्येके। पकारादिडान्तश्चेत्यन्ये। क्षीरस्वामी तु द्वावपि इदितौ पपाठ। चुडि। चुडेति दुर्गः। तुड तोडने। तोडनं दारणं हिंसनञ्च। गडिवदेकदेशे। टवर्गीयप्रकरणादिहायं न्याय्य एव। अनन्त्यादिषु पक्षेषु तेन तिङि पयादिति केषाञ्चिन्मतं मुत्वादयितुं इति कुड्डिरूपन्यस्तः। लिङ्सिचावात्मनेपदेषु। अत्रात्मनेपदग्रहणं सिचो विशेषणं न तु लिङः संभवात्। तदाह। आत्मनेपदपरः सिजेति। नष्टकम्भने च। अस्य पूर्वत्रपाठस्य कुं शक्यः। केचित्तु पूर्वत्रादिष्टदेष्ट इति पठन्ति। केष्ट। मतौ चेति पृथक्पाठसामर्थ्यादिदित्वं लभ्यत इति स्वामी। मेष्टरेष्टलेष्ट गताविति। अयं पाठः स्वामिनः। मैत्रेयस्तु नेष्टलेष्टसेचने। रेष्टप्लव गतावित्याह। हेष्टपेष्ट इत्यपि केचित् ॥ ७ ॥ कार्यं तदुत्तरखण्डादेशस्य तत्कार्यं प्रति बन्धकीभूतं स्थानित्वं नेति ज्ञाप्यते। तत एवारिरिप्रियादिस्तत्र स्थानिवत्त्वेनेयङ् भवत्येव। तस्याभ्यासकार्यं प्रति बन्धकत्वाभावादिति भावः। अभ्यासस्यानीविति। यङ्लुकि तु गति पाशपेति निषेधान्नित्यत्वान्न दोषः। वस्तुतस्तु रित्यस्य वक्तव्यं योगे त्वनुवर्तते। तेयणिति साहचर्याद्व्याख्यानाच्च ऋधातोरेव ग्रहणम्। अर्तेरिवर्णस्येयङित्यर्थ इत्युचितम्। विसर्जस्त्वत्र द्रष्टव्यः। असम्भवादिति। तस्यात्मनेपदपरत्वासंभवादित्यर्थः ॥

भट्टभास्करइति।अस्येत्रुत्रीण्यम्बकानिनेत्राणियस्येतिलक्ष्यतिमाहुः।उचितमिति।पद्लाघवादितिभावः।परन्तुनक्तमनुदात्तङितइत्यादौतदनुवृत्तयेधातोःकर्मणइत्यादौधातुपदार्थसन्देहनिवृत्तयेचेतिशेषः।उपदेशग्रहणानुवृत्त्येति।एकदेशेस्वरितत्वप्रतिज्ञानादितिभावः।तन्त्रकस्योपदेशइत्याकाङ्क्षायामुपस्थितत्वादार्धधातुकइत्येत्रविभक्तिविपरिणामेनसंबद्ध्यतेइतिबोध्यम्।वार्त्तिककृतेति।स्वस्तिच्सूत्रेवधभावात्सौपुटिचिण्वत्त्वविप्रतिषेधेमेतिवदितेत्यर्थः।अन्यथाआदेशानामन्तरङ्गत्वेनविप्रतिषेधासङ्गतिः स्यादितिभावः।रविलवि।अवि अम्बाशब्दः।त्रयःशब्दाअकारोकारमकाराःप्रतिपादकाअस्येतित्र्यम्बकइतिभट्टभास्करः।अभिरभीइति।अमुन्।अभ्यः।तस्यापत्यम्।आभिर्भीषः।अभ्यासलोपश्चेतिबाह्वादिपाठादिञ्लोपः।तद्धोजन्त्विति।पूर्वसवर्णोषत्वाप्रवृत्त्यप्रवृत्तिबीजमित्यर्थः।जभीजभी।आद्यइदिति।जभ्यम्।जृम्भिर्विनाशार्थेचुरादौ।भवार्थेपरस्मैपदिषपिकेपितसमाद्यन्ताः।सन्क्यच्काम्यच्क्यङ्क्यषोयाचारक्विप्णिच्यङ्गतथा।यगायईयङ्णिङ्चेतिद्वादशामीसनादयः।भूवादयइत्यस्यानन्तरंसनाद्यन्ताइतिनसन्निहितम्।सनादीनामियत्नायाअलाभापत्तेः।सनाद्यन्ताइत्यस्यानन्तरंभूवादयश्चेतिपठितुमुचितम्।कास्प्रत्ययात्।अच्छन्दसीत्येवनोक्तम्।ब्राह्मणेप्यप्रदृष्टत्वात्।अथाहमुनरशोपईसान्त्वको।पुत्रानामन्त्रयामासेत्यादि।अतोलोपः।आर्धधातुकेत्यादि।एतच्चानुदात्तोपदेशेत्यादिसूत्रादुपदेशग्रहणानुवृत्त्यालभ्यते।तत्फलन्त्वयपययगतौ।आभ्यांक्विपिलोपोव्योरितिलोपेअलोपाभावः।अतयत्।नन्वेवंवध्यादित्यादावतोलोपोनस्यात्।आर्धधातुकइत्यस्यविषयसप्तमीत्वेपिलिङ्लुङ्गित्यादीनांपरसप्तमीत्वस्यवार्त्तिककृतास्वीकारात्।वधादेशस्यादन्तत्वाच्चेतिचेत्सत्यम्।अतएवापरितोषाद्भाष्यकृतालिङित्यादीनामपिविषयसप्तमीत्वंस्वीकृतम्॥ ४७ लिङीत्यादिविशेषनिर्देशेनाविशेषणार्द्धधातुकइत्यस्यापिपरसप्तमीत्वमेव।विशेषनिर्देशाभावेएवत्वस्तेर्भूरित्यादौविषयसप्तमीत्वमार्द्धधातुकेइत्यस्येतिस्यसिच्सूत्रेकैयटएवस्पष्टम्।भाष्यकृतेति।एकाचउपदेशइतिसूत्रेइतिशेषः।तत्रहिएवमुक्तंवधइट्प्रतिषेधःप्राप्नोतिवधिषीष्टमैवदोषः।आद्युदात्तनिपातनस्वरःप्रकतितःप्राप्तस्वरस्यबाधकोभविष्यति।एवमप्युपदेशिवद्भावोवक्तव्यःयथैवतन्निपातस्वरःप्रकृतिस्वरंबाधतेएवंप्रत्ययस्वरंप्रयुक्तनिघातमपिबाधेत।नैषदोषः।आर्द्धधातुकीयाःसामान्येनभवन्ति।वस्तुतोवार्त्तिकमतमप्येवमेवविप्रतिषेधस्तुयथातथास्तिने

तदाह।विस्तरइति।कौस्तुभे।बौद्धेषाष्ठे।पणायामिति।तन्नायप्रत्ययान्ताद्प्रत्ययेटापिव्यवहारमित्यर्थः।नेतिवाच्येइति।णिलोपोनेत्यर्थः।अचकाङ्क्षदिति।प्रत्ययस्याङ्गं शेऽर्थितकाङ्क्षत्वेनतदन्वयस्यैवौचित्याच्चङ्परेणावितिनाचोविशेषणमितिभावः।सनियइति।सतियइत्यर्थः।इद्ज्ञत्सोतिण्योरित्यत्रकैयटेस्पष्टम्।तन्नेति।गुणानाञ्च एतच्चभावकर्मप्रक्रियायांस्फुटीकरिष्यते।विस्तरःशब्दकौस्तुभेबोद्ध्यः।जयादित्यादिमतमाह।स्तुतावेवायप्रत्ययइति।भट्टिस्तुव्यवहारेप्ययंप्रयुङ्क्ते। नचोपलेभेवणिजांपणायामिति।अयामन्ता।नेतिवाच्येअयादेशवचनंत्यपिलघुपूर्वादित्येवमर्थम्।प्रस्तनय्य।नह्यत्रगुणायौलभ्येते।आम्।कारयामास। अन्तः।गण्डयन्तोमण्डयन्तः।औणादिकोझच्।झोन्तः।आलुच्।स्पृहयालुः।स्पृहिगृहीत्यादिनाआलुच्।आय्येत्नूउणादिषुवक्ष्यते।स्पृहयाय्यः।स्तनयित्नुः।इष्णुः। पारइत्येव।णेश्छन्दसीतिइष्णुच्।णेरिति।णिङ्चोःसामान्यग्रहणम्।एवमग्रेपि।वार्त्तिकस्योक्तिसंभवमाह।णिलोपस्येति।क्तिजन्तमिति।तन्नतितुत्रेतीणिन षेधादितिभावः।आर्द्धधातुकमात्रमिति।मात्रशब्दःकार्त्स्न्ये।क्तिज्भिन्नमपीतिभावः।णौचङि।उपधायाः।किम्।अचकाङ्क्षत्।सन्यतः।तपरकरणङ्किम्।पापच्यते।सन्। पापचिषते।यत्तुवदन्ति।सनियोभ्यासःसन्निमित्तइतिविज्ञानादत्राप्रसङ्गइति।तन्न।अधीषिषते।प्रतीषिषतीत्यादावव्याप्तेः।नहिकार्यीनिमित्तत्वेनाश्रीयते।अरिरिष तीष्यादावतिव्याप्तेः।नन्वेवम्पिपक्षतीत्यादावव्याप्तिः।अभ्यासस्यसन्परत्वाभावात्।नचयेननाव्यवधानन्यायेनसन्प्रकृत्याव्यवहितेपिप्रवृत्तिरितिवाच्यम्।प्रतीषिषतीत्यत्रैवाव्यव धानसंभवादितिचेन्नैवम्।सनाधातुमाक्षिप्यसनिसतियोधातुस्तदन्तस्तदीयाभ्यासस्येतिव्याख्यानात्।नचोक्तव्याख्यानेप्रमाणाभावः।तपरकरणस्यैवतत्रप्रमाणत्वात्।किञ्च।अ कारग्रहणमपितत्रमानम्।अन्यथासनइत्येवब्रूयात्।एवं स्थितेजगद्दानदधानादिशब्देभ्यःआचारक्विबन्तेभ्यःसनिकृतेइत्वंभवत्येव।पापच्यतेःसनीत्वप्राप्तिंसोढ्वास्यतपरक रणबलेनेत्वंवारयद्भिर्हरदत्तादिभिस्तत्स्वीकारात्तत्रस्वरसाच्च॥ ७७ परार्थत्वादितिन्यायेनसनीत्यस्यसाक्षादनुवाद्येऽन्वयेसंभवतिअश्रुततद्विशेषणेऽन्वयायोगादितिभावः।दूषणान्तरमा ह।अधीषिषतीत्यादि।अभ्यासस्येति।अभ्यासाकारस्येत्यर्थः।अव्यवधानसंभवादिति।एवञ्चपापचिषतइत्यादावपिनप्राप्तिरितिभावः।सनइत्येवेति।अलोन्त्यस्येत्सनेनान्त्यस्येतिभावः ॥

भाष्योक्तेश्चेति। नन्वेवं व्याख्यानेऽपि प्रत्यासत्त्यासनन्तत्वप्रयुक्ताभ्यासस्येत्यर्थानयन्तात्सनि दोषः। किञ्च तपरत्वाभावेऽस्येत्युक्तौ न लाघवम्। किञ्च यथालक्षणमप्रयुक्ते इत्यस्याप्रयुक्ते लक्षणाभावस्यैव योग्यता न तु लक्षणस्येति अर्थ इति बहुशः कैयटेन व्याख्यानादस्यैवार्थस्य युक्तत्वाच्च। जगदादिभ्य आचारक्विबन्तेभ्यः सनो नभिधानमेवोचितम्। अपि च सन्यरो योऽभ्यासाकारस्तस्येति व्याख्यानेऽपि यङो लोपस्थानित्वात् यङन्तात्सनि दोषः। अपि च सन्निमित्ताभ्यासस्येत्यर्थेऽपि स्तौतिण्योरिति सूत्रेऽधीषिषतीति प्रयोगादत्र सूत्रे न हि का

यथालक्षणमप्रयुक्ते इति भाष्योक्तेश्चेत्यास्तां तावत्। दीर्घो लघोः। लघोरभ्यासस्येति व्यधिकरणे षष्ठ्यौ अभ्यासावयवस्य लघोरित्यर्थः। न तु समानाधिकरणे असंभवात्। न ह्यऽत्समुदायस्य लघुसञ्ज्ञास्ति ह्रस्वं लघु इति सूत्रितत्वात्। लघुनि चङ्परेऽनग्लोप इति सर्वमिहानुवर्तते तच्च प्राग्वदेव द्वेधा व्याख्येयम्। तदाह। सन्वद्भावविषय इति। एतेन हलादेरिति प्राचोक्तं निर्मूलत्वादुपेक्ष्यमित्यपि ध्वनयति। न हि मुनित्रयोक्तिं विना हलादेरिति पूरयितुमुचितम्। न वा वृत्तिकारादिभिरप्युक्तम्। यत्तु तत्सौत्रेण व्याख्यातं हलादेरित्यर्वाचीनमतेनोक्तमिति। यच्च तेनैव हेतुमण्णौ औन्दिदत्। आड्डिडत् इत्यादिव्याख्यावसरे उक्तं हलादेरित्युक्तेरर्वाचीनमते दीर्घो न। स्वमते तु दीर्घो भवत्येवेति तत्तुच्छम्। औन्दिददित्यादावङ्गलघ्वोरुभयोरपि णिचम्प्रति विशेष्यत्वे दीर्घस्याप्राप्तेः। चङ्परे हि यदङ्गं उन्द् इति न तदीयोऽभ्यासः। न वा चङ्परं णिच्परं यल्लघु तत्परः। एवञ्च स्वमते दीर्घो भवत्येवेत्युक्तिरसङ्गतैव। आटिटदित्यादिभाष्यादिसकलग्रन्थविरुद्धं च। एतेन भाष्योदाहरणमेव हलादेरित्यस्य पूरणे प्रमाणमिति केषाञ्चिदुत्प्रेक्षापि प्रत्युक्ता। दीर्घाप्राप्तेर्वोदाहरणसौष्ठवस्योक्तत्वात्। यदपि वदन्ति। हलादेरिति सामर्थ्याल्लभ्यते। तथा हि। चङ्परे णौ यदङ्गं तस्य योऽभ्यासस्तस्य दीर्घो विधीयते। अजादेस्तु अजादेर्द्वितीयस्येति वचनादङ्गावयवस्याभ्यासो न त्वङ्गस्य। न चावयवावयवः समुदायस्यावयव इति निर्वाहः। तस्यासार्वत्रिकत्वादिति ॥

र्थित्वस्य न प्रवृत्तिरत आह। आस्तां तावदिति। तपरत्वप्रयोजनविचार इति शेषः। सूत्रितत्वादिति। एवञ्च निर्दिष्टस्थानिकत्वादचश्चेति लिङ्गाभावादलोन्त्यस्येति च न प्रवर्तते। परे तु लघ्वन्ताभ्यासस्येत्यर्थे अलोन्त्यपरिभाषया चेष्टसिद्धिरित्याहुः। चङ्परणिच्परमिति। इदमेव व्याख्यानं प्रकृतसूत्रस्थभाष्यकैयटणिश्रीतिसूत्रस्थकैयटारूढमित्यन्यत्र प्रपञ्चितम्। इत्यादिभाष्यादीति। इत्याद्युदाहरणपरभाष्यादीत्यर्थः ॥

अवयवएवेति। ऊर्णुइत्यङ्गन्तदवयवोनुः द्विरुक्तोपि स एवेत्यङ्गावयव एवेत्यर्थः। अयमिति। द्विरुक्तइत्यर्थः। नतु तस्येति। द्विरुक्तनुशब्दस्य द्वितीयो नु इत्यर्थः। उपन्यासार्हमिति। वस्तुतस्तदसार्वत्रिकत्वमप्यसिद्धम्। फलितमिति। तत्र हि पक्षे पूर्वोभ्यास इत्यत्र कार्यविधायकसूत्रस्थाभ्यासपदोत्तरा विभक्तिः पूर्वशब्दोत्तरं कल्प्या पूर्वोभ्यास इति प्रथमासाधुत्वार्था। एकाचोधातो अत्रेदं वक्तव्यम्। षाष्ठन्द्वित्वन्तावद्धि प्रयोगएवेति स्थितमाकरे। अस्तु वा स्थाने द्विर्वचनम्। उभयथापि अङ्गावयवएव किलाभ्यासः। स च नाङ्गावयव इति व्याहतमेव। एकस्याङ्गावयवावयव इत्याद्यपि रभसोक्तिमात्रम्। अवयवएव ह्ययं न तु तस्यागमः। येन तदीयमसार्वत्रिकत्वे प्रकृते उपन्यासार्हं स्यात्। यदपि स्वोक्तेर्थे माधवसंवादकथनं तदपि रभसमात्रमिति समनन्तरमेव माधवमतविवेचने स्फुटीभविष्यति। लघोः किम्। अविक्ष्णत्। स्मज्ञायादित्यादि। अयं भावः। सन्वल्लघुनि दीर्घो लघोरिति सूत्रद्वयेङ्गस्येत्यनुवर्त्तते ऽभ्यासस्येति च। तत्राभ्याससंज्ञा कार्यकाले। तेनैकाचो ये द्वे तयोः पूर्वस्येति फलितम्। द्वे इत्यत्र च उच्चारणे इति विशेष्यसमर्पकमध्याह्रियते तच्च कृदन्तम्। तद्योगादङ्गस्येति कर्मणि षष्ठी। तेनाङ्गं यत्र द्विरुच्यते तत्र पूर्वस्य दीर्घसन्वद्भावौ विधीयमानावेकाच्येव फलितौ। किञ्चास्मिन्पक्षे एकाच इत्यङ्गविशेषणं शब्दतोपि सुलभम्। एकाचो द्वे इत्यधिकारात्। तदिदं माधवमतं श्लोकद्वयेनोपनिबद्धम्। तथा च ऊर्णुधातौ माधवेनोक्तम्। औणुर्नवत्। दीर्घो लघोरित्यभ्यासस्य दीर्घो न भवति। चङ्परे णौ यदङ्गं तस्य योभ्यास इति सूत्रार्थात्। अत्र त्वङ्गावयवस्याभ्यासो न त्वङ्गस्येति। युक्तञ्चैतत्। अङ्गस्येति षष्ठ्याः कारकत्वसंभवे तदुपेक्ष्य शेषषष्ठीत्वकल्पनाया अन्याय्यत्वात्। स्यादेतत्। उक्तरीत्या ह्रस्वहलादिःशेषचुत्वादीन्यप्यनेकाक्षु न स्युः। न चेष्टापत्तिः। दिदरिद्रासति। जिगणयिषतीत्यादिलक्ष्यस्य सर्वसंमतत्वात्। तन्निर्वाहार्थं यथोद्देशपक्ष आश्रीयत इति चेत्तर्हीहापि स एवोचितः। अर्थाधिकारपक्षस्यैवाभ्यर्हितत्वात् इत्यादिषु स्वीकृतत्वाच्चेत्यभिप्रेत्याह। वस्तुत इति ॥

रिति चाङ्गे न समानाधिकरणमिति भावः। कर्मणि षष्ठीति। कारकविभक्तेर्बलीयस्त्वादिति भावः। अङ्गाधिकारस्थकार्यसमीपे गमनेत्राप्यङ्गसन्निधानात्। माधवमतमिति। अत्रारुचिबीजन्तु प्रकृतसूत्रस्थभाष्यविरोधः। तत्र हि द्वहकस्मान्न भवत्यजजागरत्। लघुनि चङ्पर इत्युच्यते व्यवहितं चात्र लघु चङ्परं इत्युक्तम्। चङ्परे णौ यल्लघु तदभ्यासस्याव्यवहितमिति तदर्थः। तद्रीत्याङ्गस्य द्विरुक्तस्य भावेन शङ्काया एवानुत्थितातदसङ्गतिः स्पष्टैव। शेषषष्ठीत्वेति। अवयवषष्ठीत्वेत्यर्थः। अरुचिबीजान्तरमाह। स्यादेतदिति। इहापीति। सन्वल्लघुनीत्यत्रापीत्यर्थः ॥

स्थानिवद्भावेनेति। निषेधेन चेत्यपि बोध्यम्। आगुगागमे चेति। इदन्त्वलु डि· अस्याभिधानं कृत्वा चिन्तयाङ्गीकृत्य। वस्तुतस्तु ज्ञानमभिधानमेव। आगुडागम इति भाष्योक्तपक्षान्तरे ह्रस्वाभावेनानयोरभेदो। फलभेदापत्तेः। सार्थकमिति। तद्धि अविस्पणदित्यादिगुरोर्मौ वृत्यर्थन्त्व द्वीत्याचङ्परणि परलघुपरत्वाभावादप्राप्यातेहेयर्थस्पष्टमेव। मतभेदेति। ऊर्णोत्युक्तत्वरुचिग्रस्तमेवेति तत्त्वम्। स्पष्ट एवेति। अयं पक्षो भाष्यानारूढः। औण्ढिददित्यत्र दीर्घोपचिरप्यत्र पक्षो चङ्परे णौ यदङ्गं मोदिदइति तदीर्घाभ्यासस्य चङ्मादाय णिलोपस्य स्थानिवत्त्वेन णिमादाय चालघुपरत्वात्। नातीवेति। पक्षद्वयस्योभयोर ऊर्णोदीर्घेदिति। स्याद्वित्यनुषज्यते। सन्वद्भावस्त्विह नोपयुज्यते। णौ कृतस्य स्थानिवद्भावेनानुशब्दद्वित्वे सत्यभ्यासेऽवर्णाभावादिति भावः। अर्थापपत्ताविति। अर्थमाचष्टे इत्यर्थे णिचि आपुगागमे चेत्यर्थः। अर्थउपयाञ्चायामित्यर्थे तु यद्यपि बोपदेवेनार्थापयत इति स्वीकृतम्। प्राचा तद्व्याख्यातृभिश्च तदेव पुरस्कृतम्। तथापि तत्सर्वं ज्ञुरादिगणे भाष्यादिविरोधोद्भावनेन दूषयिष्यते। व्यवस्थयेति। चङ्परे णौ यल्लघु इति व्याख्याने हि ग्रेननाव्यवधानन्यायेनैकवर्णव्यवायेऽपीपचदित्यादावेव भाव्यम्। न त्वनेकव्यवाये। नचैवमविस्पणदित्यादौ सन्वदिति त्वं न स्यात्। न्यायसाम्येन लघोर्योऽभ्यास इत्यत्राप्येकैनैव व्यवायस्य स्वीकार्यत्वादिति वाच्यम्। अत्स्मृदृत्वरेतीत्वापवादेनालचनेन तुल्यजातीयापेक्षेण संयोगव्यवधानेऽपीत्वस्य ज्ञापितत्वात्। अत एव दीर्घो लघोरिति सार्थकम्। एतच्च वृत्त्यादिषु स्पष्टम्। माधवोऽपि जागृधातौ विस्पष्टमेवाह। एवञ्च वदन्नयमुद्देश्यपक्षमेवाशिश्रियत्। तथा चोर्णोतौ यत्तेनोक्तं तन्न तस्यापि निर्भरो नास्तीति गम्यते। अत एव च कास्तावचीचकासदित्युदाजहार। तथा च मतभेदाभिप्रायेण पूर्वापरस्य ग्रन्थविरोधः समाधेयः। यत्तु कातन्त्रे इत्वदीर्घयोर्जीजागरदित्युदाहृतं तन्मतद्वयेऽप्यसम्भवादुपेक्ष्यम्। माधवोऽप्येवञ्जागर्त्तीवाह। व्यवस्थामेव विवृणोति। सन्निहितमिति हेतुगर्भविशेषणम्। अङ्गमेव चेति। तस्य प्रत्ययोऽशे उत्थिताकाङ्क्षत्वादिति हेतुः स्पष्ट एवेति भावः। कैयटेति। तथा च एकं हरदत्तमतमपरन्तु कैयटमतमिति विषयविभागः केश्चिदुक्तो नातीवादर्त्तव्य इति भावः। चङ्परइत्यान्तर्त्व अग्लोपविशेषणतयापि योजितन्तस्य फलमाह। णेरिति। अगितामिति। पाचिकामिशाकिप्रभृतीनामित्यर्थः। नहीत्सञ्ज्ञकानां लोपो णिच्यप्रतीक्षत इति भावः। ओण। इतः पैपसन्नाः पञ्चत्रंदितः ॥ ७ पिसंमतत्वादिति भावः। तथा च सन्वत्सूत्रे कैयटः। अङ्गान्यत्वाद्यामीमयदिति सिद्धमिति भाष्यमुपादाय शीमादीनामङ्गानां सनिमीमेत्यादिनाभ्यासलोपो विहितोऽपन्त्वभ्यासोऽण्यन्तानामिति। अन्ये तु चङ्परे णौ यदङ्गन्तदभ्यासस्य सन्वत्त्वं विधीयते। णौ मीमादीत्वेबाङ्गमीत्यादि। अन्ये त्वङ्गस्याभ्यास इत्यत्राङ्गि

विरूपितङ्कृत्वाङ्चङ्निरूपितं णिनिरूपितञ्चेति कैयटीयपक्ष
द्वयतात्पर्यं न तत्त्वदृष्ट्येति आद्यपक्ष एव सर्वसंमत इत्याहुः॥

र॰ श॰ सिद्धिप्येतदिति। माधवादिभिरिति शेषः। एवञ्च बहुविरोधाद्धेय उपदेयो हेय इति भावः। फणादिरिति। यद्यप्ययं फणादिषु नास्ति अत एव वाज इत्यत्र भ्रमुग्रहणं तथापि फणादिष्वेव भ्र-
२७५ मुत्रसिञ्च पठित्वा फणाञ्च नवानामिति सूत्रं कार्यं वा जृ इति सूत्रे भ्रमुत्रसिग्रहणञ्च न कार्यम्। न च दिवाद्योरेत्वाभ्यासलोपापत्तिः। बभ्रमुरित्यादेरिष्टत्वेनेष्टापत्तेरिति तात्पर्यम्।
ष्ठिवुक्लमुचमां शितीति। वृत्तिकृत्तु वार्त्तिकस्थमाङ्ग्रहणं सूत्रे प्रचिक्षेप। जिमिङ्क्ष्विदिति। तथाच जेमनमिति भोजने प्रयुञ्जते। वा। भ्राश। भ्लाश। भ्राशृ भ्लाशृ दीप्तौ। फणादि-
सप्तके तालव्यान्तौ पठितौ। श्यन्विधायके प्रकृतसूत्रेऽपि तथैव। बोपदेवस्तु दन्त्यान्तावाह। प्राचापि स एवानुसृतः। भ्रमु चलने। भ्वादिर्ज्वलादिः फणादिः। भ्रमु अनवस्थाने।
दिवादिः पुषादिः शमादिः। तत्र भ्वादेर्भ्रम्यति भ्रमति। शमादेस्तु दीर्घे भ्राम्यतीति त्रैरूप्यम्। क्रमु पादविक्षेपे। क्लमु ग्लानौ। त्रसी उद्वेगे। त्रुट च्छेदने। लष कान्तौ। श्यन्वेति। उ-
भयत्र विभाषेयम्। अनवस्थानार्थो भ्रमिः। क्लमित्रसी च दिवादयः। तेभ्यो नित्यं प्राप्ते त्रुटेस्तौदादिकत्वादितरेषाञ्च भौवादिकत्वादप्राप्ते विधानात्। यत्तु प्राचा ष्ठिवुक्लम्विति सू-
त्रे दैवादिकस्य क्लमेर्ग्रहणमित्युक्तम्। यच्च दिवादिगणे भौवादिकस्य तु क्रमतीत्युक्तं तत्सामादिकं भ्वादिषु क्रमेरपाठादिति बोध्यम्। क्रमः परस्मैपदेषु। ष्ठिवुक्लमुचमां
शितीति पूर्वसूत्रात् शितीत्यनुवर्त्तत इत्याह। शितीति। यत्तु प्राचा शपीति व्याख्याय क्रम्यतीति श्यनि दीर्घरहितमुदाहृतं तत्सामादिकमिति भावः। यत्तु परिष्कुर्वन्निद्-
षुगमियमां छ इत्यत्रानुदित्पाठपक्षे इष्यतेरित्यात्तेश्च व्यावृत्त्यर्थं क्सस्याचीत्यतोऽचीत्यनुवर्त्य शित्यचीति काशिकायां व्याख्यातम्। एवञ्च सन्देशे पठिते क्रमः परस्मैप-
देष्वित्यत्राप्यचि शितीति संबन्धाच्छ एव भवितुं युक्तमिति। तन्न। अचीति हि पक्षेऽनुवर्त्यमानमपि च्छत्वविधावेव मण्डूकप्लुत्या सम्बध्यते न तु ततः प्रागिति। लुग्वा दुहे-
त्यत्र संबन्धे दन्त्य इवाजादावपि तङि क्सस्य लुक्प्रसङ्गात्। किञ्च। अचीत्यस्यानुवृत्तिर्वृत्तिकृतोक्तेति किमपूर्वं भाष्यकृतैवोक्तत्वात्। किं तु न तावताभवदभिमत
सिद्धिः ॥ ७७ अनुदित्पाठ इति। तुदादिगणे इषुगमीति सूत्रे चेत्यर्थः। पक्षे। अनुदित्त्वपक्षे। लुक्प्रसङ्गादिति। अच्यन्तलोपस्तु धात्वन्तरे चरितार्थ इति भावः। भाष्यकृतैवे- रामः
ति। इषेश्छत्वमहलीति वार्त्तिकप्रत्याख्यानायेति भावः। एवञ्च धातुपाठे सूत्रे चोदित्पाठो नार्ष इति सूचितम् ॥ २७५

तन्त्रेवोक्ततयेति। वृत्तावेवोक्ततयेत्यर्थः। अनुदित्पाठ पाक्षिकत्वस्येति पाठे इदम्। अनुवृत्तेः पाक्षिकत्वस्येति पाठे भाष्ये एवेत्यर्थः। वार्त्तिकारम्भोऽनुवृत्त्यभावादिति भावः। सङ्ख्यासंबन्धेति। मण्डूकप्लुत्येति भावः। अत एव प्रथमोपस्थितक्रमः परस्मैपदेष्विलत्रैयाहलीति वार्तिकोपन्यासे तत्प्रत्याख्याने चावीति अनुवृत्त्याकर्त्तव्ये इषेति सूत्रे तत्करणं भाष्ये सङ्गच्छते। ननु वृद्ध्यादृतिवत् शमामिति बहुवचनेनाद्यर्थलाभेऽपि सिद्धेऽष्टानामित्युक्तिः प्रत्येकव्यापारार्थेति उक्तनियमः सुलभोऽन्येषान्तु विद्ध्यर्थमित्यत आह। अष्टानामित्युक्तेरिति। शमादिस

अनुवृत्तेः पाक्षिकत्वस्य तन्त्रेवोक्ततया पक्षद्वये फलैकरूप्यार्थं सङ्ख्यासंबन्धस्यैव वक्तव्यत्वात्। वृत्तिकारादिभिरेव श्यनि दीर्घस्योदाहृततया तद्विरुद्धतात्पर्यकल्पनाया असंभवाच्च। यदपि वदन्ति। ष्ठिवुक्लम्विति सिद्धे क्रमः शमादौ पाठः श्यन्येषामेवाष्टानां दीर्घ इति नियमार्थः। तेन क्रमः श्यनि न भवतीति। तदपि न। सिद्धे सत्यारम्भो हि नियमार्थः। न चैवं सर्वेषां श्यनि दीर्घः सिद्धोऽस्ति येन श्यन्येषामेवेति नियमः स्यात्। अथोऽयं तश्यनि क्रम एवेति नियम इति। तदपि न। क्रमेः साक्षादपाठात्। अष्टानामित्युक्ते शमादिसङ्ग्रहार्थतयोपक्षीणत्वात्। शमादिषु क्रमेः पाठस्य षिद्गुणार्थतयोपक्षयाच्च। नन्वेवं क्रमिं मदेरनन्तरमुक्त्वा शमां सप्तानामित्येव ब्रूयादिति चेन्न। एवमप्यक्षरसन्निवेशे लाघवाभावात्। प्रत्युतार्द्धमात्राधिक्यात्। मकारान्तसन्दर्भसौष्ठवार्थं मदेः पूर्वं क्रमेः पाठसंभवाच्च। यत्तु क्रमेः शमादिषु पाठश्चिन्त्यप्रयोजन इति हरदत्तेनोक्तं तदपि नातिप्रयोजनताभिप्रायमिति दिक्। भाष्यविरुद्धमिति। यदि हि द्वौ धातू सम्मतौ स्यातां तर्हि षोपदेशलक्षणे स्यायतिरिवायमपि पर्युदस्येतेति भावः। प्लुतगतिरिति। यत्तु केचित् ष्ठिवेत्ति धात्वन्तरमित्याहुः ॥

ङ्ग्रहार्थतयेति। मदन्तमात्रसङ्ग्रहार्थतयेत्यर्थः। अन्यथा तदुत्तरेषामपि ग्रहणापत्तिः। मद्युतरं वृत्करणे तु गौरवमिति भावः। नन्वेवं शमादिषु क्रमेः पाठसामर्थ्यात्तथा नियमोऽत आह। शमादिषु क्रमेरिति। मकारान्तेति। इदमुपलक्षणं मुवर्णैतत्सन्दर्भेस्यापि बोद्ध्यम्। नातिप्रयोजनतेति। न बहुप्रयोजनतेत्यर्थः। षिद्गुणरूपैकप्रयोजनार्थत्वादिति भावः ॥

अभिमतेति। अनेनापिप्लवदित्यस्य प्लुङ्गाप्लुपुवदित्यस्य सिद्धाविति भावः। सुषूर्ष्येति। षोपदेशत्वादुत्तरस्य षः एतदेव रूपमिष्टुत्तरम्। अपदान्ते तु भेदइत्यादिरीर्ष्यादित्यन्तो ग्र

तन्न। तथा हि सति तस्माद्धुञा आप्लावशब्दे सिद्धे तदर्थं विभाषाडि·रुप्लुवोरिति प्लुवः पक्षे घञ्विधानमनर्थकं स्यात्। तथा स्नवति भृणोतीत्यादिसूत्रे णप्लुत्रते रुकारस्येत्वविधानं व्यर्थं स्यात्। तद्विपक्षे पिप्लवदिति रूपसिद्ध्यर्थं ङ्गियते। सति चास्मिन्ननेनैवाभिमतरूपसिद्धौ किन्तेनेति दिक्। मम बन्धने। ममत्येति। यस्य हलइति लोपस्तु न भवति। यस्येति सङ्घातग्रहणमिति सिद्धान्तात्। अत एव तत्रार्थवत्परिभाषापि प्रवर्त्तते तेन पुत्रकाम्ये त्यादौ लोपो नेति दिक्। आशिषि। मम्यात्। हलो यमामिति वा यलोपः। सूर्ष्येत्यादि। णल्। सुसूर्ष्य। ईष्याञ्चकार। ईर्ष्याञ्चकार। राम्यः क्विपि वलि लोपे स्कोरिति कलोपे जश्त्वचर्त्वयोः। सूर्ट् सूर्ड् रात्सस्येति नियमान्न संयोगान्तलोपः। ऊष्मान्त आदरे व स्यते। तस्याप्येतदेव रूपम्। अपदान्ते तु भेदः। सूर्क्षावित्यादि। एवमीर्क्ष्यते ईर्ष्यते श्चा। ईर्ट्। ईर्क्षौ ईर्ष्यावित्यादि। हयगतौ। भक्तिशब्दयोरपीति केचित्। शिथिलीकरणमिति। सोममभिषुणोतीत्यादौ तथादर्शनात्। सुरायाइति। तत्प्रकरणे। सस्थानं स्यादभिषवइत्यमरोक्तेः। स्नानमिति। वारां स्नीनभिषुण्वते इत्यादौ दर्शनात् स्नानपरतया चान्द्रव्याख्यातत्वाच्च। अतो ल्यान्तस्य यद्यवयववचनेनान्तशब्देन बहुव्रीहिः। अङ्गस्यान्यपदार्थः। तर्ह्यन्तग्रहणमनर्थकम्। विशेषणेनैव तदन्तविधेः सिद्धत्वात्। अथ समीपवाचिनान्तशब्देन षष्ठीसमासः रेफलकारयोः समीपभूतस्यातो वृद्धिरिति ॥

न्यः। सिद्धत्वादिति। अन्तशब्दस्य पूर्वनिपातापत्तेश्चेत्यपि बोध्यम्। समीपवाचिनेति। ओदकान्तादावनान्तात् प्रियं प्रोथमनुव्रजेदित्यादौ दृष्टेनेत्यर्थः। प्रोथः पान्थः ॥

म्वल्लीति। इहत्वन्तःशब्दः समीपवाची ओदकान्तादित्यादौ पूर्वभूतसमीपेऽपि दर्शनादित्याशयेन अत्र परगतसामीप्यवाचित्वदुराग्रहे तु लपिरण्यादावेव दोष इति बोध्यम्। तन्नोति। समीपपदार्थस्य शाब्दाकाङ्क्षासत्त्वेन तन्निवृत्तये शाब्दान्वयोचितेनावृत्तिरुक्तिरिति भावः। अतः समीपभूतरेफलकारान्तस्याङ्गस्यातो वृद्धिरिति अर्थः। नाकारसमीप इति। भाष्यप्रामाण्येनाव्यवहितसमीप एवान्तशब्दशक्तिरिति भावः। तत्र प्रत्यासत्त्या वृद्धिस्थानी ल्वसमीपभूताकार एव गृह्यते। तोत्क्षारीदित्यादावटो न वृद्धिः। आद्ये तु रेफलकारान्ताङ्गावयवस्य तर्हि लपिरणिम्वल्लिप्रभृतिष्वपि स्यात्। अथ लञ्च तदन्तश्चेति कर्मधारयस्तर्हि अन्तशब्दस्य विशेषणत्वात्पूर्वनिपातः स्यादत आह। लुप्तषष्ठीकमिति। अतो वृद्धिः स्यादिति। एतेन अत इत्यस्य तन्त्रावृत्त्यादिकं प्रदर्शितम्। अतः किम्। अखोरीत्। तदन्तस्याङ्गस्येति किम्। म्वल्ल आशुगमने। अम्वल्लीत्। अत्राटो लकारोऽकारसमीपभूतः नत्वङ्गस्यान्तः। द्वितीयस्य तु नाकारः समीपः। नेटीत्यादि। स्वविषये प्राप्तं सर्वं बाध्यते बाध्यसामान्यचिन्तायां पुरस्तादपवादन्यायस्याप्रवृत्तेः। विशेषचिन्तायां तु नेटीत्येव बाध्येत न तु विकल्पोऽपीति भावः। यत्तु प्राचा नेटीत्यस्यापवाद इत्युक्तं तद्विकल्पस्याप्युपलक्षणमिति व्याख्यातुमुचितम्। यत्तु व्याचख्युः। विकल्पस्यैवापवाद इति। तच्चिन्त्यम्। बाध्यसामान्यचिन्तायामवधारणायोगात्। विशेषचिन्तायां तु पुरस्तादपवादन्यायेन वैपरीत्यापत्तेः। न च येन नाप्राप्तिन्यायेन विकल्पस्य बाध इति वाच्यम्। मा भवानालीदित्यत्राहलादित्वेन विकल्पस्याप्राप्तेरिति दिक्। तृफलेत्येत्वमिति। यद्यप्यभ्यासे चर्चैत्वस्यासिद्धत्वांदत इत्येव फलभज्योरेत्वाभ्यासलोपौ सिद्धौ तथापि तयोर्ग्रहणमेत्वविधिं प्रति सिद्धत्वज्ञापनार्थम्। तेन त्रभणतुः बभणुरित्यादि सिद्धम्। ननु फलनिष्पत्तावित्यस्यैव तत्र ग्रहणमुचितं निरनुबन्धकत्वादिति चेत्। मैवम्। निरनुबन्धकपरिभाषायाः प्रत्ययग्रहणविषयकत्वात्। सा हि वामदेवाड्ड्यड्ड्यौ इति ड्यप्रत्यये डित्त्वेन ज्ञाप्यते। ज्ञापकञ्च सजातीयापेक्षम्॥ ७ ल्वसमीपस्यात इति ल्वपदार्थस्यार्थ उक्तः तत्र लकारयोः प्रत्यासत्त्यैकत्वलाभेनाङ्गान्त्यलकारसमीपाकाराभावात् म्वल्लीदित्यादौ न दोषः। अन्तग्रहणसामर्थ्यादेव वर्णग्रहणेऽपि जातिग्रहणं न। एतेन हलन्तग्रहणे नेट्यतरं वृद्धिराजामेव स्तिन्न परत्वेन विशेषणादन्तग्रहणं व्यर्थमित्यपास्तम्। नेटीत्येवेति। पुरस्तादपवादन्यायेनेति भावः। तथा च रेफग्रहणवैयर्थ्यापत्तिरिति तात्पर्यम्। विकल्पस्याप्राप्तेरिति। अम्वल्लीदित्या

सार्वत्रिकतामिति। द्विश्रौ रिसादिसूत्रस्थभाष्यप्रामाण्येनाप्रत्ययविषयेऽपि तत्प्रवृत्तिः। न हि सर्वत्र सजातीयापेक्षैव ज्ञापकस्यास्तीति भावः। समुच्चिन्वन्तीति। ज्ञापकसिद्धं न सर्वत्रेत्यनेनाप्रवृत्तिरिति तत्त्वम्। जहातेः कित्त्वमिति। अन्यथैकानुबन्धपरिभाषयाऽस्यैव ग्रहणं स्यादिति भावः। परिभाषाया इति। सामान्यतो घामदेवाङ्यडु ङ्यामिति सूत्रस्य ङित्त्वज्ञापितपरिभाषामात्रस्येत्यर्थः। एतच्च दीर्घोऽकित इति सूत्रस्थकैयटानुरोधेनोक्तम्। वस्तुतो हश्चेत्यत्रानुबन्धानुच्चारणेन तदनुबन्धकग्रहणाभावात्परिभाषाया अप्राप्तिरेवेति तत्त्वम्।

केचित्तु परिभाषायाः सार्वत्रिकतामन्वानाः त्तॄफलेति सूत्रे चशब्देन सानुबन्धकममुं समुच्चिन्वन्ति। तन्न हश्च व्रीहिकालयोरित्यत्र सामान्यग्रहणनिर्वाहार्थं क्ङिप्रमाणञ्जहातेः कित्त्वं परिभाषायाः सार्वत्रिकत्वे मूलमिति ध्येयम्। मील श्मीलेत्यादि। २८ सर्वे दीर्घोपधाः। मिल श्लेषण इति ह्रस्वोपधस्तुदादौ। नील वर्णे। णिल गताविति ह्रस्वोपधस्तुदादौ। शील समाधौ। उपधारण इति चुरादौ। शिल उञ्छ इति ह्रस्वोपधस्तुदादौ। तिल गतौ। ५४०। स्नेहन इति चुरादौ। खोलृ खोर्ऋ घोर्ऋ ५८६ त्रयाणामपि ऋदित्त्वान्नोपधाह्रस्वः। अचुखोलत्। अचुखोरत्। अदुघोरत्। घोरितकमश्वानाङ्गतिविशेषः। निष्ठान्तात्तत्संज्ञायां कन्। ष्ठिवु निरसने। ५९६। ष्ठीवनम्। ल्युट्। पृषोदरादित्वात्पक्षे दीर्घः। तथा च चान्द्रसूत्रम्। ष्ठिवुसिवोर्दीर्घश्चेति। अयं दिवादावपि। सन्लिटोः। सन्लिण्निमित्त इति। यदि तु सनि लिटि च पर इति प्राचो व्याख्यानमाद्रियेत तदा यङ्लुगन्तात्सनि कुत्वं स्यात्। न चेष्टापत्तिः। माधवादिग्रन्थविरोधापत्तेरिति भावः। हिवि दिवि। ५९० प्राचा तु धिन्विकृण्वी भ्वादिगणे पठितौ। तदयुक्तम्। तथा हि। पाणिनीयमते तावद्द्विमौ भ्वादौ एव न तु स्वादौ ॥

अश्वानाङ्गतीति। धातुपाठे गतिचातुर्यमश्वनिष्ठमेव विवक्षितमिति भावः। दीर्घ इति। तदा लघूपधत्वाद्गुणाभावः। दीर्घोपधोऽप्ययं ल्युड्विषय इत्यन्ये। इति भाव इति। न चलह्याख्यानेन हि कार्यीति न्यायेन जयतौ कुत्वानापत्तिः। सन्ग्रहणसामर्थ्येन तस्य न्यायस्येहाप्रवृत्तेः। यदि तु जेर्यङ्लुक्सत्त्वे तदन्तात्सन्सत्त्वेन दृढतरं मानमित्युच्यते। तदा परत्वेन व्याख्यानेऽपि न दोषः। एतच्च माधवादिग्रन्थविरोधापत्तेरित्यनेन सूचितम् ॥

पक्षेइति। धिन्विकृण्व्योरच्चेत्युप्रत्ययविधानादितिभावः। नचतत्रापिपक्षेशपूड्वीरः। शपःसामान्यविधानेनतत्तद्गणप्रयुक्तविकरणैरिवधिन्विकृण्व्योरुप्रत्ययेनापिबाधेनादोषात्तवगणेपाठेनसूत्रेणचद्वयोःपर्यायःस्यादितितात्पर्यम्। वोपदेवेनेति। अत्रारुचिबीजन्तुअनयोर्भ्वादौलुङितङितनादिभ्यस्तथासोरितिपक्षेसिचोलुगापत्तेः। पक्षादिति। एककालविधाकिंचस्वादित्वाभ्युपगमेतत्सामर्थ्याच्छ्नुःस्यात्। तथाचवस्यऊठिअनिष्टंस्पष्टमेवबोपदेवेनतुविकरणलोभात्तनादित्वंस्वीकृतंतथाचप्राचोग्रन्थोनिरालम्बनएवेत्याशयान्ता — वत्। अतोलोपइतिनचोपदेशेकारान्तत्वंनास्तीतिवाच्यम्। आर्धधातुकोपदेशइतिव्याख्यातत्वात्। इहचधिन्विकृण्व्योरचेतिसूत्रत्वादकारादेशेकृतेचानुकृष्टस्यप्रत्ययस्यपक्षाद्विधानादितिभावः। लोपश्च। असंयोगपूर्वोयइति। प्रत्ययस्यविशेषणन्तुनकृतम्। अश्नुवहेइत्यादावतिव्याप्तेः। उतश्च। इहापिप्रत्ययस्यविशेष्यत्वेआप्नुहीत्यादावतिव्याप्तिः अतआह। प्रत्ययोकारइति। कृवि १९६ – अयमिति। कृणोतीत्यर्थः। नतुकृण्वितिभ्रमितव्यम्। स्वादौहिकृञ्हिंसायामितिपठ्यते। तस्यचशाविषयेपरस्मैपदेकृण्विनातुल्यानिरूपाणि। आत्मनेपदेतुकृण्वतेइत्यादिलिडादौतुकरोतिवत्। एवंस्थितेयत्स्वादावितियथाश्रुतोधातुवृत्तिग्रन्थएवप्राचोभ्रमेमूलमितिबोध्यम्। अवरक्षण। ई॰ १हिंसादानेत्यत्रहिंसाचआदानञ्चेतिविग्रहः। एकोनविंशतिरर्थाः। तथाचबोपदेवः। अवरक्षणेगतौकान्तौप्रीतौतृप्तौयुतौश्रुतौ। प्राप्त्याश्लेषयोर्नेवेशेभागेवृद्धौग्रहेवधे। स्वाम्यर्थेऽवगमेकामेकृतिविग्रहः। एकोनविंशतिरर्थाः। तथाचबोपदेवः। क्लिश। अत्रस्वामी। क्लेशेअव्यक्तायांवाचिचेतिपठित्वाइमावपिपूर्वधातोरर्थाविति मन्यतेधात्वन्तरमितितुबहवः। क्लिशउपतापेइतिदिवादौ। क्लिशूबाधनेइतिक्र्यादौ। ईषगतिहिंसादर्शनेषु। दानेषितिपाठान्तरं देवादीनांसम्मतम्। ईष। मनसईषा। मनीषा। शकन्ध्वादिःपृषोदरादिर्वा। मनीषामगिनिनिविष्टंमनीषितम्। प्रातिपदिकाद्धात्वर्थेबहुलमितिणिजन्तात्क्तः। मनीषितंद्यौरपियेनदुग्धेतिरघुकाव्ये। अयमु — र्थः परस्मै। श्रुटिप। ह्वावपिदीपादौ। ह्रस्वादयस्तुत्रयः। गत्यर्थोदिवादौ। इच्छार्थस्तुदादौ। आभीक्ष्ण्यार्थःक्र्यादौ। वर्षस्नेहने। वृषुसेचनेइत्यत्रपरस्मैपदी। शक्त्यर्थश्चुरादौ ॥ ७७ नेपितदुपदेशेऽदन्तत्वमस्त्येवेतिचिन्त्यम्। आप्नुहीत्यादावितिपाठः। प्राचोभ्रमइति। धिविकृवीस्वादिगणेपठितावित्याकारेइत्यर्थः। द्युतिर्दीप्तिः। श्रुतिः श्रवणम्। वेशः प्रवेशः। ग्रहोग्रहणम्। वधोहिंसा। कामइच्छा। कृतिःक्रिया ॥

म॰श॰ २७८ तङ्मात्रेति। आत्मनेपदोपलक्षणमिदम्। तेन भासमानसिद्धिः। ननु भुजपर्यायो बाहुर्बाधते इत्यरुचेराह। क्षुब्धेत्यादि ॥
कृशब्दे इत्यादि। यदाह केशवस्वामी। कौक्षेक इति पर्द्दते गुदरवे खेतवार्केहसे घुके च्वस्वरवे भखे च्व हयजेहे खेतहे खेतवेति। तथाहे षाहे षाच निस्वन इत्यस्य प्रक
रणे मरः। कासाञ्चक्रे इति। ई २८ कासृत्यये स्याम्। भासृ दीप्तौ। ई २ अस्यन्त्र दित्वन्तङ्मात्रफलकं भाजतिवत्। भ्राजभासेत्यादिना उपधाह्रस्वस्य विकल्पात्।
उभयोरप्यनुबन्धात्। —— करणन्तु प्रकरणानुरोधात्। आङः शासि। शंसस्तुतावित्यग्रे परस्मैपदिषु। ग्रसु ग्लसु। ग्रसित्वा ग्रस्त्वा। ग्रस्तः। ग्रसिष्ठुरिति हेला
राजीये लिङ्गनिर्देशे प्रयुक्तम्। भुवश्चेति चकारस्य अनुक्तसमुच्चयार्थतायाः वृत्तिकृतोक्तत्वात् समर्थनीयम्। एतेन भ्राजिभुक्षपिष्णू व्याख्यातौ। वहि
महि। ई ४० मह पूजायामित्यग्रे परस्मैपदिषु। महीङितिकण्ड्वादिषु। बर्ह बहु प्राधान्ये। इमौ भाषार्थौ चुरादौ। आद्यो हिंसायामपि तत्रैव। वृह वृहि वृद्धा
विति इहेव परस्मैपदिषु। केचित्विति। मैत्रेयादयः। अत्रापरितोषबीजं वैदिकप्रयोगविरोधः। तथा च बह्वृचब्राह्मणम्। प्रवर्ह्लिकाः शंसन्ति। प्रवर्ह्लिका
भिर्वै देवा असुरान्प्रवर्ह्ल्याथैनानत्यायन्नूर्ध्याकृतस्त्रेदं भगवद्गोविन्दस्वामिना। प्रवर्ह्ल्य अनृतं भाषित्वेति। यत्तु ओष्ठ्यादेर्वर्हिशब्दस्य आच्छादयत्यनेनेत्यर्था
नुगमो द्वितीयपर्यायपठितयोरोष्ठ्यादित्वे प्रमाणमिति। तन्न। वर्हिशब्दस्य सर्वेष्ववयवेषु प्रधानं भवतीति व्युत्पादनात्। एतेन स्तीर्णं बर्हिरित्यपि व्याख्यात
म्। एवञ्च मणिप्रवर्हाः इत्यत्रापि प्राधान्यार्थत्वादोष्ठ्यादित्वं न्याय्यमिति बोध्यम्। वेहृ जेहृ बाहृ। आ— इति। उक्षाणं वा वेहतं वा सदन्ते इति हि बह्वृचब्राह्म
णम्। वेहच्छब्दश्च वेहतेरतिप्रत्ययेन निपातित इति भावः। अन्त्य इति। बाहुशब्दस्य भुजपर्यायस्य क्षुब्धस्वान्तेति निपातितस्य बाढशब्दस्य च निर्विवादत्वादिति
भावः। गत्यर्थोपीति। अरेणुभिर्जेहमानं पतत्रीत्यत्र सर्वैर्वेदभाष्यकारैस्तथा व्याख्यातत्वादिति भावः। कास ई ५० आकारोपधप्रकरणादयमिह पठितः। ऊहा। ई ५१ राम॰ २७८
अनुक्तमप्यूहति पण्डितो जन इति प्रयोगस्त्वनुदात्तेत्वलक्षणमात्मनेपदमनित्यमिति समाधेयः ॥

केचित्त्विति। अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति तु भाष्यानुक्तत्वान्न साधुत्वे नियामकमिति मदाशयः। कैयटादाविति। कैयटस्यादिभूते प्रथमे व्याख्येये भाष्ये इत्यर्थः। नास्तीति। प्रत्ययपरत्वाद्। केचित्तु ओहतीत्याङ्पूर्वं पठित्वा उपसर्गादस्यत्यूह्योरिति परस्मैपदमाहुः। अगाढेति। झलो झलीति सलोपः। ढत्वधत्वष्टुत्वढलोपाः। सिज्लोपात्पूर्वं भष्भावस्तु न। असिद्धत्वात्। ननु कृते लोपे प्रत्ययलक्षणेन सादिप्रत्ययपरत्वाद्भष्भावोऽस्त्वित्याशङ्क्य सिज्लोपस्य प्रत्ययलक्षणेन पूर्वत्रासिद्धत्वादिति माधवः। अत्रेदं वक्तव्यम्। शङ्का तावदसङ्गता वर्णाश्रये प्रत्ययलक्षणाभावात्। ननु यत्र वर्णमात्रमाश्रीयते तत्र माभूत्। यथा गवेहितं गोहितमित्यत्रावादेशो न। यत्र तु वर्णविशिष्टः प्रत्ययः आश्रीयते तत्र स्यादेव। यथा तृणेढीतीमागम इति चेन्न। भष्भावेऽपि वर्णस्यैवाश्रयणात्। प्रत्ययस्याप्रकृतत्वात्। किं च स्थानिवत्सूत्रेण सिद्धे प्रत्ययलक्षणसूत्रं नियमार्थमिति भाष्ये स्थितम्। स्थानिवद्भावश्च विशेषणत्वेनाप्यलाश्रयणे निषिद्धः। अन्यथा प्रपठ्येत्यत्रेडागमापत्तेः। अतएव तृणह इम् इत्यत्राचि नेत्यनुवर्तते न तु हलीति कैयटादौ स्पष्टम्। तस्मादिह शङ्कामन्दैव। असिद्धत्वेन समाधानमपि मन्दमेव। स्थानिवत्त्वं प्रत्ययसिद्धत्वनास्तीति प्रागेव प्रपञ्चितत्वात्। अन्यथा राम इत्यत्र विसर्गो न सिद्ध्येदिति दिक्। णिक्ष चुम्बने। प्रणिक्षतीति। उपसर्गादसमासेऽपीति नित्यं णत्वम्। वानिंसनिक्षनिन्दामिति विकल्पस्तु कृत्स्वेव। धातुत्रयेऽपि तिङन्ते तदुदाहरणं प्राचः प्रामादिकमेव। आकरविरोधादिति भावः। अवसेत्यादि। सूर्क्षणमादरः। ततोऽन्यदसूर्क्षणमित्यमरव्याख्यायाः। कल्पसूत्रे च दृश्यते। सोमेन यक्ष्यमाणो नर्तून् सूर्क्षेन्न नक्षत्रमिति। तैत्तिरीयब्राह्मणे च तत्तन्न सूर्क्ष्यम्। द्राक्षि ध्राक्षि ध्वाक्षि। ई७०। एभ्यो गुरोश्च हल इत्यप्रत्यये द्राक्षा ध्राक्षा ध्वांक्षा। आद्ययोरनुनासिकलोपो यवादिगणे निपातनात्। मतोर्वत्वं तु त्रिभ्योऽपि न। अयवादिभ्य इत्युक्तेः। द्राक्षामान्। ध्राक्षामान्। ध्वांक्षामान्। मूष स्तेये। ई८१। संज्ञायां कन्। मूषकः। अयं ह्रस्वोपधः क्र्यादौ। जूष चेति। ई८२ जुषी प्रीतिसेवनेइति तुदादौ। जुष परितर्कणे इति चुरादौ ह्रस्वोपधः। भूष अलङ्कारे। अयपञ्चरादावपि। कणरवशिषेत्यादि। ॥ ७७ इत्यादिनिर्देशाद्वेह लिङ्गम्। कृत्स्वेवेति। कृत्सपदस्य ततः कृतीत्यनुवर्तनात् पूर्वान्तरसाहचर्याच्चेति भावः। ओ [illegible]धादिति। कृत्सु च इति प्रकरणविरोधादित्यपि बोध्यम्। नर्तून् सूर्क्षेदिति। ऋतून्नाद्रियेतेत्यर्थः। अथश्चापहिषयः शास्त्रार्थः ॥

न प्र. २८८

रोरोति। कर्मणि धत्तीष्टेत्यादौ बलाद्यार्द्धधातुकसत्त्वादस्यैव प्रयोगः। एवङ्कर्मव्यतिहारे कर्त्तर्यप्यस्यैव प्रयोग इति भावः। यग्विषय इति। चिणोऽप्युपलक्षणमिदम्। इत्यास्तामिति। एषु तृतीयो निट्कः। शिषिंपिषिंशुष्यतिपुष्यतीत्विषिमिति भाष्यप्रभृतिवचनात्। न च तत्र रुधादेरेव ग्रहणम्। सङ्कोचे प्रमाणाभावादिति मैत्रेयपुरुषकारमाधवादयः। तदनुरोधेनोदाहरति। शोषेत्यादि। बोपदेवादयस्त्वमुं सेट्कमाहुः। तन्मते शोषितेत्यादि बोध्यम्। ञिषु विषु मिषु। ७०५। इह द्वितीयो निट्कः। श्लिषिंत्विषिन्तुष्यतिदुष्यती द्विषिमिति वचनात्। बोपदेवस्त्वमुं सेट्कमाह॥ कै ग्रटादय इति॥ आदिशब्दान्न्यासकारहरदत्तवर्द्धमानस्वामिसंमताकाराः। घस्लृ अदने।८१। आशिषीति। आशीर्लिङ्गस्यार्थः। एतच्च कर्त्तरि प्रयोगमभिप्रेत्योक्तम्। कर्मणि तु यग्विषये प्रयोगो नेति बोध्यम्। पुषादिद्युतादि। पुषधातुर्गणचतुष्टये पठ्यते। भ्वादौ दिवादौ क्र्यादौ चुरादौ च। तत्रानेह भ्वादिर्गृह्यते द्युतादीनां पृथक्करणाज्ज्ञापनात्। ते हि तत्र पुषेरुपरि पठ्यन्ते। नापि क्र्यादिः। तत्र हि पुषेरुपरि चत्वार एव धातवः। यदि च त एव जिघृक्षिता स्युस्तर्हि लृदित एव क्रियेरन्। न चानेकानुबन्धसङ्गगौरवम्। त्रयाणां निरनुबन्धकत्वात्। ग्रहेः स्वरितत्वेऽपि लृकारेणैव तन्निर्वाहात्। यत्तु हरदत्तादिभिरुक्तम्। स्वरितत्वादेरपि तेनैव सिद्धत्वादिति। तत्रादिशब्दग्राह्यं किमिति त एव प्रष्टव्याः। न चाङवत्तथा। अपिशब्दसमुच्चयस्य दुर्वचत्वादित्यास्तान्तावत्। नापि चुरादिः। णिचा व्यवधानेन ततोऽनन्तरस्य श्नेरसंभवात्। अतः परिशेषाद्दिवादय एव गृह्यन्ते। तदाह। श्यन्विकरणपुषादेरिति। नन्दिग्रहिपचादिभ्य इतिवत् पुषद्युतादीत्येक एवादिशब्दः सूत्रे पठितुं युक्तः। ननु पुषादयो द्युतादयश्च लृदित एव कुतो न कृता इति चेन्नैवम्। प्रत्येकं लृकारपाठे विपरीतगौरवापत्तेः। न चानुबन्धान्तरेण लृकारो निर्मातुं शक्यः। तत्तत्कार्यानिर्वाहप्रसङ्गात्। आदितामीदितामुदितामूदिताञ्च तत्र सत्त्वात्। तद्यथा। पुषादिषु। ञिष्विदा। मदी। षिधु। शमु। द्युतादिष्वपि ष्विदा ञिमिदा ञिक्ष्विदा स्रंसु ध्वंसु स्यन्दू कृपू इति पठ्यन्ते। यत्तु पुषादिषु षिधू संराद्धावित्यूदित्सु पठ्यते। इति तत्प्रामादिकम्। ऊदित्त्वे तस्यानिट्सु पाठवैयर्थ्यापत्तेः। तस्माद्ध्रस्व एव सिद्धान्तेऽनुबन्धो बोध्यः। जर्ज झर्झ चर्च। एषाञ्च वर्गीयान्तेषु पाठ उचितः ॥ ७५ आदिनोच्चारणार्थत्वमिति कश्चित्। पठितुमुचित इति। द्वन्द्वगर्भबहुव्रीहिगर्भो द्वन्द्वो व्याख्यानादिति भावः ॥

रामः २७९

नत्विहेति। केचित्त्वाद्योदन्त्योष्ठ्यान्त्यो ऽवय्यर्थसाम्यात्पठितावित्याहुः। मूलत्वाद्य स्यापि चवर्गतृतीयान्तत्वमिति मते बोध्यम्। व्याख्यानमिति। सानुबन्धकत्वं न्तूभयोरपीति भावः। गुणस्यादिति। गौरवञ्च स्यादिति अपि बोध्यम्। सूत्रान्तरस्यैवमेव व्याख्याद्व्याश्रयेन तत्र फलमाह। यये इत्यादि। एकीयमतागतं स्विदं सभाष्यप्रकृतं स्विद्भेव गमयति। खिद्यतीत्यादि। निषेधस्येष्टत्वादिति। तासि चक्लृप इति सूत्रस्य चेनेति भावः। तङानयोरभावमिति। वार्त्तिके इष्टेत्यग्रसादेरार्द्धधातुकस्येव तङानरूपत्वात्तदभावाभावेन न दोषः। नन्वविव

नत्विहेति। ष्यांतेषु शश प्लुतगतौ। श्लेशतुरिति। इह शश्वतुरिति प्राचो ग्रन्थः प्रासादिक इत्युक्तम्। चह। अचहीदिति। हान्तलक्षणवृद्धिः। रह त्यागे। अयं कथादौ मित्यकरणे च चुरादौ। अनिड्कारिकास्विति। अत्र च व्याख्यानमेव शरणम्। अथ चादेरन्तर्गणानाह। द्युत दीप्तौ। ञिमिदा। मिदेर्गुणः। शितीत्यनुवर्त्तते। सा च कर्मधारयात्सप्तमी। अङ्गाक्षिप्तश्च प्रत्ययो विशेष्यः। तेन यस्मिन्विधिस्तदादाविति प्रवर्त्तते। तदेतदाह। इत्सञ्ज्ञकशकारादाविति। इत्थं व्याख्यायाः फलमाह। रायइति। शितीति बहुव्रीहौ तु मिमिदेदत्र गुणः स्यादिति भावः। पपेतस्येत्यादौ पि वादयोऽपि स्युरिति बोध्यम्। अयं दिवादिश्चुरादिश्च। ञिष्विदा। स्वेदतीत्यव्यक्ते शब्दे भविष्यति। स्विद्यतीति स्नेहनमोचनयोर्दिवादौ स्विद्यतीति गात्रप्रक्षरणे। घुट परिवर्त्तने ७५२ अयन्तु दादावपि। रुद लुट लुठ ७५५ आद्यो प्रथमान्तो तृतीयो द्वितीयान्तः द्वावेव यातृद्वितीयान्तौ चेत्येके। क्षुभ सञ्चलने। ७५७। संचलनं प्रकृतेर्विपर्यासो मन्थनञ्च। अयन्दिवादिः क्र्यादिश्च। नवद्धाश्चतुर्थ्यः। चतुर्ग्रहणं पेभ्योऽपि त्यर्थमिति व्याचख्युः। तथा तत्रापि निषेधस्येष्टत्वात्। चतुर्ग्रहणफलन्तु स्यन्दौ स्फुटीभविष्यति। स्यन्देरूदित्वाद्विकल्पे प्राप्ते इतरेषां नित्यमिटि प्राप्ते निषेधोऽयम्। अत्र गमेरिडित्यतः परस्मैपदेष्वित्यनुवर्त्तते। तच्च तस्मिन्सूत्रे तङानयोरभावं लक्षयति। इहापि तथैवार्थाधिकारात् ॥

त्तिषत इत्यत्र लजघुत्वत्तेः पूर्वं निषेधापत्तिः। तङानयोरभावशब्देन तङाननिरूपितनिमित्तत्वाभावोपलक्षणेनादोषात्। पूर्ववत्सन इत्युक्त्या अत्रापि वृतेरात्मनेपदनिमित्तत्वात् विवृत्सिनीयत इत्यत्र च न दोषः। वृतेरात्मनेपदनिमित्तत्वाभावात्। निमित्तत्वं च फलोपहितं निवेश्यन्ते न विवृत्सितेत्यत्र तृजन्तेन दोषः ॥

हेर्लुकि चेति।परस्मैपदेपरेइत्यर्थेतुनसिद्ध्येत्।नचप्रत्ययलक्षणेनतस्यरत्वंनलुमतेतिनिषेधात्।नचार्द्धधातुकस्येडित्यत्रेवाङ्गनिमित्तस्यसादेरार्द्धधातुकस्येत्यर्थात्हिनिरूपिताङ्गसञ्ज्ञकस्यान्तोद्देश्यकोटौनप्रवेशइतिनलुमतेत्यस्याप्राप्तिः।अतएवभाष्येवृतादिप्रतिषेधेपरस्मैपदेषुचेत्क्लृपउपसंख्यानमित्येवोक्तंनतुहेर्लुकीत्यपीतिवाच्यम्।लक्षणापक्षेदोषशङ्कैवनेत्यभिप्रायेणास्यप्रयोजनत्वोक्तेरदोषात्।स्पष्टाचेयंरीतिःस्नुक्रमोरितिसूत्रेभाष्ये।।अत्रभाष्येति।।एवंहिअत्रभाष्यम्।।अविशेषेणवृतादिभ्यइट्प्रतिषेधप्रसक्तावृतादीनामात्मनेपदेनसमानपदस्थस्येड्भवतीतिवक्तव्यमिति।वृतादिसंबन्धिनःसादेरार्द्धधातुकस्यात्मनेपदेनसमानपदस्थस्येडितितदर्थः।।ननिवर्त्ततइति।।वार्त्तिकेआत्मनेपदेनैवसमानपदस्थस्येत्यर्थात्।अयंचकपङ्त्यत्तेःप्राक्सुबन्तेनापिसमानपदस्थइतिन

तेनासत्यपिपरस्मैपदेकृतेहेर्लुकिचनिषेधःसिद्ध्यति।।विवृत्सिता।।विवृत्सत्वमिति।नदेतदाह।तङानयोरिति।अत्रभाष्यवार्त्तिकयोःवृतादीनामात्मनेपदेनसमानपदस्थस्येड्वचनादन्यत्रनिषेधइतिस्थितम्।तेनविवृत्सित्रीयतइत्यत्रात्मनेपदोत्पत्तेःपूर्वन्तत्समानपदस्थत्वाभावादन्तरङ्गोनिषेधःप्रवर्त्ततेसचकृतेपितङिननिवर्त्तते।।चतुर्ग्रहणसामर्थ्यादिति।।वस्तुतस्तुपञ्चभ्यइतिवक्तुमुचितम्।एवंहितासिचेत्येवास्तु।क्लृपइतिस्मर्थम्।नचवृतादिष्वतिव्याप्तिः।परस्मैपदाभावात्तङानयोःसत्त्वाच्च।अनुविपर्यभिनिभ्यः।प्राणिषुनेत्युक्तावित‌ि।नचैतदेवसूत्रेऽभिप्रेतमितिवाच्यम्।प्रसज्यप्रतिषेधेऽसमर्थसमासापत्तेर्वाक्यभेदापत्तेश्चेतिभावः।कृपेरित्यर्वाचीनानांपाठमुपेक्ष्यभाष्यारूढंपाठमाह।कृपोरोलइति।रेफसदृशइति।वर्णैकदेशानांवर्णग्रहणेनाग्रहणमितिसिद्धान्तात्।पूर्ववाक्येनाप्राप्तमात्रत्तिसिद्धेनद्वितीयवाक्येनसामर्थ्याद्विधीयते।लुटिचक्लृपइत्यादिसौत्रनिर्देशोभाष्यकारव्याख्यानंचेहप्रमाणमितिभावः।क्लृप्तीष्टेति।लिङ्सिचावात्मनेपदेष्वितिकित्त्वान्नगुणः।वृत्।वृत्तइति।वृतुवर्त्तनइत्यस्मात्क्विप्।घटचेष्टायाम्।येधातवोन्यत्राधीताइहपठ्यन्तेतेषामर्थनियमः।येत्विहैवपठ्यन्तेतेषामुपसर्गादिनार्थान्तरपरत्वेपिमित्त्वमस्त्येवेतिन्यासधातुवृत्त्यादिषुस्थितंतदेतद्ध्वनयन्नुदाहरति।विघटयतीति।व्यथोलिटि।हलादिःशेषापवादइति।अभ्यासान्तर्गतयकारस्यनिवृत्तेरपवादइत्यर्थः ।।

दोषइत्याशयः।एतेनैतद्वार्त्तिकस्यनियमार्थत्वमाश्रित्यनिषेधसूत्रप्रत्याख्यानेपिनदोषइतिबोध्यम्।एवञ्चस्नुक्रमोरितिसूत्रस्यवार्त्तिकसमानाकारवार्त्तिककरणेनतत्प्रत्याख्यानरीत्यैतत्प्रत्याख्यानमपिभाष्येध्वनितमित्यनेनसूचितम्।।अर्थनियमइति।।अन्यथाशब्विकरणानाङ्घटादिपाठादेवसिद्धेर्ध्वनशब्दइत्यादेर्बहिर्भूतपाठस्यवैयर्थ्यापत्तिरितिभावः।।मित्त्वमस्त्येवेति।।अर्थनिर्देशस्यक्रियावाचित्वबोधार्थचारितार्थ्यादितिभावः।।न्यासेति।।अनेनभाष्यमत्रोदासीनमितिसूचितम्।।निवृत्तेरिति।हलादिःशेषेणप्राप्तायाइत्यर्थः।अत्रयद्वक्तव्यन्तदन्यत्रोक्तम् ।।

हरदत्त इति॥अत्राह विवीजमादित्वं रुष्यमत्वरेत्यस्य भावादिकर्मणोर्निष्ठायामप्रवृत्तिज्ञापनार्थम्।एवञ्च विभाषाभावादिकर्मणोरित्यर्थवत् आत्मनेपदन्तु अकारेणापि सिध्यतीति॥ज्ञापकमिति॥मचस्रूङ इत्युक्तेपि साहचर्याद्लुग्विकरणस्यैव ग्रहणं भविष्यतीति निवाच्यम्।तस्य बहुशो व्यभिचारात्॥लुग्विकरणस्यैवेति नोक्तं लस्यानुरोधे नतत्स्यैव कल्पनात्।ध्वनिता चेयंप

अतएवाह।यस्येति।जित्वरा ७८१।आदित्वमात्मनेपदमात्रफलकम्।रुष्यमत्वरेति निष्ठायामिटो विकल्पितत्वादिति मैत्रेयहरदत्तादयः।इमये ८११।आभरणकारमतमाह।के

विदिति।माधव इति।तस्यायंभावः।सूत्रे दीर्घान्तपाठस्तावदविगीतः।व्याख्यातारोपि दृ विदारण इति व्याचख्युः।युक्तं चैतत्।ह्रस्वान्ताभ्युपगमे हि शॄदॄप्रां ह्रस्वो वेति दृणातेर्विकल्पेन ह्रस्वविधानमनर्थकं स्यात्।धातुद्वयेन दद्रतुर्ददरतुरिति रूपद्वयसिद्धेः।न चार्थभेदः।धातूनामनेकार्थत्वादिति।लुग्विकरणेति।स्वरतिसूतीति सूत्रे सूङि तिवक्तव्ये सूतिसूयत्योः पृथग्ग्रहणमस्याः परिभाषायाः ज्ञापकम्।परिभाषाभ्यामिति।उक्तपरिभाषयोः परस्परविरोधे सति उभयोरप्यप्रवृत्तिः।अथवा अवधारणांशपरित्यागेनाविरोधेन समुच्चय इति भावः।मारणतोषण।माधव इति।श्यामलस्तु आलोचन इत्यस्य हि निशामन इति रूपम्।आलोचनञ्च चक्षुर्जन्यं ज्ञानमेव।पश्यार्थैश्चानालोचन इत्याद्यैरतिकारादिभिस्तत्रैव व्याख्यातत्वादिति भावः।ज्ञापनमात्रमिति।श्लाघह्नुङ्स्थेति सूत्रे ज्ञीप्स्यमान इति प्रयोगादिति भावः।एष्वर्थेष्विति।पशुं संज्ञपयति।मारयतीत्यर्थः।विष्णुं विज्ञपयतीति।सन्तोषयतीत्यर्थः।संज्ञपयति रूपं दर्शयतीत्यर्थः।मतान्तरे तु बोधयतीत्यर्थः।प्रज्ञपयति शरं तीक्ष्णीकरोतीत्यर्थः।स्यादेतत्।माधवमते ज्ञीप्समानो बोधयितुमभिप्रेत इति वृत्तिग्रन्थस्य का गतिरित्यत आह।ज्ञपमि चेति ॥

रिभाषायस्य विभाषेत्यत्र भाष्ये।तत्र हि विहितस्येत्यत्र निषेधमाशङ्क्य यदुपाधेर्विभाषा तदुपाधेर्निषेधः।विभाषा गमहनविदविशामिति सूत्रे शविकरणस्य ग्रहणं लुग्विकरणश्चाग्रमित्युक्तम्।तत्र चोहेतो।यतोर्थलुग्विकरणौ तौ विशिसाहचर्यात् शविकरणस्यैव ग्रहणं न तु हनिसाहचर्याद्दादेरेतत्परिभाषानुग्रहायेति तदाशयः॥ज्ञीप्स्यमान इति॥बोधयितुमिष्ट इति तदर्थः ॥

तथाचेति॥माधवमते इति शेषः॥क्लेशेनेति॥षष्ठ्यनुरोधाद्भावप्रधानत्वेनेत्यर्थः॥ह्रस्ववत्त्विति॥फणस्यमुख्यनेष्वित्यर्थः॥सज्यते इति॥तत्कालावधारणमित्यनुरुध्यते।अकं
ज्ञापनमिति।तथाच बोधने धातुभेदेन रूपद्वयं फलितमिति भावः।यदाहदेवः।जानातिर्ज्ञप्तिसिद्धौ तु।ज्ञपयति तु पुनर्मारणादौ घटादेर्णौमित्त्वेपीदमेव ज्ञपमि
दिति पदं ज्ञापने मारणादौ।तेनार्थाज्ञापनेर्थे ज्ञपयति पदवज्ज्ञापयेदित्यपि स्यादिति।कम्पने चलिः।धातुनिर्देशे इक्।एवं छदि रूर्जने।जिह्वोन्मथने लडि
रित्यत्रापि बोध्यम्।घटादयो मितः।माधवादीनां व्याख्यामाह।मित्संज्ञा इति।मकारानुबन्धादित्यन्ये।ज्वलह्वल।एषां मित्त्वमिति।मित इत्यनुवृत्तं क्लेशेन व्याख्येय
मिति भावः।ज्वलह्वलह्मलनमोऽनुपसर्गाद्वेति पाठान्तरम्।तत्र न कश्चित्क्लेशः।प्राप्तविभाषेति।ज्वलादीनां पूर्वत्र पाठान्नमेस्त्वमन्तत्वादिति भावः।कथं संक्राम
यतीति।यत्तु सुधाकरेणोक्तम्।इहापि घञन्ताणिजिति।तन्न।नोदात्तोपदेशस्येति वृद्धिनिषेधादिति भावः।वृत्तिन्यासादीति।तथाहि।नपादमीति सूत्रे आयामय
तइत्युदाहृत्य यमोऽपरिवेषणे इति मित्त्वं प्रतिषिद्धं तद् इति वृत्तावुक्तम्।तत्र न्यासेन कम्यमिचमामित्यतो नेत्यनुवर्त्तत इत्युक्तम्।तथा मैत्रेयादयोपि नेत्यनुवर्त्य व्याच
ख्युः।एवं वृद्धिनिषेधानन्तरं पाठ उपपद्यते।अन्यथा नकमीत्यतः प्रागेव त्रिसूत्री पठ्येतेति भावः।सामर्थ्यादिति।तपरकरणलभ्यतत्कालावधारणं ह्रस्ववत्त्वे चरितार्थ
म्।दीर्घवत्त्वबाधस्त्यज्यत इति भावः ८४०५।टुवम।केचिदमुदितं पठन्ति।वान्त्वा वमित्वेति उदाहरन्ति च।तदनाकरम्।तथाहि।काशिकायामादितश्चेति चकारस्यानुक्त
समुच्चयार्थत्वमाश्रित्य सान्त इत्यत्रेड्भावः साधितः।उदित्वे तु यस्य विभाषेत्येव सिद्धेस्तदसङ्गतं स्यात्।एवञ्च त्वाप्रत्यये वमित्वेत्येव साधु।सुधाकर इति।अन्ये तु द्धु
रण इति सगुणमेव पठन्ति।भागवृत्तौ त्विति।अत्रेयमुपपत्तिः।नशसददेति सूत्रे आदिग्रहणं व्यर्थम्।वेत्यकारान्तसङ्घातग्रहणेनेष्टसिद्धेः।एवञ्चादिग्रहणमौ
पदेशिकत्वप्रतिपत्त्यर्थम्।अनुबन्धाश्चैकान्ताः ॥

रस्य स्थानित्वं तु न त्यज्यते तत्त्यागे मानाभावात्।अतएव दीर्घोपधानां फणादौ पाठश्चरितार्थ इति भावः ॥

रत्वेति।अनुदात्तोपदेशेत्यनुनासिकलोपः॥लुग्विकरणत्वादिति॥पेद्लस्यतुशिति सारूप्याभावान्नग्रहणमितिबोध्यम्॥सौत्र इति॥अन्यथा शब्दपरत्वेनागमो न स्यात् गुणश्च
स्यादितिभावः॥विकरणलुक्नैरर्थकत्वाभावान्नेत्यपिवक्तुं शक्यम्॥अत एव प्रकृतेऽर्तिसर्तीतिप्रयोगः सङ्गच्छते॥शकारादित्वाभावादिति॥न च शपा सिद्धे सार्वधातुके श्लुलुका
वितिपरनिमित्ततयास्या निवर्त्त्वेन शपमादाय दोष इतिवाच्यम्॥आक्षेपे आक्षिप्तस्य वा शाब्देऽन्वये मानाभावात्॥अत एव जुहुत इत्यादौ न गुणः॥श्तिपितु नादेशस्तयोः सर्तिशास्त्यर्तिभ्य
यद्वा॥वमेरादौ लकारो लुप्तनिर्दिष्टः॥तथा चोपदेशे वादित्वाभावान्निषेधो न॥वेमुष्यके विदुधिरमित्यादिप्रयोगाश्चेहानुकूला इति॥रमक्रीडायाम्॥अयमुदिदिति
मन्त्रो वो पदेवादयोरत्वारमिलेसुदाजकुत्तन्महान्तो न सहन्त इति माधवः॥पा घ्राध्मा॥पा पाने॥पा रक्षणे इति तु न गृह्यते लुग्विकरणत्वात्॥इशीति सौत्रो निर्देशः॥
इश्यन्तीति पाठस्तूचित एव॥इत्सञ्ज्ञकशकारादावपि नि॥तेन पपे इत्यादौ न॥शितीति कर्मधारयस्योक्तत्वात्॥बहुव्रीहौ तु स्यादेव दोषः॥अत एवार्त्तिसर्त्योर्जुहोत्या
दिकयोर्नेह ग्रहणम्॥शपः श्लुनापहारात्॥चानशः संभवेऽपि शकारादित्वाभावात्॥यत्त्वाहुः॥शित्यचीति व्याख्यानाच्चानशि नेति॥तन्न॥उक्तरीत्या कर्मधारयस्यैवावश्य
कत्वेऽचीत्यस्य वैयर्थ्यात्॥सदेः परस्य॥सदिसञ्ज्योरिति पाठस्तु रसारूढोऽपि भाष्याननुगुणत्वादुपेक्ष्यः॥शद्लृ शातने॥विशीर्णतायामिति॥तथा च तैत्तिरीये श्रूयते॥पद
श्चशीयतेति॥शातनन्त्विति॥शदेरेव हि णिचि शदेरगताविति तत्वे तु दि च शातनमिति रूपम्॥तथा चास्यैव धातोरिदं रूपं प्रसिद्धञ्चेति तन्निर्देशः॥गम्लृ गतौ॥इप
चष्पाक इत्यादिवदिति भावः ॥ ७ श्चेति निर्देशादिति भावः॥यद्यपि शतुस्तयोः शकारादेः संभवोऽस्त्येव तिष्ठन्मूत्रयत इत्यादाविव तथापि दशिशादिसाहचर्यान्न
तयोर्ग्रहणमिति बोध्यम्॥अत्र परं दृढतरं मानं चिन्त्यम्॥शित्यचीति॥शिद्रूपेऽचीत्यर्थः॥भाष्याननुगुणत्वादिति॥स्वञ्जेरुपसंख्यानमिति वार्त्तिकादिति भावः॥अस्यैव धातोरिति॥
त्वनिष्पन्नरूपेणैव प्रायेण धातुष्वर्थनिर्देशादिति भावः॥नन्वेवं शदने इत्येव वक्तुं युक्तमत आह॥प्रसिद्धं चेति॥तत्त्वप्रसिद्धमिति ति भावः॥तत्र दृष्टान्तमाह॥गम्लृ इति॥यथा गतिपा
कादिभिः शब्दैः फलवाचकैरपि तदनुकूलव्यापारार्थकस्यार्थनिर्देशस्तथा प्रकृते शातना न्यविशरणार्थकस्य शातनपदेनार्थनिर्देश इति भावः ॥

आत्मनेपदीगत इति॥यद्यपि पूर्वेन पठितस्तथापि क्वचिद्धातुरत्नोपलभ्यत इत्यभिप्रायेणेदम्॥माधव इति॥पृषोदरादित्वाद्ध्रस्व इत्यन्ये॥अव्युत्पन्नाः सर्वे तरतन्त्रसिद्धान्तबाध

क्रुच संपर्चने इत्यादि।८४४।कुच शब्दे तारे इति पठितस्येह पुनः पाठः संपर्चनाद्यावेव ज्वलादित्वप्रयुक्तो णो यथा स्यात्।मेधृ सङ्गमे च।८६२।प्रजायै गृहमेधिनामिति लक्ष्यम्।गृहैर्मेधन्ते सङ्गच्छन्ते इति विग्रहः।बुधिर् बोधने।पूर्वोत्तरेति।दैवादिकैर्नित्यात्मनेपदिभिस्साहचर्यात्तथाभूतस्य तस्यैव ग्रहणमित्यर्थः।यत्तु माधवेनोक्तम्।अकर्मकैः साहचर्यादिति।तदुपेक्षितम्।सकर्मकादावपि।चिण्दर्शनात्।तथा च माघः।क्रमादमुं नारद इत्यबोधि सः।श्रीहर्षोपि।अबोधि तज्जागरदुःखसाक्षिणीति।उबुन्दिर्।बुन्दित्वा।बुन्त्वा।निष्ठायां बुन्नम्।निशामनं चाक्षुषज्ञानम्।वेणृ।८७०।वादित्रस्य वाद्यभाण्डस्य वादनार्थमादानं वादित्रग्रहणम्।नान्तोपीति।उत माता महिषमन्ववेनदित्यत्र भाष्यकारैस्तथोक्तत्वादिति भावः।अय गतौ।८७४।वितत्यागे तु नित्यमात्मनेपदी गतः।अयपञ्चुराद्यावदन्तः।स्पश।८८०।बाधनस्पर्शनयोः।अपस्पशत्।अत्स्मृदृत्वरप्रथेत्यादिनाऽभ्यासस्यात्वम्।सन्वदित्वापवादः।स्वामी तु पष इत्येके इत्याह।अत्र पाठे यतो व्रतानि पस्पशे इत्यादयः प्रयोगाः प्रतिकूलाः।पस्पशा।यङन्तादचि टाप्।संज्ञापूर्वकस्य विधेरनित्यत्वान्नाभ्यासदीर्घ इति माधवः।पसेति दन्त्यान्तः सौत्रो धातुः।पसतीत्यादि।यङ्लुकोस्तु।जपजभेत्यादिनाऽभ्यासस्य नुक्।पंपस्यते।पंपसीति।पंपस इति कण्ड्वादिः।पंपस्यति।हृञ्।८६२।भारं हरति।ग्रामं प्रापयतीत्यर्थः।अंशं हरति स्वीकरोति।स्वर्णं हरति।चोरयति।पापं हरति।नाशयति।आदेच उप।लिटि धातोरित्यतो धातोरित्यनुवृत्तमेवाविशेष्यते।तदाह।उपदेशे एजन्तस्येति।धातोः किम्।गोभ्याम्।नौभ्याम्।अस्ति ह्यत्रापि गमेर्डोस् ॥

ॐ कविचारार्थः पसशाशब्द इत्यन्ये॥उभयतः स्पाशेत्यप्यस्यैव।धातोः किमिति॥ढौकितेत्यादावेजुपदेशसामर्थ्यात्समुदायोपदेशाभावावयवानां नान्तरीयकतयोच्चारणेनैवोपदेशाभावाच्च न दोष इति प्रश्नः ॥

उपदेशेऽजिति॥ ङोइत्याद्यौकाराद्युच्चारणन्तु सर्वनामस्थानविषये गोतोणिदित्यस्य तन्निमित्तकवृद्धेश्च परत्वात्स्वरतौ चरितार्थम्। न चोपदेशइत्यस्याजन्तविशेषणम्। धातोरित्यस्याभावेन तल्लाभादिति भावः। अत्र वदन्ति। उणादीनामव्युत्पन्नत्वेनेदं फलम्॥ किं च धातोरित्यनुवृत्तावुदीचांमाङ इत्यादावात्वानापत्तिरनुबन्धलोपोत्तरं तद्विनिर्मुक्तस्यैव धातुतया न धातुलोप इति सूत्रे भाष्यकैयटयोः स्पष्टत्वात्॥ किं च तस्य त्वे धातुसञ्ज्ञायां ङान्तस्य धातुत्वेऽजन्तस्य धातुत्वाभावः॥ न च तत्त्वेपि तस्याग्भागस्यैव धातुत्वमिति न दोषः॥ एवं हि ङकारसत्त्वेपि धातोरुपदेशेऽजन्तत्वानपायेनात्वे बाधकाभावादस्य निर्देशस्यानुबन्धकृतमनेजन्तत्वमित्यर्थज्ञापकताभाष्योक्ताऽसङ्गता स्यात्। तस्मादुपदेश इति षष्ठ्यर्थे सप्तमी। तस्यैचेच इति विशेषणमेजन्तस्योपदिश्यमानस्येत्यर्थ इति भाष्योक्तमेव साधु॥ गोभ्यामित्येवोपदेशपदफलम्। नौ ह्यच इत्यादिस्त्वनुवादो नोपदेश इति स्पष्टं ङ्विधापके भाष्ये॥ उण

ग्लानुदिभ्याण्डोरित्युपदेशेऽच्। उपदेशे किम्। चेता। स्तोता। लाक्षणिकत्वादेवात्र न भविष्यतीति चेत्। एवं तर्हि वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषा नाश्रीयत इति ज्ञापनार्थमिदम्। तेन क्षापयतीत्यादौ कृतात्वानां पुक् सिध्यति। अशितीति पर्युदासे बहवो दोषाः। तथा हि। सुग्लः। सुग्लौ। सुग्लानः। आकारान्तलक्षणाः काङ्युचो न स्युः। प्रत्ययनिमित्तं ह्यात्वम्। आदन्ताच्च प्रत्यय इत्यन्योन्याश्रयात्। किञ्च जग्ले इत्यत्राभ्यासे इकारः श्रूयेत द्विर्वचनेचीति वचनात्। तस्मात्प्रसज्यप्रतिषेध एवायम्। विषयसप्तम्या तु पर्युदासेपि न क्षतिः॥

दीनामव्युत्पन्नत्वाड्डोइत्यादीनामुपदिश्यमानेजन्तत्वमस्तीति न वाच्यम्। स्वञ्जोपदेशग्रहणस्य वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषाऽप्रवृत्तिज्ञापकतापि चिन्त्या। अत एव भाष्ये गोभ्यामित्येतद्व्यावृत्तये धातुग्रहणानुवृत्तिमुक्त्वाऽपि निवृत्तमित्याद्युक्तम्। मेङादौ नरङकारसत्वे तस्योपदिश्यमानेजन्तत्वाभावे न तस्यानुबन्धकृतमनेजन्तत्वमित्यर्थज्ञापकता सुस्था॥ अनुबन्धलोपे तुऽजन्तत्वाभावेपि धातुसञ्ज्ञादिकार्यार्थत्वाद्वतोप्युपदेशे मात्वर्थाच्चोपदिश्यमानस्यैजन्तत्वसत्त्वेन भवत्येवात्वम्। पुग्विधौ गामादाग्रहणेष्वविशेष इत्याद्युपगमन इत्यादिभाष्यप्रयोगात्। लाक्षणिकाकारान्तस्यापि ग्रहणमिति क्षापयतीत्यादौ न दोषः। अत एवात्सूत्रादौ वर्णग्रहणेपि लक्षणप्रतिपदोक्तपरिभाषा भाष्ये सञ्चारिता। येनेत्याद्युपास्यमावर्त्यमित्यन्यदिति। अन्योन्याश्रयादिति। पूर्वमनिर्दिष्टे प्रत्यये कृते आत्वे तु परदेशस्यावश्यकत्वादेषामप्राप्तावनिर्दिष्टस्य दृष्टमेवानक्षतिरिति। सुग्ल इत्यादिलक्ष्ये न क्षतिरित्यर्थः। विषयसप्तम्यामपि परनिमित्तत्वसत्त्वाज्जग्ले

इत्यस्य त्वक्ङितीति बोध्यम्। प्रसज्यप्रतिषेधेपि विषयी
ति विषयसप्तमीति बोध्यम्॥

कर्मव्यतिहारे इति। राधातोरिति शेषः। पूर्वविप्रतिषेधेनेति। गुणे वृद्धौ प्रक्रियागौरवं स्यादिति। इष्टत्वाच्च परशब्दाश्रयेण पूर्वं वृद्धिस्वीकार एवोचित इति तदाशयः। तन्निर्मूलमिति। ननु ऋ
धातोर्लिटि गुणाद्वृद्धिः पूर्वविप्रतिषेधेनेति वार्त्तिकं मूलमत आह। निष्फलमिति। न च पूर्वविप्रतिषेधाभावे परत्वाद्गुणे सकृद्गताविति न्यायाद्वृद्धिर्दुर्लभेति वाच्यम्। गुणप्रवृत्तेः पूर्वमत उप
अत्र च ह्वावामश्चेति सूत्रेण कबाधनार्थं पुनरण्विधानं ज्ञापकम्। तदाहुः। अनैमित्तिकमात्वम्। शिति तु प्रतिषेध इति। तदेतदाह। न तु शितीति। इत्संज्ञकशकारादौ
प्रत्यये परे नेत्यर्थः। धातुग्रहणाक्षिप्तस्य प्रत्ययस्य शितीति कर्मधारयेण विशेषणात्। यदि तु शितीति बहुव्रीहिः स्यात्तर्हि जग्ले इत्यादि न सिद्ध्येत्। एशः शित्वात्।
आतो लोप इटि च। अजाद्योः किम्। ग्लायते। यक्। जाग्लायते। यङ्। दासीय। इट्। आर्धधातुकयोः किम्। यान्ति। व्यत्यरे। कर्मव्यतिहारे तङ्। लुङ्¯ उत्तमैकवच
नमिट्। दैन्यकरणे। दायति। ददौ। घुमास्थेत्यत्रेति व्याख्यानात्। तत्रान्तरस्येति जहातीति श्यना निर्देशाच्चेति भावः। विभाषाघ्रेति। श्यन्विकरणाभ्यां शाच्छाभ्यां साहच
र्यादिति भावः। एवं शाच्छासेति। पुग्विधावपि बोध्यम्। तेनास्य अर्त्तिह्रीति पुगेव। सापयति। ऋतश्च संयोगादेर्गुणः। ऋच्छत्यॄताम्। इह सूत्रद्वये पि प्राचां अवृद्धिनि
मित्ते लिटीति व्याख्यातम्। तत्सूत्रानानुगुणम्। दयतेर्दिगि लिटीति¯ प्रक्रान्तन्तत्रावृद्धिनिमित्ते इति कुतस्त्यम्। ननु स्वविषये वृद्धिर्बाधिकेति चेन्न। परत्वेन गुण
स्यैव न्याय्यत्वात्। यत्तु पूर्वविप्रतिषेधेन वृद्धिरिति। तन्निर्मूलं निष्फलञ्च। तदेतदाह। गुणः स्याल्लिटीति चागुणोर्ति। अर्तीति भ्वादिह्वाद्योश्छान्दसेन लुका निर्दे
शः। ऋग्रहणमेव तु सुकरमिति हरदत्तः। तन्न। यङ्लुग्व्यावृत्त्यर्थत्वात् श्तिपा च निर्देशस्य। अकारे विधेये गुणग्रहणम् चिन्त्यप्रयोजनम्। अयङ् यि क्ङितीति सू
त्रात् यीत्यनुवर्त्तते तच्च लिङो विशेषणम्। तदाह। यादीति। तेनेह न। संस्तृषीष्ट। सर्त्तिशास्त्यर्त्तिभ्यश्च। भ्वाघोरङ्नेति। तथा च प्राचां भ्वादौ यदुदाहृतं तदाकर
विरुद्धमिति भावः। प्रसवोऽभ्यनुज्ञानमिति। सवितुः प्रसवे इत्यादौ तथादर्शनात् ॥
धायादित्यस्याप्राप्त्योक्तन्यायस्योक्तिसंभवाभावात्। स्पष्टं चेदं कैयटे। प्रक्रियागौरवं तु मन्वचनापेक्षयाधिकं दुष्टमिति तदाशयः। लुकेति। न्यायप्राप्तया तदनुत्पत्त्येत्यर्थः ॥

व्यर्थमिति। न चाप्नुवनित्यादौ दोषः। तत्राडागमस्याभीयासिद्धत्वादेव यणभावसिद्धेः। लावस्थायामडागमेपि तत्स्थान्याश्रयमपि तत्समानाश्रयमित्यसिद्धत्वंबोध्यम्। असिद्धवत्सू हुश्नुवोः सार्वधातुके। हुश्नुवोः किम्। योयुवति। नोनुवति। असंयोगपूर्वेति किम्। अक्ष्णुवन्ति। असंयोगपूर्वग्रहणमोर्विशेषणं न तु प्रत्ययस्य। तेनाप्नुवन्तीत्यत्रापि यणनेतिभावः। स्यादेतत्। हुश्नुग्रहणं व्यर्थम्। योयुवतीति यङ्लुगन्तस्य प्रकारान्तरेणैव वारणात्। तथाहि छान्दसो यङ्लुक्। तत्र प्रत्ययस्यार्धधातुकत्वादेव यण्न भविष्यतीति चेत्सत्यम्। हुश्नुग्रहणादेव ज्ञापकात् भाषायामपि क्वचिद्यङ्लुग्भवतीति भाष्यकाराः। चान्द्रास्तु यङ्लुको भाषाविषयत्वं निःसङ्कोचमेवेच्छन्ति। ज्ञापकतामेव ध्वनयितुमिहानेकाच इत्यस्यानुवृत्तिः प्रदर्शिता। तेन युवन्ति जुवन्तीत्यादेर्व्यावृत्तौ सत्यांहि हुश्नुग्रहणस्य ज्ञापकता निर्वहति। अन्यथा सार्वधातुकपरयोर्हुश्नुवोरनेकाच्त्वाव्यभिचारात् किं तदनुवृत्त्येति दिक्। इङादेशस्यैवेति। न चास्यापि ग्रहणमस्त्विति वाच्यम्। गाते इत्यादौ तङ्वत्वे ङकारस्य चरितार्थत्वात्। आदेशङकारस्तु न चरितार्थः। स्थानिवद्भावेन ङित्त्वादेव तङः सिद्धत्वादिति भावः। जुङ्वे इति। कुहोश्चुरिति ङस्य ञः। ९५०। क्रुङ् इति। अस्मात्पचाद्यचि विक्लवः। बवयोरभेदात् विक्लव इति माधवः। रुङ्। ९५१। रेषणं हिंसेति। रिषेर्हिंसार्थे पठितत्वात्। बोपदेवोप्याह। रुङ् वधे गत्यामिति। प्राचा तु भाषणे चेति पठितम्। व्याख्यातृभिश्च रेषणे चेति पाठान्तरमुपन्यस्य रोषणङ्कोपोत्पादनमिति व्याख्यातं तत्सर्वं माधवादिविसंवादादुपेक्षितम्। मेङ्। प्रणिमयत इति। नन्विह नेर्गदेति कथं स्यात्। शिद्विषये आत्वाभावेन मारूपाभावात्। किञ्च। अशिद्विषये कृतात्वेप्य— सिन्णत्वन्दुर्लभम्। प्रतिपदोक्तस्यैव माधातोर्ग्रहणौचित्यात्। गामादाग्रहणेष्वविशेष इति चेन्मीनातिमिनोत्योरपि कृतात्वयोरतिप्रसङ्ग इत्यत आह। तत्रेति। दृष्टत्वादिति ॥ ७ त्रप्रत्याख्याने तु एरनेकाच इत्यत्रानेकाच इति योगं विभज्य इणो यणीत्यनुवर्त्य योगविभाग—स्येष्टसिद्ध्यर्थतया व्याख्यानेन चाडादिसहिताऽनेकाच्श्चेदिण् तदा इवर्णान्तस्येण एवेति नियमान्न दोषः। द्वितीयपक्षे रसंयोगपूर्वस्येत्येतत् अनेकाच इत्यनुवृत्त्या विद्ध्यर्थं बोध्यम्। न चाचारक्विपि भानवतीत्यादौ दोषः। परेण गुणेन बाधात्। अयञ्च मध्येपवादन्यायेनोवङ एवापवाद इति भावः। आरभ्यमाणेप्यस्मिन्सूत्रे इति भाष्यात् एतदर्थमसिद्धवत्सूत्रारम्भ

एव—र्थमिति परे। चान्द्रास्त्विति। अत्रारुचिबीजन्तु पाणिनि
सूत्रभाष्यविरोधः इति भाव इति। व्याख्यानादिति त्वम् ॥

विशेषविहितेनेति।सत्यपिसंभवेबाधनंभवतीतिन्यायात्।अतएवयासुड्विषयेसीयुड्नेतिभावः।पीव्यास्म्यासमिति।प्यायः पीचक्ङिङः ख्यान्त्रद्रदमस्तेर्भूरित्यादीनामप्युपलक्षणम्।लुकः प्रवृत्तेरिति।नचधेटोधासीदित्यादौदोषः।स्यात्साहचर्येणधेटोऽपिपरस्मैपदे प्रवृत्तेरितिभावः।एतदपेक्ष्यानुवृत्तिरेवलघीयसी।तस्यस्वरितत्वप्रतिज्ञातुउभयविभा

अयंभावः।दाधाघ्वितिसूत्रेप्रणिदयते प्रणिधयतीत्यत्रणत्वसिद्धयेभाष्यकारैरित्थंसिद्धान्तितम्।णत्वविधौघुमेत्यस्यस्थानेघुप्रकृतिमाङिति पठनीयम्।घुश्चप्रकृतिश्चमाङ्चेतिद्वन्द्वः।प्रकृतिश्चकस्येत्याकाङ्क्षायांसन्निधानात्पूर्वोत्तरयोरेव।अतोनकाप्यव्याप्तिः।नापिमामानद्रत्यत्रमीनातिमिनोत्योश्चातिव्याप्तिः।माङोङकारानुबन्धस्यैवोपात्तत्वादिति।दिग्यादेशेनेति।दयतेर्लिटिद्वित्वप्राप्तंदिग्यादेशश्च।तत्रविशेषविहितेनदिग्यादेशेनद्वित्वशास्त्रस्यबाधः।पीव्यास्म्यान्द्वित्वंनबाध्यते।विषयसप्तमीमाश्रित्यलिडुत्पत्तेःप्रागेवतयोःप्रवृत्तत्वात्।दिग्यादेशविधौतुपरसप्तम्येवनतुविषयसप्तमी।लक्ष्यानुरोधात्।तदेतत्सूचयति।द्यतइति।स्थाघ्वोरिच्चाद्दात्मनेपदेष्वितिनानुवर्तितम्।परस्मैपदेघुमास्थेतिलुकःप्रवृत्तेः।डीङ्।विहायसाआकाशेन।चातुर्धुस्याकाशविहायसीइत्यमरः।विहायसामित्यनाकारःपाठः।मानवध।अभ्यासस्यविकारआभ्यासःसचेत्त्वमेव।तथाहि।दीर्घश्रुत्याचइत्युपस्थितम्।नचमानादीनामभ्यासविकारभूतोचइकारादन्यःसंभवति।यदितुह्रस्वइत्येवगृह्येततर्हितद्धितनिर्देशोव्यर्थःस्यात्।सहिअभ्यासेईकारश्रवणार्थंक्रियते।अन्यथाऽजन्तस्याभ्यासस्यविधीयमानोदीर्घःहलादिःशेषमात्रंप्रतीसूतांनतुसन्वदित्त्वमपितदेतदाह।इकारस्येति।अत्रन्यासकारः।धातोःकर्मणइतिसूत्रेवाग्रहणंविभज्यत्रिसूत्रीविशेष — तयासंबध्यते।साचव्यवस्थितविभाषा।तेनेहसूत्रद्वयोऽर्थविशेषोपहितेभ्यएवसन्निति।सचविशेषोमुनित्रयेणसाक्षादनुक्तोऽपिवृत्तिकारादिभिरुपनिबद्धः।तद्दर्शयति।गुपेर्निन्दायामित्यादिना ॥ ७ गोपयमनेइत्याद्यर्थमावश्यकीतिपरे।उपनिबद्धइति।परस्मैत्रेचिकित्सः।जुगुप्सा।लिशमेत्यादौविशेषार्थप्रतीतेर्विचिकित्सानुसंशयइतिकोशबलात्।गुपगोपनेसत्रगोपनेइतिधातुवृत्तिप्रयोगाच्चविशेषलाभइत्यपिबोध्यम् ॥

आद्युदात्तः सिद्ध्यतीति। यतिअतोलोपे यदन्तस्य द्व्यच्कत्वात्। उक्थ्यइति तुच्छादसमिति भावः। यदुत्पत्तिवेलायान्द्व्यच्कमित्यर्थेप्यदोषमाह। अजन्तभूतेति। अतोलोपइत्यादावार्द्धधातुकइति विषयसप्तमीति पूर्वलोपेकृते भौतपूर्विकाजन्तत्वमादाय यदिति यतोनावइतिसूत्रेभाष्येस्पष्टम्। एवञ्च यदुत्पत्तिवेलायामपि द्व्यच्कत्वमिति भावः।। विषयसप्तम्यामपि तद्धितार्थविषये जातस्य द्विगोर्निमित्तत्वं यथा तद्धिते द्विगोर्लुगनपत्य इत्यत्रोक्तं तथा लोपस्यापि परनिमित्तकत्वमस्तीति गणयतीत्यादौ अल्लोपस्य स्थानिव

सन्यङोः। सन्नन्तस्येत्यादि। यत्तु प्राचा सन्यङोरिति सप्तमीमाश्रित्य सनि यङि च परे इति व्याख्यातम्। तन्न। प्रतीषिषति। अटाट्यते इत्यादौ सन्यङोः प्रकृतिभागस्यैव द्वित्वापत्तेः। आट अट तुरित्यादौ लिट् प्रकृतेर्यथा। न हि निमित्तत्वाविशेषे लिटो न द्वित्वम्। सन्यङोस्तु तदिति संभवति। यत्त्वत्र प्राचोक्तं शपोऽकारेण सिद्धे सन्यङोरकारोच्चारणमजादेरिति द्वित्वार्थम्। तेन यसनो द्वित्वमिति। तन्न। निमित्तस्य कार्यित्वायोगात्। न चाकारोच्चारणस्य सामर्थ्यमिति युक्तम्। अकारफलानां बहूनां सत्त्वात्। तथा हि। पापचक इत्यादावल्लोपस्य स्थानिवत्त्वादत उपधाया इति वृद्धिर्न प्रवर्त्तते। किञ्च दित्साधित्सलिप्सादिभ्य एकाच्त्वाभावाद्यङ् न। अपि च। दित्स्यन्धित्स्यमित्यत्राचो यतिकृते यतोनाव इत्याद्युदात्तः सिद्ध्यति। तथा च प्राचाप्युक्तम्। अजन्तभूतपूर्वादपि यत्। दित्स्यं धित्स्यमिति। किञ्च। पिपठिषिब्राह्मणकुलानीत्यत्राल्लोपस्य स्थानिवत्त्वाद्झलन्तलक्षणो नुम् न। अपि च। यस्य हल इत्यत्र यस्येति संङ्घातग्रहणमहर्यीदित्यादौ यलोपश्चारस्यर्थमिति सिद्धान्तः। तथा चापापविशेष्यादौ यलोपोप्यकारफलम्। अपि च। पापच्यतेरचो यत्। पापच्यः। हलन्तत्वे तु ण्यति कथञ्चिदल्लोपे णित्सु उपधावृद्धौ न जोरिति कुत्वे पापाक्य इति स्यात् ॥

[illegible] द्विर्नेति दोद्यम्। ननु हलन्तादङ्गादुत्तरस्य यस्य लोप इत्यर्थे नहर्यिते त्यादौ लोपश्चावृत्तौ स्फुट। तद्ग्रहणेन फलमत आह। अपि च पापच्यतेरिति। कथञ्चिदिति। उक्तव्याख्यानेनेत्यर्थः। पापाक्य इति। न च निष्ठायामनिट्त्वमुक्तेः कुत्वन्दुर्लभं यस्य कुत्वन्तस्य निष्ठायामनिट्त्वेनादोषादिति भावः ॥

भिन्नएवेति। चुरादिष्विदृति शेषः। तेनाञ्चसन्मात्रफलकः पाठ इति भावः। परैस्त्वेवं सति स्यादाद्यनुदात्तेत्सु गुपगोपन इत्यादिः पाठोऽनर्थकः। तस्माच्छुद्धिकरणा अप्येते। अत एव दाधर्तीति सूत्रे निजेर्यङ्लुगन्तादात्मनेपदमिति भाष्यं संगच्छते। अन्यथा णिजन्ताद्यङ्णिलोपयोरपि निपात्यतावक्तव्या स्यात्। गुपादिष्वनुबन्धकरणसामर्थ्या

अपि चापापचिफलस्त्वयमेवापापचिश्वेति। यङन्तस्याप्यजन्तत्वेऽचः कर्मकर्त्तरीति च्लेश्चिणि विकल्पः सिद्ध्यति। तस्मात्त्यङोरिति पक्ष्यैव युक्ता। अत एव यङ्लुकि प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वं सिद्ध्यति। परसन्नस्यान्त्वङ्गकार्यत्वान्न लुमतेति निषेधः प्रवर्त्तेतेति दिक्। दानशानौ चेति। आर्जवनिशानार्थाविति भावः। अर्थान्तरे त्विति। गोपनादौ धातुपाठोपात्ते इत्यर्थः। चुरादय इति। तथा चानुपूर्वीमात्रसाम्येऽपि भेदाद्यो भिन्ना एवेत्यर्थः। भेदाभ्युपगमस्य फलमाह। अनुबन्धसेत्यादिना। अभेदे तु सनन्तादिवाकर्त्तृगफलाण्यन्तादपि तङ् स्यादिति भावः। इड्गुणाविति। यद्यपि हलन्ताच्चेति सनः कित्त्वेनापि गुणः सुपरिहरस्तथापीडभावायोक्तहेतुरनुसर्त्तव्यः। एवञ्च गुणप्रसङ्गस्यैवाभावात्किङ्त्वान्वेषणेनेति भावः। मीमांसत इति। मनूलरतन्त्रे वाचस्पत्यादौ मीमांसाशब्दो माङ् मान इत्यस्माद्व्युत्पन्न इत्युक्तम्। तद्यदि समर्थनीयमित्याग्रहस्तर्हीत्थमाशयः कल्प्यः। इह सन्प्रकृतिस्तावदात्मनेपदार्हा चुरादिका द्विधैवेति स्थितम्। मानपूजायामित्यादितिमान[illegible]ङ्क्व्याख्येय एव। न हि तस्मादयं सन्, एवं स्थिते सन्प्रकृतिरनुदात्तेत्कैवेति मानाभावाड्डिदेवास्तु। नुकूचसूत्रे निपात्यताम्। मुण्डमिश्रादिसूत्रे हलकलयोरदन्तत्ववत्। न च वैयाकरणानामुपायेष्वाग्रहः। उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता इत्युक्तेः। न चैवं सनि मीमेतीस्प्रसङ्गः ॥

सनन्तादात्मनेपदमित्यस्य भाष्यस्य सन्प्रकृतिष्वर्थविशेषविशिष्टेषु तत्करणसामर्थ्यादित्यर्थः। मूलद्वयमपि रत्नकुरोपेनेत्याहुः। भङ्क्तेति। पूजायां दशान्मानो जिज्ञासापूर्वके विचारे सनित्येवं भङ्ग इत्यर्थः। तस्मादिति। तदर्थकादित्यर्थः। इत्युक्तेरिति। माङ् माने इत्यस्य मामे पठितान्माङो विचारे सनित्यर्थः कर्त्तव्यः। अर्थविशेषे ङिकरणात्सनन्तादात्मनेपदम् ॥

श्वादिसाहचर्येणेति।अतएवप्रनिमीमांसतइत्यत्रनेर्गदेतिणत्वंन।तत्साहचर्येणेच्छासन्नन्तएवमाङ्ग्रपितत्स्वरतेः।अनुदात्तेतश्चहलादेरितियुच्तस्मान्न।परेणसनाशंसेत्सुप्र
त्ययेनबाधात्।अतएवतितिक्षुःक्षमितासमीत्यमरोबीभत्सुरित्यर्जुननामचसङ्गच्छतइतिदिक्।प्रामादिकएवेति।भाष्येऽदर्शनादितिभावः।प्रपञ्चितमिति।वस्तुतस्तुगुप्तिच्कितम

श्वादिसाहचर्येणेच्छासन्नेवतद्विधानादिति।रभराभस्ये।राभस्यमुपक्रमः।वेःस्कन्देरनिष्ठायाम्।अषोपदेशत्वादप्राप्तेविभाषेयम्।यत्तुसात्पदाद्योरितिनिषेधे
प्राप्तेइति।तन्न।निषेधस्यप्राप्तिपूर्वकत्वात्।।कृत्येयेदमिति।एतच्चमाधवादिग्रन्थेस्पष्टम्।प्राचातुविष्कन्दतीत्युदाहृतंतन्नेतिभावः।नसंबुद्धातइति।तथाचप
र्युदासाविषयत्वात्परेरुत्तरस्यलिङन्तेपिषत्वंभवत्येवेतिभावः।अतएवाह।परिष्कन्दतीति।णमप्रह्वत्वे।अस्यक्वचिदुदित्पाठःप्रामादिकः।अस्यपदित्वे।ऽदित्वा
दङ्।प्राचात्वनंसीत्।अनंसीदितित्विजमुदाहृतंतत्प्रामादिकम्।कृषमृषेतिवार्तिकमहोस्यपेःप्रसक्तेपोषिप्रामादिकएवेत्यवधेयम्।यमउपरमे।के।चिदुम
मिदितंपठन्ति।कितनिवासे।चिकित्सतीति।रोगमपनयतीत्यर्थः।प्राज्ञोविचिकित्सति।निगृह्णाति।क्षेत्रेतृणंचिकित्सति।अपनयतिनाशयतिवेत्यर्थः।व्याध्र
यङ्श्चिकित्सत्वितिखण्डनम्।तद्व्याख्यावसरेचिकित्सतामितितुयुक्तमितिवर्धमानः।तत्रवर्धमानस्यप्रमादइतिशब्दकौस्तुभेप्रपञ्चितम्।तदेतद्ध्वनय
ति।कश्चिदिति।भजस्वेवायामर्दर्दंभस्यति।भस्यतइति।यत्तुहिरण्यदाअमृतत्वंभजन्तेइतिमन्त्रेभजिष्यन्तइत्यर्थइतिवेदान्तग्रन्थेषुक्तंविहृष्यतेतल्लेखकप्र
मादात्।डुवप्।ड्वितःक्त्रिः।उप्त्रिमम्।डुवबितिक्वाचित्कःपाठःप्रामादिकः।वेञोवयिः।इकारइति।नत्वित्संज्ञकः।नुमापत्तेरितिभावः।वयेसासावभावादिति।
नहितासौविद्यमानत्वंस्थानिवद्भावेनलभ्यमशास्त्रीयत्वात्।नचात्स्तास्वदितिनिषेधस्यशास्त्रीयत्वादतिदेशोऽस्त्वितिवाच्यम् ॥

नाअनुदात्तेतइतिभाष्यस्वरसात्कितेरनुदात्तेत्त्वमेवोचितंविचिकित्सतीतिछान्दसंकैयटस्यप्रमादइतिवर्धमानाशयमन्ये।प्रामादिकइतिमाधवादिविरोधादितिभावः।नत्वित्संज्ञकइति।
अनुनासिकपाठाभावादित्यभिप्रायः।उच्चारणार्थानामपीत्संज्ञकत्वमितिभाष्यमतेभाविधातुत्वमादायेकानिर्देशोयमितिनत्तुमितिबोध्यम् ॥

अल्विधित्वादिति। यद्यप्युपदेशइत्वस्यतत्रापकर्षणेनस्यान्युपदेशेजन्तत्वमस्त्येवेति नतदर्थस्यानिवत्त्वापेक्षोपदेशेत्वतद्त्वस्यप्राप्तेश्चतथाप्युपलक्षणमिदम्। प्रत्यासत्त्या
यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशप्रवृत्तिर्मृग्यतेतस्यधर्मस्यशास्त्रीयस्यैवग्रहणान्नदोषइतिबोध्यम्। गुणायादेशयोरिति। गुणेइगन्तत्वाभावाद्वृद्ध्यप्रसक्त्यायादेश
इतिभावः। नसिचीति। सिचिवृद्धेर्येननाप्राप्तिन्यायेनान्तरङ्गबाधकत्वादितिभावः। ज्ञापनार्थमिति। न्यायसिद्धस्यैवबोधनार्थमित्यर्थः। नत्वपूर्वमिदंज्ञापकमितिभ्रमितव्यन्तत्रा
अचइत्सूत्रेऽल्विधित्वात्। वदम्यकार्यांवावि। उवदिथेति। कूत्वेयदूदिथवचस्त्वपनात्मजायाइतिपल्लवस्यप्रमादएव। श्वयतेरः। पररूपमिति। अतोलोपस्तुनभवति। आर्द्धधा
कोपदेशकालेयदकारान्तमितिव्याख्यातत्वात्। अश्वयीदिति। नन्विहान्तरङ्गत्वाद्गुणायादेशयोःकृतयोर्यान्तत्वादेववृद्धिनिषेधोऽस्तुकिंण्विग्रहणेनेतिचेत्सत्यम्। नसिच्य
न्तरङ्गत्वमस्तीतिज्ञापनार्थंण्विग्रहणम्। तेनचिरिणोतिजिरिणोत्योर्यङ्लुगन्तानाञ्चिनीप्रभृतीनाञ्चसिचिअचिरायीत्। अजिरायीत्। अचेचायीदित्यादिसिद्धमिति।
चुलुंपतीति। लुम्पतीत्यर्थः। उक्तंहिकविकल्पद्रुमे। चुलुंलोपेइतिकास्यनेकाज्ग्रहणंचुलुंपाद्यर्थमितिवार्त्तिकेव्यवहृतोयम् ॥ ॥ इतिश्व्यादयः ॥ ॥ ऋतेरीयङ्।
ऋतिःसौत्रइति। तान्तोयंधातुरिकानिर्दिष्टः। वंचिलुंच्यृतश्चेत्यनुवादात्। यत्तुवदन्ति। ईयङोदीर्घोच्चारणात्सान्तोयम्। इदन्तत्वेहिसवर्णदीर्घेणेवसिद्धेरियङमेवकुर्यादि
ति। तन्न। रारनेकाचइतियणापत्तौसवर्णदीर्घस्यदुर्लभत्वात्। नचयङेवास्तु। अकृत्सार्वेतिदीर्घोपपत्तेरित्युक्तेसोचिता। सत्यङोरितिह्रस्वापत्तेः ॥
संभवादित्यन्यत्रविस्तरः ॥ इतिश्व्यादयः ॥ अनुवादादिति। ऋदन्तधातोस्तुनतत्रग्रहणंव्याख्यानात्। कमेर्णिङितिसाहचर्याच्चहलन्तस्यैवग्रहणंबोध्यम्। यणापत्ताविति। न
चतक्रकौण्डिन्यन्यायेनधात्ववयवभिन्नस्यैकारभिन्नस्यैववाचोनिमित्तत्वमितिवाच्यम्। ईदृशेस्थलेतन्न्यायाविषयस्यान्यत्रोपपादितत्वात् तुल्यन्यायेनणिचिगुणाद्यनापत्तेश्चेति
भावः। इत्युत्प्रेक्षेति। तेनसिद्धेईकारोच्चारणन्तान्तत्वेप्रमाणमित्युत्प्रेक्षेत्यर्थः। ऊयप्रत्ययेनसिद्धेईयङ्करणन्तान्तत्वज्ञापनार्थमित्यन्यत् ॥

अनुवृत्तेरिति।अर्थान्तरासंभवाच्चहलादेर्हेरित्यर्थइतिभावः।उच्चारणार्थइति।अत्राङ्गेनप्रत्ययाक्षेपस्तत्रहकाररूपप्रत्ययस्यहान्तस्यचासंभवात्तस्यावयवहसेत्यर्थः।तेनधाग्हरिरित्यादौनदोषः।हुझल्भ्यइतिविशेषणन्तुश्रुतत्वाद्धस्यैव।एवञ्चहस्येटाव्यवहितत्वाद्रुदिहीत्यादौनदोषः।अत्तादिस्तत्रतुनधिः।हलस्माल्विधित्वेनस्थानिधर्मत्वाभावेनचस्थानिवत्त्वाभावात्।स्पष्टञ्चेदंप्रकृतसूत्रेभाष्ये।अतएवपुष्णीतात्तुजहितात्शिष्टात्स्तादित्यादौशानज्झौआचहौ,शाहौ,घ्वसोरेद्धावितिन।तत्रापिहादावित्यर्थात्।पूर्वव्याख्यानेतुपरत्वा

कृपायाञ्चेत्येकइति।ऋतीयतइतिकृपापर्यायेपुऋतीयतेस्यात्।घृणयोरितिनानार्थवर्गेचभट्टमल्लेनाभिधानात्।अर्तेनञ्चऋतीयाचहृणीयाचघृणार्थकाइति।जुगुप्साकरुणोभयवाचिनाघृणाशब्देनार्त्तेनादेरर्थनिर्देशंकुर्वन्नमरोपिऋतीयतेर्द्ध्यर्थतायांप्रमाणमितिधातुचन्द्रोदयेउक्तत्वाच्चेतिभावः।शेषत्वादिति।यत्तुप्रसादकृताइयङ्भावेआर्त्तिष्टेत्यादावात्मनेपदमुदाहृतम्।तत्प्रामादिकमितिभावः।हुझल्भ्यो।घसिभसोर्हलीत्यतोहलीत्यनुवृत्तेरिडादेर्न।रुदिहि।स्वपिहि।अत्तादिति।धित्वासत्त्वाच्चातङ्।स्थानिवद्भावेनपुनर्धित्वन्तुन।सकृद्गतावितिन्यायात्।यद्वाहेर्धिरितिस्थान्यादेशयोर्हेधोरपीकारउच्चारणार्थः हकारस्यधकारआदेशः।तेनहतीत्यपिनानुवर्त्यम्।नापितातङःप्रसङ्गः।अनुदात्तो।वनतीतरेषामिति।वनतेर्व्यभिचारान्नविशेषणमितिभावः।यत्तुप्रागेषामनुनासिकस्यलोपइत्युक्तम्।तन्न।नमिमन्योर्मिहनहसुचमस्तादीनामनन्त्यस्यापिलोपप्रसङ्गात्।अनुदात्तोपदेशादिति।अनुनासिकान्ताइतिभावः।तनोत्यादयइति।अत्रापिप्राग्वत् ॥

सातङिसकृद्गतिन्यायेनैतानिनाद्दइष्टञ्चस्थानिवत्सूत्रेभाष्येस्पष्टम्।नचासंभवरूपविरोधाभावात्कथंपरत्वेनव्यवस्थेतिवाच्यम्।युगपत्प्रवृत्तौस्वस्वनिमित्तानन्तर्याभावरूपासंभवसत्वात्नाद्यासंभवएवचविप्रतिषेधशास्त्रप्रवृत्त्युपयोगी।स्थानिवद्भावस्तुकार्यप्रवृत्तेरनन्तरंनप्रवृत्तिकालइतियुगपदसंभवःस्पष्टएवेतिदिक्।ध्वनितञ्चेदंस्थानिवत्सूत्रेभाष्ये ॥

अल्विधित्वादिति।यद्यप्युपदेशइत्वस्यतत्रापकर्षणेनस्थान्युपदेशेजन्तत्वमस्त्येवेति नतदर्थंस्थानिवत्त्वापेक्षोपदेशेत्वतद्वत्त्वस्यप्राप्तेश्चतथाप्युपलक्षणमिदम्।प्रत्यासत्त्या
यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशप्रवृत्तिर्मृग्यतेतस्यधर्मस्यशास्त्रीयस्यैवग्रहणान्नदोषइतिबोध्यम्।गुणायादेशयोरिति।गुणेइगन्तत्वाभावाद्वृद्ध्यप्राप्त्यायादेश
इतिभावः।नस्निचिति।स्निचिवृद्धेर्येननाप्राप्तिन्यायेनान्तरङ्गबाधकत्वादितिभावः।ज्ञापनार्थमिति।न्यायसिद्धस्यैवबोधनार्थमित्यर्थः।नत्वपूर्वमिदंज्ञापकमितिभ्रमितव्यन्तत्त्वा
अचइत्सुक्तेरल्विधित्वात्।वक्ष्यमाणायांवावि।उवदिथेति।कूत्वेयदूदिषवचस्तपनात्मजायाइतिपल्लवस्यप्रमादएव।श्वयतेरः।पररूपमिति।अतोलोपस्तुनभवति।आर्द्धधा
कोपदेशकालेयदकारान्तमितिव्याख्यातत्वात्।अश्वयीदिति।नन्विहान्तरङ्गत्वाद्गुणायादेशयोःकृतयोर्यान्तत्वादेववृद्धिनिषेधोस्तुकिंणिश्विग्रहणेनेतिचेत्सत्यम्।नसिच्य
न्तरङ्गत्वमस्तीतिज्ञापनार्थंणिश्विग्रहणम्।तेनचिरिणोतिजिरिणोत्योर्यङ्लुगन्तानाञ्ज्ञिनीप्रभृतीनाञ्चसिचिअचिरायीत्।अजिरायीत्।अचेचायीदित्यादिसिद्धमिति।
चुलुंपतीति।लुम्पतीत्यर्थः।उक्तंहिकविकल्पद्रुमे।चुलुंलोपेइतिक्वाप्यनेकाज्ग्रहणंचुलुंपाद्यर्थमितिवार्त्तिकेव्यवहृतोयम् ॥ ॥इतिभ्वादयः॥ ॥ऋतेरीयङ्।
ऋतिःसौत्रइति।तान्तोयंधातुरिकानिर्दिष्टः।वंचिलुंचऋतश्चेत्यनुवादात्।यत्तुवदन्ति।ईयङोदीर्घोच्चारणात्तान्तोयम्।इदन्तत्वेहिसवर्णदीर्घेणैवसिद्धेरियङमेवकुर्यादि
ति।तन्न।रारनेकाचइतियणापत्तौसवर्णदीर्घस्यदुर्लभत्वात्।नचयङेवास्तु।अकृत्सार्वेतिदीर्घोपपत्तेरित्युक्तेसोचिता।सन्यङोरितिद्वित्वापत्तेः ॥
संभवादित्यन्यत्रविस्तरः॥ इतिभ्वादयः॥ अनुवादादिति।ऋदन्तधातोस्तुनतत्रग्रहणंव्याख्यानात्।कमेर्णिङितिसाहचर्याच्चहलन्तस्यैवग्रहणंबोध्यम्।यणापत्ताविति।न
चतक्रकौण्डिन्यन्यायेनधात्ववयवभिन्नस्यैकारभिन्नस्यैववाचोनिमित्तत्वमितिवाच्यम्।ईदृशेस्थलेतन्न्यायाविषयस्यान्यत्रोपपादितत्वात्।तुल्यन्यायेनणिचिगुणाद्यनापत्तेश्चेति
भावः।इत्युक्तेश्चेति।तेनसिद्धेईकारोच्चारणन्तान्तत्वेप्रमाणमित्युक्तेश्चेत्यर्थः।ऊयप्रत्ययेनसिद्धेईयङ्करणन्तान्तत्वज्ञापनार्थमित्यन्यत् ॥

अनुवृत्तेरिति। अर्थान्तरासंभवाच्च हलादेर्हेरित्यर्थ इति भावः। उच्चारणार्थ इति। अत्राङ्गेन प्रत्ययाक्षेपस्तत्र हकाररूपप्रत्ययस्य हान्तस्य चासंभवात्तस्य यावयवहस्येत्यर्थः। तेन धाग्हरिरित्यादौ न दोषः। हुझल्भ्य इति विशेषणन्तु श्रुतत्वाद्धस्यैव। एवञ्च हस्येटा व्यवहितत्वाद्रुदिहीत्यादौ न दोषः। अन्तादिवत्त्वन्तु न धिः। हल्त्वस्याल्विधित्वेन स्थानिधर्मत्वाभावेन तस्यानिवत्त्वाभावात्। स्पष्टञ्चेदं प्रकृतसूत्रे भाष्ये। अत एव पुनीतात् जहितात् शिष्टात् स्तादित्यादौ शानज्झौ आ च हौ, शा हौ, घ्वसोरेद्धाविति न। तत्रापि ह्यादावित्यर्थात्। पूर्वव्याख्याने तु परत्वा

रूपायाञ्चेत्येक इति। ऋतीयत इति कृपापर्याये पुत्रऋतीयते स्यात्। घृणयोरिति नानार्थवर्गे च भट्टमल्लेनाभिधानात्। अर्त्तेनञ्च ऋतीया च हृणीया च घृणार्थका इति। जुगुप्साकरुणोभयवाचिना घृणाशब्देनार्त्तेनादेरर्थनिर्देशं कुर्वन्नमरोऽपि ऋतीयतेर्द्व्यर्थतायां प्रमाणमिति धातुचन्द्रोदये उक्तत्वाच्चेति भावः। ऐषत्तादिति। यत्तु प्रसादकृता ईयङ्भावे आर्त्तिष्टेत्यादावात्मनेपदमुदाहृतम्। तत्प्रामादिकमिति भावः। हुझल्भ्यो। घसिभसोर्हलीत्यलोपः हलीत्यनुवृत्तेरिडादेर्न। रुदिहि। सपिहि। अत्वादिति। धित्वात्परत्वाच्च तातङ्। स्थानिवद्भावेन पुनर्धित्वन्तु न। सकृद्गताविति न्यायात्। यद्वा हेर्धिरिति स्थान्यादेशयोर्द्वयोरपीकार उच्चारणार्थः हकारस्य धकार आदेशः। तेन हतीत्यपि नानुवर्त्यम्। नापि तातङः प्रसङ्गः। अनुदात्तो। वनतीतरेषामिति। वनतेर्व्यभिचारान्न विशेषणमिति भावः। यत्तु प्राचा यमामनुनासिकस्य लोप इत्युक्तम्। तन्न। नमिमन्योर्मिहनहमुचमरुजादीनामनन्त्यस्यापि लोपप्रसङ्गात्। अनुदात्तोपदेशादिति। अनुनासिकान्ता इति भावः। तनोत्यादय इति। अत्रापि प्राग्वत् ॥

त्तातङि सकृद्गतिन्यायेनैतानि न। इदञ्च स्थानिवत्सूत्रे भाष्ये स्पष्टम्। न चासंभवरूपविरोधाभावात्कथं परत्वेन व्यवस्थेति वाच्यम्। युगपत्प्रवृत्तौ स्वस्वनिमित्तानन्तर्याभावरूपासंभवसत्त्वात् तादृशासंभव एव च विप्रतिषेधशास्त्रप्रवृत्त्युपयोगी। स्थानिवद्भावस्तु कार्यप्रवृत्त्युत्तरं न प्रवृत्तिकाल इति युगपदसंभवः स्पष्ट एवेति दिक्। ध्वनितञ्चेदं स्थानिवत्सूत्रे भाष्ये ॥

वृद्धिर्नेति।अकारस्यसिच्परत्वेनविशेषणात्अस्यस्यतुनवृद्धिः।ण्यल्लोपावितिपूर्वविप्रतिषेधेनाल्लोपेनबाधादितिभावः।वधहिंसायामितिस्वतन्त्रस्यवदन्तत्वप्रतिपादकभाष्यप्रामाण्येनतस्येदृशेविषयेप्रयोगाभावानुमानादितिबोध्यम्।तत्फलमिति।प्रत्याख्यानमित्यादौरुत्वाभावादिरूपम्।विधिसामर्थ्यादिति।नचात्रापिखशादेरेवानुकरणंलक्षणचशसंपन्नञ्चयत्त्वमितिनसिद्धलोपयोगइतिवधादेशोदन्तइति।तेनावधीदित्यत्रनोहलादेरितिवृद्धिर्नेतिभावः।चसिङ्।।असंदर्शनेपीति।विभ्राड्रूपाभिचष्टेशचीभिरित्यादौतथाव्याख्यातत्वादितिभावः।अन्तेइदितइति।नुन्धिधोगोःपदान्तइतिसूत्रादन्तग्रहणानुवृत्तेरितिभावः।एवञ्च चसिङ् इकारस्थानेअकारएववक्तुमुचितः।खशादिरिति।तत्फलन्तुप्रागेवप्रपञ्चितम्।अस्यतिवक्तीति।ख्यातीत्यत्रविधिसामर्थ्याद्यत्वंनासिद्धम्।स्वतन्त्रस्यख्यातेःसार्वधातुकमात्रविषयतायावक्ष्यमाणत्वात्।ईशःसे।ईडजनोर्ध्वेच।अत्रसेध्वेइत्येतयोरनुकरणम्।अविभक्तिकश्चनिर्देशइत्याकरः।यत्तुप्राचास्योर्देईडजनोरितीड्जजनिर्णीत्युक्तम्।यच्चलिङिएडिध्वमित्युक्तन्तदाकरविरोधादुपेक्ष्यम्।यद्यपिजनेःश्यनाभाव्यन्तथापिछान्दसत्वात्श्यनोलुकिउपधालोपाभावेचजनिषेजनिध्वेइतिबोध्यम्।णिसिचुम्बने।वभ्रामेति।उदग्रेतवेतिमन्त्रेनिंसानंजुह्वोमुखइतिदन्त्यान्तस्यैवप्रयोगादितिभावः।किंचनुम्विसर्जनीयशर्व्यवायेपीतिसूत्रेवृत्तिन्यासपदमञ्जर्यादयःसर्वेग्रन्थाअस्यतालव्यान्तत्वेऽसङ्गताःस्युः।तत्रहिनुमादिभिःप्रत्येकंव्यवायेषत्वमिष्यते।तेननिंस्तेनिंस्वेत्यत्रनेत्युक्तम्।अस्यतालव्यान्तत्वेतुव्रश्चादिषत्वेषढोरितिकत्वेकवर्गत्वेनषत्वंदुर्वारमितिकथंप्रत्युदाह्रियेत।णिजिशुद्धौ।सेट्।व्याघ्रभूतिनाणिजंसिचिमितिनिरनुषङ्गस्यपठितत्वेनजौहोत्यादिकस्यैरितएवतत्रग्रहणात्।शिजिअव्यक्ते।तालव्यादिः।योषेवशिङ्क्तेवितताधिधन्वन्नितिदर्शनात्।क्तप्रत्ययेशिञ्जितम्।आवश्यकणिन्यन्तान्ङीपिशिंजिनी।भूषणानान्तुशिञ्जितमित्यमरः।मौर्वीज्याशिञ्जिनीगुणइतिच।तौरैःशिंज इलयसुभगेरित्यत्रानुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यत्वात्शताबोध्यः ॥ङ्वाच्यम्।लौकिकेप्रयोगेखशेःसस्यक्वाप्यसत्त्वेनतदनुकरणस्यवक्तुमशक्यत्वात्कृतयत्वप्रयोगस्यख्यानामेवानुकरणादितिभावः।स्पष्टाचेयंरीतिर्दाधाघ्वितिसूत्रेभाष्ये।अविभक्तिकश्चेति।तेनरोड्डुमितिसिद्ध्यति।वृत्तिन्यासेति।भाष्येत्यपिबोध्यम्।तत्रापिनिंसेःप्रतिषेधोवाच्यः।निंस्तेनिंध्वेइत्युक्तेः।षत्वन्दुर्वारमिति।तथाचनिङ्क्ष्वेइतिस्यादितिभावः।तालव्यान्तस्याप्यङ्गीकारेणबाधकमित्यन्ये।निरनुषङ्गस्येति।निरनुस्वारस्येत्यर्थः।वार्तिकमतेनेति।परसप्तमीतितद्व्याख्यात्रेकदेशीमतेनेत्यर्थः।भाष्येति।विषयसप्तमीतिसिद्धान्तिमतेइत्यर्थः।आद्यन्द्विर्वचनेचीत्यत्रभाष्येऽन्त्यन्द्वितीयेसप्तमेचभाष्येस्पष्टम् ॥

अनैमित्तिकत्वादिति।आद्यमप्यत्रस्तुवचनम्।उदीतइति।इदंभावेनिष्ठायांसप्तम्यन्तम्।उदयकालइत्यर्थः।उदयतीतिशेषोभवतीतिवेत्यन्ये।आविर्भावार्थकत्वादिति।नचव्यतीहारस्यानेक
घूङ्।सुषुविषइति।स्वरतावुक्तेनन्यायेनेहनित्यमिट्।सोतासवितेति।स्वरतिसूतीतिवेट्।तुरुस्तुशम्यमः।अपिदर्थमिति।यत्तुप्राचाएभ्यःपरस्यपितःसार्वधातुकस्ये
तिव्याख्यातन्तत्प्रामादिकमितिभावः।स्मरन्तीति।न्यासकारवर्द्धमानादयः।यत्तुपदमञ्जर्यामुत्तवीतीत्यत्रबहुलंछन्दसीतिवापोलुगितिदृश्यतेतच्छम्यमोर्वक्ष्यमाणं
लेखकप्रमादात्पूर्वंपतितमितिमाधवः।आपिशलास्तुतुरुस्तुशम्यमःसार्वधातुकेछन्दसीतिपठन्ति।इण्गतौ।भौवादिकस्येति।आशीर्लिङीतिभावः।विध्यादौतुसमी
यादितिनभवत्येव।केचित्तुवीगतीत्यत्रदीर्घमीकारंप्रश्लिष्टमाहुरित्यनुपदंवक्ष्यतेतन्मतेविध्यादावपिभवत्येवेत्यवधेयम्।वार्त्तिकमतेनाह।लावस्थायामिति।भाष्य
मतेनाह।विवक्षितेइति।उभयथापिद्विर्वचनेचीतिसूत्रंनेहप्रवर्त्तते।आद्येऽज्निमित्तत्वाभावात्।द्वितीयेत्वनैमित्तिकत्वादितिभावः।वीगति।एकदेशिमतमाह।अत्रेका
रोपीति।तथाचदीर्घोपक्रमेकविकल्पद्रुमः ईलकान्तिगतिव्याप्तिक्षेपप्रजननखादनेइति।लइत्यादेःसञ्ज्ञा॥प्रयुञ्जतेचानहितरणिरुदीतेदिक्पराधीनवृत्तिरितिकर्म
व्यतिहारेतङ्।नचनगतिहिंसार्थेभ्यइतिनिषेधःशङ्क्य।उत्पूर्वस्याविर्भावार्थकत्वात्।ख्याप्रकथने।सनेति।शर्परेविसर्जनीयइत्युक्तेः।यद्यस्मादप्यार्द्धधातुकंस्यात्त
र्हिसस्यानोद्दुर्वारइतिभावः।मामाने।नास्येति।ङितएवतत्रग्रहणमितिमेङ्धातौनिरूपितत्वादिति।विदाङ्कुर्वम्।लोटोलुगिति।आमइतिसूत्रेलेरित्यनुवर्त्तयतांमते
नेदमुक्तम्।निष्कर्षेतुतेनैवलुगित्यवधेयम्।उपसर्गप्रादुर्भ्याम्।प्रादुसश्चेति।प्रादुस्इतिसान्तमव्ययम्।प्रादुषइतिप्राचाङ्ग्रन्थेषुमूर्द्धन्यपाठःप्रामादिकः।मृजूशुद्धौ।
केचिदमुंषितंपठन्तितदनाकरम्।भिदादिपाठानर्थक्यापत्तेः।क्ङित्यजादाविति।एतच्चेकोगुणवृद्धीइतिसूत्रेभाष्यकारैरर्थतउक्तम्।रुदिर्। घित्वेनेति।सकृद्गतिन्यायात्।
प्रागुक्तरीत्यापिद्वेधासमाधानंस्मर्त्तव्यम्।जक्षभक्षबभ्रामेति।जक्षन्क्रीडन्रममाणइत्यादौजक्षादित्वस्यनिर्विवादत्वात्।सकलधातुवृत्तिकारैस्तथास्वीकाराच्चेतिभावः ॥
निष्ठत्वात्कथमत्रसइतिवाच्यम्।कालान्तरस्यतरणौभेदमारोप्यतदुपपत्तेरित्याहुः।सकृद्गतीति।अत्रयथापरत्वप्रवृत्तिस्तथोक्तम्।द्वेधेति।नदेवमुख्यम् ॥

निषेधापवादत्वादिति।श्नोर्ङित्वेपि नहि कार्यीति न्यायेन तन्निमित्तनिषेधाप्रवृत्तेः।अतएव शृणोतीत्यादौ गुण इति भावः।भङ्क्त्वेति।अयञ्जुसीति यकारप्रश्लेषेण अयकारादौ जुसीत्येवं रूपमि
त्यर्थः।भङ्क्त्वेत्यस्य सूत्रं भङ्क्त्वेत्यर्थः।णो नेति।तस्मिन्हि परत्वेन लोपं बाधित्वा गुक् स्यादिति भावः।ई हल्यघोरितीत्वं स्यादिति।ई हल्यघोरित्यतो हलीत्यनुवर्तमाने तदपवादभूतमिदं दरिद्रस्येतीत्वं स्यादि
जुसि च।अजादाविति।क्तस्याचीत्यतो चीत्यनुवर्त्तत इति भावः।यत्तु प्राचा प्राणुयुरित्यादौ यासुटो ङित्त्वान्न गुण इत्युक्तम् तन्न।जुसि गुणस्य निषेधापवादत्वात्।भङ्क्ता व्याख्यानन्तु
क्लिष्टत्वादुपेक्षितम्।भाष्यारूढस्य स्पष्टसमाधानस्यैव लाभात्।दरिद्रा।प्राचोक्तमनुवदति।यत्त्विति।निर्मूलमेवेति।यत्तु व्याख्यातमित्युक्तम्।आमो भावे आतो लोपे कृते आत औणल इत्यौत्वं ने
त्यादि तद्दूहितम्।तथाहि।आत औणल इत्यत्र प्राथम्यादौकारे कर्त्तव्ये औकारवचनं दरिद्रातेरालोपे धिश्रवणार्थं सदाम भावे लिङ्गमिति पारायणिकहरदत्तमाधवादिभिरुक्तं सर्वमप्युपन्यस्तं च।
तत्कथमौत्वस्याप्रवृत्तिः।यदपि दरिद्रेत्यस्य समर्थनानर्थमुक्तम्।उच्चारणे विशेषाभावादौकारविधानमिति।तदपि रभसात्।तस्मिन्पक्षे आमो दुर्वारत्वात्।विवक्षित इति।तेन दरिद्रे इत्यत्र श्याद्य
धेत्यादन्तलक्षणो न किन्तु पचाद्यजेवेति भावः।आदरिद्रुरिति।सिजभ्यस्तेति भेर्जुस्।लङः शाकटायनस्यैवेत्यादन्तलक्षणो विकल्पस्तु न भवति।परत्वात् श्नाभ्यस्तयोरित्यालोपे आकारान्तत्वाभा
भावादिति माधवः।न च दरिद्राभिरिति स्थिते आल्लोपात्परत्वादपवादत्वाच्च ई हल्यघोरितीत्वं स्यादिति वाच्यम्।अकृतव्यूह इति न्यायात्।ईत्वे हि हलादित्वं निमित्तम्।तच्च विनाशोन्मुखम्।जुसो भावि
त्वात्।वशकान्तौ।भाषायामस्य प्रयोगो दृश्यते।जयाय सेनान्यमुशन्ति देवा इति।इत्यदादयः।चत्वारः परस्मैपदिन इति।होष्य इत्यादयस्तु केषाञ्चित्प्रयोगाः प्रामादिका एव।कथन्तर्हि स्मरा
ग्नौ जुह्वानाः सुरभिघृतधाराहुतिशतैरिति सौन्दर्यलहरी।नायं शानच्।किं तु चानश्।डुभृञ्।ड्वितः क्त्रिः।भृत्रिमम्।चान्द्रास्तु द्वितं पठित्वा भरथुरित्युदाहरन्ति।माङ्।ई हल्यघोः।य
त्तु प्राचोग्रन्थं व्याचक्षाणैरुक्तम्।मिमीते।घुमास्थेतीत्वमिति तत्प्रामादिकम्।तत्रार्द्धधातुक इत्यनुवृत्तेः।तथा च काशिका।आर्द्धधातुक इत्यधिकारो न ल्यपीति योगं यावदिति ॥
त्वर्थः।केचित्तु परत्वाल्लोप इति माधवोक्तमसङ्गतम्।अङ्गसंज्ञासापेक्षलोपापेक्षया तन्निरपेक्षजुसोऽन्तरङ्गत्वात्।तस्माद्यदि विकल्पस्यानिष्टत्वे दृढतरं मानं तदा पूर्वप्रतिषेध एष्टव्यो व्यवस्थितविभा
षा वा नो चेत् विकल्पे दृष्टापत्तिरिति तत्त्वं माधव इत्युक्त्वा ध्वनितमित्याहुः ॥ इत्यदादयः ॥ श्रीसङ्कष्टनाशिनी विजयतेतराम् ॥

अतएवमातइति।लुग्विकरणपरिभाषानिरनुबन्धकपरिभाषाभ्यांमाग्रहणेनादादिकस्यापिग्रहइतिभावः।नचायंशप्विकरणएवास्तुमातइत्यादावदुपदेशात्परत्वेनसार्वधातुकानुदात्तत्वापत्तेः।गातेइति।
इत्यत्रायमदादावितिहरदत्तादिमते।लुङि सिचूलुक्यगातामित्यादावीत्वंनेत्यपिबोध्यम्।नतुदधेति।घायाः स्वधानाद्याख्यानाच्चेतिभावः।प्रत्याख्यातत्वादिति।एतदुपष्टम्भेनैवेतिशेषः।दी
र्घीभवत्येवेति।चखंसइत्यत्रदीर्घाभावायकिसाहचर्येणतिङ्भिन्नझलादेर्ग्रहणस्यावश्यकत्वेनेदंचिन्त्यम्।।इतिजुहोत्यादयः॥ नियमइति।स्यादयश्चतत्रोपसर्गात्सुनोतीत्यादिसूत्रस्थाः सितास्त्रा
अतएवमातःमाथःगाते गाथेइत्यादावीत्वंन।एतेनघुमास्थेतिसूत्रेक्ङितिकिम्दातीतियत्प्रत्युदाजह्रुस्तदपिप्रत्युक्तम्।अतएवतत्रवृत्तिकृतादाताधातेतिप्रत्युदाहृतं।दधत्तथेतिद्ध
इतिकृतद्वित्वाभ्यासकार्यस्यधाञोनुकरणम्।नतुदधधारणेइत्यस्येतिव्याचष्टे।द्विरुक्तस्येति।झषन्तस्येति।तेनदधातीत्यत्रनभवति।यद्येवम्धत्तइत्यादावपिनस्यात्।अल्लोपस्यस्थानिव
त्वेनाझल्परत्वादतआह।वचनसामर्थ्यादिति।किंच सत्यपिस्थानिवत्वेश्रुतिकृतंझषन्तत्वमाश्रयिष्यते।अपिचपूर्वत्रासिद्धेनस्थानिवदित्यपीहपरिहारोबोध्यः।यत्तुवदन्ति।नायंपरि
धहारःसाधुः।सवर्णादिषुनिषेधारम्भेणास्यप्रायिकत्वादिति।तन्न।वरेयलोपस्वरवर्जेद्विर्वचनादीनिनवक्तव्यानीतिवदताभाष्यकारेणसवर्णादीनांप्रत्याख्यातत्वात्।ननुधान्तोदधन्तइति।
ह्रस्वमुदाहरन्ति।अनुनासिकस्यक्विझलोरितिदीर्घस्तुछान्दसत्वान्नेतिभावः।सतित्वभिधानेदीर्घोभवत्येवेतिबोध्यम्।।इतिजुहोत्यादयः।षिञुतन्तुसन्ताने।परिषिञ्चेत्येवेति।स्यादिष्वेनाभ्यासस्येति
नियमोनेहप्रवर्त्तते।तत्रप्राक्सितादित्यनुवृत्तेः।अस्यचाप्राक्सितीयत्वात्तेनाभ्यासस्यषत्वंभवत्येवेति।परस्त्वादेशप्रत्यययोरितिषत्वमन्यथैवीदिति।सिवादीनांवाड्व्यवायेपीति
विकल्पः।उषदाहे।दन्त्योष्ठ्यादिर्मूर्द्धन्यान्तः।तथाचवैद्यके।त्रिकटुकपर्यायोप्योषशब्दः पठ्यते।नृतौ।इदित्करणंयस्यविभाषेत्यस्यानित्यत्वज्ञापनार्थम्।तेनधावितरिभ्राजपिधस्यादिसिद्धा
ति।पुष्यविकसने।ओष्ठ्यान्तः।अकर्मकः।तयानभःपुष्यतुकोरकेणेतिश्रीहर्षः।कालात्साधुपुष्प्यत्पच्यमानेष्वितिसूत्रम्।अच्।पुष्पम्।सञ्ज्ञायाङ्कन्।पुष्पकम्॥ ७ वीनामग्रहणेनइतिसितात्परे
सिन्षत्वव्यावृत्तिःस्यादितिभावः।अनुवृत्तेरिति।एवञ्चप्राक्सितात्स्यादीनामेवेतिनियमेननियमस्यसजातीयापेक्षत्वात्तत्प्रवर्त्तिनामेवस्यादिभिन्नानान्तेनव्यावृत्तिर्नपरभूतानामितिअभ्यासस्यपरिनिवि
न्यइतिषत्वंभवत्येव।एतच्चसुविनिर्दुर्भ्यइत्यत्रभाष्येस्पष्टमितिभावः।अनित्यत्वज्ञापनार्थमिति।अन्यथासेसिचीतिविकल्पितेट्त्वात्यस्यविभाषेत्येवसिद्धेश्वीदितइत्येतत्सवृत्तिर्व्यर्थैवेतिभावः ॥,

वर्त्ततइत्याश्रितम्।नचेहचङ्क्रन्तइतिलक्ष्यङ्क्वचित्प्रमितमस्तिनबाधातुवृत्त्यादिषुस्वीकृतंशिथिलमूलानपिपक्षानुपष्टभ्यरूपोत्प्रेक्षायान्तुदीर्घविशिष्टमेवरूपन्याय्य
म्।एतेनसंसन्तइत्यात्वाभावेऽनुनासिकलोपोपिनेतियदुक्तन्तदपिप्रयुक्तंप्रतिज्ञामात्रेणार्थासिद्धेः।तनोत्यादीनामितिगणनिर्दिष्टतयानुनासिकलोपप्राप्तेरभावाच्च।य
दपिक्विप्साहचर्य्यादित्यादितदपिन।नहितन्त्रकृदेवक्विब्गृह्यते।सङ्कोचेबीजाभावात्।अपितुसर्वप्रातिपदिकेभ्यइतिक्विबपि।तथाचराजानतिचर्म्मणतीत्या
दिमाधवादिभिरुदाहृतम्।७ बोद्ध्यम्।गणनिर्दिष्टतयेति।तेनतस्यनिषेधस्याङ्गीकारादितिभावः।माधवादिभिरिति।अतएवाचारक्विपिककारोच्चारणंचरितार्थमितिबोद्ध्यम्।यदितु राम·
चक्षन्तेइत्यादौदीर्घवारणयकृदेवझलादिगृह्यतेक्विबपिकृदेव।आचारक्विपोहलन्तेभ्योऽभावात्।तत्रककारोच्चारणन्तस्यशास्त्रेप्रसिद्धत्वमात्रेणक्वोरित्यत्रतुशब्दाधिकारःसाहचर्य्यानाश्रयणञ्च। ३११
हलन्तेभ्यस्तत्त्वेपितत्साहचर्य्यात्तिङ्भिन्नोझलादिकृत्गृह्यतेइत्युच्यतेतदाविकल्पस्यनिर्मूलत्वमेवप्राचांमतेमुख्यन्दूषणमितिदिक् ॥

ग्रन्थकाराणामिति।हरदत्तादीनामित्यर्थः।अतएवेति।अभ्यासस्यानर्थकत्वादेवेत्यर्थः।ननुदयतेरितिसूत्रस्थभाष्यादुत्तरखण्डस्यैवार्थवत्वंलभ्यतेनसमुदायस्येतिदृष्टान्तासङ्गतिः।अ
ङ्गत्वन्तुअभ्यासस्यापिद्विःप्रयोगत्वेनतद्रूपत्वात्ततोविधानेनतदादिग्रहणात्समुदायस्यैवेतिस्पष्टमेकाचोद्वेइत्यत्रभाष्ये।किञ्चाभ्यासमात्रादर्थाप्रतीत्यानर्थकत्वमस्तुतत्रकित्वङ्कुतोनेत्य
स्यमपिनामधातौतथैववक्ष्यते।प्राचापिक्रोःशूङितिसूत्रेयङ्लुगन्तेतिङ्स्वपिसञ्चारितम्।तथाचक्विपःकृत्वंपुरस्कृत्यतत्साहचर्य्याज्झलादीनामपिकृतामेवग्रहणेस्वपर
ग्रन्थाःसर्वएवसिकताकूपवद्विशीर्य्येरन्।यदपिभाष्यकैयटयोःस्पष्टमित्युक्तंतदपिकुत्रकिमुक्तमितिभाष्यतत्त्वज्ञाःकृतबुद्धयएवविदाङ्कुर्वन्तु।एतेनजनेर्जेन्तइत्याद्यपिप्रा
चामुदाहरणंप्रत्युक्तम्।जाहेतीत्यादि।हाङ्हाकोस्तुल्यानिरूपाणि।स्यादेतत्।हाकोभ्यासेदीर्घोदुर्लभः।अकितइतिनिषेधात्।ननुयद्यकितइतिधातुविशेषणन्तदावनीवती
त्यादौधातोरकित्वाद्दीर्घःस्यात्।अतोभ्यासविशेषणम्।एवञ्चदीर्घस्यकुतोदौर्लभ्यमितिचेन्नधातोःकित्वेऽभ्यासस्यापिकित्वात्द्विःप्रयोगोद्विर्वचनमितिस्थितेः।नचेष्टापत्तिः।वृ
त्तिन्यासपदमञ्जरीधातुवृत्तिषुसर्वत्रजाहेतीत्यादौदीर्घस्यस्वीकृतत्वात्।अत्रेदन्तत्वम्।द्वित्वाभावेकेवलस्यार्थवत्त्वेसतिसमुदायएवार्थवानितितावद्ग्रन्थकाराणांव्यवहारोनि
र्विवादः।अतएवबिभर्त्तिपिपर्त्तीत्यादौभृञामित्अर्त्तिपिपर्त्त्योश्चेतीत्वंनानर्थकेलोन्त्यविधिरितिनिषेधात्सर्वस्यस्यादित्याशङ्क्यअनभ्यासविकारेष्वितिवाक्यशेषेणसमर्थ
यन्ते।एवञ्चार्थवत्त्वमिवकित्त्वमपिसमुदायस्यैवनतुप्रत्यवयवम्।अतोनदोषः।अथवाअकितइतिबहुव्रीहिः।नविद्यतेकिद्यस्मिन्निति।यत्तुप्राचाजहात्यभ्यासस्यनदीर्घइति
मतमुपन्यस्तन्तदाकरविरोधादुपेक्ष्यम्।पञ्चापीति।यत्तुप्राचाजाहितइतिह्रस्वेकारमुदाहृतन्तत्प्रामादिकमितिभावः।लुकालुप्तइति।यत्तुप्राचासपिस्पमीत्युत्वमुदाहृतम्।यच्चप
रिकुर्वन्तिसंप्रसारणन्तदाश्रितत्वात्कार्यञ्चबलवदितियङ्लुकःप्रागेवसंप्रसारणमिति।तदुपेक्ष्यम्।उक्तपरिभाषायाभाष्येप्रत्याख्यातत्वात्।सत्यांहितस्यांहलादिशेषात्प्राक्संप्रसारण
तयैवसिद्धेरुभयेपाङ्ग्रहणंव्यर्थंस्यात् ॥ ७ तआह।अथवेति।बहुव्रीह्याश्रयणसामर्थ्यादेवव्यपदेशिवद्भावानाश्रयणमितिभावः।अतएवाकिद्ग्रहणस्यअभ्यासविकारेषुपरस्परंबाधकत्वाभाव
ज्ञापकत्वंभाष्योक्तंसङ्गच्छते।तदाकरेति।वृत्त्यादिग्रन्थेत्यर्थः।प्रामादिकमिति।माधवादिरीत्येतिभावः।उत्वम्।संप्रसारणम्।व्यर्थंस्यादिति।तद्धिपुनर्विधानद्वाराहलादिःशेषबाधनार्थमितिभाष्येस्पष्ट

तिङन्तः॥

अकृतव्यूहेति।अन्तरङ्गानपिविधीन्बहिरङ्गोलुग्बाधतइतिपरिभाषाविरोधादित्यपिबोध्यम्।अर्थासामञ्जस्यादिति।धातूनामनेकार्थत्वन्तुवृद्धप्रयोगानुरोधेननतुयस्यकस्यचित्प्रयोगानुरोधेनेतिभावः।तन्नेतीति।लुकालुप्तेप्रत्ययलक्षणाभावादितिभावः।ग्रहेरङ्गादितीति।इदञ्चयङन्तेग्रहोलिटीतिदीर्घमाशङ्क्यतत्समाधानत्वेनभाष्येउक्तम्।एकदेशविकृतन्यायेनापितत्त्वोजरीगृहित्यङ्गंनतुग्रहिरितितदाशयइतिकैयटः।नन्वेकमेवहिरुच्यतेइत्येकस्माद्यःप्रत्ययःसोऽपरस्मादपीतिद्वेऽङ्गेएवञ्चोत्तरस्याप्यङ्गत्वादल्लोपादौकृतेएकदेशविकृतन्यायेनोत्तरगृहित्यप्यङ्गमेवेतिततः किंचअकृतव्यूहपरिभाषाविरोधादपिसंप्रसारणन्दुर्लभम्।अतएवहरदत्तमाधवादिभिःसर्वैःसास्वपीतिसास्वप्नीत्याद्युदाहृतमितिभावः।तातर्त्तीति।यत्तुप्रयुञ्जतेवोढुंनावतरीतर्तीत्यादितत्प्रामादिकमेव।उतदिरहिंसानादरयोरितिधातोरुक्तरूपसंभवेपिअर्थासामञ्जस्यात्।तरतेश्चदीर्घान्तत्वेनरीकोदुर्लभत्वादितिबोध्यम्।गृह्णातेस्त्विति।यत्तुप्राचागृह्णातेर्यङ्निमित्तंसंप्रसारणमाश्रित्यजर्गृहीतीत्याद्युदाहृतंतन्नेतिभावः।जाग्रहितेति।नन्वत्रइटोदीर्घेणभाव्यंअतआह।ग्रहइत्यादि।तत्रेति।तथाचएकाचोद्बइतिसूत्रेहरदत्तेनोक्तम्।एकाचउपदेशेइत्यतोदीर्घविधावेकाज्ग्रहणमनुवर्त्ततइति।माधवस्त्विति।तस्यायमाशयः।ग्रहोलिटीतिसूत्रेयङ्लोपेचोक्तमितिवार्त्तिकम्।तदीयभाष्यकैयटादिपर्यालोचनयाग्रहेर्यङन्तात्तजादेरिटोदीर्घाभावेयुक्तिद्वयंलभ्यते।पूर्वस्मादपिविधावल्लोपस्यस्थानिवद्भावइतिग्रहेरितिविहितविशेषणाश्रयणमितिच।तत्राद्यःपक्षोभाष्यवार्त्तिकरीत्यानपदान्तेतिसूत्रेदीर्घग्रहणस्यप्रत्याख्यानात्।द्वितीयस्तुसूत्ररीत्येतिविवेकः।एवञ्चयङ्लुकिदीर्घोभवत्येवेतिस्पष्टंलभ्यते।यङ्लुकोऽनैमित्तिकतयाअज्झलादेशतयाचस्थानिवद्भावायोगात्द्वित्वस्यद्विःप्रयोगरूपतयाग्रहेर्विहितत्वानपायाच्चेति।तद्भाष्यादिविरुद्धमिति।तथाहि।एकाचोद्वेप्रथमस्येतिसूत्रेग्रहेरङ्गादितिभाष्यमुपादायकैयटआह ॥

परत्वाद्दीर्घःस्यादितिचेन्न।पूर्वभागेपिग्रहित्वेनतदादिग्रहणात्समुदायेवाक्यपरिसमाप्तिन्यायेनसमुदायस्यैवाङ्गत्वमितिभाष्येएवसमाधानात्।ननुद्विःप्रयोगत्वाज्जरीगृहिग्रहिरेवैकदेशविकृतन्यायेनचाङ्गत्वमितिदोषःस्यादित्याशङ्क्यकैयटेनोक्तंविशेषणसामर्थ्याद्धीति।अङ्गस्येत्यस्याङ्गनिमित्तार्द्धधातुकस्येत्येवंप्रकारेणषष्ठ्यन्ततयाव्याख्यानसंभवेपिग्रहेरत्रविषयेऽङ्गत्वाव्यभिचारेपिपञ्चम्यन्ततयाविपरिणमय्यग्रहविशेषणसामर्थ्यादित्यर्थस्तस्य।यथाश्रुतरूपञ्चसूत्रेश्रूयमाणंग्रहिति।एवञ्चसूत्रश्रुतानुपूर्वीकग्रहेरङ्गात्परस्येटोदीर्घइतिसूत्रार्थइतितदाशयः ॥

यङ्लुगन्तेपीति। तत्रापि यथाश्रुतरूपाभावादिति भावः। सूत्रस्य ग्रन्थास्त्विति। स्थानिवद्भावविहितविशेषणपराः। अन्यत्रेति। एकाचो द्वे इत्यत्रेत्यर्थः। असदोषस्य। यङ्
न्तादिटो दीर्घप्राप्तिरूपस्य। तत्रलेति। दीर्घविधिस्थेत्यर्थः। एकाचसूत्रोक्तस्य। यथाश्रुतरूपाश्रयणरूपस्य इत्याद्यसिद्धिरिति। अङ्गसञ्ज्ञानिरपेक्षत्वेनान्तरङ्गत्वात्लू

तृचो हिजरीगृहिलङ्न्तु ग्रहिः। विशेषणसामर्थ्याद्यथाश्रुतरूपाश्रयणमिति। यद्यपि तत्र यङन्तं प्रक्रम्यैवमुक्तं तथापि युक्ति
साम्याद्यङ्लुगन्तेपि न दीर्घ इति लभ्यते। एकाज्ग्रहणमनुवर्तयन् हरदत्तोप्यत्रानुकूलः। न ह्यत्र पक्षे यङ्लुकि दीर्घस्योक्तिसंभ
वोप्यस्ति। ग्रहोलिटीति सूत्रस्य ग्रन्थास्तूपायस्योपायान्तरादूषकत्वादिति न्यायेन यङन्तांशे उपायान्तरपरतया नेयाः। अतएव त
त्रकैयट आह। अन्यथासदोषस्य सम्यग्रुद्धतत्त्वादिति। एवं हि वदंस्तत्रत्यपरिहारस्याव्यापकतामेकाच्सूत्रोक्तस्यावश्यादर्त्तव्य
ताञ्चाभिप्रैति। न च यथाश्रुतरूपपक्षे गृहीतमित्याद्यसिद्धिः। अङ्गसञ्ज्ञाप्रवृत्तिवेलायां यथाश्रुतस्यैव सत्त्वाद्ग्रहितादौ तु नै
वम्। एकाच इति समाधानन्तु णिजन्तविषयकमेव। तदित्थम्। यङ्लुगन्ताणिजन्ताच्च यङन्ताच्च ग्रहेरिटः। द्विधा त्रि
धा च ॥ ॥ ॥

वं संप्रसारणमिति भावः। यथाश्रुतस्यैव। ग्रहिरूपस्यैव। द्विधेति। यङ्लुगन्ते ग्रहिरूपत्वस्यैकाच्त्वस्य चाभावेन। त्रिधेति। स्थानिवत्त्वं विहितविशेषणम्। य
थाश्रुतरूपाश्रयणञ्च ॥ ॥ ॥

चतुर्ईति। यथाश्रुतरूपाश्रयणमेकाच इत्यनुवृत्तिः स्यान्निवर्त्यं विहितविशेषणञ्चेति। परे तु द्विःप्रयोगन्यायेन प्रत्येकन्त्वेपि समुदायस्य तत्त्वाभावाज्जरीगृहीग्रहित्वाभा
वादवमवस्यचोक्तरीत्याङ्गत्वाभावात्तत्र दीर्घाप्राप्त्याकिमर्थं यथाश्रुतरूपाश्रयणं कैयटस्य। किंच तथा सति कार्यकालपक्षे उक्तयुक्त्या संप्रसारणोत्तरमिट्प्रवृत्तिकाले एवाङ्गत्व
वृत्त्यागृहीतमित्यादौ तत्कालेपि यथाश्रुतरूपाभावः। अङ्गत्वनिमित्तप्रत्ययोत्पत्तिकाले इति तु नास्यस्वमर्यादालभ्यम्। किंच प्रत्यासत्त्याङ्गत्वनिमित्तेड्योग्यप्रत्ययोत्पत्तिकाले इत्यर्थापत्ता
तुपदेशे एवाडाटाविति पक्षे च अग्रहीष्टामित्याद्यसिद्धिः तस्माद्विहितविशेषणत्वपरं चैतद्भाष्यतात्पर्यम्। अत एव ग्रहोलिटीति सूत्रे यङ्लोपे त्वोक्तमिति प्रतीकमुपादाय ग्रहेर्विहितस्येत्ये
वं विहितविशेषणाद्यङ्लोपे दीर्घाभावः। भाष्यकृता एकाचो द्वे इति सूत्ररूपेन्यत्रास्य दोषस्य सम्यक्परिहाराभिधानादनादरेण तद्वार्त्तिकन्तदन्त द्विर्वचनादिति विवृतमिति व्याख्यातं कैयटे। अ
चतुर्द्वाच दीर्घप्राप्तिः समाहिता॥ यत्तु शिरोमणौ यङ्लुगन्तस्य क्रमस्योक्तं ग्रहोलिटि दीर्घस्तु न भवति। ग्रहेर्विहितस्यार्द्धधातुकस्येट् इति विहितविशेषणाश्रयणात्। इदं यङ्न्ताद्वि
हितन्न तु ग्रहेरिति। तदतिरभसादित्यवधेयम्। यङ्लुकोऽनिमित्तकत्वात्। भाष्ये ध्वनितमिति। तथा हि दत्र क्ङितीत्यनुवर्त्तते न वेति उपक्रम्य दोषानुद्भाव्य परिहृत्य चोक्तमे
तावानेव विशेषः। अनुवर्त्तमाने क्ङिः ह्रूहणोच्छः षत्वं वक्तव्यमिति। अननुवर्त्तमाने तु च्छः शत्वे कृते शान्तत्वादेव षत्वे सिद्धे व्रश्चेति सूत्रे च्छग्रहणन्न कर्त्तव्यमिति भावः। एवं
दिवस्तार्ऊठ्भाविभ्यो यङ्लुक् नास्तीत्यभिसंहितम्। अन्यथा दिवेर्यङ्लुकि देदेति देदेषीत्यादौ ऊठोभावाभावाभ्यां महान्विशेषः स्यात् ॥ ७५ ॥ नेन हि ग्रन्थेनैकाच इति सूत्रस्थंभा
ष्यं विहितविशेषणतात्पर्यकमिति स्पष्टमेवोक्तम्। तेन यङ्लुगन्तेपि न दीर्घः। अङ्गत्वन्यायेन समुदायस्यैव प्रत्ययग्रहणे यस्मादिति न्यायेन यङन्तत्वाज्जरीगृहित्यस्यैव धातु
त्वन्न तु तस्य ग्रहित्वमिति प्रत्ययस्य ग्रहेर्विहितत्वाभावात् चर्करीतं चेत्यदादौ पाठाद्धातुत्वमपि विशिष्टस्यैव। विशिष्टस्य तु न ग्रहित्वादीति दयतेरिति सूत्रे भाष्ये स्पष्टमि
त्याहुः। तदतिरभसादिति। यङ्लुकोऽनैमित्तिकतयान्तरङ्गत्वेन पूर्वं प्रवृत्तेरिति भावः। इदं माधवरीत्येति बोध्यम्। षत्वे सिद्धे इति। प्रष्टेत्यादौ। न च ग्राडिस्य त्रसोर्लोपे षत्वार्थं
च्छग्रहणमावश्यकम्। किं पुनिमित्तशादेशस्य दुर्वारत्वात्। विचोऽसार्वत्रिकत्वाच्चेति भावः ॥

एवकार इति। यद्यपि सांप्रतिभाष्यपुस्तकेषु एवकारो न दृश्यते तथापि बहुषु दृश्यत एवेति बोध्यम्। विरुध्येतेति। नच वृक्षव्भ्यामित्यादावूठ्भावाभावाभ्यां विशेषेस्येवापि लोपादेः स्थानिवत्त्वं तु न न पदान्तेति निषेधादिति वाच्यम्। भ्यामादौ तस्याप्यनभिधानादिति भावः। परे तु एतद्भाष्यं पदकर्त्तव्यत्वाकर्त्तव्यत्वरूपविशेषमात्रपरन्तदपि क्ङित्ग्रहणानुवृत्तौ ज्ञापकप्रदर्शनाय। नच द्युभ्यामित्यादावूठः स्थानेआन्तर्यतो दीर्घो वारणाय कृतं तद्दिव उदिति तपरत्वमननुवृत्तावपि ज्ञापकं भाष्येउक्तमितितयोः समफलता सूचितेति वाच्यम्। भाष्यमानस्य सवर्णाग्राहकत्वेन तस्य ज्ञापकस्य शिथिलत्वात्। इदमेव ध्वनयता भगवता तदग्रे क्ङिद्ग्रहणानुवृत्तिपक्षे गुरुत

ततश्च एतावानेवेत्येवकारो विरुध्येत। यत्तु वदन्ति। भाष्यकारेण यङ्लुक्छान्दस इति स्वसिद्धान्तदृष्ट्या किलोक्तम्। भाषायामपीति पक्षे तु दिवेरपि यङ्लुगुदाहरणं सम्यगेवेति। तन्न। भाष्यकृता श्नुग्रहणाद्भाषायामपि क्वचिदिति स्वीकुर्वता सह मतभेदस्यैवाऽभावात्। क्वाचित्कत्वज्ञापकसिद्धत्वाद्बहुलग्रहणाद्वेत्यन्यदेतत्। उभयथापि ऊठ्भाविश्रुतद्भाव एव न्याय्यः। उक्तयुक्तेः। तस्मात्प्राचो ग्रन्थः प्रामादिक एवेति स्थितम्। नेह निषेध इति। सूत्रस्योदाहरणं तु लोलुवः पोपुवः इत्यादि बोध्यम्। न चाल्लोपस्य स्थानिवत्त्वादेव गुणो न भविष्यतीति वाच्यम्। उवङ आदिष्टादचः पूर्वत्वेन लघूपधगुणे कर्त्तव्ये स्थानिवत्त्वाभावात्। अत्र पदमञ्जरीकारमतखण्डनप्रपञ्चः शब्दकौस्तुभाद्बोध्यः॥ इति यङ्लुगन्तप्रक्रिया ॥

रेपि संभावितदोषान्परिहृत्योपरतन्त्वेन चानुवृत्तिपक्षस्यैवादरः सूचितः। एवञ्च प्रागुक्तलक्ष्याणामऽभावकल्पनेन मानम्। लोपोव्योर्वलीति सूत्रस्थवलोपप्रत्याख्यानपरं भाष्यन्तु वान्तेभ्यो यङ्लुगभावे मानं बोध्यमित्याहुः। स्थानिवत्त्वादेवेति। यस्य हल इत्यत्र यस्येति योगं विभज्यात इत्यनुवर्त्य लुग्बाधकमतो लोपङ्कृत्वाऽवशिष्टस्य लुगिति भाष्योक्तरीत्येति भावः। भाष्योक्तप्रत्याख्याने लङ्गकार्ये पुनर्नाङ्गकार्यमिति गुणाभाव इत्यन्यत्र विस्तरः ॥ ॥ इति यङ्लुगन्तप्रक्रिया ॥ ॥

विचित्विति। किंबिबाधरती। त्यर्थेन प्रसादस्य किम्पदस्य विच्छरत्वेलित्यर्थः। तन्नोदाहरणानीति। बुभुक्षापिपासागर्द्धीशब्दैस्तथैव बोधादिति भावः। प्रयोगोपाधय इति। समुदाये
सुप आ। कर्मण इच्छायाम्वेत्यनुवर्त्तते। सन्निधानाच्चेच्छां प्रत्येव कर्मत्वन्तदाह। इषिकर्मण इति। आत्मशब्दः परव्यावृत्तिपरः स्वशब्दपर्यायः। स्वस्मै क इत्याकाङ्क्षायां इच्छ
यासन्निधापितत्वादेषितैव गृह्यते तदाह। एषितृसंबन्धिन इति। सुबन्ते चोक्तं विशेषणद्वयं स्वार्थद्वारकं बोध्यम्। नः क्ये। क्यचि क्यङीति। अत्र प्राचा क्यषग्युपात्तः। तद्वाच्यवि
रुद्रमा। हलन्तेभ्यः क्यचनास्तीति भाष्यसिद्धान्तात्। दीर्घस्त्विति। तथा च हलि चेति सूत्रे वृत्तावुक्तम्धातोरित्येव। दिवमिच्छति दिव्यतीति। यत्तु प्रसादकृतोक्तं दिवेः क्विबन्तस्य
धातुत्वमस्त्येवेति। तन्न। क्विबन्तत्वे हि ऊठ् स्यात्। विचि तु उपधागुणे वलोपश्च स्यात्। क्यस्य वि। क्यच्क्यङोरिति। अत्रापि प्राचा क्यच् उपात्तः भाष्यविरोधादिहोपेक्षितः। मान्त
प्रकृतिकादिति। मान्तादित्युक्तौ तु पुत्रमिच्छतीत्यादावपि न स्यात्। पुत्रौ पुत्रान्वेत्यादावेव स्यात्। अशनायो। यस्तदानीमेव भोक्तुमशनमिच्छति यश्च पातुमुदकं यश्च सत्येव
धने भूयो धनन्त्वत्रोदाहरणानि। यस्तु कालान्तरोपभोगार्थमशनमिच्छति यश्चलातुमुदकं यश्च दरिद्रः सन् धनमिच्छति तत्र प्रत्युदाहरणानि। बुभुक्षादयस्त्विह प्रयोगोपाध
यः। अन्ये त्वाहुः। अशनायतीत्यादिषु विवक्षितप्रकृत्यर्थं बुभुक्षादिकमेवार्थः। तथा च निघण्टुः। उदन्या तु पिपासा तृडिति। भारविश्च। किमु धनन्धनायितुमिति। अश्वस्यति
वडवेति। मैथुनार्थमश्वमिच्छतीत्यर्थः। एतेन वृषस्य गौरिति व्याख्यातम्। अन्ये तु। अश्ववृषरूपप्रकृत्यर्थपरित्यागेन मैथुनेच्छैवार्थ इत्याहुः। तथा च मनुष्यविषयेऽपि प्र
युज्यते। इति राज्ञो वृषस्यन्तीमिति। निघण्टुरपि। वृषस्यन्ती तु कामुकीति। लालसायामिति। उत्कटेच्छायामित्यर्थः। कर्त्तुः क्यासेति लुप्तषष्ठीकङ्कर्तृविशेषणम्। चकार
ध्मानाचये इति धनयति। सान्तस्य त्विति। विहूस्यत इति। यत्तु विहूस्यमानः श्यालोऽधिकारीति वाचस्पतिग्रन्थव्याख्यावसरे लोहितादिडाज्भ्यः क्यषिति कल्पतरावुक्तत्वा
ल्लोहितादेराकृतिगणत्वमिति वृत्तिमतमनुसृत्य बोध्यम् ॥ ७ नाशनविषयभोजनेच्छा उदकविषयपानेच्छा धनवतो धनेच्छा च गम्यत इत्यर्थः। उत्कटेच्छायामिति।
अतिरागेणाश्ववजिहीर्षायामित्यर्थः। तेनैश्वर्याद्यर्थं लवणाद्युपादानेऽलवणीयतीत्येवेति कैयटः ॥ ॥ ६ ॥

क्यङ्‌चेति। क्रियाकर्त्रादिस्वरूपविभागश्चेत्यनन्तरं तत्पाठेपि कारकांशे क्रियाया नित्यसापेक्षत्वान्न सापेक्षत्वदोष इति भावः। भाष्योक्तेरिति। अभूततद्भावाप्रतीतेर्विद्वदाभासत्वार्थस्य विवक्षितत्वाच्चेत्यपि बोध्यम्। नित्यं सपत्न्यादिष्विति। विभाषा सपूर्वस्येत्यस्यापवादोऽनेन बाध इति भावः। अत्र त्वन्तत्वं भस्याढ इत्यत्रोक्तम्। कैयटे स्पष्टमिति। अत्रारुचिबीजं वस्तुतस्तु क्यङेवायं नतु क्यष्। लोहितादिसूत्रे नायं हलन्ताद्विधीयत इति भाष्योक्तेरित्यवधेयम्। सपत्नीवेति। त्रितयसाधारणं विग्रहवाक्यम्। सपत्नायत इति। शत्रुपर्य्यायात्सपत्नशब्दात् शार्ङ्गरवादिङीनन्तात्क्यङ्। सपत्नीयत इति। समानस्वामिकाभिधायिनो भाषितपुंस्कस्य नित्यं सपत्न्यादिष्विति नादेशेनान्तत्वात् ङीप्। ततः क्यङ्। सपत्नीयत इति। विवाहजन्मसंस्कारविशेषनिमित्तकेन पतिशब्देन समासे सति नित्यस्त्रीत्वान्न पुंवत्ताप्रवाप्त इति। अत्र केचित्। ङ्याप्सूत्रभाष्ये युवतितरेत्युदाहरणाद्यौवनं जातिः। एवञ्च जातेश्चेति निषेध इहोचित इति तन्न। वयसोऽनित्यत्वेनाजातित्वात्। कथमन्यथाऽश्वः परस्मिन्निति सूत्रे युवजानिरिति भाष्यं सङ्गच्छेत। युवतितरेति तु तसिलादिष्विति पुंवद्भावे प्राप्ते भाष्यनिर्देशादेव न पुंवदिति कैयटे स्पष्टम्। पट्वीमृदूयत इति। पूर्वपदस्य क्यङ्परत्वाभावान्न पुंवत्। तङ्गेति सूचितमिति। उत्तरवार्त्तिकेन क्विप्प्राप्तस्य सुलभत्वादिति भावः। यत्तु प्राचा आचारे गल्भक्लीबेति निरुपसर्गमेव वार्त्तिकं पठित्वा गल्भत इति केवलात्तङुदाहृतः व्याख्यातं भिन्नतयैव व्याख्यातम्। तत्सर्वं प्रामादिकमाकरविरोधादिति भावः। अतो गुण इति। अन्तरङ्गत्वादतोलोपं बाधित्वेति भावः। न च वार्णादाङ्गं बलवदिति परिभाषयाऽतोलोपः स्यादिति वाच्यम्। व्याश्रयत्वात्। तस्याः समानाश्रय एव प्रवृत्तिस्वीकारात् । । च परत्वान्नित्यत्वाच्चातआदेरित्यनेनैव प्रथमं भाव्यमिति वाच्यम्। तस्य बहिरङ्गत्वेनासिद्धत्वात्। न चापवादत्वादतआदेरित्यनेन भाव्यमिति वाच्यम्। अपवादोपि यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यत एवेत्युक्तत्वात् ॥

भाष्ये च योवाचकानां जातिकार्यवैकल्पिकतायाः स्पष्टमुक्तत्वेनोभयमपि न्यायेनैव साध्विति। आकरविरोधादिति। भाष्ये सोपसर्गपाठादिति भावः। अतो लोपमिति। अतआदेरिति दीर्घश्चेत्यपि बोध्यम्। व्याश्रयत्वादिति। व्याश्रयेपि तत्प्रवृत्तौ तु अनित्यत्वात्तदप्रवृत्तिर्भाष्याद्यनुरोधादिति बोध्यम्॥

चरितार्थत्वादिति। तत्र हि युगपद्द्वित्वादिः शेषात्पूर्वमेव चापरत्वादत आदेरिति दीर्घः। न हि तदा पररूपप्राप्तिरभ्यासविकारे बाध्यबाधकभावो नास्तीत्यस्य युगपत् प्रवृत्त्यान्याय्यक्रमेण वा समावेशे तात्पर्यं पररूपापवादत्वस्यैव तदभावे प्राप्तिमात्रेणेति भावः। आनर्देत्यत्र प्रथमम् प्रयुक्तमेव द्वित्वमन्तरङ्गत्वाद्विशेषाच्च नन्द्रा इति चानन्तरस्येति न्यायेन। आदेरित्यस्यैव बाधकम्। तस्य वचनात्प्राप्तिः एकाचूहयसत्वे एव तत्प्राप्तेः। आदिभूतादचः परस्य द्वितीयैकाच इति तदर्थात्। एतेन न्द्रा इति निषेधेना ऽऽनर्देत्यत्राकारमात्रस्य आनर्देत्यादौ च तस्य चरितार्थत्वात्। अत आदेरिति। दीर्घ इति। पररूपस्याङ्ग्रहणे न ग्रहणात् आप्नमतो लोपं परत्वाद्बाधित्वेति भावः। देवतीति माधव इति। अपदान्तत्वाद्दिव उन्नः। अत्रेति। प्रगन्तेति गुणं बाधित्वान्तरङ्गत्वाद्यण्। न च तस्मिन्कर्तव्ये बहिरङ्गस्यो ठोऽसिद्धत्वम्। नाजानन्तर्ये इति निषेधात्। न च वार्णादाङ्गमिति गुणस्य बलीयस्त्वम्। समानाश्रये हि तत्। न तु व्याश्रयेपि। एतच्च सिवेरौणादिके न प्रत्यये स्योनशब्दं साधयद्भिः कैयटादिभिः सर्वैः स्पष्टमेवोक्तमिति भावः। प्राचोदाहृतमनुवदति। यत्त्विति। अनाकरमेवेति। हरदत्तमाधवादिमहाग्रन्थविरोधादिति भावः। विस्तरः शब्दकौस्तुभे बोध्यः। क्व दिवेत्यादि भाष्यकारीयं प्रत्युदाहरणम्। तद्व्याचष्टे येणन्त्रावित्यादिना। प्रातिपदिकमिति। न तु धातुः तथा सति वक्ष्यमाणज्ञापनानुपपत्तेरिति भावः। अनुबन्ध इति। अतो गुण इति पररूपेणेति भावः। अन्यथा णौ चङीति ह्रस्वापत्तेः। पूर्वपदमिति। तच्च समास एव संभवति। तेनान्दोलयित्वा प्रेङ्खोलयित्वेत्यादौ आप्रेत्यादीनां न पृथक्करणमिति भावः ॥

द्वित्वे आनृजेत्यादौ चरितार्थमत आदेरित्येतद्बाधित्वान्तरङ्गत्वेनातो गुण इत्यस्यापत्त्यात्तत्र कथञ्चारितार्थ्यमित्यपास्तम्। परत्वाद्बाधित्वेति। ण्यल्लोपावियङिति पूर्वविप्रतिषेधवार्तिके कृतार्थैवेति दीर्घस्यैव ग्रहणन्तस्यैव भाष्ये तद्व्याख्यानावसरेऽवकाशप्रदर्शनात्। इयङादिसाहचर्येणाभ्यासानिमित्तदीर्घस्यैव तत्र ग्रहणमित्याशयः। न तु व्याश्रयेपीति। तत्रापि तत्प्रवृत्तौ तु तदनित्यत्वेन निर्वाहो बोध्यः। हरदत्तेति। अनेन कैयटोन्यथेति सूचितम्। पररूपेणेति। अत एवादन्तप्रकरणे पाठः सङ्गच्छते न पृथक्करणमिति। धात्ववयवत्वेन पूर्वपदत्वादिति भावः। बहुलमेतन्निदर्शनमित्युक्त्या तेषाम्धातुत्वम् ॥

धीरेत्यस्यापीति।अवधीरेत्यप्यर्थः।एवञ्चधातुद्वयेनप्रयोगद्वयमपिसाध्वितिभावः।अयमेवनिषेधइति।उस्यपदान्तादितिसूत्रस्यमपदान्तादितिचेत्यपिबोध्यम्।अर्थवद्ग्रहणपरि
भाषाया इति।प्रतिपदोक्तपरिभाषायाः प्रत्ययाप्रत्यययोरितिपरिभाषायाश्चेत्यपिबोध्यम्।चशब्दम्।विनिगमनाविरहेणसर्वबाधकत्वबोधकम्।सुतरामुपेक्ष्या इति।हलन्तात्क्य
स्यादेतत्।उकारेत्त्वावधीरयतीत्यादावप्यवशब्दपृथक्करणंनस्यात्।तथाचबोपदेवेनअकारादिअकारान्तप्रकरणेऽवधीरङ्‌वज्ञायामितिपठितंपृथक्करणेहिधकारादिप्र
करणेएवापठिष्यत्।अतएवाडागमंवकारद्वित्वञ्चकृत्वाचञ्चुदाहृतम्।आचवधीरदिति।एवंस्थितेअवधीर्यधैर्यंपरिरम्भेतिमाघस्य।इतीवधारामवधीर्यमण्डली
क्रियाश्रियामण्डितुरङ्गमैर्महीतिश्रीहर्षस्यएवमन्येषामपित्यबन्तप्रयोगाणाङ्कागतिरितिचेत्।अत्रकेचित्।बोपदेवग्रन्थप्रामाण्यादुक्तप्रयोगाःप्रामादिकाएवेत्याहुः।
वस्तुतस्तुनायंधातुर्गणेपठितःकिन्तुबहुलमेतन्निदर्शनमितिबाहुलकादूहितः।ऊहश्चधीरेत्यस्यापिसंभवतिमुनित्रयविरोधाभावात्।तथाचोक्तप्रयोगाअ
पिनिर्बाधाएव।बोपदेवप्रामाण्यादवधीरयितेत्यप्यस्तिचेदस्तु।नतुतद्बलेनेतरस्यप्रामादिकत्वंसुवचमितिदिक्।पृथक्करणस्यफलंपूर्वत्रापिदर्शयति।एवञ्चे
ति।उस्योमाङ्क्ष्विति।उस्यपदान्तादोमाङोश्चेतिप्राप्तस्यनिषेधः।ओस्त्रीयदिति।नचानर्थकत्वादेवायमुस्नग्रहीष्यतइतिवाच्यम्।भिन्द्युरित्यादावपितथात्वात्।क
तर्हिस्यादितिचेत्।अयुःअबु रित्यादावितिगृहाण।एवञ्चायमेवनिषेधोऽर्थवद्ग्रहणपरिभाषाया इहाप्रवृत्तिंज्ञापयतीतिस्थितम्।चशब्देनेति।तथा
चचशब्दंप्रयुञ्जानःसूत्रकारोपिज्ञापकस्यविशेषविषयत्वेऽनुकूलइतिभावः।तस्येति।आद्रिशब्दस्येत्यर्थः।तस्यापीति।क्यषःककारस्येत्यर्थः।एवञ्चनः
क्येक्यस्यविभाषेतिसूत्रद्वयेक्यषोपिग्रहणंवदन्तःसुतरामुपेक्ष्या इतिभावः ॥

षोऽभावेनफलाभावादितिभावः।क्याच्छन्दसीत्यत्रविशेषणार्थमपिककारोन।उरण्युरित्यादिसिद्ध्यर्थंक्याच्छन्दसीत्येवसिद्धेः।एवंणोप्यस्यव्यर्थः।वाक्यषइतिवायादिस्थे
वपाठ्यंपापश्यासभ्यादिभ्यआचारक्विबन्तेभ्यस्तुनैतत्प्रवृत्तिःनामधातुष्वेषामप्रवृत्तेभ्यआचारक्विपोऽनभिधानाच्च।सर्वञ्चेदंभाष्येस्पष्टम् ॥

स·श· पुंवद्भावश्चेति। क्यङ्मानिनोश्चेत्यनेन। एतेन क्यङ्श्चेत्यस्तु चात् क्यङ् एवञ्च वा क्यष इति मास्त्वित्यपास्तम्। तङि ति। कष्टायत इत्युक्तौ गमनार्थप्रतीतावप्युत्साहप्रतीतेरिति भावः
३१६ नन्वेवं कर्मण इत्येकवचनन्दुर्लभमत आह। प्रत्येकं संबन्धादिति। कल्पिते नैकवचनान्तेन रोमन्थशब्देन तपःशब्देन ———— च संबन्धादित्यर्थः। सौत्रं द्विवचनस्थाने एकव
चनमित्यन्ये। सिद्धा इति। न च प्रादीनामप्रसिद्धत्वेन तन्निबन्धनटिलोपाप्रवृत्तावपि प्रकृतिलक्षणटिलोपापत्तिः। आदेशेन निरवकाशत्वात्तस्य तेन विन्मतोर्लुकात्तत्र वृत्तेत
लोहिनीयतीति। क्यङि तु तङेव स्यात् पुंवद्भावश्चेति भावः। कष्टायक्रमणमुत्साहः। वृत्तिसर्गतायनेष्विति सूत्रे हि सर्ग उत्साह इत्याकरे स्थितम्। प्रयुज्यते च। ये
नेन्द्रलोकावजयाय सष्ट इति तदेतदाह। उत्साहेऽर्थ इति। क्रमत इति। वृत्तिसर्गेत्यादिना तङ्। कष्टङ्कृच्छ्रम्। कृच्छ्रगहनयोः कष इति कृच्छ्रे इडभावः। तेन च तत्त्वा
धनं पापं कर्म लप्स्यते। मुख्येऽर्थे उत्साहासंभवात्। तदेतदाह। पापङ्कर्तुमिति। कर्मणो रो। कर्मण इति पञ्चमी। रोमन्थतपोभ्यामित्यनेन सामानाधिकरण्यात्। प्रत्येकं
संबन्धादेकवचनम्। वर्तीति ण्यन्ताद्वृत्तेर्ण्यासश्रन्थो युजिति युचि प्राप्ते तत एव निपातनात्क्तिन्। चरतेः संपदादित्वाद्भावे क्विप्। तदेतदाह रोमन्थतपोभ्यामि
त्यादिना। सुखादिभ्यः। कर्तृ इति पृथक्पदं लुप्तषष्ठीकम्। वेदना ज्ञानम्। कर्तृत्वन्तदपेक्षमेव तदेतदाह। वेदनाकर्तुरेवेति। विस्मापयत इत्यन्य इति।
तथा च मायामृगं प्रक्रम्य भट्टिराह। ततस्त्रिस्त्रीयमाणोऽसाविति। पुच्छभाण्ड। करण इत्यनुवृत्तेः क्रियाविशेषेऽर्थे। तमेव विशेषं दर्शयति। पुच्छादित्यादि
ना। वृद्धौ सत्यां पूर्वञ्चेति। अत्र पक्षभेदे यद्वक्तव्यं तच्चुरादिशेष एवोक्तम्। भाष्यस्थेति। वृत्तिकारैर्हि प्रकल्प्य काजिति सूत्रे प्रोष्टादय उदाहृताः। ते चाभासू
त्रेणैव सिद्धाः तत्प्रत्याख्यानपक्षेऽपि प्रस्यादावकारोच्चारणसामर्थ्याद्वलोपो न भविष्यति ॥ ५ स्मिंश्च प्राप्तटिलोप इवात्रापि उभयसंबन्धी टिलोपो बा
ध्यत इत्यदोषादिति बोध्यम्। एवं प्रेष्ठश्रेष्ठज्येष्ठादावपि बोध्यम्। असिद्धत्वाद्युगपत्भावनत्वसंभवे बाधकत्वमिति वार्त्तिकमतेनेति बोध्यम्। अकारोच्चारणसामर्थ्या राम·
दिति। यदित्यपप्रदित्यादावभ्यासेऽकारश्रवणेन तस्य चारितार्थ्यमुच्यते तदोक्तरीत्यैव तत्प्रत्याख्यानपक्षे न दोषः ॥ ६ ॥ ३१:

सर्वश्रेष्ठेति। इदं भाष्ये स्पष्टम्। अशश्रदित्यादौ यथा न चारितार्थ्यन्तथौ न धातौ निरूपितम्। चुरादौ रेफाद्युच्चारणसामर्थ्यादपि तदभावो बोध्यः। लोपापवादस्य। टिलोपापवादस्य। न भविष्यतीति। न च विनन्ते प्राप्तटिलोपस्य बाधेऽपि तत्प्रकृतौ प्राप्तस्य बाधे मानाभावः। सत्यपि संभवे बाधनं भवतीति न्याये न टिलोपद्वयस्यापि बाधादिति भावः। नान्ते तु नस्तद्धित इति भवत्येव। येन नाप्राप्तिन्यायेन लुकाटेरित्यस्यैव बाधात् मतोर्लुक्प्राप्त्यवस्थायान्तस्याप्रवृत्तेश्च। पुंवत्त्वविषये टिलोपो भवत्येव। पुंवत्त्वस्य टिलोपेन येन नाप्राप्त्यभावात्। भस्याढे इत्यस्य प्रत्ययोत्पत्तेः पूर्वमेव प्रवृत्त्या त्तादृशस्यैवातिदेशेन तत्काले टिलोपाप्रवृत्तेः। लुकोपवादभूतस्येति। समानाधिकरणम्। करिष्ठे कर्तृशब्दादिष्ठन्। तुरिष्ठेमेयःस्विति तृलोपः। प्रातिपदिकादेवेति। अन्यथा सुप इत्येव वदेत्। तत्करोतीति एवं श्रेष्ठज्येष्ठयोरपि। स्रग्वान्। स्रजिष्ठ इत्यत्र तु लोपापवादस्य विन्मतोर्लुकस्तस्मिन्लक्ष्ये प्रवृत्तत्वान्न भविष्यति। एषैव ह्यनेकास्तु गतिः। तथाहि इष्ठेमेयःस्वनेकाचोऽप्यवशिष्टस्य नेष्यते। टिलोपो भाष्यकारेण प्रवृत्ते विन्मतोर्लुकि। लुकोपवादभूतस्य तस्मिल्लक्ष्ये प्रवर्त्तनात्। करिष्ठादाविदन्तु ल्यन्तलोपस्य प्रवर्त्तनात्। कैयटमाधवादिग्रन्थाश्चेहानुकूला इति शब्दकौस्तुभे प्रपञ्चितमितिभावः। अङ्गवृत्तपरिभाषया वृद्धिसकृत्त्वात्त्वदयति मदयतीति केचिदिच्छन्ति। युष्मयतीति। यद्यपि युवावौ द्विवचन इत्यर्थग्रहणं तथापीह युवावौ न स्तो विभक्तिपरत्वाभावात्। प्रातिपदिकादेव हि णिजिति बहवः। सुबन्तादिति हरदत्तपक्षेऽपि विभक्तेर्लुकोपहारात्। न च प्रागेवादेशोऽस्त्विति वाच्यम्। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति न्यायात्। अथ ण्यन्तात्क्विपि कश्चिद्विशेष उच्यते। त्वां मां वाचष्ट इत्यस्मिन्नर्थे क्वौ। त्वाप्। माप्। त्वाद्। माद्। त्वद्। मद् इति प्रागुक्तम्। तस्मिन्नर्थे न त्रिधा प्रातिपदिकानि। युवामावाम्। युष्मानस्मान्वाचष्ट इत्याख्येयस्यानेकत्वे त्वमयोरभावाद्युष्म अस्म इति मान्ते प्रातिपदिके इत्थं प्रातिपदि [illegible] कात्वादयः ॥ ७ वार्त्तिके तदिति कर्मपदन्तेन द्वितीयान्तात्प्रत्यय इति हरदत्तः। अरुचिबीजन्तूक्तमेव। अथेति। एतदारभ्य सर्वं सुब्धातुवृत्तिस्थमाधवानुरोधेन। वस्तुतः स[illegible]काच इति सूत्रभाष्ये तन्मदोः प्रतिषेधो वक्तव्यस्त्वयामयान वक्तव्यः सप्तमीबहुवचने सौ यदेकाजरूपन्ततः परत्वाभावादिति। भाष्यप्रामाण्येनैकले ण्यन्तात्क्वेरनभिधानस्यावश्यकत्वादिदञ्चिन्त्यम्। अन्यथा त्वासु मासु इति सावेकाजरूपात्सरात्भ्यामिसादौ नतीयादिरस्तीति तदर्थं निषेधस्यावश्यकत्वेन प्रत्याख्यानासङ्गतिः। अभिव्यक्तेति न्याय तु पदोद्देश्यककार्यविषय इत्यसकृदावेदितम् ॥

मुख्यपक्ष इति।लादयतिमादयत्योः क्विपीत्यर्थः।मान्तात्परत्वान पायादिति।मान्तात्परत्वेनदृष्टस्याच्छब्दस्यानपायादित्यर्थः।त्वमहमित्यादौ लोपायमान्ताच्छेषत्वेनदृष्टस्यलोप इति व्याख्याया
गतत्वावश्यकत्वादितिभावः।इतिमतेतुनेति।मान्तशेषत्वेनदृष्टस्यतत्राभावादितिभावः।परिग्रहणसामर्थ्यादिति।परिग्रहणंयत्रमान्तापेक्षयापरिशिष्टमस्तितत्रैवादेशार्थम्।कटिपर्यन्तंवस्त्र
मित्युक्तेऽग्रे किञ्चिदस्तीति नियमेन प्रतीतेः।अतएवभाष्येऽवधिद्योतनार्थंपरिग्रहणंकर्त्तव्यम्।मान्तस्येत्युच्यमानेयत्रैवमान्तेयुष्मदस्मदी तत्रैवादेशाःस्युः।क्वचमान्तेयुष्मानाचष्टे इति णिचि युष्मय
तेश्चाप्रस्मये इत्युक्तम्।अवधिद्योतनार्थमित्यस्यान्तशब्देउत्तरावधिवाचकताद्योतनार्थमित्यर्थः।पर्यन्तशब्दस्यलोकेतथैवप्रयोगात्।लोकेऽग्रेकिञ्चित्सत्त्वएवदेशकालयोरवधित्वव्य
वहारात्।परिग्रहणाभावेतुयतःपूर्वोऽस्तिपरश्चनास्तिसोऽन्त इतिभाष्योक्तेर्मान्तपदस्यमुख्यार्थत्वलाभायकौलुप्तमित्यस्यप्रवृत्त्यातत्रैवादेशाःस्युरितिभावः।अत्रकेचित्।अत्रपक्षेत्वामाचष्टे इ
ततोयथायथंङे प्रथमयोरम्शसोन।भ्यसोभ्यम्।पञ्चम्या अत्।एकवचनस्य च।युष्मदस्मद्भ्यांङसोऽश्।साम आकमितिसूत्रसप्तकेनसुपामादेशाःस्युरेव।प्रकृतिभागस्यतुयथाय
थमात्वयत्वेस्तएव।शेषेलोपस्तुआत्वयत्वनिमित्तेतरविभक्ताविति व्याख्यानेभवत्येव।टिलोपाभावेनमान्तात्परत्वानपायात्।टिलोपंस्वीकृत्यपुकापकारान्तत्वमितिमतेतुन।आ
त्वयस्यानेकत्वेपिन।तत्रहिशेषेलोपेनापहार्य्यमान्तात्परत्वाविशिष्टदित्यतिदिष्टेनटिलोपेनैवापहृतम्।किञ्च।त्वाहौयूयवयौतुभ्यमह्यौतवममौमामपि।मपर्यन्तस्यविरहादात्वयैकत्वे
भवन्तिन।आत्वयस्यत्वनेकत्वेभवन्तिनभवन्तिच।तथाहिमान्तस्येत्येवसिद्धेपरिग्रहणसामर्थ्यान्मान्तत्वावस्थायान्नेत्येकंमतम्। ॥ ७ तिविग्रहेपित्वमादिभ्यःपूर्वेनित्य
त्वाट्टिलोपः।टिलोपेतदशायांत्वमादीनामनित्यत्वात्।एवञ्चतत्रापियुष्मयतीत्येव।किञ्चास्मिन्पक्षेविभक्त्यादेशाअपिनभवन्तिपूर्वस्मात्परस्यविधित्वेनणिलोपस्यस्थानिवत्त्वा
त्।कौलुप्तमित्यस्याश्रयणेतुनदृढतरंमानमित्याहुः।तन्न।टिलोपस्यापित्वमादिषुकृतेष्वन्तरङ्गत्वात्पररूपेप्रकृत्यैकाजित्यस्यप्राप्त्याऽनित्यत्वात्।नचर्वाणदाङ्मितिपररूपंबाधि
त्वाट्टिलोपस्यैवप्राप्तेःसनित्यः।तस्मान्नित्यत्वात्।अतएवत्वादयोहलन्ताइतिपक्षेणनफलभेदः।यस्यचलक्षणान्तरेणनिमित्तंविहन्यतेतस्याप्यनित्यत्वाङ्गीकारात्।अतएवभाष्येयुष्माना
चष्टेइतिणिचोविग्रहप्रदर्शनंकृतम्।द्विवचनान्तविग्रहाप्रदर्शनवत्तदप्रदर्शनमितितत्रार्थसाधकमित्यन्येपरिग्रहणाभावेइति।सामानाधिकरण्यान्वयस्यौचित्यात्मान्तएवस्यादितिभावः।

त्तेति तु तस्मिन्निति।तत्सामर्थ्यात्युष्मदस्मदोरवयवौयौमपर्यन्ताविति व्याख्यानात्मान्तेसिद्धं व्यपदेशिवद्भावेनमान्तेचसिद्धम्।अतएवत्वाहादावकारोच्चारणञ्चरितार्थम्।अभिव्यक्तपदार्थायेद्वितिन्यायस्तुपदकार्यविषयइतिभावः।अत्रनभवतीतिमतंयुक्तम्।अन्त्येपरिग्रहणेनमणिमन्त्रादिन्यायेनसामानाधिकरण्यान्वयबाधःकर्तव्यःस्यात्।आद्येत्वसंभवात्तद्बाधः।किन्त्वान्त्येऽवधिद्योतनार्थमितिभाष्यासामञ्जस्यंमपर्यन्तस्येतिचाद्येतद्गुणसंविज्ञानबहुव्रीहिः।त्वाहौसावित्यत्राकारोच्चारणन्तुश्वेतवहोक्थशास्तितिवत्त्वार्थसाधकमितिबोद्ध्यम्।एकंमतपरिग्रहणाभावेमान्तस्यैवस्यात्।सतितुतस्मिन्मान्तेततोऽधिकेचभवन्तीतिमतान्तरम्।उभयमपीदमाकरेस्थितम्।तत्राख्येयद्वित्वेसुजस्ङे·ङ·स्सुपरत्वात्त्वाहादिप्रवृत्ताव-पिवचनान्तरेषुविभक्तिपरत्वाद्युवावौएकस्मिन्मतेत्वएव।मतान्तरेतुनत्वाहादयोनापियुवावाविति विवेकः।अथरूपाणि।आख्येयैक्येपदान्तयोः।सौ।त्वाम्।माम्।वृद्धिर्नेतिमते।त्वम्।मम्।टिलोपपक्षेद्वयोरप्येवम्।पान्तयोस्तु।पक्षेत्वापम्।मापम्।पक्षान्तरेत्वाम्।मामित्येव।इत्थंसंकलनयात्रीणि॥३॥औङि।त्वाम्।माम्।जसि।साविवत्त्रीणि।अम्औटोः।त्वाम्।माम्।शसि।त्वान्।मान्।आङि·त्वाया।माया।अवृद्धौतुत्वया।मया।त्वाभ्यां।माभ्यां।त्वाभिः।माभिः।ङ·यि।अम्शेषेलोपः।वृद्धिपक्षेआतोधातोरित्यालोपः।त्वम्मम्।पक्षेत्वापम्।मापम्।त्वाभ्याम्।माभ्यांभ्यसिरूपत्रयम्।यथाहि।अभ्यमादेशपक्षेशेषेलोपेअतोलोपेचत्वभ्यम्।मभ्यम्।इदञ्चवृद्धावृद्ध्योस्तुल्यम्।भ्यमित्वाभ्यम्।माभ्यम्।वृद्ध्यभावेप्राग्वदेव।पान्तयोस्तु।अभ्यमित्वापभ्यंमापभ्यमितिविशेषः।त्वत्।मत्।त्वापत्।मापत्।त्वाभ्याम्।माभ्याम्।त्वत्।मत्।त्वापत्।मापत्।त्वम।त्वापमापा।त्वायोःमायोः।अवृद्धौत्वयोःमयोः।त्वाकंमाकम्।त्वापाकंमापाकम्।त्वायि।मायि।त्वयि।मयि।त्वायोःमायोः।त्वयोःमयोः।त्वासु।मासु।एवञ्चआख्येयैक्येत्रसुजसोश्चतुर्थीश्चभ्यसिचत्रयम्।टौसङि·दाम्भ्यस्सुरूपेद्वेअन्यत्रैकमितिस्थितम्।आख्येयेद्वित्वेतुसौ।त्वम्।अहम्।प्रकृत्यादेशाभावे।युषम्।असम्।शेषेलोपस्याप्यभावेयुष्मम्।अस्मम् ॥

मिति।अस्यमुख्यंमतमित्यर्थः।एकस्मिन्मतइति।भवन्तीत्याद्यमतइत्यर्थः।मतान्तरेत्विति।नभवन्तीतिमुख्यमतइत्यर्थः।नापियुवावाविति।नाप्यमादयःसुपामादेशाइतिबोद्ध्यम्। त्वांमामिति।शेषेलोपइत्यन्त्यलोपेइदम्।तदाह।टिलोपेति।यत्तुकैयटेनत्वादंमादन्त्वदंमदमितिचेत्युक्तम्।तन्न।शेषेलोपप्रवृत्तौबाधकाभावादिति भावः।पक्षे।मपर्यन्ताच्छेषस्यलोपइतिपक्षे।पक्षान्तरे

अन्त्यलोपपक्षे॥

त्रीणी।ति।प्रकारचतुष्टयेपीत्यर्थः।साविवेति।सावुक्ता नीवेत्यर्थः।अमोटोरिति।द्वितीयायाञ्चेत्यात्वात्।यक्षेइति।मपर्यन्ताच्छेषस्यलोपइतिपक्षेइत्यर्थः।अन्त्यलोपेतुत्वंसमित्येव।तुल्यमिति।अ
द्वावन्त्यलोपेतोगुणइति पररूपमिति भावः।विशेषइति।भ्यमित्यन्त्यलोपेत्वाभ्यंमा।भ्यमित्येव।शेषस्यलोपस्त्वत्रनेत्युक्तङि·टामयस्स्इति।ङि·द्वचनेषुआमिभ्यसिचेत्यर्थः।युषमसमि
तिपाठः।अन्त्यलोपः।शेषेलोपस्याप्यभावेइति।टिलोपपक्षेइत्यर्थः।युवामावामिति।आत्वात्परत्वाद्युवावोः कृतयोः पुनः प्रसङ्गविज्ञानादात्वमिति भावः।भ्यमादेशपक्षइति।अत्रभ्यमभ्य
इत्यन्त्रीणि।युवाम्।आवांयुषाम्।असाम्।जसि।यूयम्।वयम्।युषम्।असम्।युष्मम्।अस्मम्।अम्औटोः।युवाम्।आवाम्।युषाम्।असाम्।युवान्।आवान्।युषान्।आसान्।यु
ष्मा।अस्मा।युष्मा।अस्मा।युवाभ्याम्।आवाभ्याम्।युषाभ्याम्।असाभ्याम्।युवाभिः।आवाभिः।युषाभिः।असाभिः।तुभ्यम्।मह्यम्।युषम्।असम्।युष्मम्।अस्मम्।युवाभ्याम्।आ
वाभ्याम्।युषाभ्याम्।असाभ्याम्।युवभ्यम्।आवभ्यम्।युष्मभ्यम्।अस्मभ्यम्।भ्यमादेशपक्षेतुयुष्मभ्यम्।अत्रसंयोगान्तलोपोन।भाष्येझलइत्यनुवर्तनात्।अननुवृत्तिपक्षेतु।
युड्भ्यम्।अस्मदस्तुस्कोरितिसलोपे।अभ्यम्।शेषेलोपेपितु।ओभ्यम्।युवत्।आवत्।युषत्।असत्।युष्मत्।अस्मत्।युवाभ्याम्।आवाभ्याम्।युषाभ्याम्।असाभ्याम्।भ्यसिङ·
सिवत्त्रीणि।तव।मम।युष।असा।युष्म।अस्म।युव्योः।आव्योः।युष्योः।अस्योः।युवाकम्।आवाकम्।युषाकम्।असाकम्।युष्माकम्।अस्माकम्।युव्यि।आव्यि।युष्मि।अस्मि।यु
व्योः।आव्योः।युष्योः।आस्योः।युवासु।आवासु।युषासु।असासु।एवञ्चचतुर्थ्यांभ्यसिचत्वारि।व्याख्यानेद्वैतथान्यतः।सुजस्ङेङस्ङसिभ्यस्सुआमिचत्रीणिनिश्चितु।अथ
स्येयबहुत्वेरूपाणि।त्वम्।अहम्।युषम्।असम्।युष्मम्।अस्मम्।युषाम्।असाम्।युषान्।असान्।युष्मा।अस्मा।युषाभ्याम्।आसाभ्याम्।युषाभिः।असाभिः।तुभ्यम्।मह्यम्। ४
युषम्।असम्।युष्मम्।अस्मम्।युषाभ्याम्।असाभ्याम्।युषभ्यम्।असभ्यम्।युष्मभ्यम्।अस्मभ्यम्।युड्भ्यम् ॥७ मोः फलेविशेषेणभ्यसोभ्यमितिसूत्रस्यभाष्यविरोधापत्याभाष्येणम
नभिधानमुचितम्।अत्ररूपलेखस्तुमाधवानुरोधात्।युष्मभ्यमिति।शेषेलोपस्यटिलोपत्वेइदम्।अन्त्यलोपत्वेतुयुड्भ्यमित्येव।ङ·सिवदिति।ङ·साविवेत्यर्थः।भ्यसिचत्वारीति।इदंस्वलिखित
रूपापेक्षया।अभ्यमिशेषेलोपस्यान्त्यलोपत्वेयुषभ्यमसभ्यमितिरूपमादायपञ्चेतितत्त्वम्।युषामसामिति।अत्रयुवावौनतद्विधायकसूत्रेद्विवचनपदघटकद्विशब्देनसूत्रेगृह्यमाणयुष्मदाद्युप
स्थितसंबोद्ध्योच्चारयित्रोरेवग्रहणेनतद्रूपार्थद्वयवाचकयोरेवतदादेशादितिभावः।कैयटस्तुअनयोरपिस्थानिवद्भावेनगृह्यमाणरूपतयाख्यानकर्तृद्वयवाचकयोरप्यादेशमत्वायुवामावामित्य।

व्याह्वायुड्भ्यमिति।युष्मभ्यमित्यप्युक्तरीत्याबोध्यम्।

भ्यसितुत्रयमिति।इदंयुष्मदित्थलिखितरूपापेक्षयाबोध्यम्।कौलुप्तेति।अस्यानाश्रवणेप्रमाणन्तुमान्तेथिकेचप्रवृत्तिरित्येवंकैयटेनमतान्तरतयाकृतंभाष्यव्याख्यानमेवेतिदिक्।सन्नि
पातेति।विभक्तावन्त्यलोपेऽदन्ततायांमद्योटापितद्विघातःस्पष्ट एवेतिभावः।हेत्वहेमेति।अदन्ताआदेशाइतिपक्षेइदम्।हलन्ताआदेशाइतिपक्षेत्विदन्त्यम्।संप्रसारणमिति।न
चतत्रनकारग्रहणंकर्त्तव्यमितिवार्त्तिकात्कथमिहसंप्रसारणम्।टिलोपस्याभीयत्वेनासिद्धत्वात्।अनदुत्वपकर्षपक्षेलोपस्यस्थानिवद्भावेनानत्वंबोध्यम्।अनन्त ˉन्त्वार्थसमाज
अमभ्यम्।ओभ्यम्।युषत्।असत्।युष्मत्।अस्मम्।युषाभ्याम्।असाभ्याम्।युष्मभ्यम्।अस्मभ्यम्।युषत्।असत्।युष्मत्।अस्मत्।तव।मम।युष।अस।युष्म।अस्म।यु
ष्योः।अस्योः।युषाकम्।असाकम्।युष्माकम्।अस्माकम्।युष्यि।अस्यि।युष्योः।अस्योः।युषासु।असासु।एवंङसिभ्यसामसुद्वैरूप्येचतुर्थीभ्यसितुत्रयम्।सुजसङेङ·
स्तुतथात्वेषभूत्स्वेकमन्यतः।इहसर्वत्रप्रकृत्यादेशयत्वात्त्वशेषेलोपेषुकर्त्तव्येषुणिलोपोनस्थानिवत्।कौलुप्तत्वादितिदिक्।अत्रेदमवधेयम्।कृतःकर्त्तव्येऽसञ्ज्ञा
यामितिविशेष्यनिघ्नतोक्तेरिहत्रिलिङ्गता।तत्रस्त्रीत्वेटाप्प्राप्तः।सचयद्यप्यलिङ्गत्वाद्दिलोपाद्वेतिकेवलेउक्तयारीत्यासमाधातुन्नशक्यते।तथापिसन्निपातपरि
भाषयासमाधेयः।क्लीबत्वेतुसुजसोरसर्वनामस्थानत्वेनभत्वाद्आतोधातोरित्यालोपेत्वंममित्येवरूपम्।अवृद्धिवादिनांसंबोधनेएङ्ह्रस्वादितिहल्मात्रलो
पे।हेत्व।हेम।प्रकृतमनुसरामः।भस्यादिति।इष्ठवदित्यतिदेशेनभसञ्ज्ञायांसत्यांश्वयुवेतिसूत्रेणसंप्रसारणम्।नचाऽतद्धितइतिपर्युदासात्कथमिदमिति
वाच्यम्।णेस्तद्धितत्वाभावात्।नचातिदेशेनतद्धितत्वम्।इष्ठनीवकार्यंह्यतिदिश्यते।नचतद्धितेसंप्रसारणंनेतिनिषेधोस्ति।यइहातिदिश्येतपर्युदासोह्ययम्।
तथाचतद्धितेनविधिर्नप्रतिषेधः।नन्वेवमपिदविष्ठइत्यादौइष्ठनिओर्गुणःपूर्वस्यइष्ठइतिइहाप्यतिदिश्यतेतिचेन्नैवम्।तस्मिन्कर्त्तव्येसंप्रसारणटिलोपयोराभी
यत्वेनासिद्धत्वात्॥ ७७ ग्रस्तंश्वन्शब्दत्वन्तुसर्वेसर्वपदादेशाइतिन्यायेन।इष्ठनीवेति।इष्ठनियदृष्टन्तदतिदिश्यतेटिलोपादीतिभावः।ब्रह्मिष्ठइत्यादौइष्ठत्वमात्रेणटिलोपातिदेशे
भवत्येवेतितात्पर्यम्।श्वन्शब्दादिष्ठनोभावेनतत्रसंप्रसारणाभावेनतदतिदेशोऽशक्यइतिबोध्यम्।तद्धितेनविधिर्नप्रतिषेधइति।शाब्दःप्रतिषेधइत्यर्थः।आर्थस्यसत्वेपितदतिदेशेमाना

भावइतिभावः।तत्रशङ्केते।नन्वेवमिति।असिद्धत्वादिति।
पत्वेनाकोक्तिरीतिरिह्याबाधाद्वेत्यपिबोध्यम्॥

म·श·
३१८

टिलोपोनेति। प्रकृतिभावादितिभावः॥ इतिईत्वमिति। अतिदेशेनभत्वात्। अच्शब्दस्याश्रूयमाणत्वाच्चेतिभावः। इदमीत्वमाटः पूर्वमन्तरङ्गत्वादितिबोध्यम्। अमुमञ्चयतीति। प्रसज्येतेत्य
नुकर्षः। बलिंबन्धयतीति। इदंहेतुमतिचेत्यत्रस्पष्टंभाष्ये। मुशब्दस्येति। तदसिद्धत्वेहिदशब्दस्यद्विःप्रयोगःप्राप्नोतिदृष्यतेतुमुशब्दस्येतिभावः। विहितत्वादिति। भूभावस्येतिशेषः। स्पष्टएवे
टेरित्यस्यैवेति। तच्चेहप्रकृतिभावेननिवृत्तमितिभावः। उदीचयतीति। उपसर्गस्यपृथक्करणादच्छब्दाण्णिच्इतिटिलोपोन। उदईदिति। त्वम्। उदैचिचदिति। णिलोपस्यद्वि
र्वचनेचीतिस्थानिवत्त्वात्चिशब्दस्यद्वित्वम्। प्रत्यचिचदिति। अचइत्यल्लोपः। चिशब्दात्पूर्वमटियणादेशः। तिरापयतीति। इहतिरसःपृथक्करणंनास्ति। अनुपसर्गत्वात्।
अतःप्रकृत्यैकाजितिनप्रवर्त्ततेतदाह। अञ्चेरिति। देवद्र्यञ्चमिति। नन्विहाख्यानात्कृतस्तदाचष्टेइतिकारकस्यपृथक्करणादिकंस्यात्। ततश्चदेवानञ्चयतीतिप्रसज्येत।
नचकृत्प्रकृतेरादेशेसत्येवतत्प्रवृत्तिः। प्रकृतिप्रत्यापत्तिसन्नियोगशिष्टत्वादितिवाच्यम्। राजानमागमयतीत्यत्राप्यात्रेरितिचेन्नैवं। श्रूयमाणेकृतितत्प्रवृत्तेः। इहचकि
नोलुप्तत्वात्। एतच्चकृल्लुक्सन्नियोगशिष्टत्वाल्लभ्यते। किंचमहाजनप्रवादविषयीभूतार्थविषयकमेवतत्। आख्यानग्रहणसामर्थ्यात्। तादृशानामेवभाष्यादावुदाहृतत्वाच्च।
आमुमुमुआयदिति। पूर्वत्रासिद्धीयमद्विर्वचनेइतिमुशब्दस्यासिद्धत्वंन। स्वयतीति। अव्ययानांभमात्रेटिलोपः। प्रकृत्यैकाजितिप्रकृतिभावस्तुटेरित्यस्यैवबाधकः। येननाप्राप्तिन्याया
त्। आनन्तर्याच्च। असस्वदिति। णौकृतत्वेनटिलोपस्यस्थानिवत्वात्स्वरशब्दस्यद्वित्वमितिमतेनेदम्। वस्तुतस्तुअजादेशःस्थानिवत्अयन्तुअज्झलादेशः। अतोत्रणिच्सहितस्यैवद्वि
त्वन्तदाह। असिस्वदिति। भावयतीति। इष्ठस्ययिट्चेतिसूत्रेणेष्ठनिविहितत्वाद्बहोर्भूभावः। ननुयिडागमोपितर्हिणेरस्त्वितिचेत्मैवम्। इष्ठवदिति हिसप्तम्यन्ताद्वतिः। णावित्युपमेयेसप्त
मीदर्शनात्। तेनेष्ठनिपरेपूर्वस्ययत्कार्यंतदितिदिश्यते। नत्विष्ठनोपि। किंचप्रातिपदिकस्येत्युक्त्यापीत्थंलभ्यते। टेरितिसूत्रेकैयटेनभावयतीतिस्वमतेनोदाहृत्यवहयतीत्येकीयम
तत्वेनोपन्यस्तम्। हरदत्तादयस्तुतदेवप्रबलमितिमन्यन्ते। सन्नियोगशिष्टपरिभाषयायिडभावेभूभावस्याप्यभावादिति। वस्तुतस्तुइष्ठवदितिकार्यातिदेशःप्राधान्यात्। एवञ्चेष्टनि
दृष्टंभूभावेसत्त्वेहविपत्तेः। तथाचसन्नियोगशिष्टत्वाभावःस्पष्टएव॥ ति। नचेष्टरूपनिमित्तवैकल्यमात्रप्रयुक्तटिलोपाद्युपदेशाप्रवृत्तावतिदेशस्यचारितार्थ्येनसन्नियोगशिष्टन्यायेनापिबोधिता
प्राप्तौतद्व्यापारेमानाभावइतिवाच्यम्। तत्रापिप्रवृत्तौबाधकाभावात्। उपदेशाप्राप्तावतिदेशइत्येवनियमःनत्वेकनिमित्तवैकल्यप्रयुक्ताप्राप्तावेवेतिमानाभावादितिदिक्॥

राम:
३१८

तदन्तेदिति।वहयतीत्यस्यारुचिग्रस्तत्वमित्यर्थः।इत्यर्थादिति।नाग्लोपीतिनिषेधस्तु नञ्घटितानित्यत्वान्नेत्यभिमानः।सदृशलाक्षणिकश्रीशब्दात् णिचि श्रीसदृशीं शोभावत्त्वेनाकरोदित्यर्थ इत्यन्ये।असस्रजदिति।नन्विदमयुक्तं णौचङीति सूत्रे नाग्लोपीति प्रत्याहारग्रहणस्य वृद्धेर्लोपो बलीयानित्यर्थज्ञापकत्वं वदतो भाष्यकृतः प्रामाण्यादिकारोकारोपधाण्णेरभावस्य कैयटाद्युक्तत्वात्।नचेकारैकारान्ते लोपस्य स्थानिवत्त्वादेव ह्रस्वाप्राप्तौ अकग्रहणनैरर्थक्याद्भाष्यं प्रौढिवाद इति वाच्यम्।चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधादिति चेन्न।स्रग्विन्शब्दाण्णिचि विन्लोपेङ्वृत्ते तिवृद्ध्यभावेन नाग्लोपीत्यस्य प्रवृत्तौ फलाभावेन ज्ञापकस्य सुस्थत्वात्।इतो णेरभावे हि लुग्विधायके विन्ग्रहणं व्यर्थमेव स्यात् विन्विषये मतोः सत्त्वेन तल्लुकैव स्रजिष्ठ इत्यादिसिद्धेः।

तदेतद्ध्वनयति।वहयतीत्यन्य इति।श्रीमतीमिति।एतेन ससञ्चरिष्णुर्भुवनान्तरेषु यां सदृच्छया शिश्रियदाश्रयः श्रियामिति माघश्लोकेऽशिश्रियदिति प्रचुरः पाठोपि व्याख्यातः।श्रीमतीमकरोदित्यर्थात्।पप्रसयतीति।अत्रेदमवधेयम्।विन्मतोर्लुकि सन्वदित्यादिकन्न।अग्लोपित्वात्।अनग्लोपिनेति सिद्धान्तस्य भाष्यारूढत्वात्।तेन स्रग्विणमाख्यत् असस्रजत्।पयस्विनीम्।अपपयसत्।गोमन्तम्।अजुगवत्।स्रजं पयद् इत्यादिविग्रहे तु असिस्रजत्।अपीपयत्।अजूगवदित्यादि।एवञ्च प्राचा सुब्धातोः सन्वद्भावो वेति व्यवस्थाशून्यं यदुक्तं तन्निर्मूलत्वादुपेक्ष्यम्।स्थवयतीति।अत्र गुणस्याचोञ्णितिवृद्धिः प्राप्ता अङ्गवृत्तपरिभाषया प्रातिपदिकाद्धात्वर्थे इति बहुलग्रहणाद्वा नेति सिद्धान्तः।एवन्दवयति यवयतीत्यत्रापि।ज्यापयतीति।वृद्धस्य चेति ज्यः।स च प्रियस्थिरेति वर्षादेशेन सह विकल्प्यते तदाह।वर्षयतीति।उरुमिति।अत्र वरादेशे वृद्धिर्नेति सुब्धातुरत्नैमाधवः॥ऊर्णोतेर्धातुत्वात्तु स एव वृद्धिमुदाजहार॥बाहुलकादिह वृद्धिविकल्प इति तदाशयं ध्वनयन्नुदाहरति।वरयति।वारयतीति॥इति नामधातुप्रक्रिया॥कण्ड्वादिभ्यो धातोरित्यनुवर्त्तते।वेति निवृत्तं तदाह।धातुभ्यो नित्यमिति।द्विधा इति।यदि हि प्रातिपदिकान्येव स्युः तर्हि यकः कित्त्वं व्यर्थं स्यात्।तद्धि गुणनिषेधार्थम्।यदि तु धातव एव स्युः तर्हि कांश्चिद्दीर्घान्नात्र पठेत्।अकृत्सार्वेति सिद्धत्वात् ॥७ विन्नन्तात्तु नेष्ठनादिरजादी गुणवचनादेवेत्युक्तेः।अत्रान्तरङ्गत्वात्पूर्वं ज्ञातस्य मत्वस्य णिलोपेप्यनिवृत्तेर्नैकुत्वमिति दिक्।गोमन्तमजुगावदिति पाठः।अचोञ्णितीति वृद्धेर्दुर्वारत्वात् प्रापयतीति भाष्योदाहरणे तद्दर्शनात् स्रजजयतीति न्यायेन वृद्ध्यभावे तु ह्रस्वपाठोपि सूप~ पादः।असिस्रज~ दित्युत्तरमपपयदिति पाठः।पयस्शब्दात् णिच्यग्लोपित्वात्।सिद्धान्त इति।दवयतीति टेरिति सूत्रे भाष्येऽदाहरणात्।अत एवादेशोत्तरमुपधावृद्धिरपि नेति भावः।वारयतीति वरयतीत्युचितं दवयतीतिवत्॥ ॥ इति नामधातुप्रक्रिया॥

सार्थक — इति।नैतेभ्यःक्विप्दृश्यतइतिभाष्येणयगन्तेभ्यःक्विबभावात्यङन्तेभ्यःक्विपेदंसिद्धमितिनशङ्क्यमित्यर्थः।कृञर्थइति।करणइत्यनुवर्त्ततेइतितद्भावः।कृञर्थाविवक्षायाङ्कण्डूमित्याद्य
द्वैविध्येतुधातुभ्योयकिगुणनिषेधेनकित्त्वंसार्थकम्।कण्डूरसूरित्यादिग्रहितप्रयोगसिद्ध्यादीर्घपाठोपिसार्थकः।उक्तञ्चभाष्ये।धातुप्रकरणाद्धातुःकस्यचासञ्जनादपि।
आहचायमिमन्दीर्घमन्येधातुर्विभाषितइति।यत्तुप्राचोक्तम्।कण्ड्वादिभ्योयक्स्यात्कृञर्थइति।यच्चकण्डूंकरोतिकण्डूयतीति।यच्चनामधातुत्वाद्यथेष्टन्द्वित्वप्राप्तेकंड्वादेस्तृ
तीयस्येतिनियम्यतइतिनदेतत्सर्वमाकरविरुद्धम्।अनेकदोषग्रस्तञ्च।तथाहि।कृञर्थइत्युक्त्याकरणइत्यस्यानुवृत्तिर्लभ्यते।तच्चव्यर्थंप्रस्तुतानर्थकारिणिजन्तेष्विवप्र
कृतिप्रत्ययाभ्यांव्यापारद्वयप्रतीत्यापत्तेः।कण्डूंकरोतीतिविग्रहोप्यशुद्धः।नचप्रातिपदिकान्येवकण्ड्वादयः।तेभ्यश्चकरणेयगितितस्याशयउचितः।धातवःप्रातिपदिका
निचेतिकण्ड्वादयोद्विविधाइत्यस्यप्राचाप्युक्तत्वात्।अतएवनामधातुत्वादित्याद्यप्यशुद्धमेव।धात्वधिकाराद्धातुभ्यएवयगितिसिद्धान्तात्।धातोर्लङादौकण्ड्वतीत्याद्यनि
ष्टप्रसङ्गाच्च।सुखदुःखादिप्रातिपदिकेभ्योयकिअल्लोपासंभवेनसुख्यतीत्याद्यसिद्धिप्रसंसङ्गाच्च।यत्तुपरिष्कुर्वन्तिइत्थङ्किलग्रन्थाशयः।कण्ड्वादीनिप्रातिपदिकान्येव
यक्चवैकल्पिकः।अतएवोक्तङ्कृञर्थइतिविग्रहोतच्चकण्डूङ्करोतीतिनहिधातुभ्योयकिप्रातिपदिकेभ्योवानित्येयकिअयंविग्रहःसंभवति।एवञ्चनामधातुत्वादिसम्भवे
वा।कथन्तर्हिद्वैविध्यमुक्तमितिचेत्।इत्थंयगन्ताःसन्तोधातवः।केवलास्तुप्रातिपदिकानीति।यद्वायगन्तधात्ववयवेषुतेषुधातुशब्दोगौणः।प्रत्ययसदसद्भावाभ्यामवस्थाभे
दाच्चद्वैविध्यम्।नचैवंसुख्यतीत्यादौअतोलोपोनस्यादितिवाच्यम्।यकःकित्त्वेनावश्यकत्वाल्लाघवाच्चार्द्धधातुकस्यैवज्ञापनात्।अतएवद्विधाइत्येवोक्तंनतुधातुभ्योयगिति।
अत्रेदंवक्तव्यम्।प्रातिपदिकाद्विधानंकरणइत्यस्यानुवर्त्तनञ्चनतावत्सूत्रानुगुणम्।त्वदुक्तपक्षेहियङ्विधेःप्रागेवयकंविदध्यात्।धातोरित्यस्यानपेक्षितत्वात्।तथान्यास
पाठस्तुधातोरित्यस्यसंबन्धमेवद्रढयति।हेतुमतिगुपूधूपेतिपूर्वोत्तरसूत्रयोर्धातु —— ग्रहणसंबन्धस्यनिर्विवादतयातत्सदेशपठितेकण्ड्वादिसूत्रेतदुपेक्षायांबीजाभावा
त्।आर्द्धधातुकसञ्ज्ञारूपफलस्ययङादौनिर्णीतस्ययक्यपिस्पष्टत्वाच्च॥ [illegible] पीतितत्तात्पर्यम्।नचप्रातिपदिकान्येवेति।तानिचफलांशमात्रार्थकानीतिभावः।अल्लोपासंभवेनेति।
आर्द्धधातुकत्वाभावादितिभावः॥

दिगिति। दिगर्थस्तु यथेष्टं नामधातुष्वित्येव सिद्धे कण्ड्वादेस्तृतीयस्येत्यस्य नियामकत्वापत्तौ गौरवम्। मम तु विध्यर्थत्वं स्पष्टमेव। नामशब्दस्य सुबन्तपरत्वे तु तद्प्राप्त्या मूलविरोधः। किं च कण्डूरित्यादौ सत्त्वभूतार्थाभिधानात् यक्समभिव्याहारे चासत्त्वभूतार्थाभिधायित्वादर्थभेदेन शब्दभेदाच्च द्वैविध्य एव पर्यवसानम्। दूषि

एतेनावश्यकत्वाल्लाघवाच्चार्द्धधातुकत्वमेव यकः कित्वेन ज्ञाप्यत इति प्रत्युक्तम्। अप्रकृतस्यार्द्धधातुकत्वस्य कल्पने प्रकृतधात्वधिकारत्यागे च विपरीतगौरवस्योद्भटत्वात्। यङादीनामिव यकोप्यार्द्धधातुकत्वसंज्ञाया अनायाससिद्धत्वाच्च। नापीदं भाष्यानुगुणम्। धातुप्रकरणादित्यादिभाष्येण सह विरोधस्य स्पष्टत्वात्। नापि व्याख्येयग्रन्थानुगुणम्। द्वैविध्यग्रन्थस्य हृदयशून्यत्वापत्तेः। यत्तु व्याख्यातं यगन्ताः सन्तो धातव इत्यादि तदपि न। यगन्ताः कण्ड्वादय इत्यस्य व्याहतत्वात्। न हि यगागमो येन तद्विशिष्टः कण्ड्वादिः स्यात्। कण्ड्वादय इत्यस्य तद्विशिष्टसमुदायोर्थ इति चेत्। तर्हि नासौ प्रातिपदिकमिति स्पष्टमेव। किं च सकलप्रातिपदिकानां कुञ्जादिप्रकृतितया कण्ड्वादितुल्यद्वैविध्यसत्त्वात्। किमेषामेव विशिष्य तत्कथनेन तस्माद्यथाकरमेव गुणगृह्येग्रहीतुमुचितमिति दिक्। अस्तु। केचिन्मनस्युपतापे इति पठन्ति। तत्रापि मनस इत्यर्थनिर्देशान्तर्गतमेव । ॥एवं पूर्वभावे इति पूर्वशब्दोपि। पूर्वभावः पूर्वत्वम्। केचित्तु मनस पूर्वे इति धातुं मत्त्वा मनस्यति पूर्वतीत्युदाजह्रुः। तच्च मतन्धातुचन्द्रोदये समर्थितं शब्दकौस्तुभे तु दूषितं तत एवावधार्यम् ॥ इति कण्ड्वादयः॥ प्रथमस्येत्युपलक्षणम्। अजादेस्तु द्वितीयस्येत्यपि बोध्यम्। यथेष्टमिति तु नेह प्राप्तं नामधातुत्वस्य निराकृतत्वात्। अतएव मूले कण्ड्वादयो नामधातुषु नोक्ताः। किंतु तान्समाप्य पृथगेवोक्ताः। प्राचस्तु तन्मध्ये पाठो दुष्ट एव। अचः परस्मैवेति। हेतुमण्णिच्प्रकरणे व्युत्पादितमेतत्। षत्वं नास्तीति। आदेशोयं सकारस्तस्य हि षत्वमुक्तमयन्त्वादेशस्यावयवोन्त्यादेश इति भावः ॥ इति प्रत्ययमाला ॥

तमिति। वृत्तावर्थनिर्देशरहितगणपाठे सुलेट्लोट्लोलाद्देव पाठात् तत् दूषितमिति भावः॥ इति कण्ड्वादयः॥ श्रीरामः ॥ प्रत्ययमाला च ॥

परस्परकरणमपीति।अपिनाऽन्यकर्मणोऽन्येनकरणसङ्ग्रहः।उत्तरार्थमिति।भावकर्मणोःसामान्यसूत्रेणैवसिद्धासामर्थ्यादेवास्यकर्त्तरिप्रवृत्तिःसिद्धेतिभावः।षत्वनिषेधइति।प्रत्यय
सकारत्वादुपसर्गप्रादुर्भ्यामितिषत्वमपिनेतिबोध्यम्।एकदेशेति।व्यपदेशिवद्भावेनपदत्वमपिसुलभम्।अर्थग्रहणसामर्थ्यादिति।गतिहिंसयोरित्येवतत्रवर्त्तमानेभ्योधातुभ्यइत्यर्थेनेष्ट
सिद्धेरितिभावः।वहेस्त्विति।नियोऽप्युपलक्षणम्।अजाग्रामादिसंयोगानुकूलदेवदत्तादिनिष्ठोव्यापारोवहत्याद्यर्थः।गतिस्तुग्रामादिसंयोगानुकूलकर्तृनिष्ठोव्यापारइत्यगत्यर्थत्वमितिभावः
कर्त्तरिकर्म।परस्परकरणमपिकर्मव्यतिहारः।संप्रहरन्तेराजानः॥कर्त्तृग्रहणमुत्तरार्थम्।व्यतिस्तइति।यच्परत्वाभावान्नषः।व्यतिस्सइति।सात्पदाद्योरितिषत्वनिषेधः।एकदेशविकृ
तन्यायेनप्रत्ययमात्रस्यपदत्वात्।नगतिहिम्।एभ्यःकर्मव्यतिहारेआत्मनेपदंन।हरतेरिति।अर्थग्रहणसामर्थ्याद्धियेशब्दान्तरनिरपेक्षाएवगतिहिंसयोर्वर्त्तन्तेतइहगृह्यन्ते।
हरतिस्तूपसर्गवशाद्धिंसायांवर्त्ततइतिनतस्यायंप्रतिषेधइतिवार्त्तिकंनारम्भणीयमित्याहुः।कथन्तर्हिततःसंप्रहरिष्यन्तौदृष्ट्वाकर्णधनञ्जयाविति।अत्राहुः।योत्स्यमानाविति
विवक्षितेनतुकर्मव्यतिहारः।वहेस्तुनायंनिषेधः।अगत्यर्थत्वात्।प्रापणंहिवहेरर्थः।गतिप्रतीतिस्त्वाक्षेपात्।इतरेत।लौकिकेशब्दव्यवहारेलाघवंप्रत्यनादरादितरेतरादिश
ब्दाः।व्यतीत्युपसर्गौचकर्मव्यतिहारद्योतनायसमुच्चीयेते।तथात्मनेपदमपिसमुच्चीयेतेतिनिषेधोऽयमारभ्यते।संपद्विनिमयेचोभौदधतुर्भुवनद्वयमित्यत्रतुकरणविनिमये
सत्यपिक्रियाविनिमयस्याऽविवक्षितत्वान्नतङ्।नेर्विशः।कथंन्यविशतेति।अटाव्यवधानात्।नचस्याङ्गमव्यवधायकमितिवाच्यम्।अङ्गभक्तस्याटोविकरणान्तप्रत्ययव
वत्वेऽपिधातुप्रत्ययावयवत्वात्।सत्यम्।लावस्थायामडितिभाष्यमतेतावन्नकश्चिद्दोषः।मतान्तरेतूपसर्गनियमेऽड्व्यवायउपसंख्यानमितिवार्त्तिकमस्तीतिदिक्।अर्थव
द्ग्रहणपरिभाषयालक्षणप्रतिपदोक्तपरिभाषयावानेरुपसर्गस्यग्रहणम्।तेनेहनामधूनिविशन्तिभ्रमराः।कथन्तर्हिइत्युक्त्वामैथिलींभर्त्तुरङ्केनिविशतीभयादिति।अ
ङ्गनिविशतीमितिपठनीयमित्याहुः॥७आक्षेपादिति।तद्व्यापारमात्रेणाजाव्यापारंविनाऽजाग्रामसंयोगासंभवादितिभावः।नकश्चिद्दोषइति।यद्यपिस्यादयोऽपिलावस्थायांतथापि
परत्वादडेवअतोऽङ्गसञ्ज्ञापेक्षत्ववत्स्यादेर्धातुसञ्ज्ञापेक्षत्वेनसमत्वात्।कृताकृतप्रसङ्गित्वमात्रेणशब्दान्तरस्यप्राप्तिवत्शब्दान्तरात्प्राप्यस्यचनित्यताअनित्यताचोभयोःसमा।वार्त्तिक

मस्तीति।नेरितिषष्ठी।परिव्यवेभ्यइत्यादावपिषष्ठ्य
र्थेपञ्चमीत्यपिभाष्येस्पष्टम्॥

इत्यादेरिति।आदिना।विभाषाभावादिकर्मकादित्यादि।नह्येतेष्वेनचपदान्तरसंबन्धनिमित्तकार्यंपदसंस्कारपक्षानाश्रयणज्ज्ञाप्यतइतिभावः।अत्रस्मृताविति।स्मरणपूर्वमाददातीत्यर्थः।सिद्धत्वायत्तुदुर्घटवृत्तावुक्तंपदसंस्कारपक्षाश्रयणाद्दोषइति।तन्न।पदान्तरसमभिव्याहारेनियमप्रवृत्तेर्दुर्वारत्वात्।अन्यथायुष्मदस्मत्सामानाधिकरण्येपित्वदुक्तरीत्याप्रथमपुरुषापत्तेः।वालिप्सायामित्यादेर्वैयर्थ्यापत्तेश्चेतिदिक्।आङोदः।कथन्तर्हिव्याददतेविहगइतिमुखंस्वकीयमिति।कर्त्रभिप्रायेभविष्यति।एतेनमुखंव्यादायस्वपितीत्यत्रसुप्त्वाव्याददतइतिव्यत्यासेनप्रयोगइतिप्रत्यभावपरीक्षायांवाचस्पतिप्रयोगोव्याख्यातः।आङोङिद्धिशिष्टस्यग्रहणान्नेह।भिक्षामाददाति।अत्रस्मृतावाकारइतिहरदत्तः।एतेनप्रतीकमाददतीतिविवरणग्रन्थोव्याख्यातः।शिक्षेर्जिज्ञासायाम्।शिक्षविद्योपादानेइत्यस्यनेहग्रहणम्।अनुदात्तेत्त्वादेवसिद्धत्वात्।किंतुशकेःसन्नन्तस्य।सनिमीमेतीस्।तदेतदाह।धनुर्विषयइत्यादिना।नियमार्थमिति।नचैवंनाथतेरनुदात्तेत्त्वंव्यर्थमितिवाच्यम्।तस्यनाथतइतियुजर्थत्वात्।मातुरनुहरतीति।सादृश्यमात्रमिहविवक्षितम्।नतुप्रकारताच्छील्यम्।शपउपालम्भे।कथन्तर्हिनीवींप्रतिप्रणिहितेतुकरेप्रियेणसख्यःशपामियदिकिंचिदपिस्मरामीति।अत्राहुः।श्लाघार्थंप्रकाशयामीत्येतावदिहविवक्षितंनतुशपथइति।प्रकाशने।स्थेयोविवादपदनिर्णेता।तिष्ठन्तेऽस्मिन्नितिव्युत्पत्तेः।बाहुलकादधिकरणेऽचोयत्।उदोनू।उत्पूर्वात्तिष्ठतेरनूर्ध्वेपरिस्पन्देवर्त्तमानादित्यर्थः।इहपरिस्पन्दस्यानूर्ध्वत्वंनामोपरिदेशसंयोगफलकत्वाभावः।यदप्युदोनूर्ध्वेत्युक्तेपिक्रियावाचकत्वंलभ्यतएवतथापिपरिस्पन्दतालाभार्थंकर्मपदम्।तदेतदाह।ईहायामेवेति।समोगम्यृ।वृत्तिकारस्तुसमोगम्यृच्छिप्रच्छिस्वरत्यर्त्तिश्रुविदिभ्यइतिपठित्वादृशेरुपसंख्यानमाह।तत्रवार्त्तिकानुपूर्वीभङ्गेकेषांचिदेवसूत्रेप्रक्षेपेदृशेरेवबहिष्कारेबीजाभावात्मुनित्रयानुसारिणान्तदुपेक्षैवोचितेतिभावः।ग्रामंसङ्गच्छतीति।कथन्तर्हितच्चैकंसमगच्छतेति।आर्षत्वात्।यद्वाचतुर्वर्णादित्वात्स्वार्थेष्यञ्।एकंसमपद्यतेत्यर्थः ॥ ७ दिति।नचनियमार्थम्।विधित्वौचित्यात्।सादृश्यमात्रमिति।एतच्चतद्धितार्थेत्यत्रभाष्येस्पष्टम्।नतुशपथइतिइति।एतद्ध्यनुरोधेन।भाष्येशपउपलम्भनइतिपाठात्।उपलम्भनंप्रकाशनमितिकैयटाच्च ॥

साहचर्यादिति। व्याख्यानसहकृतादितिभावः।तादृशेनहिलुग्विकरणपरिभाषाबाध्यते।अतएवभाष्येसंवित्तइत्युदाहृतम्।किंचवेत्तेर्विभाषेतिरुड्विधानेनवेतेरात्मनेपदमावश्यकन्तत्रवेत्तेरेवेति।परस्मैपदिभ्यांसाहचर्यादितिभावः।विन्दतिर्हिस्वरितेत्।सत्ताविचारणार्थयोस्त्वनुदात्तेत्त्वादेवसिद्धम्।अङ्विधौत्वितिलुग्विकरणेनशासिनासाहचर्यादितिभावः।गन्धनंहिंसेति।गन्धअर्दने।अर्दहिंसायामितिचुरादौपाठादितिभावः।सहसावर्त्ततेसाहसिकः।ओजःसहोंभसावर्त्ततइतिठक्।तस्यकर्मसाहसिक्यम्।ष्यञान्देतदाह।तेषुसहसेति।नचैवंपरदारानितिकर्मणोऽनन्वयःशङ्क्यः।साहसिक्यस्यप्रयोगोपाधित्वात्।धात्वर्थस्तुवशीकरणम्।एधोदकस्येति।एधाश्चउदकञ्चएषांसमाहारः।यद्वा।एधांसिचदकञ्चेतिविग्रहः।उदकपर्यायोदकशब्दोप्यस्ति।तथाचहलायुधः।आपस्तोयंघनरसंपयःपुष्करंमेघपुष्पंकंपानीयंसलिलमुदकंवारिवाः।शंवरंच।अर्णः।पाथः।कुशंजलंवनंक्षारमंभोंबुनीरंप्रोक्तंप्राज्ञैर्भुवनममृतञ्जीवनीयंदकञ्चेति।अभिभवेचेति।येत्वभिभवेक्रन्दसीतिपठन्तितेषामपिक्रन्दसीतिग्राम्येवादइतिहरदत्तः।माणवकमुपनयतइति।विनिन्युरेनङ्गुरवोगुरुप्रियमित्यत्रतुआचार्य्यकरणस्याविवक्षितत्वान्नतङ्।हर्म्यतलादितिभाष्येतुहर्म्यतलमितिप्रचुरपाठः।तत्रोद्गमपूर्विकायांव्याप्तौक्रमिर्द्रष्टव्यः।कथन्तर्हिनभस्तमाक्रामतिचन्द्रमाःक्रमादिति।व्याप्तिमात्रमिहक्रमेरर्थोनतूद्गमनम्।अतोनतङ्।प्रोपाभ्याम्।उपक्रमतइति।उपपराभ्यामितितुनेहप्रवर्त्तते।वृत्त्याद्यर्थाभावात्।अप्राप्तविभाषेति।नचवृत्त्यादिसूत्रंसोपसर्गेचरितार्थमियन्तूभयत्रविभाषास्त्वितिवाच्यम्।उपपराभ्यामितिनियमस्योक्तत्वात्।अनुवदतेकठःकलापस्येति।अनुःसादृश्ये।तेनकलापस्येतितुल्यार्थैर्योगेशेषलक्षणाषष्ठी।समस्तृतीया।संपूर्वाच्चरतेस्तृतीयान्तेनयुक्तादित्यर्थः।दाण।भाष्येत्विदंसूत्रंप्रत्याख्यातम्।तथाहि।योदास्यासहभुञ्जानस्तयादत्तंस्वयंभुङ्क्तेस्वयञ्चतस्यैददातितत्रायंप्रयोगइष्यते ॥

हिनिर्देशादेवलुग्विकरणग्रहणमितिभावः।अनन्वयःशङ्क्यइति।सहसाप्रवृत्तिरेवप्रक्रमतेइत्यस्यार्थस्तत्रचसप्तम्युचितेतिभावः।सहसेत्यस्यबलात्कारेणाऽविचारेणवेत्यर्थः।क्रमिर्द्रष्टव्यइति।उद्गममात्रेऽकर्मकत्वमितिभावः।तत्रायमिति।अशिष्टव्यवहारेपरस्परकरणरूपेकर्मव्यतिहारेचेत्यर्थः ॥

तत्रस्वीकारमात्रेइति।अतएवइहकस्मान्नभवतिस्वंशाटकान्तमुपयच्छतीतिभाष्यंसङ्गच्छते।णेरणौ।क्रियापरइति।उत्तरवाक्येनाणौकर्मणःकर्तृत्वविधानादितिभावः।ननु कर्मपदस्यक्रियापरत्वेकर्मवत्कर्मणेत्यस्याग्रेणेरणावनाध्यानेइत्येवसूत्रणीयंस्याद्णौकर्मस्यक्रिययातुल्यक्रियएवकर्त्ताण्यन्तेकर्मवदितिसूत्रार्थइतिचेन्न।चिण्वदिटोप्याप तत्रचसहयुक्तेतृतीया।कर्मव्यतिहारेतङ्।दानपूर्वकेभोगेदाणधातुर्बोध्यइति।एतेनकर्मव्यतिहारोदाहरणेयुध्यतिशब्दप्रयोगआवश्यकइतिभाष्यन्तःप्रत्युक्ताः।सम इतिषष्ठीति।दास्यासंयच्छतइत्युदाहृत्यशिष्टव्यवहारेतुब्राह्मणीभ्यःसंप्रयच्छतीतिप्रत्युदाहरन्भाष्यकारइहव्याख्यानेप्रमाणम्।उपायस्वकरणंस्वीकारइति।यत्तुवृत्तिकृतोक्तंपाणिग्रहणमेवेष्यते।तेनेहन।परआर्यामुपयच्छति।दासीत्वेनस्वीकरोतीत्यर्थइति।तद्भाष्यविरुद्धंतत्रस्वीकारेआत्मनेपदस्योक्तत्वात्इतिभावः।तथाचभट्टिः।प्राङ्मुखउपायंस्तमहास्त्राणीति।समः।समोगम्यृच्छिभ्यामित्यतोविच्छिद्यपाठःसकर्मकादपिविधानार्थइतिध्वनयन्नुदाहरति।संक्ष्णुतेशस्त्रमिति।भुजो।भक्षणइतिवक्तव्येअनवनइतिवचनमर्थान्तरेपितङर्थमितिध्वनयन्नुदाहरति।बुभुजेपृथिवीपालइति।इहेति।उपभोगइत्युपलक्षणम् आत्मसात्करणस्यापि।इहचरुधादेरेवग्रहणम् अनवनइतिप्रतिषेधात्।संयोगोविप्रयोगश्चेत्युपलक्षणस्यविशेषस्मृतिहेतवइत्यभियुक्तोक्त्यानुभवबलेनचसंसर्गबहिःप्रयोगस्यापिविशेषावधारणोपायत्वात्।तेनभुजकौटिल्यइत्यस्यतुदादेःपरस्मैपदमेव।विभुजतिपाणिम्।णेरणौ।इहस्यादित्यन्तेनणेरितिव्याख्यातम्।अणौयत्कर्मणौचेदितिभिन्नंवाक्यम्।कर्मशब्दःक्रियापरः कर्तरिकर्मव्यतिहारइतिवत्।तदेतद्व्याचष्टे।णौयाक्रियासैवचेदिति।सकर्तेतिवाक्यान्तरम्।अणावित्यादिचेच्छब्दान्तमिहानुवर्ततेकर्मशब्दश्चकारकविशेषपरःशब्दाधिकाराश्रयणात्तदेतद्व्याचष्टे।णौयदित्यादिना।अनाध्यानइत्यंशंव्याचष्टेनत्विति।इहप्रसज्यप्रतिषेधोनातीवदुष्यतीतिव्याख्यातारः।नतुतत्राभिनिवेष्टव्यम्।पर्युदासस्यन्याय्यत्वात्।लक्ष्यविसंवादाभावाच्चापूर्वविप्रतिषेधेनेति ॥ ५६ सेः।सैवचेदिति।सामर्थ्यादेवकारलाभः।अध्यायेग्निप्रेषणहितौ।यकस्यायामधिकप्रवेशेपितत्सत्तायाअसत्त्वावाक्यस्यैववैयर्थ्यापत्तेः।अनुवर्त्ततेइति।यद्यप्येकयोगेनानुवृत्तिरितिइकोगुणेत्यत्रभाष्येउक्तंतथाप्यत्रवाक्यभेदसत्त्वात्स्वरितत्वसामर्थ्यादाकाङ्क्षावशाच्चसंबन्धइतिभावः ॥

भाष्योदाहरणमिति।नचायंभाष्यप्रयोगःक्रियाफलस्यपरगामित्वे।एवञ्चकर्त्तृगामिनिक्रियाफलेपरत्वाद्णावकर्मकेलस्यप्रवृत्तौनकिंचिद्बाधकमितिवाच्यम्।तदर्थमावश्यकस्यपरगामि
न्यपिपरत्वात्प्रवृत्तेर्दुर्वारत्वात्।नहिकर्त्रभिप्रायेइतितत्रानुवर्त्ततेफलाभावादितिभावः।नचाणावकर्मकादित्यत्रोद्देश्यतानवच्छेदकावच्छेदेनान्वयस्यव्युत्पत्तिसिद्धतयाऽण्यन्तावस्थात्वावच्छे
देनाकर्मकत्वप्रतीतेरत्रतदप्राप्तिः।राजानंपश्यतीत्यस्यापितदण्यन्तावस्थात्वादितिवाच्यम्।सामानाधिकरण्येनान्वयभ्रमवारणायतदङ्गीकारादित्यभिमानः।विभाषोपपदेनेत्यस्यविषयेऽ
स्यैवप्रवृत्तौदृढतरमानसत्वेतद्विषयोवाचनिकएवसइतिबोध्यम्।अन्यत्रभावक्रिययोःपर्यायत्वदर्शनादाह।अपरिस्पन्देति।विषयत्वापादनंविषयत्वापत्त्यनुकूलोव्यापारः।अंशद्वयेति
अत्रचप्रमाणंदर्शयतेराजेतिभाष्योदाहरणम्।अणावकर्मकादितिप्राप्तेति।निवृत्तप्रेषणत्वेनाकर्मकत्वादितिभावः।नन्वेतत्सूत्रंकर्मवत्कर्मणेत्यनेनैवगतार्थमित्याशङ्क्या
हाकर्तृस्थेत्यादि।अपरिस्पन्दनसाधनसाध्योभावः।सपरिस्पन्दसाधनसाध्याक्रियातत्रकर्मस्थभावेषुकर्मस्थक्रियेषुचकर्मवदित्यतिदेशःप्रवर्त्ततेनत्वन्यत्रेतिसिद्धान्तयिष्य
तइतिभावः।तत्रकर्त्तृस्थभावकमुदाहरति।पश्यन्तीत्यादि।ज्ञानविशेषविषयत्वापत्त्युपसर्जनविषयत्वापादनवचनोदृशिः।सकर्मकाणांमंशद्वयाभिधायितायाआवश्यक
त्वात्।धातूपात्तव्यापाराश्रयःकर्त्ता।व्यापारव्यधिकरणधातूपात्तफलशालिकर्मेतिसिद्धान्तात्।तदेतदाह।चाक्षुषेत्यादि।प्रेरणेति।सौकर्यविवक्षयेतिभावः।पश्यतिभावइ
ति।कर्त्तरिलट्।उक्तञ्च।निवृत्तप्रेषणंकर्मस्वक्रियावयवेस्थितम्।निवर्त्तमानेकर्मत्वेस्वेकर्तृत्वेवतिष्ठतेइति॥इहकर्मवदित्यतिदेशस्याप्रवृत्तेःकर्मकर्त्तरियथायथंशबादयस्ते
नशुद्धेनकर्त्रारूपन्तुल्यम्।ततइति।विषयत्वापत्तिमात्रवृत्तेर्दृशेरित्यर्थम्।तुल्योर्थइति।विषमयोःप्रेषणप्रतीतेसमयोश्चतत्त्यागादितिभावः।तत्रतृतीयेति।आद्यद्वितीययोस्तुण्यन्त
त्वाभावादुक्तिसंभवएवनास्तीतिभावः।क्रियासाम्येपीति।प्रथमकक्ष्यायासहेत्यर्थः॥ ७ फलव्यापाररूपेत्यर्थः।नचचतुर्थकक्ष्यायांफलमात्रवाचकत्वेनाणौक्रियेत्यंशाभावेनोदाहरणत्वा
नुपपत्तिः।धात्वर्थस्यैवतत्रक्रियाशब्देनग्रहणात्।यद्वातत्रापितत्सामानाधिकरणव्यापारप्रतीतिरस्तिअंशद्वयेत्यस्यव्यधिकरणांशद्वयेत्यर्थः।निवृत्तप्रेषणम्।त्यक्तप्रेषणधात्वर्थफलाश्रयम्।स्व
क्रियावयवे।स्वनिष्ठकर्मतानियामकधातुवाच्यैकदेशेफलरूपेतत्समानाधिकरणव्यापाररूपेवाआधेयतयास्थितमित्यर्थः।निवर्तमानेइति।प्रकृतधात्वर्थव्यापारव्यधिकरणफलाश्रयत्वाभा
वादितिभावः।अवतिष्ठतेइति।प्रधानभूतधात्वर्थाश्रयत्वादितिभावः।विषयत्वापत्तिमात्रेति।तत्समानाधिकरणव्यापारवाचकादित्यर्थः ॥

न्यूनाधिकभावेति। विनिगमनाविरहादेवकारेणोभयोरपिव्यवच्छेद इति भावः। एवकारस्यान्ययोगव्यवच्छेदपरत्वादाह। अधिकेति। एवञ्चाण्यन्तावस्थावाक्यद्वयेपि प्रत्यासत्त्यैकैव ग्राह्येतिवादिनामते
पिनदोषः। न्यूनत्वमात्रव्यवच्छेदस्तु नोक्तः असंभवात्॥ अध्यारोपितप्रेषणद्वितीयकक्षायां सूत्रस्य दुर्वारत्वेन व्यवच्छेदकवाक्यवैयर्थ्यापतेश्च। कर्मत्वावस्थायां कर्मनिष्ठफलव्यापारयोरुभयोरपि
द्वितीयामादायेति। अणौ या क्रिया सैव चेदित्यस्य न्यूनाधिकभावव्यवच्छेदपरत्वेदं बोध्यम्। अधिकव्यवच्छेदमात्रपरत्वे तु प्रथमामप्यादाय तत्संभवात्। कर्त्तस्य क्रियमुदाहरति। एव
मित्यादिना। इत्थं निवृत्तप्रेषणप्रक्रियांनुसृत्य अध्यारोपितप्रेषणक्रियायामाह। यद्वेति। हेतुत्वारोपादिति। अत्रापि सौकर्यविवक्षैव बीजम्। प्रेषणांशत्यागेन प्रेषणान्तरारोपेणापि सौ
कर्यप्रतीतेरनुभवसिद्धत्वादिति भावः। अर्थप्राग्वदिति। उदाहरणीभूतयोश्चरमकक्ष्यो पक्षद्वयेपि प्रेषणांशभानाभावादिति भावः। आधिक्यादिति। अस्मिन्पक्षे णौ चेत्या क्रियेत्यनेनाधि
क्यमात्रं व्यवच्छिद्यते न तु न्यूनत्वमपि। अन्यथा तृतीयकक्ष्यायामपि न स्यात्। प्रकृते तूपात्तप्रेषणांशत्यागेन न्यूनताध्रौव्यादिति भावः। णेरिति किम्। आरोहन्तीति निवृत्तप्रेषणान्माभूत्। न
चणौ चेदिति वाक्यशेषे श्रुतत्वात् णेरेव भविष्यतीति वाच्यम्। अण्यावित्यस्यापि श्रुतत्वात्। किंच उत्तरार्थमवश्यं णेरिति वाच्यमेव तदिहैव स्पष्टार्थमुक्तम्। अणौ यदित्यादि चेदित्यन्तं किम्।
अध्यारोपितप्रेषणपक्षे द्वितीयकक्ष्यायां माभूत्। अणौ यत्कर्म णौ चेत्स कर्त्तेति किम्। निवृत्तप्रेषणपक्षे तृतीयकक्ष्यायां माभूत्। वाक्यार्थत्रितयं सूत्रे द्वौ च पक्षावुदाहृतौ। कस्याश्चतस्त्रस्तिस्त्र
पक्षयोर्या उदाहृताः॥ १॥ प्रथमस्य तृतीये हृततृतीयेन निवारिता। द्वितीयस्य द्वितीया तु द्वितीयेनेति सङ्ग्रहः॥ २॥ यत्तु माघकाव्ये करेणुरारोहयते निषादिनमिति। ततणिचश्चेति सिद्धम्।
न तु प्रकृतसूत्रस्य विषयः। अध्यारोपितप्रेषणद्वितीयकक्ष्यारूपत्वात्। एतेन समसन्तं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुतामिति व्याख्यातम्। बन्धुतां तं पश्यति स तां दर्शयते।
यद्वा। बन्धुताङ्कृताधिपत्यामिव लोकः पश्यति स तु दर्शयति उभयथापि णिचश्चेत्येव तङ् न तु प्रकृतसूत्रेणेति दिक्। अत्रेदमवधेयम्। कर्मशब्दोऽत्र क्रियापर इति काव्याऽऽकरग्रन्थे यद्यपि नो
क्तं तथापि न्याय्यत्वात् श्रुतित्रयानुगुण्याद्बाधकाभावाच्चेह तथोक्तम्॥ ३ धातुवाच्यत्वेनाकर्मकाणामंशद्वयाभिधायकत्वेपि नाधिक्यमिति बोध्यम्। आधिक्यमात्रं व्यवच्छिद्यत इति। एतदेवन्या
य्यमित्युक्तम्। नन्वण्यावित्यस्यश्रुतत्वेपि यथा वारणसीस्थो वरो मथुरायामस्ति चेद्विवाहो भवतीत्युक्ते विवाहाधिकरणत्वं मथुराया एव प्रतीयते न तु श्रुताया अपि वारणस्यास्तथा अणौ या क्रिया सा णौ चे
त्क्रिया तत्र यत्कर्म तच्चेण्णौ कर्त्तेत्युक्ते ण्यन्ताधिकरणत्वमेवात्मनेपदस्य प्रतीयते न त्वण्यन्ताधिकरणत्वमत आह। किंचेति ॥

णौकर्मत्वंप्रतिपाद्यतेइति।अणौद्विकर्मकाणामेवउदाहरणत्वसंभवइतिभावः।कर्तृत्वप्रतिपादनादिति।अणौयत्कर्मसकर्तेतिवाक्येउद्देश्यतावच्छेदकावच्छेदेनविधेयान्वयस्यौत्सर्गिकत्वेनकर्मत्वावच्छेदेकर्तृत्वविधानेनकर्मसत्ताप्रतिपादनस्यकर्तुमशक्यत्वेनकर्मान्तरनिवृत्तिपरत्वस्यवक्तुमशक्यत्वादितिभावः।अणौकर्तृत्वादिति।कर्तृकर्मेतरकर्माभावस्यैवभवताविवक्षितत्वादितिभावः।ननुस्थलरूपमत्राधिकंकर्म।तस्यमूलभूताण्यन्तावस्थामनुष्याआरोहयमाणंहस्तिनंआरोहयन्तीत्येवंसौकर्यातिशयप्रतिपादनायप्रेरणावद्धिवत्तत्प्रतिपादनायैप्राचांग्रन्थास्तुसर्वेपिप्रायेणशिथिलाइत्यहइतिज्ञात्वाकृतङ्किंचित्स्वातन्त्र्यंइष्यतांबुधैः।तथाहि।इहसूत्रेअणौयत्कर्मणौचेत्तदेवकर्मेतिकर्मान्तरनिवृत्तिःक्रियतेनत्वणौकर्मणोणौकर्तृत्वंप्रतिपाद्यते।सकर्तेतिवाक्यान्तरेणतस्यकर्तृत्वप्रतिपादनात्।एकैकस्याङ्क्रियायांकर्तृत्वकर्मत्वाऽसंभवात्।नचैवंदर्शयतेभृत्यान्राजेतिभाष्यविरोधःभृत्यरूपस्यकर्मणःसत्त्वादितिवाच्यम्।अणौयेकर्तृकर्मणीतद्भिन्नकर्मव्युदासेतात्पर्यात्।अत्रचोक्तभाष्यस्यैवप्रमाणत्वात्।एवञ्चस्मरयत्येनंवनगुल्मःस्वयमेवेतिकोकिलस्यकर्मत्वेपिप्रत्युदाहरणंयुज्यतइतितावल्लौयरेनोक्तम्।तच्चेत्थंव्याख्यातृभिःपरिष्कृतम्।कर्तरिकर्मेत्यतःकर्तरीत्यनुवृत्तंप्रथमयाविपरिणम्यते।यच्चयच्चयदितिनपुंसकमनपुंसकेनेत्येकशेषः।तेनाणौकर्मकर्त्रोर्णौकर्मत्वेप्यदोषः।एवञ्चकरेणुरारोहयतेनिषादिनमितिमाघप्रयोगोप्युपपद्यतइति।अत्रेदंवक्तव्यम्।एवंवर्णयतांकैयटादीनांप्रकृतसूत्रस्यभाष्यवार्त्तिकग्रन्थाःसर्वएवविरुध्यन्ते।आरोहयमाणोहस्तीस्थलमारोहयतिमनुष्यानित्यत्रातिव्याप्तिशङ्कायांमनुष्यानितिकर्मणःसत्त्वान्नातिव्याप्तिरितिहिप्रथमप्रघट्टकेस्थितम्।कर्मकर्तृत्वात्सिद्धमितिशङ्कायांयक्चिणोर्निवृत्त्यर्थंनियमोयमितिद्वितीयप्रघट्टके।कर्तृस्थभावकार्थमिदंसूत्रमितितुतृतीयेप्रघट्टके।तत्राद्योविरुद्धः।मनुष्याणामणौकर्तृत्वात्।वफलाश्रयत्वाद्विकर्मकत्वकरणात्।एवञ्चोर्ध्वदेशःतत्स्थवस्तुतदुभयसंयोगानुकूलोव्यापारोधात्वर्थः।स्थलशब्देनगजपृष्ठस्थंकाष्ठमयमुपवेशनस्थानमुच्यते।आरोहन्तिहस्तिनंहस्तिपकाइतित्वारोहयमाणइत्यस्यैवमूलभूताआरोहयमाणइत्यन्तंसूत्रोदाहरणप्रदर्शनम्।दृष्टान्तार्थंहस्तीतिमध्यमणिन्यायेनोभयान्वयियथातथाऽनेनात्मनेपदञ्जायतेतथात्रापिस्यादितिप्रथमप्रघट्टकाशयइतिचेन्न।मनुष्याःस्थलमारोहन्तीतितन्मूलण्यन्तावस्थाप्रदर्शनपरतद्व्याख्यानग्रन्थविरोधात् ॥

१ न्याय्यमेवेति॥आधृषीयत्वेनपक्षेणिजभावादितिभावः॥

नचलनार्थत्वमिति।किन्तुस्पन्दनार्थत्वमितिभावः।स्पन्दनत्वञ्चद्रवद्रव्यजन्यतावच्छेदकज्वलनत्वव्याप्यजातिविशेषरूपमितिचलनार्थत्वमितिबोध्यम्।अथकपमिति।निगरणशब्देनभक्षणमिवनपादमीतिसूत्रेणग्रहणात्पानमपिगृह्यते।यद्यपिद्रवद्रव्यस्यगलादधःकरणंपानंतथापिद्रवःद्रव्यस्योपलक्षणत्वेनधात्वर्थत्वाभावान्निगरणार्थत्वमस्त्येवेतिभावः।वस्तुतःपानंना आहच।स्वरितेत्स्याद्वाहिःक्र्यादौलक्षिश्चैकश्चुरादिष्विति।तन्नेतिबहवः।चन्द्रोहिणिजभावपक्षेस्वरितेत्त्वंचरितार्थमित्याह।मैत्रेयादयस्तुस्वरितेत्त्वमनाकरमित्याहुः।तदेतत्त्वंहरदत्तोपिसञ्जग्राह।एषविधिर्नचुरादिणिजन्तात्स्यादितिकश्चननिश्चिनुतेस्म।आप्तवचोऽत्रनकिंचनदृष्टंलक्ष्यते।स्वरितेत्त्वगमनार्थमिति।समुदाङ्भ्यः।आङ्पूर्वकस्यवचनंसकर्मकार्थम्।अकर्मकेत्वाङोयमहनइत्येवसिद्धम्।अनुप।अकर्मकाच्चेत्येवसिद्धेवचनमिदंसकर्मकार्थमितिध्वनयन्नुदाहरति।गाञ्जानीतइति।इत्यात्मनेपदम्।।परेर्मृषः।योजादिकस्येति।सहिस्वरितेत्।शाकटायनमतेत्वनुदात्तेत्।उभयथापिन्याय्यमेवेहग्रहणम्।उपाच्च।सकर्मकविषयमिदमुत्तरसूत्रानुरोधात्।अतएवाहमन्नदत्तमिति।बुधयुधादहप्रुद्रुस्रूणांपदान्नचलनार्थत्वन्तदर्थङ्ग्रहणम्।चलनेतुउत्तरसूत्रेणसिद्धम्।निगरण।निगरणंभक्षणम्।अदेःप्रतिषेधइति।एतच्चगतिबुद्धौतिसूत्रेभाष्येउक्तम्।वृत्तिकृतेहस्वस्थलेयोजितम्।अथकथम्।नपीयतांनामचकोरजिह्वयाकथञ्चिदेतन्मुखचन्द्रचन्द्रिका।इमाङ्किमाचामयसेनचक्षुषीचिरञ्चकोरस्यभवन्मुखस्पृशीइतिश्रीहर्षः।आङ्पूर्वाच्चमेरनेनपरस्मैपदौचित्यात्।सत्यम्।आचामेतिलोडन्तंछित्त्वा।किन्नाचामयसेरितिव्याख्येयम्।भस्यक्ष्मीई।लक्ष्मीःतयासहवर्तमानासेः।ततःसंबोधनेसु।सलक्ष्मीकेहेदमयन्तिइत्यर्थः।अणावक।अणौकिंआरोहयमाणंप्रयुङ्क्तेआरोहयते।णेरणावितिसूत्रेउदाहरणत्वेनयोऽकर्मकोनिर्णीतस्तस्माद्द्वितीयेणौमाभूत्।सहिणावकर्मकः।न्यरभवतीत्यर्थेपर्यवसानस्योक्तत्वात् ॥

मपिपासानिवृत्त्यनुकूलोव्यापारः।भक्षणन्तुनिवर्तकोव्यापारः।सर्वेषामिन्द्रियाणाञ्चबुभुक्षापिपासेऐतरेयोपनिषदिस्पष्टम्।संबोधनेसुरिति।पञ्चमीसमासस्यानिरालयाएङ्ह्रस्वादितिसंबुद्धिलोपइतिभावः।अणौकिमिति।नचतदभावेविशेषणद्वयविशिष्टात्ण्यन्तादित्यर्थमूलोक्तोदाहरणेपरस्मैपदानुपपत्तिः।बुधादिसूत्रसाहचर्येण

म·श·
३२७

तदतिरभसादिति।नस्यश्वादेः पाठादितिभावः।निवृत्तप्रेषणतयेति।निवृत्तधात्वर्थव्यधिकरणप्रेषणतयेत्यर्थः।समानाधिकरणप्रेरणयाच णिचः साधुत्वमितिकेचित्।भेदस्येति।चुरादिणि
केचित्तुस्वार्थण्यन्ताद्धेतुमण्णावित्यस्यप्रत्युदाहरणमाहुः।तद्भाष्यादिविरुद्धम्।तथाहि।बुधादिसूत्रादिहणेरित्यनुवर्त्तते।बुधादिभ्यश्चहेतुमण्णिरेवसंभवतीतितद
न्तादेवायंविधिः।अणाविति निषेधोऽपिप्रत्यासत्तेस्तथैवन्याय्यः तेनचुरादिण्यन्ताद्धेतुमण्णौपरस्मैपदंभवत्येवेतिभाष्यादौस्थितम्।अतएवचेतयमानंप्रयुङ्क्ते चेतयत
इतिकेषांचित्प्रत्युदाहरणंवृत्तिकृतादूषितम्।तत्रचितसञ्चेतनेइतिचुरादिषाकुस्मीयेधातुर्बोध्यः।यत्तुन्यासकारहरदत्ताभ्यांव्याख्यातश्चितीसञ्ज्ञानेचुरादिरकर्मक
इतितदतिरभसात्।एतेनरूपयतेहरिरितिप्राचःप्रत्युदाहरणंप्रत्युक्तम्।रूपरूपकरणेचुरादिः।रूपाख्यस्यकर्मणोधात्वर्थेऽन्तर्भावादकर्मकः।ततोहेतुमण्णिचिरन्ति
कारदूषितेनचेतयत इत्यनेनसमानयोगक्षेमत्वात्।वस्तुतस्तुउभयमपिसमर्थयितुंशक्यम्।तथाहि।स्वार्थण्यन्तादेकस्मिन्नेवहेतुमण्णौचेतयतिरूपयतीत्यस्तुना
म।तयोर्निवृत्तप्रेषणतयाअकर्मकतामाश्रित्यद्वितीयेहेतुमण्णौतुप्रत्युदाहरणत्वङ्नवार्यते।युक्तश्चैतत्।रूपयन्तंप्रयोजयतीतिविगृह्यताप्राचायुजिणिज्यांप्रकृ
तिरूपंवदताहेतुमण्णिरूपस्यविवक्षितत्वात्।हेतुमणेरैक्येहिप्रयुङ्क्ते इतिशुद्धेनयुजिनैवव्यग्रहीष्यत् न तुणिजन्तेनेतिदिक्।यत्तुप्रसादकृतोक्तंणिग्रहणेणिजातेराश्र
यणात्भेदस्याविवक्षयेदमितितत्तुभाष्यादिविरोधादुपेक्ष्यमेव। धापयेतइति।प्रत्यवसानार्थत्वात् शिशुमित्यस्यकर्मत्वम्।समीचीदिति।प्रथमाद्विवचनम्।वाच्छन्दसी

पि

तिपूर्वसवर्णदीर्घः॥इतिपदव्यवस्था॥भावोभावनेति।उत्पत्त्यर्थाद्भवतेर्णिजन्तातःएरजितिभावः।एरजण्यन्तानामितित्वनार्षम्।कल्यादिभ्यःप्रतिषेधमात्रंहिभाष्येस्थि
तम्।कल्योमन्त्रोर्थइतित्रयएवोदाहृताश्चेत्यवधेयम्।भवतेरुत्पत्त्यर्थत्वंण्यन्तस्यभवतेः शुद्धेनकरोतिनातुल्यार्थत्वञ्चदर्शयति।उत्पादनाक्रियेति।धातुत्वेनेति।तच्चजा
तिः।वृद्धिसूत्रेआदैच्शब्दस्यजातिशब्दत्वादितिवदताकैयटेनतथाध्वनितत्वात्हेलाराजीयादौस्पष्टन्तथाभिधानाच्चेतिभावः॥ ७ चहेतुमण्योरित्यर्थः।तत्तुभाष्येति।तत्र
हिचुरादिण्यन्ताद्धेतुमण्णौपरस्मैपदमुक्तम्॥ ॥इतिपदव्यवस्था॥ ॥एरजिति।ततएवयुविभावनेतिबोद्धव्यम्।तथाध्वनितत्वादिति।सञ्ज्ञाशब्दानाञ्जातिशब्दत्वस्यध्वनितत्वादितिभावः।

रामः
३२·१

भावनाप्रतीयतइति।नचविध्यर्थप्रवर्त्तनयासाक्षिप्यतइतिवाच्यम्।विध्यभावेपितत्प्रतीतेः।नहितव्यादयोविधावेवेतिनियमः।पक्तेत्यादौविधिसंभावनायाअप्यभावाच्च।ननुमास्तुतत्रतत्प्रतीतिरतआह।कारकेति।हेत्वन्तरमाह।अस्तिचेति।तदुपपादयतिकिङ्कर्तव्यमित्यादिना।पक्तेत्यादेःपाककर्त्तेत्यादिविवारणाच्चेत्यपिबोध्यम्।नचतत्रकर्त्तृकर्मण्यान्तदाक्षेपः।पक्तेत्यत्रतदप्रतीतेर्दुर्वारत्वात्।किंचाक्षिप्तायांपदार्थान्तरानन्वयापत्तिः।अन्यथाधूमोयंज्वलतीत्यपियोग्यंस्यात्।किंचतद्देवाक्षेपेणपचतीत्यादावपितत्प्रतीतिसिद्धावनन्यलभ्यस्यशब्दार्थतयातिङान्तत्रशक्त्यनापत्तेः।नचतत्रापिप्रत्ययवाच्याभावना।तवकाष्ठैःपाकइत्यापत्तेः।कर्त्तृव्यापारस्त्विति।शब्दशक्तिस्वाभाव्याद्धात्वर्थसमानाधिकरणभावनैवतत्राख्यातार्थः।अधातुवाच्येति।एतेनभावनातिङ्प्रत्ययवाच्येतिमीमांसकमतन्नग्राह्यमितिध्वनयति।तथाहि।भोक्तव्यमित्यादौतिङन्तंविनापिभावनाप्रतीयतेकारकापेक्षाचदृश्यते।अस्तिचकरोतिसामानाधिकरण्यम्।किङ्कर्तव्यम्।भोक्तव्यम्।किङ्कृतवान्भुक्तवान्।किंचाभावयतिघटमितिवत्स्वरमतेभवतिघटमित्यपिस्यात्।तुल्यार्थत्वात्।दृष्टान्तेहिकर्तुःकुंभकारस्यव्यापारंणिजाचष्टेदार्ष्टान्तिकेत्वाख्यातप्रत्ययः।ननुप्रयोजकव्यापारोणिजर्थःकर्त्तृव्यापारस्त्वाख्यातार्थइतिवैषम्यमितिचेत्।कारकचक्रप्रयोक्तुःकर्त्तृत्वेघटस्यातथात्वात्।यदितुधातुनोक्तक्रियेनित्यंकारकेकर्तृतेष्यतइतिभर्तृहरिप्रतिपादितरीत्याप्राधान्येनधातूपात्तव्यापारवत्त्वरूपंकर्तृत्वन्तवापिसम्मतंकस्तर्हीदानीमाख्यातार्थः।व्यापारस्यधातुनैवाभिहितत्वात्।अपिचाधातोःसकर्मकाकर्मकत्वविभागउच्छिद्येत।अकर्मकाच्चेत्यादिसूत्राणिचविरुद्ध्येरन्।ननुसिद्धान्तेपिक्रियायाःकर्मापेक्षानियमात्कथमकर्मकतेतिचेत्।फलव्यापारयोःसामानाधिकरण्यवैयधिकरण्याभ्यांसकर्मकाकर्मकविभागाभ्युपगमात्।किंचाज्योतिष्टोमयाजीत्यादौकरणेयजइतिणिनिरस्मत्पक्षएवसङ्गच्छते ॥ ७ न्तर्भावितण्यर्थतातुनसर्वत्रेतिनतदापत्तिरितिभावः।ननुतिङ्योगेतिङर्थभावनाश्रयत्वमेवतन्मतेकर्त्तृत्वन्तदर्थभावनाधिकरणफलवाचकत्वञ्चधातूनांसकर्मकत्वन्तत्समानाधिकरणार्थवाचकत्वञ्चाकर्मकत्वम्।भावनाचव्यापारसामान्यन्त्वकृतिरितिरथोगच्छतीत्यादौनदोषइत्यरुचेराह।किंचज्योतिष्टोमेति।अस्मत्पक्षएवेतिपरमतेतुतदसङ्गतिः।प्रत्यासत्त्यासमर्थःपदविधिरितिपरिभाषणेनचयज्यर्थनिरूपितकरणेउपपदेतन्निरूपितकर्त्तरिवाच्येणिनिरितितदर्थःसचतन्मतेऽसङ्गतइतिस्पष्टमेव॥

तदुपात्तांशान्तरस्य। यज्युपात्तयागरूपस्य। भाव्यतयेति। पचतीत्यादावित्यर्थः। करणतयेति। शब्दशक्तिस्वभावादितिभावः। स्त्रीत्वस्येति। यदि तत्र टाबादीनां द्योतकतया विशेषणत्वन्तर्हि धातुत्वेन धातूपात्तां भावनां प्रति यजित्वेन तदुपात्तस्यांशान्तरस्य करणत्वात्। पचादयो हि धातुत्वेन भावनामाहुः। तच्चांशान्तरं भावनां प्रति प्राप्येण भाव्यतया सङ्गच्छते। ज्योतिष्टोमयाजीत्यादौ तु करणतया। ज्योतिष्टोमाख्येन यागेन स्वर्गं भावितवानित्यर्थप्रतीतेः। स्पष्टञ्चेदं णिनिविधौ हरदत्तग्रन्थे। एतेन द्व्यर्थः पचिरिति भाष्यं व्याख्यातम्। भट्टिश्चाह। विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोऽथ। नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातूनिति। ननु क्रियाया धात्वर्थत्वे पचतीत्यादावेककर्तृका वर्तमाना पचिक्रियेति क्रियाविशेष्यको बोधो न स्यात्। प्रत्ययार्थं प्रति प्रकृत्यर्थस्य विशेषणताया औपगवादौ क्लृप्तत्वादिति चेन्न। प्रत्ययार्थः प्रधानमिति ह्युत्सर्गः। स चेह त्यज्यते। क्रियाप्रधानमाख्यातमिति स्मरणात्। पाचिकेत्यादौ स्त्रीत्वस्य विशेषणत्वाभ्युपगमाच्च। प्रस्तुत तवैव पचतीत्यादावनुपपत्तिः। पचन्तं पश्येत्यादौ शतृशानचोः कर्तृप्राधान्यस्य सर्वसम्मततया तिङ्ष्वपि तथात्वापत्तेः॥ शत्रादीनान्तिङश्च लादेशत्वस्याविशिष्टत्वाच्च। आदेशानाञ्च स्थानिस्मारकत्वे स्थान्यर्थाभिधायित्वे वार्थैकध्रौव्यात्। अत एव हि युष्मदि समानाधिकरणे मध्यमः अस्मद्युत्तम इत्यादि पुरुषव्यवस्था सङ्गच्छते। अभिहिते कर्तरि प्रथमेत्यादि चानवसमानाधिकरणत्वेन स्वाभिधेयसंख्यान्वयित्वमभिहितशब्देन चाभिहितसंख्याकत्वं विवक्षितमिति वाच्यम्। सूत्राननुगुण्यात्। कृत्तद्धितसमासैः संख्याया अनभिधानात्तदभिहितेपि तृतीयाप्रसङ्गाच्च। न च कृत्यनभिधानमेव कर्तुरनभिधानमिति वाच्यम्। भावार्थकलकारेपि कर्तरि प्रथमापत्तेरिति दिक् ॥

प्रकृतेपि तथा वक्तुं शक्यम्। कृतीति। भावनेत्यर्थः। दिगिति। तदर्थस्तु भावलकारे कर्त्रादिकारकान्वयानापत्तिः। तत्रापि तस्या वाच्यत्वे तदन्वयिनि संख्यान्वयाङ्गीकारे द्विवचनाद्यापत्तेः। किं च समानकर्तृकयोः पूर्वकाले इति सूत्रासङ्गतिः समानकर्तृकक्रिययोः पूर्वकालवृत्तिक्रियायां वर्तमानाद्धातोः क्त्वेति तदर्थादिति ॥

नसामानाधिकरण्यमिति। असत्वभूतक्रियायाः सत्वार्थकयुष्मदादिसामानाधिकरण्यासंभव इति भावः। भाष्यमिति। ग्रकृत्स्ने इति आदिः। द्रव्यधर्मानिति। एवञ्च घटादिवत्प्रतिपाद्यघञादिद्रव्ये इव लिङ्गादिहेतुना घञन्तादिप्रतिपाद्ये सत्वमनुमीयत इति भावः। इदमप्यस्मत्कृदतिरिक्तविषयम्। कृत्वेऽणुनपुंसकेतरलिङ्गयोगाभावेनासत्वव्यवहारः केषाञ्चिदिति बोध्यम्। अनन्वितास्यादिति कारकाणाम् असत्वभूतक्रियान्वयित्वनियमादिति भावः। घञादौ। घञाद्यन्ते। आख्यातशब्दे। तिङन्ते क्रियाप्रधाने वा। भागाभ्याम्। प्रकृतिप्रत्ययाभ्याम्। साध्यम्। क्रिया धात्वर्थः। साधनं कारकं प्रत्ययार्थः। सघञादिष्विति। सिद्धत्वसाध्यत्वोभयविशिष्टो धात्वर्थो घञन्तवाच्यः सिद्धत्वरूपो धर्मश्च घञ्द्योत्यस्तदाह। साध्यत्वेनेत्यादि। सत्वभावस्त्विति। तथा च सामानाधिकरण्याभावादिति। भावाभिधायिनो हि लकारस्य क्वापि न सामानाधिकरण्यं कर्माभिधायिनस्तु तत्संभवात्पुरुषत्रयमपि यथायथमुदाहरिष्यते। लिङ्गाच्चेति। कृद्वाच्यायास्तु सत्वरूपत्वमिष्टमेव। तथा च भाष्यम्। कृदभिहितो भावो द्रव्यवत्प्रकाशत इति। द्रव्यधर्मान् लिङ्गसंख्याकारकादीन् गृह्णातीत्यर्थः। अतएव पाकं पाकेत्यादौ यथायथमन्वितीपादपः। नचैवमोदनस्य पाक इति कर्मणि षष्ठ्यनन्वितास्यादिति वाच्यम्। घञादावपि प्रकृतिभागस्यासत्वापन्नक्रियाभिधायित्वाभ्युपगमात्। उक्तञ्च हरिणा। आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता। प्रकल्पिता यथाशास्त्रे स घञादिष्वपि क्रमः। साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। सत्वभावस्तु यस्तस्याः स घञादिनिबन्धन इति। यत्तु अमृतरसप्रस्यन्दमाध्वीकभूरिति कुसुमाञ्जलिश्लोके अमृतस्य रसः रस्यमानममृतमिति यावदिति व्याख्यायत्रोपष्टम्भकत्वेन कृदभिहितो भावो द्रव्यवत्प्रकाशत इति वर्द्धमानेनोपन्यस्तं प्राचीनग्रन्थव्याचक्षाणैश्चानुमोदितं तत्सर्वमतिरभसात्। तथा हि। रस इति भावे कृतो रस्यमानमिति विवरणेन सह विरोधात्। यत्तु द्रव्यवदित्यस्य द्रव्यविशेष्यिकां प्रतीतिं जनयतीत्यर्थवर्णनं तदपि निर्मूलमनुशासनविरुद्धञ्चेति दिक्। ॥ ७ कर्त्तरि कृदिति सूत्रे भाष्ये इदं सूत्रं भावाव्ययस्यार्थम्। न च भावे घञिति नियमान्तान्ये कृतो भाव इति वाच्यम्। अन्यः स भावो बाह्यः प्रकृत्यर्थात्। एतदभावे हि इमे आभ्यन्तरे स्युरित्युक्तम्। पाकेन कृतमित्यादिव्यवहाराच्च त्वियामित्यादिना भावविशेषणाच्च। वर्द्धमानेनेति। द्रव्यवदित्यस्य द्रव्यविशेष्यिकां प्रतीतिं जनयतीति तदर्थ इति तदाशयः। तदाह। यत्विस्यादिना। दिगिति। तदर्थस्तु रसशब्दस्य द्रव्यपरत्वे कर्मधारये तस्य पूर्वनिपातापत्तिः। षष्ठ्यन्तत्वादिवद्रसशब्दस्य रूढत्वाच्च। किञ्च सर्वत्र भाव एवमेवापत्तौ कर्मणि ड्सम विधानेनोपप

मैदाव गमादिति। उपमानानां बहुत्वेनोपमेये तिङर्थेऽपि बहुत्वारोपेण प्रत्ययः अन्यथोपमाने बहुत्वोपादानं वैयर्थ्यं स्यादिति भावः। लिङ्गेति। लिङ्गाभावमादाय भिन्नतिङन्तार्थे कर्तृकर्माति रिक्तकारकत्वाभावमादाय चाऽसत्त्वमिति भावः। व्यवहितान्वय इति। सद्य इति पचेत्येवं सम्बन्ध इत्यर्थः। पूर्ववाक्ये इति। उत्तरवाक्ये चेत्यपि बोध्यम्। तत्राद्योदाहरणं हरिः सेव्यस्तद्भक्ताश्चेति। अन्य एकवचनमेवेति प्रायोवादोऽयम्। भाष्ये उष्ट्रासिका आस्यन्ते हतशायिकाः शय्यन्त इत्यत्र बहुवचनस्य स्वीकारात्। उष्ट्राणां हि आसिकाः स्वरूपत एव विलक्षणाः हताश्च नानाप्रकारैः शेरते उत्तानावतानाः विकीर्णकेशाः तिर्यञ्चस्तस्थुः। ततश्च यादृशानि हतानां शयनानि तादृशानि देवदत्तादिभिः क्रियन्त इत्यर्थः। अत्र सादृश्याद्यवगमाद् आख्यातवाच्यस्यापि भावस्य भेदावगमाद्बहुवचनम्। आसिकाः शायिका इति च द्वितीयाबहुवचनम्। क्रियाविशेषणत्वेन कर्मत्वात्। न चैवं क्लीबत्वमेकवचनं च स्यादिति वाच्यम्। स्त्रियाङ्क्तिन्नित्यधिकारात्स्त्रीत्वावधारणेन सामान्ये नपुंसकमित्यस्याप्रवृत्तेः। बहुत्वावधारणेन एकवचनाप्रवृत्तेश्च। न चैवं सत्तमत्वोक्तिर्विरुद्धेति वाच्यम्। लिङ्गक्रियानाधारकारकयोगाभावमात्रे तात्पर्यमित्युक्तत्वात्। स्यसिचीति। यद्यप्यजादयो द्वन्द्वेन निर्दिष्टास्तथाप्युपदेश इत्यस्य च एव विशेषणं हनादीनामव्यभिचारात्तदाह। उपदेशे योजितेति। अत्र प्राचा उपदेशेऽजन्तेभ्यो हनादेश्च परेषां स्यादीनामिड्वा स्यात्। स इट् चिण्वच्चेति व्याख्यातम्। तन्न। सूत्रे हि स्यादयः सप्तम्या निर्दिष्टाः अजादयश्च षष्ठ्या। चिण्वद्भावश्च प्रधानशिष्टः इट् तु चकारेण तत्सन्नियोगशिष्टः चिण्वदिति च सप्तम्यन्ताद्वतिः। स्यसिच्सीयुट्तासिष्विति प्रतियोगिनि सप्तमीनिर्देशात्। न चैतस्य सर्वस्य भङ्गे न विपरीतव्याख्याने बीजमस्ति। चशब्दस्य व्यवहितान्वयो निर्मूलः। स्यादेतत्। सूत्रस्वरसानुरोधेऽङ्गस्येवेट् स्यात्। अडादिवत्। अत इड्विधिवाक्ये स्यादीनामिति विभक्तिविपरिणाम आवश्यकः इति चेत्। सत्यम्। पूर्ववाक्ये चरितार्थस्य उत्तरत्र विपरिणामो न्याय्य एव। तत्र तु यथाश्रुतविभक्तेरचरितार्थत्वात् अनुचितो विपरिणामः ॥

सा तु कर्त्तृकर्मणी गुणश्चानिर्दिष्ट इत्यर्थवत्सूत्रस्थभाष्यप्रयोगः। अचरितार्थत्वादिति। सर्वथाऽचरितार्थत्वादित्यर्थः ॥

इत्यपि प्रयोक्तुमुचितमिति। स्वायत्ते शब्दप्रयोगे इति भावः। इडप्युदात्तः स्यादिति। एवञ्चेडन्तस्याङ्गत्वाभावात्ततः परस्य प्रत्ययत्वाभावाच्च लुकोऽप्राप्तिरिति भावः। प्रत्ययत्वाभ्युपगमादिति। एवञ्च तदादिग्रहणेनाङ्गत्वमपि सुलभमिति भावः। उक्तस्यापीति। इट् इव इटः परस्यापि चिणि दृष्टप्रत्ययत्वमिव चिणः परेऽपि दृष्टप्रत्ययत्वस्यातिदेशसंभवादिति भावः।

तथा हि। हरिः सेव्यः तद्वत्काश्चेति प्रयोगे उत्तरवाक्ये सेव्या इति विपरिणामं दृष्ट्वा न हरिः सेव्या इत्यपि प्रयोक्तुमुचितम्। यद्याहुः। विभक्तिव्यत्ययस्यापि बहुलं दर्शनादिति। तदपि भक्तिवादमात्रमिति स्पष्टमेव। किंच। प्राचो व्याख्याने चिण्वदिति तृतीयान्ताद्वतिः। तत्र यथा पूर्वस्य कार्यं वृद्ध्यादिकमतिदिश्यते। एवं स्वस्य स्वस्मात्परस्य च कार्यमतिदिश्येत। ततश्च चिणि वेडप्युदात्तः स्यात्। चिणः परस्येव इटः परस्यापि लुक् प्रवर्तेत। ननु बाधितोसाविट आगमत्वेन प्रत्ययत्वं न तया प्रत्ययत्वाभावादिति चेन्न। कृते ह्यागमे तद्विशिष्टस्य तया प्रत्ययत्वाभ्युपगमात्। ञ्णोन्त इति सूत्रे प्राचो ग्रन्थव्याचक्षाणैस्तथैव निर्णीतत्वात्। किंच वृद्ध्यादिकार्यस्य प्रत्यये परे विहितस्य इटि परे कथं निर्वाह इत्याशङ्क्य चिणि दृष्टस्य सर्वस्यैवातिदेशे प्रत्ययत्वस्याप्यतिदेशान्न दोष इति तत्प्राचो ग्रन्थं व्याचक्षाणा आहुः। तत्कथमुक्तस्यापि प्रत्ययत्वं न लभ्येत। यत्तु वदन्ति। चिणो लुकि चिण्वदिटोऽसिद्धत्वादिति। तदपि न। नहि चिण्वदित्यतिदेशं प्रतीडसिद्धः। अतिदेशस्य निर्विषयत्वापत्तेः। तथा च लुकोऽपि वृद्ध्यादिसमकक्षत्वेनातिदेशो दुर्वार एवेत्यलमतिक्षोदेन। ननु यदि चिणि दृष्टमात्रस्यातिदेशस्तर्हि हनिणिङादेशा अपि स्युः। घानिष्यते। आयिष्यते। अध्यायिष्यते इति। मैवम्। अङ्गाधिकारबलेनाङ्गस्यैवातिदेशात्। न चैते आङ्गाः। तदेतदाह। अङ्गकार्यमिति। सीयुट इति। तथा च सीयुट्शब्देन तद्विशिष्टं लस्यत इति भावः ॥

निर्विषयत्वापत्तेरिति। चिण्वदित्यस्य कार्यातिदेशतयाऽनेनातिदिश्यमानकार्याणामाभीयत्वेन तत्रेटोऽसिद्धत्वेऽतिदेशस्य निर्विषयतापत्तिरिति भावः। अङ्गा इति। अङ्गाधिकारस्था इत्यर्थः। सीयुण्मात्रस्यार्द्धधातुकत्वासंभवादाह। तथा चेति ॥

विधिलिङिति। प्रस्तुवीतेत्ययम्। तत्र हि कर्मकर्त्तरि न दुहेति यक्क्लिनिषेधः। प्रकृते च हनादिसाहचर्येणाजन्तधातुरूपाङ्गस्यैव ग्रहणम्। एतेन यत्र काव्य वधानदस्याऽप्रवृत्तौ कथं विधिलिङो व्यावर्त्त्यत्वमित्यपास्तम्। वलादित्वं नास्तीति। लिङः सलोप इति सलोपादिति भावः। निरपेक्षो ह्यसाविति। अतो नित्योऽसाविति भावः। परः। साप्तमिकः। अनित्य इति। तत्सापेक्षत्वादिति भावः। एवञ्च ऋद्धनोरित्यादेरपि तत्सापेक्षत्वादनित्यत्वं बोध्यम्। तदन्तत्वमस्त्येवेति। अङ्गस्य धातोर्दैति शे

आर्द्धधातुक इत्यनेन व्यावर्त्त्यस्तु विधिलिङ्। न च दत्र वलादित्वं नास्तीति वाच्यम्। तस्येहानपेक्षणात्। यदाहुः। नित्यश्चायं वल्निमित्तो विघातीति। अस्यार्थः। भाविष्यत इत्यादौ भूस्य इति स्थिते परमपि वलादिलक्षणमिटं बाधित्वा चिण्वदिडेव भवति। सत्यामपि शब्दान्तरप्राप्तौ कृताकृतप्रसङ्गित्वमात्रेण भुवो वुक इव नित्यत्वाद्वलादिलक्षणनिरपेक्षो ह्यसौ॥ परस्त्वनित्यः। अस्मिन्कृते वलादित्वविघातात्। एवञ्च नित्यत्वात्सेड्भ्योऽप्ययमेवेड्भवति। एतेन उपदेश इति किम्। भाविष्यते। अत्र गुणावादेशयोः कृतयोर्न स्यादिति प्रसादग्रन्थः प्रत्युक्तः। चिण्वदिटो विषये वल्निमित्तस्याप्रवृत्तेरेवादेशस्यासंभवात्। गुणमात्रे प्रवृत्ते त्वजन्तत्वानपायात्। उपदेशग्रहणफलं तु मूल एव स्फुटीभविष्यति। चिण्वदिट इति। ननु ण्यन्तस्य धातोरुपदेशाभावात्कथमिह चिण्वदिट्। न च णेरुपदेशा [illegible] देशे योऽच्तदन्तत्वमस्त्येवेति वाच्यम्। आरिता स्मारितेत्यादौ परत्वान्नित्यत्वाच्च रपरे गुणे कृते चिण्वदिडभावापत्तेः। न हि शान्तस्योपदेशे योऽच्तदन्तत्वमस्तीति चेन्नैवम् ॥ ७ षः। न च ण्यल्लोपाविति पूर्वविप्रतिषेधेन गुणं बाधित्वा णि

लोपप्रवृत्त्याऽल्विधौ स्थानिवत्त्वाभावेनोपदेशेऽचः तदन्तत्वं दुरुपपादमिति वाच्यम्। गुणात्परत्वादार्द्धधातुकस्येडित्यस्य प्राप्त्या तन्नित्यत्वेन बाधित्वा चिण्वदिट एव प्रवृत्तेर्न दोष इति भावः। न हि शान्तस्येति। भूनीप्रभृतीनामपि गुणे उपदेशे योऽच्तदन्तत्वाभावाच्चेत्यपि बोध्यम्। उपदेशग्रहणसामर्थ्यादिति। तत्सामर्थ्यादादेशद्वारा

पि तदन्तत्वं विवक्षितमिति भावः ॥

यदजन्तन्तस्येति। तदन्ताङ्गस्येत्यर्थः। उपदेशग्रहणसामर्थ्याच्च तद्रूपं विशेष्यमादाय वा तदन्तविधिः। तेन चाङ्गस्य विशेषणात्पुनस्तदन्तविधिरिति भावः। प्रकारान्तरमाह। व्यधिकरणेति। एवमन्वयोपि तत्सामर्थ्यादेव बोध्यः। उपदेशिवद्भाव इति। तेन णिचोऽजन्तत्वमिति भावः। यद्वा अण्यन्तेऽङ्गे योऽजङ्गावयवस्तेन न्यायेनेति भावः। कारितेत्यत्र तदन्ताङ्गत्वं व्यपदेशिवद्भावेन। आरितेत्यत्रोभयमपि व्यपदेशिवद्भावेन। स्मारितेत्यत्रोभयमपि मुख्यमेव। तदन्ताङ्गस्येति व्याख्याने त्विति बोध्यम्। चिण्वद्वृद्धिरिति। चिण्वद्भावप्रयोजनं वृद्धिरित्यर्थः। वृद्धिरन्त्यवृद्धिरुपधावृद्धिश्च। दीर्घश्चोक्त इति। शामिता शमितेत्यादौ। अत्र दीर्घे चिण्वत्त्वं नासिद्धमाभीया। उपदेशे योऽजिति व्याख्याने तूपदेशग्रहणसामर्थ्यादेव आरितेत्यादौ प्रवृत्तिस्वीकारात्। अस्तु वा उपदेशे यदजन्तं तस्येति व्याख्यानम्। अङ्गस्येति व्यधिकरणषष्ठी। अङ्गावयवस्याजन्तस्येति। कारिष्यत इत्यादौ व्यपदेशिवद्भावः सर्वथापि णिजन्ते चिण्वद्भावोऽस्त्येव। तदाहुः। चिण्वद्वृद्धिर्युक्ता च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति। इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वलनिमित्तो विघातीति। न तु ण्यन्तत्वेनाजन्तत्वं चिण्वदिडिति प्राचो ग्रन्थस्याचक्षाणो रुक्तम्। ण्यन्तस्यात्वन्तरस्य। तदुपदेशावस्थायां भवत्ययमजन्त इति। तन्न्यायविरुद्धम्। स्वोक्तिविरुद्धञ्च। उपदेशो हि साक्षादुच्चारणं न च ण्यन्तस्य तदस्ति। किंच। धात्वादेः षः सः इत्यत्र सुब्धातोः प्रतिषेधो मुख्यः। उपदेशग्रहणबलेन तत्प्रत्याख्यानमाकरे स्थितम्। स्वयमपि तत्र तथैवोक्तम्। तदिदानीं विरुद्धमेवेति दिक्। आतो युक्। चिण्वतोः किम्। चौडिः। बालाकिः। बाह्वादित्वादिञ्। ददौ। अदायि पानामिति। स्याध्वोरिड्वेत्येतद्बाधित्वा परत्वाच्चिण्वदिटि कृतेऽझलादित्वान्नेत्याहुः ॥

सिद्धत्वस्यानित्यत्वात्। इट् चेति। स च प्रयोजनमित्यर्थः। दृशधातोश्चिण्वत्त्वन्नियोगशिष्टेट्प्रवृत्तिरेव चिण्वत्त्वप्रयोजनमित्यर्थः। नादिट् च इत्यत्रोपस्थितत्वादिडेव गृह्यते। एवं च णिलोपमात्रेऽयमसिद्धो नान्यत्र। अत एव तत्सूत्रप्रत्याख्याने चेन णिलोपः साधितो भाष्ये इति बोध्यम्। चौडिरिति। न चाचामादेरित्यनुवृत्त्या निस्तारः। दरिद्रायके दोषापत्तेः। ददाविति। औत्वन्तूत्तमे णित्त्वाभावपक्षे चरितार्थमिति भावः। अझलादित्वादिति। इकोऽझलित्यतस्तदनुवृत्तेरिति भावः ॥

अनु वृत्तावप्याह। सत्यपीति। विशेष इति भाव इति। वाक्यार्थबोधकाले बाधकाऽभावेन हन्तेरपि सीयुटा संबन्धेन तस्य निरवकाशत्वात्तस्य संस्कारवेलोपस्थितवधबाधः। सीयुट्तु तदऽविषयेऽचरितार्थ इति भावः। व्याख्यात इति। निरवकाशत्वरूपस्य बाधबीजस्याभावादिति भावः। ग्रन्थार्थेति। निरवकाशत्वरूपेत्यर्थः। परस्त

स्यापि तस्मिन्नेह काचित्क्षतिः। अनिग्लक्षणयावृद्ध्या रूपनिष्पत्तेः। आशीर्लिङीति। न तु लुङि तत्रोभयोरपि वैकल्पिकतया येन नाप्राप्तिन्यायाभावादिति भावः। विशेषविहितत्वादिति। लिङीति हि पदद्वयसाधारणम्। सीयुट् त्वात्मनेपद एवेति विशेष इति भावः। एतेनस्य सिच्सूत्रे प्रतिपदविधेर्बलीयस्त्वाच्चिण्वद्भाव इति कैयटग्रन्थो व्याख्यातः। यत्तु तत्र नारायणेनोक्तम्। अत्र यद्यपि वधादेशोपि प्रतिपदविधिस्तथापि विप्रतिषेधाच्चिण्वद्भाव इत्याशय इति। यच्च तत्परिष्कारार्थं प्राचो ग्रन्थं व्याचक्षाणेरुक्तम्। यद्यपि परादप्यन्तरङ्गं बलीयस्तथापि परशब्दस्येष्टवाचित्वाच्चिण्वद्भावेन व्यवस्थेति तस्याप्याशय इति। तदेतत्सर्वं कैयटग्रन्थापर्यालोचनमूलकमिति मूल एव ध्वनितम्। पक्षे वधिरपीष्ट इति। इह प्राचा पक्षे वधादेश इत्युक्तं तत्सम्यगेव। यत्तु तत्र तत्पौत्रेणोक्तं वधादेश इति परमतम्। स्वमते तु वधादेशोत्र न भवत्येव। तथा चोक्तं महाभाष्ये। चिण्वद्भावे कृते पुनः प्रसङ्गाद्वधभावः कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा। हनिणिङादेशप्रतिषेधश्चेति। तदेतद्भाष्यार्थानवबोधविजृम्भितम्। लिङीति परसप्तमी। अस्य सिच्सूत्रे आर्द्धधातुक इत्यस्यासंबन्धश्च प्रौढिवादेन स्वीकृत्य प्रवृत्तं वधभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेनेति वार्त्तिकं व्याचक्षाणेन भाष्यकृता चिण्वद्भावपक्षे खलु वधादेशाभाव उक्तः ॥ ७ सप्तमीमिति। विषयसप्तम्यामन्तरङ्गत्वेन विप्रतिषेधायोग इति भावः। इत्यस्यासंबन्धेनेति। तत्संबन्धे हि सीयुड्यात्मनेपदस्य विशेषविहितत्वाच्चिण्वत्त्वस्यापवादत्वेनाऽयुक्तो विप्रतिषेध इति भावः ॥

रूपाऽनन्त्यस्येति। एतत्तुक्ष्णुपास्यइत्यत्रोपपादितम्। अष्टत्रिंशत्संख्यासर्वथादुरुपपादैवेत्याह। अष्टत्रिंशदिति। घटादेरिति। घटादावनुदित इत्यर्थः। कै
यटग्रन्थे इति। अत्रारुचिबीजं तु ऊकालोच्कमेर्णिङिति सूत्रभाष्यप्रामाण्येन घटादावस्य पाठोऽसांप्रदायिक इत्यन्यत्र निरूपितम्। यङो ह्लोपस्येति। च
न तु चिण्वद्भावविरहेपि। तत्कथं स्यात्सिद्धसूत्रारूढमपि विकल्पं विस्मृत्य शुद्धमपि मूलमशुद्धीक्रियते। यदपि हनिणिङादेशेत्वाद्युक्तमात्तद
पिन। अनाङ्‌स्याप्यतिदेशे प्राप्ते वार्त्तिककृताद्यानिष्पत्तेरित्यादौ तदुक्तेः भाष्यकृता अङ्गाधिकारबलेन तत्समाधानाच्च। न च लिङि लुङि च साक्षादुद्दिष्टस्य वधे
रतिदेशापेक्षास्ति। उदाहृतश्चात्र वधादेशः भाष्यकारप्रभृतिमाधवान्तैः सर्वैरेवेति दिक्। अहसातामिति। चिण्वदिटोऽभावे हनः सिजिति कित्वा
दनुदात्तोपदेशेत्यनुनासिकलोपः। चतुर्भिरधिकं शतमिति। यत्तु ध्वे सलोपो वा सस्य द इति केचिदिति पुनर्द्वित्वमिति चाप्रामाणिकद्वयं सख्यार्य
लोपविकल्पादिप्रपञ्चेनेह अष्टत्रिंशद्रूपाणि भवन्तीति वदन्ति। तत्रोक्तिसंभवं न पश्यामः। पुनर्द्वित्वे रूपानन्त्यस्य दुर्वारत्वात्। अष्टत्रिंशद्व्याख्या
याएव पुरस्कारे मूलाभावाच्चेत्यास्तां तावत्। अकृष्टभ्येति। तदपि पूर्वत्रासिद्धमिति सूत्रसिद्धार्थकथनमित्युक्तं न विस्मर्त्तव्यम्। अस्मिन्निष्कृष्टप
क्षे चिण्णमुलोरिति सूत्रे दीर्घग्रहणं कर्त्तव्यमेवान्यथाहि। हेड अनादरे घटादिः। एच इक्। हिडयति। अत्र चिण्णमुलोः कृतयोर्ह्रस्वविकल्पमते। अहिडि।
अहेडीति स्यात्। दीर्घे तु। अहिडि। अहीडि इति भवति। एतच्च चिण्णमुलोरिति सूत्रे कैयटग्रन्थे कमेर्णिङिति सूत्रे हरदत्तग्रन्थे च स्पष्टम्। दीर्घो नास्तीति।
यङोऽह्लोपस्य स्थानिवत्त्वेन णिच्परत्वाभावादुपधावृद्धेरप्रवृत्तेरिति भावः। नोदात्तोः। कथन्तर्हि हरेर्यदक्रामि पदैककेन खमिति श्रीहर्षः। प्रमा
दएवायम्। यदि समाधेयमेवेत्याग्रहस्तर्हि निवृत्तप्रेषणात्क्राकृतेर्थे णिचि ततश्चिण्बोद्धः ॥
इङ्लुकि दीर्घो भवत्येवा न हि यङ्यङ्लुकोरर्थे स्वरे वा विशेष इति भाष्ययोर्न विरोध इति भावः ॥

सञ्ज्ञापूर्वकेति। घञर्थके साधुरित्यन्ये॥ ॥ इति भावकर्मप्रक्रिया॥ ॥ फलांशेति। व्यापारसमानाधिकरणफलांशेत्यर्थः। किंतु कर्त्तृत्वमेवेति। कर्त्तृत्वाप्राप्तेः

कथमुद्यमउपरमइति। सञ्ज्ञापूर्वकविधेरनित्यत्वात्। तथा च निर्दिश्यते। अडउद्यमने। यमउपरमे इति। अथ ये द्विकर्मकास्तेषु कृत्यक्तखलर्थाः किम्मुख्ये कर्मणि उत गौणे किं वोभयोरिति सन्देहे व्यवस्थामाह। द्विकर्मकाणां त्विति॥॥ इति भावकर्मप्रक्रिया॥ ॥ प्राक् सकर्मका अपीति फलावच्छिन्नव्यापारपरत्वे हि देवदत्तादिनिष्ठव्यापारव्यधिकरणविक्लित्तिद्विधाभवनन्यग्भवनादिफलाश्रयाणामोदनादीनां कर्मत्वमुचितम्। कर्त्तुरीप्सिततमत्वात्। व्यापारांशपरित्यागेन फलांशमात्रपरत्वे तु पच्भिदिरुहामपि राध्यति द्विधाभवति न्यग्भवतीत्यादिविवरणविषयीभूतानां राध्यत्यादिवदेवाकर्मकता। नह्यस्यामवस्थायामोदनादेः कर्मत्वं संभवति किंतु कर्त्तृत्वमेव स्वतन्त्रः कर्त्तेति लक्षणात्। एतच्च णेरणाविति सूत्र एव प्रपञ्चितम्। स्यादेतत्। द्विकर्मकाणामेकस्य कर्मणः प्राधान्यविवक्षायामपि अपरेण सकर्मकत्वमस्त्येव। स्वयं प्रदुग्धेस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनीत्यादौ यथेति चेत्। सत्यम्। एककर्मकाणामेवाकर्मकता या उच्यमानत्वान्न दोषः। तदेतद्ध्वनयति। प्रायेणेति। अकर्मकत्वमुत्पाद्य तस्य फलमाह। तेभ्यो भाव इति। भावे चाकर्मकेभ्य इत्युक्तेरिति भावः। कर्मवत्। कर्मशब्देन कर्मस्था क्रिया लक्ष्यते तदाह। कर्मस्थयेति। लकारवाच्य इति। लकारेणोपस्थापित इत्यर्थः। द्विलकारादिति। अयं भावः। व्यत्ययो बहुलं लिङ्याशिष्यङिति संहितया पाठे परसवर्णविधिलब्धलकारोपरि लद्वयं न व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेषोस्तीति भाष्योक्तेः। यद्वा। लुप्तनिर्दिष्टो लकारः। लोपस्तु संयोगान्तस्येति ॥

परत्वाच्चेति भावः। कर्मस्थाक्रियेति। क्रियायाः कर्मणा साधनेन तुल्यत्वासंभवादिति भावः। लकारेणेति। लस्थानिकादेशेनेत्यर्थः। लद्वयाश्रवणादाह। न व्यञ्जनपरेति ॥

पक्षान्तरेण। यणः प्रतिषेधो वाच्य इति वार्त्तिकादिपक्षेणेत्यर्थः। तदुपस्थाप्यलम्। तत्स्थानिकादेशोपस्थाप्यलम्। कर्त्तेति पदलाभोपायमाह। कर्त्तरीति। कर्त्तस्थ ते त्यर्थ इति। यथा दर्शनारोहणाभ्यां विषयेऽन्यस्मिन्भूते च विशेषानुपलम्भात्कर्तृस्थतेति भावः। अन्येषामित्यस्यामन्येषां मतद्वयार्थमभिप्रेत्याह। उद्देश्य

पक्षान्तरे तु हलो यमामिति। तच्च लग्रहणमिहानुवृत्तं पञ्चम्या विपरिणम्यते तेनाभिमतार्थलाभ इति। करणाधिकरणाभ्यामिति। नन्विह करणत्वाद्यवस्थायां वस्तुतः सन्नपि असिस्थाल्योर्व्यापारो धातुनानोपात्त इति चेत् किं ततः। न ह्येतस्मिन्सूत्रे साहाय्यप्रतियोगिभूता क्रिया धातूपात्तत्वेन विशेषिता। एवञ्चासति कर्मणेत्यस्मिन्स्यादेवातिप्रसङ्ग इति भावः। अधिगच्छतीत्यादि। श्लोकस्योत्तरार्द्धं तु यत्कृपापातस्तस्मै नमोऽस्तु गुरवे सदेति बोध्यम्। स्यादेतत्। पच्यादीनाङ्गम्यादीनाञ्च फलाभिधायित्वे फलस्य च कर्मनिष्ठत्वे तुल्ये कथं कर्मवद्भावप्रसरस्तत्रेति व्यवस्था। तत्राह। यत्र कर्मणीति। उक्तञ्च हरिणा। विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता। क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पितेति। अन्येषामाप्तानां शब्दैः क्रियाव्यवस्था। शब्देन कर्तृव्यापारस्यैव प्राधान्येनावगमात्कर्त्तृस्थतेत्यर्थः। उद्देश्यतापि क्वचित्कर्मस्थांशस्य क्वचित्तु व्यापारांशस्येति सापि नियामिका। तथाहि। दर्शनारोहणाभ्यां विषयेऽन्यस्मिन्भूते च विशेषानुपलम्भात्कर्त्तृस्थता। उद्देश्यानुरोधाच्च। अहं पश्येयमिति ह्युद्देशेन त्वयं विषयो भवत्विति। एवमहमुपरिगच्छेयमित्युद्देशेन तु हस्तिनोऽन्यग्भावो भवत्विति। उपरिगमनरूप एव व्यापारविशेषो रुहेरर्थो न तु न्यग्भावनमात्रम्। भूमिष्ठे वृक्षस्य शाखां हस्ताभ्यामवनमयत्यपि देवदत्ते आरोहतीत्यप्रयोगात्। अत एव हियद्धितु परं छन्दसीत्यत्र भाष्यम् ॥

तापीति। यत्र धातौ यन्निष्ठो य उद्देश्यः स तत्स्थक्रियवदित्यर्थः। उपरिगमनेति। आङ्पूर्वस्य रुहेर्गत्यर्थत्वादिति भावः ॥

दिङ्मात्रमिति।अजाग्रामंनयतीत्येवोदाहरणमित्यभिमानः।यततइतियदिति।नचयत्रकर्माकाङ्क्षासस‌कर्मकइतियुक्तम्।शब्दस्वभावकल्पनापेक्षया
र्थकल्पनस्ययुक्तत्वात्।किंचगच्छतीत्यादौनामकर्मकतापत्तिः।तत्रहिकेनेत्याकाङ्क्षानतुकमितिअनुभवसिद्धमितिदिक्।यद्यपीहेति।तत्रसंयोगःक
रुहिर्गस्यार्थइति।अतएवचाणौकर्त्तुर्णौकर्मत्वम्।पचिच्छिद्योस्तुविक्लित्तिद्विधाभवनरूपोविशेषःकर्मणिदृष्टस्तदुद्देशेनैवचकार
कव्यापारइतिमहद्वैषम्यम्।एवञ्चारुह्यतेहस्तीतिकर्मवद्भावंप्रदर्शयन्तोभाष्यन्यायविरोधादुपेक्ष्याइतिकैयटः॥हरदत्तादयोप्ये
वम्।नन्वेवमिहैवसूत्रेसकर्मकाणांप्रतिषेधोन्योन्यमाश्लिष्यतइतिभाष्यवार्त्तिकग्रन्थःसंयोगरूपफलस्यकर्मस्थत्वात्प्राप्तिरिति
कैयटादिग्रन्थश्चविरुध्यते।रुहिगमिभ्यांरुहिगम्योर्वैषम्यस्यदुरुपपादत्वात्संयोगाख्यफलस्यसर्वत्रतुल्यत्वादितिचेत्सत्यम्।उ
दाहरणदिङ्मात्रन्तत्रतुस्थितोदाहरणमितितत्त्वम्।स्यादेतत्।ज्ञानेच्छयोरिवयत्नस्यापिकर्तृस्थत्वात्तद्वाचिनःकरोतेरपिकर्त्तानकर्म
वत्स्यादित्याशङ्क्यकरोतेर्यत्नार्थत्वमेवनास्तीत्याह।करोतिरिति।एतच्चभूवादिसूत्रेभाष्येस्पष्टम्।नेतदित्युपलक्षणम्।सकर्मकतैवतावत्स्या
द्यततइतिवदितिबोध्यम्।एतेनेति।ज्ञानस्यकर्तृस्थत्वव्युत्पादनेनेत्यर्थः।अनुव्यवस्यमानइति।खण्डनकारप्रयोगः।सकर्मकाणामिति।एतेनसृजस्या
त्मानमात्मनेतिव्याख्यातम्।तथाहि।आत्मानमात्मनावेत्तीत्यस्यकर्तृस्थभावकत्वेपिसृजसीत्यंशेप्रकृतवार्त्तिकेनैवनिर्वाहः।सृजेःकर्मस्थफलकत्वात्।
अन्योन्यमिति।स्यादेतत्।यद्यपीहसंयोगानुकूलक्रियाकर्मत्वकर्तृत्वोपयोगिनीउभयनिष्ठाचतथापिव्यक्तिभेदोस्त्येव।अतएवान्यनिष्ठाप्रत्यन्यस्यकर्मत्वम्।
अन्यथाउभयोरपिकर्तृत्वमेवस्यान्नतुकर्मत्वम्।इमौगङ्गाश्रशतद्रूइत्यत्रयथा।एवंस्थितेकर्मत्वोपयोगिनीयाक्रियातयातुल्यक्रियस्य॥७ मैत्वोपयोगीइतरो
रःकर्तृत्वोपयोगीतिबोध्यम्।कर्तृत्वमेवस्यादिति।परत्वादित्यादिः।भेदेत्वन्यनिष्ठाप्रत्यन्यस्यकर्मत्वमुपपन्नमितिभावः।एवंस्थिते।संयोगस्यकर्मत्वोपयोगित्वेतदनुकूलव्या

तदीयकर्त्तुः। कर्मस्थक्रियायाः कर्त्तुः। इह। कर्तृस्थक्रियाकर्त्तरि। अवस्थाविशेषेति। पच्यमानत्वावस्थातत्प्रागवस्थादिरूपेत्यर्थः। न प्राप्नोत्येवेति। स्पृशतेर्गमिवत् कर्तृस्थक्रियत्वादप्राप्तिरित्यपि बोध्यम्। एवं सृजसीति। उक्तरीत्या दोषाभावादिति भावः। किं चान्योत्पत्तिरूपफलाश्रयत्वं तज्जनकक्रियाश्रयत्वं युगपदेकत्र विरु

तदीयकर्त्तुर्विधीयमानः कर्मवद्भाव इह न प्राप्नोत्येव। एवं सृजस्यात्मानमात्मनेत्यत्रापि। तत्किं वार्त्तिकारम्भेणेत्याशङ्क्योदाहरणान्तरमाह। अजेति। नयतेर्हि कर्मकतया अजारूपस्य कर्मणः कर्तृत्वेन विवक्षायामपि ग्रामरूपेण कर्मणा सकर्मत्वान्नातिदेश इति भावः। स्यादेतत्। कर्मवत्कर्मणेति सूत्रमेवमास्तु नतरां वार्त्तिकम्। प्रयोगास्तु सर्वेऽपि प्रकारान्तरेणैव व्याख्यास्यन्ते। तद्यथा। एकस्यापि वस्तुनोऽवस्थाविशेषादिविशिष्टत्वाविशिष्टत्वाभ्यामौपाधिकभेदमाश्रित्य कर्मत्वं कर्तृत्वञ्चौपदेशिकमेव सिद्धान्तेऽपि क्वचित्स्वीक्रियते। आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मनेति। एवं पच्यतेओदन इत्यत्रापि मुख्ये कर्मण्येव प्रत्ययोऽस्तु मास्तु च निवृत्तप्रेषणता। स्वयमित्यस्यात्मनेत्यर्थात्। एवञ्च स्थाली पचतीत्यत्राधिकरण इव कर्तृत्वमेवं धात्वर्थः कर्मण्यपि लभ्यत इत्यपरमनुकूलम्। कथन्तर्हि पच्यतेओदनेनेति भावे लकार इति चेत्। माभूद्भावे कर्मण्येव प्रत्ययोऽस्तु। कर्म चात्मैवान चैवं भेत्तव्यं कुसूलेन भिन्नमीषद्भेदमिति भावे कृत्यादयो न स्युः। कर्मणि चेदात्मेति विशेष्यानुरोधेन पुंस्त्वं स्यादिति वाच्यम्। सामान्ये नपुंसकसंभवात्। स्वरूपमित्यस्य विशेष्यसंभवाच्च। आत्मेति विवक्षायान्तु पुल्लिङ्गतायामुक्तविवक्षया सूत्रपक्षेऽपि दुर्वारत्वाच्च। अत्रोच्यते। कर्मवत्सूत्रं प्रत्याचक्षाणेन न दुहस्नुनमामिति प्रतिषेध आरभ्यो न वा। आद्ये। शुद्धकर्मैवास्य विषयः स्यात्। ततो दुह्यते गौर्गोपालेनेत्यादि न सिद्ध्येत्। दुग्धे गोपालेनेत्यादि च स्यात् ॥

इतयोपाधिभेदेन भेदस्यावश्यवाच्यतया मुख्यकर्त्तर्येवात्र प्रत्ययो न तु कर्मकर्त्तरीत्यपि बोध्यम्। नयतेरिति। अजानिष्ठांशस्योद्देश्यत्वात् कर्मस्थक्रियोऽयमिति भावः।
सृजस्याऽऽत्मानमिति। स्थूलोपाधिविशिष्टस्य कर्मत्वं सूक्ष्मोपाधिकस्य कर्तृत्वमत्रेत्यर्थः। कृत्स्नः। विक्लेदनान्तः। उक्तविवक्षया। औपाधिकभेदनिबन्धनया ॥

येन चिण्वदिट् इति। दुहस्नुनमान्तङानाविलेव सिद्धे यक्चिणाविलस्यवैयर्थ्यापत्तेश्चेत्यपि बोध्यम्। ध्वनितञ्चेदमार्द्धधातुके इति सूत्रे भाष्ये। तत्रत्यकैयटस्तु प्रमादः तस्मिन् कर्त्तव्ये इति। निषेधे कर्त्तव्ये इत्यर्थः। कर्तृचिण्ग्रहणयोरिति। मिलितयोरित्यर्थः। चिण्ग्रहणसामर्थ्यन्तु सूपपादमेवेति बोध्यम्। तत्रैव वर्णितत्वादिति। चिण्णिमे द्वितीये तु नमते दण्ड इत्यादि न स्यात्। कर्मणि यक्प्रसङ्गात्। कर्त्तरि तङो दुर्लभत्वात्। किं चाचः कर्मकर्त्तरीति चिण्विकल्पो निर्विषय एव स्यात्। कर्मवदित्यतिदेशस्य विषयीभूतः कर्त्ता हि कर्मकर्त्ता। न चासौ नवास्ति। त्वद्रीत्यात्मनात्मा ज्ञासीत्यत्रापि चिण्विकल्पापत्तेश्च। ननु निरस्तप्रेषणतामाश्रित्य भूतपूर्वे कर्मणि सांप्रतिके कर्त्तरि चिण्विकल्पं ब्रूम इति चेत्। तर्हि यथायथं लडादिषु शबादयः स्युः यक् न स्यादिति कर्मवत्सूत्रमवश्यारम्भमेवेति दिक्। सृजियुज्योः। श्यनो नित्यत्वादित्यादिर्नित्यमिति स्वरार्थं॥ यकि तु लसार्वधातुकानुदात्तत्वे कृते यक उदात्तत्वं श्रूयेत। यत्तु प्राचा स्नुद्रावकर्तृकात्तु जेर्यक्चिणौ कर्त्तरीति केचिदित्युक्तं तन्न यगित्यशुद्धं आत्मनेपदानुक्तेश्च न्यूनतेति दिक्। भूषाकर्मेति। यत्तु प्राचा कृगृश्रिज्भूषार्थेभ्यः सन्नन्ताच्च यक्चिणौ नेत्युक्तं तत्र कृगृ इति न्यूनम्। किरादीनां सर्वेषां ग्राह्यत्वात्। एतच्चाद्रियते। आह तदुदाहरणाभ्यां मूले ध्वनितम्। यदपि चिण्वदिडपि नेति केचिदित्युक्तं तत्र केचिदित्यंशोऽनुचितः। उक्तार्थस्य भाष्यवार्त्तिकारूढत्वात्। प्राप्ताविष्टेति। चिण्वदिट्। यत्तु प्राचा न दुहेति चिण्वदिटोऽपि निषेधं मन्वानेनोक्तं न निषेध इति केचिदिति। तन्न। चिण्वदिति हि चिणीव कार्यमतिदिश्यते। न च चिण्नेत्यस्यासावतिदेशो निषेद्धुं शक्यते येन चिण्वदिटो निषेधः स्यात्। एवं निषेधाभावस्य न्याय्यत्वे सर्वसम्मतत्वे च केचिदित्युक्तेरनुचितत्वात्। यत्तु वदन्ति। चिण्निषेधस्य चिणि परे विहितत्वाभावात्तस्मिन्कर्त्तव्ये नास्त्यतिदेश इति। तदतिरभसात्। अतिदेशो न निषिध्यत इति वक्तव्ये निषेधो नातिदिश्यत इत्युक्तेरनुचितत्वात्। अचीकरतेति। णिचि प्रतिषिद्धे णिश्रीति चङ्। यत्तु प्राचा कर्मकर्त्तरि चङ् नेत्युक्त्वाऽकारयिष्टेत्युदाहृतं तन्निर्मूलत्वादुपेक्ष्यम्॥ ७ धस्य चिणः कार्यत्वेनातिदेशेऽपि चिण्वदिटोऽभावः कथमिति चिन्त्यमित्यपि बोध्यमिति कश्चित्। नेतीति। न यमितीत्यनुवर्त्तत इत्यर्थः।

उत्तरार्थत्वमेवोपपादयति। द्विषन्तप इति। सुप्यजाताविति सिद्धे इति। ऊरुभिन्नीत्यत्र बहुव्रीहेश्चान्तोदात्तात् जातिपूर्वादिति ङीष् तत्र अजातावितिनिषेधो दुर्वार इत्य प्रियवशे। खशि प्रकृते प्रत्ययान्तरकरणमुत्तरार्थम्। द्विषन्तप इत्यत्र ह्रस्वणिलोपौ यथा स्यातां शप् च माभूत्। नन्वेवमुत्तरस्यैव क्रियतामिति चेत्सत्यम्। इहकरणादन्यत्रापि कित्सदेहार्तिकसुखेनाह। गमेरिति। असञ्ज्ञार्थमिति। सञ्ज्ञायामनुगमयतीति सूत्रेण सिद्धमिति भावः। वाचंयमपुरन्दरौ च। अमन्तत्वमिति अत्र हरदत्तः अयं खच्प्रत्ययोऽनेनैवास्तु नैवं वाचंयम इत्यस्य व्रतविषयता न लभ्येतेति वाच्यम्। निपातनबलादेव तल्लाभसम्भवात्। अथवा वाचंयमो व्रते पुरन्दरश्चेति सूच्यताम्। सर्वथापि वाचंयमो व्रत इति सूत्रं पूःसर्वयोरित्यत्र उरिदारेरिति शब्दस्त्यज्यतामिति। पूःसर्वयोः दविदारणेऽयमेव गृह्यते न तु दृङ् आदरे इत्येतावितिसम्प्रदायः। आशितंभवदिति। यावता ओदनेनातिथ्यादिर्भोजितो भवति स एवमुच्यते। इह वासरूपविधिना ल्युडपि। आशितम्भवनः आशितम्भवनं सरूपत्वात्तु घञ् बाध्यत एवेति प्राञ्चः। यत्तु वदन्ति। क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नेति निषेधात् ल्युडयुक्त इति। अत्रेदं वक्तव्यम्। यत्र घञादेर्बाधकत्वेन क्तल्युडादयः प्रसक्ताः तत्र नित्यं बाधः न तु विकल्पेनेति तस्यार्थः। इह तु ल्युटोऽपवादः खच् नत्व वासरूपन्यायो निर्बाध एव। अत एवेह जयादित्येन ल्युडुदाहृतः इत्यास्तां तावत्। सञ्ज्ञायाम्। विश्वम्भरः कैटभजित्। रसा विश्वम्भरा स्थिरेत्यमरः। युसनिमात्रमिति। तस्कलन्तु खरावग्रहो रथन्तरं साम जभारावसिष्ठः इह हि कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तमधीयते। रथमित्यवग्रहान्ति च। अखण्डत्वे तु न विषयस्यानुदात्तः निरवग्रहता स्यात्। इलुक्तमिति। माधवादयस्तु बोधेनेत्यर्थः। मतान्तरे खिति। हरदत्तादिमते इत्यर्थः। चित्तेन्द्रिययोर्व्यापारोपरमरूपौ शमदमौ विलासादिवेदान्तग्रन्थाश्चेहानुकूलाः। गमश्च योगविभाग उत्तरार्थः। कुमारशीर्षयोर्णिनिः। एतयोः कर्मणोरुपपदयोर्हन्तेर्णिनिः स्यात्। सुप्यजाताविस्यादिभिः सिद्धे ताच्छील्याद्यभावेऽपि णिन्यर्थम्। शिरसः शीर्षभावार्थं च वचनम्। लक्षणहन्तीति। सूत्रे लक्षणशब्दोऽर्शआद्यजन्त इति भावः। जायाघ्न इति। जायामरणसूचकं पाणिरेखादिकं यस्यास्ति स तां हन्तीति गौणो व्यवहारः। एवं पतिघ्नीत्यत्रापि। शक्तौ हस्ति। शक्ताविति किम्। विषेण हस्तिनं हन्तीति हस्तिघातः। शक्तिग्रहणसामर्थ्याद्विप्रकर्षो विज्ञायते स्वबलेनैव हन्तुं या शक्तिरिति। कपाटघ्न इति। कं शिरः पाटयति प्रविशत इति कपाटम्। पाठान्तरे तु अटतेः पचाद्यच् ॥ ७। रुचेराह। शिरसः शीर्षेति। प्रविशत इति। षष्ठ्यन्तमेतत्। पाठान्तरे। कपाटेति पाठे ॥

हरदत्त इति। बाहुलकात्तोऽल्लजिदित्यन्ये। गतिसमासेति। च्व्यन्तस्य गतित्वादिति भावः। अगत्येति। एवञ्चाच्व्यन्तोत्पदो विषयः केवलः ख्युन इति भावः। स्पष्टीकरिष्यत इति। एवञ्चूतह्यर्थं मेवेति भावः। न चात्रैव कर्तृप्रत्ययार्थन्तत् कर्मण्युपपदे एकोऽन्यत्रापर इति। न च भुवोः कर्मकत्वात्कर्मणीत्यस्यासंबन्धे उक्तार्थफलाभावो र्थान्तरे सकर्मकत्वेऽप्याढ्यादीनां अर्थवत्त्वा सं भव इति वाच्यम्। अन्तर्भावितण्यर्थस्य करोतिपर्यायत्वेन तेषां योगे कर्मत्वसम्बन्धार्थयोगस्य च संभवादेवञ्च मत्रैव प्रवृत्तिः स्यात् कर्मणीत्यस्य निवृत्तौ मानाभावात् कर्तृग्रहणाच्च सर्वं कवर्गोल्ले इत्यत्र योगविभागात्कोः कवादेश इति हरदत्तः। आढ्यसुभग। प्रतिषेधसामर्थ्यादिति। तथाहि। आढ्यीकरणमिति रूपं ल्युट्ख्युनोस्तुल्यम्। न च ख्युनि नुम् ह्रस्वौ स्यातामिति वाच्यम्। अव्ययपर्युदासात्। च्व्यन्तस्याव्ययत्वात्। न च ख्युनि उपपदसमासो विशेषः ल्युट्यपि गतिसमाससंभवात्। उभयोरपि नित्यत्वाविशेषात्। न च स्त्रीप्रत्यये विशेषः टिड्ढेति सूत्रेण ख्युन उपसंख्यानेन च ङीपस्तुल्यत्वात्। नापि स्वरे विशेषः ल्युटि लित्स्वरेण ख्युनि नित्स्वरेण कृञ उदात्तत्वाविशेषात्। न चोत्तरार्थमत्राविख्युक्तमिति वाच्यम्। केवलोत्तरार्थत्वे हि तत्रैव ब्रूयात्। तदेतदुक्तं इहेति। भाष्यमते त्विति। भाष्यवार्त्तिकस्वरसेन ल्युडिष्ट इति निर्णीते च्व्यादित्वस्य केवलोत्तरार्थत्वमगत्या स्वीकर्तव्यमिति भावः। कर्तरि भुवः। कर्तृग्रहणं करणानुवृत्तिभ्रमनिरासार्थमुत्तरार्थञ्चेति प्राञ्चः। वस्तुतस्तु व्यर्थमेव। अस्वरितत्वादेवाननुवृत्तिसिद्धेः उत्तरत्रापि अनुप्रयोगः स्पष्टीकरिष्यते। खिष्णुचः खकारो मुमर्थः। नन्विकारो मास्तु इडागमेन रूपसिद्धेः। एवञ्चकारोऽपि मास्तु प्रत्ययस्वरेणेष्टसिद्धेः। न च कृत्योकेष्णुच्चार्वादयश्चेति स्वरसूत्रेऽस्य ग्रहणं न स्यात् चकाराभावात्। इकारस्य लाक्षणिकत्वात्तल्लक्षणत्वयोरसिद्धत्वे न ष्णु इति रूपाभावाच्चेति वाच्यम् ॥

त्रप्रवृत्तिरिति चेन्न। अन्तर्भावितण्यर्थस्य भुवोः प्रसिद्धत्वेनात्र ग्रहणाभावात्। ध्वनितञ्चेदं भुवो भाव इत्यत्र भाष्ये। रमिजयोरप्यन्तर्भावितण्यर्थत्वसंभवेन न संबोधम् इत्यस्यासिद्ध्यापत्तेश्च। न हि तत्रापि कर्तृग्रहणमस्तीति दिक्। इडागमेनेति। न चेकाराभावे खस्य चर्त्वं स्यात्। व्याख्यानेन निर्णयसंभवेनाप्तेरिति भावः ॥

तत्सामर्थ्यादिति। तत्सामर्थ्याच्चप्रतिपदोक्तपरिभाषायास्तदनुबन्धकपरिभाषायाअसिद्धपरिभाषायाश्चबाधइतिभावः। चिन्त्यमेतदिति। स्पष्टञ्चेदंभाष्ये। कर्त्तृप्रचयइति। तत्सामर्थ्यादस्यनिवृत्तिरितिभावस्तदाहसुबन्तइति॥ क्विपापिसिद्धेरिति। नचयङ्लुगन्तेस्वरेविशेषः। नकारप्रत्याख्यानपरभाष्यप्रामाण्येनस्पृशेर्यङ्लुगभावस्यध्वनितत्वात्। इतिदिगिति। अतएवसत्सूद्विषेतिसूत्रेसदादिषुसुपग्रहणंकर्त्तव्यमितिभाष्यंसङ्गच्छते। कर्मकर्त्तरीति॥ भाष्येलक्ष्यारोपितप्रेषणपक्षेऽनुसन्धिर्दर्शिता॥ निकृतेपिइकारोऽनुबन्धपरिभाषयालङ्ङादीषुचएवग्रहणस्यन्याय्यत्वात्। इकारोच्चारणसामर्थ्यादस्यापिग्रहणमितिचेत् हन्तेर्नञ्कारमात्रमस्तुतत्सामर्थ्यादस्यापिग्रहणेसिद्धेकिमिकारेणेति। चिन्त्यमेतत्। यत्तुसुहरदत्तेनोक्तंमूलणत्वयोःसामर्थ्यादस्यग्रहणमिति। तदापाततः। सुजपेस्त्र्यासुजुक्तौप्रक्रियालाघवेनसामर्थ्यायोगादितिदिक्। निरुक्तमिति। ननुस्पृशेःसकर्मकत्वात्कर्मण्युपपदेइत्येवोचितमितिचेत्। अत्रप्राञ्चः। पूर्वसूत्रात्कर्त्तरीत्यनुवर्त्ततेतच्चव्यर्थंसत्कर्तृप्रचयार्थंसंपद्यते। कर्मण्युपपदेएकःकर्त्ताकरणादौचापरइतिकर्तृप्रचयः। एवञ्चसुबन्तउपपदइतिफलितंभवतीति। वस्तुतस्तुव्यर्थोयंयत्नःमन्त्रेस्पृगित्यादेःक्विपापिसिद्धेः। क्विन्प्रत्ययोयस्मादितिबहुव्रीहिबलादेवकुत्वसंभवादितिदिक्। दृगिति। कर्मकर्त्तरिप्रत्ययःरूढ्यर्थानुगुणत्वात्। द्युसदिति। पूर्वपदादितिषत्वंतुनभवति। छन्दसीत्यनुवृत्तेःआदितेयादिविषयइत्यन्यत्रतुसुषामादित्वात्षत्वमितिमाधवादयः। उपनिषदिति। सदिरप्रतेरितिषः। अग्रग्रामाभ्यामिति। सएषाङ्ग्रामणीरितिनिर्देशेनज्ञापितमेतत्। निरूपिप्रत्ययविषयञ्चेदम्। तेनकर्मण्यपिणत्वंन। ग्रामनायः। अदोनन्ने। विट्स्यादिति। जनसनखनक्रमगमोविडितिपूर्वसूत्रादनुवृत्तेः। पूर्वसूत्रेतुछन्दसिसहइत्यत्रछन्दसीत्यनुवर्त्ततइत्याकरः। अतएवेहतत्रोपन्यस्तम् ॥ दृशेति। असञ्ज्ञात्वात्पूर्वपदादित्यस्याप्राप्तिरितिभावः। नीरूपप्रत्ययेति। नीरूपोयःक्विप्तद्विषयमित्यर्थः। वारूपसूत्रेभाष्येग्रामनायइतिदन्त्यपाठादितिभावस्तदाह। तेनेति। संप्रतितुभाष्येमूर्द्धन्यपाठोदृश्यतेतस्यप्रामाणिकत्वेनीरूपाद्धातोर्विहितप्रत्ययविषयमित्यर्थः। तेनेत्यस्यार्थः। यवयैत्यादिर्दण्डकपठितनयतेर्धातोरितिशेषः। अत्रनिर्णयोबहुश्रुतैःकार्यः। पूर्वसूत्रे। जनसनखनक्रमेतिसूत्रे। आन्करोवस्यादिः ॥

अङासाहचर्यमिति।अङासंबन्धइत्यर्थः तेनयस्माच्छासेरङ् तत्रैवेत्वमितिभावः।दृशोयङिति।परस्मैपदेदृष्टेभ्यःसर्त्यादिभ्यःपरस्यच्लेरङित्यर्थइत्यभिमानः।वस्तुतःपरस्मैपदे एवाङित्यन्यत्रनिरूपितम्।पाव नइत्यस्यवनिपासिद्धिमाश्रित्येत्वमवकारादाविलस्यभाष्येप्रत्याख्यानादाह।भाष्यकारीयेति।इतिपक्षेइति।धीदेधातेश्छायमेवेति।स्याश्व विजुपेछन्दसि।आतोमनिन्क्वनिब्वनिपश्चेत्यधिकृत्याह।अन्येभ्योपीति।सुशर्मेति।सुष्ठुशृणोतीतिविग्रहः।प्रातःएतीतिप्रातरित्वा।वाहभ्रडिति।वाहात्स्थ तंभ्रश्यतीतिविग्रहः।वृत्तौतुवहाभ्रडितिपाठः।वहस्कन्धः।अन्येषामपिदृश्यतइतिपूर्वपदान्तस्यदीर्घइतिहरदत्तः।आशासइति।आशिषिलिङित्यादि निर्देशेनेदंसिद्धम्।नचशासइदङ्हलोरित्येववाच्यम्।तत्रपरस्मैपदिनएवशासेर्ग्रहणात्।तद्बीजन्तुआङासाहचर्यम्।यद्यपिशास्तिशास्तीतिसूत्रेपृथग्योगकरणात्पदद्वयेप्यङितिसिद्धान्तः तथाप्युत्तरार्थतयापरस्मैपदग्रहणानुवृत्तेराकरेस्पष्टतयापरस्मैपदेदृष्टोयःशासिःतस्मात्परस्याङितिनिष्कर्षः।अत एवाशास्तेइत्यादौनेत्वमितिभावः।सुम्नाविति।ओःसुपीतियण्।स्थःक।संस्थाइति।क्विपिलुप्तेघुमास्थेतीत्वेनस्थानिवद्भावस्यानल्विधावितिनिषेधात्।प्रत्ययलक्षणसूत्रन्तुनियमार्थमितिनिष्कर्षात्।यत्तुकैयटेनोक्तमीत्वमवकारादावितिवचनात्भाष्यकारीयोदाहरणप्रामाण्याद्वाप्रत्ययलक्षणेनेईत्वेति। तत्तुअवर्णेङित्यादिसिद्धयेप्रत्ययप्राधान्येऽल्विध्यर्थंप्रत्ययलक्षणसूत्रमितिपक्षेबोध्यम्।एतेनमित्राणिशास्तिमित्रशीरित्यत्रइत्वंव्याख्यातम्। निष्कर्षेतुशासइत्क्विपि।ततःअङितिनियमार्थमिदम्।अजादौचेदङ्येवनान्यत्रेति।हल्ग्रहणमास्तुइत्यवधेयम्।स्यादेतत्।सुपिस्थःक्विपेति सूत्राभ्यांक्विपोसिद्धौतन्नाह।शामीति ॥

तिःसंप्रसारणमितिवार्त्तिकस्यभाष्यात्घुमास्थेत्यत्रहलीत्यस्यानजादावित्यर्थेलक्षणेतिपक्षेइत्यपिबोध्यम्।तत्पक्षेप्रत्ययलक्षणसूत्रस्यनियमार्थत्वेपिस्थानिवद्भावस्य सुलभत्वात्।एतेनप्रत्ययलक्षणसूत्रस्याल्विधौविध्यर्थत्वेन।निष्कर्षेत्विति।नियमार्थत्वेत्वित्यर्थः।कक्विपाविति।वासरूपन्यायेनेतिभावः ॥

कृञश्छमिति। शङ्केति। न चौलाशङ्कायां परिव्राजिके त्यत्र परत्वात्प्राप्तमित्यर्थः। बाधेनेति। न च कस्य परत्वाद्बाधेन सरूपतया च वासरूपाप्रवृत्त्या नित्यबाधेपि क्विपेनन्यायेन सुलभ इति वाच्यम्। धातुग्रहणाद्धि ह्यन्तरकल्पनेन तत्सामर्थ्याद्धेत्वादिषु परत्वात्प्राप्तस्य ठस्येव वासरूपन्यायेन पक्षप्राप्तक्विपोप्यत्र बाधात्। न च पुरस्तादपवादन्यायेन टस्यैवायं बाधको न क्विप इति वाच्यम्। येन नाप्राप्तिन्यायेन क्विप एव बाध इत्यस्यापि वक्तुं शक्यत्वात्तस्माद्बाधसामान्यचिन्तयोभयोरपि स बाधक इति। स्थः कचेति। बाधकबाधनार्थम्। न च स्थः कचेति चोऽप्यर्थः। वासरूपन्यायेन कस्याभावे क्विपः सिद्धेरिति वाच्यम्। अस्य धातुग्रहणप्राप्तजपवादत्वेपि क्विबपवादत्वाभावेन धातुग्रहणबाधितक्विपश्च विना साधयितुमशक्यत्वादिति स्पष्टं भाष्ये। इति भविष्यतीति। अन्तवत्त्वेन धातुत्वाच्छस्य इत्यादावातो धातोरिति लोपसिद्धिः स्थानिव

धातुग्रहणसामर्थ्याद्धि धातुमात्राद्भवन्नच् प्रसयोहेत्वादिषु कं स्पष्टं यथा बाधते तथा तिष्ठतेः कः क्विपावपि बाधेतेति भावः। नन्वेवं शामि धातोरित्यस्यानन्तरं स्थः कचेति सूत्र्यताम्। चकारेणापि समुच्चिते सवर्णदीर्घेण संस्थादिति भविष्यति। एवञ्चोत्सर्गापवादयोः समानदेशतया सन्दर्भशुद्धिः इत्वाभावार्थञ्च नयसनीयमिति महल्लाघवमिति चेत्। मैवम्। अक्ता धर्षं क्ताविति सूत्रेण अशं स्यादित्यत्रोत्तरपदान्तोदात्तत्वापत्तेः ॥

त्वन्तु न। अपूर्वविधित्वादिति भावः। ईत्वाभावार्थञ्चेति। धातुग्रहणसामर्थ्यात्क्विपो प्राप्तेरिति भावः। मैवमिति। अयं भावः। पूर्वधर्मावच्छिन्नोद्देश्यकविधिसत्त्वेन कृदतिङ् सूत्रस्य भाष्यरीत्या स्थानित्वस्य दुर्वारत्वात्। न च धियाविसादावियङ्ङ्नयारीत्या पूर्वरूपस्य स्थानिवत्त्वं स्यादिति वाच्यम्। आकारात्पूर्ववृत्तिधर्मावच्छिन्नोद्देश्यकत्वाभावात् इवर्णान्तधातोर्हि सः। एतेन जुहुवतुरित्याद्यसिद्धिरत्र पक्षे इत्यपास्तम्। धियावित्यत्रैकादेशस्यानेहल इति दीर्घप्रवृत्तेश्च। भीईभियइति स्थानिवत्सूत्रस्य भाष्ये तु सौत्रत्वादियङ् लोके नेदृशप्रयोगाः साधुरेवा। परनिमित्त इत्यत्र परोऽस्थानिभूत एव गृह्यते इत्यत्र न मानम्। तक्रकौण्डिन्यन्यायस्यापवादविषयत्वेनेदृशाविषयेऽप्रवृत्तेरिति दूषणान्तरमाह। अक्ताविस्यादि ॥

गतिकारकेति।स्याधातोरन्तर्भावितण्यर्थत्वे शंशब्दार्थस्य कर्मत्वेन कारकत्वमिति भावः।उपसर्गान्तरमिति।पञ्चम्यन्तोपसर्गपदेन भिन्नवाच्यन्तरशब्दस्य समासत्वेनोप
कृद्ग्रहणे गति कारकपूर्वस्यापीति अशंस्थाशब्दस्याजन्तत्वात्तत्क्विबन्तेन ननञ्समासे तु नञ्पूर्वपदप्रकृतिस्वरः सिद्ध्यति।आमन्त्र्यमिते ति।ताच्छील्यस्य विवक्षितत्वा
तृन्।अतएव ब्राह्मणानिति कर्मणि षष्ठी न कृता।भाष्यविरोधादिति।उक्तं हि भाष्ये।सुपीति वर्तमाने पुनः सुब्ग्रहणं किमर्थम्।अनुपसर्ग इत्येवन्तद्भूत् इदं सुम्मात्रे
यथास्यात्।उदासारिण्यः प्रत्यासारिण्य इति।प्रसिद्धश्चेति।एवञ्च व्यापीत्यादिप्रयोगा अपि निर्बाधा एव।अमरश्च प्रायुङ्क्त।लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधित इ
ति।यत्तु सप्तपदार्थीटीकायां व्यापीत्याङ्प्रश्लेषादुदासारिण्यः प्रत्यासारिण्य इतिवत् साधु इत्युक्तम्।तस्योक्तिसंभवमपि विकीर्षता भ्रमपरम्पराशरणीकर्तव्या।न
याहि सुबुक्तिरुपसर्गनिवृत्त्यर्थेति तावदेको भ्रमः।तथा सति पाणिनीयानुसारिणीमित्यादौ असङ्गतिमाशङ्क्य उपसर्गग्रहणं केवलोपसर्गपरम्।इह तु पाणिनीयादि
पदान्तरमप्यस्तीति प्रसादादिग्रन्थं पुरस्कृत्य तत्रत्यकेवलपदस्य असहायपरतया नेकोपसर्गसद्भावे णिनिर्भवत्येवेत्यपरो भ्रमः।एवं सति उत्प्रतिभ्यामाङि सर्त्ते
रुपसंख्यानमिति स्वोपज्ञग्रन्थविरोधापर्यालोचनम्।उपसर्गेपीत्येत[illegible]स्यावृत्तिफलकमिह सुब्ग्रहणमिति वृत्तिमते उपसर्गान्तरङ्किञ्चिदाश्रित्यैव णिनिः
प्रवर्त्तते।न त्वनेकमप्युपसर्गमिति मतशरीरस्यापर्यालोचनं च तन्मूलमस्यास्वान्तोदन्त्।साधुकारिणीति।एतज्ज्ञापकसिद्धम्।आक्वेरिति सूत्रे हि तच्छीलात्स्यकु
साधुकारी गृह्यते।तच्च ताच्छील्यं विनापि णिनौ सत्येव सङ्गच्छते।ब्रह्माणिवद इति।वाचनिकमेवेदम्।अताच्छील्यार्थमिति।एतच्च कैयटहरदत्तादिग्रन्थेस्पष्टम्।य
त्तु भट्टवार्त्तिके ब्रह्मवादिशब्दस्य तच्छीलतद्धर्मतत्साधुकारिपरतया व्याख्यानं दृष्ट्वा आक्वेरित्यधिकारे णिनिविधायकं वार्त्तिकमस्तीति केचिद्भ्राम्यन्ति तद्भा[illegible]दर्श
नप्रयुक्तम्।भट्टपादानान्त्वयमाशयः।सुप्यजाताविति सूत्रेण ताच्छील्ये णिनिः।उपसंख्यानेन ज्ञापकेन वा साधुकारिणि आवश्यकाधमर्ण्ययोर्णिनिरिति आवश्य
के णिनिस्तु तद्धर्मे पर्यवस्यति ॥ ७ सर्गभिन्नमित्यर्थः।णिनौ सत्येवेति।साधुकारिशब्दे इति शेषः।साधुकारिणीति ब्रह्मवादिशब्दे णिनिरिति शेषः।णिनिस्त्विति।तत्रैव शब्दे इ

यद्यपिणिनिरिति। अनेन वार्त्तिकचारितार्थ्यं दर्शितमानत्विति। अत एवात्ममान इति सूत्रे यगर्थे कर्मकर्त्तृग्रहणमिति वार्त्तिकं श्यनैव सिद्धिमाश्रित्य भाष्ये प्रत्याख्यतम्। अन्यथा तनादेरु प्रत्ययवारणाय वार्त्तिकमावश्यकमेव स्यात्। कर्मणि षष्ठ्येति। कर्त्तृषष्ठ्यां तु न समासः आत्मग्रहणसामर्थ्यादिति भावः। इति प्राप्तमिति। पुंवत्कर्मधारयेस्यस्य न प्राप्तिः समानाधि——— कारस्थस्यैव कर्मधारयत्वात्। अत्राभेदान्वयाभावेपि पूर्वपदार्थस्यैवोत्तरपदेनाभिधानाद्वस्तुतः सामानाधिकरण्यम् एवञ्चात्र ह्यणिवदिति वार्त्तिकेन ताच्छील्यादिविरहे यद्यपिणिनि रूपसंख्यातस्तथापि प्रागुक्तरीत्या ताच्छील्यादिघर्थे षुसुलभ इति। एवञ्च फलितार्थकथनपरं भट्टवार्त्तिकं न त्वाकेरिति सूत्रस्यापारदर्शनपरमिति। [illegible] मनः। बहुलग्रहणानुवृत्तेरिह दैवादिकस्यैव ग्रहणं न तु तानादिकस्य। तेनोत्तरसूत्रे खशि श्यनैनैव भवति न तु प्रत्ययस्तदाह। मन्यतेरिति। आत्ममाने। ममनमानः। आत्मशब्दः स्वपरः कर्मणि षष्ठ्या समासः। तदाह। स्वकर्मक इत्यादि। प्रत्ययार्थत्वेन संनिहितः कर्त्ता स्वपदार्थः। चादिति। यद्यपि वासरूपविधिनालभ्यत एव णिनिस्तथाप्यविच्छेदाय समुच्चीयते तेन करणे यज इत्यादौ णिनिश्चानुवर्त्तते न तु खशिति भावः। पण्डितमात्मानमिति। एकस्याप्यात्मनः [illegible] रूपेण कर्तृत्वं पण्डितत्वविशिष्टरूपेण च कर्मत्वं बोध्यम्। कालिंमन्येति। स्त्रियाः पुंवदिति प्राप्तं पुंवद्भावं बाधित्वा परत्वात् ह्रस्वः। यत्त्वत्र क्यङ्मानिनोश्चेति प्राप्तः पुंवद्भावइ प्रसादकृतो कान्तत्वामादिकमेव। दिवामन्येति। अधिकरणशक्तिप्रधानस्याप्यस्य वृत्तिस्वभावात्कर्मत्वम्। इच एकाचः। अम्ग्रहणमिहावर्त्तते। तत्रैकेन अम् विधीयते। अपरेण प्रत्ययो विशेष्यते तदाह। स्वाद्यम्वदिति। भाष्यकारेति। अयंभावः ॥

ति

स्येव। एकविशेष्यकप्रतीतिजनकत्वस्यैव सामानाधिकरण्यपदार्थत्वात्। अत एव च्व्यन्ते महद्भूतेत्यादौ प्रकृतेः कर्तृत्वेप्यमहच्छब्दार्थस्यैवामहच्छब्देनाभिधानात्सामानाधिकरण्यप्रयुक्तपुंवत्त्वसिद्धिरिति दिक्। प्रत्ययः। प्रत्यय इति सूत्रस्य प्रत्ययपदार्थरूप इत्यर्थः ॥

श·श· स्त्रियांवर्त्ततइति। पुंयोगादितिसूत्रबलात्स्वलिङ्गत्यागेनस्त्रियांवर्त्ततइत्यर्थः। तथैवेति। भाष्यप्रामाण्यादितिशेषः। अम्विधिसामर्थ्यादिति। समाससञ्ज्ञाप्राति
३४८ पदिकसञ्ज्ञोत्तरमङ्गेजातस्यतन्मध्यपतितत्वात्तद्ग्रहणेनग्रहहणेपितदवयवत्वाभावज्ञापनेनेतिभावः। नचस्वमोरित्यस्यार्थवदमोग्रहणज्ञापनद्वा
राऽप्रवृत्तिःस्यादितिवाच्यम्। येननाप्राप्त्यामध्येपवादन्यायेनचसामासिकस्याप्रवृत्तिनिमित्तज्ञापनेपिस्वमोरित्यस्याप्रवृत्तिनिमित्तार्थज्ञापनेमानाभावा
त्। अथैवम्परिभाषात्वनित्यत्वादत्रनप्रवर्त्तते। नचान्तरङ्गेलुक्यमसिद्धः उत्तरपदाधिकारेन्तरङ्गपरिभाषायाअप्रवृत्तेरन्यथापरन्तपइत्यादावनुस्वारो

यथाप्रष्टादयःशब्दाःपुंयोगात्स्त्रियांवर्त्तन्तेप्रष्टीगणिकेतितथेहश्रीशब्दःपरित्यक्तस्वलिङ्गःक्लीबःसन्कुलेवर्त्ततेतत्रह्रस्वोनपुं
सकइतिह्रस्वःपुमन्तुन। अपवादेनास्याबाधात्। स्वमोर्नपुंसकादित्यमोलुक्। नचैवंगांमन्यतइत्यादावपिसुपोधातुप्रातिपदिकयोरि
तिलुक्स्यादितिवाच्यम्। अम्विधिसामर्थ्यादेवतद्बाधात्। श्रीशब्दस्येहक्लीबत्वेप्रमाणन्तुभाष्यमेवेतिदिक्। भूतेधात्वर्थस्यविशेषणमिद
म्। धातोरित्यधिकारात्। भूतार्थेविद्यमानाद्धातोरित्यर्थः। सोमेनेति। सोमेनलताविशेषेणयागङ्कृतवानित्यर्थः। अग्निष्टोमेनेति। अग्निष्टो
मसंस्थाकेनयागेनापूर्वंभावितवानित्यर्थः। उक्तञ्चकाशिकायाम्॥ ७ नस्यादितिस्पष्टंभाष्ये। यत्रप्रातिपदिकस्यैवलक्षणामानसिद्धात
त्रस्वलिङ्गत्यागोयत्रतुपदस्यलक्षणातत्रस्वलिङ्गात्यागइतिमर्यादेतिदिक्। वस्तुतउत्तरपदाधिकारेएषापरिभाषानास्तीत्युक्तिर्भाष्येउक्तिप्रयुक्तिक्र
मेणपूर्वपक्षिपरइतिस्पष्टन्तद्विदाम्। अतएवक्रियाद्याकार्यकालपक्षेपिनअन्तरङ्गपरिभाषाप्रवृत्तिरित्यस्यविसर्जनीयस्यसूत्रेभाष्येसिद्धान्तितत्वान्नेदंयुक्त
मित्यपास्तम्। पूर्वपक्ष्युक्तित्वेनेष्टापत्तेः। एवञ्चामोसिद्धत्वाल्लुगभावेश्रियंमन्यइत्येवात्रान्तरङ्गपरिभाषायाअप्रवृत्तौमानाभावादितिबोध्यम्॥ राम:
३४८

करणमितीति। यजेस्त्यागकरणकव्यापारे शक्तिस्तद्व्यापाररूपभावनायांभाव्याकाङ्क्षायांधात्वर्थस्यकरणत्वेनैवोपस्थितेः स्वतःपुरुषार्थत्वाभावाच्चसुखरूपः स्वर्गोभाव्यत्वे
नान्वेति। त्यागस्यकरणत्वञ्चभावनाभाव्यनिर्वर्त्तकत्वमेव। सर्वत्रकरणानामीदृशमेवकरणत्वम्। संस्थावचनस्यापिज्योतिष्टोमशब्दस्यतत्त्वारोपेणत्यागसामानाधिक
अग्निष्टोमः फलभावनायांकरणमिति। एतच्चभावकर्मप्रक्रियायामेवोपपादितम्। कुमार्गहनः। पितृव्यघातीति। अत्रकाशिका॥ कुत्सितग्रहणंकर्तव्यम्। इहमाभूत्। चोरंह
तवानिति। यद्यपीदंभाष्येनास्तितथापिशब्दशक्तिस्वाभाव्याल्लभ्यतइत्याहुः। चतुर्विधइति। अयमाशयः। इहसूत्रेश्रुतत्वात्पूर्वंब्रह्मादयउद्देश्याः ततोनन्तरंप्रकृतित्वाद्धन्तिः
ततः परिशेषाद्भूतइति। क्विप्सर्वान्तेनिर्देश्यः विधेयत्वात्। तदेवंवचनव्यक्तिः ब्रह्मादिषूपपदेषुहन्तेर्भूतेक्विबिति। एवंस्थितेयत्रैवकारस्ततोन्यत्रनियमइतिन्यायेननियमो
त्रभवन्अनन्तरेभवति। ततश्चब्रह्मादिष्वेवेत्यवधारणेहन्तेस्तदनन्तरंनिर्दिष्टत्वाद् उपपदान्तरसंबन्धनिवृत्तिफलोनियमोभवति। ब्रह्मादिषुहन्तेरेवभूतइतितुअनन्तरत्वा
विशेषेऽपिप्राप्यस्यादुपपदनियमः ब्रह्मादिषुहन्तेर्भूतएवक्विबितितुआनन्तर्याद् वृहन्त्योरपिविशिष्टोपिप्राधान्यात्प्रत्ययनियमः। ब्रह्मादिषुहन्तेर्भूतेक्विबेवेतिवचनव्यक्तौकाल
नियमः। सोयंप्रकृत्युपपदप्रत्ययकालनियमानांविवेकः। अगृह्यमाणविशेषत्वाद् चतुर्विधस्यापीहग्रहणम्। तत्रब्रह्मादिष्वेवहन्तेरितिप्रकृतिनियमेभूतइत्याश्रयणात्। काला
न्तरेउपपदान्तरेपिभवत्येव। पुरुषंहन्तिहनिष्यतिवापुरुषहाऽरिहयोरिहयोगविचक्षणः। ब्रह्मादिषुहन्तेरेवेत्युपपदनियमेपिभूतइत्याश्रयणात्। कालान्तरेधात्वन्तरादपिभव
त्येव। वृत्रंजयतिजेष्यतिवावृत्रजिदिति। भूतएवक्विबितिप्रत्ययनियमेपिब्रह्मादिष्वित्युक्तेः पुरुषहाअरिहेतिप्राग्वत्। भूतेक्विबेवेतिकालनियमेपिउपपदान्तरेभूतेपिप्रत्ययान्तरं
भवत्येव। पितृव्यंहतवान्पितृव्यघातीति। सोपपदश्चप्रत्ययोनियमेनव्यावर्त्यते। निष्ठातुभवत्येववृत्रंहतवानिति॥ रण्यात्करणत्वम्। स्वर्गादेः कर्मत्वमपिभाव्यत्वरूपमेव। नतुफ
लाश्रयत्वरूपम्। अतएवेदृशानांकामान्तपदेनैवोल्लेखइतिदिक्। लभ्यतइति। एवंकुमारशीर्षयोरितिसूत्रमपिकृत्स्नायामिति भूतइतिसूत्रेभाष्येध्वनितम्। ततः परिशेषादिति। तस्या
प्युद्देश्यत्वेनक्विपः पूर्वमेवनिवेशादितिभावः। इत्यवधारणेइति। इतिनियमेइत्यर्थः। कालनियमइति। आनन्तर्यादितिभावः। निष्ठात्विति। मध्येपवादन्यायेनतन्निवृत्तेरभावादितिभावः॥

प्रकृतिकालेति।तथाचभाष्यम्।उभयतोनियमोयंब्रह्मादिष्वेवेति।क्विबेवेति।क्विबिति।क्विबर्थस्तु क्विग्रहणेननिर्वाहस्यागतिकगतित्वात्विधायकत्वमेवैषांभाष्येतूदासीनमिति।अत्रैवं भाष्यकारस्तुप्रकृतिकालनियमावेवआशिश्रियत्।तस्यायमाशयः।धातुकालौहिनेहसूत्रेश्रुतौ।किंतुप्रकरणलक्षणजघन्यप्रमाणेनोपस्थितौ।अतस्तयोरेवउपरोधो न्याय्यः।नतूपपदप्रत्यययोः।श्रुतस्यापितत्वात्।एवंन्यायोपबृंहितेनभाष्येणसहविरोधात्वृत्तिमतमुपेक्ष्यमेवेतिकैयटेस्थितम्।यत्त्विहहरदत्तेनोक्तम्धातूपपदविषय नियमद्वयंभाष्येप्रदर्शितमिति।तत्रधातुकालविषयमितिवक्तव्येउपपदग्रहणंप्रामादिकमित्यवधेयम्।सुकर्म।त्रिविधइति।धातुनियमस्त्विहनेष्यतइतिभावः।सोमे सुञः।इहापिचतुर्विधोनियमइतिवृत्तिः।एवमुत्तरसूत्रेपि।कर्मण्यग्न्याख्यायाम्।श्येनचिदिति।समुदायोपमाहवनीयधारणार्थइष्टकानिर्मितस्थलविशेषेनिरूढः।दृशेः क्वनिप्।अन्येभ्योपिदृश्यन्तइतिसिद्धेनियमार्थमिदं।क्वनिबेवयथास्यात्।तत्र निर्दिष्टंमनिनादिसोपपदंचापादिमाभूदिति।निष्ठातुभवत्येवपरंदृष्टवानिति।एवंस्थितेवि श्वदृश्वनयनावयमेवेत्यादौविश्वंपश्यन्तीतिलटाविग्रहेपिनक्षतिः।प्रत्ययान्तरं नेवृत्त्यर्थंसूत्रमित्येववृत्तिकारादिभिर्व्याख्यातत्वात्।कालान्तरनिवृत्त्यर्थत्वस्यचाभियुक्तैरनु क्तत्वादितिदिक्।मन्दुरायामिति।वाजिशालातुमन्दुरेत्यमरः।पुमनुजेति।इहजनिःसकर्मकः।अनुरोधविशिष्टजननवृत्तित्वात्।अन्येष्वपिदृश्यन्ते।अपिशब्दइति।यत्तुअन्तात्य न्ताध्वेतिप्रकरणेअन्यत्रापिदृश्यतइत्युपसंख्यातंतद्भूतकालंविनापियथास्यादित्येवमर्थम्।वस्तुतस्तुप्रकृतसूत्रस्थस्यअपिग्रहणस्यसर्वोपाधिव्यभिचारार्थत्वात्तद्वार्तिकमनेनै वगतार्थंविभावितञ्चेदमिकोगुणवृद्धीतिसूत्रेजनेर्डप्रकरणेगमेरप्यपण्डेवक्तव्यइतिवदताभाष्यकारेण।एवञ्चप्रकृतसूत्रस्थमन्येभ्योपिदृश्यतइतिवार्तिकमपिगतार्थं बोध्यम्।निष्ठायामण्यदर्थे।भावकर्मणोरिति।यद्यपियाज्याक्रमित्यादौकरणादपिबाहुलकाण्ण्यद्भवतितथापितयोरेवेतिवचनाद्भावकर्मणोरेवसाधुत्वात्तदुपात्तोऽर्थइतिस एवेहविवक्षितइतिभावः।क्षियेक्षिनिवासगत्योःद्वयोरपिग्रहणम्।क्षितःकामइति।अन्तर्भावितण्यर्थात्कर्मणिक्तः।एतच्चअक्षितोतिसनेदिममितिमन्त्रव्याख्यायां माधवग्रन्थेस्पष्टम् ॥ ७ वेति।अन्येष्वपीतिसूत्रेण।द्वयोरपीति।क्षीहिंसायामित्यस्यापिग्रहणंबोध्यम् ॥

न निष्ठेति। एकदेशत्वादिति भावः। द्वाविंशतिरिति। यद्यपि गृ घ इत्येतावपि तत्र दृश्येते तथाप्येकीयमतत्वादिति भावः। रदाभ्यामित्यनेनैव तत्र सिद्धिरित्यन्ये। पुनातेरिति। पूत इत्यर्थः। कप्रत्यये चेति। भावे तु स्तितङ्गामेनेत्युदाहार्य्यम्। रदाभ्याम्। दृहरदाभ्यामित्यनेन तकारो विशेष्यते न निष्ठातेन चरितं मुदित— मित्यत्र न। तकारस्येटा व्यवहितत्वात्। तदेतदाह। परस्य निष्ठातस्येति। एकविंशतेरिति। क्र्यादिषु ल्वाद्यो द्वाविंशतिः। तन्मध्ये पूञं विहाय ल्वादयो ज्ञेयाः। जीन इति। सिद्धत्वान्नित्यत्वाच्च संप्रसारणे कृते संयोगादेरित्यस्याप्राप्तिः। गून इति। गु पुरीषोत्सर्गे। विनष्ट इति। धातूनामनेकार्थत्वात् लुनातेर्विनाशे वृत्तिः। क्षिणो ग्रास इति। पिण्डीक्रियमाणो ग्रासो यदा दध्यादिव्यञ्जनवशाद्दुस्थनेनुकूलो भवति तदा कर्मणः स्वचकर्त्तृत्वं बोध्यम्। यस्य विभाषा। यस्येत्यार्द्धधातुकापेक्षया षष्ठी यदीयस्यार्द्धधातुकस्येत्यर्थः। उदक्तमिति। उत्क्षिप्तमित्यर्थः। द्यून इति। क्षीण इत्यर्थः। द्यूतमिति। विजिगीषया हि तत्राक्षाः पात्यन्त इति गम्यते विजिगीषा। क्षीबादिष्विति। क्षीबृ मदे। कृश तनुत्वे। लाघृ शक्तौ उत्पूर्वः। एभ्यः क्तः। ननु फुल्ल विकसने ऽस्मात् उल्लाघेश्च पचाद्यचि इतराभ्यामिगुपधलक्षणे कप्रत्यये च फुल्लादयः सिद्ध्यन्ति तत्किं सूत्रेणेत्यत आह। सूत्रितन्त्विति। निर्वृत्त्यर्थमित्युपलक्षणं फुल्लवानिति रूपस्य निष्ठा च द्व्यजनात् इति स्वरस्य च सिद्ध्यर्थमिति बोध्यम्। वेत्तेस्त्विति। तथा च भाष्यम्। वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते। वत्तेर्विन्नश्च वित्तश्च भोगे वित्तश्च विन्दतेरिति। पूर्त्त इति। श्र्युकः कितीति नेट्। र्त्त इति। आदितश्चेति। मत्त इति। श्वीदित इति। भुज्यत इति भोगः प्रतीयत इति प्रत्यय इति। कर्मसाधनावेताविति आचष्टे। भोग्ये प्रतीते चेति। भित्तं शकलम्। भिदेः क्तेन त्वाभावो निपात्यते। भित्तं शकलखण्डे इत्यमरः। भिन्नमन्यदिति। विदीर्णमित्यर्थः। ऋणमाधमर्ण्ये। अधमं दुःखप्रदमृणं यस्य सोऽधमर्णस्तस्य भाव आधमर्ण्यम्। तेन च व्यवहारविशेषो लक्ष्यते। तेनोत्तमर्णोऽपि सिद्ध्यति। धातोरुत्तमर्ण इति निर्देशश्चेह लिङ्गम्। स्फायः स्फी। कथन्तर्हि स्फीतिकाम इति। स्फात इति प्रसिद्धिः स्फीतिः। आख्यानण्यन्तादच्ईः। यस्येति। निरः कुष इति विकल्पितेट्त्वादिति भावः। उषित इति। यजादित्वात् संप्रसारणम्। शासिवसीति षः। क्षुधित इति। एवञ्च तस्यालमेषा क्षुधितस्येति प्रयोगमुट्टङ्क्य क्षुधे भावे क्विपि तारकादित्वादितजिति यद्वा तु वृत्तिपूर्वकन्न इष्येवा। समानन्यायतया कुपितादावुपयोस्यत इति भावो बोध्यम्। अञ्चेः उदित्वात् क्त्वायां विकल्पे प्राप्ते निष्ठायां प्रस्य विभाषेति वचनम्। अञ्चित इति। नाञ्चेः पूजायामिति नलोपनिषेधः। लुभः। तीषसहेति। क्त्वायां विकल्पो निष्ठायां निषेधे च प्राप्ते वचनम्। पूङश्च। श्र्युकः कितीति निषेधे प्राप्ते वचनम्। पूङः क्त्वा च। उत्तरार्थमिति ॥ ५५ भावे घञर्थकप्रत्यये चेत्यपि बोध्यम्। रूपस्येति। इदं वृत्तिकारोक्तेरभिप्रायेण। भाष्यमिति। वित्तो भोगे इति सूत्र इति शेषः। आदितश्चेनीत्यस्य निडिति शेषः ॥

अन्यथेति।यद्यपिकर्त्तासिद्धस्तथापितद्गतनिमित्तत्वस्यविधेयत्वेनविशेषविहितेनकर्त्तृगतनिमित्तत्वेनभावकर्म्मगतङ्क्निरूपितंनिमित्तत्वंबाध्यतइतिभावः।विकल्पेप्राप्तेइति।धृषेरादि
दृहतुनत्कासेडित्वेनसिद्धमितिभावः।स्कैवेति।नतुनिष्ठा।चानुकृष्टत्वादितिभावः।शेश्वियतइति।एरनेकाचइतियण्।चादिति।अन्यथातक्रकौण्डिन्यन्यायेनबाधः
स्यादितिभावः।स्वादिरिति।स्नेहनमोचनयोरितिपठितः।स्विद्यतेस्विति।गात्रप्रक्षरणेपठितस्य।नचायमपिञीदितिवाच्यम्।हरदत्तग्रन्थविरोधादितिभावः।अत्रहरद
त्तः।ञिष्विदास्नेहनमोचनयोरितिदिवादिर्गृह्यतेनतुञिक्ष्विदाअव्यक्तेशब्दइतिभ्वादिरपिमिदिनासाहचर्यादित्याह।तच्चिन्त्यम्।भ्वादिष्वपिमिदेःपठ्यमानत्वात्।तस्माद
विशेषादुभयोर्ग्रहणंन्याय्यम्।तदेतदाह॥दिवादौभ्वादौचेति।स्विदादीनामादितश्चेतिनिषेधात्सेण्निष्ठा।दुर्लभेसतुआदिकर्म्मणिनिष्ठोदाहृता।क्षुब्धस्वान्त।अनायाससाध्य
इति।क्षुण्णमौषधजातमुष्णोदकेप्रक्षिप्यसद्योभिमृत्यंपूतायत्पीयतेतत्स्फाण्टमित्याहुः।वेदभाष्यइति।तद्वैनवनीतंभवतिघृतंवैदेवानांफाण्टंमनुष्याणामितिशतपथश्रुते
ध्योरस्यायामित्यर्थः।अन्यत्रेति।मन्थादेरवाच्यइत्यर्थः।वाहितमिति।बाह्यप्रयत्ने।धृषिशसीवैयात्ये।विरुद्धंयातोवियातःअविनीतःतस्यभावोवैयात्यम्।नियमार्थश्चेदंवचनम्।
ञिधृषाप्रागल्भ्ये।शसुहिंसायां।अनयोरादितश्च यस्यविभाषेतिसूत्राभ्यामिट्प्रतिषेधसिद्धेः।तदेतदाह।अविनयएवेति।नास्तीति।अनभिधानादितिभावः।अत्रप्रमाणमाह।अ
तएवेति।अतएवनियमार्थमिदंसूत्रमितिवृत्तिः।अन्यथाविभाषाभावादिकर्म्मणोरितिविकल्पेप्राप्तेनित्यार्थंस्यादितिभावः।माधवस्त्विति।एवंहरदत्तोक्तंचिन्त्यमुद्धृतमितिभा
वः।दृढस्थूला।बलमस्यास्तीतिबलः।अर्शआद्यच्।तदाह।बलवतीति।तस्येति।तकारस्येत्यर्थः।हस्येति।ननुहोढइतिढत्वेढोढेलोपेनैवसिद्धमितिचेत्।मैवम्।तथाहिसतिढ
लोपस्यासिद्धत्वेनद्रढिमेत्यत्ररऋतोहलादेर्लघोरितिरभावोनस्यात्।परिदृढय्यगतइत्यत्रल्यपिलघुपूर्वादितिअयादेशोनस्यात्।परिदृढस्यापत्यंपारिदृढीकन्येत्य
त्रगुरूपोत्तमलक्षणःष्यङ्स्यात्।अतोऽसिद्धत्वनिवृत्तयेहलोपोनिपात्यतइतिभाष्यादौस्थितम्।अतएवढ्लोपइतिसूत्रेअणःकिंदढइतिप्राचोग्रन्थस्थप्रामादिकताम
वोचाम॥ ५) त्वादितिभावः।चिन्त्यमसुहैयमिति।अवैयात्येभावादावादिफलस्यसत्त्वादितिभावः।होढइतिढत्वेइति।घत्वाभावमात्रंनिपात्यतामितिभावः॥

धातुविशेषणार्थ इति। श्यन्निर्देशस्तु धातुविशेषणत्वार्थ इति भावः। अभ्युपेत्येति। श्तिपं विनापि संयेत्यादेशोपानिर्देशावलम्ब्यनानिर्देशस्य कर्त्तृशब्दतेनाश्तिपनिर्देशादिङभावमभ्यु
पगमो। निपातनमिति। हलोपे प्रयोजनमिति। [illegible] कृच्छ्र गहनयोः कषः। कृच्छ्रं दुःखं तत्कारणं [illegible] तीव्र इति हिंस्रः। कृष्टो मोह इति। दुःखहेतुरित्यर्थः। अभेः।
अविदूरस्य भावः आविदूर्यं ब्राह्मणादित्वात् ष्यञ्। [illegible] निर्देशान्न [illegible] पूर्वादिति निषेधो न भवति। सामीप्य इत्येतत्तु नोक्तम्। नातिदूरस्यासन्नस्याप्येतेः। तदेतद्ध्वनयन्ना
चष्टे। नातिदूरमासन्नञ्चेति। एवञ्च सामीप्य इति व्याख्याने [illegible] प्राचीनोक्तं नेति भावः। णेः। आधीयत इत्यध्यापनम्। बहुलवचनात् [illegible] त्वादाक्काशमुदस्तु उपशमो पुरी
आप्यायने दिवादिः श्चुरादिश्च। दसु उपक्षये। स्वशब्दोपताप अपवारणे ज्ञापि मित्त्वञ्चायामुक्तः। रुष्यमत्वरेति अन्तीमस्त इति विकल्पि[illegible]त्वात् पश्यविभाषेति निषे
धे विधीयते। अमगत्यादिषु। अमरोगे इति चौरादिकस्तु न गृह्यते। एकाच इत्ये एकारादित्वात्। नूणं इति। [illegible] ज्वरत्वरूठ। आदितश्चेति निषेधे प्राप्ते विकल्पः। आ
दित्त्वस्य फलन्तु आत्मनेपदमात्रमाप्तदेतदाह। फलमन्यदिति। तथाच एधत्यादिवत् हस्तान्तवत्त्वमेव [illegible] मिति भावः। संघुष्ट इति। आदितश्चेति सपूर्वस्य परत्वाद य
विकल्पस्यैव। आस्वान्त इति। आङ्पूर्वस्य स्वनेर्मनो [illegible] आनेप्यन्मेव विकल्पो परत्वात्। प्रह्लन इति। ह्लादो सुखे च। इदित्त्वान्नेदानीमिति स्यति। श्तिपा निर्देशो धातुविशेषणा
र्थः। नहि तेन विना श्यन सुलभः। यत्तु प्रसादकृतोक्तं श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः। दाटन्तः [illegible] न इति। तन्न। यङ्लुकि दोदाभाव्य [illegible] तिन इति। तत्रेति। कि
तीति वचनान्नास्ति प्रसङ्गः। अभ्युपेत्य ब्रूमः। दो दद्घोरिति विधीयमान आदेशः अनेकालत्वात्सर्वस्येति निर्दिश्यादस्यात्। तथा च साभ्यासस्य प्रवर्तेत। न हि [illegible] यङ्लुगन्तस्यैव [illegible]।
तथा च दादन्त इति बदुदाहृतं रूपं कथमुक्तिसंगत [illegible] भेनादधातेर्हिः। श्तिपा निर्देशो धेटो निवृत्त्यर्थः। तीन नुत [illegible] यङ्लुकि नादा [illegible]। आत्मा [illegible] दकृता श्तिपा निर्दे
शस्य यङ्लुङ्निवृत्त्यर्थत्वाद्दधीत इति पुमाम्ये [illegible] मुदाहृतन्तत्सूर्वव देवहेयमादोदद्धोः। दद्ध आदेशस्यान्तरएव न नु तदधान्तः। संहितायां [illegible] यापि प्रक्रियायां दोषा
दिनिप्राञ्चः ॥ ७ पेत्येत्यर्थः। साभ्यासस्येति। एतच्च माधवीये स्थितिबोध्यम् ॥

[illegible] स्यादित्यपाम्सम्।विवक्षितेति।[illegible] सत्प्रयोगादिति भावः।भाजनम्।[illegible]

३५१ तथा चाहुः।तान्ते दोषो दीर्घत्वं स्यादान्ते दोषो निष्ठानत्वम्।धान्ते दोषो धत्वाख्यः स्थान्ते दोषत्वात्स्थान्तो ग्राह्यइति।तदनुसारेणाह।दथ्स्थादिति।वस्तुतस्तु सर्वपक्षा
इहसूपधादाइत्याह।तान्तो वेत्यादिना।अत्र उपसर्गान्तः।अचइत्यावर्त्तते।तत्रैकं पञ्चम्यन्तमुपसर्गं विशिनष्टि।अपरं षष्ठ्यन्तं स्थानिलाभायेति व्याचष्टे।अजन्तादि
त्यादिना।यद्वा दितकारको यमादेशः।तेनानेकाल्त्वात्सर्वस्य घोर्भविष्यति।अचइतितु अनावृत्तं पञ्चम्यन्तमेवास्तु।न चैवं अपो भीत्युत्तरसूत्रेपि सर्वादेशत्वापत्तिः।
अचइत्यनुवर्त्त्य अचः परस्य यकारस्यादेशविधानेन तत्रान्त्यस्य संयोगान्तलोपे पूर्वस्य जश्त्वे रूपसिद्धेः।अवदत्तमिति।आदिकर्मणीत्येतत्सूत्रदत्तमित्यस्यैव विशेषणम्।धीतमि
मिति।दधातेर्हिरित्यत्र श्नुविकरणस्य निर्देशाद्धेटो हिर्न।नापि दत्।तद्धि धौदे इत्युपादानादिति भावः।अरो झरीति।अनेन पाक्षिको धलोपइत्यर्थः।प्रकृतइति।कर्त्तुमा
रब्धवानित्यर्थः।नदीष्णइति नदीस्नाने कुशलइत्यर्थः।गङ्गां प्राप्तइति।प्रपूर्व आप्लृव्याप्तौ।प्राप्तिरपीह सूत्रे गतिशब्देन विवक्षितेति भावः।उपोषितइति।वसतिक्षुधो
रिडितीट्।शाशिवसीति षः।मुकुन्दस्येति।आस्यतेऽस्मिन्नित्यासितं आसनमित्यर्थः।यायतेऽस्मिन्निति यातं मार्गः।भुज्यतेऽस्मिन्निति भुक्तम्। भाजनम्।अधिकरणवाचि
नश्चेति त्रिष्वपि कर्त्तरि षष्ठी।स्विण्णः।इड्ढइति।आदितश्च।श्वीदितइति नेट्।इष्टइति।तीषसहेति वेट्। क्त्वाद्यस्य विभाषेति नेट्।सुयजोर्ङ्वनिप्।इह सुसृगतौ।षुप्रसवै
श्वर्ययोरिति निरनुबन्धकयोर्ग्रहणं प्राप्तमनभिधानादुभयपदिना साहचर्याद्वा न भवतीत्याह।सुनोतेरिति।ङकारः सुनोतेर्गुणप्रतिषेधार्थः यकारः स्वरार्थस्तुग
र्थश्च।छन्दसि लिडिति सूत्रस्यार्थमाह।भूतसामान्येइति।नच छन्दसि लुङ्लङ्लिटइत्यनेनैव गतार्थता।धातुसंबन्धइत्यधिकारे स विधिः।इदन्तु धातुसंबं
न्धं विनापि भवतीति विशेषात्।त्रिमुनिमतमिति सूत्रकृता छन्दसीति प्रक्रान्तत्वादुत्तरसूत्रे भाषाग्रहणाच्च ॥७॥ इदंत्विति।नचानेन सिद्धे तत्रातिङ्ग्रहणं व्यर्थं रामः
लुङ्लङ्भ्यां बाधापत्तेः अनुबन्धातिरिक्तकृतोपदेशिकासरूपत्वस्यैव वासरूपसूत्रे ग्रहणेन तस्येहाप्रवृत्तेरत एव लिटा लुङ् बाध्यत इति दिक् ॥ ३५१

सिद्धान्तितत्वादिति। आरिवानित्यादौ गुणस्तु ऋच्छत्यृतामित्यत्र ऋकारप्रश्लेषेण ऋधातोः पुनर्विधानाद्बोध्यः। हरदत्तेत्यादि। अत्रारुचिबीजन्तु विभाषापूर्वाह्णेति सूत्रे भाष्ये पपुष आगतं पपिवद्रूप्यमिति लौकिकविग्रहे क्वसुप्रयोगात् लोकेपि क्वसुः। उक्तभाष्यप्रामाण्यात्संयोगान्तेभ्यश्छन्दस्येव क्वसुः कानच् तु छन्दस्येव। उत्तरसूत्रे तेभ्योन्यत्र क्वचिदेवेत्यर्थज्ञापनार्थमिति। गतानुगतिकतयेति। गतमनुलक्षीकृत्य गतिर्यस्य तत्त्वेनेत्यर्थः। द्वित्वाभावादिति। आदिनेड्भावदीर्घठत्वानि। अयं हि ग्रन्थोपि क्वसोर्लोभाष्यवार्त्तिकयोरपि क्वसुकानचोश्छन्दस्युभयथेति वचनात्सार्वधातुकत्वेन सार्वधातुकमपिदिति ङित्त्वादेव आजिवानित्यादौ नलोपादीनां ङित्कार्याणामन्यथासिद्धिमाशङ्क्य तितीर्वान् तितिराण इत्यादौ ऋच्छत्यृतामिति प्राप्तस्य गुणस्य बाधनार्थं ङित्करणमिति सिद्धान्तितत्वात्। अत एव कित्करणसामर्थ्याद्भाषायामपि क्वसुकानचौ स्त इति केषाञ्चिदुत्प्रेक्षानादर्तव्येति हरदत्तमाधवादिग्रन्थस्वरसमिति भावः। कवयस्त्विति। गतानुगतिकयेति भावः। अत्र प्राचा दाश्वान् साह्वान् मीढ्वांश्चेति सूत्रमुपन्यस्तम्। तच्च यद्यपि छन्दसि भाषायाञ्चाविशेषेण वर्त्तत इति रत्नादौ स्थितं तथापीहोपेक्षितम्। छन्दस्येव प्राचुर्येण दाश्वानित्यादिप्रयोगाणामुपलम्भात्। उक्तसूत्रस्य द्वित्वाभावादिनिपातनमात्रोपक्षीणत्वात् क्वसोश्छान्दसताया निर्णीतत्वात्। अनेनैव क्वसोरपि विधाने गौरवात्। यदाहुः। अल्पार्थविधिस्तन्तुः शक्तो नानेकार्थविधिक्षम इति। अत एव हि तत्सूत्रमनावश्यकम्। तथाच पदकाराः। साह्वान् विश्वा इति मन्त्रे साह्वानिति ह्रस्वञ्चिच्छिदुरिति दिक्। उपेयिवाननाश्वान्॥ इडिति। वलादिलक्षण एवेट् नेड्वशि कृतीति प्रतिषिद्धः क्रादिनियमात्प्राप्तः वस्वेकाजाद्घसामिति सूत्रेण कृतद्वित्वानामेकाचामादन्तानां घसेश्च वसोरिट् स्यान्नान्येषामिति नियच्छता प्रतिषिद्धः। के प्रवृत्तौ साधक इति बोध्यम्। दिगिति। दिगर्थस्तु पदविभागस्यापि लौकिकत्वात्तत्र दीर्घस्यौचित्येपि तदभावात्पृषोदरादित्वस्यावश्यकत्वेन तेनैव सर्वसिद्धाविदं व्यर्थमिति। वस्तुतो न लक्षणेन पदकारा अनुवर्त्या इति न्यायेन तथा पदपाठो भ्रान्त्यैवेति बोध्यम्। नेड्वशीति इदमेकाच उपदेश इत्यस्याप्युपलक्षणम् ॥

इति पक्षे इति। अत्रारुचिबीजन्तु ईयतुरित्यादौ च गादेशस्य सावकाशः अचः परस्मिन्निति पूर्वस्यैव विधौ न पूर्वपरविधौ। एवञ्च सवर्णदीर्घे कृते कादिनियमादिटि कृते दीर्घस्य यादे
शो निपातनादिति बोध्यम्। नेनेति। अकृतव्यूहपरिभाषयेति भावः। वस्तुतस्त्वपि न क्ङितीति निरूपितम्। व्याख्यानमेवेति। अत एवैकादिष्टत्वाई ईयुप्भवतीति भाष्ये दीर्घोच्चारणम
सम्भिश्चेति बोध्यम्। सामानाधिकरण्यमिति। अप्रथमान्तेनेत्यादिः। आदेशयोरिति तिङ्रूपादेशोपस्थापककर्तृकर्मणोरप्रथमान्तसामानाधिकरण्याभावादाह शतृशानचोरिति। त
नियत्वात् हि त्वे कृते नेकाचूत्वात् न च सवर्णदीर्घे णेकाचूत्वं दीर्घ इणः किति निर्दीर्घे कृते न तत्सामर्थ्यात्सवर्णदीर्घाभाव इति पक्षाश्रयणात् तस्येदं इह प्रतिप्रसूयते नापूर्वो
विधीयते। तेन संप्रसारणविषये न भवति। अत एवोदाहरति। उपेयुष इति। अविनस्तिनमिति। व्याख्यानमेवात्र शरणम्। वचेः कर्त्तरीति। न तु भावकर्मणोः। एतच्च नि
पातनाल्लभ्यम्। लटः शतृशानचौ। सामानाधिकरण्ये सतीति। यद्यपि केवलस्य लटः प्रयोगाभावात् सामानाधिकरण्यं दुर्लभम्। तथापि आदेशयोः शतृशानचोस्तद्
द्वारा स्यान्निरूपितत्वं कल्प्यते। पचन्तमिति। विक्लृत्त्यनुकूलवर्त्तमानव्यापाराश्रयमित्यर्थः। पचतीति विग्रहप्रदर्शनन्तु ईषत्साम्येन। क्रियाप्रधानमाख्यातं सत्त्वप्रधा
नानि नामानीति सिद्धान्तात्। आने मुक्। अतो येय इति सूत्रादनुवृत्तं पञ्चम्यन्तमपि अत इति पदं षष्ठ्या विपरिणम्यते। आन इति सप्तमीबलात्। न च विपरीतं शङ्क्यं प्र
त्ययस्याः पूर्वसूत्रे चरितार्थत्वात्। सप्तम्याश्चाचरितार्थत्वात्। तदेतदाह। अङ्गस्यात इति। ननु प्राचा अदन्ताङ्गस्येति व्याख्यातं तन्न। पचमान इत्यादौ अदुपदेशात् लसार्व
धातुकमनुदात्तमिति शानचः स्वरस्यासिद्धिप्रसङ्गात्। तत्पक्षे हि अङ्गभक्तो मुक् स च तदेव न व्यवदध्यात्। तदवयवमकारन्तु व्यवदध्यादेवस्वरस्यैतदाकरे। लडिति। य
द्यपि प्रथमान्तं प्रकृतं तथापि षष्ठ्या विपरिणम्यत इति भावः। पुनरिति। एवं हि पुनर्विधिः सम्पद्यते। स च प्रथमेनाप्राप्ते पि क्वचित्स्यादित्यर्थ इति भावः ॥ तस्यानि लकारे प्रकृत्यर्थश्च
निप्रधानभूतकर्त्राद्यभिधायकत्वमेव कल्प्यते। एवञ्च कल्पितसामानाधिकरण्यानुवादेन शत्रादिविधिरिति भावः। इति सिद्धान्तादिति। वस्तुतो विग्रहे तस्यानुसार्येव विशेष्यविशेषण
भावः क्रियाप्रधानमिति तु लोकेऽर्थबोधाय प्रयुज्यमानाख्यातविषयमेवेति निरूपितम्। व्यवदध्यादेवेति। स्वरोद्देश्यकविधेरभावात् हल्स्वरप्राप्तेरभावाच्च नस्य ज्ञनस्याविद्यमानवत्त्वस्
एवं हि पुनरिति। इदं वृत्त्यनुसारि। भाष्ये तु तदभावे प्रत्ययान्तरत्वमेव स्यादेवञ्च कर्मणि शानज् न स्यात् अतो लटः शतृशानचाविति योगविभागेनायमर्थः साध्य इत्युक्तम् ॥

अनुबन्धग्रहणेति।एकानुबन्धकेत्यस्याप्युपलक्षणम्।नवितिति।लट इति निवृत्तेरिति भावः।वासरूपन्यायेनेति।न त्वभिन्नार्थत्वादनयोर्न तिङपवादत्वन्तिङि हि संख्याद्युपस्थापकार्थोपि
भास्तेन कृतीति वाच्यम्।शुभ्रादार्थस्य समभिव्याहृतपदेन संख्यायास्तु तत्सुपा प्रतीत्याः विशेषादिति भावः।लादेशे विति।प्रत्ययविषयत्वात्तस्यादेशोऽप्रवृत्तेरिति भावः।अ
प्रथमेति।उपलक्षणमिदम्।प्रथमान्तेन सामानाधिकरण्याभावेपीत्यर्थः।तेन कुर्वतोऽपत्यङ्कौर्वतः।कुर्वतो भक्तिः कुर्वद्भक्तिः।कुर्वाणभक्तिरिति प्रत्ययोत्तरपदयोरपि
सिध्यति।विदेः शतुर्वसुः।स्थानिवत्त्वादेव सिद्धे वसोरुगित्करणं वसोः संप्रसारणमित्यत्र क्वसोरपि सामान्यग्रहणार्थम्।अनुबन्धग्रहणपरिभाषापि तत्सामर्थ्यादेव न
प्रवर्तते।पूङ्यजोः।ण्वुलादिवत्स्वतन्त्रोयन्तु शानजादिवल्लादेशस्य प्राहि सति वेति वाच्यं स्यात्।पचते यजते इति तिङोपि स्युः।न च वासरूपन्यायेन निर्वाहः।लादेशे
पुनद्भावस्याकारे स्थितत्वात्।किंच लादेशत्वे भावकर्मणोरपि स्यात्।कर्त्तर्येव चेष्यते।एवञ्चानशः वक्ष्यमाणशतुश्च स्थानत्वं बोध्यम्।यत्तु शानन्नो लादेशत्वे सार्वधातु
कानुदात्तत्वं स्यादिति वदन्ति तच्चिन्त्यम्।नितरां स्वजागरूकत्वात्।अनुदात्तत्वे दृशापत्तेश्चेत्यास्तान्तावत्। नन्वेषां लादेशत्वाभावे सोमं पवमान इत्यादौ कर्मणि षष्ठी
स्यादित्याशङ्क्य नेत्येवम्।न लोकेति सूत्रे तृन्निति प्रत्याहारनिर्देशस्य कृतत्वात्।ताच्छील्य चानशो लादेशत्वाभावेन अनात्मनेपदत्वात्स्वरसोपदिश्योपि विधानमिति ध्वनयन्नु
दाहरति।शत्रुं निघ्नान इति।सुञो यज्ञसंयोगे।सुनोतेः शतृप्रत्ययः स्यात्।यज्ञेन संयुज्यमाने रत्तिश्चेत्।नन्विह सुञोपसंरेदृत्येवास्तु यज्ञविषयकश्चेत्सुनोत्यर्थ इति व्याख्यायतु
रं सुनोतीत्यादेर्व्यावर्त्तयितुं शक्यत्वात्।अत्राहुः।संयोगग्रहणं प्रधानकर्तृसंप्रत्ययार्थम्।तेन यजमानादन्यत्र न भवतीति एवञ्चाप्रधाने कर्तरि लटः शतृशानचाविति सनेनापि
न भवति।संयोगग्रहणसामर्थ्यादिति हरदत्तः।यः सुन्वन्तमवतीत्यादिनामेकवचनान्तानामधिकारिपरत्वे निर्बाधनम्।बहुवचनान्तानान्तु स्थलविशेष एव संभवतीति
दर्शयितुमुदाहरति।सर्वे सुन्वन्त इति।तद्याचष्टे सर्वे इत्यादिना।अर्हः।प्रशंसायाङ्कृम्।अर्हतीति चोरो वधम्।आकेः।शीलादीनान्त्रयाणां विशेषणं समर्थयितुं निर्दिष्टेस्मिन्निः।त
कद्वैः प्रकृतिभूतधात्वर्थो निर्दिश्यते ॥ ७) बन्धग्रहणपरिभाषेति।एकानुबन्धकपरिभाषेत्यर्थः।स्थानत्रमिति।लट इत्यस्य निवृत्तेरिति भावः।यज्ञेन संप्रयुज्यमाने इति।कर्त्तरि रा

त्रंत्वस्येति शेषः।अप्रधाने कर्तरि स्युः।अधिकारीति।य
जमानेत्यर्थः ॥

म·श
३५३

इत्येवेति। एवञ्चपाठेनेत्यर्थः। प्रत्ययमाहुरिति। अत्रारुचिर्बीजन्तूदान्तपाठस्यबहुसंमतत्वाभावः। साहचर्याच्चेति। पिशुणकर्मकाणामितिभाष्योक्तेः। ———— सक
र्मकाश्चेत्यपिबोध्यम्। इतिविशेष इति। नचतच्छीलादिषुतद्बाधकः। वासरूपन्यायेनसिद्धेरितिभावः। ण्यन्तस्यचेतिपूर्वसूत्रस्थप्रत्ययान्तसाहचर्यान्नतुदेवतेरित्यभावः। नसिध्येदिति। नचतत्रेति
अलङ्कृञानिराकृञ्इतिकरोतेर्ग्रहणात्प्रसिद्धेर्नहिंसार्थस्य। इहपच्यादयस्त्रयउत्पूर्वाः पठ्यन्ते। तत्रोदः पचपतमदइत्येववक्तव्येप्रत्येकमुत्पूर्वस्यपाठउपसर्गान्तरनिवृत्त्यर्थः। तेन
समुत्पतिष्णुरितिनभवतीत्याहुः। इहपचेरनन्तरंपतिस्तोत्रःपठ्यतेतथाचभट्टिः। उत्पतिष्णुसहिष्णूचचेरतुः खरदूषणावितिकालिदासोपि। सस्त्रम्भुरभ्रसुष्णानामेलानामुत्पतिष्ण
ष्णु[illegible]केचित्तुउत्पतस्यस्थानेसंपठित्वापदगतावित्यस्मात्प्रत्ययमाहुः। पारयिष्णवइति। अयामन्ताल्वाय्येत्न्यःनैतदिति। चकारस्यानुक्तसमुच्चयार्थत्वमित्यर्थः। गकारेति। नन्वेवङ्कारच
तेनासिद्धत्वाहशिवेस्तुत्वंस्यादितिचेत्सत्यम्। सौत्रोयंनिर्देशः। तथाचवार्त्तिकम्। स्नोर्गित्वान्नस्थईकारः क्ङितोरीत्वशासनात्। गुणाभावस्त्रिषुस्मार्यः श्र्युकोऽनिट्त्वङ्गकोरितोरिति। त्र
सि। त्रस्नुरेति। नेड्वशीतिनेट्। शमित्यष्टाभ्यः। इतिशब्दआद्यर्थः। संपृचापरिदेवीतिदेवेरेवनेभ्वादिः। ण्यन्तस्यदीव्यतेस्तुनेहग्रहणम्। लाक्षणिकत्वात्। अण्यन्तैःसाहचर्याच्च। वौकष। कष
हिंसार्थः। लसश्लेषणक्रीडनयोः। कत्थश्लाघायाम्। स्रम्भुविश्वासे। अपेचलषः। लषकान्तौ। प्रमाथीति। मन्थविलोडने। निन्दहिंसा इहसूत्रेविनाशेतिविपूर्वस्यनशेर्ण्यन्तस्यभाविना
णिलोपेननिर्देशः। अकारस्त्वागन्तुकः। केचित्तुविनाशीतिण्यन्तमेवपठन्ति। परिवादीतुवदेर्ण्यन्तपाठेनिर्विवादएव। असूयतिः कण्ड्वादियगन्तः। निन्दादीनामसूयान्तानांसमा
हारद्वन्द्वेसौत्रंपुंस्त्वम्। स्यादेतत्। असूयतेरेववुञ्विधेयोनेतरेभ्यः। निन्दादीनाण्वुलैवसिद्धेः। नहितत्रलित्स्वरञित्स्वरयोर्विशेषोस्ति। उभयथाप्याद्युदात्तत्वात्। असूयतेस्तुण्वुलि
तिप्रत्ययात्पूर्वमुदात्तंवुञितुआदिरुदात्तइतिविशेषः। तत्राह। ण्वुलिनीति। तृजादयोनेति। नकेवलंण्वुल्विषयमेवज्ञापकङ्किन्तुप्रत्ययमात्रविषयकमित्यर्थः। देविक्रुशोः। दीप्यतेर्हेतुमण्य
न्तस्यदिवुकूजनेइत्यस्यचुरादिण्यन्तस्यचग्रहणम्। शब्दनइति। शब्दशब्दनेचुरादिः। अनुदात्तेतश्चहलादेः। आदिग्रहणाभावेहलन्तादित्यर्थःस्यात्। ततश्चजुगुप्सनइत्यादिनसिद्ध्येत्।
अस्मिन्नेहानुदात्तेत्त्वम्। गुपादिष्ववयवेषुअचरितार्थस्यानुबन्धस्यसमुदायविशेषकत्वात्। जुचङ्क्रम्यक्रमिद्रमीयङन्तौ॥ ॐ तिसुरित्यादिवत्स्वरत्वादुः प्राप्नोतीतिवाच्यंएधादिभ्योयुजभावस्य

फलस्यसत्त्वेनाक्षतेः। मूलन्तुवृत्त्यनुरोधेनचेनानुक्तस
मुच्चयार्थेनजुगुप्सनादेरपिजिलन्ये ॥

राम:
३५३

यथाश्रुतभाष्यमिति।भवतिहिरेणयुचःसमावेशइतिहिभाष्येउक्तम्।त्रयाणामेवेति।त्रयाणामपीत्यर्थः।व्याख्यानादितिरूढिप्रकारस्ताच्छीलिकाइत्याढ्येतिसूत्रेभाष्योक्तेरितिभावः ॥ परस्परमिति।निन्दादिसूत्रेहितच्छीलादिषुवासरूपविधिनातृजादयोनेतिज्ञापितमिहतुताच्छीलिकेषुपरस्परंवासरूपविधिर्नेतिविवेकइतिभावः।नयः।अयमयतयनयगतावितिपठितस्यनयतेर्नायंनिर्देशः।अनुदात्तेत्त्वादेवयुचःसिद्धत्वात्।किंतुनेतिपृथक्पदमितिमत्वाह।यकारान्तादिति।क्नूयिता।क्ष्मायितेति।क्नूयीशब्दे।क्ष्मायीविधूनने।सूददीपदीक्षश्च।ताच्छीलिकेष्विति।परस्परमितिभावः।प्रायिकमिति।नकेवलंयथाश्रुतंभाष्यमवलम्ब्ययुज्ञयोरेवसमावेशइतिमन्तव्यम्।किंतुप्रायिकत्वएवभाष्यतात्पर्यम्।तेनगर्भेलषपतपदेतिउकञ्विषयेतृन्नपि।गन्तागामुकः।वौकषलसेतिघिनुण्विषयेयुजपिविकत्थीविकत्थनइत्यादिसिद्ध्यतीतिभावः।जल्पभिक्ष।कुट्टच्छेदने।लुण्ठस्तेयेचौरादिकौ।जिदृक्षि।जिजये।जिअभिभवे।दृङादरे।क्षिक्षये।क्षिनिवासगत्योः।श्रिञ्सेवायां।विपूर्वः।व्यथभयसञ्चलनयोर्नञ्पूर्वः।निपातनान्नञोधातुनासमासेनलोपेततःप्रत्ययः।प्रसवीति।षूप्रेरणेअस्मादिनिः।सूतिसूयत्योस्तुसानुबन्धत्वान्नेहग्रहणम्।जिदृक्षीत्यत्रैवव्रजुंपठित्वापूर्वसूत्रेत्यक्तुमुचितम्।एवंहिपृथग्विभक्तिश्चकारोमास्त्वितिसुवचनम्।स्पृहिगृही।तत्पूर्वइति।तच्छब्दस्यसमासोपिनिपातनादितिबोध्यम्।दाधेट्।डुदाञ्।दोदेङ्।त्रयाणामेवग्रहणमित्याहुः।भञ्जभास।भङ्गुरइति।भञ्जेःकर्मकर्त्तर्य्येवअभिधानस्वभावादित्याहुः।विदिभिदि।विदिर्ज्ञानार्थस्यैवग्रहणम्।नलाभाद्यर्थस्यव्याख्यानात्।छिदुरमिति।कर्मकर्त्तरीतिवृत्तिः।नैतद्भाष्येदृष्टम्।तथाचमाघः।मुख्येकर्त्तरिप्रायुङ्क्त।प्रियतमायवपुर्गुरुमत्सरच्छिदुरयादुरयाचितमङ्गनाइति।जागरूकः।जागुरितिपञ्चम्यन्तंनव्याचष्टे।जागर्त्तेरिति।जागरूकइतिसिद्धरूपमेवनतुनिपातितंउत्तरत्रऊकस्याननुवृत्तिप्रसङ्गात्।यजजपा।जञ्जपूकइति।जपजभदहदशभञ्जपशाञ्चेतिनुक्।वावदूकशब्दस्तुउलूकादयश्चेत्यत्रवक्ष्यते।माधवस्त्वाह।कुर्वादिगणेवावदूकेतिपाठादेवयङन्ताद्वदेरूकप्रत्ययइति।सनाशंस।सनितिप्रत्ययग्रहणात्तदन्तग्रहणम्।षणुदाने।षणसंभक्तावितिधात्वोस्तुनेहग्रहणम् ॥

नयाप्रत्ययोरितिन्यायलब्धेर्थेलिङ्गमप्याह।गर्गादिष्विति।आङः शस्विति।आङा सहनिर्देशात्तुल्यार्थशंसेर्नग्रहणमितिभावः।कथमिति।लोकेकथमितिप्रश्नः।स्वरूपाद्याधेनै
वेति।अतएवकिकिनोर्विधानञ्चरितार्थमितिभावः।नचलिड्वदतिदेशाद्भावकर्मणोरप्येतौस्याताम्।उत्पन्नयोःकार्यातिदेशात्उत्पत्तिश्चकर्त्तरिकृदित्येकवाक्यतयाकर्त्तर्येवावर्त्त
गर्गादिषुविजिगीषुशब्दस्यपाठात्।आङः शंसुइच्छायाम्।विन्दुरिच्छुः।वेत्तेरिति।ज्ञानार्थस्यैवग्रहणान्नेतरेषाम्।एवमिषेरपीच्छार्थस्यैवग्रहणंनतुइष्यतीष्यत्योः
अनभिधानात्।निपातनाद्वेतिभावः।क्याच्छन्दसि।किंतुपःक्यइतिव्याख्यानात्कण्ड्वादियगपिगृह्यतेतेनतुरण्यवोङ्गिरसोनक्षन्त।सपर्य्येमसपर्य्यवः।यमस्यधोगोश
कुनेभुरण्युमित्यादिसिद्धम्।अथकथंसन्तःप्र णयिवाक्यानिगृह्णन्तिह्यनसूयवइतिभट्टपादाः।मृगय्वादिषुअसूयुशब्दोद्रष्टव्यः।सुम्नयुरिति।नच्छन्दस्यपुत्रस्येतिनिषे
धातक्यचिचेतिईत्वमकृत्सार्वेतिदीर्घश्चनभवति।आदृ।आदितिदकारोमुखसुखार्थः।नत्वयन्तकारः।तेनतात्परत्वाभावात्ऋइत्यनेनदीर्घोपिगृह्यतेतेनततुरिर्जगुरिः तरतेर्गि
रतेश्चबहुलंछन्दसीत्युत्वेरूपमितिप्राञ्चः।वस्तुतस्तुआदित्यादिप्रकृतिविशेषग्रहणमुदाहरणप्रपञ्चमात्रं।किनौलिट्चेत्येतावन्मात्रन्तुविवक्षितम्।तथाचवार्तिक
म्।किकिनावुत्सर्गश्छन्दसिसदादिभ्योदर्शनादितिउदाहृतञ्चभाष्येसेदिर्नेमिरित्यादि।एवंस्थितेआदितितपरकरणेपिनक्षतिरितिध्वनयन्नाह।आदन्तादृदन्तादिति।ब
भ्रिर्वज्रमिति।नलोकेतिषष्ठीनिषेधाद्वितीया।किकिनोःस्थानेतिवादयस्तुनलिड्वदित्यतिदेशेनस्वरूपाद्याधेनैवकार्यातिदेशात्।छान्दसस्तुद्वयोदश्यसत्वेभाषायामित्यादि
वार्तिकविशेषविवेचनार्थम्।इहचवार्तिके।गमिर्यद्यपिनदृश्यतेतथापिधातुवृत्तौक्वचिद्वृत्तिपुस्तकेचदर्शनादुपन्यस्तः।नोगमावश्चेति।नोगवाञ्छत्यादिनाप्राप्तस्यनोगागम
स्याभावइत्यर्थः।श्रयतिहरिंश्रीरितिप्राचानुश्रयन्त्येनामितिकर्मणिक्विबुदाहृतः।तत्रकर्त्तरिकृदितिसूत्रविरोधःस्पष्टएव।बाहुलकन्तुअगतिकगतिः।एतेनश्रीयतेइतिश्रीरि
तिकर्मणितिङाविग्रहोनतुश्रयतीतिकर्त्रर्थेकर्मणिक्विपोविधानादितिप्राचोग्रन्थव्याचक्षाणोक्तिरपिप्रत्युक्ता।अतएवजुहूरित्यस्यजुहोत्यनयेतिप्राचाविग्रहोप्युपेक्ष्यः।त
थाचजुहूरित्यत्रहरदत्तेनोक्तङ्करणस्यापिकर्तृत्वविवक्षेति।एतेनधीरितिव्याख्यातम्।।७मानइत्यधिकारेणभूतकालोपिनातिदिश्यतइतिदिक्।बाहुलकन्त्विति।तास्यामन्त्रेणादयइ

ना

ज्ञकेरुणक्विपःकर्मण्यपि [illegible] गति
कागतिरिति[illegible]म् ॥

र्देशादिति। शोवादंष्ट्रो मणिरिति भाष्यप्रयोगाच्चेत्यपि बोध्यम्। एतच्च रत्नानुसारेण। दशेतिश्च पानिर्देशो दंशसञ्ज्ञेति नलोपदृष्ट्वानिदितामिति सूत्रे भाष्ये। दशनाद्इति। औणादिककुना सिद्ध भुवः सञ्ज्ञान्तरयोः। धनिकेत्यादि। तेन ग्रामयोरन्तरे यस्तिष्ठति तत्र नेति भावः। एतच्च दृशिग्रहणानुवृत्तेर्लभ्यते। नन्वेवं प्रतिभूशब्दः सञ्ज्ञेति फलितम्। तत्र सञ्ज्ञायामित्येव सिद्धे किमन्तरग्रहणेन। अत्राहुः। यावद्द्रव्यभाविन्यः सञ्ज्ञाः प्रतिभूशब्दस्तु सत्येव तस्मिन्नृणप्रदाने निवर्त्तते इति। दाम्नी। दशेति नलोपिनो निर्देशो ज्ञापकं क्वचिदक्ङित्यपि दंशेर्नलोपो भवति इति तेन ल्युटि दशनादन्ताः। दंशदशने इति सिद्धमानचसन्निधानात् छन्दस्येव नलोपः स्यादिति वाच्यम्। शुनो दन्तदंष्ट्रेति निर्देशात्। न चेदिति। एतेन हलसूकरयोरभिधेयमुउपपद बन्धनिरस्यति। मुखमित्यर्थ इति। तत्रैव रूढेरिति भावः। अर्त्तिलूधूसु। धू इति कुटादिरेव गृह्यते निरनुबन्धकत्वात्। अतएव गाङ्कुटेति ङित्वाद्गुणनिषेधे उवङ्। तदाह। धुवित्रमिति॥ अयोणादयः॥ कृवापा। कारुः शिल्पिनि कारके धरणिकोशमभिप्रेत्याह। कारुरित्यादि। आद्ये योगरूढिः। द्वितीये तु योगमात्रमिति विवेकः। अतएव द्वितीये यथालर्थं प्र निकारकान्वयो भवत्येव। तथा च भट्टिः। राघवस्य ततः कार्यङ्कारुर्वानरपुङ्गवः। सर्ववानरसेनानामाश्वागमनमादिशत् इति। पायुः पुंसि। गुदं त्वपानं पायुर्नेत्यमरः। पिबत्यनेन तैलादिकमिति विग्रहः। पाति रक्षतीति विग्रहे रक्षकोऽपि। तथा च मन्त्रः। भुवस्तस्य स्वतवाः पायुरग्ने इति। स्वतवान्पायाविति रुत्वम्। जायुरिति। भेषजौषधभैषज्यान्यगदो जायुरित्यपीत्यमरः। साहचर्यात्पुंस्त्वम्। मायुः पित्तङ्कफश्लेष्मेत्यमरः। शब्दोऽपि मायुः। यत्र शुर्मायुमकृत गोमायुरेको अजमायुरेक इत्यादौ वेदभाष्यकारादिभिस्तथैव व्याख्यानात्। स्वदते रोचते इति स्वादुः। विशेष्यनिघ्नोऽयम्। एवं साधुरपि। आशु शीघ्रमिति। विलम्बाभावमात्रपरत्वे क्लीबं तद्विशिष्टद्रव्यपरत्वे तु त्रिलिङ्गम्। अथ शीघ्रमित्युपक्रम्य क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्वगामि यदित्यमरः। व्रीहौ तु पुंस्येव। कन्दसीणः। उणनुवर्त्तते। मान आयाविति। आयुशब्दो मनुष्यपर्यायेषु वैदिकनिघण्टौ पठितः। अतएव त्वामग्ने प्रथममायुमायवे मानस्तोक इत्यादिमन्त्रेषु वेदभाष्ये तथैव व्याख्यातम्। अर्वाचीनास्तु कन्दसीण इति सूत्रं बहुलवचनाद्भाषायामपि प्रवर्त्तत इति स्वीकृत्य आयुर्जीवितकालो वा इत्यमरग्रन्थे आयुशब्दमुकारान्तमाचख्युः। वायुना जग दायुनेति वर्णविवेकः। एतेर्णिच्चेत्युसत्यये सकारान्तो वक्ष्यमाणो आयुः शब्दस्तु लोकवेदयोर्निर्विवाद एव ॥ ७ म्। अतएव तनुत्रवर्मदशनमित्यमरः स

इति

…नाशिमाति। अस्मारु विलौ मनुलोङ्के एवागलस्तु लमेव। बाहुलकालनप्रत्ययौ।

म·श्री मानभावइति॥ शाकविशेषइति। अरुईत्याख्यः। गलन्तिका। सच्छिद्रघटे लोहमये दर्व्याकारे सच्छिद्रे भाषायां झरणे झाख्ये च। तरन्ति नरकमिति। नरति जलमध्ये इत्यपि बोध्यम्। चरु

२५५ अतएवजटाआयुरस्येति विग्रहे ग्रहस्वाजटायुषमिति प्रयोगः। कथन्तर्हि मावधिष्ट जटायुं मामिति भट्टिः। नटौ विद्यस्याद्रे भजतजटायोः प्रथमज इति विश्ववर्ण

नेअभिनैन्दवतिचेत्। अर्वाचीनमते तावद्रूद्रमेव। वस्तुतस्तु जटां याति प्राप्नोतीति जटायुः सृगस्वाद्रिखालकः। आयातीत्यायुः। जटायुषा जटायुञ्च विद्यादायुरन्यायुषेति

द्विरूपकोशः। चाद्विति। चटु चाटु प्रियं वाक्यमिति हेमचन्द्रः। चाटु चारुतकसंभ्रमसासाङ्कर्मणत्वमगमद्रमणेषितिमाघः। चाटुर्नरिप्रियोक्तिः स्यादिति रत्नमालाकोशः। नरि

पुंसि च करचवटुचाटूनसौढयोषिदृदस्येति माघः। इह सूत्रे रश्मिमपि पठितारा इरित्येके। बाहुलकादिति तु भहवः। तस्येति। किंशारुर्नासस्य शूके विशिखे कङ्कपक्षिणीतिमेदि

नीकोशः। त्रोरश्चलः। त्रइति तरतेः पश्चानिर्देशः। केचित्तु त्रोरिति निर्दिश्यारुधातोरपि प्रश्ने पादइयर्त्तिअर्यते वा। आलुः शाकविशेषो घटी चेत्याहुः। कर्कन्ध्यालुर्गलन्तिके त्वमरः।

भृमृशीभरुरिति। भरुः स्वर्णे हरे पुंसीति मेदिनी। भरुर्भर्त्रे कनकयोरिति हेमचन्द्रः। शयुरिति। अजगरे शयुर्वा सइत्युभौ इत्यमरः। नरुरिति। तरन्ति नरकमनेन नरो यज्ञकोशः। चरुहे

रिति। अनवस्नावि चान्तरे रूष्मपक्व ओदन इति याज्ञिकाः। चिरश्चर्वपि तरवे ये वञ्जगवादिभ्यो यदिति सूत्रे कैयटस्त्वाह। स्थालीपाची चरुशब्दस्तात्स्थ्यादोदने भाक्त इति। विश्वप्रकाशे

तु चरुर्भाण्डे च हव्यान्ने इति नानार्थतोक्ता। अथ पुमान् चरुर्हव्यान्नभाण्डयोरिति मेदिनी च। हव्यपाके चरुः पुमानित्यमरग्रन्थे कर्मार्थघञन्तेन कर्मधारयमधिकरणार्थघञन्ते षष्ठी

तत्पुरुषञ्चाश्रित्य द्वेधा व्याचक्षाणाः स्वाम्यादयोपि नानार्थतायामनुकूलाः। तरुः कायेल चिल्लीस्यात्त्रिषल्ये विरहेकशे। धनुःपुमान् प्रियालद्रौ राशिभेदे शरासने इति नान्तमेदिनी।

विश्वप्रकाशमुदाहरन्ति। धनुषाचेत्यादि। स्यात्तनुस्त्वनुषा सार्द्धमित्यतः सार्धमित्यनुषज्यते। शुद्धवंशजनितोपि गुणसस्यानतामनुभवन्नपि शक्तः। क्षिप्नुरेनमृजुमाशुविपक्षं साम

कमिति श्रीहर्षः। लोकशेषः। धनुर्वंशविशुद्धोपि निर्गुणः किं करिष्यतीति धन्वन्तरिः। केचित्तु इहसूत्रे धनिन्न पठन्ति। तेषां मते सकारान्तधनुःशब्दमेवाश्रित्योक्तग्रन्थानिर्वाह्याः। तस्यापिं रा·म·

स्यात्॥ ७७ भाण्डे चेति। भाण्डं तरुस्यात्त्रेवा। कर्मार्थघञन्तेन कर्मधारयमधिकरणघञन्तेन षष्ठीतत्पुरुषञ्चेति पाठः। प्रियालद्रौ। भाषया चिरौञ्जीत्याख्ये। राशौ। मेषादौ। ॥ २५५

२ धनुरिति।

कटुरोहिणी। कटुकी लता ओषधिविशेषः। राजिका। राई इति प्रसिद्धम्। अकार्यमप्योषम्। स्वरे। नीह्यो। आद्युदात्तदर्शनादिति। यद्यपि नञ्विषयस्येत्याद्युदात्तत्वं सिद्धम् तथापि पुंस्याद्युदात्तार्थं नै
उक्तं ह्यमरेण। अथास्त्रियौ धनुश्चापाविति। किन्त्वदन्तः। तुरङ्गवदनो मयुरित्यमरः। मीनातीति मित्रो तील्यात्। स्वन्तु नेह बाहुलकात्। कटति रसनामिति कटुः। कटुः स्त्री कटुरोहिण्यां लताराजिक-
योरपि। नपुंसकमकार्ये स्यात्पुंल्लिङ्गो रणमात्रके। त्रिषु तद्वत्सुगन्ध्योश्च मत्सरेऽपि खरेऽपि चेति मेदिनी। बटतीति। बटुर्द्विजसुतः स्मृत इति संसारावर्त्तः। नन्दवटुरिति तु प्रमादात्। दन्तोष्ठ्या-
दिरयम्। [illegible]ल्पवटुमादिप्रामाण्यात्। अभिव्याप्येति। यद्यपि फलिपाटीत्यादिसूत्रे यावदनुवर्त्तत इति न्यासग्रन्थेन मर्यादोक्त्येत्सपि प्रतीयते। तथापि अभिव्याप्त्यैवोचितम्। पिबतेः सौ-
मं मधु दूसीदो मधुशब्दस्याद्युदात्ततादर्शनात्। वोतो गुणवचनादिति सूत्रे हरदत्तेन अभिव्याप्येति स्पष्टमभिधानाच्चेति भावः। त्रपुसीसमिति। तद्धि अग्निं दृष्ट्वा त्रपते लज्जत इव। त्रपुसीस-
कयोरिति मेदिनीकोशः। हनुरिति। हनुः पुमान् परो गण्डादिति वररुचिकोशः। स्त्रीलिङ्गोऽप्ययम्। हनुर्हट्टविलासिन्यामस्त्रावस्त्रगदे स्त्रियाम्। द्वयोः कपोलावयवे इति मेदिनी। अवि-
शायने मतुप्। हनुमान्। अन्येषामपि दृश्यत इति दीर्घग्रहणात् पाक्षिको दीर्घः। हनूमान्। स्नेहेन बध्नातीति बन्धुः। प्रज्ञादित्वात् बान्धवः। मनुरादिराजो मन्त्रश्च बिन्दुः पवर्गीयादिः। कन्दुरिति।
स्कन्दत्यस्मिन्नर्जनताप इति व्युत्पत्त्या भोगस्थानमित्याहुः । अमरस्त्वाह । क्लीबाऽम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियामिति। कन्दुर्वा ना इति पूर्वेणान्वयाद्वा पुमानित्यर्थः। सजेर-
सुम्वा सजतीति रज्जुः। स्त्रियां रज्जुर्वैण्यां गुणेऽपीति मेदिनी। आगमस्तकारस्य श्चुत्वेन शः। जस्त्वेन जः। तर्कुरिति। कृन्तत्यनेनेति विग्रहः। तर्कुटी सूत्रलातर्कुरिति हारावलीकोशः। फ-
लिपाटि। स्थापि षष्ठी विषयभेदाद्भिद्यते। गुणागमे हि फलेरव यवषष्ठी पञ्चादेशचतुष्टयविधौ तु पाद्यादिभ्यः स्थानषष्ठी। तयोर्विधौ अन्त्यस्तु पसंह्रियत इति विवेकः। अनागमका-
नां सागमका आदेशा इति पक्षे तु स्थानषष्ठ्येवेति बोध्यम्। कलम्बसारे निधेयवत्। नदीभेदे मलघा स्त्रीति मेदिनी। बलेर्गुक् च। बल्गु सवरणे इति दन्त्योष्ठ्यादिः
॥ यत्तूज्ज्वलदत्तेन सूत्रे पवर्गीयादिं पठित्वा वलप्राणन इत्युपन्यस्तं तन्न। स्वविरोधात् बुधेष्वयम्। भयं नाभाव इति वल्गुब्रोगृहे इत्यादौ दन्त्योष्ठ्यपाठस्य निर्विवादत्वात्।
धरणिकोशस्य माह। बभ्रुरित्यादि। बभ्रुर्वैश्वानरे शूलपाणौ च गरुडध्वजे। विशाले नकुले पुंसि पिङ्गले त्वभिधेयवत् इति मेदिनीकोशः। अन्यतोऽपीति। भः कुश्चेति वक्तव्ये भाक् प्रत्य-
यनिर्देशादित्याहुः ॥ ७७ वनुक्तमिति भावः। गण्डात्। कपोलात्। हट्टविलासिनी ओषधिः ॥

म०
न्नश्चेतिप्रकृतिसंसृष्टेनचकारेणप्रकृत्यन्तरसमुच्चयाच्चेतिबोध्यम्।एभिरिति।गुरुःप्राज्ञ्येभिधेयवत्।पुंसिस्याद्देवलोकेचनत्यभेदपरागयोरितिमेदिनी।विधुरित्यादिवि
पु०
षकोशः।इहसूत्रेधृषिक्षुषिभ्यश्चेतिपठित्वाहृषुर्हर्षः सूर्याग्निशशिनिराहवोपिहृषभइतिकेचित्।कृञोः।करोतीति।केचित्तुसूत्रेकुइतिदीर्घंपठित्वाकिरतीतिविगृह्णन्ति
कुरुर्नृपान्तरेभक्तेपुमान्पुंभूम्निनीवृतिइतिमेदिनी।सुपामेत्यादि।एतच्चन्यासाद्यनुरोधेनोक्तम्।वार्त्तिककृतातुस्यास्थिन्स्रूनामुपसंख्यातम्।अपटुःपुंसिबालेचलामे
रूपाद्न्यलिङ्गकइतिमेदिनी।अजिरविशि।अर्जअर्जने।अस्यऋजिरादेशः।दृशेःपशिःकमेस्तुगागमः।अमरोगयलादिषु।अस्यधुगागमः।पशिनाशने।सौत्रोधातुः।अस्यदी
र्घः।बाधृलोडने।अस्यहादेशः।पङ्क्तोपिकुप्रत्ययः स्यादित्यर्थः।अविशेषणेति।चादिगणेतुपश्वितिपठितम्।पशुरित्यर्थमव्ययमितिधरणिः।कन्तुःकन्दर्पः।इःकंतुर्मकराङ्कःद
तित्रिकाण्डशेषः।पांसुरिति।पडिपसिनाशनेतुरादिर्दन्त्यान्तः।स्त्रीपुंसयोरित्युक्तमित्यमरेण।द्वौपरौद्वयोर्भुजबाहूइति।परौद्वौभुजबाहुशब्दौद्वयोःस्त्रीपुंसयोरितितदर्थः।अका
रान्तोव्ययम्।अतएवबाहूबाहुभुजयोःपुमानितिदामोदरः।बाहाभुजेऽपुमान्मानभेदाश्च वृषवाहुषितिमेदिन्यां टावन्तोव्ययम्।प्रथिम्रदि।प्रथ्यतेइतिपृथुः।पृथुःस्या
न्महतित्रिषुत्वक्पत्र्यांस्त्रीजीरेचपुमान्वैन्यनृपान्तरइतिमेदिनी।म्रदितुशक्यतेअकठिनत्वादितिमृदुःकोमलः।भृगुःपुमान्मुनौहरेत्वटेशुक्रेइतिमेदिनी।भृगुःशुक्रेप्रपा
तेचजमदग्नौपिनाकिनीतिकोशान्तरम्।लघुरिति।पृक्कायांस्त्रीलघुःक्लीबंशीघ्रेकृष्णागुरुण्यपिइतित्रिकाण्डशेषः।लघुरगुरौचमनोज्ञेनिःसारेवाच्यवत्क्लीबम्।शीघ्रेकृष्णागुरुण्यपि
पृक्कानामौषधौतुस्त्रीतिमेदिनी।नृपभेदइति।एतेनावेस्यधातोर्गमनार्थमर्थविचकारनाम्नारघुमात्मसम्भवमितिव्याख्यातम्।बहुरिति।बहुतुत्र्यादिसंख्यासुविपुलेत्वभिधेयवत्।इति
मेदिनी।ऊरुर्जङ्घेतिउज्ज्वलदत्तः।तन्न।तयोर्भेदात्।ऊर्णूयतेआच्छाद्यतेइत्यूरुः।कर्मणिप्रत्ययः।ऊरुर्महदितिकर्तरिप्रत्ययः।उद्यतइति।सहियावत्कार्यमभिव्याप्तिलगतिव्याप्रियतइ रामः
त्यपावत्।परशुरपीति।पर्शुःपरशुनासहेतिविश्वः।हरिद्रुर्वृक्षइति।दारुहरिद्रात्येकेतद्वानिति।धुदुश्यामः।खरुशब्दस्यक्रूरोमूर्खइत्यर्थः।हयन्दर्पादिवृत्त्यनुसारेणोक्तम्।खरुःपतिंवराक ३५६
न्त्यपिबोध्यम्।खरुर्दन्तेहरेदर्पेहयेश्वेतेतुवाच्यवत्इतिविश्वत्रिकाण्डशेषौ।शङ्कुरिति।शकिशङ्कायाम्।शङ्कतेस्मादितिशङ्कुः।कीलेगरेशल्येसंख्यापादपभेदयोः।यादोभेदेचपापेचस्था
णावपिबहस्पतइतिविश्वः।पीयुरिति पीयुःकालेरवौपूकेइतिमेदिनी।कृमिविशेषइति।नीलङ्गुःकृमिजातौस्यात्भ्रमरालीप्रसूनयोरितिविश्वः ॥

अलगर्दो रक्तविकारः।खेदने॥कुदाई इति भाषायाम्।भर्जनं मृत्स्नाश्च।वेणी स्त्रीणां केशविन्यासः।तर्कु दीप्तौ।सूत्रवेष्टनसारे कुई इत्याख्यस्य नाम।विषमभेदाद्विद्यते इति सौत्रत्वाच्च साधुत्वं
पाठान्तरमिति।नीलङ्गुरपि नीलाङ्गुरिति विश्वः।धातोरपीति।केचित्तु नीलशब्दे उपपदे गमेष्टिलोप उपपदस्य मुम् दीर्घश्च पाक्षिको निपात्यत इत्याहुः।लिगुचित्तेन भुडुं
सकमिति वररुचिः।मृगय्वादयश्च।मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनीति मेदिनी।मृगयुर्ब्रह्मणि ख्यातो गोमायुव्याधयोरपि देवयुर्धार्मिके स्याल्लोके देवयुर्लोकया
त्रिक इति विश्वः।आकृतिगण इति।तेन पीलप्रतिष्ठेभे अस्मात्कुः।पीलुर्गजे द्रुमे काण्डे परमाणुप्रसूनयोरिति विश्वः।भट्टास्तु पीलुशब्दस्य वृक्षे आर्यप्रसिद्धिः।गजे तु म्ले
च्छप्रसिद्धिरित्याश्रित्य व्यवजह्रुः।कडि मदे।कण्डुरित्यादि बोध्यम्।वाशुरा रात्रिरिति वाश्यन्ते अस्यामिति विग्रहः।वाशुरो गर्दभस्त्रियाम्।दीर्घरावासिता रात्र्योरिति मेदि
नी।चङ्कुर इति।चकिः सौत्रो धातुः।चङ्कुरः स्यन्दने रथ इति मेदिनी।अङ्कुरो रुधिरे लोम्नि पानीये भिनवोद्भिदि इति च।खर्जूरेति।अङ्कूरोऽङ्कुरः रक्षपे इति विश्वप्रकाशः।व्यथेः व्य
थभयसञ्चलनयोः।अस्मात्कुरच्।कित्स्याद्धातोः संप्रसारणञ्च।दशपाद्यां तु व्यथः किच्चेति पठित्वा धकारमन्त्यादेशं विधाय विधुरेतनिरुक्तमुदाहृतं माधवेनापि तदे
वानुसृतम्।न त्वेतद्युक्तम्।लभेषां विधुराशयोऽसि।अतिविद्धा विधुरेणाचिरस्तादृशादिमन्त्रेषु थकारपाठस्य निर्विवादत्वात्।यदपि माधवेनोक्तं विदिभिदिदीत्यत्र व्यथेः सं
प्रसारणञ्चेति वचनात् कुरचि थान्तरूपमिति तदलिस्ववीयः।कुरच्विधायके सूत्रे व्यथेरुपसंख्यानस्याप्रसिद्धत्वात्।तस्मादिह व्यथः किच्चेति दशपादीपाठं पुरस्कुर्व
तेः प्रसादकारादयोऽप्युपेक्ष्याः।कथन्तर्हि विधुर इति प्रयोगस्य निर्वाह इति चेत्।धुरो विगत इति प्रादिसमासेनेत्यवधेहि।समासान्ताद् इति सूत्रे वृत्तिपदमञ्ज
र्यां स्थितत्वात्।मकुर इति।मकि मण्डने।अस्मादुरच्।नलोपश्च।बाहुलकादिति।धातोरुपधायाः स्थाने उकार इति भावः।मुकुरो मकुरोऽपि चेति विश्वः।मुकुरः
स्यान्मकुरवत् दर्पणे बकुलद्रुमे।कुलालदण्ड इति मेदिनी च।धातोरिति।केचित्तु गुणो दुगागमश्च निपात्यते इत्याहुः।कर्बु इति।कर्बुरं सलिले हेम्नि कर्बुरः पा
परक्षसोः।कर्बुरा कृष्णवृन्तायां शबले पुनरन्यवत् इति मेदिनी।मसेश्च।मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः।मसूरी पापरोगे स्यादुपधाने पुनः पुमानिति मेदिनी।
वोढा स्यादिति पक्षेत्विति।शुक्रपदस्य तद्विशिष्टे लक्षणेति भावः।असारन्तु कम्।नदीभेदो नदीविशेषः गयाश्राः।मलपूर्वस्य विशेषः।निर्विवादत्वादिति।वबयोरैक्याद्वल्गुर्वल्गु च सुन्दरम्॥

श्वशुर इति। पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोरित्यमरः। अविष इति। राजा समुद्रश्च। महिषो महान्। तुरीयस्याममाहिषो विभक्ति। उतमाता महिषमन्ववेनत्। टित्वा
न्ङीप्। महिषी राजपुत्री। रुहेः। रोहिषो मृगभेदः स्याद्रोहिषञ्च तृणं मतमिति संसारावर्त्तः। वेदभाष्यमिति। इन्द्रो मित्रस्य तविषीम्। इन्द्रस्यात्र तविषीभ्य इत्यादिमन्त्रेष्विति
भावः। वैदिकनिघण्टौ ओजः पाज इत्यादिषु बलनामसु तविषीशब्दस्य पाठश्चेह मूलमिति वोध्यम्। तविषः शोभनाकारे भेले व्यवसाययोः। तविषी देवकन्यायां पुंसि
स्वर्गे महोदधौ। तविषी चेन्द्रकन्यायां नास्वर्गे बुधिकाऽव्ने इति मेदिनी। किलेर्वुक् च। किल श्वैत्यक्रीडनयोः। किल्विषं पापरोगयोः। अपराधेपीति मेदिनी। इषिरोग्निरिति। आहा
र इत्यन्ये। छिदिरः पावके रज्जौ करवाले परश्वधे। मन्दिरं नगरे गारे क्लीबं ना मकरालये। चन्दिरो नेकपे चन्द्रे तिमिरं ध्वान्ते नेत्रामयान्तरे। मिहिरः सूर्यबुधयोः। मुहिरः काममूर्खयोः
। रुधिरो ङ्गारके पुंसि क्लीबन्तु कुङ्कुमासृजोः। शुषिरं वंश्यादिवाद्ये विवरे च नपुंसकम्। मूषिके ना स्त्रियां नील्योषधौ रन्ध्रान्विते त्रिषु। आशिरो वीतिहोत्रे स्यात् राक्षसे भास्करे पुमान् इति मे
दिनी। अजिरमङ्गणमिति। अङ्गेस्तुदि अनादेशस्य बाहुलकाण्णत्वमित्येके। अन्ये तु विश्वकोशाद्युपष्टम्भेन दन्त्यमेवेच्छन्ति। इह दशपादीवृत्तौ नञ्पूर्वस्य जीर्यतेऋवर्णलोपो निपात्यते
इत्युक्तं तदपि ग्राह्यम्। आशु द्रुतमजिरं प्रत्नमीड्यमित्यादौ न जीर्यतीत्यजिर इत्यर्थस्यानुगुणत्वात्। अजिरं प्राङ्गणे कार्यविषये दर्दुरेऽनिले। शिशिरो ना हिमे न स्त्री ना चन्द्रे दन्तधावन इति मे
दिनी। शिबिरमिति। शेरतेस्मिन् रा[illegible]स्तानि। निवेशः शिबिरं षण्ढमित्यमरः। सलिकलि। कलिल इति। मिश्रो गहनश्च। महिलेति। माहिला फलिनी स्त्रियोरिति मेदिनी। एणोदरेति। तथा च द
मयन्तीकाव्ये परमहेलारतोऽप्यपारदारिक इति परमहेला स्त्री। अथ च परमा उत्कृष्टहेला क्रीडा तत्र रत इत्यर्थः। कपिल इति। कपिला रेणुकायाञ्च शिंशपा गोविशेषयोः। पुण्डरीकेकरिण्यां
स्त्री वर्णभेदे त्रिलिङ्गकम्। ना नले वासुदेवे च मुनिभेदे च कुक्कुरे इति मेदिनी। रेणुके हलता विशेषः। हरेणु रेणुका कौन्ती कपिला भस्मगन्धिनीत्यमरात्। कपिलादयश्च। मथे विलोडने। अक
रस्येत्वं निपातनात्। कठेर इति । । कठ कृच्छ्रजीवने। कठि च। द्वितीयस्य इदित्वान्नुमि प्राप्ते आह। बाहुलकादिति। कबेरोतच्। गुपादिसूत्रादारभ्य एतदन्तानि सप्त सूत्राणि केषाञ्चिदसं
मतानि। कपोत इति। कपोतः स्याच्चित्रकण्ठे पारावतविहङ्गयोरिति मेदिनी। कपोतः पक्षिमात्रेपीति त्रिकाण्डशेषः। अत्रोनवश्चित्वं प्रामादिकम्। यत्कपोतः [illegible]ग्नौ [illegible]णोति। देवाः कपोत इ
षितो यदिच्छन्नित्यादौ सर्वत्र प्रत्ययस्वरेण मध्योदात्तस्यैव पठ्यमानत्वात्। कठोर इति। कठिनः पूर्णश्च। कठोरताराधिपलाञ्छनच्छविरिति माघः। किशोर इति। किशोरोश्वस्य शावके। तैलपर्ण्यां

षधौचस्यात्तरुणावत्स सूर्ययोरितिमेदिनी।कटोलइति।कटेवर्षावरणयोः।केचित्तुसूत्रेकडिंपठन्ति।कडिमदे।कुण्डोल पिटकः।चण्डालश्च।चण्डालिकातुकण्डोलवी चिण्डालवल्लकीत्यमरः।पटोलइति।पटोलंवस्त्रभेदेनौषधौज्योत्स्नान्तुयोषितिइतिमेदिनी।कल्लशब्देबाहुलकादतोप्योलच्।कल्लोलःपुंसिहर्षेस्यान्महत्सूर्मिषुवारिणइतिमेदिनी।स्पन्दः।सिन्दूरतरुभेदेस्यात्सिन्दूरंरक्तचूर्णके।सिन्दूरीरोचनारक्तवेल्लिकाधातकीषुचेतिमेदिनी।विश्वप्रकाशो।सिनति।सेतुरालौकुमारकइतिमेदिनी।सेतुरालौस्त्रियांपुमानिति।मण्डन्दधिभवंमस्तुइतिचामरः।धातुनेन्द्रियेषुच।शब्दयोनिमहाभूततद्गुणेषुरसादिषु।मनःशिलादौश्लेष्मादौविशेषाद्गैरिकेस्त्रिचतिमेदिनी।श्लेष्मादिरसरक्तादिमहाभूतानितद्गुणाः।इन्द्रियाण्यश्मविकृतिशब्दयोनिश्चधातवइत्यमरः।अर्त्तेश्चतुः।तुनिप्रकृतेअत्तोरा::तत्त्वार्थन्तुक्रियते।ऋतुनायज्ञम्।यऋतुर्जनानामित्यादि।ऋतुर्वर्षादिषट्सुच। आर्त्तवेभासिचपुमानितिमेदिनी।कमिमनि।कमिग्रहणंप्रपञ्चार्थम्।अर्जिदृशीत्यादिनाकुप्रत्ययेतुकिसिद्धत्वात्।मन्तुरिति।मन्तुःपुंस्यपराधेपिमनुष्येपिप्रजापताविति मेदिनी।दीर्घत्यङ्कुशमितिमन्त्रस्यवेदभाष्येतुमन्तुमइतिमन्तुर्मनना[illegible]हेइन्द्रेतिव्याख्यातम्।गातुर्नाकोकिलेभृङ्गेगन्धर्वेत्रिषुरोषणेइतिमेदिनी।भानुर्नाकिरणेसूर्येइतिच।चायःकिः।केतुर्नारुक्पताकारिग्रहोत्पातेषुलक्ष्मणीतिमेदिनी।असुःशरीरमिति।अभिलषितार्थश्च।आप्तव्यत्वात्।अतएवआप्तोर्यामशब्दस्याभिलषितार्थप्रापकइत्येवयथार्थमाहुः।कृञः।क्रतुः।क्रतुर्यज्ञेमुनौपुंसीतिमेदिनी।एधिवह्योश्चतुः।नित्वादन्तोदात्तः।स्योनंपत्येवहतुंकृणुष्व।वहतुःपथिकेवृषभेपुमानितिमेदिनी।आतृकन्।जैवातृकःपुमान्।सोमेकृपकायुष्मतोस्त्रिष्वितिमेदिनी।कृषिचमि।रभसकोशस्थमाह।कर्षूरित्यादि।कर्षूःपुमान्।करीषाग्नौस्त्रियांकुल्याल्पखातयोरितिमेदिनी।सर्जूर्वणिजिविद्युतिस्त्रियांस्वर्गेविधौरुद्रेइति।खर्जूःकीटान्तरेस्मृता।खर्जूरीयादपेकण्डूमितिचामृजे।मर्जूःस्त्रीशुद्धौधावकेपिचेतिमेदिनी।वहः।वधूःस्नुषानवोढास्त्रीभार्यास्पृक्काङ्गनासुचेतिविश्वः।स्पृक्काचमहिलावधूरितित्रिकाण्डशेषः।कषेः।कषशिखेतिदण्डकेपठितः।कच्छ्वान्तुपामपामाविचर्चिकेत्यमरः।णिकसि।कसगतौ।कासूर्विकालवाचिस्यात्तथाशक्त्यायुधेस्त्रियामितिमेदिनी।कासूःशक्त्यायुधेरुचिर्बुधोविकलवाचिस्यादितिहेमचन्द्रः।नलंबतेअलाबूः।ञोडुट्चात्।नडूरिति।नेडुणीतिनेड्।वरमनादा

श पिङ्गले। वर्णविशेषे प्राज्यम्। बहुपरागयोरिति। परागः कौसुमे रेणौ स्नानीयादौ रजस्यपीति बोध्यम्। भक्ते ओदने। नीवृति। जनपदे स्थास्थिनस्थूनामिति। संप्रतिभाध्येस्यास्थिनस्थणामिति पठ्य
तेसव्येष्ठाः परमेष्ठी सव्येष्ठा सारथिरिति चोदाहृतं तङ्ङिं चेदं आध्यनवार्त्तिकमिति भिन्न्यमेतत्। वामे। प्रतिकूले सुन्दरे च। इत्यर्थमिति॥ सम्यगर्थमित्यपि बोध्यम्। लक्ष्म्यां मङ्गल इति प्रसिद्धाया
२५ म्। मुक्तादि लगुरौ। प्रपातः कराडा इति लोकप्रसिद्धः। इष्टका। औषधिविशेषः। पादपभेदयोरिति। सस्रुवे सारखेरसे। घूके। पक्षिविशेषे। किमिजानो। सोनकीडे इति भाषया प्रसिद्धे। भ्रमरा स्त्री।
भाषया वेर इति प्रसिद्धा। गोमायुः शृङ्गालः। काण्डे बाणे। वाशितेति स्त्रीकरिणी चेत्यर्थः। नवोद्धृत। नवीनवस्त्रः। प्रादिसमासेनेति। व्यधेरपि बहुलकादुरचं संप्रसारणे इत्यन्ये। व्यथेरेव बाहुल
कात्सशेधकार इति परे। कुलस्त्री भाषया पाउली त्याख्या। पापरोगः शीतलाभेलो जलतरणद्रव्य मस्त्यवसायो निश्वसुः। मकरालयः समुद्रः। अनेकपो हस्ती। कुङ्कुमे। केसरो नल्यौषधादिति। ज
केचित्तु नोडुकेति पठित्वा धातोर्डुगागमसमाहुः। तेषां धातोर्गुणो दुर्लभः चकारबलेन व्यूस्य साधनीयः। डुगागमात्पूर्वं यत्वात् प्रन्तदपि भङ्गी प्रतिव्याख्यानात्। दरिद्रातेः इक्म
आश्चेति भोजदेवस्तु यलोप इति रेफादिकं पदं छित्वा हेधा व्याख्यत्। रिक्ष्व आक्ष्व। दद्रूः। रक्ष्व द्रुक्ष्व आक्ष्व। अन्त्य वा पेन्त्य सदेशस्येति द्वितीयरेफलोपः। दद्रूः। मृगव्यादित्वाद्द
द्रु ह्रस्वान्तश्च। दुर्दुर्णो दर्दुरो गीस्त्यादित्यमरः। इत्यत्र्वत्वारि रूपाणि। अन्दू दृंभू। अन्दू बन्धनमिति। अदिबन्धने। अन्दूः स्त्रियां स्यान्निगडे प्रभेदे [illegible]णस्य चेति मेदिनी। अन्दु
कौ हस्तिनिगड इत्यमरः। सञ्ज्ञायां कन्। केण इति ह्रस्वः। केचित्तु अमगतौ अस्य दुक् अन्दूबुद्धिरिति व्याचख्युः। दृभी ग्रन्थे इति तुदादिः। दृंभूरिति [illegible] भेकश्चेत्यर्थः। कृषक इ
त्यन्ये। अस्य रूपाणि हूहूवदित्युक्तम्। कैयटोप्यत्रानुकूलः ॥ ७ लोपरिस्येशाकविशेषे प्रवालवल्ल्यां चेत्यर्थः। विषये देशे। दन्तधावने खदिरे [illegible]सिनीति प्रियङ्गुः फलिनी फली।
रेणुका लताविशेषः। पुण्डरीककरिण्यां अग्निकोणस्थदिग्गजभार्यायाम्। द्वितीयस्येति। कुटीतिधातोरित्यर्थः। पिटक इति। पिटकः पेटकः पेटी। कुण्डोलवीणा भाषया [illegible] रीत्याख्या। रक्त
वेल्लिका। पुष्पविशेष। धातकी धातुः। आलिर्जलबन्धनम्। कुमारो वरणाख्यो वृक्षः। शब्दयोनीति। भूसत्तायामित्यादिः। महाभूतानि। पृथिव्यादीनि। तद्गुणा गन्धादयः। श्लेष्मा दोषस्ते भवात पि. राम:
त्तेश। रसरक्तादि। रसरक्तमांसमेदो मज्जास्थिशुक्राणि। अश्मति कृति हरितालादिः। आर्त्तवम्। स्त्रीपुष्पम्। रोषणे। सक्रोधे। लक्ष्मणी। चिन्हे। कृषकः। कृषीवलः ॥ २९७

हस्वाह्वरिति। अत्रारुचिबीजन्तु क्विपास्ति द्वे निपातनवैयर्थ्यम्। लाक्षणिकत्वादस्य भुवो वार्त्तिके ग्रहणाभावेनेको यणचीति यण औचित्यम्। क्रुशद्रु इति सोत्र इति। क्रुशान् लातीति क्रुशल इत्य
माधवादयस्तु दृशब्दे उपपदे स्थः क्विप्प्रत्ययः। उपपदस्य दृन्नादेशो निपात्यते। यद्वा दृन्विति नान्तमव्ययं दृढार्थकमुपपदं दृन्भूः तरुः सर्पः कपिर्वेति व्याख्याय दन्करेति यथाव
र्णाभूवद्रूपमस्येत्याहुः। ह्रस्वोपीति। उदाहृतञ्च विक्रमादित्येन। तस्यां जम्बोः फलरसो नदीभूय प्रवर्त्तते इति। यत्तु परिणतजम्बुफलोपभोगहृष्टा इति भारविप्रयोगं ह्रस्वान्तत्वे साधक
त्वेनोदाजहुः। तन्न। इकोह्रस्वोऽङ्यो इति सूत्रेण गतार्थत्वात्। दधिमिति। केचित्तु दधातेरित्वन्दित्वं कुक्च निपात्यते। दधात्यसौ दीधी उरित्याहुः। उज्ज्वलदत्तो कंपाठमाह। केचिलि
ति। एतच्च कैयटमाधवादिमहाग्रन्थविरोधमित्यवधेयम्। अत एव दंभूः स्त्री सर्पचक्रयोरिति भान्ते मेदिनी। मरुदिति। प्रज्ञादित्वादणि मारुतोपि मरुत्शब्दोप्यव्युत्पन्नोस्ति। त
था च विक्रमादित्यकोशः। मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत् इति। संसारावर्त्तश्च। कोयं वाति स दाक्षिणात्यमरुत् इति कविराजः। अत्रानुपपत्तिं मत्वा दाक्षिणात्यपवन इ
ति पाठं कल्पयन्त्यल्पदृश्वान इति वर्णविवेकः। गरुदिति। यवादित्वम्। तेन मतुपो वत्वं न। गरुत्मान्। ग्रो मुट् च। गर्मुत् स्त्री स्वर्णलतयोरिति मेदिनी। विश्वकोशश्चाह। हरिदिति। ह
रिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः। अस्त्रियां स्याच्च तृणे चेति मेदिनी। क्रुरस्यसेति। एतेन गलं गं हिङ्गुतारिरमयि पुमृच्य सवपुषेति पुष्यन्तप्रयोगो व्याख्यातः। रोहिन्त
ष्याङ्गताभेदे स्त्रीनाक इति मेदिनी। शमेर्ढः। बाहुलकादिति। यद्यपि नेड्वशि कृतीत्येव निषेधः सुवचः तथापि नेड्रमनादावितिप्रतिषेधो गणपाठादेवमुक्तम्। शण्ढः स्यात्पुंसि गोप
तौ। आकृशाङ्के वर्षवरे तृतीयप्रकृतावपीति मेदिनी। कमठ इति। कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकमिति मेदिनी। जरठ इति। जॄ वयोहानौ। जरठः कठिने पाण्डौ कर्कशे
प्यभिधेयवत्तु इति विश्वमेदिन्यौ। जरठः कठिने जीर्णे इति वैजयन्ती। शमेः खः। शंखो निधौ ललाटास्थि कंबौ न स्त्री इत्यमरः। शङ्खः कंबौ न योषिन्नाभालास्थि निधिभिन्नखे इति मेदिनी। क
ण्ठः। कण्ठो गले सन्निधाने ध्वनौ मदनपादपे इति विश्वमेदिन्यौ। फलत्रिकमिति। त्रिपलात्पलाचसेति विश्वः। त्रिफलाशब्दसमानार्थस्तु फलाशब्द इति द्विगोरिति सूत्रे रक्षितः। शपेः।
शप आक्रोशे। वृषादिभ्यश्चित्। शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजा इत्यमरः। वृषलस्तुरङ्गे शूद्रे इति हेमचन्द्रः। पललमिति। पल गतौ। पललं तिलचूर्णे च पङ्के मांसे नपुं
सकम्। ना रक्षसे इति मेदिनी ॥ ७ ॥ न्येतृतीयाप्रकृतिर्ना क्लीबः। उदारा वक्रयोरिति ॥

उदारेवकामिनेचेष्टत्यर्थः।पुष्पमिता।पुष्पविशेषः।गोदारणो।हलो।तृणराजः।स्थालिः।कुलपाथेयमत्सरेइतिसमाहारद्वन्द्वः।तेषुइत्यर्थः।पृश्निरोषधिविशेषइत्यर्थः।डिंबिका।भाषया
सरलःपूतिकाष्ठेनाथोदारावक्रयोस्त्रिष्वितिमेदिनी।सरलाविरलायन्तेघनायन्तेकलिद्रुमाः।नशमीनचपुन्नागाअस्मिन्संसारकाननेइत्यभियुक्तप्रयोगः।कमेरिति।बाहुल
कादित्वान्नानुषज्यते।कंबलोनागराजेस्यात्सास्नाप्रावारयोरपि।कृमावप्युत्तरासङ्गेसलिलेतुनपुंसकमितिमेदिनी।मुसलंस्यादयोग्रेचपुंनपुंसकयोःस्त्रियाम्।तालमूल्यामाखुपर्णी
गृहगोधिकयोरपीतिमेदिन्याम्।मूर्द्धन्यमध्योप्ययमितिवर्णदेशना।मुसखण्डनइतिधातोर्दन्त्यान्तेषुमूर्द्धन्यान्तेषुचवोपदेवात्रेयादिभिःपठितत्वात्।उज्ज्वलदत्तादयस्तुतालव्यमध्य
मप्याहुः।अतएवमुसलोमुशलोपिचेति।विश्वकोशेमुशलोपिचेतिपाठान्तरम्।लङ्गेरिति।बाहुलकादिखेवएवमग्रेपि।लाङ्गलन्तालहलयोःपुष्पभिद्गृहदारुणोः।लाङ्गलीगृहपि
प्पल्यामितिहेमचन्द्रः।लाङ्गलीतोयपिप्पल्यांक्लीबन्तुकुसुमान्तरेगोदारणेतृणराजग्रन्थेशरुविशेषयोरितिमेदिनी।कुड्मलोमुकुलेपुंसि[illegible]नरकान्तरे।कोमलंमृदुलेजलेइति
च।बाहुलकादन्यत्रापि।तथाकुशश्लेषणेदन्त्यान्तोनिर्विवादः।वोपदेवमतेतालव्यान्तोपि।गुणः।कोसलःकोशलोवादेशविशेषः।रुढेः।कोसलेति[illegible]तुदन्त्यपाठएवसांप्रदायिकः।
संबसंबन्धे।शंबच।सम्बलंशंबलम्।शंबलोऽस्त्रीसंबलवत्कूलपाथेयमत्सरेइतिमेदिनी।कदिआह्वाने।नलोपः।गौरादित्वात्ङीष्।मदान्दो[illegible]कपूरकदलीदलसम्पन्नया।वि
श्रामायश्रमापनयनाहृन्तमिवाध्वगामितिकाशीखण्डम्।अजादेराकृतिगणत्वाट्टाबपि।कदला।कदलीपृश्न्यांकदलीकदलोपुनः।रंभावृक्षेध्व[illegible]पताकामृगभेदयोः।कदलाडिं
बिकायाञ्चेतिमेदिनी।पिजिहिंसायाम्।न्यङ्क्वादित्वात्कुत्वम्।पिङ्गलोनागभिद्रुद्रचण्डांशुपा रिपार्श्वके।निधिभेदेकपावर्गेपुंसिस्यात्कपिलेन्यवत्।स्त्रियांवेश्याविशेषेचकरि
ण्याङ्कुमुदस्यचेतिमेदिनी।कुशइतिसौत्रोधातुः।कुशलःशिक्षितेत्रिषुमेषेचसुकृतेचापिपर्याप्तेचनपुंसकमितिमेदिनी।कमुकान्तौ।कमलंसलिलेताम्रेजलजेव्योम्निभेषजे।मृगभे
देतुकमलःकमलाश्रीवरस्त्रियोरितिविश्वमेदिन्यौ।मडिभूषायाम्।मण्डलंपरिधौकोठेदेशेद्वादशराजके।क्लीबेथनिवहेबिंबेत्रिषुपुंसितुकुक्कुरेइतिमेदिनी।कोठोमण्डलमित्यमरः।
बिंबो।स्त्रीमण्डलङ्क्रिषिति।कुडिदाहे।पदगतौ।कोठेदेनो।कुण्डलङ्कर्णभूषायांपाशेपिवलयेपिच॥ ७ धाडिइत्युच्यते।पाशश्चोरणांबधसाधनंसूत्रमयम्॥

परिच्छदे।शिबिकाद्याच्छादने।प्रस्तरान्तरेइति॥पाषाणविशेषइत्यर्थः।रुद्रद्रारकोविथारेतिप्रसिद्धः।पांसुला।व्यभिचारिणी॥हस्तिसंवाहोहैस्तिकवचम् ॥ ॥ ॥ ॥ अथपटलम्पिटकेचपरिच्छदे।छदिर्दृग्रोगतिलकेक्लीबंवन्देपुनर्नना॥छलंस्खलितशाठ्ययोरितिमेदिनी।मृजेटिलोपश्च।मलोस्त्रीपापविट्किट्टे[illegible]अभिधेयवत्इतिमेदिनी॥चुपेः।चपलःपारदेमीनेचिरेकेप्रस्तरन्तुरे।चपलाकमलाविद्युत्पुंश्चलीपिप्पलीषुच।नपुंसकेतुशीघ्रेस्याद्वाच्यवत्तरलेचलेइतिमेदिनी॥शकि[illegible]ः।शकलंखण्डेरहितादीनान्त्वचितद्योगात्।छकलीमत्स्यः।मत्स्यान् शकलानितिभाष्यम्।शकलन्त्वचिखण्डेस्यात्रागवस्तुनिवल्कलेइतिमेदिनी॥शमलंशकृदे[illegible]रितिनानार्थरत्नमाला॥छोगुग।छगलंनीलवस्त्रेनाच्छागेस्त्रीवृद्धदारकेइतिमेदिनी॥छगलच्छागेच्छगलीवृद्धदारकभेषजेइतिहेमचन्द्रः।अमन्ताड्डः।अमितिप्रत्याहारः।त्रिभ्यएवकणमाइतिवृत्तिकारोक्तिस्तुअष्टाध्यायीस्थमात्रविषया।दण्डइति।बाहुलकात्तुड्इतिने[illegible]।दण्डोस्त्रीलगुडेपिस्यादित्यमरः।दण्डौसैन्येर्कपार्श्वगावितित्रिकाण्डशेषः।रण्डामूषिकपर्ण्यांच्चविधवायाञ्चयोषिति।खण्डोस्त्रीशकलेनेतुविकारमणिभेदयोः।मण्डःपञ्चाङ्गुलेशाके[illegible]मस्तुनि।चण्डातुपांसुलायांस्त्रीत्रिषुहस्त्यादिवर्जिते।अण्डंमुष्केचपेश्यांस्यात्षण्डंपद्मादिसङ्घातेनस्त्रीस्याद्गोपतौपुमान्।गण्डःस्यात्पुंसिखड्गिनि।ग्रहयोगप्रभेदेचवीप्यङ्के पिटकेपिच।चिह्नवीरकपोलेषुहयभूषणबुद्बुदे।चण्डो[illegible]तिन्तिडीवृक्षेयमकिङ्करदैत्ययोः।चण्डीकात्यायनीदेव्यांहिंस्राकोपनयोषितोः।चण्डाधनहरीशङ्खपुष्पीस्त्रिषुअतिकोपने।तीव्रेपि।पण्डःशठेस्त्रियपिस्त्रीस्यादितिमेदिनी।फणगतौ।फण्डः।प्रज्ञादित्वादण्।फाण्डंसुन्दरम्।क्रादिभ्यःकित्।कुण्डमिति।कुणशब्दोपकरणयोः।किलान्नगुणः।कुण्डमग्न्यालयेमानभेदेदेवजलाशये।कुण्डीकमण्डलौजारात्पत्यौ[illegible]मृतेपुमान्।पिठरेतुननाइतिमेदिनी॥काण्डमिति।कमुकान्तौ।अनुनासिकस्यक्वीतिदीर्घः।काण्डोस्त्रीदण्डवाणार्ववर्गावसरवारिषुइत्यमरः।अर्वाकुत्सितः।अतएवकाण्डस्तम्बेतरुस्कन्धेवाणेवरदनीरयोः।कुत्सितेरहसिन्नाडीशब्देहस्तिनस्त्रियामितिमेदिनी॥गुडोगोलेक्षुपाकयोरित्यमरः।गुडास्नुही।तद्वत्केशाअस्यगुडाकेशः।शिवः।जटाधारित्वात्।गुडःस्याद्गोलकेहस्तिसन्नाहेक्षुविकारयोः।गुडास्नुह्यांस्यात्कथितागुटिकायाञ्चयोषितीतिमेदिनी॥स्थाचतिः।लचासिद्धेआलच्आकारश्चित्यप्रयोजनः।चित्स्वरंबाधित्वापरत्वाद्युदात्तार्थइत्येके।स्थालंभाजनभेदेपिस्थालीस्यात्पाटलोखयोरितिमेदिनी॥चात्वालोयज्ञकुण्डेस्यात्तद्गर्भेचेतिविश्वः।मार्जालीयःस्मृतःशूद्रेबिडालेकायशोधनेइतिमेदिनी।पातालमिति।उपधावृद्धिः।पातालंनागलोकेस्याद्विवरेवडवानलेइतिमेदिनी।चडिकोपेइत्यस्यतुइदित्वान्नुमिगुपधत्वाभावान्नवृद्धिः ॥

भ.टी. २६

नागरे। अभिज्ञे। धूम्याटोऽमरः। षिद्रो विटः ॥

यत्तु माधवग्रन्थे पतिचण्डिभ्यामालञ्निति पठित्वा पातालशब्दे बाहुलकाड्डिमुक्ता आलजिति वृद्ध्यर्थञितङ्के विग्रसठन्निड्लुपन्यस्य चण्डालशब्देपि वृद्धिः स्यादिति दूषितम्। तदलिरभसात्। एके इत्यपरितोषाद्वावनम्। तद्वी जन्तुकुलालवरुडकर्मारनिषादचण्डालमित्रामित्रेभ्यः छन्दसि इति चण्डात्स्वार्थेण्णं विदधता वार्तिके न तद्व्याख्येयाचसहविरोधइतिमो द्धामूतमिति विशिनसुकाड्डा स्याम्। विश प्रवेशने। विड आक्रोशे। मृण हिंसायाम्। कुल संस्त्याने। कपि चलने निर्देशान्नलोपः। पल गतौ। पचि विस्तारे। तमालस्तिलके खड्गे तापिच्छे वारुणद्रुमे। विशाला लिन्द्रवारुण्यां स्त्रजायिन्यान्तु योषिति। नृपवरसभिदोः पुंसि त्वमुलेप्यभिधेयवत्। विडालो नेत्रपिण्डे स्यात् वृषदंशकके पुमान्। मृणालं नलदे क्लीबं पुंनपुंसकयोर्बिसे। कुलालः कुकुभे कुम्भकारे स्त्री त्वञ्जनान्तरे। कपालोस्त्री शिरोस्थि स्यात् घटादेः शकले व्रजे। पञ्चाली पुत्रिकागीत्योः स्त्रियां पुंभूम्नि नीवृति इति मेदिनी। बाहुलकात् स्यतेरपि शाला। शल चलने। स्मात् घञि कायां शाला निशानामिति निपातनात् स्त्रीत्वमिति न्यासकारः। बोपदेवस्तु शालङ् कत्थने इति पपाठ। शाला द्रुस्कन्धशाखायाङ्गृहे गेहैकदेशयोः। नासषे इति मेदिनी। पलेर्बाहुलकादर्थान्तरेपि। पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः। क्लीबं सूते इति मेदिनी। सूते पारदे इत्यर्थः। तरङ्गस्तुरगादीनामुत्काले वस्त्रभङ्गयोरिति विश्वः। विडङ्ग इति। विड आक्रोशे। विडङ्गः कृमिसङ्घे विडङ्गो नागरेऽन्यवत् इति विश्वः। विडङ्गस्त्रिष्वभिज्ञे स्यात् कृमिघ्ने पुंनपुं[illegible]तिमेदिनी। मृदङ्ग इति। मृद क्षोदे। मृदङ्गः पटहे घोषे इति मेदिनी। कुरङ्ग इति। कुविक्षेपे। बाहुलकादुत्वम्। कुर शब्दे इति वास्तु। सारङ्गः पुंसि हरिणे चातके च मतङ्गजे। शबले त्रिषु इति मेदिनी। बाहुलकात् नन नये। अयनारङ्ग पिप्पली सोयमजप्राणिनिकटे नागरङ्गः द्रुमेपि चेति मेदिनी। गन् गम्यद्योः। बाहुलकादसेरपि। अङ्ग ङ्गाक्रउपाये च प्रतीके चाप्रधानके। अङ्गो देशविशेषे स्यादङ्ग संबोधनेऽव्ययमिति विश्वः। अगङ्गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृति। क्लीबैकत्वे त्वप्रधाने त्रिषङ्गवति चान्तिक इति मेदिनी। छा। पूछायते छिद्यते छागः। पूयते सुखं यज्ञार्थमनेन पूगः स्तुक्रमुके वृन्दे इति मेदिनी। खड भेदने। [illegible]गड कशाङ्गे स्यात् निस्त्रिंशे पुंगण्डकेपि चेति शब्दतरङ्गिणी। खड्गो गण्डकशृङ्गासिबुद्धभेदेषु गण्डके इति मेदिनी। भृञः। किद्ग्रहणं स्पष्टार्थम्। अनुस्वरस्यैव लाभात्। भृङ्गो धूम्याट[illegible]षिङ्गयोः। मधुव्रते भृङ्गराजे पुंसि भृङ्गङ्गुडत्वचि इति मेदिनी। शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके। स्त्रि विषाभा स्वर्णमीनभेदर्षीः ऋषभौषधे इति मेदिनी। शृङ्गं विषाणमाख्यातं शैलाग्रे जलयन्त्रके। मीनौषधिसुवर्णानां भेदे शृङ्गी प्रयुज्यते। इति उत्पलिनीकोशः ॥

रा.न.
२६०

हंसेमारवनाः इत्यस्याप्यभिनेति। पद्मचौदात्तत्वमस्येष्यमेतदातदपि बाहुलकादेवाद्यम्। वागुलाविति। अधोमुखतया विष्टाकारिणि पक्षिणि ॥
अण्डन्तःस्थ। करण्डो मधुकोशासिकाण्डे पुद्गलाटके इति मेदिनी। वरण्डोऽन्तरावेदौ समूहमुखरोगयोरिति विश्वमेदिन्यौ। बाहुलकात् वरतेः। तरण्डोऽपि डिशीसूत्रबद्धकाष्ठादिके प्लवे इ-
ति मेदिनी। शरद्वा शरत् स्त्री वत्सरे ऋतौ। दरता स्त्रियां प्रपाते च भयपर्वतयोरपि। भसत् स्त्री भास्वरे योनाविति च मेदिनी। उवेअंबसुलाभिके इति मन्त्रे स्वव्याख्यायां भसद्भग इति
वेदभाष्यम्। जाघन्याः पत्नीः संयाजयन्ति भसद्वीर्याहि स्त्रियः इत्यत्र भसज्जघनमिति व्याख्यातारः। दृणातेः दृषदिः पेषणशिलापट्टप्रस्तरयोः स्त्रियामिति मेदिनी। अर्हिंस्तु सो-
मस्तु हिमद्युतिः पितौ। वानरे च कुबेरे च पितृदेवे समीरणे। वसुप्रभेदकर्पूरे नीरे सोमलतौषधौ इति मेदिनी। धर्मो स्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ। [illegible] पनिषन्न्यायेनाधनुर्ये
त्सोपमेइति च। धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रताविति विश्वः। क्षौमं मदे दुकूले स्त्री क्षौमवल्कलजांशुके। शरणे जसिजेइति मेदिनी। भामः क्रोधे रवौ [illegible] यामस्तु पुंसि प्रहरे संय-
मेपि च कीर्तितः। वामश्च ने पुंसि हरे कामदेवे पयोधरे। वल्गुप्रतीपसव्येषु त्रिषु नार्यां स्त्रियां मता। वामी शृगालीवडवारासभीकरभीषु च। पक्षोऽर्धौ पत्रके मूहनिधिसव्यान्तरे भुजे।
नानागे इति च मेदिनी। यस्य पूजायामिति। यचूज्वलदत्तेन यस्य भसहसनयोरित्युपन्यस्तमस्ति स्वचर्गतेतीयादिलात् न चलस्यमपि तथैवेति भोभिनवम्। असीभ्यान्तेनासिका
भ्यामिति मन्त्रे यस्मय इत्यान्तस्यादित्वनिर्णयात्। न च तदुपन्यस्तधातुष्वन्तस्यादिरिति भ्रमितव्यम्। जक्षत् क्रीडन् रममाण इत्यादिप्रयोगेण तथा कविकल्पद्रुमादिभिः सह
विरोधादिति दिक्। मनिन्प्रत्यये तु नान्तः। राजयक्ष्मेच रोगाणामिति माघः। यक्ष्मणापि परिहाणिराययावितिरघुः। दशायादौ रुक्मौ सुदृहसूत्रे पक्षीति पवर्गीयादिं पठितासोन्नेया
तु। बाहुलकात् नकारस्य नेत्त्वमित्याहुः। क्लारिपरस्येत्युदाहृतं तन्न। पक्षपरिग्रहे इत्यत्रानिनामतार्थत्वात्। नेमः क्लीबेवधौ गर्ते प्राकारे कैतवेपि चेति मेदिनी। नेमस्त्वर्धे प्रका-
रे गर्ते योऽपि च यौ कैतवे चेति हेमचन्द्रः। जहातेः। जिह्मस्तु कुटिले मन्दे क्लीबं तगरपादपे इति मेदिनी। अवतेः। ओं प्रश्नेऽङ्गीकृतौ रोषे इति विश्वः। ग्रसेराचाग्रसुअदेनोअनेमनिन्धा
तोराकारश्च। ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वक इति विश्वः। शब्दादिपूर्वको ग्रामशब्दः वृन्दे। शब्दग्रामो गुणग्राम इति यथा। संपूर्वो यं युद्धे। तदुक्तम्। संपूर्कं संयुगे स्मृतद्रवि-
मेमगरुमिति। अमात्यैः कालेयजमानादिति सेक्रतुमन्त्रे इति वेदभाष्यम् । स्तोमोऽध्वरे रितिः सूक्ष्मतन्तुरित्यन्ये पुष्पतेजसि सूर्ये वा इति मेदनी। पुष्पबलमिति वेदभाष्ये। पुष्पइति।
धोपनुपिसंयुगे इति मेदिनी। दस्मस्तु यजमाने स्यादपि चौरे हुताशने इति च। नपूषणामिति। [illegible] स्वभावे तु दस्मो दर्शनीय इति व्याख्यातम्। निपुरुषास्मोह। रिलस्मोऽपामास्या च्छारिका नियोस्मम।

स्वामीवरोऽभागमनवारि देवहृदारकोऽपि के चन्द्रसहरितौः प्रक्लिसा
नहलिनिघ्नः मरिचे सिन्धुलवणे क्लीबं स्त्री शारिवौषधौ। अग्रस्तुलाङ्-
नाभाक्षत्रिय [illegible] पिवाग्गुलौ ॥

[illegible] दिषु प्रथमः पादः ॥

म॰ यमुना या स्त्रियामा माकुलस्त्रि इति कौ पचौ। शीतिका यामिति मेदिनी। ईर्म मिति। ईर गतौ। व्रणो स्त्रियामीर्ममरुः क्ली वे इत्यमरः। जन जनने। जन्मम्। भविनन्त्यस्तुनान्तः। जन्तुर्जननजन्मानीत्यमरः। उ
२६१ भयसाधारणः। गुञ्जिरु चिरुङ्कम तु काञ्चने लोहे इति विश्वमेदिन्यौ। हन्तेर्हिंच। हिमन्तु पारमेलयो द्रुष्योः स्यान्नपुंसकम्। शीतलेऽवाच्यलिङ्ग इति मेदिनी। भी यो गाङ्गे यचोरस्योः। भीमोम्लवेतसे घो
रे शंभौ मद्यमपाण्डवे। धर्मः स्याद्दानयेश्रीष्मे पुसहोरंभ सोरपि। ग्रीष्मऊष्मर्तुभेदयोरिति च। अशू व्याप्तौ। अम्बः पुंसि देवाग्निजौ रिति विश्वः। लङ्गाकरञ्जभेदे स्यात् फलेनशयेखगान्तरे इति विश्वमेदि
न्यौ। कष्मं पापे पुनौ पुंसि क्लीबम्। एवं शीलाद् बीधु श्रु। विम्लातलतिविवायास्त्रीजगति स्यान्नपुंसकम्। नानाधुद्वात् पुंसि देवप्रभेदे पाविलेऽत्रिषु इति मेदिनी। इणशीभ्याम् वन्। स्तुत्ममिलि देर आप्यम्। कृष्ट
नि। हृस्वशब्दे। हृस्वोन्यक्कृतसर्वे भस्त्रि इति मेदिनी। शेश्चयह्वाद्श्यपारोहणीशितिकर्मा त्रसनेनेति। अन्ये तु पक्षते जेकारस्य हकारो निपात्यत इत्याहुः। यह्वशब्दो वैदिकनिघण्टौ महन्नामसु पठितः।
प्रवेज ह्रूपकृणाम्। यह्वं महान्तमिति वेदभाष्यम्। मीवेति। वेदभाष्ये तु अमीवा इति कुत्वाभ मरोगेऽनाधाहः इत्येतदुक्तम्। अमीवहा वास्तोष्पते इत्यादिमन्त्रात्तत्रानुकूलाः। कनिन्युवृषितक्षि
राजिधन्विद्युप्रतिदिवः। उक्षा। वृषा कर्णे महेन्द्रेना इति मेदिनी। तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट् इत्यमरः। राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ। यक्षे शक्रे च पुंसि स्यादिति मेदिनी। समानौ म
रुधन्वानौ इत्यमरः। अश्म स्त्रियाम्। धनुश्चापौ धन्वशरासनकोदण्डकार्मुकमिति। धन्वा तु मरुदेशे ना क्लीबे चापे स्थलेऽपि चेति मेदिनी। पचिर्गत्यर्थः सौत्रो धातुः। [illegible] गम्युवासः। प्रतिदिक्षेति। प्रतिदी
व्नः [illegible] आकृता [illegible] इति मन्त्रेतु प्रतिदिवा कितव इति व्याख्यातम्। स्वनुक्तत्। कनिप्रत्ययान्ता इति। नायं निदिति भावः। एतच्च हस्यत्र शब्दप्रकरणे मघवन्शब्दे व्युत्पादितम्। कचिन्नु निस्संकलेोऽस्त्वादी
नां स्नेहोपशमन निपातनमाहुः। तद्धोरक्षा दुपेक्षितम् इति। इकारलोपो निपात्यते। पूषेति। पूषन्। पूषा। कौ दोषधिशशाङ्कः योरिति यादवः। मूर्धेति। मूर्धा ना मस्तके स्त्रियाम् इत्यमरः। मज्जेति। यज्वा। यज्वा। उ
ष्मः सार्वत्रा पिमज्जो कीन जन्मा सह इति हिरूपकोशात्। अर्यमा तु पुमान् सूर्ये पितृदेवान्तरेऽपि चेति मेदिनी। परिज्ञायतइत्यादि। एतच्च दशपादीवृत्त्यनुरोधेनोक्तम्। परिज्मा [illegible] स्वं स्थमिति मन्त्रवेद
भाष्ये तु परिज्मा परितो गन्ता। अजेः परिपूर्वस्य नुडागमस्तिलादिष्वत्र अनुस्वरश्च। अकारलोपश्च। आद्युदात्तत्वं निपात्यत इत्युक्तम्। उज्ज्वलदत्तस्तु परिज्वेति पठित्वा जुहोतेरेवो धातुः परिपूर्वः यणादेशः परि य॰ भ॰
ज्वा यज्वा इत्याह। तच्च हविरोधाद्वपेक्ष्यम्। मातरिश्वेति। मातरिश्वा अलुक् उदात्तत्वञ्च निपात्यते। इह श्वन्निति श्व यथेसंप्रसारणम्वन्नेति। मद्युदेतिस्त्रने भिन्न कलरे [illegible] कुक्कुरवाचकस्य श्वन् शब्दस्य तु श्वन् सच २६१
गृहपतावुह सरस्त्वान् इति शब्दप्रमाणमर्थः। तेनाऽभ्योऽपि मयादर्शनदुनि दश पाठान्तुति शब्दो न पठ्यते। इत्युणादिषु प्रथमः पादः ॥

नेभे इति द्भ्रुमानित्यर्थः।कालमानेति।अष्टादशनिमेषाः काष्ठाः।पुटः अस्त्रोघ्नस्तनजलस्याकस्मादुपरिनिर्गमः ॥

कुहूःश्यामा।करेणुरिभ्यांस्त्रीनेभइत्यमरः।करेणुर्गजयोषायांस्त्रियांपुंसिमतङ्गजइतिमेदिनी।गन्धेति।कलापश्चेतिबोद्धम्।कलापस्तुसतीनकः।हरेणुःखण्डकेचास्मिन्नितिवैश्यवर्गेऽमरः।हरेणुर्नासतीनेस्त्रीरेणुकाकुलयोषितोरितिमेदिनीविश्वप्रकाशौ।कुष्ठंरोगेसुगन्धेचेतिविश्वः।नीथेनीथेमघवानंसुतासइतिमन्त्रेनीथशब्दस्योदात्तत्वंबाहुलकात्।नीथेनीथेस्तोत्रेइतिवेदभाष्यम्।रथःपुमानवयवेस्यन्दनेवेतसेपिचेतिमेदिनी।रथःस्यात्स्यन्दनेकायेचरणेवेतसेपिचेतिविश्वः।काष्ठादारुहरिद्रायाङ्कालमानप्रकर्षयोःस्थानमात्रेदिशिचस्त्रीदारुणिस्यान्नपुंसकमितिमेदिनी।उषिकुषि।कोष्ठःकुसूलेवात्मीयेमध्येकुक्षेर्गृहस्यच।गाथाश्लोकेसंस्कृतान्यभाषायांशेषवृत्तयोरितिमेदिनी।अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः।अर्थोविषयार्थनयोर्धनकारणवस्तुषु।अभिधेयेचशब्दानांनिवृत्तौचप्रयोजनइतिमेदिनी।शोथःश्वयथुः।श्रुगतौ।सर्त्तेर्णित्।सार्थोवणिक्समूहेस्यादिवसङ्घातमात्रकेइतिमेदिनी।विश्वप्रकाशे।जरूथम्।जरूथोऽसुरविशेषइतिवेदभाष्यम्।वरूथंस्यात्तनुत्राणेरथगोपनवेश्मनोरितिहेमचन्द्रः।वरूथोरथगुप्तौस्यात्वरूथंरथवेश्मनोरितिविश्वः।पात्।तुत्थोग्रावखण्डेतुत्थानालीसूक्ष्मैलयोरपीतिविश्वः।तुत्थमञ्जनभेदेस्यात्नीलीसूक्ष्मैलयोःस्त्रियाम्।सिक्थोऽस्त्रीपुलाकेनामधूच्छिष्टेनपुंसकमितिमेदिनी।अर्तेः[illegible]रि।ह्रघवाचस्तेनिर्ऋथंसचन्तामितिमन्त्रेनिर्ऋथोहिंसेतिवेदभाष्यम्।निशीथस्तुपुमानर्धरात्रेस्याद्रात्रिमात्रेचेतिमेदिनी।प्रतित्यञ्चारुमध्वरमितिमन्त्रेगोपीथःसोमपानमितिवेदभाष्यम्।यास्कोप्येवम्।तीर्थमितिनिरुक्तिकारः।अववाधइति।गाढोह्रस्वत्वंनिपातनात्।समीणः।समिथशब्दःसङ्ग्रामपर्यायेषुवैदिकनिघण्टौपठितः।अग्नियेजातइतिमन्त्रेसमिथायुद्धानीतिवेदभाष्यम्।युक्तञ्चैतत्।सम्यगेतिजयायमन्त्रेइतिव्युत्पत्तेः।संपूर्वस्यइणःक्थन्नाद्यन्तस्यलोकेपियुद्धार्थत्वदर्शनाच्च।उक्तंह्यमरेणसमीत्याजिसमियुधः।निपृष्ठा।पृषुसेचने।पृष्ठन्तुचरमंतनोरित्यमरः।पृष्ठञ्चरमात्रेपिदेहस्यावयवान्तरेइतिमेदिनी।स्तोत्रविशेषोपिपृष्ठम्।चित्राधिकरणेपृष्ठैःस्तुवतइत्यादौतथापिनिर्णयात्।गूथमिति।गुपुरीषोत्सर्गे।निपातनाद्दीर्घः।एवंयूथेपि।यूथन्तिर्यक्समूहेस्त्रीपुष्पभेदेचयोषितीतिमेदिनी।यूथीपुष्पप्रभेदेस्यात्मागध्यामङ्कुरण्टके।यूथन्तिर्यक्समूहेपिवृन्दमात्रेपिभाषितमितिविश्वः।प्रुङगतौ।निपातनात्गुणः।प्रोथोऽस्त्रीहयघोणायांनाकट्यामध्वगेत्रिष्वितिमेदिनी।स्थापितस्त्रि।द्वात्रिंशतइति।दशपाद्यान्तुत्रयस्त्रिंशदुक्ताः।दंभिवहीतिपठित्वावहग्रा।यथो।उदःअनड्वानित्युदाहरणात्।माघवोप्येवम् ॥

म॰उ॰
९९२

उपविश्य। भूपक पर्णा क्लिन्ने जलार्द्रे। भुग्नस्येति। भुचरतीति मूढः। आनोनुपसर्ग इति कः। पृषोदरादित्वाद्वर्णव्यत्यय इति भावः। आभीलं दुःखम्। सान्तपनादि प्रायश्चित्तार्थं व्रतम्। नृशंसो घातुकः। स्फारमिति। नेड्वशीति नेट्। वलि यलोपः। स्फारः स्यात्तु स्फिरे विकटे करकादेश्च बुद्बुदे इति मेदिनी। तक्रमिति। तञ्चू सङ्कोचे। वक्रः स्याज्जटिले क्रूरे पुटभेदे शनैश्चरे इति विश्वः। वक्रः शनैश्चरे पुंसि पुटभेदे नपुंसकम्। शक्रः पुमान्देवराजे कुटजार्जुनभूरुहोरिति मेदिनी। क्षुद्र इति। क्षुदिर् संपेषणे। क्षुद्रः स्यादधमे क्रूरे कृपणाल्पेषु वाच्यवत्। क्षुद्रा व्यङ्गानटीकण्टकारिकासरघासु च। चाङ्गेरीवेश्ययोर्हिंसामक्षिकामात्रयोरपीति मेदिनी। तृप्रः पुरोडाश इति। ननु प्र उरुष्यसं इति मन्त्रे वेदभाष्यकारैः प्रकृतसूत्रे उज्ज्वलदत्तादिभिश्चैवं व्याख्यातम्। दशपादीर्घत्वौ तु तृप्रमाज्याङ्गुष्ठत्रेयुक्तम्। तृप्रं दुःखमिति तु धातुवृत्तौ माधवः। हिमं तु स्यादिति शब्दार्णवः। दस्यति रोगान् क्षिपतीति दस्रः। दस्रः खरेऽश्विनीसुते इति मेदिनी। दस्रः खरे चाश्विनयोरिति विश्वः। भूपाभिप्रायेति। माधवस्तु। वृत्तिस्वरसमनुरुध्य अविन्द उस्रिया इत्यत्र बाहुलकात्सत्वं नेति व्याचष्टे। उस्रो वृषे च किरणे पुंस्यार्जुन्युपचित्रयोरिति मेदिनी॥ उस्रा गव्युपचित्रायामुस्रस्तु किरणे स्मृत इति विश्वः। वस्रो नादि वमेक्लीबं मन्दिरे च वचर्मण्यथे इति मेदनी। वाश्रो रासभपक्षिणोरित्येके। मा यज्जुषा वाश्रेव विद्युन्मिमातीति मन्त्रे शब्दयुक्ता प्रसूतस्तनधेनुर्वाश्रेति व्याख्यातम्। शुभ्रं स्यादभ्रके क्लीबमुदीप्ते शुक्लयोस्त्रिषु रिति मेदिनी। चुक्रमिति। चक तृप्तौ। चुक्रस्त्वम्लेऽम्लवेतसे चुक्री [illegible]रिकायां स्यात्तु साम्ले तु चुक्रमिष्यते इति विश्वः। चुक्रं रसाम्ले चाङ्गेर्यां स्त्री पुंस्यम्लेऽम्लवेतसे इति मेदिनी। अर्हेर्दीर्घश्च। आर्द्रा नक्षत्रभेदे स्यात्स्त्रियां क्लिन्नेऽभिधेयवत् इति मे[illegible] शुचेर्दश्च। शूद्रो वृषलः। अह हारेत्वा शूद्र इति श्रुतौ तु रूढेर्बाधात् योग एव पुरस्कृतः। तथा च तरत्सन्त्रे भगवता व्यासेन सूत्रितम्। शुगस्य तदनादरश्रवणादिति। कृतेः। अन्त्यस्य च्छः। क्रूरमर्थः सः। अनेकार्थत्वात्। कृच्छ्रमाख्यातमाभीले पापसान्तपनादिनोरिति विश्वमेदिन्यौ। क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवदिति च। बहुलमन्यत्रापि। संज्ञायां रहयति वर्जयति प्रजाः ब्रह्मा। शंसु खं भावयति एवभुः। शोषयति शुष्यत्यादि। छन्दसि। वर्द्धन्तु त्वा सुष्टुतयः पद्मा जजान। बाहुलकादसंज्ञाच्छन्दसोरपि क्वचिदित्याशयेनोदाहरति वान्तीत्यादि। जोरी च। जीरः खड्गे वणिग्द्रव्ये इति विश्वः। जीरस्तु [illegible] इति मेदिनी। ज्यश्चेति। तथा च नधातुलोप इति सूत्रे जीवेरदानुरित्यस्य प्रत्याख्यानार्थं नैतज्जीवेरूपं किं तु रदानुर्ज्यः संप्रसारणमिति भाष्ये उक्तम्॥

राम:
९९२

चषकः। सुरापानपात्रम्। चीरी। विकरदेशप्रेषितपत्रम्। क्षेत्रचये क्षेत्ररक्षणार्थे कुड्ये। कोकिलाक्षस्तालमखाना। कोलो बदरी। कृष्णा पिप्पली। रोचने गोरोचनाख्ये ॥ ॥ सुरः। सुरा चषकमद्ययोः। पुंल्लिङ्गः स्त्रिदिवेशे स्यादिति मेदिनी। सुरो देवे सुरा मद्ये चषकेऽपि सुरा क्वचिदिति विश्वः। सुवति प्रेरयति कर्मणि लोकमिति सूरः सूर्यः। धीरो धैर्यान्विते स्वैरे बुधे क्लीबन्तु कुङ्कुमे। स्त्रियां श्रवणतुल्यायामिति मेदिनी। गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽर्थलुब्धके इति च। शुरिति तालव्यादिर्गत्यर्थः। शूरः स्याद्वीरे भटे इति मेदिनी। शूरश्चारभटे सूर्ये इति विश्वहेमचन्द्रौ। स्मरः स्मृस्मरणावितिह्रूपेषु विश्वः। सीरोऽर्कहलयोः पुंसि चीरी झिल्ल्यां नपुंसकम्। गोस्तने वस्त्रभेदे चीरे लालेखनभेदयोरिति मेदिनी। चीरन्तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च। चिरिकच्छ्रादिका झिल्ल्योरिति विश्वः। वाविन्ध्ये। विध्रन्तु विमलात्मकमिति विशेष्यनिघ्नेऽमरः। वप्रः पितरि केदारे वप्रः प्राकाररोधसोः। रिति धरणिरन्तिदेवौ ॥ वप्रस्ताते पुमान् क्लीबे तु क्षेत्रचये तटे इति मेदिनी। ऋज्र इन्द्रः। ऋज गत्यादिषु। ऋज्राश्वः प्रष्टिभिरंबरीष इति मन्त्रे ऋज्रा गतिमन्तोऽश्वा यस्य स ऋज्राश्व इति वेदभाष्यम्। पुवीयतामनन्तरात्मन्यादित्य——रिति विश्वः। अग्रं पुरस्तादुपरि परिमाणे पलस्य च। अग्रं लम्बने समूहे च प्रान्ते चास्यान्नपुंसकम्। अधिके च प्रधाने च प्रथमे चाभिधेयवदिति मेदिनी। क्षुरः स्याच्छेदनद्रव्ये कोकिले च गोक्षुरे इति विश्वमेदिन्यौ। खुरः कोलदलेशफे। भद्रः शिवे खञ्जरीटे [illegible]के। करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः। काञ्चने च स्त्रियां रास्नाकृष्णाव्योमनदीपुच्छातिथिभेदे प्रसारिण्याङ्कुरफलानन्तयोरपि। त्रिषु श्रेष्ठे च साधौ च नपुंसि करणान्तरे। उग्रः शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे। स्त्री वचासुद्रयोरिति मेदिनी। भेलः प्लवे भीरुके च निर्बुद्धमुनिभेदयोरिति विश्वः। भेलः प्लवे मणौ पुंसि भीरौ वज्ञे च वाच्यवत्। शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान्। रेतोऽक्षिरुग्भिदोः क्लीबं शुक्लो योगान्तरे सिते। नपुंसकन्तु रजते गौरः पीतेऽरुणे श्वेते विशुद्धेऽप्यभिधेयवत्। ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे। गौरी त्वसञ्जातरजःकन्याशङ्करभार्ययोः। रोचनीरजनीपिङ्गाप्रियङ्गुवसुधासु च। आपगायाविशेषेऽपि पादसौपतिपोषितिरिति मेदिनी। नदीभेदे च गौरी स्याद्वरुणस्य च योषितीति विश्वः। अष्टवर्षा तु या दत्ता श्रुतशीलसमन्विते। सा गौरी तनयस्तु यस्तस्य गौरः परिकीर्तित इति ब्रह्माण्डवचनं श्राद्धकाण्डे हेमाद्रिणा उदाहृतम्। अनेन गौरः शुद्धाचार इति भाष्यं व्याख्यातम्। इरा भूवाक्सुराप्सु चेति मेदिनी। मालं क्षेत्रे जने मालो माला पुष्पादिदामनीति विश्वः। मालं क्षेत्रे स्त्रियां स्रजि जने जात्यन्तरे पुमानिति मेदिनी। मालमुन्नतभूतलमित्युत्पलः। क्षेत्रमारुह्य मालमिति मेघदूतः। मणिपूर्वोऽयमर्थान्तरेऽपि रूढः। मणिमाला स्मृता हारे स्त्रीणां दन्तक्षतान्तरे इति विश्वः। बाहुलकात् तिज निशाने रन् दीर्घत्वञ्च। स्यवः। तीव्रा तु कटु

[illegible]

रोहिण्यां राजिकागण्डदूर्वे पीः ॥

नितान्ते।अतिशये।व्यवहरतीत्यर्थइति।तेनदीव्यतीतिसूत्रेणेत्यर्थः।लब्धो नञः।यस्यापत्यमिति।यस्यकुण्डिनस्यवाचकान्नान्तकुण्डिनशब्दात्ङीपितस्याअपत्यमित्यर्थः।कुण्डिनात्तुयञ्दुर्लभः।कुण्डि
त्रिषत्युक्तेनितान्तेचकटौइतिमेदिनी।सामिकसः।सङ्कुसुकोऽस्थिरेइतिविशेष्यनिघ्नेअमरः।कुन्।अपूर्वस्यनिरुपपदस्यअपियन्दात्तोपपदस्यअर्थद्वारकसंबन्धेषष्ठीप्रकृतिप्रत्ययार्थयोः।क्रिया
कारकभावात्।रजकोधावकेशुकेइतिविश्वः।रजकौधावकशुकावितिहेमचन्द्रः।कुट्टछेदने।इक्षून्कुट्टयतिगौडिकः।चषकोस्त्रीसुराभाण्डेमध्यमाद्यप्रभेदयोरितिमेदिनी।लमकः।कृषिविशेषः।
कृषेः।कार्षकः।कृषीवलः।कृषकः।सएवकृषकः।पुंसिफालेस्यात्कर्षकेत्वभिधेयवत्इतिमेदिनी।स्त्रीकृशीकृषिकः।फालइतिरत्नकोशः।उदकस्यउन्दीक्लेदने।ननुकुन्शिल्पीत्यादिनागमार्थमि
दमतआह।प्रपञ्चेति।प्रादि।सङ्घातउपपदस्मात्।आङि।पणि।नन्वनेनैवसिद्धेप्राङोऽस्यनपणिग्रहणंव्यर्थइतिचेन्न।उपसर्गान्तरनिरासार्थत्वात्।आपणिकइति।वणिक्।नित्स्वरेणाद्युदात्तः।आपणे
नव्यवहरतीत्यर्थेठक्।कितुकितइत्यन्तोदात्तः।श्यास्त्या।श्येनःपत्त्रिणिपाण्डुरेइतिमेदिनी।स्त्येन।स्तोरः।स्तेनचौर्येइतिचौरादिकास्यचाद्यवितुनिर्थकारोऽपि।केचित्तुस्तामूर्नांपतयेइत्यादिप्रयोगोप
लंभेननिर्थकारस्यापिष्टेः।धातोर्व्यादिषुमाघवादिभिःस्वीकृतत्वात्प्रकृतसूत्रेपितमेवपठन्तः।स्तेनशब्दे।निर्थकारस्यैवाहुः।हरिणःपुंसिसारङ्गे।विशदेत्वभिधेयवत्।हरिणीहरितायाञ्चनारी
भिद्वृत्तभेदयोः।सुवर्णप्रतिमायाञ्चेतिमेदिनी।रजेःकिच्च।रजिनंकल्मषेक्लीबङ्केशेनाकुटिलेन्यवदितिमेदिनी।अजिनञ्चर्मकृत्तिःस्त्रीत्यमरः।कठिनमिति।कठकृच्छ्रजीवने।कठिनमपिनपुंसा
स्तब्धेतुनपुंसकंस्यात्स्थाल्यांकठिनीखटिकायामपिकठिनागुडशर्करायाञ्चेतिमेदिनी।मलमल्लधारणे।मलिनन्दूषितेकृष्णेऋतुमत्यान्तुयोषितिइतिमेदिनी।कुण्डिनमिति।नमरकुण्डिनम
ण्डजोयथावितिश्रीहर्षः।कुण्डिनस्य।षिः।यस्यापत्यङ्कौण्डिन्यः।परुषिपर्वणिदिनंखण्डितमितितैत्तिरीयश्रुत्यर्थः।द्रुदक्षिभ्यामिनन्।द्रुगतौ।दक्षवृद्धौ।द्रविणंतद्धने[illegible]तेकाञ्चनेचपराक्रमे।दक्षि
णोदक्षिणोद्भूतसरलछन्दवर्तिषु।अवामेत्रिषुयज्ञादिविधिदानेदिशिस्त्रियामितिमेदिनी।दक्षिणःसरलोदारपरछन्दानुवर्तिषु ।
घा
स्यवद्दक्षिणावाचीयज्ञदानप्रतिष्ठयोरितिविश्वः।अर्त्तेः।इरिणंशून्यमूषरमित्यमरः।इरिणन्तुखरेशून्येपीतिमेदिनी।तुहिनमिति।तुहिर्अर्दने।लघूपधगुणेकृतेनहृत्सःतिमिपत्तिभ्याञ्च।
तलप्रतिशयाम।पुलमहत्वे।नलितंविरलेस्तोकेस्वच्छेपिवाच्यलिङ्गकमितिमेदिनी।महेः।कुतस्त्वमिन्द्रमाहिनःसन्नितिमन्त्रेमाहिनोमहनीयःपूजनीयइतिवेदभाष्यम्।नीसेवगर्गादौपाठात्

नितञ्ज्ञे दंभस्याद्इतिवार्त्तिकभाष्ये ॥

षस्य ग्रहणादिति। उच्चरितसमकालग्रहणादित्यर्थः। अयन्तु धात्ववयवस्तरिस्तरीरिति च तदुदाहरणमिति भावः। इत्यवधेयमिति। तच्च तत्र भाष्ये तु रशेरशनाराशिः रश्मिरित्युक्तम्। तिनिशो वृक्षविशेषे। शिष्ट्वीतीति प्राट्। कोः शू डिति शः प्राशौ प्राशः। श्रीरिति। कृदिकारादिति ङीष् तु न कृत्प्रत्ययो य इकार इति व्याख्यानात्। कृदन्तं यदिकारान्तमिति पक्षेऽपि कारग्रहणेन तत्सामर्थ्यादेव केवलग्रहणात्। दुर्घटस्तु ङीषि श्रीमित्यपि रक्षितदृच्छतीत्याह। श्रीर्वेशरचनाशोभाभारतीसरलद्रुमे। लक्ष्म्यां त्रिवर्गसंपत्तिविधोपकरणेषु च। विभूतौ च मतौ च स्त्रीति मेदिनी। जुहोत्यादिसूत्रोदाहृतत्वात्। हुवः। चात् क्विप्। दीर्घौ। स्रुवः कः। स्रु गतौ। स्रुवो यज्ञपात्रविशेषः। अयं स्रुवोऽभिजिघर्ति। स्रुवेणाघारौ जुहोतीत्यादौ प्रा[illegible]दुः। किकः। स्रुव इत्येव योगविभाग उत्तरार्थः। तनोतेः व इति सङ्घातग्रहणम्। तदाह वशब्देति। स्त्रियां तु त्वगसृग्धरेत्यमरः। केशवोक्तमाह। गोर्नेत्यादि। गोः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्। स्त्री सौरभेयी दृग्बाणदिग्वाग्भूस्वप्सु भूम्नि चेति मेदिनी। द्योरिति। कर्त्तर्य्यधिकरणे वा प्रत्ययः। दोरिति। त्रिलिङ्गोऽयमिति प्रागेवोक्तम्। जसिसहो रुरिन्। जसुरयस्तु[illegible]पि[illegible]शुर्गामिति मन्त्रे जसु-

रये श्रान्तायेति नीचायमानं जसुरिं न श्येनमित्यत्र जसुरिं क्षुधितम्। श्येन वत्न श्येनं पक्षिणमिवेति उत[illegible]जामुरुक्रोतावेति मन्त्रे सहुरिः सहनशील इति च वेदभाष्यम्। सुञ्। सवनं त्वध्वरे स्नाने सोमनिर्दलनेऽपि चेति मेदिनी। रवणः शब्दनः[illegible] इति च। वरणस्तिक्तशाकेऽपि प्राकारे वरणं वृतौ इति विश्वः। वरुणो वरुणः सेतुस्तिक्तशाकः कुमारक इत्यमरः। अशेरश्नुट्। जिह्वेति। रस आस्वादने चौरादिकः। ततो नन्द्यादित्वाल्ल्युः[illegible]प्राप्ते ससेति सुज्वा। अथ रसनं स्वादने ध्वनौ। जिह्वायां तु न पुंसि स्यात् रास्नायां रसनास्त्रियामिति मेदिनी। एषा दन्त्यतालव्ययोः र्यव्यवस्था भूरिप्रयोगाभिप्रायेणोक्ता। वस्तुतस्तु द्वावप्यर्थद्वये साधू। तथाहि। तालव्या अपि दन्त्याश्च शंबलशूकराः। रशनापि च जिह्वायामिति विश्वकोशात् जिह्वामुभयम्। रसनं निस्वने स्वादे रसना काञ्चिजिह्वयोरित्यजयधरणिकोशाभ्यां चाप्युभयं साधु। रसनं स्वदने चाथ रसना काञ्चिजिह्वयोः। रसनं स्नापि रास्नायामिति विश्वप्रकाशे इति दिक्। एवञ्च हस्ते अशू व्याप्तौ अश भोजने इति धातुद्वयमपि ग्राह्यम्। रस आस्वादने रस शब्दे इति धातुभ्यां बहुलमन्यत्रापीत्यनुपदं वक्ष्यमाणत्वाच्च। तेन सर्वत्रावयवार्थानुगमेऽपि रूपपद इत्यवधेयम्। उन्देः। ओदनं ना स्त्रियां भक्ते बलायामोदनी स्त्रियामिति मेदिनी। बहुलम्। स्यन्दनं तु स्रुतौ नीरे तिनिशे ना रथेऽस्त्रियामिति मेदिनी। रोचना रक्तकह्लारे गोपित्तवरयोषितोः। रोचनः कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिषु इति च। चदि आह्लादने। चन्दनं मलयाद्रौ। चन्दनः कपिभेदे स्यान्नदीभेदे तु चन्दनी इति विश्वः। चन्दनी तु नदीभेदे चन्दनोऽस्त्री मलयजे भद्रकाल्यां नपुंसकमिति मेदिनी ॥ ७ शेषः। कूटशाल्मल्याम्। यमहारस्य शाल्मल्याम् ॥

जीवद्रुमोविजयसारः।आवलिःपङ्क्तिः ॥

भद्रकालीओषधीविशेषः।भद्रकालीतुगन्धोल्यांकात्यायन्यामपिस्त्रियामितिमेदिनी।असुक्षेपणे।असन्तक्षेपणेक्लीवंपुंसिस्याज्जीवकद्रुमेइतिमेदिनी।अतसातत्यगमने।राजपूर्वः।राजतन्तः।धीरिकायांप्रियालेकिंशुकेपिचेतिविश्वमेदिन्यौ।एवमन्येपिद्रष्टव्याः।रञ्जेःक्युन्।बाहुलकात्कृपेरपि।लत्वाभावश्च।कृपणः।भूसू।बहुलवचनाद्भाषायामपि।भुवनंविष्टपेपिस्यात्सलिलेगगनेजनेइतिमेदिनी।कृष्ट।निधनंस्यात्कुलेनाशेइतिमेदिनी।निधनङ्कुलनाशयोरितिहेमचन्द्रः।धृषेः।धिषणस्त्रिदशाचार्येधिषणाधिषियोषितिइतिमेदिनी।वर्त्तमानेपृषन्मृगेउमान्विन्दौनद्योःपृषतोपिना।अनयोश्चत्रिषुश्वेतबिन्दुयुक्तेपृभाविमोइतिमेदिनी।बृहतीक्षुद्रवार्त्ताक्यांकण्टकार्याञ्चवाचिनि।वारिधान्यांमहत्याञ्चछन्दोवसनभेदयोरितिविश्वः।शतृवद्भावादुगिदचामितिनुम्।बृहन्विपुलः।महतीवल्लकीभेदेराज्येतुस्यान्नपुंसकम्।तत्त्वभेदेपुमान्श्रेष्ठेवाच्यवदितिमेदिनी।महतीनारदस्यवीणा।अवेक्षमाणंमहतीर्मुहुर्मुहुरितिमाघः।जगत्स्याद्विष्टपेक्लीवंवायौनाजङ्गमेत्रिषु।जगतीभुवनेक्ष्मायांच्छन्दोभेदेजनेपिचेतिमेदिनी।[illegible]पुंवाचिनःपुल्लिङ्गस्यनुमिजगन्जगन्तौजगन्तः।इत्यादि।युगमिजुहोतीनान्द्रेचेतिश्रुत्वादितस्यतुनुमभावात्।जगत्जगतावित्यादि।सञ्चिनोतेरिति।सुभूतिचन्द्रस्तुसंपूर्वाच्छूयतेःसंस्त्वदित्याह।तपत्कत्रमिति।चन्द्रसंइत्यन्ये।पिबमधस्त्वपदिन्द्रवृषसेतिमन्त्रेतुतृपत्शब्दोयौगिकः।तृप्यन्नित्यर्थः।वेदभाष्येतुतौदादिकात्तृपतेःशतृप्रत्ययेआगमशास्त्रस्यानित्यत्वान्नुमभावइत्युक्तम्।तत्प्रौढिपे।स्मात्तृम्पएतेनत्वमस्यब्राह्मणाद्तृंपत्पिबेत्यादिमन्त्रान्तरंव्याख्यातम्।गौरित्यनुवृत्तौवेहद्गर्भोपघातिनीत्यमरः।छन्दस्यसानच्।शुगतौ।जृषवयोहानौ।एतेनप्रमन्महइत्यादिमन्त्रद्वयेपिशृ[illegible]सानशब्दस्यगन्तपरतयासौष्ठेवबाहुलकोपष्टंभेनक्लिष्टव्याख्यानंनातीवादर्त्तव्यम्।ऋञ्जिवृधि।ऋजिभर्जने।इदित्वान्नुम्।ततएवनलोपाभावः।एवञ्चअयंमंदिसहीचपूर्वसूत्रे[illegible]ठितुंयोग्याः।किंचतुरआवेवोपसुज्यते।उत्तरसूत्रेपिगुणग्रहणंसुत्यजम्।अर्त्तेःशुट्।वृधेः।किदित्युक्तौसर्वसामञ्जस्यात्।ऋञ्जसानोमेपद्इति।ऋञ्जसानःपुरु वारउक्थैः।अस्मिन् मन्दसानावृषस्तेवसुइत्यादिमन्त्राणांभाष्येतुयौगिकार्थएवपुरस्कृतः।अर्त्तेः।धातोर्गुणः।प्रत्ययस्यसुडागमः।आसाविषदर्शसानायशरुमितिमन्त्रस्यभाष्येअर्शसानायशत्रूणांहिंसित्रेइतिव्याख्यातम्।युधिबुधि——— बाहुलकात्कृपेरपि।कृपाणःखड्गः।कृपाणेनकथंकारंकृपणःसहगण्यते।परेषान्दानसमयेयःस्वकोशंविमुञ्चति।हुर्छेः।पुषोध्याद्समञ्जुरुशपमेनइतिम

श्वितेर्दीर्घः। श्विता वर्णे। अस्मात्सनन्तादानच् सनो लुक् तकारस्य दकारः। किदित्यनुवृत्तेर्न गुणः। पुण्यकर्मेति। स हि उज्ज्वलो भवितुमिच्छति। शिश्विदानोऽकृष्णकर्मेति विशेष्यनिघ्नो अमरः। अकृष्णमशुक्लं शुद्धमित्यर्थः। इह क्षीरस्वामी प्रकृतसूत्रं विस्मृत्य श्विदि श्वैत्ये अस्माल्लिटः कानजिति व्याख्यत्। तत्तुच्छम्। कानचश्छान्दसत्वात् इदित्वेन नलोपानुपपत्तेश्चेति दिक्। कृष्णकर्मेत्यमरे पाठान्तरम्। पापकर्मेत्यर्थः। तत्रावयवार्थानुगमबलेन बोध्यः। शुद्धो भवितुमिच्छतीत्युक्ते हि इदानीमशुद्ध इति गम्यते। तृन्तृचौ। अप्तृन्निति सूत्रेण न्नादिपाठेन साधितम्। औणादिकयोस्तृन्तृचोस्तत्राग्रहणमिति। अतोऽत्र दीर्घो नेत्युदाहरति। संस्तरावित्यादि। नित्वादाद्युदात्तः। तथा च मन्त्रः। ग्रावग्राभ उत शंस्ता सुविप्रः। आदिशब्दात् प्रशास्ता अनुशिष्टो। शास्ति विनयति सत्वान् शास्ता बुद्धः। शास्तरौ। शास्तारः। शास्ता समन्तभद्रे ना शासके पुनरन्यवदिति मेदिनी। प्रपूर्वस्य तु अप्तृन्निति दीर्घः। प्रशास्तारौ प्रशास्तारः। क्षत्ता शूद्राच्च वैश्याजे प्रतीहारे च सारथौ। भुजिष्यातनयेपि स्यात् नियुक्तवेधसोः पुमानिति मेदिनी। कोशानुसारेणाह। वैश्याजाभ्यामिति। अमरस्तु क्षत्रियायाञ्च शूद्रजे इत्याह। याज्ञवल्क्योपि। क्षत्रियायां मागधं वैश्यात् शूद्रात् क्षत्तारमेव चेति। इह बहुलमन्यत्रापीति प्रपञ्चार्थत्वात् उपेक्षितम्। नप्तेति। नञः प्रकृतिभावः पतेस्तृन् अलोपः। त्वष्टा पुमान् देवशिल्पिनि स्यादादित्यभिद्यपीति मेदिनी। जायां मातीत्यन्तर्भावितण्यर्थः। स्वसे। असु क्षेपणे। असदीप्त्यादिषु। आभ्यां सुजि उपपदे ऋन्। यतेः। यती प्रयत्ने। नञि च नन्देः। उषाप्यूषा ननन्दा च ननान्दा च प्रकीर्तिते इति द्विरूपेषु विश्वः। देवेति। भ्रातृ इत्यनुवर्तते। स्वामिनो देवृदेवरौ इत्यमरः। देवृ धवे देवरि आपवे चेति श्रीहर्षः। नयतेः। नुः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः इत्यमरः। सव्ये — । ऋ डिच्चेत्यनुवर्तते। सव्येष्ठेति। तत्पुरुषे कृतीति सप्तम्या अलुक्। अर्त्तिसाधमिः सौत्रः। अरणिर्वह्निमन्थे ना द्वयोर्निर्मन्थदारुणीति मेदिनी। सरणिः श्रेणिवर्त्मनोरिति रन्त्यादेः रभसः। सरणिः पङ्क्तौ मार्गे चेति मेदिनी। शॄ हिंसायाम्। ततः शरणिरित्येके। धारणिरित्येके। शरणिः पथि चावनाविति तालव्यादौ विजयः। इमामग्ने शरणिमिति मन्त्रे शरणिं हिंसां व्रतलोपरूपां मीमृषः क्षमस्वेति वेदभाष्यम्। धमनी तु शिरा हृद्विलासिन्याञ्च योषिति। अशनिः स्त्रीपुंसयोः स्यात् वज्रवा पापवावपि। तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम्। रजनी नीलिनी रात्रिहरिद्राजतुकासु चेति मेदिनी। कुमारी लताविशेषः। तरणी रामतरणी कर्णिका चारुकेशरा। सहा कुमारी गन्धाढ्येति धन्वन्तरिनिघण्टुः। रञ्जेर्नलोपोपि बाहुलकात्। कृषेरादेशश्च। चर्षणिर्जन इति वैदिकनिघण्टौ चर्षणिशब्दस्य मनुष्यनामसु पाठात्। उभा स चर्षणीधृतः। प्र चर्षणिभ्यः इत्यादिमन्त्राणां भाष्ये तथैव व्याख्यानाच्च। अत एव आदेश्च च इति दशपादीवृत्तिपाठस्येह पुरस्कारः। उज्ज्वलदत्तस्तु आदेश्च ध इति पठित्वा धर्षणी बन्धकीति व्याख्यत्। तन्न। तथा सति धृषेरित्येव सूत्रं ये

तां प्रामाण्यं रूपावयवार्थानुगमात्। आदेश्च धइत्यपस्यता
गेन्यायप्राप्तम् ॥

म॰श्री॰
३६५

जित्वरो जयशीलः। दुर्गते दरिद्रे ॥
वर्त्तनिरिति। कृदिकारादिति पक्षे ङीष्। सरणिः पद्धतिः पद्या वर्त्तन्येकपदीत्यमरः। सिपणिरायुधंमिति। उतस्यवाजी क्षिपणिन्तुरण्यतिदृतिमन्त्रस्य वेदभाष्ये तु क्षिपणिर्ङ्केः पणमनुतुरण्यति त्वर
यतिगन्तुमिति व्याख्यातम्। अर्च्चिरिति। सान्तम्। तमर्च्चिषा स्फूर्जयन्निति मन्त्रः। नयनमिव सनिद्रघूर्णितदैपमर्च्चिरिति माघः। ज्वालाभासोर्न पुंस्यर्च्चिरिति नानार्थे सान्ते घमरः। इदन्तोपीति। णिजन्ता
दचइरिति भावः। अर्च्चिर्हेतिः शिखा स्त्रियामित्यमरः। रोचिः शोचिरुभे क्लीबे इति च। दाद्यतेऽनयाच्छृदिः। छृदिः स्त्रियामेवेति लिङ्गानुशासनसूत्रम्। एवञ्च पटलं छदिरित्यमरग्रन्थे पटलसाह
चर्यात् छृदिषः क्लीबतां वदन्त उपेक्ष्याः। रंहेः। बर्हिः पुंसि हुताशने। न स्त्री कुशे इति मेदिनी। द्युनेः। ज्योतिर्भद्योतदिनकरे। पुमान्नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोरिति मेदिनी। वसौ रुचेः। बाहुलकाल्ले
वलादपि। रोचिः शोचिरुभे क्लीबे। अर्तिपृ। व्रणोऽस्त्रियामीर्म्मरुः क्लीबे इत्यमरः। ग्रन्थिर्नापर्वपरुषी इति च। वपुः क्लीबं तनुः शस्ताकृतावपीति मेदिनी। तनुः शरीरम्। तनुषे तनुषेनङ्गमिति सुबन्धुः।
स्यात्तनुस्तनुषा सार्द्धं धनुषा च धनुर्विदुरिति द्विरूपेषु विश्वः। अथास्त्रियां धनुश्चापाविस्यमरः। धनुः पियाले ना नस्त्री राशिभेदे शरासने। धनुर्द्धरे त्रिष्विति सान्ते मेदिनी। चक्षेः। शिलात्त्वार्वधातुकत्वे ख्याञ्
नचक्षते रूपमनुभवन्त्यनेनेति चक्षुः। मुहेः। मुहुः पुनः पुनः शश्वत् अभीक्ष्णमसकृत्समाः इत्यम ~~[illegible]~~ अस्मासिरं बहुलमन्यत्रापीति सूत्रस्य स्पष्टत्वात्त्यक्तम्। कृगृशॄनैक्रतः कर्वरः कर्व्यात्कर्वुरो
यातुरक्षसी इति शब्दार्णवः। शर्वरी यामिनी स्त्रियोरिति मेदिनी। वर्वरः पामरे केशविन्यासे नीवृदन्तरे। वर्वरः फञ्जिकायान्तु वर्वरा शाकपुष्पयोरिति विश्वः। वर्वरः पामरे केशचक्रले नीवृदन्तरे। फ
ञ्जिकायां पुमान् शाकभेदपुष्पभिदोः स्त्रियामिति मेदिनी। चत्वरं स्थण्डिलेङ्गने इति च। नौसदेः। घरजनुवर्त्तते। सदिरप्रतेरिति षत्वम्। निषद्वरः स्मरे पङ्के निशायान्तु निषद्वरीति मेदिनी। इण्णुणादि
पु द्वितीयः पादः॥ कित्वरः स्कन्दने द्रव्ये धूर्त्ते वैरिणि च त्रिष्विति मेदिनी। डुपाञ्। अन्त्यस्य ईत्वम्। एवं पापानइत्यादीनामित्येके। अन्ये तु पीवमीवतीवनीवस्थौल्ये एभ्यः प्रत्यये लोपो वोरिति वलोपमाहुः।
पीवरः कच्छपे स्थूले इति मेदिनी। नीवरो नाम्बुधौ व्याधे इति च स्यान्नीवरो वणिजके वास्तवेपि च दृश्यते। इति मेदिनी विश्वप्रकाशौ। कृद्वरङ्कुत्सिते वाच्यलिङ्गन्तकेन पुंसकमिति मेदिनी। बाहुलकादुपपूर्वा
ज्जुहोतेरुकारलोपः। उपह्वरं समीपे स्यादिकान्तेपि नपुंसकमिति मेदिनी। उपह्वरो रथ इति केचित्। तदुपश्रयस्तमसितिमन्त्रे तु उपह्वरे उपगन्तव्ये समीपदेशे। ह्वृ कौटिल्ये गतिविशेषणे वा विना धातुनाग
तिमात्रमिह लक्ष्यते। ततोधिकरणे पः। कृदुत्तरपदप्रकृतिस्वरत्वमिति भाष्ये व्याख्यातम्। इण्सिञ्। इनः पत्यौ नृपार्कयोः। जिनोऽर्हति च बुद्धे च पुंसि स्यात्त्रिषु जित्वरइति मेदिनी। दीनाम् मूषिकयोषायान्तु
र्गेनेकान्तरेऽन्यवत् इति विश्वः। उजलोग्रीषे पुमान् दक्षाशीनयोरन्यलिङ्गकइति मेदिनी। फेनमीनौ। डिण्डीरोऽब्धिकफः फेन इत्यमरः। मीनो राश्यन्तरे मत्स्य इति विश्वः। क्रुषेः। कृसः सत्यवतीपुं केश

अमरटीका
रामः
३६५

कणा। पिप्पली। एवञ्च सूत्रे वर्णग्रहणमिह स्वप्रयोजनम्। अवक्रयो मूल्यम्। काष्ठाम्बुवाहिनी। सेत्रसेचनार्थं नौकाकृतिः। ष्ठम्। आजिमुष्का। रक्ष विशेषः। कूपकः शुष्कनद्यादौ जलार्थं कृतो गर्त्तः। मन्थानं कृष्णा स्यात् द्रौपदी नीली कणा द्राक्षासु योषिति। मेचकेऽयाच्यलिङ्गः स्यात् क्लीबे मरिचलोहयोरिति मेदिनी। ब्रध्नः सूर्यः ब्रध्नः शिफायां रुद्रे चेति विश्वः। बुध्नो नामूलरुद्रयोरिति मेदिनी। धाष्ट्र। धाना भृष्टयवे प्रोक्ता धान्याकेऽभिनवोद्भिदि इति विश्वः। पर्णं पत्रे किंशुके ना इति मेदिनी। वस्नं त्ववक्रये पुंसि वेतने स्यान्नपुंसकमिति च। वेन इति। लुण्ठाकः प्रजापतिश्च तत्पूर्व्यामहानासिति मन्त्रे मनोः पुत्रेऽपि प्रसिद्धः। लक्ष्मणमित्यादि। लक्षणलक्ष्मणशब्दौ द्वावपि नामचिह्नयोः क्लीबौ। रामभ्रातरि पुंलिङ्गौ हंसयोषायां लक्षणा सारसयोषायां लक्ष्मणा इति व्यवस्थेत्यर्थः। लक्षणं नाम्नि चिह्ने च सारस्यां लक्ष्मणा क्वचित् लक्ष्मणौषधीभेदे सारस्यामपि योषिति। रामभ्रातरि पुंसि स्यात् सश्रीके चाभिधेयवदिति मेदिनी। कोशे तु सारस्या अपि निर्मकारः स्वीकृतः। चेन्नेति। लघूपधगुणः। बाहुलकादिति। एतच्च कृशूः शृ डिति सूत्रे रन्तोयेन विधिरिति सूत्रे कैयटग्रन्थे स्पष्टम्। स्योनः किरणसूर्ययोरिति मेदिनी। कृवृ। कर्णः पृथाज्येष्ठसुते सुवर्णाद्रौ श्रुतावपीति विश्वमेदिन्यौ। वृञ् वरणे। दीर्घपाठे तु वॄ वरणे। वर्णो द्विजातिशुक्लादियशोगुणकथासु च। स्तुतौ ना ना स्त्रियां भेदे रूपाक्षरविलेपने इति मेदिनी। विश्वमेदिन्यौ स्वमाह। जर्ण इति। जर्णो जीर्णद्रुमेंदुषिति हेमचन्द्रः। द्रोणः स्त्रियामाढके स्यात् आढकादिचतुष्टये। पुमान् कृपीपतौ कृष्णकाके स्त्री नीरदन्तरे। स्त्रियां द्रोणी दाम्बुवाहिन्यां गवादन्यामपीष्यते। अन्नं भक्ते च भुक्ते स्यात्। स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमानिति मेदिनी। धेट् द्रुञ्च। धेना नद्यां न दे पुमान् इति मेदिनी। धेनः समुद्रे नद्यां च धेना इति विश्वः। श्लोको धारेत्यादिषु सप्तपञ्चाशत्सङ्ख्याकेषु वाङ्नामसु धेनेति वैदिकनिघण्टौ पठितम्। अत एव धेना जिगाति दाशुषे। इन्द्र धेनाभिरिह मादयस्व इत्यादिषु धेना वागिति व्याख्यातं भाष्ये। तृषि शुषि। ञितृष पिपासायाम्। तृष्णा लिप्सापिपासयोरिति विश्वः। सुञः। सूना अधोजिह्विकापि चेति नान्ते अमरः। सूनं प्रसवपुष्पयोः। सूना पुत्र्यां वधस्थाने गलशुण्डिकयोः स्त्रियामिति मेदिनी। रमेर्नश्च। रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकमिति मेदिनी। चुष्यु व ङ्गतौ। अनेकार्थत्वादिह भाषणे। चुवन्ते भाषन्ते नेनेति विग्रहः। दशपाद्यां तु चुपः किञ्चेति पठ्यते। चुप मन्दायां गतौ चोपनीति चुप्यो मन्दगमनकर्त्ता। सुशृ। सूपो व्यञ्जनसूदयोरिति मेदिनी। शूर्पमिति। बाहुलकादुलरपरत्वं हलि चेति दीर्घः। प्रस्कोटनं शूर्पमस्त्रीत्यमरः। दशपाद्यां तु कुसुभ्यश्च। सभूभ्यां मूडू चेति पठित्वा सर्पशूर्पश्च्युत्यादिनन्दिरूपकोशेषूभयदर्शितम्। कुषुभ्याञ्च। कुशब्दे। युमिश्रणे। आभ्यां यः सनान्तः। धातोर्दीर्घत्वञ्च। कूपः कूपकमन्थानगर्त्तान्तु गुणवृक्षके इति मेदिनी। स्वपः क्रोधे बलात्कृताविति विश्वः॥ कूर्तं मानपात्रं गुणवृक्षकः नौकादौ गुणास्य

जल्पाके बहुवक्ता।कार्मुकम्धनुः विक्रान्तो वीरः।अर्कपर्णोऽर्कवृक्षः।ग्रन्थिपर्णी कुकुरौन्याख्येभाषया ॥
शष्पंबालतृणेपिच।पुंसिस्यात्प्रतिभाहानाविति मेदिनी।विश्वोक्तिमाह।बाष्पइति।बाष्पमूष्मणि चाश्रुणीति कोशान्तरमभिप्रेत्याह।बाष्पश्चेति।रूपंस्वभावेसौन्दर्येनालकेपशुशब्दयोः।ग्रन्थ
वृत्तौनाटकादौ आकरश्लोकयोरपीति विश्वमेदिन्यौ।तल्पमट्टे कलत्रेच शयनीयेच नद्वयोरिति मेदिनी।अमरोक्तमाह।तल्पमिति।स्तनिहृषि।स्तनगदीदेवशब्दे चुरादिण्यन्तौ।हृषतुष्टौ।पुषपुष्टौ।म
दीहर्षग्लेपनयोः घटादिः।स्तनयित्नुः पुमान्वारिधरेपिस्तनितेपिचेति मेदिनी।हर्षयित्नुः सुतेहेम्निपोषयित्नुः पिके द्विजे।स्तनयित्नुः पयोवाहे तडिन्मृगरोगयोरिति विश्वः।गदयित्नुः पुमा
न्कामेजल्पाके कार्मुकेपिचेति विश्वमेदिन्यौ।मदयित्नुः कामदेवे पुमान्मद्ये नपुंसकमिति मेदिनी।कृहनिभ्यांक्नुः।कृत्नुरिति कर्त्तेत्यर्थः।कित्वान्नगुणः।हत्नुरिति।अनुदात्तेत्यादिना।अनु
नासिकलोपः।एवमुत्तरत्रगमेरपि।शस्त्रश्चेति चाद्रुन्ता दशपादीरत्नौतुक्नुरितितकाररहितंपठित्वा कृणुः कर्त्ता हनुर्वक्त्रैकदेशः।बाहुलकान्नलोपः।गमेस्तुजिगत्नुरित्युदाहृतम्।तत्सर्वेषामा
दिकमलस्यविसंज्ञादात।तथाचश्रूयते।सुरूपकृत्नुमूतये।ज्येष्ठराजंभरेकृत्नुम्।अयङ्क्लुरग्भीतः।भोजनस्यास्तहत्नवे।मृगंनभीमउपहत्नुमुग्रम्।योनःसनुत्यउतवाजिगत्नुरित्यादि।अलम्बहन्ति
धातुरूपवतामाधवेनउपहत्नुरित्युदाहृतस्य क्नोः कित्वादत्रनासिकलोपइत्युक्तम्।यत्तुतैत्रैवसुरूपकृत्नुमितिमन्त्रे विरणवतातकारोपजनश्छान्दस इत्युक्तम्।तद्दशपादीवृत्तिमनुसृत्यनतु
वस्तुस्थितिमनुरुध्येतिसहृदयैराकलनीयम्।दाभाभ्यांनुः।दानुर्दातरि विक्रान्तेइति मेदिनी।भानूरश्मिदिवाकरावित्यमरः।वचेः।वग्नुर्वक्ता।धेटः।धेनुःस्यान्नवसूतिकेत्यमरः।विश्वोक्तिमाह।सूनुरि
ति।जहातेः।जह्नुः स्यात्पुंसिराजर्षिभेदे च मधुसूदने इति मेदिनी।विश्वोक्तिमाह।स्थाणुरिति।स्थाणुः कीले हरे पुमानस्त्री ध्रुवे इति मेदिनी।अजिवृ।वेणुर्नृपान्तरे वंशे इति विश्वः।रेणुः स्त्रीपुंसयोर्धू
लौपुंल्लिङ्गः पर्पटे —————— पुनरिति मेदिनी।विषेः किच्चावकारान्वित्।आद्युदात्तः।विष्णुरिष्णुःप्रविष्णवेशूषमाकृदा।कर्कः कर्केतले वह्नौ शुक्लाश्वे दर्पणे घटे इति विश्वमेदिन्यौ।एका
नद्यन्तरेकच्छूनवजातरजः स्त्रियाम्।संपूर्णेन्दुतिथावपीति मेदिनी।राकातुसरिदन्तरे।राकानवरजःकन्यापूर्णेन्दुः पूर्णिमापि चेति विश्वः।इहदाधारासुषाङ्केयाइतिह्रस्वोपिबाहुलकान्ने
तिबोध्यम्।अर्कोऽर्कपर्णेस्फटिके रवौताम्रेदिवसतोइति विश्वमेदिन्यौ।कल्कोऽस्त्रीघृततैलादिशेषेदम्भेबिभीतके।विट्किट्टयोश्च पापेचत्रिषुपौंश्येपुनरिति मेदिनी।बाहुलकाद्रमेरपिकः।रङ्कः
कृपणमन्दयोरिति मेदिनी।कपिलकादित्वाल्लत्वम्।पालङ्कारसः।पुरीषगवाशानि।नीकुलटासुचेति विश्वमेदिन्यौ।स्तंशः।स्तकावाणोत्पलवाताइति हेमचन्द्रः।स्तकंसंशायपथिमिन्द्रतिस्तमाइतिमन्त्रस्य
वेदभाष्येतुस्तकंसरणशीलम्।पविंकृत्स्नःशायसंस्यकोष्णीकृत्लेतिन्यासव्यातम्।भकंचिद्द्रेचकालेचेति मेदिनी।मुष्को मोक्षकवृक्षेस्यात्सङ्घातेवृषणेपिचेति मेदिनी।शुक्रोव्यासस्तुतेकीरेरावणस्य च म

टी०।शल्कोमत्स्यत्वक्।पीठसर्पीपङ्गुः।रक्तिकागुञ्जा।नाकुवल्मीकम्।इतोमनुष्येति।कृदिकारादिस्युचितम्।प्रत्ययसञ्ज्ञायादितिपक्षेनेत्येवयुक्तम्।।मू०।।वल्कंवल्कलशल्कयोरितिच।उल्काज्वालाविभावसोरिति।भूतिचन्द्रः।दूष्यभौ।एकंसंख्यान्तरेश्रेष्ठेकेवलेतरयोस्त्रिष्वितिमेदिनी।।काकःस्याद्वायसेवृक्षप्रभेदेपीठसर्पिणि।शिरोवक्षालनेमात्रप्रभेदेद्वीपभेदयोः।काकास्त्रीकाकनासायांकाकोलीकाकजङ्घयोः।रक्तिकायांमलधान्यकाकमाच्यामयोषिति।कंसुरतबन्धेस्यात्काकानामपिसंहताविति विश्वमेदिन्यौ।।पाकःपरिणतौशिशौ।केशस्यजरसाशौक्ल्यंस्यात्पादोदनेमिषु।शल्कन्तुशकलेवल्केइतिमेदिनी।शल्कैरपिमिन्धानइतिमन्त्रेकाष्ठखण्डैरितिव्याख्यातारः।मर्कइति।मर्चिःसौत्रोधातुरितिबहवः।वर्मशब्देघोरादिकइतिसिद्धचोन्त्यात्सूत्रेकैयटः।मर्तोमर्त्तसवेयतिद्रूपेनेतिमन्त्रेमर्चयतिविधेयीकरोतीतिभर्त्सयतीतिवेदभाष्यम्।नचैवंणिलोपस्स्यानिवद्भावाकुत्वंनस्यादितिवाच्यम्।पूर्वत्रासिद्धेतद्भावात्।बाहुलकात्शपतेःकन्।शाकोद्वीपान्तरेपिच।शाकोद्रुमविशेषेचपुमान्हरितकेस्त्रियामितिमेदिनी।नोहः।निहाकागोधिकासमेइत्यमरः।शाकंमश्यनिहाकयेतिरितिश्रुतिः।निष्कमस्त्रीसाष्टहेमशतेदीनारकर्षयोः।वक्षोलङ्करणेहेममात्रेहेमपलेपिचेतिमेदिनी।स्मेकःसमुद्रे।स्मीकामिसीकापीस्त्रीस्मीकोनाकुवृक्षयोरितिमेदिनी।अजियुसम्यःकुः।स्याद्दीर्घश्च।तत्सामर्थ्याद्गुणाभावः।शकेः।शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाइत्यमरः।शकुनस्तुपुमान्पक्षिमात्रेपक्षिविशेषयोः।शुभशंसिनिमित्तेचशकुनंस्यान्नपुंसकमितिमेदिनी।शकुन्तःकीटभेदेस्याद्भासपक्षिविहङ्गयोरिति।शकुनिःपुंसिविहगेसौबलेकरणान्तरेइतिच।बाहुलकात्कमेरपिप्रत्ययादिलोपेकुशब्दादेशः।कुन्तिः।इतोमनुष्यजातेरितिङीष्।कुन्तीपाण्डुप्रियायांस्याच्छल्लक्यांगुग्गुलुद्रुमेइतिमेदिनी।कन्युन्।क्षिपण्युस्तुपुमान्देहेसुरभौवाच्यलिङ्गकइतिमेदिनी।भुवन्युःस्यात्पुमान्भानौज्वलनेशशलाञ्छनेइतिविश्वमेदिन्यौ।।करुणः।करुणस्तुरसेवृक्षेकृपायाङ्करुणामतेतिविश्वमेदिन्यौ।।वरुणस्तरुभेदेस्युप्रतीचीपतिसूर्ययोरितिविश्वः।दारुणोरसभेदेनात्रिषुतुस्याद्भयावहेइतिमेदिनी।गौरम्।तरुणङ्क्रुयेमारुवकेयूनिचत्रिष्वितिमेदिनी।तरुणीतलुनीतिचेतिद्विरूपेषुविश्वः।क्षुधिपिशि।पिशुनङ्कुङ्कुमेस्मृतम्।कपिवक्त्रेचकाकेनासूचकक्रूरयोस्त्रिषु।पृक्कायांपिशुनास्त्रीस्यादितिमेदिनी।मिथुनन्द्वयोराशिभेदेस्त्रीपुंसयुग्मकेइतिच।फलेः।फल्गुनस्तुगुडाकेशेनदीजार्जुनभूरुहे।तपस्यसञ्ज्ञमासेतत्पूर्णिमायाञ्चफाल्गुनीतिमेदिनी।अण्चेति।प ।द्विलातसेणिल्यर्थः।फल्गुनःफाल्गुनेर्जुनइतिद्विरूपकोशः।अशेलश्च।अशभोजनेअस्मादुनन्धातोर्लशादेशश्चालशुनम्महाकन्दः।उशनालशुनंवेस्मकस्मलंविश्वमप्यवदितिमद्धनी।लक्ष्मेषुविश्वः।लसचेतिपाठस्तुप्रामादिकः।अजेर्णिलुक्।अत्रणेरनिटीतिलोपेनसिद्धेणिलुकचेत्सुक्तेःफलञ्चिन्त्यम्।अर्जुनःककुभेपार्थेकार्तवी

मयूरयोः।मातुरेकसुतेस्याद्धवलेपुनरन्यवत्।अर्जुनन्तुतृणेने
त्ररोगेचाप्यर्जुनीगवि।दुर्गायांबाहुदानद्यांकुट्टिन्यामपिच

म॰श
२६७

टी॰।जराजरामोक्षौ।लक्षविशेषाद्विवि।बहिष्ठसंवत्सरेतिस्वरविधायकन्तूपायान्तरंबोध्यम्॥ मू॰॥क्वचिन्तु इतिविश्वमेदिन्यौ।अर्भैश्च।अरुणोव्यक्तरागेऽर्केसंध्यारागेऽर्कसारथौ॥निःशब्देकपिले कुष्टभेदेनागुणिनित्रिषु।अरुणातिविषाश्यामामञ्जिष्ठात्रिवृतासुचेतिमेदिनी।अजिघ्रसि।विश्वानिदेववयुनानिविद्वानितिमन्त्रेवयुनानिप्रज्ञानानीतिदेवभाष्यम्।वैदिकनिघण्टौप्रज्ञानामीयेप्रशस्यपर्यायेचवयुनशब्दः पठितः।वृत्।वर्सन्तसमिति।तितुत्रेतिनेट्।षत्वन्तुनभवति।बाहुलकेनषत्वेकर्तव्येप्रत्ययसञ्ज्ञायाअप्रवृत्तेः।कृत्सशब्देतुषत्वंभवत्येव।एतच्चसर्वमादेशप्रत्यययोरितिसूत्रेभाष्यकैयटपदमञ्जरीषुस्पष्टमेव।उणादिवृत्तिकृतस्तुसर्वेपीहषत्वमुदाजह्रुः।तेषामयमाशयः।अस्तुभाष्यप्रामाण्याद्वर्सन्तसमितिदन्त्योपिसाधुः।बाहुलकबललभ्यषत्वाभावस्यपाक्षिकत्वेपिबाधकाभावात्सषत्वमस्तु।हृषितृषिभ्याड्·पिण्यन्तादेरविघञर्थेकप्रत्ययेवावर्षतर्षशब्दयोर्दुर्वारत्वात्।अत्विषीभयादीनामुपसंख्यानंनपुंसकेक्तादिनिवृत्त्यर्थमित्यत्रवर्षमित्युक्तेरुदाहृतत्वाच्चेतितस्माद्दिहदिरूपताफलिता।वर्षाः स्त्रीभारतादौस्याज्जम्बुद्वीपाब्दवृष्टिषु।प्रावट्कालेस्त्रियांभूम्निइतिमेदिनी।तर्षौलिप्सोदन्ययोरितिच।पुत्रादौतर्णकेवर्षवत्सः क्लीबेन्तुवक्षसिइतित्रिकाण्डशेषः।हंसः स्यान्मानसौकसि।निर्लोभनृपविष्णवर्कपरमात्मसुमत्सरे।योगभेदेमन्त्रभेदेशरीरमरुदन्तरे।तुरङ्गमप्रभेदेचेतिमेदिनी।कंसोऽस्त्रीतैजसद्रव्येकांस्येमानेऽसुरेतुनेतिचाक्षघोटेत्यान्तरेस्मृतः।कांस्येपात्रेचमानभेदेचकीर्तितइतिविश्वः।कक्षास्यात्सरीसृपस्यपश्चादञ्चलपल्लवे।स्त्रीद्यांनातुदोर्मूलकच्छवीरुत्तृणेषुचेतिमेदिनी।तुषेः।प्लक्षोजटीगर्दभी हिङ्गुपमिलुर्ज्जराग्यनेइतिमेदिनी।प्लक्षोद्वीपविशेषेस्यात्पर्कटीगर्दभाण्डयोः।पिप्पलेद्वारपार्श्वेचगृहस्यपरिकीर्तितइतिविश्वः।मानेमांसंस्याद्दामिषेक्लीबंकक्कोलीजटयोः स्त्रियामितिमेदिनी।अशेः।अथाक्षमिन्द्रिये।नातूनाङ्गेकर्षचक्रेव्यवहारेकलिद्रुमेइत्यमरः।अक्षोज्ञानात्मशकटव्यवहारेषुपाशके।रुद्राक्षेन्द्राक्षयोः सर्पविभीतककयोरपि।चक्रेकर्षेपुमान्क्लीबन्तुसौवर्चलेन्द्रियेइतिमेदिनी।सुवर्णे।ऋक्षः पर्वतभेदेस्यादृक्षकेशोणकेपुमान्।ऋक्षस्तेवध्यानेन्यलिङ्गंनक्षत्रेचनपुंसकमितिमेदिनी।ऋषेर्जातौ।नियमार्थमिदंसूत्रं।ऋषेर्जातावेवेति।तेनान्येभ्यः केवलयौगिकत्वेपिप्रत्ययः।उन्दिगुधि।गुत्सः स्यात्स्तबकेसंषेहारभिद्ग्रन्थिपर्णयोरितिमेदिनी।गुच्छस्त्वागुत्सोगुच्छोगुलुच्छवदितिहिरूपकोशात्।स्याद्गुच्छः स्तबकेस्तबेहारभेदकलापयोरितिचवर्गद्वितीयान्तमेदिनीकोशाच्च।गधिपणौः।गृधेप्रत्वेनसिद्धेभपूभावनिवृत्त्यर्थेदकारविधिः।पक्षोमासार्द्धकेपार्श्वेग्रहेसाध्यविरोधयोः।केशादेः परतोवृन्देबलेससखिसहाययोः।चुल्लीरन्ध्रेपरस्रेचराजकुञ्जरपार्श्वयोरितिविश्वमेदिन्यौ।अंशेः सरः।अक्षरंस्यादपवर्गेपरमब्रह्मवर्णयोरितिहेमचन्द्रः।उज्वलदत्तादयस्तुअशेः सरान्तेतिपेठुः।तन्न।नित्स्वरापत्तेः।इष्यतेतुप्रत्ययस्वरेणास

पुरधाम्नस्समद्योदात्तमण्डलोअस्तुऽध्यमध्यो।मन्त्रा।अस्
ऽकेऽभिमतिवस्त्रवोर्णाइत्यादृङ्·मन्त्रेष्वीणिचश
पद्मः
२६७

मू०॥तानिषष्टिश्चासराणीतियजुषिचतथैवपाठात्।अतएवद्वितीयाह्निकान्ते।अश्योतेर्वात्तरोत्सरमितिभाष्यकृतोक्तम्।सपूर्वाचित।पूर्वेणसहितःसपूर्वः।इद्वत्सरायपरिवत्सरायसंपूर्वादिनिपा
ठस्तुलस्यविरोधात्।धातुपेस्सः।कृधू।कृसरइत्यादिहारावलीस्थम्।धूसरीकिन्नरीभेदेनागरेत्रिषुपाण्डुरेइतिमेदिनी।मत्सरामक्षिकायांस्यान्मात्सर्यक्रोधयोःपुमान्।असह्यपरसंपत्तौकृपणेत्वाभिधे
यवत्इति।मत्सरोन्यशुभद्वेषेतद्वत्कृपणयोस्त्रिष्वितिअमरः।अयमत्सरः।असह्यपरसंपत्तौमात्सर्येकृपणेकुधीतिविश्वः।वेदेतुयोगंपुरस्कृत्यप्रयुज्यते।इदुमिन्द्रायमत्सरम्।तंसिन्धवोमत्सरमि
न्द्रपानमित्यादि।मत्सरंहर्षहेतुमितितद्भाष्यम्।अमरोक्तिमाह।त्सरइति।अनुदात्तोपदेशेत्यादिनाऽनुनासिकलोपः।ऋक्षरः।ऋक्षलिकइति।ऋक्षरन्तोयथारायाम्।ऋक्षरंऋत्विजिस्मृतमितिमेदि
नी।अनृक्षराऋजवःसन्तुपन्थाइतिमन्त्रस्यवेदभाष्येतुऋक्षरःकण्टकइतिव्याख्यातम्।पीयुक्कणिभ्याम्।राजादनप्रियालुःस्यादित्यमरः।प्रियालःस्यात्पियालवदितिद्विरूपकोशः।बाहुलका
दुञ्जेरपिकालन्तलोपःन्यङ्क्वादित्वात्कुत्वम्।भगालेनरमस्तकम्।मत्वर्थेइनिः।चण्डीकान्तोभगालीचलेलिहानोवृषध्वजइतिराजशेखरः।कठिकुषिभ्याम्।कठकृच्छ्रजीवने।कुषनिष्कर्षे।कुषा
कुःकपिवह्न्यर्केनापरोनापिनित्रिष्वितिमेदिनी।उज्वलदत्तस्तुकठिकुषिभ्यामितिपठित्वाकण्टशिखेतिदण्डकधातुमुपन्यस्यकण्टाकुरित्युदाजहार।तत्कोशस्थैर्विरुद्धम्।मेदिनीकोशेउकारप्रक्रमेपाठा
त्।सर्त्तेःसदाकुर्न्निलेचकेस्खलनेप्रतिसूर्यकेइतिमेदिनी।वृन्तेः।वार्त्ताकुरपिवार्त्ताकेवृन्ताकोपिंचदृश्यतेइतिद्विरूपेविश्वः।वार्त्ताकीहिङ्गुलीसिंहीभण्टाकीदुःप्रधर्षिणीत्यमरः।वार्त्ताकंपित्त
लङ्किविदङ्गरपरिणाविक्रमिनिरैश्यकशास्त्रम्।पर्दः।विश्वोक्तिमाह।पृदाकुरित्यादि।पृदाकुर्वृश्चिकेव्याघ्रेसर्पेचित्रकयोःपुमानितिमेदिनी।सृजः।सरण्युस्तुपुमान्वारिवाहेस्यान्मातरिश्वनिइतिमे
दिनी।सरण्युरत्यसूनुरण्युरितिमन्त्रस्यभाष्येतुसरण्युःशीघ्रगामीतिव्याख्यातम्।यवागूरुष्णिकाश्राणाविलेपीतरलाचसेत्यमरः।वचक्नुस्तुपुमान्विप्रेवावदूकेभिधेयवदितिमेदिनी।ऋषि
विशेषेप्ययम्।यस्यकन्यावाचक्नवीतिप्रसिद्धा।आनकः।भयानकःस्मृतोव्याघ्रेरसेराहौभयङ्करेइतिमेदिनी।शिंघाणकइति।शिघिआघ्राणे।शिङ्घाणंकाचपात्रेस्यात्लोहनासिकयोर्मलइतिविश्वः।
शिङ्घाणःफेनडिण्डीरेनक्रेतत्पिच्छलइतिविक्रमादित्यकोशः।हारावलीस्थमाह।शिंघाणमिति।उल्मुकमितिच।दर्विःकम्बिःखजाकाचेत्यमरः।ह्रियःकुक्।प्रत्ययोयङ्कारोगुणनिषेधा
र्थः।हस्तिमृ।हस्तःकरेकरिकरेसप्रकोष्टेकरेपिच।ऋक्षेकेशात्परोव्रातेइतिमेदिनी।मर्त्तोभूलोकः।तत्रभवोमर्त्यः।दिगादेराकृतिगणत्वाद्यत्।गर्त्तस्त्रिगर्त्तभेदेस्यादवटेचकुकुन्दरे।एतःकर्बुरेआ
गते।अन्तःस्वरूपेनाशेवानस्त्रीशेषेन्तिकेत्रिषु।दन्तोदकरटकेकुञ्जेदशनेचौषधौस्त्रियामितिमेदिनी।लोतमश्रुणिचोरितेइतिविश्वः।क्तक्तवतूइतिसूत्रेलोतोमिषइतिकैयटः।पोतःशिशौ

वहित्रेचेतिविश्वमेदिन्यौ।धूर्त्तइति।धुर्वीहिंसायाम्।लोपो
व्योरितिवलोपः।क्लिनीत्वजतुर

टी०॥ बहुवारस्तरुर्लेहसो राख्यः। शैलजं शिलाजतुः। कुचन्दनम्। रक्तचन्दनम्। नदान्तरे। ब्रह्मपुत्राख्ये॥ मू०॥ तिपक्षे तु रालोप इति लोपः। हलि चेति दीर्घः। धूर्त्तन्तु खण्डेलवणे धत्तूरे नाशठे त्रिष्विति मेदिनी। तनिमृङ्भ्याम्। ततं वीणादिकं वाद्यमित्यमरः। अथ ततं व्याप्ते विस्तृते च त्रिलिङ्गकम्। क्लीबं वीणादिवाद्ये स्यात् पुंलिङ्गस्तु समीरणे। मृतन्तु याचिते मृत्यौ क्लीबं मृ[illegible]स्तु म[illegible]न्त्रिष्विति मेदिनी। अग्निजि। अक्तपरिस्कृतम्। अक्तपरिमाणस्य वाचक इति भाष्यस्य केचित्पठेन तथा स्यास्मानत्वात्। अत्र व्यस्तं प्राप्ते च सङ्कुले इति विश्वप्रकाशे लिपिभ्रमात् क्तं व्याप्ते च सङ्कुले इत्युदाहरन्तु न्त्वल दंवो भानत्वादुपेक्ष्यः। तथा च मेदिन्याम् अकारादिप्रक्रमे व्यस्तन्तु व्याकुले व्याप्ते इत्युक्तम्। घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत्। सितमवसिते च बद्धे धवले त्रिषु शर्करायां स्त्रीति मेदिनी। ऋ गतौ। बाहुलकात् क्तः। ऋतमुञ्छशिले जले। सत्ये दीप्ते पूजिते स्यादिति मेदिनी। दुतनिभ्याम्। दूतः प्रेष्यः। गौरादित्वात् ङीष्। दूती। अथ कथन्तेन दूतिविदितं निषेदुषेति रघुः। दूङ् परितापे। अस्मात् क्तिच्। दूत्वान्दूतिरपि स्मृतेति द्विरूपकोशः। तातोऽनुकम्पे जनके इति विश्वमेदिन्यौ। बाहुलकात् शीङोऽपि। शीता लाङ्गलपद्धतिः। रामपत्नी च। शीता नभःसरिति लाङ्गलपद्धतौ च। शीता दशाननारिपोः सहधर्मिणी च। शीतं स्यादहिमगुणे च तदन्विते च। शीतो लसे च बहुवारतरौ च दृष्ट इति तालव्यादौ धरणिः। शीता दन्त्यादिरपि। सीता लाङ्गलपद्धतिः वैदेही स्वर्गगङ्गासु इति मेदिनीकोशात्। सीता लाङ्गलरेखा स्याद्व्योमगङ्गा[illegible]की इति दन्त्यादौ रभसकोशाच्च। अत्र तकं सूत्रम्। जेर्मूट् चोदात्तः। जि जये। अतः क्तस्य मूडागमः स चोदात्तः धातोर्दीर्घश्च। जीमूतस्येव भवति। जीमूते द्वौ भूतिकरे देवताडे पयोधरे इति मेदिनी। वे[illegible] खरा गरी देवताडो जीमूत इत्यपि इति अमरः। जीमूतः स्याद् भृतिकरे शक्रे द्वौ घोषके घने इति विश्वः। इदं सूत्रमनार्षमिति पुरुषोत्तमः। अतएव आकरे पृषोदरादिषु जीमूतशब्द उदाहृतः। लोष्टमिति। लोष्टानि लेष्टवः पुंसि इत्यमरः। अत्र पुंस्त्वं तु भयान्वयि। तेन पुंनपुंसकलिङ्गोऽयम्। तथा च स्याद्यैः तरतमसूत्रे भाष्यम्। लोष्टः क्षिप्तो बाहुवेगं गत्वा इत्यादि। अतएव लोष्टंदेऽपि लोष्टः स्यादि[illegible]डुस्काण्डे वा। पलितः। पलितं शैलजे तापे कोशपाके च कर्दमे इति मेदिनी। हरिता स्त्री च दूर्वायां हरितवर्णयुते त्वभिधेयवदिति च। रुहेः। रोहितं कुङ्कुमे रक्ते ऋजुशक्रशरासने। पुंसि न्मीनमृगयोर्भेदे रोहितकद्रुमे। रोहितं रक्तगोशीर्षकुङ्कुमाक्तिकचन्दने। पुमान्मदान्तरे भौमे वर्णे च त्रिषु तद्वतीति मेदिनी। पिशेः। पिशितं मांसं मांस्यां स्त्रीति मेदिनी। मांस्यां जटामांस्याम्। तथा च। जटा च पिशिता पेशीति धन्वन्तरिः। मृदसि। उदात्तस्तु चेभवसिन्त्रवाच्य इति मन्त्रे श्रवाय्यो मरुद्भिः श्रवणीय इति वेदभाष्यम्। दसायो यो दम आस नित्यः। विश्व[illegible]स्य सस्रहयाप्यस्य राजन्। मित्र इव यो दिधिषाय्यो भूदित्यादिषु पि येमि कार्यस्य एव भाष्य उरस्कृतः। उज्ज्वलदत्तस्तु दधिषाय्य इति सूत्रं पठित्वा दधिपूर्वात्स्यातेराय्यः प्रत्ययः। दधिषाय्यो घृतं इति व्याख्यानात्। दशपादीवृत्तिकारस्तु दधिशब्दस्य हि लङ्गाभावः। अभ्यासस्य निपातन इत्याह। प्रसादकारस्त्वौपे वमेव प्रतिपन्नः। तदेतत्सर्वं ङ्स्य विरोधादिदं भाष्यविरोधाच्चोपेक्ष्यम्। स्तुषेय्यं स्तोतव्यम्। पुरुवर्पसम्। बहुरूपमिति वेदभाष्यम्॥

टी०। दुर्वर्णरूप्यम्।

मू०। यत्तूज्ज्वलदत्तेनसुवःकोष्मइतिपठित्वाकित्वाद्गुणाभावउवङादेशस्तुवेय्यःपुरन्दरइत्युक्तम्।तन्न।वेदतद्भाष्यादिविरोधात्।तस्मादिहक्सेय्यप्रत्ययंपठन्दशपादीवृत्तिकृदेवज्यायान्।पर्जन्योमेघशब्देचध्वनदेवुदशक्रयोरितिमेदिनी॥अजयकोशस्यमाह।वदान्यइत्यादि।अमिनक्षि।नक्षगतौ।विधिःप्रकृत्यन्तरम्।नक्षन्नमिति।नभ्राण्नपादितिसूत्रेणनञःप्रकृतिभावउक्तः।स्वदेःसौत्रादनिनञ्समासेअत्यन्तसन्तरन्तादितिबोध्यम्।यज्ञोयष्टव्यदेवता।सतोवासुवीतेगच्छतांसंयजत्रैरङ्गानीतिमन्त्रेतथादर्शनात्।गडेः।गडसेचने।कलत्रंश्रोणिभार्ययोरित्यमरः।वजश्वित्।चित्वादन्तोदात्तः।वदत्रासानावीनह्यमानः।सुविदेःकत्रः।इहप्रायेणकत्रन्नितिनितंपठन्तितत्सामादिकम्।बृहस्पतेःसुविदत्राणिराध्येत्यादौनित्स्वरादर्शनात्।कृदुत्तरपदप्रकृतिस्वरेणप्रत्ययस्वरस्यैवदर्शनाच्च।धन्वच्यवृक्तैस्तैश्चोतिमन्त्रोपितथैव।कृन्तत्रंछेत्तनीयमरण्यमितिवेदभाष्यम्।भृमृ।भृञ्भरणेमृङ्प्राणत्यागे।दशिर्प्रेक्षणे।दशपाद्यान्तुभृदृशीङितिपठित्वादङ्आदरेध्रियतेदरतःशेतेशयतइत्युक्तम्।तन्न।कृन्तत्रमभिन्दर्शतंइहहन्तम्।तरणिर्विश्वदर्शतः।दैव्योदर्शितोरथइत्यादिमन्त्रेस्तद्भाष्येणचविरोधात्।भरतोनाट्यशास्त्रेसुनौनटे।रामानुजेचदौष्यन्तौइतिमेदिनी॥यजतःत्रिलिङ्गिरिज्ज्वलदत्ताद्यनुरोधेनोक्तम्।त्रिनोश्विनायजतहिरण्यशर्म्यंयजतोरहन्तमित्यादिषुयजतशब्दोयष्टव्यपरतयैववेदभाष्येव्याख्यातः।पर्वतःपादपेपुंसिशाकमत्स्यप्रभेदयोः।देवमुन्यन्तरेशैलेइतिमेदिनी।हर्यतोऽश्वइति।एतदपिहर्यकान्तौगतौचेतिधात्वर्थेवृत्तिकारोक्तिश्चानुसृत्योक्तम्।यरित्वंहर्यतंहरिम्।आहर्यतायधृष्णवेइत्यादिमन्त्रेषुहर्यतःसर्वैःस्पृहणीयइतिवेदभाष्यम्।पृषिरञ्जि।पृषन्मृगेपुमान्बिन्दौनद्वयोःपृषतोपिना।अनयोश्चत्रिषुश्वेतबिन्दुयुक्तेपुआविमौ।रजतन्त्रिषुशुक्लेस्यात्क्लीबंहारेचदुर्वर्णइतिमेदिनी॥शीङ्शपि।उज्ज्वलदत्तेनात्रपञ्चमोवह्निःपठ्यतेअन्यैस्तुवन्दिः।वह्निथवन्द्ययोरन्यतरंवेदादावुपलभ्यबहुश्रुतैःपाठोनिर्णेयः।बाहुलकादिति।शमथःशान्तिमन्त्रिणोरितिमेदिनी।दमथस्तुपुमान्दण्डेदमेचपरिकीर्तितइतिच।रुदिविदि।विदथोयोगिकृतिनोरितिमेदिनी।अत्रोज्ज्वलदत्तः।रुविदिभ्यांङिदितिपठित्वारोतीतिरुवथःश्वेत्युदाजहार।दशपादवृत्तिकारस्तुरुदिविदिभ्यांङिदितिपपाठ।किञ्चोपसर्गेवसेरित्येवंरूपमुत्तरसूत्रंद्वावपिनपेठतुः।तथाहि।शीङ्शयेतिसूत्रानन्तरंसोपसर्गाद्वसेःभुजश्वित्रुदिविदिभ्यांङित्इत्युज्ज्वलदत्तस्यसूत्रपाठः।अन्यस्यतुशीङ्तौशयेतिसूत्रानन्तरंआङिवसेःभुज्श्वित्रुदिविदिभ्यांङित्इतिसूत्रपाठः।तदेतत्पाठद्वयंभाष्यादिविरोधादुपेक्षितम्।तथाहि।गाङ्कुटादिसूत्रेकेपुनश्चङादयःचङ्अङ्नजिङ्अथङ्नङ्इतिभाष्यम्।रुदिविदिभ्यांङिदित्यनुवर्त्तमानेउपसर्गेवसेरित्यथप्रत्ययइतिकैयटेनव्याख्यातम्।एवञ्चाङ्किदितिपठतांसूत्रविपर्यासञ्चकुर्वतांभाष्यादिविरोधःस्पष्टएवेत्यास्तांतावत्॥

४दिकरभेवानरसिंहीति।

ष्ठी।पिष्टके।माषचूर्णे।शूकशिम्बी।कपिकच्छुः।नागसंभवम्।सिन्दूरम्।चूर्णम्।पटवासः।कनकालुः।स्वर्णजलपात्रम्।सहाघृतकुमारी।इतितृतीयः ॥
मूः।माष्यकेयदमतेपिडि·दित्वस्यानुवृत्तेःफलञ्चिन्त्यम्।अल्पविचमि।गौरादित्वात्ङीष्।अतसीस्यादुमाक्षुमेत्यमरः।चमसोयज्ञपात्रस्यभेदेऽस्त्रीपिष्टकेस्त्रियाम्।पनसःकण्टकिफलेकणके
वानरान्तरे।स्त्रियांरोगप्रभेदेस्यादितिमेदिनी।वेन्नस्तुरुच्चादशपादीचवेतुरि तुरच्चेतिपठित्वावीगत्यादिष्वितिधातुरुदाहृतः।वहित्युभ्याम्।अजगरेशयुर्वाहसइत्युभावित्यमरः।वातुक्लीवेदि
वसवासरावितिचाकूष्म।करभोमणिबन्धादिकनिष्ठान्ते तत्सुतौशरभस्तुपशोर्भे मेदिनी।समौपतङ्गशलभावित्यमरः।करभःकरिशावकइतिच।गर्दभश्वेतकुमुदेगर्दभोगन्धभेद्यपि।रासभे
गर्दभीक्षुद्रजन्तुरोगप्रभेदयोरितिमेदिनी।ऋषिरषिभ्याङ्कित्।ऋषभस्तौषधान्तरे । स्वरभिद्वृषयोःकर्णरन्ध्रगर्दभपुच्छयोः।उत्तरस्थःस्मृतःश्रेष्ठेस्त्रीनरकारयोषिति।शूकशिम्ब्यांशिराला
यांविधवायांकथ्यतेतिमेदिनी।वृषभःश्रेष्ठवृषयोरितिच।रासिंत्रहिभ्याञ्च।रासःशब्दे।वल्लसंवरणे।वल्लभोदयितेध्यक्षेसल्लक्षणतुरङ्गमेइतिचमेदिनी।जृविशिभ्यांझच्।बाहुलकादर्हे
तेरपिझच्।अर्हन्तःक्षपणकोजिनइतिविक्रमादित्यकोशः।तृभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च।नन्दिग्रहणं किमर्थम् ... तदाह।नन्दयन्तइति।उज्ज्वलदत्तस्तुनन्द न्तइत्युदाहृत्यपूर्वसूत्रेणगतार्थतामाशङ्क्य अनाशीर्थंनन्दिग्र
हणमित्याह।तन्नाइहल्प्रकृतिशीलत्वस्यस्वयमेवानुवर्तितत्वात्।बाहुलकादिति।जर्जरंशैवलेशक्रध्वजेत्रिषुजरन्तरे।झर्झरःस्यात्कलियुगेवाद्यभेदेनदान्तरेइतिमेदिनी।अर्तिकमि।अर[illegible]द
कपाटयोः।भ्रमरःकामुकेभृङ्गेचभ्रमरोभ्रमरीत्वितुमुन्दारीमृगभेदयोरितिमेदिनी।वासरइति।वसेर्णयन्ताद्दरः।केचित्तुसूत्रेवाशिभ्यइतिवाशब्दंपठित्वावाशब्देवाशयसतेवारारः।कोकिलइ
त्याहुः।अङ्गिमदि।अङ्गेर्मन्दुकेनस्त्रीपुल्लिङ्गःस्तुमङ्गीसुतेइतिमेदिनी।मन्दारःस्यात्सुरद्रुमे।पारिभद्रेऽर्कपर्णेचमन्दारोहस्तिधूर्तयोरितिच।मदिस्तुत्यादावित्यस्माद्बाहुलकादारुरपि।पारिभद्रे
तुमन्दारुर्मदारुःपारिजातकइतिशब्दार्णवः।गडः।कडारःकपिलेदासेइतिमेदिनी।शङ्गेरङ्गारे।शृङ्गारःसुरतेनाट्यरसेचगजमण्डने।नपुंसकंलवङ्गेपिनागसंभवचूर्णयोरितिमेदिनी।
भृङ्गारीझिल्लिकायांस्यात्कनकालौपुनःपुमानितिच।कञ्जिमृजिभ्याम्।कञ्जारोजठरेसूर्येविरिञ्चौवारणेमुनावपि।विश्वमेदिन्यौ।मार्जारओतौखट्वाङ्गेइतिच।कमेः।कुमारःस्यात्शुकेस्क
न्देयुवराजेऽश्ववारके।बालकेवरुणद्रौनानदयोजात्यकाञ्चने।कुमारीशैलतनयावनमाल्योर्नदीभिदि।सहायराजिताकन्याजम्बूद्वीपेषुचस्त्रियामितिमेदिनी।विश्वप्रकाशेतुकुमारीरामतर
णीतिपाठः।रामतरणीलताविशेषः।सहेतिप्रसिद्धः।तरणीरामतरणीकर्णिकाचारुकेसरा।सहाकुमारीगन्धाढ्येतिधन्वन्तरिनिघण्टुः।जंबुद्वीपसहाकन्याकुमार्योयाश्ववारके।बा

ति॰ कशपुत्रे। रामसौत्रे। गजकर्णिका। गजशुण्डा ग्राम ॥ मू॰॥ तुषारस्तुहिनं हिमम्। कासारः सरसी सरः। कुणेः। कुणपः पूतिगन्धे शवेपि च मेदिनी। विटप विष्टप इति ।ःविटपो न स्त्रियां स्त
म्बशाखाविस्तार पल्लवे। विटपिपि देतिमेदिनी। आदेः पर इति। स तद्धोज्ज्वलदत्तरीत्योक्तं अन्ये तु सूत्रेऽविटपेति दन्त्योष्ठ्यादिमेव पठन्ति। युक्तञ्चैतत्। यत्र त्रघ्नस्य विष्टपमित्यादौ तथा दर्शनात्।
उलपो न स्त्री गुल्मिन्यां नातृणान्तरे इति मेदिनी। लत्तिकेति। लतिः सौत्रः इष्टकेति। इष्टके षीका मलानामिति निर्देशात् प्रत्ययस्थादिति नेत्त्वम्। अर्त्तिगृ। गर्भ भ्रूणे र्भके कुक्षौ स्त्यौ पनसकण्ट
केऽइति मेदिनी। इभ्य इभः स्तम्बेरमः पद्मी त्यमरः। लक्षेमुट् च। लक्ष दर्शनाङ्कनयोः। चुरादिण्यन्तः। अस्मादी प्रत्ययः स्यात्। तस्य मुडागमश्च णिलोपः। लक्ष्मीः संपत्ति शोभयोः। ऋद्धौ ष
धौ च पद्मायां वृद्धिनामौषधेपि च। फलिन्यां स्त्रीति मेदिनी। इत्युणादिवृत्तौ तृतीयः पादः॥ अयमिति॥ द्विचतुः षट्पदोरगाः। इत्यमरेणोभयलिङ्गोक्तेः। सुभूतिचन्द्रादिभिरपि वातप्रमीशब्दस्य
हिलिङ्गतोक्तेति भा[illegible]। तत्र कदिकारादिति पाक्षिको ङीप्। केश्चिदिष्यते नहि कारग्रहणे केवलग्रहणमिति मुनित्रयेण परिभाषितम्। अतएव वातप्रमी श्रीलक्ष्मीति पक्षे ङ्यन्तासु साधवः इति र
क्षितः। एतच्च दुर्घटग्रन्थे स्पष्टम्। आशीराश्यहिदंष्ट्रायां लक्ष्मीलक्ष्मी हरिस्त्रियामिति द्विरूपकोशः। अत एवाशीर्विषो विषधर इति सङ्गच्छते। आशीमिव कलामिन्दोरिति राजशेखरः। आशी
र्हितांशसाहिदं[illegible]ति सौन्तः मरान्। सान्तोप्याशीः शब्द इत्यन्ये तन्न। वद्धेति। मुष्यातु बद्धयास रत्निः स्यादित्यमरः। सहस्त इत्यर्थः। प्रसङ्गादाह। अरत्निरिति। नरत्निरिति। नरत्निरिति नञ्स
मासः। दशपादी वृत्तौ तु [illegible] समकिं तं विधाय रत्निः साधितः। उज्ज्वलदत्तानुसारेणाह। वायुरात्रिश्चेति। इह शब्दो मेघः अशनिश्चेति अपि बोध्यम्। आविष्कृणोमि तन्न्यतु नेरश्मि
तिमन्ने तन्यतु गर्जित[illegible] मन्त्रे तन्यतु स्तनयितु रशनिरिति वेदभाष्ये व्याख्यातत्वात्। अञ्जलिस्तु पुमान् हस्तसंपुटे कुडवेपि चेति मेदिनी। स्थविरान्त्रमिति। वनिष्ठोर्दयया विधीति मन्त्रस्य भाष्ये त
थोक्तत्वात्। अञ्जिष्ठ इति। केचिदञ्जेरिष्णुचमिच्छन्ति तेषामञ्जिष्णुरित्युदाहरणम्। मदेरिति। मत्स्यो मीने थ पुंभूम्नि देश इति मेदिनी। अतिथिः कुशपुत्रे स्यात् पुमानागन्तुके त्रिषु। अङ्गुलिः क
रशाखायाङ्कर्णिकायाङ्गजस्य चेति मेदिनी। कवसः सन्नाहः। कङ्कटजातिश्च अच इति। कवचो दुर्गभाण्डे च सन्नाहे पर्पटेपि चेति मेदिनी। पुषः। पुष्यतेः करः स्यात्। स च कित्। पुष्करं खे म्बुपद्मयोः।
तूर्य्यवक्त्रे खड्गफले हस्तिहस्ताग्रकाण्डयोः। कुष्ठौषधे द्वीपतीर्थभेदयोश्च नपुंसकम्। ना रागनागविहगनृपभेदेषु वारुणौ इति मेदिनी। कलंश्च। पुष्यतेः कलन् कित् स्यात्। पुष्कलस्तु पूर्णश्रेष्ठे इति
हेमचन्द्रः। मथ्या इति। पथिमथी स्यात्। तस्माद् इतो त्सर्वनामस्थाने। मन्थाम न्थन दण्डे च वज्रे वाते पि च स्मृतः। पन्था इति। पथे गतौ अस्मात् सचाद्यचि अकारान्तो प्यस्ति। वाटः पथश्च मार्गश्चेति सुभूति
चन्द्र पुरुषोत्तमौ। त्वचितलचः। किरोपि स्यात् किरौ प्रोक्तः पथः पथीनिति द्विरूपेषु विश्वः। इहञ्जरभवो देवाः स्यन्त्वसि निति विग्रहे न्येभ्योपि दृश्यते इति डः। ऋभुक्षः स्वर्गवज्रयोरिति विश्वः ॥

टीनवाल्हीकम्।केसरम्॥ मू०॥ ततोमत्वर्थीयेइनिः।क्रमुसिन्निति नान्तं प्रातिपदिकम्।आलाले।क्रमुस्ताः इन्दुः।क्रमुस्ताणौ क्रमुस्ताण इत्युज्ज्वलदत्तः।दशपाद्यान्तु अर्त्तेर्मुस्तिनगिति सूत्रमुप
स्सत्तम्।क्रमुस्सणमिन्द्रमाहुवउतयइति मन्त्रस्य वेदभाष्येपि तत्सूत्रमुदाहृतम्।अत्रायं विवेकः।आद्यमन्तेन्तोदात्तत्वं न्याय्यम्।अवग्रहाभावे बाहुलकात्।द्वितीये तु अवग्रहाभावोन्याय्यः।
अन्तोदात्तस्तु बाहुलकादिति।खजाकइति।खजमन्योबलाकावकपङ्क्तिः स्याद्बलाका बिसकण्ठिका॥बलाका कामुकी प्रोक्ता बलाकश्च बको मत इति विश्वशाश्वतौ॥शलाका शल्यमदनसारि
काशल्लकीषु चेति मेदिनी॥पताका वैजयन्त्यां स्यात्सौभाग्यनाटकाङ्कयोरिति च।पताका वैजयन्त्यां स्यात्सौभाग्ये ऽङ्के ध्वजेपि चेति विश्वः।पिनाकादयश्च।पिनाकोऽस्त्री रुद्रचापे पांसुवर्षत्रिशूलयोरिति
मेदिनी।अमरोक्तिमाह।क्लीबेति।किञ्च पिष्लृसञ्चूर्णने।षकारस्य णत्वम्।धातोर्युगागमः।पिण्याकोऽस्त्री तिलकल्के हिङ्गु बाह्लीकसिह्लके इति मेदिनी।अमरोक्तिमाह।दूषिकेति।किञ्च दूष
यतेरच इरितिर्ईप्रत्यये दूषिः कृदिकारादिति ङीष्।दूषी उभाभ्यामपि स्वार्थे कनि दूषिका ह्रस्वमङ्योर्वा केण इति ङीषो ह्रस्वादेशात्।पिचण्डी दूषिका दूषिः पिचाटश्च दृशोर्मलमिति विक्रमा
दित्यकोशः।दूषिका तू[illegible]नेत्रस्यास्याल्लोचनस्य चेति मेदिनी । —— अनिकाषिभ्याम्।अनीकोऽस्त्री गणे सैन्येपीति मेदिनी।हृषीकं विष
यीन्द्रियमित्यमरः।पर्करादेर्श इति।उज्ज्वलदत्तरीत्योक्तम्।वस्तुतस्तु धातोर्ह्रस्वत्वं उकारस्याकारः सलोपश्च।रुक्चाभ्यासस्येति दशपाद्युक्तमेव न्याय्यम्।चरेर्नुम् चेत्तु चरग्रन्थ्याद्युरोधेन्देहेरु
केसादेरनुवृत्तेर्न्याय्य[illegible]किसलयमिति।नैतोशेवतुर्फरीपर्फरीके इति मन्त्रस्य वेदभाष्ये तु ञिफला विशरणे पृ पालनपूरणयोः प र्व पूरणे एषामन्यतमस्य निपातनमिदमाश्रित्य शत्रूणां वि
दारयितारोस्तोतॄणां पू[illegible]काविषार्थस्य पूरयितारौ चेति व्याख्यातम्।तिन्तिडीक इति।तिमेर्नकारस्य डकारः।अभ्यासस्य तुक् च।तिन्तिडी चिञ्चाम्लिके त्यमरे तु शब्दान्तरम्।तथा च तिन्तिडी त्वम्लि
काचिञ्चा तिन्तिडीकापि प्रिये इति वाचस्पतिः।अम्लीका चाम्लिका चिञ्चा तिन्तिडीका च तिन्तिडा इति चन्द्रः।अम्लिका चुक्रिका चुक्रा साम्ला शुक्ला च शुक्लिका।अम्लिका चिञ्चिका चिञ्चा तिन्ति
डीका च तिन्तिडेति धन्वन्तरिनिघण्टुः।यत्तु उज्ज्वलदत्तेनोक्तं उपदंशस्तृतीयायामिति सूत्रे तिन्तिडोपदंशं भुङ्क्ते इति भाष्यप्रयोगात्साधुतेति तदुपेक्ष्यम्।उपदंश इति सूत्रस्य भाष्यकारैरस्पृष्टत्वात्।
तदुदाहृतप्रयोगस्य भाष्ये कुत्राप्यभावाच्च।भ्रमरश्चञ्चरीकः स्याद्रोलम्बो मधुसूदनः । इन्दिन्दिरः पुष्पकीटो मधुव्रो मधुकेशट इति त्रिकाण्डशेषः।कर्कर्यालुर्गलन्तिकेत्यमरः।पुण्डरीकं सितां
भोजे सितच्छत्रे च भेषजे।पुंसि व्याघ्रे च दिग्नागे कोशकारान्तरेपि चेति मेदिनी।ईषेः।ईषिका स्यादिशीकापि वानायुजवनायुजाविति द्विरूपकोशः।सर्त्तेः।सृणीका स्यन्दिनी लाला इत्यमरः।मृडः की
कः [illegible]ग्रादन्तोदात्तः।कीकनित्युज्ज्वलदत्तादिपाठस्तु प्रामादिकः।मृलीके अस्य सुमतौ स्याम।मृलीकाव प्रियव्रतान इत्यादिषु चित्त्वस्वरस्यैव दर्शनात्।अलीकमप्रियेपि स्यात् दिव्यसत्येनपुं

वेलस्यः। विनयान्वितः। किशोरः। अश्वकुमारः। एकादशमारभ्यापञ्चदशकुमार इत्यन्ये ॥ मू० ॥ अलीकमप्रियेभालेवितथे इति हेमचन्द्रः। तथाचप्रयुज्यते। ते दृष्टिमात्रपतिता अपि कस्यनात्रक्षोभायपक्ष्मलदृशामलकाः खलाश्च। नीचाः सदैवसविलासमलीकलग्नायेकाललाङ्कुटिलताञ्चनसन्त्यजन्ति इति। व्यलीकमप्रियाकार्यवैलक्ष्येषु पिपीठके। नानागरे इति मेदिनी। वलीकनीध्रेपटलप्रान्ते इत्यमरः। वलतेर्मुगागमे वल्मीकम्। वामलूरश्चनाकुश्चवल्मीकंपुन्नपुंसकमित्यमरः। वहतेर्इञ्चिश्च। वाहीकोगौः। बाहश्च। सुप्रपूर्वादिणस्तुट् च। सुप्रतीकः शामले। शमीकः ऋषिः। एवमन्येप्यूह्याः। उज्ज्वलाह। इत्यादीति। ऋदृ। गूथंपुरीषं वर्चस्कमस्त्रीविष्ठाविषौ स्त्रियामित्यमरः। अर्जेः। अमरोक्तिमाह। ऋजीषमिति। किंच। उद्धृतरसः सोमलतायाः शेषोपि ऋजीषम्। तच्च ऋजीषिणं वृषणं ससतश्रिये। आसत्योयातुमघवानृजीषी इत्यादि मन्त्रभाष्येस्पष्टम्। अयमिति। ईषन् प्रत्ययः अरुट्चतस्यागमः इत्यर्थः। बोपालितोक्तिमाह। अम्बरीष इत्यादि। अम्बरीषं रणेभ्राष्ट्रे क्लीबंपुंसिनृपान्तरे। नरकस्यप्रभेदेचकिशोरेभास्करेपिच। आम्रातकेतुनापेचेति मेदिनी। कृश्रृ। करीरोवंशाङ्कुरे स्त्रीरसाभिदुवयोः पुमान्। करीराचीरिकायाञ्च दन्तमूलेचदन्तिनामिति मेदिनी। शरीरंवर्ष्मविग्रह इत्यमरः। अर्द्धर्चादित्वात् शरीरोपि। बाहुलकात्हिडिगत्यनादरयोः। हिण्डते इतस्ततोगच्छतीति हिण्डीरः। हिण्डीरोब्धिकफः फेन इत्यमरः। डिण्डीरोपिच तिण्डीरः इति द्विरूपकोशः। किमीरजंबीरतूणीरादयोप्येवंबोध्याः। किर्मीरो नागरङ्गे च कर्बुरे राक्षसान्तरे इति मेदिनी। जम्बीरः प्रस्थपुष्पे स्यात्तथा दन्तशठे द्रुमे इतिच। उशीरं वीरणमूलम्। उशीरोपि मूले स्यादुशीरमस्त्रियाम्। अभयंनलदंसेव्यमित्यमरः। कुरीरमिति। कपिलकादित्वाल्लत्वे कुलीरः कर्कटकः। घसेः। क्षीरमिति। उपधालोपः। कत्वंषत्वम्। क्षीरं दुग्धे च नीरे चेति विश्वः। गमेरिति। निम्नं गभीरं गम्भीरमित्यमरः। पचएलिमच्। कर्त्तर्यच् यङ्स्य प्रकृत्ययेश्वरिदुपसंख्यानः। शेरतेनेनशीधुः मद्यविशेषः मैरेयमासवः शीधुरित्यमरः अर्द्धर्चादिपाठात् क्लीबञ्च। पुन्नपुंसकयोर्द्रुरुजीवातुरस्त्री शुभोधव इति त्रिकाण्डशेषः। शीलंस्वभावेसद्वृत्ते इति मेदिनी। जलनीलीतुशैवालंशैवल इत्यमरः। शैवलंपद्मकाष्ठे स्यात् शैवलेतु पुमानयमिति मेदिनी। शब्दार्णवोक्तिमाह। शेवालमित्यादि। उलूकादयश्च। उलूकः पुंसिकाकारौ विन्द्रेभारतयोधिनि इति मेदिनी। वदेर्यङ्न्तादूकः। वाचोयुक्तिपटुर्वाग्मीवावदूकश्चवक्तरीत्यमरः। शमेर्वुक्। शम्बूको गजकुम्भान्ते घोषे च शूद्रतापसे इति मेदिनी। बाहुलकादुकप्रत्ययेह्रस्वमद्ध्येपि। जम्बूकंजम्बूकं प्राहुः शम्बूकमपिशम्बुकमिति द्विरूपकोशः। जम्बूकबम्बूकादयोप्यत्रैवद्रष्टव्याः। जम्बूकः फेरवेनीचे पश्चिमाशापतावपीति विश्वमेदिन्यौ। बम्बूकं बन्धुजीवे स्याद्बन्धूकपीतसारके इति च। शालिमण्डि। सौगन्धिकन्तुकह्लारमित्याद्युपक्रम्य शालूकमेषांकन्दः स्यादित्यमरः। एषांसौगन्धिकादीनाङ्केरवान्तानांकन्दोमूलमित्यर्थः। निपोमिः। नेमिर्नातिनिशेकूपत्रिकाचक्रान्तयोः स्त्रियामिति मेदिनी। बाहुलकादन्यतोपि। याम्रापणे। यामिः स्वसृकुलस्त्रियोरित्यन्तस्यादौ रभसः। यामिः कुलस्त्रीस्वस्रोः स्त्रीत्यन्तस्यादौ मेदिनी। जैक्षये। जामिः स्वसृकुलस्त्रियोरिति चवर्गतृतीयादौ अजयकोशः। चवर्गादिरपि प्रोक्ता यामिः स्वसृकुलस्त्रियोरिति द्विरूपेषु विश्वः। अर्तेरूच्च। उर्वेलुचितम्। ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः। वस्त्रसङ्कोचरेखायां वेदनापीडयोरपीति मेदिनी। भवन्ति भूतान्यस्यामिति भूमिः। भूमिर्वसुन्धरायां स्यात् स्थानमात्रेपि च स्त्रियामिति मेदिनी। अश्नोतेः रश्मिः पुमान् दीधितौ स्यान्मसृणप्रग्रहयोरपीति मेदिनी। वीज्या। अमरोक्तमाह। वेणिरित्यादि। वेणिःकेशस्यबन्धे अनेनद्यादेरन्तरे देवताडे इति मेदिनी। वेणी खरा गरी देवताडो जीमूत इत्यपीत्यमरः ॥

मू॰।ज्यानिर्हानौस्त्रवत्याञ्चेतिविश्वः।जूर्णिःस्त्रीरोगः।सृणि।अङ्कुशोऽस्त्रीसृणिःस्त्रियामित्यमरः।सृणिःस्यादङ्कुशेपुमानितिकोशान्तरम्।अतएवआरक्षमग्नवमत्यसृणिंशिताग्रमितिमाघः।वृष्णिस्तुयादवेमेषेवृष्णिःपाखण्डचण्डयोरितिविश्वः।ऐन्द्रंवृष्णिंषोडशिनितृतीयमितिश्रुतौवृष्णिंमेषमित्यर्थः।अङ्केः।अग्निर्वैश्वानरेऽपिस्याच्चित्रकाख्यौषधौपुमानितिमेदिनी।श्रेणिः।श्रेणिःस्त्रीपुंसयोःपङ्क्तौसमानेशिल्पिसंहताविति च।कटिःश्रोणिःककुद्मतीत्यमरः।योनिःस्त्रीपुंसयोश्चस्यादाकरेस्मरमन्दिरेइतिमेदिनी।घृणि पृश्नि।घृसेचनेतिप्रत्ययोगुणाभावश्च।घृणिःपुनः।अंशुज्वालातरङ्गेषुइतिहेमचन्द्रः।पृश्निरल्पतनावित्यमरः।पार्ष्णिःस्यादुन्मदःस्त्रियाम्।स्त्रियान्द्वयोःसैन्यपृष्ठेपादग्रन्थ्यधरेपिचेतिमेदिनी।भूर्णिर्धरणीति।नक्षत्रानभूर्णिरितिमन्त्रेसामान्येतुभूर्णिर्धारकःपोषकोवेतिव्याख्यातम्।दिवोढा।दीदिविर्धिषणान्नयोरितिविश्वः।दीदिविर्ना।धिषणे ऽन्नेत्वदस्त्रियामितिमेदिनी।धिषणोबृहस्पतिः।दीदिविर्द्वादशकरश्चासाःसुरगुरुर्गुरुरितित्रिकाण्डशेषः।दीदिविर्द्वादशार्चिःसुरमन्त्रीजीवःप्राक्फल्गुनी सुनइतिहारावली।ओदनोऽस्त्रीसदीदिविरित्यमरः।अत्रसदीदिविर्दीदिविस्सहितइतिव्याख्यानंन्याय्यम्।सइतिच्छेदेतुअस्त्रियामितिनलभ्येत।ततश्चअन्नेतदस्त्रियामितिमेदिनी।ग्रन्थाविरुद्धोनेतिध्येयम्।गोपामृतस्यदीदिविमितिमन्त्रेतुद्योतमानमित्यर्थः।कृविघृषि।एतेनक्विन्नन्तानिपात्यन्ते।घृषिर्वराहइति। उग्रस्यपुनःस्यविरप्सघृषेरितिमन्त्रेतुघृषेःकाम्यानाम्वर्षकस्येत्यर्थः।घृषुसेचनेइतिधात्वर्थानुगमात्।तकृविःशोभारुचेयोषिदितिमेदिनी।अस्यचाषःकिकीदिविरित्यमरः।विनिमयहति।किकिदीविःकिकीदिविरितिद्विरूपकोशः।पातेः।पतिर्द्धवेना।त्रिषीशेइतिमेदिनी।शकेः।उच्चारावस्करौशमलंशकृत्।गूथंपुरीषंवर्चस्कमस्त्रीविष्ठाविशौस्त्रियामित्यमरः।अमेरतिः।अथामतिःपुंसिहिमदीधितिकालयोरितिमेदिनी।अमतिश्चामतिःकालइतिद्विरूपेषुविश्वः।वहिवसि।वहतिःसचिवेगवीतिविश्वः।वसतिःस्यात्स्त्रियांवासेयामिन्याञ्चनिकेतनेइतिमेदिनी।अमरोक्तिमाह।प्रादेशनस्तिति।रमेः।रमतिर्नायकेनाकेपुंसिस्यादितिमेदिनी।वृत्तिकारोक्तंशान्तमाह।रमतिरित्यादि।नित्वमाद्युदात्तार्थम्।रन्तिरसिरमतिरसि।सूङःक्रिः।धीमान्सूरिःकृतीकृष्टिर्लब्धवर्णोविचक्षणःइत्यमरः।दशपाद्यान्तुसूङोरिन्दीर्घश्चेतिपाठः।तत्ररिनोनकारोनानुबन्धःउत्तरसूत्रेप्रत्ययान्तरारम्भात्।अनुबन्धत्वेहिलाघवादिहैवकिन्नोच्येत।तथासतिसूरीसूरिणौसूरिणइत्यादिरूपम्।अतएवाभिधानमालायांसूरीतिनान्तमुदाहृतमित्यवधेयम्।यत्तुदशपादीवृत्तिकारैर्नित्वंस्वीकृत्यसूरिभिःसुदाहृतम्।तदेतेनप्रत्युक्तम्।स्वरविरुद्धमपि।सदापश्यन्तिसूरयः। ———ःविसूरयोदधतोविश्वमायुरित्यादौसूरिशब्दस्यान्तोदात्तत्वात्।अदिशदि।अद्रयोद्रुमशैलार्काइत्यमरः।भूरिर्नावासुदेवेचहरेचपरमेष्ठिनि।नपुंसकंसुवर्णेचप्राज्येस्याद्वाच्यलिङ्गवदितिमेदिनी ॥

प्रमीला।आलस्यम्।पुन्नागः।केसरः।कर्बुरः।एतरक्षसोः ॥

उतन्द्रिय
वंक्रिरिति।वकि कौटिल्ये।तन्द्रिरिति।कृदिकारादितिपक्षेङीष्।तन्द्री।निद्राप्रमीलयोरितिमेदिनी।तन्द्रींतन्द्र्यामितिद्विरूपकोशः।विभज्यनक्तन्दिवमस्ततन्द्रिणेतिभार
विः।राशदि[illegible]याम्।अत्रिर्नोभोधरेजिस्राविति मोदिनी।अत्रिमग्न्युपमाङ्कं नुमयेइतिमन्त्रस्यवेदभाष्येतुउपामासुपमानभूतङ्कं तुं प्रख्यातंशत्रिंएतन्नामकंराजर्षिमितिव्याख्या
तम्।अदेस्त्रिनि[illegible]।अत्री भक्षकः।अत्रिः।ऋषिविशेषः।उज्ज्वलदत्तस्तुअदेस्त्रिनूइतिपठित्वाअत्रिरित्युदाजहारतन्न।त्रिपेवुसिद्धेप्रत्ययान्तगेवैयर्थ्यात्।गोवर्द्धनस्तुअ देस्त्रि
न्निचेतिपठित्वा[illegible]दितिवचनान्नकारस्यनेत्वस्ना।अत्री।अत्रि णो।अत्रिणइत्याह।तदपि न।आद्युदात्तापत्तेः।नचेष्टापत्तिः जहीन्यत्रिणंपिणिम्।दूरेवायेअन्तिवाकेचिदत्रिणः।अग्ने
हंसित्या त्रिणमित्य[illegible]दावन्तोदात्तस्यनिर्विवादत्वात्।दृशापादीर चौतु अदेस्त्रिनिश्चेतिपठित्वाचकारात्त्रिवित्युक्तम्।तदपि न।त्रिनिचक्षिलस्यव्यर्थत्वात्।इकारेणवकार परित्रा
णे स्ततिप्रत्ययस्वरेणै[illegible]ष्टसिद्धेः।अतएववर्षेद्रुःशंसानितिमन्त्रस्यभाष्येअदेस्त्रिनिश्चेतिमाधवः।नलुमताङ्गस्येतिसूत्रेकैयटोप्येवमेवाहेतिदिक्।पतत्रिरिति। पक्षवाचका
त्पतत्रशब्दान्मत्वर्थे इतितुपतत्री पतत्रिणावित्यादि।मृकणिभ्याम्।मरीचिः।कृपणे दीप्तावृषिभेदे च दृश्यत इतिविश्वः।मरीचिर्मुनि भेदेनागभस्त्वावनपुंसकमितिमेदिनी।कणीचिः
पुष्पितलताङ्ग[illegible]ीः शकटे स्त्रियामितिच।वेञः।वीचिः स्वल्पेन्तरङ्गे स्यादवकाशेसुखेद्वयोरितिविश्वमेदिन्यौ।पुरः।पुरुषः पुरुषे सांख्यगेचपुन्नागपदपे इतिविश्वमेदिन्यौ।ए
नहि।परुषङ्कर्बुरे रूक्षेनिष्ठुरे क्लीबवाच्यवदितिमेदिनी।नहुषोराजविशेषेनागभिद्यपीतिहेमचन्द्रः।चित्स्वरेणान्तोदात्तत्वेप्राप्तेग्रामादित्वाद्वृषादित्वाद्वा आद्युदात्तोयम्।एतच्च
देवा अकृण्वन्नहुषस्यविश्पतिमितिमन्त्रस्यभाष्येस्पष्टम्।कलुषं त्वाविलेनसोरितिविश्वः।पीयेः।पीयूषंसप्तदिवसावधिक्षीरेतथामृतेइतिमेदिनी।पियूष इत्यादिस्त्वमरः।
मस्तेः पिटकः पेटकः पेटामञ्जूषेत्यमरः।गण्डेश्च।गण्डूषोमुखपूर्त्तौभपुष्करप्रसृतोन्मितेइतिमेदिनी।अर्तेररुः॥उकारान्तोयंप्रत्ययः।नतुसकारान्तइतिस्फोटपतिः।अर
रुइत्यादिना।युक्तंश्चैतत्।कंविधावारसुक्ष्वरमर्त्याम्।अपारहमदेवयजनोजजिइत्यादिमन्त्रेप्लुष्टस्यादर्शनात् ॥

टी॰। शेफोलिङ्गम् ॥

यत्तुमानःपंसोअररुंषड्इतिमन्त्रस्यभाष्येस्तान्तोयमितिमाधवेनोक्तंतत्प्रौढिवादमात्रन्नतुवास्तवम्।पदस्याद्युदात्तत्वानुपपत्तिप्रसङ्गात्।उक्तप्रयोगस्यकृसन्तेनराति
नानञ्समासेसौष्ठवात्।गुरुद्वेषोअररुषेदधन्तीत्यत्रस्वयमेवतथाव्याख्यानात्।योनोअग्नेअररिवांअघायुरित्यादिमन्त्रान्तरसंवादाच्चेतिदिक्।क्लीबेनःशकृट्टोस्त्रीस्या
दित्यमरः।करटोगजगण्डेस्यात्कुसुम्भेनिन्द्यजीविनि।एकादशाहादिश्राद्धेदुर्दुरूढेपिवायसेइतिमेदिनी।क्रकचः।करम्भोमिश्रितेवान्तोभान्तस्तुदधिसक्तुषुइतिविश्वः।
कदम्बनिकुरम्बेस्यान्नीपसर्षपयोःपुमानितिमेदिनी।कलम्बीशाकभेदेस्यात्कदम्बशरयोःपुमानितिच।कदेः।कादम्बास्यात्पुमान्पक्षिविशेषेसायकेपिचेतिमे
दिनी।कलिःकलमःपुंसिलेखन्यांशालौपाटच्चरेपिचेतिमेदिनी।कुपेर्वा।कुपक्रोधे।अतःक्विन्दच्।वकारान्तादेशश्चवा।तन्तुवायःकुविन्दःस्यादित्यमरः।बाहुलकात्
अलभूषणादौ।अलिन्दः।यस्यामलिन्देषुनचक्रुरेवमुग्धाङ्गनागोमयगोमुखानीतिमाघः।प्रज्ञादित्वादणिदीर्घादित्ययम्।निषङ्गथिरितिचजोरितिकुत्वम्।आभुंर
स्यनिषङ्गथिः।रथकूबरइत्यर्थः।सर्तेः।नियन्ताप्राजितायन्तासूतःक्षत्ताचसारथिरित्यमरः।खर्जिपिंजादिभ्यः।खर्जमार्जनेएवमादिभ्यऊरच्।पिञ्जहिंसायाम्।एवमा
दिभ्यऊलच्।खर्जूरंरूप्यफलयोःखर्जूरःकीटवृक्षयोरितिमेदिनीहेमचन्द्रौ।कृपूसामर्थ्ये।बाहुलकाल्लत्वाभावः।अथकर्पूरमस्त्रियाम्।घनसारश्चन्द्रसंज्ञःसिताभ्रो
हिमवालुकेत्यमरः।वल्लसंवरणे।वल्लूरम्।उत्तप्तंशुष्कमांसंस्यात्तद्वल्लूरंत्रिलिङ्गकमित्यमरः।एवंशालूरमण्डूरादयः।भेकेमण्डूकवर्षाभूशालूरप्लवदर्दुराइत्यमरः।
अथमण्डूरं।शिङ्घाणमपितन्मलेइतिचातन्मलोतस्यपूर्वोक्तस्यलोहस्यमलेइत्यर्थः। लाङ्गूलंपुच्छशेफसोरितिमेदिनी।कुसूलइति।कुसश्लेषणे।दन्त्यसकारवा
न्।कुसूलश्चकुसीदश्चमद्यदन्त्यमुदाहृतमितिविश्वः।ताम्बूलादयोप्यत्र।तमुग्लानौ।नवुग्दीर्घलत्वञ्च।ताम्बूलीनागवल्ल्यांस्त्रीक्रमुकेतुनपुंसकमितिमेदिनी।शृहिंसायाम्।
धातोर्वृद्धिः।दुगागमश्च।शार्दूलोराक्षसान्तरे।व्याघ्रेचपशुभेदेचसत्तमेतूत्तरस्थितइतिमेदिनीविश्वप्रकाशौ।उत्तरस्थितउत्तरपदम्।राजशार्दूलइतियथा।दुगतौ।कुङ्शा
ब्दे।अनयोःकुकूच।दुकूलंश्लक्ष्णवस्त्रेस्यात्क्षौमेचेतिमेदिनी।कुकूलंशङ्कुसंकीर्णश्वभ्रेनातुषानलेइतिविश्वमेदिन्यौ।शिरीषादपिमृद्वङ्गीकेयमायतलोचना।अयंक्वचकुकू

लाग्निकर्कशोमदनानलः इतिप्रयोगस्य ॥

सचोदात्त इति। इञो मण्डूकप्लुतौ सचोदात्त इति ज्ञापकस्यानाश्रयणादित्यन्वयः। वकाराद्यमेकोति। वसिवपीतिसूत्रे इति शेषः। धातूनामनेकार्थत्वादर्थभेदार्थं पाठद्वयमपि न युक्तमाम्
जनिघसिभ्यामिण्। प्रत्ययान्तरकरणं स्वरार्थम्। अयञ्च घासिञ्जघास। आजिन्नजग्मुः सुकृतोलमर्ण। इत्यादौ घस्याजिपाणिप्रतिभृतीनामन्तोदात्तत्वात्। जनिरिति स्त्रीलिङ्गम्।
कृदिकारादिति पक्षे ङीष्। जनी सीमन्तिनी बध्वोरुस्त्र नावो वधूमिदीति मेदिनी। आजिः समावनौ युद्धे इति विश्वः। शरारिराटिराटि श्चेत्यमरः। पादे च। पादे उपपदे अज्यति
भ्यामिण्। पादस्य पदाज्यातिगोपहतेष्विति पदादेशः। अत एव निर्देशाद्बाहुलकाद्वा जेर्वीभावो न। पदातिः पत्तिः पदगः पादातिकः पदाजयः। पदगश्च पदिकश्चेत्यमरः। अणि। ताणि
भैम्यादिपुञ्जयोरिति मेदिनी। पुंस्येवान्धुः प्रहिः कूप उदपानन्तु पुंसि वेत्यमरः। नौ। स्त्रीकटीवस्त्रबन्धेपि नीवी परिपणेपि चेत्यमरः। परिपणं मूलधनम्। समाने। इण्त्यादिति। य
तू ज्वलरदनेनोक्तम्। अस्यायञ्चोदात्त इति। तत्र इणः सन्निधानात्। इञो विच्छिन्नत्वात्। पर्दपिनेनैवनोत्म इति। पूर्वसूत्रे उक्तं इत्येकानुवृत्तेनेति णि। उत्तरस्योदात्तवचनात्।
यकादिति तदपि न। सचोदात्त इति हि नायं प्रत्ययनिर्देशस्तच्छब्दः किन्तु समानशब्दस्य स्थाने विधेयं निर्देशः शब्दस्वरूपपरः। तथा च कथञ्ज्ञापकता। यदपि यदिति व्याख्याय
समानस्य सभाव इति प्रक्रियास्मरणमात्रं तम् तदपि न। विधायकाभावात्। यदपि स्वरमञ्जर्यां कारादिभिः समानस्य छन्दसीति सूत्रेणेत्युक्तं तदपि न। लोके सखिशब्दस्यास
पुताश्चेः अपि च। सखा सखायमब्रवीत्। सखा सख्ये अयच्छत्। सखायस्त्वा ववृमहे। सखा सखिभ्य ईड्यः इत्यादिमन्त्रेषु सर्वत्र सखिशब्द आद्युदात्त एवेति निर्विवादम्। एवञ्च इञ्
अः इति व्याख्यानं वेदवार्त्तानभिज्ञत्वप्रयुक्तमेव। तथा च ज्ञापकोपन्यासोऽपि निर्भस्त्रावेणैवगतः। अपि चात्वसे सख्य इणि सैव सूत्रताङ्किं सचेत्यादिना शब्दतोर्थतश्च यो
रस्य प्रकृत्वात्। अपि च। इणित्यपि मास्तु। नौव्य इत्यादि त्रिसूत्री जनिघसिभ्यामित्यतः प्रागेव पठ्यताम्। एवं हि महद्देवलाघवम्। सचोदात्त इति मण्डूकप्लुतौ ज्ञापकस्यानाश्रयणा
त्। नन्वानेडिद्वेतिडित्वाय जीवनार्थमित्यं पाठ इति चेत्। तर्हीण्प्रकरणानन्तरमेव इञ्प्रकरणं सर्वं मास्तु। नौव्याय इति सूत्रे इञ् प्रपठ्यताम्। आण्डित्प्रत्यासन्नं तत्र वसिवपीत्यादि
[illegible] सानुवर्तिष्यते न तु डित्त्वम्। वकाराद्यनेकधातुपाठवैयर्थ्यापत्तेरिति दिक्। ॥ ७ दिवाघ्सोः समानार्थकत्वान्नेति भावः ॥

कृग्रोरिङ्खेति। केचित्तु नयोरित्कृदेः दृत्वातोरित्यनेन चात्वसयः। प्रकृतसूत्रे योति प्रक्रियास्मरणपरतया हरदत्तग्रन्थं योजयन्ति। तत्र दक्षस्वरसविरुद्धम्। गिरिजकं शिलाजतु। सिह्लिकम्।
तस्मादस्तद्वकैच व्याख्या सुधीभिरादर्त्तव्या। दृशपादित्वति ग्रन्थाः स्वाधान्तौ माधावग्रन्थः। यस्त्वेसखिभ्य आवरम्। इत्यादीन् मन्त्रान् व्याचक्षरणा नांवेदभाष्यकृतामनेकग्रन्थ
दृकास्थिता ग्रन्थाश्चेहानुकूलादृत्सनवधेयम्। अश्रिकोणः। स्त्र अमरोक्तिमाहं स्त्रियं इति। एवञ्च सुप्रातः सुश्वेति सूत्रे चतुश्रेति तालव्यपाठ एव। केषाञ्चिद्दन्त्यपाठस्तु एतत्
सूत्रानालोचनमूलक इत्यवधेयम्। नैवैतावता चतुरस्रमिति दन्त्यप्रयोगोऽप्यदृष्ट इति भ्रमितव्यम्। अकारान्तेन दन्त्यगर्भेणास्त्रशब्देन विग्रहे तत्सौष्ठवात्। नच नादृष्टाघटेऽपि वि
प्रतिपन्नम्यम्। अस्रः कोणे कचे पुंसि क्लीबमश्रुणि शोणिते इति मेदिनीकोशात्। अहिर्वृत्रासुरे सर्पे इति मेदिनी। अच इः। कुङ् शब्दे। कविर्वाल्मीकिशुक्रयोः। सूरौ काव्यकरे पुंसि
स्यात्खलीने तु [illegible]लीति मेदिनी। खनिकाषि। खनिः स्त्रियामाकरः स्यादित्यमरः। ण्यनादृच दृरिती प्रत्यये खानिरपि। खनिरेवमत्ता खानारिति द्विरूपकोशः। ग्रन्थिस्तु ग्रन्थिप
वर्णे स्वरु कुम्भे — दपर्वणोरिति मेदिनी। वृत्ते च्छन्दसि। बाहुलकात्स्लोकेऽपि। वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः। गात्रानुलेपनी दीपशादशादीपेषु योषितीति मे
दिनी। कृगृ। यत्तु नपदान्ते लिसूत्रे न्यासकारहरदत्ताभ्यां ङ्कि योगिं योरित्यत्र कृग्रोरिङ्खेत्युपन्यस्तम्। तत्क्वचिद्गुणावृद्धिवृत्तिषु अन्वेषणीयम्। कुर्वोः गुर्वोः कृग्रोरिङ्खेति वा
पाठः शोधनीयः। वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिरित्यमरः। इगुपधज्ञाप्रीतिकृ प्रत्यये किरोऽपि। वक्विल्वचः किरोऽपि स्यात्किरौ प्रोक्तः। पथः पथि इति द्विरूप
कोशः। गिरिर्नो नेत्ररुग्भिदि। अद्रौ गिरिजके योषित् दृशी र्णौ पूज्ये पुनस्त्रिष्विति मेदिनी। कुटिरिति ङीषि तु कुटी कुटः कोटे पुमान्स्त्री पटे स्त्री पुंसयोर्गृहे। कुटी स्यात्कुम्भदास्यां च सु
रायां च्छिन्नगुच्छके इति मेदिनी। कृपिः। नासिक्ये शाखामृगे च मधुसूदने इति च। सर्वधातुभ्यः। कर्मण्याख्ये क्रियामात्रे पुंनपुंसकयोर्मतमिति रुद्रः। चर्मकन्त्यां च फलाके इति मे
दिनी। वहेः। ब्रह्मन्तत्वतपोवेदे व द्वयोः पुंसि वेधसि। ऋत्विग्योगभिदोर्विप्रे इति मेदिनी। अश्मेति। भाषायामपीष्यते। छन्दसीति तु शकिन्नैवान्वेति। हृभृ। शरिमेति। शृ हिंसाया
म्। एतच्चोज्ज्वलदत्तरीत्योक्तम्। दशपाद्यान्तु मृणातिने क्य तो। तत्का नेसूः प्रत्ययादिदीर्घादिनिवस्त्र। सृप्यर्दीमनित्रिति छन्दोग्रहणस्यानुवर्तितम्॥ ५ लोहबाण इति प्रसिद्धम्।

२वेजः सर्वत्रे निसूत्रे

टी॰। विष्टपम्। जगत् ॥ सू॰॥ शुक्रञ्चेतत्। पिष्टतान्नोभरीमभिः। वातस्य सर्गो अभवत्सरीमणि। स्तीर्णं बर्हिः सुष्टरीम जुषाणा। यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिः। इत्यादिमन्त्राणान्तु ह्रस्वस्य चानुगुणत्वादुक्तप्रयोगाणामापायामादर्शनेन च्छन्दोनुवृत्तेर्न्याय्यत्वाच्च। अतएवैवं सर्वत्र ग्रहणं कुर्वन्ति। नामन्सीमन्। सर्मेति। मनिन्नन्ता इति शेषः। नामेति। म्ना। अभ्यासे मलोपः। सीमेति। सीमसीमे स्त्रियामुभे इत्यमरः। पक्ष्माणि। पिबतेः प्रागागमः बाहुलकादन्यतोपि। यक्ष पूजायाम्। क्षयः शोषश्च यक्ष्मा चेत्यमरः। षू प्रेरणे। सोमा सन्द्रः। धुधाम। धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोरिति मेदिनी। सुशर्मेति। कृदुत्तरपदस्वरेणान्तोदात्तं पदम्। मनिनि तु मध्योदात्तं स्यात्। सुष्ठु शृणातीति विग्रहः। [illegible] स्यति दुःखक्षयत्वात्साम। साम क्लीबमुपायस्य भेदे वेदान्तरेपि चेति मेदिनी। आत्मा पुंसि स्वभावेपि प्रयत्नमनसोरपि। धृतावपि मनीषायां शरीरब्रह्मणोरपीति च। हनिमश्चि[illegible]स्यादिति हारावली। कबरः पाठकः। बवयोरैक्यात् कबरी केशविन्यासः। जातपदेति ङीष्। अन्यत्र कबरा। गौरउडवाद्दं सूत्रं ङे चिन्त्यं पठन्ति। अत एव गरुत्मानिय न्त इति विग्रहः। डप्रत्यये पृषोदरादित्वात्तलोपे गरुड। शब्दं व्युत्पादयन्ति। इन्देः कमिः। उज्ज्वलदत्तस्तु कमिन्निति नितं पपाठ। तन्न। इदन्त्यत्वात्र मिन्नुपागमः। इदन्तेसो मन्मधु इत्यादौ नित्स्वराभावात्। दशपाद्यान्तु इणो द्मगिति सूत्रितम्। इदमिति। सर्वनामशब्दोयं प्रत्यक्षपरामर्शी। कायतेर्डिमिः। प्रयोजनाभावादेव मकारस्येत्संज्ञाविरहे सिद्धे इकार उच्चारणार्थः। दशपाद्यान्तु डिमिरित्येव सूत्रितम्। किमिति सर्वनाम । । दशपाद्यान्तु ष्ट्रनित्येव सूत्रम्। अत एवाधिकं प्रक्षिप्तमित्याहुः। असु क्षेपणे। अस्त्रं प्रहरणे चापे ना खालेन पुंसकमिति मेदिनी। पत्त्रा। पत्त्रन्तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोरिति मेदिनी। पिबतेः पात्रम्। षित्वात् ङीष्। पात्र्यमत्रे त्रिषु क्लीबं स्रुवादौ राजमन्त्रिणि। तीरद्वयान्तरे योग्ये इति मेदिनी। भ्रस्त्रि। क्लीबेऽम्बरीषं भ्राष्ट्रो ना इत्यमरः। वेष्ट्रं विष्टपम्। उष्ट्रः क्रमेलकः। उष्ट्रे क्रमेलकमयमहाङ्गा इत्यमरः। सिविमुच्योः सूत्रे मूत्रे। भ्याञ्चुरादिण्यन्ताभ्यामेरचा सिद्धे स्वरार्थमिदं सूत्रम्। न च घञान्तत्वसिद्धिः। अचा घञो बाधात्। सूत्रन्तु सूचनाग्रन्थे स्यात्सूत्रं तन्तुव्यवस्थयोरिति विश्वः। अमिचि। आम्रमिति। अनुनासिकस्य क्विझलोरिति दीर्घः। चित्रा सुपर्णी गोतुम्बी सुभद्रा दन्तिकासु च। मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम्। तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि। तद्युक्ते त्वन्यलिङ्गमिति मेदिनी। [illegible] [illegible] चार्थेपंमीति च। शस्त्रं लोहास्त्रयोः क्लीबं छुरिकायान्तु योषितीति च ॥

टीनगव्यम्।गोसङ्घः।हलसूत्रकम्।विवाहादौहस्तेबद्ध्यमानंसूत्रम् ॥ मू०॥ प्रत्ययस्वरेणैतेन्तोदात्ताः।शुनआन्त्र।णिं पेचे।चित्रन्देवानाम्।मित्रंत्रयस्मात्।शस्त्रस्यशस्त्रमसि इत्यादि।पुना
तीतिपुत्रः।पुन्नरकन्तस्मात् त्रायतेइतितुप्रसलन्तरम्।स्त्रीति।डित्वादिलोपः।दविलोपः।टित्वात् ङीप्।स्त्रीयोषिदबलायोषानारीसीमन्तिनीवधूरित्यमरः।गुधूङ्गुङ्
शब्दे।गोत्राभूराख्ययोर्गोत्रः शैलेगोत्रंकुलाख्ययोः।संभावनीयबोधेचकाननक्षेत्रवर्त्मसुइतिमेदिनी।सत्त्रमाच्छादनेयज्ञेसदादानेचकैतवेइतिविश्वः।सत्त्रंयत्तसदादा
नाच्छादनारण्यकैतवेइतिमेदिनी।हुयामा।होत्राशब्दःऋत्विक्स्यपिस्त्रीलिङ्गइतिहोत्राभ्यः कृइतिसूत्रेह दसादयः।अयनेच।कागदन्नोअश्विनावामिति होत्र
हविः।यात्रानुयातनेवृत्तिस्यात्तगमनोत्सवयोःस्त्रियाम्।मात्राकर्णविभूषायांवित्तेतानेपरिच्छदे।अक्षरावयवेस्वल्पेक्लीबिकालेवधारणेइतिमेदिनी।कर्णशब्दग्रहौश्रोत्रंश्रु
तिःस्त्रीश्रवणंश्रवइत्यमरः।भस्त्राचर्मप्रसेविकेतिचागमेः।गात्रमङ्गेकलेवरेस्त्वंवेरमाग्रजङ्घादिविभागेपिसमीरितमितिविश्वः।चारित्रमिति।इत्रप्रत्ययेचरित्रमित्युक्तम्।
नचतत्रस्वरभेदोघणासिद्धेकिमनेनेतिवाच्यम्।स्वरे विशेषात्।धरित्रीति।गौरादित्वाङ्ङीष्। अमेः।अत्रएवानुवर्ततेनोत्रः।आःसमिण्।समयानिकषाशब्दौसमीपवाच
कौ।बाहुलकात्दुपेः दोषा।दिवेर्गुणाभावश्च।दिवा।स्वदेर्धश्च।स्वधेत्यादि।अपरोक्तमह।चिक्कणमिति।सूचेः।सूक्ष्ममिति।णिलोपेकृतेकुत्वादि।सूक्ष्मंस्यात्कण्टकेध्यात्मेपुं
स्यणौत्रिषुचाल्पकेइतिमेदिनी।पातेःडित्वाट्टिलोपः।उकारनकारयोस्तुफ ।सोसुड्डितिसूत्रेवोचाया।यत्तूज्वलदत्तेनोक्तम्।उकारउच्चारणार्थइति।तदाकरविरुद्धत्वादुप
न्।पुंसोसुडितिसूत्रेन्यासरक्षितायांपुनातेमक्सुन्ह्रस्वश्चेतिपठितौपूङोडुम्सुन्नित्यन्ये।भाष्येतुसूतेःसुप्प्रसवेपुमानित्युक्तम्।उपेयप्रतिपत्त्याउपायाअव्यवस्थि
ताइतितुतत्त्वम्।हविभुजि।भुजिष्यस्तुस्वतन्त्रेचहस्तसूत्रकदासयोः।स्त्रियान्दासीगणिकयोरिति मेदिनी। वसेस्तिः।वस्तिर्द्वयोर्निरूहेनाभ्यधोभूमिदशासुचेतिमेदिनी।अगस्तिः
कुम्भयोनौचवङ्गसेनतरौपुंस्यानितिवासावसेः।असभुवि।बहुलवचनान्नभूभावः।वौतसेः।अङ्गुष्ठकनिष्ठेस्याद्वितस्तिर्द्वादशाङ्गुलेइत्यमरः।स्त्रीपुंसयोर्वितस्तिःस्यादित्य
मरमाला।दृणातेः।दृतिश्चर्मपुटेमत्स्येनाइतिमेदिनी।कृतृकृपिकपिदाभ्यइतिपठित्वाकंपीटइतिचतुर्थमुदाहृतम्।कपोरोलइत्यन्यासेतुकृपिभ्यामितिपठ्यते।अ
तस्तरतिरत्रप्रसिद्धइतिकश्चित्।नरतेश्चेतिपृथक्पठित्वानिरीटः कूलरक्षइतिकश्चिद्व्याख्यत् ॥

शे॰। सैंहिकेयो राहुः॥ मू॰॥ रुचि व वि। उचितन्तु भवेन्न्यस्ते मिते ज्ञाते समञ्जसे इति मेदिनी॥ कुटि कुषि॥ कुड्मलो मुकूले पुंसि न द्वयोर्नरकान्तरे इति मेदिनी॥ कुषालं च्छादनं विकसितनमितस्मो क्षवेधातुभ्यो सुनूदशपाद्य। दिघसुनइत्येव सूत्रम्। सर इति। अयं स्त्रियामपि। गौरादित्वान्ङीष्। सरसी तु महासर इति शब्दार्णवः। महान्ति सरांसि सरस्य इति भाष्यम्। पय इति। पीङ् पाने। पयः स्यात् क्षीरनीरयोरिति मेदिनी। वर्च दीप्तौ। वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि पुंसि चन्द्रस्य तनये इति मे॰ दिनी॥ णभ हिंसायाम् भौवादिकः। क्रैयादिकश्च। तप सन्तापे। षह मर्षणे। मह पूजायाम्। तमु ग्लानौ। रञ्ज रागे। एभ्यः षड्भ्यः असुनि सान्तम्। अत्र कयोरन्तमपि। नभस्तु नभसा सार्द्धं तपस्तु तपसा सह। सहश्च सहसा सार्द्धं महश्च महसा सह॰ तमेन च तमः प्रोक्तं रजेनापि रजं सममिति द्विरूपकोशः। तपो लोकान्तरेपि च। चान्द्रायणादौ धर्मे च पुंस्यान् शिशिरमाघयोः। सहः बले ज्योतिषि च पुंसि हेमन्तमार्गयोरिति मेदिनी॥ मह उत्सवतेजसोरिति च। तमः क्लीबङ्गुणे शोके सैंहिकेयान्धकारयोरिति रभसः। तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुन्तुदे इति मेदिनी। नभोऽजसी तु व्याख्यास्येते। रुदिर्। रोदश्च रोदसी चापि दिवि भूमौ पृथक्कौ सहप्रयोगे घनयो रोदस्यावपि रोदसी। इति विश्वः। वी गत्यादिषु। वयः पक्षिणि बाल्यादौ यौवने च नपुंसकमिति मेदिनी। अन प्राणने। अनो भक्तमन्नत्का नञ्च। अनोऽश्मायःसरसां जातिसञ्ज्ञयोरिति टच्। पाकस्थानं महानसमित्यमरः। रेपोवद्यमिति। अं रेपसा तन्वेति मन्त्रे निरवद्ययेति भाष्यम्। उब्जोर्बले ओजो दीप्तावष्टम्भे प्रकाशबलयोरपीति मेदिनी। श्रयतेः। उत्तमाङ्गं शिरः शीर्षमित्यमरः। शृणातेर्घञर्थे कप्रत्ययेऽदन्तोपि। वीचीशिरं दन्तो रजो वा भाजनमेनिके गान्धास्मृ। पिण्डन्दद्याद्गयाशिरे इति वायवीये। कुण्डलोद्घृष्टगण्डानां कुमाराणान्तरस्विनाम्। निचकर्त शिरांसि द्रोणिर्नालेभ्य इव पङ्कजानीति महाभारतम्। अर्त्तेः। उरो वत्सञ्च वक्षश्चेत्यमरः। रिचेः। दहुदशपादौ वृत्तौ तुतुद्र नानुवर्त्तितः। रिकः। रेकः शीङ्त्युदाहृतञ्चात्र। उत्तरसूत्रे तु उडनुवर्त्तनेर्निर्विवादत्वात्। मण्डूकप्लुतौ मानाभावात्। तस्याविसंवादाच्च। उज्वलदत्तेन तु रिचेर्धने विविकिच्चेति पठित्वा तु ठम चानुवसेकित्वाद्गुणाभावन्तु ठम्ङ्गुले नत्र कारेरिक्न्नमिति साधितम्। तदपि न। उक्तोदाहरणस्य लोकवेदयोरप्रसिद्धत्वात्। निरिक्कारेकुणोऽमर्षो। परि पाद्यस्यणस्परेक्णः। रेक्णः स्वलसि पानाममेति इत्यादिमन्त्रेषु रेक्ण इति शब्दस्य प्रसिद्धत्वात्। वैदिकनिघण्टौ च सुवर्णपर्यायेषु तथा पाठात्। वेदभाष्यादिषु प्रकृतसूत्रेण तस्य साधितत्वाच्चेति दिक्। आप्नोतेः। अप्नोऽधिधत्सु तेदधि घत्स्व इत्यादिमन्त्रेषु च नः शब्दः प्रसिद्धः। एतेन च णोऽन्नमित्युदाहृतस्य बाहुलकाण्णत्वमिति वदन्तो दशपादीरत्तिकारा रूदत्तगाः प्र

सादकारादयश्च प रासाः ॥

पतद्ग्रहे। भाषायामपि कदाचीत्याख्ये। माभूदिति। अकाररेफादिंस्यश्चेदिमिरस्योरेवेति नियमेनेत्यर्थः। इतिवद्भ्रीति। अत्राहुर्विबीजन्तु अमोघमिति प्रयोगवारणाय सूत्रस्यावश्यकत्वे बर्योरूपमिति। पुनर्हि मदेवा अभिवर्धर्ये साभूरित्यादिमन्त्रेषु प्रसिद्धमिदम्। शेपः स्याद्भूषणं पेलमिति सुभूतिचन्द्रः। अकारान्तोऽप्ययमिति शेपपुच्छलाङ्गूलेषु शुन इत्यत्रावोचाम। शेपः शेपो च शेफश्च शेफः प्रोक्तश्च शेफसेति द्विरूपकोशः। सुरीभ्यां स्रोतोम्बुवेगेन्द्रिययोरिति विश्वः। रेतः शुक्रे पारदे चेति मेदिनी। पातेः जुट्। चवर्गतृतीयादिः। उज्ज्वलदत्तस्तु युट् चेत्यन्तस्यादिपपाठः। तन्न। पिपाजसा पृथुना। पृथुपाजा अमर्त्यः इत्यादिमन्त्रतद्भाष्यविरोधात्। अदेः। भिक्षा स्त्री भक्तमन्धोऽन्नमित्यमरः। द्विजातिशेषेणयदेतदन्धसेति भारविः। समन्धसा ममदः पृष्ट्येनेति श्रुतिः। स्कन्देश्च। असुन् धश्चान्तादेशः। आपः कर्माख्यायाम्। असुन् ह्रस्वश्च धातोः प्रत्ययस्य नुडागमस्तु वा। अप्नस्वतीमश्विना। अपांसि सिषक्तिमा धितन्द्युः। बाहुलकादित्युपलक्षणम्। हलन्तु टोबान्त इति व्याख्यानादिलपि बोध्यम्। तथा च बुवतेकतमेपि नपुंसकमापः इति कोशमुदाहृत्य सर्वमापोमयं जगदिति प्रयोगो दुर्घटवृत्तौ समर्थितः। रूपेः। आप्नोतेरसुन्। ह्रस्वत्वञ्च धातोः प्रत्ययस्य नुट् चेत्यर्थः। अब्द इति। झलां जश् झशि। नहेः। दिवि गगने। नभो व्योम्नि नभो मेघे श्रावणे च पतद्ग्रहे। प्राणे मृणालसूत्रे च वर्षासु च नभः स्मृतमिति विश्वः। नभः क्लीबं व्योम्नि पुमान् घने घ्राणश्रावणवर्षास्तु बिसतन्तौ पतद्ग्रहे इति मेदिनी। नभन्तु नभसा सार्द्धमिति द्विरूपकोशः दकारान्तोऽपि। विश्वोक्तिमाह। आग इति। अमेः। अमन्ति गच्छन्त्यधोऽनेनेत्यंहः दुरितम्। रंहो वेगः। अहिरहिभ्यामसुना सिद्धे। घिरघिभ्यामसुनि अङ्घोरङ्घः इति माभूदिति सूत्रद्वयमिति गोवर्द्धनः। तस्माच्च स्यान्मद्धोमच चतुर्थत्वं महसोरंहसस्तथेति द्विरूपकोशः। एवञ्च दन्तार्धाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमङ्घो विघातमिति। रङ्घः सङ्घः सुराणाञ्जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नो न्वहमहिमरुचेः सोऽवतात्स्यन्दनो व इति घकारपाठोनुप्रासरसिकानां प्रामादिक इति वदन्ति। देशेइत्वा। रहस्तत्त्वे रते गुह्ये इति मेदिनी। अञ्चञ्जि। अङ्कः। अङ्कसी। अङ्कांसि। अङ्गः। अङ्गसी। अङ्गांसि। योगः योगसी योगांसि। उचसमवाये। अस्मादसुनि बाहुलकात्कुत्वं न्यङ्कादित्वाद्वा। ओक आश्रयमात्रेपि मन्दिरेपि नपुंसकमिति मेदिनी। भूरञ्जिभ्याम्। भुवः अन्तरिक्षम्। सुबन्तप्रतिरूपकमव्ययमिदम्। रजो रेणुः। रजः क्लीबं गुणान्तरे। आर्त्तवे च परागे च रेणुमात्रेपि दृश्यते इति मेदिनी। घञर्थे कप्रत्यये तु अकारान्तोऽप्ययम्। रजोयं रजसा सार्द्धं स्त्रीपुष्पगुणधूलिषु इति जयकोशः। विरजां नदीम्। विरजान्दीक्षामिति। चन्देः। छन्देः। छन्दः पद्यप्रभेदेपि स्वैराचाराभिलाषयोरिति मेदिनी॥ ५ न नियमार्थत्वे मानमिति। एवञ्चाङ्घोरङ्घः इत्यपि साध्वेवेति। इति चतुर्थः पादः ॥

मू०॥ अकारान्तोपि। छन्दोवभिप्रायवशाद्विस्मयाद्द्विरूपकोशे। पचिवचिभ्यां सुप्। पक्षः। पक्षसी। पक्षांसि। अनीकाधिकरणे पूर्वोत्तरे द्वे पक्षसी इति शबरस्वामी। आदयः। माधवस्तु पक्षपरिग्रहे इत्यस्मादसुन्। पक्षः [illegible]दिः। संवत्सरार्द्धश्चेत्याह। वहिहा। अत्र पूर्वसूत्रात्तुडमनुवर्त्य ततोज्ज्वलदत्तादीनां मते नोदाहरणमाह। वक्षादित्यादि। प्राञ्च इति। सकलवृत्तिकृतः प्रसादकारादयश्चेत्यर्थः। एतश्च। शुक्लम्। उक्तोदाहरणानि हन्तावल्लोके दृश्यन्ते। न त्वा संभवन्ति। छन्दसीति सूत्रात्। वेदे तु विपरीतमेवास्तीत्याह। वस्तुतस्त्विति। वेदभाष्यकाराश्चेह साक्षिण इत्यवधेयम्। मिथुनेसिः। सुपमाः सुस्नोताः। इत्याद्युदाहरणम्। विधाञः। वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनि इति मेदिनी। नोधा इति। सद्यो नुवद्धीयायनोधा इति मन्त्रे नोधा ऋषिर्भवतीति निरुक्तम्। नवन्धातीति तु नैरुक्तं व्युत्पत्त्यन्तरं बोध्यम्। अत्र स्वरसूत्रम्। गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वञ्चेति। कृदुत्तरपदप्रकृतिस्वरापवादोयम्। चन्द्रे। चन्द्रं रजतममृतञ्च। तदिव मीयते। चन्द्रमा इति वा मीयते इति दासीभारादित्वादिति हरदत्तः। पुरसि च। पुरोधास्तु पुरोहित इत्यमरः। पुरूरवाः बुधसुतः राजर्षिश्च पुरुरवा इत्यपि। विद्यात् पुरूरवः शब्दे रुकारस्यापि दीर्घतामिति द्विरूपकोशः। नृचक्षाः इति। शिश्वेत्युक्ते सार्वधातुकसंज्ञा। अतः ख्यान्न। उषः कित्। दशपाद्यां तु वसः किदिति पाठः। वसन्ति सूर्येण सहेत्युषा। अपोभीति सूत्रे उषसश्चेष्यते इति वार्त्तिकस्य समुषद्भिरित्युदाहरणं क्विवण्वद्भिर्हरदत्तादिभिरयं पाठः पुरस्कृतः। दमेरुनसिः। सप्तार्चिर्दमुनाः शुक्र इत्यमरः। पक्षे अन्येषामपि दृश्यत इति दीर्घः। जुषेदमूनाः। दमूनसं गृहपतिं वरेण्यम्। दशपाद्यां तु सूत्रे एव दीर्घः पठ्यते तन्मते पक्षे ह्रस्वो बाहुलकाद्बोध्यः। प्रायेणेति। स्त्रियां बहुष्वप्सरस इत्यमरः। स्त्रियां बहुष्वप्सरसः स्यादेकत्वेप्सरा अपीति शब्दार्णवः। अप्सरस्त्वप्सराः प्रोक्ताः सुमनाः सुमनः सुचेति द्विरूपकोशः। एकाप्सरः प्रार्थितयोर्विवाद इति रघुः। विदिभुजिभ्यां विश्वे शब्दस्य रूपपरत्वात्स्विन्नादेशो न कृतः। उदाहरणं विश्ववेत्ति विन्दति भुङ्क्ते इति विग्रहः। अत्रोज्ज्वलदत्तेन विश्ववेदाः अग्निः विश्वभोजाः इन्द्रः तत्सुरूपकृतीति सन्नस्या अलुगित्युक्तम्। तन्न। स्विन्नादेशस्य दुर्वारत्वात्। सुमृडीको भवतु विश्ववेदाः। पूषा भगः प्रभृथे विश्वभोजा इत्यादिमन्त्रेषु सुपो लुक एव दर्शनात्। इत्यन्तरेण तथैवोदाहरणाच्च। वशेः। उशना भार्गवः कविरित्यमरः॥ इत्युणादिषु चतुर्थः पादः॥ अद्भुतमिति। अत् इत्यव्ययमाकस्मिकार्थे। तस्मिन्नुपपदे भुवः प्रत्ययः। गुह्यते परितो वेष्ट्यते प्राणिभिरिति। गोधूमो नागरङ्गे स्यादोषधीव्रीहिभेदयोरिति मेदिनी। मसेः। मसी परिणामे। स्थूरो मनुष्य इति। स्थूरस्य रायो बृहतो य ईशे इति मन्त्रे तु योगपुरस्कारान्न स्थिरस्य इत्यर्थः॥

टी०।शिफा वृक्षमूलम्।पर्शुगणे पार्श्वास्थिसमूहे।इति पञ्चमः ॥ मू० ॥ रभसकोशस्यमाह।वातिरिति। वृञलुटि।यद्यपि सानसिवर्णसीति सूत्रे तण्डुलशब्दो निपातितस्तथापि प्रत्ययस्वरेण मध्योदात्तः।सः।अयन्तु चित्स्वरेणान्तोदात्त इति विवेकः।दंसेः नः नकारस्य।दासः शूद्रे दानपात्रे भृत्यधीवरयोरपीति विश्वः।दंशेम्ना।कैवर्त्ते दाशधीवरावित्यमरः।धूञः।पुण्यं मनोज्ञेऽभिहितं तथा सुकृतधर्मयोरिति विश्वः।अर्त्तेः।मेढ्रोरभ्रोरणो र्णायुमेषवृष्णयएडके इत्यमरः।डित्वनेः।मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरिति विश्वः।संज्ञान्तरे नाटकादेः शब्देऽपि च नपुंसकमिति मेदिनी।अमेः सन्।स्कन्धो भुजशिरोंऽसोऽस्त्रीत्यमरः।अंसः स्कन्धे विभागे चेति दन्त्यान्ते विश्वः।मुहेः।अज्ञे मूढयथाजातमूर्खवैधेयबालिशा इत्यमरः।नहेः।नखः कररुहे शण्ठे गन्धद्रव्ये नखं नखीति विश्वः।नखी स्त्रीक्लीबयोः शुक्तौ नखरेऽनपुंसकमिति मेदिनी।शीङः।ह्रस्वविधिसामर्थ्याद्गुणो न।शिखा शाखा बर्हि चूडा लाङ्गलिक्यग्रमात्रके।चूडामात्रे शिफायाञ्च ज्वालायां प्रपदेऽपि चेति मेदिनी।माङः।मयूखस्त्विट्करज्वालास्वित्यमरः।गुल्फ इति।तद्ग्रन्थी घुटिके गुल्फावित्यमरः।तयोः पादयोर्ग्रन्थी इत्यर्थः।स्पृशेः।पार्श्वङ्कक्षाधरे चक्रोपान्ते पशुगणेऽपि चेति विश्वमेदिन्यौ।श्मनि।तद्वृद्धौ श्मश्रु पुंमुखे इत्यमरः।पुरुषस्य मुखे ते [illegible] द्वौ श्मश्रुशब्दो वर्त्तते इत्यर्थः ——— अश्माद यश्चा।अशूव्याप्तौ।क्रुन्प्रत्ययः।नञ्पूर्वात्तस्मयतेर्डुन्वा।यत्तु अश्नोतेर्डुन्रुट् चेत्युज्ज्वलदत्तेनोक्तं तन्न।धातुलोपापत्तेः।तदभावोऽपि निपातनादिति चेत्तर्हि डित्वोऽस्य सर्वं निष्पन्नमिति दिक्।जने टन्लोपश्चेति।अलोन्त्यस्य।जटा लग्नकचे मूले मांस्यां प्लक्षे पुनर्जटीति मेदिनी।हन्तेः।चादच् अभ्यासकार्यम् । ——— अभ्यासाच्चेति कुत्वम्।अमरोक्तिमाह।पश्चादिति॥जघनञ्च स्त्रियाः श्रोणिपुरोभागे कटावपीति मेदिनी।क्लिशेः।क्लेशः स्यात्पुंसि वरुणे ह्रीवेरकुन्तलेऽपि चेति मेदिनी।फलेः।पलितं शैलजे तापे केशपाके च कर्दमे इति मेदिनी।पलितञ्जरसा शौक्ल्यं केशादावित्यमरः।कृञादिभ्यः।करकस्तु पुमान्पक्षिविशेषे दाडिमेऽपि च।द्वयोर्मेघोपले न स्त्री करके च कमण्डलौ इति मेदिनी।कण्टक इति।कुनू शिल्पिसंज्ञयोरिति कुनाप्ययं सिद्धः।गुणभाज इहैवोदाहार्याः।गुणनिषेधभाजस्तु कुनि।उदासीनास्तु यत्रकुत्राचेदिति भावः।नृ नये।नरकः पुंसि निरये देवरातिप्रभेदयोरिति मेदिनी।उदयनाचार्यस्तु नचनरकाण्येव न सन्तीति क्लीबं प्रयुञ्जते।तत्र मूलं मृग्यम्।सृ गतौ।सरकोऽस्त्री शीधुपात्रे शीधुपाने सुशीधुनोरिति मेदिनी।कुर शब्दे।कोरकोऽस्त्री कुड्मले स्यात्कक्कोलकमृणालयोरिति मेदिनी।विचकार कोरकाणीति माघः ॥

मू०।कोरकःपुमानितिअमरस्तप्रमादः। …… अपवरकावरकादयोपीहैमबोद्धाः
वीकयतेरिति।बाहुलकबललब्धोयमर्थः।एवमनुपदंवक्ष्यमाणंपचिमच्योरित्यपिबोद्धव्यम्।कीचकोदैत्यभिद्वाताहतसस्वनवंशयोः।पेचकोगजलाङ्गूलमूलोपान्तेचकौशिके।मेचकस्तुम
यूरस्यचन्द्रकेश्यामलेपुमान्।तद्युक्तेवाच्यवत्क्लीबंस्रोतोञ्जनान्धकारयोरितिमेदिनी।जनेःजठरःकठिनेपिस्यादित्यमरः।जठरोनस्त्रियांकुक्षौबद्धककूखटयोस्त्रिधितिमेदिनी।वचिव
ठरःकुक्कुटेवण्ठेचेतिमेदिनी।ऊर्ज्जि।नमूर्दरत्वघटणनायनेनेतिमन्त्रः।हर्यतेः।हर्यगतिकान्त्योः।हिरण्यंरेतसिद्रव्येशातकुम्भवराटयोः।अक्षयेमानभेदेस्यादकुप्येचनपुंसकमितिमेदिनी।ज
नेः।तुदस्यविभक्तिकम्।तुप्रत्ययः।रेफश्चान्तादेशः।ऊर्णोतेः।ऊर्णामेषादिलोम्निस्यादावर्तेचान्तराभ्रुवोरित्यमरः।भ्रुवोर्मध्येयआवर्त्तस्तत्रेत्यर्थः।अन्तरान्तरेणेतिद्वितीया।दधातेः।धा
न्यंव्रीहिषुधान्यकेइतिमेदिनी।तनोतेः।चालनीतितउःपुमानित्यमरः।चालनन्तितउस्तुकमितिकोशान्तरम्।तितउपरिपवनंभवतीतिपरस्परशायांआप्यम्।स्याद्वास्तुहिङ्गु·तितउइतिपुंनपुं
सकवर्गत्रिकाण्डशेषः।अर्भकः।अर्भकःकथितोबालेमूर्खेपिचकृशेपिच।पृथुकःपुंसिचिपिटेशिशौस्यादभिधेयवत्।पाकःपरिणतौशिशौ।केशस्यजरसाशौक्ल्येस्यात्स्यादौ।पचनेपिचेतिमेदि
नी।अवद्य।निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः।कुपूयकुत्सितावद्यखेटगर्ह्याणकाःसमाःइतिसर्वत्रामरः।अधमःस्यात्गर्ह्येऊनेपीतिमेदिनी।अर्वातुरङ्गमेपुंसिकुत्सितेवाच्य
लिङ्गकः।रेफोरवर्णेपुंसिस्यात्कुत्सितेपुनरन्यवदितिचाली रीडेः।लिप्तंविपाक्तेभुक्तेचवाच्यवत्स्याद्विलेपिते।इतिविश्वः।क्लिशेः।कीनाशःकर्षकःक्षुद्रोपांशुघातिषुवाच्यवत्।यमे
नाइतिमेदिनी।ईश्वरइति।स्त्रियाणित्वान्ङीप्।ईश्वरीमध्योदात्ता।वनिपीङीब्रयोस्तुआद्युदात्ता।पुंयोगलक्षणेङीषिअन्तोदात्ता।स्थेशभासेतिवरजन्तात्पिईश्वरेतिविवेकः।ईश्वरोमन्मथे
शंभौनाथेस्वामिनिवाच्यवत्।ईश्वरीचेश्वरोमायामितिमेदिनी।ईश्वरःशङ्करेधीशेतत्सत्वामीश्वरीश्वरेतिवोपालितः।विन्यस्तमङ्गलमहौषधिरीश्वरायाइतिभारविः।दशपाद्यान्तुसूत्रान्तरम
पि।हन्तेरन्घश्च।रन्प्रत्ययःस्याद्धुश्चादेशः।हन्यतेगम्यतेऽतिथिभिःघरःगृहम्।प्रातरिति।अतसातत्यगमने।प्रपूर्वः।स्वरादिपाठादव्ययत्वम्।दहेः।नगोमहीरुहेशैलेभास्करेपवनाशनेइतिमेदिनी।
सिचेः।सिंहःकण्ठीरवेराशौसत्तमेचोत्तरस्थितः।सिंही।क्षुद्रावृहत्योःस्याद्वासकेराहुमातरीतिविश्वः।हिंसेर्वर्णव्यत्ययतःसिंहइतिमतान्तरम्।व्याडिः।व्याघ्रःस्यात्पुंसिशार्दूलेरक्तैरण्डकरञ्ज
योः।श्रेष्ठेनराद्युत्तरस्थःकण्टकार्यांस्त्रियामपीतिमेदिनी।हन्तेः।घोरंभीमेहरेघोरइतिविश्वः।ग्रहेः।ग्रहणीरुक्प्रवाहिकेत्यमरः।प्रथेः।प्रथमस्तुभवेदादौप्रधानेपिचवाच्यवदितिमेदिनी।प्रथमचरमे
तिसर्वनामत्वात्सेजसःशीः।प्रथमाः।चरेश्चाचरमे।चरमाः।प्रथिचरिभ्यामितिसुवचम्।मङ्गेरलच्उखवखेत्यादिदण्डकेमगिःपठ्यते।मङ्गलासितदूर्वायामुमायांपुंसिभूमिजे।नपुंसकंतुकल्याणेसर्वो
प्रथमः १

प्र·श·
३१८

टी०। एकवाक्यत्वादिति। एवञ्च पञ्चपाद्युणादिसूत्रे इति तदुक्तिरसङ्गतेति भावः। इति प्राचः प्रमादाः ॥ सू० ॥ थैरः स्वर्गेपि चेति मेदिनी। भावे ष्यञि माङ्गल्यम्। तत्र साधुरिति यन्नाम इत्यः स्यात्त्रायमाणाश्च स्य बिल्वमसूरके। स्त्रियां ग्राम्यामधःपुष्पी मिसिशुक्लकवासुचा रोचनायाम्। तथोदश्वि क्लीबं शिबिकारं त्रिषु इति मेदिनी। इत्युणादिवृत्तौ पञ्चमः पादः ॥ प्राचा तु कतिपयानामेवोणादीनामुपन्यासः कृतः। सोपि नैकप्रघट्टकतया किन्तु विच्छिद्येति स्पष्टमेव। तत्रापि प्रमादलेशतो दर्शयामः। भजो ण्विरिति ण्विप्रकरणे छन्दसि सहः। वहश्चेत्युपन्यस्य परौ व्रजेः षः पदान्त इति ण्विस्तेनैव षः। परिव्राड् इति तावत्प्राचो ग्रन्थः। तद्व्याख्यातानन्तसौत्रेण पञ्चपाद्युणादिसूत्रे इदं पठ्यत इत्युक्तम्। तन्न। क्विप् चेति क्विब्दीर्घौ प्रकृत्य परौ व्रजेरिति सूत्रस्य पाठात्। अस्मिन्नंशे पञ्चपादीदशपाद्योरेकवाक्यत्वात्। यदपि प्राचो ग्रन्थे कश्चित्पठ्यते चिणिति तदप्यपाणिनीयत्वादुपेक्ष्यम्। एतेन प्रघट्टकान्तरेषु दुपरिव्राजादीर्घश्चेति केचिदिति प्राचो ग्रन्थोपि प्रत्युक्तः। सूत्रारूढे सर्वसम्मते दीर्घे केचिदित्युक्तेरप्रामाणिकत्वात्। यदपि धन्तिर्वक्षिङ् वृपिनपिजनियजेरुस् इति पठितं तदप्याकरमात्। तथाहि। जनेरुसिः। अर्त्ति पॄवपियजितनिधनितपिभ्यो नित्। एतेर्णिच्च। चक्षेः शिच्चेति सर्वसम्मतः पाठः। वपुषि तस्मै वपुषे च वपुष्टरं इत्यादिमन्त्रे षाद्युदात्ततायाः अनुकूलश्च। वेदभाष्येष्वेवमेव स्थितम्। इति द्वितीयः प्रमादाः। तृतीयेपि स्तनिदूषिपुषिगदिमदिहृदिभ्यो णेरित्नुच् इति प्राचा पठितम्। तत्र दूषिहृदी प्राचां वृत्तिकृता दृश्येकापि न पठितौ। दूषयित्नुः हृदयित्नुरिति प्रयोगोप्याकरे न दृष्टः। स्तनिहृषिपुषिगदिमदिभ्यः इति हि पञ्चपादीपाठः। घुषिग्रन्थिमण्डिजनिभ्य इति दशपाद्यामधिकमित्यन्यदेतत्। यदपि श्रुदक्षिस्पृहिगृहिदृजिभ्य आय्य इति पठित्वा दारय्यः प्राचोक्तं तदपि न। दृजिग्रहणस्याकरविरुद्धत्वात्। यदपि जॄविशिभ्यां झच् गण्डिमण्डिजनिनन्दिभ्यश्चेत्युक्त्वा गण्डयन्तो जनयन्त इत्युदाहृतं प्राचा। यच्च गण्डयन्त इति प्रतीकमुपादाय मेघनादमिति व्याख्याय गडिवदनैकदेश इति व्याख्यातृभिर्विवृतं तदेतत्सर्वं प्रामादिकम्। तथाहि उणादिवृत्तिषु गडीति निरनुषङ्गं पठित्वा गड सेचने इति विवृतं अयामन्ताति सूत्रे वृत्तिन्यासहरदत्तादिसकलग्रन्थेष्वेवम्। माधवग्रन्थेष्वेवमेव। युक्तं चैतत्। मेघ इति व्याख्यानं प्रति — सेचनार्थस्यैवानुगुणत्वात्। जनेः पाठोप्यप्रामाणिकः। जिधातुं पठित्वा जयन्तः पाकशासनिरिति सर्वैर्विवृतत्वात्। । प्रजय्याय्य इति अप्रसिद्धत्वाच्च। इति तृतीयः प्राचः प्रमादाः ॥ यदपि कॄगॄस्तॄजागृभ्यः क्विन्। कीर्विः। गीर्विः। स्तीर्विरिति तदपि लिपिभ्रमप्रयुक्तमेव। कॄ विक्षेपे। गॄ निगरणे। स्तॄञ् आच्छादने इति प्राचो ग्रन्थं विवृण्वता मुक्तिरपि मूलाशुद्ध्यैव हेया। जॄशॄस्तॄजागृभ्यः क्विन्निति पाठ उणादिवृत्तिकृतां माधवा

रामः
३१८

टी०॥ भावेतुमुनिति। अतएव तुमर्थे सेसेनिति सूत्रे तुमर्थ इति चरितार्थम्। अत्र च भावोऽसत्वभूत एव। अन्यथार्थे लिङ्गाद्यभावेन प्रत्ययार्थे वैलक्षण्या ननुभवात्।भाव
मू०॥ जीर्विः पशुः। शीर्विर्द्रिस्लः। स्तीर्विरध्वर्युरिति च तत्तद्ग्रन्थे षूदाहृतम्। स्नु इत्यस्य दीर्घान्तत्वे एव हि स्नूतद्धातोरितीत्वं लभ्यते न तु ह्रस्वान्तत्वेपि तस्माद्व्याकर
मेव ग्रहीतुमुचितमिति दिक्। ग्लाज्याहात्वरिभ्यो निरित्यप्यनाकरम्। वीज्यागृरिभ्यो निरिति पठित्वा सूत्र इत्यानन्तरं वहिश्रीति सूत्रे ग्लाहात्वरिभ्यो निदिति सूत्रितत्वात्। तूर्णी
रप्यः सदानवइत्यादावाद्युदात्तदर्शनाच्च। न च स्त्रियां क्तिन्नित्यधिकारस्थं वार्त्तिकमेवेदं प्राचोदाहृतं न तूणादिस्थमिति वाच्यम्। एवमपि त्वरतेः पाठस्यानुचितत्वात्। न ह्य
सौ वार्त्तिकेऽस्तीति दिक्। एवं संस्त्यायतेड्ड्रिति प्राचोदाहृतमप्यनाकरम्। स्त्यायतेड्ड्रिरित्येव सूत्रस्याकरे पञ्चपाद्यां दशपाद्यां च उपलम्भात्। संस्त्याने स्त्यायतेर्ड्रट्
स्त्री। सूते सप्रसवे पुमानिति तु भाष्ये श्लोकपाठः स एव माधवेनोपन्यस्तः। न तु सूत्रपाठस्य तथात्वं दृश्यते। एतद्ग्रन्थव्याख्यातृणामपि प्रमादा ऊह्याः। यथा पाणिन्या
दिमुनीनिति व्याचक्षाणैरुक्तम्। मनेरुश्चोपधाया इति। नह्येवंविधं सूत्रं पञ्चपाद्यादावप्यस्ति। अतइत्यनुवर्त्तमाने मनेरुच्चेति सूत्रितत्वात् इति दिक्॥ इति चतुर्थे प्राचः
प्रमादाः॥ उणादयो बहुलम्। वर्त्तमाने लडित्यतो वर्त्तमानग्रहणम्। पुवः सञ्ज्ञायामित्यतः सञ्ज्ञाग्रहणञ्चानुवर्त्तेते तदाह। एते इति। बहुलग्रहणस्य फलमाह।
केचिदिति। हृषेरुलजुक्तः शङ्केरप्यूह्यते शङ्कुलेति दर्शनात्। किं च फिडफिड्डौ कुत्रापि न विहितौ। अर्तेरूह्यते ऋफिडः ऋफिड्ड इति। सञ्ज्ञास्विति। अन्नादि प्र
युक्तास्वेव न तु सर्वत्रेत्याहुः। कार्याद्गुणप्रतिषेधादिकात् अनुबन्धङ्कारादिकं विद्यात्। तेन फिडफिड्डौ कितावूह्याविति भावः। अनूबन्धमित्यत्र उपसर्ग
स्य घञीति दीर्घः। एतदुणादिषु शास्त्रं शासितव्यम्। भूतेपि दृश्यन्ते। नन्वेवं वर्त्तमानग्रहणमेव निवर्त्त्यताम्। इदञ्चोत्तरञ्च सूत्रन्त्यज्यतामविशेषात्कालत्रये
प्रत्ययलाभादिति चेत् सत्यम्। बाहुल्येन वर्त्तमाने क्वचिदेव भूतभविष्यतोरिति विवेकप्रदर्शनायेदमित्याहुः। तुमुन्ण्वुलौ। क्रियार्थः प्रयोजनं यस्याः सा
क्रियार्था तस्याम्। अत्र अयं सिद्धान्तः। तुमुन्ण्वुलोः कृत्वाविशेषेपि अव्ययकृतो भाव इति वचनात् भावे तुमुन्। ण्वुल् तु कर्त्तरि। ॥
वचनाच्चेत्यनेन सत्वभूते भावे घञादीनामेव विधानाच्चेति भावः ॥

टी०॥ प्रत्ययद्योत्यमिति। उभयत्रापीति भावः॥ मतभेदेनेति। अर्थाध्याहारवादे संसर्गः शब्दाध्याहारवादे तु प्रकार इत्यर्थ इत्येके। कर्मप्रवचनीयवत् द्योतकत्वे संसर्गः प्रादिवद्योतक
प्रकृत्यर्थस्य उद्देश्यत्वन्तु प्रत्ययद्योत्यम्। तत्र संसर्गः प्रकारो वा मतभेदेन। लिङ्लोर्भाष्ये विद्यादीनां वाच्यत्वमिति पक्षस्याप्युक्ततया न द्री
त्याद्होद्देश्यत्वं प्रत्ययार्थः। प्रकृत्युपपदार्थयोः समानकर्तृकत्वमपीहाभिधानबललभ्य प्रयोगोपाधि। तुमुन्प्रकृत्यर्थस्तु उपपदार्थप्रति
विशेषणम्। ण्वुलि प्रकृत्यर्थो ण्वुलर्थे ण्वुलर्थस्तु कारकद्वारा उपपदार्थे विशेषणम्। कृष्णं द्रष्टुमिति। कृष्णकर्मकभविष्यद्दर्शनार्थमित्यर्थः।
दर्शको यातीति। भविष्यद्दर्शनकर्तृकन्तदुद्देश्यकञ्च यानमित्यर्थः। क्रियायाङ्किम्। भिक्षिष्य इत्यस्य जटाः। इह भिक्षार्था जटाः ताश्च द्रव्यं न तु
क्रिया। भिक्षितुं जटा इति प्रयोगस्तु धारयतीत्यध्याहारेण योज्यः। क्रियार्थायाङ्किम्। धावतस्ते पतिष्यति दण्डः। अस्त्यत्र धावत इति क्रिया
न त्वसौ दण्डपातनार्था। उद्देशेन हि तादर्थ्यं विविच्यते न हेतुत्वमात्रेण। समानकर्तृकेषु तुमुन्। अक्रियार्थेति। भोक्तुमिच्छतीत्यत्र हि भोज
नविषयिणीच्छा प्रतीयते न तु भोजनार्था। तदुद्देशेनानुष्ठीयमानत्वात्तादर्थ्यम्। उद्देशश्चेच्छा। न च भोजनेच्छापि तयैवानुष्ठीयते आत्माश्र
यात्। अतः पूर्वेणाप्राप्तिरिति भावः। यत्तु वदन्ति समानकर्तृकेष्विति विशेषं समर्थयितुमयमारम्भः। तेन देवदत्तेन भोक्तुमिच्छति यज्ञ
दत्त इति न भवतीति। अत्रेदं वक्तव्यम्। तुमुन्ण्वुलाविति विधिरपि भिन्नकर्तृकेषु नेष्यते। पुत्रं भोजयितुं माता गच्छतीति वक्तव्ये पुत्रेण
भोक्तुमित्यप्रयोगात्। सेयं व्यवस्था शब्दशक्तिस्वाभाव्यात् बहुलग्रहणाद्वा सिद्धेत्यन्यदेतत्॥ एवं स्थिते प्रकृतसूत्रे तादर्थ्याभावेऽपि विध्य
र्थमित्येव ज्यायः ॥ ७७ त्वप्रकार इत्यर्थ इत्यन्ये। प्रकार एवेति पक्ष एव युक्त इत्याह॥ लिङ्दिधाविति॥ अभिधानेति॥ प्रयोगस्वभावबललभ्य इत्यर्थः॥ अनभिधानादन्यत्रप्रयो
गो नेति यावत्। प्रयोगोपाधिरिति। समुदायशक्य इत्यर्थः। विविच्यते। गम्यते। तदुद्देश्यकं हि तदर्थमित्युच्यते न तज्जनकमात्रमित्याशयः। न तु भोजनार्थेति। दर्शनेच्छया यथा दर्शनमनु
ष्ठेयं न तथा भोजनेच्छया इच्छानुष्ठेयेत्यर्थः। इत्येव ज्याय इति। समानकर्तृकेष्विति स्पष्टार्थमेवेति भावः ॥

टी०॥ नियच्छतीति। यत्तु तुमुन् समानकर्तृके उपपदे इच्छार्थे विहितो यस्येति भावः। विश्वतोमुखत्वमनेकार्थत्वं इह चलटेति। अन्यथा तदुपादानवैयर्थ्यमिति भावः। नन्वविवक्षितक

मू०॥ वस्तुतस्तु तन्त्रावृत्त्याद्याश्रयणेन प्रकृतसूत्रं प्रागुक्तेऽपि तुमुनि समानकर्तृकत्वं नियच्छति। सूत्रे विश्वतोमुखत्वस्यालंकरणत्वात्। स्वरितेनाधिकार इत्यादिसूत्राणां भाष्य एव बहुधा योजितत्वात् लक्ष्यस्य निर्विवादत्वात् ननु धातोः कर्मण इति सूत्रेऽनभिधानबलेन समानकर्तृकादित्वं यो वार्त्तिके प्रत्याख्यातः। तत्किमिह तन्त्राद्याश्रयणेनेति चेत् मैवम्। तत्रैव भाष्यकृता अगतिकगतिरेषा यदनभिधानमित्युक्तत्वादिति दिक्। अत्र काशिका। इच्छन् करोतीत्यत्रानभिधानान्नेति। अस्यार्थः। उक्तविषये इच्छन् कर्तुमिति न भवति। इच्छन् कर्तुं गच्छतीत्यादौ तुमुन्ण्वुलाविति सूत्रेण स्यादेवेति। अत्रेदं वक्तव्यम्। करोतीत्यर्थे तु तुमुनः प्राप्तिरेव नास्ति तस्य भावार्थकत्वात् इह च लटा कर्त्तृप्रतीतेः। यत्तु हरदत्तेनोक्तं इच्छता क्रियत इत्यत्र प्रसङ्ग इति। यच्च परिकुर्वन्ति कर्माविवक्षायां भावे प्रसङ्ग इति तच्चिन्त्यम्। अविवक्षितकर्मणां भावे लो न। किंतु कर्मसामान्य एवेति लः कर्मणि सूत्रस्य स्वग्रन्थविरोधात्। किंच भावे लस्यापि वर्त्तमानकालता निर्विवादा। न चेयं तुमुना लभ्यते। किंच इच्छन् कर्तुमिति प्रयोगो नेष्यत इति रिक्तं वचः। कर्तुमिच्छन्निति प्रयोगस्य सकलसम्मतत्वात्। यदानुपूर्व्या आहर पात्रं पात्रमाहरेत्यादाविव स्वेच्छामत्त्वात् तुमुन्प्रकृत्यर्थस्योपपदार्थं प्रति विशेष्यतापि स्यादिति चेन्न। आपादकाभावात्। अव्ययकृत्प्रकृत्यर्थानां क्रियान्तरं प्रति विशेषणतायाः क्वाप्यक्लृप्ततया तथैव व्युत्पत्तेश्चेति दिक्। इच्छासनन्तस्य विग्रहे सर्वत्रायमेव तुमुन् प्रयुज्यते। कर्मत्वसमानकर्तृत्वयोरिच्छाप्राधान्यस्य च सन्नन्ते दृष्टस्येहापि तौल्यात्। वृत्तिसमानार्थकवाक्यस्य न्याय्यत्वादित्यवधेयम्। शकधृष ॥ ७ ॥ एभ्योऽपि भावे लः पक्षे प्र

करणस्य भाष्याल्लभ्यते इति न्यायेऽर्थे स्वग्रन्थविरोधो न दूषणमत आह। किंचेति। अपि नाकर्त्तर्यपि। न चायं तुमुनेति। तत्रकृत्यर्थे समभिव्याहृतक्रियापेक्षया भविष्यत्वस्यैव प्रतीतेरिति भावः। अत एव सन्नन्त कर्तुमिच्छन्निति कर्तुमिच्छन्नासीदिति तदर्थः। अस्येच्छाप्राधान्य एव प्रवृत्तिरित्यत्र मानाभाव इति भावः। न्याय्यत्वादिति। तथानेनैव तुमुना निर्वहति न पुनः क्रियार्थेनापीति भावः।

स्यादनमिच्छतीति न विग्रहः समानार्थकत्वेनान्यस्यानौ
चित्यात् स्पष्टं चेदं सन्विधायके भाष्ये ॥

अयमपीति।अत एवायं स्वार्थिक इति भूवादिसूत्रे कैयटः।बाधे प्राप्ते वचनमिति।यद्यप्ययं भावोऽसत्त्वभूतो घञादिवाच्यस्तु सत्त्वभूतस्तथाप्यस्यैव विषयविभागस्य स्फुटं बोधनायेदमि
तिभावः।कर्तृत्वविवक्षेति।तेनायङ्कर्तरीति भावः।इत्यादाविवेति।मितां ह्रस्व इत्यत्र वेत्यनुवर्त्य व्यवस्थितविभाषयेति भावः।नधालिति।अन्यथेत्यादिः।परिच्छित्तिरिति।इयत्तेत्यर्थः।प
अयमप्यक्रियार्थोपपदार्थारम्भः।भोक्तुं शक्नोति।धृष्णोति जानातीत्यत्र भुज्यर्थो विषयतया संबध्यते।प्रावीण्यञ्च गम्यते। ग्लायतीति तदशक्तिः।घटते अर्हतीति योग्यता।
आरभते।क्रमते उत्सहते भोक्तुमिति।भुजेराद्यावस्था।लभते इत्यप्रत्याख्यानम्।अस्तीत्यादौ तु संभवमात्रम्।आनवचनाच्च।क्रियार्थोपपदे विशेष विहितेन तुमुनास्य विषये घञा
दीनां बाधे प्राप्ते वचनम्।यागायेति।यष्टुमित्यर्थः।तुमर्थाच्च भाववचनादिति चतुर्थी।पदरुजेति।पद्यतेऽसाविति।करणस्यात्र कर्तृविवक्षा।आद्याः।स्थिरोऽसर्त्तेरिति।श्वादेर्द्धादे
श्च ग्रहणम्।स्थिरे कर्तरीति।एतेन स्थिरग्रहणं प्रत्ययार्थस्य कर्तुर्विशेषणम्। ननूपदमिति दर्शयति।अङ्घ्र्यादिषु सारशब्दस्य पाठश्चेह प्रमाणम्।व्याधीत्यादि।अस्थिरा
र्थम्।विसारो मत्स्य इति।विविधं सरतीति कृत्वा।सारो बलमिति। अत्राप्यन्तर्भावितण्यर्थो धातुः।सारयति चेष्टयतीति कृत्वा।बलवान्हि चेष्टते।अपाणिनीयमिति।भ्र
मेः शुद्धाद्घञि वृद्धेर्दुर्लभत्वादिति भावः।यदि तु धुर्यान्विश्रामयेत्यादाविव णिचि वृद्धिमाश्रित्य णिजन्तादेरच् क्रियते तदा रूपं सिद्ध्यत्येव।अर्थस्तु भिद्यत इति भावः।निवृत्तप्रे
षणाद्धातोः प्राकृतेऽर्थे णिजिति विवक्षायां तु न दोष इत्यवधेयम्।अवोद इति।उन्दी क्लेदने अवपूर्वः घञ् नलोपो निपात्यते।एध इति।इन्धेर्घञि नलोपो गु
णश्च निपात्यते। नधातुलोप इति प्रतिषेधः स्यात्। ओद्म इति।उन्देरौणादिके मन्प्रत्यये नलोपो गुणश्च।श्रन्थेति।प्रपूर्वस्य हिमश्रन्थ च घञीति बोध्यम्।प
रिमाणाख्यायां सर्वेभ्यः।परिमाणं परिच्छित्ति   आख्यानमाख्या उक्तिः परिच्छित्तेरुक्तौ सत्यामित्यर्थः।कस्य पुनः परिच्छित्तिः प्रत्ययार्थस्य।तण्डुलनिचाय इति।निची
यते राशीक्रियते इति निचायः।अत्र राशेरेकत्वेन समुदायिनां परिच्छित्तिर्गम्यते।एरचि प्राप्ते घञ् ॥ ५ ॥ परिच्छित्तेरिति।तदुक्तिश्चोदाहरणे एकादिशब्दैः स्पष्टैव।समुदायिनामिति।त,
ण्डुलपदेन कर्मधारय इति समुदायिन एव प्रत्ययार्थ इति भावः।तत्परिच्छित्तिश्चैकराशिविषयत्वेनेति बोध्यम्।एरचीति।निश्चाय इति पाठे ग्रहवृदृ इत्यपो बाध इति बोध्यम्।न स्वपरिमाणा

आर्थिकमिति। एवंरीत्यैकत्वमपि बोध्यम्। कर्मणीति। इदञ्चिन्त्यम्। अकर्त्तरि चेति सूत्रे पर्युदासेनैव कारकलाभे पुनस्तद्ग्रहणं परिमाणाख्यायामित्यस्य कारक एव प्रवृत्तिर्न तु भाववदित्यर्थं ते
नेह न ऐकातिलोच्छितिर्हेलुतौ। एवञ्च घञनुक्रमणमजपविषये ऽवचने हि स्त्रीप्रत्ययान्मप्यप। आदविज्ञानमिति तत्रस्थवार्त्तिकं न कार्यमिति भाष्यं सङ्गच्छते। अन्यथा कर्मणि
क्तिनो बाधाभावात्तद्वचनस्यावश्यकत्वेन भाष्यासङ्गतिः स्पष्टैव। तस्मात्परिमाणाख्यायां भाव एव क्तिन् न कारके ऽनभिधानादित्यावश्यकम्। अत्राप्यकर्त्तरीत्यनुवृत्त्या तत्रत्याख्या त
निष्पूयते शोध्यते तुष्पाद्यपनयनेन यस्तण्डुलादिः स निष्पावः शूर्पेणेति करणतृतीयान्तस्य कर्तृकरणे कृता बहुलमिति समासः। अत्र शूर्पसंख्यया तण्डुलादेरपि परि
च्छित्तिः। शूर्पद्वित्वन्तु आर्थिकं न तु शाब्दम्। यद्यप्यत्र निरभ्योः पूल्वोरिति घञ् लभ्यते तथापि सर्वग्रहणबलादनेनापि भवितुमर्हतीति भावः। अस्योदाहरणमाह। द्वौ कारा
विति। कृषिविशेषे कर्मणि घञ्। विक्षिप्तधान्यादिराशिः कारः। इह प्रकृत्याश्रय एवापवादो बाध्यते न त्वस्याश्रयः। सर्वेभ्य इति पञ्चमीनिर्देशात्। तेनेह न। एका तिलोच्छि
तिः। कर्मणि भावे वा क्तिन्। ऊर्द्धीकृतो राशीकृत इत्यर्थः। तदन्तस्य चयितुः अजपोरित्युक्तम्। दारजारौ। यद्यपि दारयतेः पचाद्यचा सिद्धः स्वरश्च तुल्यः कर्षात्वत इति घञोऽप्य
न्तोदात्तत्वात् तथाप्यकावशङ्काविति स्वरे वारयितुमिदम्। णिलुकोति। लोपे हि सति घञाश्रयात् वृद्धिर्न स्यात् णिलोपस्य स्थानिवद्भावात्। न च णिज्निमित्ते न शास्तु इति वाच्य
म्। जारशब्दे मित्वात् ह्रस्व इति ह्रस्वापत्तेः। लुकि तु सति तस्याः परनिमित्तकत्वात् क्विलुगुपधात्वनिप्रतिषेधात् स्थानिवत्त्वाभावान्न दोष इति भावः। यत्तु वदन्ति दीर्घान्तेभ्य एव दा
रः। जीर्यतेऽनेनेति जार इति अण्यन्ताभ्यामेव करणे घञा सिद्धत्वात् तदाद्युदात्तत्वमिलितमिति स्वबोधः। अपवादस्यात्र दारयित्यपोतिषधे उत्सर्गस्य घञो दुर्लभत्वात्। अपवादे
विपरेण त्यदाबाधादिह दुर्लभ इत्यन्यदेतत् ॥ ७७ मित्यन्यत्। न दोष इति। यद्यपि ञ्यादिर्नु धातोर्ण्यन्तात्कर्त्तरि घञि न स्यामित्या न णिलोपेनैवासिद्धे लुग्विधानं व्यर्थं तथाप्ये
तद्वार्त्तिकभाष्यप्रामाण्यान्न साम्प्रदायिकः स इति भावः। नित्तदिति। एतद्वचनं न कार्यमित्यर्थः। ल्यदेत्तु पनत्वं घस्यापि। यदि तु नेतदाद्युदात्तत्वमित्यस्य कर्त्तरीत्यस्य स्थाने करणे इति
पठित्वा तत्रापवादः घञमण्यन्तादिष्यायमिति लुके त्वं शोनादत्तीय इति व्याख्यायते तदा सस्य गतः स्पष्टश्चेदं भाष्ये ॥

अक्षेष्वपीति।अक्षकरणकद्यूतसाधनेष्वपीत्यर्थः।अयमेवघञिति।राजसमीपेऽभिव्याप्यशयनस्यपर्यायइत्यर्थेकेराजोपशायइत्यादावितिभावः।अग्न्यादौति।आदिनाइष्टकाः।आ अपादानेस्त्रियामिति।घञनुक्रमणमजपोर्विषयेइतिवचनात्।स्त्रियामप्राप्तेघञ्विधीयते।उपाध्यायेत्यादि।यास्वयमध्यापयतितस्यामिदंरूपद्वयम्।पुंयोगेतुङीषे वा।आनुगामगमश्वपासिकइत्युक्तम्।अकृतनीशारइति।उपसर्गस्यघञीतिदीर्घः।अथकथंप्रदक्षिणप्रसव्यगामिनांशारणामितिअत्राहुः।अतएववार्त्तिकप्रयोगात्अक्षेष्वपिशारणातेर्घञिति।यज्ञेसमिस्तुवः।अधिकरणेल्युटोऽपवादोघञ्।प्रथने।विस्तारस्त्रियंगायतिः।छन्दोनाम्निच।शब्दविषयत्वात्पूर्वेणाप्राप्तेवचनम्।अत्रकेचिद्वावितिनानुवर्त्तयन्तितेनप्रस्तारपङ्क्तिरित्यादिसिद्धम्।उदिग्रहः।घञ्स्यात्।ग्रहवृदृनिश्चिगमश्चेतिप्राप्तस्यापोऽपवादः।परिन्योः।परिणयन्।इहद्विःपरिग्रहणङ्क्रियते।सकृदेवतुकर्त्तव्यम्।तथाहि।परौनियोर्द्यूते।इणोनुपात्यये।नावभ्रेषेइतिसूत्ररचनास्तु।सत्यम्।तथानकृतमित्येव।व्युपयोः।ननुपूर्वसूत्रेणेअनुपात्ययेपर्यायशब्दोऽस्त्यादितःएवञ्चेहपर्यायग्रहणंव्यर्थंअनुपात्ययइत्यस्यानुवृत्तिसंभवात्इतिचेत्।अत्राहुः।पर्यायग्रहणंपुनर्विधानार्थम्।तेनाभिविधिविवक्षायांपरमपीनुणंबाधित्वाअयमेवघञ्भवतीति।आकायमिति।आचीयतेअस्मिन्नग्न्यादि।अधिकरणेघञ्।अग्निस्थलविशेषश्चिन्वीतचयनेननिष्पाद्यएवेतिश्रुत्यर्थः।सङ्घेच।उत्तरेचअधरेचउत्तराधराः।तेषांभावऔत्तराधर्यम्।सूकरेति।स्तनपानाययदोत्तराधरभावेनसूकराःशेरतेतदेवंप्रत्युदाहरणम्।यदातुभिक्षुवत्पृथक्पृथगेवावतिष्ठन्तेतदेहापिभवत्येवघञ्।कर्मव्यतीहारे।अन्नवर्त्तमानाद्धातोरित्यर्थः।आवेणजिति।कर्त्तरिघञ्जिनेकारकेतुनभवत्यनभिधानादित्याहुः।प्राचातुभावादावित्युक्तंतदुपेक्ष्यमाकारविरोधात्।व्यावक्रोशीति।क्रुशआह्वाने।हसेहसने।णिजन्ताभ्यामञ्।सचकृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणमितिपरिभाषयासोपसर्गाद्भवति।तद्धितत्वादादिवृद्धिः।नस्त्रियामितितुसकर्मकत्वात्व्यतिहारइतिनिषिद्धम्।स्यादेतत्।स्त्रियाङ्क्तिन्नितिप्रकरणेणज्विधेयः।एवञ्चस्त्रियामितिनवाच्यमितिलाघवमितिचेन्मैवम्।अस्त्रियामितिवासरूपविधिपर्युदासापत्तेः।दृश्यतेहिव्यावकृष्टिरितिक्तिन्नपि।ननुयेननाप्राप्तिन्यायेनक्तिनएवापवादोऽयंणच्।युजादयोऽप्येवम्।उभयप्रसङ्गेऽपवादविप्रतिषेधाद्युजादयःप्राप्नुवन्ति।दृश्यतेतुणजेव॥ अग्निस्थलविशेषमिति।अग्न्याधारस्थलविशेषमित्यर्थः।दृश्यतेहीति।ध्वनितञ्चेदंवासरूपसूत्रेभाष्येप्रकृतसूत्रस्थभाष्यन्तुन्यायानुगृहीततद्भाष्यविरोधादेकदेश्युक्तिरितिभावः ॥

वा ज्ञात इति। वासरूपइत्यस्य बाधप्रहारेति भावः। नपुंसकइत्युत्तरमेव तु न कृतम्। खलर्थविषये भावे खलादयो माभूवन्निति। अत एव भाष्ये उक्तं येन खलबाधकास्तदर्थं पृथग्ग्रहणं मि तद्यथा। ध्यावचोरित्यत्र ण्यासश्रन्थेति युच् प्राप्तः। ल्युट्त्वात्र गुरोश्च हल इत्यकारः प्राप्तः। क्वचित्त्वाकार एवेष्यते न तु णच्। अतीसारापनीतौ हेति यथा। सेषा मनस्यान्यायतो दुर्लभापि कृत्यल्युट इति बाहुलकेन समर्थनीयेति स्थितमाकरे। एवं च आवकृष्टिक्तिन्नपि तथैवास्तु। मास्तु च प्रकरणभेदेन क्लिष्टामिस्तु क्तिपिति चेत्। सत्यम्। पावसंशोबाहुलकं पिनेव निर्वाहस्तस्यां शास्त्रबाहुलकेन निर्वाहं स्वीकृत्य तदुपायानां प्रत्याख्याने पञ्चादिविषयकानेकवचनवैयर्थ्यापत्तेरित्यालोचनावत्। सांराविणमिति। समन्तात्स्यशब्द इत्यर्थः। संशब्दोऽभिविधिद्योतकः। पूर्ववत्समातिकादण्। स्वभावतश्चेदमणिनुणन्तं नपुंसकम्। अनेन नपुंसके भावे क्तो घञ् चेति उभयं वासरूपन्यायेन प्राप्तं पुनर्भावग्रहणसामर्थ्याद्बाध्यते। न च कर्तृभिन्नकारकनिवृत्तये भावग्रहणमिति वाच्यम्। पूर्वसूत्रे द्रव्यशब्दशक्तिस्वाभाव्यादेव कारकद्वयोः प्रवृत्तेः। ल्युटा तु समावेशो दृश्यते। संदरणमिति। तत्र बाहुलकाल्लभ्यत इत्याकरः। आक्रोशे। ग्रह इति निग्रहं गमयेत्यपि प्राप्तेऽयमारम्भः। अवग्रहपदः स्वेति। च्छेदविशेषइत्यर्थः। निग्रहो निरोधः। पात्रग्राहेणेति। भिक्षापात्रोपादानेन पात्रं गृहीत्वेति यावत्। लिप्सायाम्। प्रग्रहो देवदत्तस्य। प्रकृष्टोऽभिनिवेश इत्यर्थः। विवराकन्येति। ग्रहवृद्धादिना कर्मण्यपानुस्त्यादिः विशिष्टकर्मणि परत्वात्किं नाभाणम्। अजब्यांस्त्री खलनाद्युक्तैः अत आह किंन विषयेऽपीति। एवं च अपोऽज्वन्ताः पुंसीति प्रायिकं द्रष्टव्यम्। रश्मौ च। रश्मिवाकटादिसंबद्धायां रज्जौ रश्मिशब्दो वर्तते। न तु रज्जुमात्रे। इह बहुलकत्वो ग्रहे रुपासः। सकृदेव तु कुशक्यः। तथा हि। उद्ग्रहः। समि मुष्टौ। आक्रोशे अवन्योः। अवेर्लिप्सापमापरोपन्ते। अवे वर्षप्रतिबन्धे विभाषा। प्रे वणिजाम्। इत्यादि। परे भुवोऽवज्ञाने। इत्यस्यानन्तरं आङि रुप्लुवोरित्यस्तु। तथा तु न कृतमित्येवा क्तादिनिरस्यर्थमिति। परत्वाड्डितासु टो प्राप्तो। तथा च पूर्वविप्रतिषेधोऽयं फलितः। एवञ्च वासरूपन्यायो नास्ति। अनपवादत्वादिति भावः। वर्षमिति। वर्षभोवर्षणादिति भाष्यकारप्रयोगात् ल्युडपि भवतीति कैयटादयः। एतच्च वृष्टिमात्रविषयकं बोध्यम्। अत एव भीत्रार्थानामिति सूत्रे भयं भीरिति न्यासग्रन्थमुपादाय भयनमिति काशिकोपपाठ इत्यनुन्यासादयः ॥ ५७ नि। आकर इति। भाष्यमित्यर्थः। अयमारम्भ इति। घञर्थ इत्यर्थः। ततो हि नित्यमित्यादि तद्धिते पुन्व्याख्यानमिदम् ॥

करणे इति। नच परत्वाल्ल्युटा बाधापत्तिर्बाहुलकेन तदप्रवृत्तेः। अत एव ग्रस्यादावधिकरणे क्त उक्त आकरे। इत्यनाप्यक्तिरित्यादयः। करणे किं। युजाद्यन्ता अपि बाहुलकेनैव बोद्ध्याः। ऋदोरप्। नायमकारः किंतर्हि स्कारो निरभ्योः पूल्वोरित्यारम्भात्।। इत्याशयेन दीर्घान्तादप्युदाहरति। लवः पव इति। वशिरण्योरिति। घञि प्राप्ते वचनम्। वशनं वशः। रंगन्ति शब्दायन्तेऽस्मिन्निति रणः संग्रामः। घ्यर्थ इति विग्रहः। वैश्वदेव शिरमन्नम्। घास अत्तुमदं भक्ष्यम्। शष्पं बालतृणं घास इत्यमरः। उपजापो मन्त्रभेदः। प्रजने सर्तेः। प्रजननं प्रजनः। भावे घञ्। जनिवध्योश्चेति वृद्धिप्रतिषेधः। यद्वा। ण्यन्तादेरच्। प्रयाह्येत्र पालयं विपरीतयति। यथाप्रतिष्टन इत्यत्र प्रादुर्भावस्यैवैपरीत्यं। भंग्रहणम्। तच्च प्रथमं द्वितीयादिकं च। त्यत्र नाग्रह इत्येके। ह्रस्वदत्तस्वरसौम्येवमाहुः। तौ तु प्रथमग्रहणमिति व्याख्यानम्। उत्तरो ग्रन्थः स्पष्टार्थः। ड्वितः क्त्रिः। अयमिति। तथा च पाकेन निर्वृत्तमिति विगृह्यते। नतु पक्त्रेनेति। यत्तु प्राचोक्तं भावादाविति तन्नेति भावः। क्त्रेर्मम्। तद्धिते पुंस्त्वं व्यस्तमिदम्। नित्यग्रहणादिति। तत्र हि नित्यमिति योगो विभज्यते। तत्सामर्थ्यादर्थविशेषानादरेणैकस्य विषयत्वं निर्णीयते। एकयोगत्वे तु निर्वृत्ते इत्यधिकात् तन्निर्वृत्तार्थस्य विवक्षायां कार्यं वारणेऽपि तद्विवक्षायां स्यात् तन्न प्रसज्येतेति भावः। यजयाच। भावे कर्तृरि कारके च। अत एव यज्ञेन यज्ञमयजन्त देवा इत्यत्र यज्ञ इति व्याचक्षते। उपसर्गे घोः किः। बाहुलकात्कर्तर्यपीति माधवः। अत एव उपसमीपे स्वधर्मं समादधातीति उपाधिरिति व्याचक्षते। वस्तुतस्तु तत्र करणे प्रत्ययः सुवचः तदेतदाह। उपाधीयते नेनेति। एवं विधाता विश्वस्य द्विधिरित्यत्रापि माभूत्किः। विधाने इत्यस्मादिगुपधात् किदिति इनरूपसिद्धेः। स्त्रियां क्तिन्। घञोऽपवाद इति। यत्तु प्राचोक्तं व्याचक्षाणा आहुः। आद्ये त्वधिकः कारोऽधिकार इति घञप्युदाहृत इति तदतिरभसात्। न हि तत्र स्त्रीत्वविशिष्टो भावोऽर्थः किंतु पुंस्त्वविशिष्ट इति ध्येयम्। अजपोस्त्विति। तयोरवकाशः। चयः। लवः। क्तिनोऽवकाशः कृतिः हृतिः। चिनोति स्तौति इत्याभ्यां स्त्रियामुभयप्रसङ्गे परत्वात् क्तिन्नित्यर्थः। श्रुयजि परत्वाल्ल्युटि प्राप्ते वचनम्। स्तुतिः श्रोत्रम्। क्तिन्नपीति। अस्त्रियामिति प्रतिषेधात् वासरूपविधेरभावादिदमुक्तम्। अङ् इति। स्यादिभ्य आतश्चोपसर्ग इति कः। भावेऽनुपसर्गस्याह्व इति। एतेन वायवायाहीत्यस्यामृचि हवशब्दव्याख्यावसरे हूयतिधातोर्बाहुलं छन्दसीति संप्रसारणे सत्युकारान्तत्वादुदोरबित्यबिति वदन्तो वेदभाष्यकाराः प्रत्युक्ताः ।।

प्राप्तस्येतिभावइति।पुरस्तादपवादन्यायेनेतिभावः।तेनाण्वुलिञोःस्याधिकारस्थापवादमितिसिद्धान्ति।नकारस्येति।तस्मैकश्चेतिसूत्रस्यभाष्यादिदंलभ्यते।अन्येति।कीर्तेर्ण्यन्तत्वादिति
भावः।भरणंभृत्येति अस्मादेयंभावएवेतिभ।जोसंज्ञायामितिसूत्रस्थभाष्यस्वरसः।अन्यत्रत्विति।संप्रदानादौ।ताभ्यामन्यत्रेत्यस्यतुनात्रविषयस्त्रीणादि
पचेस्तुषिद्भिदादिभ्यइतिप्राप्तस्येतिभावः।इत्नाभावइति।इतिस्त्रीताद्दिर्नाप्राप्तस्येत्यस्याभावइत्यर्थः।हन्तेरिति।नकारस्यलम्।हिनोतेस्तुगुणइतिबोध्यम्।कीर्तिरिति।अत्रण्यास
श्रन्थेतिणुचिप्राप्ते।किंभिवाल्यतेउदात्तत्वज्ञानातांसुतेकीर्तिम्।व्रजयजोर्भावेक्यप्।उदात्तइत्येव।अधिकरणंतुउत्तरसूत्रेतुगर्थम्।गलपार्श्वेति।तथाहि ज्ञायतइतिभावः।भर
णंभृत्या।जीविका।कुमारभृत्यागर्भिण्याःपरिचर्याभिधीयतेइतिहारावली।कुमारभृत्याकुशलैरधिष्ठितेइतिरघुः।संज्ञायामिति।आसुतिः।र्जितिः।तथाचअवइतन्मतेतिबुद्धि
पूजार्थेभ्यश्च।कर्मणिभृतौ।रज्जःकृष्ण्यासुतीत्यादि।एतेनउक्तसौत्रप्रयोगाद्देवरपीसाधुत्वंइतिदुर्घटवृत्तिःप्रयुक्ता।क्रियेति।यदाभावकर्मणोःशःतदासार्वधातुकेयक्।रि
ङ्शयग्लिङ्क्ष्वितिरिङादेशः।अन्यत्रतुयगभावेरीप्रत्ययेरिङादेशेकृतेइयङादेशः।अकर्तरिचकारकेपीत्यर्थः।परिचर्येति।कथंतर्हिधन्यानांगिरिजस्तनमभवती
चर्येयमाह्लादतेइतिमुरारिः।अत्रकेचित्।गदमदचरयमश्चानुपसर्गेइतियतोपवासरूपविधेरस्याधिकारेपठितात्तत्किंनायतोबाधःस्यादितिवाच्यम्।बाध्यबाधकयोर्द्वयोरपित्र्यधि
कारस्थत्वेसत्येवस्त्रियामितिपर्युदासप्रवृत्तेः।अतएवकाशिकायांकथमासेत्याशङ्क्यऋहलोर्ण्यदितिसमाधायवासरूपविधिप्रतिषेधस्तुल्लोत्कर्षणविषयस्यैवोत्सर्गाप
वादस्येत्युक्तमित्याहुः।अस्मिन्पक्षेघञादयोपिस्त्रियांस्युः।तथाचक्तल्युट्तुमुन्पुंसकेभावेस्त्रियांक्तिन्नादयोयतः।अतोपजजपाःपुंसिपरिशेषादितिस्थितिरितिसिद्धान्तो
माकुर्येत।अतोअपवादमात्रस्यस्त्र्यधिकारस्थत्वेपिवासरूपविधिर्नैवन्याय्यम् ॥ ७॥ एतेनप्रसिद्धेणादिपाठस्यानांविधेयसमर्पकोणवृत्तिनवाक्यस्थानामेवग्रहण
मितिरन्यत्रप्रपञ्चितम्।अतएवोपाद्य।पद्समापदानेधसितिरङःयेत्युदाहरणमापेधितम्।करणाधिकरणयोस्तुनशोल्युटाबाधादिमिदिकाद्स्येवन्याय्यमिति।किंचयनण्यन्तोपि
पित्र्यावार्थकयोःस्त्रीत्वेहुबाहूलकाश्रयणमावश्यकम्।किंचवासरूपसूत्रेऽस्त्रस्यपदेनापवादस्यैवग्रहणेनास्त्रियामित्यस्यापितद्विशेषणतैवन्याय्येतिबोध्यम् ॥

म·रा· मत्वर्थो लक्ष्यत इति। मञोः सौत्रो लुगिति तत्त्वम्। व्याख्यातार इति। बाहुलकादिति भावः। निष्ठायां वा सेट् इति। न चैवमाशंसेत्यनुपपन्नमिति वाच्यम्। आशंसायामिति निर्देशेनाश्री। लि
१८४ अस्मान्धोरस्मादित्तु बाहुलकादिति दिक्। यकारनिवृत्तिरिति। हलादिशेषस्तु नास्ति। षाष्ठे द्वित्वे धातुद्वित्वे वाभ्याससञ्ज्ञास्वीकारात्। इह तु तदुभयाभावादिति भावः। अटाटेति। य
ङ्तु यङन्तादप्रत्ययादित्यकारस्य लात्। अतो लोपे यलोपे च अटाटेति बोध्यम्। जागर्जेति। सार्वधातुके यक्। जाग्रोविचिण्णल्ङित्सु इति गुणः। गुरोश्च हलः। प्रकृतस्य धातोर्हला विशेषणात्त
दन्तविधौ हलन्तधातुर्लभ्यते। न चायं गुरुरिति संभवति। अविशेषेणोक्ते गुरुः। अतो मत्वर्थो लभ्यते तेन दाह्। गुरुमत इति। ननु विपरीतमस्तु। गुर्वन्तात् हलन्त इति। मैवम्। चेष्टायाम
नध्वनि। आशंसायां भूतवच्चेत्यादिनिर्देशात्। पिद्भिदादिभ्योऽङ्। कथं तर्हि मधुसुरभिमुखाब्जगन्धलब्धेरिति माघः। प्रेक्षोपलब्धिरित्यमरश्च। भिदादेरङि लभेत्येव ह्युचितम्। सत्यम्। अ
नर्थकास्तु प्रतिवर्णमर्थानुलब्धेरिति भाष्यवार्तिकप्रयोगात् बाहुलकादुक्तिन्नपि बोध्यः। एतेन ज्ञप्तिरूपाप्तिरित्यादयोपि व्याख्याताः। इति कृतान्तु क्तिन्नाबादिभ्य इति वचनम्पु
रस्कृत्य सर्वं समाहितम्। एवञ्च पङ्क्त्यादिषु गन्तास्य कण्डतिरिति क्तिन्समर्थितः। किन्त्वेतत्सर्वं भाष्यविरोधादुपेक्ष्यम्। तथाहि अवादिभ्यश्चेति क्तिन् नुपसंख्याय निष्ठायां वा सेटोऽकर्मक
चनास्तिद्रमिति क्तुं यतो वार्तिककारस्य गुरोश्च हल इति प्राप्तिस्थल एव आवादिभ्यश्चेति क्तिन्नभिमतः। तत्कथं लभेत्यङो विषये उपासनेति गुरुचेश्च विषये स्यात्। अत्रांशे आबादेराकृ
तिगणत्वं स्वीकृत्य बाहुलकलभ्योपि आबादिकृत्सो निक्षिप्येत। अपि यप्रतिपत्त्यर्था उपाया अव्यवस्थिता इति न्यायात्। तथापि कण्डूतिरिति क्तिन्नन्तो दाक्षिणेयमिदमेव। न पदान्तस्य नै
स्य भाष्यविरोधात्। तत्र हि कण्डूतिरित्युदाहृत्यानैत इति प्रयोजनमाक् कण्ड्वायेत्येव भवितव्यमिति निर्धार्य क्तिचूक्तौ चेति क्तिचि ब्राह्मणकण्डूतिरित्युदाहृतेष्वन्वये नैवंविधे भाष्यकृद्वि
रेकस्य स्पष्टं निराकृतत्वेपि बहुलग्रहणं प्रभवति। एतेन रत्तिकारानुगामिनः प्राचीनग्रन्थः प्रत्युक्त इत्यवधेयम्। भिदेति। एवमादयः अजन्ताः समुदाया एव गणे पठ्यन्ते। तत्रये प्रकृतिभाग
स्तेपि दादिशब्देन सूत्रे निर्दिष्टाः। गणे विशिष्टपाठस्तु लोकप्रसिद्धार्थविशेषकस्य कचिल्लाक्षणिककार्यस्य सङ्ग्रहार्थः। प्रकृतं यत्तु भिदिर् विदारणे। छिदिर् द्वैधीकरणे। विद राम
ज्ञाने। क्षिप प्रेरणे। गुहू संवरणे। डुधाञ् धारणपोषणयोः। मेदृ मेधृ हिंसाङ्क्लेशनयोः। ऋ गतौ ॥ ५) त्वत्वस्वीकारात् तत्र लोकप्रसिद्धार्थविशेषाभावाद्द्वैधीकरण इत्यादि ॥ २९

धाताविति। वृद्धिरित्याद्यभिप्रायम्। अन्तास्पणिकत्वायाण्यन्त। पञ्चसुक्तदशाविति। इदमुपलक्षणं सृजेः पाक्षिकत्वाद्यभावः क्रयेः संप्रसारणमित्यपि बोध्यम्। लाभार्थ इति। सकर्म काकारविकरणवन्दिसाहचर्याद्व्याख्यानाच्चेति भावः। बहुलमितीति। अत एव कचिड्डालवर्थनिर्देशेऽपि एच्छतौ सुखतादिभ्य इति वार्त्तिकप्रयोगात्। अत एव सनेर्नाशब्दमिति व्या हृञ् हरणे। क्षि क्षये। क्षि निवासगत्योरिति चात् प्लवनतरणयोः। धृञ् धारणे। लिख अक्षरविन्यासे। चुद प्रेरणे। पीड अवगाहने। डुवप बीजसन्ताने। वस निवासे। मस्जुडौ। क्रपकृपायामिति वेदितव्याः। भित्तिरन्यत्र। भिद्यत इति भित्तिः कुड्यम्। छिदेति। द्वैधीकरणे। अन्यत्र तु च्छित्तिश्छिद्रमसृहादरोषधिविशेषश्च। न्यग्रहूढिः। आर्यन्ते अनयाऽभ्रा आरा। प्रतोदः। आर्त्तिरन्याः। आङोऽन्तेभ्य उपसर्गादिति धाताविति वृद्धिः। आराद्धाक्काराताराधारेति पञ्चसुक्तदशोडोतिगुणे दीर्घत्वं निपात्यते। लिखेस्तु गुणः। लकारस्य पक्षे रेफश्च। रेखा लेखा। चुदेर्ईत्वं दीर्घत्वञ्च चूडा। चिन्ति पूजि। चकारोऽनुक्तसमुच्चयार्थः। तेन तोलयते स्तुलेति हरदत्तः। घट्टि वन्दि। विदि दिर्लाभार्थे गृह्यते। ज्ञानार्थस्य तु संवित्तिः। विदेर्वेदना स्थाननिवासे विन्तिवुरादिनाऽज्ञाने पिंसिद्धम्। प्रच्छर्द्दिकेति। छर्द वमने। प्रवाहिकेति। प्रवाहयति मुहुर्मुहुः प्रवर्त्तयतीति ग्रहणी विचर्चिकेति। चर्च अध्ययने। प्रत्ययोपसर्गाभ्यां रोगप्रतीतिः। शिरोर्त्तिरिति। शिरःपीडा। अर्द हिंसायाम्। तितुत्रेतिनेट्। आसिकाशायिकेति। आसनं शयनं इत्यर्थः। इक्श्तिपौ। धातोर्निर्देशेऽनुकरणम्। बहुलमित्यनुवृत्तेः कचिन्नागुणः। तिजपिकड्डः सन्। पचतिरिति। उपसर्गात्सुनोतिसुवतिह्वायतेः संप्रसारणं चेत्यादिनिर्देशादकर्त्तर्वाचिन्यपि परे शपादयः। एवं भावकर्मवाचिन्यपि कचित्। विभाषालीयतेरिति यथा तत्र हि लीलीङोर्यका निर्देश इत्युक्तम्। यत्तु शावाशिकरणसामर्थ्यान्नशपादय इत्युक्तं तन्न। पिबतिर्ग्लायतिरित्यादौ पिबाद्यादेशप्रवृत्त्याभावनिवृत्त्या च शित्वस्य चरितार्थत्वात्। संरूढं सङ्गच्छते। आलनिवृत्त्या चेति। इदं तु तितुत्रेत्यनेनापि सुवचवारणमिति भावः। इकः किल्वे पिबविस्वपीत्यादौ न संप्रसारणं प्रसिद्धत्वेन शब्दातिरिक्तार्थपरे येव न तत्प्रवृत्तेरिति बोध्यम्। इगित्यत्र वर्णसंभूतो गकारः पुनर्निर्दिष्ट इत्यन्ये ॥

श्यामा।अ

ईवेदनति

वर्णानुकरणमिति।प्रतिपादनार्थकनिर्देशपदानुवृत्त्यावर्णस्यैवयत्रप्रतिपादनंतत्रैवायमितिभावः।चकारइति।सूत्रेचकारोविवक्षितइत्यादौसमुदायप्रतिपादनेतात्पर्यादितिभावः।उक्तत्कारकरणस्यप्रयोजनमितिविभाषामृगेतिसूत्रस्थभाष्यप्रयोगइत्यपिबोध्यम्।एतेनकरणंत्कारश्चस्यकारइतिसमासेनेदंसिद्धमित्यपास्तम्।तन्त्राकारपरत्वात्तस्याझोपौतमाह।अपत्यावर्णादिति।वर्णानुकरणादित्यर्थः।ननुवर्णादुच्चार्यमाणादिति।तथाहिसतिअकारइत्यादावेवस्यात्।नतुककारइत्यादौसङ्घातस्योच्चारणात्।अनुकार्यन्त्विहवर्णमात्रम्।अकारस्योच्चारणार्थत्वात्।कथन्तर्हिएवकारश्चकारइत्यादि। ——— अत्राहुः।क्वचित्सङ्घातादपिवषट्कारइतिसूत्रनिर्देशात्।सर्वेचकाराःप्रत्याख्यायन्तइतिभाष्यात्।बहुलवचनाच्चेति।वस्तुतस्तुविभाषाग्रेप्रथमपूर्वेषुकर्तरिकृदित्यादौपुनःपुनर्भाष्यकारैरुक्तत्वात्एवकारःसाधुश्चकारवत्।इहकारप्रत्ययस्यधातोरविहितत्वेपिअधिकारबलात्कृत्सञ्ज्ञालेनकृदन्तत्वात्प्रातिपदिकत्वंप्रयोजनाभावात्तककारस्येत्सञ्ज्ञा।आर्द्धधातुकसञ्ज्ञाभावान्नेट्।अस्यच्चाविलादौनप्रत्ययोबाहुलकादेव।रादिफ।वासरूपविधिनाकारोपि।रकारादिनिमामानिम्नएवतोममपार्वति।अकारलोपइति।अतइतितपरत्वादभत्वाच्चयस्येतिलोपस्याप्राप्तिः।प्रातिपदिकत्वन्तुकृदन्तत्वात्पूर्ववद्बोध्यम्।बाहुलकान्नेहढः।तसौमत्वर्थेइति।बाहुलकादेवमतुबर्थशब्दादपि।शैषिकान्मतुबर्थीयादितियथा।अन्येतुनैतत्कृदन्तम्।किन्तुमतुबर्थभावइतिविगृह्यगहादित्वाच्छेतद्धितान्तमेवेत्याहुः।इणजादिभ्यः।धात्वर्थनिर्देशेण्वुलोऽपवादोयम्।एवमग्रेपि।आजिरिति।बाहुलकादजेर्वीभावोन।सञ्ज्ञायाम्।अधिकरणेण्वुलर्थआरम्भः।उद्दालकश्लेष्मातकः।तस्यपुष्पाणिभज्यन्तेयस्यांक्रीडायांसातथा।विभाषाख्यानपरिप्रश्नयोरिञ्च।अल्पाच्तरत्वेनसूत्रेआख्यानशब्दस्यपूर्वनिपातेपिआख्यानस्यप्रश्नपूर्वकतयाआर्थक्रममनुसृत्यव्याचष्टेपरिप्रश्नेआख्यानेचेति।परिपाटीति।पटगतौ।परिपूर्वः।इणजादिभ्यइतीण्।कृदिकारादितिङीष्।आक्रोशःशपनम्।नपुंसकेभावेक्तः।ननुतयोरेवकृत्यक्तखलर्थाइत्येवसिद्धम्।अत्राहुः।भूतेइत्यधिकृत्यविहितेतिसूत्रेणविहितस्यक्तस्यभावोऽर्थस्तेनविहितः।अनेनतुकालसामान्येनपुंसकेभावेक्तोविधीयते।अतएवायंस्वविषयेपरत्वात्घञजपांबाधकः।परिशेषात्तेषांपुंविषयत्वंसिद्धमित्युक्तम्॥७७ चेति।गहादित्वाच्छइतिमत्वर्थीयस्याप्येवंसिद्धाविदंवचनंव्यर्थमित्यन्ये।तस्यपुष्पाणीति।नित्यंक्रीडेतिसमासः।इत्येवसिद्धमिति।एवञ्चात्रभावेइतिव्यर्थमितिशङ्काशयःअतएवेति।कालसामान्यविधानादेवेत्यर्थः॥

असंनिधानादिति। विशिष्यार्थनिर्देशेन तयोरेयेत्यस्याप्रवृत्तेरिति भावः। प्रायेणेत्यस्य कृत्यमाह। क्वचित्त्विति। अत्रपक्षे हविबीजन्तुअन्नभावग्रहणमफलं कारकत्वाद्वत्यर्थङ्ल्य ल्युडइति तावद्भावे अकर्त्तरि कारके इत्यनुवर्त्तत इत्यर्थं स्वेतद्भावग्रहणमूलक एवेति तन्ध्वनयन्नाह। अन्ये त्विति। ननु तस्य सूत्रस्य भाव एव तत्र चाकर्मकेभ्य एवेत्यर्थद्वये तात्पर्ये प्याद्योशास्य फलाभावादप्रवृत्तौ तत्सहचरिते तरांशस्याप्यप्रवृत्तिरत आह। तथा हीति। भावोपीति। अपिना कर्म। अत एव तद्विधायके कर्त्तरीत्यस्य न संबन्धः अविशिष्ट इति। गीतः कद्गतिवदस्यापि पूर्वस्यादेतत्। इह भावे चाकर्मकेभ्य इत्यंशस्यासंनिधानात्सकर्मकेभ्योप्ययं स्यात् पञ्चादिवदिति चेत् इष्टापत्तिः। गतन्तिरश्चीनमित्यादिप्रयोगात्। नन्वेवमन्तद्योगे कर्मणि द्वितीया स्यात्। कृद्योगलक्षणषष्ठ्या नलोकेति निषेधात्। एवञ्च घरट्टं तं वृक्षच्छिन्नमित्यादि प्रसज्येतेति चेत् न। नपुंसके भावे क्तस्य योगे षष्ठ्या उपसंख्यानत्वात्। ननु शेषविवक्षामाश्रित्य प्रत्याख्यातं तदाकर इति चेत् तर्हि तत्प्रामाण्यात्तत्र प्रायेण शेषविवक्षैवेत्यस्तु। क्वचित्तु द्वितीयापि दृश्यते। भात्तं देशमनेकदुर्गविषममिति यथा। अन्ये त्वाहुः। अयमपि क्तोऽकर्मकेभ्य एव। तथाहि। तयोरेवेति सूत्रे भावे चाकर्मकेभ्य इत्यनुवृत्तं वाक्यभेदेन व्याख्येयम्। तथा। कृत्याद्यो ये तत्र तत्र विहिताः तान् नूद्य भावकर्मणोरेवेत्यर्थविधायकमेकं वाक्यं तेन निष्ठेति विहितस्य क्तस्य भावोप्यर्थो लब्धः अनुवृत्तेन वाऽन्तरेण तु भावे यो यङ्क्तं इत्यनूद्याकर्मकेभ्य इति विषयो व्यवस्थाप्यते। स चानुवादो निष्ठेति नपुंसके भावे क्त इति च विहितयोः क्तप्रत्ययोरविशिष्टः। आशितः कर्त्तेति सूत्रस्थं भाष्यकैयटादिकन्त्वात्रानुगुणम्। अस्मिंश्च पक्षे अविवक्षितकर्मत्वेनाकर्मकतामाश्रित्य गतम्। भुक्तमित्यादि समर्थनीयमिति दिक् ॥ ७ मुपस्थितेस्तुल्यत्वादिति भावः। आशितः कर्त्तेति। नहि आशितशब्दे आद्युदात्तविधायकम्। तत्र हि कर्त्तरि क्तो निपात्यत इति भाष्ये उक्तम्। सकर्मकत्वादशेः कर्त्तर्यप्राप्तः क्तो निपात्यत इति कैयटे उक्तम्। यदि तु अयं सकर्मकेभ्यः स्यात्तदा भावे क्ते कृते ततोऽर्शआद्यचि कर्त्र्यर्थकत्वसंभवात् निपातनपर्यन्तधावनं व्यर्थं स्यादिति भावः। किंच कर्त्तृकर्मणोरिति सूत्रे कृतपूर्वीकटमित्यत्र भावे क्तसिद्धयेऽविवक्षितकर्मकत्वाश्रयणं भाष्ये कृतं तन्न सङ्गतिरित्यपि बोध्यम्। समर्थनीयमिति। भात्तं देशमित्यपि कृतपूर्वीकटमितिवद्भावे क्ते साधु। वस्तुतस्तत्र गत्यर्थत्वात्सकर्मकत्वेपि भावे क्तः तेन नतेभ्यो विधित्सतयोरर्थयोस्तद्विधानात्। तयोरित्यत्र न तस्य क्तस्य ग्रहणम्। पूर्वोपस्थितेः क्तेस्तस्य निराकाङ्क्षत्वादित्यलम् ॥

॥दिति

कर्मणीति।संसर्गादित्यपेक्ष्यैतिभावः।कर्तृत्वञ्चप्रत्यासत्त्याविधेयप्रकृत्यर्थनिरूपितंबोध्यम्।एरजिति।पचाद्यचोप्यत्रग्रहणमित्यन्ये।उपसर्गादेवेति।खलघञोरेवेतिनियमस्तु
कर्मणिच।कर्तुरितिकर्मणिषष्ठी।उभयप्राप्तौकर्मणीतिनियमात्।येनेतितृतीयान्तदाह।येनस्पृश्यमानस्येत्यादौनपुंसकेभावेइतिबोध्यम्।अतएवाह।पूर्वेणेति।नेहेति।
णिजर्थप्रतीतिभावः।करणाधिकरणयोश्च।येननाप्राप्तिन्यायेनघञोऽपवादोयम्।अजपोस्त्रीप्रत्ययांश्चपरत्वाद्बाधतेउक्तंहि।अजब्भ्यांस्त्रीखलनाःस्त्रियाःखलनौविप्रतिषे
धेनेति।आकुर्वन्तीति।एत्यकुर्वन्तिव्यवहारमस्मिन्नःआकरः।उत्पत्तिस्थानम्।गोचरोदेशइति।तथाचभारविः।उपारताःपश्चिमरात्रगोचरादिति।विषयपर्यायोप्ययम्।त
थाचप्रयुञ्जते।उपादानगोचरज्ञानमिति।सञ्चरन्तेनेनेति।समस्तृतीयायुक्तादित्यात्मनेपदम्।एतेनसञ्चरन्तीतिप्राचःपरस्मैपदपाठःप्रत्युक्तः।अवहारेत्यादिवृत्तिकार
स्तुआधाराधायशब्दौसूत्रेप्रक्षिप्यचकारेणावहारशब्दंसञ्जग्राह।तत्रवेदरूपंनिर्मूलम्।उदङ्कोऽनुदके।हलश्चेतिसिद्धेउदकप्रतिषेधार्थंवचनम्।उदकोदञ्चनइति।ननुपुंसि
सञ्ज्ञायामितिघेप्राप्तेघञ्विहितः।उदकेतुघञ्प्रतिषिद्धेघएवस्यादितिचेन्नैवम्।प्रतिषेधसामर्थ्यात्घस्याऽप्रवृत्तेः।नहीहघेघञिवारूपेविशेषोस्ति।नचस्वरेविशेषः।
घेहिसतिकृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तता।घञ्यपिथाथादिस्वरेणतथैवेति।जालम्।जलघातनेज्वलितिकसन्तेभ्योणइतिजालशब्दःसिद्धः।अतस्तन्निपातनमि
हनशङ्क्यम्।खनोघच।घित्करणमिति।नहिखनःचजोरितिकुत्वार्हःकश्चिदवयवोस्ति।येनघित्करणमिहोपयुज्येतेतिभावः।एतइति।आख्याद्यःषडित्यर्थः।ईषद्दुःसु
ष्विहसामान्योक्तावपियोग्यताबलात्विषयविभागोलभ्यते।कृच्छ्रार्थेदुरि।अकृच्छ्रार्थयोरितरयोरितितदेतद्दर्शयति।कृच्छ्रेदुष्करइत्यादिना।भवतेति।नञो
केतिषष्ठीनिषेधात्कर्तरितृतीया।कृच्छ्रेत्यादिकिम्।ईषत्कार्यम्।अल्पमित्यर्थः।निमीति।मीनातिमिनोतिदीङांल्यपिच।विभाषालीयतेरितिप्राप्तंनिषिध्यते।निमयइत्यादि।
।एरच्।उपसर्गात्खलुघञोः।लभेश्चेत्येवसिद्धेनियमार्थमिदम्।उपसर्गादेवखलघञोरितितदेतदाह।उपसर्गादेवेति।कर्तृकर्मणोश्चभूकृञोः।चकारःसन्नियोगा
र्थः।यदाकर्तृकर्मणोरीषदादीनाञ्चयुगपत्प्रयोगःतदाप्रत्ययोयथास्यात्।नचकर्तृकर्मणोःप्रत्ययार्थत्वमेवास्त्वितिवाच्यम् ॥ ७ नव्याख्यानादितिभावः ॥

वैयर्थ्यापत्तेरिति। किञ्च चोपि व्यर्थः। यदु नरञ्चशब्दस्तत्तद्दशासमुच्चयाङ्गीकारेणोपपदसमुच्चयासंभवादित्यपि बोध्यम्। द्व्यर्थासङ्गतेरिति। अभूततद्भावस्य सत्त्वार्थ एव संभवो न तु प्राप्त्यर्थे। एवमघटो घटः करोतीत्यर्थे घटीकरोतीत्यस्यासंभव इति भावः। अव्यवहितप्राक्त्वमेवेति। उत्तराङ्गविकलस्य तस्मादित्युत्तरस्येत्यस्याप्रवृत्तेरिति भावः। सुमः संभवादिति। ईषदादीनामेवोपपदत्वादिति। तथात्वे ईषदादीनामेवोपपदत्वात् खलः खित्त्वस्य वैयर्थ्यापत्तेः। सुमर्थं हि तत्। सुमश्चानव्ययस्य विधीयते। तस्मात्कर्तृकर्मणोरित्युपपदमेव। तदेतदाह। ईषदादिषु चेति। इह कर्तृकर्मणी द्वे भूकृञौ च द्वौ तयोर्यथासंख्यं प्राप्तं स्वीकृतञ्च तथैव वृत्तिकृता। अनुसृतञ्च तदेव न्यासकारहरदत्तमाधवादिभिः। एवञ्च प्राचापि तथैवोक्तम्। तद्व्याख्यातृभिस्तथैवानुमोदितं तदेतत्सर्वं नादर्तव्यमिति ध्वनयन्नाह। यथासंख्यं नेष्यत इति। एतच्च यथासंख्यसूत्रे भाष्य एव स्पष्टमिति भावः। ईदेन तु द्व्यर्थयोरिति तावदिहैव सूत्रे भाष्यवार्त्तिकयोः स्पष्टम्। एवञ्च यथासंख्यनिराकरणस्य फलं दुर्वचम्। न हि भवतेः कर्मणि संभवः प्रायेणाकर्मकत्वात्। प्राप्त्यनुभवादिषु सकर्मकत्वेपि द्व्यर्थासङ्गतेः। नापि करोतेः कर्तरि संभवः। द्व्यर्थासङ्गतेरेवेति चेत्। तर्हि किं यथासंख्यसूत्रस्य भाष्यादिकमपार्थकमिति ब्रूषे। ननु तस्य गतिं पृच्छामीति चेत् शृणु। अन्तर्भावितण्यर्थस्य भवतेः करोतिना कर्मकर्तृविषयस्य करोतेश्च भवतिना तुल्यार्थतया भवतेः कर्मणि करोतेः कर्तरि चोपपदे खल्प्रत्ययसिद्धेरेव यथासंख्यनिराकरणस्य फलमित्यवधेहि। स्यादेतत्। उपपदयोर्मत्वे पूर्वापरीभावव्यवस्था न सिध्यति। कर्तृकर्मणी हि भूकृञोरव्यवहिते इष्येते। विपरीतञ्च प्राप्नोति। ते प्राग्धातोरिति वचनेन सुदुरोः प्राक्त्वावश्यंभावात्। न च व्यवहितेपि प्राक्त्वमस्त्येवेति वाच्यम्। छन्दसि परेपि व्यवहिताश्चेति सूत्रारम्भेणेहाव्यवहितप्राक्त्वमेवार्थ इति स्वीकारात्। न चैवं खलः खित्त्वस्य वैयर्थ्यं स्यादिति वाच्यम्। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति सुदुर्भ्यां विशिष्टस्य खिदन्ततया ततः पूर्वस्याकूलसुड्डुजादाविव मुमः संभवात्। किं च ईषच्छब्दस्य गत्यादिसञ्ज्ञाराहित्येन ते प्रागित्येतत्सूत्राविषयतया व्यवहितप्रयोगसंभवेन तत्र मुमर्थं खित्त्वमस्तु ॥ आढ्यंभवदित्यादौ। ईषत्पूर्वपदस्य खलोनभिधानमिति ते प्राग्धातोरिति सूत्रस्य भाष्यस्वरसः। गत्यादीति। आदिनोपसर्गत्वम्। केचित्तु व्यवहिताश्चेति योगविभागात्तत्र छन्दसीत्यननुवृत्त्या लोकेपि क्वचिद्व्यवहितप्रयोगज्ञापनान्न दोषः। अत एव सञ्ज्ञानियमप्रयोगनियमपक्षयोर्न फलभेद इत्याहुः ॥

म·श· इह तदभ्युपगमे इति। अधिकारादूर्ध्वं क्वचिद्वासरूपविधेराश्रयणं तेन ज्ञाप्यत इति भावः। मेङ इति। ङविशिष्टस्येत्यर्थः। इह। व्यतीहारे तस्यैव वृत्तिर्न तु माङ इति भावः। समासे इति। ग-
३८० तसंज्ञादिष्टव्यवस्थार्थं ल्यप् लभ्येतेति चेत्। अत्राहुः। बहुलग्रहणानुवृत्त्या दुराढ्यंभवमित्यादिभाष्योदाहरणाच्च दृष्टव्यवस्थासिद्धिरिति। तदेतत्फलमभिप्रेत्याह। कर्तृकर्म-
णोश्चेति। भवतेः कर्त्र्युदाहरति। अनाढ्येनेति। कर्मणि तु अनाढ्य आढ्यो भूयत इति विग्रहः। भाव्यत इति तदर्थः। एवमग्रेऽपि विग्रहद्वयमुन्नेयम्।

यत्तु प्राचा अदुराढ्येन दुराढ्येन भूयत इत्यादि विगृहीतम्। तन्न। ईषदर्थविशेषकस्य दुरः आढ्यशब्देन सह सामर्थ्याभावात् समासायोगात्। प्रत्युदाहरणे तु ते प्राग्धातोरित्यस्य निर्बाधत्वादाह। स्वाढ्यम्भूयत इति। काशिकायां तु स्वाढ्येन भूयत इत्युक्तं तत्स्वाभाविकमिति हरदत्तः। क्विच्क्वौ। प्राचा तु क्विच्कनौ चेति पठित्वा क्विचो ह्रस्वस्यादिति व्याख्याय यदुक्तिः क्विचा बाधा मा भूदिति पठितं तदाकरविरोधादुपेक्ष्यम्। क्विचश्चकारो न क्विचीति विशेषणार्थमिति प्राञ्चः। तन्न। एकानुबन्धकपरिभाषयैव क्विनो व्यावृत्तिसिद्धेरिति हरदत्तः। यत्तु वदन्ति तितुत्रेष्वत्र क्विन्क्विचोः सामान्यग्रहणार्थश्चकारः अन्यथैकानुबन्धकत्वात् अस्यैव ग्रहणं स्यान्न क्विन इति। तन्न। तितुत्रेति सूत्रेऽनुबन्धविशिष्टरूपानुच्चारणेनोक्तपरिभाषाया उक्तिसंभवस्यैवाभावात्। एतेन तितुत्रेति सूत्रे एकानुबन्धकत्वात् क्विन एव ग्रहः स्यात्। ततश्च रोदितीती ण्न स्यादिति शङ्का। कृतीत्यनुवृत्त्या तत्समाधानं चेति द्वयमपि प्रत्युक्तम्। भूतिरित्यत्रापीह न स्यादित्युक्तः। क्तिन्यस्त्येवेण्नि-षेधो न्याय्यः। तथापि वन्तितन्त्योरावश्यकत्वात्फले विशेषाभावाच्च तितुत्रेत्युपन्यस्तम्। यन्तिरित्यादि। यम उपरमे। रमु क्रीडायाम्। वनु याचने। तनु विस्तारे। अलङ्खल्वोः। पूर्वाभ-मिति। ननु विकल्पार्थमस्तु। अलंकृदित्वाऽलंरोदनेनेति रूपद्वयं हीष्यत इति चेन्न। वासरूपन्यायेनैव सिद्धेः। ननु ल्युटि वासरूपन्यायो नास्ति। क्तल्युट्तुमुन्खलर्थेषु नेति सि-द्धान्तात् इति चेन्न। क्तल्युडादयोऽपवादभूताः स्वबाध्यं नित्यं बाधन्त इति हि तस्यार्थः। इह तु ल्युटोऽपवादः क्त्वेति वैषम्यात्। ननु प्रैषादिसूत्रे कृत्यवचनेन प्रागधिकारादूर्ध्वं वासरूपविधि-र्नावश्यमस्तीति ज्ञापितमिति चेत् किं ततः। इह तदभ्युपगमे बाधकाभावात्। अलन्दत्त्वेति। अपात्रे न देयमित्यर्थः। उदीचाम्। मेङः क्त्वा। तस्यायं निर्देशो नानुबन्धकृतमनेजन्तत्वमिति रा·म·
ज्ञापयति। तेन घुसंज्ञायां देपोऽपदाविति पर्युदासः सिध्यति। अयमित्येति। समासेऽनञ्पूर्व इति वक्ष्यमाणेन क्त्वो ल्यप् ॥ ञ तिसमासे इत्यर्थः ॥ ३८०

परावरेति।अन्तरशब्दोत्रपूर्वत्वनिवाची।परावरशब्दयोःसंबन्धिशब्दत्वाद्यदपेक्षंपरावरत्वंगम्यतेतेनयोपरावराभ्यांयोगोबोध्यः।सचक्रियाद्वारकएवनसाक्षात्।क्रिययासर्वौं
यत्रगृह्यते।तत्रयस्ययक्रियाद्वारकःसंबन्धोययाक्रिययावातद्वाचकात्कः आद्योदाहरणेस्थितइतिशेषः।पूर्वत्वादिकञ्चन‾तत्पुरुषतत्तदवधिभेदेनभिन्नन्तदाह।
दक्षिणदेशस्य.मामिति।प्राप्तिविरहेति।प्राप्तिप्रागभावेनेत्यर्थः।सचसामानाधिकरण्यसंबन्धेनपर्वतकर्तृकस्थितावन्वेतितदाह।विशिष्टदेशस्येति।फलितमाह।
अग्रेति।अत्रपरभूतयानद्याःप्राप्त्यैतद्वारकोयोगःपर्वतस्यगम्यते।अतिक्रम्येत्युदाहरणेदक्षिणदेशस्यपुरुषकर्तृकपर्वतकर्मकप्राप्तिध्वंससमानाधिकरणान्
दीकर्तृकास्थितिरित्यर्थस्तदाह।पर्वतस्येति।भिद्यन्ते इति।उक्तरीत्येतिभावः।साक्षात्क्रिययान्वयेत्विदमुदाहरणम्।अवेर्मांसमितिविगृह्याविकशब्दादुत्पत्तिरिति।
परावरयोगेच।अप्राप्येति।दक्षिणदेशस्यानाङ्ग·ङ्गामप्राप्यविन्ध्यः।गङ्गा।प्राप्तिविरहविशिष्टदेशस्येत्यर्थः।अत्रविन्ध्यात्परागङ्गेतिगम्यते।अतिक्रम्ये
ति।पर्वतस्यपरस्तादित्यर्थः।प्रागुक्तएवविषयेऽयमपिप्रयोगः।विशेषणविशेष्यसंसर्गास्तुभिद्यन्तइतिस्पष्टमेव।इहत्रिसूत्र्यांविधेयस्यक्त्वाप्रत्ययस्यय
द्यपिभावमात्रंअर्थस्तथापिद्वितीयक्रियायाःपूर्वकालत्वस्यचाभावात्। अलंखल्वोरितिपरापरेतिचालभ्यते।उदीचामितितुपूर्वकालत्वाभावादितिवि
वेकः।एवञ्चेहमध्यमंविहायसूत्रद्वयेअधिकारलभ्यस्यात्तुसंबन्धइत्येतन्नसंबन्धनीयम्।कथञ्चित्संबन्धनीयमित्याग्रहेतुअपूर्वकालायैवत्रिसूत्रीत्यवधेयम्॥
विरहा‾भिन्नत्वेनज्ञानन्तदुत्तरकालिकीप्रत्ययकर्तृकोत्पत्तिरित्यर्थः।परावरत्वञ्चात्रतादृशज्ञानोत्तरकालिकत्वात्प्रत्ययोत्पत्तेर्लोकव्यवहारादेवसिद्धम्।असमानकर्तृक
त्वात्समानकर्तृकयोरित्यस्यनप्राप्तिःस्पष्टञ्चेदङ्खलयवेतिसूत्रेकैयटे।द्वितीयक्रियाया इति।क्त्वाप्रकृत्यर्थक्रिययान्विताया इत्यर्थः।पूर्वकालत्वस्यचेति।परावरेतिसूत्रविष
येसमानकर्तृकत्वस्यचाभावइत्यपिबोध्यम्।कथञ्चिदिति।परावरेतिसूत्रविषयेस्थितिक्रियामादायपरानद्यादिविषयेपिअध्याहृतक्रियामादायसंबन्धसंभव
इतिभावः।परावरयोर्योगस्तत्तत्कारकक्रियायोगेनैवेतिअस्त्येवधात्वर्थसंबन्धइतिबोध्यम् ॥

समानकर्त्तृकत्वमिति। समानशब्द एकवाची। तन्निरूपितशक्तेर्भेदाद्विशिष्टभेदेन सादृश्यस्यैक्येन कर्त्तृकत्वं फलतीत्यन्ये। तुमर्थ इत्यनुवृत्तेर्वेति। तदनुरस्याएषाङ्कुःत्रर्थत्वा
भावे बोधिते विशेष्यार्थानिर्देशात्क्त्वार्थस्य च संभवत्वेनेति भावः। किन्त्विति। अत एव भावे इत्युपेक्ष्य तुमर्थ इत्युक्तम्। संसर्गश्चेति। भोजनोत्तरकालिकं व्रजनमिति बोध इति भावः। विशे
समानकर्त्तृकयोः। इह धात्वधिकारेऽपि समानकर्त्तृकत्वं क्रिययोरेव संभवतीत्याशयेनाह। धात्वर्थयोरिति। निर्द्धारणे षष्ठी सप्तमी वा। पूर्वः कालो यस्यार्थस्य तस्मि-
न्नित्यर्थः। क्त्वा स्यादिति। स च भावे अव्ययकृत इति वचनात्। तुमर्थ इत्यनुवृत्तेर्वा। न च क्षोऽपि भाव इति कथं लभ्यतामिति वाच्यम्। तुमर्थे सेसेनिति ज्ञापकेन तल्लाभात्। तथा
हि। कर्त्तरि कृदिति कर्त्तरि प्रसक्तौ तुमर्थ इत्युच्यते। तथा च तुमर्थो न कर्त्तेति स्थिते भाव एव पर्यवस्यति। अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति न्यायात्। अयमिह निष्क-
र्षः। भावोऽपि घञादाविवनेह सिद्धावस्थः किं तु साध्यावस्थः स च धातुनैव लब्धः। क्त्वाप्रकृत्यर्थभूतां क्रियां च क्रियान्तरं प्रति विशेषणम्। धातुसंबन्धाधिकारात्। संसर्गश्चे-
ह सामानाधिकरण्यमुत्तरकालत्वञ्च। तत्र संसर्गविशेषे तात्पर्यग्राहकाः क्त्वाणमुलादयः। अत्र समानकर्त्तृकयोरिति सूत्रांशेन सामानाधिकरण्यमुपनिबद्धम्।
धातूपात्तव्यापाराश्रयस्य कर्त्तृतया तथा पर्यवसानात्। निर्द्धारणविभक्त्या च द्वयोस्तत्वं स्फुटीकृतम्। अन्यथा हि समानेकर्त्तरीत्येव ब्रूयात्। निर्द्धारणविभक्तिबलादेव पूर्व
काल इत्यस्य बहुव्रीहित्वं निर्णीयते। निर्द्धारणस्य सजातीयविषयतानियमेन निर्द्धार्यमाणस्य क्रियात्वलाभात्। अत एव तत्र विद्यमानादिति व्याख्यातम्। एवञ्च कर्म-
धारयमाश्रित्य पूर्वस्मिन्काले वाच्ये क्त्वा भवतीति केषाञ्चिद्व्याख्यानमयुक्तमेव। किञ्च पूर्वकालो न वाच्यः तद्विशेष्यकबोधापत्तेः। न चेष्टापत्तिः। क्रियाप्राधान्यविरहेण आभी-
क्ष्ण्ये द्वित्वाभावापत्तेः। न च गुणीभूतक्रियामाश्रित्य तदिति वाच्यम्। पाचकादावतिप्रसङ्गात् ॥७ षणनिष्ठः संसर्ग इति मते पूर्वकालकं व्रजनमिति बोध इत्यूह्यम्।
समानकर्त्तृकेति। स च कप्रत्ययदर्शनात् बहुव्रीहिरिति भावः। बहुव्रीहित्वमिति। व्यापारश्चान्यपदार्थ इति भावः। तद्विशेष्यकमिति भोजनपूर्वकालकं व्रजनमिति रीत्येति भावः।

२पूर्वकालः संसर्गः। भोजन

अन्येभ्योभोक्तव्य इति। साधनपौर्वकाल्यविषयाणामेवाग्रादीनां ग्रहणमत्रेति समानकर्तृकयोरिति सूत्रे भाष्ये कैयटाभ्यामुक्तत्वादिति भावः। णमुलिति। तत्सूत्रविहितक्त्वो पुवलक्षणम्। स्वाद्विङ्कारमिति। खितीति ह्रस्वे मुमिति भावः। एते दोषा इति। ङीषि स्वाद्वीङ्कारमिति प्रसज्येतेति विशेषः न च प्रत्ययसंनियोगेन मुमो विधानादन्तरङ्गत्वेन पूर्व समाधत्ते। व्याख्यानेनेति। एतेनईश्वरःसर्वव्यापकवर्त्तते। ज्ञात्वातिष्ठतीत्याद्यपि व्याख्यातम्। श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते। इत्यादौ समानकर्तृकतानि र्वाहार्थं स्थितस्येत्यादि यथासंभवमध्याहार्यम्। पायंपायमिति। आतो युक्। वा दीर्घ इति। गमेण्यन्तात् णमुलि मितां ह्रस्व इति ह्रस्वे चकृते वा दीर्घ इत्यर्थः। ण्य न्तस्यापीति। यत्तु प्राचा ण्यन्तजागर्त्तेश्चिण्णमुलोर्वा वृद्धिरिति मतमुपन्यस्तम्। तदपाणिनीयमिति भावः। नयदि। अनाकाङ्क्ष इति। पचादजन्तेन। असमासः। तद्दर्शयति। नाकाङ्क्षते चेदिति। इहेति। नन्वनन्तरस्येति न्यायात् णमुल्मा भूत् क्त्वा तु सूत्रान्तरेण स्यादेवेति चेन्न। पूर्वकाले यत्प्राप्नोति तन्नेति व्याख्यानेन प्र कारणापेक्षयैव प्र ति षेधाभ्युपगमात्। विभाषाग्रे प्रथमपूर्वेषु। यद्यप्यग्रशब्दो देशविशेषवचनोऽप्यस्ति प्रभोरग्रे भुङ्क्ते इति तथापीह कालविशेषवाच्येव गृह्यते प्रथमशब्दसाहचर्यात्। अग्रे इति सप्तम्यन्तस्यानुकरणम्। अत एव विभक्तेर्लुङ् न कृतः। अस्यवामीयमितिवत्। अग्रेभोजमिति। अन्येभ्यो भोक्तव्यः पूर्वं भुङ्क्ते इत्यर्थः। यदि तु अग्रेप्रभृतिभिर्व्रजनादिक्रियापेक्षं भुज्यादेः पूर्वकालत्वमुच्येत तदा क्त्वाणमुलौ न स्यातामेव ताभ्यां द्योत्यस्य पूर्वकालत्वस्य अग्रेप्रभृति भिरेव निर्णीतत्वात्। स्वादुमीत्यर्थग्रहणं व्याख्यानादूतदोह। स्वाद्वर्थेष्विति। मान्तत्वमिति। ननु मास्तु णमुल् खमुञेवानुवर्त्तताम्। अरुर्द्विषदिति मुम् भविष्यति जस्य मान्तत्वनिपातनं व्यर्थमिति चेन्नैवम्। तथाहि। सति च्व्यन्तस्य मुम् न स्यात्। अनव्ययस्येति वचनात्। ततश्च स्वादुङ्कारमित्यत्र च्वौ चेति दीर्घः स्यात्। संपन्ना दिषु अस्य च्वावितीत्वं स्यात्। किंच त्वियां वोतो गुणवचनादिति ङीष् स्यात्। ततश्च स्वादीकारमिति प्रसज्येत। मुमः स्वरूपेण विधाने त्वेते दोषाः। अतः स्वादुमीति रूपं निपात्यते ॥ ॐ प्रवृत्तौ मैनैते दोषा इति वाच्यम्। सुमन्तस्योपपदत्वेन प्रियकुलानादिषु ततः प्रवर्त्तते सौ विभक्त्यन्त इति भाष्योक्तरीत्या स्वार्थद्रव्यलिङ्गसंख्यानाक्रमिकत्वेन सुपः

वागेन ङीपः प्रसक्तस्य बाधादिति भावः ॥

निपात्यत इति। ननु निपातनमाश्रित्य खमुञेव विधीयतां किं णमुलेति चेन्न। खमुञि अव्ययार्थमेव निपातनं स्यादिति ङीप्बाधानापत्तेः। णमुलि तु पूर्वं विधीयमानत्वं सर्वार्थं उत्तरार्थश्च णमुलिति कैयटादयः। भावप्रत्ययमात्रेति। एतत्प्रकरणस्थभावप्रत्ययमात्रविषयकं निपातनमिति हरदत्तोक्तेरिति भावः। परे तु णमुल्विषयमेव निपातनं अत एवास्वाद्वीङ्कृत्वेति भाष्यं सङ्गच्छते। अन्यथा सास्यात्प्रभृतिषितिसूत्रभाष्योक्तरीत्या मान्तत्वनिपातनमित्यस्य स्वादुशब्दस्य स्वादुमादेश इत्यर्थे लिङ्गविशिष्टपरिभाषया ततश्चानजन्तत्वान्नेत्वदीर्घौ न वा ङीष्। निपातनञ्च भावप्रत्ययविषयकम्। तेन स्वादुङ्कृत्येत्यपि सिद्धम्। व्यर्थत्वादिति। निष्प्रयोजनत्वादित्यर्थः। तदेव दर्शयति। कृत्वा भुङ्क्ते इत्यर्थ इति। फलितार्थकथनमेतत् शाब्दबोधे तु वैलक्षण्यमस्त्येव। तथाहि क्रियासामान्यवचनः करोति। तदीयश्च प्रकारोऽन्यथादिशब्दचतुष्टयेनोच्यते। एवञ्चान्यथाकारमित्यादिभिश्चतुर्भिः प्रकारविशेषविशिष्टा क्रिया बोध्यते। सा च भुज्युपात्तफलविशिष्टक्रियां प्रति विशेषणतया संबध्यते। एकस्यापि। क्रियाया विशेषणोपरागेण भिन्नाया विशेषणविशेष्यभावसंभवात्। कथन्तर्हि सिद्धाप्रयोगश्चेदित्युक्तमिति चेत्। अनतिप्रयोजनत्वादिति गृहाण। न त्विह सर्वथा निष्फलत्वमिति। अभिधेयशून्यत्वमिति वा भ्रमितव्यम्। भेदनिबन्धनस्य पौर्वकालस्य समानकर्तृकत्वस्य चाभावेन णमुल एव दुर्लभत्वात्। धातुसंबन्धाधिकारबाधापत्तेश्च। अथाभिवचनसामर्थ्यात् णमुल्। अपार्थकमेव णमुलन्तं प्रयोक्ष्यत इति ब्रूषे एवमपि वासरूपविधिलभ्यः पाक्षिकः क्त्वा न सिद्ध्येत्। न चेष्टापत्तिः। भाष्यकृतैव तत्र प्रयुक्तत्वात्। एतेन व्याकरणा— धिकरणे अन्यथाकृत्वा। विदितं अन्यथाकृत्वा परिहारः। कथङ्कृत्वा बाधकं इत्यादिभाष्यप्रयोगानुदाहृत्य तेषां प्रामादिकतां वदन्तो भट्टपादा अपि पूर्वपक्षे स्थिताः। प्रौढिमात्रञ्च कुरित्यवधेयम्। न तु तदुक्तिः पारमार्थिकत्वेन ग्राह्या। सूत्रकारवचनबलेन ——— णमुलन्तं अपार्थकं प्रयोक्तव्यमिति स्वीकारे भाष्यकारवचनबलेन क्त्वान्तेऽपि तथात्वस्य सुवचत्वात् ॥ ७ तस्यापि तदादेशापत्तावसागतिः स्पष्टैवेति हरदत्तोक्तिरसङ्गता। स्वादुङ्कृत्येत्यस्य स्वादुमन्तं कृत्वेत्यर्थः। उपपदत्वाभावान्न समास इत्याहुः। इत्यपीति। स्वादुङ्कारमित्यस्यैवार्थः। विशेषणतयेति। अभेदेनेत्यर्थः। सर्वथाभेदाभावे विशेषणविशेष्यभावासंभवादाह। एकस्या अपीति ॥

क्वाप्यपार्थकतानेति।अर्थवत्त्वेसंभवतितथाकल्पनानुचितत्वाचेत्यपिबोद्ध्यम्।इत्थमेवेति।सत्यानृतमिथुनीकरणंविनालोकव्यवहारासिद्धेरितिभावः।दर्शनविषयीभूतानामिति।साक
वस्तुतःक्वाप्यपार्थकतानेत्युक्तत्वात्।नचऔपाधिकभेदमादायक्त्वाप्रत्ययनिर्वाहस्यासांप्रदायिकत्वंशङ्क्यम्।भाष्यकारादप्यधिकस्यसांप्रदायिकस्याप्रसिद्धत्वात्।तद
भिप्रायस्ययथातथयोरितिसूत्रेहरदत्तादिभिरित्थमेवविवृतत्वात्।उत्तरमीमांसायामपिअन्योन्यस्मिन्अन्योन्यात्मकतामध्यस्यसत्यानृतेमिथुनीकृत्यलोकव्यवहारइति
भाष्यकारैःप्रयुक्तत्वान्तत्रापिविवरणादावित्थमेवसमर्थितत्वाच्चेतिदिक्।शिरोन्यथाकृत्वेति।इहहिकरोतेरभावेभुजिक्रियागतएवप्रकारोगम्यतेनतुशिरसोऽन्यथाक
रणम्।अतआवश्यककरोतिरितिभावः।यथाकारमिति।प्रष्टुमनर्हःसन्यदिपृच्छतितदेदमुत्तरम्।अत्रापिवासरूपन्यायेनपक्षेक्त्वाबोध्यः।कन्यादर्शनमिति।अत्रद
र्शनविषयीभूतानांसर्वासांकन्यानांवाक्यार्थेऽन्वयात्साकल्यंबोध्यम्।सर्वाइति।दर्शनविषयीभूताःसर्वाइत्यर्थः।अतिशयप्रतिपादनपरमेतत्।जानातीत्यादि।सत्तार्थ
स्यविदेरकर्मकत्वान्नेहग्रहणम्।किन्त्वितरेषामितिभावः।यावतिविन्दजीवोः।विदेर्लाभार्थस्यानुकरणन्तस्यविन्दतीत्यादौशेमुचादीनामितिनुमस्ति।यावल्लभत
इति।असाकल्यमनेनदर्शयति।साकल्यंहिपूर्वेणैवसिद्धम्।चर्मोदरयोः।कर्मणीत्येवेति।एवञ्चपूरेरितिण्यन्तस्यनिर्देशः।नतुकेवलस्याकर्मकत्वादितिभावः।उदरमिति।
उदरपूरणविशिष्टाभुजिक्रियार्थः।इहपूर्वकालइतिनसंबध्यतेऽसंभवात्।अप्रतीतेश्च।एवमन्यत्रापियथासंभवंबोध्यम्।चेलेक्नोपे।व्याख्यानादर्थग्रहणमित्याह।
चेलार्थेष्विति।चेलक्नोपमिति।यथावर्षणेचेलानिशब्दायन्तेतथावृष्टइत्यर्थः।निमूलमिति।निर्गतंमूलमस्यनिमूलम्।सहमूलेनसमूलम्।विशेषणविशेष्यभावइ
तिणमुल्प्रकृत्याअनुप्रयुज्यमानधातुनाचयद्यप्येकएवार्थउपस्थितस्तथापिउपपदार्थविशिष्टोणमुल्प्रकृत्यर्थोऽनुप्रयोगार्थेप्रतिविशेषणमितिभावः।स्नेहनेपि
षः।शुष्कचूर्णेतिसूत्रएवस्नेहनग्रहणंनकृतम्।तत्रहिकर्मणिदृशिविदोरितिसूत्रात्कर्मणीत्यनुवर्त्ततेइहतुपूर्वसूत्रात्करणेइति।सञ्ज्ञायाम्।अनधिकरणार्थमारम्भः।मू
लकेनोपदंशमिति।अयमर्थः।मूलकेनभुङ्क्ते।किङ्कृत्वा।उपदश्य।किमुपदश्य।अर्थान्मूलकमिति।वचनसामर्थ्यादिति ॥ तुल्यमपितदपेक्षयैवबोध्यम्।शब्दायन्तेइति।धा
तूनामनेकार्थत्वादार्द्रीकरणंक्नोपेरर्थइत्यन्ये।प्रतिविशेषणमिति।अत्रप्रकरणेशाब्दबोधमात्रीयङ्किंचिद्वैलक्षण्यमाश्रित्यणमुलन्तानामनुशासनबलात्साधुत्वंबोध्यम् ॥

म·भा· तर्हि करणे इत्येवेति। एतेन दध्नेरूपपदप्रयमुङ्क्ते इत्यादौ वचनञ्चरितार्थमिति परास्तम्। न च दध्ना सह सक्तून् भुङ्क्ते इत्यर्थे दध्नुपदंशं सक्तून् भुङ्क्ते इत्येतत्सिद्ध्यर्थन्तृतीयाग्रहण
३९२ ञ्चरितार्थम्। तादृशे विषये उपदंशनिरूपितार्थकर्मत्वस्यापि सत्वेनोपपदविभक्तेरिति न्यायेन तृतीयाया दुर्लभत्वात्। न च वचनसामर्थ्यात्समासप्रत्ययाद्युपपत्त्याव
पिमूलकेनोपदंशमित्यत्र समासाभावपक्षे कृद्ग्रहणपरिभाषया विशिष्टे प्रातिपदिकसञ्ज्ञापादनं समासग्रहणकृतनियमेन वारणञ्चासङ्गतं स्यात्। प्रत्यासत्त्या
यदि हि तृतीयान्तेन शब्दे अन्वये सत्येव प्रत्ययो भवेत्तर्हि करण इत्येव ब्रूयात्। करणे हन इति वदिति भावः। कालयतीति। कलविक्षेपे चुरादिः। दण्डताडमि
ति। तड प्रतिघाते चुरादिरेव। उपपूर्वेभ्य इति। सूत्रे पीडादीनां समाहारद्वन्द्वः। लाउपपूर्वः पीडादिरिति उत्तरपदलोपी समास इति भावः। पुंस्त्वन्तु सौत्रम्। प
ञ्चम्यर्थे प्रथमा। कर्षतीति शपा निर्देशः कृतोपधागुणस्योच्चारणान्तत्फलन्तु तुदादेर्व्युदासः। यद्यपि विलेखन एवसोपि पठ्यते तथापि क्षेत्रविषय एव विलेखनेत
स्य वृत्तिः। पञ्चभिर्हलैः कृषतीति दर्शनात्। एवञ्च तौदादिकात्क्त्वाप्रत्यय एव भवति। क्षेत्रे उपकृष्य हलेनोपकृष्य। न त्विह णमुलिति स्थितमाकरे। समासत्तौ।
केशग्राहमिति। सन्निकर्षप्रतिपादनपरमेतत्। केशेषु ग्रहणं भवतु वा मा भूत्। द्व्यङ्गुलोत्कर्षमिति। द्वयोरङ्गुल्योः समाहारो द्व्यङ्गुलम्। तत्पुरुषस्याङ्गुलेरि ॥
त्यच् समासान्तः। द्व्यङ्गुलेनोत्कृष्य परिच्छिद्येत्यर्थः। ह्रस्वः खण्डः खण्डिका। द्वितीयायाञ्च। अथ कथमनुदात्तं पदमेकवर्जमिति। नह्यत्र त्वरा गम्यते। अत्राहुः इ का
हापि त्वरा विवक्षिता। तथा हि। परिभाषेयम्। तेनोदात्तः स्वरितो वा यत्र विधीयते तत्र समकालमेवैकमचं वर्जयित्वा परिशिष्टमनुदात्तं कर्तव्यं न विलम्बितव्यमि रि
ति। यष्टिग्राहमिति। एवं नाम समुद्धाय त्वरन्ते यदासन्नं यष्ट्यादिकं अपि गृहीत्वा धावन्ति नायुधं प्रतीक्षन्त इति भावः ॥७ कृत्स्नत्वस्यार्थनिरूपितकारकत्वस्यैव ७
ग्रहणादिति वाच्यम्। उपदंशे कर्मत्वेनान्यार्थान्वयसत्त्वात्तन्निरूपितकारकत्वाक्षतेः। विभक्तिस्तु प्रधानानुरोधिनी तृतीयेन परत्वाच्चेति बोध्यम्। स्थितमाकर इति। धनुर राम:
भिरिभिरसह्यमुष्टिपीडं स्थाने इति भट्टिप्रयोगे तु न णमुलन्तं किंतु घञन्तं क्रियाविशेषणत्वाच्च द्वितीयेति बोध्यम्। न विलम्बितन्नमिति। एतच्च हरदत्तग्रन्थे स्पष्टं सौत्रत्वात्तत्त्व ३९२

अनृजुत्वादिति। गमनप्रतिबन्धकत्वमनृजुत्वं अग्रतः स्थितं काष्ठमित्यर्थः। तत्र यद्यपीति। तस्प्रत्ययान्ते स्वाङ्गे उपपदे इत्यर्थस्तूचितः। इहेति। प्रत्यययोः प्रकृत्योश्चेत्यर्थः।
नेष्यत इति। यथासंख्यसूत्रस्य भाष्यप्रामाण्यादिति भावः। नार्थ इति। वस्तुतस्तदनित्यत्वज्ञापकम्। तेन सनः क्तिचीत्यादौ सन् धातोर्ग्रहणं सिध्यति। अनुवर्त्येति। एकाद
अव्यये। अयथाभिप्रेतशब्द आख्यानक्रियाविशेषणम्। यथाभिप्रेतं न भवति तथा आख्याने इत्यर्थः। तदेतद्व्याचष्टे इत्यादिना। नीचैः कृत्येति। यद्यपीह प्रियाख्या
नमभिप्रेतं तथापि तत्प्रकारस्य नीचैस्त्वस्यानभिप्रेतत्वमस्त्येवेति भवत्युदाहरणम्। अतएव अयथाभिप्रेताख्याने इति सूत्रितम्। न पुनरप्रियाख्याने इति।
तिर्यक्कृत्वेति। अनृजुत्वादग्रतः स्थितं पार्श्वे स्थितमित्यर्थः। स्वाङ्गे तस्प्रत्यये कृभ्वोः। तस् चासौ प्रत्ययश्चेति कर्मधारयः। तस्प्रत्ययोऽन्ते यत्स्वाङ्गं तस्मिन्नुपपदे इति
प्राञ्चः। तत्र यद्यपि स्वाङ्गमात्रं नोपपदं तथापि तस्मिन्नित्येतत्प्रकृतिप्रत्ययसमुदायपरमिति बोध्यम्। इह यथासंख्यं नेष्यत इति ध्वनयन्नुदाहरति। मुखतःकार
मिति। मुखतो भूयेति च। आद्यादित्वात्सप्तम्यर्थे तसिः। प्रत्ययग्रहणं किम्। मुखं तस्यति मुखतः। तसु उपक्षये क्विप्। अधातोरित्युक्तेरत्वसन्तेति दीर्घो न। मुखतः
कृत्वागत इति काशिका। एतच्च प्रत्ययाप्रत्यययोः परिभाषामनाश्रित्योक्तम्। वस्तुतस्तु नार्थः प्रत्ययग्रहणेन। नाधार्थ। नार्थौ नानाञौ। धार्थाः धमुञादयः। द्वैधं कृत्वा द्वै
धङ्कारम्। द्वैधं भूय। द्वैधं भावम्। यद्यपि धमुञादिविधौ धइत्यनुवर्त्यते तेषामादेशत्वाश्रयणात् स्थानिवद्भावेनापि सिद्धम्। तथापि धमुञन्तात्स्वार्थे डदर्शनमिति
उपसंख्यानस्य सङ्ग्रहार्थमर्थग्रहणम्। द्वैधीकृत्येत्यादि। तूष्णीमि ॥ कृञो निवृत्त्यर्थं भूग्रहणम्। अन्वच्यानुलोम्ये। ननु इह अच इत्यकारलोपे चाविति दीर्घे अनूची
ति निर्देष्टुमुचितम्। उदक् प्रतीचोऽय दिति वत्। स्यादेतत्। अच इत्यर्थवतो ग्रहणं स चार्थो लोकप्रसिद्ध एव गृह्यते। अभिव्यक्तपदार्था ये इति न्यायात्। अतोऽनुकर
णेन भविष्यतीति। एवन्तर्हि ति यो दीर्घादित्यादावियङादिकं न स्यात्। प्रकृतिवदनुकरणमित्यतिदेशाद्भवतीति चेत्। तर्हीहाप्यतिदेशादेवास्तु। एवञ्च तिर्यच्यपव
र्ग इति सूत्रेऽपि तिरश्चीत्येव निर्देष्टुमुचितं इति चेत्सत्यम्। प्रकृतिवदित्यतिदेशस्य वैकल्पिकत्वाददोषः ॥ ७ इत्यत इति भावः। सिद्धमिति। एवञ्च धांशे नार्थग्रहणस्यो
पयोग इति भावः। निरनुबन्धकपरिभाषाया अनित्यत्वे तु नांशेऽपि नोपयोग इति बोध्यम्। भूग्रहणमिति। अतएव च्व्यर्थ इति नानुवर्त्तत इति भावः ॥

[illegible] इदि अग्रे [illegible]लि। लोके नेदं शब्द इति भाष्यं इत एव प्रकृति सदित्यत्र लिङ्गं। लिम इति तद्धाः। किं तु लोके यांता उपपदस मासे। [illegible] सिद्ध [illegible] सुत्रह [illegible]
१९३ मदन्ते वा [illegible] शब्देन्दुशेखरादौ चद्रष्टव्यः। इति [illegible] संपूर्णम् [illegible]पीति। निर्द्धारणे सप्तमीतत्समुदायान्तर्गता: कांचिद [illegible] इति [illegible]
बैकल्पिकत्वन्नुपपत्तदेतेभ्यइंतिसूत्रेत्यदाद्यत्वस्यकरणादेकशेषाभावदर्शनाच्चनिर्णीयत इति प्रागेवप्रपञ्चितम्। अग्रत इत्यादि। अन्वक्शब्दस्यआनुकूल्यमात्रेवि
श्रान्तेर्देशविशेषप्रमाणंनास्तीतिसूचयितुमिदम्। टष्टतोभूत्वेति। इह अनुकूलोऽननुकूलोवेतिशब्देननस्पृश्यते। अन्वक्शब्दस्य देशविशेषमात्रे पर्य्यवसाना
त्। प्रमाणान्तरेणकाचिदानुकूल्यलाभेपिअन्वक्शब्दस्यतत्समर्पणेव्यापारविरहात्णमुल्न। किन्तुक्त्वैवेतिव्यवस्थाबोद्ध्या॥ इतिकृदन्तप्रक्रियासमा
प्ता॥ श्रीगणेशायनमः॥ अथवैदिकशब्देषुविशेषमाह। जक्षीयुक्त इति। वृषन्निति। कनिन्युवृषीति। कनिन्नन्तस्यवृषन्शब्दस्यभत्वमुपसंख्यायते। तत्फल
न्तुनलोपस्यणत्वनिषेधस्यचाभावः। लोके तु वृषवसुः। रणाश्वः। उभयसञ्ज्ञानीति। अयस्मयादिषुभकनेस्यादयः समुदाया एव बोद्ध्याः। तेनजस्त्वमस्तु। कुत्वं
माभूदितिवैपरीत्यंनप्रसज्यतइतिबोद्ध्यम्। नेनमिति। वाचामिनाः प्रभवः। तेष्वपिएनंविद्वांसंनहिन्वन्तिविवदितुंनगच्छन्तीत्यर्थः। तेप्राग्धातोः। तेगत्युपसर्गस
ञ्ज्ञा धातोः प्रागेवप्रयोक्तव्या इति प्रयोगोनियम्यते। अस्यापवादश्छन्दसीत्यादिसूत्रद्वयम्। इहसञ्ज्ञानियमपक्षोपिभाष्येस्थितः। तथाहि। तेइत्यनेनप्रादीनु
पनिपत्यपर्यन्तात्स्वरूपेणपरामृश्य धातोः प्राक्प्रयुक्तानामेवैषांसञ्ज्ञेतिव्याख्येयम्। एवञ्चछन्दसीत्यादिसूत्रद्वयंनकर्त्तव्यम्। नचैवंलोकेऽपिव्यवहितप्रयोगापत्तिः।
क्वचिदिष्टापत्तेः। तथाचमाघः। वारुणीमदविशङ्कमथाविश्वसुषोभवदसाविवरागइतिभवति प्रेत्यादितुनापादनीयम्। अनभिधानात्। सूत्रस्यप्रयोगनियमार्थत्वे
पिघटश्चपरइत्यादीनामनभिधानेनैववारणीयत्वात्। एवञ्चकर्त्तृकर्मणोश्चेतिसूत्रेस्वाख्येनभूयतइतिवृत्तिग्रन्थोप्यस्मिन्पक्षेसङ्गच्छतइतिदिक्। इतिप्रथमोध्यायः॥
सजातिपरत्वेनव्याहतमित्यादौनदोषः। अतएवगतिरनन्तरइत्यत्रानन्तरग्रहणञ्चरितार्थम्। एषासञ्ज्ञेति। तत्तत्सूत्रैकवाक्यतयेतिभावः। सूत्रद्वयमिति। अनुकरणञ्चेतिसूत्रेऽ [illegible]
नितिपरग्रहणञ्चेत्यपिबोद्ध्यम्। वृत्तिग्रन्थोपीति। सुकटंकराणीतिभाष्यग्रन्थोप्यर्थः॥ इतिप्रथमोध्यायः ॥ १९३

भिन्नेति। यवाग्वेति तृतीयाग्निहोत्रमिति द्वितीयेति भावः। भेदमात्रस्येति। स्वरूपभेदमात्रस्येत्यर्थः। भिन्नार्थकविभक्त्यवरुद्धयोरिव न तथान्वय इति भावः। एकविभक्तिकत्वनियम इति। एकस्या — कृतेश्चरितं प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भवतीति कृञ्चानुप्रयुज्यत इति सूत्रभाष्ये उक्तत्वादिति भावः। करणे द्वितीयेति। अयं भावः। अग्निहोत्रशब्दः कर्मनामधेयं स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासावित्यादिदर्शनात्। हूयते इज्यतेऽस्मिन्निति होत्रं अग्नेर्होत्रमिति समासः। अत एव केषाञ्चिदन्तोदात्तपाठः श्रुतौ। एव यवाग्वाख्यमिति। न च यवाग्वग्निहोत्रशब्दयोर्भिन्नविभक्त्यवरुद्धतया तदर्थयोरभेदान्वयो न संभवतीति वाच्यम्। विभक्त्योर्भेदेऽपि कर्मार्थकताया अविशेषेण विरुद्धार्थकत्वात्। विभक्तिभेदमात्रस्याकिञ्चित्करत्वादिति भावः। यद्यपि गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ दिवः कर्म चेत्यादीनामुदाहरणेषु विभक्तिविकल्पेऽपि विशेषणविशेष्ययोरेकविभक्तिकत्वनियमो लोके दृष्टस्तथापि वेदे नास्तीति ज्ञेयम्। प्राभाकरास्तु तृतीया च होरिति सूत्रेण करणे द्वितीया विधीयत इत्याहुः। तन्न, तत्र सूत्रा ग्रहणानुग्रणं न वा भाष्याद्यनुगुणमित्युपेक्ष्यम्। हनति शयत इति। हन्ति शेते इत्यर्थः। नाध्वं त्रामध्वम्। दाति। ददाति। विवष्टि वष्टि। इह सप्तमान्ते वक्ष्यमाणेन बहुलं छन्दसीति सूत्रेणाभ्यासस्येकारो बोध्यः। मन्त्रे घस। ह्वृ कौटिल्ये। असकृतगुणस्यानुकरणं ह्वरेति। अकारस्तूच्चारणार्थः। अजनेति। अजनिषतेत्यर्थः। एतरेयब्राह्मणे हरिश्चन्द्रप्रतिवरुणस्येदं वचनम्। विभाषेति। एतेनेह सूत्रे सिच इत्यनुवर्त्य सिचः स्थानिभूतयोर्लिरिति व्याख्यानात् लिङ्लिटोनेति हरदत्तग्रन्थः परास्तः। लोपस्य वैकल्पिकतया छन्दसि रूपान्तरस्यानापाद्यतया सिजनुवृत्तेर्वैफल्यात्। द्वितीयोऽध्यायः। आद्ये तु चतुर्थीति। तत्रापि सहिजनिरमिभ्यो णिजन्तेभ्य आम्। विनोतेस्तु शुद्धादिति बोध्यम्। लोक इति। वेदेऽपि पाक्षिकमिदं बोध्यम्। विदाङ्कुर्वन्त्विति पूर्वसूत्रादन्यतरस्यांग्रहणस्येहानुवृत्तेः। पावयामिति। पवतेः पुनातेर्वा ण्यन्तादाशीर्लिङि आम्। क्रियादित्यनुप्रयोगः ॥ ७ स्वाग्निहोत्राख्येनेष्टं भावयेदित्यर्थ इति तत्र सूत्रेति। कर्मणीत्यधिकारात्। नापि भाष्येति। तत्र तृतीयाविधानार्थमिदं द्वितीया तु कर्मणीत्येव सिद्धेति सिद्धान्तिनोक्तम्। विवष्टीति। वष्टीति प्राप्तम्। वैफल्यादिति। एवञ्च लिग्रहणमपि व्यर्थम्। सिच इत्यनुवर्त्य तस्यैव लुका सिद्धेः। आदिः सिच इत्यस्य वैकल्पिकतया रूपान्तरस्यानापाद्यत्वेन तदप्रवृत्त्यर्थं लिग्रहणमित्यपि न शङ्क्यमित्यपि बोध्यम्। इति द्वितीयः ॥

प्रागुक्तेति। कुत्सोलुङि मन्क्षेघसेतिक्षेर्लुकि सार्वधातुकगुणे इत्यपि बोध्यम्। इदुपक्षे त्विति। नेटीति वृद्धिप्रतिषेधाद्गुणोत्र पक्षे। चुरादावदन्त इति। तस्मात् णिचि चङि णौ कृतस्याल्लोपस्य स्थानिवत्त्वान्न शब्दस्य द्वित्वं अग्लोपित्वान्न सन्वद्भावदीर्घोपधाह्रस्वत्वानि। नत्वौढिवाद्मात्रमिति। संज्ञापूर्वकविधेरनित्यताया आप्यसंमतत्वाच्चेत्यपि बोध्यम्। अविदामक्रन्निति विदेर्लुङ्ग्याम्। गुणाभावः। लुगन्तकरोत्यनुप्रयोगः। मन्क्षेघसेतिलेर्लुक्। ।सोन्तः। अकरिति। प्रागुक्ते तु तिपि सार्वधातुकगुणे हल्ङ्यादिलोपः इतिविशेषः। गुपेः। आयप्रत्ययाभावस्थल एवेदं सूत्रे केवलस्योच्चारणात्। अगोप्तमिति। ऊदित्वादिड्भावेव दव्रजेति वृद्धिः। झलोझलीति सिचो लोपः। इट्पक्षे तु अगोपिष्टम्। आयप्रत्ययपक्षेऽगोपायिष्टम्। इत्यस्त्व त्वारिछन्दसि। भाषायां तु चङ्। त्वंवर्जयित्वा त्रीण्येवेति विवेकः। त्वायतस्त्वामिच्छतः। जरितुः स्तोतुर्नमकाममभिलाषं मा ऊनयीः। ऊनं माकार्षीरित्यर्थः आऊनन इति भाषायाम्। ऊन परिहाणे चुरादावदन्तः। ध्वन शब्दे। चुरादिरदन्तः। घटादिर्नान्तश्च। भाषायां तु अदध्वनत्। घटादेरदिध्वनत्। इल प्रेरणे चुरादिः। ऐलयीत्। भाषायां तु ऐलिलत्। अर्द गतौ याचने च। अर्द हिंसायाम्। हेतुमण्णिच्। आर्दयीत्। भाषायां त्वार्दिदत्। यत्तु प्राचा नोनयतीति सूत्रं लौकिकेपि सञ्चारयता द्वयमपि लोक इत्युक्तम्। तन्न। छन्दसीत्यस्यानुवृत्तेः। काशिकादिमहाग्रन्थासंमतत्वात्। वैयात्या त्वदनुवृत्तौ तु चङो दुर्लभत्वात्। यत्तु विभाषेत्युभयोरिति विभाषाग्रहणमिहानुवर्त्तते न तु छन्दसीति तदाशयवर्णनम्। तदपि न। सूत्रे न ञौ वैयर्थ्यापत्तेरित्यास्तां तावत्। अमरदिति। व्यत्ययेन परस्मैपदम्। यत्तानोरिति यत्तु इमामृचं व्याचक्षाणैरुक्तम्। इहेर्लङि शपि संज्ञापूर्वको विधिरनित्य इति लघूपधगुणो न भवतीति। तन्न प्रौढिवादमात्रम्। लोके तु अकार्षीत्। अमृनात्। अद्रीनात्। अरुरुसत्। छन्दसि निष्ट। क्यपि प्राप्त इति। रुदुपधाश्चेति। सूत्रेणेति भावः। ब्रह्मणि वदेरिति। न च यत्येव दीर्घो निपात्यतामिति वाच्यम्। यतोऽनाव इत्याद्युदात्तापत्तेरिति भावः। अत्र श्लोकवार्तिकम्। निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातनात्। ण्यदायादेश इत्येतौ उपचाय्ये निपातितौ। ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः। ण्यदेकस्माद्यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः। व्यत्ययमिति। आद्यन्तविपर्यासमित्यर्थः। चतुर्भ्य इति। देवहूयादिषु चतुर्षु चतुर्भ्यो धातुभ्यः क्यप्। उपसर्गे वेदान्नयतेर्गेदः। द्वौ क्यपाविति। द्वाभ्यां धातुभ्यां द्वाविति भावः॥ ७) दारीदिति। सूत्रे दृ इति दीर्घपाठे इदं ह्रस्वपाठे तु नेति बोध्यम्। आद्यन्तविपर्यासमिति। प्रत्ययव्यत्ययमित्यपि बोध्यम्। तदुक्तं षत्वनिपा

त्वादिति। ननु प्रयोगहृषेण ह्वेन नयतेरेव प्रकृतित्वा
चतुर्भ्य इत्यसङ्गतमत आह॥ उपसर्गे वेदादिति ॥

स्याध्यत्वाच्चेति। अकारविशिष्टयोरेव सूत्रे पाठाच्चेत्यपि बोध्यम्। पादान्त इति सूत्रस्थेनाद्यपादादावपीष्टत्वेनेदं चिन्त्यम्। निपातनमिति धातूपपदसमुदायान्तमिति बोध्यम्। व
देः कर्मणीति। श्वेतैरुह्यत इति श्वेतवा इन्द्रः। उक्थे इति। उक्थैरुक्थानि वा शंसत्युक्थशाः। कर्मणि चेति। पुरो दाश्यते पुरोडाशः। सम्प्रसारणे कृते इति। पदस्य विभज्यान्वाख्याने ऽन्त
वद्युरिति सुवन्नम्। चतुरो वा राण्सहि पीयत इत्यर्थः। छन्दसि। वण षण सम्भक्तौ। इति भ्वादिगणे सह निर्दिष्टे गृह्येते। ननु वनु याचने षणु दाने इति तनादिकौ। तानुबन्धकत्वा
त्सह पठितयोरेव ग्रहणस्यान्याय्यत्वाच्च। ब्रह्मवनिमिति। ब्रह्मवनिति। सेनं वनति। गां सनतीति विग्रहः। सुषामादित्वात्षत्वम्। हव्येनमा। हव्यघान्दे उपपदे वहेरसुट् स्यात्पा
दान्ते। जनसन। जन जनने। जनी प्रादुर्भावे। द्वयोरपि ग्रहणम्। षणु दाने षण सम्भक्तौ द्वयोरपि ग्रहणमित्याहुः। अत्र च व्याख्यानं शरणम्। मन्त्रे। श्वेतादिपूर्वेभ्यो वहा
दिभ्यो ण्विन् स्यात्। अलाक्षणिककार्यार्थं निपातनम्। श्वेतशब्दे कर्तृत्वाविनि उपपदे वहेः कर्मणि प्रत्ययः। उक्थे कर्मणि करणे वा उपपदे शंसतेः प्रत्ययः। नलोपश्च। दाशृ दा
ने। अत्र पुरस्पूर्वत्वादेडत्वं कर्मणि च प्रत्ययः। अवयाः श्वा। चकारादुक्थशाः। एतच्च वार्त्तिकम्। तथा च कैयटादयः। उक्थशादिष्वपि संबुद्ध्यर्थं निपातनं कर्त्तव्यम्। यदिम
नो दूतो नमस्तीति। अररिवानिति। रा दाने लिटः क्वसुः। वस्वेकाजाद्घसामितीट्। आदन्तत्वात्। नञ्तत्पुरुषे ऽव्ययपूर्वपदप्रकृतिस्वरः दीर्घादटीति नकारस्य रुत्वम्। आतो
ऽटि नित्यमिति रोः पूर्वस्यातो नित्यमनुनासिकः। भविषये तु वस्वोः संप्रसारणे कृते वलादित्वाभावादिडभावः। एतेन मानः शंसो अररुषः इत्यादि व्याख्यातम्। प्रसङ्गाद
घायुशब्दं साधयितुमाह। छन्दसीति। आत्मनः इति विशेषणादप्राप्तिः। अघायुरिति। अश्वाघस्यादिति वक्ष्यमाणेनाकारादेशः। जवसवाविति। ऋदोरपोपधाटो ऽव
त्वारार्थे विधीयेते। तौ डाटौ। आगमौ स्त इति। तौ च पर्याये न तु यौगपद्येन। अङ्घिपि सामर्थ्यात्। अन्यथा सवर्णदीर्घे कृते विशेषाभावात्। आडुत्तमस्येति सूत्रान्म
पङ्कालुत्यादिकेत्यनुवर्त्तत इत्याशयेनाह। तो वपितावितिं नत्कलन्तु। पश्चो ग्याः अस्मै वैधा। विकन्दसी उर्वरा सुब्रवैते इत्यादौ गुणः। वत्तौ तु पिद्ग्रहणं नानुवर्त्तितम्। नत्र
कर्तृस्थपयोरेति सार्वधातुकत्वादिकरणः ॥ ॐ ऋङ्परिभाषया अनित्यत्वादनाश्रयणेन नित्यत्वात्संप्रसारणे कृते इत्यर्थः। जवसुब योर्ज्जुस्प्रकृती। स्वरार्थमिति। एव

अत्र पादोऽजससौ छन्दसीत्यस्य पाठः प्रामादिक
इति भावः। विकरण इति। करवैते इत्यादौ ॥

द्विकरणस्य गुण इति।करोतेरुत्वाभावश्छन्दस्यपि बोध्यम्।क्वचिन्नेति।गृ ग इति शेषः।परस्मैपदमिति। तिपो ठसिपद् डिति बोध्यम्।आडिति।वस इति शेषः।आडिति लेट् इत्यर्थः। जि
आर्द्धधातुकत्वान्ङित्वाभावाद्विकरणस्य गुणः।अतएव क्वचित्।तनूरुचा तनूरुषिय कृण्वेवेते।तारिषदिति।तिपद्कारलोपः।सिपद् इट्।जोषिषदिति।जुषी प्रीतिसेव
नयोः।अनुदात्तेत्।अतएवात्र परस्मैपदम्।करवाचेति।कृञो लेटो वस उः।गुणो रपरः।आट्।अङित्वाद्विकरणस्य गुणः।करोतेरुत्वाभावश्च।मादयैतेरिति।मदी हर्षे।णि
जन्ताल्लेट्।आकारस्यैति।प्रथमस्येत्यर्थः।द्वितीयस्य तु टित आत्मनेपदानामिति एत्वमेव नित्यत्वात्।न च शब्दान्तरप्राप्त्या अनित्यत्वम्।कृताकृतप्रसङ्गित्वमात्रेण क्वचिन्नि
त्यत्वाश्रयणात्।उत्तरसूत्रे अन्यत्रेति लिङ्गाच्च।वैतो।अन्यत्वं किमपेक्ष्येत्याकाङ्क्षायां पूर्वसूत्रविषयादिति लभ्यते।सन्निधानात्तदाह।आत इत्यादि।ईशे इति।ईश ऐश्व
र्ये।उत्तमैकवचनमिदम्।इतश्च लोपो नास्ति परस्मैपदेष्वित्युक्तेः।टेरेत्वे तस्य ऐरगृह्यान्ता इति।ग्रहेः कर्मणि लेट्।आट् यक्।संप्रसारणम्।झोन्तः।पणबन्ध इति।यदि
मे भवानिदं कुर्यात्तर्हीदमहन्दास्यामीति।समयकरणं पणबन्धः।आशङ्का संभवना।अहमेवेति।त्रिपुरविजये देवैः प्रार्थितस्य रुद्रस्येदं वचनम्।पशवः संसारिणः।नेदि
ति।इच्छब्द आशङ्कां द्योतयति।जिह्माचरणेन नरकपातः संभाव्यते।स माभूदित्यर्थः।द्वौ विकरणाविति।तत्र शप्न्याय्यः।सिप्तु बाहुलकात्।एते समर्यजिद्वाजो अस्मा अ
विड्ढ।से माम विड्ढि इत्यादिव्याख्यानम्।अव रक्षणे।अस्माल्लोटि बाहुलकात्सिपः प्रवृत्तेः।तरुषेमेति।उप्रत्ययान्तस्य सिपं प्रत्यङ्गत्वात्सार्वधातुकार्द्धधातुकयोरिति गुणः
प्राप्तः।स्निजन्तस्य शपि लघूपधगुणश्च प्राप्तौ बाहुलकान्न भवति।तरुषन्तीति प्राप्नोति।यत्तु सुपां सुलुगिति सूत्रे हरदत्तेनोक्तं नक्ष्णुवन्तीति प्राप्त इति तु युक्तः पाठ इति।त
च्चिन्त्यम्।श्नुप्रत्ययस्य वैकल्पिकत्वे हि शपः सौष्ट्वेन बहुवचनमात्रे व्यत्ययमभिप्रेत्य नक्षन्तीति भाष्यकाशिकारूढपाठस्यैव न्याय्यत्वात्।कृन्तन्नीति।तेन दीव्यतीत्या
दौ विधीयमानानां ठगादीनां देवनादिकर्तृवाचकत्वादेवमुक्तं न तु हकारकत्वाविलेप्याग्रहः।कृत्तद्धितमात्रे तात्पर्यात्।तथा च किमो विहितो ड इति यच्छब्दादपि भव
ति।त्वम्बेत्ययति तेजातवेदः।विश्वेदेवासो मनुषो पति इत्न।आङ्गमः।ताच्छीलिकेषु व्याख्यातमिदम्।विशेषाभिदित्सया स्मार्यते।लिड्वद्वावादिति।असंयोगाल्लिट्किदि
ति कित्वं सिद्धमिति भावः।ननु स्रंसिध्वंसिप्रभृतिभ्यः किकिनोः संयोगात्परत्वेन कित्वं सार्थकमिति चेत्॥ ७ ह्याचरणेनेति।जिह्मं कुटिलं पापम्।स्रंसुध्वंसुप्रभृतिभ्य इति।

छन्दसि सर्वेभ्यः किकिनौ वा आदिदुकोरिति भावः।

अगुणेइति।गुणाभावेइत्यर्थः।इयङिति श्रिञ्सेवायामित्यस्माण्ण्यन्तादितिमदेरितिशेषः।विशस्यपीति।अपिनाबाहुलकाद्गुणाभावमात्रमित्यपि[illegible]म्।लस्येति।पिबध्यैइत्यत्राद्युदात्तत्वाद्ध्यालस्यस्याकरेअनुदात्तत्वात्।यदितुतादृशलस्यप्रमाणमस्तितर्हिछन्दस्युभयथेतिलिटःसार्वधातुकत्वस्यापिसत्त्वेनसार्वधातुकमपिदितिङित्त्वात्सिद्धमितिभावः।ततुरिर्जगुरिरिति।द्विर्वचनेऽचीतिस्थानिवद्भावादादेशप्रतिषेधाद्वा।तृगॄइत्यनयोर्द्वित्वन्त[illegible]तउत्तरदलेउत्वेपिअभ्यासेउरदत्वंत्रिर्बोध्यम्।तुमर्थे।पञ्चदशप्रत्ययाविधीयन्ते।तत्रासेसेन्।असेअसेन्।अध्यैअध्यैन्।कध्यैकध्यैन्।शध्यैशध्यैन्।एषान्दशानान्द्वयोर्द्वयोरूपाविशेषेपिस्वरेविशेषः।इतरेषुपञ्चसुरूपविशेषःस्पष्टएव।वक्षइति।वचःसे।कुत्वम्।षत्वम्।एषेइति।इणोगुणः।नित्त्वादाद्युदात्तः।प्रेषेति।इणःक्से।कित्त्वादगुणेआद्गुणः।श्रियसेइति।इयङ्।नित्त्वादाद्युदात्तः।इहमन्त्रेमध्योदात्तःपठ्यतेतत्रबाहुलकात्प्रत्ययस्वरोबाध्यः।मादयध्यैइति।ण्यन्तात्शध्यै।तस्यभावत्वात्सार्वधातुकत्वाद्यक्प्रसङ्गेव्यत्ययेनशप्।गुणायादेशौप्रत्ययस्वरः।पिबध्याइति।यक्।तस्यबहुलंछन्दसीतिलुगितिहरदत्तः।पूर्ववद्व्यत्ययेनयकःप्रसङ्गेशबित्यपिसुवचम्।यत्तुप्राचोग्रन्थव्याचक्षाणैर्मादयध्याइत्यत्रयकंस्वीकृत्यव्यत्ययेनलुक्शप्चेतिस्वीकृतन्तद्दैएवग्रस्तम्।यच्चकाशिकायांशध्यैशध्यैन्पिबध्यैमादयध्यैइत्युदाहृतम्।अन्यैश्चतदेवानुसृतन्तच्चक्रमेणयोजनीयम्।अन्यथालक्ष्यविसंवादात्।सूतवइति।ङित्त्वान्नगुणः।दशमेमासिसूतवेइतिमन्त्रेसूतवइतिपदमाद्युदात्तंपठ्यते।तत्रस्वरव्यत्ययः।यद्वा।तवेन्प्रत्ययेनित्स्वरः।गुणाभावस्तुबाहुलकात्।यद्वा।छन्दस्युभयथेतिसार्वधातुकत्वेसार्वधातुकमपिदितिङित्त्वंबोध्यम्।प्रयै।प्रपूर्वाद्यातेःकैप्रत्ययः।रुहेरिष्यै।नञ्पूर्वाद्व्यथेश्च।दृशेविख्येच।योगविभागेफलञ्चिन्त्यम्।केप्रत्ययः।कित्त्वाद्दृशेर्नगुणः।ख्यातेरनोलोपः।लिलिखइति।कित्त्वान्नगुणः।क्त्वातोसुन्कसुनइत्यव्ययत्वाद्विभक्तेर्लुक्।ननुमन्ता[illegible]निषेधादस्सन्तस्येतिदोषोन।कृत्यार्थे।भावकर्मणोरित्यर्थः।यद्यपिभव्यगेयादिषुकर्त्तावक्तुंकरणंस्नानीयंचूर्णमित्यादौकरणंदानीयोविप्रइत्यत्रसंप्रदानञ्चकृत्यानामर्थस्तथापिकृत्यत्वेनरूपेणनकर्त्रादिषुविधिरस्तिकिन्तुविशिष्यैव।बाहुलकाद्वा।कृत्यतयातुभावकर्मणोरेव।तयोरेवेतिसूत्रात् ॥ उदात्तपाठादितिभावः।ङित्त्वंबोध्यमिति।एवञ्चतवेङ्व्यर्थइतिभावः।इत्यव्ययत्वादिति।अन्यत्रकृन्मेजन्तइत्यव्ययत्वंबोध्यम्।सनन्तादितिकेन्यप्रत्ययः ॥

म.श.
३९६

इत्यर्थइति।कस्त्वनी तिवो।ब्रुम।रेफस्यविसर्गइति।एवञ्चतत्रकस्त्वमितिरूपमितिभावः।एशप्रत्ययइति।वसिङ इत्यादिः।इत्यादावपि।सन्तिष्ठतेपितृयत्तद्इत्यादिशब्दार्थः।इ
अतःप्रतिपदोक्तस्यैवकृत्वार्थस्येहग्रहणंन्याय्यंनम्लेच्छितवै।नम्लेच्छितव्यमित्यर्थः।दिदृक्षेण्यइति।दृशेःसन्नन्तात्।अतोलोपः।कत्वमिति।कृत्वमित्यर्थः।यत्तुकृञोविचि
गुणेरपरत्वेतस्याभावइतिलप्रत्ययइतिव्याचक्षतेतत्ररेफस्यविसर्गोदुर्वारः।आद्युदात्तताचदुर्लभेतिदिक्।अवचक्षेच।एश्प्रत्ययः।शित्वात्सार्वधातुकत्वंतेनख्याञा
देशोन।भावलक्षणे।संस्यादीनामवधित्वेनलक्षणत्वंबोध्यम्।आसमाप्तेरिति।संपूर्वोहितिष्ठतिःसमाप्तौरूढः।यतिष्ठन्तुयज्ञःसन्तिष्ठतेइत्यादौदर्शनात्।आतमि
तोरिति।तमुग्लानौ।सःपितदोः।सृगतौ।उतृदिर्‌हिंसानादरयोः।विसृपइति।गमनादित्यर्थः।यत्तुव्याचख्युर्विसर्पितुमा तर्दितुमित्यर्थइति।तन्न।सृपेरनिट्त्वा
त्।भावलक्षणइत्यनुवृत्तेश्च।अतएवय ऋतेचिदभिश्रिषःपुराजत्रुभ्यआतृदः।सन्धातासन्धिंमघवापुरूवसुरिष्कर्त्ताविह्रुतंपुनः।अयंमन्त्रोवेदभाष्येइत्थंव्याख्या
तः।इयद्द अभिश्रिषः अभिश्लेषणात्सन्धानद्रव्यात्।ऋतेचिद्विनापिजत्रुभ्यः ग्रीवाभ्यः अतृदः आतर्दनात्रुधिरनिःसारणात्पुरापूर्वमेवसन्धिंसन्धातव्यंसन्धाता
संयोजयिताविह्रुतंविच्छिन्नंपुनरिष्कर्त्तानिष्कर्त्तासंस्कर्त्तेति।तस्माद्यथोक्तमेवम्।नोरमम्।इतितृतीयम्।उङ्प्रत्ययान्तमिति।तेनक्विबन्तान्ङीपास्वयम्भूःलित्स्वरइति।
आद्युगाकारस्योदात्तत्वमित्यर्थः।यत्तुन्यासकृतोक्तंमुद्गलानीशब्देद्वितीयउदात्तइति।तद्देववाह्यमप्रयुक्तमेव।लितीतिप्रत्ययात्पूर्वस्यैवविधौयञ्चानंसंनिहितंमानुक्तं
विहायद्वितीयेप्रवर्त्ततइत्यत्रवीजाभावात्।सकलवैदिकपाठविरोधाच्चेत्यास्तान्तावत्।अविष्यइति।आविर्भूतइत्यर्थः।द्यावचक्षम्।मयेद्वेतयोर्भीषाममित्युक्तेर्वेदेअ
माक्षाविधीयते।नोलत्।द्यचइतिप्राप्तःप्रतिषिद्ध्यते।भीक्ष्ममिति।औत्सर्गिकोणवृधभ्यमेति।रुधिवृपिभ्योरनाद्यक्रम।सागशब्दात्सन्नन्तात्ठःस्यात्साध्वर्थे।पायक्षीति।पा
योन्तरिक्षमितिवृत्तिकाराः।पातिभूतान्यवकाशदानेनेतिव्युत्पत्तेः।यद्यपिपातेर्बलेजुट्च।उदकेनुट्च।अत्रैवेति।गत्नोदकयोःपाथःशब्दोव्युत्पादितस्तथापिबाहुलका
दन्तरिक्षेपीतिभावः।वेशन्तीभ्यइति।वेशन्तःपल्वलम्।विशेर्झच्।अग्राह्युत्।भवेच्छन्दसीत्येवसिद्धेघञादिभिर्बाधामाभूदितियद्विधीयते।अग्नियइति।द्यचूपनोरु
दाहरणम्।अन्तोदात्तमाद्युदात्तञ्चरक्षोयातुनाम्।षष्ठीबहुवचनान्ताभ्यांरक्षस्शब्दयातुशब्दाभ्यांहननकरणीभूताइत्यर्थेयत्स्यात्।रक्षस्येति।रक्षसांहननी॥ ७ इतितृतीयः।

समः
२९६

एवंयातश्चेति।यातूनांहन्तेत्यर्थः।कृद्योगेकर्मणिषष्ठी।यातुरक्षसीपर्यायौ।बहुवचनान्ताद्विधानंस्तुत्यर्थंबहूनान्तेषांहननेहिस्तुतिर्भवति।हविष्येति।अत्रउगवादिभ्यो
यत्।मत्वन्तप्रकृतिकादिति।तद्वानित्युक्केरिदंलक्ष्यम्।सवितुरित्यादिकइति।यद्यपितत्रमन्त्रेपदान्तराणिसन्तितथापितत्प्रकृतिकमत्वन्तात्प्रत्ययोनप्रयोगानुसरणार्थं
तिशब्दात्।उपचारादिति।छन्दसोयमुपचारः।अश्विन्शब्दवन्तस्तथापिसामान्यापेक्षयैकवचनम्।उदाहरणेदृनण्यनपत्यइतिप्रकृतिभावः।अथवेति।इदङ्किन्त्यम्।उ
एवंयातव्याद्दविष्माइते। हविर्भिहिताहविष्यातस्याःप्रशंसनमित्यर्थः।यस्येतिलोपेकृतेहलोयमामितिपक्षेयलोपः।मायायामण्।पूर्वसूत्रापवादः।तद्वानास।
म्।मत्वन्तप्रकृतिकात्प्रथमान्तादुपधानकरणीभूतमन्त्रार्थकात्इष्टकारूपेसंबन्धिनियत्स्यात्मतोश्चलुक्।वर्चस्वानिति।वर्चशब्दोस्यास्मिन्सःवर्चस्वान्स
वदेवसत्वात्सवितुरित्यादिकः।उपधीयन्तेऽनेनेत्युपधानः। अथकर्मसप्तीरुपदधातिप्राणभृतउपदधातीति।सप्तम्याःप्राणभृत्यादृतिहिप्राप्नोति।सत्यम्।सप्तम्यादिश
ब्दानान्तद्धन्मन्त्रोपधेयास्विष्टकासूपचारात्प्रयोगः।ननुतद्धितमेतदित्यतआह।पूर्वोत्तरमीमांसयोस्तुतद्धितपरतयाप्रतीयमानाग्रन्थाःभक्त्याव्याख्येयाः।
अश्विमानण्।अश्विमच्छब्दादुक्तेऽर्थेऽण्स्यात्यतोपवादः।मतोर्लुक्।अश्विनीरिति।अश्विन्शब्दवान्मन्त्रउपधानोयासान्ताइत्यर्थः।मूर्द्धन्वतीरिति।अतोनुडि
तिनुडागमः।अत्रेदमवधेयम्।सूत्रेवयस्याश्चित्यनुपपन्नन्तद्धानासामितियत्प्रत्ययस्यछन्दस्येवविहितत्वात्।एवञ्चच्छन्दोवत्सूत्राणीतिभाष्यकारेष्टेरि
दमेवज्ञापकम्।अथवासामान्यापेक्षंज्ञापकंछान्दसाअपिकविद्भाषायांभवन्तीति।तेनसुपस्थितपरिपन्थिभिःपार्थिवैरित्यादिसिद्धम्।यथासंख्यमिति।वृत्ति
कारस्तुयत्वाचेतिसूत्रंव्यभजत।पूर्वैःकृतम्।मत्वर्थइतिनिवृत्तम्।चात्वइतिवृत्तिकारः।यत्तुनानुवर्त्तते।एतदपिपूर्वत्रयोगविभागस्यफलमितितेषांमत
म्।यत्वावितिभाष्यपाठेतुयदप्यनुवर्त्तताम्।तथाचपूर्वीणाइत्यपिरूपंबोद्ध्यम्।पूर्व्याइत्याद्युदात्तत्वञ्च।सहस्रेण।समितइतिपाठान्तरे।मतोश्चात्पःसहस्रा
भ्यांविनीनीइत्यस्यापवादः।सोममर्हतियः।कथन्तर्हिप्रीतास्मितेसोम्येतिरघुःछन्दोऽधिकारात्॥ केष्ट्यासिद्धेर्ज्ञापकत्वासंभवात्।वृत्तिकारस्त्विति।अत्रारुचिबीज
नुयथासंख्यसूत्रस्यभाष्यविरोधः।पूर्व्वाइतीति।यदिवेदेलित्वरविशिष्टःप्रयोगोनालीत्युच्यतेतदेकदेशानुवृत्तिर्बोद्ध्या।पाठान्तरमिति।गारुडरोपितुल्यइत्यर्थःसमानः।

कृष्णाईति।अनडुहोविभाषादिमथः॥

[illegible]गदूर्मेति। मीनः क दूरूचन्द्र[illegible]। स्वार्थे ष्यञिति। चातुर्वर्ण्यादित्वादिति भावः। यथायोग्यमिति। आगते पञ्चमी प्रकृते प्रथमा मद्ध्ये। षष्ठीति बोध्यम्। इति चतुर्थः। सादृश्य

३८७ मिति। सदृङ्न महतीत्यर्थः। प्रयोजनं यस्येति। धातोरित्येव शब्दे कार्यस्यासंभवादर्थग्रहणे सिद्धे अर्थपदं बहुव्रीह्यर्थमिति भावः। उपसर्गा हि क्रियायास्तद्विशेषकाः यथा आ

उच्यते। सोम इव सोम्यः। शाखादित्वाद्यः। तत्र साधुरिति। यद्वा। सोम्येत्यादिर्द्विपाठे तु स्वार्थे ष्यञ् मयेच। आगतविकारावयवप्रकृता मयडर्थाः। यथायोगं

पञ्चमीषष्ठीप्रथमाः समर्थविभक्तयः। शिवशम्। भाषायान्तु शन्तातिप्रभृतीनां प्रयोगश्चिन्त्य इत्याहुः। इति चतुर्थः। त्वावत इति। त्वमिव त्वावान्। तस्य प्रत्य

योत्तरपदयोश्चेति त्वादेशः। आ सर्वनाम्न इत्यात्वम्। एतेन मावत इति व्याख्यातम्। सादृश्यमिति। अन्येषामपीति दीर्घः। छन्दसि घस्। सकारः सितिचेति पदत्वार्थः।

तेन भत्वाभावादोर्गुणो न। न चैवं पक्षे इकोऽसवर्णे इति शाकल्यापत्तिः। छन्दसि दृष्टस्यैवानुविधेयत्वात्। वार्त्तिककृता समित्यसमासयोर्नेति तन्निषेधाच्च। उ

पसर्गा। इह धातुशब्देन धातुवाच्या क्रिया लक्ष्यते सार्थः प्रयोजनं यस्य साधनस्य तस्मिन्नित्यर्थः। तदाह। धात्वर्थविशिष्ट इति। छन्दसिया। पर्यवस्थातृश

ब्दात्। स्वार्थे इति प्रत्ययः। अवस्थातृशब्दस्य पन्थपर इत्यादेशो च निपात्यते। अष्ट्रावीति। अशेष्ट्रन्। अष्ट्रा दंष्ट्रा। करिष्ट इति। तुरिष्टेमेयःस्विति लोपः।

इति पञ्चमः। स्पर्द्धे लङीति। स्पर्द्ध संघर्षे। द्विर्वचनं अकारलोपः रेफस्य संप्रसारणञ्च निपात्यते। अस्पर्द्धेथामिति भाषायाम्। प्रकृत्यान्तः। अयं पाठः

पाष्ठभाष्यानुगुणः। शाकलसूत्रे ह्रस्वश्चेति चकारेण प्रकृत्येत्यनुकृष्यत इति भाष्यदर्शनात्। इको गुणवृद्धी इति सूत्रे तु नान्तः पादमिति पाठः पुरस्कृ

तः। अयमपि पाष्ठभाष्ये स्पष्टः। अस्मिंश्च पक्षे राङः पदान्तादतीति पूर्वरूपं निषिध्यते। तस्मिंश्च निषिद्धे एचोयवायाव इत्यपि न भवति ॥

गच्छतीत्यादौ तदसत्त्वे तु क्रियाविशिष्टसाधनबोधका यथा निक्षोशां विरित्यादौ तत्र यत्र क्रियापदाश्रवणं तत्रैव यथा स्यादित्यर्थं धात्वर्थ इतीति तात्पर्यम्। अष्ट्रेति। रामः

दंष्ट्रापर्यायो यञ्छन्दोविषयः। इति पञ्चमः। संप्रसारणञ्चेति। एवञ्चापस्पर्द्धेथामित्येकं पदन्तिङ्ङतिङ इति निपातस्य यद्वृत्तान्नित्यमिति प्रतिषेधे आद्युदात्तम् ॥ ३८७

क्वचिन्नेतीति। अष्टावसरत्वादिति भावः। प्रकृतसूत्रभाष्ये तु पदान्तादेङोतीत्यनुवर्त्य पदान्तस्यैङोति यत्प्राप्नोति तस्य सर्वस्यायं निषेध इति व्याख्यातं अष्टावसरत्वाय स्तुनास्येव तौ सदित्यादिनिर्देशादिति तदाशयः। पूर्वपद्यान्ते इति। पद्यमिति पदस्य संज्ञा। आकारादेश इति। नचैवं छन्दोग्रहणं व्यर्थमाकारादेशस्य छन्दस्येव सत्वादिति वाच्यम्। सहबाधके निषिद्धे बाह्यमपि क्वचिन्नेति स्वीकारात्। पादश्चेह न श्लोकस्य। वा छन्दसीत्यतो मण्डूकप्लुत्या छन्दसीत्यस्यानुवृत्तेः। तदाह। ऋक्पादे इति। एङः पदान्तादतीति सूत्रादेङ् इति पञ्चम्यन्तमनुवृत्तं प्रथमया विपरिणम्यत इत्याह। एङ् प्रकृत्येति। अन्तःपादं किमिति। अञ्चीत्येव किं नोक्तमिति प्रश्नः। एतेऽर्चन्तीत्यत्र पूर्वपदस्यान्ते एङ् अकारस्तु परपादस्यादौ। अंतोनमित्तनिमि। तेनोः पादमध्यस्थत्वं नास्ति। अम्नात्। अवरक्षणो आधीलिङ्। अवद्यादिति पञ्चम्यन्तम्। अवक्रमुरिति। अवपूर्वस्य क्रमेर्लिघुसि छन्दसि चेति द्वित्वाभावः। कश्चित्तु अवचक्रमुरिति पठ्यते तदयुक्तम्। लक्ष्यविरोधात्। अव्रतेति। वृङ्वृञो मन्त्रे घसेति च्लेर्लुकि ह्रस्य अदादेशे यण्। अवस्यव इति। अवेरसुन्। ततः क्यच्। क्याच्छन्दसीत्युः। स्यश्छन्दसि। त्वदः प्रथमान्तस्यानुकरणम्। हसीत्। कथं तर्हि महिक्षित्रं पुरुश्चन्द्रं विविद्वान्। पृथुश्चन्द्रमवसे चर्षणिप्राः। अधिश्चन्द्रं बृहत्युरिति। नह्यत्रोत्तरपदमस्ति। उदात्तद्वयदर्शनात्। पदकारैर्विभज्यैव पाठाच्चासत्यम्। बाहुलकात्समाधेयम्। प्रातिशाख्ये तु विशिष्य विहितम्। पुरुः ष्वधि पूर्वेषु शकारोतिउपजायते। ह्रस्वे च पूर्वपद्यान्ते चन्द्रशब्दे पर्न्ति. रा इति। अन्तरेति। मध्ये इत्यर्थः। तथा चाभक्तः शकार इति भावः। पाणिनीये तु टित्वाल्लिङ्गादागम एव। स च चन्द्रशब्दस्य उभयनिर्देशो बलीयानिति सिद्धान्तात्। पितरा। पूर्वपदस्य अराङादेशो निपात्यते उत्तरपदे तु सुपां सुलुगित्यादिना विभक्तेराकारादेशः। ऋतो ङिसर्वनामस्थानयोरिति गुणः। सधमा। सधे स विभक्तिको निर्देशः। सह माद्यन्ति देवा अस्मिन्निति सधमादो यज्ञः। मदोऽनुपसर्गे इत्यपि प्राप्ते अजब्भ्यां स्त्रीखलना इति तद्बाधके ल्युटि हलश्चेति घञ्। सूत्रे मादेत्यकार उच्चारणार्थः। तेन माद्यतेः क्विबन्तस्य मादिति यद्रूपं तन्नाभिभवति। आ त्वा वहन्तु हरयो युञ्जाना अर्वागिन्द्र सधमादो वहन्तु। साढ्यै। तृनि तृतीयमिति। भूरि चक्रे निमन्त्रे हिंसाहेत्याद्युदात्तं पठ्यते। तद्भाष्ये च शत्रूणामभिभवितेति व्याख्यातम्। तविलन्तोदात्तत्वसात्। क्तप्रत्ययान्तात्पितु स्वरे दोषोऽर्थासङ्गतिश्च स्यात्। तस्मात्तृन्नन्ततैव युक्तेति भावः। सूत्रे इतिशब्दः प्रकारार्थे तेन निष्ठायामपि निपातनं बोध्यम्॥ ७ र्थसत्वात्। अन्यथोत्तरखण्डे आकारोऽपि निपात्यत इति समाधेता। साढ्वेति। साढेत्यर्थकम्॥

म·श·
३९८

माचेदंसूत्रमितिनिपातातिरिक्तेगन्तविषयन्तुलक्ष्यंनवेदेद्इतिभावः।अतएव।मन्त्रइत्यस्यानुवर्त्तनादेव।इहेति।अमाङ्योगेपीत्यर्थः।उपधालोपइति।सलोपधत्वेइत्यपिबोध्यम्।इतिपक्षे।
अषाढ्हो।अग्नेवृषभः।अषाढ्हमुग्रंसहमानम्।अषाल्हयुत्सुपृतनासु।अषाल्हायसहमानायेत्यादि।यत्तुहरदत्तेनसूत्रेसादेतिह्रस्वान्तमेवेतिनिर्णीयदीर्घान्तमपिलक्ष्यमस्ति
स्तितदाअन्यतरस्यांछन्दसिबहुलमितिशब्देनसङ्ग्राह्यमितिवर्णितम्।तत्रयदीतिसन्दिग्धोक्तिरुक्तलक्ष्यादर्शनप्रयुक्ता।यद्यपिवृत्तिकृतात्रचिरूपमित्युक्तन्तत्त्वरव्यस्य
सिप्रायेणकथञ्चिन्नेयम्।प्रमादएवेतितुहरदत्तः।उदात्तप्रयोगनिर्वाहार्थंबह्वृचप्रातिशाख्यस्यप्रमेयमाह।अचोरिति।अस्यआचार्यस्यऊष्मणासंप्रयुक्तःसह्रकारत्नामि
तीत्यन्वयः।स्थानिवदादेशोपिसोष्मेतिभावः।ओषधेश्चानचक्रादिकारादितिङीषागतार्थता।अन्तोदात्ततापत्तेः।इष्यतेत्वाद्युदात्तः।लघावन्तेद्वयोश्चेतिफिट्सूत्रात्।अचितु
घइतिस्वरूपग्रहणंनतरप्तमपोः।छन्दसिघशब्दस्यैवदीर्घदर्शनात्।उतवेति।आर्याया।आतास्यालःततःपञ्चमी।शृणोतेति।तप्तनप्तनथनाश्चेतितबादेशः।पित्वान्नङित्व
म्।ऊरुण्या।णइति।ऊर्णोतेःकण्ड्वादियगन्तोरसणार्थकः।सेर्हिः।अतोहेरितिलुक्।इकः।सुञीतिनिपातस्यग्रहणम्।तस्यचञकारइहैवविशेषणार्थः।नचनिपातस्येति
तिसूत्रेणगतार्थतातत्रातइत्यनुवृत्तेरितिभावः।वस्तुतस्तुमास्त्वनुवृत्तिः।माचेदंसूत्रम्।नचातिप्रसङ्गः।अतइत्यनुवृत्तादपि।अधतेविश्वम्।अधद्रुमितम्।तमित्येवसम
त्तादावतिप्रसङ्गाद्धाहलकेनसमाधानस्यचेहापिसुलभत्वादितिदिक्।चकेतिन्तदुत्तमपुरुषबहुवचनम्।शमिता।इहमन्त्रइत्यनुवर्त्ततइतिकाशिका।अतएवशमयि
तेत्यर्थइतिविवरणंसङ्गच्छते।जनिष्टाइति।इहअडागमोन।माङ्योगेप्यडागममुदाहरन्ति।मावइति।वःयुष्माकंक्षेत्रेभार्यायापरेषांवीर्याणिउप्तानिमाभूवन्नित्यर्थः।ल
पेःकर्मणिलुङ्।च्लेर्लोपेनपरस्मैपदम्।एतच्चकाशिकानुरोधेनोदाहृतम्।अध्ययनन्तुवाप्सुरित्येवदृश्यते।माङ्याटस्तुउदाहरणान्तरमन्वेषणीयम्।निनिषत्योः।छन्दसिकि
म्।विवेनिरे।येतिम।धत्तिभसोः।हलादावजादौचक्ङितिअनयोरुपधालोपइष्टः।अतअचीत्याक्रष्टुंवृत्तिकारेणसूत्रेचकारःप्रक्षिप्तोनत्वसावार्षः।तथाचवार्त्तिकस्यहलग्रह
णमनर्थकमन्यत्रापिदर्शनादिति।सग्धिरिति।अदेःक्तिन्।बहुलंछन्दसीतिघस्लादेशः।उपधालोपेकृतेझलोझलीतिसलोपः।धत्वजश्त्वम्।समानस्यसभावः।बब्धामिति।
भसेर्लोट्।तामाम्।पकारंनित्यमप्युपधालोपंबाधित्वाबाहुलकात्प्रथमद्वित्वन्ततउपधालोपइत्यादि।अजादौ।अग्निर्वनानिबप्सति।अभ्यासदीर्घश्चेति।तुजादित्वादितिभावः।भ

शब्दस्येतिवास्यासिद्धत्वाद्यस्येतिलोपेन ॥

राम:
३९८

ऋदृशोऽङीति। इरित्वादङ्। नयुष्मेइति। नयुष्मेवाजबन्धवोनिनित्सुश्चनमर्त्यः ॥ अवद्यमधिदीधरदितिमन्त्रः॥ मू० ॥ अकृत्सार्वेतिदीर्घस्तुअङ्गवृत्तपरिभाषयानेतिभा
वः। यद्वामकारमात्रस्यलोपः। ततोयस्येतिलोपेकृतेप्रत्यः.कारस्यश्रवणम्। इतिषष्ठः। अदृश्रमिति। बाहुलकादेवाऋदृशोऽङीतिगुणोनेत्येके। भाष्येतुगुणंवारयितुंदृशेरर
वक्तव्यइत्युक्तम्। व्यत्ययेनप्रथमपुरुषबहुवचनस्य। नेउत्तमपुरुषैकवचनंबाहुल्ये। शाखान्तरेतुअदृश्रन्नित्येवपठ्यतइतिमाधवः। स्कापिन्दसि। अपिशब्दाल्लग्वापिसच
समासेयद्यपिपूर्वेणैवसिद्धः तथाप्यसमासेतेनप्राप्यतेऽएतदर्थमेवह्यपिशब्दः अन्यथावाछन्दसीत्येवब्रूयात्। तथाचच्छन्दोनुविदधानाः कत्पसः अकारः प्रयुक्तेभाउं
नाशिषीअजेति। याज्ञवल्क्यश्चाह। एवंविनामर्कंपूज्येति। सुपांसु। पन्थाइति। व्यत्ययोबहुलमित्येवसिद्धमिदम्। उक्तंहितत्रसुप्तिङुपग्रहेत्यादि। स्यैवत्वयंप्रपञ्चः। पूर्वसव
र्णइति। ईकारः। प्रमाणतआन्तरतम्यात्। ततःसवर्णदीर्घः। अर्चामसिवीरब्रह्मवाहोयादेवविद्मतात्त्वामहान्तमितिबह्वृचाः। अत्रयात्तादिति। अमआतान्नविभक्तौतुस्माः। सुषास्वा
स्वस्मिन्निति। प्राप्तइति। यत्तुकाशिकायामुक्तंयूयंवयमितिप्राप्तइति। सोऽयंमहान्प्रमादः। तथाहि। नयुष्मेइति। ऋग्भ्योनक्षाश्वमेध भ्नोराज्ञोदानंस्तूयते। सुस्त्राआतिथिग्वेस्वभी
शहूरोर्षिआम्रमेषेसुपेशसः इत्युपक्रमात्। वाजमित्यन्ननाम॥ अन्नदानेनयेसर्वेषांबन्धवः तेषांसंबोधनंहेवाजबन्धवः। युष्मेयुष्मासु। अधिइतिसप्तम्यार्थानुवादोवि
भक्त्यर्थः। अव्ययीभावस्तुयद्यपिनित्यसमासस्तथापिबाहुलकादिहन। तिनिनित्सुश्चन। निन्दनेच्छाशीलोपि। निन्दतेर्नलोपः सन्इडभावश्चबाहुलकात्। मर्त्यः। अवद्यंगर्हा
रथति। भवदनुसन्धानमात्रेणैवनिष्पाद्यत्वादितिभावः। निनित्सुरपीत्युक्त्याकिमुतनिन्दन्नितिगम्यते। सहियुष्मश्लोकामागृह्णन्नसुतरांशुद्धइतिभावः। द्वितीयमन्त्रेपि
देवताप्रार्थ्यतेहेइन्द्राबृहस्पती अस्मभ्यंरयिंन्यस्तमितिदधातिर्दानार्थः। नचास्मिन्मन्त्रद्वयेयूयंवयमितिस्यस्यकश्चिदुक्तिसंभवोऽस्ति। किंचजसःशेइतिपक्षेयूयंवयोजसीत्येकेनवारणी
यम्। बाहुलकादितिचेन्न। सोऽयमस्थानेसंरम्भः। एतेनकाशिकानुगामिनःप्राचोपिग्रन्थःप्रत्युक्तः। तामनुक्ष्णेति। ताःवङ्क्रीः षट्त्रिंशतिरस्यवङ्क्रयइतिहिप्रक्रम्यइदमपिगृध्रेषेपरि[illegible]न
नुपूर्वान्निश्चितेः आतश्चोपसर्गेइति ङबाधितस्यागाप्यपचोभावइतिक्तिनाभाव्यमितिचेत्। सत्यम्। पूर्वपरेनिरस्तत्वेन्यवस्थाश्रमितिनिर्देशाद्ङपि भविष्यति। सामान्यपेक्षाप
क्षाश्रयणात्। तदेतत्ध्वनयति। व्यवस्थावदिति। बाहुनेप्रिप्राप्तेइति। यत्तुकाशिकायांप्रवाहुनेतिप्राप्तइत्युक्तंप्राचाचानुसृतंतत्तल्लंसमासश्रेममेवहेतायमा। प्रैतिहिनसमस्तपृथक्स्वरदर्शना
त्पदकारैर्विच्छिद्यपठ्यमानत्वाच्च। अतएवाख्यातानामपीतिद्विपमा। एतेनप्रवाहुशब्दान्तर्गतेपिमानत्वाणाभ्यासकारः प्रत्युक्तः। अव्ययेति। अमाचोऽकारःसुपिपरेतिर्दीर्घनिरस्यते॥

उभ्रसप इति। कचेरिति घोषः। वस्याकारोतो लोप इति बोध्यम्। इतरेतरयोगद्वन्द्व इति। समाहारद्वन्द्वे त्वेकशेषे तु ह्रस्वान्तत्वादेव नुट् सिद्ध्या ग्रामणीग्रहणमपि व्यर्थम्। छन्दसीति तु गोः
मिवार्द्ध्यासेति। नतु द्वितीये कवचनस्य। छन्दसि दृष्टानुविधानादिति भावः। ग्रामादिकीति। लक्ष्येवकारपाठस्य निर्विवादत्वादेव भाष्येपि ग्रहकृतसूत्रस्य मलोपमात्रपरतोक्तेरि
तिभावः। कृणुतादिति। धिन्विकृण्व्योरत्वमुप्रत्ययः। सुनोत तनेति। पित्त्वे सति ङित्त्वाभावाद्गुणः। दधातनेति। ङित्त्वाभावाच्छ्नाभ्यस्तयोरात इत्यालोपो न। जुषध्वमिति। काशिकायां प्राचो
ग्रन्थे च जुषतेति ग्रामादिकमिति भावः। आज्जसेः। जसेरिति पूर्वो वार्थानुरोधेन निर्देशः। श्रीग्रामण्योः। श्रीणामिति। वामीति नदीत्वविकल्पात् रूपद्वयं प्राप्तमिति प्राञ्चः। न
चिन्त्यम्। छन्दसि दृष्टस्य नुटः सिद्धेः। अभावस्यापादयितुमशक्यत्वात्। तस्माद्व्यर्थमेवेति तत्त्वम्। सूताश्च ग्रामण्यश्चेति इतरेतरयोगद्वन्द्वः। कौ इङ्ङिति। क्विन्प्रत्ययस्य कुरि
ति नकारस्य ङकारः। स्ववानिति। अवतेरसुन् सुष्ठु अवो यस्येति विग्रहः। तुधातुः सौत्रो वृद्ध्यर्थः। ततोऽसुन्। सुष्ठु तवो वृद्धिर्यस्येति विग्रहः। तनूरिरिति। तरतेः कित्तु उत्वम्। —
तस्य द्विर्वचने चीति स्थानिवद्भावात् तृ इत्यस्य द्वित्वम्। उरदत्वम्। ह्रु ह्वरेः। आगन्तुना इकारेण गुणेन च निर्देश इत्याहुः। अतएव ज्ञापकात् धातुनिर्देशे क्विदिकार इत्यपि सुवच
म्। तोमे। इ ह्रुणाविति। ह्रु इत्यादेशस्याभावोपि बोध्यः। अष्टादशेति। त्वमितेः पाठपक्षे तु एकोनविंशतिः। चत्तो इति। चतशब्दादपि उञा सह आद्गुणः। निपातेन सह एकी
कृत्य च्छेदस्तु पदकाराणां संप्रदायसिद्धः। भूयामो इति मन्त्रे भूयामो इति यथा। अम्बस्या विशस्तेति। अन्येषामपीति दीर्घः। बभूया। रुजः क्त्वादिसूत्रेण इडभावे सिद्धे नियम
एवेति नियमार्थं निपातनम्। तदेतदाह। भाषायां तु ववर्थेति। सर्वमा इति। अस्तेर्लङ् तिप्। ईडभावे अपृक्तत्वाद्धल्ङ्यादिलोपः। रुत्वविसर्गौ। संहितायां तु भो
भगोरिति यत्वम्। लोपः शाकल्यस्येति यलोपः। नच्छन्दसि। इह यदि आनन्तर्यादीत्वमात्रं प्रतिषिद्धेत तर्हि अकृत्सार्वेति दीर्घः स्यात्। अपवादाभावे पुनरुत्सर्गस्थितेः।
अत आह। ईत्वदीर्घेनेति। क्यचि यदुक्तं तन्नेति व्याख्यानादिति भावः। अत्र च ज्ञापकमनुपदमेव वक्ष्यति। दुष्टीयतीति। प्रकृतिमात्रे तात्पर्यम्। उप्रत्ययसमानार्थेन तु ना
दुष्टीयितेत्यादि वा बोध्यम्। देवसुम्नयोः ॥ ७ पादान्त इति सूत्रे क्त क्यादस्यैव ग्रहणार्थमावश्यकमिति बोध्यम्। क्विन्प्रत्ययस्येति। त्यदादिषु दृश इति क्विन्। भू
यामो इति यथेति। तत्रापि भूयामेत्यस्योत्र आद्गुणः। हल्ङ्यादिलोप इति। शपस्तु लुक् ॥

टी०। शाखान्तर इति पाठः शाखान्तरमात्र इत्यपपाठः। इति सप्तमः ॥ मू०॥ ननु देवाञ्जिगातीति प्रत्युदाहरणमङ्गद्वयं विकलं यजुषि काठक इत्यंशद्वयस्यापि तत्राभावादित्याशङ्क्याह। बह्वृचानामस्तीति। तत्रेदं दृष्टमिति भावः। काठक इति किम्। यजुर्वेदेपि शाखान्तरमात्रे माभूत्। अत्र सुम्नयुरिदमस्ति। कव्यध्वर। काविअध्वरपृतना एषामन्त्यस्य लोपः स्यात् क्यचि परे ऋचि विषये। सुगन्ध्वादिगणेप्यध्वर्युशब्दः पठ्यते तेन ह्युसत्यन्तरं बोध्यम्। वसुधितमिति। वसूनामातारं प्रदातारमित्यर्थ इति वेदभाष्यम्। समुषद्भिरिति। वसन्तीत्युषसः। सहवासिनः। तैः संभूयेत्यर्थः। वेदभाष्ये तु उषद्भिर्ज्वलद्भी रश्मिभिः। उष दाहे। लटः शत्रादेशे शपि प्राप्ते व्यत्ययेन श्लुक्तम्। तदुपायान्तरं बोध्यम्। नकवतेरिति। अनुवृत्त्यर्थ उपन्यासः। कृषेश्छन्दसि। लोके तु वरीकृष्यते कर्षीवलः। आद्यास्त्रय इति। यङः शपः श्लुः अभ्यासस्य दीर्घः परस्मैपदञ्च निपात्यते। तस्यैव यङ्लुकि रुगभावमात्रमिति वा। तत्र पक्षे माभूदित्येतदर्थं दर्दर्तीति रुक् निपातितः। दर्दर्षीत्यत्र तु यङ्लुक्पक्षे न किंचिन्निपात्यम्। किंतु श्लावेवाधारयतेस्तु णिलुक् श्लुः आद्ये अभ्यासदीर्घः। इतरत्र रुगागमश्च निपात्यते। इति सप्तमः। प्रसमुपोदः। पादपूरणे किम्। प्रदेवं देव्या धिया। छन्दसीरः। कथन्तर्हि शृणुतनो अध्वरस्ते ष्टिमन्तमा यो अद्रिमां उदनिमादयन्तीति। छन्दसि सर्वे विधयो विकल्प्यन्त इत्यदोषः। अक्षण्वन्त इति। अक्षिशब्दान्मतुप्। छन्दस्यपि दृश्यत इत्यनङ्। नुटोऽसिद्धत्वात् पूर्वं न लोपः। भूतपूर्वगत्या नुट् न तु तस्यैव वत्वप्रसङ्गः। वत्वं प्रत्यसिद्धत्वात्। यदि पूर्वान्तो नुक् क्रियेत णत्वं न स्यात्। तस्मान्नुडेवोचितः। नन्वेवं अवग्रहे दोषः स्यात्। अक्षणिति णान्तं ह्यवगृह्णन्ति। अतः सकारान्तं अवगृहीतुमुचितमिति चेत्सत्यम्। न लक्षणेन पदकाराः अनुवर्त्याः। पदकारैर्नाम लक्षणमनुवर्तनीयम्। तस्माद्यथालक्षणं पदं कर्तव्यमिति महाभाष्ये स्थितम्। किंच देवयन्तः ईयिवांसमित्यादौ पदत्वं विनापि बहुलमवग्रहः क्रियते पूर्वेभिरग्निं नेत्यादौ सत्यपि पदत्वे न क्रियत इति प्रागेवोक्तम्। भूरिदावत्तर इति। आतो मनिन्निति वनिप्। अत्राप्यवग्रहः प्राग्वत्। रथीतर इति। रथशब्दान्मत्वर्थ इनिः तदन्तात्तरप्। नकारलोपे कृते ईकारः। यदि तु नलोपापवादेन नकारस्य स्थाने ईद्विधीयेत तदा तस्यासिद्धत्वात् सवर्णदीर्घो न लभ्येत। एतेन नकारस्य ईकारादेशे सति सवर्णदीर्घत्वमिति न्यासग्रन्थः प्रत्युक्तः। रथीतममिति। इह तु पदकाराः ह्रस्वान्तमवगृह्णन्ति। अन्येषामपीति संहितायां दीर्घ इति तदाशयः ॥

म.श. टी०। समर्थनीयत्वादिति। त्वयापीति शेषः। उक्तमिति। निपातनादिति शेषः। अम्नारस्तमिति इति। इतिप्रयोगादिति शेषः। कथं सङ्गच्छन्त इति। एवञ्च ते चिन्त्या इति भावः। चिन्त्यसि
४०० ति। चिन्ताबीजन्तु ह्रस्वस्य ब्रीहिकालयोरित्यत्र सामान्यग्रहणार्थङ्कित्त्वमिति। प्राचीनग्रन्थैरिति। दीर्घोकित इति सूत्रस्थभाष्यादिग्रन्थैरित्यर्थः। व्यवस्थिततयेति छन्दसि। सर्वविधीनां विकल्पि
उर्णोर्नोः पूर्वस्येति। यद्यपि नुद विदोन्दत्रेति सूत्रेणेनत्वं इदं न च छन्दसि पाक्षिकमपि नत्वं माभूदिति निपातनाश्रयणम्। सर्वविकल्पानां छन्दसि व्यवस्थिततया विपरीतापादनस्यासम्भ
वात्। अनुत्तमस्मै क्षत्रं विश्वायु विश्वा इन्द्रायातनविषारित्यादिमन्त्रेषु नत्वाभावस्यैव दृश्यमानत्वात्। यदि तु क्वचित्तत्त्वमपि दृश्येत तर्हि तस्य बाहुलकादिनापि समर्थनीयत्वात्। तथापि भाषाया
नुन्नमिति नत्वस्य नित्यत्वं निपातनस्य फलमित्याहुः। अनुत्तमिति यत्तु छन्दस्येवेति व्याख्यानादिति भावः। त्वरतेरिति। ज्वरत्वरेत्यूठ्। तुर्वी त्यस्येति। राल्लोपः। स्वइत्यस्येति। उवर्णपरत्वान्तूर्णमपरइले
नसिद्धस्य कार्यकालपक्षाश्रयणेन परिभाषाणामसिद्धप्रकरणेपि प्रवृत्तेः। उभयथेति। यावष्टे रूर्वेति निष्ठे रूत्वे प्राप्ते पक्षे रेफार्थमिदम्। अम्नः शब्द ईषदर्थे। अम्नरस्तमितः। उवश्च महाव्याहृतिश्च
णां लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वज्ञापनार्थं तेन क्नोपयतीत्यादौ पुक् सिद्ध इति। मतुवा अनुबन्धपरित्यागेन सकारान्तस्यैव सु इत्यस्य मतुना सह द्वन्द्वः। अल्पाच्तरस्यापि सोत्रः परनिपातः।
मद्वद्दनि। यज्ञ इति वलन्तस्यैत्वर्थ इति भत्वं हारिवो मेदिनमिति संयोगान्तलोपो रुत्वे सिद्धो वक्तव्य इति वचनाड्डिपि चेत्तु त्वम्। प्रसङ्गादाह दाम्नानिति। अनुबन्धस्येति। अत एव वनो र चेति सू
रपि सामान्यग्रहणस्य कार्यं माद इत्यस्तु चिन्त्यम्। उक्तरीत्या ह्रस्वस्य ब्रीहिकालयोरिति सूत्रे सामान्यग्रहणस्य निर्बाधत्वे जहातेः ककारः सामान्यग्रहणनिर्वाहार्थ इति प्राचाङ्ग्रन्थाः। कथं सङ्गच्छन्त इति।
किं नकारस्य फलमपि चिन्त्यम्। अस्यार्थस्य ङ्लुकि दीर्घोकित इति दीर्घस्याप्रवृत्तिः कित्त्वसामर्थ्यादिलुप्तेक्षासम्भवति तथापि प्राचीनग्रन्थैः सह लक्ष्ये विसंवादो दुर्वार इति दिक्। देवो अच्छे
ति। अनुपदं व्याख्यास्यमानेनातो दीर्घ इति सूत्रेण आनुनासिकः। तस्य व्याख्यानपक्षे तु अत्रानुनासिक इति सूत्रेणेति विवेकः। नेहेति। एतेन महान् हि स इति बह्वृचानां पाठो व्याख्यातः। आकरे तु महां हि स इति
हतेनः व्याख्यानान्तरे अन्वेषणीयम्। एवञ्चाति विकल्पस्यैव व्यवस्थिततया प्रकृतसूत्रत्यागेन महल्लाघवम्। सूत्रारम्भे तु व्यस्य योपि शरणीकरणीय इति महान् क्लेश इति भावः। छन्दो विकल्प
ग्रन्थस्यैव सिद्धेः प्रेत्यादिकं स्पष्टार्थमिति तत्त्वम्। एवमुत्तरसूत्राण्यपि दिवस्थित्यादीति। अत्र परिः सर्वतोभावे समुहेः चकारोनुक्तसमुच्चयार्थ इत्याशयेनाह। वदिति कृती पाहमिति। कृति शब्द
स्यान्येषामपीति दीर्घः। इत्यष्टमः।। ७ कृत्वादिति भावः। विकल्पव्यवस्थयेति। व्यवस्थितविकल्पेनेति यावत्। इत्यष्टमः।। इति श्रीमद्दीक्षितभट्टोजीपौत्रदीक्षितवीरेश्वरसून रामः
शिवहरिविरचिते लघुशब्देन्दुशेखरे वैदिकी समाप्ता।। श्रीगङ्गाविश्वेश्वराभ्यां नमः। ग्रन्थसङ्ख्या संवत् १९३२ मिती फाल्गुण सुदी ७ अधिगच्छति शास्त्रार्थः संस्मरति ग्रन्थमातिथ्य। य ४००
कृपावशात्तस्मै नमोस्तु गुरवे सदा।। १।। गुरुचरणसरोजाभ्यां नमः।। संकष्टनाशिनी विजयतेतराम् ।।

ल॰शे॰
स॰मा॰
२९

श्रीगणेशायनमः समर्थःपदः विधिशब्दःकर्मसाधनः शेष षष्ठ्यासमासस्तदाह पदसंबंधीति। पदविधिसहचरितोपि पदविधिशब्देनगृह्यते अतएव। सन्नतादावेकार्थीभावःपदविधिश्चसमाससंज्ञादिस्तस्यचनसामर्थ्यंसाक्षात्‌विशेषणमसंभावादत आह समर्थाश्रितइति सामर्थ्यंचात्रनव्यपेक्षाख्या नात्समासादिवृत्तिषुतस्यासंभवाच्चकिंत्वेकार्थीभावःसचविशेष्यविशेषणभावावगाह्युपस्थितिजनकत्वंसंसृष्टार्थंसमर्थमितिभाष्योक्तेः। अतएवराजपुरुषेकदेशेराज्ञिऋद्धस्येत्यादिविशेषणान्वयोनदेवदत्तस्यगुरुकुलमित्यादौतुगमकत्वाद्भवत्येववृत्तिः एवंराजपुरुषइत्यादौविशेष णपदेसंख्यानवगमोप्येकार्थीभाव। कृतः संख्याविशेषप्रकारेणतत्तदर्थभानेपृथगुपस्थितेस्तंत्रत्वात्‌ यथाघटाइत्यादित्तौवहुत्वेनैवत्रिचतुरादिव्यक्तीनांभानंनतुत्रित्वचतुष्ट्वादिनातथावृत्तौराजत्वादिनैकानेकव्यक्तिभानंतात्पर्यवशान्नत्वेकत्वबहुत्वादिनाएवंतावकीनोयौष्माकीणइत्यादौसंबोध्यत्वेनैवैकानेकव्यक्तिभानंनत्वेकत्वबहुत्वादिनाविग्रहवाक्यीयेकवचनत्वारोपेणशास्त्रप्रवृत्तिमात्रंनतुतद्बोधः वृत्तिस्वभावविरोधादितिमंजूषायांविस्तरः गमकत्वादेवशिवस्यभगवतोभक्तइत्यर्थे शिवभागवतइत्ययःशूलेतिसूत्रेभाष्येप्रयोगःप रंतुतत्रवृत्तिरेवनतुशिवस्यभागवतइतिवाक्यंसाधुतत्रभगवच्छब्दादण्‌शिवपदेनभगवच्छब्दस्यसमासश्चयुगपदेवेतिबोध्यं तथोपस्थितिश्चसमुदायशक्तिसाध्याएवंचक्लृप्तशक्तित्यागेमानाभावात्प्रत्येकशक्तिसहकृतयासमुदायशक्त्यातथोपस्थितिरयमेवचैकार्थीभावः जहत्स्वार्थावृत्तिःपदानामानर्थक्यमितितुनयुक्तंमहावाहुःसुपंथाइत्यादावात्वाद्यनापत्तेः अर्थवत्त्वेभूतपूर्वगत्याश्रयणंतुसत्यांगतावयुक्तमूह्वेः जहत्स्वार्थातुतत्रैवयत्ररूढिविरोधिनी अवयवार्थविरुद्धोयत्रसमुदायार्थस्तत्रैवसेतितदर्थः यथागोरखरक्तस्सर्पादौपरिभाषेयम्‌ साचपदविधिरितिसूत्रस्वरसात्‌ समासेंगुलेः संगइत्यादौसमासग्रहणाच्चगतिर्गतावितिसूत्रेपदस्येत्यधिकारात्‌ समर्थपरिभाषोपस्थितिरितिकैयटस्वरसाच्च पदत्वेनसुबंतत्वेनवायत्रसाक्षादुद्देश्यतातत्रैवप्रवर्तते तेनान्यारादितरेत्यादौनास्याःप्रवृत्तिः एकार्थीभावश्चालौकिकविग्रहवाक्यएवकल्प्यतेययाशत्रादौद्वितीयासामानाधिकरण्यंदृष्ट्वालकारेपितत्कल्पना तथाअ.न्यपदार्थेसमर्थश्चार्थेइत्यनुवादवलादस्यतत्रकल्पनेति तथाचशतृविधायकेभाष्यम्‌ लस्याप्रथमासमानाधिकरणेनार्थेनायोगादादेशानुपपत्तिस्तस्यक्वापिप्रयोगाभावादित्याशंक्यादेशसामानाधिकरण्यंदृष्ट्वानुमानाद्गंतव्यंप्रकृतेरपितत्‌ भवतीतितत्रकैयटः सिद्धानांशब्दानामन्वाख्यानात्‌॥

राम
१

अर्चतेश्चभौवादिकाद्गुरोश्चहलइत्यप्रत्ययः। अर्चा। चौरादिकान्तुण्यासश्रन्थेतियुचस्यात्· षष्ठ्यपवादोऽयम्· अप्रत्ययादिभिरिति· लक्षणेत्यमितिसू
त्रोपात्ताःप्रत्यादयः। नक्षत्रेच· लुपशब्देनलुप्सञ्ज्ञयालुप्तप्रत्ययार्थोलक्ष्यतेइतिबोध्यम्· अधिकरणेकिम्· अद्यपुष्यः। असत्यान्तदनुवृत्तावन्तरङ्गत्वात्प्राति
पदिकार्थेएवस्यात्· मूलेनेति· नक्षत्रेणयुक्तःकालइत्यणोलुब्विशेषइतिलुप् नक्षत्रेकिम् पञ्चालेषुतिष्ठन्तिजनपदेलुविति लुप्· सप्तमीपञ्चम्यो·।
कालाध्वनोरित्यतस्तदनुवर्त्ततेतच्चपञ्चम्याविपरिणम्यतेमध्यस्यावधिद्वयसापेक्षतयाद्विवचनान्तेनसमासः। बोधस्तुशक्तित्वेनशक्तिद्वयस्यनतुद्वि
त्वेनेतिबोध्यम्· ननुकर्तृरूपस्यकारकस्यैकत्वाद्भेदनिबन्धनमध्यव्यपदेशासम्भवोऽतआह· शक्तिद्वयमध्येयाविति· कर्तृत्वादिशक्तिरेवकारकं। सा
चक्रियाभेदेनभिन्नेतिभावः। यद्यप्यवध्यवधिमतोस्साजात्यनियमान्नकालाध्वानोकारकमध्येसम्भवतस्तथापिशक्तिशब्देनतदाधारकालादिग्रह
णान्नदोषः। षष्ठ्यपवादोयम्· स्थानन्तरकालवृत्तित्वादिकंविभक्त्यर्थः। शक्तिद्वयमध्यवर्त्तित्वन्तुवस्तुसन्निमित्तम्· अधिकशब्देनेति· कर्त्तरिक्तप्रत्ययान्ता।
ध्यारूढशब्दार्थकाधिकशब्दयोगेलोकशब्दात्सप्तम्याम्प्राप्तायाञ्ज्ञापकादिमेइष्यतेइत्यर्थः। तदस्मिन्नधिकमितिसूत्रेभाष्येतुउपश्लिष्टपदाध्याहारेणोप
श्लेषिकेऽधिकरणेसप्तमीत्युक्तम्· कर्मणिक्तप्रत्ययान्ताध्यारूढशब्दार्थकाधिकयोगेतुअधिकोलोकोहरिणेतिप्रथमैव· उपपरार्द्धेइति· उपोधिकेचे।
तिकर्मप्रवचनीयत्वम्· ननुमामुद्दिश्यविनियोक्ष्यतइत्यर्थादत्रकर्मणिद्वितीयेवेतिकिङ्कर्मप्रवचनीयत्वेनेत्यतआह· अगतित्वादिति· तिङि· चेति· उदात्त
वतितिङ्न्तेगतिर्निहन्यतइत्यर्थः। अत्रतिङ्ङ्तिङ इतिनिघातस्यनिपातैर्यद्यदीत्यादिनानिषेधात् करिष्यतीतितिङ· न्तस्योदात्तवत्त्वमितिसर्वेष्टसि
द्धिः॥ ॥ ❋ ॥ इतिविभक्त्यर्थाः अधिगच्छतिशास्त्रार्थस्मरतिश्रद्दधातिच। यत्कृपावशतस्तस्मैनमोस्तुगुरवेसदा [illegible] ॥

अत्रकर्मशब्देनकालादिव्यतिरिक्तमेवगृह्यते व्याख्यानात्· तेनमासमधीतीव्याकरणे इत्यत्रनेतिकैयटः।साध्वसाधु·शेषषष्ठ्यपवादोऽयम्· साधुनिपुणाभ्यामित्येवसिद्धेऽनर्चार्थमत्रसाधुग्रहणम्· तेनतत्वकथनेऽपिभवतिसूत्रेऽर्चाग्रहणन्तु निपुणार्थम्· निमित्तादिति· निमित्तवाचकात्सप्तमीभवतितस्यनिमित्त स्यप्रत्यासत्त्यास्वान्वयिक्रियाकर्मणायोगइत्यर्थः।निमित्तञ्चात्रक्रियाफलम्।एवञ्चफलंसप्तम्यर्थः।चर्मणीति· चर्मणःफलत्वञ्चहननस्यतल्लाभेच्छाधीनत्वात्कर्मसम्बन्धश्चस्वरूपसन्नेवनिमित्तम्· द्वीपिचर्मणोरण्डकोशमृगयोश्चसमवायः।इतरयोस्संयोगः।मुक्ताफलायकरिणांरघुवीरेत्यादौक्रियार्थोपपदस्येतिचतुर्थीघ्नन्तीतिशेषः।मुक्ताफलान्याहर्तुमित्यर्थः।यस्यचभा·भावःक्रिया·ततः।ज्ञापकक्रियाश्रयवाचकात्।तेनगोपददुह्यमानपदयोरुभयोरपिसप्तमीसिद्धा·क्रियाश्रयःकर्त्ताकर्मच·तत्रब्राह्मणेष्वधीयानेषुगतइतिकर्त्तर्युदाहरणम्·कर्मण्याह·गोष्विति·तत्रकाचित्क्रियास्वाधारकालेनान्याङ्क्रियाम्परिच्छिनत्ति·यथाप्रकृतेकाचित्तुस्वाधारकालाव्यवहितपूर्वकालेन यथागोषुधोक्ष्यमाणास्वित्यादौ·काचित्स्वाधारकालानन्तरकालेन·यथागोषुदुग्धास्वित्यादौ।ज्ञापकत्वंसप्तम्यर्थस्तस्यचभावलक्षणमित्युक्तेःक्रियायामेवान्वयः।लक्ष्यलक्षणभावः शब्दबोध्यएवैतच्छास्त्रप्रवृत्तौनिमित्तन्नतुतस्यभूयोदर्शनादिरूपमानान्तरेणग्रहणापेक्षेतिबोध्यम्· अन्यथोदिते आदित्येतमोनष्टमित्यादावेवस्यान्नतुप्रकृते।कदाचिद्धिगोषुदुह्यमानासुसोगतः इदञ्चयत्रमानान्तरेणज्ञातस्वरूपस्यार्थस्यकालविशेषादिज्ञानार्थशब्दप्रयोगस्तत्रैवप्रवर्त्ततेभाष्यस्वरसात्·राहूपरागेस्नायादित्यत्रराहूपरागपदेनतदाश्रयकालउच्यतइत्यधिकरणसप्तम्येव·विवाहेनान्दीमुखङ्कुर्यादित्यत्रविवाहपदेनतत्प्राक्कालउच्यते·गवान्दोहेऽप्यागतइत्यत्राप्यधिकरणसप्तम्येवेत्यन्यत्रविस्तरः अर्हाणाम्·कर्त्तृत्वार्हाणाम्·तद्वैपरीत्येऽर्हाणामकर्त्तृत्वेऽनर्हाणाञ्चकर्त्तृत्वेइत्यर्थः।वाक्यचतुष्टयमेतत्।कर्त्तृ समर्पकादकर्त्तृसमर्पकाच्चसप्तमीत्यर्थः।सप्तम्याञ्चतदन्वयिक्रियावाचकाद्धातोरप्रथमासामानाधिकरण्याच्छतृशानचावेव·लक्ष्यलक्षणभावाविवक्षार्थमिदम्·सत्स्विति·सन्तोहितरणक्रियाकर्त्तृत्वार्हाः·तरणक्रियाकर्त्तृसत्सम्बन्धिअसत्कर्त्तृकमासनमितिबोधः।स्वक्रियाधिकरणकालवृत्तित्वंसम्बन्धः।असत्स्विति·तरणक्रियाकर्तृत्वानर्हाणान्तदकर्त्तृत्वमत्र·यद्यपिस्थितिक्रियाकर्त्तृत्वार्हत्वेनेदंसिद्धम्·तथाप्यसतान्तरणङ्क्रियानर्हत्वादिकमपिबोधविषयइतिभावः।सत्स्विति·तरणक्रिया

र्हाणान्तदकर्त्तृत्वमत्र·

षष्ठीचा·अनादरइतिविषयसप्तमीयस्यचभावेनेत्याद्यनुवर्त्ततेअनादरेगम्यमानेसतियस्यक्रिययाक्रियान्तरँल्लक्ष्यतेततःसप्तमीषष्ठ्यावित्यर्थः।फलितमाह·अनादराधिक्यइति·लक्ष्यलक्षणभावःषष्ठ्यर्थः।अनादरविशिष्टम्प्रव्रजनन्धात्वर्थः।तत्रषष्ठीतात्पर्यग्राहिकाऽनादरश्चप्रत्यासत्त्यापुत्रादिविषयकएवेतिभावः।स्वामीश्वर·शब्दपरत्वाद्विरूपाणामपीतिनैकशेषः।पर्यायान्तरसङ्ग्रहापत्यास्वाम्यर्थेतिनोक्तम्·दीयतेइतिव्युत्पत्त्यादीयमानांशरूपन्दायमादत्तेइतिसोपसर्गादप्यादन्तादतएवनिपातनात्कः।गवादिकन्दीयमानेऽन्वेतिनित्यसाकाङ्क्षत्वाद्वृत्तिः।दायादशब्दःस्वामिपर्यायइत्यन्ये·षष्ठ्यामेवेति·शेषेषष्ठीत्यनेनेतिभावः।तात्पर्येइति·आसेवापदस्यतत्ररूढेरितिभावः।तात्पर्यञ्चतदेकव्यापारता।आयुक्तयोगेऽधिकरणत्वविवक्षायांसप्तमीप्राप्तौसम्बन्धविवक्षायामत्रकुशलयोगेचषष्ठीप्राप्तौवचनम्·यतश्च·जातिगुणक्रियासञ्ज्ञाभिरिति·विशिष्टस्येत्यध्याहारः।तद्विशिष्टस्यैकदेशस्ययतःस्वघटितसमुदायात्स्वेतरसमुदायघटकव्यावृत्तधर्मकरणकम्पृथक्करणन्तद्वाचकात्षष्ठीत्यर्थः·यतःकिम्·यस्यजात्यादिविशिष्टस्यस्वेतरव्यावृत्तधर्म वत्त्वबोधनन्तएवमाभूत्षष्ठ्यपवादत्ववत्प्रथमापवादत्वस्यापिसम्भवात्·स्वघटितसमुदायावधिकस्वेतरसमुदायघटकव्यावृत्तधर्मकरणकपृथक्करणरूपनिर्धारणविषयत्वरूपोऽवयवावयविभावरूपश्चसम्बन्धोविभक्त्यर्थः।नृसमुदायावधिकद्विजेतरनरव्यावृत्तश्रेष्ठत्वकरणकपृथक्करणरूपनिर्द्धारणविषयोनृसमुदायावयवोद्विजःश्रेष्ठ इतिबोधः।संसर्गघटककरणञ्चश्रेष्ठत्वादिरूपमेवप्रत्यासत्तेः।अतएवननिर्द्धारणइतिसूत्रबोधितन्निर्द्धारणस्यविभक्त्यर्थत्वंसङ्गच्छते·उद्भूतावयवभेदविवक्षयानृणामितिबहुवचनम्।तिरोहितावयवभेदविवक्षयानिर्द्धारणविषयेएकवचनन्त्वसाध्वितिकारकइतिसूत्रेभाष्येस्पष्टम्·तत्रहिनिर्द्धारणेकारकेष्वितिब्रूयादित्युक्तम्·भिदचोन्यादिस्वदेतुसोत्रोनिर्देशइतितदाशयः।द्वन्द्वःसामासिकस्यचेत्यत्रसमासंसमूहमध्येइत्यर्थः·समूहेऽर्थेऽचितेत्तिठक्·पञ्चमीति·यतश्चनिर्द्धारणमित्यनुवर्त्ततेविभागोऽत्रभेदः।तत्रनिर्द्धारणेसर्वत्रयथाकथञ्चिद्भेदस्यसत्त्वेनविभक्तग्रहणसामर्थ्याद्यत्रभेदएवनतुकेनाप्युपात्तरूपेणाभेदस्तत्रैवप्रवृत्तिरित्यतआह·भेदएवेति·अत्रपञ्चम्यर्थोनिर्द्धारणविषयत्वरूपएव·पाटलिपुत्रकावधिकनिर्द्धारणविषयामाथुराआढ्यतराइतिबोधः।एवञ्चत्रितयोपादानएवनिर्द्धारणप्रतीतिरितिपुरुषोत्तमइत्यादौसम्बन्धसामान्येषष्ठी उत्तमनिरूपितेतिसमाससिद्धिरितितरप्सूत्रेकैयटः।साधुनि·निपूर्वात्पुणकर्मणिशुभेइत्यतइगुपधलक्षणः।

निषेधविषयेशेषत्वविवक्षानेतिज्ञाप्यते शेषत्वविवक्षयाभाष्योक्ततत्प्रत्याख्यानेतु। अनभिधानात्क्तातिरिक्तविषयेनसा। पूरणगुणेतिसूत्रेभाष्येध्वानितमिदम्· तत्रहिसतिकिमुदाहरणम् ब्राह्मणस्यकुर्वन् नैतदस्तिकारकषष्ठ्यानिषेधात् शेषषष्ठ्यातुब्राह्मणस्यकटमित्यर्थेनासामर्थ्यादित्याद्यर्थकमुक्तमितिपरे· अधीयन्निति· इङ्· धार्य्योः शत्रकृच्छ्रिणीतिशता। द्विषन्निति· द्विषोऽमित्रइतिशता· शेषषष्ठीत्विति· इदन्त्विन्त्यमित्युक्तम्परैः अकेनो· अत्रयथासङ्ख्यन्नेष्यते अकस्याधमर्ण्येऽसम्भवादाह भविष्यत्यकस्येति· वर्षशतस्यपूरकइत्यादौ एतत्कर्मकयाजनकर्त्तारइत्यर्थके। अङ्गयजतांलप्स्यन्तेऽस्ययाजकाइत्यादौचषष्ठीभवत्येव कर्तृमात्रार्थकेण्वुल्तृचाविति ण्वुलिपदान्तरसम्बन्धेनभविष्यत्वप्रतीतावप्यकस्यतत्राहन्तेः तुमुन्ण्वुलाविति ण्वुल्तुभविष्यतीत्यधिकृत्यविधानाद्भविष्यदर्थकएवेतिभावः अजङ्गमीति· गमेरिनिरित्यौणादिकइतिः सचभविष्यति भविष्यतिगम्यादयइत्युक्तेः गामीतिपाठेवाङ्लकाद्वृद्धिः शतन्दायीति· आवश्यकाधमर्ण्ययोरितिणिनिः आवश्यकेणिनावप्ययन्निषेधः सूत्रेआधमर्ण्यपदेनतन्त्रत्रोक्तार्थोपलक्षणात्· अतएवांशंहारीतिनिर्देशः सङ्गच्छते तत्रह्यावश्यकेणिनिः नचात्रभविष्यदर्थकत्वेनसिद्धिः भूतवर्त्तमानयोरावश्यकत्वबोधनस्यवैकल्येनभविष्यतएवततोबोधादितिवाच्यम्· वस्तुतोभविष्यतोबोधेपितत्त्वेनाबोधात् णिनेस्तदर्थकत्वाभावाच्च· अतएवावश्यङ्कारीकटस्येतिवृत्त्युदाहृतंसङ्गच्छते। तत्राहेनानेनणिनिः अवश्यपदोपादानात्· किन्तुसुप्यजाताविति नव्याः कृत्यानाङ् र्तृकर्मणोरितिनित्येप्राप्तेविभाषाकर्मनिवृत्त्यर्थङ्कर्त्तृग्रहणम्· अनुवर्त्ततइति· निषेधोऽयङ्कर्त्तरिकर्मणिचकर्त्तरिवेतित्वनुभयप्राप्तिविषयमितिवृत्तिकैयटादयः अजमित्यत्रगुणकर्मणिवेष्यतइतिविकल्पस्तुन कृत्यातिरिक्तेचरितार्थस्यतस्यदोग्धव्यागावः पयः कृष्णेनेत्यादौगुणकर्मणउक्तत्वात्प्रधानेचरितार्थेनानेनपरत्वाद्बाधात्·

तुल्यार्थैर्योगइति· तुल्यत्वार्थैरित्यर्थः अतएवातुलोपमाभ्यामितिचरितार्थम्· अतएवपर्युदासादनव्यपयोगएवेदम्· तेनेवशब्दयोगेन· चतुर्थीचाशिषि· आशीर्विषयक्रियान्वय्यर्थकात्प्रातिपदिकात्तद्वारके आयुष्यादियोगेचतुर्थीषष्ठ्यावित्यर्थः अतएवैतदर्थकचतुर्थ्याद्यन्तेनसुखहितादिभिर्नसमासः उभयोरपिक्रियान्वयेनपरस्परमसामर्थ्यात् अतएवहितेनचतुर्थ्यांसमासविधानन्तद्योगेचतुर्थीज्ञापकमित्याकरा

का·
श·शे·
२७

क्तंसङ्गच्छते·यत्तुवृत्तावुद्देश्यविधेयभावेनानन्वयादाशीर्विषयेचतथान्वयान्नसमासइतितन्न·वृत्तावपिप्राप्तत्वादिपर्यालोचनेनलोहितोष्णीषेत्यादौतथान्वय
दर्शनात् भाष्येतथाप्यन्वयेवृत्तेरसाधुतायाअनुक्तेश्चेतिसमासवादेमञ्जूषायांविस्तरः·व्याख्यानादिति·सूत्रेऽर्थशब्दःपृथङ्निमित्तमितिभावः·भाष्येतुनैतद्दृश्य
ते॥ ❁ ॥ इतिषष्ठी· ॥ ❁ ॥ आधारो·कारकेइत्यधिकारात्क्रियाजनकेएतत्प्रवृत्त्योपस्थितत्वादाधारः क्रियायाएवतत्रेप्सिततमस्वतन्त्रपदाभ्यांसाक्षात्क्रि
याधारयोःकर्मकर्तृसञ्ज्ञाभ्यांबाधात्परम्परयातदाश्रयस्यग्रहणम् परम्पराचकर्तृकर्मद्वारकैवव्याख्यानादित्याह·कर्तृकर्मद्वारेति·यद्यपिकालस्यसाक्षात्क्रि
यापरिच्छेदकत्वन्तथापिकर्तृकर्मद्वारेवतथैवानुभवात्साक्षात्तदाधारत्वेपिआधारपदेस्वरितत्वप्रतिज्ञानात्परम्पराधारस्यग्रहणम्·किञ्चसाक्षात्तदाधारत्वे
कर्तृत्वमेवतस्यस्यात्कालःपचतिभूतानीतिवत् एवञ्चक्रियान्वयोऽप्यस्यकर्त्राद्यन्वयद्वारैवयस्ययद्द्वाराकारकत्वन्तस्यतद्द्वारैवक्रियान्वयइतिव्युत्पत्तेः अतएवा
क्षशौण्डइत्यादौसमासः।अत्राऽऽसक्त्यादिक्रियान्तर्भावेणबोधाननुभवात्क्रियाद्वारासामर्थ्यमितिकैयटाद्युक्तन्नयुक्तम्·मूलेवृक्षःकपिसंयोगीत्यास्ववृत्तिक्रियाम
ध्याहृत्यतस्याःस्वकर्तृकपिसंयोगिवृक्षद्वारामूलवृत्तित्वादाधारत्वम्·विशिष्टवृक्षमूलवृत्तित्वबोधनेऽन्यत्रावयवेतद्विशिष्टवृक्षाभावप्रतीतेःकपिसंयोगेतद्व्यव
च्छेदत्वम्फलतीतिदिक्·चकारादिति·प्रातिपदिकार्थेइतिशेषः·त्रिधेति·तत्रसकलावयवव्याप्तौव्यापकाधारत्वम्·यथातिलेषुतैलमिदमेवमुख्यमधिकरणमि
तिस्वरितेनेत्यत्रसाधकतममित्यत्रचभाष्येस्पष्टम्·उपसमीपेश्लेषःसम्बन्धस्तत्कृतमौपश्लेषिकम्·अतएवेकोयणचीत्यादावौपश्लेषिकेआधारेसप्तम्युक्तासं
हितायामितिसूत्रेभाष्ये·तत्राजादिसामीप्यमेवेगादीनांयन्मासेतिक्रान्तेदीयतेतस्यसमासऔपश्लेषिकमधिकरणमित्युक्तम्·तत्रचदीयतइतिसूत्रेभाष्येतद
स्मिन्नधिकमितिसूत्रेभाष्येस्पष्टमिदम्· कटेआस्तेइतितुनौपश्लेषिकोदाहरणंयुक्तमुक्तभाष्यविरोधात्·यदेकदेशावच्छेदेनश्लेषेपिश्लेषस्यसमीपमुपश्लेषन्त
त्कृतमितिव्युत्पत्त्यौपश्लेषिकत्वमित्यभिप्रायेणतदुदाहरणन्नात·एतत्सर्वङ्गौणमधिकरणङ्गङ्गायाङ्गावइत्यादिकञ्चेतिस्वरितेनेत्यादौभाष्येस्पष्टम्·गौणोप्याधा
रादिःसप्तम्यादिशब्दएवेतिबोध्यम्·एतदतिरिक्तंसर्वंवैषयिकम्·अधिकरणत्वशक्तिमांश्चाधिकरणविभक्त्यर्थः इन्विषयस्येति· इनोविषयस्येत्रक्तेःक्तान्तस्य
कर्मणीत्यर्थः।तेनकृतपूर्वीकटमित्यत्रन।उदाहरणेनकर्मणिक्तः।अमितत्वेनसप्तम्यतापत्तेःकिन्तुभावे·इष्टादिभ्यश्चेति·तत्रहिश्राद्धमनेनेत्यतोऽनेनेतिवर्त्तते।

राम
२७

स्यमादृग्भ्योधायैरासोदमुत्तमम्·लिप्स्येरिवतनोर्वातैश्चेतयःसाञ्ज्वलोनकइतिभट्टिपद्यम्·मादृग्भ्योदुःखन्ददद्भिरुत्तममामोदमुष्यादीनाङ्गृहीत्वामादृशा
न्दन्नस्यदुःखस्यपोषकैर्मादृशांशरीरैर्लिप्सद्भिरिववातैःकोमादृक्विरहाग्निर्व्याप्तश्चेतयन्ज्वलः।ज्वलन्निवनस्यादितितदर्थः।दाधातोःपोषणार्थाद्दात्रश्चददाति
दधात्योश्शणौ।लिप्स्येश्शः·ज्वलेर्णइतिजयमङ्गलाख्योक्तव्याख्याप्येतज्जातीयैवतत्रेतिदिक्·तत्रधायैरामोदमुत्तममित्यत्रगृहीत्वेत्याहृत्यतद्योगेद्वितीयावो।
ध्या।उभयोःप्राप्तिर्यस्मिन्निति·तेनैकनिमित्तत्वलाभादोदनस्यपाकोब्राह्मणानाञ्चप्रादुर्भावइत्यादौविभिन्नक्रियाकर्तृकर्मणोःषष्ठीप्राप्तौनायन्नियमइतिभावः
प्रातिपदेनचोभयोःप्रयोगएवायन्निषेधइतिध्वनितम्·स्त्रीप्रत्यययोरिति·स्त्रियाङ्गिन्नित्यधिकारविहितयोरित्यर्थः।नायन्नियमइति·तेनोभयत्रापिषष्ठीभ
वत्येवेतिभावः।भेदिकेति·धात्वर्थनिर्देशेण्वुल्·सन्ननाङ्गिदेरप्रत्ययादित्यप्रत्ययः।शेषइति·नियमस्यायम्विकल्पः·इत्येकेइत्येतत्त्वमर्थस्यसुप्रतिपत्तयेआ
ह·केचिदिति·अकाकारभिन्नेहल्मात्रेइत्यर्थः।अनुशासनमिति·अनुशिष्यन्तेऽसाधुभ्योविविच्यबोध्यन्तेयेनेतिकरणेल्युट्मतइत्यादौमतिबुद्धीतिवर्त्तमानेक्त
।इदमेषामिति·कर्त्तरिषष्ठी।सकर्मकेभ्यस्त्वधिकरणेक्तेकर्तृकर्मणोर्द्वयोरपिषष्ठी।इदमेषाम्भुक्तमोदनस्य।उभयप्राप्तावितितुमध्येऽपवादन्यायेनकर्तृकर्म
णोरित्यस्यैवनियमइतिबोध्यम्·नलोका·लादेशाइति·लकारसम्बन्धिनइत्यर्थस्तेनददिर्गाइतिसिद्धम्·केवललस्यकापिप्रयोगाभावादेवव्याख्यातम्·कुर्वन्निति·।
तृन्प्रत्याहारघटकस्तुनायम्·तृशब्दस्यतद्घटकत्वेपिशतुस्तद्घटकत्वाभावात्·लिडादेशक्वसादियोगेलिट्सदृशकिकिनोर्योगेचनिषेधार्थन्तस्यावश्यकत्वा
च्च·उइति·उकारेणव्याख्यानात्तदन्तविधिर्व्यपदेशिवद्भावेनोकारस्यापिसनाशंसेति।अलङ्कृञितिचउइष्णुचौ।घातुकइति·लषपतपदेत्युकञ्वृद्धिस्तत्त्वम्·
कमेरिति·उकारान्तस्येतिशेषः।इदञ्चभाषायामेव।भाषायामितिभाष्योक्तेः।निष्ठेति·एतदपवादतयाभाष्येवार्त्तिकम्पठ्यते नपुंसकेभावेक्तस्ययोगेषष्ठ्याउपसं
ङ्ख्यानम्।छात्रस्यहसितमिति।इदञ्चप्रतिपदोक्तत्वान्नपुंसकेभावेक्तइतिसूत्रविहितक्तान्तयोगएवभ्रान्तन्देशमित्यादौगत्यर्थाकर्मकेइत्यनेनक्तेनानेनषष्ठी
नपुंसकेभावेक्तस्तुनात्रतस्याप्यकर्मकेभ्यएवेष्टेः।अविवक्षितकर्मतयाऽकर्मकत्वेनक्तस्तुक्तपूर्वीत्यादिवृत्तिविषयएवेत्युक्तम्·एवञ्चेहाहेःसुप्तमित्या
दौपरत्वेनक्तोऽधिकरणेचेत्यनेनभावेक्तेशेषत्वविवक्षयैवषष्ठीसाधनस्यावश्यकत्वेनेदंशेषत्वविवक्षयाभाष्यप्रत्याख्यातम्·वार्त्तिकेनचानेनकारकषष्ठी

का· श·शे· २५

मितिप्रश्नः द्विरहनीति· इत्यादिप्रामाण्यान्मण्डूकप्लुत्यानुवृत्तिः स्वीकार्येत्युत्तरम्· अधीगर्थेति सूत्रे कर्मादीनामविवक्षा शेष इति भाष्ये बहुवचनेनात्रापि शेषपदसम्बन्धबोधनाच्च· वस्तुतस्तु कर्माश्रयषष्ठीविषये सूत्रोपात्तसकर्मकाणामकर्मकवद्वचनमिति वार्त्तिकप्रत्याख्यानाय शेष इति वर्त्तते इति भाष्यकृतोक्तेः परेण शेषश्च क इति पृष्टे शेषे षष्ठीति सूत्रोक्तकर्मादीनामविवक्षा शेष इति सिद्धान्तिना स्मारितम्· नैतावता कृत्वोर्थ इत्यत्र सम्बन्धो लभ्यते· किञ्चैतज्ज्ञाप्यबलाद्धि व इति सूत्रेपि शेषपदसम्बन्ध आवश्यकः। अन्यथा वार्त्तिकरीत्या शतस्य दीव्यत इति भावे इष्टस्य प्रयोगस्यासिद्धिः। अत एव वार्त्तिकव्याख्यायामधीगर्थादयः प्रेष्यब्रूपर्यन्ताः कर्माश्रयपदे नोच्यन्त इति कैयटः। एवञ्च शेष इत्यनुवृत्त्या वार्त्तिकप्रत्याख्यानवदेतत्सूत्रद्वयप्रत्याख्याने एवं भाष्यतात्पर्य्यम्· द्वितीया ब्राह्मण इति सूत्रस्थम्भाष्यन्तु वार्त्तिकरीत्येत्याहुः· किञ्च यदा कर्म विवक्षितम्भवति तदा षष्ठी न भवति स्मराम्यहम्मातरमिति भाष्ये उक्तम्· त्वद्रीत्या यदा कर्मादिविवक्षितम्भवतीति वदेत्· एवञ्च ज्ञो विदर्थस्येत्यत्रापि तदसम्बन्ध एव· एवञ्च तद्योगे न कदापि तृतीया शतन्दीव्यतीत्यादि च सिध्यति। अधीगर्थेत्यादौ च मण्डूकानुवृत्तिरिति सुधियो विभावयन्तु· कर्तृकर्मणोः। अत्र शेष इति न सम्बध्यते सूत्रवैयर्थ्यापत्तेः कृद्योगा षष्ठी समस्यत इति वार्त्तिकेन तत्र समासस्येष्टत्वात्· कृतिरिति· भावे क्तिन्। कृत्स्नः कर्त्ता। जगत इति· कर्मेदम् कर्त्तृसाहचर्यात्कर्मोपि धात्वर्थभेदेनान्वय्येव गृह्यते। तेन स्तोकम्पाक इत्यादौ न क्रियाविशेषणात् षष्ठी· किञ्च क्रियाविशेषणे न स्तोकम्पाचक इत्यादौ न समानाधिकरणसमासो नापि सुप्सुपेत्यादिः। सुबन्तार्थस्य विशेष्येणानन्वयेनासामर्थ्यात्· द्वितीया श्रितेत्यादेस्तु सामर्थ्यादवयवद्वारकसामर्थ्ये प्रवृत्तिः। द्वितीयाप्रकरणोक्तपरेतुमतरीत्या वा सामर्थ्यम्· अत एव पूजनात्पूजितमिति सूत्रे दारुणं यथा भवति तथाध्यापक इत्यर्थकस्य दारुणाध्यापक इत्यस्य सिद्ध्यर्थम्मलोपवचनमारब्धम्भाष्ये· अन्यथा समासेन सिद्धे तदर्थं स्यात्। एतदेव भाष्यन्ततः षष्ठ्यभावेपि मानम्· अन्यथा षष्ठीसमासस्य तृजकाभ्याङ्कर्त्तरीत्यादिनिषेधे कृत्तसामर्थ्येपि प्रवृत्त्या तत्समासेनैव सिद्धौ मलोपवचनं व्यर्थमेव स्यादिति बोध्यम्· न च भिन्नपदत्वेपि तथा प्रयोगसाधुत्वार्थम्मलोपवचनमिति वाच्यम्· तथा सति वाके मलोपश्च वक्तव्य इति वदेत्· अत एव कैयटेन क्रियाविशेषणन्दारुणादयस्तत्र वैयधिकरण्यात्समासाभावान्मलोपो विधीयत इत्युक्तम्· सुप्सुपेत्यादिसमासो न सार्वत्रिक इति तदाशय इत्यलम्· कृति किमिति· कर्त्तृकर्मभ्याङ्क्रियासन्निधाप्यते तद्वाची च धातुरेव· कारकान्वययोग्यतावच्छेदकरूपेण साध्यत्वेन धातुभिरेव तदुपस्थितेः। शत्योश्च आम्रिक इत्यादौ तद्धितान्तेन

एम २५

रूपेणोपस्थितिरितिन तत्रकारकान्वय एतद्भाष्यप्रामाण्यात्· अतएवहि रुगादियोगेनकर्मादिसञ्ज्ञाः एतेनदेवदत्तेनशत्योऽम्ब इत्यादौ षष्ठीनिवृत्त्यर्थंदुह्ग्रहणमि
त्यपास्तम्· अधिकारवारीद्रोणेनेत्यत्रहेतौतृतीयाक्रियायोगाभावात्कर्तुः कर्तृत्वाभावेजनकत्वरूपहेतुत्वसत्त्वात् धातोश्चद्वयेप्रत्ययास्तिङः कृतश्च तत्रतिङ्योगेनलो
केतिनिषेधात्कृद्योगएवभविष्यतीतिकिन्तेन· नलोकेतिसूत्रेकृदव्ययस्यैवग्रहणात्तु अव्ययार्थस्ययेकर्तृकर्मणीइतिव्याख्यानेनसिद्धम्।उ·भयप्राप्तावित्यत्रवहु
व्रीहिसुएकाचोद्वेइत्यादाविवान्यपदार्थस्याशाब्दत्वेपिव्याख्यानाद्भविष्यति· नचभेदिकादेवदत्तस्ययज्ञदत्तस्यकाष्ठानामित्यादौगुणभूतेणिच्प्रकृत्यर्थकर्तरिषष्ठ
र्थङ्करोतीति कृदितिकर्तृपरत्वादितिवाच्यम्· तृतीयावत्तत्रषष्ठ्या अपिविनैवयत्नंसिद्धेरितिप्रश्नः। तद्धितइति· तद्धितान्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रिया
याः कर्तरिकर्मणिचमाभूदित्यर्थः उदाहरणेसकर्मकप्रकृतिकभावक्तान्तस्येदृशवृत्तिमात्रविषयतायाभाष्यसम्मतत्वेनतस्यकेवलस्यक्वाप्यप्रयोगेणतद्धि
तान्तसमुदायशक्त्यैवक्रियोपस्थापकत्वात्। कृद्ग्रहणात्कृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियाकर्तृकर्मणोर्ग्रहणन्नचात्रतथा। तण्डुलानाम्पाचकत
रइत्यादौपाचकादेः पृथक्प्रयोगेणतच्छक्तिग्रहस्यापिसत्त्वेनकृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयत्वङ्क्रियायाअस्त्येवेतिभवत्येवषष्ठी· अतएवतद्धितेमा
भूदित्येवोक्तन्नतद्धिताधिकेइति।भाष्येपितद्धितस्ययेकर्तृकर्मणी तत्रमाभूत्कृतोयेकर्तृकर्मणीतत्रैवयथास्यादित्येवोक्तम्· कृतपूर्वीति· अत्रकर्मविशेष
स्यतत्तद्रूपेणप्रागन्वयाविवक्षयाऽकर्मकत्वाद्भावेक्तेपूर्वादिनिरितितद्धितस्तदनन्तरन्तुविशेषरूपेणकर्मयोगोभवत्येवातत्रोक्तरीत्याषष्ठ्यभावेऽनभिहित
त्वाद्द्वितीया·एवरीत्यासाधुत्वेऽत्रत्यभाष्यमेवमानम्· वृत्तेः पूर्वङ्कर्मान्वयाभावाच्चसापेक्षत्वाद्वृत्तिर्नस्यादितिनशङ्क्यम्· एवमधीतीव्याकरणेइत्यादावपिबोध्यम्·
तदुक्तम्भाष्येयदावाक्यन्नतदाप्रत्ययः।यदाप्रत्ययःसामान्येनतदावृत्तिरिति।नतदाप्रत्ययः।नतदाभावेप्रत्ययः।धातोःसकर्मकत्वात्।यदाप्रत्ययः।भावेइतिशे
षः। तदावृत्तिरेव।साचवृत्तिर्नकदापिकर्मक्तान्तेनेत्याह· सामान्येनेति·कर्मविशेषस्यतत्तद्रूपेणप्रागन्वयाविवक्षाविशिष्टोयोऽर्थस्तदर्थकधातुप्रकृतिकक्ता।
न्तेनेत्यर्थः।इयमेवकर्मणोविवक्षानामानेनतादृशक्तान्तस्यवाक्येनप्रयोगइतिस्पष्टमेवोक्तम्। प्रयोगानुरोधिनीहिविवक्षेतिनद्भावः।नचाविवक्षितकर्म
तयाभावेक्तसाधनयत्नोव्यर्थः।नपुंसकेभावइत्यनेनसकर्मकेभ्योपिसिद्धेरितिवाच्यम्· तस्याप्यकर्मकेभ्यएवेष्टेः।अत्रचेदमेवभाष्यम्मानम्· ददेर्दुःख।

लभ्यंतेइति२

सर्वनाम्नस्तृतीयाचेतिसूत्रेव्यर्थेइतिवोध्यम्·षष्ठ्यत सर्थेदिक्छब्दलात्यञ्चम्याम्नाध्यायामिदम्। ततःपञ्चादित्यत्रतुसार्वविभक्तिकःषष्ठ्यन्तात्तसिः।षष्ठ्यपीति·स्यषृष्टेदम्वृत्तौ·भाष्येतुनदृश्यते। विपरीतंषष्ठ्यतसर्थेतिसूत्रात्पूर्वमेनपेत्यस्यपाठइतिपृथग्विनेतिसूत्रेउक्तम्। दूरान्तिकार्थैः।यदपेक्षन्दूरत्वादिकन्ततःषष्ठीत्यर्थः पञ्चमीचेति·तस्याएवसमुच्चयोनतुद्वितीयातृतीययोरपीतिभावः। ज्ञोवि·अत्रसूत्रेऽविदर्थस्येतिछेदोव्याख्यानात्·सर्पिषोज्ञानमिति·जानातेःप्रवृत्तिरर्थः। सर्पिःसम्बन्धिनीप्रवृत्तिरित्यर्थः।अधीग·अधीगर्थःस्मृतिः। कर्मणिकिम्·मातुर्गुणस्मरणम्·करणेशेषत्वेनषष्ठ्यभावेसमासोभवत्येव। अतएवात्रसूत्रेभाष्ये शेषइतिवर्त्तनइत्युक्तम्·प्रतिपदविधानाषष्ठीनसमस्यतइत्येतैःषष्ठीसमासनिषेधात्।एधोदकस्येति·एधइतिपृथक्पदम्दकशब्दउदकवाची।रुजार्थानाम्·रोगार्थानाम्धातूनामित्यर्थोव्याख्यानात्·धातोर्भाववचनत्वाव्यभिचारेणसामर्थ्याद्वचनइतिकर्त्तरिल्युट्।भावशब्देनसिद्धरूपोऽर्थउच्यतेल्युट्प्रकृत्यर्थोऽविवक्षितस्तदाह·भावकर्त्तृकाणामिति·रोगकर्तृकमितिच। रोगोऽत्रक्षयादिः।भावकर्त्तृकाणाङ्किम्।श्लेष्मणश्चौरस्रुजाश्लेष्मात्रनभावः।सर्पिषोनाथनमिति·।सर्पिर्मेभूयादित्याशासनमित्यर्थः।जासिनि·जसुमोक्षणइतिदैवादिकस्यनग्रहणञ्जासीतिनिर्देशाद्धिंसायामित्युक्तेश्च·निप्रोपसृष्टोहनोनिप्रहणःशब्दपरत्वेपिसोऽत्रत्वाद्धनेरितिणत्वम्·चुरादिरिति·घटादेस्तुनग्रहणन्दीर्घनिर्देशात्·क्राथनमिति·घटादेःक्रथेःक्राथेतिनिपातनाद्वृद्धिरितिवृत्तिः।परेतुएतत्सूत्रप्रामाण्यान्नटसाहचर्याच्चायमपिचुरादिर्बोध्यस्तस्याकृतिगणत्वात्·निपातनस्यशेषषष्ठीसन्नियोगशिष्टत्वे कर्मत्वेनविवक्षायाञ्चौरस्यक्राथनमित्यस्यानापत्तिः। सामान्येननिपातनेचिण्णमुल्विषयेक्रथङ्कथमित्यादेःक्रथयतीत्यादेश्चानापत्तिरित्याहुः·समर्थयोरिति·समपर्यायसंशब्देनसमासःशकन्ध्वादित्वात्पररूपम्वा·ब्राह्मणपणनमिति·आप्प्रत्ययोवैकल्पिकत्वान्नहतः।उदाहरणेस्तुतावेवेतिनियमादपिन·दिवस्त·कर्मणिषष्ठीस्यादिति·शेषइतित्वत्रनसम्बध्यते।व्याख्यानात्·अतएवद्वितीयाब्राह्मणइतिसूत्रङ्गामस्यतदहःसभायान्दीव्येयुरित्यत्रनित्यंषष्ठीप्राप्तौद्वितीयार्थमितिभाष्येउक्तम्·तद्ध्वनयन्तिउ·न्नमुदाहरति·शतस्यदीव्यतीति·यद्यपिपूर्वसूत्रेदिवम्पठित्वातदर्थस्येतित्यक्तुंशक्यतेतथापियोगविभागउत्तरार्थः शेषइत्यस्यासम्बन्धार्थश्च· विभाषोप·अत्रापिशेषइतिनसम्बध्यते· तदर्थस्येतिचवर्त्ततेनेनदाह·पूर्वयोगेति·अतएवेयम्प्राप्तविभाषेतिनचेतिसूत्रेभाष्येस्पष्टम्·कृत्वोर्थशेषेकिमिति·दिवस्तदर्थस्येत्यादिनाविच्छेदादधिकरणकारकेएवषष्ठीविधानंयुक्त

का॰
ग्रा॰शे॰
२४

धिकारेद्वितीयाषष्ठीविषयेप्रतिषेधोवक्तव्यः।दक्षिणेनग्रामन्दक्षिणतोग्रामस्येतिप्रकृतसूत्रस्थभाष्येणएनपाद्वितीयेतिसूत्रंषष्ठ्यतसर्थेत्यतःआगितिचसूचितम्।अन्यथासौत्रक्रमत्यागेन्याय्यविपरीतपूर्वनिपातकरणेचबीजानापत्तिः अतएवकरणेचेतिसूत्रेद्वितीयासमुच्चयोनेत्याहुः करणेचस्तो॰करणेतृतीयायाःसिद्धत्वेनपक्षेपञ्चम्यर्थमिदम्॰चकारस्तृतीयान्यतरस्यामित्यनुकर्षणार्थः।षष्ठीतुगापोष्टगितिवत्॰अद्रव्येति॰द्रव्यभिन्नवचनेभ्यइत्यर्थः।द्रव्यपदेनात्रसर्वनामपरामर्शयोग्यंलिङ्गनिरूपितविशेष्यत्वास्तोकशब्दोयद्धर्मावेशाद्द्रव्येस्तोकव्यवहारस्तद्धर्मपरःसचधर्मोऽल्पत्वादिशब्दप्रवृत्तिनिमित्तमेव।शुक्लादिवच्चैते।धर्मवचनाअपि।करणत्वञ्चपरम्परयाईदृशार्थेएवंचसाधुत्वंसूत्रवलादितिस्पष्टमलुगुत्तरपदेइत्यत्रकैयटे॰करणेकिम्॰स्तोकम्पचति।असत्वभूतफलसमानाधिकरणत्वादत्रस्तोकशब्दस्यासत्ववचनत्वमितिदिक्॰दूरान्ति॰अत्रदूरान्तिकार्थैःषष्ठ्यन्यतरस्यामित्यतस्समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्त्येवाथोधिकारात्पञ्चम्यासिद्धेचकारोव्यवहितत्तृतीयासमुच्चयार्थोव्याख्यानादित्याह॰चादित्यादि॰प्रातिपदिकार्थमात्रइति॰व्याख्यानादितिभावः॥ इतिपञ्चमी०॥षष्ठीशेषे॰शेषउक्तादन्यः।सचतत्तद्रूपेणस्वत्वादिःसम्बन्धत्वेनरूपेणच॰कारकविभक्तीनाङ्क्रियाजनकत्वसमानाधिकरणकर्तृत्वादिशक्तिरूपेणबोधकत्वन्तत्रापितन्मूलकेसम्बन्धेविवक्षितेषष्ठीतदाह॰कारकेति॰स्वस्वामिभावादिरिति॰स्वत्वस्वामित्वसमूहःसम्बन्धइत्यन्यत्रविस्तरः।एवंसर्वत्रबोध्यम्॰षष्ठ्यर्थस्यसंसर्गविधयैवभानम्॰कारकविभक्तिभ्योपिक्रियाकारकभावस्यसंसर्गविधयाभानमित्युक्तम्॰सम्बन्धमात्रविवक्षायामिति॰सम्बन्धत्वेनभानेइत्यर्थः यत्राक्रियाकारकभावमूलकसम्बन्धस्यैवविवक्षायान्नतुतद्विवक्षायामित्यर्थः॥कर्तुरपितथाविवक्षाक्तस्यचवर्तमानइतिसूत्रेछात्रस्यहसितमित्यादौभाष्येस्पष्टा॰संयोगसम्बन्धावच्छिन्नाधारस्यनतथाविवक्षाअतएवघटवद्भूतलमितिप्रयोगसाधकम्मतुप्सूत्रेऽस्मिन्नितिचरितार्थमितितत्रैवभाष्येस्पष्टम्॰लोहितोष्णीषाइत्यादावपिसप्तम्यर्थेबहुव्रीहिर्बोध्यः।एधोदकस्येति॰एधः॰कर्तृकर्त्तावा॰दकस्योदकस्येत्यर्थः एधशब्दोऽदन्तः पुल्लिङ्गः कारकइतिसूत्रेभाष्येप्रयुक्तः।एधाःपश्यानीति।सान्तःक्लीबोपि।हेतौद्योत्यइति॰हेताविति वर्त्तते।हेतुहेतुमद्भावेनेतरान्वयेइत्यर्थः।तेनान्नंहेतुम्पश्यत्यादौन॰षष्ठीति॰हेतुवाचकादित्यर्थः।निमित्तेत्यादि॰निमित्तादिप्रयोगेतेभ्यस्तत्समानाधिकरणशब्देभ्यश्चेत्यर्थः।किन्निमित्तमितिप्रथमान्तन्द्वितीयान्तञ्च।प्रायग्रहणादिति॰एवञ्चषष्ठीहेतुप्रयोगे।

राम
२४

नासङ्गतिरितिभावः। एवञ्चतदर्थकारभ्यशब्दयोगेपिपञ्चमीयथाऽवीचिमारभ्यमेरुपृष्ठपर्यन्तम्भूलोकोमेरुपृष्ठादारभ्यध्रुवपर्यन्तङ्ग्रहनक्षत्रतारागणाचित्रितोन्तरिक्षलोकइतिपातञ्जलभाष्यप्रयोगे· प्रभृतीत्यस्यचावधिमादायेत्यर्थः। आरभ्येत्यस्यैतदर्थकतापि। अवधौचपञ्चम्यन्तार्थस्याभेदेनान्वयः। तद्विशेषणत्वेपिनद्वितीया। प्रभृत्यर्थयोगेपञ्चमीतिभाष्यकृद्बोधितवचनात्· आरभ्येत्यस्यगृहीत्वेत्यर्थेनावीचिमारभ्येत्यादौद्वितीया· वस्तुतोऽवधित्वन्तस्यसमभिव्याहृतपदार्थनिरूपितङ्गम्यमानक्रियापेक्षमित्यपादानत्वादेवात्रपञ्चमीसिद्धा कार्त्तिकीतोविभक्ते· अतएवकार्त्तिक्यवधिकेआग्रहायणीघटितेमासेकार्त्तिकीमादायगतेऽऽग्रहायणीतिबोधः। भवात्प्रभृतिआरभ्यवेत्यत्रभवकालाद्विभक्तेः। अतएवभवावधिकेमरणान्तेकालेभवकालमादायहरिःसेव्यइतिबोधः। एवमन्यत्राप्यूह्यमित्यलंविस्तरेण· ज्ञापकादिति· पञ्चम्यन्तेनसमासविधानाज्ज्ञापकादित्यर्थः। अयम्भावः परस्परसाहचर्यात्तत्रापपारीवर्जनार्थौकर्मप्रवचनीयावेवतद्योगेपञ्चम्यपाङ्परिभिरितिवचनाल्लक्षणप्रतिपदोक्तपरिभाषयापपरिनिमित्तकसुबन्तस्यैवग्रहणाच्चपञ्चम्येवसिद्धः समासस्तत्साहचर्यादुक्तपरिभाषयाचाञ्चूत्तरपदेनापितन्निमित्तपञ्चम्येवसिद्धः समासइतिव्यर्थन्तद्बहिःशब्देनपञ्चम्यन्तेनसमासविधानद्वारातद्योगेपञ्चम्याअपिज्ञापनार्थमिति। इदमपपरिबहिरितिसूत्रेभाष्येस्पष्टम्। पञ्चमीति· सापीत्यर्थः। तेनकरस्यकरभोबहिरितिसिद्धम्· प्रतिनिधिप्र· यस्मादितिपञ्चम्यर्थः सम्बन्धः। अस्मादेवनिपातनात्षष्ठ्यर्थेपञ्चमी। प्रतिनिधिप्रतिदानशब्दौकर्मकिभावल्युडन्तौ। प्रतिनिधिप्रतिदानेयत्सम्बन्धिनीततःकर्मप्रवचनीययुक्तात्पञ्चमीत्यर्थः। प्रतिनिधिःसदृशःप्रतिदानन्दत्ततुल्यमूल्यस्यवस्तुनःप्रत्यर्पणम्· कर्त्तृवर्जितमिति· कर्त्तृसञ्ज्ञारहितमित्यर्थः ऋणात्वंवस्तुसन्निमित्तन्नतुतृतीयावाच्यकोटिनिविष्टम्· हेतुभूतमिति· तेनकरणत्वविवक्षायान्तृतीयैवेतिभावः। विभाषागुणे· योगविभागादिति· बाहुलकम्प्रकृतेस्ततुदृष्टेरित्युक्तवार्त्तिकप्रयोगाद्गुणेऽस्त्रियामितिप्रायिकमित्यन्ये· धूमादिति· धूमपदस्वज्ञानेऽग्निमत्पदंस्वज्ञानविषयेलाक्षणिकम्बोध्यम्· समुच्चयार्थमिति· स्पष्टञ्चेदम्भाष्ये एतेनान्यतरस्यामङ्गीकारइत्यर्थकम्पदद्वयमेतदित्यपास्तम्· विकल्पविषयेप्यर्थासङ्गतेश्च· परेतुद्वितीयासमुच्चयेनफलंविनावातंविनावर्षमित्यादावृतेशब्दयोगइवततोऽन्यत्रापिदृश्यतइत्यनेनद्वितीयासिद्धेः। अतएवभाष्येद्वितीयासमुच्चयोनोक्तः। पञ्चम्यात्र

अथमः प्रकाशः। प्रग्रहणात् तदधिकरणमपादानमित्यर्थः। प्रभवो जलमूले स्याज्जन्महेतौ पराक्रमे ज्ञानस्य चादिमस्थाने इति विश्वः। प्रकाशत इत्यस्य योगे तु न प्रथ-
म प्रकाशार्थत्वाभावान्नदाह· तत्र प्रकाशत इत्यर्थः· इति· ल्यब्लोप इति· ल्यबन्तशब्दाज्ज्ञाने इत्यर्थः। कर्मणीति प्रत्यासत्त्या ल्यबन्तधात्वर्थस्येति भावः। प्रासादादिति· फले-
भ्यो यातीत्यत्रैव बोधप्रक्रिया आजघ्ने विषमविलोचनस्य वक्ष इत्यत्र कर्मणः शेषत्वविवक्षया षष्ठी· वक्ष इत्यस्य प्राप्येति शेषः। गम्यमानापीति विशिष्य तद्वाचकश-
ब्दानुपात्तापीत्यर्थः। कस्मात्त्वमित्यादौ फलेभ्यो यातीत्यत्रैव बोधप्रक्रिया· अन्येत्यर्थेति· तदर्थश्च भेदवान्। अतएव घटाद्भिन्न इत्यादिसिद्धिः· परे तु ध्रुवमिति सूत्रेऽ-
पायशब्देन भेदस्यापि ग्रहणम्· पञ्चमी विभक्ते इत्यत्र विभागार्थकविभक्तपदेन भेदस्यैव व्याख्यानात् भिदिर्विदारणे इत्यत्र भेदज्ञानविषयत्वमपि विदारणम्
एकत्वेन गृहीतस्य तथा बोधे बुद्धिविदारणस्य तत्रापि सत्त्वात्· अतएव घटाभेद इति सिद्धम्· तद्योगेप्यपादानत्वात् तस्यैव सम्बन्धत्वेन विवक्षायां घटीयो भेद इत्यपि·
अन्यशब्दस्याक्रियात्वात्तद्योगे एतद्विधानम्· अतएव घटः पटो नेत्यादौ न पञ्चमी· नञो भेदवदर्थकत्वेपि अक्रियात्वात्· घटादेक इत्यादि त्वसाध्वेव अतएवेतरग्र-
हणञ्चरितार्थम्· अतएव भाष्येऽर्थग्रहणन्नोक्तमित्याहुः। आराद्दूरसमीपयोः। एतद्योगे दूरान्तिकार्थैरिति प्राप्तम्· नन्वयन्देशवाचीन दिक्शब्दोऽतत्राह· दिशि
दृष्ट इति· शब्दग्रहणादिति भावः। ते च रूढ्यादिग्विशेषवाचकाः पूर्वादय एव गृह्यन्ते नैन्द्रीककुवादयो व्याख्यानात्· अवयववाचीति· तद्वाचिपूर्वादियोगेऽवयवि-
वाचकान्नेत्यर्थः। ज्ञापकस्य सजातीयापेक्षत्वात्· अतएवास्मादयम्पूर्वं भागः कायस्येति सिद्धम्· अवयवे पूर्वत्वन्त्ववयवान्तरापेक्षया प्रथमकालिकोत्पत्तिकत्वे-
न बोध्यम्· अञ्चूत्तरपदस्येति· दिक्शब्दसाहचर्येण तस्य दिग्वाचकस्यैव ग्रहणम्· तेन सध्र्यङित्याद्यर्थेन्तन्नेति भावः। बाधितुमिति· परत्वात्प्राप्तामित्यादिः। यदि
तु षष्ठ्यतसर्थेत्यत्र प्रत्ययग्रहणन्तस्य श्रूयमाणप्रत्यये एव प्रवृत्तिस्तदेदम्मास्त्विति तत्वमिति भाष्ये स्पष्टम्· दक्षिणाग्रामादिति· दक्षिणस्यान्दिशीत्यर्थे दक्षिणा-
दाजाहि च दूरे इत्याजाही। षष्ठ्यतसर्थेत्यस्यापवादः। प्रभृतियोगे इति· प्रभृत्यर्थयोगे इत्यर्थः। अपादाने पञ्चमीति सूत्रे यतश्चाध्वकालनिर्माणन्ततः पञ्चमी का-
र्त्तिक्या आग्रहायणी मासे इति वार्त्तिकप्रत्याख्यानायेदमत्र प्रयोक्तव्यं स न प्रयुज्यते कार्त्तिक्याः प्रभृत्याग्रहायणी मासे इति भाष्येण प्रभृतिशब्दाभावेपि तदर्थ।
सत्तामात्रेण पञ्चमीत्यर्थकेन प्रभृत्यर्थयोगे पञ्चमीति वचनसत्त्वस्य भगवता बोधितत्वादन्यथा प्रभृतिशब्दाभावे पञ्चम्यर्थवचनावश्यकत्वेन तत्प्रत्याख्या।

णालकारः सार्थेन त्यज्यते देवदत्त इत्यर्थः। धावत इति· क्रियाविशिष्टस्याप्यश्वस्य प्रकृतधातूपात्तगत्यनावेशाद्धावनस्याविवक्षणाद्ध्रुवत्वम्वोध्यम्· जुगुप्से
त्यादि· जुगुप्सादीनां यद्विषयकत्वेन विवक्षा तदपादानम्· तस्यैव विषयस्य क्रियाजनकत्वरूपकारकत्वेनाविवक्षायां सम्वन्धित्वेन च विवक्षायाम्पापस्य जुगुप्सत
इति षष्ठी भवत्येव सत्यभिधाने· एवमुत्तरसूत्रेष्वपि वोध्यम्· एषान्धातूनां सार्थपूर्वकवौद्धविश्लेषजनकनिवृत्तिलक्षणाया सूत्रेणैव सिद्धेदं वार्तिकमुत्तरसूत्राणि च।
प्रत्याख्येयानि इति भाष्ये स्पष्टम्· भयम्भीत्राणत्रासस्तदाह· भयार्थानामिति· हेतुतृतीयापवादोयम्· · अरण्ये इति· भयाद्यर्थानां योगे कारकमपादानमित्यर्थेऽविशेषात्स
र्वसञ्ज्ञापवादोयं स्यादिति भावः। पराजेः। असोढो ग्लानिविषयः एवञ्च पराजेरकर्मकत्वे उदाहरणान्तरमाह· ग्लायतीत्यर्थ इति· अभिभवतीति· तिरस्कारानुकूलो व्यापा
रो धात्वर्थ इति भावः। प्रवृत्तिविघात इति· भक्षणसंयोगादिजनकव्यापाराभावानुकूलो व्यापार इत्यर्थः। ईप्सित इति· वारणार्थधात्वर्थफलाश्रय इत्यर्थः। उदाहरणे च त
द्धात्वर्थव्यापारजन्यसँय्योगादिरूपफलाश्रयत्वाद्यवानामपादानत्वमीप्सित इत्यनेन प्रधानाप्रधानान्यतरव्यापाराश्रयमात्रस्याक्षेपः। कर्मलक्षणे तु तमप्ग्रहणात्प्रकृ
तधात्वर्थप्रधानभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयस्य ग्रहणमिति भावः। अन्तर्द्धौ· अन्तर्द्धिरन्यकर्तृकस्वकर्मकदर्शनाभावानुकूलो व्यवहितदेशस्थितिरूपस्तद्घ
टकं यत्कर्तृकदर्शनाभावमिच्छति तदपादानमित्यर्थस्तत्फलितमाह· व्यवधाने सतीति· येनेत्यत्र कर्तृकर्मणोरिति षष्ठी न सौत्रत्वात्· आत्मन इति प्रत्यासत्तिलभ्यम्·
मातुर्निलीयत इत्यादावाक्षेपलभ्येच्छा वोध्या· चोरानिति· चोरकर्मकदर्शनेच्छाभाव इति शाव्दोऽर्थः। स च चोरकर्तृकस्वदर्शनाभावायेति प्राप्तिः। इच्छामात्रस्याक्षेपलभ्य
त्व इव विशिष्टस्याक्षेपलभ्यत्वेऽपि स्यादिति भावः। प्रकृते नान्तर्द्धिरिति न दोषः। येनेत्यस्याभावे हि स्वकर्मकदर्शनाभावं य इच्छतीत्यर्थे कर्तुरेव स्यादतस्तत्· इच्छतिग्रह
णाद्विमिति· अन्तर्द्धौ सति यत्कर्तृकदर्शनस्याभावस्तदपादानमित्यर्थोऽस्त्विति भावः। सत्यपीति· अदर्शनेच्छया तदनुकूलव्यापारकरणे दैववशाद्दर्शने सत्य
पीत्यर्थः। अन्यथा यत्र दर्शनाभाव एव तत्रैव स्यादिति भावः। नियमेति· उपयोगशव्दस्य तत्रैव रूढेः। नियमो ब्रह्मचर्यादिः। नटस्येति· नटजन्यं श्रवणमिति वोधात्कार
कत्वन्नियमपूर्वकविद्यावकृलाभावान्नेत्युत्तरम्· जनिक· प्रकृतिरुपादानकारणम्· ब्रह्म च मायाशवलञ्जगदुपादानकारणम्· वृत्तौ हेतुपदमप्युपादानकारणप
रमेवेति वोध्यम्· विभाषेत्येव सिद्धे इदमपादानत्वेन वोधनार्थम्· तत्र हि गुणेऽस्त्रियामिति प्रायिकं वाहुलकम्प्रकृते स्तनुदृष्टेरिति वार्तिकप्रयोगात्· भुवः प्र· प्रभवना।

पान्तरावेशाविवक्षणादित्यर्थः तस्मादपायेगतिविशिष्टेसतियद्ध्रुवमवधिभावोपगमाश्रयत्वेसतितदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रय।
न्तदपादानमितिसूत्रार्थः त्रासादेरवधित्वोपयोगित्वाश्रयेणाशङ्का वृक्षात्पर्णमित्यादौतस्यासत्वान्नतदुपयोगित्वन्नस्य प्रकृतेतुविद्यमानस्यापितस्याविव
क्षितत्वान्नतदुपयोगित्वन्तस्येत्युत्तरम्· ध्रुवमपायइतितुवृक्षस्यपर्णम्पततीत्यादौवस्तुतस्तस्यपर्णद्वारापातजनकत्वात्प्राप्तापादानत्ववारणाय· एवञ्चा
पायेइतिकारकेइत्यस्यक्रियाजनकत्वेनविवक्षितइत्यर्थेतात्पर्यग्राहकम्बोध्यम्· ध्रुवग्रहणन्तुकारकान्तराणामिवापादानस्यावधिभावोपगमातिरिक्त
व्यापाराश्रयत्वाभावबोधनायेत्याहुः।अपादानत्वशक्तिश्चप्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेति अपादानसमभिव्याहारेविभागोपिधात्व
र्थइतिबोध्यम्·एवञ्चवृक्षात्पततीत्यादौतदपादानकविभागपूर्वकः संयोगः पर्णवृत्तिरितिबोधः।वृक्षाद्भूमिम्पततीत्यादौवृक्षापादानकविभागपूर्व
कः संयोगानुकूलोव्यापारइतिबोधः परस्परस्मान्मेषावपसरतइत्यादौमेषपदोपात्तयोरेवक्रियाश्रयत्वात्कर्तृत्वम्परस्परपदोपात्तयोरेवविभागाश्रय
त्वादपादानत्वम्·मेषपदोपात्तेतदविवक्षणात्प्रयोगानुसारित्वाद्विवक्षायाः।विभागपूर्वकम्पृष्ठतोगमनंह्यपसरणम्·आत्मानमात्मनेत्यादावन्तष्कर
णाद्युपाधिकृतभेदवत् शब्दरूपोपाधिकृतभेदाग्रहणेमानाभावात्· शब्दालिङ्गितार्थभानस्यैवसत्वाच्चेत्यन्यत्रविस्तरः· यत्त्वपसरतइतिस्थधातु
नागतिद्वयस्याप्युपादानादेकनिष्ठाङ्गतिम्प्रतिइतरस्यापादानत्वमविरुद्धमिति· तन्न· वस्तुतस्तन्निष्ठव्यापारयोर्भेदेपिस्थधातुनानिवृत्तभेदस्यैवापाय
स्योपादानादुभयोरपितत्क्रियाश्रयत्वेनपरत्वात्कर्तृत्वापत्तेः।अतएवैकशेषसूत्रेभाष्ये उक्तम्·नवैवतिङन्तान्येकशेषारम्भम्प्रयोजयन्तिक्रियापृथ
कत्वादिति धनुषाविध्यतीत्यत्रनिःसरच्छरजन्यवेधनार्थत्वाद्व्यधेरपादानत्वाकरणत्वोभयप्राप्तौपरत्वात्करणत्वम्बोध्यम्·ग्रामादायातीति·आख्याते
विभागपूर्वकोत्तरदेशसंयोगानुकूलोव्यापारोऽर्थः।वृक्षन्त्यजतीत्यादौव्यापारव्यधिकरणविभागस्यैवधात्वर्थत्वेनकर्मसञ्ज्ञयापादानत्वस्यबाधः
स्यन्देस्तुनविभागोर्थइतिवृक्षःस्यन्दतइत्येव·चलतेस्त्वासनाच्चलितइतिप्रयोगादस्त्येवविभागार्थत्वम्· सार्थाद्धीयतेइत्यत्रसार्थस्यधात्वर्थप्रधान
व्यापाराश्रयत्वेप्यपादानेचाहीयरुहोरितिज्ञापकात्कर्मप्रत्ययान्तहीयमानधातुयोगेपादानत्वम्·कर्मसञ्ज्ञायाञ्चकर्तृपदंस्वतन्त्रोपलक्षणमितिकर्म

ष्योत्तरेप्रयोगात्।मन्यकर्मणितिरस्कारइति·अनादरोनादराभावमात्रमपितनञोऽधर्मोदाविवप्रतिपक्षवाचित्वात्तिरस्कारइतिभावः।तत्रानादरइतिमन्यकर्मविशेषणन्तद्योतकंयत्कर्मेत्यर्थः।तेनयुष्मच्छ्वाच्चतुर्थीन·तिरस्कारश्चव्याख्यानादपकृष्टनिरूपितोपमेयत्वस्याप्यभावरूपउपमेयेऽत्रगृह्यतेनत्वपकृष्टसादृश्यरूपसत्वप्रतीतिश्चनञ्समभिव्याहारएव·तृणतुल्यमपिनमन्येइत्यर्थः।तृणायमत्वारघुनन्दनोपीत्यादौनञोऽध्याहारस्तदाह·नत्वान्तृणमिति·।कर्मात्रचतुर्थ्यर्थः।श्वनेति·नतुयकाव्याख्यानादितिभावः।श्वन्नूपलक्षणनेनलिङादावपिभवतितद्धनयन्नाह·तानादिकयोगेनेति·नौकाकेति·भाष्येयेषुप्राणिषुनेष्यतेतेनावादयोभविष्यन्तिइतियेष्वितिवहुवचनेनह्यनुदाहरणवलेनचेष्वेवानिष्टनिर्णयइतिभावः।गत्यर्थकर्म·कर्मात्रचतुर्थ्यर्थः।गत्यर्थेतिकिम्·ओदनम्पचति·कर्मणीतिकिम्·अश्वेनगच्छति।चेष्टायाङ्किमिति·धात्वर्थस्यक्रियारूपत्वात्प्रश्नः शारीरक्रियायाएवग्रहणमित्युत्तरम्·पन्थानमिति·।अध्वशब्दोऽर्थपरोव्याख्यानादितिभावः।अधिष्ठितइति·शब्दप्रयोगसमकालिकगन्तृव्यापारजन्यफलाश्रयइत्यर्थः।अध्वशब्देनगन्तृप्राप्योऽर्थउच्यतेतेनगंतृयुक्तस्त्रियास्त्रिपङ्गच्छतीत्यादौन·स्पष्टञ्चेदम्भाष्ये·उत्पथादिति·उत्पथंसन्त्यज्येत्यर्थः।इष्यतइति·नत्वाक्रान्तइत्यर्थः।उत्पथेनेति·गन्तुमशक्तइतिशेषः इतिचतुर्थी· ॥ ध्रुवम्·ध्रुवंस्थिरम्।अपायोविभागजनकोव्यापारस्तदनाश्रयमितियावत्· विभागश्चनवास्तवसम्वन्धपूर्वकोवास्तवएव।किन्तुवुद्धिपरिकल्पितसम्वन्धपूर्वकोवुद्धिकल्पितोपि।माथुराःपाटलिपुत्रकेभ्यआढ्यतराइत्यादौवुद्धिकल्पितापायाश्रयेणैवभाष्येपञ्चमीसाधनात्·कर्तृवारणायध्रुवमिति।अन्यथाकर्तृसञ्ज्ञायाइयमपवादास्यात्·अपापविषयेयत्कारकन्तद्रूपक्रियाजनकन्तदपादानमित्यर्थसम्भवात्कर्तृसञ्ज्ञातुपचत्यादियोगेचरितार्थाः·हरिरप्याह·अपायेयदुदासीनञ्चलम्वायदिवाचलम्।ध्रुवमेवातदावेशादिति।स्पष्टञ्चेदङ्कैयटादौ·भाष्यानुसारिणस्तुएवंहित्रस्तादश्वात्पततितोधावतःपतितइत्यादौध्रुवत्वाभावादपादानत्वन्नस्यादित्याशङ्क्यध्रौव्यस्याविवक्षितत्वमत्र।यतःसतोप्यविवक्षाभवतीतिसमाहितम्भाष्येतदसङ्गतंस्यात्·त्वदुक्ताध्रुवत्वस्यपतधात्वर्थव्यापाराश्रयत्वस्यात्रासत्त्वेनसतोऽध्रौव्यस्याविवक्षेत्यस्यासङ्गतेः।सिद्धान्तेपित्वदुक्तध्रुवपदार्थकथनमेवोचितमितितदसङ्गतिश्चलोकसिद्धातिरिक्तेऽर्थेध्रुवशब्दस्यशक्तिकल्पनेगौरवञ्च·अतदावेशादित्यस्यहरिकारिका

क्रियार्थाक्रियेति· फलेभ्यो यातीत्यादौ फलकर्मकाहरणफलकं यानमिति बोधः यथा वाक्यार्थे वाक्यैकदेशप्रयोगस्थले प्रविश पिण्डीमित्यादौ तस्यैव पदस्य
सम्पूर्णवाक्यार्थे शक्तता तथास्य समुदायस्याहरणघटितोक्तार्थे शक्तिरेतच्छास्त्रबलात् स्थानिनइत्युक्तेः तत्प्रयोगेनेति बोध्यम्· अयमेवार्थोध्याहारः। नमस्कु
र्मो नृसिंहायेति· नमः स्वस्तीत्यनेन तु न सिद्धिः। उपपदविभक्तेरिति न्यायेन द्वितीयापत्तेः पिण्डीमित्यादावप्रयुज्यमानभक्षणक्रियाकर्मणि चतुर्थी वार
णाय क्रियार्थोपपदस्येति· तुमर्थात्· तुम्शब्देन तदर्थो लक्ष्यते सोऽर्थो यस्येत्यर्थः इति सूत्रेणेति· भाववेप्रत्यया वक्ष्यन्ते ते क्रियार्थायाङ्क्रियायामुपपदे
भविष्यतिस्युरिति तदर्थः। यागायेति· यागफलकं यानमित्यर्थः। उपपदविभक्तेरिति· वाचनिकमेवेदम्भाष्ये पठितमिति केचित्· क्रियाकारकयोः सम्बन्धो
ऽन्तरङ्ग· उपपदार्थेन तु यत्किञ्चित्क्रियाकारकभावमूलकः सम्बन्ध इति तन्निमित्ता विभक्तिर्वहिरङ्गेति अन्तरान्तरेणेति सूत्रे कैयटः अत्राहुः। एवं सति न
मस्यति देवानित्यादौ नमःपदार्थे क्रियाकारकभावेनैवान्वये परत्वाच्चतुर्थीमाशङ्क्यानेन वारणस्य भाष्योक्तस्यासङ्गतिः। एतेन प्रधानत्वात्क्रियायासम्ब
न्धनिमित्तकत्वेन बलवत्त्वमित्यपि परास्तम्· कारकविभक्तित्वञ्च क्रियाजनकत्वसमानाधिकरणकर्त्रादिषट्कान्यतमार्थकत्वम्· अन्याभिहितानुक्
तकर्त्राद्यन्यतमार्थत्वम्प्रथमायामपि। अभिहिते प्रथमेति वार्तिकस्वारस्यादतः प्रथमापि कारकविभक्तिरिति बोध्यम्· द्वावित्यादौ द्वित्वादेरिव देवदत्तः प
चतीत्यादावुभाभ्यामेकस्यैव कर्तृत्वस्य बोध इति न तद्वाधावृत्तिः नमस्करोति देवानिति उत्कृष्टनिष्ठो यः स्वनिष्ठापकृष्टत्वबोधस्तदनुकूलव्यापाररूपनम
स्कारफलस्य तादृशबोधस्याश्रयतया देवानाङ्कर्मत्वम्। स्वशब्देन प्रयोक्ताः नमःशब्दस्य साक्षात्प्रभृतिषु सूर्यादिषु वा पाठेन गतित्वात्सत्त्वम्· एकस्या एवोपपदविभ
क्तित्वे कारकविभक्तित्वे चायं न्याय इति तु न युक्तम्। नमस्यति देवानित्यत्रैतत्परिभाषोपन्यासपरभाष्यविरोधात्सहयुक्ते इत्यादिसूत्रस्थभाष्यविरोधाच्च· अ
लमितीति· अलमित्यनेन पर्याप्त्यर्थानाङ्ग्रहणम्व्याख्यानादित्यर्थः तत्र ज्ञापकमप्याह· तस्मै प्रेति· षष्ठ्या अपि साधुत्वे बीजम् सएषामिति· आशीर्विवक्षाया
मिति· आशीर्विषयत्वविवक्षायामित्यर्थः। स्वस्त्यर्थः कुशलम्मङ्गलं वा। स्वस्तियोगे चतुर्थ्या अवकाशः स्वस्ति जाल्मायास्तीति तत्त्वकथनम्· कुशलार्थैराशिषीत्य
स्यावकाशः स्वस्तिभिन्नाः कुशलार्थाः। स्वस्तिशब्दोऽनव्ययमपि। प्रतिगृह्णामि ते धेनुङ्कुटुम्बार्थे विशेषतः। स्वस्तिर्भवति मे नित्यं सुखञ्चानुत्तमन्तथेति· भवि।

क्रायेति·म्रियमाणस्वरूपेणावतिष्ठमानम्मोक्षं हरिः प्रयुङ्क्ते इत्यर्थः। प्रेरणायाभक्तासत्त्वेऽभावात्तस्यापिप्रेरणाजनकत्वेनकारकत्वम्बोध्यम्‌ अवश्यदेयत्वेनमोक्षेऽपिक्रणत्वम्बोध्यम्‌· प्रकर्षविवक्षायान्त्विति·फलाश्रयत्वेनविवक्षायामित्यर्थः· परत्वादिति· इदं सूत्रं विषयतयाक्रियाजनकत्वमात्रविवक्षायाञ्चरितार्थमितिभावः। पुष्यसम्प्रदानिकेच्छेतिचतुर्थीसमभिव्याहारेबोधः कुमार्यइवकान्तस्यत्रस्यन्तिस्पृहयन्तिचेत्यत्रक्रियासम्बन्धित्वमात्रविवक्षायांषष्ठी· अन्येतुभोगायेत्याध्याहृत्यकामायेतिविभक्तिविपरिणामेनवाव्याख्येयमित्याहुः। स्पृहधातुरिच्छामात्रवाचीफलावच्छिन्नेच्छावाचीचाद्येसम्प्रदानत्वमन्त्येकर्मत्वम्‌· ईप्सितत्वन्धात्वर्थजन्यफलाश्रयत्वम्‌· नतुफलस्यधात्वर्थत्वपर्यन्तमाग्रहः। कर्मसञ्ज्ञायानुयथानत्वाभस्तथोक्तम्‌ भार्यामीर्ष्यतीति· नात्रभार्याम्प्रतिकोपः किन्तुपरैर्दृश्यमानान्तान्नसहतेइत्येव। एवञ्चात्रनकोपजन्येर्ष्या किन्त्वन्यपुरुषदर्शनजन्येतिभावः। हरेः कोधद्रोहाभ्यामिच्छाविषयत्वाभावात्‌ क्रिययायमभीत्यनेननसिद्धिः नत्वकुपितः क्रुध्यतीतिभाष्येणप्ररूढकोपएवक्रोधइतिबोधनात्‌ कुपेस्तदर्थत्वाभावेननतद्योगेइदङ्कुप्यतिकस्मैचिदित्याद्यसाध्वेव· उपसृष्टयोरित्यस्यार्थमाह· सोपसर्गयोरिति· वैयाकरणनिकायेएव एतदर्थकत्वेनप्रसिद्धः·पूर्वसूत्रापवादोयम्‌ यदीयइति·यदीयशुभाशुभसम्बन्धीत्यर्थः। राधीक्ष्योः प्रश्नविषयपर्यालोचनमर्थः। कर्मणः। प्रश्नविषयस्यधात्वर्थेनोपसङ्ग्रहादकर्मकावेतौ· अतएवस्यन्राधोऽकर्मकादेवेत्युक्तेः कृष्णसम्प्रदानकशुभाशुभपर्यालोचनमर्थः। प्रत्याङ्भ्याम्‌· व्याख्यानात्प्रत्येकन्निमित्तत्वमित्याशयेनोदाहरति· गाम्प्रतिशृणोतीति· अनयोः प्रवर्त्तनापूर्वकोऽभ्युपगमोऽर्थः। तत्रविप्रस्यकर्त्तृप्रयोजकत्वेनहेतुत्वेप्राप्तेवचनम्‌· अनुप्रतीतिभिन्नम्पदंलुप्तपञ्चम्यन्तम्‌· गृणइतिश्नानानुकरणात्षष्ठी· शंसितुः शंसनविषयहर्षानुकूलव्यापारलक्षणम्प्रोत्साहनमनयोरर्थः पूर्वव्यापारस्येति· शंसनस्येत्यर्थः। प्रोत्साहयतीति· आश्रावयेत्यादिशब्दैरितिशेषः। श्रातायेति· करणस्यैवसम्प्रदानत्वेनभानमत्र। तद्व्यापारश्चदानरूपएवेतिबोध्यम्‌· तादर्थ्ये· तादर्थ्यमुपकार्योपकारकभावरूपः सम्बन्धः। यदातादर्थ्यस्यसम्बन्धत्वेनभानन्तदाषष्ठी गुरोरिदङ्कुर्वर्थमित्यत्रभाष्यस्पष्टम्‌· कॢपीतिसप्तमी। अर्थग्रहणाच्चात्र। सम्पत्तिरुत्पत्तिः कॢप्यर्थकधातुयोगेउत्पद्यमानार्थेवर्त्तमानाच्चतुर्थीत्यर्थः। हितयोगेच·चात्सुखयोगेपि। क्रियार्थोप· क्रियार्थः फलंयस्यतत्क्रियार्थन्तेनस्ववाचकंलक्ष्यतेक्रियाफलकार्थवाचकमुपपदंयस्येत्यर्थः सोऽर्थश्चप्रत्यासत्याक्रियारूपएव· स्थानिशब्दश्च

प्रयुज्यमानवाचीवैयाकरणानान्निकायेप्रसिद्धः·क्रियार्थे
क्रियोपपदत्वञ्चतुमुनादेरेवेत्याहुः।

व्यर्थमित्यपास्तमकिञ्च दे

का·
श·शे·
२०

यं सग्रहणं किम् तदस्नवेहि कर्मणा योऽभिप्रैति ब्राह्मणादिस्तस्यैव स्यात् कर्तृसञ्ज्ञात्वकर्मकविषये सावकाशा न च कर्तुः कर्तृत्वाभावे कथङ्गोः क
र्मत्वम्। कर्मसञ्ज्ञायाङ्कर्तृग्रहणस्य स्वतन्त्रोपलक्षणत्वात् अतएव सार्थाद्धीयते इत्यत्र कर्तुरपादानत्वेपि कर्मणि लकारः सिद्धः। ननु कर्मणेत्युक्तावकर्मक
क्रियोद्देश्यस्य सम्प्रदानत्वन्न स्यादत आह· क्रियेति· कर्मरहितक्रिययेत्यर्थः। सकर्मकेषु कर्मसञ्ज्ञा स्याद्बाधिकेत्याशयेनाह· पत्ये शेते इति न च दानादी
नान्तदर्थत्वात्तादर्थ्ये चतुर्थ्यैव सिद्धे किमनया सञ्ज्ञयेति वाच्यम्· दाशगोघ्नौ सम्प्रदान इत्यर्थत्वात्· तत्सम्प्रदानकन्दानमिति बोधार्थं तदावश्यकत्वाच्च
अतएव तादर्थ्ये चतुर्थ्या न्दानकर्मणो गवादेस्सम्प्रदानार्थत्वेपि दानक्रियायास्तदर्थत्वाभावेन चतुर्थ्यन्तार्थस्य दानक्रियान्वयानापत्तिरिति हेलाराजः।
तादर्थ्ये चतुर्थ्यैव सिद्धे चतुर्थी सम्प्रदान इति सूत्रं रुच्यर्थानामित्यादिविषये चतुर्थ्यर्थमिति भाष्यस्वरसम् पशुनेति· कर्मन्तृतीयार्थः सम्प्रदानन्द्वितीया
र्थः। एतच्च दानार्थकयजधातुविषयम्। पूजार्थत्वे पशोः करणत्वन्न्यायसिद्धम् इदञ्छान्दसमिति कैयटः। अन्यकर्तृक इति· अभिलष्यतिक
र्त्रपेक्षयान्यदभिलष्यतिकर्म तत्कर्तृक इत्यर्थः। यत्किञ्चिद्विषयकप्रीत्यनुकूलव्यापाराश्रयो भिलष्यतिकर्ता हरिर्भक्तिमभिलष्यतीति प्रत्यया
त्। यत्किञ्चिन्निष्ठप्रीत्यनुकूलः प्रीतिव्यधिकरणो यो व्यापारस्तदाश्रयो रोचतेः कर्त्रेति अभिलषते रुच्यर्थत्वाभावान्न तद्योगे सम्प्रदानत्वमिति भाव
स्तदाह· हरिनिष्ठेति· पथीति· न च प्रीयमाणपदाभावे सूत्रस्य क्रियाजनकत्वमात्रविवक्षायां सञ्ज्ञान्तराप्राप्तिविषये चारितार्थ्येन परत्वादधिकर
णसञ्ज्ञाया बाधसिद्धेः कथमेतदिति वाच्यम्· देवदत्तं रोचते इत्यस्याप्यापत्तेरित्याशयात् तत्सत्वेतु अस्य कर्मसञ्ज्ञापवादत्वान्न दोषः। गोपीस्मरा
दिति· श्लाघादेः स्तुत्यादिना बोधनमर्थः स्मरादिति हेतौ पञ्चमी स्तुत्यात्मानुरागङ्कृष्णम्बोधयतीत्यर्थः स्तुतिश्च कृष्णस्यैव एवं ह्नुत्या कृष्णं स्वानुराग
म्बोधयतीत्यर्थः। ह्नुतिः सपत्न्यादिभ्यः कृष्णस्यैव। एवं स्थित्याशपथेन च कृष्णं स्वानुरागम्बोधयतीत्यर्थः। यद्वा स्तुत्या ह्नुत्या च कृष्णं स्वसखीजनम्बोधा
यति स्थित्याशपथेन च कृष्णन्तम्बोधयतीत्यर्थः ज्ञीप्स्यमानपदे ण्यर्थकर्मणा प्रकृत्यर्थकर्मणश्च ग्रहणादित्यन्यत्र विस्तरः। स्तुत्यादिमात्रार्थत्वे कृष्णं
श्लाघते कृष्णं ह्नुते इत्येव ज्ञीप्स्यमान इति ज्ञानवचनाज्ज्ञपेः सन्नन्तात्कर्मणि शानच् धारेरु धृङ् अवस्थाने इति ण्यन्तस्य ग्रहणं व्याख्यानात्। भ।

राम
२०

तत्वेऽपरस्या अपि तद्व्यप्रकाशेनाक्षतेः।एकैवशक्तिः सम्बन्धाद्वयोपयोगिनी इतितुचिन्त्यम्· कर्मादिपदानाङ्कर्मत्वादिनतच्छक्तिरूपेणबोधकतयातयोर्भेदस्यैवौ
चित्यादितिमञ्जूषायांविस्तरः फलप्राप्तिरिति· तस्याश्चसत्याम्प्रयोजनाभावादेवनक्रियाप्रवृत्तिरितिफलप्राप्तिशब्देनतत्पूर्वकत्यागउच्यतेत्यागस्यचफलप्राप्तिर्व्या-
प्त्येत्यन्यत्रविस्तरः।नायातइति· अनेनफलाप्राप्तिरेवस्फुटमुच्यते· सहयुक्ते· पृथग्विनानानाभिरितिवत्सहेनेत्येवसिद्धेयुक्तग्रहणंशब्दविशेषानादरेण
र्थयोगेभवत्वित्यर्थमित्याह· सहार्थेनेति· अतएवक्वचिच्छब्दयोगम्विनापिभवतितदाह· विनापीति·न्यायसिद्धेऽर्थेलिङ्गमप्याह· वृद्धइति· सहार्थः सा
हित्यम् तच्चस्वसमभिव्याहृतक्रियादिसमानकालिकत्वक्रियादिमत्वम्।क्वचित्समानदेशक्रियावत्वम्· अतएवमाषवापोत्तरन्तत्रैवक्षेत्रेतिलवा-
पेतिलैः सहमाषान्वपतीतिभवति यद्यपिपुत्रेणसहागतइत्यादावागमनक्रियाकर्तृत्वादेवपुत्रात्तृतीयासिद्धा तथापिपुत्रेणसहस्थूलइत्याद्यस्यमु
ख्यमुदाहरणमितिभाष्येस्पष्टम्· अङ्गेन· अवयवेनइदंसन्निधानलब्धम्· अङ्गिनोऽवयविनः सूत्रेअङ्गशब्दोऽर्शआद्यजन्तोव्याख्यानादितिभावः।
अक्ष्णाकाणइति· यद्यप्यक्ष्येवकाणन्तथाप्यवयवधर्मस्यसमुदायेआरोपाच्छरीरेतदवच्छिन्नेचव्यवहारोनिरूढइतिबोध्यम्· यद्यपिकाणशब्दोऽक्षि
गतविकारवाचकएवतथापिद्वौविप्रावितिवदक्ष्णेतिप्रयोगस्यसाधुत्वमीदृशरीत्या ईदृशानांसाधुत्वेचेदमेवमानंषष्ठ्यपवादोऽयमित्याह· अक्षिस
म्बन्धीति· अङ्गविकारः किमिति· अङ्गग्रहणप्रयोजनप्रश्नः।अक्षिकाणमिति· प्रथमाम्बाधित्वात्रैवस्यात् लेशतोऽपिदर्शनसामर्थ्यहीनत्वङ्काणत्वम्॥
इत्थंशब्दः प्रकारमात्रपरः।प्राप्त्यर्थाद्भुवः कर्त्तरिक्तः कर्मविभक्त्यन्तेनेत्थंशब्देनभूतशब्दस्यसमासः।लक्षणशब्दः करणप्रधानः तस्यकर्मषष्ठ्यन्तेनेत्थम्भू-
तशब्देनसमासइत्याह· कञ्चिदित्यादि· जटाभिरिति· यद्यपिताभिस्तापसोज्ञानइत्यर्थेज्ञानक्रियायाङ्करणत्वादिदंसिद्धन्तथापिकरणत्वाविवक्षायांलक्ष्यलक्ष
णभावमात्रविवक्षायान्तृतीयार्थमिदम्।इत्थम्भूतस्ययत्रलक्षणवाचकात्पृथगुपस्थितिरेवतत्रैवानेनतृतीयातेनकमण्डलुपाणिञ्छात्रमद्राक्षीदित्या
दौकमण्डलुपदान्नतृतीयानचोत्पन्नायास्तृतीयायाः सुपोधात्वितिलुगितिवाच्यम्· कृतसमासेतस्याउत्पत्त्यासमासरूपप्रातिपदिकानवयवत्वा दितिकै
यटेस्पष्टम्कमण्डलुःपाणौयस्येतिबहुव्रीहिः।परेतुकमण्डलुपाणिशब्दादत्रतृतीयापत्तिःकमण्डलुयुक्तपाणिरूपस्यकमण्डलुपाणित्वस्यलक्षणत्वेनतस्यैवतद्वाचकत्वात्तदुक्तमनुले
क्षणइतिसूत्रेभाष्येसकृदसौकमण्डलुपाणिश्छात्रोदृष्टस्त
स्यतदेवलक्षणम्भवतीतितदे।

वेत्यस्यकमण्डलुपाणित्वमेवेत्यर्थः। कमण्डलोर्लक्षणत्वे हि स एवेति वदेत्। किञ्च तन्मध्यपतितन्यायेन तद्विशिष्टस्य प्रातिपदिकत्वेन तस्मात् तदनवयवत्वोक्तेर
नौचित्येन लुको दुर्वारत्वम्। अत एव नरम्मन्य इत्याद्यविजन्तस्योत्तरपदपरत्वाय पूर्वं सुपो लुकि उत्पन्नस्यामः सुपो धात्विति लुक् अम्विधिसामर्थ्येन वारित
इव एकाचो मिति सूत्रे भाष्ये इत्याहुः। सञ्ज्ञो· दैवादिकस्य जनेर्न ग्रहणन्तस्याकर्मकत्वादित्याह· जानातेरिति· कर्मत्वशक्तिरेवात्र तृतीयार्थः। हेतौ· हेतुरिह का
रणन्न शास्त्रीयः। तस्य कर्तृसञ्ज्ञाया अपि सत्त्वेन कर्तृतृतीययैव सिद्धेः। ननु लौकिकहेतुरपि करणमित्यत आह· द्रव्यादीति· आदिना गुणक्रिये। साधारणमि
ति· तज्जनकेपि वर्त्तत इत्यर्थः। करणन्तु क्रियाजनकमेवेति भावः। वैषम्यान्तरमाह·। निर्व्यापारेति· करणन्तु व्यापारवदेवेति भावः। एवञ्च करणत्वशक्तेर्भि
न्नैव हेतुत्वशक्तिरत्र तृतीयार्थ इति तात्पर्यम्· स्फुटप्रतिपत्तये करणे वैलक्षण्यमाह· करणत्वन्त्विति· हेतुहेतुमद्भाव एव तृतीयार्थः। दण्डव्यापारसत्त्वेपि।
क्रियाजनकत्वाभावान्न करणत्वम्· पुण्ये क्रियाजनकत्वेपि निर्व्यापारत्वान्न तत्त्वम्· फलमपीहेति· इहैतत्सूत्रोदाहरणे क्वचित्फलमपि हेतुत्वेन विवक्ष्यत इ
त्यर्थः। तस्यापि स्वज्ञानद्वारा जनकत्वात्। एतच्च प्रत्यय इत्यादि सूत्रेषु कैयटे स्पष्टम्॥ नन्वलं श्रमेणेत्यादौ क्रियावाचकपदाभावात् क्रियाया अप्रतीत्या
कथङ्करणत्वमत आह· गम्यमानापीति· श्रमेणेत्यादिपदजबोधविषयापीत्यर्थः। नतूच्चार्यमाणतद्वाचकपदजबोधविषयैवेति भावः। अलंशब्दो निषे
धार्थस्तदाह· साध्यन्नास्तीति· ननु साध्यमित्यर्थे ज्ञानेपि तस्य श्रमेणेति नामार्थत्वेन न क्रियात्वमत आह· इहेति· स्ववाच्यक्रियाम्प्रति स्वस्य करणत्वमित्य
र्थः· स्पष्टञ्चेदमिग्यण इति सूत्रे प्रविश पिण्डीमिति वाक्यार्थे वाक्यैकदेशप्रयोग इत्यादिना भाष्ये इति मञ्जूषायां विस्तरः· अशिष्टेति· अशिष्टानां सङ्कीर्णा
चाराणां यो व्यवहारः क्रियातद्बोधकप्रयोगप्रत्यासत्त्याय त्सम्बन्धेन व्यवहारस्य सङ्कीर्णाचारत्वन्तद्वाचकाच्चतुर्थ्यर्थे तृतीयेत्यर्थः· दास्येति· दासीसम्प्रदानकं
रतिफलकन्दानमिति बोधः॥ ※ ॥ इति तृतीया ॥ ※ ॥ दानस्येति· दाधात्वर्थस्येत्यर्थः। इदमुपलक्षणङ्क्रियामात्रस्य· कर्मणेति· सम्बद्धुमिति शेषः· अभि
प्रैति· इच्छति कर्मणा सम्बन्धश्च सत्त्वादिरूपः सम्प्रदानत्वशक्तिमान् सम्प्रदानचतुर्थ्यर्थः। स एवोद्देश्य इत्युच्यते· क्रियाकारकभावः सम्बन्धश्च तदा।
र्थः· विप्रसम्प्रदानकन्दानमिति बोधः। कर्मणेति किम्· तदभावे हि कर्मणोप्युद्देश्यतयान्तरङ्गत्वात्तस्यैव सञ्ज्ञा स्यात् कर्मसञ्ज्ञायास्तु पर्यायो भविष्यति

